For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जैमिनिनाऽप्युक्तम् 'कार्येऽर्थे वेदः प्रमाणम्'। 'चोदनालक्षणोऽर्थो धर्म' इति। अतश्च निरवशेषपदार्थपरिज्ञानातिशययोगाद्धर्मप्रवचनसामर्थ्यं सिद्धवदुपादाय। प्रभो इत्यामन्त्रणम्। हे प्रभो धर्माभिधानशक्त त्वमनुब्रूहि धर्मानिति। एवमनया त्रिश्लोक्या धर्मान् पृष्ट उत्तरेण श्लोकेन प्रतिजज्ञे ॥ ३ ॥

स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ॥
प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति ॥ ४ ॥

स मनुरमितौजास्तै**र्महर्षिभिर्महात्मभिः पृष्टस्तथा तान् प्रत्युवाच। श्रूयतामिति। तथा** तेन प्रागुक्तेन प्रकारेण। पृच्छ्यमानवस्तुप्रश्नविधिश्च प्रकारवचने तथाशब्देऽन्तर्भूतः। तेनायमर्थस्तथापृष्टस्**तान्** धर्मान् पृष्टः **प्रत्युवाच**। अथवा तथेतिप्रकारमात्रमाचष्टे। पृष्ट इति पूर्वश्लोकात्पृच्छ्यमानविशेषो बुद्धौ विपरिवर्तत एव। तेन यत्पृष्टस्तत्प्रत्युवाच 'श्रूयतामिति' प्रश्नप्रतिवचनयोरेककर्मता सिद्धा भवति। तदा च तथाशब्दः श्लोकपूरणार्थः। आद्ये तु व्याख्याने तथाशब्दोपात्तैव प्रश्नप्रतिवचनयोरेककर्मता। सम्यक्शब्दः प्रतिवचनविशेषणम्। सम्यक् प्रत्युवाच। प्रसन्नेन मनसा न क्रोधादियोगेन। **अमितौजा** अक्षीणवाग्विभवोऽमितमनन्तमोजो वीर्यमभिधानसामर्थ्यमस्येति। महात्मतया महर्षीणां धर्मप्रष्टृत्वं[1] महर्षित्वं चाविरुद्धमित्याह। **महर्षीनिति**। 'परार्थकारी सततं महात्मे' त्युच्यते। तेन यद्यपि स्वयं विद्वांसोऽधिगतयाथातथ्या अन्यथा महर्षित्वानुपपत्तेस्तथाऽपि परार्थमपृच्छन्। **मनुः** प्रख्याततरप्रमाणभावः। एतेन यदुच्यते तल्लोकेनाद्रियते। प्रत्ययतोऽयं समुपास्यतेऽतः शास्त्रावतारार्थमुपाध्यायीकुर्मः। अस्माभिश्च पृच्छ्यमानः प्रमाणतरीकरिष्यते जनेनेति[2]। अत **एवार्च्य तान्** सर्वानित्यर्चनमविरुद्धम्। अन्यथा शिष्यस्योपाध्यायात्कीदृश्यर्चेति। अर्चयतेराङ्पूर्वस्य ल्यबन्तस्य रूपमार्च्येति। पाठान्तर 'मर्चयित्वा तानिति'।

अत्र यथोच्यते। यदि **मनुना**ऽयं ग्रन्थः कृतः परापदेशो न युक्तः स तैः पृष्टः **प्रत्युवाचेति**। अहं पृष्टः प्रत्यब्रवमिति न्याय्यम्। अथान्यतर एव ग्रन्थस्य कर्ता मानवव्यपदेशः कथमिति। तदचोद्यं प्रायेण ग्रन्थकाराः स्वमतं परापदेशेन[3] ब्रुवते। अत्राह 'अत्र परिहरन्तीति नैवमहं तैः पृष्ट इति'[4]। यो यः पूर्वतरः स स प्रमाणतरो लोके नत्वेव नाभ्युपगम्यते। 'तत्प्रमाणं बादरायणस्येति'। अथवा भृगुप्रोक्ता संहितेयं। **मानवी** तु स्मृतिरूपनिबद्धेति मानवव्यपदेशः। प्रत्युवाच तान्महर्षीन् किं तद्यदहं पृष्टस्तत् श्रूयतामिति'॥ ४ ॥

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ॥
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ५ ॥

क्व अस्ताः क्व निपतिताः। शास्त्रोक्तनिपातितधर्मान् पृष्टस्तानेव वक्तव्यतया प्रतिज्ञाय जगतो व्याकृतावस्थावर्णनमप्रकृतमपुरुषार्थं च। सोऽयं सत्यो जनप्रवादः 'आम्रान् पृष्टःको-

१ फ-धर्मशब्दत्वं; धर्मप्रष्टत्वं धर्मवृष्टत्व । २ फ-अनेनेति । ३ ड-परोपदेशेन । ४ ख-एवमिह स तैः पृष्ट इति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विदारानाचष्ट इति । न चास्मिन् वस्तुनि प्रमाणं न च प्रयोजनमित्तः सर्व एवायमध्यायो नाध्येतव्यः । उच्यते । शास्त्रस्य महाप्रयोजनत्वमनेन सर्वेण प्रतिपाद्यते । ब्रह्माद्याः स्थावरपर्यन्ताः संसारगतयो धर्माधर्मनिमित्ता अत्र प्रतिपाद्यन्ते । 'तमसा बहुरूपेण वेष्टिताः कर्महेतुनेति' (श्लो. ४९) । वक्ष्यति च । 'एता दृष्ट्वा तु जीवस्य गतीः स्वेनैव चेतसा । धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मन' इति (अ. १२ श्लो. २३) ॥ ततश्च निरतिशयैश्वर्यहेतुर्धर्मस्तद्विपरीतश्चाधर्मस्तद्रूपपरिज्ञानार्थमिदं शास्त्रं महाप्रयोजनमध्येतव्यमित्यध्यायतात्पर्यम् ।

सूत्रे त्वत्र मन्त्रार्थवादाः सामान्यतो दृष्टं च । तथा च मन्त्रः । "तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतम् । सलिलं सर्वमा इदम् । तुच्छेनाभ्वपिहितं यदासीत्तमसस्तन्महिनाऽजायतैकम् " चन्द्रार्काग्न्यादिषु बाह्याध्यात्मिकेषु महाप्रलये प्रकाशकेषु नष्टेषु तम एव केवलमासीत् । तदपि तमः स्थूलरूपतमसा गूढं संवृत्तम् । न हि तदानीं कश्चिदपि ज्ञाताऽस्ति । अतो ज्ञातुरभावान्न कस्यचित् ज्ञानमस्तीति तमसा गूढमुच्यते । अग्रे भूतसृष्टेः प्राक् अप्रकेतमज्ञातं सर्वं आः आसीत् । इदं सलिलं सरणधर्मकम् क्रियावत् यत्किंचिच्चेष्टावत्तत्सर्वं निश्चेष्टमासीत् । तुच्छेन सूक्ष्मेणाभु स्थूलमपिहितं प्रकृत्यात्मनि विशेषरूपं लीनमित्यर्थः । एतावताऽव्याकृतावस्था जगतो द्योतिता । चतुर्थेन पादेनाद्या सृष्ट्यवस्थोच्यते । तमसस्तन्महिना महत्त्वेन एकं यदासीत्तदजायत विशेषात्मनाऽभिव्यज्यते स्म । कर्मवशात्पुनः प्रादुर्बभूवेत्यर्थः । अथवा तस्यामवस्थायां तमः कर्मणा महत्त्वेन हिरण्यगर्भ आत्मनाऽजायत प्रादुरासीत् । यथा वक्ष्यति 'ततः स्वयंभूरिति' (श्लो. ६) ।

सामान्यतो दृष्टेन महाप्रलयोऽपि संभाव्यते । यस्य ह्येकदेशे नाशो दृष्टस्तस्य सर्वस्यापि नाशो दृश्यते । यथा शालाऽपि कचिद्दह्यमाना दृष्टा कदाचित्सर्वो ग्रामो दह्यते । ये च कर्तृपूर्वा भावास्ते सर्वे विनश्वरा गृहप्रासादादयः कर्तृपूर्वं चेदं जगत्सरित्समुद्रशैलाद्यात्मकम् । अतो गृहादिवन्नंक्ष्यतीति संभाव्यते । कर्तृपूर्वतैव न सिद्धेति चेत्तन्निवेशविशेषवत्त्वादिना गृहादिवत्साऽपि साध्यत इत्यादि सामान्यतो दृष्टम् । न च प्रमाणशुद्धौ तद्दूषणे वा प्रयतामहेऽनिदंपरत्वाच्छास्त्रस्य । एतद्धि यावन्न विचार्य निरूपितं तावन्न सम्यगवधार्यते । तथानिरूपणे च तर्कशास्त्रता स्यान्न धर्मशास्त्रता ग्रन्थविस्तरश्च प्रसज्यते । प्रक्रियाबहुलं चेदं सर्वमुपन्यसिष्यते । कचित्पौराणी प्रक्रिया कचित्सांख्यानाम् । न तया ज्ञातयाऽज्ञातया वा कश्चिद्धर्माधर्मयोर्विशेष इति निपुणतया न निरूप्यते । अर्थिता चेत्तत एवान्वेष्या । पदार्थयोजनाव्याख्यानमात्रं त्वध्यायस्योपदिश्यते तदेव करिष्यामः । तात्पर्यमुपदर्शितमेव ।

---

१ वृक्षाविशेषान् । २ ङ-बाध्येतव्यः । ३ फ-क-अ-भूतसृष्टेरर्वाक् प्रकेतमज्ञातं । ४ अनुमानेन । अ-च-क्ष-आसु । ५ फ-क्ष-क-प्रलयेऽपि । ६ फ-सिद्धौ ।

For Private And Personal Use Only

आसीदिदं जगत्तमोभूतं तम इव। भूतशब्दोऽनेकार्थोऽह्युपमायां प्रयुक्तः। यथा 'यत्तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्द इति' सामान्यभूत इति सामान्यमिवेत्यर्थः। किं तमसा जगतः सादृश्यमत आह। अप्रज्ञातं विशेषाणां स्वभावानां विकाराणां प्रकृतावुपलयनादतः प्रत्यक्षेणाज्ञातम्। अनुमानात्तर्हि ज्ञायेत। तदपि चालक्षणम्। लक्षणं लिङ्गं चिन्हं तदपि तस्यामवस्थायां प्रलीनमेव सर्वविकाराणां विशेषात्मना विनष्टत्वात्। अप्रतर्क्यं यद्रूपमासीत्तर्कयितुमपि न तद्रूपतया शक्यम्। तर्कप्रकारमनुमानं निषेधति। न सामान्यतो दृष्टमनुमानमस्ति तद्रूपकावेदकं न विशेषतो दृष्टमतश्चाविज्ञेयम्। नैव तर्ह्यासीदसदेवाजायतेति प्राप्तमेतन्निषेधति।

प्रसुप्तमिव सर्वतः। नासतः सत उत्पत्तिः। उक्तं च 'सदेव सोम्येदमग्र आसीत्. कथमसतः सज्जायेते' त्याद्युपनिषत्सु। अतश्चाविज्ञेयमवच्छेदविषयैः प्रमाणैः। आगमात्तादृशादेव गम्यते। प्रसुप्तमिव जाग्रत्स्वप्नवृत्तां परित्यज्य संप्रसादावस्था सुपुप्तिर्दृष्टान्तत्वेनोपात्ता यथा 'अयमात्मा सुषुप्त्यवस्थायां निःसंबोधक्लेशप्रध्वस्ताशेषविकल्प आस्ते न च नास्तीति शक्यते वक्तुं प्रबुद्धस्य सुखमस्वाप्समिति' प्रत्यभिज्ञानदर्शनात्। एवं जगदागमात्सिद्धार्थरूपादाभासानुमानेभ्यश्च तार्किकाणामवसीयते। **आसीदिति**। वर्तमाना तु साऽवस्था न कस्य विज्ञेयेति। अंते उक्तमविज्ञेयम्। **सर्वतो** नैकदेशप्रलय इत्यर्थः ॥५॥

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ॥
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥ ६ ॥

तस्या महाराञ्या अनन्तरं। स्वयं भवतीति **स्वयंभूः** स्वेच्छया कृतशरीरपरिग्रहो न संसार्यात्मवत्कर्मपरतन्त्रं शरीरग्रहणमस्य। **अव्यक्तो** ध्यानयोगाभ्यासभावनावर्जितानामप्रकाशः। अथवा 'अव्यक्तमिदमि'त्येवं पठितव्यम्। इदमव्यक्तावस्थं **व्यञ्जयन्** स्थूलरूपैर्विकारैः प्रकाशमानयन्। यदिच्छया पुनर्जगत्प्रादुर्भवति। **प्रादुरासीत्**। प्रादुःशब्दः प्राकाश्ये। **तमोनुदः** तमो महाप्रलयावस्था तां नुदति विनाशयति पुनर्जगत्सृजत्यतस्तमोनुदः। **महाभूतानि** पृथिव्यादीनि। आदिग्रहणात्तद्गुणाः शब्दादयो गृह्यन्ते। तेषु वृत्तं प्राप्तमोजो वीर्यं सृष्टिसामर्थ्यं यस्य। स एवमुक्तः स्वयमसमर्थानि महाभूतानि जगन्निर्वर्तयितुम्। यदा तु तेन तत्र शक्तिराधीयते तदा वृत्ताद्यात्मना विक्रियन्ते। न तु प्रकृतिशक्त्यवस्थानि प्रकृतिरूपापन्नानि महाभूतानि जगत्सर्गादौ महाभूतशब्देनाभिप्रेतानि। पाठान्तरं ' महाभूतानुवृत्तौजा ' इति। अनुवृत्तमनुगतमिति प्रागुक्त एवार्थः ॥ ६ ॥

योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ॥
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥ ७ ॥

---

१ ड—उपलंभनाद. १ फ-यदार्त्त तु......तदावृत्तत्यात्मना... ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योऽसाविति । सर्वनामभ्यां सामान्यतः प्रसिद्धमिव परंब्रह्मोद्दिशति । योऽसौ वेदान्तेष्वन्यासु चाध्यात्मविद्यास्वितिहासपुराणेषु च प्रसिद्धो वक्ष्यमाणैर्धर्मैः स एष प्रादुरासीदित्यत्रोक्तः **स्वयमुद्भभा**वुद्भूतः शरीरग्रहणं कृतवान् । भातिरनेकार्थत्वादुद्भवे वर्तते । अथवा दीप्त्यर्थ एव स्वयंप्रकाश आसीन्नादित्याद्यालोकापेक्षः । इन्द्रियाणामत्ययोऽतीन्द्रियम् । अव्ययीभावः । अतीन्द्रियग्राह्यः सुप्सुपेतिसमासः । इन्द्रियाण्यतिक्रम्य गृह्यते न कदाचिदिन्द्रियस्य गोचरः । अन्यदेव तद्योगजज्ञानं येन गृह्यते । अथवेन्द्रियाण्यतिक्रान्तमतीन्द्रियं मन उच्यते । परोक्षत्वादिन्द्रियाणामविषयः । तथा च **वैशेषिका** 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमि'त्यानुमानिकत्वं मनसः प्रतिपन्नास्तेन गृह्यते । तथा च भगवान्**व्यासः**–'नैवासौ चक्षुषा ग्राह्यो न तु शिष्टैरपीन्द्रियैः । मनसा तु प्रयत्नेन गृह्यते सूक्ष्मदर्शिभिरिति' ॥ प्रसन्नेन रागादिदोषैरकलुषितेन तदुपासनापरत्वेन लब्धसूक्ष्मदर्शनशक्तिभिः । सूक्ष्म इव सूक्ष्मोऽणुर्न ह्यसावणुस्थूलादिविकल्पानामाश्रयः । सर्वविकल्पातीतो ह्यसौ । उक्तं च । 'यः सर्वपरिकल्पानामाभासे[1]ऽप्यनवस्थितः । तर्कागमानुमानेन बहुधा परिकल्पितः । व्यतीतो भेदसंसर्गाद्भावाभावौ क्रमाक्रमौ । सत्यानृते च विश्वात्मा स विवेकात्प्रकाशत इति' । सूक्ष्मत्वादव्यक्तः सनातनोऽव्यक्तस्वाभाविकेनानादिनिधनेनैश्वर्येण युक्तो । येषामपि कर्मप्राप्यं हैरण्यगर्भं पदं तन्मतेऽपि सनातनत्वं सत्यप्यादिमत्त्वेऽन्तत्वाभावात् । न हि सर्गादिफलभोक्तृत्वावस्था कदाचिदपैति । सर्वाणि भूतानि मया स्रष्टव्यानीत्येवंभावितचित्तो भूतात्मा एवं संपन्नः सर्वभूतमय इत्युच्यते । यथा मृन्मयो घटो मृद्विकारत्वान्मृद्भिरारब्धशरीर एवं यः कश्चित्किंचिदत्यन्तं भावयति स तन्मय इत्युपचारादुच्यते । यथा स्त्रीमयोऽयं पुरुषः ऋङ्मयो यजुर्मय इति । अथवा **ऽद्वैतदर्शने** "नैव चेतनाचेतनानि भूतानि पृथक्त्वेन सन्ति तस्यैवायं विवर्तः । अतो विवर्तानां भूतमयत्वात्तैश्च तस्याभेदाद्युक्तमेव तन्मयत्वम् । कथं पुनरेकस्य नानारूपविवर्तितोपपत्तिरेकत्वाद्विरोधिनी उच्यते । एवमाहुर्विवर्तवादिनो । यथा समुद्राद्वायुनाऽभिहता ऊर्मयः समुत्तिष्ठन्ति ते च न ततो भिद्यन्ते[2] नापि लिप्यन्ते" सर्वथा भेदाभेदाभ्यामनिर्वाच्या एवमयं ब्रह्मणो विश्वविवर्तः । अपिशब्दश्चात्र द्रष्टव्यः । स्वरूपे स्थितोऽग्राह्यो विवर्तावस्थायामिन्द्रियग्राह्यः । एवं सूक्ष्मः । अपिशब्दात् स्थूलावस्थायां स्थूलः । अव्यक्तो व्यक्तश्च शाश्वतोऽशाश्वतश्च । भूतमयस्तद्रूपरहितश्च । विवर्तावस्थाभेदेनैव व्याख्येयम् । **अचिन्त्यः** आश्चर्यरूपः सर्वविलक्षणया शक्त्या योगात् ॥ ७ ॥

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ॥
अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥ ८ ॥

स पूर्वनिर्दिष्टविशेषणे"हिरण्यगर्भः समवर्तताग्रे" इत्यादिभिर्मन्त्रैर्लब्धहिरण्यगर्भाभिधानः।

---

१ फ-क्ष-अभ्यासे । २ फ-क्ष-न ततोऽभिपद्यन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रजा विविधा नानारूपाः सिसृक्षुः स्रष्टुमिच्छन्नपः उदकमादौ प्रथमं ससर्जोत्पादितवान्। शरीरात् स्वायत्तेन गृहीतं शरीरं अद्वैतदर्शने "प्रधानमेव तस्येदं शरीरं तदिच्छानुवर्तित्वात् स्वं तस्य शरीरनिर्माणहेतुत्वाच्च"। सर्वलोकानां शरीरं किं भौतिकेन व्यापारेण कुद्दालखननादिना ससर्ज? नेत्याह। कथं तर्हि? अभिध्याय 'आप उत्पद्यन्ताम्'। एवमिच्छामात्रेण। अत्रेत्थं चोच्यते। पृथिव्यादीना तदानीमभावादपां सृष्टानां क आधारः। अन्येभ्य इदमुच्यते। स्रष्टुरपि परमेश्वरस्य गृहीतशरीरस्य क आधार इत्यपि वाच्यम्। अथ विलक्षणैश्वर्यातिशययोगादन्यैव सा कर्तृशक्तिरसंचोद्या प्रकृतधर्मसामान्येनेत्येवमेप्स्वपि द्रष्टव्यम्। तासु वीर्यं शुक्रमवासृजत् न्यषिञ्चत्॥ ८॥

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्॥
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥ ९॥

प्रथमं प्रधानं सर्वतोभवं मृद्रूपं संपद्यते। हिरण्यगर्भवीर्यसंयोगात्काठिन्यं प्रतिपद्यते। तदण्डं समभवदित्युच्यते। हेम्न इदं हैमं स्वर्णमयमित्यर्थः। शुद्धसामान्यात्तस्य सुवर्णमयस्य। ननु नागमिकोऽयमर्थो, न चात्र इवशब्दः श्रूयते, तत्र कथमुपचारतो व्याख्यानमसति प्रमाणान्तरे? उच्यते। वक्ष्यति, 'ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे' इति। इयं च भूमिर्मृन्मयी न सर्वतः सुवर्णमयीत्यत उपचार आश्रितः। सहस्रांशुरादित्य इत्यर्थः। अंशवो रश्मयस्तत्तुल्या प्रभा दीप्तिस्तस्याण्डस्य, तस्मिन्नण्डे स्वयं ब्रह्मा जातो जज्ञे संभूतः। ब्रह्मा हिरण्यगर्भ एव। स्वयमिति उक्तार्थम्। योगशक्त्या प्राग्गृहीतं शरीरं परित्यज्यान्तरण्डमनुप्राविशत्। अथवाऽशरीर एवापः ससर्ज। ततोऽन्तरण्डं स्वशरीरं जग्राह। अथवाऽन्यो 'योऽसावित्य'त्र निर्दिष्टः (श्लो. ७) अन्यश्चायमण्डजो ब्रह्मेति। तथा च वक्ष्यति (श्लो. ११) 'तद्विसृष्ट' इति। तेनेश्वरेण सृष्टः। कथं तर्हि स्वयं जज्ञे स्वयंभूतश्च तत्र ब्रह्मोच्यते। नैष दोषः। पितृनाम्ना पुत्रो व्यपदिश्यते। 'आत्मा हि जज्ञ आत्मन' इति। अनिदंपरेभ्य आगमेभ्यो लिखितमाचार्येण, नचात्राभिनिवेष्टव्यम्। 'स एव स्वयं जायतामन्यो वा तेन सृज्यतामिति' न धर्माऽभिधान उपयुज्यत इत्युक्तम्। सर्वलोकानां पितामह इति संज्ञा। तस्योपचारतोऽवास्तवदृष्टत्वात् पितुरपि सकाशादधिकः पितामहः पूज्यः॥ ९॥

आपो नारा इति प्रोक्ता आपो वै नरसूनवः॥
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥ १०॥

यः कुत्रचिन्नारायणशब्देन कर्तृज्ञातृशक्त्यतिशययोगेन जगत्कारणपुरुषतयाऽऽगमे-

---

१ फ—स्वतः शरीर। २ फ—क्ष अ—असंगचोद्या। ३ फ—क्ष अंशुसामान्यात्। ४ ड—नतु वागमिकोऽयं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्वाम्नातः, सोऽयमेव । न शब्दभेदादर्थभेदः । ब्रह्मा नारायणो महेश्वर इत्येक एवार्थो नोपासनाकर्मतया भिद्यते । तथा च द्वादशे दर्शयिष्यामः । तथाचैतत्तथोच्यते । **आपो नारा** इत्यनेन शब्देन प्रोक्ताः । ननु नायं वृद्धव्यवहारोऽथ च न तथा प्रसिद्धोऽत आह **'आपो वै नरसूनवः'** । स भवेत् भगवान्नरः पुरुष इति प्रसिद्धः । आपश्च तस्य सूनवोऽपत्यानि । अतस्ता नरशब्देनोच्यन्ते । दृष्टो हि पितृशब्दोऽपत्ये वसिष्ठस्यापत्यानि वसिष्ठा, भृगवस्तथा बभ्रुमण्डुलोमक इत्यभेदोपचारेण ता आपो नरशब्दवाच्याः । यत् येन प्रकारेण अस्य प्रजापतेः पूर्वमयनं प्रथमसर्गे आश्रयो वा गर्भस्यस्य, तेन हेतुना नारायणः स्मृतः । नरा अयनमस्येति नरायण इति प्राप्तेऽ'न्येषामपि दृश्यते' (न्या. सू. ६।३।१३४) इति दीर्घः । 'पुरुष इति' यथा । अथवा सौमूहिकोऽण् ॥ १० ॥

यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ॥ ११ ॥

कारणमेव न कार्यो न परेच्छाविधेयशरीरः, स्वाभाविकेन महिम्ना युक्तम् । अव्यक्तं नित्यमुक्तमित्युक्त्वा,[3]* विरुद्धस्य भावाभावरूपधर्मद्वयस्य योग उच्यते । अर्वाग्दर्शनानां तद्विषयाया उपलब्धेरभावात्सत्ताव्यवहारायोग्यत्वादसदात्मेत्युच्यते । आगमेभ्यः सर्वस्यास्य तत्कारणत्वावगमात्सदात्मकम् । अतः प्रतिपत्तॄणि अभेदादुभयतोऽपि व्यवहारो ब्रह्मण्यविरुद्धः।

ननु च सर्व एव भावा एवंरूपाः स्वेन रूपेण सदात्मकाः पररूपेणासन्तः किमुच्यते ब्रह्मण्यविरुद्ध इति? उच्यते । अद्वैतदर्शने नैवान्यद्ब्रह्मणः किंचिदस्तीति किंतत् परं यत् तद्रूपतयाऽभाव इत्युच्यते । तेन विसृष्ट उत्पादितोऽन्तरण्डं निर्मितः पुरुषो लोके ब्रह्मेति कीर्त्यते । योऽसावुग्रतपसां देवासुरमहर्षीणां वरदानार्थं तत्रतत्रोपविष्ट इति महाभारतादौ श्रूयते स एष तेन महापुरुषेण परेण ब्रह्मणा प्रथमं विसृष्टः ।

अन्ये तु 'त्वमेवैक' इत्याद्यन्यथा वर्णयन्ति । अस्येति प्रत्यक्षाभिनयेन, जगन्निर्दिश्यते सर्वस्यास्य जगतो यद्विधानं निर्माणं तत्स्वयंभुवः संबन्धि अचिन्त्यमद्भुतरूपं विचित्रमतिमहदप्रमेयं न शक्यं सर्वेण ज्ञातुम् । तथा ऋषिः । 'को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिरिति' । किमिदं जगत्सर्वमुपादानमपेक्ष्य जायत उत नैर्माणिकमात्रम् । यथा बुद्धस्य दर्शनं किमीश्वरेच्छाधीनमुत केवलकर्मवशजमुत स्वाभाविकमप्रमेयम् । तथा किं महदादिक्रमेणोत्पद्यत उत द्व्यणुकादिक्रमेण? अस्य त्वं कार्यं तत्त्वमर्थं च

१ क्ष ख–यथा चैतत् । २ "तस्य समूहः" व्या. सू. ४।२।३७ । ३ **अ–क–फ**–नित्ययुक्तम् । * **ड–ख**–मित्युक्तार्यो सदसदात्मकम् । सच्चासच्च सदसती, ते आत्मा स्वभावो यस्य तदेवमुच्यते । कथं पुनरेकस्य विरुद्धस्याविरुद्धस्य भावाभावरूपधर्मद्वयस्य योग उच्यते । ४ **अ–ख–फ–ड**–सत्ताव्यवहारयोग्यत्वात् । ५ **अ–क–ड–फ** प्रतिपत्तृत्वभेदात् । ६ **अ–क–ड–फ**–अभिनयने । ७ **अ–क–ड–फ** संबंधे । ८ **अ–क–ड–फ**–अवेक्ष्य । ९ **अ–क–ड–फ**–यज्ञवुधस्य । १० **अ–क–ड–फ**–त्वं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेत्सि। कार्यं महतोऽहङ्कारोऽविशेषस्तन्मात्राण्यहंकारस्य तन्मात्राणां विशेषाः पञ्चमहाभूतानि। अहङ्कारस्येन्द्रियाण्येकादश । विशेषाणामपि पिण्डीकार्यं ब्रह्मादिस्तम्बपर्यन्ताः । तेषामपि प्रत्ययात्तत्त्वं स्वभावो । यथा महतो मूर्तिमात्रत्वं प्रधानस्य सर्वस्य विकारावस्था महदित्युच्यते । प्रकृतेर्महानिति। प्रकृतिः प्रधानमित्येकोऽर्थः । अहङ्कारस्य तत्त्वमस्मिप्रत्ययमात्रत्वमविशेषाणामविशेषप्रत्ययसंवेद्यत्वमिति । अर्थः प्रयोजनं । पुरुषार्थमिदंवस्त्वनेन प्रकारेण पुरुषायोपयुज्यते इमं चार्थं साधयति । यद्यपि धर्मं जिज्ञासमानस्य जगन्निर्माणज्ञता आचार्यसंबन्धिनी न क्वचिदुपकारिणी न च प्रष्टव्या तथाऽप्यन्यतो दुर्विज्ञानं महर्षीणां वैषम्याज्जगन्निर्माणमादौ प्रश्नार्हं भवति । मनो ह्यवचनीयम् । यद्वस्तु प्रमाणषट्कस्याप्यविषयस्तदपि त्वमार्षेण चक्षुषा वेत्सि । धर्मः पुनर्वेदगोचरः सोऽवश्यं त्वया विज्ञात इत्येवं प्रकृतविषयैव प्रवक्तृप्रशंसा ।

एवं स्तुत्या प्रोत्साहितो जगन्निर्माणमेव तावद्वक्ति 'आसीदिदमिति'। 'ततःस्वयंभूरिति'। प्रधानमेवैतैः शब्दैरभिधीयते। स्वयं भवति परिणमति विक्रियामेति महदादितत्त्वभावेन । न कश्चिदीश्वरः स्वभावसिद्धोऽस्ति यथेच्छमचेतनं प्रधानमनुवर्तते वस्तुस्वभाव एवायं तदुत प्रकृतिरूपं प्रधानं पुनर्विक्रियते । यथा क्षीरमचेतनं मण्डकावस्थाभिर्दधीभवति । **भगवानिति**। स्वव्यापार ईश्वरो महाभूतादिद्वारेण प्रवृत्तः । स्वकार्योत्साह ओजः सामर्थ्यम् । आदिशब्दः प्रकारे व्यवस्थायां । तेन महदादिकारणमव्यक्तं भवति । विकारावस्थायां प्रच्युतं प्राग्रूपात्सूक्ष्मभावात् प्रकाशमयं तमो नुदतीत्युच्यते । अर्थशब्दाध्याहारेण वा प्रधाने पुल्लिङ्गनिर्देशः । पुरुषशब्दश्च प्रधानादिषु दृष्टः । तेषामिदं तु 'सप्तानां पुरुषाणामिति' । **योऽसाविति** पूर्ववत् । **सोऽभिध्यायेति** । अभिध्यानं गुणतोऽचेतनत्वात्प्रधानस्याभिध्यानासंभवात् । यथा कश्चिदभिध्यायैव कार्यं निवर्तयेदन्यकार्यनिरपेक्षमेव वस्तुस्वाभाव्येन परिणममानमीश्वरेच्छानपेक्षतयाऽभिध्यायेत्युच्यते । अप आदौ ससर्ज । महाभूतान्तरापेक्षया तासामादित्वं, न तु महदादितत्त्वोत्पत्तेः । वक्ष्यति हि 'तेषामिदं तु सप्तानामिति' । प्रथमं तत्त्वोत्पत्तिस्ततो भूतानाम् । तासु वीर्यमिति । वीर्यं शक्तिमवासृजत् । प्रधानमेव कर्तृ भवति । सर्वतः प्रधानं पृथिव्यादिभूतोत्पत्तौ काठिन्यमेति । अण्डरूपं संपद्यते । **तदण्डमिति** । यथा तत्त्वानि स्त्रीपुरुषसंयोगं विनोत्पन्नानि प्रथममेवं पूर्वकर्मवशेन ब्रह्माऽपि स्वमाहिम्नैवायोनिजं तस्य शरीरं दंशमशकादिवत् । तद्विसृष्टस्तेन प्रधानेन विसृष्टस्तन्मयत्वात्तच्छरीरस्य तद्विसृष्ट इत्युच्यते । शेषं पूर्ववत् । यदत्रार्थतत्त्वं तदस्माभिरुक्तमेव । अर्थवादा एते यथाकथंचिद्गुणवादेन नीयन्ते ॥ ११ ॥

१ अ-ब-क-ड-अस्मिन्प्रत्यय । २ पुरुषशब्दाध्याहारेण । ३ अग्रे १९ श्लोके ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् ॥
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा ॥ १२ ॥

स भगवान् ब्रह्मा परिवत्सरं संवत्सरमुषित्वा तस्मिन्नण्डे स्थित उत्पन्नः सर्वज्ञः कथं निर्गच्छेयमिति ध्यातवान् । तदण्डमकरोद्द्विधा । तावता कालेन गर्भः परिपच्यते । अण्डमपि तावत्कालेन भेदजातं परिपाकादतः काकतालीयन्यायेन तदण्डमकरोद्द्विधेत्युच्यते ॥ १२ ॥

ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे ॥
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् ॥ १३ ॥

शकले अण्डकपाले ताभ्यामण्डकपालाभ्यामुत्तरेण **दिवं निर्ममे** निर्मितवान् । अधरेण पृथिवी मध्ये व्योमाकाशं दिशोऽष्टौ च प्रागाद्याः । अवान्तरदिग्भिर्दक्षिणपूर्वादिभिः सह अपां स्थानमन्तरिक्षे समुद्रमाकाशं च पृथिवी पातालगता ॥ १३ ॥

उद्बवर्हात्मनश्चैव मनः सदसदात्मकम् ॥
मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम् ॥ १४ ॥

तत्त्वसृष्टिरिदानीमुच्यते । या च यथावयवा पश्चादुक्ताऽर्थात्पूर्वेति तथोक्तम् । तत्प्रधानात् स्वस्माद्रूपान्मन उद्धृतवान् । प्रातिलोम्येनेयं तत्त्वोत्पत्तिरिहोच्यते । मनसः पूर्वमहंकारमभिमन्तारम् । अहमित्याभिमानिताऽहंकारस्य वृत्तिः । ईश्वरं कार्यनिर्वर्तनसमर्थम् ॥ १४ ॥

महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च ॥
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥ १५ ॥

महानिति संज्ञया[1] सांख्यानां तत्त्वं प्रसिद्धम् । **आत्मानमिति** महता सामानाधिकरण्यम् । सर्वपिण्डसृष्टौ च महत्तयाऽनुरूपमत आत्मव्यवहारः । अहङ्कारात्पूर्वं पूर्वेण न्यायेन ससर्ज । **सर्वाणि त्रिगुणानि च** । यथानुक्रान्तं यथानुक्रम्यते तत्सर्वं त्रिगुणं सत्वरजस्तमांसि गुणाः । क्षेत्रज्ञाः केवलं निर्गुणाः, प्राकृतो भागः सर्वः सत्त्वरजस्तमोमयः । पञ्चेन्द्रियाणि तेषां निर्देशविषयाणां रूपरसादीनां यथा स्वं **ग्रहीतॄणि** विज्ञानजनकानि । पञ्च 'श्रोत्रं त्वगित्यादिना' वक्ष्यन्ते विशेषनाम चशब्देन[2] । विषयांश्च शब्दस्पर्शरूपरसगन्धान् पृथिव्यादीनि च ॥ १५ ॥

तेषां त्ववयवान्सूक्ष्मान् षण्णामप्यमितौजसाम् ॥
सन्निवेश्यात्ममात्रांसु[3] सर्वभूतानि निर्ममे ॥ १६ ॥

तेषां षण्णां या आत्ममात्रास्तासु सूक्ष्मानवयवान् सन्निवेश्य सर्वभूतानि निर्ममे ।

---

१ क-फ-ड-महानिति संज्ञायां इति ॥ अ-संज्ञां । २ ख-चशब्दात्-अ-फ-चशब्दान् । ३ ड-मात्राभिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र षट्संख्यया, वक्ष्यमाणानि पञ्च तन्मात्राणि अतिक्रान्तश्चाहंकारः प्रतिनिर्दिश्यते । आत्ममात्रास्तेषां स्वविकाराः तन्मात्राणां भूतानि । अहंकारस्येन्द्रियाणि पृथिव्यादिषु भूतेषु शरीररूपतया तिष्ठत्सु सूक्ष्मानवयवांस्तन्मात्राहंकारान् सन्निवेश्य यथास्थानं योजनं कृत्वा सर्वभूतानि देवमनुष्यतिर्यक्पक्षिस्थावरादीनि निर्ममे । एतदुक्तं भवति । षडविशेषा अवयवा एकदेशारम्भकाः सर्वस्य जगतस्तस्य तदारब्धत्वात् । सूक्ष्मत्वं तन्मात्रसंज्ञयैव सिद्धम् । तानि संनिवेश्य संनिहत्य तेषामेवात्ममात्रास्तद्विकाराः । भूतेन्द्रियाणि निर्ममे तैश्च पिण्डसृष्टिम् । चकारात् 'मात्रास्वि'त्यत्र 'मात्राभि'रिति युक्तः पाठः ॥ १६ ॥

यन्मूर्त्यवयवाः सूक्ष्मास्तानीमान्याश्रयन्ति षट् ॥
तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः ॥ १७ ॥

मूर्तिः शरीरं। तदर्थास्तत्संपादका अवयवाः सूक्ष्माः षडुक्तस्वरूपाश्च अविशेषाख्यास्तानीमानीन्द्रियाणि वक्ष्यमाणानि च भूतान्याश्रयन्ति । तस्योत्पत्तेर्भूतान्याश्रयन्तीत्युच्यते । तदाश्रयोत्पत्तिस्तेषाम् । पठितं च, 'पञ्चभ्यः पञ्चभूतानी'ति । यद्येन कारणेनाश्रयन्ति तस्मात् कारणाच्छरीरम् । तस्य प्रधानस्य येयं मूर्तिः शरीरमित्युच्यते । **मनीषिणः ।** मनीषा बुद्धिस्तद्वन्तः । पण्डिताः । अथवा विपरीतः कर्तृभावः । सूक्ष्माः कर्तार इन्द्रियाणि कर्म। अवयवाश्चेन्द्रियाणामाश्रयभावं प्रतिपद्यमाना आश्रयन्तीत्युच्यते । यथा 'बहुभिर्भुक्त'इति, भोजयन् भुक्त इत्युच्यते । अथवाऽनेकार्थत्वाद्धातूनामाश्रयन्ति जनयन्तीत्यर्थः ॥ १७ ॥

तदाविशन्ति भूतानि महान्ति सह कर्मभिः ॥
मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम् ॥ १८ ॥

तदेतत्प्रधानं **सर्वभूतकृद्भवति** । **अव्ययमविनाशं** कारणात्मना। कथं सर्वाणि भूतानि करोति? यतस्तदाविशन्तीमानि । कानि पुनस्तानि । मनः सूक्ष्मैरवयवैः सह तन्मात्रैर्बुद्ध्यहंकारेन्द्रियलक्षणैः। अनन्तरं महान्ति भूतानि पृथिव्यप्तेजोवाय्वाकाशाख्यानि। सह कर्मभिर्धृतिसंहननपक्तिव्यूहावकाशाः पृथिव्यादीनां यथाक्रमं कर्माणि । तत्र **धृतिः** धारणं सरणपतनधर्मकस्य। एकत्रावस्थानं । संग्राहकाद्विकीर्णस्य **संहननम्**। यथा पांसवो विकीर्णा उदकेन संहन्यन्ते पिण्डीक्रियन्ते । **पक्तिरन्नौ**षधतृणादेस्तेजसः कार्यतया प्रसिद्धा । **व्यूहो** विन्यासः सन्निवेशः। **अवकाशो** मूर्त्यन्तरेणाप्रतिबन्धः । न हि यस्मिन्देशे मूर्तिरेका स्थिता तत्र मूर्त्यन्तरस्य स्थानं सुवर्णपिण्डे न कस्यचिदन्तःसंभवः। मनोग्रहणं सर्वेन्द्रियप्रदर्शनार्थम् । कर्मग्रहणेन च कर्मेन्द्रियाणि वा गृह्यन्ते । अथवा तत्कार्यं सूक्ष्मैरवय-

---

१ अ-च-क-अहंकारात् । २ अ-व-फ-क-विशेषाख्या । ३ व-फ-तस्येमानि । ४ क-अ-व-फ-कारणं सरणपतनधर्मस्य । ५ अ-ब-क-ड-क-प्रतिबंधः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैर्युक्तं महान्ति भूतान्यधितिष्ठति पश्चादित्येवं योजना इन्द्रियाणि च मनःशब्दस्य प्रदर्शनार्थत्वात् ॥ १८ ॥

तेषामिदं तु सप्तानां पुरुषाणां महौजसाम् ॥
सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम् ॥ १९ ॥

सूक्ष्मात्स्थूलमुत्पद्यते सम्भवति । अव्ययाद्व्ययमित्येतावति तात्पर्यम् । न तु षण्णां सप्तानां वा तत्त्वानां मात्राभ्य इति । चतुर्विंशतितत्त्वानि तानि सृष्टौ सर्वेषां निमित्तम् । अथवा पिण्डसृष्टौ सप्तैव प्रधानं कारणम्; षडविशेषाः सप्तमो महान्, तेभ्यो भूतेन्द्रियाण्युत्पद्यन्ते । तेषु चोत्पन्नेषु पिण्डीभवति शरीरम् ।

अथ यावत्प्रधानादुपसंभूतसर्वविकारादेकीभूतादिदं बहुधा विप्रकीर्णं विश्वरूपं जगदुत्पद्यते किं युगपदेव समस्तैर्विकारैः स्थूलरूपैः प्रधानं विक्रियते? नेत्याह । **तेषामिदमिति** । यादृशः प्रागुक्तः क्रमस्तेनैव । प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणस्तु षोडशक इति पुरुषशब्दस्तत्त्वे पुरुषार्थत्वात्प्रयुक्तः । **महौजसां** स्वकार्ये वीर्यवताम् । अपरिमितविकारहेतुत्वान्महत्त्वम् । तेषां याः **सूक्ष्मा मूर्तिमात्रा मूर्तिः** शरीरं तदर्था मात्रास्ताभ्य इदं भवति । अत उच्यते । **अव्ययाद्व्ययमिति** । काः पुनस्तेषां सूक्ष्मा मात्राः । न हि तन्मात्राणामन्या मात्राः संभवन्ति येन तेषां सूक्ष्मा मात्रा इति व्यतिरेक उपपद्यते । न तेषां स्वांगतमात्रापेक्षत्वम् । किं तर्हि? तन्मात्रेभ्यः सूक्ष्मो महान्महतः प्रभूरिति ॥ १९ ॥

आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परः ॥
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥ २० ॥

पूर्वश्लोके केचिदन्यथा सप्तसंख्या परिकल्पयन्ति । पञ्चेन्द्रियाणि चक्षुरादीनि वर्गीकृतान्येकीभवन्ति । बोधहेतुतयैकेन धर्मेण योगादेकत्वेन निर्दिश्यन्ते । एवं कर्मेन्द्रियाणि । तौ च वर्गद्वित्वाद्द्वौ पुरुषौ भवतः । पञ्चभूतानि भेदेनैव निर्दिष्टानि कार्यवैलक्षण्यात् । तदेवं सप्तपुरुषास्तेषां या मूर्त्यर्थाः सूक्ष्मा मात्रा निर्माणकार्याणि तन्मात्राण्यहङ्कारश्च । अन्यत्समानम् । अतश्च भूतानां पूर्वश्लोके संनिधानादेषामिति तेषां प्रतिनिर्देशः । यद्यपि च व्यवहिते बहूनि च तानि संनिहितानि तथापि य इहार्थः प्रतिपाद्यते विशिष्टसंख्याकर्तृगुणवत्त्वं तद्भूतानामेव संभवति, नान्येषा प्रकृतत्वे सत्यपि । अतोऽयं श्लोकार्थ एषां भूतानां यदाद्यन्तवत्तस्य यद्रूपं ततोऽनन्तरं पठितं तत्तत्पूर्वस्य संबन्धेन गुणं गृह्णाति । गुणशब्देन शब्दादयः पञ्चोच्यन्ते । आद्यत्वं चात्र वक्ष्यमाणया व्यवस्थयाऽऽकाशं जायत इति । गुणत्वं च शब्दादीना तत्रैव वक्ष्यति ।

१ स्वागतमेव स्वगतं । २ क-फ-प्रभुरिति-च-स्वरूप इति ङ-प्रकृतिरिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यो य आकाशादिलक्षणोऽर्थो **यावतिथः** यावतां पूरणः । [illegible] । द्वितीये तृतीयेऽवस्थाने स्थितः स तावद्गुणस्तावन्तो गुणास्तस्य भवन्ति । द्वितीय[illegible] स्थितो द्विगुण इत्यादि परस्पराद्याद्यगुणसंबन्धित्वं प्रथमेऽर्धश्लोक उक्तम् । तत्र यः स्वशब्देन यस्यैव यो गुणोऽभिहित 'स्तस्य शब्दगुणं विदुस्तद्रूपगुणमुच्यत' इत्यादि । ततश्च पूर्वगुणावाप्तौ द्वैगुण्यम् आकाशं वर्जयित्वा भूतानां प्राप्तमत उक्तं ' यो यो यावतिथ इति ' । तेन द्विगुणो वायुस्त्रिगुणं तेजश्चतुर्गुणा आपः पञ्चगुणा भूमिरिति । आद्याद्यस्येति कथम्? । आद्यस्याद्यस्येह भवितव्यम् । 'नित्यवीप्सयोरिति[1], द्विवचनेन । यथा परः पर इति । छन्दोभिरविशेषात् स्मृतीनां लुब्धवृत्तानुरोधाच्चैवं पठितम् ॥ २० ॥

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ॥
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥ २१ ॥

स प्रजापतिः सर्वेषामर्थानां नामानि चक्रे । यथा कश्चित् पुत्राणां जातानामन्येषां वा संव्यवहारार्थं करोति । 'वृद्धिरादैच्[2]', 'धीश्रीस्त्री'मिति शब्दार्थसंबन्धं कृतवान् 'गौरश्वः पुरुष' इति । कर्माणि च निर्ममे । धर्माधर्माख्यान्यदृष्टार्थान्यग्निहोत्रादीनि च । सृष्ट्वा च कर्माणि तत्र **संस्था** व्यवस्थाश्चकार । इदं कर्म ब्राह्मणेनैव कर्तव्यं कालेऽमुष्मै च फलाय । अथवा दृष्टार्था मर्यादा संस्था । 'गोप्रचार इह च प्रदेशे न कर्तव्य', ' इदं उदकं सस्यसेकार्थममुष्मिन् ग्रामे न देयं यावत्तस्माद्ग्रामादस्माभिरयमुपकारो न लब्धः' । दृष्टार्थानि च कर्माणि निर्ममे । तत्र यान्यदृष्टार्थानि तानि वेदशब्देभ्यो वैदिकेभ्यो वाक्येभ्यः ।

ननु सर्वस्य तेनैव सृष्टत्वात्तस्यैव स्वातन्त्र्याद्वेदं ससर्ज कर्मानुष्ठानपरिपालनार्थमित्येवं वक्तव्यं वेदसृष्टिश्च वक्ष्यते अग्निवायुरविभ्यश्चेत्यत्रान्तरे । उच्यते । भिन्नमत्र दर्शनम् । केचिदाहुरन्यस्मिन्कल्पे वेदास्तेनाधीतास्ते च महाप्रलयेन प्रलीनाः पुनरन्यस्मिन् कल्पे सुप्तप्रतिबुद्धवत्सर्वं प्रथमं प्रतिभाति स्वप्नपठितो यथा कस्यचिच्छ्लोकः प्रतिभाति । भाति च वेदे ' गौरनुबन्ध्या'ऽ'श्वस्तूपरोगोमृग ' इत्यादिवाक्येभ्यः शब्दानुस्मृतिपूर्वकं झटिति तानर्थान् स्मृत्वोत्पद्यमानांश्च पदार्थान् दृष्ट्वा तस्यार्थस्यायं शब्दः कल्पान्तरे नामासीत्संप्रत्यस्यैव क्रियतामित्युभयं वेदशब्देभ्य एव नामानि कर्माणि च सृष्टवान् । अथवा नैव वेदाः प्रलीयन्ते महाप्रलयेऽपि । योऽसौ पुरुषः केषांचिदिष्टस्तथा वेदा आसते । स एवान्तरण्डं ब्रह्माख्यं पुरुषं निर्माय वेदानध्यापयामास । एवं स ब्रह्मा वेदशब्देभ्यः सर्वं निर्मितवान् । यदत्र तत्वं तदस्माभिरुक्तमेव । अथ पौराणिकीप्रक्रिया प्रयुज्यते साऽस्माभिः प्रदर्श्यत एव । **आदौ** जगत्सर्गे इत्यर्थः । अथवाऽऽदौ यानि नामान्यनपभ्रष्टानि न पुनरिदानींतनान्यशक्तिजानि गव्यादीनि पृथक् । यथा शरीरं च समुदायरूपमेवं (न !) निर्ममे । किं तर्हि ? **पृथक्** ॥ २१ ॥

१ व्या. सू. ५-२-५३ । २ व्या. सू. ८-१-४ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मात्मनां च देवानां सोऽसृजत्प्राणिनां प्रभुः ॥
साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम् ॥ २२ ॥

कर्मात्मानः शरीरिणः प्राणिनः कर्मसु तत्परा मनुष्या उच्यन्ते । तेषामर्थसिद्धये यज्ञमसृजत् । ये ब्रह्मोपासनास्व (न) भिरताः पुत्रपश्वादिफलार्थिनो द्वैतपक्षाश्रितास्ते कर्मानुष्ठानपरत्वात्कर्मात्मान उच्यन्ते । षष्ठ्यपि तादर्थ्ये ब्रूत इति तदर्थं यज्ञमसृजदिति गम्यते । देवानां च गणं तदर्थमेवासृजत् । **कर्मात्मनां** चेत्ययमदेशो चः पठितः । तस्य देशो देवानामित्यतोऽनन्तरं यज्ञं ससर्ज । अग्निरग्नीषोमाविन्द्राग्नी इत्यादिं यज्ञसिद्ध्यर्थं देवानां गणमसृजत् । तथा साध्यानां देवानां गणमित्यनुषज्यते । भेदेनोपादानमहविर्भाक्त्वात्तेषां स्तुतिभाज एव ते केवलम् । ‘ यत्र पूर्वे साध्याः सन्ति देवाः ’ इति । ‘साध्या वै नाम देवा’ इति । ‘साध्या वै नाम देवा आसन् ’। अथवा ब्राह्मणपरिव्राजकवत् । **सूक्ष्मं** मरुतो रुद्राङ्गिरस इत्येतदपेक्षया साध्यगणः सूक्ष्मः । साध्यग्रहणं चान्यासामप्यहविःसंबन्धिनीनां देवतानां वेनोस्तुनीतिरित्यादीनां प्रदर्शनार्थम् ।

अन्ये तु कर्मात्मनां देवानां प्राणिनामिति समानाधिकरणानि मन्यन्ते । कर्माणि आत्मा स्वभावप्रतिलम्भो येषां ते कर्मात्मानः । यागादिकर्मनिर्वर्तनपरत्वात् प्रधानतया वा कर्मात्मानः । काश्चिद्देवता यागादिकर्मण्येव स्वरूपत इतिहासे श्रूयन्ते । यथेन्द्रो रुद्रो विष्णुरिति । अन्यासां तु याग एव देवतात्वं न स्वरूपतः । अक्षाग्रावाणो रथाङ्गानि । न हि यथा भारते इन्द्रादीनां वृत्रादिभिरसुरैर्युद्धादि कर्म श्रूयते तथाऽक्षादीनां वर्ण्यते । अस्ति च सूक्ते हविःसंबन्धे तेषामपि देवतात्वम् । अक्षाणां ‘ प्रावेपामा ’ इति । ग्राव्णां ‘ प्रैते वदन्त्विति’ । ‘ वनस्पते वीड्वङ्ग ’ इति रथाङ्गानाम् । अत एव **प्राणिनामिति** । द्विविधा हि देवताः । प्राणवत्यस्तद्रहिताश्च । यथेन्द्रादयः पुरुषविग्रहाः प्राणवन्तः पुराणे वर्ण्यन्ते । नाक्षादय इतिहासदर्शना । अतश्चायं सर्वः सर्गादिप्रपञ्चः । चशब्दश्चात्र द्रष्टव्यः । प्राणिनामप्राणिनामपि । निरुक्तदर्शनेऽपि द्विविधा देवता । अश्वा ‘मानोऽमित्र’ इति । शकुनिः ‘कनिक्रददिति’ । गाव ‘ आगावो अग्मन्नि ’ ति । एताः प्राणवत्यः अप्राणा उक्ताः । **सनातनग्रहणं** यज्ञविशेषणं पूर्वकल्पेऽपि यज्ञस्य भावात्प्रवाहनित्यतया नित्यत्वम् ॥ २२ ॥

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ॥
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥ २३ ॥

तिस्र एव देवता अग्निप्रभृतय इति नैरुक्ताः सत्यप्यभिधाननानात्वे । अतस्तेन दर्शने-[1]नोच्यते । एताभ्यस्तिसृभ्यो यज्ञसिद्ध्यर्थं यागसंप्रदानत्वात्तासां चतुर्थी । त्रयमृग्यजुःसाम-

1 फ—दर्शनेनोच्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ळक्षणं ब्रह्म वेदाख्यं दुदोह । द्विकर्मकोऽयं धातुः । प्रधानं कर्मत्रयम् । अप्रधानेन द्वितीयेन कर्मणा भवितव्यम् । न च तदस्ति । अतः पञ्चम्येवेयमिति मन्यामहे । अग्न्यादिभ्यो दुदोहाक्षारयदभावयत् । कथं पुनरग्न्यादिभ्यो वर्णात्मा शब्दो मन्त्रवाक्यानि ब्राह्मणवाक्यानि च भवेयुः । किं नोपपद्यते ? कः शक्तीरदृष्टा असतीर्वक्तुमर्हति । नाख्यातार्थो विकल्पयितुं युक्तः । पञ्चमी तर्हि किमर्थं ? 'दुहि याचीति' द्वितीयया भवितव्यम् । किंच दृष्टप्रमाणविरोधी प्राक्कृतोऽर्थ उच्यमानो मनसः परितोषमाधत्ते । प्रामाणिकानां परिहृतो विरोधः । स्वरूपपरत्वाश्रयणेनैषामागमानामृग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यादिति । अग्न्यादयोऽपि देवता ऐश्वर्यभाजो निरतिशयशक्तिश्च प्रजापतिस्तत्र का नामानुपपत्तिः ? अस्मिन् दर्शने पञ्चम्यपि विवक्ष्या । अतः कारकाणि कथितान्यत्रापादानसंज्ञेत्यपादानविवक्षायां भाष्ये समर्थितानि । अन्यदर्शने कथं चतुर्थी तावद्युक्तैव । अर्थवादाश्चैते तत्र द्वितीयं कर्मात्मैव प्रजापतिरात्मानं दुदोह । दोहनं चाध्यापनं परसंक्रान्तिसामान्येन । अथापि पञ्चमी । तत्राप्याग्नेया मन्त्रा आदावृग्वेदे'ऽतोऽग्नेरजायते'त्युच्यते, यजुर्वेदेऽपि "इषेत्वोर्जेत्वेति" । इडन्नं तन्मध्यस्थानत्वाद्वायुना वर्षदानेन क्रियते । उर्क् प्राणः स वायुरेव । अत आदितो वायुकार्यसंबन्धाद्वायोरित्युपमा । अथवाऽऽध्वर्यवमार्त्विज्यं बहुप्रकाराश्चेष्टाश्च सर्वा वायोरित्यनेन सामान्येन वायोर्जन्म यजुर्वेदस्य । अनधिकारस्य सामगीत्ययोग्यत्वादुत्तमाध्ययनानि सामान्युत्तमस्थानश्चादित्य इति ॥ २३ ॥

कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा ॥
सरितः सागराञ्छैलान् समानि विषमाणि च ॥ २४ ॥

धर्मसामान्यादाह । द्रव्यात्मा कालो वैशेषिकाणां क्रियारूपोऽन्येषाम् । आदित्यादिगतिप्रतान आवृत्तिमान् । **कालविभक्तयो** विभागा मासर्त्वयनसंवत्सराद्याः । **नक्षत्राणि** कृत्तिकारोहिण्यादीनि । **ग्रहा** आदित्यादयः । **सरितो** नद्यः । **सागराः** समुद्राः । **शैलाः** पर्वताः । **समानि** स्थलान्येकरूपा भूभागाः खातप्रदरवर्जिताः । **विषमाणि** आरोहावरोहवन्ति ॥ २४ ॥

तपो वाचं रतिं चैव कामं च क्रोधमेव च ॥
सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः ॥ २५ ॥

रतिर्मनसः परितोषः । **कामोऽभिलाषो** मन्मथो वा । अन्यत्प्रसिद्धम् । एवमादिकां सृष्टिं ससर्जेमामत्रश्लोके पूर्वा च या सृष्टिरुक्ता । इमाः प्रजाः स्रष्टुमिच्छन् देवासुरयक्षराक्षसगन्धर्वाद्यास्तदुपकरणं तदात्मधर्मवच्छरीरं धर्मं चादावसृजदित्यर्थः । अथ केयं

१ ब—काः शक्तीरदृष्टा न सन्तीति वक्तुमर्हति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाचोयुक्तिः सृष्टिं ससर्जेति य एवार्थः सृष्टिं कृतवानिति । सर्वे धातवः करोत्यर्थस्य विशेषावच्छिन्ने वर्तन्ते । पचति पाकं करोति, यजति यागं करोति । तत्र कृदन्ताद्विशेषेऽवगत आख्यातगतो धातुः करोत्यर्थमात्रप्रतिपादनपरो भवति । तस्मिन्नपि कुतश्चित्प्रतिपन्ने पुनःप्रतिपादनेऽनुवाददोषो मा भूदिति कालकारकादिषु तात्पर्यम् । अथवा सृज्यमानविशेषाः प्रमाणावच्छिन्ना सृष्टिः सामान्यसृष्टेः कर्म; यथा स्वपोषं पुष्ट इति ॥ २५ ॥

कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयत् ॥
द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः ॥ २६ ॥

धर्माधर्मौ व्यवेचयद्विवेकेन पृथग्भावेन व्यवस्थापितवान् । अयं धर्म एवायमधर्म एव । ननु च नैवायं विवेकोऽस्ति । सन्ति हि कर्माण्युभयरूपाणि धर्माधर्मात्मकानि । यथाहुः शबलानि वैदिकानि कर्माणि हिंसासाधनकत्वात् । यथा ज्योतिष्टोमस्वरूपेण धर्मो हिंसाङ्गत्वात्त्वधर्म इति अत आह । **कर्मणां तु विवेकाय** । कर्मशब्देनात्र प्रयोगः कर्मणामनुष्ठानमुच्यते । स एव पदार्थोऽन्यथाप्रयुज्यमानो विपरीतस्वभावो भवति । धर्मः सन्नधर्मरूपतामापद्यतेऽधर्मो धर्मत्वम् । तथा हिंसैव हिंसा बहिःप्रयुज्यमाना अधर्मः सः 'न हिंस्यात्सर्वभूतानीति' प्रतिषेधगोचरत्वात् । अन्तर्वेदिकृता अग्नीषोमीये धर्मः विधिलक्षणत्वात् । एवं तयोर्धर्मस्तदेव तु दम्भेनासमर्थो न वा क्रियमाणमधर्मः । एवं देवरगमनं स्त्रीणामधर्मो, गुरुनियुक्तानां पुत्रार्थिनीनां घृताक्ताद्यनुग्रहेण धर्मः । अतः स्वरूपैकत्वेऽपि प्रयोगभेदाद्धर्माधर्मव्यवस्था । एकत्वं च प्रमाणान्तरदृष्ट्या तु स्वरूपभेद एव । अथ च कर्मफलेषु कर्मशब्दः कारणे कार्योपचारात् । तेनैतदुक्तं भवति । कर्माणि व्यवेचयत् कर्मफलविभागाय । कः पुनः कर्मणां फलविभागोऽत उक्तं द्वन्द्वैरयोजयत् सुखदुःखादिभिः । धर्मस्य फलं सुखमधर्मस्य दुःखम् । अत उभयकारिणो द्वन्द्वैर्योज्यन्ते धर्मकारित्वात्सुखेनाधर्मकारित्वाद्दुःखेन । द्वन्द्वशब्दोऽयं रूढ्या परस्परविरुद्धेषु पीडाकरेषु वर्तते शीतोष्णवृष्ट्यातपक्षुत्सौहित्यादिषु । आदिग्रहणं सामान्यविशेषभावेन ज्ञेयम् । केवलौ सुखदुःखशब्दौ स्वर्गनरकयोर्वाचकौ निरतिशयानन्दपरितापवचनौ वा । विशेषस्वर्गग्रामपुत्रपश्वादिलाभस्तदपहारश्चादिशब्दस्य विषयः । कर्मणां पूर्वमुत्पत्तिरुक्ताऽनेन तेषामेव प्रयोगविभागः फलविभागश्च प्रजापतिना कृत इति प्रतिपाद्यविवेकः ॥ २६ ॥

अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ॥
ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः ॥ २७ ॥

उपसंहारोऽयम् । दशार्धानां पञ्चानां महाभूतानां या **अण्व्यः** सूक्ष्मा **मात्रा** अवयवास्तन्मात्रास्ता **विनाशिन्यः**, परिणामधर्मित्वात् स्थौल्यप्रतिपत्त्या विनाशिन्य उच्यन्ते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताभिः सार्धमिदं जगत्सर्वं **सम्भवत्युत्पद्यते। अनुपूर्वशः** क्रमेण। सूक्ष्मात्स्थूलं स्थूलास्स्थूलतरम्। यादृशो वा क्रम उक्तः प्राक् ॥ २७ ॥

यं तु कर्मणि यस्मिन्स न्ययुङ्क्त प्रथमं प्रभुः ॥
स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः ॥ २८ ॥

अस्यायमर्थः। यद्यपि प्रजापतिरीश्वरो भूतसृष्टौ शक्नोति यथेच्छं प्राणिनः स्रष्टुं तथापि न पूर्वकल्पकृतानि कर्माण्यनपेक्ष्य प्राणिनः सृजति येन यादृशं पुराकल्पे कर्म कृतं तत्कर्माक्षिप्तायां जातौ तं जनयति। न जात्यन्तरे। शुभेन कर्मणा तत्फलोपभोग्यायां देवमनुष्यादिजातौ जनयति, विपरीतेन तिर्यक्प्रेतादिषु। यथैव भूतेन्द्रियगुणाः कल्पादौ प्रकृतिस्था उद्भवन्ति एवं कर्माण्यपि प्रलये स्वप्रकृतिस्थानि पुनरुद्भवन्ति सर्गादौ। 'ततः शेषेणे'त्येष न्यायस्तत्राप्यस्त्येव।

यदि तर्हि कर्मापेक्षोत्पत्तिः क्व प्रजापतेरैश्वर्यमुपयोगि कीदृशं वा सापेक्षमैश्वर्यं तस्मिन् सति जगत उत्पत्तेः। कथमनुपयोगः न तमन्तरेण स्थित्युत्पत्तिप्रलयाः सन्ति नित्यत्वात्तस्य स्वकृतान्यपि कर्माणि कारणं तदिच्छाऽपि प्रकृतिपरिणामश्च। एतस्याः कारणसामग्र्या इदं जगदुत्पद्यते तिष्ठति प्रलीयते च। सापेक्षस्याप्यैश्वर्यं न विहन्यते यथेह राजादिरीश्वरो भृत्यादीन् फलेन योजयेदेवमेवादिकर्मानुरूपेणैव योजयति। न चानीश्वरः।

ननु नास्य श्लोकस्यायमर्थः प्रतीयते। किं तर्हि प्रतीयते? विधातुरेव प्राणिनां कर्मविनियोगे स्वातन्त्र्यम्। स यं प्राणिनं प्रथमं सर्गादौ यस्मिन् कर्मणि हिंसात्मके तद्विपरीते वा न्ययुङ्क्त स तदेव कर्म भजते करोति न पित्रादेरनुशासनमपेक्ष्य स्वेच्छयाऽन्यथा प्रवर्तते। किं तर्हि प्राक्प्रजापतिनियोगवशात्साध्वसाधु वा स्वयमन्यानुशासननिरपेक्षोऽनुतिष्ठति। **सृज्यमानः** पुनर्जायमानः कल्पान्तरेऽस्मिन्नेव वा कल्पे प्रजापतिरेव क्षेत्रज्ञांस्तत्कर्तृत्वेन नियुङ्क्ते। अतस्तन्नियोगमेवानुवर्तमानाः प्राचीनं शुभमशुभं वा कर्म कुर्वन्ति। तदुक्तम्। "कर्तृत्वं प्रतिपद्यन्ते अनीशाः स्वेषु कर्मसु। महेश्वरेण प्रेर्यन्ते शुभे वा यदि वाऽशुभे" इति। "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा"। उच्यते। एवं सति कर्मफलसंबन्धस्त्यक्तः स्यात् पुरुषकारानर्थक्यं च स्यादग्निहोत्रादिकर्माद्युपदेशो ब्रह्मोपासनाश्च व्यर्थाः प्रसज्येरन्। य एवेश्वरस्वरूपानभिज्ञास्त एव दृष्टादृष्टार्थेषु कर्मसु प्रवर्तेरन्। ये तु तद्वर्तिनं कर्तृत्वं भोक्तृत्वं च मन्यन्ते तेषां सर्वत्राप्रवृत्तिप्रसङ्गः। कृतमपि न तत्कर्म फलति। अकर्तारोऽपि भोक्ष्यामह इति मन्यमाना उदासीरन्। न च व्याधिरिवापथ्याद्विदुषां बलादिच्छोपजायते कर्तृत्व ईश्वरप्रेरणया। अथ कर्मफलसृष्टया तदिच्छा निश्चिता अस्मात्कर्मण इदं कर्तृफलं भवतीति।

१ अ-ख-क-फ-सापेक्षस्यैश्वर्यं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न तर्हि 'यं तु कर्मणी'त्येतदपि शास्त्रादेव नियोगः प्रतिपत्तव्यः । तस्माद्यं पुरुषं स प्रभुः प्रथमं न्ययुङ्क्तानादौ संसारे प्रथमं वर्तमानापेक्ष्यं नियोक्तृत्वं चास्य सर्वभावेषु दिक्काल-निमित्तकारणत्वात् ।

अन्ये तु व्याचक्षते । जात्यन्तरापन्नस्यात्मनो न पूर्वं जातिसंस्कारापेक्षा अतः स्वभावानुवृत्तिः । यं जातिविशेषं यस्मिन्कर्मणि नियुक्तवान् परवधादौ स सिंहादिजातीय आत्मा संपन्नो मनुष्यत्वे मार्दवमभ्यस्तमपि हित्वा जातिधर्मं प्रतिपद्यते । अन्येनानुपदिष्टमपि स्वाभाव्यात्प्रजापतिकृतत्वात् कर्माणि बलवन्ति प्रागभ्यासं जात्यन्तरगतस्य विस्मारयन्तीति प्रदर्शितं भवति । एतदेव विस्तारयति ॥ २८ ॥

हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ॥
यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत् ॥ २९ ॥

हिंस्रं परप्राणवियोगकरं सर्पसिंहहस्त्यादि । तद्विपरीत**महिंस्रं** रुरुपृषतादि । **मृदु** पेशलमनायासम् । **क्रूरं** कठिनं परदुःखोत्पादनात्मकम् । अन्यत्प्रसिद्धम् । यदेतद्विशः प्रसिद्धं कर्म जातं ततो यस्य यदेव अदधाद्दत्तवान् कल्पितवान् स प्रजापतिः सर्गे सृष्ट्यादौ पूर्वकर्मानुरूप्यमवेक्ष्य तत्कर्मसंसृष्टः प्राणी स्वयमाविशत् प्रतिपद्यते । भूतकालता न विवक्षिता । आद्यत्वेऽपि जातिधर्मस्यानुपदिष्टस्य स्वयंप्रतिपत्तिदर्शनात् ॥ २९ ॥

यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्यये ॥
स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः ॥ ३० ॥

अत्र दृष्टान्तः । अचेतना अपि यथा भावास्तन्मर्यादयैव व्यवस्थितस्वभावाः एवं चेतना अपि पुरुषकृतकर्मसहायेन प्रजापतिना कृतां मर्यादां नातिक्रामन्ति । यस्यां जातौ जातास्तदेव कुर्वन्ति नान्यदिच्छन्तोऽपि शक्नुवन्ति कर्तुम् । **ऋतवो** वसन्तादयः **स्वलिङ्गानि** चिह्नानि पत्रफलकुसुमशीतोष्णवर्षादीनि । **पर्यये** यस्यर्तोर्यः पर्यायः स्वकार्यावसरस्तस्मिन् स ऋतुस्तं धर्मं स्वयमेव प्रतिपद्यते, न पुरुषप्रयत्नमपेक्षते । चूतमञ्जर्यो वसन्ते स्वयमेव पुष्प्यन्ति न मूले सलिलसेकमपेक्षन्ते । एवं पुरुषकर्माण्यदृष्टानि । नास्ति स पदार्थो यो न कर्मापेक्षते । तथाहि । वर्षाणां स्वस्वभावो यो वृष्टिप्रदो भवति च । राजदोषाद्राष्ट्रदोषाद्वा कदाचिदवग्रहः तस्मात्कर्मशक्तिरेवानपसार्या । वृत्तानुरोधादसकृदनुग्रहणम् ।

अन्ये तु श्लोकत्रयमप्यन्यथा व्याचक्षते । कर्मशक्तीनां स्वभावनियमोऽनेनोच्यत इत्याहुः । यत्फलं यस्मिन्कर्मण्याहितं प्रजापतिना स कर्मविशेषः पुनःपुनः सृज्यमानोऽनुष्ठीयमानः स्वयं तत्फलं भजते ददातीत्यर्थः । तेन यागः कृतो यदा फलिष्यति न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदा किंचिदन्यदपेक्षत इति प्रतिपादितं भवति । सर्वो हि स्वकृतावपि मन्त्रिपुरोहितादिवाक्यमपेक्षते । नैवं यागः । दृष्टस्तु व्यापारस्तेनापेक्ष्यते। दृष्टादृष्टकारणद्वयजन्यत्वात्सर्वस्य कार्यस्यादृष्टान्तरापेक्षा निषिध्यते तदानीम् । कर्माणीष्टानिष्टफलप्रदानि विधिप्रतिषेधविषयाणि । कर्माणि द्विश उदाहरति। **हिंस्राहिंस्रे** इति । हिंसा प्रतिषिद्धा। तस्या नरकादिफलप्रदानं नियमितम् । यो ब्राह्मणायावगुरेत् यो मामकायावगुरेत्तं शतेन यातयादिति वाक्यशेषेभ्यः सा ततः स्वभावान्न च्यवते । प्रायश्चित्तेषु विशेषं वक्ष्यामः । अहिंस्रं विहितम् । तस्यापि नेष्टफलदानात् स्वभावच्युतिरस्ति । धर्माधर्मयोरेव विशेषायते। विहितं कर्म धर्मः, प्रतिषिद्धमधर्मस्तयोर्विशेषाः सत्याऽनृतादयः । सत्यं विहितमनृतं प्रतिषिद्धम् । एवं सर्वाणि पूर्वोत्तरपदानि विहितप्रतिषिद्धविशेषप्रदर्शनानि । अव्यभिचरितदृष्टकार्यकारणसंबन्धीनि कर्माणि । दृष्टान्तः यथर्तुलिङ्गानीति । शेषं समानम् ॥ ३० ॥

लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ॥
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ॥ ३१ ॥

पृथिव्यादीनां **लोकानां विवृद्ध्यर्थं** वृद्धिः पुष्टिर्बाहुल्यं वा ब्राह्मणादिषु चतुर्षु वर्णेषु सत्सु त्रयाणां लोकानां वृद्धिः । इतः प्रदानं देवा उपजीवन्ति । ते च यागाद्यधिकृता[1] अतस्तैः कर्म कृतमुभौ लोकौ वर्धयति । पुरुषकर्मप्रचोदिता देवाः । 'आदित्याज्जायते वृष्टिरिति' अस्यापि लोकस्य सृष्टिर्वृद्धिः । ब्राह्मणादीन् वर्णान्निरवर्तयन्निर्वर्तितवान् असृजन्मुखबाहूरुपादतः । यथाक्रमं मुखाद्ब्राह्मणं, बाहुभ्या राजन्यं, ऊरुभ्यां वैश्यं, शूद्रं पादत इति । तसिः अपादाने। कारणात्कार्यं निष्कृष्यत इवेति भवति अपाये सति अपादानत्वम्। आद्यं कंचिद्ब्राह्मणं स्वमुखावयवेभ्यो दैव्या शक्त्या निर्मितवान् । अद्यतनानां सर्वेषां मिथुनसंप्रयोगद्वारेण तत्त्वेभ्य उत्पत्तिदर्शनात् । परमार्थतः स्तुतिरेषा वर्णानामुत्कर्षापकर्षप्रदर्शनार्थम् । सर्वेषां भूतानां प्रजापतिः श्रेष्ठस्तस्यापि सर्वेषामङ्गानां मुखं ब्राह्मणोऽपि सर्वेषां वर्णानां प्रशस्यतमः । एतेन सामान्येन ब्रह्ममुखादुत्पन्न इत्युच्यते। मुखकर्माध्यापनाद्यतिशयाद्वा मुखत इत्युच्यते । क्षत्रियस्यापि बाहुकर्म युद्धं वैश्यस्याप्यूरुकर्म पशुरूपं रक्षतो[2] गोभिश्चरन्तीभिर्भ्रमणं[3] स्थलपथवारिपथादिषु वाणिज्यायै गमनम् । शूद्रस्य पादकर्मशुश्रूषा ॥ ३१ ॥

द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत् ॥
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥ ३२ ॥

एषा सृष्टिः साक्षात्परस्य पुरुषस्य । इयं तु ब्रह्मणस्तस्यैवेत्यन्ये । यत्तदन्तरण्डं समुद्गतं शरीरं तद्द्विधा कृत्वाऽर्धेन पुरुषोऽभवत् पुमान्संपन्नः शुक्रसेकसमर्थोऽर्धेन नारी गौरीश्वर-

---

१ अ-क-ख-फ—चेतनायोगाद्यधिकृता । २ ङ-पशून् रक्षतो । ३ ङ-प्रयाणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भङ्ग्या। अथवा पृथगेव तां निर्मितवान्। तां निर्माय तस्यां मैथुनेन धर्मेण विराडिति यस्य नाम प्रसिद्धं तं जनितवान्। एतदुच्यते। प्रजापतिः स्वां दुहितरमगच्छत्। इदमपि जायापत्योः शरीरमात्रभेदात् सर्वत्र कार्येष्वविभागात् तदालम्बनं द्वैधंकारवचनम् ॥ ३२ ॥

तपस्तप्त्वाऽसृजद्यं तु स स्वयं पुरुषो विराट् ॥
तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः ॥ ३३ ॥

स विराट् तपस्तप्त्वा **यं पुरुषमसृजत् तं मां वित्त** जानीध्वम्। एवं स्मृतिपरंपरया नात्र वः किञ्चिदविदितं मम वर्णयितव्यमस्ति। तन्मध्ये शुद्धिमात्मन आचष्टे। अस्य सर्वस्य स्रष्टारमनेन सर्वशक्तिमाह। जन्मकर्मातिशयवन्तं मां प्रत्ययितेरीकरिष्यतीत्यभिप्रायः। निश्चयोत्पत्त्यर्थं चान्यतोऽवगतेऽपि मनुजन्मनि स्वयमभिधानात्। यथाऽन्यतः श्रुतोऽपि कश्चित् पृच्छ्यते, 'देवदत्तस्य त्वं पुत्र' इति, 'बाढमिति' तेनोक्ते निश्चय उपजायते। अभिजनवर्णनं कवीनामत्रपाकरं सत्यामपि पारंपर्येणात्मस्तुतौ। **द्विजसत्तमा** इत्यामन्त्रणम्। सत्तमाः साधुतमाः श्रेष्ठा इति यावत् ॥ ३३ ॥

अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् ॥
पतीन्प्रजानामसृजं महर्षीनादितो दश ॥ ३४ ॥

अहमसृजमुत्पादितवान्। दशप्रजापतीन्महर्षीन्। आदितः सुदुश्चरं तपः कृत्वा सुष्ठु दुःखेन तपश्चर्यतेऽतिपीडाकरं बहुकालं च। तान्महर्षीन्नामतो निर्दिशति ॥ ३४ ॥

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥
प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ॥ ३५ ॥

एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः ॥
देवान् देवनिकायांश्च महर्षींश्चामितौजसः ॥ ३६ ॥

एते महर्षयः **सप्तान्यान्मनूनसृजन्**। अधिकारशब्दोऽयं मनुरिति। मन्वन्तरे यस्य प्रजासर्गे तत्स्थितौ वाऽधिकार उक्तेन प्रकारेण स मनुरित्युच्यते। **भूरितेजस अमितौजस** इति चैक एवार्थः। एकं प्रथमान्तं स्रष्टुर्विशेषणम्। द्वितीयं द्वितीयान्तं स्रष्टव्यानां मन्वादीनां विशेषणम्। ननु देवा ब्रह्मणैव सृष्टाः। सत्यं, न सर्वे। अपरिमिता हि देवसंघाताः। **देवनिकाया** हि देवस्थानानि स्वर्गलोकब्रह्मलोकादीनि ॥ ३६ ॥

यक्षरक्षःपिशाचांश्च गन्धर्वाप्सरसोऽसुरान् ॥
नागान् सर्पान् सुपर्णांश्च पितॄणां च पृथग्गणान् ॥ ३७ ॥

यक्षादीनां स्वरूपभेदश्चेतिहासादिप्रमाणक एव न प्रत्यक्षादीनामन्यतमेन प्रमाणेन परि-

१ तत्र। २ ख--प्रत्ययैव तरीकरिष्यति।

For Private And Personal Use Only

च्छिद्यते । तत्र वैश्रवणानुचरा यक्षाः । रक्षांसि बिभीषणादयः । तेभ्यः क्रूरतराः पिशाचाः । अशुचिमरुदेशादिवासिनो निकृष्टा यक्षराक्षसेभ्यः । हिंस्रास्तु सर्व एव । छद्मकरणेन केचित् प्राणिनां जीवमाकर्षन्त्यदृष्टया शक्त्या व्याधींश्च जनयन्तीत्यैतिहासिका मन्त्रवादिनश्च । **गन्धर्वा** देवानुचरा गीतनृत्तप्रधानाः । **अप्सरसो** देवगणिका उर्वश्याद्याः । **असुरा** देवशत्रवो वृत्रविरोचनहिरण्याक्षप्रभृतयः । **नागा** वासुकितक्षकादयः । **सर्पाः** प्रसिद्धाः । **सुपर्णाः** पक्षिविशेषा गरुत्मत्प्रभृतयः । **पितरः** सोमपाज्यपादिनामानः । स्वस्थाने देववद्वर्तन्ते तेषां गणमसृजन् ॥ ३७ ॥

विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ॥
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ॥ ३८ ॥

मेघोदरं दृश्यं मध्यमं ज्योतिर्विद्युदुच्यते । यस्यास्तडित्सौदामिनीत्यादयः पर्याया विशेषाश्रयाः । **अशनिः** शिलाभूता हिमकणिका सूक्ष्मदृश्यश्च वर्षधारादिवत्पतन्त्यो वेगवद्वातप्रेरिताः सस्यादिविनाशिन्य उच्यन्ते । **मेघा** अभ्रोदकमरुज्ज्योतिःसंघाता आन्तरिक्षाः । **रोहितं** दण्डाकारमन्तरिक्षे नीललोहितरूपं कदाचित् दृश्यते । आदित्यमण्डललग्नं कदाचित् । कदाचित्प्रदेशान्तरेऽपि । तस्यैव विशेष इन्द्रधनुः वक्रत्वं धनुराकारताऽधिकाऽस्य । **उल्का** संध्याप्रदोषादौ विसारिप्रभाण्युत्पाते दिक्षु पतन्ति यानि ज्योतींषि दृश्यन्ते । **निर्घातः** भूम्यन्तरिक्ष उत्पातशब्दः । **केतव** उत्पाते दृश्यमानानि शिखावन्ति ज्योतींषि प्रसिद्धानि । अन्यान्यपि ध्रुवागस्त्यारुन्धतीप्रभृतीनि नानाप्रकाराणि ॥ ३८ ॥

किंनरान्वानरान्मत्स्यान् विविधांश्च विहङ्गमान् ॥
पशून् मृगान्मनुष्यांश्च व्यालांश्चोभयतोदतः ॥ ३९ ॥

अश्वमुखाः प्राणिनो हिमवदादिपर्वतेषु भवन्ति ते **किंनराः** । **वानरा** मर्कटमुखा पुरुषविग्रहाः । **विहङ्गमाः** पक्षिणः । अजाविकोष्ट्रगर्दभादयः **पशवः** । **मृगा** रुरुपृषतादयः । **व्यालाः** सिंहव्याघ्रादयः । द्वे दन्तपंक्ती उत्तराधरे येषां भवतस्ते **उभयतोदतः** ॥ ३९ ॥

कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम् ॥
सर्वं च दंशमशकं स्थावरं च पृथग्विधम् ॥ ४० ॥

कृमयोऽत्यन्तसूक्ष्मा प्राणिनः । **कीटास्तेभ्य** ईषत्स्थूला भूमिचराः । **पतङ्गाः** शलभपक्षकादयः । **स्थावरं** वृक्षपर्वतादिः । **पृथग्विधं** नानाप्रकारम् । क्षुद्रजन्तव इत्येकवद्भावः ॥ ४० ॥

---

१ ख–छद्मना । २ अ–ख–क–ज–फ–केनचित् । ३अमरकोशे १।३।९ । ४ ढ–हिंस्रा व्याघ्रादयः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः ॥
यथाकर्म तपोयोगात् सृष्टं स्थावरजङ्गमम् ॥ ४१ ॥

एवमिति प्रक्रान्तप्रकारप्रत्ययपरामर्शः । **एतैर्महात्मभिर्मरीच्यादिभिः । इदं सर्वं स्थावरजंगमं सृष्टम् । यथाकर्म** यस्य जन्मान्तरे यादृशं कर्म तदपेक्षम् । यस्यां जातौ यस्य तु युक्तमुत्पत्तुं कर्मवशात्स तस्यामेवोत्पादितः । **मन्नियोगान्**मदाज्ञया । **तपोयोगा**न्महत्कृत्वा तपः । यावत्किंचिन्महदैश्वर्यं तत्सर्वं तपसा प्राप्यमित्येतदनेनाह ॥ ४१ ॥

येषां तु यादृशं कर्म भूतानामिह कीर्तितम् ॥
तत्तथा वोऽभिधास्यामि क्रमयोगं च जन्मनि ॥ ४२ ॥

येषां भूतानां यादृशं कर्म स्वभावतो हिंस्रमहिंस्रं वा तद्वत्तथैव **कीर्तितम्** । इदानीं **जन्मक्रमयोगमभिधास्यामि** । क्व पुनः कर्म कीर्तितं यत्रेदं यक्षरक्ष इत्यादि नामनिर्देशो न कर्मनिर्देशः । उच्यते नामनिर्देशादेव कर्मावगतिः कर्मनिमित्तत्वादेषां नामप्रतिलम्भस्य । तथाहि । यक्षणाद्भक्षणादशनाद्वा यक्षाः । रहसि क्षणनाद्रक्षांसि । पिशिताशनात्पिशाचाः । अद्भ्यः सृता इत्यप्सरसः । अमृताख्यायाः सुराया अलाभादसुरा । इत्याद्यप्यूह्यम् । **जन्मनि** क्रमयोगो जरायुजाण्डजा इत्यादि वक्ष्यते ॥ ४२ ॥

पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः ॥
रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥ ४३ ॥

एते **जरायुजाः** जरायुरुल्बं गर्भशय्या । तत्र प्रथमं ते संभवन्ति । ततो मुक्ता जायन्ते । एष एतेषां जन्मक्रमः । दन्तशब्दसमानार्थो दत्शब्दोऽन्योऽस्तीत्युभयतोदत इति प्रथमाबहुवचने रूपं युज्यते ॥ ४३ ॥

अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः ॥
यानि चैवंप्रकाराणि स्थलजान्यौदकानि च ॥ ४४ ॥

नक्राः शिशुमारादयः । **कच्छपः** कूर्मः । **यानि चैवंप्रकाराणि** कृकलासादीनि **स्थलजानि** । एवं रूपाण्यौदकानि जलजानि शङ्खादीनि ॥ ४४ ॥

स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् ॥
ऊष्मणश्चोपजायंते यच्चान्यत्किंचिदीदृशम् ॥ ४५ ॥

स्वेदः पार्थिवानां द्रव्याणामग्न्यादित्यादितापसंबन्धादन्तःक्लेदस्ततो जायते **दंशमशकादि** । अन्यदपि यदीदृशमत्यन्तसूक्ष्मं पुत्तिकापिपीलिकादि यदूष्मण उपजायते ।

---

१ ङ-प्रकारप्रत्ययमर्शः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऊष्मास्वेद एव तद्धेतुर्वा तापः । 'उपजायन्तेति' वा पाठः । ये चान्ये केचिदीदृशा इति पठितव्यम् ॥ ४५ ॥

उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः ॥
ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥ ४६ ॥

उद्भेदनमुद्भित् । भावे क्विप् । ततो जायन्त इति **उद्भिज्जाः** । उप्तं बीजं भूमिं च भित्त्वा विदार्य जायन्ते वृक्षाः । सर्वे बीजात्काण्डाच्च प्ररोहन्ति जायन्ते मूलस्कन्धादिना दृढीभवन्ति । **तथौषध्यः** औषधय इति युक्तमीकारः । 'कृदिकारादिति' छान्दसो वा । इदं तासां स्वाभाविकं कर्म । **पाकान्ताः** फलपाकः अन्तो नाश आसामिति । पक्वे फले व्रीह्यादयो नश्यन्ति, बहुना च पुष्पफलेनोपगताः युक्ता भवन्ति । औषधीनां वृक्षाणां च यथासंभवमेतद्विशेषणम् ॥ ४६ ॥

अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ॥
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥ ४७ ॥

विना पुष्पेण फलं जायते येषां ते वनस्पतयः कथ्यन्ते, न वृक्षाः । पुष्पिणः फलिनश्च वृक्षा उभययोगात् क्वचिद्वनस्पतयो वृक्षा अपि उच्यन्ते, वृक्षाश्च वनस्पतयोऽपि । तत्र विशेषहेतुत्वं दर्शयिष्यामः । वयं तु ब्रूमः । नायं शब्दार्थसंबन्धविधिर्व्याकरणस्मृतिवत् । तेन नायमर्थो य एवंस्वभावास्ते वनस्पत्यादिशब्दवाच्याः, किं तर्हि पुष्पफलानां जन्मोच्यते। तस्य वक्तव्यतया प्रकृतत्वात् 'क्रमं योगं तु जन्मनीति' । द्विधा फलानामुत्पत्तिः । अन्तरेण पुष्पाणि जायन्ते पुष्पेभ्यश्च, एवं पुष्पाणि वृक्षेभ्यश्च । तेन यद्यप्येवमभिधानं ये फलिनस्ते वनस्पतयो ज्ञेयास्तथापि प्रकरणसामर्थ्याद्यत्तदोर्व्यत्ययः कर्तव्यः । ये वनस्पतय इति एवं प्रसिद्धास्तेऽपुष्पाः फलवन्तस्तेभ्यः पुष्पमन्तरेण फलानि जायन्ते इति सामर्थ्याच्चायं क्रमोऽवतिष्ठते । यथा 'वाससा स्तम्भं परिवेष्टयेति' वाससि परिधातव्येऽयमर्थोऽस्य भवति । स्तम्भे निधाय वासः परिधापयेति । प्रसिद्धमप्येतदनूद्यते 'तमसा बहुरूपेणेत्ये'तत्प्रतिपादयितुम् ॥ ४७ ॥

गुच्छगुल्मं तु विविधं तथैव तृणजातयः ॥
बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च ॥ ४८ ॥

याः संहता भूमेर्बद्धा एकमूला अनेकमूलाश्च लता उत्तिष्ठन्ति न च वृद्धिं महतीं प्राप्नुवन्ति तासां संघातो गुच्छगुल्मशब्दवाच्यः । तृणमूलकादिस्तयोस्तु भेदः । पुष्पवदपुष्पकृतो वाऽन्या वा तृणजातयः कुशशाद्वलशङ्खपुष्पीप्रभृतयः । प्रताना दीर्घा भूमिगतास्तृण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्ररोहाः । वल्ल्यो व्रतत्यः भूमेरुत्पत्य वृक्षमन्यं वा कंचित्परिवेष्ट्योर्ध्वमारुहन्ति । सर्वमेतत् वृक्षवत् बीजकाण्डरुहम् ॥ ४८ ॥

तमसा बहुरूपेण वेष्टिताः कर्महेतुना ॥
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥ ४९ ॥

कर्म अधर्माख्यं हेतुर्यस्य तमसस्तेन वेष्टिता व्याप्ताः । **बहुरूपेण** विचित्रदुःखानुभवनिमित्तेन । यद्यपि सर्वं त्रिगुणं तथाऽप्येषांतम उद्रिक्तम् । अपचिते सत्त्वरजसी । अतस्तमोबाहुल्यान्नित्यं निर्वेददुःखादियुक्ता अधर्मफलमनुभवन्तः सुचिरमासते । सत्त्वस्यापि तत्र भावात् कस्यांचिदवस्थायां सुखलेशमपि भुञ्जते । तदाह । **सुखदुःखसमन्विता इति । अन्तःसंज्ञा** बुद्धिस्तल्लिङ्गस्य बहिर्विहारव्याहारादेः कार्यस्य चेष्टारूपस्याभावादन्तःसंज्ञा उच्यन्ते । अन्यथाऽन्तरेव सर्वः पुरुषश्चेतयते । अथवा यथा मनुष्याः कण्टकादितोदं प्राक् चेतयन्ते नैवं स्थावराः ते हि महान्तं प्रतोदं परशुविदारणादिदुःखसंज्ञायामपेक्षन्ते । यथा स्वापमदमूर्च्छावस्थागताः प्राणिनः ॥ ४९ ॥

एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः ॥
घोरेऽस्मिन् भूतसंसारे नित्यं सततयायिनि ॥ ५० ॥

एषोऽन्तोऽवसानं वल्लीगतिर्यासां गतीनां ता **एतदन्ताः** कृतकर्मफलोपभोगार्थमात्मनस्तच्छरीरसंबन्धो **गतिरुच्यते** । अस्याः स्थावरात्मिकाया गतेरन्या निकृष्टा दुःखबहुला गतिर्नास्ति । ब्रह्मगतेश्चान्याऽऽद्योत्तमा गतिरानन्दरूपा नास्ति । एता गतयः शुभाशुभैः कर्मभिर्धर्माधर्माख्यैः प्राप्यन्ते । परब्रह्मावाप्तिस्तु मोक्षलक्षणा केवलानन्दरूपा ज्ञानात् ज्ञानकर्मसमुच्चयाद्वेति वक्ष्यामः । **भूतसंसारे** भूतानां क्षेत्रज्ञानां संसारे जन्ममरणप्रबन्धे जात्यन्तरागमने । **घोरे** प्रमादालस्यवतां भीषणे । इष्टवियोगानिष्टयोगोत्पत्त्या सततं सर्वकालं गमनशालिनि विनाशिन्यसारेऽपि **नित्यं** घोरेन कदाचिदघोरे । देवादिगतिष्वपि सुचिरं स्थित्वा मर्तव्यमिति नित्यं घोरः । तदनेन धर्माधर्मनिमित्तत्वसंवर्णनेन संसारस्य शास्त्रस्य महाप्रयोजनता प्रतिपादिता भवति । शास्त्राद्धि धर्माधर्मयोर्विवेकज्ञानमित्यध्येतव्यम् ॥ ५० ॥

एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः ॥
आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् ॥ ५१ ॥

एवं किंचित्साक्षात्किंचित्प्रजापतिनियोगेन स भगवान् **सर्वमिदं** जगत्सृष्ट्वोत्पाद्य **मां** च जगत्स्थितौ नियोज्य स्वेऽन्तरेऽचिन्त्य आश्चर्यरूपो महान् प्रभावः पराक्रमः सर्वविषयाशक्तिर्यस्य स सृष्ट्वाऽन्तर्दधेऽन्तर्धानं कृतवानिच्छागृहीतं शरीरं योगशक्त्योज्झित्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरप्रकाशः संवृत्तः । **आत्मनीति** । यथाऽन्ये भावाः प्रकृतावन्तर्धीयन्त एवं सोऽन्यत्रेत्येवं न । किं तर्ह्यात्मन्येव प्रलीनः । न हि तस्यान्या प्रकृतिरस्ति यत्रान्तर्धीयेत सर्वभूतानां तत्प्रकृतित्वात् । जगत्सर्वव्यापारनिवृत्तिर्वाऽन्तर्धानम् । **भूयः कालं कालेन पीडयन्** । सृष्ट्वेत्येतत्क्रियापेक्षः शताद्दष्टव्यः प्रलयकाले सर्गस्थितिकालेन विनाशयन् । **भूयः** पुनरित्यर्थः । वक्ष्यति 'अनन्ताः सर्गसंहारा' इति ॥ ५१ ॥

यदा स देवो जागर्ति तदेवं चेष्टते जगत् ॥
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥ ५२ ॥

स देवो यदा जागर्ति यदेतदिच्छतीदं जगदुत्पद्यतामेतां स्थितिं च कालमियन्तं लभतामिति तदा चेष्टते । मानसवाचिकभौतिकैर्व्यापारैरान्तरैर्बाह्यैश्च श्वासप्रश्वासाहारविहारकृषियागादिभिर्युक्तं भवति । **यदा स्वपिति** यदा निवृत्तेच्छो भवति जगत्सर्गस्थितिभ्यां तदा सर्वं निमीलति प्रलयं प्राप्नोति । जागर्यास्वापश्च प्रजापतेरिच्छा प्रवृत्तिनिवृत्ती उच्येते । शान्तात्मत्वं भेदावस्थोपसंहारः ॥ ५२ ॥

तस्मिन् स्वपति तु स्वस्थे कर्मात्मानः शरीरिणः ॥
स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छति ॥ ५३ ॥

पूर्वव्याख्यानश्लोकोऽयं विस्पष्टार्थः । **स्वस्थे** सुस्थिरे । शान्तात्मवच्छुद्धरूपे स्वात्मन्यवस्थानमौपाधिकभेदनिवृत्तिः । कर्मात्मानः कर्मप्रधानाः संसारिणः क्षेत्रज्ञाः शरीरिणः कर्मसंबन्धेन शरीरसंबन्धानुभावादेवमुच्यन्ते । तस्मिन्स्वपति शयाने स्वकर्मभ्यो निवर्तन्ते । शरीरचेष्टानिवृत्तिरेतेनोच्यते । **मनश्च ग्लानिमृच्छति** । एतेनान्तरव्यापारनिवृत्तिः । अतो बाह्यान्तरव्यापारनिवृत्त्या प्रलयः प्रतिपादितो भवति । ग्लानिर्निरुत्साहः स्वव्यापारान्निःशक्ततामृच्छति प्राप्नोति ॥ ५३ ॥

युगपत्तु प्रलीयन्ते यदा तस्मिन्महात्मनि ॥
तदाऽयं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ॥ ५४ ॥

यत्तदोर्व्यत्ययेनायं श्लोको व्याख्यातव्यः । अन्यथा पूर्वश्लोकापेक्षयेतरेतराश्रयः प्रसज्येत । एतदुक्तम् । यदा स्वपिति तदा निमीलति सर्वम् । सुखं स्वपिति निर्वृतः सुखस्वरूपमेव परं ब्रह्म न तस्य स्वापावस्थायां सुखमन्यदा दुःखम् । स्वापश्च तस्य यादृशः स प्रागुक्त एव । निर्वृतिश्च तस्य सर्वकालम् । न ह्यसौ परमात्माऽविद्योपप्लवतरङ्गैरामृश्यते । केवलसुखमयस्तस्य सर्वस्य कर्तृत्वं उपपद्यते । यथाऽयं पुरुष उपरतो गृहकृत्येभ्यः कृतकृत्यतयाऽर्जितं मया धनं गृहोपयोगि निरुपद्रवश्चास्मि संवृत्त इत्येवं सुखं स्वपीति निर्वृतो निरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शङ्कात्मबाध एवमुपमीयतेऽसावपि । तस्यापीदं जगत् कुटुम्बभूतमिति प्रशंसा । प्रधानविषयो वाऽयं श्लोको वर्णनीयः । तदा प्रधानं स्वपिति । यदा युगपत्सर्वाणि भूतानि तत्र प्रलीयन्ते तदात्मतां कारणरूपतामापद्यन्ते विकारावस्थामुद्गच्छन्ति युगपद्यावन्ति त्रैलोक्योदरवर्तीनि । स्वापश्च परिणामानिवृत्तिर्न पुनर्ज्ञानोपसंहृतिः अचेतनस्य प्रधानस्य । सुखं चोपचारतोऽचेतनत्वादेव ॥ ५४ ॥

तमो यं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः ॥
न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥ ५५ ॥

इदानीं संसारिणः पुरुषस्य मरणं देहान्तरप्राप्तिश्चाभ्यां श्लोकाभ्यां कथ्यते । **तमो** ज्ञाननिवृत्तिस्तां **समाश्रित्य चिरं तिष्ठ**त्यास्ते **सेन्द्रियः । न च स्वं कुरुते कर्म** श्वासप्रश्वासादिकं । तदा **मूर्तितः** शरीरादु**त्क्रामति** गच्छति ।

ननु च सर्वगत आत्माऽऽकाशवद्विभुस्तस्य कीदृश्युत्क्रान्तिः? कर्मोपार्जितशरीरत्याग एवोत्क्रान्तिः । न पुनर्मूर्तस्यैवार्थस्य देशाद्देशान्तरगमनम् । अथवा कैश्चिदिष्यते अस्त्यन्यदन्तराभवं शरीरं सूक्ष्मं यस्येयमुत्क्रान्तिः । अन्यैस्त्वन्तराभवदेहो नेष्यते । यथाह भगवान्व्यासः । "अस्मिन्देहे व्यतीते तु देहमन्यन्नराधिप । इन्द्रियाणि वसन्त्येव तस्मान्नास्त्यन्तराभवः ।" **सांख्या** अपि केचिन्नान्तराभवमिच्छन्ति विन्ध्यवासप्रभृतयः । कोऽयमन्तराभवो नामास्मिञ्छरीरे नष्टे मातृकुक्ष्यादिस्थानं द्वितीयशरीरग्रहणार्थं यावन्न प्राप्तं तावदन्तरा निरुपयोगिशरीरमुपजायते सूक्ष्मं यस्य न क्वचित्संयोगो नाग्न्यादिदाहो न महाभूतैः प्रतिबन्धः । अन्ये तु मूर्तिं परमात्मानमाहुः । सर्वात्मरूपः परमात्मा समुद्रस्थानीयस्ततः प्रादुर्भवन्ति जीवा अविद्यावशाद्भेदमुपयन्ति महोदधेरिवोर्मयः । तस्य च ततो निष्क्रामतः पुर्यष्टाकाख्यं लिङ्गमभ्युपगम्यते । धर्माधर्मपूर्वकृतवशात्प्रत्येकस्य जीवस्य वासःस्थानीयं सूक्ष्मं शरीरम् । यथा **पुराण** उक्तम् । "पुर्यष्टकेन लिङ्गेन प्राणाख्येन स युज्यते । तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन तु" ॥ ते च प्राणापानव्यानोदानसमानाः पञ्चबुद्धीन्द्रियवर्ग एवं कर्मेन्द्रियवर्गोऽष्टमं मन इत्येतत्पुर्यष्टकम् । तच्छरीरं न नश्यति आमोक्षावस्थायाः । तदुक्तं "संसरति निरूपभोगभावैरधिवासितं लिङ्गम्" ॥ ५५ ॥

यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च ॥
समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति ॥ ५६ ॥

अण्व्यः सूक्ष्मा मात्रा अवयवा यस्य सोऽणुमात्रिकः । पुर्यष्टकमन्तराभवदेहो वा । स्वभावत एव वाऽऽत्मा नः । सूक्ष्माः यथोक्तम् । "स एष आत्माऽन्तर्हृदयेऽणीयानित्यादि

१ ड—अविकारावस्थामापद्यन्ते । २ ड—नीरूपभोगं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बीजं शरीरोत्पत्तिकारणम् । **स्थास्नु** वृक्षादिजन्महेतुभूतम् । **चरिष्णु** जङ्गमम् । **समाविश**त्यधितिष्ठति प्रतिनिबध्यते । यदा तेन **संसृष्टः** प्राणादिभिस्तदा मूर्तिं विमुञ्चत्याबध्नाति शरीरं गृह्णातीत्यर्थः ॥ ५६ ॥

एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम् ॥
संजीवयति चाजस्रं प्रमापयति चाव्ययः ॥ ५७ ॥ ९

उपसंहारः पूर्वोक्तस्य । आत्मसंबन्धिभ्यां जाग्रत्स्वप्नाभ्यां चराचरं स्थावरं जङ्गमं जीवयति मारयति च जगत् । अव्ययोऽविनाशी ॥ ५७ ॥

इदं शास्त्रं तु कृत्वाऽसौ मामेव स्वयमादितः ॥
विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन् ॥ ५८ ॥

इह शास्त्रशब्देन स्मार्तो विधिप्रतिषेधसमूह उच्यते । न तु ग्रन्थस्तस्य **मनुना** १०
कृतत्वात् । तथा हि मानव इति व्यपदेशोऽस्य इतरथा हि हैरण्यगर्भ इति व्यपदिश्येत । केचित्तु हिरण्यगर्भेणापि कृते ग्रन्थे मनुना बहूनां प्रकाशितत्वात्तेन व्यपदेशो युज्यत एव । यथा हिमवति प्रथममुपलभ्यमाना गङ्गाऽन्यतोऽप्युत्पन्ना हैमवतीति व्यपदिश्यते, यथा च नित्यं दर्शनात्काठकं प्रवचनं कठेन व्यपदिश्यते । सत्स्वप्यन्येष्वध्येतृष्वध्यापयितृषु च प्रवचन-
प्रकर्षात्कठेन व्यपदेशः । **नारदश्च** स्मरति । 'शतसाहस्रोऽयं ग्रन्थः प्रजापतिना कृतस्ततः १५
स मन्वादिभिः क्रमेण संक्षिप्त'इति । अतोऽन्यकृतत्वेऽपि मानवव्यपदेशो न विरुद्धः । **शास्त्रशब्देन** ग्रन्थाभिधानमपि शासनरूपार्थप्रतिपादकत्वाद्दृष्टमेव । मामेव ग्राहयामासाहं तेनाध्यापित इत्यर्थः । स्वयमादितो विधिवदित्येभिः पदैरागमस्याविभ्रंश उच्यते । ग्रन्थकारेण हि स्वकृतो ग्रन्थो यः स्वयमध्याप्यते प्रथमं तत्र मात्राऽपि न परिहीयते । अन्यस्य
हि तस्मादधिगतवतोऽन्यमध्यापयतो न तद्ग्रन्थाविनाशे यत्नो भवति कर्तुरप्यध्यापित- २०
पूर्वस्य प्रतिष्ठापितो मया पूर्वमयं ग्रन्थ इति द्वितीयवारं प्रमादालस्यादिना भ्रंशः संभाव्यत अत आदित इत्युक्तम् । विधिवच्छिष्योपाध्याययोरनन्यमनस्कतादिगुणोऽवहितचित्तता विधिः । अर्हे वतिः । मरीच्यादींस्त्वहं मुनीन्मरीच्यादयः प्रसिद्धप्रभावास्तैरप्येतन्मत्सकाशादधीतमित्यात्मनो विशिष्टशिष्यसंबन्धेन सिद्धमौपाध्यायिकं दर्शयन्महर्षीणां शास्त्रमाहा-
त्म्येन च श्रद्धातिशयं जनयत्यध्ययनाविरामाय । एवंविधमेतन्महच्छास्त्रं यन्मरीच्यादिभि- २५
रप्यधीतम् । एष चेदृशो महात्मा मनुस्तेषामुपाध्याय इति युक्तमेतस्य सकाशादेतद्ग्रन्थाध्ययनमित्याशास्त्रपरिसमाप्तेर्नोपरमन्ते श्रोतार इत्युभयथाऽपि शास्त्रप्रशंसा ॥ ५८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः ॥
एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ॥ ५९ ॥

एतच्छास्त्रं वो युष्माकमयं **भृगुरशेषतः** सर्वं **श्रावयिष्यति** कर्णपथं नेष्यत्यध्यापयिष्यति व्याख्यास्यति च । एतच्छास्त्रस्यैतदा प्रत्यवमर्शः । **एतच्छास्त्रमेव मुनिरखिलमशेषं मत्तो** मत्सकाशादधिजगेऽधिगतवान् ज्ञातवान् । गुरुमुखाद्विद्या निष्क्रामतीव शिष्यः प्रतिगृह्णातीवेत्यतः अपादाने तसिर्मत्त इति युक्तः । **भृगुस्तु** महर्षीणां प्रख्याततरप्रभावः । तस्य प्रवक्तृत्वनियोगेनानेकाशेषनिरतिशयविद्याविदामागमनपरंपरयागतमेतच्छास्त्रमिति प्रदर्श्यते । अतश्च केषांचिदयमपि प्रवृत्तिप्रकारो दृश्यते । बहुभ्यो महात्मभ्यः शास्त्रमिदमवतीर्णमिति किमिति नाधीमह इत्यध्ययनादिप्रवृत्त्याभिमुख्यं शास्त्रे जन्यते ॥ ५९ ॥

ततस्तथा स तेनोक्तो महर्षिर्मनुना भृगुः ॥
तानब्रवीदृषीन्सर्वान् प्रीतात्मा श्रूयतामिति ॥ ६० ॥

स महर्षिर्भृगुस्तेन **मनुना** तथोक्त एष वः श्रावयिष्यतीति नियुक्तस्ततोऽनन्तरं तानृषीनब्रवीच्छ्रूयतामिति । **प्रीतात्मा**ऽनेकशिष्यसन्निधावहमत्र नियुक्त इति बहुमानेन प्रीतात्मत्वं प्रवक्तृत्वयोग्यतयाज्ञाकरोऽहमनेन संभावित इत्यात्मनि **भृगोर्बहुमानः** ॥ ६० ॥

स्वायंभुवस्यास्य मनोः षड्वंश्या मनवोऽपरे ॥
सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः[1] ॥ ६१ ॥

उपाध्यायो धर्मान्पृष्टो जगदुत्पत्त्यादि वर्णितवान् । तथैव शिष्योऽपि तन्नियुक्तस्तच्छेषमेव वर्णयितुमारब्धः । अस्येति साक्षात्कारेण मनुं प्रत्यवमृशति । अस्मदुपाध्यायस्य स्वायंभुव इति ख्यातस्य षडन्येऽपरे मनवो वंश्या एकस्मिन्वंशे कुले जाताः सर्वे वंश्याः । सर्वे हि साक्षाद्ब्रह्मणा सृष्टा इत्येककुलसंभवाद्वंश्या उच्यन्ते । अथवा एकस्मिन्कार्येऽधिकृता वंश्या एककर्मान्वयेन प्राणिनां वंशव्यवहारो भवति । 'द्वौ मुनी व्याकरणस्य वंश्यौ" । तं चैकं धर्मं दर्शयति "सृष्टवन्तः प्रजाः स्वाः स्वाः" इति । मन्वन्तरे मन्वन्तरे यस्य मनोरधिकारः स एव प्रजानां पूर्वमन्वन्तरविनष्टानां स्रष्टा पालयिता च । अतो येन याः प्रजाः सृज्यन्ते तास्तस्य स्वा भवन्ति ॥ ६१ ॥

स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा ॥
चाक्षुषश्च महातेजा विवस्वत्सुत एव च ॥ ६२ ॥

तान्मनून्नामतो निर्दिशति । महातेजा इति विशेषणम् । अन्यानि नामानि रूढ्या

---

१ ब-अमितौजसः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संबन्धेन वा । विवस्वत्सुत इति समासपदरूपं शब्दान्तरं कृष्णसर्पनरसिंहादिशब्दवत् ॥ ६२ ॥

स्वायंभुवाद्याः सप्तैते मनवो भूरितेजसः ॥
स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ॥ ६३ ॥

अत्र सप्त मनवो मया प्रोक्ताः । अन्यत्र चतुर्दश संपद्यन्ते । स्वे स्वेऽन्तरेऽवसरे प्राप्तेऽधिकारकाले इति यावत् । उत्पाद्य प्रजा आपुः पालितवन्तः । स्वे स्वेऽन्तरेऽधिकारावसरे यस्य मनोर्यस्मिन्काले प्राप्तः सर्गस्थितिपालनाधिकारः । अन्ये त्वन्तरशब्दं मासादिशब्दवत्कालविशेषवाचिनं मन्यन्ते तदयुक्तम् । मनुशब्दोपसंहितः कालविशेषविषयो मन्वन्तरो नाम कालो न तु केवल इति ॥ ६३ ॥

निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला ॥
त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः ॥ ६४ ॥

स्थितिप्रलयकालपरिमाणनिरूपणार्थं ज्योतिःशास्त्रगोचरं कालविभागं वक्तुमुपक्रमते । अष्टादश निमेषाः काष्ठा नाम कालो भवति । त्रिंशत्काष्ठाः कलाः । त्रिंशत्कला एको मुहूर्तः स्यात् । तावतः त्रिंशदित्यर्थः । त्रिंशन्मुहूर्तः अहोरात्रम् । विद्यादिति क्रियापदमाहृत्य तावदिति द्वितीयाबहुवचनम् ॥ ६४ ॥

अहोरात्रे विभजते सूर्यो मानुषदैविके ॥
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥ ६५ ॥

अथ कोऽयं निमेषो नाम । अक्षिपक्ष्मणोर्नैसर्गिकं कंम्प उन्मेषसहचारी । अन्यैस्तु पठितं यावता कालेनाविकृतमक्षरमुच्चार्यते स निमेषः । अहश्च रात्रिश्च ते अहोरात्रे । तयोर्विभागं करोति आदित्यः । उदित आदित्ये यावत्तदीया रश्मयो दृश्यन्ते तावदहर्व्यवहारः । अस्तमिते तु प्रागुदयाद्रात्रिव्यवहारः । मनुष्यलोके देवलोके वा । यत्र तर्ह्यादित्यो न व्याप्नोति रश्मिभिस्तत्र कथमयमहोरात्रविभागो विज्ञेयोऽत आह । **रात्रिः स्वप्नायेति । स्वयंप्रभेषु** भूतेषु नित्यप्रकाशित्वात्कर्मचेष्टाकार्यारम्भेण स्वापेन च विभागः । यथैवौषधीनां नियतः प्रादुर्भावकालः स्वाभाव्यादेवं कर्मचेष्टास्वापावपि कालस्वभावत एव नियतौ ॥ ६५ ॥

पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः ॥
कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी ॥ ६६ ॥

यो मनुष्याणां मासः स पितॄणामहर्निशम् । कतरदहः कतमा च रात्रिरिति प्रविभागः ? इदमहरियं रात्रिरित्येष विभागः । पक्षयोः पञ्चदशरात्रिसंमितयोरर्धमासाख्ययोर्व्यवस्थितः । पक्षाश्रित इत्यर्थः । एकः पक्षोऽहरपरो रात्रिस्तयोश्च भिन्नस्वभावत्वान्नियत-

१ फ–नैसर्गिकोन्मेषसहचारी । २ ड–व्यक्तम् । अ–ब–व–क–फ–प्रकाशत्वात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रमत्वाच्च विशेषमाह । अहः कृष्णः पक्षः । शुक्लः पक्षः शर्वरी रात्रिः । ' कर्मचेष्टाभ्य ' इति युक्तः पाठः । यथा ' स्वप्नायेति '। तादर्थ्यमेव विषयभावेन विवक्षितं वृत्तानुरोधादतः सप्तमी ॥ ६६ ॥

दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ॥
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥ ६७ ॥

वर्षं मनुष्याणां द्वादशमासास्तदेकमहोरात्रं देवानाम् । तयोश्च विभाग उदगयनदक्षिणायनाभ्याम् । तत्रोदीचीं दिशमभिप्रतिष्ठमानस्यादित्यस्य षण्मासा उदगयनं भवति । अयनं गमनमधिष्ठानं वा । तस्यां दिशि षण्मासानादित्य उदेति । ततः परावृत्तस्य दक्षिणायनम् । तथा हि दक्षिणां दिशमाक्रम्योदीचीं हित्वा ह्युदयं करोति ॥ ६७ ॥

ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ॥
एकैकशो युगानां तु क्रमशस्तन्निबोधत ॥ ६८ ॥

ब्रह्मा प्रजानां स्रष्टा तस्य यो लोकस्तत्र **क्षपाहस्या**होरात्रस्य **यत्प्रमाणं** युगानां चै**तत्समासतः** संक्षेपेण निबोधत मत्सकाशाच्छृणुत । **एकैकशः** एकैकस्य युगस्य ।

वक्ष्यमाणस्य प्रकरणस्य पिण्डार्थकथनार्थोऽयं श्लोकः श्रोतॄणामवधानार्थः । तथा च संबुध्यन्ते **निबोधतेति** । प्रकृते कालविभागे पुनः प्रतिज्ञाकरणं तत्त्वज्ञापनार्थम् । तेन वक्ष्यमाणोऽर्थो न शास्त्रारम्भशेष एव । अपि तु धर्मोयापि । तथा च वक्ष्यति ' ब्राह्मं पुण्यमहर्विदुरिति '। तद्विज्ञानाच्च पुण्यं भवतीत्यर्थः ॥ ६८ ॥

चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् ॥
तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥ ६९ ॥

प्रकृतत्वाद्दैविकानि वर्षाणि परिगृह्यन्ते । तथा च पुराणकारः " इत्येतदृषिभिर्गीतं दिव्यया संख्यया द्विजाः ॥ दिव्येनैव प्रमाणेन युगसंख्या प्रकीर्तिता " ॥ तानि चत्वारि सहस्राणि कृतयुगं नाम कालः । तस्य कृतयुगस्य तावन्त्यैव शतानि चत्वारि संध्या । संध्यांशस्तस्य तथाविधस्तत्परिमाणश्चत्वारिवर्षशतानीत्यर्थः । तत्रातीतस्य कालस्यागामिनश्च स्वभावानुवृत्तिः सा संध्या । उभयकालधर्मानुविधानं **संध्यांशः** । यत्रैषत्पूर्वधर्मानुवृत्तिर्भूयसी भाविनो युगस्य ॥ ६९ ॥

इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ॥
एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ ७० ॥

कृतयुगादन्येषु त्रेतादिषु त्रिषु युगेषु सन्ध्यासन्ध्यांशसहितेषु सहस्राण्येकापायेने

---

१ क-अवधारणार्थः । २ ख-क-तद्वेदनाच्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्तन्ते । हानिरपायः । एकं सहस्रं हीनं त्रेतायां कृतयुगात् । एवं त्रेतातो द्वापरस्य द्वापरात्कलेः । एवं च त्रीणि वर्षसहस्राणि त्रेता द्वे द्वापर एकं कलिरिति भवति । शतानि हीयन्ते सन्ध्या तदंशयोः । विशिष्टोऽहःसंघातो युगाख्यस्तस्य विशेषाः कृतादयः ।

तावच्छतीति ङीकारः स्मर्तव्यः । इह स्मृतिः । तावतां शतानां समाहारः । तावच्छब्दस्य 'बहुगणवतुडतीति'। वत्वन्तत्वात्संख्यासंज्ञायां सत्यां 'संख्यापूर्वो द्विगुरिति' द्विगुसंज्ञायां सत्यां 'टापोपवादो द्विगो'रिति ङीप् । शतं परिमाणमस्य इति । 'यत्तदेतेभ्य' इति वतुप् ।'आ सर्वनाम्न' इत्याकारः। अन्यथा बहुव्रीहौ तावन्ति शतानि यस्याः शतशब्दस्याकारान्तत्वात्'अजाद्यतष्टाप्' इति टापा भवितव्यम् । तस्मिन्कृते तावच्छता इति स्यादित्यभिप्रायः ॥ ७० ॥

यदेतत्परिसंख्यातमादावेव चतुर्युगम् ॥
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥ ७१ ॥

यदेतदिति लौकिकी वाचो युक्तिः । समुदायेन प्रक्रान्तोऽर्थः परामृश्यते । यदेतच्चतुर्युगं परिसंख्यातं चत्वारिसहस्राणीत्यादिना निश्चितसंख्यमादौ प्रागस्माच्छ्लोकादेकस्य चतुर्युगस्य द्वादशभिः सहस्रैर्देवानां युगमुच्यते । द्वादशचतुर्युगसस्राणि देवयुगं नाम काल इत्यर्थः । सहस्रशब्दात्स्वार्थेऽण् । द्वादशचतुर्युगसहस्राणि परिमाणं यस्मिन्निति विग्रहः ॥ ७१ ॥

दैविकानां युगानां तु सहस्रं परिसंख्यया ॥
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥ ७२ ॥

देवयुगसाहस्रं **ब्राह्ममेकमहः**। **तावती** ब्रह्मणोरात्रिर्देवयुगसहस्रमेव । परिसंख्यया संख्यानेन यत्सहस्रमिति संबन्धः । श्लोकपूरणार्थश्चायमनुवादः । न ह्यसंख्यया सहस्रादिव्यवहारः । हेतौ तृतीया ॥ ७२ ॥

तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ॥
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ॥ ७३ ॥

युगसहस्रमन्तो यस्याह्नस्तद्युगसहस्रान्तम् । ये मनुष्या एतज्जानते तेऽहोरात्रविदः। किं तेषामित्यपेक्षायां पुण्यं भवतीति संबन्धः । ब्राह्मस्याह्नः परिमाणवेदनं पुण्यमतस्तद्वेदितव्यमिति स्तुत्या विधिप्रतिपत्तिः ॥ ७३ ॥

तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते ॥
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् ॥ ७४ ॥

---

१ ङ–ख–हीयते । २ व्या. सू. (१।१।२३) । ३ व्या. सू. (२।१।५२) । ४ टापः–आकारान्तस्त्रीलिंगशब्दा–अजाद्यतष्टाप् (व्या. सू. (४।१।४) । ५ व्या. सू. (५।२।३९) । ६ व्या. सू. (६।३।९१) ७ व्या, सू. (४।१।४).

For Private And Personal Use Only

स ब्रह्मा तावतीं दीर्घां निशां निद्रां अनुभूय प्रतिबुध्यते । ततः पुनर्जगत्सृजति । स्वापो ब्रह्मण उक्तरूपः । न ह्यसौ प्राकृतपुरुषवत्स्वपिति नित्यं प्रतिबोधात् । तत्र सर्गक्रममाह । 'मनः सदसदात्मकमिति' । ननु चाप एव ससर्जादावित्युक्तम् । केचिदाहुर्द्विविधः प्रलयः महाप्रलयोऽवान्तरप्रलयश्च । अवान्तरप्रलयेऽयं क्रमः । मनश्चात्र न तत्त्वान्तर्गतं तस्य पूर्वमुत्पन्नत्वात् । किं तर्हि प्रजापतिः प्रबुद्धः मनःसर्गाय सृजति नियुंक्ते इत्यर्थः । द्वितीये तु महाप्रलयपक्षे मनः कारणत्वान्महत्तत्त्वमेव मनस्ततश्च प्रागुक्तम् । महानिति । पुराणे हि "मनो महान्मतिर्बुद्धिर्महत्तत्वं च कीर्त्यते ॥ पर्यायवाचकाः शब्दा महतः परिकीर्तिता" इति ॥ ७४ ॥

मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया ॥
आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ॥ ७५ ॥

उक्ताऽप्येषा तत्त्वस्य सृष्टिर्यो विशेषो नोक्तस्तत्प्रतिपादनाय पुनरुच्यते । ब्रह्मणा चोद्यमानं तस्मान्नोदितादाकाशं जायते । तस्याकाशस्य शब्दाख्यो गुणो भवति । गुण आश्रित उच्यते । आकाशं तस्याश्रयः । न ह्याकाशं विना शब्दस्य संभवः ॥ ७५ ॥

आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः ॥
बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः ॥ ७६ ॥

भूताद्भूतान्तरस्योत्पत्तिर्नेष्यते । महतः सर्वभूतानामुत्पत्त्यभ्युपगमात्तेनैवं व्याख्यायते । आकाशादनंतरं, महतो विकुर्वाणात्स्पर्शमात्रभावं गताद्वायुर्जायते । सर्वगन्धान्छुचीनशुचींश्च वहति । अथ च शुचिः पवित्रः । बलवान् । यावती काचिद्बलक्रातिश्चेष्टारूपा सा वायुकर्मणः । कम्पाक्षेपोर्ध्वाधस्तिर्यग्गमनादिलक्षणा यत्किञ्चिच्चलितं स्पन्दितं तत्सर्वं वाय्वायत्तमित्येतत्प्रदर्शयितुं बलवानित्युक्तम् । उत्तरत्रापि याः पञ्चम्यस्ता न जन्यर्थापेक्षाः । किं तर्हि वायोः परतोऽनन्तरमित्येवं योजनीयाः ॥ ७६ ॥

वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम् ॥
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ॥ ७७ ॥

विरोचिष्णु भास्वदिति समानार्थेन शब्दद्वयेन स्वपरप्रकाशता प्रतिपाद्यते । स्वयं दीप्तिमत्परं च भासयति ॥ ७७ ॥

ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः ॥
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः ॥ ७८ ॥

---

१ क-स्पर्शमात्राभावम् । २ ङ-सर्वगतत्वात् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रसो मधुरादिः सलिलगुणः गन्धः सुरभिरसुरभिश्च । स भूमेर्गुणः । तथा च वैशेषिकाः । क्षितावेव गन्ध इत्येते सांसिद्धिका एकैकस्य गुणाः संसर्गात्तु संकीर्यन्ते । तदुक्तं 'यो यो यावतिथ' इति । एतच्च गुणानुकथनमध्यात्मचिन्तायामुपयुज्यते । उक्तं हि **पुराणकारेण**—"दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः ॥ भौतिकास्तु शतं पूर्णं सहस्रं त्वभिमानिनः" ॥ अहंकारचिन्तकाः । "महात्मकाः सहस्राणि दश तिष्ठन्ति विज्वराः ॥ पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः ॥ पुरुषं निर्गुणं प्राप्य परिसंख्या न विद्यते" ॥७८॥

यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगम् ॥
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ॥ ७९ ॥

एकसप्ततिर्दैविकानि युगानि मन्वन्तरं नाम कालः ॥ ७९ ॥

मन्वन्तराण्यसंख्यानि सर्गः संहार एव च ॥
क्रीडन्निवैतत्कुरुते परमेष्ठी पुनःपुनः ॥ ८० ॥

नैषा संख्या विद्यत इत्यसंख्यानि । ननु चतुर्दश मन्वन्तराणीति संख्या श्रूयते ज्योतिःशास्त्रादौ । उच्यते । आवृत्त्या ह्यसंख्यानि । यथा द्वादशमासाः । सर्गसंहारयोरप्यावृत्तिरनुपरतैव । **क्रीडन्निवैतत्कुरुत इति** । सुखार्थितया क्रीडा । तस्य चाप्तकामत्वादानन्दैकरूपत्वाच्च । न क्रीडाप्रयुक्तौ सर्गसंहारवत इव शब्दः प्रयुक्तः । अत्र परिहारः स प्रागुक्त एव । लीलयाऽपि[1] कौतुकेनापि लोके राजादीनां प्रवृत्तिर्दृश्यत इति ब्रह्मविदः ॥ ८० ॥

चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ॥
नाधर्मेणागमः कश्चिन्मनुष्यान्प्रतिवर्तते ॥ ८१ ॥

चत्वारः पादा यस्य चतुष्पाद्धर्मः । यागादेश्च धर्मत्वात्तस्य चानुष्ठेयस्वभावत्वाद्विग्रहाभावान्न पादशब्दः शरीरावयववचनः । किं तर्हि अंशमात्रवचनः । न हि धर्मस्य शरीरमस्ति पुरुषविधं पशुपक्ष्यादिविधं वा । तेन स्वांशैश्चतुर्भिरुपेतश्चतुष्पादुच्यते । तेन योऽयं धर्मः चतुष्पात्सकलः कृतयुग आसीत् यागस्य तावत्प्रयोगावस्थस्य चत्वारो होतृकाः । होता ब्रह्मा उद्गाता अध्वर्युरिति । चत्वारो वर्णाः कर्तार आश्रमा वा । सर्वथा यावान्वेदे धर्म उक्तः स सर्वस्तस्मिन्कालेऽशतोऽपि न हीनः अविगुणः सर्वोऽनुष्ठीयते । बाहुल्येन चतुःसंख्याः ।

एवं दानादिष्वपि योज्यम् । दाता द्रव्यं पात्रं भावतुष्टिः[2] । अथवा यागदानतपांसि ज्ञानं च । तथा वक्ष्यति—'तपः परमिति' । अथवा धर्मप्रतिपादकं वाक्यं धर्मः ।

---

१ ङ-ख-लीलया निष्प्रयोजनाऽपि लोके राजादीनाम् । २ फ-भावस्तुतिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य च चत्वारः पादाः चत्वारि पदजातानि । नामाख्याते चोपसर्गनिपाताश्च । तथा चाह । "चत्वारि वाक्परिमिता पदानि । तानि विदुर्ब्राह्मणा ये मनीषिणः" । मनस ईषिणः समर्था विद्वांसो धार्मिकाः । अद्यत्वे तु 'गुहायां त्रीणि निहितानि नेङ्गयन्ति' । न हि प्रकाशन्ते । तुरीयं भागं वैदिकानां मनुष्या वदन्ति । एतदुक्तं भवति किंचिदन्तरितम् । न च काचिद्वेदशाखा । अद्यत्वे तु बह्वन्तरितम् । सत्यं चैवं सकलमित्यनुषङ्गः । सत्यपि सत्यस्य विहितत्वाद्धर्मत्वे, प्राधान्यार्थः पृथगुपदेशः, हेत्वर्थे वा । सकलस्य धर्मानुष्ठानस्य सत्यं हेतुः । येत्वनृतिनस्ते लोकावर्जनार्थं किंचिदनुतिष्ठन्त्यन्यत्त्यजन्ति । **नाधर्मेण** निषिद्धेन मार्गेण **कश्चिदागमो** विद्या वाऽर्थो वाऽनुष्ठातुरुपवर्तत आगच्छति युगस्वाभाव्यात् । न मनुष्या अधर्मेण विद्यामागमयन्ति नापि धनमर्जयन्ति । विद्याधने धर्मानुष्ठानकारणे तत्परिशुद्धिः सकलधर्मसद्भावस्य हेतुत्वेन नोच्यते ॥ ८१ ॥

इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः ॥
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ॥ ८२ ॥

कृतयुगादन्येषु युगेष्वा**गमाद्वे**दाख्याद्**धर्मः पादशः** युगेयुगे पादेना**वरोपितो** व्यपनीतः अन्तर्हितः । वेदशाखा । पुरुषाणां ग्रहणावधारणशक्तिवैकल्यात् । योऽप्यद्यत्वे धर्मो ज्योतिष्टोमादिः प्रचरति सोऽपि चौर्यादिभिः पादशो हीयते । ऋत्विजां यजमानानां दातॄणा संप्रदानानां चैतैर्दोषैर्युक्तत्वान्न यथाविधि धर्मो निष्पद्यते । फलमतो यथोक्तं न परिप्राप्यते तेन धर्मापायहेतूनां चौरिकादीनां न युगैर्यथासंख्यं सर्वेषामद्योपलम्भात् ॥ ८२ ॥

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ॥
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥ ८३ ॥

अधर्मस्य रोगकारणस्याभावादरोगाः । रोगो व्याधिः । सर्व एव चत्वारो वर्णाः सिद्धाभिप्रेतार्थाः । अर्थः प्रयोजनम् । अथवा सर्वेऽर्थाः सिद्धाः येषां काम्यानां कर्मणां प्रतिबन्धकाभावादव्याक्षेपेणाशेषफलसिद्धिः । **चतुर्वर्षशतायुष इति** । ननु "स ह षोडशं वर्षशतमजीवदिति" **परममायुर्वेदे** श्रूयते । अत एवाहुः । वर्षशतशब्दोऽत्र वयोभेदप्रतिपादकः । चत्वारिवयांसि जीवन्तीति । न पुरायुषः प्रमीयंते नाप्राप्य चतुर्थं वयो म्रियन्ते । अत एव द्वितीये श्लोकार्धे वयो ह्रसतीत्याह । पूर्वत्र वयसो वृद्धानुक्तायामुत्तरत्र तस्यैवं ह्रासाभिधानोपपत्तिः । **पादश इति** । न चात्र चतुर्थो भागः पादः । किं तर्हि । भागमात्रमंशत आयुः क्षीयत इत्यर्थः । तथा च केचिद्बाला म्रियन्ते, केचित्तरुणाः, केचित्प्राप्तजरसः । परिपूर्णमायुर्दुर्लभम् ॥ ८३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् ॥
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ॥ ८४ ॥

केचिदाहुर्वैदिकैः कर्मभिः सहस्रसंवत्सरादिभिरपेक्षितमायुर्वेदोक्तम्। तदनुयुगं फलति युगानुरूपेण संपद्यते, न सर्वेषु युगेषु। नाद्य कश्चित्सहस्रसंवत्सरजीवी यः सर्वश्चिरंजीवति स वर्षशतम्। तदपरे नाद्रियन्ते। यतो दीर्घसत्रेषु संवत्सरशब्दे दिवसेषु व्यवस्थापिते विधेयान्तरविरोधाद्वाक्यभेदापत्तेः। एष हि तत्र ग्रन्थः। 'पञ्चपञ्चाशतस्त्रिवृतः संवत्सरा' इत्यादि। तत्र त्रीण्यहानि गवामयनप्रकृतित्वात्प्राप्तानि। विशिष्टानुसंख्या पञ्चपञ्चाशत इत्यप्राप्तविधेया। यद्यपरा संवत्सरता प्रतीयेत वाक्यं भिद्येत। तत्रावश्यमन्यतरस्यानुवाद आश्रयितव्यः। संवत्सरशब्दः सौरसावनादिमानभेदेन षष्ट्यधिकशतत्रयात्मनोऽहःसंघातादन्यत्रापि दृष्टप्रयोग एवेति। तस्यैव लक्षणया दिवसेष्वनुवादो युक्त इति।

अन्ये तु मन्त्रार्थवादेषु 'शतमिन्नु शरदोऽन्ति देवाः' 'शतायुर्वै पुरुषः' इति। शतशब्दश्च बहुनामसु पठितो बहुत्वं चानवस्थितम्। युगानुरूपेण दीर्घजीविनोऽल्पायुषश्च भवन्ति। यथाश्रुतव्याख्याने तु कलौ सर्वे शतायुषश्च भवन्ति। अथवा आयुःकामस्य यानि कर्माणि न च तत्र प्रमाणं श्रुतम्। तत्रानुयुगं परिमाणं वेद्यम्। आशिषोऽन्या अपि फलविषया वेदशासनाः काम्यानां कर्मणाम्। आयुषः काम्यत्वेऽपि प्राधान्यात्पृथगुपदेशः। तथा ह्याह "आयुर्वै परमः कामः"। प्रभावोऽलौकिकी शक्तिरणिमादिगुणयोगः। अभिशापो वरदानम्। अनुयुगं फलन्तीति सर्वत्र योज्यम् ॥ ८४ ॥

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ॥
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥ ८५ ॥

उक्तोऽस्य कालभेदेन पदार्थस्वभावभेदस्योपसंहारः। धर्मशब्दो न यागादिवचन एव। किं तर्हि पदार्थगुणमात्रे वर्तते। अन्ये पदार्थानां धर्माः प्रतियुगं भवंति यथा प्राक् दर्शितम्। यथा वसन्तेऽन्यः पदार्थानां स्वभावोऽन्यो ग्रीष्मेऽन्य एव वर्षास्वेवं युगेष्वपि। अन्यत्वं चात्र न कारणानां दृष्टकार्यत्यागेन कार्यान्तरजनकत्वमप्यपरिपूर्णस्य कार्यस्योत्पत्तेः शक्तेरपचयात्तदाहुर्युगह्रासानुरूपत इति। ह्रासो न्यूनता ॥ ८५ ॥

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ ८६ ॥

अयमन्यो युगस्वभावभेदः कथ्यते। तपःप्रभृतीनां वेदे युगभेदेन विधानाभावात्सर्वदा सर्वाण्यनुष्ठेयानि। अयं त्वनुवादो यथाकथंचिदाख्येयः। इतिहासेषु

क-ख युक्तोऽस्य।

For Private And Personal Use Only

ह्येवं वर्ण्यते । तपःप्रधानं तच्च महाफलम् । दीर्घायुषो रोगवर्जितास्तपसि समर्था भवन्त्यनेनाभिप्रायेणोच्यते । ज्ञानमध्यात्मविषयं शरीरक्लेशादन्तर्नियमो नातिदुष्करः । यागे तु न महाक्लेश इति द्वापरे यज्ञः प्रधानम् । दाने तु न शरीरक्लेशो नान्तःसंयमो न चातीव विद्वत्तोपयुज्यत इति सुसंपादना ॥ ८६ ॥

सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः ॥
मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत् ॥ ८७ ॥

उक्तः कालविभागः । ब्राह्मणादीनां गुणा इदानीं कथ्यन्ते । तत्रायमुपक्रमः । सर्वस्य सर्गस्य सर्वेषां लोकानां गुप्त्यर्थं रक्षार्थम् । महातेजाः प्रजापतिः मुखादिजातानां ब्राह्मणादीनां चतुर्णां वर्णानां दृष्टादृष्टार्थानि कर्माण्यकल्पयद्व्यवस्थापितवान् ॥ ८७ ॥

अध्यापनमध्ययनं यजनं याजनं तथा ॥
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ॥ ८८ ॥

तानीदानीं कर्माण्युच्यन्ते ॥ ८८ ॥

प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च ॥
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ॥ ८९ ॥

विषयाभिलाषजनका गीतशब्दादयो भावा उच्यन्ते । तत्राप्रसंगः पुनः पुनरसेवनम् ॥ ८९ ॥

पशूनां रक्षणं दानमिज्याऽध्ययनमेव च ॥
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ॥ ९० ॥

वणिक्पथः वणिक्कर्मणा स्थलपथवारिपथादिना धनार्जनमुपयुज्यमानदेशान्तरीयद्रव्यसन्निधापनं यस्य राज्ञो विषये वसति । कुसीदं वृद्ध्या धनप्रयोगः ॥ ९० ॥

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् ॥
एतेषामेव वर्णानां शुश्रूषामनसूयया ॥ ९१ ॥

प्रभुः प्रजापतिरेकं कर्म शूद्रस्यादिष्टवान् । **एतेषां** ब्राह्मणक्षत्रियवैश्यानां **शुश्रूषा** त्वया कर्तव्या**ऽनसूयया**ऽनिन्दया चित्तेनापि तदुपरि विषादो न कर्तव्यः । शुश्रूषा परिचर्या तदुपयोगि कर्म करणं शरीरसंवाहनादितच्चित्तानुपालनम् । एतद्दृष्टार्थं शूद्रस्य अविधायकत्वाच्चैकमेवेति न दानादयो निषिध्यन्ते । विधिरेषां कर्मणामुत्तरत्र भविष्यति । अतः स्वरूपं विभागेन यागादीनां तत्रैव दर्शयिष्यामः ॥ ९१ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः ॥
तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा ॥ ९२ ॥

आपादान्तान्मेध्यः पुरुषस्तस्य नाभेरूर्ध्वमतिशयेन मेध्यं ततोऽपि मुखम् । एतच्च स्वयमेव जगत्कारणपुरुषेणोक्तम् ॥ ९२ ॥

ततः किमत आह—

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् ॥
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥ ९३ ॥

उत्तमङ्गं मूर्धा तत उद्भव उत्पत्तिर्ब्राह्मणस्य। ज्येष्ठश्चासावन्येभ्यो वर्णेभ्यः पूर्वं ब्रह्मणा सृष्टः । ब्रह्मणो वेदस्य धारणात्तस्य हि सविशेषं तद्विहितमतः सर्वस्य जगतोऽस्माद्धेतुत्रयाद्ब्राह्मणः प्रभुः प्रभुरिव । प्रभुर्विनयेनोपसर्पणीयः । तदाज्ञायां च धर्मे स्थातव्यम् । **धर्मतः प्रभुर्धर्मे** प्रभुरित्यर्थः । आद्याद्वित्वात्तसिः ॥ ९३ ॥

तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वाऽऽदितोऽसृजत् ॥
हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ॥ ९४ ॥

पूर्वस्यैव हेतुत्रयस्य विशेषार्थमिदम् । अन्यस्यापि पुरुषस्योत्तमाङ्गं प्रधानम् । तं पुनर्ब्राह्मणं स्वयंभूः **स्वादास्यान्**मुखादसृजत् । तपश्च कृत्वैवोत्तमाङ्गादुत्पत्तिः । ज्यैष्ठ्यमाह आदितः। यद्देवानुद्दिश्य क्रियते तद्धव्यम्। पितॄनुद्दिश्य तत्कव्यम् । तयोरभिवहनाय देवान्पितॄंश्च प्रति प्रापणाय । अभिवाह्यायेति भावे कृत्यः कथंचिद्द्रष्टव्यः । सकर्मत्वाद्वहतेः । तेन च कर्मणा सर्वस्य त्रैलोक्यस्य गुप्तिः परिपालनं भवति । इतः प्रदानं देवा उपजीवन्ति । ते च शीतोष्णवर्षैरोषधीः पचन्ति पाचयन्ति । अतः परस्परोपकाराद्गुप्तिः ॥ ९४ ॥

यस्यास्येन सदाऽश्नन्ति हव्यानि त्रिदिवौकसः ॥
कव्यानि चैव पितरः किं भूतमधिकं ततः ? ॥ ९५ ॥

हव्यादिवहनं पूर्वोक्तं दर्शयति । त्रिदिवमोको गृहं येषां त एवमुच्यन्ते । स्वर्गवासिनो देवाः । ब्राह्मणेन भुक्तमन्नं देवा उपतिष्ठन्ति। श्राद्धे पित्र्यस्य कर्मणोऽङ्गभूतं विश्वेदेवानुद्दिश्य ब्राह्मणभोजनं विहितम् । तदपेक्ष्यैतदुक्तम् । **किं भूतमन्यदधिकं** श्रेष्ठं ततस्तस्मादिति । स्वयं विस्मयते । देवाः पितरश्चोत्तमस्थाना मध्यमस्थानाश्चाप्रत्यक्षा न तेषां भोजनोपायोऽन्योऽस्त्यन्यतो ब्राह्मणभोजनादतो[1] महान्ब्राह्मणः ॥ ९५ ॥

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ॥
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥ ९६ ॥

---

१ ड–अतो ब्राह्मणभोजनात् ।

६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृथिव्यां ये भावाः स्थावरा वृक्षादयो जङ्गमाः कृमिकीटादयस्ते भूतशब्देनोच्यन्ते। तेषां ये प्राणिन आहारविहारादिचेष्टासमर्थास्ते श्रेष्ठाः प्राणिनस्ते हि पटुतरं सुखमनुभवन्ति । तेषां ये बुद्ध्या जीवन्ति हिताहिते विचिन्वन्ति श्वशृगालादयः; ते हि घर्मेणोपतप्ताः छाया-मुपसर्पन्ति, शीतेनार्दिता आतपे निराहारं स्थानं त्यजन्ति। तेषामधिकतरा मनुष्यास्तेषां च ब्राह्मणाः । ते हि लोके पूज्यतमाः । न च सर्वेण परिभूयन्ते । जातिमात्राश्रयं हि तद्वधे महत्प्रायश्चित्तम् ॥ ९६ ॥

ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः ॥
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ॥ ९७ ॥

विदुषा श्रैष्ठ्यं महाफलेषु यागादिष्वधिकारात् । तेषामपि कृतबुद्धयः परिनिष्ठित-वेदतत्त्वार्था न बौद्धादिभिः कलुषीक्रियन्ते । तेषामपि कर्तारः कर्मणामनुष्ठातारः । ते हि विहितकरणात्प्रतिषिद्धासेवनाच्च नोपहन्यन्ते तेषामपि ब्रह्मस्वरूपत्वात्तत्र ह्यक्षय्यानन्दः॥९७॥

उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ॥
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥ ९८ ॥

विद्वत्तादिगुणसंबन्धिनो ब्राह्मणस्य विशेषे दर्शिते जातिमात्रं ब्राह्मणं कश्चिदवमन्येत तन्निवृत्त्यर्थमिदमुच्यते । **उत्पत्तिरेव** गुणानपहाय जन्मैव ब्राह्मणस्य जातिरेव **शाश्वती धर्मस्य मूर्तिः** शरीरम् । **धर्मार्थमुत्पन्नो** द्वितीयेन जन्मनोपनयनेन संस्कृतः। सा हि तस्य धर्मार्थोत्पत्तिर्ब्रह्मत्वाय **कल्पते** संपद्यते। धर्मशरीरमुज्झित्वा परानन्दभाग्भवतीति **श्रुतिः** ९८

ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ॥
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ ९९ ॥

सर्वलोकस्योपरि भवति । श्रैष्ठ्यमुपरिभावेनाह । **ईश्वरः सर्वभूतानामिति ।** प्रभुत्वं धर्माख्यस्य कोशस्य **गुप्तये** जायते । द्रव्यसंचयः **कोशः** । उपमानाद्धर्मसंचय उच्यते कोश इति ॥ ९९ ॥

सर्वं स्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतम् ॥
श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति ॥ १०० ॥

असंतुष्टस्य प्रतिग्रहादिषु पुनः प्रवृत्तौ दुष्कृतितामाशङ्क्य समाधत्ते । **सर्वमिदं** त्रैलोक्यान्तर्वर्ति धनं **ब्राह्मणस्य** स्वं मात्र प्रतिग्रहो विद्यते । प्रभुत्वेनासौ गृह्णाति न

१ ङ-विदन्ति । २. शाब्दोऽर्थः ३ "तेषां न पूजनीयोऽन्यस्त्रिषु लोकेषु विद्यते ॥ तपोविद्याविशेषेण पूजयन्ति परस्परम् ॥ ब्रह्मविदः परंभूतं न किंचिदिह विद्यते " ॥ भट्टभण्डालिकमुद्रितपुस्तके दृश्येते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिग्रहीतृतयेति । प्रशंसैषा न विधिरत एवार्हतिशब्दः । अभिजनोऽभिजातता विशिष्टत्वम् ॥ १० ॥

स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥
आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरेजनाः ॥ १०१ ॥

यत्परगृह आतिथ्यादिरूपेण भुङ्क्ते तदात्मीयमेव । नैवं मन्तव्यं परपाकेनेति । **स्वं वस्ते** याचित्वाऽयाचित्वा वा वस्त्रं लभते नासौ तस्य लाभाय अपि तु स्वकृत्याच्छादने विनियोगः । तिष्ठतु तावदात्मोपयोगि गृह्णाति तत्र प्रभूतं यदन्येभ्यो ददाति परकीयम् तदपि तस्य नानुचितम् । **आनृशंस्यं** कारुण्यं तदीयया महासत्त्वतया पृथिव्यां राजानः स्वानि धनान्युपयुञ्जते । अन्यथा यद्यसाविच्छे ' दहमेतदादाय स्वकार्ये विनियुञ्जीयेति ' तदा सर्वे निर्धनाः निरुपयोगाः स्युः ॥ १०१ ॥

तस्य कर्मविवेकार्थं शेषाणामनुपूर्वशः ॥
स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥ १०२ ॥

सर्वस्याः ब्राह्मणश्रुतेः फलप्रदर्शनार्थं श्लोकोऽयम् । एवंविधमिदं महार्थं शास्त्रं यत्तस्य स्वमहिम्नाऽऽत्यन्तिकेन महत्तमस्य ब्राह्मणस्य कर्मविवेकार्थं इमानि कर्माणि कर्तव्यानि इमानि वर्ज्याणि एष **विवेकस्तदर्थम्** । **शेषाणां** च क्षत्रियादीनामनुपूर्वशः प्राधान्याद्ब्राह्मणस्यानुषङ्गात्क्षत्रियादीनामिदं शास्त्रमकल्पयत्कृतवान् ॥ १०२ ॥

विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ॥
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित् ॥ १०३ ॥

अध्येतव्यं प्रवक्तव्यमित्यर्हे कृत्यो न विधौ । द्वितीयादध्यायात्प्रभृति[1] शास्त्रं प्रवर्तिष्यते । अयं ह्यध्यायोऽर्थवाद एव । नात्र कश्चिद्विधिरस्ति । तेन यथा ' राजभोजनाः शालयः ' इति शालिस्तुतिर्न राज्ञोऽन्यस्येति तद्भोजननिषेधः एवमत्रापि नान्येन केनाचिदिति नायं निषेधः केवलं शास्त्रस्तुतिः । सर्वस्मिञ्जगति श्रेष्ठो ब्राह्मणः सर्वशास्त्राणां शास्त्रमिदमतस्तादृशस्य विदुषो ब्राह्मणस्याध्ययनप्रवचनार्हं न सामान्येन शक्यते अध्येतुं प्रवक्तुं वा । अत एवाह । **प्रयत्नत इति** । यावन्न महान्प्रयत्न आस्थितो यावन्न शास्त्रान्तरैस्तर्कव्याकरणमीमांसादिभिः संस्कृत आत्मा तावदेतत्प्रवक्तुं न शक्यते । अत एवाध्ययनेन श्रवणं लक्ष्यते । तत्र हि विद्वत्तोपयोगिनी न संपाठे । विधौ ह्यध्ययने विद्वत्ताऽदृष्टायैव स्यान्न च विधौ श्रवणमध्ययनेन लक्ष्यत इति युक्तं वक्तुं न विधेये लक्षणार्थता युक्ता । अर्थवादे तु प्रमाणान्तरानुसारेण गुणवादो, न दोषाय । तस्मात्त्रैवर्णिकाधिकारं शास्त्रमेतच्च परस्ताद्विशेषतो वक्ष्यते ॥ १०३ ॥

---

१ ङ–अध्यायादारभ्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदं शास्त्रमधीयानो ब्राह्मणः संशितव्रतः ॥
मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते ॥ १०४ ॥

एवं संबन्धिद्वारेण ब्राह्मणार्थतया शास्त्रं स्तुत्वाऽधुना साक्षात्स्तौति । इदं शास्त्रं जानानः **संशितव्रतो** भवतीति परिपूर्णयमनियमानुष्ठायी भवति । शास्त्रादननुष्ठाने प्रत्यवायं ज्ञात्वा तद्भयादनुतिष्ठति सर्वान्यमनियमान्यथाशास्त्रं सर्वमनुतिष्ठति । अनुतिष्ठन्विहितातिक्रमप्रतिषिद्धकर्मजनितै**र्दोषैर्न लिप्यते** न संबध्यते ॥ १०४ ॥

पुनाति पंक्तिं वंश्यांश्च सप्तसप्त परावरान् ॥
पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति ॥ १०५ ॥

पंक्तिपावनो भवति । विशिष्टानुपूर्वीकः संघातः **पंक्तिरुच्यते** । तां **पुनाति** निर्मलीकरोति । सर्वे दुष्टास्तत्सन्निधानाददुष्टाः संपद्यन्ते । **वंश्यान्**स्वकुलसंभूतान्**सप्तपरा**नुपरितनान्पितृादीनाग**मिनोऽवरा**ञ्जनिष्यमाणान् । समुद्रपर्यन्तां पृथिवीं प्रतिग्रहीतुमर्हन्ति । धर्मज्ञता हि प्रतिग्रहाधिकारे हेतुः । इतश्च सर्वे धर्मा ज्ञायन्ते ॥ १०५ ॥

इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम् ॥
इदं यशस्यमायुष्यमिदं निःश्रेयसं परम् ॥ १०६ ॥

स्वस्त्यभिप्रेतस्यार्थस्याविनाशः । **अयनं** प्रापणम् । स्वस्ति प्राप्यते येन तत्**स्वस्त्ययनं** । **श्रेष्ठ**मन्येभ्यो जपहोमादिभ्यः । न हि शास्त्रमन्तरेण तेषामनुष्ठानं संभवति अतस्तदनुष्ठानहेतुत्वाच्छ्रेष्ठमेतत् । अथवा धर्मज्ञानार्थवाक्यान्येव श्रेयस्यान्यनुष्ठानं तु क्लेशकरमत उच्यते श्रेष्ठमिति । इदं **बुद्धिविवर्धनम्** । शास्त्रे ह्यासेव्यमाने तदर्थस्य प्रकाशनाद्ग्रन्थिप्रमोक्षाद्बुद्धिविवृद्धिः प्रसिद्धैव । **इदं यशस्यं,** धर्मज्ञः संशयानैः पृच्छ्यमानः ख्यातिं लभते यशसो निमित्तं यशस्यं विद्वत्तौदार्यादिगुणवत्तया प्रसिद्धि**र्यशः** । **निःश्रेयसं** दुःखाननुविद्धायाः प्रीतेः स्वर्गापवर्गलक्षणायास्तत्प्राप्तिहेतुकर्मज्ञानहेतुत्वान्निःश्रेयसं परं श्रेष्ठम् ॥ १०६ ॥

अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ॥
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ॥ १०७ ॥

इदानीं स्वशास्त्रस्य स्वविषये साकल्येन वृत्तेरन्यनिरपेक्षतामाह । कश्चियो नाम धर्मः स सर्वः शास्त्रेऽस्मिन्कात्स्न्येनाभिहितः न तस्माद्धर्मज्ञानाय शास्त्रान्तरापेक्षा कर्तव्येत्यतिशयोक्तिः स्तुतिः । अस्मिञ्छास्त्रे धर्मः स्मार्तोऽखिलेन निःशेषेणोक्तौ **गुणदोषौ च** कर्मणामिष्टानिष्टे फले गुणदोषौ कर्मणां यागादिब्रह्महत्यादीनाम् । एवं हि साकल्यं भवति

---

१ अ-फ-क-ब-शांसितव्रतः । २ अस्याग्रे-" यथा त्रिवेदाध्ययनं धर्मशास्त्रमिदं तथा ॥ अध्येतव्यं ब्राह्मणेन नियतं स्वर्गमिच्छता " इतिपाठो दृश्यते कुत्रचित् । ३ ख-ड-सततम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि कर्मस्वरूपमितिकर्तव्यताफलविशेषः कर्तृविशेषसंबन्धो नित्यकाम्यताविवेकः । एतत्सर्वं गुणपदेन प्रतिज्ञातम् । धर्म इत्यक्ते कर्मग्रहणं वृत्तपूरणार्थम् । ' चतुर्णामपि वर्णाना ' मेतदपि साकल्यार्थम् । यो नाम कश्चिद्धर्मेऽविकृतस्तस्य सर्वस्येतो धर्मलाभः । **आश्चारश्चैव शाश्वतः** । आचारप्रमाणको धर्म आचार इत्युक्तः । द्वितीये चैनं विवेक्ष्यामः । **शाश्वतो** वृद्धपरंपरया नेदानींतनैः प्रवर्तितः ॥ १०७ ॥

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ॥
तस्मादस्मिन्सदायुक्तो नित्यं स्यादात्मवान् द्विजः ॥ १०८ ॥

परमः प्रकृष्टो धर्म आचारस्तथा श्रुतौ वेदे य उक्तः । **स्मार्तः** स्मृतिषूक्त**स्तस्मा**-**चारधर्मे** नित्यं युक्तः स्यान्नित्यमनुतिष्ठे**दात्मवाना**त्मनो हितमिच्छन् । सर्वस्याऽऽत्मास्त्यतो मतुपा तद्धितपरत्वमुच्यते ॥ १०८ ॥

आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ॥
आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ॥ १०९ ॥

प्रकारान्तरेणेयमाचारस्तुतिः । आचारात्प्रच्युत आचारहीनो न वेदफलं प्राप्नोति । वेदविहितकर्मानुष्ठानफलं **वेदफलमित्युक्तम्** । समग्राण्यविकलानि वैदिकानि कर्माण्यनुतिष्ठन्यद्याचारभ्रष्टो न ततः पुत्रकामादिफलमश्नुत इति निन्दा । एष एवार्थो विपर्ययेणोच्यते । आचारेण तु संयुक्तः सकलं फलं प्राप्नोति । काम्यानां च । अत्र यद्वदन्ति संपूर्णवचनादाचारहीनस्याप्यस्ति काम्येभ्यः फलसंबन्धो न कृत्स्नफललाभ इति तन्न किंचित्, अर्थवादत्वादस्य ॥ १०९ ॥

एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम् ॥
सर्वस्य तपसो मूलमाचारं जगृहुः परम् ॥ ११० ॥

यावत्किंचित्तपःप्राणायाममौनयमनियमकृच्छ्रचान्द्रायणानशनादि तस्य **सर्वस्य** फलप्रसवे **मूलमाचारो**ऽतस्तमेव **मुनय**स्तपःफलार्थिनो मूलत्वेन कारणतया **जगृहुः** गृहीतवन्तः । आचाराद्दृष्ट्वा **धर्मस्य मुनयो गतिं** प्रातिमतिक्लेशकरं तपस्तदप्याचारहीनस्य न फलतीति श्रुतिः ॥ ११० ॥

जगतश्च समुत्पत्तिं संस्कारविधिमेव च ॥
व्रतचर्योपचारं च स्नानस्य च परं विधिम् ॥ १११ ॥

उक्तधर्मा अत्र विशिष्यन्ते । श्रोतृप्रवृत्त्यर्थं चानन्तफलता धर्मस्योक्ता 'एतदन्ता' स्त्वित्यादिना । तत्रातीन्द्रियोऽयमनन्तो दुष्पार इति मन्वाना अवसीदेयुरत उत्साहजननार्थं शास्त्रार्थसंकलनात्मिकामनुक्रमणीं पठति । एतावन्त्यत्र वस्तूनि, नातिबहूनि, शक्यन्ते श्रद्दधानैः पुरुषैर्ज्ञातुमिति । संक्षेपोपदिष्टमार्गे आक्रम्यमाणो न दुःसहो भवतीति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगतश्च समुत्पत्तिमिति कालपरिमाणं तत्त्वभावभेदो ब्राह्मणस्तुतिरित्यादि सर्वं जगदुत्पत्तावन्तर्भूतम् । एतच्चार्थवादतयोक्तं न प्रमेयतया। **संस्कारविधिं व्रतचर्योपचारं च ।** गर्भाधानादयः संस्काराः तेषां विधिः कर्तव्यता । ब्रह्मचारिणो व्रतचर्याया उपचारोऽनुष्ठानमितिकर्तव्यता वा । एतद्द्वितीयाध्यायप्रमेयार्थः । **स्नानं** गुरुकुलान्निवर्तमानस्य संस्कारविशेषः ॥ १११ ॥

दाराधिगमनं चैव विवाहानां च लक्षणम् ॥
महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम् ॥ ११२ ॥

दाराणामधिगमनं भार्यासंग्रहः । **विवाहानां** ब्राह्मादीनां तत्प्राप्त्युपायानां च **लक्षणं** स्वरूपाधिगमने हेतुम् । **महायज्ञाः** पञ्च वैश्वदेवादयः । **श्राद्धस्य** पितृयज्ञस्य **कल्पो** विधिरितिकर्तव्यता । परग्रहणं शाश्वतग्रहणं च वृत्तपूरणार्थम् । एष तृतीयाध्यायार्थः ॥ ११२ ॥

वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च ॥
भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च ॥ ११३ ॥
स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च ॥
राज्ञश्च धर्ममखिलं कार्याणां च विनिर्णयम् ॥ ११४ ॥
साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि ॥
विभागधर्मं द्यूतं च कण्टकानां च शोधनम् ॥ ११५ ॥
वैश्यशूद्रोपचारं च संकीर्णानां च संभवम् ॥
आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा ॥ ११६ ॥

वृत्तीनां जीवनोपायानां धनार्जनात्मकानां भृत्यादीनां **लक्षणम् । स्नातकस्य** समाप्तवेदाध्ययनस्य गुरुकुलान्निवृत्तस्य **व्रतानि** 'नेक्षेतोद्यन्तमादित्यमित्यादीनि' । एष चतुर्थाऽर्थः ।

भक्ष्याभक्ष्यं 'पञ्चपञ्चनखा भक्ष्या' 'अभक्ष्यं पलाण्ड्वादि' **शौचं** कालकृतं जन्मादावुदकादिना च **द्रव्यशुद्धिः स्त्रीधर्मयोगः** संबन्धो बाल्ययुवेत्यादि । **एतत्पाञ्चमिकम् ।**

तापसाय हितं **तापस्यं** तपःप्रधानस्तापसो वानप्रस्थस्तस्य धर्मस्तापस्यम् । **मोक्षः** परिव्राजकधर्मः **संन्यासश्च** तद्विशेष एव स च तत्रैव दर्शयिष्यते । **षष्ठाध्यायस्त्वेतत् ।**

राज्ञः पृथिवीपालनाधिकृतस्य प्राप्तैश्वर्यस्य **धर्मोऽखिलो** दृष्टार्थोऽदृष्टार्थश्च । एष **सप्तमाध्यायगोचरः ।**

कार्याणामृणादीनां विनिर्णयो विचार्य संशयच्छेदेनावधारणमनुष्ठेयनिश्चयः । **साक्षिणां** च प्रश्ने यो विधिः प्राधान्यात्पृथङ्निर्देशः । **आष्टमिकोऽयमर्थः ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मः स्त्रीपुंसयोरित्येकदेशे स्थितयोः प्रवासवियुक्तयोश्च परस्परं वृत्तिः । **ऋक्थविभागधर्मः**। **द्यूतं** तद्विषयो विधिः द्यूतशब्देनोक्तः । **कण्टकादीनां** चोराटविकादीनां शोधनं राष्ट्रान्निरसनोपायः । यद्यपि विभागादिरष्टादशपदान्तर्गतत्वात्कार्याणा चेत्यनेनैवोपादानाद्दणादानादिवन्न पृथङ्निर्देशः । अध्यायभेदात्तु पृथङ्निर्देशः **वैश्यशूद्रयोरुपचारः** स्वधर्मानुष्ठानम् । **एतन्नवमे** ।

संकीर्णानां क्षत्रियवैदेहकादीनां **संभवमुत्पत्तिमापद्धर्मं** च स्ववृत्त्याऽजीवतां प्राणात्यये यो धर्मः । **एतद्दशमे** ।

प्रायश्चित्तविधिरेकादशे ॥ ११३ ॥ ॥ ११४ ॥ ११५ ॥ ११६ ॥

संसारगमनं चैव त्रिविधं कर्मसंभवम् ॥
निःश्रेयसं कर्मणां च गुणदोषपरीक्षणम् ॥ ११७ ॥

संसारगमनं धर्मेण धर्मी लक्ष्यते । संसारी पुरुष आत्मा तस्य गमनं देहाद्देहान्तरप्राप्तिः । अथवा संसारविषयाः पृथिव्यादयो लोका उच्यन्ते । तत्र गमनम् । पूर्वव**त्त्रिविध**मुत्तमाधममध्यमं कर्मसंभवं शुभाशुभकर्मनिमित्तम् । **निःश्रेयसं** न केवलं कर्मनिमित्तागतय उक्ता । यावद्यतः परमन्यच्छ्रेयो नास्ति तदुपायोऽप्यध्यात्मज्ञानमुक्तम् । कर्मणां च विहितप्रतिषिद्धानां गुणदोषपरीक्षा ॥ ११७ ॥

देशधर्माञ्जातिधर्मान्कुलधर्मांश्च शाश्वतान् ॥
पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः ॥ ११८ ॥

तदेव साकल्याभिधानं द्रढयति । प्रतिनियते देशेऽनुष्ठीयमाना न सर्वस्यां पृथिव्यां **ते देशधर्माः** । ब्राह्मणादिजात्याश्रया **जातिधर्माः** । **कुलधर्माः** प्रख्यातवंशप्रवर्तिता इति । **पाखण्डं** प्रतिषिद्धव्रतचर्या । आम्नायस्मृतिसमाश्रयास्तत्र ये धर्माः । 'पाखण्डिनो विकर्मस्थानिति' । **गणः** संघातो वणिक्कारुकुशीलवादीनाम् । तान्सर्वधर्मान्भगवान्**मनु**रास्मिञ्छास्त्रे उक्तवान् ॥ ११८ ॥

यथेदमुक्तवाञ्छास्त्रं पुरा पृष्टो मनुर्मया ॥
तथेदं यूयमप्यद्य मत्सकाशान्निबोधत ॥ ११९ ॥

अवधानार्थः प्रतिबोधः ॥ ११९ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां प्रथमोऽध्यायः ॥ १ ॥

इति श्रीभट्ट**मेधातिथिविर**चिते **मनु**भाष्ये प्रथमोऽध्यायः ॥ १ ॥

---

१ ख–प्रायश्चिविधि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ द्वितीयाध्यायः २ ।

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ॥
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥ १ ॥

प्रथमोऽध्यायः शास्त्रप्रतिपाद्यार्थतत्त्वदर्शनार्थोऽनुक्रान्तः । जगत्सृष्ट्यादिवर्णनं च तच्छेपमेव व्याख्यातम् । इदानीं शास्त्रमारभ्यते । तत्र प्रतिज्ञातोऽर्थो जगत्सर्गादिवर्णनेन व्यवायाद्विस्मृत इत्यनुसंधानार्थं पुनः शिष्यान्प्रति बोधयति ।

यो धर्मो भवतां शुश्रूषितस्त**मिदानीं** मयोच्यमानं **निबोधता**वहिता भूत्वा शृणुत । प्रथमेऽध्याये पञ्चषाः श्लोकाः प्रयोजनादिप्रतिपादनार्थाः । परिशिष्टमर्थवादरूपम् । तच्चेनातिसम्यगवधारितं न धर्मपरिज्ञाने महती क्षतिः । इह तु साक्षाद्धर्म उपदिश्यते । ततोऽवधानवद्भिरवधारणीयोऽयमर्थ इति पुनरुपन्यासफलम् । **धर्म**शब्द उक्तार्थोऽष्टकाद्यनुष्ठानवचनः । बाह्यदर्शनिनस्तु भस्मकपालादि धारणमपि धर्मं मन्यन्ते । तन्निवृत्त्यर्थं विद्वद्भिरित्यादीनि विशेषणपदानि ।

विद्वांसः शास्त्रसंस्कृतमतयः प्रमाणप्रमेयस्वरूपविज्ञानकुशलाः । ते च वेदार्थविदो विद्वांसो नान्ये यतो वेदादन्यत्र धर्मप्रति ये गृहीतप्रामाण्यास्ते विपरीतप्रमाणप्रमेयग्रहणादविद्वांस एव । एतच्च मीमांसातस्तत्त्वतो निश्चीयते ।

सन्तः साधवः, प्रमाणपरिच्छिन्नार्थानुष्ठायिनो हिताहितप्राप्तिपरिहारार्थाय यत्नवन्तः । हिताहितं च दृष्टं प्रसिद्धम् । अदृष्टं च विधिप्रतिषेधलक्षणम् । तदनुष्ठानबाह्या असन्त उच्यन्ते । अत उभयमत्रोपात्तं ज्ञानमनुष्ठानं च । विद्यमानतावचनः सच्छब्दो न संभवत्यानर्थक्यात् । यद्धि येन सेव्यते तत्तेन विद्यमानेनैव ।

सेवाऽनुष्ठानशीलता । भूतप्रत्ययेनानादिकालप्रवृत्ततामाह । नायमष्टकादिधर्मोऽद्यत्वे केनचित्प्रवर्तित इतरधर्मवत् । एतदेव **नित्य**शब्देन दर्शयति । यावत्संसारमेषधर्मः । बाह्यधर्मास्तु सर्वे मूर्खदुःशीलपुरुषप्रवर्तिताः कियन्तं कालं लब्धावसरा अपि पुनरन्तर्धीयन्ते । न हि व्यामोहो युगसहस्रानुवर्ती भवति । सम्यग्ज्ञानमाविद्यया संच्छन्नमपि तत्क्षये निर्मलतामेवैति । न हि तस्य निर्मलतया छेदः संभव इति ।

अद्वेषरागिभिः । इदं बाह्यधर्मानुष्ठाने द्वितीयं कारणम् । व्यामोहः पूर्वमुक्तः । अनेन लोभादय उच्यन्ते रागद्वेषग्रहणस्य प्रदर्शनार्थत्वात् । लोभेन मन्त्रतन्त्रादिषु प्रवर्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यन्ति । अथवा रागद्वेषयोर्लोभोऽन्तर्भूतः । आत्मनियोगोपभोगे चारक्ताः उपायातरेण जीवितुं समर्था लिङ्गधारणादिना जीवन्ति । तदुक्तं भस्मकपालादिधारणं, नग्नता काषाये च वाससी बुद्धिपौरुषहीनानां जीविकेति । द्वेषो विपरितानुष्ठानकारणम् । द्वेषप्रधाना हि नातीव तत्त्वावधारणे समर्था भवन्त्यतोऽधर्ममेव धर्मत्वेनाध्यवस्यन्तीति । अथवोभावपि रागद्वेषौ तत्त्वावधारणे प्रतिबन्धकौ । सत्यामपि कस्यांचिच्छास्त्रवेदनमात्रायां लब्धेऽपि विद्वद्व्यपदेशे रागद्वेषवत्तया विपरीतानुष्ठानं संभवति । जानाना अपि यथावच्छास्त्रं कस्यचिद्द्वेष्यस्योपघाताय प्रियस्य चोपकाराय कौटसाक्ष्याद्यधर्मं सेवन्ति तेषां वेदमूलमेवानुष्ठानमित्यशक्यनिश्चयं कारणान्तरस्य रागद्वेषलक्षणस्य संभवादतस्तत्प्रतिषेधः ।

अत्र चोच्यते । सद्भिरिति सच्छब्दः साधुतावचनो वर्णितः । कीदृशी च साधुता तस्य यदि रागद्वेषाभ्यामधर्मे प्रवृत्तिः संभाव्यते तस्माद्द्वेषरागिभिरिति न वक्तव्यम् । एवं तर्हि हेतुत्वेनोच्यते । यतो रागादिवर्जिता अतः सन्तो भवन्ति । रागद्वेषप्रधानत्वाभावश्चात्र प्रतिपाद्यते । न सर्वेण सर्वं तदभावयोग्यावस्थागतस्य हेतोर्निरन्वयमुच्छिद्यते । तथा च श्रुतिः—" न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति " । रागो विषयोपभोगगृध्नुता तत्प्रतिषेधव्यापारो रागद्वेषः । लोभो मात्सर्यमसाधारण्येन स्पृहा, परस्य चैतन्माभूद्विभवख्यात्यादि । चित्तधर्मा एते । अथवा चेतनावत्सु स्त्रीसुतसुहृद्बान्धवादिषु स्नेहो रागः, लोभोऽचेतनेष्वपि धनादिषु स्पृहा ।

हृदयेन । हृदयशब्देन चित्तमाचष्टे । अनुज्ञानं च हृदयस्य प्रसादः । एषा हि स्थितिः अन्तर्हृदयवर्तीनि बुद्ध्यादितत्त्वानि । यद्यपि बाह्यहिंसाभक्ष्यभक्षणादिषु मूढा धर्मबुद्ध्या प्रवर्तन्ते तथाऽपि हृदयाक्रोशनं तेषां भवति । वैदिके त्वनुष्ठाने परितुष्यति मनः ।

तदस्य सर्वस्यायमर्थः । न मया तादृशो धर्म उच्यते यत्रैते दोषाः सन्ति । किंतु य एवंविधैर्महात्मभिरनुष्ठीयते स्वयं च यत्र चित्तं प्रवर्तयति वा । अत आदरातिशय उच्यमानेषु धर्मेषु युक्तः ।

अथवा हृदयं वेदः । स ह्यधीतो भावनारूपेण हृदयस्थितो हृदयम् । ततश्च त्रितयमत्रोपात्तम् । यदि तावदविचार्यैव स्वाग्रहात्काचित्प्रवृत्तिः कस्याचित्तथाऽप्यत्रैव युक्ता । एतद्धृदयेनाभ्यनुज्ञात इत्यनेनोच्यते । अथाप्ययं न्यायो 'महाजनो येन गतः स पन्थाः' इति तदप्यत्रैवास्ति । विद्वांसो ह्यत्र निष्कामाः प्रवृत्तपूर्वा अनिन्द्याश्च लोके । अथाप्रामाणिकी

---

१ अ-फ-आत्मनि ये भोगोपयोगासरेण जीवितुमसमर्था लिंगधारणादिना जीवन्ति । स्वरूपज्ञानकुशलाः । २ क-सेवन्ते । ३ बृहदारण्यकोपनिषदि ४ फ-विभवोऽप्यस्यापीति । अ-क-विभवख्यात्या च । ५ ङ-ख-क्ष-अनुज्ञातस्य । ६ फ-प्रवृत्तिपूर्वाः ।

For Private And Personal Use Only

प्रवृत्तिः साऽपि वेदप्रामाण्यात्सिद्धैवेति । सर्वप्रकारं प्रवृत्त्याभिमुख्यमनेन जन्यते । अन्ये त्वेतं श्लोकं सामान्येन धर्मलक्षणार्थं व्याचक्षते । एवंविधैर्यः सेव्यते स धर्मोऽवगन्तव्यः । प्रत्यक्षवेदविहितस्य स्मार्तस्य वाऽऽचारतः प्राप्तस्य सर्वस्यैतल्लक्षणं विद्यते । अत्र तु य एतैः सेव्यते तं धर्मं निबोधतेति पाठो युक्तः ॥ १ ॥

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता ॥
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥ २ ॥

फलाभिलाषः कर्मप्रवृत्तेर्हेतुर्यस्य स कामात्मा तद्भावः **कामात्मता** । तत्प्रधानता आत्मशब्देन प्रतिपाद्यते । सा **न प्रशस्ता** निन्दिता अतश्च निन्दया प्रतिषेधानुमाने न कर्तव्येति प्रतीयते । अर्थात्सौर्यादीनां सर्वेषां काम्यानां निषेधोऽयम् । अथवा किं विशेषेण ब्रूमः सौर्यादीनामिति । सर्वमेव क्रियानुष्ठानं फलसिद्ध्यर्थं न स्वरूपनिष्पत्तये । न च काचन निष्फला क्रिया । यदपि 'न कुर्वीत वृथाचेष्टामिति' । भस्मनि हुतं विषयान्तरे देशराजवार्ताद्यन्वेषणं तत्रापि क्रियाफलं विद्यते । किंतु प्रधानफलं स्वर्गग्रामादि पुरुषस्य यद्दृष्टादृष्टयोरुपयुज्यते तदभावाद्वृथाचेष्टेत्युच्यते ।

अथोच्यते । भवतु क्रिया फलवती तद्विषयेऽभिलाषो न कर्तव्यो वस्तुस्वाभाव्यात्फलं भविष्यति । अत्रापि सौर्यादीनामफलत्वं काम्यमानं फलं ज्ञातं नानिच्छोस्तद्भविष्यतीति । न च लौकिकी प्रवृत्तिर्दृश्यते फलाभिसन्धिनिरपेक्षा । न चात्र विशेषः श्रुतौ वैदिकेषु कर्मसु फलं नाभिसंधेयमिति । तत्र फलवत्सु श्रुतेषु कामनानिषेधादप्रवृत्तौ श्रुतिविरोधः । नित्येषु तु प्राप्तिरेव नास्ति । विशेषानुपादानाच्च लौकिकव्यापारनिवृत्तौ दृष्टविरोधः ।

तदिदमापतितम्, न किंचित्केनचित्कर्तव्यं सर्वैस्तूष्णींभूतैः स्थातव्यम् । उच्यते । यत्तावदुक्तं काम्येषु सौर्यादिषु निषेधप्रसङ्ग इति तत्र वक्ष्यति 'यथासंकल्पितांश्चेह सर्वान् कामान् समश्नुत' इति । निषेधे हि कुतः संकल्पः कुतश्च कामावाप्तिः । यदपि विशेषानुपादानाल्लौकिकेऽपि प्रसक्त इति । तत्रोपात्त एव विशेषः । 'यो धर्मस्तं निबोधतेति' धर्मस्य प्रकृतत्वात् । यदप्युक्तं नित्येषु फलाश्रवणात्फलाभिसन्धेः प्राप्तिरेव नास्ति । किं निषेधेनेति तत्राप्युच्यते । फलाभावात्कश्चित्सम्यक्शास्त्रार्थमजानानो न प्रवर्तेत । सौर्यादिषु च श्रुतफलेषु फलाभिसन्धिपूर्विकां प्रवृत्तिं दृष्ट्वा सामान्यतो दृष्टेन यत्कर्तव्यं तत्फलहेतोः क्रियत इत्यश्रुतमपि फलमभिसंदधीत । तन्निवृत्त्यर्थमिदमारभ्यते । यद्यप्ययं न्यायो यत्फलवच्छ्रुतं तत्तथैव कर्तव्यम् । यदापि निष्फलमेव कर्तव्यतया शास्त्रेण यावज्जीवादिपदैर्वैनैव विश्वजिन्न्यायेन फलकल्पनयाऽवगमितं तथाऽन्यथानुष्ठाने प्रसङ्ग एव नास्ति तथापि य एतं न्यायं

---

१ ख–फ–वाऽऽच रतः । २ फ–यद्दृष्टा– ३ अग्रे ५ श्लो. । ४ क–यद्यपि; फ–तदपि । ५ फ–ख अ–क्ष–अलाश्रयणात् । ६ ' क–ख–ड–चाश्रुतफलेषु ' । ७ फ–तस्यानुष्ठाने ।

प्रतिपत्तुमसमर्थः स वचनेन प्रतिपाद्यते । न्यायतः प्रतिपत्तौ हि गौरवम् । वचनात्तु लघीयसी सुखप्रतिपत्तिरिति सुहृद्भूत्वा प्रमाणसिद्धमर्थमुपदिशतिस्म ।

न चैवेहास्त्यकामता । कामशब्दोऽयं यद्यपि स्त्वच्छयवचनो दृष्टस्तथाऽपि तस्येहासंभवात्काम इच्छाभिलाष इत्यनर्थान्तरम् । तत्र वक्ष्यमाणपर्यालोचनया फलाभिलाषेण न सर्वत्र प्रवर्तितव्यमित्ययमर्थः स्थास्यति ।

परस्तु कामात्मतामिच्छामात्रसंबधमात्रं पदार्थं मन्वानश्चोदयति । **न चैवेहास्त्यकामतेति** । न चेह लोके काचिदकामिनः प्रवृत्तिरस्तीत्यर्थः । आस्तां तावत्कृषिवाणिज्यादि व्युत्पन्नबुद्धिना क्रियमाणम् यः स्वयं वेदाधिगमो वेदाध्ययनं बालः कार्यते पित्रादिना ताड्यमानः सोऽपि न काममन्तरेणोपपद्यते । अध्ययनं हि शब्दोच्चारणरूपम् । न चोच्चारणमिच्छया विना निर्घातध्वनिवदुत्तिष्ठति । इच्छति चेत्किमिति ताड्यत इति । सैव तथेच्छोपजन्यते । अभिमते तु विषये स्वयमुपजायत इत्येतावान्विशेषः । यश्चायं वैदिको वेदविहितः कर्मयोगो दर्शपूर्णमासादि कर्मानुष्ठाने नित्यत्वेनावगतः सोऽपि न प्राप्नोति । न ह्यनिच्छतो देवतोद्देशेन स्वद्रव्यत्यागोपपत्तिः । तस्मात्कामात्मतानिषेधे सर्वश्रौतस्मार्तकर्मनिषेधः प्रसक्त इति ॥ २ ॥

संकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः ॥
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः ॥ ३ ॥

ततश्च यदुक्तं यागस्य कामेन विना न स्वरूपनिष्पत्तिरिति तदनेन विस्पष्टं कृत्वा कथयति । संकल्पो यागादीनां मूलं कामस्य च । यागादींश्चिकीर्षन्नवश्यं संकल्पं करोति । संकल्पे च क्रियमाणे तत्कारणेन कामेन संनिधातव्यमनिष्टेनापि यथा पाकार्थिनो ज्वलनं कुर्वतस्तत्समानकारणो धूमोऽप्यनिष्टो जायते । तत्र न शंक्यं[2] यज्ञादयः करिष्यन्ते कामश्च न भविष्यतीति ।

अथ कोऽयं संकल्पो नाम यः सर्वक्रियामूलम् ? । उच्यते । यच्चेतःसंदर्शनं नाम यदनन्तरं प्रार्थनाध्यवसायौ क्रमेण भवतः । एते हि मानसा व्यापाराः सर्वक्रियाप्रवृत्तिषु मूलतां प्रतिपद्यन्ते । न हि भौतिका व्यापारास्तमन्तरेण संभवन्ति । तथाहि प्रथमं पदार्थस्वरूपनिरूपणम् । अयं पदार्थ इमामर्थक्रियां साधयतीति यज्ज्ञानं स इह संकल्पोऽभिप्रेतः । अनन्तरं प्रार्थना भवति इच्छा । सैव कामः । 'कथमहमिदमनेन साधयामीति' इच्छायां सत्यामध्यवस्यति करोमीति निश्चिनोमीति सोऽध्यवसायः । ततः साधनोपादाने बाह्यव्यापारविषये प्रवर्तते । तथाहि बुभुक्षित आदौ भुजिक्रियां पश्यति तत इच्छति भुञ्जीयेति ततोऽध्यवस्यति

१ उपरितन-२-श्लोके । २ फ-शंक्यम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यापारान्तरेभ्यो विनिवृत्त्य भोजनं करोमीति ततः कर्मकारणस्थानाधिकारिण आह । 'सज्जीकुरुत रसवतीं संचारयतेति' । नन्वेवं सति न यज्ञादयः संकल्पमात्राद्भवन्ति अपि तु संकल्पप्रार्थनाध्यवसायेभ्यः; तत्र किमुच्यते 'यज्ञाः संकल्पसंभवाः' इति ? । संकल्पस्याद्यकारणत्वाददोषः । अत एवोत्तरत्र 'नाकामस्य क्रिया काचिद्दृश्यत' इति वक्ष्यति । **व्रतानि** । मानसो ऽध्यवसायो व्रतम् । 'इदं मया यावज्जीवं कर्तव्यमिति' यद्विहितम् । यथा स्नातकव्रतानि । **यमधर्माः** प्रतिषेधरूपाः अहिंसादयः । कर्तव्येषु प्रवृत्तिः, निषिद्धेभ्यो निवृत्तिः; नान्तरेण संकल्पमस्ति ॥ ३ ॥

अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् ॥
यद्यद्धि कुरुते किंचित्तत्तत्कामस्य चेष्टितम् ॥ ४ ॥

पूर्वेण शास्त्रीये प्रवृत्तिनिवृत्ती संकल्पाधीने व्याख्याते । अनेन लौकिकेषु कर्मसु तदधीनतोच्यत इति विशेषः । **नेह लोके कर्हिचित्कदाचिदपि** जाग्रदवस्थायां किंचिदनुष्ठेयत्वेनानिच्छतः संभवति । यत्किंचिल्लौकिकं वैदिकं वा कुरुते कर्म विहितं प्रतिषिद्धं च तत्सर्वं कामस्य चेष्टितम् ॥ ४ ॥

हेतुत्वाच्चेष्टितं कामस्यैवेत्युक्तं तदिदमतिसंकटं, कामात्मता न प्रशस्ता, न चानया विना किंचिदनुष्ठानमस्ति । अत्र प्रतिविधत्ते—

तेषु सम्यग्वर्तमानो गच्छत्यमरलोकताम् ॥
यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ॥ ५ ॥

तेषु कामेषु **सम्यग्वर्तितव्यम्** । का पुनः सम्यग्वृत्तिः[6] ? यद्यथा श्रुतं तत्तथैवानुष्ठेयं नित्येषु फलं नाभिसंधेयम् अश्रुतत्वात् । काम्येषु त्वनिषेधः तेषां तथाश्रुतत्वात् । फलसाधनतयैव तानि विधितोऽवगम्यन्ते । फलानिच्छोस्तदनुष्ठानमश्रुतकारणं स्यात् । नित्येषु फलाभिसंधिर्व्यामोह एव । न ह्यभिसंधिमात्रात्प्रमाणतोऽनवगते फलसाधनत्वे फलमुत्पद्यते । एवं कुर्वन्गच्छति प्राप्नोत्यमरलोकताम् । अमराः देवास्तेषां लोकः स्वर्गः तन्निवासात् अमरेषु लोकशब्दः स्थानस्थानिनोरभेदात् 'मञ्चाः क्रोशन्तीति' वत् ।

---

१ फ—कर्मकरण— । २ ख—ड—क्ष—संचरतेति । ३ फ—ख—ड—क्ष—अ—क—संकल्पसाधकारणत्वात् । ४ अग्रे ४ श्लो. । ५ [इमौ प्रक्षिप्तौ] श्लोकौ.

[असद्वृत्तस्तु कामेषु कामोपहतचेतनः ॥ नरकं समवाप्नोति तत्फलं न समश्नुते ॥ १ ॥
तस्माच्छ्रुतिस्मृतिप्रोक्तं यथाविध्युपपादितम् ॥ काम्यं कर्मेह भवति श्रेयसे न विपर्ययः ॥ २ ॥]

६ ख—ड—क्ष—केषु न सम्यग्वृत्तिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेनायं समासः। अमराश्च ते लोकाश्च अमरलोकास्तद्भावः अमरलोकता । देवजनत्वं प्राप्नोति देवत्वं प्राप्नोतीत्यर्थः। वृत्तानुरोधादेवमुक्तम् । अथवाऽमराँल्लोकयति पश्यत्यमरलोकः । 'कर्मण्यण्'। तदन्ताद्भावप्रत्ययः । (न्या. सू. ३। २। १) देवदर्शी संपद्यते । अनेनापि प्रकारेण स्वर्गप्राप्तिरेवोक्ता भवति । अथवाऽमर इव लोक्यते लोके ।

अर्थवादश्चायं नात्र स्वर्गः फलत्वेन विधीयते । नित्यानां फलाभावात्काम्यानां च नानाफलश्रवणात् । तेन स्वर्गप्राप्त्या शास्त्रानुष्ठानसंपत्तिरेवोच्यते । लक्षणया यदर्थं कर्मण्यनुष्ठानं तत्संपद्यत इत्यर्थः । तत्र नित्यानां प्रत्यवायानुत्पत्तिर्विध्यर्थसंपत्तिर्वा प्रयोजनम् । काम्येषु तु यथासंकल्पितान्यथाश्रुतं संकल्पितान् । प्रयोगकाले यस्य कर्मणो यत्फलं श्रुतं तत्संकल्प्य अभिसंधाय मनसा कामयित्वेदमहमतः फलं प्राप्नुयामिति । ततः **सर्वान्कामान्काम्यानर्थान्समश्नुते** प्राप्नोति । अतः परिहृता संकटापत्तिः, यतो न सर्वविषयः कामो निषिध्यते । किं तर्हि? नित्येषु फलाभिलाषलक्षणः । साधनसंपत्तिस्तु काम्यैव ।

ब्रह्मवादिनस्तु सौर्यादीनां निषेधार्थं कामात्मतेति मन्यन्ते । फलार्थितया क्रियमाणा बन्धात्मका भवन्ति । निष्कामस्तु ब्रह्मार्पणन्यायेन कुर्वन्मुच्यते । तदुक्तं भगवता **कृष्णद्वैपायनेन** 'मा कर्मफलहेतुर्भूः' (भ.गी.अ.२ श्लो. ४७)। तथा "साधनानामकृत्स्नत्वान्मौर्ख्यात्कर्मकृतस्तथा । फलस्य चाभिसंधानादपवित्रो विधिः स्मृतः" इति । बहवश्चात्र व्याख्याविकल्पा असारत्वात्तु न प्रदर्शिताः ॥ ५ ॥

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ॥
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ ६ ॥

कोऽस्याभिसंबन्धः यावता धर्मोऽत्र वक्तव्यतया प्रतिज्ञातः स च विधिप्रतिषेधलक्षणः । तत्र न वेदस्य धर्ममूलता विधेया । वेदो धर्ममूलत्वेन ज्ञातव्यो धर्मप्रामाण्य आश्रयणीयः, अन्तरेणैवोपदेशं तत्सिद्धेः। न हि **मन्वाद्युपदेशसमधिगम्यं वेदस्य धर्ममूलत्वम्**। अपि तु अबाधितविषयप्रतीतिजनकत्वेनापौरुषेयतया च पुरुषसंसर्गदोषैरपि मिथ्याभिधानाशङ्काभावात्, स्वतश्च शब्दस्यादुष्टत्वात्प्रत्यक्षवत्स्वतःप्रामाण्यसिद्धिः । अथोच्यते । न्यायतः सिद्धं वेदस्य प्रामाण्यमनूद्य मन्वादिस्मृतीनां तन्मूलता वचनेन ज्ञाप्यत इति तदपि न । तत्रापि पूर्वज्ञानसापेक्षत्वात्स्मरणस्य भ्रान्तिविप्रलम्भादीनां महाजनपरिग्रहादिना निरस्तत्वादतीन्द्रियार्थदर्शनस्याशक्यभावाच्च पुरुषस्य च स्वानुभवसिद्धेर्वेदार्थस्मरणस्य वेदमूलतैवावशिष्यते । न हि वेदविदां कार्यार्थविषयं स्मरणं संभवति । वेदस्य च मूलत्वेन मूलान्तरकल्पनायाऽनवसरः ।

---

१ क-ख-ड-क्ष-संकल्पादभिसंधाय । २ ड-कामात्मनेति । ३ अ-क-ख-ड-क्ष-प्रतिज्ञातव्यः । ४ अ-क-क्ष-ड-ख-तदपि । ५ ख-ड-क्ष-मूलतैव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाप्येतद्युज्यते वक्तुं 'स्मृतिशीले च तद्विदामि' त्येतदप्यनूद्यते बाह्यस्मृतीनामप्रामाण्याय यतस्तासां न्यायत एव सिद्धमप्रामाण्यम् । न हि शाक्यभोजकक्षपणकादीनां वेदसंयोगसंभवो येन तन्मूलतया स्वविषये प्रमाणं स्युः स्वयमनभ्युपगमात्, तैश्च वेदस्याप्रामाण्याभिधानात् प्रत्यक्षवेदविरुद्धार्थोपदेशाच्च । तत्रासंभवस्तासु स्मृतिषु वेदाध्ययननिषेधात् । सति हि वेदाध्येतृत्वे बुद्धादीनां तन्मूलता स्यान्न वेति जायते विचारणा । यत्र तु तत्संबन्धो दूरापेतस्तत्र का तन्मूलताशङ्का । स्वयं च मूलान्तरं परंपरायातमभ्युपगच्छन्ति । पश्याम्यहं भिक्षुकोनां दिव्येन चक्षुषा सुगतिं दुर्गतिं च । एवं सर्व एव बाह्या भोजकपाञ्चरात्रिकनिर्ग्रन्था नार्थवादपाशुपतप्रभृतयः स्वसिद्धान्तानां प्रणेतॄन्पुरुषातिशयान् देवताविशेषांश्च प्रत्यक्षतदर्थदर्शिनोऽभ्युपयन्ति । न वेदमूलमपि धर्ममभिमन्यन्ते । प्रत्यक्षेण च वेदेन विरुद्धास्तत्रार्था उपदिश्यन्ते । तथाहि हिंसा चेद्धर्म उच्यते संसारमोचकादिभिः सा चात्र प्रत्यक्षतः प्रतिषिद्धा । तथाऽन्यत्र तीर्थस्नानमघर्मोऽभ्युपेयते इह त्वहरहः स्नायात्तीर्थानि सेवेतेति च विधिः । तथाऽग्निष्टोमीयवधः क्वचित्पापहेतुरिष्यते स च ज्योतिष्टोमविधिना विरुद्धः । तथाऽन्ये सर्वानेव यागहोमानात्मार्थान्संमन्यंते देवताभेदविधिभिर्नानादैवत्यास्तेऽवगमिता अतो विरोधः ।

येऽप्याहुर्ग्रहणाग्रहणवदुदितानुदितहोमकालवत्प्रत्यक्षश्रुतिविरोधदर्शनात् स्यात्संभवः शाखान्तरस्योच्छिन्नस्यानुच्छिन्नस्य वा तद्विरुद्धार्थविधिपरस्य । अनन्ता हि वेदशाखास्ताः कथमेकस्य प्रत्यक्षा उत्सादश्च संभवतीति । तत्र स्यात्तादृशी वेदशाखा यस्यामयं नरास्थिपात्रभोजननग्नचर्मादिरुपदिष्टो भवेत् ।

उच्यते—न वयं ब्रूमः वेदविरुद्धार्थोपदेशात्संभव इति । किंतु समकक्षत्वात्तयोर्विकल्पितप्रयोगयोरव्याघातः । इह तु कल्प्यो वेदो । न च प्रत्यक्षविरोधिकल्पनाया अवसरः । न च संभवमात्रेण तावता निश्चयः । निश्चितस्तु तद्विरुद्धप्रत्यक्षविधिरनिश्चितेन न वा निश्चितं बाध्यते । शाखोत्सादपक्षं चात्रैव श्लोके परस्तात्प्रपञ्चयिष्यामः । सर्वत्र च प्रत्यक्षश्रुतिभिर्मन्वादिस्मृतीनां व्यतिषङ्गः । कचिन्मन्त्रेण कचिद्देवतया कचिद्द्रव्यविधिभिः । न च बाह्यासु तत्संभवतीति तासामप्रामाण्यम् ।

एवमाचारस्यापि वेदविद्भिरदृष्टार्थतयाऽऽचर्यमाणस्य स्मृतिवदेव प्रामाण्यं मूलसंभवात् । असाध्वाचारस्यापि दृष्टकारणादिसंभवादविदुषां च भ्रान्त्यादिसंभवादप्रामाण्यम् । एवमात्मनस्तुष्टेरपि । यदि च वेदस्मृत्याचाराणां मन्वाद्युपदेशसमधिगम्यं प्रामाण्यं मन्वादीनां कथं तत्राप्युपदेशान्तरात् 'स्मार्त च मनुरब्रवी' दित्यादेः । तत्र कथं तस्मादिदं

---

१ क–स्मृतिपरंपरायातम् । २ ख–क–अ–ड–क्ष–भिक्षावादिव्येन । ३ अ–क–ख–ड–क्ष–प्रत्यक्षविधिनिश्चितेन । ४ अ–क–ख–ड–क्ष–देवतायाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणमिदमप्रमाणमिति युक्तित एतदवसेयम् । नोपदेशतः तथाचायमनर्थकः श्लोकः । एतत्समानरूपा उत्तरेऽपि ।

अत्रोच्यते । इह ये धर्मसूत्रकारा अव्युत्पन्नपुरुषव्युत्पादनार्थं पदार्थसंपादनपरतया ग्रन्थसंदर्भानारभन्ते तत्र यथैवाष्टकादीनां वेदात्स्वयंकर्तव्यतामवगम्य परावबोधनार्थमुपनिबन्धः एवं प्रमाणान्तरसिद्धस्य वेदप्रामाण्यादेः । सन्ति केचित्प्रतिपत्तारो ये न्यायतस्तत्त्वविवेचनासमर्था ऊहापोहादिरूपबुद्ध्यभावात् । तान्प्रति न्यायसिद्धोऽप्यर्थः सुहृदुपदेशवदुपदिश्यते । तत्र यन्न्यायतः सिद्धं वेदस्य धर्ममूलत्वं तदेवानेनानूद्यते । वेदो धर्ममूलं धर्मस्य मूलत्वेन वेदो विचार्य युक्त्या सिद्धो नात्राप्रामाण्यशंका कर्तव्या । भवन्ति च लोके प्रमाणान्तरसिद्धानामर्थानामुपदेष्टारः । न त्वयाऽजीर्णे मोक्तव्यमजीर्णप्रभवा हि रोगाः। न चैतद्वक्तव्यम्, ये न्यायतो वेदस्य धर्ममूलत्वं न शक्नुवन्ति प्रतिपत्तुं ते वचनादपि न प्रत्येष्यन्ति । यतो दृश्यते । य आप्तत्वेन प्रसिद्धास्तदीयं वचनमविचार्यैव केचन प्रमाणयन्ति । तदेवं सर्वमिदं प्रकरणं न्यायमूलं न वेदमूलम् । अन्यत्रापि व्यवहारस्मृत्यादौ यत्र न्यायमूलता तत्र यथावसरं दर्शयिष्यामः । अष्टकादीनां यथा वेदमूलता तथाऽत्रैव निर्दिश्यते । वेदशब्देनर्ग्यजुःसामानि ब्राह्मणसहितान्युच्यन्ते । तानि चाध्येतॄणां वाक्यान्तरेभ्यः प्रसिद्धभेदानि उपदेशपरंपरासंस्कृता अध्येतारः श्रुत्वैव वेदोऽयमिति प्रतिपद्यन्ते यथा ब्राह्मणोऽयमिति। तत्र वाक्यसमूहेऽपि 'अग्निमीळे' 'अग्निर्वै देवानामवम' इत्यादौ 'संसमिद्युवसे' 'अथ महाव्रतमि'त्यन्ते, वेदशब्दः प्रयुज्यते;तदवयवभूतेषु केवलेषु वाक्येष्वपि ।

न च ग्रामादिशब्दवद्गौणमुख्यता विद्यते । तत्र समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इत्येष न्यायः । ग्रामशब्दो हि प्रसिद्धभूयिष्ठप्रयोगः समुदाय एव, 'ग्रामो दग्ध' इत्यादिपदसंबन्धात्तदवयवे वर्तते । कतिपयशालादाहेऽपि लौकिका 'ग्रामो दग्ध' इति प्रयुञ्जते । अथवा तत्रापि समुदायवचन एव । दाहस्त्वेकदेशवर्ती समुदायसंबन्धितया व्यपदिश्यते । अवयवद्वारक एव समुदायस्य क्रियासंबन्धः। एष एव समुदायस्य क्रियासंबन्धो योऽवयवानाम् । न ह्यवयवान्परिहाप्य समुदायो द्रष्टुं स्प्रष्टुं वा शक्यते ।

व्युत्पाद्यते च वेदशब्दः; विदन्त्यनन्यप्रमाणवेद्यं धर्मलक्षणमर्थमस्मादिति वेदः । तच्च वेदनमेकैकस्माद्वाक्याद्भवति । न यावानृग्वेदादिशब्दवाच्योऽध्यायानुवाकसमूहः । एवं चोदाहरणे जिह्वाच्छेद इत्येकवाक्यविषयोऽप्ययं दण्डः । कृत्स्नोऽधिगन्तव्य इति कृत्स्नग्रहणं सकलवेदवाक्याध्ययनप्राप्त्यर्थम् । अन्यथा कतिचिद्वाक्यान्यधीत्य कृती स्यात् । पुनश्च वेदः कृत्स्न इति । अत्रैतन्निरूपयिष्यामः । स च वेदो बहुधा भिन्नः सहस्रवर्त्मा सामवेदः

१ अ-क-ख-ङ-क्ष-अनुवाकसमूहः । २ फ-न पुनः 'कृत्स्नं' वेदमिति । ३ ख-ङ-क्ष-न च वेदो । ४ ख-ङ-क्ष-अ-सहस्रधर्म्मा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सात्यमुग्रिराणायनीयादिभेदेन, एकशतमध्वर्यूणां काठकवाजसनेयकादिभेदेन, एकविंशतिबाहृच्या आश्वलायनैतरेयादिभेदेन, नवधा आथर्वणं मौदकपैप्पलादकादिभेदेन।

ननु नैव केचिदाथर्वणं वेदं मन्यन्ते यत; " त्रयी विद्या ऋचः सामानि यजूंषीति "। " वेदैरशून्यस्त्रिभिरेति सूर्यः "। तथा "त्रैवेदिकं व्रतं चरेदि' त्यादौ न क्वचिदाथर्वणानामप्यस्ति "। प्रतिषेधश्च श्रूयते " तस्मादाथर्वणेन न शंसेदिति"। अतस्त्रयीबाह्यानाथर्वणिकान्पाषण्डिनः प्रतिजानते तदयुक्तम्। अविगानेन शिष्टानां वेदव्यवहारात् श्रुतीरथर्वाङ्गिरसीरित्यत्रापि व्यवहारः। श्रुतिर्वेद इत्येकोऽर्थः। न च वेदशब्दवाच्यताऽग्निहोत्रादिवाक्यानामपि धर्मप्रामाण्ये कारणम्। इतिहासायुर्वेदयोरपि वेदव्यवहारदर्शनात् 'इतिहासपुराणं पञ्चमं वेदानां वेदमिति'। किं तर्हि अपौरुषेयत्वे सत्यनुष्ठेयार्थावबोधकत्वाद्विपर्ययाभावाच्च। तच्चाथर्ववेदेऽपि सर्वमस्ति; ज्योतिष्टोमादिकर्मणां यजुर्वेदादिष्विव तत्राप्युपदेशात्। अभिचारमूलकं[2]कर्मणां बाहुल्येन तत्रोपदेशादवेदत्वमिति[3] विभ्रमः केषांचित् अभिचारा हि परप्राणवियोगफलत्वात्प्रतिषिद्धाः; आथर्वणिकैश्च त एव प्राधान्येनानुष्ठीयन्ते राजपुरोहितैरतस्ते निन्द्यन्ते।

यत्तु " वेदैरशून्य " इत्यादावथर्ववेदस्यानिर्देश इति। अर्थवादा एते। किं तत्र निर्देशेनानिर्देशेन वा। मन्त्रभेदाभिप्रायं वैतद्वचनं त्रयो वेदास्त्रयी विद्येत्यादि। न हि चतुर्थं मन्त्रजातमस्ति ऋग्यजुःसामव्यतिरेकेण। प्रैषनिविन्निगदेन्द्रगाथादीनामत्रैवान्तर्भावात्। अथर्ववेदे चर्चएव मन्त्रत्वेन समाम्नाताः। अत ऋग्वेद एवायं मन्त्राभिप्रायेण। यस्तु प्रतिषेधः स विपरीतसाधनः प्राप्तौ सत्यां प्रतिषेधोपपत्तेः। अयं वाऽस्यार्थः। अथर्ववेदाधीतैर्मन्त्रैस्त्रैवेदिकं कर्म न मिश्रयेत्। वाचः स्तोमे सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि विनियुक्तानि तत्राथर्ववेदाधीतानां प्रतिषेधः।

स वेदो विशिष्टः शब्दराशिरपौरुषेयो मन्त्रब्राह्मणाख्योऽनेकशाखाभेदभिन्नः। धर्मस्य मूलं प्रामाण्यपरिज्ञाने हेतुः। कारणं मूलम्। तच्च वेदस्मृत्योर्धर्मप्रतिज्ञापकतयैव न [4]निर्वर्तकतया न च स्थितिहेतुतया वृक्षस्येव। धर्मशब्दश्च प्राग्व्याख्यातः। यत्पुरुषस्य कर्तव्यं प्रत्यक्षाद्यवगम्यं विलक्षणेन स्वभावेन श्रेयःसाधनं कृषिसेवादि भवति। तस्य च तत्साधनत्वस्वभावोऽन्वयव्यतिरेकाभ्यामवगम्यते। यादृशेन व्यापारेण कृष्यादेर्व्रीह्यादिसिद्धिः साऽपि प्रत्यक्षाद्यवगम्यैव। यागादेस्तु साधनत्वम्। येन च रूपेणापूर्वोत्पत्तिव्यवधानादिना तन्न प्रत्यक्षाद्यवगम्यम्। श्रेयश्चाभिलषितस्वर्गग्रामादिफलप्राप्तिः सामान्यतः सुखशब्दवाच्या।

१ एतद्धि अस्मदुपलब्धलिखितपुस्तकेषु न दृश्यते। २ अ-ख-ड-क-फ-क्ष-अभिचारमूलकर्मादिकर्माणाम्। ३ अ-क-ख-ड-क्ष-अवेदत्वमतिविभ्रमः। ४ अ-ख-ड-क-फ-क्ष- निवर्तकतया। ५ अ-ख-ड-क-फ-क्ष-अवगम्य।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याधिनिर्धनत्वासौख्यनरकादिफलप्राप्तिः सामान्यतो दुःखशब्दवाच्या तत्परिहारश्च । अन्ये तु परमानन्दादि रूपं श्रेयः ।

अयं धर्मो ब्राह्मणवाक्येभ्योऽवगम्यते लिङादियुक्तेभ्यः। कचिच्च मन्त्रेभ्योऽपि ‘वसन्ताय कपिञ्जलानालभत’ इत्येवमादिभ्यः । तत्र कामपदयुक्तानि वाक्यानि फलार्थमनुष्ठानमवगमयन्ति । ‘सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामो वैश्वदेवीं सांग्रहिणीं निर्वपेद्ग्रामकाम’ इति । तानि फलमनिच्छता न क्रियन्ते ।

अन्यानि यावज्जीवादिपदैर्नित्यतया समर्पितानि तानि न फलहेतोरनुष्ठीयन्ते फलस्यास्याश्रुतत्वात्। न च “ विश्वजिता यजेते ” त्यादिवदश्रुतफलत्वेऽपि फलकल्पना। यतो यावज्जीवादिपदैर्विनैवं फलेन कर्तव्यतयाऽवगम्यन्ते । तत्राकरणे शास्त्रार्थातिक्रमदोषः । तत्र तत्परिहारार्थं तानि क्रियन्ते ।

प्रतिषेधानामपि । ‘ ब्राह्मणो न हन्तव्यः ’ ‘ सुरा न पेया ’ इत्येषैव वार्ता । न हि फलार्थं प्रतिषिद्धवर्जनमपि तु प्रत्यवायपरिहारार्थम् ।

अखिलः कृत्स्नः । न किंचित्पदं वर्णो मात्रा वा यन्न धर्माय । अत्र चोदयन्ति । ननु च ‘ विध्यर्थवादमन्त्रनामधेयात्मको वेदः । धर्मश्च कर्तव्यतास्वभाव ’ इत्युक्तम् । तत्र युक्तं यद्विधिवाक्यानि धर्मे प्रमाणं स्युः । तेभ्यो हि यागादिविषया कर्तव्यता प्रतीयते । “ अग्निहोत्रं जुहोति; दध्ना जुहोति; यदग्नये च प्रजापतये च सायं जुहोति स्वर्गकामो जुहोतीति ” । अत्र ह्यग्निहोत्राख्यं कर्म कर्तव्यतया प्रतीयते । ‘ दध्नेति ’ तत्रैव द्रव्यम् । ‘ यदग्नये चेति ’ देवता । ‘ स्वर्गकाम ’ इत्यधिकारः ।

यत्तु “ अग्निर्वै सर्वा देवता अग्निरेव दैव्यो होता स देवानाह्वयति च जुहोति च ” इत्यादयः । तथा “ प्रजापतिर्वपामात्मन उदखिदत् ” इत्यादयः । न तैः किंचित्कर्तव्यमुपदिश्यते केवलं पुरावृत्तमन्यद्वाऽसांप्रतिकं भूतमनुवदन्ति । प्रजापतिना पुरा आत्मनो वपोत्खाता उत्खिदतु किमस्माकमेतेन ? तथाऽग्नेरपि सर्वदेवतात्मत्वं नाग्नेयकर्मण्युपयुज्यते । अग्निशब्देनोद्देशार्थनिवृत्तेः अन्यदेवत्वेऽन्यत्वादग्नेरुद्देश एव नास्ति। आवाहनस्यापि वचनान्तरेण “ अग्निमग्न आवह ” त्यादिना विहितत्वात् । स देवानाह्वयति च जुहोति चेत्यादिरनर्थकः । मन्त्रा अपि “ न मृत्युरासीदमृतं न तर्हि ” “ सुदेवो अद्य पतेदनावृत् ” इत्यादयो भाववृत्तपरिदेवनादिरूपार्थाभिधायिनः कं धर्मं प्रमिमते ? तस्मिन्काले न मृत्युर्जातो नाप्यमृतं जीवितं प्राक् सृष्टेर्भूतानामनुत्पन्नत्वान्न कस्यचिज्जीवितमासीन्नापि मृत्युः प्रलये सर्वेषां मृतत्वाद्भवतु वा मृत्युर्मा वा न किंचिदेतेन कर्तव्यमुपदिष्टं भवति । एवं सुदेवोऽसौ महापुण्यो देवतुल्यो मनुष्यो योऽद्य प्रपतेच्छ्वभ्र आत्मानं क्षिपेदनावृदावृत्तिः

८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्युज्जीवने यस्मात्प्रपातान्न भवति । उर्वश्या विप्रलब्धः पुरूरवाः परिदेवयांचक्रे । तथा नामधेयम् । "उद्भिदा यजेत, बलभिदा यजेत" इत्यादि न कस्यचिदर्थस्य क्रियाया द्रव्यस्य वा विधायकमाख्यातेन क्रियाया विधानाद्द्रव्यवचनत्वाच्च बलभिदादेः । सोमस्य चाव्यक्त-चोदनत्वेन प्रकृतितः प्राप्तत्वान्न क्लेशेन द्रव्यवचनता कल्प्यते । तस्मान्नाम्नायेन धर्म उपदिश्यते । अतः कथमुच्यते कृत्स्नो वेदो धर्ममूलमिति ।

उच्यते । अनयैवाशंकयाऽखिलग्रहणं कृतम् । यतः सर्वेषामेतेषां धर्मप्रतिपादनपरत्वम् । तथा ह्यर्थवादा नैव विधायकेभ्यो वाक्येभ्यः पृथगर्थाः येन धर्मे न प्रमिमीरन् । विभज्यमानसाकांक्षत्वे विधिपरत्वावगमात्, तत्परत्वे च सिद्धायामेकवाक्यतायां, यथा तदर्थानुगुण्यं प्रतिपद्यन्ते तथा व्याख्येयाः । अतः प्रजापतेर्वपोत्खादनवचनं न स्वार्थनिष्ठम् । किं तर्हि ? विधिशेषम् । न च विधेयं द्रव्यगुणादि अर्थवादेभ्यः प्रतीयत इति प्रकारान्तरेण विधेयार्थस्तावकत्वेन तच्छेषतां प्रतिपद्यन्ते । तदपि तत्र प्रतीयत एव । इत्थं नाम पशुयागः कर्तव्यो यदसत्सु पशुषु गत्यन्तराभावात्प्रजापतिनाऽऽत्मैव पशुत्वेन कल्पितो वपा चोत्खिन्ना यतस्तत्सहितान्येव विधायकानि यत्रार्थवादाः सन्ति । यद्यपि तैर्विनाऽपि भवति विध्यर्थावगतिः । विध्युद्देशादेव "वसन्ताय कपिञ्जलानालभत" इति तथापि न तेषामानर्थक्यम् । तेषु हि सत्सु न केवलादवगतिः ।

नच केनचित्कृतो वेदो येनोच्यते 'यथाऽन्यत्र न सन्ति तथात्रापि मा भूवन्' । सत्स्वर्थवादेष्वस्माभिर्गतिर्विवक्तव्या सा चोक्ता । न चायमलौकिकोऽर्थो लोकेऽपि हि स्तुतिपदानि दृश्यन्ते विधिशेषभूतान्येव । यथा भृतिदाने प्रवृत्तस्य स्वामिनः कश्चिद्भृतकः प्रीत्याऽऽचष्टे साधुर्देवदत्तो नित्यसंनिहितः परिचर्याभूमिज्ञस्तत्परश्चेति । अतो विधेयार्थस्तुतिद्वारेणार्थवादा विधायका एव । तथा क्वचिदर्थवादादेव विधेयविशेषावगतिः । यथा "अक्ताः शर्करा उपदधाति" । अत्र ह्यञ्जनसाधनं सर्पिस्तैलादि यत्किंचिद्विधिनाऽपेक्षितम् । "तेजो वै घृतम्" इत्यर्थवादे घृतस्तुत्या घृतमध्यवसीयते । "एवं प्रतितिष्ठन्ति य एता रात्रीरुपयन्तीति" रात्रिष्वर्थवादादधिकारावगमस्तस्मादर्थवादा अपि धर्ममूलम् ।

मन्त्रास्तु केचिद्विधायका एव । यथा "वसन्ताय कपिञ्जलानिति" । आघारे देवताविधिर्मान्त्रवर्णिक एव । न हि तत्र देवता कर्मोत्पत्तिवाक्ये श्रुता, नापि वाक्यान्तरेण विहिता । मन्त्रस्तु विहितो नियुक्तः "इत इन्द्र" इत्यादिः । अतोऽस्मान्मन्त्रवर्णाद्देवताप्रतिपत्तिः । सहस्रशश्च मान्त्रवर्णिका देवताविधयः सन्ति ।

येऽप्यन्ये क्रियमाणानुवादिनस्तेऽपि स्मृतिलक्षणं धर्ममेव बुद्धं कुर्वन्तीति । भवति धर्ममूलमनुष्ठेयार्थप्रकाशनेन । नाम त्वाख्यातार्थादभिन्नार्थमाख्यातार्थवस्तुप्रसिद्ध-

१ क-अव्यक्तशेषत्वेन प्रकृतितः । २ अ ख क ड क्ष-पार्थेयो भूमिज्ञः ।

For Private And Personal Use Only

धर्ममूलभावम्। गुणविधयश्च प्रायशो नामाश्रय एव । " शरदि वाजपेयेन यजेत स्वारा-
ज्यकामो वाजपेयेनेति " । तस्मात्सिद्धं कृत्स्नस्य वेदस्य धर्ममूलत्वम् ।

अन्ये तु श्येनादिवाक्यानां धर्मोत्पत्तिमत्त्वाभावमाशङ्कमाना निषेधानां च " न
लशुनं भक्षयेदि " त्यादीनामखिलग्रहणं मन्यंते । अभिचारा हि श्येनादयो मारणात्मानो
हिंसारूपाः । क्रूरत्वाच्च हिंसाया अभिचाराणां च प्रतिषेधादधर्मत्वम् । अतो न कृत्स्नो ९
वेदो धर्ममूलम् । कर्तव्यश्च धर्म उक्तः । ब्रह्महत्यादिश्च न कर्तव्यः । अतः कथं तद्वा-
क्यानि धर्ममूलं स्युः ? किंच येऽपि पशुयागा अग्नीषोमीयादयस्तेऽपि हिंसासाधकत्वाद्दूरा-
पेतधर्मभावाः । हिंसा हि पापमिति सर्वप्रवादेष्वभ्युपगमः । उक्तं च ' यत्र प्राणिवधो
धर्म अधर्मस्तत्र कीदृशः ' । कथं पुनरियमाशङ्काऽपनुद्यते ? अखिलग्रहणात् । न ह्यस्या-
न्यत्प्रयोजनमस्ति । हेतुर्नोक्त इति चेदागमग्रन्थोऽयं सिद्धमर्थमाह । हेत्वर्थिनो मीमांसातो १०
विनीयन्ते । अस्माभिरुक्तं य आगममात्रेण प्रतियन्ति तान्प्रत्येतदुच्यते । विवरणकारास्तु
युक्तिलेशमात्रं दर्शयन्ति ।

यदुक्तं श्येनादयः प्रतिषिद्धत्वादधर्म इति तत्सत्यम् । तथापि प्रतिषिद्धेष्वपि तेषु
योऽत्यन्तप्रवृद्धद्वेषो न हिंस्याद्भूतानीत्यतिक्रान्तनिषेधाधिकारस्तस्य ते शत्रुवधलक्षणां प्री-
तिमनुष्ठीयमानां निर्वर्तयन्तीत्येतावताऽशेन वेदस्य धर्ममूलत्वं श्येनादिवाक्येष्वपि न विह- १५
न्यते । निषेधेष्वपि यो रागतः प्रवृत्तो हनने स निषेधे नियुज्यते । एतदेव निषेधस्यानु-
ष्ठानं यन्निषिध्यमानस्याननुष्ठानम् । अग्नीषोमीयादौ तु नैव हिंसाप्रतिषेधोऽस्ति द्वेषलक्षणाया
लौकिक्या हिंसाया निषेधेन निषिद्धत्वात् । शास्त्रीया तु विधिलक्षणा न निषेधेन
विषयीक्रियते । लौकिक्यां चरितार्थत्वान्निषेधस्य । न च सामान्यतो दृष्टेन हिंसात्वाल्लौकिक-
हिंसावद्वैदिक्याः पापहेतुत्वमापादयितुं शक्यते । यतो न हिंसात्वं पापहेतुत्वे कारणं अपि २०
तु प्रतिषेधेन विषयीकरणम् ।

न चात्र प्रतिषेधोऽस्तीत्युक्तम् । कैश्चित्तु मूलशब्दः कारणपर्यायो व्याख्यायते ।
धर्मस्य वेदो मूलं प्रतिष्ठा कारणं साक्षात्प्रणाड्या च । 'स्वाध्यायमधीयीत' 'ऋग्वेदं धार-
यन्विप्र ' इत्यादि चोदनासु साक्षात् । अग्निहोत्रादिकर्मस्वरूपज्ञापकतया प्रणाड्या ।

स्मृतिशीले च तद्विदाम् । अनुभूतार्थविषयं विज्ञानं स्मृतिरुच्यते । तच्छब्देन वे- २१
दः प्रत्यवमृश्यते । तं विदन्ति तद्विदः । वेदार्थविदामिदं कर्तव्यमिदं न कर्तव्यमिति यत्स्म-
रणं तदपि प्रमाणम् । ननु च स्मृतिर्न प्रमाणमित्याहुः सा हि पूर्वप्रमाणावगतप्रमेयानुवादिनी
नाधिकमर्थं परिच्छिनत्तीति वदन्ति । सत्यम् । ये स्मरन्ति तेषामाद्यमेव तत्र शब्दादि
प्रमाणं नात्मीया स्मृतिः । अस्माकं तु मन्वादिस्मृतिरेव प्रमाणम् । नहि वयं तामन्तरेणा-

१ फ्ल–प्रतिपत्तारः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यतोऽष्टकादिकर्तव्यतामवगच्छामः। तच्च मन्वादीनामीदृशं स्मरणं तत्कृतेभ्यो वाक्येभ्यः स्मृतिपरंपरायातेभ्योऽवसीयते। तस्माच्च स्मरणादनुभूतोऽयमर्थः प्रमाणेन मन्वादिभिरिति निश्चिनुमो यत एते स्मरन्ति। नह्यननुभूतस्य स्मरणोपपत्तिः।

ननु कल्पयित्वा ग्रन्थमुपनिबध्नीयुरननुभूतकेन[1] प्रमाणेन। यथोत्पाद्य वस्तु कथानकं केचन कवयः कथयेयुः। अत्रोच्यते। भवेदेवं यद्यत्र कर्तव्यतोपदेशो न स्यात्। कर्तव्यतोपदेशो ह्यनुष्ठानार्थः। न च केचित्[2]स्वेच्छया कल्पिते बुद्धिपूर्वव्यवहारिणोऽनुष्ठातुमर्हन्ति। भ्रान्त्याऽप्यनुष्ठानसिद्धिरिति चेत् स्यादप्येकस्य भ्रान्तिः सर्वस्य जगतो भ्रान्तिर्यावत्संसारभाविनी चेत्त्यलौकिकी कल्पना। न च संभवति मन्वादीनां वेदमूलत्वे भ्रान्त्यादेरवसरः। अत एव प्रत्यक्षतो मन्वादयो धर्मान्ददृशुरिति नाभ्युपगम्यते।

"इन्द्रियैरर्थानां सन्निकर्षे यज्ज्ञानं तत्प्रत्यक्षम्[3]"। न च धर्मस्येन्द्रियैः सन्निकर्षः संभवति तस्य कर्तव्यतास्वभावत्वात्। असिद्धं च कर्तव्यम्। सिद्धवस्तुविषयश्च सन्निकर्षः। अनुमानादीनि तदात्वे यद्यप्यसन्तमर्थमवगमयन्ति पिपीलिकाण्डसंचारेण हि भविष्यन्तीं वृष्टिमनुमिमते तथापि न तेभ्यः कर्तव्यतावगतिः। तस्मात्कर्तव्यतास्मरणस्या[4]नुरूपकारणकल्पनायां वेद एवोपदिश्यते। स च वेदोऽनुमीयमानो मन्वादिभिरुपलब्धः। इदानीमुत्सन्ना सा शाखा यस्याममी स्मार्ता धर्मा आसन्। तथा किमेका शाखाऽथ बह्वचः। तासु च कश्चिदष्टकादिः कस्यांचिदित्येतदनुमानं प्रवर्तते।

अथाद्यत्वे पठ्यन्त एव ताः शाखाः किंतु विप्रकीर्णास्ते धर्माः कस्यांचिच्छाखायामष्टकादीनां कर्मणामुत्पत्तिः कस्यांचिद्द्रव्यं क्वचिद्देवता क्वचिन्मन्त्र इत्येवं विप्रकीर्णानां मन्वादयोऽङ्गोपसंहारं सुखावबोधार्थं चक्रुः।

अथ मन्त्रार्थवादलिङ्गमात्रप्रभवा एते धर्माः। अथायमनादिरनुष्ठेयोऽर्थोऽविच्छिन्नपारंपर्यसंप्रदायायातो वेदवन्नित्य उतास्मदादीनामिव मन्वादीनामपि परप्रत्ययानुष्ठानो नित्यानुमेयश्रुतिक इत्येवमादि बहुविकल्पं विचारयन्ति विवरणकाराः।

एतावांस्तु निर्णयो वैदिकमेतदनुष्ठानम् स्मार्तानां वैदिकैर्विधिभिर्व्यतिषङ्गावगमादनुष्ठातॄणां च तद्वद्व्यनुष्ठानात्। व्यतिषंगश्च दर्शितः। क्वचिद्वैदिकमङ्गं प्रधानं स्मार्तं क्वचिदेतदेव विपरीतं क्वचिदुत्पत्तिः क्वचिदधिकारः क्वचिदर्थवाद इति। एवं सर्व एव स्मार्ता वैदिकैर्व्यतिषक्ताः। निपुणतश्चैतन्निर्णीतमस्माभिः **स्मृतिविवेके**—

"स्मार्तवैदिकयोर्नित्यं व्यतिषङ्गात्परस्परम्। कर्मतः कर्मतो वाऽपि वियुज्येते न जातु तौ॥

"प्रत्यक्षश्रुतिनिर्दिष्टं येऽनुतिष्ठन्ति केचन। त एव यदि कुर्वन्ति तथा स्याद्वेदमूलता॥

"प्रामाण्यकारणं मुख्यं वेदविद्भिः परिग्रहः। तदुक्तं कर्तृसामान्यादनुमानं श्रुतीः प्रति॥

---

१ फ–अननुभूयैव केनचित्प्रमाणेन। २ फ–केनचित्। ३ (जैमिनी–अ. १ सू.) ४ क–ङ–क्ष–स्मरणकल्पनायां वेद एवोपशेते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषनिर्धारणे तु न किंचित्प्रमाणं न च प्रयोजनम् । उत्सादोऽपि संभाव्यते । दृश्यन्ते हि प्रविरलाध्येतृका। अद्यत्वेऽपि शाखाः । ताभ्यः संभाव्यभाव्युत्सादाभ्यो विधिमात्रमर्थवादविरहितमुद्धृत्योपनिबद्धं स्मृतिकारैरिति कैश्चिदभ्युपगम्यते । "ब्राह्मणोक्ता विधयस्तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्त" **इत्यापस्तम्बः** (१।४।१०) । अत्र तु यैवं महाप्रयोजना शाखा यस्यां सर्वे स्मार्ता गार्ह्याश्च सर्ववर्णाश्रमधर्मा आम्नातास्तस्या उपेक्षणमसंभाव्यम् । सर्वाध्येतॄणां चोत्साद इत्यादि बह्वदृष्टं प्रकल्प्यम् ।

विप्रकीर्णानां त्वर्थवादगहनानां क्रत्वर्थपुरुषार्थतया च दुर्विज्ञानानां प्रयोगोन्नयनमभियुक्तानां न्यायतो निश्चितार्थानां घटते । अस्मिंस्तु पक्षे विरोधद्वयस्यापि प्रत्यक्षश्रौतत्वाद्विकल्पेन स्मृतेर्बाधः। स च विशिष्टानां नाभिप्रेतः। स्मृतिकाराश्च बाधमनुमेयश्रुतिमूलत्वं च प्रतिपन्नाः । एवमप्याह **गौतमः** (३।३९) । "ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येति" । यदि हि मन्वादीनां प्रत्यक्षास्ताः शाखा अभवन्केयं वाचोयुक्ति 'गार्हस्थ्यस्य प्रत्यक्षविधानादिति' । ननु सर्व एवाश्रमाः प्रत्यक्षविधाना स्वमतमेव चैतद्गौतमेनाचार्यापदेशेनोपदिष्टं ' तस्याश्रमविकल्पम् ' (३।१) । इत्याद्युपक्रम्यानेनोपसंहृतत्वात् ।

मन्त्रार्थवादप्रमाणभावोऽप्यविरुद्धः । यद्यप्यर्थवादा विध्युद्देशस्तुतिपरा न स्वार्थस्य विधायकास्तथापि केषांचिदन्यपरतैव नोपपद्यते यावत्स्वार्थविषयो विधिर्नावगमितः यथा स्तेनो हिरण्यस्य सुरां पिबंश्चेत्यादेः पञ्चाग्निविधिशेषतैवमेतावतैव नोपपद्यते यावद्धिरण्यस्तेयादेः प्रतिषधो नावगमितः । य एतां विद्यामधीते स हिरण्यस्तेयाद्यप्याचरंस्तैश्च संवसन्न पतति अन्यथा तु पततीत्यवगतिरविरुद्धा ।

अथ विध्युद्देशो विधेः प्रतिपादको नार्थवाद इति केनैषा परिभाषा कृता । ' एते पतन्ति चत्वार' इत्यत्राप्याख्यातश्रवणमस्ति। लिङादयो न सन्तीति चेत् 'प्रतितिष्ठन्तीति' रात्रिष्वपि नैव लिङ्श्रुतिरस्ति ।

अथ तत्राधिकाराकांक्षायामेकवाक्यतायां सत्यां पञ्चमलकारादिकल्पनया विध्यवसायः एवमत्रापि भविष्यति । बहवश्च द्रव्यदेवताविषयोऽर्थवादावगम्याः सन्ति । तत्र यस्य विधेः शेषा अर्थवादास्तद्विधिनैव द्रव्यदेवतादेरपेक्षितत्वाद्विशेषसमर्पणमात्रे व्यापारान्तर्गतविशेषावगतिरर्थवादाधीना न दोषाय । इह तु तदसंबद्धस्य विध्यन्तरस्येष्यमाणत्वाद्वाक्यभेदापत्तिरतश्च न प्रकृतिशेषता । तदभावे च तन्मूलाप्रतिषेधावगतिर्न स्यादतश्च ' अक्ताः शर्करा उपदधाति ' 'तेजो वै घृतमि'त्यनेनं वैषम्यमित्याहुः । तदसत् । सत्यप्यर्थान्तरत्वे तदेकवाक्यतामूलत्वादस्याऽवगतेर्नास्ति वाक्यभेदाभिचोद्यापत्तिः । मन्त्राः प्रयोगप्रकाशत्वेन रूपादेवावगतास्तस्य प्रयोगस्यान्यतोऽसिद्धेः प्रकाशकत्वनिर्वहणाय प्रकाश्यं

१ क ङ क्ष—व्यापारा । तद्गतविशेषावगतिरर्थवादाधीना न दोषाय । २ ङ क्ष—अवैषम्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कल्पयन्ति । न[1] वाऽसतोरुत्पत्त्यधिकारयोः प्रकाशनमष्टकायाः संभवतीत्युत्पत्त्यधिकारविनियोगप्रयोगबोधका मन्त्राः । एवं मान्त्रवर्णिकाश्च विधयोऽप्युपगम्यन्ते । यथाऽऽघारे देवताविधिश्चतुष्पाद्धिधर्मोऽभ्युपगतस्तत्राल्पतरांशः श्रुतः सकलेतरांशबोधहेतुस्तथाविध एव विधौ संबन्धग्रहणादिति । सर्वथा तावत्संभवति वेदसंयोगः ।

मनुर्बहुभिर्बहुशाखाध्यायिभिः शिष्यैरन्यैश्च श्रोत्रियैः संगतस्तेभ्यः शाखाः श्रुत्वा ग्रन्थं चकार । ताश्च मूलत्वे[2] प्रदर्श्य ग्रन्थं प्रमाणीकृतवान् । एवमन्ये तत्प्रत्ययादनुष्ठानमादृतवन्तो न मूलोपलम्भे यत्नं कुर्वन्ति । अस्माकं चैतदनुमानम् । अतो विरोधे सत्यपि तुल्ये श्रौतत्वे बाधोपपत्तिः । प्रत्यक्षया श्रुत्या प्रयोगसंपत्तौ श्रुत्यन्तरं प्रत्याकांक्षैव नास्ति । यथा सामिधेनीषु साप्तदश्य पाञ्चदश्ययोः पाञ्चदश्येन प्रकृतिरवरुद्धा साप्तदश्यं प्रत्यक्षश्रुतमपि नाकांक्षति । आभिधानिको ह्यर्थः सन्निकृष्यतेऽभिहितार्थाकांक्षावगम्यं प्रत्ययं विप्रकर्षाद्दुर्बलं बाधते । न चैतावताऽप्रामाण्यापत्तिः । यथा प्राकृतान्यङ्गानि विकृतिषु चोदकप्राप्तानि वैकृतिकैर्विरुद्ध्यमानानि बाध्यन्ते तद्वदेव द्रष्टव्यम् । यत्र संप्रदायाविच्छेद[3]स्तत्र च परंपरापत्तिः । न हि तत्र कस्यचित्प्रमाणं प्रवृत्तम् । नित्यानुमेयपक्षोऽपि संप्रदायपक्षान्नातीव भिद्यते । मन्वादिस्मरणस्य वयं मूलं परीक्षितुं प्रवृत्ताः । यदि च तेषामप्यसावनुमेयो वेदो वयमिव न ते स्मर्तारः । नच यः पदार्थो न कस्यचित्प्रत्यक्षस्तस्यानुमेयतासंभवत्यन्वयासंभवात् । क्रियादिषु सामान्यतोऽस्त्येव संबन्धदर्शनम् । यदि वाऽर्थापत्त्यवसेयाः क्रियादयो न चेहान्यथाऽनुपपत्तिरस्ति । तस्मादस्ति मन्वादीनामस्मिन्नर्थे वेदसंबन्धो न पुनरयमेव प्रकार इति निर्धारयितुं शक्यम् । द्रढीयसी कर्तव्यताऽवगतिर्वेदविदां वेदमूलैव युक्ता कल्पयितुं न भ्रान्त्यादिमूलेत्यवगत्यनुरूपकारणकल्पना कृता भवति । तत्रोत्सादविप्रकीर्णमंत्रार्थवादे प्रत्यक्षवेदानां कारणानां संभवात्कल्प्यत्वमुपशेते । प्रत्यक्षोऽपि विधिः कचिन्मूलत्वेन दृश्यते ' न मलवद्वाससा सह संवसेदिति ' । स चाध्ययने चोपनयने च पठ्यते । तदेतल्लेशतोऽस्माभिरुक्तम् । विस्तरस्तु **स्मृतिविवेका**ज्ज्ञातव्यः ।

" शाखाः काश्चित्समुत्सन्नाः पक्षो नैष मतो मम । पक्षेऽस्मिन्न प्रमाणं हि बह्वदृष्टं प्रसज्यते ॥
" उपपन्नतरः पक्षो विक्षिप्तानां ततस्ततः । उत्पत्त्यादि समाहारः प्रायशो दृश्यते ह्यदः ॥
" अनेकशिष्योपाध्यायैः श्रोत्रियैरादृतो परैः । शक्तो रचयितुं श्रुत्वा शाखां तां तां कुतश्चन ॥
" उपपन्नस्तदानीं च दृष्टमूलैः परिग्रहः । निश्चयोऽस्माकमप्यद्य यथा संभवतः स्थितः ॥
" प्रयोगद्योतका मन्त्रा द्योतनं तस्य नामतः । नर्तेऽधिकारोत्पत्तिभ्यां प्रयोगस्यास्ति संभवः ॥
" विशिष्टदेवतालाभ आघारे मान्त्रवर्णिकः । प्रकाशकत्वान्मन्त्रस्य तन्निर्वहणहेतुकः ॥

१ ङ क क्ष–स न वा । २ फ–मूलत्वेन । ३ फ–सम्प्रदायविच्छेदः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"या सिद्धरूप एकस्मिन् क्रियान्तरगतिर्भवेत्[1]। न सा स्वरूपनाशाय विश्वजित्यधिकारवत् ॥
" प्रतिपन्ने विधौ युक्तं तत्संबन्धार्थकल्पनम्। गतिर्मन्त्रार्थवादेभ्यो न दृष्टा चेद्विधेः क्वचित् ॥
" लिङ्गादिगम्यं भगवान्विधिं स्मरति **पाणिनिः**। न शक्तास्ते विधिं वक्तुं सिद्धवस्त्वभिधायिनः ॥
"व्याख्येयो गुणवादेन योऽर्थवादादतत्परात्। अर्थोऽधिगन्तुमिष्येत कथं स्यात्तस्य सत्यता ॥
"भिन्द्याद्वाक्यं न प्रतिष्ठाः साकांक्षा रात्रयो यतः। विशेषे तद्गते युक्ता वाक्यशेषावगम्यता ॥
"स्तेयादीनां[3] निषेधेऽपि विध्यन्तरगतिर्ध्रुवा[4]। ततश्च वाक्यभेदः स्यान्नोपन्यासस्ततः समः ॥
"वाचः स्तोमे प्रयुज्यन्ते सर्वे मन्त्रविधिश्रुतेः। नाष्टकादौ विशेषोऽस्ति हेतुर्मन्त्रस्य बोधने ॥
" विना सामान्यसंबन्धाल्लिङ्गं च विनियोजकम्। न च नास्तस्य[5] संबन्धो विना प्रकरणादिभिः ॥
"परिहारं ब्रुवन्त्यत्र केचित्तन्मूलवादिनः। रात्रिषु प्रतितिष्ठन्तीत्यसत्स्वेव लिङ्गादिषु ॥
"पञ्चमेन लकारेण तदर्थगतिरिष्यते। पतन्ति न म्लेच्छित वा इत्यादिषु तथा भवेत् ॥
"ऋचां विधिर्वाचिस्तोमे सर्वदाशतयीरिति। दशभ्यो मण्डलेऽभ्यस्ता वर्जिताः पठिता बहिः ॥
"सामान्यसंबन्धकारी समाख्यैवेति गीयते। समाख्या गृह्यमन्त्राणां तेन तेनास्ति कर्मणाम् ॥
" पञ्चाग्निविद्याशेषत्वं हिरण्यस्तेननिन्दया। स्तेनो हिरण्यवाक्यस्य न विना तन्निषेधतः ॥
"शेषत्वावगमौर्थात्तु[6] तदकर्तव्यता तु या। द्रढिम्ने शेषतायाः सा न पुनस्तद्विरोधिनी ॥
"नित्यानुमेयपक्षो यो वाऽप्यागमपरंपरा। तयोरन्धप्रवाहत्वं न भेदः कश्चिदीक्ष्यते ॥"

एवं च सति या गौतमेन प्रत्यक्षविधानता गार्हस्थ्यस्योक्ता सा शब्दस्याव्यवहितव्यापाराभिप्रायेण। श्रवणानन्तरं योऽर्थः प्रतीयते स प्रत्यक्षः। यस्तु प्रतीतेऽर्थे तत्सामर्थ्यपर्यालोचनया गम्यः स विलम्बितत्वात्प्रतिपत्तेर्न प्रत्यक्ष इति सर्वमुपपन्नम्।

स्मृतिशीले च तद्विदाम्। स्मृतिश्च शीलं च स्मृतिशीले। शीलं रागद्वेषप्रहाणमाहुस्तच्च धर्ममूलं वेदस्मृतिवन्न ज्ञापकतया किंतु निर्वर्तकत्वेन। रागद्वेषप्रहाणाद्धि धर्मो निर्वर्तते[7] ॥

ननु च श्रेयःसाधनं धर्म इत्युक्तम्। रागद्वेषप्रहाणमेव च तत्स्वभावम्। तत्रासति व्यतिरेके किमुच्यते रागादिप्रहाणाद्धर्मो निर्वर्तत इति। उक्तमस्माभिर्धर्मशब्दोऽयं स्मृतिकारैः कदाचिद्विधिनिषेधविषयभूतायां क्रियायां प्रयुज्यते। कदाचित्तदनुष्ठानजन्य आफलप्रदानावस्थायिनि कस्मिंश्चिदर्थे। तस्य च सद्भावे शब्द एव प्रमाणम्। यदि हि यागस्तथाविधं वस्त्वनुत्पाद्य विनश्येत्तदा कालान्तरे कुतः फलोत्पत्तिः। तदेतद्वस्तु धर्मशब्देनात्राभिप्रेतं तस्य शीलं मूलमिति न किंचिदनुपपन्नम्। तदभिप्राया एव व्यवहाराः।

---

१ फ–रूपान्तरगतिर्भवेद्। २ क–ङ–मिथुर्नतम्। ३ ङ–क–क्ष–स्तेनरदीनां। ४ ङ–क–क्ष–ध्रुवम्। ५ फ–न च नास्त्यस्य। ६ फ–गमोऽर्थात्तु। ७ ङ–क–क्ष–अभिनिर्वर्तते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः" इति। क्रियाया अनुष्ठानसमनन्तरमेव नाशात्कुतः कालान्तरान्वयः।

अत्र चोद्यते। ननु सर्व एव श्रुतिस्मृतिविहितो ऽर्थो धर्मस्य मूलं शीलस्यापि तत्रान्तर्भावाद्भेदेनोपादानमनर्थकं विधायिष्यते च "इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्। यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गणाविति"। अयमेव मनसो जयो यो रागद्वेषयोः परित्याग इति वक्ष्यामः। केचिदाहुरादरार्थः पृथगुपदेशः। एतद्धि सर्वकर्मणामनुष्ठान उपयुज्यते। स्वप्रधानं च अग्निहोत्रादिकर्मवत्। सर्ववर्णधर्मश्चायं सर्वाश्रमधर्मश्च। तैः सामान्यधर्मलक्षणावसरेऽस्मिन्नुच्यते।

वयं तु ब्रूमः। समाधिः शीलमुच्यते। तथाहि 'शीलसमाधाविति'। धातुषु पठ्यते। समाधानं च मानसो धर्मः। यच्चेतसोऽन्यविषयव्याक्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणता तच्छीलमुच्यते। द्वन्द्वश्चायमितरेतरयोगे तेन परस्परसापेक्षयोः स्मृतिशीलयोः धर्मंप्रति प्रामाण्यमेवाभिप्रेतं न पूर्ववन्निर्वर्तकत्वम्। एतदुक्तं भवति। समाधानवती या स्मृतिः सा प्रमाणं न स्मृतिमात्रम्। तेन सत्यपि वेदार्थवित्त्वे यदेतत्पराणां स्मरणं न तद्धर्ममूलं भ्रान्त्यादिसंभवाच्छास्त्रार्थविधानशून्यानां च शब्द इह पठ्यते स तद्विदामित्यस्मादनन्तरं द्रष्टव्यः वृत्तानुरोधात्त्वेवं पठितः।

समुच्चयार्थश्चासौ पूर्वप्रकृतस्य च समुच्चेतव्यस्याभावात्तृतीये पादे यत्साधूनामित्युक्तं तत्समुच्चिनोति। अतस्त्रीणि विशेषणान्यत्राश्रीयन्ते। विदुषामुपाध्यायादागमितविद्यानां तथा तदभ्यासपराणामनुष्ठानपराणां च स्मृतिः प्रमाणम्। एतत्सर्वं मन्वादीनामासीदिति स्मर्यते। नान्यथा तत्कृतेषु ग्रन्थेषु शिष्टानां परिग्रहोपपत्तिः।

यद्येवं स्पष्टमेव वक्तव्यम्। मन्वादिवाक्यानि धर्ममूलमिति किमेतेन लक्षणेन। सत्यम्। यः कथंचित्तत्प्रामाण्ये विप्रतिपाद्येत तं प्रति न्यायशास्त्रप्रसिद्धं प्रामाण्यहेतुकथनमेतत्। अद्यत्वेऽपि यस्यैतद्धेतुसद्भावः सोऽपि मन्वादिवद्ग्राह्यवाक्यः स्यात्। तथा च विदुषां[1] प्रायश्चित्ताद्युपदेशो तथा भूता एव परिषत्त्वेन प्रमाणीभवन्ति "एकोऽपि वेदविद्धर्मं यो व्यवस्येद्द्विजोत्तम" इति। अत एव स्मर्तृपरिगणना मनुर्विष्णुर्यमोऽङ्गिरा इति निर्मूला।

तथा हि पैठीनसिबौधायनप्रचेतःप्रभृतयः शिष्टैरेवंरूपाः स्मर्यन्ते। न च परिगणनायामन्तर्भाविताः। सर्वथा यामविगानेन शिष्टाः स्मरन्ति वदन्ति वा। एवंविधैर्गुणैर्युक्तं तेन चैतत्प्रणीतामिति तस्य वाक्यं सत्यपि पौरुषेयत्वे धर्मे प्रमाणं स्यादिति। "स्मृतिशीले च तद्विदाम्" इत्यस्यार्थः।

---

१ ढ—अविदुषाम्।

For Private And Personal Use Only

अद्यत्वे य एवंविधैर्गुणैर्युक्त ईदृशेनैव च हेतुना ग्रन्थमुपनिबध्नीयात्स उत्तरेषां मन्वादिवत्प्रमाणीभवेत् । इदानींतनानां तु यदेव तत्र तस्य[1] बोधकारणं तदेव तेषामस्तीति न तद्वाक्यादवगतिः । इदानींतनो हि यावन्मूलं न दर्शयति तावन्नविद्वांसस्तद्वाक्यं प्रमाणयन्ति । दर्शिते तु मूले प्रमाणीकृते ग्रन्थे कालान्तरे यदि कथंचिदष्टकादिमूलतुल्यता स्यात्तदा तेषां शिष्टपरिग्रहान्यथानुपपत्त्या तन्मूलानुमानं युक्तम् ।

आचारश्चैव साधूनाम् । चशब्देन वेदविदामिति संबध्यते । पदद्वयेन शिष्टत्वं लक्ष्यते । शिष्टानां य आचारः सोऽपि धर्मे मूलम् । आचारो व्यवहारः अनुष्ठानम् । यत्र श्रुतिस्मृतिवाक्यानि न सन्ति शिष्टाश्च धर्मबुद्ध्याऽनुतिष्ठन्ति तदपि वैदिकमेव पूर्ववत्प्रतिपत्तव्यम् । यथा विवाहादौ कंकणबन्धनादि माङ्गलिकत्वेन यत्क्रियते, या च कन्यायास्तदहर्विवाहयिष्यमाणायाः प्रख्यातवृक्षयक्षचतुष्पथादिपूजा देशभेदेन तथा चूडासंख्या देशभेदश्च या चातिथ्यादीनां गुर्वादीनां चानुवृत्तिः प्रियहितवचनाभिवादनाभ्युत्थानादिरूपा, तथा पृश्निसूक्तं तृणपाणयोऽधीयते अश्वमेधमश्वं यथा समपर्यन्तः ईदृश आचारः । एषोऽपि हि स्वभावभेदेन पुरुषाणां मनःस्वास्थ्यदौःस्थ्यादिभेदेनानेकरूपः प्रतिविशेषमानन्त्यादशक्यो ग्रन्थेनोपनिबद्धुम् । यदेव बहुशः प्रियेत्युपलक्षितं तदेवावसरान्तरे विपरीतं संपद्यते । तथा पर्युपासनं गृहस्थेनातिथेः क्रियमाणं कस्यचित्प्रीतिकरं ममायं भृत्यवत्तिष्ठति । अन्यस्त्वन्यथा निर्यन्त्रणया न लभ्यत आसितं[2]मस्मिन्संनिहित इति पर्युपासनयैव विरज्यति । न तत्र सामान्यतः शक्यं वेदानुमानं न विशेषतः । अष्टकादीनां तु नियतैकरूपसमस्तप्रयोगस्मरणमित्येष स्मृत्याचाराणां भेदः ।

आत्मनस्तुष्टिरेव च धर्ममूलमित्यनुषज्यते । वेदविदां साधूनामिति च । अस्याश्च धर्ममूलत्वप्रामाण्येनैवेत्याहुः । यत्र ह्येवंविधानामनुष्ठेयेऽर्थे मनः प्रसीदति द्वेषो न भवति स धर्मः । ननु च यस्य प्रतिषिद्ध एवार्थे मनः प्रसीदेत्स धर्मः[3] प्राप्नोति । विहिते च किंकथिका[4]स्यात् स न धर्म इति । एवमेतदीदृशानां महात्मनां मतिमतां महाप्रभावो मनःप्रसादो येनाधर्मोऽपि धर्मतामेति धर्मश्चाधर्मतां न रोगद्वेषादिदोषवताम् । यथा रुमायां यत्किंचिद्द्रव्यं प्रविशति तत्सर्वं लवणसात्संपद्यते एवं वेदविदा सहसोत्पन्नेन मनःपरितोषेण सर्वं निर्मलीक्रियते । अतो यथा प्रतिषिद्धमपि ग्रहणं षोडशिनि विधिनाऽनुष्ठीयमानं न दोषाय । न चात्र ग्रहणवद्विकल्पः । प्रतिषेधा ह्यात्मतुष्टिव्यतिरेकेणान्यत्र विषये व्यवस्थाप्यन्ते । अथवा नैव तेषामधर्मे आत्मा परितुष्यति । यथा विषघ्नीमेवौषधीं नकुलो दशति नान्याम् । अत उच्यते " नकुलो या यां दशति सा सा विषघ्नीति " ।

इह भवन्तश्चाहुः ये वैकल्पिकाः पदार्थास्तेषु यस्मिन्पक्षे मनः प्रसीदति स पक्ष आश्रयितव्यः । वक्ष्यति च द्रव्यशुद्धौ प्रायश्चित्तेषु च " तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टि-

---

१ फ–तस्यास बोध कारणम् । २ फ–आसितु । ३ फ–धर्मम् । ४ फ– किंकथितं ।

करं भवेत्" । अथवा योऽश्रद्दधानो नास्तिकतया तस्यानधिकारमाह । नास्तिकस्य हि न वैदिकं कर्म कुर्वतोऽप्यात्मा तुष्यति । अतस्तेन क्रियमाणमपि कर्म निष्फलमेव । अथवा सर्वकर्मविषयो भावप्रसाद उपदिश्यते । अनुष्ठानकाले क्रोधमोहशोकादि त्यक्त्वा प्रमुदितेन भाव्यम् । अतश्च शीलवदस्याः सर्वशेषतया धर्ममूलत्वाभिधानम् ॥ ६ ॥

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ॥
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥ ७ ॥

यदुक्तं वेदवित्संबन्धेन स्मृतेः प्रामाण्यं तदनेन प्रकटयति । **यः कश्चिद्धर्मो** वर्णधर्म आश्रमधर्मः संस्कारधर्मः सामान्यरूपो विशेषरूपश्च कस्यचिद्ब्राह्मणादेर्वर्णस्य । **मनुना परिकीर्तितः** । **स सर्वोऽपि वेदेऽभिहितः** प्रतिपादितो यथा चैतत्तथा पूर्वश्लोक उक्तम् । **सर्वज्ञानमयो हि सः** । सर्वेषां ज्ञानानामदृष्टविषयाणां हेतुर्निमित्तं वेदः । सर्वैर्ज्ञानैर्निर्मित इवेति ज्ञाने तद्विकारत्वमध्यारोप्य मयट् कृतः । यो हि यद्विकारः स तन्मयस्तत्स्वभाव इत्युच्यते । वेदश्च ज्ञानहेतुत्वात्तन्मय इति । यत्कार्यदर्शने कारणं कार्यस्वभावमिति । अथवा सर्वज्ञानाद्धेतोः । आगतः 'हेतुमनुष्येभ्य' (व्या. सू. ४–३–८१) इति मयट् क्रियते ॥ ७ ॥

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ॥
श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै ॥ ८ ॥

सर्वज्ञेयं कृतकाकृतकम्[1] । शास्त्रगोचरं प्रत्यक्षादिगोचरमप्रत्यक्षादिगोचरम् । **समवेक्ष्यैतज्ज्ञानचक्षुषा** तर्कव्याकरणनिरुक्तमीमांसादिविद्यास्थानश्रवणचिन्तनात्मकेन । चक्षुरिव चक्षुः । शास्त्राभ्यासो ज्ञानस्य कारणत्वसामान्यात् । यथा चक्षुषा रूपं ज्ञायते एवं शास्त्रेण धर्म इति सामान्यम् । **समवेक्ष्य** सम्यग्विचारपूर्वकं निरूप्य । **श्रुतिप्रामाण्यतो** वेदप्रामाण्येन **धर्मे निविशेत** । धर्ममनुतिष्ठेत् ।

सर्वेषु हि शास्त्रेषु सम्यग्ज्ञातेषु वेदप्रमाण्यमेवावतिष्ठते । नाज्ञातेषु । तथाहि तानि शास्त्राणि निपुणत्वेन चिन्तयन्[2] न तेषां प्रामाण्ये सम्यग्युक्तिरस्ति, वेदे त्वस्तीति निश्चिनोति । सर्वग्रहणं ज्ञेयविशेषणम् । निखिलशब्दश्च समवेक्ष्येति क्रियाविशेषणम् । निखिलं समवेक्ष्य निःशेषेण पूर्वपक्षेण शास्त्रान्तराणां प्रामाण्ये वेदस्य वा प्रामाण्ये यावन्त्यः काश्चन युक्तयः प्रतिभासन्ते ताः सर्वाः प्रदर्श्य सिद्धान्तासिद्धैर्हेतुभिर्यथालक्षणलक्षितैर्निराकृत्य स्वपक्षसाधने चोपन्यस्ते वेदप्रामाण्यमवतिष्ठत इति निखिलशब्देन प्रदर्श्यते । तेन तौ निखिलसर्वशब्दौ पर्यायावपि भिन्नविषयत्वान्न पुनरुक्तौ । **स्व**ग्रहणमनुवादः । यो ह्यन्यस्य धर्मः सोऽन्यस्याधर्म एव ॥ ८ ॥

---

१ अ–क–ङ–क्ष–फ–कृतकाकृतकशास्त्रगोचरम् । २ फ–चिन्तयन्ति । अ–क–ङ–क्ष–चिन्तयन्तेषाम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतिस्मृत्युदितं सर्वमनुतिष्ठन् हि मानवः ॥
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ ९ ॥

यो नास्तिकतया वैदिकानि निष्फलानि कर्माणीति व्यामुह्य न तदनुष्ठाने प्रवर्तेत तस्य प्रवृत्त्यर्थं सुहृद्भूत्वादृष्टफलप्रदर्शनं करोति । तिष्ठतु तावदन्यत्फलम्। श्रुतौ स्मृतिषु च यदुदितमुक्तं धर्माख्यं कर्म तदनुतिष्ठन्निहास्मिँल्लोके यावज्जीवति तावत्कीर्तिं प्रशस्यतां पूज्यतां सौभाग्यं लभते । न्याय्ये पथि स्थितो महापुण्योऽयमिति सर्वेण पूज्यते । प्रियश्च सर्वस्य भवति । प्रेत्य देहान्तरे यस्मादन्यदुत्तमं नास्ति तत्सुखं प्राप्नोति । प्रायेण स्वर्गकामस्याधिकारः । निरतिशया च प्रीतिः स्वर्गस्तत उच्यते **अनुत्तममिति** । तस्मान्नास्ति कस्यापि दृष्टफलार्थिनोऽत्रैव प्रवृत्तिः पयुक्तेत्येवं परमेतत् ॥ ९ ॥

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ॥
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥ १० ॥

किमिदं शब्दार्थसम्बन्धस्मरणमभिधानकोशशास्त्र 'मात्मभूः परमेष्ठी' त्यादिवन्न धर्मशास्त्रं येनेदमुच्यते । 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै **स्मृति**' रिति **उच्यते** । **इह सदाचारो** न श्रुतिर्न स्मृतिर्निबन्धाभावात् । निबद्धाक्षरा हि स्मृतयः प्रसिद्धाः । अतस्यस्त स्मृतित्वमुपपादयति । यत्कार्यं धर्मप्राप्त्यर्थं तद्धर्मशास्त्रम् । यत्र धर्मः शिष्यते कर्तव्यतया प्रतीयते सा स्मृतिः । निबन्धानिबन्धावप्रयोजकौ शिष्टसमाचारादपि धर्मस्य कर्तव्यतावगतिः । सोऽपि स्मृतिरेव । ततश्च यत्र कस्मैचित्कार्याय स्मृतेरुपादानं तत्र सदाचारोऽपि ग्रहीतव्यः ।

धर्मशास्त्रं चेत्स्मृतिर्वेदोऽपि सर्वमुख्यं धर्मशासनमिति तस्यापि स्मृतित्वप्रसङ्गस्तन्निवृत्त्यर्थमाह । **श्रुतिस्तु वेदो विज्ञेयः** । यत्र श्रूयते धर्मानुशासनशब्दः सा **श्रुतिः** । यत्र च स्मर्यते सा **स्मृतिः** । तच्च समाचारेऽप्यस्तीत्यतः सोऽपि स्मृतिरेव । न हि तत्राप्यस्मृतवैदिके शब्दे प्रामाण्यम् । अथवा श्रुतिग्रहणं स्मृतेर्वेदतुल्यत्वार्थम् ।

किं पुनः श्रुतिस्मृत्योः समानं कार्यं यत्समाचारेऽप्यन्येन प्राप्यते । उच्यते । **ते सर्वार्थेष्वमीमांस्ये** । ते श्रुतिस्मृती सर्वेष्वर्थेष्वत्यन्तासंभाव्येष्वपि दृष्टविषयैः प्रमाणैः । यथा तस्मादेव हिंसालक्षणात्पदार्थात्क्वचिदभ्युदयः क्वचित्प्रत्यवायः 'सुरापानान्नरकः सोमपानात्पापशुद्धिः' इत्यादौ पक्षप्रतिपक्षगमनेन विचारो न कर्तव्यः । आशङ्कापक्षान्तरसंभावनं मीमांसनम् । यथा हिंसा चेत्पापहेतुः स्वरूपाविशेषाद्वैदिक्यपि तथा भवितुमर्हति । अथ वैदिक्यभ्युदयहेतुर्लौकिक्यपि तथा स्यात् । तद्रूपसमानत्वात् । यस्य यद्रूपं वेदादवगतं

१ फ–धर्मं । २ फ–प्रवर्तेते । ३ क–ड–निबन्धाक्षरा । ४ अ–क–ड–तत्कार्यधर्म प्राप्त्यर्थं संकाद्धर्मशास्त्रम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य तद्विपरीतरूपसंभावनमसत्तर्कोश्रयैरसम्यग्वेतुभिर्यद्विचारणं तत्सिद्धान्ताभिनिवेशः स इह प्रतिषिध्यते । न पुनरयमर्थो वेदस्यास्याद्यः पूर्वपक्ष उतस्विद्यः सिद्धान्त इत्येषा मीमांसा निषिध्यते । यतो वक्ष्यति । " यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर " इति ।

किं पुनरयमदृष्टार्थो मीमांसनप्रतिषेधः । नेति ब्रूमः । **ताभ्यां धर्मो हि निर्बभौ ।** अनेन तार्किकप्रमाणानां वेदार्थविपरीतसाधनानामाभासतामाह । ईदृशा हि तेषां हेतवः वैदिकी हिंसा पापहेतुः हिंसात्वाल्लौकिकहिंसावत् । तत्र हिंसायां पापहेतुत्वं न कुतश्चिदन्यतः प्रमाणात्सिद्धमन्तरेणागमम् । एवं चेन्नास्ति हिंसायाः पापसाधनसिद्धौ हेतुः यावदागमः प्रामाण्येन नाभ्युपगतः । अभ्युपगते चागमप्रामाण्ये तद्विरुद्धो हेतुर्न युज्यते अप्रामाण्यापत्तेरागमस्य । ततश्चेतरेतरव्याघातः पूर्वं प्रामाण्येन परिग्रहः पश्चादप्रामाण्यमिति । सोऽयं स्ववचनविरुद्धः पक्षः । नैनं तार्किका अनुमन्यन्ते । ' मम माता वन्ध्येति ' वत् ।

आगमविरुद्धादिश्च । अथोच्यते । नैवागमः प्रमाणं कथं तद्विरोधोद्भावनं दूषणम् । अनृतव्याघातपुनरुक्तदोषेभ्यः । कारीर्यादिकर्मणां तत्समनन्तरं फलार्थितयाऽनुष्ठीयमानानां न नियमतोऽनुष्ठानसमनन्तरं फलप्राप्तिः । कालांतरे भविष्यतीति चेदुक्तमत्र । 'कृता शरदि कारीरी भृशं शुष्यत्सु शालिषु । वसन्ते जायते वृष्टिस्तस्यादौ न भवेत्फलमिति' । यान्यप्यन्यत्र भाविफलानि ज्योतिष्टोमादीनि तत्रापि निरन्वयविनाशात्कर्मणो वर्षशते फलं भविष्यतीति निःसंदिग्धवैतालिकव्यवहारोपममेतत् । तस्मादनृतम् ।

व्याघात उदिते होतव्यमनुदिते जुह्वतो दोषः । " प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् " । तथाऽनुदिते होतव्यं यथा अतिथये प्रद्रुताय दद्यात्तादृगेतद्यज्जुहुयादित्येकत्रोदितहोमो विधीयतेऽनुदितहोमनिन्दया । तदेव विपरीतमन्यत् । तत्रैकः पक्ष आश्रीयतामित्यनध्यवसायः । यदेवाग्निहोत्राद्येकस्यां शाखायां विद्यते तदेव शाखान्तरेऽपि । सर्वशाखाप्रत्ययमेकं कर्मेत्यभ्युपगमः । ततश्च पुनरुक्तम् ।

तत्रानृतमेव तेन्न भवतीत्येतेनैव पादेन प्रतिपाद्यते । यतो वेदाद्धर्म एवकर्तव्यतामात्रं यागादिविषयं **निर्बभौ** विभाति गम्यते । न पुनः कालविशेषः । फलस्योत्पत्तौ अधिकारवाक्येषु कालविशेषाश्रवणात् विधितो हि फलं भवतीत्येतावद्गम्यते । कालावच्छेदो न विधिः । धात्वर्थसंबन्धिनो हि कालविभागा भूतभविष्यद्वर्तमानाः । न चैतद्धात्वर्थफलं किन्तु वैधम् । धात्वर्थफलं हि तदानीमेव निर्वर्तते । देवतोद्देशेन द्रव्यत्यागः । हविर्विकारादि । यदि कश्चित्कस्यचिदाज्ञाकारो भवति तेन प्रेष्यते ' गच्छ याहि ग्राममिति ' स आज्ञासंपादने प्रवृत्तः कदाचित्प्रारम्भ एव वेतनफलं लभते, कदाचिन्मध्ये, कदाचित्कृत

१ फ–व्यापारः । २ फ–विरुद्धश्च । ३ अ–क–ड–तस्यागोमरकःफलमिति ४ । अ–वैतालिक । फ–वैतानिक । ५ फ–तत्र । ६ अ–क–ड–क्ष–कालाविशेषः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आज्ञाविषये; समनन्तरमन्येद्युर्वा कालान्तरेऽथवा । एवमेतच्छास्त्रफलमनियतकालम् । दिव्यवृष्ट्यादेस्तु स्वाभाव्येन प्रत्यासत्तिमात्रं गम्यते । न तु तदहरेवोत्पत्तिः ।

प्रतिबन्धकानि च यथा फलस्यैवंविधस्य लोके भवन्ति तथा वेदेऽपि । पुराकृतं दुष्कृतादि । तथा च वेद एवैतद्दर्शयति । यदि न वर्षेत्तथैव वसेदिति । सर्वस्वारे तु विवदन्ते । 'नैतत्क्रतुफलम् । अङ्गमेतत्सरणम् । क्रतुफलं यः कामयेतानामयः स्वर्गलोकमियामिति' । यच्चोक्तं हिंसायां लोकवेदयोर्न विशेष इति तत्र शास्त्रावगम्यो हि तस्या अयं स्वभावो न प्रत्यक्षादिगोचरस्तत्र च भेदः । रागलक्षणा लौकिकी हिंसा, विधिलक्षणाऽलौकिकी हिंसा, विधिलक्षणा त्वग्नीषोमीयस्येति महान्भेदः । तस्मान्न किंचिद्वेदेऽनृतम् । व्याघातं परस्तात्परिहरिष्यति श्लोकेनैव ॥ १० ॥

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ॥
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ ११ ॥

असत्यप्रामाण्यहेतोर्वेदस्य यो द्विजो हेतुशास्त्राश्रयाद्धेतुशास्त्रं नास्तिकतर्कशास्त्रं बौद्धचार्वाकादिशास्त्रम् । यत्र वेदः अधर्मायेति पुनः पुनरुद्घुष्यते तादृशं तर्कमाश्रित्य योऽवज्ञां कुर्यात् । श्रुतौ स्मृतौ च केनचिदकार्यान्निवर्त्येत 'मैवं कार्षीः प्रतिषिद्धं वेदेनेति' तमनादृत्य चिकीर्षेत् 'किंनाम वेदे'। यदि वेदे स्मृतिषु वा प्रतिषिद्धं किं तयोः सम्यक् प्रामाण्यमस्तीति कथयेत् मनसा वा विचिन्तयेत् । तर्कशास्त्रेषु निबद्धादरो यदि दृश्येत स साधुभिः शिष्यैर्बहिःकार्यस्तत्तत्कार्येभ्यो याजनाध्यापनातिथिसत्कारादिभ्यः । क्रियाविशेषस्यानिर्देशाद्विद्वदर्हेभ्य इति गम्यते । यतोऽविद्वान्सम्यगसंस्कृतात्मा तार्किकगन्धितयैवं व्यवहरति । आसु च क्रियासु विद्वानधिक्रियते । अत एव पूर्वश्लोके विचार ईदृशः प्रतिषिध्यते यतस्तदवज्ञानपरतया क्रियते । ननु यतस्तदर्थविशेषजिज्ञासया । एवमर्थमेव हेतुमाह । नास्तिको वेदनिन्दकः । अतश्च पूर्वपक्षे यो वेदस्याप्रामाण्यं ब्रूयान्नासौ नास्तिकः स्यात् । सिद्धान्तदार्ढ्यार्थमेव पूर्वपक्षे हेतुकथनं वेदनिन्दक इति । स्मृतिग्रहणं न कृतम्। तुल्यत्वेनोभयोः प्रकृतत्वादन्यतरनिर्देशेनैव सिद्धमुभयस्यापि ग्रहणमित्यभिप्रायः ॥ ११ ॥

यस्त्वेतमर्थमविदित्वा वेदशब्दस्य विवक्षितार्थत्वमेव मत्वा स्मृतिनिन्दकस्य न बहिष्कारः, अनेन वेदनिन्दकस्यैव विहितं इति प्रतिपद्येत । तं प्रत्याह—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥ १२ ॥

---

१ क-प्रसत्तिमात्रम् । २ अ-क-ख-क्ष-फ-ननु । ३ अ-क-ख-क्ष-निवर्तितः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नात्र कश्चिद्विशेषः वेदनिन्दाप्रतिषेधेन स्मृतिसदाचारात्मतुष्टीनामपि निन्दकस्य बहिष्कारोऽनेन विहितः । तेषामपि वेदमूलधर्माभिधानम् । अतः स्मृत्यादिनिन्दको वेदनिन्दक एव ।

ननु श्लोकद्वयेन नार्थः । एवं वक्तव्यम् । "श्रुत्यादीनात्मतुष्ट्यन्तान्हेतुशास्त्राश्रयान्द्विजः । यो निन्देत्स बहिष्कार्यः साधुभिर्नास्तिकत्वतः" । उच्यते । नाचार्या ग्रन्थगौरवं मन्यन्ते । बुद्धिगौरवं यत्नेन परिहरन्ति । तस्मिन्हि सति असम्यगवबोधो धर्मस्य । स च पुरुषार्थं विहन्ति ।

भेदनिर्देशेऽपि हि चोदयेयुर्वेदग्रहणमेव कर्तव्यम् । सर्वस्य धर्मस्य वैदिकत्वात् । तस्माद्विस्पष्टार्थं भेदेनोभयनिर्देशः । संक्षिप्तरुचीनां पूर्वश्लोकः । अन्येषां श्लोकद्वयम् ।

'स्वस्य च प्रियमात्मनः' इत्यनेन प्रागुक्ता आत्मतुष्टिरेवोक्ता । स्वग्रहणं वृत्तपूरणार्थम् । एत'त्साक्षाद्धर्मस्य **लक्षणं**' निमित्तं ज्ञापकम् । न पुनः प्रत्यक्षम् । **यथा नैरुक्तं** 'साक्षात्कृतधर्माण' इति । विधाशब्दः प्रकारवचनः । एकमेव धर्मे प्रमाणं वेदाख्यं । तस्य त्वेते भेदाः स्मृत्यादयः ।

अन्ये तूपसंहारार्थमिमं श्लोकं व्याचक्षते । समासं धर्मलक्षणप्रकरणमिति पुनःपाठः समाप्तिं सूचयति । यथा द्विरभ्यासो वेदाङ्गेषु संस्थाजपेनोपतिष्ठन्त उपतिष्ठन्त इति । तथा च पिण्डीकृत इव प्रागुक्तोऽर्थो हृदि वर्तते । यथा नैयायिका अनित्यः शब्द इति प्रतिज्ञाय साधनोपन्यासं कृत्वा निगमयन्ति । तस्मादनित्यः शब्द इति । प्रायेण चैषा ग्रन्थाकाराणां रीतिः । तथा महाभाष्यकारोऽपि क्वचित्सूत्रं वार्तिकं वा पठित्वा व्याख्याय पुनः पठति ॥ १२ ॥

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ॥
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥ १३ ॥

गोभूमिहिरण्यादिधन**मर्थः** । तत्र सक्तिस्तात्पर्येण तदर्जनरक्षणार्थं कृषिसेवादिव्यापारकरणम् । **कामः** स्त्रीसंभोगः । तत्र सक्तिर्नित्यं तदासेवनं तदङ्गानां च गीतवादित्रादीनाम् । तद्वर्जितानां पुरुषाणां **धर्मज्ञानं** धर्माविबोधो **विधीयते** विशेषेण धीयते । व्यवस्थितं भवति । 'धा आधार' इत्यस्यैतद्रूपम् ।

किमर्थं पुनस्तत्र सक्ताना भवति धर्मज्ञानं यावता तेपि यथालक्षणं तदविरोधिन्यवसरे भोजनादावितिहासश्रवणादन्योपदेशात्समाचाराद्वा शक्नुवन्ति ज्ञातुमित्यत आह । **धर्मं जिज्ञासमानानामिति** । मुख्यं प्रमाणं धर्मे वेदः स च तैर्न शक्यो ज्ञातुम् । अत्यन्तदुर्विज्ञानो ह्यसौ निगमनिरुक्तव्याकरणतर्कपुराणमीमांसाशास्त्रश्रवणमपेक्षते स्वार्थबोधे ।

---

१ अ-क-ड-क्ष-प्रामाण्यं परमा श्रुतिः । २ अ-क-ड-क्ष-आधीयते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न चेयान्ग्रन्थराशिः सर्वव्यापारपरित्यागेन विना शक्य आसादयितुम् । समाचारेतिहासादेः कतिपये धर्मा अवगम्यन्ते । न वेदादिवत्समस्ताङ्गयुक्तो ज्योतिष्टोमादिप्रयोगः । अत उक्तं । **प्रमाणं परमं श्रुतिः** । न तु समाचारादेः प्रामाण्यापकर्षः तदुक्तं " योऽहेरिव धनाद्भीतो मिष्टान्नाच्च विषादिव । राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति " अपरे त्वर्थकामदृष्टफलैषिण उच्यन्ते । तत्र सक्तानां पूजाख्यात्यादिकामानां दृष्टफलार्थितया लोकपक्तिमात्रप्रयोजनानां न धर्मज्ञानं धर्मानुष्ठानं विधीयते उपदिश्यते ।

ज्ञायतेऽस्मिन्निति ज्ञानमनुष्ठानमित्युच्यते । अनुष्ठीयमानो हि धर्मो व्यक्ततरो भवति । शास्त्रावगमकालतोऽपि[1] अतोऽनुष्ठानं धर्मज्ञानमुच्यते । अत एतदुक्तं भवति । यद्यपि धर्मानुष्ठानाल्लोकपक्त्यादि दृष्टं प्रयोजनमुपलक्ष्यते तथापि न तत्सिद्धिपरतया तत्र प्रवर्तितव्यम् । किं तर्हि ? शास्त्रेण तच्चोदितमिति कृत्वा । तथा च प्रवृत्तौ यदि दृष्टमपि भवति । भवतु, न विचार्यते । तथा च **श्रुतिः** स्वाध्यायस्य दृष्टं फलमनुवदति । " यशो लोकपक्तिरिति " " लोकः पच्यमानश्चतुर्भिरेनं भुनक्ति । अर्चया दानेनाजेयतया चावध्यतया " इत्यादि । श्लोकश्चात्र भवति--

" यथेक्षुहेतोरिह सेचितं पयस्तृणानि वल्लीरपि च प्रसिञ्चति ।
" तथा नरो धर्मपथेन संचरन्यशश्च कामांश्च वसूनि चाश्नुते ॥ "

ननु च यस्य यः स्वभावोऽवगतः सोऽन्योद्देशेनाप्यनुष्ठीयमानो न स्वभावव्यवते करोत्येव तत्कार्यम् । यथा विषं औषधोद्देशेनापि पीतं हन्त्येव । अतो दृष्टार्थतयाऽप्यनुष्ठीयमानानि कर्माणि शास्त्रीयाण्यदृष्टार्थान्यपि भविष्यन्ति । को भवतो मत्सरो लोकावर्जनहेतुतया न प्रवर्तितव्यमिति येनात्थ ।अत आह । धर्मं जिज्ञासमानानां वेदो धर्मे प्रमाणम् । तेन चैतदुक्तम् । दृष्टफलकामार्थानां नादृष्टं भवति । न केवलं अदृष्टं न भवति । यावत्प्रतिषिद्धसेवनादधर्मोऽपि भवति ॥ १३ ॥

श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ ॥
उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः ॥ १४ ॥

प्रागुक्तो व्याघातः परिह्रियते । यत्र श्रुत्योर्द्वैधं विरुद्धाभिधानं यं धर्मोऽयमिति काचिच्छ्रुतिराह, तमेवाधर्ममित्यन्या । तत्र **उभावपि तौ धर्मा**वनुष्ठेयौ विकल्पेन । तुल्यबले हि ते श्रुती । तत्रेयं प्रमाणमियं नेत्यशक्यो विवेकः । अत एकार्थतुल्यबलविरोधे विकल्पः[2] । इत्युभावपि तौ धर्मावित्युक्तम् । तत्र समुच्चयः प्राप्नोति । एवमुभौ धर्मौ भवतोऽन्यथा एकः स्यात् । नेति ब्रूमः । पर्यायेणापि प्रयोगे नोभयशब्दस्य प्रवृत्तिविरोधः । न ह्ययं सापेक्ष्यद्वयविषय एव । न्याय्यश्च विकल्पः । यथाऽग्निहोत्राख्यमेकं कर्म; तस्य

१ क--कातरोऽपि । २ विकल्पपक्षे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतिद्वैधे तत्र कर्मप्रधानं, कालो गुणः, न चैकस्मिन्प्रयोगे कालत्रयसंभवः, न च कालानुरोधेन प्रयोगप्रवृत्तिर्युक्ता, नाङ्गानुरोधेन प्रधानमावर्तनीयम्, तस्मान्न्याय्योऽयं तुल्यबलत्वाद्विकल्प इति । न वचनात् ।

उभावपि हि तौ धर्मौ । ननु च को भेदस्तत्र धर्मावित्यस्मादेतस्य न कश्चित् । पूर्वेण स्वमतमुपन्यस्तमुत्तरेणान्यैरपि मनीषिभिरेतदेवोक्तमिति स्वमतमाचार्यान्तरमतसंवादेन द्रढयति ॥ १४ ॥

उदितेऽनुदिते चैव समयाध्युषिते तथा ॥
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ १५ ॥

उदाहरणमिदम् । अनन्तरप्रदर्शिते विरोधे । य एते त्रयः काला इतरेतरनिन्दया होमस्य विहिताः तत्रायमर्थः श्रुतिवाक्यानाम् । **सर्वथा वर्तते यज्ञः** । सर्वप्रकारो होमः प्रवर्तते । प्रवर्तनीय इत्यर्थः । या उदितहोमनिन्दा सा न तत्प्रतिषेधार्था किं तर्ह्यनुदितहोमविध्यर्था । एवमितरत्रापि तेनायमर्थ उक्तो भवति । सर्वथा कर्तव्य एतेषां कालानामन्यतमस्मिन्काले । तत्र यस्मिन्कृतस्तत्र संपूर्णः शास्त्रार्थो भवतीतीयं वैदिकी श्रुतिरेवंपरा। अस्मिन्नर्थेऽस्यास्तात्पर्यं न पुनर्निन्द्यमानप्रतिषेधे। यज्ञो होमोऽत्राग्निहोत्राख्योऽभिप्रेतः। यागहोमयोर्यतो नात्यन्तं भेदः । देवतामुद्दिश्य द्रव्यस्य स्वत्वत्यागो 'नेदं मम देवताया इदमिति' **यागः** । एतच्च स्वरूपं होमेऽप्यस्ति। अयं तु विशेषो यष्टव्यस्य होमे प्रक्षेपः। अधिक आरोपणविशेषोऽग्न्यादौ । अतो यज्ञशब्देनात्र होमस्याभिधानम् । होमे ह्येते कालाः श्रुतावाम्नाता न यागमात्रे । उदितादिशब्दैश्चोदिते होतव्यमित्यादिका श्रुतिरेकदेशेन लक्ष्यते । येयमुदिते होतव्यं नोदिते होतव्यमिति श्रुतिः सैवंपरेत्येवं योजना ।

समयाध्युषितशब्देन समुदायेनैवौषसः काल उच्यते। अन्ये तु पदद्वयमेतदित्याहुः। समयाशब्दः समीपवचनः समीपिनमपेक्षते । उदितानुदितयोः सन्निधानात्तत्समीपी संध्याकालः। अध्युषितं रात्रेर्विवासकालः। व्युष्टायां रात्रावित्यर्थः। कासुचिच्छ्रुतिष्वेवं पठितम् । कासुचिदेवमिति श्रुतिवाक्यानुकरणमेषा स्मृतिस्तत्र किंपदद्वयमेतदुतैकमिति तत एव निर्णयः। अतो विकल्पेनैकं होमाख्यं कर्म प्रतिकालत्रयेऽपि श्रुतिविधानान्नास्ति विरोधः । सिद्धरूपे हि वस्तुनीतरेतरविरुद्धरूपसमावेशासंभवः । तस्माद्विरोधो न साध्ये । साध्यं ह्यनेनापि सिध्यत्यनेनापीति एवमवगम्यते । तत्र कुतो विरोधः एष एव च स्मृतीनां विरुद्धानां विकल्पो न्याय्यः ॥ १५ ॥

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ॥
तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित् ॥ १६ ॥

---

१ ड-क-क्ष-युक्तानाम् याम्यनुरोधेन । २ क-ड-क्ष-वचनात् । ३ अ-क-ड-क्ष-एकस्या ४ क-ड-क्ष-रूपम् । ५ फ-तत्र समापम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'विदुषा ब्राह्मणेनेदमध्येतव्यमिति' पठन्ति स चार्थवादः । तत्र तव्यप्रत्ययदर्शनात्कस्यचिद्विधिभ्रान्तिः स्यात् । तथा च सति क्षत्रियवैश्ययोरध्ययनं निवर्तेत इत्येदाशङ्कानिवृत्त्यर्थोऽयं श्लोकः क्षत्रियवैश्ययोः प्राप्तिं दर्शयति । तथा यथाकामी शूद्रोऽप्यप्रतिषेधादध्येतुं प्रवर्तेत तन्निवृत्त्यर्थमपीत्येवमिमं श्लोकं पूर्वे व्याचक्षरे । शास्त्रशब्दोऽयं मानवग्रन्थवचनः अधिकारो मयैतदनुष्ठेयमित्यवगमः । न च शब्दराशेः सिद्धस्वभावस्यानुष्ठेयत्वावगतिः संभवति । न हि द्रव्यमनाश्रित्य क्रियाविशेषं साध्यतयाऽवगम्यते । अतः शास्त्रविषयायां कस्यांचित्क्रियायामधिकार इत्यवगम्यते । तत्र 'कृभ्वस्तय'स्तावन्न विषयतया प्रतीयन्ते । भ्वस्त्योर्भवत्यर्थत्वात् । भ्वस्तिसंबन्धे ह्ययमर्थः प्रतीयते । शास्त्रस्य यद्भवनं या च सत्ता तामनुतिष्ठेदिति । न चान्यदीयायां सत्तायामन्यस्यानुष्ठातृत्वसंभवः । करोत्यर्थेपि न संभवति । पदानां नित्यत्वाद्वाक्यानां चान्येन कृतत्वात् । अतः शास्त्रसहचारिण्यध्ययनक्रिया प्रतीयते । अतोऽयमर्थ उक्तो भवति । शास्त्राध्ययने तस्याधिकारः । यथैवाध्ययने तथैव तदर्थश्रवणेऽपि ।

न चादिमत्त्वान्मानवस्य ग्रन्थस्य कथं तद्विषयो विधिरनादिर्वेदमूल इति शक्यते वक्तुम् । उच्यते । यानि कानिचन शास्त्रप्रतिपादकानि वाक्यानि न तानि शूद्रेणाध्येयानीति शक्यते । सामान्यतोऽनुमानम् । यानि वेदवाक्यानि यानि तदर्थव्याख्यानवाक्यानि व्याख्यातॄणां तत्प्रतिरूपकाणि तान्यपि प्रवाहनित्यतया नित्यान्येव । अनुष्ठानं तु शास्त्रविषयः । तत्र चातुर्वर्ण्यस्याधिकारः । नन्वेवं सत्यनुपात्तकर्तृविशेषेषु सामान्यधर्मेषु शूद्रस्याधिकारप्रसङ्गः । यथा च न भवति तथा च तत्र तत्र कथयिष्यामः ।

ननु कथमध्ययनावबोधाधिकारनिषेधे कर्माधिकारः? न ह्यविदितकर्मरूपस्य तदनुष्ठानसंभवः, न चाध्ययनमन्तरेण तदर्थावबोधसंभवः, न चावैद्योऽधिक्रियते । सत्यम् । परोपदेशादपि यावत्तावत्सिद्ध्यति परिज्ञानं यं ब्राह्मणमाश्रितः शूद्रो यो वाऽर्थतः प्रवृत्तः स एनं शिक्षयिष्यतीदं कृत्वेदं कुर्विति । अतो न कर्मानुष्ठानप्रयुक्ते शूद्रस्याध्ययनवेदने, स्त्रीवत्परप्रत्ययादप्यनुष्ठानसिद्धेः । यथा स्त्रीणां भर्तृविधैव प्रसङ्गादुपकरोति । न कर्मश्रुतयो विद्यां प्रयुञ्जते । तेषामेव स्वप्रत्ययोऽनुष्ठानहेतुर्येषां 'स्वाध्यायोऽध्येतव्य' इति विधिरस्ति पुंसाम् । स च पुंसां त्रैवर्णिकानां तेषामपि नार्थज्ञानप्रयुक्तेऽध्ययनवेदने । अपि तु विधिद्वयप्रयुक्ते आचार्यकरणविधिना स्वाध्यायाध्ययनं विधिना च ।

निषेको गर्भाधानं स आदिर्यस्य संस्कारकलापस्य स निषेकादिः । गर्भाधानं च विवाहादनन्तरं प्रथमोपगमे 'विष्णुर्योनिं कल्पयतु' इति मन्त्रवत्केषांचिद्विहितम् ।

---

१ फ—भ्वसोरभवत्यर्थत्वा । क—ड—क्ष—भ्वस्सोरभवत्यर्थत्वाद् । २ ड—न तु । क—ननु । ३ अक-ड-क्ष—अनुष्ठानं तु न शास्त्रविषयः । ४ फ—एवं ।

For Private And Personal Use Only

परेषामागर्भग्रहणात्प्रत्युत । श्मशानमन्तोऽस्येति **श्मशानान्तः** । श्मशानशब्देन मृतशरीराणि यत्र निधीयन्ते तत्स्थानमुच्यते । तच्च साहचर्यात्प्रेतसंस्कारं पराचीमिष्टिं लक्षयति । सा हि मन्त्रवती । न स्थानम् । अनेन च द्विजातयो लक्ष्यन्ते । तेषा हि मन्त्रवन्तः संस्काराः द्विजातीनामिति नोक्तम् । विचित्रा श्लोकानां कृतिः स्वायंभुवस्यास्य **मनोः** ।

मन्त्रैरुदित उक्तो विधिरिति नायं संबन्धः । न हि मन्त्रा विधिं वदन्ति । किं तर्हि ? प्रयोगावस्थस्य विधेयस्य स्मारका न विधायकाः । तस्मादेवं व्याख्येयम् । मन्त्रैर्युक्तः समन्त्रको येषामयं विधिरिति । **नान्यस्य कस्यचिदित्यनुवादो** द्विजातीनां नियतत्वात् । अथवा कश्चिन्मन्येत द्विजातीनामयं विहितोऽवश्यकर्तव्यः । शूद्रणां त्वविशिष्टोऽतिषिद्ध इति । तदा शङ्कानिवृत्त्यर्थमिदमुक्तम् ॥ १६ ॥

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ॥
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥ १७ ॥

उक्तानि धर्मे प्रामाणानि । विरोधे च विकल्पोऽभिहितः । अधिकारिणश्च सामान्येनोक्ताः । इदानीं येषु योग्यतया धर्मोऽनुष्ठेयतामापद्यते ते देशा वर्ण्यन्ते । **सरस्वती** नाम नदी । अपरा **दृषद्वती** । तयोर्नद्योर्यदन्तरं मध्यं **तं देशं ब्रह्मावर्त** इत्यनया संज्ञया **प्रचक्षते** व्यवहरन्ति शिष्टाः । देवग्रहणमवध्यवधिमतोः स्तुत्यर्थम् । देवैः स निर्मितोऽतः सर्वेभ्यो देशेभ्यः पावनतर इति ॥ १७ ॥

तस्मिन्देशे य आचारः पारम्पर्यक्रमागतः ॥
वर्णानां सान्तरालानां स सदाचार उच्यते ॥ १८ ॥

अथास्मिन्देशे य आचारस्तस्य प्रामाण्ये किं विद्वत्ता शिष्टता चोपाधिरङ्गीक्रियते । अथाविदुषामशिष्टानां च देशोपाधिरेव प्रमाणम् । किं चातः यदि नापेक्ष्यते यत्तदुक्तं 'आचारश्चैव साधूनामिति' विशेषणद्वयमनर्थकम् । नत्वसाध्वाचारस्य धर्ममूलतोपपद्यते । वेदसंयोगासंभवात् । अथापेक्ष्यते देशविशेषसंबन्धानुपकारः । न हि देशान्तरेऽपि शिष्टसमाचारस्याप्रामाण्यं शक्यते वक्तुम् । उच्यते । प्रायिकमेतदभिधानं प्रायोवृत्त्याऽस्मिन्देशे शिष्टानां संभव इत्युक्तम् । **तस्मिन्देशे य आचारः स सदाचार इति** ।

अन्ये तु, देशान्तरे मातुलदुहितुः परिणयनाद्देशाचारनिषेधार्थमिदमित्याहुः । तदयुक्तम् । अविशेषेणैवोक्तं तद्देशकुलजातीतानामविरुद्धं कल्पयेत् । स च विरुद्ध

४ क-७ क-ड-वाऽयं सम्बन्धः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो मातृबन्धुभ्यश्च पञ्चमात्' इत्येतेन । अस्मिन्नपि देशेऽनुपनीतेन सहभोजनादिराचारो नैव धर्मत्वेनेष्यते, न च स्मृतिविरुद्धस्याचारस्य प्रामाण्यसंभवः श्रुतिविप्रकर्षात् । आचारात्स्मृतिरनुमातव्या, स्मृतेः श्रुतिः । स्मृतिस्त्वव्यवहितामेव श्रुतिमनुमापयति ।

किंच कारणग्रहाच्चैवमादेराचारस्य रूपवतीं मातुलकन्यां कामयमाना राजभयाद्द्रवन्तः कन्यागमनं दण्डो माभूदिति । अन्ये त्वविद्वांसो "येनास्य पितरो याता" इत्यस्य यथाश्रुतमर्थं गृहीत्वा धर्मोऽयमिति प्रतिपन्नाः । अपि च । 'एतास्तिस्रस्तु भार्यार्थे नोपयच्छेतेति' । प्रायश्चित्तं श्रुतमपि भ्रान्तिहेतुराभ्यस्तिसृभ्योऽन्यानप्रतिषिद्धा इति । यथा चास्य नायमर्थस्तथा वक्ष्यामः ।

न च दृष्टकारणयोः स्मृत्याचारयोः प्रामाण्यम् । उक्तं च भट्टपादैः " विरुद्धा च विगीता च दृष्टार्थादिष्टकारणे । स्मृतिर्न श्रुतिमूला स्याद्या चैषा संभवश्रुतिः" ॥ तस्मादेतान्द्विजातयो देशान्संश्रयेरन्नित्येतद्विधिशेषा देशप्रशंसार्थवादा एते । परंपरैव पारंपर्यमन्यस्मादन्यमुपसंक्रामति । तस्मादन्यं ततोऽप्यन्यमित्येवंरूपः प्रवाहः परंपराक्रमः । तदविच्छेदस्तत आगतः संप्राप्तः । संकीर्णयोनयोऽतरालाः तत्सहितानां वर्णानाम् ॥ १८ ॥

कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः ॥
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः ॥ १९ ॥

देशनामधेयान्येतानि कुरुक्षेत्रे समन्तपञ्चकं[1] प्रसिद्धं कुरवस्तत्र क्षयं गताः । 'कुरुत वा सुकृतं क्षिप्रमत्र त्राणं भवतीति' व्युत्पत्तिः । मत्स्यादयः शब्दा बहुवचनान्ता एव देशवचनाः । ब्रह्मर्षिदेश इति समुदायसंज्ञा । देवनिर्मितो देशो ब्रह्मावर्तः । देवेभ्यः किंचिन्न्यूना ब्रह्मर्षय इत्यतोऽयं देशो ब्रह्मर्षिसंबम्बन्धाद्ब्रह्मावर्तान्न्यूनः । तथा चाह । ब्रह्मावर्तादन्तर ईषद्भिन्नः । नञीषदर्थो[2] यथाऽनुष्णा यवागूं पिबेदामयावीतीषदुष्णामुपदिशन्ति । अन्तरशब्दो भेदवचनः[3] । 'नारीपुरुषतोयानमन्तरं महदन्तरमिति' यथा ॥ १९ ॥

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः[4] ॥
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ २० ॥

एतेषु देशेषु कुरुक्षेत्रादिषु प्रसूतस्याग्रजन्मनो ब्राह्मणस्य सकाशात्स्वं स्वं चरित्रमाचारं शिक्षेरञ्जिज्ञासेरन् । 'तस्मिन्देश' इत्यनेनैतद्व्याख्यातम् ॥ २० ॥

---

१ फ-क-क्ष-समन्ततं पञ्चकम् । २ फ-तत्रेषदर्थो । ३ क-ङ-क्ष-फ-अनन्तरशब्दोवभेदवचनः ४ क-ङ-क्ष-अग्राजन्मनः ।

For Private And Personal Use Only

हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि ॥
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ २१ ॥

उत्तरस्यां दिशि हिमवान्पर्वतो दक्षिणस्यां विन्ध्यः। **विनशनं** सरस्वत्या अन्तर्धानदेशः। **प्रयागो** गङ्गायमुनयोः संगमः। एतान्देशानवधीन्कृत्वा मध्यं मध्यदेशनामानं देशं विद्यात्। नात्युत्कृष्टो नातिनिकृष्ट इत्यतोऽयं मध्यदेशो न तु पृथिवीमध्यभवत्वात् ॥ २१ ॥

आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात् ॥
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ २२ ॥

आपूर्वसमुद्रादापश्चिमसमुद्राद्योऽन्तरालवर्ती देशस्तथा तयोरेव पूर्वश्लोकोपदिष्टयोर्गिर्योः पर्वतयोर्हिमवद्विन्ध्ययोर्यदन्तरं मध्यं स आर्यावर्तो देशो बुधैः शिष्टैरुच्यते। आर्या वर्तन्ते तत्र पुनःपुनरुद्भवन्त्याक्रम्याक्रम्यापि न चिरं तत्र म्लेच्छाः स्थातारो भवन्ति। आङत्र मर्यादायां नाभिविधौ। तेन समुद्रद्वीपानि नार्यावर्तः। एते चतसृषु दिक्षु देशावधय उपात्ताः। प्राच्यां पूर्वसमुद्रः प्रतीच्यां पश्चिमः। उदग्दक्षिणयोर्हिमवद्विन्ध्यौ। एतौ ह्यवधित्वेनोपात्तौ। न तयोरार्यावर्तत्वमस्त्यतस्तत्र निवासाभावे प्राप्त इदमाह ॥ २२ ॥

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ॥
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतःपरः ॥ २३ ॥

कृष्णश्वेतः कृष्णपीतो वा कृष्णसारङ्गो **मृगो यत्र चरति** निवसति। संभव उत्पत्तिर्यत्र देशे तस्य **स्वभावतो** न पुनर्देशान्तरात्प्रशस्त्योपायनादिना निमित्तेनानीतस्य कियन्तमपि कालं निवासः **स देशो यज्ञियो** यागार्हो बोद्धव्यः। अतः कृष्णमृगचरणात्परोऽन्यो म्लेच्छदेशः। म्लेच्छाः प्रसिद्धाः। चातुर्वर्ण्यजात्यपेताः प्रतिलोमजातीयानधिकृता मेदान्ध्रशबरपुलिन्दादयः।

न चानेन यागाधिकरणताऽस्य देशस्य विधीयते। 'समे यजेतेति'वत्। चरतीति वर्तमाननिर्देशात्। न हि यत्रैव चरितुं प्रवृत्तस्तदैव तत्र यागः शक्यः कर्तुम्। यागस्य हि देशोऽधिकरणं तत्साधनकर्त्रादिकारकाश्रितद्रव्यादिधारणद्वारेण। न च द्वयोर्मूर्त्तयोरेककाले एकदेशे स्थानसंभवः। न च कालान्तरलक्षणा न्याय्या विधौ लक्षणाया अन्याय्यत्वात्। यथोक्तं शूर्पाधिकरणे। 'एतद्धि क्रियत इत्युच्यत' इति। ननु च नाभिव्यापक एवाधेयो येन कृत्स्नाधाराभिव्याप्त्यैवाधिकरणार्थनिर्वृत्तिः स्यात्। तिलेषु तैलमितिवत्। किंतर्हि एक-

---

१ अ-क-ड-क्ष-व्यातारो २ ड-तैलमितिवत चेद।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देशसंबन्धिनाऽप्याधयेन भवति कृत्स्नस्याधारभावः । प्रासाद आस्ते रथमधितिष्ठतीति । एवमिह ग्रामनगरसमुदायस्य नदीपर्वतान्ताद्यवधिकस्य देशस्य प्रकृतत्वादेकदेशेऽपि पर्वतारण्यादौ चरन्सर्वमाधारीकरोति । तेनायमदोषः मूर्तयोर्नैकदेशः संभवति । उच्यते । नैवात्र यष्टव्यमिति विधिरस्ति । जानातेः परो विधायकश्रुतो न यजेः । यागस्य तत्रार्हता श्रुता । यागार्होऽसौ देश इति । सा च यागार्हता सत्यपि विधौ घटते । एतेषु देशेषु यागाङ्गानि दर्भपलाशखदिरादीनि प्रायेण च भवन्ति । अधिकारिणश्च त्रैवर्णिका वैद्याश्च तेष्वेव देशेषु दृश्यन्ते । अत एतदवलम्बनो यागार्हतानुवादः । कृत्योऽपि ज्ञेय इत्यध्यारोपितविध्यर्थो 'जर्तिलयवाग्वाजुहुयादि' तिवद्विधिवन्निगदार्थवाद एव ।

यच्चोक्तं 'म्लेच्छदेशास्त्वतःपर' इत्येषोऽपि प्रायिकोऽनुवाद एव । प्रायेण येषु देशेषु म्लेच्छा भवन्ति । न त्वनेन देशसंबन्धेन म्लेच्छा वक्ष्यन्ते । स्वतस्तेषां प्रसिद्धेर्ब्राह्मणादिजातिवत् । अथार्थद्वारेणायं शब्दः प्रवृत्तो म्लेच्छानां देश इति तत्र यदि कथंचिद्ब्रह्मावर्तादिदेशमपि म्लेच्छा आक्रमेयुः तत्रैवावस्थानं कुर्युर्भवेदेवासौ म्लेच्छदेशः । तथा यदि कश्चित्क्षत्रियादिजातीयो राजा साध्वाचरणो म्लेच्छान्पराजयेत् चातुर्वर्ण्यं वासयेत् म्लेच्छांश्चार्यावर्त इव चाण्डालान्व्यवस्थापयेत्सोऽपि स्याद्यज्ञियः । यतो न भूमिः स्वतो दुष्टा संसर्गाद्धि सा दुष्यत्यमेध्योपहतेव । अत उक्तदेशव्यतिरेकेणापि सति सामग्र्ये त्रैवर्णिकेनाकृष्टमृगचरणेऽपि देशे यष्टव्यमेव तस्मादनुवादोऽयम् । 'स ज्ञेयो यज्ञियो देशो म्लेच्छदेशास्त्वतः पर' इत्युत्तरविधिशेषः ॥ २३ ॥

एतान् द्विजातयो देशान्संश्रयेरन्प्रयत्नतः ॥
शूद्रस्तु यस्मिंस्तस्मिन्वा निवसेद्वृत्तिकर्शितः ॥ २४ ॥

यदर्थं देशसंज्ञाभेदकथनं तमिदानीं विधिमाह । एतान्ब्रह्मावर्तादीन्देशान्द्विजातयो देशान्तरेऽपि जाता आश्रयेरन् । जन्मदेशं त्यक्त्वा ब्रह्मावर्तादिदेशसंश्रयणं प्रयत्नेन कर्तव्यम् ।

अत्र केचिदाहुरदृष्टार्थ एवायमेतद्देशसंश्रयणविधिः । सत्यपि देशान्तरेऽप्याधिकारसंभवे एतेषु देशेषु निवासः कर्तव्यः । तत्र कल्पाधिकारत्वे, यदि वा गङ्गादितीर्थस्नानवदेतद्देशनिवासविधिः पावनत्वेन कल्प्यते । यथैव काश्चिदापः पवित्रतरा एवं भूमिभागा अपि केचिदेव पवित्राः । यथोक्तं पुराणे यदि वा संश्रयणादेव स्वतन्त्रात्स्वर्गो विश्वजिद्वत्तैतौ द्वावपि पक्षावप्रासौ । यद्यप्राप्तः संश्रयो विधीयते कल्प्येताप्यधिकारः । तत्र चिन्त्यते । कतरः पक्षो युक्त इति । स त्वनित्यकाम्यानामुक्तया रीत्या । एतद्देश

१ अ-क-क्ष-फ-एकदेशोऽपि । २ कड-क्ष-येन येन येन । ३ ड-अकृष्णमृगचरणे । ४ फ-यस्मिन्कस्मिन् । ५ क-ड-क्ष-देशान्तरेष्वधिकारसम्भवे । ६ अ-क-ड-ख-क्ष-कल्पते । ७ फ-तच नित्योद्देश एव । अ-क-ड-क्ष-स त्वनित्यकाम्यानामुक्तानीत्या ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवानुष्ठानसंभवादधिकृतानां प्राप्त एव । न ह्येतद्देशव्यतिरेकेण कृत्स्नधर्मानुष्ठानसम्भवः । तथाहि । हिमवति तावत्काश्मीरादौ शीतेनार्दिता न बहिः संध्योपासनेऽधिक्रियन्ते । न च यथाविधि स्वाध्यायसंभवः प्राग्वोदग्वा ग्रामादुपनिष्क्रम्येति । न हि हेमन्तशिशिरयोरहरहर्नदीस्नानादि संभवः ।

इदमेव च द्विजातय इति वचनं लिङ्गम् । न कश्चिदेव देशोऽसति म्लेच्छसंबन्धे स्वत एव म्लेच्छदेशः । अन्यथा तद्देशसंबन्धान्म्लेच्छत्वे कथं द्विजातित्वम् ? । अथोच्यते । न गमनमात्रान्म्लेच्छताऽपि तु निवासात् । स चानेन प्रतिषिध्यते । तच्च न । संश्रयोऽत्र श्रूयते । स च देशान्तरे भवतस्तत्त्यागेनान्यदेशसंबन्धः । न संश्रितस्यैव संश्रयणम् । अन्यथा एवमेवावक्ष्यत् । एतान्देशांस्त्यक्त्वा नान्यत्र निवसेत् । अथ सिद्धे संश्रयणे तद्वचनमन्यनिवृत्त्यर्थमिति परिसंख्या तथा स्यात् । तस्याश्च त्रयो दोषाः । अर्थहानिर्लक्ष्यते । एतान्देशान्न जह्यादिति । न श्रुतार्थसंभवे लक्षणा युक्ता । अत एव न भूतपूर्वगतिः । तस्माल्लिङ्गमिदं न देशसंबन्धेन पुरुषा म्लेच्छाः किं तर्हि पुरुषसंबन्धेन म्लेच्छदेशता ।

शूद्रस्य द्विजातिशुश्रूषाया विहितत्वात्तद्देशनिवासे सर्वदा प्राप्ते तत्राजीवतो देशान्तरनिवासोऽप्यनुज्ञायते । यदा बहुकुटुम्बतया शुश्रूषाशक्त्या वा द्विजातियमाश्रितः[1] स एनं बिभृयात् । तदा देशान्तरे संभवति धनार्जने निवसेत् तत्रापि न म्लेच्छभूयिष्ठे, किंतर्हि याज्ञिये; म्लेच्छावृते यानासनाशनादिक्रियानिमित्तस्य संसर्गस्यापरिहार्यत्वात्तद्भावापत्तिप्रसङ्गात् ।

वृत्तिकर्शितो वृत्त्यभावपीडितः । वृत्तिरात्मकुटुम्बस्थितिसमर्थं धनम् । तदभावे यत्कर्शनं तत्संबन्धितयोच्यते । यथा वर्षकृते सुभिक्षे दुर्भिक्षं वर्षाभावकृतम् । दुर्भिक्षं[2] वर्षकृतत्वेन व्यपदिश्यते ॥ २४ ॥

यस्मिंस्तस्मिन्नितिअतिनियममाह—

एषा धर्मस्य वो योनिः समासेन प्रकीर्तिता ॥
संभवश्चास्य सर्वस्य वर्णधर्मान्निबोधत ॥ २५ ॥

अतिक्रान्तस्य सर्वस्य ग्रन्थार्थस्य पिण्डार्थकथनमविस्मरणार्थम् । **योनिः** कारणम् । **समासेन** संक्षेपेण । **संभवश्चेति** प्रथमाध्यायार्थोवमर्शः । **अस्य सर्वस्येति** । जगन्निर्माणं बुद्ध्या प्रत्यक्षीकृत्य निर्दिशति । वर्णानुष्ठेया धर्मा वर्णधर्माः । **तान्निबोधत** । विस्तरेणेति विशेषः[3] ।

इह पञ्चप्रकारो धर्म इति **स्मृतिविवरणकाराः** प्रपञ्चयन्ति । वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो नैमित्तिको गुणधर्मश्चेति । तत्र यो जातिमात्रमपेक्ष्य प्रवृत्तो न वयोविभागा-[4]

---

१ फ–अ–द्विजातीयमाश्रितः । २ फ–सुभिक्षेसुभिक्षे । क–ख–ड–क्ष–क–ख–ड–क्ष–सुभिक्षे । ३ फ–शेषः । ४ फ–वयोविभागेनाश्रमादिकम् ।
४ फ–

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रमादिकमाश्रयति स **वर्णधर्मः**। यथा 'ब्राह्मणो न हन्तव्यः'। 'ब्राह्मणेन सुरा न पेयेति' जातिमात्रस्याऽन्त्यादुच्छ्वासादेष धर्मः। **आश्रमधर्मो** यत्र जातिर्नापेक्ष्यते केवला, तदाश्रमप्रतिपत्तिराश्रीयते। यथा 'ब्रह्मचारिणोऽग्नीन्धनभिक्षाचरणे'। **वर्णाश्रमधर्म** उभयापेक्षः। यथा मौर्वी ज्या क्षत्रियस्येत्यादिः। नाश्रमान्तरे न च जात्यन्तरस्य धारणमस्या उदाहरणम्। प्रथमोपादानन्तूपनयनं धर्मो नाश्रमधर्मः। उपनयनं वाऽऽश्रमार्थं नाश्रमधर्मः। **नैमित्तिको** द्रव्यशुद्ध्यादिः। गुणमाश्रितो **गुणधर्मः**। 'षड्भिः परिहार्यश्चे'त्यादिः। बाहुश्रुत्येन गुणेनैते धर्माः। एवमभिषिक्तस्य क्षत्रियस्य ये धर्माः। तदेतद्वर्णग्रहणेन सर्वं गृहीतमिति दर्शितम्। अवान्तरभेदस्तु नेत्येवावतिष्ठते। पुरुषत्वमात्राश्रिता अवर्णधर्मा अपि सन्ति। तेऽपि भेदेन वाच्याः स्युः। एवमन्योऽपि भेदोऽभ्यूह्यः। वर्णग्रहणं चात्र प्रदर्शनार्थम्। नान्तरप्रभवव्युदासार्थं। पूर्वं प्रतिज्ञातत्वात् तदनुवादिनी ह्येषा प्रतिज्ञा॥ २५॥

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्॥
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥ २६॥

मन्त्रप्रयोगा वैदिककर्माणि। वेदा मन्त्रा इहाभिप्रेताः। तेषां यान्युच्चारणानि तानि। तत्र भवान्यतोऽध्यात्मादित्वाट्ठक्। वेदमूलत्वाद्वोपचरितो वैदिकशब्दः। कर्मशब्देन च इतिकर्तव्यतारूपं कर्म गृह्यते। ततश्च कर्मभिर्निषेकादिः संस्कारः कार्य इति साध्यसाधनभेदोपपत्तिः। प्रधानं निषेको मन्त्रोच्चारणमितिकर्तव्यता।

निषेको योनौ शुक्रनिषेकः। स आदिर्यस्य संस्कारकलापस्य वक्ष्यमाणस्योपनयनपर्यन्तस्य। एकवचनं शरीरसंस्कार इति समुदायापेक्षम्। संस्कारशब्देन च सगुणशरीरनिर्वर्तकमुच्यते। तत्र निषेकाद्यानि विशेषजनकानि। एतदेवाह। **पावन इति**। पावयति अशुद्धतामपकर्षतीति पावनः। **प्रेत्य चेह चेति**। संस्कृतस्य सर्वत्रात्र दृष्टादृष्टफलेषु कर्मसु कारीरीज्योतिष्टोमादिष्वधिकारादुभयलोकोपकारकत्वमाह। **पुण्यैः** शुभैर्मङ्गलैरिति यावत्। सौभाग्यमावहन्ति दौर्भाग्यं चापनुदन्तीति पुण्यपावनशब्दयोरर्थभेदः। **द्विजन्मनामिति** शूद्रपर्युदासार्थम्। संस्कार्यनिर्देशश्चायम्। लक्षणया च त्रैवर्णिकाः प्रतीयन्ते। न हि तदानीं द्विजन्मानो भवन्ति॥ २६॥

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः॥
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥ २७॥

उक्तं संस्कारप्रयोजनं पावनः शरीरसंस्कारः पुण्यश्च। तत्र पावनत्वमुच्यते। दुष्टस्य दोषापकर्षणम्। कुतः पुनः शरीरस्य दुष्टतेत्याशङ्कायामाह। **बैजिकं गार्भिकं चैन**

---

१ अ-क-ड-क्ष-ख-चूडा।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । बीजे भवं बीजनिमित्तं वा बैजिकम् । एवं गार्भिकम् । एनः पापमदृष्टं दुःखकारणम् । तस्य बीजगर्भयोर्निमित्तभावादशुचित्वमात्रमिहोच्यते । शुक्रशोणिते पुरुषस्य बीजम् । ते च स्वभावादशुचिनी । गर्भाधान्यपि दोषसंक्रान्त्या दुष्टैव । अतस्तन्निमित्तमशुचित्वं पुरुषस्य संस्कारैरपमृज्यतेऽपनुद्यते । तानीदानीं कांश्चिन्नामधेयेन, कांश्चित्संस्कार्यविशेषोपलक्षितान् कृत्वा निर्दिशति । **गार्भैर्होमैः** । गर्भे संभूते नार्याः क्रियन्ते । गर्भं वा ग्रहीतुम् गर्भप्रयोजनकत्वाद्गार्भाः । नारी तत्र द्वारमात्रम् । प्रयोजकस्तु गर्भ एव । अतस्तत्प्रयुक्तत्वाच्च तदर्था होमाः पुंसवनसीमन्तोन्नयनगर्भाधानानि । होमशब्द उपलक्षणार्थः कर्ममात्रस्य । न हि गर्भाधानं होमः । एतेषां च कर्मणां द्रव्यदेवतादिरूपं गृह्यस्मृतिभ्योऽवसातव्यम् । यथैव गार्भैर्होमैरेवं जातकर्माख्येन संस्कारेण । एवं **चौडेन** । चूडार्थः चौडः । **मौञ्जीनिबन्धनमुपनयनम्** । तत्र हि मुञ्जविकारो मेखला बध्यते । अतस्तेनोपनयनकर्मोपलक्ष्यते । बन्धनमेव निबन्धनम् । निः वृत्तपूरणः । जातकर्मादीनि संस्कारनामधेयानि कृतद्वन्द्वानि करणविभक्त्या एनोपमार्जनस्य निर्दिश्यन्ते ।

संस्कारश्च सर्वः संस्कार्ये कार्यान्तरशेषभूते कृतार्थे करिष्यमाणार्थे वा कंचिद्दृष्टमदृष्टं वा विशेषमादधाति 'व्रीहीनवहन्तीति' 'व्रीहिभिर्यजेते'ति यागं निर्वर्तयिष्यतां तुषकणविप्रमोक्षो दृष्टो विशेष आदधाति । 'शिरसोऽवतार्य स्रजं शुचौ देशे निदधातीति' उपभुक्ताया आकीर्णाकारायाः प्रतिपत्तिनियमाददृष्टः स्रजो विशेषस्तत्रेमे संस्काराः शरीरशुद्ध्यर्थाः श्रुताः । न च गन्धाद्यपकर्षणं मृद्वारिसंबन्धादिव शरीरे दृश्यते । तेनेयं जन्मादिकालशुद्धिवददृष्टविशेषा शुद्धिर्वेदितव्या । एतया च शुद्ध्या पूतः श्रौतस्मार्तेषु कर्मस्वधिक्रियते । यथा मन्त्रपूतमाज्यं होमे । लौकिके तु कार्ये द्रव्यशुद्ध्यैव शुद्धिर्यथाऽऽज्यस्य भोजनादौ । स्पृश्यता हि कुमारस्य 'अद्भिर्गात्राणि शुध्यन्ती'त्येतावतैव भवति । तथा चाह । 'न तदुपस्पर्शनादशौचमिति' ।

कथं पुनः कर्मार्थत्वमेतेषाम् । युक्तमुत्पवनस्याज्यद्वारकं प्रकरणेन विनियोगात् । अमी तु बाह्या न कस्यचित्कर्मणः प्रकरणे श्रुताः । अतः पुरुषद्वारिका कर्मार्थता दुर्भणा । न चासति कार्योपयोगे स्वरूपतः संस्कार एव निर्वर्त्यः । तथाऽसति संस्कारतैव हीयेत प्रधानकर्मता स्यात् । अतश्च कार्यः शरीरसंस्कार इति । 'कुमारे जाते पुराऽन्यैरालम्भादिति' च द्वितीया श्रुतिर्बाध्येत । 'शत्रूञ्जुहोतीति'वद्विनियोगभङ्गः स्यात् । तत्र चाधिकारकल्पनेत्यादिबह्वसमंजसं प्राप्नोति । उच्यते । न वयं श्रुत्यादिप्रामाण्यापेक्ष्यं तादर्थ्यमङ्गलक्षणं ब्रूमः । अपि तूपकारकत्वं तच्चानङ्गत्वेऽप्युपपद्यते । यथाऽऽधानविधिः स्वाध्यायाध्ययन विधिश्च

१ फ–अ–क–ख–ड–क्ष–आद्य । २ अ–क–ड–फ–क्ष–श्रुत्याप्रामाण्यापेक्ष्यं तादर्थ्यं मेवलक्षणम् । ४ क-

For Private And Personal Use Only

विधिश्च । न ह्यत्र श्रुत्यादयः सन्ति । यदाहवनीये जुहोतीत्याहवनीयादयो विनियुक्ताः । अलौकिकत्वाच्च तत्स्वरूपस्याधानविधिनैव सिद्धिः 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति । अत आहवनीयादिनिर्वृत्तिद्वारेणाधानं क्रतुषूपयुज्यते । न चाङ्गम् । अध्ययनविधिरप्यर्थावबोधद्वारेण क्रतूपकारकः । एवममी संस्काराः । एतत्संस्कृतस्याध्ययनविधिः निष्पादितोऽध्ययनविध्यर्थस्य विवाहः । कृतविवाहस्याधानम् । आहिताग्नेरधिकार इत्यस्ति संस्कारकार्योपयोगिता बाह्यपुरुषसंस्काराणाम् ।

निषेकग्रहाच्च सर्वत्रापि पितुरधिकारः । तथा च जातकर्मणि मन्त्रः 'आत्मा वै पुत्रनामासि' इति। तस्य ह्यपत्योत्पादनमपत्यानुशासनं च विहितम् । 'ऋणानि त्रीण्यपाकृत्य' (अ.६।३५) इति । 'तस्मादनुशिष्टं पुत्रं लोक्यमाहुः' इति। अनुशासनं च स्वाधिकारप्रतिपादनम्, तच्च वेदाध्यापनेनार्थावबोधपर्यन्तेन भवतीति वक्ष्यामः । अत एवोभयोपकारकाः संस्काराः अपत्योत्पत्तिविधौ पितुर्माणवकस्य च संस्कृतसाध्यासु क्रियासु । तस्मात्पितुरधिकारस्तदभावे तत्स्थानापन्नस्य । तथा चाह 'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः' इति ॥ २७ ॥

येषु कर्मसु माणवकस्य संस्कारा उपकारकास्तानिदानीमुदाहरणमात्रेण दर्शयति—

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ॥
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ २८ ॥

अध्ययनक्रिया स्वाध्यायशब्देनात्राभिप्रेता । तस्या एष विषयनिर्देशस्त्रैविद्येनेति । व्यवधानेऽप्यर्थलक्षणः संबन्धो 'यस्य येनार्थसंबन्धः' इति न्यायेन । अत एव सामानाधिकरण्येऽपि श्रुते[1] विषयविषयिभावो विभक्तिविपरिणामेन । त्रयाणां वेदानामध्ययनेनेत्यर्थः । त्रय एव वेदाः । त्रैविद्यं चातुर्वर्ण्यादिवद्रूपसिद्धिः । अथवा 'स्वाध्यायेनेति' वेदाध्ययनं 'त्रैविद्येनेति' तदर्थावबोधः । **व्रतैः** सावित्रादिभिर्ब्रह्मचारिकर्तृकैः । होमैर्व्रतादेशनकाले ये क्रियन्ते । यदि वा सायंप्रातः समिद्भिरग्नीन्धनं ब्रह्मचारिणो होमशब्देनाग्न्याधारसंबन्धसामान्यादुच्यते । अथ किं समिदाधानं न होमो येनैवमुच्यते संबन्धसामान्यादिति न भवतीति ब्रुवन्ति अदनीयद्रव्यसाध्यत्वाद्यागहोमयोः ।

कथं तर्हि "सायं प्रातश्च जुहुयात्ताभिरग्निमतंद्रितः" इत्युक्तम् । लक्षणया समिदाधानं होमशब्देनोच्यते । यथैव हूयमानं द्रव्यमग्नौ प्रक्षिप्यते एवं समिन्धनार्थाः समिधोऽपि अत एतेन सामान्येन समिन्धनमेव होम इत्युच्यते । उत्पत्तिवाक्ये हि 'समिधमादध्याद्' इति श्रुतम् । जुहुयात्ताभिरग्निमित्यनुवादोऽयमन्यार्थ इति परस्ताद्वक्ष्यामः । न चानुवादे लक्षणादोषः ।

---

१ क-ब-क्ष-श्रुतेर्विषय ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदं तु युक्तं यन्मेध्यमात्रद्रव्यसाध्यौ यागहोमौ । तथा च सति बह्वृचश्चोदना यथार्था भवन्ति । यथा सूक्तवाकेन प्रस्तरं प्रहरतीति । तत्र हि प्रस्तरं द्रव्यमाहुर्हरतिं च यजतिं । अथ वचनादसौ तादृश एव यागः । दर्भाश्चाप्यदनीयाः केषांचित् । कथं शाकलहोमे । तत्रापि हि 'शकलान्यभ्यादधाति' इत्युत्पत्तिरिति चेद्ग्रहयज्ञे का गतिः । ग्रहेभ्य एकैकस्यै समिधो जुहुयादर्कादीनाम् । अतो यत्र जुहुयादिति देवतासंबन्धश्च काष्ठादेरपि श्रुत उत्पत्तिवाक्ये सोऽपि होम एव ।

इज्यया देवर्षितर्पणेन । एष तावदुपनीतस्य ब्रह्मचर्ये क्रियाकलापः । इदानीं गृहस्थधर्माः । **सुतैरपत्योत्पत्तिविधिना** । **महायज्ञैः** पञ्चभिर्ब्रह्मयज्ञादिभिः । **यज्ञैः** श्रौतैर्ज्योतिष्टोमादिभिः ।

ननु यद्येषां कर्मणां किंचित्प्रयोजनं स्यात्तदा तदधिकारयोग्यतोत्पत्त्यर्था बाह्याः संस्कारा अर्थवन्तः स्युः । अत आह । **ब्राह्मीयं क्रियते तनुः** । ब्रह्म परमात्मा कारणपुरुषः तस्येयं संबन्धिनी तनुः शरीरम् एतैः श्रौतस्मार्तैः सर्वैः कर्मभिः क्रियते । ब्रह्मसंबन्धिता च तद्भावापत्तिलक्षणा । स हि परः पुरुषार्थः । संबन्धान्तराणि सर्वस्य कस्यचित्कारणत्वेन सिद्धत्वान्नाभिलषितव्यानि । ततो मोक्षप्राप्तिरुक्ता भवति । ब्राह्मीत्येनन तनुशब्देन च तदधिष्ठाता पुरुषो लक्ष्यते । तस्य ह्येते शरीरद्वारकाः संस्काराः । तस्यैव च मोक्षप्राप्तिः शरीरस्य पञ्चतापत्तेः ।

अन्ये त्वाहुर्ब्रह्मत्वप्राप्तौ योग्या क्रियते । न हि कर्मभिरेव, केवलैर्ब्रह्मत्वप्राप्तिः, प्रज्ञानकर्मसमुच्चयात्किल मोक्षः, एतैस्तु संस्कृत आत्मोपासनास्वधिक्रियते । तथा च श्रुतिः । 'य एतदक्षरं गार्ग्यविदित्वा यजते जुहोति तपस्तप्यते अधीते ददात्यन्तवदेवास्य तद्भवति' इति ।

ननु च नैतेषां कर्मणां ब्रह्मप्राप्तिः फलं श्रुतम् । तथा हि नित्यानि तावदश्रुतफलान्येव कल्पनायां च पौरुषेयत्वं यावज्जीवादिपदैश्च नित्यताया अवगमितत्वाद्विश्वजिन्न्यायोऽपि नास्ति अथास्मादेव वचनादेतत्फलत्वमिति यदुच्येत मोक्षार्थिनः तदाऽधिकारः स्यात्तथा च नित्यत्वहानिस्ततश्च श्रुतिविरोधः। निष्फलं न कश्चिदनुतिष्ठति तत्रानर्थक्यमिति चेत् कामनानुष्ठानात् ।

प्रमाणस्य प्रमेयावगतिरर्थः । सा चेत्कृता जातमर्थवत्त्वम् । अस्ति चात्र कर्तव्यतावगतिः । सत्यां च तस्यामकरणे शास्त्रार्थातिक्रमस्ततश्च प्रत्यवाय ईदृश एवार्थे लिङादीनां वृद्धव्यवहारे व्युत्पत्तिः । यो हि भृत्यादिः कर्तव्यं न करोति कस्यचिदाज्ञातुः स वेतनार्थी वेतनं न लभते । यदि वा प्रत्यवायेन योज्यते । तत्र फलस्याश्रुतत्वान्न फलानुत्पत्तिः प्रत्यवायः । अपि तु दुःखेन योजनं नित्येषु । एवं सर्वपुरुषाधिकारो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यः समर्थितो भवति । तस्मान्न नित्यानां किंचित्फलम् काम्यानां त्वन्यदेव फलं न मोक्षः श्रुतत्वात् । तत्र कथमेतत्सर्वकर्मानुष्ठानसाध्यः परः पुरुषार्थ इति ।

अत एव कैश्चिदर्थवादोऽयमिति व्याख्यायते । संस्कारविधिस्तुत्यर्थः । अत्र च ब्राह्मीयमिति यत्किंचिदालम्बनमाश्रित्य गुणवादेन नीयते । ब्रह्म वेदस्तदुच्चारणार्हा तत्कर्माधिकारिणी च । यत्तर्हि गौतमेनोक्तम् (अ. ८ सू. ८)। 'चत्वारिंशत्संस्काराः' इति । तत्कथं तत्र हि सोमसंस्थाऽपि संस्कारत्वेनोक्ता । न च प्रधानकर्मणां संस्कारत्वोपपत्तिः । नाप्येतदर्थवादतया शक्यं व्याख्यातुमविशेषत्वात् । तत्राप्यात्मगुणशेषसंस्कारत्वाध्यारोपेण स्तुतिः । एवमिहापि संस्कारैः संस्कारान् समानीकृत्य तुल्यफलताध्यारोपेण संस्काराणामवश्यकर्तव्यतामाचष्टे । तथा च संस्कारप्रकरणान्नोत्कृष्यते (स्तुतिः) क्रियत इति च वर्तमानापदेशः । न विधिविभक्तिः । तत्र कुतो ब्रह्मप्राप्तेः फलत्वावगमः । न चात्र कर्माणि विधीयन्ते येनाधिकाराकाङ्क्षायां सत्यपि वर्तमाननिर्देशे रात्रिसत्रे प्रतिष्ठावत्फलनिर्देशः स्यात् । तस्मात्संस्कारस्तुत्यर्थमेव सर्वमेतदुच्यते । येऽपि विभागेन वर्णयन्ति नित्यानां ब्रह्मप्राप्तिफलं काम्यानां तु यथाश्रुतमेव तदप्यप्रमाणं सर्वस्यास्यार्थवादत्वात् । अन्तरेण च फलं नित्येष्वनुष्ठानसिद्धेः । प्रतिपादितत्वात्तदुक्तं 'कामात्मता न प्रशस्तेति' (अ. २ श्लो. २) ॥ २८ ॥

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ॥
मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ॥ २९ ॥

वर्धनं छेदनम् । **जातकर्मेति** कर्मनामधेयमेतत् । रूपं चास्य गृह्यस्मृतिभ्यो ज्ञातव्यम् । कस्य पुनः कर्मणो जातकर्मेति नाम ? तदर्थमुक्तं **प्राशनम्** । **हिरण्यमधुसर्पिषाम्** । 'अस्येति' दारकं व्यपदिशन्ति । कर्म वा, **अस्य** जातकर्मण इदं प्रधानम् । **यन्मन्त्रवत्प्राशनमिति** । समन्त्रकं मन्त्रेण कर्तव्यमित्यर्थः । मन्त्रस्य चेहानुक्तत्वात् सर्वत्तास्मृतीनां चैकार्थ्याद्यदन्यत्रोक्तं तदत्रापि प्रतीयते तेन गृह्यस्मृतिषु ये मन्त्रा उपायास्तैर्मन्त्रवदिति द्रष्टव्यम् ।

यदि गृह्यस्मृतयोऽपेक्षन्ते द्रष्टव्यनिर्देशोऽपि न कर्तव्यः । एवं हि तत्र पठ्यते । सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत् 'प्र ते ददामि मधुनो घृतस्य' इति । किंच बह्वचो गृह्यस्मृतयो भिन्नाश्च प्रतिगृह्यमन्त्राः, अन्याऽपि भिन्नेतिकर्तव्यता तत्र काऽऽश्रीयतामिति न विद्मः । अथ चरणसमाख्या नियामिका भविष्यति व्यर्थस्तर्हि जातकर्माद्युपदेशस्तत एव सिद्धेः । कठानां गृह्यं बह्वृचामाश्वलायनानां च गृह्यमिति यद्येन समाख्यायते स तदुक्तमनुष्ठास्यतीति । उच्यते । दृष्टादिनिर्देशेन सुस्पष्टं कर्मैकत्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिति प्रतीयते । तथा हि प्रत्यभिज्ञासिद्धिः । तदेवेदं तन्नामधेयकं चेदं कर्मातस्तदेवेदमिति, भूयसा दृष्टं तद्गुणयोगेन प्रत्यभिज्ञायते । सति चैकत्वे यदङ्गजातं क्वचिन्नोक्तं तदनिबद्धमन्यत आनेतव्यम् । यथा सर्वशाखाप्रत्ययमेकं कर्म, एवं सर्वस्मृतिप्रत्ययमपि । यत्तु बहुत्वाद्गृह्ये स्मृतीनां काऽऽश्रीयतामित्यनध्यवसायः । सर्वासां प्रामाण्याविशेषादेकार्थानां च विकल्पः भिन्नार्थानां समुच्चयः । चरणसमाख्या तु नैव नियामिका यतो न समाख्यया पुरुषस्य नियतः संबन्धः गोत्रप्रवरवत् । यैव शाखा येनाधीता स एव तथा समाख्यायते 'कठो बह्वृच' इति । न चाध्ययने नियमोऽस्त्यनेनेयं शाखाऽध्येतव्येति । अनेकशाखाध्ययनमप्यस्ति वेदानधीत्येति । तत्र त्रिवेदाध्यायिनः सर्वे व्यपदेशाः प्रवर्तन्ते ।

केऽप्यूचुः कठो बह्वृच इति । तत्रावश्यं विकल्प आस्थेयः । एकशाखाध्यायिनस्तु यद्गृह्यं यया शाखया समाख्यायते तदुक्तमेव तस्य युक्तं कर्तुम् । एष हि तदुक्तमेव शक्नोति कर्तुं तच्छाखामन्त्रा एव तेनाधीताः शक्नोति तान्प्रयोक्तुम् । तमेव वा वृतं वेद । वेदने च कर्मानुष्ठानार्थं वेदाध्ययनं येन तावतो मन्त्रान्कर्मोपयोगिनोऽध्येष्यत इति । उच्यते । स्वाध्यायविधिवशेन वेदाध्ययनम् । अनधीतवेदस्य नाधिकारो न च कर्मप्रयुक्तमध्ययनम् । अत इयं समाख्या मन्त्रविशेषविनियोगनिमित्तैव 'कठानां गृह्यं' 'वाजसनेयिनां गृह्यमिति' । यस्यां शाखायां ये मन्त्रा अधीतास्ते यत्र बाहुल्येन विनियुक्तास्तद्गृह्यं तथा समाख्यायते ।

प्रमाणं गृह्यस्मृतिः सा कठानामियमिति व्यपदिश्यमाना बह्वृचानामपि स्वार्थावगमनं करोत्येव । कर्तव्यता वेदस्य स्वार्थे स्मृतीनां च । अवगतायां च कर्तव्यतायां कर्तृविशेषोश्रवणे स्वाधिकारो न स्याद्यथा च तनूनपाति प्रयाजे । वसिष्ठानां निर्देशाद्वा पतितम् । न चेह द्वयमप्यस्ति । न च शक्यं कल्पयितुं न हि कठानां बाह्वृच्यं न प्रमाणं, बह्वृचानां वा काठकं यतो य एव कठः स एवाकठोऽसति तच्छाखाध्ययने । गोत्रं तु नियतमित्यसमान एवार्थः ।

'स्वसूत्रं यः परित्यज्य परसूत्रेण वर्तत' इति । यद्येतदस्ति तदेव क्व तर्हि ? "स्वकं यदधीतं तदर्थः शक्योऽनुष्ठातुम्" । तेन स्वाधीतां शाखामतिक्रम्य पित्राद्यधीतशाखया कर्माणि कुर्यात्तद्गृह्यं च समाश्रयेत् न तस्य शाखात्यागदोषः । पित्रादीनां वा शाखात्यागः यैर्माणवकः क्रमाधीतां शाखां नाध्यापितः । माणवकस्यात्र दोषो नास्ति यदा मृतपितृको जाबालवदयं बालः स्वयमाचार्यमाश्रयेत्तदा ' येनास्य पितरो याताः ' इत्यनेनैव शास्त्रेण सैवाध्येतुं युक्ता स्यात् । अथात्मशाखाध्ययनं न संभवति तदा स्वशाखा-

---

४ क- ङ-क्ष-कौठुमः । २ क-ङ-फ-क्ष-कर्तृविशेषभावणे । ३ फ-ध्यायेन । ४ अग्रे अ. ४ श्लो.१७८ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यागः । अतः स्थितमिदं सर्वे सर्वासु स्मृतिषु जातकर्माद्युपदिश्यते । तत्र भिन्नार्थमङ्गजातं समुच्चीयते विरुद्धं विकल्प्यते समानार्थे च ।

पुंस इति स्त्रीनपुंसकव्यावृत्त्यर्थम् । अन्ये त्वविवक्षितं पुमर्थं मन्यन्ते । द्विजन्मनामिति सामान्येन त्रैवर्णिकानां संस्कार्यत्वेन प्रकृतत्वात् । संस्कार्यश्च प्रधानमुद्देशो न च प्रधाने लिङ्गसंख्यादिविशेषणं विवक्ष्यते । 'ग्रहं संमार्ष्टीति' सत्यप्येकवचने सर्वे ग्रहाः संमृज्यन्ते । 'ज्वरितं ज्वरमुक्तं च दिनान्ते भोजयेन्नरम्' इति नार्या अपि ज्वरिताया एष एव भोजनकालः तथा च प्रासप्रतिषेधः । स्त्रीणां 'अमन्त्रिका तु कार्या' 'इयं स्त्रीणामावृद्' इति (अ. २ श्लो. ६६) । नपुंसकानां च पाणिग्रहणदर्शनं 'यद्यर्थिता तु दारैः स्यात्क्लीबादीनामिति' (अ. ९ श्लो. २०३) तत्रोच्यते । नायं पुंशब्दो मनुष्यजातिवचनो नरशब्दवद्येन विभक्तिवाच्यं लिङ्गं न विवक्ष्येत । एष हि सर्वस्वस्थावरमूर्तामूर्तगतं लिङ्गविशेषं प्रसवरूपमाचष्टे । प्रातिपदिकार्थो ह्यत्र लिङ्गं विभक्तिवाच्यस्य ह्यर्थस्य विवक्षाविवक्षे युज्येते यतो न विभक्तेर्वचनमेवैकं प्रयोजनं कर्माद्यर्थान्तराभिधानेनाप्यर्थवत्त्वात् । इह त्वविवक्षायामानर्थक्यमेव प्राप्नोति पुंस्पदस्य यथा तत्रैव ग्रहप्रातिपदिकार्थो विवक्ष्यते वाक्यानर्थक्यपरिहाराय । अथोच्येत न प्रत्ययार्थमात्रस्य विवक्षा कृत्स्नोऽपि पदार्थ उपदिश्यमानविशेषणं न विवक्ष्यते यथा 'यस्योभयं हविः' इति सत्यप्युभयपदश्रवणे दधिपयसोरन्यतरावृत्तावपि तदेव प्रायश्चित्तं न विवक्षित उभयशब्दः । अत्र केचित्परिहारमाहुः । नैतत्तेन समानं न हि हविरर्थः पञ्चशरावः हविर्विनाशे हि नैमित्तिकोऽधिकारः । इह तु माणवकार्था एव संस्काराः ।

एष त्वप्रयोजको विशेषः । वाक्यभेदभयाद्विशेषणविवक्षा नेष्यते । तादर्थ्येऽपि वाक्यभेदो नैवापैति । तस्मादयं परिहारः । एतदेवोत्पत्तिवाक्यं जातकर्मणः । वैदिकैः कर्मभिरित्येतदुपक्रमम् । तत्र पुमानेव संस्कार्यतया निर्दिष्टः । तदविवक्षायां वाक्यानर्थक्यं यथा तत्रैव हविःपदं विवक्ष्यते ।

यद्येवं शूद्रस्यापि प्राप्तिं जातिविशेषानिर्देशात् न प्राप्स्यति मन्त्रसाध्यत्वात् । अथवा द्विजन्मनामिति वाक्यशेषको भविष्यति । न च तदानीं विधेयार्थविषयत्वेन निर्दिष्टे । येन तत एव संस्कार्यावगतौ पुंस इत्येतदुभयपदवदविवक्षितमाशङ्क्येत ।

स्त्रीणां त्वप्राप्तेऽपि विधानमुपपद्यते । क्लीबस्यापि दारदर्शनम् । वातरेता यः क्लीब उभयव्यञ्जनोऽप्रवृत्तेन्द्रियो वा । बहुप्रकारव्यावृत्तिकरं जातकर्मादिसंस्कारकालेऽपरिच्छेद्यत्वाच्छक्यप्रतीकारत्वाच्च । न च यो न नियतो धर्मः सोऽधिकारं व्यावर्तयति यथाऽ-

१ क-ख-ग-उभयपदविवक्षितमाशंक्येन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रव्यत्वं न ह्यद्रव्यत्वनियतं जातिवत्। य एवाद्रव्यः सोऽपि द्रव्यवान्भवति। चिरमधनो भूत्वा भवत्यह्ना महाधनः। ईदृशस्यैव षण्ढस्य वधे पलालभारकशुद्धिः। स ह्यसंस्कृतोऽनुपनीतः शान्त्यै न कस्यचित्तिष्ठति। अतः स्थितं पुंसामेवैते संस्कारा एभिर्विधीयन्ते। विध्यन्तरेण स्त्रीणाममन्त्रकाः। नपुंसकस्य नैव सन्तीति ॥ २९ ॥

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् ॥
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥ ३० ॥

दशम्यां तिथौ **द्वादश्यां वाऽस्य** दारकस्य **नामधेयं** कुर्वीत। णिजर्थो न विवक्षितः। तथा च गृह्यम् "दशम्यामुत्थाप्य पिता नाम करोति" इति। नामैव नामधेयम्। येन शब्देन कार्येष्वाहूयते तन्नाम 'प्राङ्नाभिवर्धनादिति' जातकर्मणः प्रकृतत्वाज्जन्मनः प्रभृति दशमीद्वादश्यौ गृह्येते न चन्द्रतिथी।

इह केचिद्दशमीग्रहणमाशौचनिवृत्तिरित्युपलक्षणार्थं वर्णयन्ति। अतीतायामिति चाध्याहारः दशम्यामतीतायां ब्राह्मणस्य द्वादश्यां क्षत्रियस्य पञ्चदश्यां वैश्यस्येति। तदुक्तं लक्षणायां प्रमाणाभावाज्जातकर्मवदाशौचेऽपि करिष्यते। यदि तु ब्राह्मणभोजनं विहितं कचित्तदा युक्ता लक्षणा। यदि दशमीद्वादश्यौ वक्ष्यमाणगुणयुक्ते भवतः तदा तयोः कर्तव्यम्। अथ न तदाऽन्यस्मिन्नपि पुण्येऽहनि, पुण्यान्यहानि द्वितीयापञ्चम्यादीनि। पुण्यं प्रशस्तं, नवमीचतुर्दश्यादयो रिक्तास्तिथयः अपुण्याः। मुहूर्तो लग्नं कुंभादि। तस्मिन्पुण्ये पापग्रहैरनधिष्ठिते गुरुभ्यां च दृश्यमाने, लग्नशुद्धिर्ज्योतिषादवगम्यते। नक्षत्रे च गुणयुक्ते। नक्षत्रं श्रविष्ठादि तद्यस्मिन्नहनि गुणयुक्तं भवति। नक्षत्रगुणाश्च क्रूरग्रहपापग्रहविष्टिपातविवर्जितम्। वा शब्दः समुच्चये। तेन प्रशस्तायां तिथौ नक्षत्रे च शुद्धे लग्न इत्युपदिष्टं भवति। समुच्चयश्च ज्योतिषाऽवगम्यः। अयं च परमार्थः। दशमीद्वादशीभ्यामर्वाङ्न कर्तव्यम्। उत्तरकालं च यदहर्नक्षत्रं लग्नं परिशुद्धं तदहरेव कर्तव्यम् ॥ ३० ॥

इदानीं यादृशं नाम कर्तव्यं तन्नियमयति स्वरूपतोऽर्थतश्च—

मङ्गल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम् ॥
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ॥ ३१ ॥

तत्र स्वरूपमवधारयिष्यन्नाह। मङ्गलाय हितं तत्र वा साधु माङ्गल्यमिति व्युत्पत्तिः। 'अभिमतस्यार्थस्य चिरजीवित्वबहुधनादेर्दृष्टादृष्टसुखफलस्य सिद्धि'र्मङ्गलम्। तदभिधानमेव शब्दस्य हितत्वं साधुत्वं चेति तद्धितसिद्धिः। साधुत्वं नाभिप्रेतार्थसिद्धिप्रतिपादनमेव विवक्षितम्। किं तर्हि? य आशास्यते तद्वचनेनैव सिद्धिः। समासादायुः सिद्धिः धनसिद्धिः पुत्रलाभ

१ क—शब्दाभ्यर्हितत्वम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादेः प्रतीयते । तद्धिताद्वा हितनिमित्तप्रयोजनार्थीयात्। तत्र गृह्ये तद्धितान्तं प्रतिषिद्धं "कृतं कुर्यान्न तद्धितमिति" समासेऽपि पदद्वयैकार्थीभावस्तत्र बह्वक्षरप्रयोगप्रसंगो यतो वक्ष्यति 'शर्मवद्ब्राह्मणस्ये'त्युपपदनियमं तत्र चतुरक्षरे त्र्यक्षरे वा नाम्नि शर्मशब्दे चोपपदे पञ्चाक्षरं षडक्षरं नाम भवति तच्च प्रतिषिद्धं द्व्यक्षरं चतुरक्षरं वा कुर्यादिति तेन यत्किंचित्प्रायेण सर्वस्याभिलषणीयमगर्हितं पुत्रपशुग्रामकन्याधनादि तद्वचनाः शब्दा नामधेयत्वेन मत्वा विनियोक्तव्याः शर्मान्तास्तेन गोशर्मा धनशर्मा हिरण्यशर्मा कल्याणशर्मा मङ्गल्यशर्मेत्यादिशब्दपरिग्रहः सिद्धो भवति ।

अथवा, मङ्गलं धर्मस्तत्साधनं मङ्गल्यं नाम । कतमत्पुनर्धर्मसाधनं नाम। य एते देवताशब्दाः इन्द्रोऽग्निर्वायुः । तथा ऋषिशब्दाः । वसिष्ठो विश्वामित्रो मेधातिथिस्तेषामपि धर्मसाधनमस्ति । ऋषींस्तर्पयेत्पुण्यकृतो मनसा ध्यायेदिति । "देवतानामृषीणां च द्विजानां पुण्यकर्मणाम्। प्रातः प्रबुद्धः श्रीकामो नरो नामानि कीर्तयेद्" इति मङ्गल्यग्रहणाच्च । यदप्रशस्तं यमो मृत्युरित्यादि तन्निरस्यते,यच्चानर्थकं डित्थादि यदृच्छानिमित्तम्।

क्षत्रियस्य बलान्वितम् । बलसंयुक्तं बलवाचि। अन्वयः संबन्धः । शब्दस्यार्थेन संबन्धः प्रतिपादकभाव एव । सामर्थ्यं बलं तद्येन येन प्रतिपाद्यते तादृशं नाम क्षत्रियस्य कर्तव्यं शत्रुंतपः दुर्योधनः प्रजापाल इत्यादि। विभागेन च नामनिर्देशो। जातिचिन्हम् ।एवं वैश्यस्य धनसंयुक्तम् ।

न चात्र पर्याया एव गृह्यन्ते "धनं वित्तं स्वापतेयमिति"। किंतर्हि येन प्रकारेण प्रतिपत्तिः यदि वा धनादिशब्दप्रयोगादर्शसंबन्धाद्वा, धनकर्मा महाधनः गोमान्धान्यग्रह इति । एवं सर्वत्र द्रष्टव्यम् । तथा चान्वितादिशब्दप्रयोगो बलान्वितं धनसंयुक्तमिति । इतरथा एवमेवावक्ष्यद्बलनामानि कुर्यादिति । [2]स्वल्पत्वाद्बलार्थवाचिनामानन्त्याच्च[3] पुरुषव्यक्तीनां दुरवधाने भेदे व्यवहारोच्छेद एव स्यात् । शूद्रस्य जुगुप्सितम् । कृपणको दीनः शबरक इत्यादि ॥ ३१ ॥

शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् ॥
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥ ३२ ॥

अत्र स्वरूपग्रहणं पाठानुक्रमश्चादौ मङ्गल्यमेते शर्मशब्दाः । तथा चोदाहृतम् । क्षत्रियादिनाम्नां तु नैतत्संभवति रक्षाशब्दस्य स्त्रीलिङ्गस्य श्रवणात्पुंसां सामानाधिकरण्यानुपपत्तेः । तस्मादेकोपक्रमत्वात्समाचाराच्च सर्वत्रार्थग्रहणं वाक्यभेदाच्च समुच्चयः । यन्मङ्गल्यं तच्छर्मार्थवत् । शरणमाश्रयः सुखं च अर्थग्रहणात्स्वामिदत्तभवभूत्यादिशब्दपरिग्रहः । इन्द्रस्वामीन्द्राश्रयः इन्द्रावतोऽपि तदाश्रयता प्रतीयते । एवं सर्वत्रोन्नेयम् ।

१ अमरः (३।९।९०) । २ फ–स्वबलाद्बलार्थवाचिनाम् । ३ फ–स्वल्पत्वाद्बलार्थवाचिनामानन्त्याच्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कोऽयं हेतुर्वाक्यभेदात्समुच्चय इति । व्रीहिभिर्यजेत यवैर्यजेतेति किं न समुच्चय इति । उच्यते । लिङ्गदर्शनमात्रमेतत्पौरुषेयत्वात् ग्रन्थस्य । विकल्पेऽभिप्रेते मङ्गल्यं शर्मवद्वेति लाघवादवक्ष्यत् । वाक्यभेदे हि द्विराख्यातोच्चारणम् । तद्गुरु भवति । रक्षा परिपालनं पुष्टिर्वृद्धिर्गुप्तिश्च । गोवृद्धो धनगुप्त इति । प्रेष्यो दासो ब्राह्मणदासो देवदासो ब्राह्मणाश्रितो देवताश्रित इति ॥ ३२ ॥

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ॥
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥ ३३ ॥

पुंस इत्यधिकृतत्वात्स्त्रीणामप्राप्तौ नियम्यते । सुखेनोद्यते सुखोद्यं स्त्रीबालैरपि यत्सुखेनोच्चारयितुं शक्यते तत्स्त्रीणां नाम कर्तव्यम् । बाहुल्येन स्त्रीणां स्त्रीभिर्बालैश्च व्यवहारस्तेषां च स्वकारणसौष्ठवाभावान्न सर्वं संस्कृतं शब्दमुच्चारयितुं शक्तिरस्ति । अतो विशेषेणोपदिश्यते तत्तु पुंसामसुखोद्यमप्यनुज्ञायते । उदाहरणं मङ्गलदेवी चारुदती सुवदनेत्यादि । प्रत्युदाहरणं शर्मिष्ठा सुश्लिष्टाङ्गीति । अक्रूरमक्रूरार्थवाचि । क्रूरार्थवाचि क्रूरार्थं डाकिनी परुषेति । विस्पष्टार्थं यस्यार्थो व्याख्यानगम्यो न भवति श्रुत एव विदुषामविदुषां वाऽर्थप्रतीतिं करोत्यविस्पष्टार्थं यथा कामनिधा कारीषगन्ध्येति । कामस्यै निधेव निधा तया कामस्तत्रैव तिष्ठतीति । एवं यावन्न व्याख्यातं तावन्नावगम्यते । एवं कारीषगन्धेर्दुहिता कारीषगन्ध्येति व्याख्यानमपेक्ष्यते । मनोहरं चित्ताह्लादकरं श्रेयसी विपरीतं तु कालाक्षी शर्मवती रुद्रवतीति मङ्गल्यं विपरीतमभागा मंदभागेति । दीर्घो वर्णोऽन्ते यस्य विपरीतं शरत् । आशिषं वदतीत्याशीर्वादम् । अभिधानं शब्दः । तयोर्विशेषणसमासः । तद्यस्मिन्नास्ति विद्यते तदाशीर्वादाभिधानवत् । सपुत्रा बहुपुत्रा कुलवाहिकेति । एते ह्यर्था आशीर्विषया विपरीता अप्रशस्ता अलक्षणेति । अथ मङ्गल्यस्याशीर्वादस्य च को विशेषः । न कश्चित् । वृत्तपूरणार्थं तु भेदेनोपादानम् ॥ ३३ ॥

चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् ॥
षष्ठेऽन्नमाशनं मासि यद्वेष्टं मङ्गलं कुले ॥ ३४ ॥

जन्मचतुर्थमासे गृहाद्बहिर्निष्क्रमणमादित्यदर्शनं शिशोर्बालस्य कर्तव्यम् । त्रीन्मासान् गर्भगृह एव वासयेत् । शिशुग्रहणं शूद्रस्यापि प्राप्त्यर्थम् । एवं षष्ठे मास्यप्यन्नप्राशनं पञ्चमासान्क्षीराहार एव । यद्वा कुले दारकस्य श्रेयस्यं मङ्गल्यं पूतना शाकुनिकैकवृक्षोपहारादि प्रसिद्धम् । कालविशेषे वा तत्कर्तव्यम् । अयं च संस्कारशेषः तेन नामधेयमुक्तलक्षणव्यतिरेकेणापि यथा कुलधर्मं लभ्यते । इन्द्रस्वामी इन्द्रशर्मा इन्द्रभूमिः

१ क्ष—ख—अक्रूरार्थम् । २ क्ष—ख—कामस्य निधेव पश्ये च बध्यते । ३ क्ष—ख—केचिन्मङ्गल्यम् ।

For Private And Personal Use Only

इन्द्रघोष इन्द्रात इन्द्रविष्णुः इन्द्रदेव इन्द्रज्योतिः इन्द्रयशा इत्यादि कुलभेदेनोपपन्नं भवति ॥ ३४ ॥

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ॥
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ॥ ३५ ॥

चूडा शिखा तदर्थं कर्म **चूडाकर्म** केषुचिन्मूर्द्धदेशेषु केशानां स्थापनं रचना विशेषश्चैतच्चूडाकर्मोच्यते । प्रथमवर्षे तृतीये वा प्रहसौस्थित्या विकल्पः । श्रुतिनोदना-दित्यनुवादस्तन्मूलतयैव प्रामाण्यस्योक्तत्वात् । अथवा श्रुतिशब्देन न विधायकान्येव वाक्यान्युच्यन्ते । किं तर्हि मन्त्राः ते च चूडाकर्मण्यञ्जना इतिवदर्द्दृष्टं प्रकाशयन्ति यत्क्षुरेण मार्जयेतेत्यादि तेन समन्त्रकमेतत्कर्मेत्युक्तं भवति विशेषापेक्षायां गार्ह्यो विधिरङ्गीक्रियते । अतः शूद्रस्य नायं संस्कारः द्विजातिग्रहणाच्च । अनियतकालं तु केशवपनं शूद्रस्यार्थप्राप्तं न निवार्यते ॥ ३५ ॥

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥ ३६ ॥

गर्भस्थस्य यः संवत्सरस्तत आरभ्यते योऽष्टमोऽब्दः । गर्भशब्दे साहचर्यात्संवत्सरो लक्ष्यते । न हि मुख्यया वृत्त्या गर्भस्य संवत्सरोऽष्टम इति व्यपदेशं लभते तस्मिन्नौपनायनं ब्राह्मणस्य कुर्वीत । उपनयनमेवौपनायनं स्वार्थिकोऽण् "अन्येषामपि दृश्यते" (व्या. सू. ६।३।१८७) इत्युत्तरपदस्य दीर्घः। छान्दसत्वाद्धोमयपदवृद्धिः। उपनयनमिति हि एष संस्कारो वेदविदां गृह्यस्मृतिषु प्रसिद्धो मौञ्जीबन्धनापरपर्यायः । उपनीयते समीपं प्राप्यते येना-चार्यस्य स्वाध्यायाध्ययनार्थं कुड्यं कटं वा कर्तुं तदुपनयनम् । विशिष्टस्य संस्कारकर्मणो नामधेयमेतत् । **गर्भादेकादशे राज्ञः** । गर्भात्प्रभृति गर्भाद्वा परो य एकादशोऽब्दस्तत्र क्षत्रियस्य कर्तव्यम् । राजशब्दोऽयं क्षत्रियजातिवचनो नाभिषेकादिगुणयोगमपेक्षते ग्रन्थेषु तथा प्रयोगदर्शनात् ब्राह्मणादिजातिशब्दसाहचर्याच्च । गुणविधिषु च क्षत्रियशब्ददर्शनात् 'क्षत्रियस्य तु मौर्वीति' । यस्तु राजशब्दस्य क्षत्रियादन्यत्र जनपदेश्वरे वैश्यादौ प्रयोगः स गौण इति वक्ष्यामः । मुख्ये चासति गौणस्य ग्रहणम् । तथा च **गृह्यकारः** । "अष्टमे वर्षे ब्राह्मणमुपनयेदेकादशे क्षत्रियं द्वादशे वैश्यमिति" । भगवांश्च **पाणिनिः** एवमेव प्रतिपन्नो राज्ञः कर्म राज्यं इति राज्यशब्दस्य राजशब्दं प्रति प्रकृतित्वं ब्रुवन्नेव जनपदै-श्वर्येण राजशब्दार्थप्रसिद्धिमाह । एवं **गर्भात्तु द्वादशेऽब्दे विशः** वैश्यस्य ॥ ३६ ॥

---

१ क्ष-ड-नोदनात् । २ ते वद्दपात् । ३ अदृष्टकाम् । ४ फ-राज्यशब्दम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।। ।। ३७ ।।

पितृधर्मेणापत्यं व्यादिशति ' ब्रह्मवर्चसी मे पुत्रः स्यादिति ' पितृकामनया पुत्रो व्यपदिष्टस्तत्कामस्येति । पुत्रस्य बालत्वान्नैवंविधा कामना संभवति । ननु चैवमन्यकृतात्कर्मण अन्यस्य फलेऽभ्युपगम्यमानेऽकृताभ्यागमदोषापत्तिः । अकाम्यमानं च फलं भवत्येतदप्युत्क्रान्तशब्दप्रमाणन्यायमर्यादयोच्यते । नैष दोषः श्येनवदेतद्भविष्यति श्येनमभिचरन्करोत्यभिचर्यमाणश्च म्रियते । अथोच्यते कामिन एवैतत्फलं शत्रुमरणं हि यजमानः कामयते तदेव प्राप्नोतीति नाकर्तृगामिता फलस्य । अत्रापि विशिष्टपुत्रवत्तालक्षणमुपनेतुरेव फलं यथा पुत्रस्यारोग्येण पितुः प्रीतिः । एवं ब्रह्मवर्चसेनाप्यतोऽधिकृतस्य कर्तुश्च तत्फलमन्वयानुसारी हि शास्त्रार्थावसाय इह च पुत्रस्य फलकामेनैवंकर्तव्यमित्यन्वयः प्रतीयते ।

न च यथाश्रुतान्वयापरो किंचन प्रमाणमस्ति । एतेन पितुरौर्ध्वदेहिकः पुत्रकृत उपकारो व्याख्यातः । तत्रापि हि पुत्रः कर्ता पितृतृप्तिश्च फलं तथा च लिङ्गं " आत्मा वै पुत्रनामासीति " । पित्रैव हि तावच्छ्राद्धमात्मसंप्रदानकं वस्तुतः कृतमेव येनापत्योत्पादनमेवमर्थमेवकृतम् । यथा सर्वस्वारे मृतस्यार्भकावमानात् । ये पराञ्चः पदार्थास्तेष्वपि यजमानस्यैव कर्तृत्वं ' ब्राह्मणाः संस्थापयत यज्ञमिति ' प्रैषेण, दक्षिणाभिर्वरणेन वा प्रयोगसमाप्तावृत्विजां विनियोक्तृत्वादेवमिहापि तादर्थ्येन पुत्रस्योत्पादनाद्यच्छ्राद्धादिकं पित्रर्थं क्रियते पित्रैव तत्कृतं भवति । अध्ययनविज्ञानसंपन्नं ब्रह्मवर्चसम् ।

बलं सामर्थ्यम् । आभ्यन्तरं बाह्यं च उत्साहशक्तिर्महाप्राणता चेतदाभ्यन्तरं बाह्यं च हस्त्यश्वरथपदातिकोशसंपत्तदुक्तं स्वांगाभ्युच्चयं सांयौगिकानां चार्थानामिति । ईहा चेष्टा । बहुना धनेन कृषिवाणिज्यादिव्यवहारः । सर्वत्र गर्भादिसंख्या च वर्षाणां गर्भादिति ह्यनुवर्तते ।। ३७ ।।

आ षोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते ।।
आ द्वाविंशात्क्षत्रबन्धोरा चतुर्विंशतेर्विशः ।। ३८ ।।

एवं तावन्मुख्यकाम्यावुपनयनकालावुक्तौ । इदानीं पितुरभावे व्याध्यादिना वा कथंचिदनुपनीते माणवके कालातिपत्तावनुपनेयता प्राप्ता सत्यपि कालस्याङ्गत्वे तदभावेऽधिकारनिवृत्ते यथा सायंप्रातःकालातिपत्तावग्निहोत्रस्याकरणे । अतो विहितकालव्यतिरेकेण

१ फ–पुत्रकामनया । २ स–संभवति । ३ फ–चाप्नोतीति । ४ ड–स–फ–येनाप्यन्तोत्पादनम् । ५ फ–वाऽर्थानाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिप्रसवार्थमिदमारभ्यते यावत्षोडशं वर्षं गर्भादारभ्य तावद्ब्राह्मणस्योपनयनार्हता न निवर्तते । सावित्रीशब्देन तदनुवचनसाधनमुपनयनाख्यं कर्म लक्ष्यते । **नातिवर्तते** नातिक्रान्तकालं भवतीत्यर्थः । एवमा **द्वाविंशात्क्षत्रबन्धोः** क्षत्रियजातीयस्येत्यर्थः । बन्धुशब्दोऽयं क्वचित्कुत्सायां प्रवर्तते । यत्स्वं कथं चेच्छ ब्रह्मबन्धाविति ज्ञातिवचनः । यथा "ग्रामता जनता चैव बन्धुता च सहायता । महेंद्रस्याप्यगम्याऽसौ भूमिभागभुजां कुतः॥" द्रव्यवचनो "जात्यन्ताच्छ बन्धुनीति" (न्या. सू. ५।४।९)। तत्र पूर्वयोरर्थयोरसंभवात्तृतीयोऽर्थो गृह्यते । द्वाविंशतेः पूरणो द्वाविंशोऽब्दः तद्धितार्थः । **आ चतुर्विंशतेर्विशः** प्राप्तोऽप्यत्र पूरणप्रत्ययो वृत्तानुरोधान्न कृतः प्रतीयते तु तदर्थः । न हि समुदायविषयायाश्चतुर्विंशतिसंख्याया अवधित्वेन संभवः तदवयवस्तु चतुर्विंशो भवति संवत्सरोऽवधिः । आङमभिविधौ व्याचक्षते । लिङ्गदर्शनं चोदाहरन्ति । "गायत्र्या ब्राह्मणमुपनयीत, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम्" इति । एतेषां च छंदसामियता कालेन द्वौ पादौ पूर्येते । तावन्तं कालं बलवन्ति न त्यजन्ति स्वाश्रयभूतान्वर्णान् । तृतीये तु पादेऽपक्रान्ते[1] गतरसान्यतिवयांसि न्यूनसामर्थ्यानि भवन्ति समाप्तिमुपयान्ति । यथा "पञ्चाशता स्थविरो मनुष्यः" इत्यतश्च नैतेन वयमुपासितानीति त्यजन्ति तं वर्णं ततो 'न गायत्रो ब्राह्मणो, न त्रैष्टुभो राजन्यो, न जागतो वैश्य' इति । सविता देवता यस्या ऋचः सा सवित्री; सा च गायत्री द्रष्टव्या । प्रदर्शिता गृह्याच्च । एवं क्षत्रियस्य त्रिष्टुप् सावित्री 'आकृष्णेनेति'। वैश्यस्य जगती "विश्वा रूपाणीति" ॥ ३८ ॥

अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥ ३९ ॥

अस्मात्कालादूर्ध्वं परेण त्रयोऽप्येते वर्णाः ब्राह्मणादयो यथाकालं यस्योपनयनकालः तत्रानुकल्पिकेऽप्य**संस्कृता** अकृतोपनयनाः **सावित्रीपतिता** उपनयनभ्रष्टा भवन्ति । **व्रात्याश्च** संज्ञया । आर्यैः शिष्टैः विगर्हिताः निंदिताः । व्रात्यसंज्ञाव्यवहारप्रसिद्ध्यर्थोऽयं श्लोकः । अनुपनेयत्वं तु पूर्वेण च सिद्धमुक्तम् "आर्यैर्निन्दितः" इति ॥ ३९ ॥

का पुनरेषां निन्देत्याह ।

नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ।।
ब्राह्मान् यौनांश्च सम्बन्धान्नाचरेद्ब्राह्मणैः सह ॥ ४० ॥

एतैर्व्रात्यैरपूतैरकृतप्रायश्चित्तै**र्विधिवद्**यादृशो विधिः । प्रायश्चित्ते शास्त्रेणोपदिष्टः तांश्चारयित्वा 'त्रीन्कृच्छ्रानि'त्यापद्यपि हि कर्हिचित्कस्यांचिदप्यापदि न संबन्धा-

[1] फ-अपक्रान्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाचरेत्कुर्यात्तैः सह । किं सर्वसंबन्धनिषेधो नेत्याह । ब्राह्मान्यौनांश्च । ब्रह्म वेदः । तन्निमित्तान्संबन्धान्याजनाध्यापनप्रतिग्रहान् । " न ते याज्याः न याजकाः कर्तव्याः " । एवं नाध्याप्या नैतेभ्योऽध्येतव्यं वेदार्थे विदुषः प्रतिग्रहाधिकारादेषोऽपि ब्राह्मसंबन्धो भवति । यौनः संबन्धः कन्याया दानादाने । ब्राह्मणग्रहणं प्रदर्शनार्थम् । अस्माच्च दोषदर्शनाद्व्रात्यतापरिहारार्थे पितुरभावेऽपि व्युत्पन्नबुद्धिना माणवकेनाप्यात्मनाऽऽत्मोपनाययितव्य इति प्रतीयते । तथा च श्रुतिः । " सत्यकामो जाबालः सहहारिद्रुमंतं गौतममियाय ब्रह्मचर्यं भवति; वत्स्यामीति, " । स्वयमाचार्यमभ्यर्थितवानुपनयनार्थम् ॥ ४० ॥

कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः ॥
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥ ४१ ॥

कृष्णशब्दो यद्यपि कृष्णगुणयुक्तवस्तुमात्रे वर्तते " कृष्णा गौः, कृष्णः कम्बलः " इति तथापीह स्मृत्यन्तराद्रौरवसाहचर्याच्च मृग एव प्रतीयते । रुरुर्मृगजातिविशेषः । बस्तः छागः । सर्वत्र विकारेऽवयवे वा तद्धितः । कृष्णाजिनं ब्राह्मणो, रुरुचर्म क्षत्रियो, वैश्यश्छागचर्म वसीरन्नाच्छादयेयुः । शणक्षुमोर्णास्तत्र कृतानि च वस्त्राणि । च शब्दः समुच्चये । तत्रानुत्तरीयाणि शाणादीनि, चर्माण्युत्तरीयाण्यौचित्यात् कौपीनाच्छादनानि च वस्त्राण्यानुपूर्व्येण नैकैकस्य सर्वैरभिसंबन्धो नापि व्युत्क्रमेण । प्रथमस्य ब्रह्मचारिणः प्रथमेन चर्मणा वस्त्रेण च संबन्धो द्वितीयस्य द्वितीयस्थानस्थेन । तथा च दर्शितम् ।

ननु चान्तरेणापि वचनं लोकत एवैतत्सिद्धं " चूर्णिताक्षिप्तदग्धानां वज्रानिलहुताशनैरिति " यथाक्रमं संबन्धप्रतिपत्तिः चूर्णिता वज्रेणाक्षिप्ताः अनिलेन दग्धा अग्निनेति । उच्यते । भवेदेतदेवं यदि भेदेन निर्देशः स्यात्समसंख्यात्वं च । इह तु ब्रह्मचारिण इत्येकशब्दोपादानान्न क्रमोऽवगम्यते । त्रयश्च ब्रह्मचारिणः । षडनुदेशिनः । त्रीणि चर्माणि वस्त्राणि । आनुपूर्वग्रहणे तु सति वाक्यान्तरोपात्तः क्रम आश्रीयते । तथा च चर्मभिः संबध्य पुनर्ब्रह्मचारिपदमावर्त्य वासोभिः संबध्यते । ततः संख्यासाम्यसिद्धिः । ईदृश एव विषये भगवता पाणिनिना यत्नः कृतो " यथासंख्यमनुदेशः समानामिति " (व्या. सू. १।३।१०) ॥ ४१ ॥

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ॥
क्षत्रियस्य तु मौर्वीज्या वैश्यस्य शणतान्तवी ॥ ४२ ॥

मुञ्जस्तृणजातिस्तद्विकारो मौञ्जी । सा ब्राह्मणस्य मेखला रशना कर्तव्या मध्यबन्धनी । त्रिवृत्त्रिगुणा समा न क्वचित्सूक्ष्मा न क्वचित्सूक्ष्मतरा । किं तर्हि सर्वत्र एव समा । श्लक्ष्णा तनुत्वगुणयुक्ता परिघृष्टा च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षत्रियस्य पुनर्ज्या धनुर्गुणः । सा कदाचिच्चर्ममयी भवति, कदाचित्तृणमयी मञ्जोमादिरज्जुर्वा । तदर्थमाह । **मौर्वीति** । तया धनुषोऽवतारितया श्रोणीबन्धः कर्तव्यः । यद्यपि त्रिवृत्तादिर्गुणो मेखलामात्राश्रितो मौञ्ज्या एव तथाऽपि ज्यायाः स्वरूपनाशप्रसंगान्न भवति ।

शणतन्तुविकारः **शणतान्तवी** । छान्दसत्वादुत्तरपदवृद्धिः । अथवा केवलात्तन्तुशब्दात्तद्धिते कृते तदन्तस्य शणैः संबन्धः । शणानां तान्तवीति विकृतेर्विकारः शणतान्तवी प्रकृतिसंबन्धितया व्यपदिश्यते । 'गव्यं घृतं' 'देवदत्तस्य पौत्र' इति । तंतुः सूत्रं शणमौञ्जीवत्कर्तव्या । गृह्यकारैर्वैश्यमेखलायाः त्रिवृत्तादिधर्मः सुस्पष्ट एवोक्तः ॥ ४२ ॥

मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः ॥
त्रिवृत्ता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥ ४३ ॥

आदिशब्दलोपमत्र स्मरन्ति । **मुञ्जाद्यलाभ इति** । **कर्तव्या इति** च बहुवचनमुपपन्नतरं भिन्नजातिसंबन्धितया सुव्यक्तो मेखलाभेदः । एकजातिसंबन्धित्वे तु केवलव्यक्तिभेदालम्बनं बहुवचनं स्यात् । विप्रस्येति च प्रकृतस्य बहुवचनेन परिणामः कर्तव्यः । विकल्पश्चैकविषयत्वे स्यात् । न च संभवत्यां गतौ विकल्पो युक्तः । तेन मुञ्जाभावे कौशी । ज्याया अभावेऽश्मन्तकेन । शाणानां बल्वजैः । तृणौषधिवचनात्कुशादयः । प्रतिनिधिनियमश्चायम् । कुशाद्यभावेऽप्यन्यन्मुञ्जादिसदृशमुपादेयं **त्रिवृत्ता ग्रन्थिनैकेन** । नायं ग्रन्थिसंख्याभेदो वर्णभेदेन । अपि तु प्रत्येकं विकल्पः । कुशादिमेखलास्वप्ययं ग्रन्थिभेदो धर्मभेदश्चोद्यमानः स्मृत्यन्तरसमाचारस्यानित्यत्वेऽपि द्रष्टव्यः ॥ ४३ ॥

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ॥
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥ ४४ ॥

उपवीतशब्देन वासो विन्यासविशेष उच्यते । वक्ष्यति "उद्धृते दक्षिणे पाणाविति" । तत्र धर्ममात्रं तस्य न कार्पासता संभवत्यतो धर्मेण धर्मी लक्ष्यते । यस्यासौ विन्यासस्तत्कार्पासमुच्यते । अर्श आदित्वाद्वा मत्वर्थीयोऽकारः कर्तव्यः । उपवीतवदुपवीतमिति । **ऊर्ध्ववृत्तं** ऊर्ध्वां दिशं प्रतिवर्त्यते वेष्टयते । **त्रिवृत्** त्रिगुणं कर्तनिकाभ्यो लब्धसूत्रभावस्य त्रिगुणीकृतवेदमूर्धनि वर्तनं विधीयते । संहत्य तन्तुत्रयम् । उर्ध्ववेष्टनेन रज्ज्वाकारं कृत्वा तेनोपवीतं कुर्यात् । सा च रज्जुरेकैव धारयितव्या । तिस्रः पञ्च सप्त वा । यज्ञसंबन्धाद्धि तद्यज्ञोपवीताख्यं लभते । यज्ञार्थोऽयमुद्यत इति भक्त्योप-

१ ङ-क्ष-मुञ्जाभावे । २ क-फ-ख-ङ-क्ष-त्रिवृता । ३ फ-कौश्या । ४ अस्मिन्नेवाध्याये ६३ श्लोके । ५ व्या. सू. (५।२।१२७) । ६ ङ-क्ष-वर्द्धनम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चर्यते तत्रेष्टिपशुसोमानां यज्ञरूपतयैकत्वादेकतन्तुकं क्रियते । अग्नित्रयसाध्यत्वादहीनैकाहसत्रभेदाद्वा त्रितन्तुकं सोमसंस्थानां सप्तसंख्यत्वात्सप्त वा तन्तवः । "त्रीणि सवनानि त्रिसंध्येनेति" पञ्चसूत्राभावेऽपि पटादिनाऽपि कर्तव्यम् । स्मृत्यन्तर एवमुक्तम् ।

अविको मेषस्तस्य सूत्रं तेन कृतं **आविकसूत्रिकम्** । अध्यात्मादित्वाट्ठञ्[1] कर्तव्यः । 'अविकसूत्रिकमिति' वा पठितव्यम् । तत्र च मत्वर्थीयेन ठना रूपसिद्धिः ॥ ४४ ॥

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ॥
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥ ४५ ॥

सत्यपि द्वन्द्वनिर्देशे गुणविधिष्वेकत्वश्रवणात्केशान्तिक[2] इति 'प्रतिगृह्येप्सितं[3] दण्डम्' इति च विकल्पितम् एकदण्डधारणं प्रतीयते । "बैल्वः पालाशो ब्राह्मणस्य दण्ड" इति गृह्ये । **गौतमीये** चैकदण्डग्रहणमेवोक्तम् । इह केवला दण्डसत्ता श्रूयते । दण्डानर्हन्ति दण्डा एते ब्रह्मचारिणां योग्याः । कस्यां क्रियायां इत्येतदत्र चोक्तं उत्तरत्र भविष्यति 'प्रतिगृह्येप्सितमिति' । तस्मिंश्च ग्रहणे दण्डस्योपायत्वाद्विवक्षितमेकत्वमत इह द्विवचननिर्देशः । देवश्चेद्वर्षेद्बहवः कृषिं कुर्युरिति यथा प्राप्तानुवादः । बिल्वपलाशवटखदिरपीलूदुम्बरवृक्षजातिविशेषनामधेयानि । बिल्वस्य विकारोऽवयवो वा बैल्वः । एवं सर्वत्र प्रदर्शनार्थाश्चैते । यज्ञिया वा सर्वेषामिति वचनात् । एतान्दण्डान्वक्ष्यमाणे कार्ये **अर्हन्ति** । **धर्मतः** शास्त्रतः ॥ ४५ ॥

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ॥
ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विशः ॥ ४६ ॥

आकारविशेषवचनो दण्डशब्दः । दीर्घे काण्डसम्मितायामं दण्ड इत्युच्यते । कियत्तस्य दैर्घ्यमित्यपेक्षायामाह । केशान्तं गच्छति प्राप्नोति केशान्तगो मूर्द्धप्रमाणः । पादाग्रादारभ्य मूर्द्धावधिः केशान्तगः । केशा वाऽन्तोऽस्येति केशान्तकः । समासान्तः ककारः । **प्रमाणतः** प्रमाणेनानेन युक्तो **दण्डः कार्यः** कारयितव्यः । **ब्राह्मणस्या**चार्येण । **ललाटसंमितः** ललाटान्तमितः ललाटान्तप्रमाणः । ललाटमात्रे चतुरङ्गुलेन मीयमानस्य दण्डशब्दवाच्यत्वाभावादेवं व्याख्यायते पादाग्रादारभ्य यावल्ललाटान्तं प्राप्तः । एवं **विशो** वैश्यस्य नासान्तग इति ॥ ४६ ॥

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः ॥
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः ॥ ४७ ॥

ऋजवः अवक्राः । **सर्वे** इत्यनुवादः । प्रकृतत्वाविशेषात् । **अव्रणा** अच्छिद्राः । सौम्यं प्रियंकरं दर्शनमेषां ते **सौम्यदर्शनाः** वर्णपरिशुद्धाः । अकण्टकिताश्च **अनुद्वेग-**

---

१ ड-स-ठक्कर्तव्यः । २ अग्रे ४६ श्लोकः । ३ अग्रे ४८ श्लोकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कराः । नैतैः कश्चिदुद्वेजयितव्यः श्वा वा मनुष्यो वा नृणामिति प्रदर्शनार्थम् । **सत्वच** अतष्टाः । **अनग्निदूषिताः** वैद्युतेन दावोत्थेन वाऽस्पृष्टाः ॥ ४७ ॥

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् ॥
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥ ४८ ॥

प्रावृतेषु चर्मसु मेखलाबन्धनं कर्तव्यम् । आबध्य मेखलामुपनयनं कर्तव्यम् । कृते चोपवीते दण्डग्रहणं दण्डं गृहीत्वा भास्कर आदित्य उपस्थेयः । अभिमुखं स्थित्वा ऽऽदित्यदैवतैरभिधानमादित्यस्य कर्तव्यम् । गृह्यान्मन्त्रावगमः । अन्या चेतिकर्तव्यता तत एव । यत्सर्वसाधारणं तदिहोच्यते ।

प्रदक्षिणं परीत्य सर्वतो **गत्वाऽग्निम्** । **चरेत्**कुर्यात् **भैक्षं** भिक्षाणाम् समूहो भैक्षम् तच्चरेद्याचेत । **यथाविधीति** वक्ष्यमाणविध्यनुवादः । भिक्षाशब्देन स्वल्पपरिमाणं भक्ताद्युच्यते ॥ ४८ ॥

भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ॥
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥ ४९ ॥

भिक्षा प्रार्थनावाक्यमत्र भैक्षशब्देनोच्यते[1] । तस्य हि भवच्छब्दपूर्वता सम्भवति । न भक्तादेरर्थस्य[2] । स्त्रीणां च प्रथमं भिक्ष्यमाणतयोपदेशात्प्रार्थनायां च प्रार्थ्यमानस्य संबोध्यत्वात्संबुद्धिविभक्त्यन्तः स्त्रीलिङ्गो भवच्छब्दः प्रयोक्तव्यः । क्रम एव चात्रादृष्टाऽर्थो नियम्यते । यथार्थं तु शब्दप्रयोगो भवति ' भिक्षां देहीति ' ।

कुतः पुनः संस्कृतशब्दार्थलाभः यावता स्त्रियः संबोध्यन्ते ताश्च संस्कृतं नावबुध्यन्ते । नित्यमुपनयनं तस्य च शब्दोच्चारणमङ्गत्वेनोक्तमिति अनित्याश्चापभ्रंशाः[3] न तैर्नित्यस्य संयोग उपपद्यते । तथैव च शिष्टा असाधूनुपश्रुत्यैकदेशसादृश्येन[4] साधून्संस्मृत्यार्थं प्रतियन्त्यसाधुरनुमानेन वाचक इति दर्शनेन गाशब्दो हि सादृश्याद्गोशब्दमनुमापयति । ततोऽर्थप्रतिपत्तेः । एवं स्त्रियः सादृश्यात्साधुभ्यः असाधूनुत्पन्नसंबन्धात्स्मृत्वा[5] तेभ्योऽर्थं प्रत्येष्यन्ति । स्वल्पाक्षरं चैतत्पदत्रयं सर्वत्रप्रसिद्धं स्त्रीभिरपि सुज्ञानम् । एवं भवन्मध्यं क्षत्रियः ' भिक्षां भवति देहीति ' तथा वैश्यो भवच्छब्द उत्तरमस्येति । भवदुत्तरं वाक्यं समासार्थः ।

उपनीत इति भूतप्रत्ययनिर्देशादान्वहिकेऽपि वृत्त्यर्थे भैक्ष्यचरणेऽयमेव विधिरिति दर्शयति । एष प्रोक्तो हि द्विजातीनामौपनायनिक इत्यत्रोपनयनप्रकरणमुपसंहरन्नुपनयनांगस्यापि भैक्ष्यस्यायमेव विधिरित्याह । अन्यथाकरणादुपनयनांगमेवैतत्स्याद्यदि वा

---

१ ड-क्ष-फ-भैक्ष्यशब्देन । २ फ-भक्तादेरत्रस्य । ३ फ-क्ष-नित्याश्च । ड-त्याज्याश्च । ४ फ-असाधुरूपश्रित्य । ५ फ-असाधुभ्यः साधूनुत्पन्नसंबंधात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न प्रत्ययसामर्थ्यात्प्रकरणं बाधित्वा वृत्त्यर्थ एव भैक्ष्य उपनीयमानस्य तदङ्गं यद्भैक्षं यच्चाहरहर्वृत्त्यर्थं तत्र सर्वत्रायं धर्मः ॥ ४९ ॥

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ॥
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥ ५० ॥

मात्रादयः शब्दाः प्रसिद्धार्थाः **निजा** सोदर्या **या चैनं** न विमानयेत् । विमानना अवज्ञानम् । न दीयत इति प्रत्याख्यानम् । तथा च **गृह्यम्** । 'अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वेति' । तदेव हि मुख्यं प्राथम्यं यदुपनीयमानस्य । अहरहस्तु न विमाननाभयमाश्रयणीयम् ॥ ५० ॥

समाहृत्य तु तद्भैक्षं यावदर्थममायया ॥
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥ ५१ ॥

समाहृत्येति शब्दो बहीभ्य आहरणं दर्शयति । नैकस्याः सकाशात् बह्व्यो ग्रहीतव्याः। **तदिति** यस्यानन्तरं शब्दसंनिधिर्वृत्त्यर्थस्य न प्राकरणिकस्योपनयनाङ्गस्य । तस्य हि **गृह्यकारैः** "अनुप्रवचनीयं श्रपयेदिति" विहितं न भोजनं तिष्ठेदहःशेषमिति च कृतप्रातराशस्य चोपनयनम् । अतो नोपनयनांगं भैक्षभोजनम् । **यावदर्थं** यावता भैक्ष्येण तृप्त्याख्यप्रयोजननिर्वृत्तिः न बहु भिक्षितव्यम् । **अमायया निवेद्य गुरवे** न कदन्नेन संस्कृतमन्नं प्रच्छाद्य कदन्नं गुरोः प्रकाशयेत् । तदन्नं किल एष न ग्रहीष्यतीत्यनया बुद्ध्या निवेदनम् 'इदं प्राप्तमिति' प्रकटीकरणम् । अगृहीते गुरुणा अनुज्ञातो **अश्नीयात्** । कथं पुनर्निवेदनमदृष्टसंस्कारार्थमेव न भवतीतिहासप्रामाण्यात् । तथा च भगवान्**व्यासः** । त्रितकूपाख्याने 'गुरुणा गृहीतमिति' दर्शितवान् । 'अनुज्ञातो भुञ्जीतेति' यत्कचिच्छ्रूयते । **आचम्य प्राङ्मुखः** आचमने प्राङ्मुखतेयमानन्तर्यादिति केचित्तदयुक्तम् । 'प्रागुदङ्मुख' इत्याचमने दिङ्नियमो भविष्यति तस्माद्भोजनेनैव संबन्धः । **शुचिः** । चाण्डालादिदर्शनमशुचि । देशाक्रमनिष्ठीवनादि कृताचमनस्य भोजनकालेऽनेन निषिध्यते ॥ ५१ ॥

आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः ॥
श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते ह्युदङ्मुखः ॥ ५२ ॥

निष्कामस्य प्राङ्मुखस्य भोजनं विहितं नित्यतया । इदानीं काम्या विधय उच्यन्ते । आयुषे हितं **आयुष्यं प्राङ्मुखो भुंक्ते** इति । यदि तद्भोजनादायुः प्राप्यते तत आयुष्यं तद्भवति तेनायमर्थः संपद्यते । आयुष्कामः प्राङ्मुखो भुङ्क्ते । अधिकारद्वयं

---

१ फ–यावदन्नम् । ड–फ–क्ष–नाश्नीयात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राच्यां नित्यं काम्यं च । आयुष्कामः फलमभिसंदधीत । इतरस्तु न तथेति । यथा नित्यमग्निहोत्रम् । स्वर्गकामस्य चासकृत्प्रयोगात्तन्त्रेण फलकामस्य नित्योऽप्यधिकारो निर्वर्तते[1] । एवं यशःकामो दक्षिणामुखः । इमे काम्या एव विधयः । श्रियमिच्छन् । श्रियन् क्यजन्ताच्छता कृतः । श्रियै हितं वा श्रियमिति मकारान्तः पाठः । आयुष्यादिवत् । प्राण्यङ्गत्वात्स्वार्थे भुजिर्वर्तते । तथा कृतं भुंक्ते[2] इति । श्रियं भोजनात्प्राप्नोतीति । तथा च द्वितीयान्तः पाठः श्रियमिति । तादर्थ्ये वा चतुर्थी 'श्रियै प्रत्यगिति' । ऋतं सत्यं यज्ञश्च तत्फलं वा स्वर्गः । स्वर्गकाम उदङ्मुखो भुञ्जीत । अन्तरेणापि विधिप्रत्ययमप्राप्तत्वाद्विध्यर्थावगतिः पञ्चमलकारादिकल्पनया । एवमेतद्दिग्विभागेन भोजनं फलविशेषार्थम् ।

विदिग्भोजनं त्वर्थप्राप्तं नित्येन प्राङ्मुखतानियमेनापोद्यते[3] । अयं च काम्यो विधिर्न ब्रह्मचारिण एव । भैक्ष्यभोजनविषयोऽपि तु गृहस्थादीनामपि भोजनमात्राश्रितः । तथा चाश्नीयादिति प्रकृते भुंक्त इत्याख्यातान्तरनिर्देशो लिङ्गम् । इतरथाऽश्नीयादिति यतो निःसंदिग्धा प्रकृतविषयता प्रतीयते तदेव निरदेक्ष्यत् । भुंक्त इति तु निर्देशे किं प्रकृत एवार्थः शब्दान्तरेण निर्दिष्ट उत शब्दार्थतया भोजनमात्रमिति संदेहे आख्यातावृत्तावर्थान्तरावगतिर्न प्रकृतप्रत्यभिज्ञानमेव ।

यत्तु विधिप्रत्ययाभावादर्थवाद एवायं पूर्वशेष इति चोक्तः परिहारः वचनानि त्वपूर्वत्वादिति । न च पूर्वैकवाक्यताहेतुर्विभज्यमानसाकांक्षत्वादिरस्ति । यद्यप्युत्तरेषां चैतद्वरोधीत्यनेनातिदेशेन ब्रह्मचारिधर्मोऽपि पुरुषमात्रविषयः स्यात्फलं तु न स्यात् । गुणकामनायां हि नातिदेशात्प्रवृत्तिमनुमन्यंते । 'गोदोहनेन पशुकामस्य प्रणयेत्' 'खादिरं वीर्यकामस्येति' । विकृतिषु नेष्यते कैश्चित् ॥ ५२ ॥

उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः ॥
भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ॥ ५३ ॥

आचमनोपस्पृशतिशब्दौ समानार्थौ शुद्ध्यर्थसंस्कारविशेषवचनौ शिष्टव्यवहारादवगम्येते । यद्युपस्पृशतिरर्थान्तरे पठितश्चमु[4]रप्यदनमात्रे तथापि विशेष एव सोपसर्गयोः प्रयोगदर्शनात्तदर्थतैव प्रतीयते । स्पृशेः सामान्यविषयत्वेऽपि प्रयोगो नियामकः । गडिर्वदनैकदेशे पठ्यते । स च कपोल एव गण्ड इति प्रयुज्यते । नैकदेशान्तरे । 'पुष्यसिद्ध्यौ' (व्या. सू. ३।१।११६) नक्षत्रमात्रे पठ्येते विशेषे च वर्तेते । धाय्याशब्दः सामिधेनीमात्रे पठ्यते । आवापिकीषु च वर्तते । अतोऽप एवाचम्येत्यर्थः । स एवोपस्पृ-

१ फ-निवर्तते । २ ड-शतंभुंक्ते-फ-यथार्थं भुंक्ते । ३ फ-उपपद्यते । ४ फ-चमि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्येति। स च परस्ताद्विधायिष्यते। सामानाधिकरण्यं चानयोर्दृश्यते नित्यकालमुपस्पृशेदित्यभिधाय त्रिराचामेदित्याह। अतः समानार्थ उक्तेऽप्याचम्येति भोजनार्थतयाऽऽचमने पुनर्वचनमानन्तर्यार्थमनन्तरमेव भुञ्जीत न व्यापारान्तरेण व्यवदधीत। तथा च भगवान्व्यासः। "पञ्चार्द्रो भुञ्जते नित्यं तेषु वत्स्याम्यहं हरे" ॥ श्रीः किलैवमाह। द्वौ हस्तौ द्वौ च पादावास्यं च एषा पंचार्द्रता या चोपस्पर्शनानन्तरं भुञ्जानस्य भवति न विलम्बमानस्य। इहापि वक्ष्यत्यार्द्रपादस्तु भुञ्जीतेति स्नातकव्रतेषु तस्यापौनरुक्त्यं च वक्ष्यामः। नित्यग्रहणं प्रकरणाद्ब्रह्मचारिधर्मभोजनता मा विज्ञायि भोजनमात्रधर्मो यथा स्यादुपदेशत एव। अत्र द्विजग्रहणं भोक्तृमात्रधर्मार्थं चाहुः नित्यग्रहणं चानुवादं न ते सम्यङ्मन्यन्ते। यदि द्विजशब्दः प्रकृते ब्रह्मचारिणि न समाविशेत्तदा स्यादपि। यदा तु तस्याप्येतदभिधानं तदा नान्तरेण नित्यग्रहणं प्रकरणबाधोपलभ्यते। समाहितः भुज्यमानं द्रव्यं स्वात्मशक्तिं चावेक्षमाणः। अन्यचेतस्कस्य हि गुरुविरुद्धवादादिवर्जनं सात्म्यभोजनं च न स्यात्। भुक्त्वा चोपस्पृशेत् स्नेहादिलेपापनयनं द्रव्यशुद्धावुक्तम्। कृते तस्मिन्भुक्तवत इदमाचमनं विधीयते।

अत्र केचिन्मन्यन्ते शुद्ध्यर्थमेकमाचमनं सुप्त्वा क्षुत्वा च भुक्त्वा चेति। अनेनादृष्टार्थं द्वितीयं कर्तव्यम्। एवं च पठ्यते "आचान्तः पुनराचामेदिति"। एतत्पञ्चमे स्थापयिष्यामः। सम्यगिति वैधतामाचमनपदार्थस्यानुवदति। 'यादृशो विधिरुक्तस्तं सर्वमनुतिष्ठेत्'। अद्भिः खानि च संस्पृशेत्। खानि छिद्राणि शीर्षण्यानि। ननु चैतदुक्तमेव खानि चैव स्पृशेदद्भिरिति। आत्मशिरसोर्व्यावृत्त्यर्थमिति केचित्। यदा शुचिः सन्नभोजनार्थतयैवाचामति। येषां च भोजनोत्तरकालमेकं शुद्ध्यर्थमाचमनमपरमदृष्टार्थं तत्रादृष्टार्थे आत्मशिरसी न स्पृश्येते शुद्ध्यर्थे तु तादृशमुत्पन्नं तस्य संपूर्णाङ्गस्य प्रयोगो वक्ष्यते (६१ श्लो.) "शौचेप्सुः सर्वदाऽऽचामेदिति"। यदि वा विधिप्रत्यभिज्ञानार्थं शास्त्रीयमेतदाचमनं न लौकिकमिति ज्ञाताङ्गविशेषसंबन्धस्य तदङ्गनिर्देशो तदेवेदमिति प्रत्यभिज्ञानसिद्धिः। अतश्च यत्राचामेदिति श्रुतं तत्र न यस्य कस्यचिद्द्रव्यस्य भक्षणमात्रं प्रतीयते किं तर्हि शास्त्रीयस्य संस्कारस्य सपरिकरस्येति यदुक्तं तद्दर्शितं भवति ॥ ५३ ॥

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्।
दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥ ५४ ॥

अश्यत इत्यशनं भक्तसक्तुपूपाद्युच्यते। तदशनार्थमानीतं देवतारूपेण पश्येत्। एषा वै परमा देवता यदन्नम्। तस्य सर्वेषां भूतानां स्रष्टृत्वेन स्थितिहेतुतया च यद्दर्शनं साऽस्य

१ क–स्वात्म। २ क–ज्ञानाग।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूजा । अथवा प्राणार्थत्वेन भावनं ध्यानं 'यजन्मम तदर्थत्वं संपूजयति मां सदेति'। नमस्कारादिना वा प्रणम्य ग्रहणं पूजा । अद्याच्चैतदकुत्सयन् । कदन्नतया दुःसंस्कारोपग्रहणेन वा कुत्साहेतुसंभवे नान्नं कुत्सयेत् । किमिदमश्यते । अरुचिकरं धातुवैषम्यजनकमित्येवमादिनाऽभिधानेन नाक्षिपेत । यदि तु तद्रूपं भवति तदा नाद्यान्न कुत्सयन्नद्यात् ।
दृष्ट्वैव हृष्येत् । पुत्रकृत्यादिसंदर्शनेन चिरप्रवासप्रत्यागत इव तुष्येत प्रीयेत । प्रसीदेच्च ९
निमित्तान्तरजमपि कालुष्यमन्नदर्शनेन हित्वा मनःप्रसादमाश्रयेत् । प्रतिनन्देच्च समृध्द्याशंसनं प्रतिनन्दनम् । 'नित्ययुक्ता एते न स्याम' इत्यादरोपदर्शनमभिनंदनम् । सर्वशः सर्वदा । 'अन्यतरस्यामिति'[1] व्यवस्थितविभाषाविज्ञानात्सप्तम्यर्थे शस् कर्तव्यः । सर्वदेति वा पठितव्यम् ॥ ५४ ॥

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति ॥ १०
अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम् ॥ ५५ ॥

पूर्वविधिशेषोऽयमर्थवादो न तु फलविधिः । फलविधौ हि काम्योऽयं विधिः स्यादूर्जकामस्य बलकामस्य च । ततश्च नित्यशब्दो नोपपद्येत पूजितं ह्यशनं नित्यमिति अतोऽयं यावज्जीविकः प्राङ्मुखता नियमः[2] । अपूजितं भुक्तं ह्युभयं नाशयेद्बलमूर्जं च । बलं सामर्थ्यमनायासेन भारोद्यमनादिशक्तता । कृशस्याप्यूर्जं महाप्राणता अङ्गोपचयः महा- ११
कायो महाबलश्च भवति ॥ ५५ ॥

नोच्छिष्टं कस्यचिद्दद्यान्नाद्यादेतत्तथान्तरा[3] ॥
न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत् ॥ ५६ ॥

पात्रीस्थमन्नमास्यस्पर्शदूषितमुच्छिष्टमुच्यते । तत्र कस्यचिद्दद्यादनेनैव सिद्धे स्नातकव्रतेषु यः शूद्रविषयः[4] प्रतिषेधः स तत्रैव निरूपयिष्यते चतुर्थ्यां प्राप्तायां षष्ठी २०
संबन्धमात्रनिषेधार्था येऽपि दत्तमिदमस्मभ्यमिति न विदुस्तेषामपि भोजनाय प्रकल्पं श्वबिडालादीनाम् । न ह्यत्र ददात्यर्थः परिपूर्णस्वत्वनिवृत्तिमात्रं दातुः, परस्य सत्वापत्तिर्नास्ति । अन्तराशब्दो मध्यवचनः । द्वौ भोजनकालौ सायं प्रातश्च ततोऽन्यस्मिन्काले न भुञ्जीत । अथवा व्यवधाने अन्तराशब्दः[5] । त्यक्तभोजनव्यापारः क्रियान्तरेण व्यवधाय पुनस्तदेव प्राक्पात्रगृहीतं न भुञ्जीत । स्मृत्यन्तरे तु विशेषः पठ्यते । उत्थानाचमनव्यपेतमिति । २१
केचित्तु विच्छेदमन्तरमाचक्षते । सव्येन पाणिना पात्रमन्वालभ्य दक्षिणेनावदाय प्राणायास्ये जुहोतीति श्रूयते । तत्र यः सव्येन पात्रस्यानुग्रहस्तदनन्तरं न चैवात्यशनमतिमात्रमशनं कुर्यात् । एतच्चानारोग्यकारणं गुरुविरुद्धादीनां प्रदर्शनार्थं हेतूपदेशान्मात्राशितायाश्चायुर्वेदा-

१ "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्" (व्या. सू. ५।४।४२.) २ अ-ब-क-ड-फ-क्ष-प्राङ्मुखतावन्नियमः । ३ फ—न.द्याच्चैव तथांतरा । ४ ड—तद्विषयः । ५फ—नान्तराशब्दः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दतिमात्रता बोद्धव्या । यावदशितमन्नमुदरपूरं न करोति सम्यग्जीर्यति तावदशितव्यम् । त्रयः कुक्षेर्भागा अध्यर्धमन्नस्य भागार्धं पानस्य भागो दोषसंचाराय । अन्यथा नारोग्यं । न चोच्छिष्टः क्वचिद्व्रजेदतश्चोच्छिष्टमपनीय शुचित्वमापादिते तस्मिन्नेव देश आचान्तव्यम् ॥ ५६ ॥

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ॥
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ ५७ ॥

दृष्टमूलतानत्यशनप्रतिषेधस्याचष्टे । **अनारोग्यं** व्याध्युत्पत्तिर्ज्वरोदरादिपीडा । विषूचिकादिना जीवितनाश **अनायुष्यं** सर्वत एवात्मानं गोपायेदिति शरीरपरिरक्षादिव्यतिक्रमादस्वर्ग्यं नरकप्राप्तिः स्वर्गाभावेन प्रतिपद्यते । **अपुण्यं** दौर्भाग्यकरं **लोकविद्विष्टं** बहुभोजितया निन्द्यते । तस्मात्कारणादत्यशनं **परिवर्जयेन्न** कुर्यात् ॥ ५७ ॥

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ॥
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ॥ ५८ ॥

तीर्थशब्देन पवित्रमुदकाधिकरणमुच्यते । तारणाय पापप्रमोचनाय च तिष्ठतीति तीर्थम् । केचित्तु तरन्त्यनेनेति तीर्थमुदकावतरणमार्गः । इह तूदकाधारकरतलैकदेश उच्यते । स्तुत्या वा तीर्थशब्दप्रयोगः । न हि तत्र नित्यस्था आपः तेनोपस्पृशेदाचामेत् । ब्राह्मेणेत्येतदपि स्तुत्यर्थमेव । ब्रह्मा देवताऽस्येति । न हि तीर्थस्य देवता भवत्ययागरूपत्वादमन्त्रत्वाच्च । यागरूपतां च केनचिद्धर्मेण शुद्धिहेतुत्वादिनाऽध्यारोप्य देवतातद्धितः । **नित्यकालं** शौचार्थे कर्माङ्गे च । कः प्रजापतिः स देवताऽस्येति कायम् । एवं त्रिदशा देवता अस्येति त्रैदशिकम् । त्रिदशशब्दाद्देवताऽणिकृते स्वार्थे कः देवतात्वं च पूर्ववत् । एभिस्तीर्थैरुपस्पृशेत् । विप्रग्रहणमविवक्षितम् । यतः क्षत्रियादीनां विशेषं वक्ष्यति । न चासत्यां सामान्यतः प्राप्तौ विशेषविधानमुपपद्यते । ' कण्ठगाभिस्तु भूमिप ' इत्यादि । न **पित्र्येण** पितृदैवत्येन कदाचिदपि स्फोटपिटकादिना ब्राह्मादितीर्थेष्वयोग्यतामायातेष्वपि ।

ननु चाविधानवदेव पित्र्यस्याप्राप्तिः । अस्त्यत्राशंका । पितृतीर्थज्ञापनार्थं तावत्पित्र्यं तयोरित्यवश्यं वक्तव्यम् । न च तस्येह कार्यं निर्दिश्यते कार्याकांक्षाय प्रकृतत्वात्तेन कार्येण संबन्ध आशंक्येत । अथ पुनः प्रतिषेधे सति पित्र्यमिति समाख्ययैव कार्यावगतिरुदकतर्पणादि पितृकर्म एतेन तीर्थेन कर्तव्यम् । एवं स्तुतिरन्वयिनी भवति । श्रुतिनोदितत्वाच्च ब्राह्मादीनां तदभावे प्राप्ताशंकानिवृत्त्यर्थं युक्तमस्याभिधानम् ॥ ५८ ॥

---

१ अ-क-ड-फ-क्ष- नारायणाय । २ अ-क-ड-क्ष-घ-च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अंगुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते ॥
कायमंगुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥ ५९ ॥

अंगुष्ठस्य मूलमधोभागः । तस्य तलप्रदेशो **ब्राह्मं तीर्थम्** । हस्ताभ्यन्तरं तलमाह । महारेखांतमभिमुखमात्मनो ब्राह्मं हस्तमध्ये । अङ्गुलीनां मूले दण्डरेखाया ऊर्ध्वं कायमग्रे अंगुलीनाम् । एवमुपसर्जनीभूतोऽपि मूले अंगुलिशब्दः सापेक्षत्वादग्रशब्दस्य संबध्यते । **पित्र्यं तयोरधः** । अत्रापि गुणीभूतस्याङ्गुलीशब्दस्याङ्गुष्ठस्य च संबन्धः । प्रदेशिनी चात्राङ्गुलिर्विवक्षिता । तयोरध अन्तरं पित्र्यं स्मृत्यन्तरशिष्टप्रसिद्धिसामर्थ्यादेवं व्याख्यायते । यथा श्रुतान्वयासंभवात् । तथा च **शंखः**—"अङ्गुष्ठस्याधरतः प्रागग्रायाश्च रेखाया ब्राह्मं तीर्थं, प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यं, कनिष्ठान्तरलयोः कायं पूर्वेणाग्रमङ्गुलीनां दैविकमिति" ॥ ५९ ॥

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ॥
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥ ६० ॥

अन्यतमेन तीर्थेन **त्रिरप** उदकमाचामेदास्येन जठरं प्रवेशयेत् । **तत** उदकभक्षणान्तरं **द्विर**भ्यासेन **मुख**मोष्ठद्वयं **परिमृज्यात्** । ओष्ठश्लिष्टानामुदकावयवानां सोदकेन हस्तेनापनयनं प्रमार्जनमत्र कुतः पुनर्हस्तेनेति समाचारात्तीर्थाधिकाराद्वा तीर्थे नैवाद्भिरिति चोत्तरत्र श्रुतमत्राप्यपकृष्यते । दृष्टार्थत्वाच्च प्रमार्जनस्य मुखशब्द एकदेशे यथोक्ते वर्तते । **खानि** छिद्राणि **चोपस्पृशेदद्भि**र्हस्तगृहीताभिः स्पर्शनमेवोपस्पर्शनं मुखस्य च प्रकृतत्वान्मुख्यानामेव खानामेष स्पर्शनविधिः । **गौतमश्चाह** " खानि चोपस्पृशेच्छीर्षण्यानि" । **आत्मानमिति** हृदयं नाभिं वा निर्दिशति । उपनिषत्सु हि "अन्तर्हृदयमात्मानं पश्येदिति " कथ्यते । अतो हृदयस्यायं स्पर्शः क्षेत्रज्ञस्यात्मनो विभोः । अमूर्तस्य न स्पर्शसंभवः । ' नाभिमालभेतेति ' क्वचित्स्मर्यते तेन नाभिं मन्यामहे । **शिरः** प्रसिद्धम् । स्मृतीनां चैकार्थ्यादामणिबन्धात्पाणी प्रक्षाल्येत्येवमादि लभ्यते । तथा अशब्दकरणं वाङ्नियमः पादाभ्युक्षणं महाभारते प्रक्षालनमपि पादयोर्दर्शितम् ॥ ६० ॥

अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित् ॥
शौचेप्सुः सर्वदाऽऽचामेदेकान्ते प्रागुदङ्मुखः ॥ ६१ ॥

उष्णशब्दः क्वाथोपलक्षणार्थः । तथा हि पठ्यत 'अशृताभिरद्भिरिति'[1] । एवं च ग्रीष्मोष्मतप्ताः स्वभावोष्णाश्च न प्रतिषिध्यन्ते । फेनग्रहणं बुद्बुदानामपि प्रदर्शनार्थम् । पठितं च ' हीनाभिः फेनबुद्बुदैरिति' । **तीर्थेन धर्मविदिति** वृत्तपूरणमेव । **शौच**माप्तुमिच्छुः

१ याज्ञवल्कीये आचारे २० श्लोके ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शौचेप्सुः। शुद्धिकाम इत्यर्थः। नान्यथा शुद्धो भवति। **सर्वदा** न प्रकरणाद्भोजन एव। किं तर्हि नेतरो विण्मूत्रादिशुद्धिष्वप्यपां भक्षणे कर्मत्वात्तृतीयानिर्देशो न भक्ष्यमाणानामेवायं धर्मोऽपि तु कारणभूतानामपि पादाभ्युक्षणादौ। वयं तु ब्रूमो भक्षणेऽपि। करणमेवापो न हि तासामाचमनं संस्कारः। **एकान्ते** शुचौ देश एकान्तो हि जनैरनाकीर्णः प्रायेण शुचिर्भवति। **प्रागुदङ्मुखः**। मुखशब्दः प्रत्येकमभिसंबध्यते। "प्राङ्मुख उदङ्मुखो वा"। एवं हि **गौतमेन** पठितम्। विग्रहश्चैवं कर्तव्यः प्रागुदङ्मुखमस्येति। नायं द्वंद्वगर्भो बहुव्रीहिरपि तु बहुव्रीहिरेव। द्वंद्वगर्भतायां समाहारे समासान्तेनाकारेण भवितव्यमितरेतरयोगोऽपि नैव। न हि युगपदुभयदिङ्मुखता संभवति तत्र कश्चिदाचमनभागः प्राङ्मुखेन कर्तव्यः कश्चिदुदङ्मुखेनेत्यापतति। न चैकदेश आचमनं न च दिगर्थ उपादेयो येन परस्परापेक्षे संबध्येयातां नापि दक्षिणपूर्वादिवत्प्रागुदक्शब्दोऽपराजिताया दिशो वाचकत्वेन प्रसिद्धो येन दिक्समासबहुव्रीहिर्ज्ञायते। तस्मान्नायं वृत्त्यन्तरगर्भो बहुव्रीहिः अतो विकल्पः। उदाहृतं च **स्मृत्यन्तरे** "प्राङ्मुख उदङ्मुखो वा शौचमारभेतेति"। यथा "बृहद्रथन्तरसाम षडहे" इति केषुचिदहरहःसु बृहत् केषुचिद्रथन्तरं न त्वेकस्मिन्नहनि समस्तोभयसामत्वम्॥ ६१॥

उक्तमाचमनं तीर्थेनापां भक्षणं परिमाणं तु नोक्तमतस्तदवधारणार्थमाह—

हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः॥ ६२॥

हृदयं गच्छन्ति प्राप्नुवंति हृद्गाः 'अन्येष्वपि दृश्यत' (व्या. सू. ३।२।१०१) इति गमेर्डः। 'हृदयस्य हृदिति' (व्या. सू. ६।३।५०) योगविभागाद्धृदादेशः। **पूयते** पवित्रतां प्राप्नोत्यशुचित्वं व्यावर्तते। स्पर्शो ईषदूनचुलुकमात्रप्रमाणः। **कण्ठगाभिस्ताभिः**। कण्ठमात्रव्यापिनीभिः **भूमिपः** क्षत्रियः भूमेराधिपत्यं क्षत्रियस्य विहितं तेन प्रसिद्धेन कर्मणा क्षत्रियजातिर्लक्ष्यते। आधिपत्यविवक्षायां राजधर्मेष्वेवावक्ष्यत्। **वैश्यः प्राशिता**भिरन्तरास्यप्रवेशिताभिः कण्ठमप्राप्ता अपि शुद्धिहेतवो वैश्यस्य। **शूद्रः स्पृष्टाभिरन्तत** अन्तेनेति। आद्यादित्वात्तृतीयार्थे तसिः (व्या. वार्तिके)। अन्तशब्दोऽयं समीपवचनोऽस्त्युदकान्तं गत उदकसमीपमिति गम्यते। अस्त्यवयववचनो वस्त्रान्तो वसनान्त इत्युभयत्रापि वर्तमानः संबन्ध्यन्तरमपेक्ष्यते। अस्य समीपं कस्य वाऽवयव इति। तत्रेह येन स्थानेन वर्णान्तराणामाचमनं विहितं तीर्थेर्जिह्वोष्ठे न च तदन्तेनेति प्रतीयते। समीपवचनस्तु न संभाव्यः विधीयमानस्याचमनस्य तत्साध्यत्वासंभवात् स्पर्शेपि प्राशन-

१ फ-एकान्ते। २ फ—अंते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मस्ति । जिह्वौष्ठे न हि स्पृश्यमानस्य रसास्वादनमवश्यंभावि । तत्र वैश्यपरिमाणात्किञ्चिन्न्यूनताऽत्र विवक्षिता । जिह्वामूलं यावद्वैश्यस्य जिह्वाग्रं शूद्रस्य । द्रवत्वादुदकस्यापरिहार्योऽव्यतिक्रम अवश्यप्राप्तौ स्वशुद्धिः । सर्वश्चायं तीर्थविभागो दक्षिणहस्तस्योपस्पर्शने हस्तस्यौचित्याद्दक्षिणाचारतायाश्च पुरुषधर्मतया विहितत्वात् । एवमर्थमेव चास्मिन्नवधाविदमुच्यते ॥ ६२ ॥

उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ॥
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ॥ ६३ ॥

ननु च लोकतः सिद्धाः पदार्था धर्मशास्त्रेऽप्याश्रीयन्ते न पदार्थसंविज्ञानार्थानि मन्वादिवाक्यानि व्याकरणाभिधानकाण्डस्मृतिवत् । उत्तमस्माभियों नातिप्रसिद्धोऽर्थस्तं चेल्लक्षयन्ति किमुपालम्भमर्हन्ति अस्ति चात्र किंचित्प्रयोजनमन्यदपि । आचमनक्रममुच्यमानमुत्तरसंव्यानादिकमाचमनाङ्गं यथा विज्ञायते। यद्यप्युपवीतधारणं व्रतार्थतया पुरुषार्थतया वा सर्वदा प्राप्तं तथापि तेन विनाऽऽचमनं परिपूर्णमेव (न) स्यात् । असत्यस्मिन्वचने व्रते वैगुण्यं पुरुषदोषश्च स्यात् । अथ पुनरन्तरेणोपवीतमाचमनं कृतमप्यकृतसमं दोषश्च स्यादप्यशुचिना कृतमपां भक्षणमिति । कथं पुनः केवलस्योपवीतस्यैवाचमनाङ्गता यावताऽन्यदप्यत्र निर्दिष्टं प्राचीनावीति च । उच्यते । प्राचीनावीतं स्वशब्देनैव पित्र्ये कर्मणि विहितं तत्रार्थवत्तायामुपयातायां नाकृतार्थेनोपवीतेन विकल्पितुमर्हति । निवीतमप्याभिचारेऽर्थवत् । यद्यप्यत्र निवीतस्य विनियोगो नास्ति तथापि स्मृतीनां चैकार्थ्यादन्यत्र यो विनियोगस्तेनेहाप्यर्थवत्ता भवत्येव । पाणिग्रहणं बाहूपलक्षणार्थमुद्धृतबाहुर्यतो लोक उपवीतीत्युच्यते । सार्वकालिकं चोपवीतं वक्ष्यामः । न च केवलपाणावुद्धृत उपवीती सव्ये उद्धृते प्राचीनावीती समासपदान्नामधेयम् । असमासस्तु वृत्तानुरोधितया । कण्ठसज्जने कण्ठे सज्जनं सङ्गस्थापनं यदा वस्त्रस्य सूत्रस्य वाऽन्यतरोऽपि बाहुरुद्ध्रियते तदा निवीती भवति ॥ ६३ ॥

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ॥
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥ ६४ ॥

विनष्टानामप्सु प्रासनमन्येषां च ग्रहणमत्र विधीयते । प्रासनग्रहणयोः पौर्वापर्यं यथाश्रुतमेवास्माच्च पुनरुपादानान्नैषामुपनयनाङ्गतैव । तदङ्गत्वे हि तत्प्रयोगापवर्गितैव स्यात् । किं तर्हि ? यावद्ब्रह्मचर्यं धारणम् । अथ किमुपनयनकाल एव प्राक्कर्मनिष्पत्तेः दैवान्मानुषाद्वा प्रतिबलाद्विनष्टानां प्रतिपत्तिर्न संभवति प्रयोगसमाप्त्यर्थं च पुनरुपादानं यथा

१ क–धारणं च ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कपालस्य; येनैवमुच्यत अस्मात्पुनरुपादानाद्धारणमनुमीयते। उच्यते। ग्रहणं तावद्दण्डस्य चोदितं मेखलाया बन्धनं तत्र[1] सूत्रकस्य विन्यासस्तावदुपनयनाङ्गत्वेनावश्यं कर्तव्यम्। कृते तस्मिन्कृतः शास्त्रार्थः। उत्तरकालं किं तैर्नष्टैरनष्टैर्वा। अङ्गनाशे च प्रतिपत्तिविशेषः कर्मोपकारको भवति। न च तेषां किंच न कार्यमाम्नातं येन तत्सिद्ध्यर्थं विशिष्टे काले वाचनिकमुपादानमकृतत्वाच्च कार्यस्य तत्प्रयुक्तं पुनरुपादानमर्थसिद्धमुच्यते। तस्मात्प्रतिपत्तिविधानादुपादानवचनाच्च धारणमङ्गं न च प्रयोगापवर्गे। यतः कमण्डलुनोपनयनोत्तरकालानुवर्तिना तुल्यवन्निर्देशात्तेषामप्युत्तरत्रानुवृत्तिः प्रतीयते। सा च व्रताङ्गम्। अत उभयार्था मेखलादयः प्रकरणादुपनयनार्थाः। निवृत्ते चोपनयने दर्शनाद्यावद्ब्रह्मचर्यभाविनः। कमण्डलुना चोदकार्थः कर्तव्योऽस्मादेव प्रतिपत्तिविधानात्। अन्यथा यदा कमण्डलुस्तदेयं प्रतिपत्तिरिति पाक्षिकत्वं स्यात्तत्र दण्डधारणं प्रतिगृह्य दण्डं भिक्षां चरेदिति कमाद्भैक्ष्यचर्याङ्गत्वमेव प्राप्तं समाचाराद्भैक्षेऽर्थेऽपि भ्रमणे[2] भवत्येव। न तु सर्वदैव करतलधृतदण्डस्य स्थानासनशयनभोजनादीनि। तथा च स्वाध्याये ब्रह्मांजलिं वक्ष्यति। मंत्रवदित्युपनयनविधिना ग्रहणमनुवदति। तत्र च मेखलाया मन्त्रो न दण्डस्य ॥ ६४॥

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ॥
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥ ६५ ॥

केशान्तो नाम संस्कारः स गर्भषोडशे वर्षे ब्राह्मणस्य कर्तव्यः। तस्य च स्वरूपपरिज्ञाने गृह्यमेव शरणम्। द्वे वर्षेऽधिके यस्य द्वाविंशस्य[3] तस्मिन्द्व्यधिके द्वाविंशे। अथवा कालमात्रमन्यपदार्थः। ततो द्वाविंशाद्वर्षाद्द्व्यधिके काले। वैश्यस्येति द्विशब्दस्य च वर्षाण्येव संख्येयानि प्रकृतानि हि तानि ॥ ६५ ॥

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ॥
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥ ६६ ॥

इयमावृदशेषतः[4] स्त्रीणाममंत्रिका कार्या। जातकर्मण आरभ्येयं संस्काराणामावृत्परिपाठी[5]। सेतिकर्तव्यताकः संस्कारकलाप इति यावत्। संस्कारार्थं शुद्ध्यर्थं शरीरस्य। पौंस्नमेव स्त्रीणामपि प्रयोजनमाह। यथाकालं यस्मिन्काले यः संस्कार उक्तस्तं कालमनतिक्रम्य। पदार्थानतिवृत्तौ 'यथासादृश्ये' अव्ययीभावः। एवं क्रमेऽपि द्रष्टव्यम्। मन्त्रमात्ररहिताया आवृतो विहितत्वाद्यथाकालक्रमप्राप्तिरेव नास्तीत्यतो निषेधो नित्यानुवादो वृत्तपूरणार्थः। एतावद्विवक्षितं स्त्रीणां चैते अमन्त्रका इति ॥ ६६ ॥

---

१ क–तत्र सूत्रस्य। २ क–भ्रमणं। ३ क–द्वाविंशास्तस्य। ४ क–विशेषतः।
५ क–ख–ड–क–क्ष–परिपाटी।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वेणावृद्वचनेन जातकर्मादिवदुपनयनेऽप्यमन्त्रके प्राप्ते तदापत्तिवचनं विवाहस्य तन्निवृत्त्यर्थमारभ्यते ।

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ॥
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥ ६७ ॥

वेदग्रहणार्थो **वैदिकः संस्कार** उपनयनाख्यो यः स **स्त्रीणां वैवाहिको विधिः**। विवाहे भवो विवाहविषयो विवाहसाध्यः । अतो विवाहस्योपनयनस्थाने विहितत्वात्तस्य निवृत्तिर्यदि विवाहस्तत्कार्यकरः । हन्त प्राप्तं वेदाध्ययनं प्राप्ता च व्रतचर्या । उपनयनं नाम मा भूद्बदुभयमपि निवर्तयति । **पतिसेवा गुरौ वासः** । पतिं यत्सेवत उपचरत्याराधयति स एवास्या गुरौ वसतिः । गुरौ वसत्याऽध्ययनं कर्तव्यं न चास्या गुरौ वासोऽस्त्यतः कुतोऽध्ययनम् । **गृहार्थो** गृहकृत्यानि रन्धनपारिणाह्यप्रत्यवेक्षणादीनि यानि नवमे वक्ष्यन्ते । (श्लो. ११) "अर्थस्य संग्रहे चैनाम्"इत्यादि । सायंप्रातर्ब्रह्मचारिणो यत्समिदाधानं तदेवास्या गृहकृत्यम् । अग्निक्रियया च यावान्यमनियमसमूहो ब्रह्मचारिणः स सर्व उपलक्ष्यते ।

एवं चैतदुक्तं विवाहस्योपनयनापत्त्यं यथैव मनुष्यायोपनयनात्प्रभृति श्रौताः स्मार्ता आचारप्राप्ताश्च विधयो भवन्ति प्राक्तनं कामचारवादभक्षत्वमेवं स्त्रीणां प्राग्विवाहात्कामचारः । परस्मात् श्रौतस्मार्तेष्वधिकारः । एवं वा पदयोजना । विवाह एव स्त्रीणां वैदिकः संस्कार उपनयनम् । अनुपनयनेऽपि विवाहे भवत्योपनयनत्वमुच्यते । किं तदुपनयनेन विवाहस्य साम्यं येनास्य तद्व्यपदेश अत आह । **पतिसेवेत्यादि** ॥ ६७ ॥

प्रकरणोपसंहारः—

एष प्रोक्तो द्विजातीनामौपनायनिको विधिः ॥
उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधत ॥ ६८ ॥

एतावदुपनयनप्रकरणम् । अत्र यदुक्तं तत्सर्वमुपनयनार्थम् । ननु केशान्तोऽप्येवं प्राप्नोति । नानिर्वृत्ते उपनयने स्वकाले तस्य विधानात् प्रकरणेऽपि पठितस्य वाक्यादन्यार्थता भवति । तथा च केशान्तः समावृत्तस्यापि कैश्चिदिष्यते । उपनयने भव **औपनायनिकः** । उत्तरपदस्य दीर्घत्वम् । पूर्ववद् उत्पत्तिस्तन्मातापित्रोः सकाशाज्जन्म तां व्यनक्ति प्रकाशयति सगुणतां करोतीत्युत्पत्तिव्यञ्जकः । जातोऽप्यजातसमोऽनुपनीतोऽधिकाराभावात् । अतोऽयं विधिरुत्पत्तिव्यञ्जकः **पुण्य** इत्युक्तार्थम् । उपनीतस्य येन कर्मणा योगः संबन्धोऽधिकारो यत्तेनोपनीतेन कर्तव्यं तदिदानीं वक्ष्यमाणं **निबोधत** ॥ ६८ ॥

---

* अग्निहोत्रस्य शुश्रूषा सायमुद्वासमेव च ॥ कार्यं पत्न्या प्रतिदिनं इति कर्म च वैदिकम् ॥ १ ॥

१ क–क्ष–वसता । २ क्ष–ढ–सर्वोऽप्युपलक्ष्यते ।

For Private And Personal Use Only

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ॥
आचारमग्निकार्यं च सन्ध्योपासनमेव च ॥ ६९ ॥

शिक्षयेद्व्युत्पादयेच्छौचमादितः । आदित इति वचनेनाचारादिभ्यः प्रागुपदेशः शौचस्येष्यते । किंतर्ह्यनियतक्रमकः परस्परमेते । केवलमुपनयनानन्तरं व्रतादेशनं वक्ष्यति । आदिष्टवेदव्रतस्य च वेदाध्ययनम् । अतोऽग्नीन्धनसंध्योपासनयोः समन्त्रकत्वादकृते व्रतादेशे मन्त्रोच्चारणमप्राप्तं विधीयते । शौचं चानियतकालं तदवशिष्टं तदहरेवोपदेष्टव्यमेवमाचारोऽपि । अत इदमादित इति वचनमादरार्थं न प्रथमोपदेश्यतां शौचस्य विधत्ते । **शौचम्** 'एकालिङ्ग' (अ. ५ श्लो. १३६) इत्याद्याचमनान्तम् । आचारो गुर्वादीनां प्रत्युत्थानासनदानाभिवादनादिभिः । **अग्निकार्यम**ग्न्याधानकार्यं समित्समिन्धनं संध्यायामादित्यस्योपासनं तत्स्वरूपभावनं संध्याया उपासनम् । एवं वा 'पूर्वां संध्यामित्यादि' (अग्रे १०१ श्लो.) । एष व्रतधर्मः ॥ ६९ ॥

अध्ययनधर्मानिदानीमाह

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ॥
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥ ७० ॥

प्रत्यासन्ने भविष्यति लृडयं द्रष्टव्यः । अध्ययने प्रवर्तमान अध्ययनमारभमाण अध्येतुमिच्छन्निति यावत् । **उदङ्मुखोऽध्याप्यः** । **गौतमीये** तु "प्राङ्मुखो वा शिष्यः प्रत्यङ्मुख आचार्य" इति (अ.१सू.५५) । **आचान्तो** यथाशास्त्रमिति । प्रागुक्तमाचमनविधिं स्मारयति । ब्रह्माञ्जलिः कृतो येनेति । आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य परनिपातः । ब्रह्माञ्जलिकृदिति वा पाठः । **लघुवासा** धौतवासाः प्रक्षालनेन लघुनी वाससी भवतः । अतो लघुत्वेन वाससः शुद्धिर्लक्ष्यते । अथवाऽयं रोमादिस्थूलवसनः चित्तव्याक्षेपे ताड्यमानो न प्रहारं वेदयेत्ततश्च न युक्तः पठेत् । अपनीयमाने तु वाससि गुरोः खेदः स्यात् । निरावरणे च काये रज्ज्वादिना ताड्यमानो महतीं बालो वेदनामनुभवेदतो दृष्टार्थं लघुवासस्त्वम् । जितानि नियमितानीन्द्रियाण्युभयान्यपि येन स **जितेन्द्रियः** । न इतस्ततो वीक्षेत, यत्किंचिन्न शृणुयादध्ययनेऽवहितो भवेदित्युक्तं भवति ॥ ७० ॥

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ॥
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥ ७१ ॥

ब्रह्मशब्दोऽयमनेकार्थोऽप्यध्ययनाधिकारादत्र वेदवचनः प्रतीयते, तस्यारम्भे । निमित्तसप्तम्येषा । अध्ययनाधिकारादेव च तद्विषयाऽध्ययनक्रिया तस्यायमारम्भः प्रथमा-

१ फ–तदवश्यम् । २ ङ–वाससी ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृत्तिः पुरुषस्य तत्रेदं पादग्रहणं वेदस्य तु यान्याद्यक्षराणि 'अग्निमीळे' 'इषेत्वा' 'अग्न आयाहि' इति न सोऽत्रारम्भ उच्यते । न हि तस्य निमित्तभावः संभावितः नित्यत्वात् । कादाचित्कं हि निमित्तं भवति तेनैतदुक्तं भवति । वेदाध्ययनमारिप्समानो गुरोः पादसंग्रहणं कुर्यात्कृत्वा ततः स्वाध्यायाक्षराण्युच्चारयेन्न पुनः प्रवृत्ताध्ययनक्रियः पादौ गृह्णीयात् ।

ननु चाद्यक्रियाक्षण आरम्भः, स च निमित्तं विद्यमानस्य च निमित्तत्त्वं युक्तं जीवनस्येव । अत्र गेहदाहाद्यतीतमपि निमित्तं तत्र तथैव श्रवणम् । तस्मात्सहप्रयोग एवाध्ययनपादोपसंग्रहणयोर्युक्तः । उच्यते । अध्यापनाध्यवसाय आरम्भ उच्यते । नाद्यः क्रियाक्षणः यदैव गुरुरधीष्वेत्याह तदैवाध्यवस्यति माणवकः । अतस्तदनन्तरं पादोपग्रह उपकारप्रवृत्तस्य गुरोश्चित्तप्रसादनमेतत् । यथा लोके कश्चिदुपकारप्रवृत्तं सभाजयति वाचा 'ननु त्वया वयमस्मात्पापान्मोचिता' इति । अनक्षरा चेयमध्येषणा 'उपसन्नाः स्माध्ययनायेति' । न हि गुरुरुपरोध्योऽध्यापयेति केवलमुपसदनमस्य कर्तव्यं संबोधार्थमवसरोऽध्ययनस्येति । अतः कृतोपसदनस्य वेदाक्षरोच्चारणम् । अपि च संहत्य हस्तावध्येतव्यमित्युच्यते । तत्राधीयानः पादोपसंग्रहणविधिमतिक्रमेत । अवसानं समाप्तिरध्ययनादुपरमः । यद्यपि ब्रह्मशब्द आरम्भे गुणभूतस्तथाप्यवसानस्य सापेक्षत्वात्सन्निहितत्वाद्ब्रह्मपदेनैव संबन्धः प्रतीयते अन्यस्याश्रुतत्वात् । सदाग्रहणमन्वहं भाविप्रयोगारम्भावसानयोरेष विधिर्यथा स्यादितरथा य एव व्रतादेशानन्तरो मुख्यप्रारम्भः तत्रैव स्यात् ।

अथान्वारम्भणीया दर्शपूर्णमासारम्भे चोदिताय एवाधानानन्तरभावी दर्शपूर्णमासप्रयोगारम्भः तत्रैव भवति । न मासिकप्रयोगारम्भे । न मासिकप्रयोगारम्भे प्रातः प्रातरारम्य यावदाह्निकं न निवृत्तं प्रपाठकद्वयमात्रपरिमाणं तावदेकैव साऽध्ययनक्रियेति । अंतरा कथंचिद्विच्छेदेऽपि पुनः प्रवृत्तौ नारम्भशब्दवाच्यताऽस्तीति न पुनः पादोपसदनं क्रियते । स्मृत्यन्तरे च पठ्यते "[1] पादोपग्रहणं गुरोः प्रातरन्वहमिति" । संहत्य संलग्नौ संश्लिष्टौ परस्परं कृत्वाऽध्येयम् । कच्छपकर्ण इति यः संनिवेशो हस्तयोः प्रसिद्धस्तथा कर्तव्यः स हि ब्रह्माञ्जलिः । पदार्थकथनमेतत् ॥ ७१ ॥

व्यत्यस्तपाणिना कार्यमुपसङ्ग्रहणं गुरोः ॥
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च[2] दक्षिणः ॥ ७२ ॥

यदुपसंग्रहणं पूर्वश्लोके गुरोरुक्तं तद्व्यत्यस्तपाणिना कार्यम् । कीदृशः पुनः पाण्योर्व्यत्यासः कर्तव्य इत्यत आह । सव्येन हस्तेन सव्यः पादः स्प्रष्टव्यः स्पर्शः कर्तव्यो न तु चिरं निपीड्यासितव्यम् । एष च व्यत्यासो युगपदितरेतरदिक्संचारेण हस्तयोर्भवति ।

---

१ गौतमीये अ. २ सू. ५३ । २ ड--तु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्रतः स्थितेन संमुखेन **गुरोरुपसंग्रहणं** कर्तव्यम् । तत्र वामो दक्षिणमार्गे नीयते,दक्षिणो[1] वाममित्येवं सव्येन सव्यः स्पृष्टो भवति, **दक्षिणेन च दक्षिण** इत्येष पाणिव्यत्यासः ।

अन्ये तु विन्यस्तपाणिनेति पठन्ति । स्पर्शादेव च विन्यासे सिद्धे नाग्नितप्तायःपिण्डस्पर्शनवद्दाहभयादङ्गुल्यग्रमात्रेण स्पर्शनं न कर्तव्यमपि तु हस्तौ विन्यसितव्यौ निधातव्यौ पीडनं तु पीडाकरं निषिद्धमिति वर्णयन्ति ॥ ७२ ॥

अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः ॥
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥ ७३ ॥

अध्येष्यमाणमित्यादीनि प्राग्व्याख्यातानि पदानि गुरोरयं नियोगः । गुरोर्यदा माणवकोऽध्यापयितुमभिलषितस्तदा**अधीष्व भो** इत्यामन्त्रयितव्यः । अनामन्त्रितेन न गुरुः खेदयितव्य 'उपदिशानुवाकमिति' । उक्तं च । "आहूतश्चाप्यधीयीतेति" । **विरामोऽस्त्वित्येतं शब्दं समुच्चार्यारमेत्** निवर्तेत । कः गुरुरेव । प्रथमान्तनिर्देशात् । अथवा गुरुणोत्सृष्टो निवर्तेत । न स्वेच्छया । एवं च तदाख्यायते । यदा गुरुर्विरामोऽस्त्विति ब्रूयात्तदा विरमेद्ब्रह्मचारी ।

अन्ये त्वध्येतृमात्रस्य शिष्याणामुपाध्यायस्य च उपरमणकाले धर्ममिममिच्छन्ति । तथा च **स्मृत्यन्तरम्** । "स्वाध्यायमधीत्य विरमणकाले प्रदेशिन्या पृथिवीमालभ्य स्वस्तीति ब्रूयाद्विसृष्टमिति सामसु विरामः परमास्त्वृक्षु आरमस्त्वथर्वसु" ।
अतन्द्रित अनलसः । तन्द्राऽऽलस्यं तद्योगात्पुरुषस्तान्द्रित इत्युच्यते । त्यक्त्वाऽऽलस्यमतन्द्रितः । अनुवादश्चायम् । नात्र तन्द्राश्रमः । न त्वियमाशङ्का कर्तव्या । य अतन्द्रितस्तस्यायं [3]विधिः । आलस्यवतस्त्वन्यः ॥ ७३ ॥

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ॥
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति ॥ ७४ ॥

अत्रापि पूर्वोक्तेन न्यायेन **ब्रह्मण आदावन्ते च प्रणवं कुर्यात्** । ब्रह्मविषयाया अध्ययनक्रियाया इति द्रष्टव्यम । प्रणवशब्द [4]ॐकारवचनः । स्तथा च वक्ष्यति । **स्रवत्यनोङ्कृतमिति** । सर्वदा ग्रहणमध्ययनविधिमात्रधर्मो यथा स्यादितरथा प्रकरणाद्ग्रहणार्थ एव ब्रह्मचारिणः स्यात् । अस्मिंस्तु सति योऽप्यविस्मरणार्थो यच्च "अहरहः स्वाध्यायमधीयीत" इति गृहस्थादीनां तत्र सर्वत्र सिद्धं भवति । संध्याजपादौ तु स्वशब्देन विधास्यति । 'एतदक्षरमेनां चेति' । न चायं वेदधर्मो येन यत्र कुत्रचिद्वैदिकवाक्योच्चारणमारभेत । तत्र प्राप्नुयादतो होममन्त्रजपशास्त्रानुवचनयाज्यादीनामारम्भे नास्ति प्रणवोऽन्यत्राप्युदाहरणार्थे वैदिकवाक्यव्याहारे । तस्मात्स्थितं प्राकरणिकस्वाध्यायाध्ययनविधिधर्मार्थं **सर्वदाग्रहणम्** ।

१ फ-दक्षिणे । २ याज्ञवल्क्ये आचारे ३७ श्लोकः । ३ फ-विधाः । ४ फ-ॐकारविषयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रणवप्रयोगस्यान्वाहिकारम्भार्थता तु नित्यकालग्रहणानुवृत्त्यैव सिद्धा । अस्यार्थवादः **स्रवत्यनोंकृतम्। पूर्वं** प्रारम्भे अनोंकृतं ब्रह्म स्रवति। ॐमितिकृतं ॐ शब्देन संस्कृतम्। साधनं कृतेति समासः । अथवा ॐ कृतमित्युच्चारितो यस्मिन्ब्रह्मणि तदोंकृतं सुखादित्वात्परनिपातः । **परस्ताच्च** समासौ । चकारेणानोंकृतमिति संबध्यते। **स्रवति विशीर्यति** इत्युभाभ्यामपि नैष्फल्यमध्ययनस्य प्रतिपाद्यते । अधीतं ब्रह्म यस्मिन्कर्मणि विनियुज्येत तन्निष्फलं भवतीति निन्दार्थवादश्च पाकार्थं निषिक्तस्याप्राप्तपाकक्षीरादेरवच्छिद्रिते भाजने य इतस्ततो विक्षेपः प्रक्षरणं तत्स्रवतीत्युच्यते तच्च पाकस्य पिण्डीभूतस्य भोग्यतां प्राप्तस्य यो विनाशः स विशरणम् ॥ ७४ ॥

प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ॐकारमर्हति ॥ ७५ ॥

कूलशब्दो दर्भाग्रवचनः । तान्पर्युपासीनः तेषु प्रागग्रेषु दर्भेषूविष्ट इत्यर्थः। 'अधिशीङ्स्थासामिति' (व्या. सू. १।४।४६) स्था आ आसामित्याङा प्रश्लेषात्कर्मत्वम् । परि उप आ आसीन इति इहाप्याङाश्लिष्टनिर्दिष्टो द्रष्टव्यः। पर्युपशब्दावनर्थकौ । **पवित्रै**-र्दर्भैरेवमादितः शुचित्वमापादितः । अघमर्षणादिषु मन्त्रो नेह पवित्रशब्देनोच्यते । ब्रह्मचारिणस्तदानीमनधीतत्वात्तेषां न च दर्भाः स्वसत्तामात्रेण काञ्चित्क्रियामकुर्वतः पावने करणं भवन्तीति । अवान्तरव्यापारापेक्षया स्मृत्यन्तरे प्राणोपस्पर्शनं प्रतीयते। आह च **गौतमः**। (अ. १ सू. ४९।५०) " प्राणोपस्पर्शनं दर्भैः ।प्राक्कूलेष्वासनं च"। **प्राणायामैस्त्रिभिः पूतः** मुखनासिकासंचारी वायुः प्राणस्तस्यायामो निरोधः, शरीरे धारणं बहिर्निष्क्रमणनिषेधः, तस्य स्मृत्यन्तरे धारणकालस्य मानं समाम्नातम् । मन्त्रानुस्मरणं च । "प्रतिप्रणवसंयुक्तां गायत्रीं शिरसा सह । त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते" । **वसिष्ठेन** भगवता महाव्याहृतयोऽप्युक्ताः । मन्त्रावसान एव निरोधावधिरन्यस्यानाम्नातत्वात्सर्वस्मृतीनां चासति विरोध एकार्थत्वादिहाप्येवमेवानुष्ठानम् ।

नन्वेवमितरेतराश्रयः स्यादकृतेषु प्राणायामेषु ओङ्कारो न कर्तव्यो न चोङ्कारेण विना प्राणायामो निवर्तते । नैष दोषः । त्रिर्जपेदिति प्राणायामेषु मानसव्यापारेणोङ्कारस्य स्मरणमुच्यते । न हि निरुद्धप्राणस्य शब्दोच्चारणं संभवति। यद्यपि जपः कश्चिद्वाग्व्यापारसाध्यो भवति । स्वाध्यायाध्ययने तु पुनरुच्चारणं विवक्षितम् । अध्ययनक्रियाया एवंरूपत्वाच्छब्दक्रियायां धातुः । श्रोत्रग्राह्यश्च शब्दो न केवलेन मनसा गृह्यते । न चायमोङ्कारधर्मो येनान्यत्रापि तस्मिन्नुच्चार्यमाणेऽपि प्रसज्येत । उक्तं च "स्वाध्यायारम्भे कर्तव्य" इत्योङ्कारधर्मत्वे हि लौकिकेषु वाक्येष्वोमिति ब्रूम इत्यादिषु प्रसज्येत । **गौतमेन**

१ या. व. आचारे २३ श्लो.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तु पठितम् (अ. १ सू. ९०)। "प्राणायामास्त्रयः पञ्चदश मात्रा" इति। मात्राशब्देन चाविकृतस्य स्वरस्याकारादेर्यावान्कालः स उच्यते तत्र विरोधात्स्मृत्यन्तरोक्तः कालो नास्ति । न च मन्त्रस्मरणं तत्रानोंकारा अपि प्राणायामाः सन्तीति नेतरेतराश्रयदोषापत्तिः । तत ॐकारमर्हति कर्तुमिति शेषः । यदाऽयं समुदाय एव रूढिरूपेण प्रणववचनः । यदा तु करणं कारः । ॐमित्येतस्य कार उच्चारणमोङ्कारस्तदा नास्ति पदान्तरापेक्षा । प्रणवशब्देन कर्तव्यतामुक्त्वाऽत्रोंकारमित्यनुवदत्यत एतावेकार्थौ । तथा च दर्शितम् ॥ ७५ ॥

अकारं चाप्युकारं च मकारं च प्रजापतिः ॥
वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च ॥ ७६ ॥

पूर्वस्य विधेरर्थवादः । अक्षरत्रयसमाहाररूप ॐकारस्तत्रैकैकस्य व्युत्पत्तिमाह । **वेदत्रया**त्त्रिभ्यो वेदेभ्यः **निरदुहदु**द्धृतवान्यथा दध्नो घृतमुद्ध्रियते । न केवलमक्षरत्रयं-यावदिदम् । अपरं **भूर्भुवःस्वरिति** ॥ ७६ ॥

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ॥
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥ ७७ ॥

अयं "तत्सवितुर्वरेण्यम्" इत्येतस्याः गायत्र्या उत्पत्त्यर्थवादो विधानार्थः। पूर्वश्लोके चार्थवादादेव व्याहृतीनामपि विधानम् । क्रमस्तु पाठावगम्यः वक्ष्यति च । " एतदक्षरमेतां च जपन्व्याहृतिपूर्विकाम् " इति । **अदूदुहदु**द्धृतवानिति । यद्यपि **तदि**त्येतत्प्रतीकेन तत्सवितुर्वृणीमह इति वा शक्यते लक्षयितुं न तु सा त्रिपदेति । त्रिपदैव ग्राह्या त्रिपदा चैव सावित्रीति कश्यपादयोऽपि प्रजापतयः सन्त्यतो विशिनष्टि । **परमेष्ठीति** । हिरण्यगर्भः स हि परमे स्थानेऽनावृत्तिलक्षणे स्थित आदरातिशयार्थं चैतत्सावित्र्याः साक्षात्किलेयं सर्वमुख्येन प्रजापतिना **वेदेभ्यः** समुद्धृतेति ॥ ७७ ॥

एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम् ॥
संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥ ७८ ॥

सत्यपि स्वाध्यायविधिप्रकरणैकवाक्यात्संध्याजपविधिरयं तत्र गायत्र्या अनुवादः प्रणवव्याहृतीनामप्राप्तविधिः ।

अत्र कश्चिदाह । नायं संध्याविधिरप्रकरणात् । विधिर्हि भवन्ब्रह्मचारिणः स्यात्तस्य प्रकृतत्वात् । न च तस्य संभवतीह हि वेदविदित्युच्यते । न च तस्य प्रथमोपनीतस्य वेदवित्त्वमस्त्यपि च फलमत्र श्रूयते । **वेदपुण्येन युज्यते** । नित्यस्य-संध्योपासनविधिः न फलार्थः । न चैतद्विद्मः किमिदं वेदपुण्यं नाम फलं येन योगोऽयं जप उच्यते । यदि तावद्वेदाध्ययनत्वाद्यत्पुण्यमभिप्रेतं तदवाप्तिर्वेदपुण्येन योगोऽभिप्रेतस्तत्र यः

१ ड–निरवृहत् । २ अग्रे ७८ श्लो.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तावदयं प्रकृतः स्वाध्यायविधिस्तस्य नार्थावबोधादृते किंचित्फलमस्त्यश्रुतत्वादृष्टत्वाच्चार्थावबोधस्य कल्पनाऽपि नास्ति । यश्च गृहस्थादीनां विधिः "अहरहः स्वाध्यायमधीयीत" इति सोऽपि नित्य एव । यत्तत्र फलश्रवणं 'पयोदधि घृतं मधु' इतिसोऽर्थवाद एव तस्मान्नायं विधिः। विधौ हि सर्वमेतद्विवक्षितव्यम् । यदा त्वयमर्थवादस्तदा जपन्निति प्रकृतमध्ययनमुच्यते वेदपुण्येनेत्येतदपि यथाकथंचिन्नीयते । अत्रोच्यते । वाक्येन प्रकरणं बाध्यत इत्युक्तमेव यत एव वेदवित्पदं संध्यापदं च न प्रकृतविषयतयाऽभ्येति तत एवान्यत्रायं विधिः । संध्ययोरेतत्त्रयं जपेदित्येतावान्विधिः । वेदवित्पदमनुवदिष्यते । गृहस्थादीनां वेदवित्त्वस्य संभवात् ब्रह्मचारिणो वेदवित्त्वं न संभवतीति चेत्किं तदीयेन संभवेन । यथा प्राप्तानुवादे हि सर्वाश्रमिणामधिकारः कर्तृविशेषणे हि वेदवित्पदे ब्रह्मचारिणो नाधिकारः स्यात्कथं पुनरस्यानुवादः वाक्यभेदप्रसङ्गात् । विधौ संध्याविधौ प्राप्ते प्रणवव्याहृतयस्तावदप्राप्तास्तत्र विधातव्या । तत्र यद्यपरं वेदविदि विधीयते तदा वाक्यभेदः स्यात् प्राप्ते हि कर्मणि नानेकार्थविधानं संभवति । प्रणवव्याहृतीनां तु नानुवादः संभवति । तेनायमत्र वाक्यार्थः । संध्ययोर्यत्सावित्रीं जपेदित्युक्तं तत्रायमपरो गुणः प्रणवव्याहृतिपूर्विकां तां जपेत् । विप्रग्रहणं च तदा प्रदर्शनार्थमेव । यदप्युक्तं फलमत्र श्रूयते नित्यश्चायं विधिः संध्यायाः को नामायं विरोधः। नित्य एव तस्मिन्गुणे कामो भविष्यति । प्रणवव्याहृतिगुणकात्तस्मादिदं फलमिति । यथा गोदोहनप्रणयनकादग्निहोत्रात्पशवः फलम् । " गोदोहनेन पशुकामस्य प्रणयेत्" इति वाक्यसामर्थ्येन । अध्येतुश्चैतदुक्तं न त्वयं काम्यो विधिः स्मृत्यन्तरे हि नित्य एवायं विधिः स्पष्ट एवोक्तो "गायत्रीं शिरसा सार्धं जपेद् व्याहृतिपूर्विकाम्" इति। फलानामवगमे भवतैवोक्तः ।

अयं ह्यर्थो **वेदपुण्येनेति** । वेदे यत्सन्ध्योपासनात्पुण्यमुक्तं तेन त्रिकमेतज्जपन्युज्यते । न केवलं गायत्रीम् । पुण्यं च धर्मः वेदमूलत्वात्स्मृतीनां स्मृत्युक्तमपि वेदपुण्यतया व्यपदिश्यते । वेदस्य पुण्यं वेदपुण्यं किं च वेदस्य पुण्यं यत्तेन प्रतिपाद्यते पठ्यमानाद्वेदाद्यज्ञायते तदपि शक्यते तस्येति वक्तुम्, किंत्वसाधारणत्वात्प्रतिपाद्यमेव युक्तं व्यपदेष्टुं नोत्पाद्यं यागादयो धर्ममुत्पादयन्ति । प्रतिपादकस्तु वेद एव येऽप्यन्त्यस्य पादस्य सामर्थ्यमाहुः । यदुक्तं 'नित्यस्वाध्याय' इति तत्र संध्यायां त्रिकजपादेव कृतार्था भवन्तीति तदप्यसत् । एवं सति तेन विधिना विकल्पेत । तत्र च पाक्षिको नित्यस्वाध्यायतया बाधः स्यात् । न चाबाधे संभवति बाधोऽभ्युपगंतव्यः । एतदक्षरमित्योंकारस्य प्रतिनिर्देशः ।

ननु च नैतदेकमक्षरं द्वे वा त्रीणि वा । उच्यते । अक्षरशब्देन केवलं स्वर उच्यते। व्यञ्जनसंयोगश्च । तत्रेह यादृशः प्रकृतः तादृशस्याभिधानम् । एतां च "तत्सवितु-

---

१ क—च चाश्रमिणां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरेण्यमिति " सावित्रीं व्याहृतयः पूर्वा यस्यास्तां **व्याहृतिपूर्विका** तिस्रः प्रकृता एव ता व्याहृतयो गृह्यन्ते प्रकृतपरत्वादस्य न [1]सप्तसत्यान्ताः ॥ ७८ ॥

सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः ॥
महतोऽप्येनसो मासात्त्वचेवाऽहिर्विमुच्यते ॥ ७९ ॥

बहिरित्यनावृतो देश उच्यते तेनैतदुक्तं भवति । ग्रामनगराभ्यां बहिररण्ये नदीपुलिनादौ । सहस्रवारानभ्यस्याऽऽवर्त्य न तु कृत्वसुचोऽप्यावृत्तिः प्रतिपाद्यते । अभ्यस्येत्यनेनापि तत्र पौनरुक्त्यम् । सामान्यविशेषभावाददोषः । **अभ्यस्येत्यनेन** सामान्यतोऽभ्यास उक्तस्तत्र विशेषापेक्षायां **सहस्रकृत्वेति** । न च कृत्वसुजन्तादेवोभयाऽवगतिस्तस्य क्रियाविशेषापेक्षत्वात् । न हि देवदत्तः पञ्चकृत्वोऽह्न इत्युक्ते यावद्भुङ्क्ते इति [3]नोच्यते तावद्वाक्यार्थः समाप्यते । ननु चाभ्यस्येत्यनेनापि न काचिद्विशिष्टा क्रियोपात्ता । सत्यम् । जपः प्रकृतस्तमभ्यस्येति प्रतीयते । आवृत्तिः पौनःपुन्येन सेवा । **महतोऽप्येनसः** । महत्पापं च ब्रह्महत्यादि । ततोऽपि मुच्यते किं पुनरुपपातकेभ्यः । **अपिः** संभावने, न समुच्चये । भेदोपादानेन समुच्चयावगमो यथा देवदत्तस्यात्र प्रभुत्वं यज्ञदत्तस्यापि । इह न तथा निर्देशः । केभ्यः पुनरुपपातकेभ्योऽयं मोक्ष उच्यते । गोवधादीन्युपपातकानि । तानि च प्रतिपाद्यमाम्नातप्रायश्चित्तानि सरहस्यानि यानि वा संवेत्ति न कृतान्यनुक्तपरिहाराण्यवश्यंभावितया च ज्ञायते । कृतानीति । तेषामपि नित्यानि संध्योपासनादीन्यपनोदकानि । यदि चैतत्प्रायश्चित्तं स्यात्तदा तत्रैवावक्ष्यत् । " जपेद्वै नियताहारः त्रिर्वै वेदस्य संहितामिति " च । प्रायश्चित्ते चास्मिन्प्रायश्चित्तप्रकरणमेवानर्थकं स्यात् । को हि दैववशप्राप्तो जपमात्रसाध्यां निष्कृतिं हित्वा कृच्छ्रेषु शरीरप्राणहरेष्वध्यवस्येत् । उक्तं च । " अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत् " ॥ तथा " पणलभ्यं हि न प्राज्ञः क्रीणाति दशभिः पणैः " इति । न च प्रकृतेनैकवाक्यताबीजं किंचिद्विभज्यमानसापेक्षत्वाद्यस्ति येन तच्छेषतयाऽर्थवाद उच्यते । अत्रोच्यते । विधिरेवायम् । पापप्रमोचनार्थ एवायं प्रयोगः । यत्तूक्तं "विषमशिष्टैर्विकल्पो न सिध्यतीति " जपप्रायश्चित्त एवास्मिन्विकल्पार्थो भविष्यति । अघमर्षणादिभिः सर्वपापापनोदनमुक्तं तेनास्य विकल्पः । अघमर्षणे हि त्र्यहमुपवास उक्तः । इहाश्नन्नेव मासिकेन प्रयोगेण शुध्यति । ततो न दूरविप्रकृष्टे न तपसा समीयते येन विषमशिष्टता स्यात् । अथवा पूर्वकृतस्यैनसः शुद्धिरेषा ग्रहादौ स्थित्यादिसूचिते दैवे दोषे तस्मान्मोक्षः । अनिष्टेन उच्यते । तस्मान्मुच्यते । तत्फलेन न संबध्यत इत्यर्थः । **त्वचेवाहिर्जीर्णया** त्वचा मुक्तः सर्पो यथा

---

१ फ–सत्यानन्ताः । २ "[2]संख्यायाः क्रियाभ्या०" (व्या. सू. ५।४।१७) । ३ फ–तेनोच्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवति । निरवशेषेण पापनाश एतेन प्रतिपाद्यते । यत्तु दौश्चर्यादिसूचितं पूर्वकृतमशुभं तत्र स्मृत्यन्तरे प्रायश्चित्तमाम्नातं बहु । तत्प्रायश्चित्तेष्वेव निदर्शयिष्यामः । एतदेवाभिप्रेत्योक्तम् । "जपतां जुह्वतां चैव विनिपातो न दृश्यते" इति ॥ ७९ ॥

एतयर्चा विसंयुक्तः काले च क्रियया स्वया ।
ब्रह्मक्षत्रियविड्योनिर्गर्हणां याति साधुषु ॥ ८० ॥

एतया सावित्र्या **विसंयुक्तो** हीनसंध्योपासनस्त्यक्तस्वाध्यायश्च **गर्हणां** निन्दां **साधुषु** विशिष्टेषु **याति** प्राप्नोति । कीदृशीं गर्हणां प्राप्नोत्यत आह । **काले च क्रियया स्वया** काल"आषोडशादि"त्यस्मिन्वियुक्ते गते निन्द्यते । एवमुपनीतोऽपि स्वाध्यायारम्भयोग्यः सावित्रीवर्जितो व्रात्य एव भवति । त्रयाणां या साधारणी स्वक्रिया सेह निर्दिष्टा सा चोपनयनमेव । कालशब्दश्चैवमर्थवान् । अध्ययनादिस्वकर्मविवक्षायामेतावदेव वाच्यं स्यात् यत् **क्रियया स्वयेति** । योनिशब्दो जन्मपर्यायो जात्यर्थं गमयति । विप्रादिजातीय इत्यर्थः । अर्थवादोऽयं व्रात्यप्रायश्चित्तार्थः ॥ ८० ॥

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ॥
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥ ८१ ॥

ॐकारः पूर्वो यासां ता **ओङ्कारपूर्विकाः । महाव्याहृतयः** प्रकृता एव भूर्भुवः स्वरित्येते शब्दा अभिधीयन्ते । **अव्यया** अविनाशिन्यः फलस्य दीर्घकालत्वादेवमुच्यते । अन्यथा "सर्वे एव शब्दा नित्या" इति विशेषणमनर्थकम् । **त्रिपदा** तत्सवितुरित्येषा **सावित्री ब्रह्मणो मुखम्** । आद्यत्वान्मुखव्यपदेशः अतश्चारम्भे अध्येयमेतदित्यस्यैवार्थवादः । अथवा **मुखं** द्वारमुपायो ब्रह्मप्राप्तिरनेन भवतीत्येतदेवाह ॥ ८१ ॥

योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः ॥
स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ॥ ८२ ॥

आकाश इव सर्वव्यापी विभुः संपद्यते **खमूर्तिः** खस्वभाववान् भवति । न तु मूर्तिः शरीरमाकाशस्य शरीराभावात् । अथ किमिदं ब्रह्म, यद्रूपापत्तिरुच्यते । परमात्माऽऽनन्दरूपः यस्येमे क्षेत्रज्ञाः पवनजवोद्धतस्य वारिराशेरिवोर्मयः । ते यथा प्रशान्तावस्थे तस्मिंस्तद्रूपा भवन्ति । एवममी तद्रूपा आत्मानः संपद्यन्ते । विशेषतश्च सर्वमेतद्वादशे वक्ष्यते । अध्ययनमिदं गायत्र्याश्चोदितं न जपो न चावृत्तिगणनाऽस्ति । **अतन्द्रित** इतिवचनाद्बहुकृत्वः करणं प्रतीयते । सकृत्प्रयोगे हि नास्ति तन्द्राशङ्का । मोक्षार्थिनोऽयं विधिः ॥ ८२ ॥

---

१ अ. २ श्लो. ३८ । २ फ–भवति तदेवाह । ३ फ–ननु ।

१५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ॥
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥ ८३ ॥

ओङ्कार **एकाक्षरं** तत्परं **ब्रह्म**। ब्रह्मप्राप्तिहेतुत्वात् । "तज्जपस्तदर्थभावनया" (योग सू. १।२८) ब्रह्मप्राप्तेरेवमुच्यते । ओमिति ब्रह्माभिधानम् । एवं ह्याहुस्तस्य वाचकः प्रणव इति । तत्परं प्रकृष्टं कुतोऽन्याभ्यः ब्रह्मोपासनाभ्यो "अन्नं ब्रह्मेत्युपासीत, आदित्यो ब्रह्मेत्यादेश" इति एवमाद्याभ्य उपासनाभ्यः ओङ्कारोपासना प्रकृष्यते । अध्ययनादेव तत्प्राप्त्यभिधानात् । शब्दस्यैव च ब्रह्मत्वेन श्रवणात् । "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति" । सर्वो ह्यर्थो वाग्व्यवहारानतीतो वाचश्च सर्वस्या ओङ्कारो मूलम् । तथा च श्रुतिः । "तद्यथा शंकुना सर्वाणि पत्राणि संतृण्णान्येवमोङ्कारेण सर्वा वाक् संतृण्णा ओङ्कार एवेदं सर्वमिति" । अन्तर्द्धानमनुस्मृतिः आश्रयभावापत्तिर्वा । कथं पुनः सर्वा वागोङ्कारेण संतृण्णा । वैदिक्यास्तावदोङ्कारपूर्वकत्वमुक्तम् । लौकिक्या अपि, 'तदादीनि वाक्यानि स्युरि'त्यापस्तम्बवचनात् । उपनिषद्भाष्ये चैतदन्यथा व्याख्यातम् । तत्त्विहानुपयोगान्न प्रदर्शितम् । प्राणायामशब्द आचमनवद्विशिष्टेतिकर्तव्यताके प्राणनिरोधे वर्तते । परं तपश्चांद्रायणादिभ्यः। किं पुनस्तस्य श्रैष्ठ्यम् । भक्तिरेषा । **सावित्र्याः परं** मन्त्रज्ञानं **नास्ति** एषामिति प्रशंसा । **मौनात्सत्यं विशिष्यते** । मौनं वाङ्नियम उच्यते । तस्य च नियमे उच्यते यत्फलं ततोऽधिकं सत्यवचनात्प्राप्यते सत्यवचने विध्यर्थोऽपि तथाऽनुष्ठितो भवति । मौने तु केवलमनृतप्रतिषेधानुष्ठानमेव । अर्थवादोऽयं श्लोकः ॥ ८३ ॥

क्षरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः ॥
अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः ॥ ८४ ॥

यावन्तः केचन वैदिका होमा अग्निहोत्रादयो ये च यागा ज्योतिष्टोमादयः ते सर्वे **क्षरंति** न परिपूर्णा भवन्ति । फलं वा तदीयं स्रवत्याशु विनश्यति । **अक्षरं** त्वेतदोङ्काराख्यमक्षरं **ज्ञेय**मक्षयफलम् । ब्रह्मीभूतस्य न पुनः संसारापत्तिः । अतोऽक्षयफलत्वादक्षरमुच्यते । एकोऽक्षरशब्द उद्देश्यः संज्ञाशब्दो द्वितीयो यौगिकः क्रियाशब्दः । ब्रह्म च तदेव । **प्रजापतिश्चो**ङ्कार एव । स्तुतिरेषा । "जुहोतियजतीति" धातुनिर्देशस्तयोः क्रियाप्रतिपाद्यार्था यागहोमाः । व्यक्त्यपेक्षं बहुत्वम् । अथवा धात्वर्थनिर्देश एवायं जुहोति यजतीति क्रियास्तद्व्यतिरिक्ता दानाद्याः । द्वंद्वश्चायम् । जुहोतियजतीति च क्रियाश्च होमयागौ प्राधान्यात्पृथगुपादीयेते ।

---

१ मांड्क्ये । २ ड-क्ष-तस्य च यत्फलम् । ३ फ-दुष्करं । ४ फ-परिपूर्णफला । ५ फ-ब्रह्मैव तदैव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ युक्ता ॐकारस्य स्तुतिः केवलस्यापि जपविधानार्थेति केचित् । न हि प्रकृतविधिशेषतैवात्र पुनः परामर्शाभावात् । वैश्वानरे ह्यष्टत्वादीनां "यदष्टाकपालो भवति, गायत्र्या चैनं ब्रह्मवर्चसेन पुनाति, यन्नव कपालस्त्रिवृतैवाऽस्मिंस्तेजो दधाति" इति(अष्टक १ अन्त्यपादः)। सर्वत्र वैश्वानरपदापेक्षया तदेकवाक्यत्वे संभवति । न वाक्यभेदकल्पनया विध्यन्तरसंभवः । इह त्वक्षरं ज्ञेयमिति । न पूर्वापेक्षा नापि सावित्र्यादीनां पुनः परामर्शोऽस्ति । अतः स्वपदार्थैरेव वाक्यार्थपरिसमाप्तेर्नान्यशेषता । ज्ञेयमित्यत्र कृत्यो विधायकः । ब्रह्मपदेन च संबन्धाद्ब्रह्मरूपतया ज्ञेयमुपास्यं भावनीयम् । भाव्यमाने च तस्मिन्मानसजप उक्तो भवति ॥ ८४ ॥

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ॥
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥ ८५ ॥

विधिविषयो यज्ञो **विधियज्ञो** ज्योतिष्टोमादिर्यत्कर्म यजेतेति चोदितं ब्राह्मेण व्यापारेण ऋत्विगादिसर्वाङ्गसंपत्त्या क्रियते स विधियज्ञ इहोच्यते । जपस्तु न यज्ञः । प्रशंसया यज्ञ उपचारेणोच्यते । अतो नासौ विधियज्ञः । स **विशिष्टः** प्रकृष्टः श्रेष्ठो यज्ञो ज्योतिष्टोमादेर्**दशभिर्गुणैः** । महाफलत्वमेतेन जपस्योच्यते । यदेव यागात्फलं तदेव बहुतरजपात्प्राप्यते । न च यागेभ्यः श्रौतेभ्यो जपस्याधिकफलत्वं युक्तम् । तथाहि सति कः शरीरधनपरिक्षयरूपेषु यागेष्वध्यवस्येत् । तस्मात्प्रशंसैषा । पूर्णाहुत्या सर्वान्कामानवाप्नोतीतिवत् । एतावदस्यार्थस्तदेव स्वर्गादिफलमवाप्यते । किंतु लोकवत्प्रयत्नविशेषात् । फलपरिमाणविशेषोऽविशेषित्वात् । यज्ञस्य स्वर्गग्रामपुत्रपश्वादि यस्य यज्ञस्य यत्फलं तत्तज्जपात्प्राप्यते । **उपांशुः शतगुणः** यदन्यो न शृणोति समीपस्थोऽपि । सहस्रगुणः **साहस्रो मानसः** व्यापारमात्रेण यश्चिन्त्यते जपमात्रविषय उपांशुत्वादिगुणः, प्रकृतस्य योऽधीतेत्यनेन विच्छेदात्तेन यः प्रायश्चित्तादौ जपो यः शान्तिको यश्चाभ्युदयिकः सर्वत्रैते गुणाः । सहस्रमस्यास्तीति **साहस्रः** । गुणानां प्रकृतत्वात्सहस्रगुणसद्भावः प्रतीयते । गुणशब्दश्चावयववचनः । फलभूमा च संबन्धादवगम्यते ॥ ८५ ॥

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः ॥
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ ८६ ॥

महायज्ञाः **पाकयज्ञा** उच्यन्ते, ब्रह्मयज्ञं वर्जयित्वा **चत्वारो** यज्ञा भवन्ति । विधियज्ञा उक्तास्तैः **समन्विताः** सहिताः **कलामंशं षोडशीं नार्हन्ति** । षोडशेन भागेन न समा भवन्ति । अथवाऽर्हतिः प्राप्त्यङ्गे मूल्यपणने वर्तते । अर्हशब्दात्क्विपं कृत्वा अर्हन्ति रूपम् ॥ ८६ ॥

---

१ फढक्ष–ब्राह्मेन । २ ङ–क्ष–अर्थशब्दात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः ॥
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ ८७ ॥

जप्येनैव सिद्धिं काम्यफलावाप्तिं ब्रह्मप्राप्तिं वा प्राप्नुयात् । नात्र हृदि शंका कर्तव्या । यज्ज्योतिष्टोमादिभ्यो महाप्रयासेभ्यो भावनाभ्यश्च यल्लब्धव्यं तज्जपेन कथं सिध्यतीति सिध्यत्येव । **कुर्यादन्यान्नि**त्यं ज्योतिष्टोमादि । अथवा तदपि **न कुर्याद्य**तो **मैत्रो ब्राह्मण उच्यते** । मित्रमेव मैत्रं सर्वभूतमैत्रीरतेन ब्राह्मणेन भवितव्यम् । अग्निषोमीय पशुहिंसायां च कुतो मैत्री । अयमर्थवाद एव । न पुनः पश्वङ्गकर्मप्रतिषेधः पूर्वशेषत्वा वगतेः प्रत्यक्षश्रुतिविहितत्वाच्च तेषाम् । अतिक्रान्तो जपविधिः ॥ ८७ ॥

इन्द्रियाणां विचरतां विषयेष्वपहारिषु ॥
संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम् ॥ ८८ ॥

इन्द्रियाणां संयमे यत्नमातिष्ठेदित्येतावाञ्छास्त्रार्थः । परिशिष्टोऽर्थवादः आसंध्योपासनविधेः । संयमः प्रतिषिद्धेषु **विषयेषु** अप्रवृत्तिः[1] परिहारोऽप्रतिषिद्धेष्वप्यतिसक्ति[2]वर्जनम् । तत्र प्रतिषिद्धपरिहारस्तैरेव प्रतिषेधैः सिद्धः । अप्रतिसिद्धेष्वप्यतिसक्तिनिषेधार्थोऽयं श्लोकसंघातः । एतदेवाह । **विचरतां विषयेषु** स्वातन्त्र्येण वस्तुशक्त्या प्रवर्तमानानाम् । **अपहारिषु** विषयेष्वपहरन्त्याकर्षन्त्यात्मसात्कुर्वन्ति पारतन्त्र्यमापादयन्ति । पुरुषापहा[3]रिणो विषया मनोहरा य उच्यन्ते तत्र विचरतां विविधं विशेषेण चरताम् । यदीन्द्रियाणि विशेषेण न चरेयुरपरिहारिणोऽपि तदा विषयाः किं कुर्युः । भवन्तु वा निरंकुशानीन्द्रियाणि । यदि विषयाः प्रत्याख्यायिकास्तथाऽपि सुसंयमः पुरुषेणात्मा । यतस्तूभयं सापराधमतो यत्न आस्थेयो दुर्नियमानि ह्येतानि । नियन्तेव **वाजिनां यन्ता** सारथिरश्वानां यथा रथयुक्तानां स्वभावतो विचलनशीलानां **संयमे** नियमे **यत्नं** करोति न तदाऽनिच्छया उन्मार्गेण वहन्ति, विधेयतां तस्य भजन्त एवमिन्द्रियाणि विधेयीकर्तव्यानि ॥ ८८ ॥

एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः ॥
तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ॥ ८९ ॥

संख्यानिर्देशोऽयं प्रमाणान्तरगम्यो न पदार्थः सौहार्देन तु व्युत्पाद्यते । तानि **पूर्वे मनीषिण** आहुः । परस्तान्नामतः कर्मतश्च वक्ष्यामि । आनुपूर्व्यमनाकुलता । पूर्वग्रहणान्नेयं तार्किकैरेव व्यवस्था कल्पिता । किंतु पूर्वेषामप्याचार्याणां स्थितैव । एतामजानतो नागमिक इति । लोकैरपि हस्यते । इत्यतो ये वेदितव्याः प्रसिद्धाः पदार्था व्याख्याताश्च प्राक् ॥ ८९ ॥

---

१ फ–प्रवृत्तिपरिहारो । २ ङ–क्ष–फ–अतिसक्तिवर्जन । ३ ङ–क्ष–फ–पुरुषानपहारिणो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ॥
पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ॥ ९० ॥

श्रोत्रादीनि प्रसिद्धानि। अधिष्ठानभेदाच्चक्षुषी इति द्विवचनम्। अन्यत्र तदाधारायाः शक्तेरेकत्वादेकवचनम्। उपस्थः शुक्रोत्सर्जनः पुंसो जवस्तदाधारश्च स्त्रियाः। द्वन्द्वनिर्दिष्टयोः 'प्राण्यङ्गत्वादेकवद्भावः' (व्या. सू. २।४।२)। **वाक्**ताल्वादिशब्दाभिव्यञ्जकः शरीरावयववचनः। नामनिर्देशोऽयम् ॥ ९० ॥

बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः ॥
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥ ९१ ॥

कार्यमिदानीमेषामाह स्वरूपाऽवधारणार्थम्। न हि तानि प्रत्यक्षाणि बुद्धेरिन्द्रियाणि[1] जनकानि कार्यकरणानि। कार्यकरणसंबंधे षष्ठी। **श्रोत्रादीन्यनुपूर्वशः**। आदिशब्दस्य प्रकारार्थता मा विज्ञायीति। **अनुपूर्वशः** क्रमेणेत्यर्थः। क्रमश्च सन्निवेशापेक्षो भवत्यतः पूर्वश्लोकोक्ता व्यवस्थाऽऽश्रीयते। **कर्मेन्द्रियाणि** परिस्पन्दात्मकमत्र कर्म विवक्षितम्॥९१॥

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम् ॥
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ ॥ ९२ ॥

एकादशसंख्यापूरकं **मन** इन्द्रियाणाम् स्वो गुणो मनसः संकल्पः। तेनोभयं शुभमशुभं वा संकल्प्यते। अथवा बुद्धीन्द्रियेषु कर्मेन्द्रियेषु स्वविषयप्रवृत्तौ संकल्पमूलत्वादुभयात्मकमुच्यते। **यस्मिञ्जिते एतौ** बुद्धीन्द्रियवर्गः कर्मेन्द्रियवर्गश्च **पञ्चकौ** प्राक्प्रदर्शितपरिमाणौ **जितौ** भवतः ॥ ९२ ॥

इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ॥
सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति ॥ ९३ ॥

प्रसङ्गस्तत्परता। तेन हेतुभूतेन दृष्टमदृष्टं च **ऋच्छति** प्राप्नोति। नात्र **संशयो** निश्चितमेतत्। **संनियम्य तानी**न्द्रियाणि **ततः सिद्धि**मभिप्रेतार्थावाप्तिं श्रौतस्मार्तकर्मणामनुष्ठानफलं निःशेषं गच्छति प्राप्नोति ॥ ९३ ॥

न जातु कामः कामानामुपभोगेन शाम्यति ॥
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ९४ ॥

तिष्ठतु तावद्विषयाभिलाषः शास्त्रोपदेशान्न क्रियते। किंतु दृष्टमेव सुखं तावन्निवृत्तेर्भवति। तथाहि सेव्यमाना विषया अपि अधिकं गर्द्धमुत्पादयन्त्युदरपूरं भुक्तवत-

१ क-बुद्धीन्द्रियाणि।

For Private And Personal Use Only

स्तृप्तस्यातिसौहित्यमपि गतवतो भवति त्वदयसमीहा किमिति न शक्नोमि अन्यद्वोक्तुम् अशक्त्या तु न प्रवर्तते । ततो नैषा भोगेन शक्या निवृत्तिर्न कदाचित्**कामो**ऽभिलाषः । **कामानां** काम्यमानानां स्पृहणीयानामर्थानामु**पभोगेन** सेवया **शाम्यति** निवर्तते । भूयोऽधिकतरं वर्धते । **हविषा** घृतेन **कृष्णवर्त्मा**ऽग्निरिव । दुःखरूपश्चाभिलाषः । अनुपभुक्तरसस्य त्वभिलाषानुत्पत्तिः । तत्त्वप्रसंख्यानमेतत् । उक्तञ्च " यत्पृथिव्यां व्रीहियवहिरण्यं पशवस्त्रियः । नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् " ॥ ९४ ॥

यश्चैतान्प्राप्नुयात्सर्वान् यश्चैतान्केवलांस्त्यजेत् ॥
प्रापणात्सर्वकामानां परित्यागो विशिष्यते ॥ ९५ ॥

पूर्वोक्तं हेतुत्वेनोपजीव्यायं निगमश्लोकः पठितो यदा सेवया वर्धते कामः अतो **य एतान्**कामान्कामी **सर्वान्प्राप्नुयात्**सेवेतानेकमण्डलेश्वर इव तरुणः यश्चैनांस्त्यजति **केवलानी**षदपि न स्पृशति नैष्ठिक एव बालः । तयोर्यः प्रापको भोक्ता तस्मात्स **विशिष्यते** । अतिशयेन श्रेष्ठो भवति । यः परित्यजेदिति । एतच्चात्मप्रत्यक्षम् ॥ ९५ ॥

न तथैतानि शक्यन्ते संनियंतुमसेवया ॥
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥ ९६ ॥

यद्येवमरण्यवास एव तर्हि प्राप्ते न हि तत्र विषया संनिधीयन्ते । असंनिहिताश्च न सेविष्यन्ते । तदर्थमाह । न सेवया इंद्रियाणि नियन्तव्यानीति । अथोच्यते । निःसुखः स्यादिति हि स्मरन्ति । असंनिहिताश्च न सेविष्यन्ते । तदर्थमाह । **नासेवया** इन्द्रियाणि नियन्तव्यानीति पूर्वाह्णमध्यंदिनापराह्णानेफलान्कुर्याद्यथाशक्तिधर्मार्थकामेभ्यः । न च शरीरधारणमसेवया भवति । किं तु गर्धनिषेधोऽयमुच्यते । स च गर्द्धः सत्याऽपि सेवया **ज्ञानेन** विषयगतदोषज्ञानेन अस्थिस्थूणास्नायुयुतमित्यादिशास्त्रोक्तेन । स्वसंविदा च विपाकविरसतया । किंविपाकफलमेवादिदोषभावनया वैराग्याभ्यासेन क्रमेण स्पृहा निवर्तते । न तु सहसैव त्यक्तुं शक्यते, कर्तुं **नित्यशः** नित्यकालं ज्ञानविशेषणमेतत् । प्रदुष्टानि प्रवृत्तानि दोषत्वात् । प्रदुष्टान्येव प्रवृत्तान्युच्यते । अयमंशस्तत्र तत्र । **नित्यशः** अनुपूर्वशः **सर्वशः** पूर्वश इति **व्यासमनु**प्रभृतिभिर्महामुनिभिः प्रयुज्यते । तस्य साधुत्वे यत्नः कर्तव्यः । तत्र शस्विधौ " एकवचनाच्च वीप्सायामिति " (व्या. सू. ५।४।४३) पठ्यते । तत्र वीप्सार्थः कथंचित् द्योतयितव्यः । अन्ये तु शसास्तिष्ठत्यर्थस्य क्विपि रूपं वर्णयन्ति । क्रियाविशेषणं चैतत् नपुंसकं नित्यास्थितेन ज्ञानेनेत्यर्थः ॥ ९६ ॥

---

१ फ–तप्त । २ गौतमीये ९।४६ । ३ फ–ननु ।

वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ॥
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥ ९७ ॥

अयमत्र विधिरेव । **वेदा**स्तद्विषयमध्ययनजपादि । **त्यागो** दानं लक्षणया । अथवाऽप्रतिषिद्धस्यापि मधुमांसभक्षणादेर्निवृत्तिः फलदेत्यनेन वर्जनं विप्रदुष्टो भावश्चित्तं यस्य तस्य । **सिद्धिं न गच्छन्ति** फलसाधकानि न भवन्ति । कस्मिंश्चिदपि काले । अतोऽनुष्ठानकालेनाभिप्रेतादिगतमानसेन[1] भवितव्यम् । शक्यं तर्हि सर्वेतरविकल्पतिरस्कारेण कर्मणि मन आधेयं अंगं[2] हि कर्मसु विषयचिन्तात्यागोऽनेन वाक्येन विहितः । तदभावे कर्मनैष्फल्यं स्यात् । एष हि भावदोषो यत्कर्मा[3]नुष्ठाने प्रवृत्तस्य तत्परतात्यागेन व्यसनेषु मनोऽवधानम् ॥ ९७ ॥

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ॥
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥ ९८ ॥

श्रुत्वा वंशगीतादिध्वनिं त्वं बृहस्पतिरित्यादिवचनं श्रुत्वा **न हृष्यति** । रूक्षपरुषाक्रोशवाचः श्रुत्वा **न ग्लायति** न मनोदुःखं भजति । ग्लानिः खेदः । **स्पृष्ट्वा** राङ्कवकौशेयादिवस्त्रं अजलोमकुतपञ्च समत्वेनानुभवति । एवं सुवेषतरुणीजननटप्रेक्षासु शत्रुदर्शने च समः बहुघृतं क्षीरषष्टिकान्कोद्रवांश्च समं भोजने । देवदारुतैलं कर्पूरादि च तुल्यं जिघ्रतः । तथाकर्तव्यम्, यथा केवलैर्मानसैः सुखदुःखैर्न स्पृश्यते । एवं तेन जितानीन्द्रियाणि भवन्ति । न त्वप्रवृत्त्यैव । इयत्पर्यैतः संयमः आश्रयणीयः ॥ ९८ ॥

इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ॥
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥ ९९ ॥

ननु च ब्रह्मचारिणा स्त्रीसंबन्धो यत्नेन वर्ज्यः, संस्कृतभिक्षालाभस्तु किमिति निषिध्यते । अत आह । निर्धारणे षष्ठी । एकमेव **यदीन्द्रियं क्षरति** । स्वातन्त्र्येण स्वविषये वर्तमानं न निवार्यते । ततोऽस्य **क्षरति प्रज्ञा** धैर्यमिन्द्रियान्तरविषयमपि । दृतिश्छागादिचर्मोदकाद्याहरणभाजनं तस्य संवृतेष्वपीतरेषु यद्येकस्मादुदकं **पादात्स्र**वति सर्वं रिच्यते । ज्ञानाभ्याससंभृतं धैर्यं सम्यक्ज्ञानमेव वा विषयगृध्नुतया तद्गतमानसस्य न तत्त्वतो युक्तिशास्त्रगम्या अर्थाः सम्यक् प्रतिभासन्ते ॥ ९९ ॥

वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा ॥
सर्वान्संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ॥ १०० ॥

---

१ फ–मानसम् । २ फ–अगर्हितकर्मसु । ३ ड–क्ष–यत्कर्मणस्तत्परतात्वेन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपसंहरति। सत्यपीन्द्रियत्वे मनसः प्राधान्यात्पृथगुपादानम्। ग्रामः संघातः विधेहि कृत्येन्द्रियाणि तथा मनः सर्वानर्थाञ्श्रौतस्मार्तकर्मसाध्यान्**संसाधयेत्**निष्पादयेत्। **तनुं** शरीरम**क्षिण्वन्न**पीडयन् **योगतः** युक्त्या। सहसा कस्यचित्कठिनासनकृष्णाजिनादिप्रावरणपीडा भवति सुकुमारत्वात्प्रकृतेस्तदर्थमिदमुच्यते। येषां सुशीलितं सुसंस्कृतं भोजनं मृदुशय्यादि न तैः सहसा तत्त्यक्तव्यमपि तु क्रमेण। सात्म्यतामानेतव्यम्। तद्विपरीतं योगः क्रमेण प्रवृत्तिरुच्यते। तत्र च योगतो वशीकृत्वेति संबन्धः। यथास्थानमेव वा योगत इति योजनीयम्। युक्त्या औचित्यतः शरीरं नापनयेत्। यदुचितं शरीरस्य न तज्झटिति निवर्तयेत् तात्पर्यं वा योगः तृतीयायोगः तृतीयार्थे तसिः। तात्पर्येण शरीरं रक्षेत्॥ १००॥

पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमाऽर्कदर्शनात्॥
पश्चिमां तु सदाऽऽसीनः सम्यगृक्षविभावनात्॥ १०१॥

संमुखे प्रातः पूर्वा संध्या। आदित्यास्तमये पश्चिमा। तां **तिष्ठेत् जपन्सावित्रीम्**। आसनादुत्थाय निवृत्तगतिरेकत्र देशे स्यात्। सावित्री उक्तैव 'तत्सवितुर्वरेण्यमिति'। तस्या ह्यनुवादः। ॐकारादिविधिः श्लोके। संध्याजपार्थम् 'एतदक्षरमेतां चेति'। **आऽर्कदर्शनादिति**। यावद्भगवानादित्यो दृष्टः। जपस्थानयोरयमेव विनिर्देशः।

ननु किमत्र विधिनाऽर्कोदय एव संध्या निवर्तते। तथाहि। न सर्वं तमः क्षीणं नापि परिपूर्णः प्रकाश एषा संध्या। उक्तं च। "दिवि प्रकाशो भुवि चान्धकारः कालः स सावित्र इति प्रदिष्टः। **निरुक्ते**ऽप्युक्तम् "अधो भागः सावित्र" इति। पशुसमाम्नाये विज्ञायते "कस्मात्सामान्यादधस्ताद्रामोऽधस्तात्कृष्ण" इति। आदित्योदये च सर्वतस्तमो निवर्तते। उभयधर्मानिवृत्तौ च संध्या रात्रिधर्मेऽहर्धर्मे च।

अत्यन्तसंयोगे चैषा द्वितीया। **संध्यामिति**। तेन यावत्संध्याकालं तिष्ठेदित्युक्तं भवति ततः परं स्वातंत्र्यं स्थितमेव। केचिदाहुर्नैवेयमत्यन्तसंयोगे द्वितीया किं तर्हि "कालश्चाकर्मकाणां कर्मसंज्ञो भवतीति" **वार्तिककार**स्तत्र 'कर्मणि द्वितीये' त्येव द्वितीया। यत्तु "कालाध्वनोरत्यन्तसंयोग" इति तद्यत्र क्रियावाची शब्दो न प्रयुज्यते। क्रोशं कुटिला नदी। सर्वरात्रं कल्याणी उभयत्र च सकर्मको धातुः। मासमधीयत इति सत्यं तस्य विषय इह पुनः संध्यां तिष्ठादिति। तिष्ठतिरकर्मकः। अतो विधिनिर्देशः कृत्स्नसंध्याप्राप्त्यर्थं स्थानासनयोः कर्तव्यः। आरम्भकालस्त्विह नोक्तः संध्याशब्देनैव

---

१ फ–साम्यम्। २ फ–कुंचितानः क्ष–कुचित्यतः। ३ फ–समासीनः। ४ फ–किमविधिना। ५ फ–रामो। ६ फ–धर्मानिवृत्तौ। ७ "कालाध्वनोरत्यन्तसंयोगे" (व्या. सू. २।३।५)। ८ व्या. सू. (२।३।२)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समर्पितत्वात् । य एव हि संध्याकालस्यारम्भः स एव तद्विधेः श्रोत्रियस्यापि । न हि पूर्णमास्यादिकालवद्दीर्घः संध्याकालो यदि विलम्बः स्याद्दुर्लक्षो ह्यसावतिसूक्ष्मत्वात्तुकालान्तरयोरिव । नामोन्नासावलक्ष्यपौर्वापर्यविधिनिवासोऽह्नश्च । अतिशीघ्रगतिर्भगवान्भास्करस्तस्य यथा निर्भुक्ति राशौ राश्यन्तरसंक्रमणं तु त्रुटिमात्रकालमिच्छन्ति ज्यौतिषिकाः । एवं दिवसारम्भावसानयोरप्युदयास्तमयौ । प्रागुदयाद्रात्रिरुदितेऽहः अनेन च नास्ति संध्या । आदित्योदयेनैव रात्रिविरामात् । अत एवोदयास्तमयसमीपयोरनुष्ठानप्रवृत्तिः । स्पष्टे च सूर्ये नक्षत्रेषु च निवृत्तिर्यतो य इयन्तं कालमुपास्ते तेनावश्यं मुख्ये काले विधिर्निर्वर्तितो भवति । अत एव च यावान्सावित्रः कालः सेह संध्याऽभिप्रेता न ज्योतिःशास्त्रगणिता सा चोक्ता पुरस्तात् ।

यद्येवं येषामयमेवाग्निहोत्रकालस्तेषां संध्याविधेरभावः प्रसक्तः । केयं परिनोदना श्रौतेन स्मार्तस्य बाधो युक्त एव । गृह्याग्निहोमेन विकल्पितम् । नैव चात्र विरोधः । तिष्ठताऽपि शक्यं होतुमासीनेन च ।

ननु च न केवले स्थानासने संध्ययोर्विहिते किंतु त्रिकजपोऽपि । तत्र सावित्रीं जपन्कथं होममन्त्रमुच्चारयेत् । अस्तु जपस्य बाधः प्रधाने तावत्स्थानासने न विरुध्येते । 'गुणलोपे [२]च मुख्यस्ये' त्यनेन न्यायेन जपस्याङ्गत्वाद्बाधो युक्तः तयोश्च प्रधानत्वं साक्षाद्विधिसंबन्धात्तिष्ठेदासीत वेति च । जपस्य तु गुणत्वं शत्रन्तत्वाज्जपतेर्लक्षणत्वावगमात् । अधिकारसंबन्धश्च स्थानासनयोरेव । " न तिष्ठति तु यः पूर्वां " तथा " तिष्ठन्नैशमेनो व्यपोहतीति " (अग्रे श्लो० १०३।१०२) ।

यत्तु केनचिदुक्तं तिष्ठतिरत्र गुणः प्रधानं जपकर्म ततो हि फलमश्नोष्मेति । तत्रोच्यते । नैवायं कामिनोऽधिकारः । कुतः फलश्रवणं यत्तु प्रण[३]वादिवाक्ये ' वेदपुण्येन युज्यत ' इति फलानुवादभ्रमः स तत्रैव निर्णीतः । तस्मात्स्थानासने प्रधाने ।

अथवा अग्निहोत्रिणः सकृत्सावित्रीं जपिष्यन्ति त्रिरावर्तयिष्यन्ति वा । न तावताऽग्निहोत्रस्य कालातिपत्तिः । अ[४]श्नन् सायं विनिर्मुक्त इति न तावता विह[५]न्यते । अश्नशब्दः चिरकालवचनः । तावता च कृतः संध्यार्थो भवति । अर्कदर्शनपर्यन्तता ह्यङ्गमेव । उदितहोमिनां कृतसंध्यानामेवाग्निहोत्रहोमः ।

गौतमेन तु ' सज्योतिष्याज्योतिषो दर्शनादिति ' (अ. २ सू. १७) सूत्रस्यार्थः । एतावान्कालः संध्योच्यते । न विध्यङ्गम् । तत्रैतावति काले नास्त्यावृत्तिः । यथा ' पौर्णमास्यां यजेतेति ' न कालानुरोधेन कर्मण आवृत्तिः, तथा पूर्वां संध्यां सनक्षत्रां पश्चिमां

१ फ–कालान्तरयोरिव । २ जै. अ. १० पा. २ सूत्र ६३ । ३ फ–प्रमाणवादिवाक्ये । ४ ड–अश्नः । ५ फ–विनिहन्यते । ६ फ–न वाऽप्यक्रम ।

For Private And Personal Use Only

सदिवाकरामिति । तदपि काललक्षणं एतावान्काल इह संध्याशब्देनोच्यते । तत्र सांध्यो विधिरनुष्ठेयः। तत्रेयति सन्ध्याशब्दवाच्ये काले च मुहूर्तमात्रे यदि त्रिचतुरासु कालकलासु स्थानासनजपान्कुर्यात् । संपन्न एव विध्यर्थः । न ह्यत्र कृत्स्नकालव्याप्तिः श्रुतौ मनोरिव सर्वथाऽग्निहोत्रसंध्याविधी समानकालावपि शक्यावनुष्ठातुम् ।

सदाशब्दो नित्यतामाह । उभयसंध्याशेषः । **आसीत** आसनमनूर्ध्वतावस्थानमुपविष्टो भवेत् । **ऋक्षं** नक्षत्रम् । आ तद्विभावनात् । आऽर्कदर्शनादिति य आकारः स इहानुषक्तव्यः । सम्यक्शब्दो दर्शनविभावनयोर्विशेषणम् । सम्यग्यदा परिपूर्णमण्डल आदित्यो भवति नक्षत्राणि च भास्वंति स्वभासा युक्तानि नादित्यतेजोभिभूतानि ॥ १०१ ॥

पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ॥
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् ॥ १०२ ॥

अयमत्राधिकार उच्यते । **एनः** प्रतिषिद्धसेवनाज्जातो दोषस्तं **व्यपोहत्यपनु**दति । निशि भवं **नैशं** रात्रौ कृतम् । एवं **मल**मेनःशब्देन समानार्थम् ।

न च सर्वस्य दिवाकृतस्य नैशिकस्य चैतत्प्रायश्चित्तम् । तथा सति कृच्छ्राद्युपदेशः प्रायश्चित्तविशेषोऽनर्थकः स्यात् । " अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति " लौकिकात्प्रवादात् । किं तर्हि यदसेवितं कृतं अशक्यपरिहारमनाम्नातप्रायश्चित्तविशेषं लघीय एनस्तदपैति । यदा सुप्तस्य हस्तचारशय्यापरिवर्तनादिना सूक्ष्मप्राणिवधो गुह्याङ्गकण्डूकर्षणेनाकस्मात्स्पर्शादिति प्रतिषिद्धम् । लालास्रवादिना चाशुचित्वमेतत्कालकृताशौचस्यावस्थाने प्रतिषिद्धसेवनादि । एतदभिप्रायमेवेदम् । " सर्वदैवाशुचिर्ज्ञेयः संध्योपासनवर्जितः " इति । न चानित्यतापत्तिरेवंविधस्य दोषस्य सर्वदाभावात् । दिवा च पथि गच्छन्नन्यस्त्रीमुखसंधानसंपन्नं तज्जन्यचित्तविकारोन्मीलने, क्रुद्धाश्लीलसंभाषणे तत्संध्याविधी अपनुदतः ॥ १०२ ॥

न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम् ॥
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥ १०३ ॥

अनेनाननुष्ठानप्रत्यवायं वदन्नित्यतामेव समर्थयति । यः प्रातः संध्यायां नोर्ध्व आस्ते न च पश्चिमायामुपविष्टो भवति स शूद्रतुल्यो वेदितव्यः । सर्वस्माद्द्विजातिकर्मणः आतिथ्यादिसत्कारसंप्रदानादितो **बहिष्कार्यो**ऽपनोद्यः । अतः शूद्रसमानतानिरासार्थं नित्यमनुष्ठेया संध्या । इदमधिकारवाक्यम् । अत्र च स्थानासन एवोपात्ते जपे यस्य चाधिकारसंबन्धस्तत्प्रधानमन्यत्तत्संबन्धमङ्गम् ॥ १०३ ॥

---

१ फ-अनित्यत्वापत्तिः । २ फ-एवोपपसिर्जपेयस्य ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपां समीपे नियतो नैत्यकं विधिमास्थितः ॥
सावित्रीमप्यधीयीत गत्वाऽरण्यं समाहितः ॥ १०४ ॥

अयमपरः स्वाध्यायविधिः प्रकरणान्तरे श्रुतत्वात्पूर्वस्माद्ग्रहणार्थाद्भिद्यते[1] । बहिर्ग्रामान्निर्जनो देश **अरण्यं** तद्गत्वा प्राप्यापां **समीपे** नदीवाप्यादिस्थाने तदभावे कमण्डल्वादिभाजनस्थानामपि । **नियतः** शुचिर्यत्नवान्वा । **समाहितः** परित्यक्तचित्तव्याक्षेपः । **सावित्रीमप्यधीयीत** । यदि बहुसूक्तानुवाकाध्यायादि कयाचित्कार्यातिपत्त्या न शक्यते । **नैत्यकं विधिमास्थितः** । नित्य एव नैत्यकः । नित्योऽयं विधिरित्येवं स्थितप्रज्ञः । ग्रहणार्थश्च स्वाध्यायाध्ययनविधिः प्रकृतिः अयं विकारः संस्तदीयान्धर्मान्गृह्णाति[2] । तेन ब्रह्मणः प्रणवं "प्राक्कूलान्" इत्यादिधर्मो भवति ।

अन्ये तु विधिर्विधा प्रकार इतिकर्तव्यतेत्यादि चक्षते । नित्ये ब्रह्मचारिणाऽवश्यकर्तव्ये स्वाध्यायाध्ययनविधेतिकर्तव्यता तामाश्रितः । अस्य तु विधेस्तदा नित्यत्वं ब्रह्मसत्रं हि तत्स्मृतमित्यादिवाक्येभ्योऽवसातव्यम् । आद्यमेव व्याख्यानं युक्तरूपं दृश्यते । न हि विधिशब्दः प्रकारवचनतया प्रसिद्धः । यदि च नैत्यकशब्देन ब्रह्मचारिणो विधिरुच्यते तदा "नैत्यके नास्त्यनध्यायः" इत्यत्रापि नैत्यकशब्देन तस्यैवाभिधानं स्यात्ततश्चानध्यायनिषेधस्तत्रैव न प्रसज्येत ॥ १०४ ॥

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ॥
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥ १०५ ॥

उपकरणमुपकारकं वेदाङ्गं कल्पसूत्रनिरुक्ताद्युच्यते । तस्मिन्पठ्यमानेऽनध्यायेऽप्य**नुरोध** आदरो **नास्ति** । **अनध्याये होममन्त्रेषु चैव** ह्यनध्याया नादरणीया । अनध्यायेष्वध्येतव्यम् । न निरोध इति वा पाठः । निवृत्तिरनध्यायेष्वध्ययनस्य नास्ति । यद्यप्यध्ययनविधिधर्मोऽनध्यायेष्वनध्ययनं, अध्ययनविधिश्च स्वाध्यायविषयः, स्वाध्यायश्च वेदो न च वेदशब्दवाच्यान्यङ्गानि, तथापि वेदवाक्यमिश्रत्वबुद्धिः स्यादिति स्पष्टार्थमुच्यते । दृष्टान्तो वाऽयम् । वेदाङ्गेष्विव वेदेऽप्यनध्यायो नास्ति । होममन्त्रेष्वग्निहोत्रहोमे ये मन्त्रा अन्यस्मिन्वा सावित्रादिशान्तिहोमे । एतच्च प्रदर्शनार्थम् । शश्वज्जपप्रैषादिमन्त्राणां कर्माङ्गानां वैदिकवाक्योच्चारणमात्रधर्मोऽनध्यायानध्ययनं स्वाध्यायनविधिप्रयुक्त इति मन्यमानो होमादिमन्त्रेषु चतुर्दश्यादिष्वनुच्चारणं प्रपद्येत यः स न्यायसिद्धेनार्थेनानूद्यमानेन प्रतिबोध्यते । स्वाध्यायाध्ययनविधिप्रयुक्तमनध्यायानुक्रमणं न वेदधर्मस्ततो नास्ति कर्माङ्गमन्त्रेष्वनध्यायः । नैत्यके स्वाध्याये पूर्वेण वाक्येन सर्वाश्रमिणां विहिते नित्ये स्वाध्यायविधौ ॥ १०६ ॥

---

१ फ–प्रकरणाद्भिद्यते । २ फ–तदीयाद्धर्मात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम् ॥
ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम् ॥ १०६ ॥

पूर्वविधिशेषोऽयमर्थवादः । एतेन हेतुना **नैत्यके नास्त्यनध्यायो** यतो **ब्रह्मसत्रं तत्स्मृतं** सततप्रवृत्तं सत्रं यथा सहस्रसंवत्सरादिसत्रं न कदाचिच्छिद्यत इत्यतः सत्रमेवमिदमपि ब्रह्माध्ययननिर्वर्त्यं ब्रह्मसत्रम्। सत्रत्वाच्च न कदाचिद्विच्छेत्तव्यम् । विच्छेदे हि सत्रत्वं न स्यात् । सत्रत्वमिदानीं रूपकभङ्ग्या योजयति । ब्रह्माध्ययनमाहुतिहुतमन्यत्सत्रं सोमाहुत्या हूयते । जुहोतिरनिवृत्तौ वर्तते । अनेकार्थत्वाद्धातूनाम् । ब्रह्मशब्देन तद्विषयाध्ययनक्रिया लक्ष्यते। ब्रह्माध्ययनमाहुतिरिव "उपमितं व्याघ्रादिभिरिति" (व्या. सू. २।१।५६) समासः । अनध्याये यदध्ययनं तेन वषट्कृतं यथा याज्यान्त अविच्छेदो वषट्कारेण क्रियत एवं चतुर्दश्याद्यनध्यायाध्ययनं वषट्कारस्थानीयम् । वषट्शब्देन वौषट्शब्दो लक्ष्यते । तेन कृतं युक्तं संस्कृतम् । साधनं[1]कृतेति समासः ॥ १०६ ॥

यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः ॥
तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु ॥ १०७ ॥

प्रकृतविधिशेषोऽयम् । स च नित्यः समधिगतः नित्ये च फलश्रवणमर्थवादो न च विधिविभक्तिर्विद्यते। येन "एकस्य तूभयत्वे संयोगः[2] पृथक्त्वमि"त्यनेन न्यायेनाधिकारान्तरहेतुः पयःप्रभृतिः स्यात् । लब्धे च नित्येऽधिकारे रात्रिसत्रन्यायोऽपि नास्ति येन पय आदीनि निष्फलत्वेन कल्पेरन् । तस्मादर्थवाद एवायम् । अधीयानस्य लोकपक्त्या प्रतिग्रहादिना गोलाभात्पयःप्रभृतेः प्रक्षरणानुवादस्यालम्बनम् । **स्वाध्यायं** वेदमधीते**ऽब्दं** संवत्सरं **विधिना** प्राक्कूलाध्यासनेन **नियतः** संयन्तेन्द्रियः **शुचिः** स्नानादिना तस्य पुरुषस्य **नित्यं** यावज्जीवं **क्षरति** स्रवति ददाति । एषः स्वाध्यायः पयोदधीति । अन्ये तु धर्मार्थकाममोक्षान् पयआदिभिः शब्दैरभिहितान्मन्यन्ते । पयः शुद्धिसामान्याद्धर्मः, दधि पुष्टिहेतुत्वादर्थः, स्नेहसामान्याद्घृतं कामः, सर्वरसैक्यान्मधु मोक्षः। यावान्कश्चन पुरुषार्थः स सर्वो वेदाध्ययनात्संवत्सरेणैव प्राप्यते किं पुनर्बहुना कालेन ? अर्थवादत्वात्पय आदिशब्दानां कोऽर्थो युक्त इति नाभिनिवेष्टव्यम् ॥ १०७ ॥

अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितम् ॥
आ समावर्तनात्कुर्यात्कृतोपनयनो द्विजः ॥ १०८ ॥

सायंप्रातः समिद्भिरग्नेरादीपनम**ग्नीन्धनम्** । अपर्यंकारोहण**मधःशय्या** । न तु स्थण्डिलशायित्वमेव । गुरवे हितमुदकुम्भाद्याहरणं शुश्रूषणलक्षणम् । यत्तु तदुपकारकरणं

---

१ "कर्तृकरणे कृता बहुलम्" (व्या. सू. २।१।३२) । २ जैमिनीये अ. ४ पा. ३ सू. ५.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्यावज्जीविकम् । एतदा ब्रह्मचर्यसमाप्तेर्गुरुकुलनिवृत्तिलक्षणात् स्नानात्कर्तव्यं स्वाध्यायाध्ययनविध्यर्थत्वात् । ब्रह्मचर्यस्य तद्धर्माणां च यावद्ग्रहणमनुवृत्तिस्तन्निवृत्त्या च निवृत्तिः सिद्धैवेति ।

अग्नीन्धनादीनां पुनर्वचनं तद्व्यतिरिक्तस्यातिक्रान्तस्य धर्मकलापस्योत्तरेषामप्याश्रमिणामनुष्ठानार्थम्। तथा च गौतमः (अ.३सू.९) "उत्तरेषां चैतदविरोधीदिति"[1]। अथैवं कस्मान्न भवति एते यावद्ब्रह्मचर्यभाविन अन्ये पुनरर्वागपि निवर्तन्त इति स्मृत्यन्तरमात्रदर्शितप्रधानकालानुवर्तिनश्च नियमा इत्येष न्यायः सत्यां गतौ बाधितः स्यात् । गुरवे हितमिति हितयोगे चतुर्थी (व्या. सू. २।१।३६) न्याय्या ॥ १०८ ॥

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ॥
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ॥ १०९ ॥

तद्वक्ष्यति (श्लो.२३३) 'सर्वेषामेव दानानां ब्रह्मदानं विशिष्यत' इति तत्र कीदृशाय विद्या दातव्या इति पात्रलक्षणार्थः श्लोकः । ब्रह्मचारिधर्मप्रसङ्गेनाध्यापनविधिरयमुच्यते । आचार्यस्य पुत्रः शुश्रूषा परिचर्या गृहोपयोगि शक्तितः कर्म करणं शरीरसंवाहनं च[2] । ज्ञानाद् यः कश्चिद्ग्रन्थ आचार्यस्य न विदितः शिष्येण कथंचिच्छिक्षितोऽर्थकामकलाविषयो धर्मविषयो वा । विद्याविनिमयेनेदमध्यापनम् । **धार्मिकः** अग्निहोत्रादिकर्मानुष्ठानप्रधानः । **शुचि**र्मृद्वारिशुद्धः अर्थशुद्धश्च। गोबलीवर्दवत्पदत्रयस्य पुनरुक्तं **धार्मिकः शुचिः साधु**रिति। **आप्तः**सुहृद्बान्धवादिः प्रत्यासन्नः । **शक्तः** ग्रहणधारणसमर्थः । **स्वः** पुत्रः उपनीतश्च पूर्वः अन्योपनीता अप्यध्याप्याः ।

ननु च धर्मत इत्युच्यते एतैरध्यापितैर्धर्मो भवति । **अर्थद**श्च दृष्टेनोपकरोति तत्र कुतोऽदृष्टकल्पना केनोक्तं कल्पमिति। श्रुते का कल्पना साक्षादेव हि श्रुतम् **अध्याप्या दश धर्मत** इति ।

उपाध्यायस्त्वाह धर्मशास्त्रव्यवस्थोच्यते । एतैरध्यापितैर्धर्मातिक्रमो न भवति, न पुनरर्थदे अध्यापिते विद्यादानलक्षणो धर्मो भवति ॥ १०९ ॥

नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः ॥
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥ ११० ॥

अधीयानेनानुपसन्नेन यदि नाशितमपाक्षरं विस्वरं वाऽधीतं तदाऽपृष्टेन न वक्तव्यम् । नाशितं त्वयैवमेतत्पठितव्यमिति शिष्यस्य त्वपृच्छतोऽपि वक्तव्यम् । पृच्छ-

---

१ विरोधीनि आनन्दाश्रमे मुद्रितगौतमीये पाठः । २ ब-षा ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानोऽपि यद्यन्यायेन पृच्छति तथाऽपि न वक्तव्यम् । प्रश्रयपूर्वकमस्मिन्वस्तुनि मे संदेह-स्तदुपदेष्टुमर्हसीति शिष्यधर्मेण प्रश्नो न्यायेन । अन्यथा तु जानन्नपि जडवन्मूक इव लोके वर्तेत आचरेदज्ञ इव तूष्णीमासीत । शास्त्रविषयोऽयमपृष्टसंदेहापनयननिषेधः । व्यवहारे तु वक्ष्यति । " नियुक्तो वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हतीति । " अन्ये त्वविशेषेणेच्छन्ति ॥ ११० ॥

अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति ॥
तयोरन्यतरः प्रैति विद्वेषं वाऽधिगच्छति ॥ १११ ॥

अस्य प्रतिषेधस्यातिक्रमे दोषमाह । **अधर्मेण** पृष्टोऽन्यायपृष्टश्च **यः** प्रब्रवीति एवमेतद्युक्तमध्येतुमिति **यश्च पृच्छति** । तावुभावपि म्रियेते अप्राप्तकालौ । अथैको व्यतिक्रमकारी स एव म्रियते । यद्यन्यायेन पृष्टो न वक्ति तदा प्रष्टैव वाऽथ प्रतिवक्ति तदोभावपि । अनेनान्यायप्रश्ने दोषदर्शनेन प्रष्टुर्न्याय्यः प्रश्नविधिः । **विद्वेषं वा** द्वेष्यतां लोके प्राप्नोति ॥ १११ ॥

धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा ॥
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥ ११२ ॥

यदुक्तम् " अध्याप्या दश धर्मत " इति तस्यैवायं प्रकारान्तरेण संक्षेपतः प्रतिनिर्देशो नापूर्वार्थाभिधानम्, प्रकृतानुवादत्वात् । अर्थशब्द उपकारमात्रलक्षणापरो द्रष्टव्यः, विद्याविनिमयेनापि पूर्वमध्ययनस्योक्तत्वात् । **तद्विधा**ऽध्यापनानुरूपा । महति महती स्वल्पे स्वल्पेति । **तत्र विद्या** विद्यते ज्ञायते यया सर्वोऽर्थ इति सा विद्या पाठोऽर्थावबोधश्च । अनुपकारी नाऽध्याप्यः । न चास्यार्थविवरणं कर्तव्यम् ।

उषरो भूमिभाग उच्यते । यस्मिन्नखिलेऽपि मृत्तिकादोषाद्बीजं न प्ररोहति **शुभं** श्रेष्ठं व्रीह्यादिकं लाङ्गलादिनोप्यते एवं विद्याऽपि क्षेत्रे ह्युप्ता महाफला भवति । न चैतन्म-न्तव्यम्, अर्थमादाय यदध्यापनं सा भृतिः । न हि पणपरिमाणसंभाषणपूर्विका तत्र प्रवृत्तिः यदेयद्ददासि तदैतदध्यापयामीति । एतद्भृते रूपम् । न पुनरर्थोपकारगन्धमात्रेण ।

यत्तु न पूर्वं किंचिद्गुरवे उपकुर्वीतेति नासौ पूर्वोपकारप्रतिषेधः किंतु स्नास्यताऽवश्यमाज्ञप्तेन गुर्वर्थो यथाशक्ति संपाद्यः । तच्छेष एव प्रतिषेधो न पृथग्वाच्यः ॥ ११२ ॥

---

१ क-ख-वाऽपि गच्छति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ॥
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ॥ ११३ ॥

समं शब्दः सहार्थे । अप्रतिपादितया स्वदेह एव जर्जरिततया युक्तं ब्रह्मवादिनो वेदाध्यायिनो मरणं न पुनरपात्रे प्रतिपादनम् ।

अनेन च ज्ञायते । अध्यापनमप्यधीतवेदेनावश्यं कर्तव्यं न केवलं वृत्त्यर्थम् । नापि वार्योदिदानवत्फलकामस्यैवाधिकारः । तथा च श्रुतिः " यो हि विद्यामधीत्यार्थिने न ब्रूयात्स कार्यहा स्यात् । श्रेयसो द्वारमपावृणुयात् । अध्यापयेन्महदेतद्यशस्यं वाचोऽधिकारं कवयो वदन्ति । अस्मिन्योगे सर्वमिदं प्रतिष्ठितम् । य एवं विदुरमृतास्ते भवन्ति ।" स कार्यहा स्यादित्यनेनानध्यापने दोषमनुवदन्तीति श्रुतिरेवावश्यकर्तव्यतां ज्ञापयति । इरिणे पूर्वोक्तप्रयोजनत्रयाभावो यत्र । आपद्यपि हि घोरायां कष्टायामपि कष्टा आपदुक्तशिष्याभावः । एतच्चावश्यकर्तव्ये सत्युपपद्यते । नित्यत्वे हि मुख्याभावे प्रतिनिधिशिष्योपादानेनाध्यापनानिवृत्तिः प्राप्ता । व्रीह्यभाववन्नीवारैः । अतोऽस्यामवस्थायामध्यापनाधिकारनिवृत्तिरेव । यथोक्तलक्षणातिथ्यभावेऽतिथिपूजानिवृत्तिः । वपेदिति लक्षणया बीजधर्मेणाध्यापनमुच्यते । बीजं किल क्षेत्रोप्तं बहुफलं भवत्येवं विद्याऽपि ।

ये तु धनाभावनिमित्तामापदमाचक्षते अत्यन्तदुर्गतेनापि नेरिणे वपन्व्येति वरं म्रियता । "सर्वत एवात्मानं गोपायेद्"इति नैष विधिरतिक्रान्तो भवति सत्यपि तथाविधाध्यापने वृत्त्युपाये । तदेतदयुक्तं अर्थदो नैवेरिणं पूर्वोक्तानुवादत्वादिरिणशब्दस्य । यदि चार्थदोऽपि न भवति कथमापदि तत्र प्रवृत्तिः संभाव्यते, या निषिध्यते ॥ ११३ ॥

विद्या ब्राह्मणमेत्याह शेवधिष्टेऽस्मि रक्ष माम् ॥
असूयकाय मां माऽदास्तथा स्यां वीर्यवत्तमा ॥ ११४ ॥

अयमप्यर्थवाद एव । विद्या मूर्तिमती कंचिदुपाध्यायमागत्याह प्रोक्तवती । शेवाधिर्निधिस्तवास्मि रक्ष माम् । का पुनस्ते रक्षा । असूयकाय कुत्साकराय निन्दकाय मां माऽदाः । निन्दकं माऽध्यापय । तथा चैवमहं वीर्यवत्तमाऽतिशयेन तव कार्यकरी भवामि । वीर्यं कार्यनिवृत्तौ सामर्थ्यातिशयः । 'शेवधिष्टेऽस्मीति' कृतषत्वं पठितं तच्छान्दसप्रयोगानुकरणम् ॥ ११४ ॥

यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम् ॥
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ॥ ११५ ॥

यं शिष्यं शुचिं जानीयान्नियतं संयतेन्द्रियं यत्नपरं ब्रह्मचारिणं तस्मै मां

---

१ ब-हरणे । २ फ-ना ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रूहि यो हि निधिं पाति रक्षति यतोऽसावप्रमादी न प्रमाद्यति न स्खलति तत्परत्वात् शक्तासार्थदादीनां सर्वशिष्याणामेतद्गुणसंयोगे देयेत्यस्मादर्थवादाद्गम्यते ॥ ११५ ॥

ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् ॥
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ॥ ११६ ॥

योऽभ्यासार्थमधीयानस्यान्यं चोद्दिश्यैवं व्याचक्षाणस्य तत्संनिकर्षमन्य आगत्य तद्ब्रह्मापूर्वं गृह्णीयात्संदेहं वाऽपनुदेत्तस्यैष दोष उच्यते । यावदनुज्ञामसौ न दाप्यते यथैते त्वत्सकाशादधीयत एवमप्यहमप्यधीयीयेत्यनुज्ञातुमर्हसीति लब्धानुज्ञां शिक्षेत । अन्यथा तु यद्ब्रह्माध्ययनं तत्स्तेयमिव[1] सोऽध्येताऽनेन ब्रह्मचौर्येण संयुक्तो नरकं महायातनास्थानं प्राप्नोति । अधीयानादिति पञ्चमी " आख्यातोपयोगे " (व्या. सू. १।४।२९) इति । अपायस्य वा गम्यमानत्वाद्ब्रह्म ह्यध्येतुर्निष्क्रामतीव । ल्यब्लोपे वा कर्मणि । अधीयानं श्रुत्वाऽऽप्नोति शिक्षते[2] ॥ ११६ ॥

लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव वा[3] ॥
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्[4] ॥ ११७ ॥

अतिक्रान्तं प्रासङ्गिकम् । अभिवादनविधिरिदानीं प्रक्रम्यते । लोके भवं **लौकिकं** लोकाचारशिक्षणम् । अथवा गीतवादित्रकलानां ज्ञानं वात्स्यायनविशाखिलकलाविषयग्रन्थज्ञानं वा । **वैदिकं** विधिनोदितम् । वेदवेदाङ्गस्मृतिविषयम्[5] । आध्यात्मिकविद्याऽऽत्मोपनिषद्विद्याऽऽत्मोपचाराद्वा शरीरस्य । वैदिकमेत**ज्ज्ञानम्** । यतः शिक्षेत **तं पूर्व**मुपदेष्टारं पुरुष**मभिवादयेत्** । प्रथमसंगमे यदाशीःप्रयोगार्थं वक्ष्यमाणस्वरूपेण प्रयोगेण शब्देन संमुखीकरणं सोऽभिवादयतेरर्थः । **पूर्वमिति** प्रथमम् । तेनासौ संबोध्यो न पुनस्तदीयं वचनमपेक्षितव्यम् । तदा हि प्रत्यभिवादयिताऽभिवादयेदित्यनेनैव सिद्धत्वात् पूर्वशब्दोऽनर्थक इति चेत्तन्न । सति ह्यस्मिन्नयमर्थो लभ्यते । धातूपसर्गार्थपर्यालोचनया ह्याभिमुख्येन वदनमात्रं प्रतीयते । अन्येनापि संबोधितस्य भवत्येव । ये तु पूर्वं स्वयोगिगुरुभ्य इति व्याचक्षते तदप्रकृतसंशब्दितमित्युपेक्ष्यम् ॥ ११७ ॥

सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ॥
नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ॥ ११८ ॥

अभिवादनाद्याचारविधेः स्तुतिरियम् । सावित्रीमात्रं सारं प्रधानं यस्य स एवमुच्यते । सावित्रीमात्राध्ययनो **वरं** श्रेष्ठो **विप्रो** यदि **सुयंत्रितो** भवति शास्त्रनिगृहीतात्मा । **अयन्त्रितस्त्रिवेदोऽपि** शास्त्रविदपि सर्वमश्नाति लोकाचारगर्हितं साक्षादप्रतिषिद्धमपि । एवं **सर्वविक्रयी** । प्रदर्शनार्थवशानाविक्रयवन्यस्यापि प्रतिषिद्धस्य ।

---

१ फ-न स्तेयमिव । २ फ-शिक्ष्यते । ३ फ-च. ४ जन्मप्रभृति यत्किञ्चिच्चेतसा धर्ममाचरेत् ॥ तत्सर्वं विफलं ज्ञेयमेकहस्ताभिवादनात् ॥ १ ॥ रावसाहेबमंडलिकोद्धृतपुस्तकेऽयं श्लोकः पाठान्तर इति दत्तः । ५ फ-विषयाध्यात्मिकविद्या ।

For Private And Personal Use Only

एतदुक्तं भवति । यथाऽन्यनियमत्यागान्निन्द्यते एवं प्रत्युत्थानादित्यागादपि । अथ कथं वरं विप्र इति यावता वरो विप्र इति भवितव्यम् । केचिदाहुः सामान्योपक्रमस्य विशेषस्याभिधानात् । वरमेतत् किं तद्यत्सुयन्त्रितो विप्र इति । अन्ये त्वाहुराविष्टलिङ्गो वरशब्दो नपुंसकलिङ्गोऽप्यस्ति ॥ ११८ ॥

शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ॥
शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् ॥ ११९ ॥

शय्या चासनं चेति 'जातिरप्राणिनामिति' (व्या. सू. २।४।६) द्वन्द्वैकवद्भावः तस्मिन् **श्रेयसा** विद्याद्यधिकेन गुर्वादिना च **न समाविशेन्न** सहासीत । किं सर्वस्मिन्नेव नेत्याह । **अध्याचरिते** कल्पिते शय्यात्वेनासनत्वेन च । यत्तु शिलाफलकादिस्तत्र न दोषः । वक्ष्यति च (श्लो. २०४) "आसीद्गुरुणा सार्धमिति" तस्यैवायमनुवादः ।

अन्ये व्याचक्षत अध्याचरिते अधिष्ठित इति । **न समाविशेत्त**त्रोत्तरकालमपि न केवलं सहासनप्रतिषेधः स हि वक्ष्यमाणेनैव सिद्धः । विधौ च संभवति नानुवादो युक्तः। तत्र केचिदाचारतो भेदं व्याचक्षते । यद्गुरोरसाधारण्येन शय्यात्वेनासनत्वेन च विज्ञातं यत्र गुरुः शेते आस्ते च तत्र शिष्यः प्रत्यक्षं परोक्षं च नोपविशेत् । यत्र तु कथंचिदेते क्रिये गुरुणा कृते तत्र गुरोरप्रत्यक्षं प्रतिषेधः । ईदृशमेवाध्याचरितमुच्यते । न स्वस्वामि-संबन्धेन यदधिष्ठानम् ।

शय्यासनस्थस्य च यदि श्रेयानागच्छति तदा तत उत्थायाभिवादनं कर्तव्यम्। यत्तु यानासनस्थ इति तद्गुरुविषयमवरोहणम् । शय्यासनत्याग एव भूमिष्ठेन कर्तव्य इति तस्यार्थः । इदं त्वगुरोः श्रेयसः प्रत्युत्थानमासनस्थस्यैव संभवति ॥ ११९ ॥

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ॥
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥ १२० ॥

पूर्वस्यार्थवादः । **स्थविरे** वृद्धवयस्यायत्यागच्छति, **यूनस्त**रुणस्यो**र्ध्वं प्राणाः** जीवितहेतवोऽन्तर्मरुत ऊर्ध्वमास्याद्बहिर्निष्क्रामन्ति अपानवृत्तिं परित्यज्य जीवविच्छेदं चिकीर्षन्ति । प्रत्युत्थाय यदभिवादनं क्रियते तेन यथापूर्वं जीवितस्थेम्ने कल्पते । **प्रति-पद्यते** प्रत्युज्जीवति ॥ १२० ॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ॥
चत्वारि संप्रवर्धन्ते आयुर्धर्मो यशो बलम् ॥ १२१ ॥

---

१ फ–तत्र । २ फ–तस्य वर्धन्ते । ३ फ–आयुर्विद्या ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वानेव प्रति पूर्वाभिभाषिता यथार्हाऽभिवादनशीलता न पुनरभिवादनशब्दोच्चारणमेव । शीलशब्देन प्रयोजनापेक्षाभाव उच्यते । **नित्यं** वृद्धानुपसेवते प्रियवचनादिना । यथाशक्त्या ह्युपकारेण चाराधयते । तस्य **चत्वारि संप्रवर्धन्ते । आयुर्धर्मो**ऽमुत्र स्वर्गादिफलपादपः । **यशोबले** च प्रागुक्ते । अर्थवादोऽप्ययं फलावगमहेतुः ॥ १२१ ॥

अभिवादात्परं विप्रो ज्यायांसमभिवादयन् ॥
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥ १२२ ॥

येन शब्देन परः संबोध्यते आशिषं प्रति प्रयोज्यते कुशलप्रश्नं वा कार्यते सोऽभिवादः । अस्माद**भिवादाद**भिवादप्रतिपादकाच्छब्दात्**पर**मव्यवहितपूर्वं शब्दमुच्चारयेत् । **असौ नामाहमस्मी**त्यसाविति सर्वनाम सर्वविशेषप्रतिपादकमभिमुखीकरणार्थोऽयमीदृशः शब्दप्रयोगः मया त्वमभिवाद्यसे आशीर्वादार्थमभिमुखीक्रियसे ततोऽध्येषणामवगम्य प्रत्यभिवादमाशीर्दानादिकर्तुमारभते । न च सामान्यवाचिना सर्वनाम्ना प्रयोज्यमानेनैतदुक्तं भवतीदं नामधेयेन मयाऽभिवाद्यसे इत्यतोऽध्येषणामनवबुध्य कस्याशिषं प्रयुङ्क्ताम् ।

अपि च स्वनाम परिकीर्तयेदिति श्रुतम् । तत्रासौ देवदत्तनामाऽहमित्युक्तेनाभिवादनं प्रतिपद्येत । असावित्येतस्य पदस्यानर्थक्यादर्थानवसायः । स्मृत्यन्तरतन्त्रेणापि व्यवहरन्ति च सूत्रकाराः । यथा **पाणिनिः** (व्या.सू.२।३।२) । 'कर्मणि द्वितीयादि' शब्दैः इहाप्यसाविति । 'स्वं नामातिदिशतेति' **यज्ञसूत्रे**ऽपि परिभाषितम् । यद्येवं स्वं नामेत्यनेनैव सिद्धेऽसौ नामेत्यनर्थकं नामशब्दप्रयोगार्थम् । कथं **स्वं** नाम कीर्तयेदिदं नामाहमिति । अनेन स्वरूपेणाहमस्मीति । समानार्थत्वाद्विकल्पं मन्यंते ।

अत्र श्लोक एतावदभिवादनवाक्यस्य रूपं सिद्धम् । अभिवादये देवदत्तनामाऽहं भोः । उत्तरेण श्लोकेन भोरित्येतद्विधास्यते । **ज्यायांसमिति** वचनात्समहीनानामप्याभिवादनमस्ति न त्वयं प्रकारः ज्यायोविषयत्वादस्य ॥ १२२ ॥

नामधेयस्य ये केचिदभिवादं न जानते ॥
तान्प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥ १२३ ॥

वित्ताद्याधिक्येनाविदुषोऽपि यथाविध्यभिवाद्यतायां प्राप्तायां तं निवृत्त्यर्थमिदम् । **ये केचिद**विद्वांसो **नामधेयस्य** संस्कृतस्योच्चारितस्या**भिवादम**भिवादार्थम् । अभिवादिता एतेन वयमित्यवैय्याकरणा **न जानते** संस्कृतं नावबुध्यन्ते **तान्प्राज्ञो** नारीश्चाभिवाद्याः । एतेन संस्कृतमुच्यमानं प्रतिपद्यते । तत्र विध्येकदेशं स्वनामग्रहणं हित्वाऽभिवादयेऽहमित्येतावदेव **ब्रूयात्त**दपि चेन्नावबुध्यन्ते लौकिकेनापभ्रंशेनाऽप्यभिवाद्या इत्येवमर्थं

---

१ ढ–क्ष–अभिवादपरो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राज्ञग्रहणम् । तदीयामबोधशक्तिं ज्ञात्वोहितव्योऽभिवादप्रयोगो नोपदेश एवादर्तव्यः । **स्त्रियाऽप्येवमेव** । सर्वग्रहणं गुरुपत्नीनां संस्कृतप्रयोगज्ञानामपि । अन्ये तु य उपनामिकया प्रसिद्धो वनमालीवर्णे इति । पितृकृतं यत्तस्य नाम तन्न प्रसिद्धं यत्प्रसिद्धं न तन्नामेत्यतोऽसौ स्वनाम कीर्तयेत् ।

अन्ये तु प्रत्यभिवादं न जानत इति वर्णयन्ति । "प्रत्यभिवादे शूद्रे" (व्या. सू. ८।२।८३) इति नामान्ते प्लुतो विहितः । तं ये न विदुस्तेष्वहमित्येव वाच्यम् । व्याकरणप्रयोजनोपन्यासप्रसङ्गेन चैतन्महाभाष्यकारेण प्रदर्शितम् ।

"अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः । कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्" ॥

स्मृत्यन्तरसामर्थ्यादेवायमभिवादशब्दः प्रत्यभिवादे वर्तत इत्याहुः । यदि चैतदेवं न व्याख्यायते तदा नाभिवाद्यः स विदुषेति सर्वेण सर्वमभिवादप्रतिषेध आश्रीयमाणे यमहं वदेदिति स्मृत्यन्तरविरोधः । अस्मिंस्त्वेवं व्याख्याते स प्रतिषेधः स्तुत्यालम्बनो न विधायक एतदर्थानुसारितया नीयते ॥ १२३ ॥

भोः शब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने ॥
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः ॥ १२४ ॥

स्वस्य नाम्नोऽन्ते भोः शब्दं कीर्तयेत् । स्वग्रहणमभिवाद्यमानप्रतिषेधार्थम् । परिशिष्टोऽर्थवादः । न च नामाक्षराणामेवान्तेऽपि तु ततः परेषाम् । अहमस्मीति । एष हि तत्रेतिकरणं प्रयोगावधारणार्थम् एवमेव प्रयोक्तव्यः । अपि च देवदत्तो भो अहमिति दुःशिष्टे प्रयोगे विलम्बितायां प्रतिपत्तौ सम्मुखीभावः चिरेण स्यात्तत्र कार्यविरोधः । व्यवहितसंबन्धे कश्चिन्नैवावधानवान्स्यात् ।

स्वरूपभावः स्वरूपस्य सत्ताऽथवाऽभिवाद्यनाम्नां स्वरूपे भवति तत्स्थाने भवत्यतस्तन्नामनिवृत्तिः । भावसाधनः कर्तृसाधनो वा भावशब्दः । स्वरूपभाव इति सप्तम्यन्तो वा पठितव्यः । **भोभावो** भो इत्येतस्य यद्भवनं यत्स्वरूपं **तन्नाम्नां** स्वरूपम् । यथैव नाम गृहीत्वा कस्यचित्संबोधनं क्रियते देवदत्त श्रूयतामित्येवं भोः शब्दोऽप्यामन्त्रितविभक्त्यन्तः संबोधनार्थैव **ऋषिभिः** स्मर्यते ॥ १२४ ॥

आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ॥
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥ १२५ ॥

अभिवादने कृते प्रत्यभिवादः पित्राऽभिवादयिता एवं वाच्यः **आयुष्मान्भव सौम्येति** इतिशब्दः प्रकारे । आयुष्मानेधि दीर्घायुर्भूयाश्चिरञ्जीवेत्येवमादिशब्दपरिग्रहः शिष्टाचारप्रसिद्धो भवति ।

For Private And Personal Use Only

अकारश्चास्य प्रत्यभिवाद्यस्य यन्नाम तदन्ते योऽकारः स प्लुतः कर्तव्यः । **प्लुत** इति त्रिमात्रस्य संज्ञा । अकारग्रहणमिकारादीनामपि प्रदर्शनार्थम् । अजपेक्षमेव चान्तत्वं द्रष्टव्यम् । व्यञ्जनान्तस्यापि योऽन्त्यः स्वरस्तस्य भवति । **पूर्वाक्षर** एव प्लुतभाविनोऽकारस्य विशेषणमेतत् । अक्षरमत्र व्यञ्जनं तत्र पूर्वस्मिन्यस्मिन् श्लिष्टः स एवमुच्यते । एतदुक्तं भवति । पूर्व एव नागन्तुरकारः प्लुतः कर्तव्यः । किं तर्हि य एव नाम्नि विद्यते स एव प्लावयितव्यः । सर्वं चैतदेवं व्याख्यानं भगवतः **पाणिनेः** स्पृशति सामर्थ्येन । शब्दार्थप्रयोगे च मन्वादिभ्योऽधिकतरः प्रामाण्ये भगवान्**पाणिनिः** । स च 'प्रत्यभिवादे शूद्रे'(व्या.सू.८।२।८३) टेः प्लुतिं स्मरति । टिशब्देन योऽन्त्योच् तदादिशब्दरूपमुच्यते । विप्रग्रहणमविवक्षितम् क्षत्रियादीनामप्येष एव विधिः स्मृत्यन्तरसमाचारो ह्येवमेव स्थितः । न चैषां विध्यन्तरमस्ति । अत्रोदाहरणमायुष्मान्देवदत्त३ । व्यञ्जनान्तस्यायुष्मानेधि सोमशर्म३न् ॥ १२५ ॥

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ॥
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ १२६ ॥

यो न वेत्ति प्रत्यभिवादनमित्येवं वाच्यम**भिवादस्ये**त्यतिरिच्यते न संगच्छते नैवमभिवादस्यानुरूपं प्रत्यभिवादनमित्येवं योजना क्रियते । येन स्वनामोच्चार्याभिवादनं कृतं तस्य नामान्ते प्लुतिः कर्तव्या । यस्त्वहं भो इत्येवमभिवदेन्न तस्य नाम्नोच्चारणं नापि प्लुतिरिति । **नाभिवाद्य** इत्यभिवादनशब्दोच्चारणप्रतिषेधः । यथा विहितमभिवादनं कर्तव्यम् । न पुनरहं भो इत्यादि तस्य प्राग्दर्शितत्वात् । **यथा शूद्र** इति च दृष्टान्तेनैतदेव ज्ञायते । शूद्रस्यापि वृद्धवयसोऽभिवाद्यत्वं पूर्वाभिभाष्यत्वमिष्यते । **विदुषेति** पादपूरणार्थम् ॥ १२६ ॥

ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् ॥
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ १२७ ॥

कृताभिवादनप्रत्याभिवादनयोः सौहार्दे प्राप्ते जिज्ञासाप्रश्ने जातिभेदाश्रयः **शब्द-नियमो**ऽयमिष्यते । प्रष्टव्यानां जातिनियमोऽयं न प्रष्टॄणाम् । नात्यन्तभिन्नार्थत्वाच्च एतेषां स्वरूपनियमोऽयं विधीयते । आरोग्यानामयशब्दौ समानार्थावेवं क्षेमकुशलशब्दावपि नात्यन्ताभिन्नौ । कुशलशब्दो यद्यपि प्रावीण्यवचनस्तथापीह संयोगिनामर्थानां शारीराणां चानपाये वर्तते । एतेऽवश्यं प्रयोक्तव्या अन्येषामपि यथाप्रतिभम् । विशेषे जिज्ञासयाऽप्रतिषेधः । तथा **महाभारते** कस्मिंश्चिदध्याये दर्शितम् । केचिदिह समागम्येति लिङ्गान्न गुर्वादिविषयोऽयं प्रश्नः किं तर्हि सवयसामेव । अभिगमनं हि गुरौ विहितं न यदृच्छया समागमः । अभिगमनेऽपि समागमोऽस्तीति यत्किंचिदेतत् ॥ १२७ ॥

---

१ " अचोऽन्त्यादि टि " व्या. सू. (१--१--६४) ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ॥
भो भवत्पूर्वकं त्वेनमभिभाषेत धर्मवित् ॥ १२८ ॥

प्रत्यभिवादनकाल अन्यत्र च **दीक्षितो** ज्योतिष्टोमादिषु दीक्षणीयातः प्रभृत्या अवभृथा**न्नाम्ना** न वाच्यस्तस्य यन्नामधेयं तन्नोच्चारयितव्यम्। **यवीयान्**कनीयानचिरकालजातः। **अपि**शब्दात् ज्येष्ठस्यादीक्षितस्यापि नामग्रहणनिषेधोऽनुमीयते । तथा च **गौतमः** (अ.२सू.२८)"नामगोत्रे गुरोः समानतो निर्दिशेत्"। मानः पूजा तत्पूर्वकं नाम ग्रहीतव्यं तत्रेश्वरो जनार्दनमिश्र इति। कथं तर्हि दीक्षितेन कार्यार्थे संभाषः कर्तव्यः **भो भवत्पूर्वकं** भोः शब्दं पूर्वं प्रयु**ज्यैनं** दीक्षितम**भिभाषेत** दीक्षितयजमानादिशब्दैर्यौगिकैः। न तु भोः शब्दपूर्वकं नामग्रहणमभ्यनुज्ञायते । भो भवच्छब्दः पूर्वो यस्याभिभाषणस्य तदेवमुक्ते द्वयोश्चैतयोः शब्दयोरेकत्र वाक्ये प्रयोगाभावाद्यवस्थां व्याचक्षते । यदा तेन सह संभाषणं भवति तदाऽऽमन्त्रितविभक्त्यन्तेन भोः शब्देन संबोध्यः । यदा तु तदीयगुणाख्यानं परोक्षं करोति तत्रभवता दीक्षितेनैवं कृतं तत्रभवानेवं करोतीत्येवं प्रयोक्तव्यम् । भवदिति च प्रातिपदिकमात्रमुपात्तं यथा विभक्त्या संबन्धमुपैति तदन्तं प्रयोक्तव्यम् ॥ १२८ ॥

परपत्नी तु या स्त्री स्यादसंबद्धा च योनितः ॥
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च ॥ १२९ ॥

अर्थप्रयुक्तं संभाषणं स्त्रिया सह यदा भवति तदैवं कर्तव्यम् । **या** तावत्परस्य **पत्नी** सा 'भवति सुभगे' अथवा 'भवति भगिनि'। भवच्छब्दोऽयं स्त्रीप्रत्ययान्तः संबुद्धौ कृतह्रस्वः। **भवतीत्य**त्रेतिकरणं पदार्थविपर्यासकृत्स्वरूपं परं बोधयति **सुभगे भगिनीत्यत्र** प्रकारे । **ब्रूयादित्य**धिकाराच्छब्दस्वरूपग्रहणं सिद्धम् । आकार्यतायां च मातर्यशस्विनि कनीयसी च दुहितरायुष्मतीत्येवमादिभिः शब्दैः संभाष्या । पत्नीग्रहणात्कन्याया नैष विधिः । **असंबद्धा च योनितः** मातृपक्षपितृपक्षाभ्यां या ज्ञातित्वं नागता मातुलदुहित्रादिस्तासामन्यं विधिं वक्ष्यति (१३२ श्लोके) 'ज्ञातिसंबन्धियोषित' इति। ननु च नैवैतत्सिद्धमस्योत्सर्गस्यान्यत्र चरितार्थत्वात्किमसंबद्धा चेत्यनेन । नात्र पौनरुक्त्योद्भावने यतितव्यं पद्यग्रन्थोऽयम् ॥ १२९ ॥

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ॥
असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः ॥ १३० ॥

गुरूनिति वचननिर्देशान्न य एवात्र गुरुरुक्तः स एव गृह्यते । किं तर्हि **गौतमीय** इव सामान्यशब्दो वित्तादिज्येष्ठवचनः। तान्**यवीयसो** भागिनेयादेः स्ववयोपेक्षया हीनवयसः।

---

१ फ—असंबन्धा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असावहमिति स्वं नाम निर्दिश्यते । तत्परश्चाहंशब्दोऽप्यनुज्ञायते । एतच्च प्रत्युत्थाया-गतानां कर्तव्यम् । अभिवादने भोःशब्दप्रयोगो निषिध्यते । उक्तं च **गौतमीये** "प्रत्युत्थानमभिवाद्य" इति ॥ १३० ॥

मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ॥
संपूज्या गुरुपत्नीवत्समास्ता गुरुभार्यया ॥ १३१ ॥

एताश्च **गुरुपत्नीवत्संपूज्याः** प्रत्युत्थानाभिवादनासनदानादिभिः । 'गुरुपत्नीवत्' इत्यनेनैव सिद्धे **समास्ता** इति वचनमन्यदप्याज्ञादि गुरुपत्नीकार्यं कदाचिदनुजानाति । इतरथा प्रकरणात्संपूज्या इत्यभिवादनविषयमेव स्यात् । पलितवयसश्च स्त्रियः स्मर्यन्ते । कनीयसीनामप्येष एवाभिवादनविधिः ॥ १३१ ॥

भ्रातुर्भार्योपसंग्राह्या सवर्णाऽहन्यहन्यपि ॥
विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः ॥ १३२ ॥

भ्रातुर्ज्येष्ठस्येति द्रष्टव्यम् । **उपसंग्राह्या** पादयोरभिवाद्या । **सवर्णा** समान-जातीया । क्षत्रियादिस्त्रीणां तु ज्ञातिसंबन्धिधर्मो भ्रातुर्भार्याणामपि । **विप्रोष्य ज्ञाति-संबन्धियोषितः** । विप्रोष्य प्रवासात्प्रत्यागतेन । न हि प्रोषितस्योपसंग्रहणसंभवः । **ज्ञातयः** पितृपक्षाः पितृव्यादयः, **सम्बन्धिनो** मातृपक्षाः श्वशुरादयश्च, तेषां ज्येष्ठानां याः स्त्रियः पूजारूपत्वादुपसंग्रहणस्य । न कनीयांसः पूजामर्हन्ति ॥ १३२ ॥

पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि ॥
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥ १३३ ॥

पितुश्च या भगिनी मातुश्च या भगिनी तस्यां, **स्वसरि** चात्मीयायां ज्येष्ठायां-भगिन्यां मातृवद्वृत्तिरतिदिश्यते ।

ननु च मातृष्वसुः पितृष्वसुश्चायमुक्त (श्लो. १३१) एव धर्मो "मातृष्वसा मातुलानी" इत्यत्र । अथोच्यते । तत्र गुरुपत्नीवदित्युक्तम् । इह तु **मातृवद्वृत्तिरित्युच्यत** इति । नैष भेदः । तुल्या हि गुरुपत्न्यां मातरि च वृत्तिः । केचिदाहुः **माता ताभ्यो गरीयसी**त्येतद्वक्तु-मनूद्यते भगिन्योः पितुर्मातुश्च गरीयस्त्वम् । यदा माताऽऽज्ञां ददाति स्वस्रादयश्च तदा मातुराज्ञा क्रियते न तासाम् । न चैतद्वाच्यमेतदपि सिद्धं "माता गौरवेणातिरिच्यत" इति । अर्थवादत्वात्तस्य ।

---

१ ड-क्ष—श्वश्वादयश्च ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये तु गुरुपत्न्या मातुश्च वृत्तिभेदं मन्यन्ते । गुरुपत्न्याः पूजाज्ञाद्यावश्यकम् । मातुस्तु शैशवात्वात्सर्ख्येनान्यथात्वमपि । लालनात्तत्रोभयोपदेशान्मातृष्वसुः पितृष्वसुश्च व्यवस्था । शैशवे लालनं तुल्यमेव स्वस्यां स्वसरि । अतीतशैशवस्य तु गुरुपत्नीवत्संपूज्यत्वमिति । न चानेनैवैतत्सिध्यति असति हि वाक्यद्वये मातृवद्वृत्तिरित्येतावता प्राकरणिकी अभिवादननिवृत्तिरेव विज्ञायेत ॥ १३३ ॥

दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ॥
त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु ॥ १३४ ॥

अथ पुनः स्नेहवृत्तिरतिदिश्यते । उक्तं पूर्वं "प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयतीति"। तत्र कियद्भिर्वर्षैः स्थाविर्यं भवति । लोके हि शिरः पालित्ये स्थविरव्यवहारस्तन्निरूपणार्थमिदम् । दशभिर्वर्षैर्जन्मनोऽधिकैरपि पौराणां सख्यमाख्यायते । तेन दशवर्षाधिको ज्येष्ठो भवति अपि तु मित्रवद्व्यवहर्तव्यः यथोक्तं भो भवन्निति वयस्येति । दशभ्यो वर्षेभ्य ऊर्ध्वं ज्येष्ठः । आख्यानमाख्या । दशाब्दा आख्या यस्य सख्यस्य । त्रिपदो बहुव्रीहिः । आख्यानिमित्तत्वाद्वर्षाणां सामानाधिकरण्यं निमित्तनिमित्तिनोर्भेदस्याविवक्षितत्वात् । एतावांश्च समासान्तर्भूतोऽर्थो यः पूर्वजो दशवर्षाणां यावत्स सखैव भवति । पुरे भवाः पौराः तेषाम् । पुरग्रहणं प्रदर्शनार्थं ग्रामवासिनामपि । एष एव न्यायः । ये केचिदेकस्मिन् ग्रामे सन्ति तान्यः कश्चित्परस्परप्रत्यासत्तिहेतुर्विद्यते ते सखायः । ये तु कलां कांचन बिभ्रति शिल्पगीतवाद्यादिकां तेषां पञ्चवर्षाणि योऽधिकः स सखा तत ऊर्ध्वं ज्येष्ठः । त्रयोऽब्दाः पूर्वे यस्य तच्छ्रोत्रियाणां सख्यम् । अल्पेनापि कालेन स्वयोनिष्वेकवंश्येषु कतिचिदहानि योऽधिकः स ज्येष्ठः । कियान्पुनः स्वल्पकालः न तावदब्दः । त्र्यब्दपूर्वमिति निर्दिश्याल्पेनेत्युच्यमानस्ततो न्यूनः प्रतीयते । एकवचननिर्देशाच्च न वर्षद्वयं नाप्येकोऽब्दः स्वल्पेनेति विशेषणानुपपत्तेः । परिच्छिन्नपरिमाणो ह्यब्दवाच्योऽर्थस्तस्याहोरात्रमात्रेण न्यूनस्य नाब्दत्वमस्ति । तस्मादल्पेनेति कालसामान्यमपेक्षते । संवत्सरादवरश्च तस्य विशेषः । अपिशब्दश्चैव शब्दस्यार्थे द्रष्टव्यः । अल्पेनैव कालेन सख्यं बहुना तु ज्येष्ठत्वमेव । एतच्च समानगुणानां समानजातीयानां च द्रष्टव्यम् । एतेन लौकिकं स्थविरलक्षणं निवर्तितसापेक्षिकमाश्रितम् ।

अन्ये तु व्याचक्षते । नानेन स्थविरत्वं लक्ष्यते किं तर्हि सखित्वमेव । यथाश्रुतत्यागेन स्थविरलक्षणं स्यात् । इयता कालेन सखा परतस्तु ज्येष्ठ इति ।

---

१ ख-क्ष—बालभ्येन । २ ख-क्ष—उभयोपदेशात् । ३ फ—यथाश्रुतार्थत्यागेन ।

For Private And Personal Use Only

अयं च श्लोकार्थः । एकत्र पुरे वसन्ति दशवर्षाणि यावत्तानि मित्राणि । कलाश्चतुःषष्टिस्तद्विदां संगत्या पञ्चभिर्वर्षैः । **स्वयोनिषु** स्वल्पेनापि च कालेन सह वसतां मित्रत्वमेव । अतश्च न सर्वो वयसा तुल्यो वयस्यः किं तर्हि एतदेव समानवयस्त्वेवैतल्लक्षणम् । युक्तमेतत् किंतूत्तरश्लोको विरुध्यते । तत्र हि जातेः प्राधान्यं न वयसः । यदि चात्रेयता कालेन ज्यैष्ठ्यमुक्तं भवति तदा विजातीयानामप्याशङ्क्यमानं न निवर्त्येत इति युक्तम् । पूर्वे च व्याख्यातार आद्यमेव व्याख्यानं मन्यन्ते ॥ १३४ ॥

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम् ॥
पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ॥ १३५ ॥

दशवर्षाणि जातस्य यस्य स भवति दशवर्षः । परिच्छेदकः कालः तस्य परिच्छेद्यो ब्राह्मणः श्रुतः । न च तस्योच्चनीचतादि कार्श्यादि वा कालेन परिमातुं शक्यम् । किं तर्हि तदीया काचित्क्रिया सा च जन्मनः प्रभृति नित्यसमवायिनी प्राणधारणलक्षणैव । एवं **शतवर्ष**मिति । **पितापुत्रौ** तौ द्रष्टव्यौ । **तयोः** संप्रधार्यमाणयोर्**ब्राह्मणः पिता** । चिरवृद्धेनापि क्षत्रियेण स्वल्पवर्षोऽपि ब्राह्मणः प्रत्युत्थायाभिवाद्यश्चेति प्रकरणार्थः ॥ १३५ ॥

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ॥
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ १३६ ॥

उक्तं जातेरुत्कर्षहेतुत्वम् । हीनजातीयेनोत्तमजातीयः पूज्यः । इदानीं समानजातीयानां य अभिवादनादिपूजाहेतवस्तेषां बलाबलमुच्यते । तत्र वयसः पुनरभिधानं बलाबलार्थम् । वित्तादिसंबन्धोऽत्र सर्वत्र पूजाहेतुः । वित्तवत्त्वं बन्धुमत्त्वं मानस्थानमित्ययमत्रार्थः । (न) विशिष्टता बन्धुतैव पितृव्यमातुलादिरूपता मानकारणं बन्धुमान्यो बहुबन्धुः स पूज्यः । **वयः** प्रकृष्टमिति ज्ञेयम् । ईदृश एव चार्थे प्रायेणायं प्रयुज्यते । "पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव सः" इति । यवच्च वयः पूजाहेतुः तदुक्तमेव दशाब्दाख्यमिति । **कर्म** श्रौतं स्मार्तं तदनुष्ठानपरता । **विद्या** सान्ता सोपकरणवेदार्थज्ञानम् ।

ननु विद्वान्यजते विद्वान्याजयतीत्यविद्यस्य कर्मानुष्ठानानधिकाराद्विद्यया विना कथं कर्मणां मानहेतुता ? नैष दोषः । प्रकर्षोऽत्राभिप्रेतः । अतिशयवती विद्या मानहेतुः । स्वल्पविद्यस्याप्यनुष्ठानोपपत्तिः । यो यावज्जानाति स तावत्यधिक्रियते । न विद्याया वाचनिकमधिकारहेतुत्वमपि तु सामर्थ्यलक्षणम् । अविदितकर्मस्वरूपो ह्यवैद्यस्तिर्यक्कर्मा काधिक्रियताम् ? शक्यं ह्यनेन कतिचित्स्मृतिवाक्यान्युपश्रुत्य जपतपस्यनुष्ठातुम् । अग्निहोत्रादिकर्मणां तु वेदवाक्यावबोध उपकरोति । तत्रापि यो यावज्जानाति स तावत्यधिक्रियते । अग्निहोत्रवाक्यानां योऽर्थं वेत्ति स तत्राधिक्रियते । क्रत्वन्तरज्ञानं न तत्रोपकारकम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथोच्यते । 'वेदः कृत्स्नोऽधिगन्तव्यः' इति । कृत्स्नवेदविषयोऽयं विधिरवबोध-
पर्यन्तस्तत्र कृत्स्नस्य वेदस्यावबोधे कर्तव्ये कुतोऽयं प्रतिभागावबोधसंभवः । येनोच्यते ।
'योऽग्निहोत्रवाक्यस्यार्थं वेत्ति वाक्यान्तरार्थमविद्वानप्यधिक्रियत' इति । अत्रोच्यते ।
एकशाखाध्ययनं तावदवश्यं कर्तव्यम् । तत्र येनैकशाखाऽधीता तस्याश्चार्थोऽवधृतः ।
सोऽनवधृतशाखान्तरार्थोऽधिक्रियते । ९

ननु च सर्वत्रैक एव शास्त्रार्थो यदि नाम पदवर्णानुपूर्वीभेदः शास्त्ररूपत्वं भिन्नं
पदार्थन्यायव्युत्पत्त्या वाऽवबोधः । न च प्रतिशाखं पदार्था विद्यन्ते नाऽपि न्यायस्तत्र येनैव
हेतुनैकस्याः शाखाया अर्थोऽवधार्यते शाखान्तरेऽप्यसावस्ति । न व्युत्पत्त्यन्तरमपेक्षते । तत्र
यद्येका शाखाऽवगता सर्वा एवावगता भवन्ति । सत्यम् । यान्येकस्यामग्निहोत्रादीन्युपदिष्टानि
तेषां शाखान्तरेऽप्युपदिश्यमानानामभूद्भेदः किन्तु कस्यांचिच्छाखायां कानिचित्कर्माणि १०
नैवोपदिश्यन्ते । यथा बाह्वृचे आश्वलायनके दर्शपूर्णमासौ श्येनादिरेव एवाभिचारकः ।
अन्ये च सोमयागवाजपेयबृहस्पतिसवादयः । तत्र यत्तच्छाखाधीनमग्निहोत्रज्योतिष्टोमादि
तत्राधिक्रियते । शाखान्तरं त्वनधीतमश्रुतकथं तद्विदितानि कर्माण्यतच्छाखाध्यायी वेत्तु ।
न चैते सोमयागा नित्या येनाननुष्ठानप्रत्यवायभयात्परिज्ञानाय शाखान्तरमन्विष्यते । आधानं
तु यद्यपि तत्र न पठितं तत्राप्युद्धराहवनीयमित्याहवनीयस्य विधानम् । लोकात्तदर्थमनवबुध्य- १५
मानः कोऽयमाहवनीयो यस्याधानमिति शाखान्तरमन्विष्यति । ततः शाखान्तरे पठ्यमान-
माधानप्रकरणं सर्वं पर्यालोचयति । एवमामावास्येन वा हविषेष्ट्वा पौर्णमासेन वेति श्रुत्वा
कीदृशमनयोः कर्मणो रूपमिति तथैव शाखान्तरं गवेषयते । एवमन्यदपि यत्काम्यं नित्यं
चानुष्ठेयं तस्य यत्किंचिदङ्गजातं तत्र नाम्नातमाध्वर्यवमौद्गात्रं वा तत्परिज्ञाय तथैव
शाखान्तराद्ध्रियते । यत्तु शाखान्तराधीतमनुष्ठेयं तस्य न वेदनसंभवः । अनेकशाखा- २०
ध्यायिनस्तु तदर्थपरस्य सर्वमेतत्प्रत्यक्षमिति । अस्तीदृशी विद्यामन्तरेणापि कर्मानुष्ठानं
अथवा ईषद्व्युत्पत्त्याऽपि संभवत्यनुष्ठानं यस्य तु निर्मला विद्या, व्याख्येयानि विद्यास्था-
नानि, तस्य विद्यामान्यतत्स्थानम् ।

गरीय इति द्वयोर्द्वयोः संप्रधारणेऽयमियसुन्प्रत्ययः । चतुर्दशविद्यास्थानज्ञः पङ्ग्वन्ध-
निर्धनादिरनधिकृतोऽपि विद्ययैव पूज्यते । तेषां विरोधे बलाबलमाह । **गरीयो** २१
यद्यदुत्तरम् । एकस्य वित्तमन्यस्य बहुबन्धुता तत्र वित्तवतो बन्धुमान्मान्यः । यस्माच्च
यत्परं तत्तस्मात्तरं गुरु । तथा बन्धोर्वयः ततः पूर्वस्मादपि वित्तात्तद्गुरु सिद्धम् । अत
उपपन्नं, "श्रुतं तु सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्मस्येति" **गौतमवचनम्** (अ.६ सू.१९।२०)।

---

१ ख–विद्यामान्यतः स्थानं । २–" द्विवचनविभज्योपपदे " (व्या. सू. ५–३–५७)

१८

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गरीय इति कथं प्रकर्षप्रत्ययो यावता नैव पूर्वस्य गुरुत्वम् । यदि हि द्वे रूपिणी तत्रोत्तरीयस्य गरीयस्त्वमस्ति तर्हि पूर्वापेक्षया वित्तस्य नास्तीति चेत्समुदाये सामान्येन गुरुत्वेऽपेक्षिते अपरस्य प्रकर्षविवक्षायां युज्यत ईयसुन् । मानः पूजा तस्य स्थानं कारणम् । ' मानस्थानानीति ' वा पाठेऽन्तर्भूतभावार्थो द्रष्टव्यः । ' मान्यत्वस्थानानि ' मान्यत्वकारणानि ॥ १३६ ॥

एकैकगुणसंबन्धे परस्य ज्यायस्त्वमुक्तम् । यत्रेदानीं द्वौ पूर्वावेकस्य भवतोऽपरस्यैकः पर इति तत्र कथमित्यत आह ।

पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ॥
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥ १३७ ॥

पञ्चानामेतेषां मान्यस्थानानां यत्र **भूयांसि** बहून्यसर्वाणि स मान्यः । तत्र परत्वमाहर्तव्यम् । एकस्य वित्तबन्धू द्वे । अन्यो वृद्धवयाः । तत्र पूर्वे बाधके । सत्यपि बहुत्वे यदि न श्रेष्ठानि भवन्ति एकं चैकस्यात्युत्कृष्टं तदा साम्यं न पुनः परबाधकत्वं गरीय एकापेक्षया चरितार्थत्वात् । यदि तु भूयांसि गुणवन्त्यत्युत्कृष्टानि तदा साम्येऽपि संख्यया परेषां, पूर्वाणि परैश्च समसंख्यानि, तदा न पूर्वतरतया बाध्यबाधकभावः । किं तर्हि सामान्यमेव । ननु च यत्र **गुणवन्ति** स्युः सोऽत्र मानार्ह इत्यभिधानेन समसंख्यस्यापि पूर्वस्य बाधकत्वमेव युक्तम् । नैवं तुल्यत्वे गुणानामेतस्य चरितार्थत्वात् यथैकोऽपि विद्यावानापरोऽपि तयोर्यस्य गुणवती प्रकृष्टा विद्या स प्रशस्यते । एवं सर्वत्र **त्रिषु वर्णेषु** ब्राह्मणक्षत्रियवैश्येषु यद्येते गुणा भूयांसः प्रकृष्टाश्च क्षत्रियस्यापि भवन्ति तदा हीनगुणेन ब्राह्मणेन जात्युत्कृष्टेनापि क्षत्रियः पूज्यः । एवं क्षत्रियेण वैश्यः । एवं त्रिभिरपि द्विजातिभिः । **शूद्रोऽपि दशमी**मितः । दशमी अन्त्यावस्थोच्यते । अत्यन्तवार्धकोपलक्षणमेतत् । एवं च वित्तबन्धू शूद्रस्य माने हेतू त्रैवर्णिकान्प्रति दशमीग्रहणात् । कर्मविद्ये तु नैव तस्य संभवतोऽनधिकारात् ।

भूयांसीत्याधिक्यमात्रं विवक्षितं न बहुत्वसंख्यैव । तेन द्विविषयताऽपि सिद्धा भवति । न ह्ययं संख्यावाच्येव बहुशब्द इत्यत्र प्रमाणमस्ति भूयःशब्दश्चायं न बहुशब्दः आधिक्ये च तत्रतत्र दृष्टः प्रयोगः । " भूयांश्चात्र परिहारो भूयसाऽभ्युदयेन योक्ष्य " इति प्रत्ययार्थबहुत्वमपि न विवक्षितम् । " जात्याख्यायां " ह्येतद्बहुवचनम् । विवक्षायां हि एकस्य गुणवतो मानहेतुत्वं न स्यात्ततश्च पूर्वोऽवगतिर्बाध्यते । शूद्रोऽपि दशमीमित्यत्र च केवलस्यैव वयसः प्रकर्षे मानहेतुत्वं ब्रुवन्नविवक्षां दर्शयति । समाचारश्चैवमेव ॥ १३७ ॥

---

१ फ—पूर्वस्य वा । २ फ—न कर्मविद्ये तु । ३ व्या. सू. ३।२।५८ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः ॥
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥ १३८ ॥

अयमन्यः पूजाप्रकारः प्रासङ्गिक उच्यते । **चक्री** रथिको गन्त्र्यादियानाधिरूढ-स्तस्य **पन्था देयः** । येन भूमिभागेन ग्रामादि देशान्तरं गम्यते स पद्धतिः पन्था उच्यते । तत्र यदि पृष्ठतः संमुखतो वा रथिक आगच्छेत्तदा तद्गमनोपरोधिनः पथिप्रदेशा-त्पदातिरपक्रामेत् । **दशमीस्थो**ऽत्यन्तपरिणतवयाः । **रोगी** व्याधिनाऽत्यन्तपीडितः । **भारी** गृहीतव्रीह्यादिगुरुद्रव्यः सोऽपि यथोपसर्तुमशक्तोऽनुग्राह्यः । **स्त्रिया** अनपेक्ष्यजाति-गुणभर्तृसंबन्धान्स्त्रीत्वमात्रेणैव । **राजा च** विषयेश्वरोऽत्राभिप्रेतो न क्षत्रिय एव । तथा चोत्तरत्र पार्थिवग्रहणेन निगमने पृथिव्या ईश्वरः पार्थिवः ।

ननु चोपक्रमे राजशब्दश्रवणाद्वाक्यान्तरगतः पार्थिवशब्दस्तत्पर एव युक्तः । राजशब्दो हि क्षत्रियजातिवचनो विज्ञातः स तावदनुपजातविरोधित्वादुपक्रमगतो मुख्यार्थो ग्राह्यः । बलादिवाक्ये तु तत्सापेक्षक्षत्रियजातिविहितेन धर्मेण पृथिवीपालनाख्येन पार्थिव-शब्दस्य प्रयोगसंभवेन जात्यन्तरविषयत्वमयुक्तम् । अत्रोच्यते । मान्यताऽत्र श्रुता स्नातको नृपमानभागीति । तत्र क्षत्रियजातीयमात्रान्मान्यत्वं **स्नातकस्य** सिद्धमेव ब्राह्मणं दशवर्षमिति । तत्र हि भूमिपशब्दः क्षत्रियजातिमात्रोपलक्षणार्थ इत्युक्तम् । उपलक्षणत्वाच्च राजजातेः क्षत्रियस्यापि प्रजेश्वरस्यायं धर्मो विज्ञायते । **वरो** विवाहाय प्रवृत्तः । एतेषां **पन्था देयः** । त्यागमात्रं च ददात्यर्थः । त्यागश्च पथोऽपसरणम् । अत एव चतुर्थी न कृता ॥ १३८ ॥

तेषां तु समवेतानां मान्यौ स्नातकपार्थिवौ ॥
राजस्नातकयोश्चैव स्नातको नृपमानभाक् ॥ १३९ ॥

तेषां तु समवेतानामेकत्र संनिपतितानां **मान्यौ स्नातकपार्थिवौ** । प्रकृतेन पथोदानेन **नृपमानभाक्** नृपस्य सकाशान्मानं भजते लभते । षष्ठी निर्धारणे (व्या. सू. २।३।४१)। चक्र्यादीनां त्वन्योन्यं विकल्पः स च शक्त्यपेक्षः ॥ १३९ ॥

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ॥
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ १४० ॥

आचार्यादिशब्दानामेवार्थनिरूपणार्थमिदमारभ्यते । सोपचारो हि लोके एषां प्रयोगो न च शब्दार्थसंबन्धस्य स्मर्तृभिराचार्यपाणिनिप्रभृतिभिरेतन्निरूपितम् । इयं चाचार्यपदार्थस्मृतिर्व्यवहारमूला, न वेदमूला, पाणिन्यादिस्मृतिवत् । न ह्यत्र किंचित्कर्तव्य-मुपदिश्यते । अस्य शब्दस्यायमर्थ इति सिद्धरूपोऽयमर्थो न साध्यरूपः ।

१ अग्रे श्लोकः १३९ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपनीयोपनयनं कृत्वा **यो वेदम**ध्यापयति ग्राहयति स आचार्यः । ग्रहणं चात्राध्येत्रन्तरनिरपेक्षं वाक्यानुपूर्वीस्मरणम् । कल्पशब्दः सर्वाङ्गप्रदर्शनार्थः । **रहस्यमुपनि**षदः । यद्यपि तेऽपि वेदशब्देनैव गृहीतास्तथापि द्वितीयस्तेषां व्यपदेशोऽस्ति । वेदान्ता इत्यन्तशब्दं समीपवचनं मन्यमानो नैते वेदा इति मन्येत तदा शङ्कानिवृत्त्यर्थं रहस्यग्रहणम् ।

अन्ये तु रहस्यं वेदार्थं वर्णयन्ति । तेन न स्वरूपग्रहणमात्रादाचार्यकनिष्पत्तिः । अपि तु तद्व्याख्यानसहितात् । तथा चाभिधानकोशेऽभिहितम् "विवृणोति च मन्त्रार्थानाचार्यः सोऽभिधीयते" इति । मन्त्रग्रहणं वेदवाक्योपलक्षणार्थम् । अस्मिंश्च व्याख्यानेऽर्थावबोधोऽप्याचार्यकरणविधिप्रयुक्तः स्यान्न केवलं संपाठमात्रम् । ततश्च सर्वेण सर्वस्वाध्यायविधिरनुष्ठापकः स्यात् । अस्तु परप्रयुक्तेऽप्यनुष्ठाने स्वाध्यायविधेर्ब्रह्मचारिणः स्वार्थसिद्धिः यदा, तर्हि काम्यत्वादाचार्यकरणविधेराचार्यो न प्रवर्तेते तदा स्वाध्यायविधेर्[1]र्यानुष्ठानं न प्राप्नोति ; ततश्च न नित्यस्वाध्यायविधिः स्यात् । न च रहस्यशब्दो वेदार्थवचनतया प्रसिद्धस्तस्मात्पूर्वमेव रहस्यग्रहणस्य प्रयोजनं प्राधान्याद्वा पृथगुपादानम् । यत्तु 'विवृणोति च मन्त्रार्थान्' इत्यस्मृतिरेवैषा । मन्त्रशब्दस्योपलक्षणत्वे प्रमाणाभावात्तस्मात्पाठाभिप्रायमस्य विधेरप्रयोजकत्वम् । अतो वेदस्वरूपग्रहणे माणवकस्य जाते आचार्यकरणविधिनिवृत्तिः ॥ १४० ॥

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ॥
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ १४१ ॥

वेदस्यैकदेशो मन्त्रः ब्राह्मणं वा । वेदवर्जितानि वा केवलान्यङ्गान्येवं[2] **योऽध्यापयति** तथा सर्वमपि वेदम् । **वृत्त्यर्थं** जीविकार्थम् । नाचार्यकरणविधिवशेन **स उपाध्यायो** नाचार्यः । अन्येनोपनीतं यः कृत्स्नमपि वेदमध्यापयति नासावाचार्यः । उपनीयापि यः कृत्स्नं वेदं नाध्यापयति सोऽपि नाचार्यः । यद्येवमेकदेशग्रहणमुपाध्यायलक्षणे[3] कृतमाचार्यलक्षणे[4] उपनयनग्रहणं यस्तर्ह्यनुपनेता कृत्स्नवेदाध्यापकश्च तस्य किं लक्षणं नासावाचार्यो नाप्युपाध्यायः । न चापि नामान्तरं तस्य श्रुतम् । उच्यते । अल्पं वा बहु वा यस्य श्रुतस्येत्यनेन गुरुरसावाचार्यान्न्यून उपाध्यायादप्यधिकः । **अपि पुनः** शब्दौ पादपूरणार्थौ ॥ १४१ ॥

---

१ ढ क्ष –स्वाध्यायविधि । २ ढ क्ष–एवं । ३ लक्षणा । ४ ड क्ष–लक्षणेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निषेकादीनि कर्माणि यः करोति यथाविधि ॥
संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ १४२ ॥

निषेकग्रहणात्पितुरयं गुरुत्वोपदेशः । निषेको रेतःसेकः स आदिर्येषां कर्मणाम् । आदिग्रहणात्सर्वे संस्कारा गृह्यन्ते । तानि **यः करोत्यन्नेन च यः संभावयति** संवर्धयति । चैवेनमिति वा पाठः । अर्थस्तु स एव । अन्नेनैव । संभावनोपपत्तेः । अर्थान्तरनिर्देशः एनं कुमारम् । ननु चान्वादेशः न चेह कुमारस्य पूर्वमुपदेशः । नैवं कस्यान्यस्य **निषेकादीनि** क्रियन्ते तानि **यः करोति** सामर्थ्यादपि निर्देशो न निर्देशात एव । एवमाभ्यां गुणाभ्यां हीनः केवलजनकत्वे[1] पितैव भवति न गुरुः । न चैवं मन्तव्यमसति गुरुत्वे नासौ मान्यः सर्वप्रथममसावेव मान्यः । तथा च भगवान्**व्यासः** "प्रभुः शरीरप्रभवः प्रियकृत्प्राणदो गुरुः । हितानामुपदेष्टा च प्रत्यक्षं दैवतं पिता" इति ॥ **विप्रग्रहणं प्रदर्शनार्थम्** ॥ १४२ ॥

अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् ॥
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥ १४३ ॥

आहवनीयादीनामग्नीनामुत्पादककर्माग्न्याधेयमुच्यते । 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति विहितम् । **पाकयज्ञा** दर्शपूर्णमासादयः । **अग्निष्टोमादयो मखाः** सोमयागः । **मखशब्दः** क्रतुपर्यायः । एतानि कर्माणि **यस्य यः करोति स तस्यर्त्विगित्युच्यते** । यस्य तस्येतिशब्दौ संबन्धिता दर्शयतः । यस्यैवैतानि कर्माणि करोति तस्यैवासावृत्विगुच्यते नान्यस्य । सर्व एत आचार्यादयः सम्बन्धिशब्दाः । **वृतः** प्रार्थितः शास्त्रीयेण विधिना कृतवरणः । मान्यताप्रसङ्गादृत्विक्संज्ञोपदेशोऽत्र न हि ब्रह्मचारिधर्मेषु ऋत्विजामवसरः । आचार्यादिवत्पूज्य इत्यस्मिन्नवधौ तल्लक्षणमुच्यते ॥ १४३ ॥

य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ ॥
स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन ॥ १४४ ॥

य उभौ श्रवणौ ब्रह्मणा वेदाध्यापनेना**वृणोति स माता स पिता ज्ञेयः** । नेदमध्यापकस्य मातापितृशब्दवाच्यताविधानम् । आचार्यादिशब्दवत्प्रसिद्धार्थौ हि पितृमातृशब्दौ । जनकः पिता । जननी माता । उपचारेणाध्यापकस्तुत्यर्थं प्रयुज्येते । यथा गौर्वाहीक इति । लोके ह्यत्यन्तोपकारकौ मातापितरौ प्रथितौ, तौ हितं जनयतो भक्तादिना च पुष्णीतः स्वशरीरानपेक्षमपि पुत्रहिते प्रवर्तेते । अतो महोपकारकत्वात्ताभ्यामुपाध्यायः स्तूयते । यो विद्यायामुपकरोति स सर्वोपकारकेभ्यः श्रेयान् । **अवितथं** क्रियाविशेषणमेतत् । अवितथेन सत्येन ब्रह्मणाऽनक्षरविस्वरवर्णितेन तन्न दुष्येत । अपकारो द्रोहस्तदुपरि अवज्ञानं च **कदाचन** निष्पन्नमपि ग्रन्थग्रहणे तदुत्तरकालमपि **न द्रुह्येत** । तथा च

१ ख—जनकत्वेऽपि नैव भवति गुरुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरुक्तकारः " अध्यापिता ये गुरुन्नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा " । नाद्रियन्ते अवज्ञां कुर्वन्ति " यथैव ते शिष्या न गुरोर्भोजनीयाः न भोगाय कल्पन्ते तथैव तान्न भुनक्ति " । श्रुतं तत्पाठान्तरमातृणत्तीति । अर्थकर्णौ भिनत्ति विध्यतीत्युपमयाऽध्यापनमेवोच्यते । " अविद्धकर्णः किल स स्मृतो नरः श्रुतं न यस्य श्रुतिगोचरं गतम्" इति । सर्वाध्यापकानामीदृशेऽध्यायगुरूणामयं कृतविद्यस्यापि द्रोहप्रतिषेधः ॥ १४४ ॥

उपाध्यायान्दशाचार्य आचार्याणां शतं पिता ॥
सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते ॥ १४५ ॥

स्तुतिक्रमेण प्रकृष्टपूर्वविधानम् । उपाध्यायाच्छ्रेष्ठ आचार्यस्तस्मात्पिता ततोऽपि मातेति दशादिसंख्यानिर्देशः स्तुतिमात्रम् । पूर्वस्मात् पूर्वस्मात्परस्य परस्यातिशयो विवक्षित अत एव सहस्रं पितुरिति वचनम् । **उपाध्यायान्दशातिरिच्यते** । दशभ्य उपाध्यायेभ्योऽधिकः । कथं पुनरत्र द्वितीया । अतिरयं कर्मप्रवचनीयः[1] । उपाध्यायानति क्रम्यातिक्रम्यातिरिच्यते **गौरवेण** सातिशयेन युज्यते । अथवाऽऽधिक्यमतिरेकः तद्धेतुकेऽभिभवे धातुर्वर्तते । गौरवाधिक्येनोपाध्यायानभिभवति । अतिरिच्यत इति कर्मकर्तरि द्वितीया चाविरुद्धा ' दुहिपच्योर्बहुलं सकर्मकयोः ' (वार्तिकं व्या. सू. ३।१।८७) इति बहुलग्रहणात् ।

ननु चानन्तरमेव वक्ष्यति " गरीयान् ब्रह्मदः पिता " इति, इह चाचार्यात्पितुराधिक्यमुच्यते तदितरेतरव्याहतम् । नैष दोषः । इहाचार्यो नैरुक्तदर्शनेनाध्यापकः संस्कारमात्रेणाचारोपदेशमात्रेण चाभिप्रेत आचार्य आचारं ग्राहयतीति । न चैष नियमः स्वशास्त्रसिद्धाभिरेव संज्ञाभिर्व्यवहारः । गुरुशब्दो ह्यत्र पितरि परिभाषित आचार्ये च तत्र तत्र प्रयुज्यते । तेन स्वल्पोपकारादुपनयनमात्रकरादाचारग्राहकादध्यापनरहितादिदं पितुर्ज्यायस्त्वम् । अस्मिंश्च क्रमे विवक्षिते समवाय एतेषां माता प्रथमं वन्द्या ततः पिता तत आचार्यस्तत उपाध्यायः ॥ १४५ ॥

मुख्याचार्यसन्निधौ पितरि च संस्कर्तरि सन्निहिते तत्र क्रमः । अत आह[2]

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ॥
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥ १४६ ॥

उत्पादको जनकः **ब्रह्मदाता**ऽध्यापकः तौ द्वावपि पितरौ तयोः पित्रोर्**गरीयान्पिता यो ब्रह्मदः** । अतः पित्राचार्यसमवाये आचार्यः प्रथममभिवाद्यः । अत्र हेतुरूपमर्थवादमाह । **ब्रह्मजन्म हि** ब्रह्मग्रहणार्थं जन्म ब्रह्मजन्म, शाकपार्थिवादित्वात्समासः

१ " कर्मप्रवचनीययुक्ते द्वितीया " (व्या. सू. २।३।८) २ अग्रे १४६ श्लोकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(वार्तिकं व्या. सू. २।१।६०) । अस्मिन्समासे उपनयनं **ब्रह्मजन्म** । अथवा ब्रह्मग्रहणमेव जन्म । **तद्धिमस्य शाश्वतं** नित्यं **प्रेत्योपकारकमिह** चोपकारकम् ॥ १४६ ॥

कामान्माता पिता चैनं यदुत्पादयतो मिथः ॥
संभूतिं तस्य तां विद्याद्यद्योनावभिजायते ॥ १४७ ॥

श्लोकद्वयमर्थवादः । मातापितरौ **यदेनं** दारकमुत्पादयतो जनयतो **मिथो** रहसि परस्परं तत्**कामाद्धे**तोर्मन्मथपरवशौ **संभूतिं तस्य तां विद्यात्** तस्य दारकस्य संभवोत्पत्ति**र्यद्योनौ** मातृकुक्षाव**भिजायते**ऽङ्गप्रत्यङ्गानि लभते । संभवश्च येषां भावानां ते तथैव विनश्यन्ति । अतः किं तेन संभवेन यस्यानन्तरभावी विनाशः ॥ १४७ ॥

आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ॥
उत्पादयति सावित्र्या सा सत्या साऽजरामरा ॥ १४८ ॥

आचार्यात्तु यत्तस्य जन्म तदविनाशि । गृहीते वेदेऽवगते च तदर्थे कर्मानुष्ठानात्स्वर्गापवर्गप्राप्तिरित्यस्य सर्वस्याचार्यमूलत्वात्स श्रेष्ठः । **यां जातिमुत्पादयति** यं संस्कारमुपनयनाख्यं द्वितीयं जन्मेति जन्मसंस्तुतिं निर्वर्तयति सावित्र्या तदनुवचनेन **सा** जातिः **सत्या साऽजरामरा** । यद्यप्येतेऽभिन्नार्थाः शब्दास्तथापीहोपनयनाख्यस्य जन्मनो मातृजन्मनः सकाशाद्गुणातिशयविवक्षायां प्रयुक्ताः । न हि जरामृत्यू प्राणिनामिव जातेः संभवतः । अविनाशित्वं त्वेकेनैव शब्देन शक्यते प्रतिपादयितुम् । न च तत्प्रतिपाद्यते वेदपारग आचार्यो यां जातिं विधिवत्सावित्र्या उपनयनाङ्गकलापेन सावित्रीशब्दस्य तल्लक्षणत्वात् उत्पादयति सा श्रेयसीति पदयोजना । जातिर्जन्म ॥ १४८ ॥

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ॥
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥ १४९ ॥

य उपाध्यायो **यस्य** माणवक**स्योपकरोति श्रुतस्य** श्रुतेनेत्यर्थः । **अल्पं वा बहु वा** क्रियाविशेषणमेतत् । **तमपि** स्वल्पश्रुतोपकारिणं **गुरुं विद्यात्** । एवं तु योजना ज्यायसी। यस्य श्रुतस्य सामानाधिकरण्ये वेदविषयस्य वेदाङ्गविषयस्य वा शास्त्रान्तरविषयस्य तर्ककलाशास्त्रस्य यदल्पं बहु वा तेनोपकरोतीत्यध्याहारः । श्रुतं च तदुपक्रिया चासौ श्रुतोपक्रिया तया उपकारक्रियया तद्धेतुत्वाच्छ्रुत**मुपक्रियेति** सामानाधिकरण्यम् । गुरुवृत्तिस्तत्र कर्तव्या तद्व्यपदेशो वा तत्राचार्यादिशब्दवत्स्मर्यते ॥ १४९ ॥

ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता ॥
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः ॥ १५० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मग्रहणार्थं जन्म ब्राह्ममुपनयनं तस्य **कर्ता** । **स्वधर्मस्य शासिता** उपदेष्टा वेदार्थव्याख्यानेन । स तादृशो **बालोऽपि** ब्राह्मणो **वृद्धस्य** ज्येष्ठस्य तर्ककलाशास्त्रस्य वा यदल्पं वा बहु वा तेन **पिता भवति** । पितृतुल्या तत्र वृत्तिः कर्तव्या ज्येष्ठेनापि । कथं पुनः कनीयाञ्ज्येष्ठमुपनयते अष्टमे त्युपनयनं यावच्च नाधीतश्रुतवेदस्तावन्नाचार्यकरण-विधावधिक्रियते । एवं तर्हि नोपनयनमंत्रं ब्रह्म जन्म किं तर्हि स्वाध्यायग्रहणमेव । तस्य **कर्ता**ऽध्यापयिता । स्वधर्मस्य वेदार्थस्य शासिता व्याख्याता पिता भवति । **धर्मतः** पितृधर्मास्तत्र कर्तव्याः । धर्मत इति धर्मनिमित्तं तत्र पितृत्वम् । न च ते धर्मा अध्यापक-व्याख्यात्रोः[1] पितृसंबन्धिनः सिद्धाः सन्ति । अतो विधीयैते[2] ब्राह्मणवत्क्षत्रिये वर्ति-तव्यमिति ॥ १५० ॥

अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः ॥
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ १५१ ॥

पूर्वस्य पितृवद्वृत्तिविधेरर्थवादोऽयं परकृतिनामा । **अङ्गिरसः** पुत्रः **कवि**र्नाम **शिशु**-**र्बालः** पितृतुल्यान्पितृव्यमातुलतत्पुत्रादीनधिकवयसोऽध्यापयाञ्चकाराध्यापितवान् । स चाह्वाननिमित्तेषु **तान्पुत्रका** आगच्छत इत्याजुहाव । **ज्ञानेन परिगृह्य** तान्स्वीकृत्य शिष्या-न्कृत्वा ॥ १५१ ॥

ते तमर्थमपृच्छन्त देवानागतमन्यवः ॥
देवाश्चैतान् समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥ १५२ ॥

ते पित्रादिस्थानीया पुत्रका इत्याह्वानेन**नागतमन्यव** उत्पन्नक्रोधास्तमर्थं पुत्रश-ब्दाह्वानं **देवान्पृष्टवन्त** अनेन बालेन वयमेवमाहूयामहे किमेतद्युक्तं ते **देवाः** पृष्टाः सन्तः सर्वे समवायं कृतवन्तः **समेत्य** ऐकमत्यं स्थापयित्वैतान्कवेः पितॄनूचुरुक्तवन्तो **न्याय्यं** युक्तं **वो** युष्मान् **शिशुरुक्तवान्** ॥ १५२ ॥

अज्ञो भवति वै बालः पिता भवति मन्त्रदः ॥
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥ १५३ ॥

यस्मान्न च वयसा स्वल्पेन **बालो भवति** किं तर्ह्य**ज्ञो** मूर्खो वृद्धोऽपि यः । **मन्त्रद** उपलक्षणम् । मन्त्रान्वेदान्यो ददात्यध्यापयति विवृणोति च स **पिता भवति** । **वै** शब्द आगमान्तरसूचकः । देवानामप्येष आगमः पुराण एव । तथा चैतिह्यसूचकः परोपदेश **आहु**रिति । **अज्ञं** मूर्खं **बालमित्याहु**रस्मत्पूर्वेऽपि **पितेति मन्त्रदम्** । इतिकरणं स्वरूप-

---

१ फ-व्याख्यात्रोः २ ढ-क्ष-विधीयन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परतां बोधयति । यतः परतः श्रूयते बाल इत्येतेन शब्देनाज्ञमांत्रः । अतश्च बालशब्दाद्वितीयाया अभावः। छान्दोग्ये शैशवं ब्राह्मणमेतद्वस्तुतः स्मृतिकारेण वर्णितम् ॥ १५३ ॥

न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ॥
ऋपयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ १५४ ॥

इयमपराऽध्यापकप्रशंसा । **हायन**शब्दः संवत्सरपर्यायः । न बहुभिर्वर्षैः परिणत- ९
वया महान्पूज्यो भवति **न पलितैः** केशश्मश्रुरोमभिः शुक्लैर्न **वित्तेन** बहुना **न बन्धुभिः**
प्रागुक्तानि मान्यस्थानान्यापद्यन्ते । समुदितैर्न महान्भवति किं तर्हि एकयैव विद्यया। यस्मा-
दृपयश्चक्रिरे ऋषिर्दर्शनात् निःशेषवेदार्थदर्शिनो निश्चित्येमं **धर्मं** व्यवस्थापितवन्तः ।
योऽनूचानः अनुवचनमध्यापनं कृत्स्नाङ्गस्य वेदस्य **स नो**ऽस्माकं **महा**ञ्छ्रेष्ठः । करोति
व्यवस्थापने वर्तते नाभूतजनने ॥ १५४ ॥ १०

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ॥
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥ १५५ ॥

अयमप्यर्थवाद एव । यदुक्तं वित्तादिभ्यः समुदितेभ्यः केवलाऽपि विद्या ज्यायसीति तदेव सप्रपञ्चमनेन निर्दिश्यते । ब्राह्मणानां ज्ञानेन **ज्यैष्ठ्यं** न वित्तादिभिः,
क्षत्रियाणां वीर्यतः वीर्यं द्रव्यस्य कौशलं दृढप्राणता च, **वैश्यानां धान्यधनतः** ११
धान्यस्य पृथगुपादानाद्धनशब्दो हिरण्यादिवचनः ब्राह्मणपरिव्राजकवत् । बहुधनो वैश्यः
स ज्येष्ठः । आद्यादित्वात्तृतीयार्थे तसिः । हेतौ तृतीया (व्या. सू. २।३।२३) ॥ १५५ ॥

न तेन वृद्धो भवति येनास्य पलितं शिरः ॥
यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः ॥ १५६ ॥

न तेन वृद्ध उच्यते **येनास्य पलितं** धवलं **शिरः** शिरःस्थाः केशाः । कथं तर्हि २०
यो वै युवाऽपि तरुणोऽपि अथ चाधीते **तं देवाः स्थविरं विदुः** ब्रुवते । देवाः किल
सर्वस्य वेदितार इति प्रशंसा ॥ १५६ ॥

यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति ॥ १५७ ॥

इयमध्ययनाध्येतृस्तुतिः । **काष्ठमयो** वारणो यः क्रियते क्रकचादिना हस्त्याकृतिः २१
स यथा निष्फलो न हस्तिकार्यं राज्ञां शत्रुवधादि करोति एवं यो ब्राह्मणो नाधीते स काष्ठतुल्यो न कश्चिदधिकारी । **चर्ममयो मृगः** चर्मविकारोऽन्योऽपि यो मृगः स निष्फलो नाऽऽखेटकादिकार्यं करोति । त्रय एते **नाममात्रं बिभ्रति** न तस्यार्थम् ॥ १५७ ॥

---

१ ख-अहमाहुः ।

१९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला ॥
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥ १५८ ॥

षण्ढो नपुंसक उभयव्यञ्जनोऽशक्तः स्त्रीगमने **यथा स्त्रीष्वफलः । यथा गौर्गवि** स्त्रीगौः स्त्रीगव्या एवं **तथा विप्रोऽनृचो**ऽनधीयानोऽ**फलः** ॥ १५८ ॥

सप्ताष्टश्लोकाः अध्येतृवेदित्रोः प्रशंसार्था अतिक्रान्ताः । इदानीमश्रद्धस्य शिष्यस्याधीयानस्येतस्ततश्चित्तं व्याक्षिप्यते ।

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ॥
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥ १५९ ॥

अध्यापयितुः क्रोधोत्पत्तौ ताडनपरुषभाषणाद्यमत्यर्थं प्राप्तं निषिध्यते । **अहिंसया** अताडनेन **भूतानां** भार्यापुत्रदासशिष्यसोदर्याणा **श्रेयोर्थमनुशासनं कार्यम्** । भूतग्रहणान्मा शिष्यस्यैव विज्ञायि । दृष्टादृष्टफलावाप्तिः श्रेयः तदर्थमनुशासनम् । अग्रन्थको वोपदेशः, शास्त्राध्यापनव्याख्याने वा । यथासंभवमतिताडनं क्रोशनं चात्र प्रतिषिध्यते । ईषत्ताडनं त्वभ्यनुज्ञातमेव 'रज्ज्वा वेणुदलेन' वेति । कथं तर्हि मार्गे स्थाप्याः । **वाक् चैव मधुरा** सान्त्वपूर्विका प्रियया वाचा **श्लक्ष्णया** नोच्चैरुद्धतेन काकरूक्षेण स्वरेण प्रियेणाऽपि 'अधीष्व पुत्रक मा चित्तमन्यत्रावध्नाः श्रद्धया समापय शीघ्रं प्रपाठकं तत्क्षणं विहरिष्यसि शिशुभिः सवयोभिः' । यस्तु न तथा श्रद्धामुपैति तस्योक्तो विधिः 'वेणुदलेनेति' । **प्रयोज्या** वक्तव्या **धर्ममिच्छता** । एवं सातिशयोऽध्यापनधर्मो भवति ॥ १५९ ॥

यस्य वाङ्मनसे शुद्धे सम्यग्गुप्ते च सर्वदा ॥
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ॥ १६० ॥

यस्याध्यापयितुरन्यस्य वा सङ्क्षोभहेतौ सति **वाङ्मनसी शुद्धे** न कालुष्यं गच्छतः **सम्यग्गुप्ते** चोत्पन्नेऽपि कालुष्ये न परद्रोहव्यवसायो न च तत्पीडार्थः कर्मारम्भ एतत्सम्यग्गोपनं वाङ्मनसयोः । सर्वदा ग्रहणं पुरुषमात्रधर्मार्थं, नाध्यापयितुरेव अध्यापनकाले । **स वै सर्वमवाप्नोति** । **वेदान्ता** वेदसिद्धान्ताः । सिद्धशब्दस्यात्यन्तं सिद्ध इति 'सिद्धे शब्दार्थसंबन्धे' इत्यत्रात्यन्तशब्दस्येव लोपः । वैदिकेषु वाक्येषु यः सिद्धान्तो व्यवस्थितार्थोऽस्य कर्मण इदं फलमित्युपगत अभ्युपगतो वेदविद्भिः तत्फलं **सर्वं प्राप्नोति** । एवं च वदता वाङ्मनससंयमस्थानेन वाक्येन ऋतुषु पुरुषोभयधर्मतोक्ता भवति । केवलपुरुषधर्मातिक्रमे ह्यसति ऋतुवैगुण्येऽसंयतोऽपि वाङ्मनसाभ्यां किमिति कृत्स्नं फलं न प्राप्नोति येनोच्यते 'संयमी सर्वमाप्नोति' इति ।

---

१ गौतमीये अ. ३ सू. ४९. २ क ड क्ष—वाङ्मनसी ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये तु वेदान्तान् रहस्यब्राह्मणान्व्याचक्षते तेषु यदभ्युपगतं फलं नित्यानां कर्मणां निष्फलानां च यमनियमाना तत्फलं ब्रह्मप्राप्तिलक्षणं सर्वमाप्नोति। कथं पुनर्नित्यानि ब्रह्मप्राप्त्यर्थानीति चेदस्ति केषां चिद्दर्शनम् । अथवा वेदस्यान्तोऽध्यापनसमाप्तिस्ततो यत्फलमाचार्यकरणविधिस्तत्प्राप्नोति । एवं तु व्याख्यानेऽध्यापनविध्यर्थतैव स्यात् ॥ १६० ॥

नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्मधीः ॥
ययाऽस्योद्विजते वाचा नालोक्यां तामुदीरयेत् ॥ १६१ ॥

अयमपरः पुरुषार्थमात्रधर्मः। अरूंषि मर्माणि तुदति व्यथयतीत्यरुंतुदो मर्मस्पर्शिनीर्वाचोऽत्यन्तोद्विजनकरीराक्रोशवाचो यो वदति । **आर्त्तः** पीडितोऽपि परेण न तादृशमप्रियं भाषेत । तथा परद्रोहः परापकारः तदर्थं कर्म तद्धीश्च न कर्तव्या । अथवा परद्रोहश्चासौ कर्म च तत्र धीः बुद्धिरपि न कर्तव्या । **यया वाचा** नर्मप्रयुक्तयाऽपि पर **उद्विजते** अथ च **तां** वाचं **नोदीरयेत्** । वाक्यैकदेशमपि तादृशं नोच्चारयेद्यत एकदेशादर्थप्रकरणादिनाऽर्थान्तरसूचनं प्रतीयते । यतः सा वागलोक्या स्वर्गादिलोकप्राप्तिप्रतिबन्धिनी ॥ १६१ ॥

संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव ॥
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ॥ १६२ ॥

भिक्षमाणस्य ब्रह्मचारिणो गृहे वोपाध्यायस्य जीविकयाऽध्यापयतो यत्र संमानं न स्यान्न तेन चित्तसंक्षोभमाददीतापि तु **संमानादेवोद्विजेत** पूजयैव दीयमानं न बहु मन्येत । अमृतमिवा**काङ्क्षेद**भिलषेदवमानमवज्ञां सर्वदा । उत्कण्ठासामान्यात् अधीतास्त्वर्थमाकाङ्क्षेरारोप्य षष्ठी कृता। ननु चानर्चितमभोज्यं सत्यं चित्तसंक्षोभप्रतिषेधार्थमेतत् । न तु तादृशस्य भोज्यतोच्यते । संमानावमानयोः समेन भवितव्यं न पुनरवमानं प्रार्थनीयम् । ब्रह्मचारिणस्त्ववमतमपि भिक्षाऽऽदानम् न चायं प्रतिग्रहो योऽर्चितं प्रतिगृह्णातीत्येतस्य येन विषयः स्यात् ॥ १६२ ॥

सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते ॥
सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति ॥ १६३ ॥

पूर्वस्य विधेरर्थवादोऽयं फलदर्शनार्थः । योऽवमानान्न क्षुभ्यति स **सुखं शेते** । अन्यथा द्वेषेण दह्यमानो न कथंचिन्निद्रां लभते प्रतिबुद्धश्च तच्चिन्तापरो न **सुखं** विन्दति । उत्थितश्च शयनात्कार्येषु **सुखं चरति** ॥ १६३ ॥

---

१ अ ड क्ष–तेषांचिद्दर्शनम् । २ अधीगर्थस्वमिति समीचीनः पाठः "अधीगर्थदयेशां कर्मणि" व्या. सू. (२।३।५२)। ३ आकांक्षेदारोप्य।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः ॥
गुरौ वसन् सञ्चिनुयाद्ब्रह्माधिगमिकं तपः ॥ १६४ ॥

संस्कृतात्मोपनीतो द्विजो**ऽनेन क्रमयोगेन तपः संचिनुयात्**। अध्येष्यमाण इत्यत आरम्य यद्ब्रह्मचारिणः कर्तव्यमुक्तं तस्य तेनेति प्रत्यवमर्शः। **अनेन** विधिसंघातेन **क्रमयोगेन** क्रमेणानुष्ठीयमानेन **तप** आत्मसंस्कारं निष्कल्मषत्वलक्षणं यथा तपसा चान्द्रायणादिना निष्कल्मषत्वं भवत्येवमनेनापि वेदग्रहणार्थेन यमनियमसमूहेन। अतः **संचिनुयात्** शनैरत्वरयाऽर्जयेच्च वर्धयेच्च। क्रमः परिपाटी इदं कृत्वेदं कर्तव्यम्। ओंकारपूर्विका इत्यादिः। तेन योगः संबंधो यस्यानुष्ठानस्येति यावत्। ब्रह्मणः आधिगमिकमधिगमार्थम्। अध्ययनबोधावधिगमः १६४ ॥

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ॥
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥ १६५ ॥

तपोविशेषैः कृच्छ्रचान्द्रायणादिभि**र्विविधै**र्बहुप्रकारैरेकाहारचतुर्थकालाहारादिभिरभिक्षिण्वता शरीरं **व्रतैश्चो**पनिषदमहानाम्निकादिभिः **विधिनोदितै**र्गृह्यस्मृतिष्वाम्नातैरनुष्ठीयमानै**र्वेदः कृत्स्नोऽधिगन्तव्यः**। ये तु पूर्वश्लोके तपः शब्दो ब्रह्मचारिधर्मे प्रयुक्त इहापि तपोविशेषास्त एवाभिप्रेता इत्याहुर्न ते सम्यङ्मन्यन्ते। व्रतशब्देनैव तेषां संगृहीतत्वात्। व्रतमिति हि शास्त्रतो नियम उच्यते। सामान्यशब्दत्वाच्च व्रतशब्दस्य महानाम्निकादीनामपि ग्रहणसिद्धिः। तस्मात्तपांस्युपवासादीन्यभिप्रेतानि।

इह केचिद्वेद इत्यत्रैकवचनं विवक्षितं मन्यन्ते। यद्यपि तव्यप्रत्ययनिर्देशाद्विनियोगतो वेदस्य प्राधान्यं संस्कार्यतया प्रतीयते तथापि विधितो वस्तुतश्चार्थावबोधे गुणभाव एव। गुणे च संविवक्षितेऽर्थावबोधपर्यन्तो ह्ययं वेदविषयो माणवकस्य व्यापारो विधिवृत्तपर्यालोचनयाऽवसीयते। अयं ह्यत्र विध्यर्थोऽधीतेन वेदेनार्थावबोधं कुर्यान्न संस्कार्यत्वमन्यथा निर्वहति। सर्वो हि कार्यान्तरे शेषभूतः संस्क्रियते। वेदस्य च दृष्टमेव कार्यमधीतस्य स्वार्थबोधजनकत्वमन्यथा 'सक्तूञ्जुहोति' इति वत्प्राधान्यं श्रुतमप्युत्सृज्येत। धातुरप्यवबोधार्थ एव। अधिगमनं हि ज्ञानमुच्यते। "सर्वे गत्यर्था ज्ञानार्थाः" इति स्मृतम्। स्वरूपग्रहणं च वेदस्य प्रागेव विहितं 'संहत्य हस्तावध्येयम्' इत्यादिना। तस्यैवार्थग्रहणपर्यन्तताऽनेन प्रतिपाद्यते। विवक्षामेव मत्वाऽनेकवेदाध्ययनमप्राप्तं प्रतिप्रसविष्यते वेदानधीत्येति। यद्यप्यनेकवेदाध्ययनमस्ति कैकत्वविवक्षोपयुज्यते। बाढमुपयुज्यते। एकस्यामेव शाखायामधीतायां स्वाध्यायोऽध्येतव्य इति विध्यर्थनिवृत्तिः। इच्छातस्त्वनेकवेदाध्ययनं यदि न विधिचोदितं क उन्मत्तो दन्तकलशिकयाऽऽत्मानं क्लेशयिष्यति। अस्त्ये-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाऽत्र विध्यन्तरं वेदानधीत्येति तच्च फलकामस्य फलं च स्वर्गः । अथास्य विधेर्वाक्यशेषे किंचिदाम्नायते । घृतकुल्यादयोऽन्यद्वा ततस्तदेव भवितुमर्हति ब्रह्मचारिणो हि विधिरर्थावबोधविषयो दृष्टप्रयोजनश्च । अवबोधस्य कर्मानुष्ठानोपयोगादर्थादर्शनाद्विदुषः कर्मण्यधिकारादेकैकवेदाध्ययनमदृष्टायैव अन्यथैकवेदाध्ययनेनैव स्वाध्यायविधिनिर्वृत्तेरसति धर्माय विधौ वेदानधीत्येत्यादिवचनमनर्थकमेव स्यात् ।

तत्रोच्यते । कथमयं पक्षः संगच्छेत यावतैकोऽयं विधिर्वेदोऽधिगन्तव्य इति । स चेत्संस्कारविधित्वाद्दृष्टकर्मानुष्ठानोपयोगाच्च नादृष्टार्थः कल्प्यते तदनेकवेदाध्ययनेऽपि तुल्यम् । तत्रापि ह्ययं प्रकारोऽस्त्येव, वैरूप्यं च स्यात् । क्वचिदाधानविधिवदवबोधद्वारेण नित्यकाम्यकर्मसंबन्धः क्वचित्साक्षात्फलार्थतेति ।

अथ मतं वेदानधीत्येति विध्यन्तरमेतन्न वाऽऽचार्यकरणविधिप्रयोज्यम् । तत्फलकाम एवात्राधिक्रियत इति तदसत् । न चैतद्विध्यन्तरं प्रकृतस्यैव विधेरसत्यां संख्याविवक्षायां पञ्चषट्सप्तादिशाखाध्ययनं यावच्छक्तिप्राप्तं त्रयं नियमयति । न चाधीयीतेति विधिरत्र श्रूयते । अपि तु गृहस्थाश्रममावसेदित्ययमत्र विधिः । यदपि संख्याया विवक्षितत्वमुक्तं तदत्यन्तासंबद्धम् । विनियोगतो हि संख्याविवक्षा नोपपादनतः । स च विनियोगः स्वाध्यायार्थमध्ययनमाह, नार्थेन गुणभावेन द्वितीयान्ताभ्यामवगतं प्राधान्यमपैति । एवं ह्याश्रीयमाणे ग्रहेऽप्येकत्वं विवक्ष्येत ' ग्रहं संमार्ष्टीति ' । प्रधानभूतस्यापि हितस्य संमार्गे प्रत्यस्त्येव साधनभावो न त्वसौ शब्देनाभिधीयते । तथा ग्रहैर्जुहोतीति होमेऽपि गुणभावः । तस्मादभिधानविनियोगाभ्यां प्राधान्यं स्वाध्यायस्य । सति च प्राधान्ये न विवक्षितमेकत्वम् । हन्त तर्हि यद्येकेनापि वेदेन गृहीतेन निवर्तेत स्वाध्यायविध्यर्थो वक्तव्यमनेकवेदाध्ययनप्रयोजनम् । तृतीये वक्ष्यामः ।

ननु यद्यवबोधपर्यन्तोऽयं विधिस्तदा गृहीतेऽपि स्वरूपतो वेदे यावदर्थावबोधो न जातस्तावदन्तरा मधुमांसादियमनियमानुष्ठानमव्यावृत्तं स्यात् । तत्र को दोषः । शिष्टसमाचारविरोधः । न हि शिष्टा अधीते वेदे तदर्थमुपशृण्वन्तोऽपि मधुमांसादि वर्जयन्ति । नैष दोषः । अस्ति हि स्मृत्यन्तरं 'वेदमधीत्य स्नायात्' इति । तत्राधीत्येति पाठमात्रमुच्यते । स्नायादिति च स्वकालस्वाध्यायविध्यङ्गयमनियमनिवृत्तिर्लक्ष्यते । यथैव मधुमांसे प्रतिषिद्धे एवं स्नानमपि । तत्र स्नानमनुज्ञायमानं साहचर्यान्मधुमांसादीन्यपि तुल्यप्रकरणत्वादनुजानाति । स्त्रीसंप्रयोगस्तु वचनान्तरेणाविप्लुतब्रह्मचर्य इति प्रतिषिद्धः । तद्व्यतिक्रमे च न स्वाध्यायविधेरर्थावबोधकाले किंचित्परिहीणम् । न हि तस्यामवस्थायां तदङ्गं सर्वेषां यमनियमानां ग्रहणान्तरत्वात् । पुरुषार्थस्त्वयं प्रतिषेधः । अत एव कथंचिद्विप्लवे नावकीर्णि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रायश्चित्तम् । अथ व्रतस्थस्य हि रेतःसेको विकारो न च व्रतस्थश्चान्द्रायणादिना-ऽनेनोपपातकप्रायश्चित्तेनाधिक्रियते ।

किं पुनः स्नायादिति लक्षणत्वे कारणमुच्यते । न तावदिदं स्नानमद्भिः शरीर-क्षालनरूपमदृष्टार्थत्वप्रसङ्गात् । ब्रह्मचारिनियमानां चावध्यपेक्षत्वादस्य चावधिसमर्पकत्वेना-पेक्षितार्थविधिनोपपत्तेः । न पुनरेवं तेषामवध्यन्तरापेक्षा । स्वाध्यायविध्यर्था हि तेऽतस्तन्नि-वृत्तिरेव तेषामवधिः । तस्य च निवृत्तिर्विषयनिवृत्त्या । अध्ययनं च तस्य विषयः । तन्नि-वृत्तिः प्रत्यक्षैव ।

सत्यं यद्यस्य श्रुतविषयनिष्ठतैव स्यात् । अश्रुतोऽप्यस्य विषयः फलभूतोऽर्था-धिगमोऽपि संस्कारविधित्वान्यथानुपपत्त्या विषयतामापन्नो यतः श्रुताध्ययननिष्ठत्वे विधि-त्वमेवास्य व्याहन्येत । विधेर्हि स्वार्थानुष्ठापकत्वं रूपम् । स्वार्थश्च कार्यकारणेतिकर्तव्यता-त्मकः । तच्च विध्यर्थव्यतिरेकेण नान्यत्किंचिन्न कार्यं करणं विषय एकपदोपादानात् । अधी-यीतेत्यध्ययनादिः धात्वार्थावच्छिन्नो भावार्थः । यमनियमानुष्ठानमितिकर्तव्यता । न तत्र तावदस्य विधेः स्वार्थानुष्ठापकत्वसंभवः यतो विषयानुष्ठानद्वारिका सर्वविधीनां स्वार्थानु-ष्ठानसंपत्तिः । तस्यास्य विषयानुष्ठानं विध्यन्तरवशादेव सिद्धम् । आचार्यस्य हि विधि-रस्ति ' उपनीय शिष्यं वेदमध्यापयेत् ' इति । न चाध्यापनमन्तरेणाध्ययनसिद्धिः । अत आचार्यः स्वविधिसंपत्त्यर्थमध्ययने माणवकं प्रवर्तयति स्वयं च ज्ञात्वा नाचार्येणाप्रवर्तितस्या-नुष्ठानसंभवः । अतोऽवश्यमाचार्यविधिप्रयुक्तता एषितव्या । तत्प्रयुक्तत्वे सति सिद्धमनुष्ठानमिति न स्वाध्यायाध्ययने माणवकस्य विधिना कश्चिदर्थः । अतः प्रयोक्तृ-त्वासंभवात्कीदृशी विधिरूपताऽस्य विधेः । स्वरूपनाशे प्रसक्ते स प्रकारोऽन्विष्यते, यथाऽस्य प्रयोक्तृत्वं लभ्यते । तत्र निश्चितस्तावदयं संस्कारविधिः । न च निष्फलः सं-स्कारः । अध्ययने सति यादृशस्य तादृशस्यार्थबन्धस्य दर्शनात्तस्य च सकलतत्कर्मानुष्ठानो-पयोगित्वात् । अतः श्रुताध्ययनविषयसंबद्धावबोधकर्तव्यताऽन्यो विधिः प्रतीयते । यद्यपि च वस्तुस्वाभाव्येन वाक्यग्रहणसमनन्तरमवबोधो जायते न तु निश्चितरूपो भवति । अतो येन प्रकारेण निश्चयो भवति तस्मिन्नंशो विधेः प्रयोक्तृत्वम् । निश्चयो विचार्य संश-यादिव्युदासेन भवति । न च विचारोऽन्यतः प्राप्तः । नाचार्यविधेः तस्याध्ययनमात्रेण नि-वृत्तेः । नापि दृष्टकार्यप्रयुक्तः । किं विचारमन्तरेण पुरुषस्य न सिद्ध्येद्यदर्थं प्रवर्तेत ।

यदृच्छया ग्रामादिकामस्येव विचारोऽपि प्राप्त इति चेत् । एवं तर्ह्यनियतत्वात्पुरुषे-च्छायाः कश्चिन्न विचारयेत् । यदि विचारयेन्नाध्ययनसमनन्तरम् । अतोऽस्यांशस्याप्रा-प्तत्वाद्यावदप्राप्तं विधेर्विषय इत्यस्ति विधेर्व्यापारः । तस्मादध्ययनस्यान्यतः प्राप्तत्वात्तत्सं-बन्धस्यावबोधस्यानिश्चितरूपस्य वस्तुस्वाभाव्येनोत्पत्तेस्तादृशस्य न क्वचिदर्थवत्त्वात्सत्यपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिन्संस्कारकत्वान्निर्व्यूढे निश्चितस्यैव फलवत्कर्मानुष्ठानोपयोगित्वान्निश्चयस्य विचारसाध्यत्वात्तस्य च नियतकालावश्यकर्तव्यताप्राप्तेस्तन्निवृत्त्यर्थं विचारपर्यवसायी विधिरयमवतिष्ठते। अतो भवत्याकाङ्क्षा नियमानाम् । किं श्रुताध्ययनपर्यवसानावधिरुताऽऽक्षिप्तनिश्चितावबोधजननार्थविचारपर्यवसानः। अतोऽस्यामपेक्षायां वेदमधीत्य स्नायादित्यनेनावधिसमर्पणं क्रियते । तत्र प्रकृतस्यापेक्षायाश्चाविशेषाद्युक्ता लक्षणा ।

ननु किमिदमुच्यतेऽश्रुतोवबोधः यावताऽधिगन्तव्य इति । श्रूयत एव वेदे **स्मृतिषु** चान्यासु ' वेदमधीते स्वाध्यायोऽध्येतव्यः ' इति च पठ्यते । **मानव्या** अपि स्मृतेरेतत्स्मृतिमूलत्वादभिन्नार्थतैव । आक्षिप्तावबोधाभिप्रायोऽयमधिगमो यदि वा स्वरूपग्रहणमेवाधिगमः अवबोधपर्यन्तता तु तेनैव न्यायेन लभ्यते न च विसमञ्जसमेकोऽयं विधिस्तस्य च विषयांशः कश्चिदाचार्यविधिना प्रयुज्यते कस्यचिदंशस्य स एव प्रयोजक इति वैरूप्यम् । किमत्रानुपपन्नमर्थभूतस्यैवावगमात् ।

यत्तूक्तमनेकवेदाध्ययनमदृष्टार्थं युक्तमिति तस्य षट्त्रिंशदाब्दिकमित्यत्र परिहारं वक्ष्यामः ।

वेदशब्दो मन्त्रब्राह्मणवाक्यसमुदायात्मिकां शाखामाचष्टे । तदवयवेऽपि वाक्ये वेदशब्दस्य प्रयोगदर्शनात् तदाशङ्कानिवृत्त्यर्थः कृत्स्नशब्दः । यद्यप्येकस्मिन्वाक्येऽधीते वाक्यान्तरस्यापि वेदशब्दवाच्यत्वादेव निवृत्तमध्ययनं संस्कारकर्मत्वाद्ग्रहवत्तथापि विस्पष्टार्थं कृत्स्नग्रहणम् । अन्ये त्वङ्गविषयं कृत्स्नशब्दं वर्णयन्ति । वेदशब्दो ह्युक्तपरिमाणस्य वाक्यसमुदायस्य वाचकस्तत्र ऋङ्मात्रेणापि न्यूनेन स्वाध्यायोऽधीतो भवति । तस्मात्कृत्स्नशब्दोऽङ्गाध्ययनप्राप्त्यर्थः । तथा च **स्मृत्यन्तरं** " ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येय " इति ।

ननु यो वेदः स कृत्स्न इत्येतदत्र प्रतीयते । न चाङ्गानि वेदशब्दवाच्यानि तत्र कृताङ्गैः साहित्यं या त्वेषा स्मृतिः ' षडङ्गो वेदोऽध्येय ' इति तत्र स्वशब्देनाङ्गान्युपात्तानि इह तु वेदविशेषणत्वात्कृत्स्नशब्दस्य कथमिवाङ्गानि गृह्येरन् । उच्यते । स्वाध्यायोऽध्येतव्य इति मूलैषा स्मृतिः । सा चावबोधपर्यन्ता व्यवस्थापिता । अवबोधश्च नान्तरेणाङ्गानि कल्पत इत्यर्थसिद्धमङ्गानामुपादानम् । अतो निगमनिरुक्तव्याकरणमीमांसावेदनमपि विध्याक्षिप्तम् । एवमर्थमङ्गानामुपादानमङ्गीकृत्य कृत्स्नशब्दो द्योतकत्वेन युक्त उपादातुम् । तत्र यथाऽऽरम्भकाणि पुरुषस्य हस्तपादादीन्यङ्गान्युच्यन्ते नैवं वेदस्य निरुक्तादीन्यारम्भकाणि । अथ च भक्त्याऽङ्गत्वेन वेदस्योच्यन्ते न किल तैर्विना वेदः स्वार्थाय प्रभवत्यतोऽङ्गानीवाध्यासोऽत्र । एवमध्यारोपितवेदत्वेन कृत्स्नशब्द उपपद्यते ।

१ फ-ग्रहणवत् । २ अ क ड क्ष फ-कृत्स्नशब्दो नोपपद्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सरहस्य इति रहस्यमुपनिषदः सत्यपि वेदत्वे प्राधान्यात्पृथगुपादानम् ॥ १६५ ॥

वेदमेव सदाभ्यस्येत्तपस्तप्स्यन् द्विजोत्तमः ॥
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥ १६६ ॥

प्रकृतशेषतया प्राप्त एव ग्रहणार्थोऽभ्यासोऽनूद्यते स्तुत्यर्थं न पुनर्विध्यन्तरम् । **सदा** शब्दो ग्रहणकालापेक्ष एव । **तपः**शब्दः शरीरक्लेशजननेष्वाहारनिरोधादिषु वर्तते । इह तु तज्जन्यात्मसंस्कारो वराभिशापादिसामर्थ्यं लक्षणयोच्यते । **तत्तपस्तप्स्यं**स्तपसाऽर्जयितुमिच्छन्नर्जनाङ्गे संतापे वातुर्वर्तते । कर्मकर्तृत्वस्याविवक्षितत्वात्परस्मैपदम् । हेतुरूपो द्वितीयश्लोकार्थवादः। **वेदाभ्यासो हि** यावत्किंचित्प्रकृष्टं **तपः** ततः **परं** श्रेष्ठं वेदाभ्यासस्तत्तुल्यफलतामारोप्य स्तूयते ॥ १६६ ॥

आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ॥
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥ १६७ ॥

अयमपरो वाजसनेयकस्वाध्यायविधिर्ब्राह्मणेऽर्थवादानुवादः । **आ** नखाग्रेभ्य एवेति संबन्धः । **ह**शब्द ऐतिह्यसूचकः । **परम**शब्दात्तपसः प्रकर्षे प्रतिपन्ने नखाग्रग्रहणं प्रकृष्टस्यापि प्रकर्षमाह । नखाग्राणि निर्जीवानि तान्यपि तपसाऽनेन व्याप्यन्ते । तपो हि कृच्छ्रादिकं नखाग्राणामव्यापकत्वान्न निःशेषफलप्रदम् । इदं तु तान्यपि व्याप्नोतीति प्रशंसा । **तप्यते तप** इति । "तपस्तपः कर्मकस्यैव" (व्या. सू. ३।१।८८) इति यगात्मनेपदे । **यः स्रग्व्यपि** । स्रगस्यास्तीति स्रग्वी कृतकुसुमदामा पुरुष उच्यते । अनेन च ब्रह्मचारिनियमत्यागं दर्शयति । परित्यज्यापि ब्रह्मचारिधर्मान् । यदि **शक्तितो** यावच्छक्नोति स्वल्पमप्यन्वहं प्रत्यहं **वेदमधीते** सोऽपि प्रकृष्टेन पुरुषार्थेन युज्यते । स्तुतिरियं न पुनर्नियमत्यागेऽध्ययनमुच्यते ॥ १६७ ॥

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ॥
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ १६८ ॥

येषां तावत्कृत्स्नशब्दोऽङ्गपरिग्रहार्थस्तेषामनियतक्रमेऽध्ययने प्राप्ते क्रमो नियम्यते । प्रथमं वेदोऽध्येतव्यस्ततोऽङ्गानि । येषां तु वेदस्यैवासौ कल्प्याशङ्कानिवृत्त्यर्थं तेषां त्रैविध्यव्रतानन्तरं वेदस्यैव प्राप्तमध्ययनम् । अगृहीतेऽपि तस्मिन्नध्ययनमभ्यनुज्ञायते । **यो द्विजो वेदमनधीत्यान्यत्र शास्त्रे** अङ्गेषु तर्कशास्त्रग्रन्थेषु वा **श्रम**मभियोगातिशयं **कुरुते स जीवन्नेव शूद्रत्वमाप्नोति** । **आशु** क्षिप्रम् । **सान्वयः** पुत्रपौत्रादिसंतत्या सह ।

---

१ अ क्ष-सद्यः । २ फ-ततस्तप्स्यन् । ३ क्ष—कर्तृत्वस्याप्यविवक्षितत्वात् । ४ फ-अर्थकल्प्याशङ्का ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रमो यत्नातिशयस्तन्निषेधा[1]योगात्तत्समाप्तौ यथावसरमन्यान्यपि विद्यास्थानानि पठ्यन्ते । शूद्रत्वप्राप्तिवचनं निन्दातिशयः । द्विज इति वचनादुपनीतस्यायं क्रमनियमः। प्राक् चोपनयनादङ्गाध्ययनमनिषिद्धं शिक्षाव्याकरणादि यद्वेदवाक्यैर्न मिश्रितम् ।

ननु च स्वाध्यायविधिनाऽङ्गान्याक्षिप्यन्ते तं च विधिमाचार्यप्रयुक्तो माणवकोऽनुतिष्ठति प्रागुपनयनादसत्याचार्ये कुतोऽङ्गाध्ययनसंभवः । नैष दोषः । तस्मादनुशिष्टं पुत्रं लोक्यमाहुरिति पित्रा यः संस्कर्तव्यः स एनं प्रागुपनयनाद्व्याकरणाद्यध्यापयिष्यति ॥ १६८ ॥

द्विजातीनां तत्र तत्राधिकारः श्रुतस्तत्राचार्यादिशब्दवत्सुद्दत्त्वात्तदर्थनिरूपणार्थमाह ।

मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने ॥
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ॥ १६९ ॥

मातुः सकाशादग्रे आदावधिजननं जन्म पुरुषस्य **द्वितीयं मौञ्जिबन्धने** उपनयने । 'ङ्यापोर्बहुलम्' (व्या. सू. ६।३।६३) इति ह्रस्वः । **तृतीयं** ज्योतिष्टोमादि**यज्ञदीक्षायाम्** । दीक्षाऽपि जन्मत्वेन श्रूयते पुनर्वारं तदृत्विजो गर्भं कुर्वन्ति यद्दीक्षयन्तीति । त्रीणि जन्मानि द्विजस्य श्रुतिनोदितानि । नन्वेवं सति त्रिजः प्राप्नोति । अस्तु । द्विजव्यपदेशे तावदुपनयनं निमित्तं तद्व्यपदेशनिबन्धनश्च श्रौतस्मार्तसामयिकाचारिककर्माधिकारः । प्रथमतृतीयजन्माभिधानं द्वितीयजन्मस्तुत्यर्थं सर्वजन्म श्रेष्ठं तत् । अदीक्षितो हि यज्ञ एव नाधिक्रियते अनुपनीतस्तु न क्वचिदेव । अन्ये त्वाद्यत्वसामान्यादाधानं यज्ञदीक्षां मन्यन्ते । तस्यापि जन्मसंभवोऽस्ति अजात एवासौ योऽग्नीन्नाधत्त इति ॥ १६९ ॥

तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम् ॥
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥ १७० ॥

तत्रैतेषु द्विजन्मसु **यदेतद्ब्रह्मजन्म** उपनयनं **मौञ्जीबन्धनचिह्नितं** मेखलाबन्धनेनोपलक्षितम् । **तत्रास्य माता सावित्री** तया ह्यनूक्तया तन्निष्पन्नं भवति । अनेन च सावित्र्यनुवचनमुपनयने प्रधानं दर्शयति । तदर्थं ह्यसौ समीपमानीयते **पिताऽऽचार्यः** । मातापितृनिर्वर्त्यं जन्म । अतो रूपकभङ्ग्या तत्राप्याचार्यसावित्र्यौ मातापितरावुक्तौ ॥ १७० ॥

मौञ्जीबन्धनचिह्नितमित्युक्तम् । तत्र रज्ज्वासञ्जनादाचार्यः पितृवन्मान्यः स्यात्तदर्थमुच्यते ।

वेदप्रदानादाचार्यं पितरं परिचक्षते ॥
न ह्यस्मिन् युज्यते कर्म किञ्चिदा मौञ्जिबन्धनात् ॥ १७१ ॥

१ निषेधाच्च योगात् इत्यपरः पाठः ।

For Private And Personal Use Only

वेदप्रदानादाचार्यं पितरं परिचक्षते । कृत्स्नवेदाध्यापनान्नोपनयनाङ्गभूतसावित्र्यनुवचनमात्रादेव । **प्रदानं** स्वीकारोत्पादनं वेदाक्षरोच्चारणे माणवकस्य । यद्येवं यावन्नाचार्येण पितृत्वं प्राप्तं तावन्न माणवको द्वितीयं जन्म समश्नुते । अप्राप्तद्विजभावश्च प्रागिवोपनयनात्कामचारः स्यादत आह । **न ह्यस्मिन्प्राङ्मौञ्जिबन्धनादस्य** माणवकस्य **किंचित्कर्म** श्रौतस्मार्तमाचारप्रतिष्ठं वाऽदृष्टार्थं प्रयुज्यते न तत्राधिक्रियते । उपनयनसमनन्तरमेव सर्वैर्हि जातिपुरुषधर्मैरधिक्रियते[1] । नन्ववैद्यत्वात्तस्यामवस्थायां कथमधिक्रियतां एतदर्थमेवोक्तं "**गुरौ शिष्यश्च याज्यश्चेति**" । आचार्येणासौ शिक्षयितव्यः । तदुक्तं '**शौचाचारांश्च शिक्षयेत्**' । यथा च **गौतमः** । (अ० २ सू. १०) । '**उपयनादिर्नियम**' इति । आचार्यस्य तु वेदसमापनान्तो व्यापारः ॥ १७१ ॥

नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ॥
शूद्रेण हि समस्तावद्यावद्वेदे न जायते ॥ १७२ ॥

आ मौञ्जिबन्धनादित्यनुवर्तते । यदि वा यावद्वेदे न जायत इत्यर्थवादतोऽवधिपरिनिश्चयः । **ब्रह्म वेदस्तन्नोच्चारयेत्** । पितुरयमुपदेशः । यथा मद्यपानादिभ्यो रक्षेत्तथा वेदाक्षरोच्चारणात् । केचित्त्विममेव ब्रह्माभिव्याहारनिषेधं प्रागुपनयनाद्व्याकरणाद्यङ्गाध्ययने ज्ञापकं वर्णयन्ति । णिजर्थं व्याचक्षते । पित्रा न वाचनीयः । बाल्यात्तु कानिचिदव्यक्तानि वेदवाक्यानि स्वयं पठतो न दोषः । एतत्तु न युक्तम् । **स्मृत्यन्तरे** हि पठ्यते 'न ब्रह्माभिव्याहारयेदिति' (गौ०अ०२ सू. ९)।अर्थवादे च श्रुतं **शूद्रेण हि समस्तावदिति** । यथा शूद्रो दुष्यति तद्वदयमपीत्युक्तं भवति । स्वधाशब्देन पितृभ्यः कल्पितमन्त्रमिहोच्यते । अथवा पित्र्यं कर्म **स्वधाशब्देनोच्यते** । तन्निनीयते त्यज्यते प्राप्यते येन मन्त्रेण स स्वधानिनयनः । "शुन्धन्तां पितरः" इत्यादिस्तं वर्जयित्वाऽन्यमन्त्रो नोच्चारयितव्यः । अनुपनीतेनोदकदाननवश्राद्धादि पितुः कर्तव्यमित्यस्मादेव प्रतीयते । पार्वणश्राद्धादौ त्वग्निमत्त्वाभावादनधिकारः पिण्डान्वाहार्यकं हि तद्वक्ष्यते । तृतीये चैतन्निपुणमुपपादयिष्यामः ॥ १७२ ॥

कृतोपनयनस्यास्य व्रतादेशनमिष्यते ॥
ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम् ॥ १७३ ॥

'उपनीय गुरुः शिष्यम्' इत्यनेन शौचाचाराध्ययनानां क्रम उक्तः । अतश्च तेनैव क्रमेण पठेत् । उपनयनानन्तरमध्ययने प्राप्ते क्रमान्तरार्थमिदमारभ्यते ।

उपनीतस्य त्रैविद्यादिव्रतं च कर्तव्यम् । ततः स्वाध्यायोऽध्येतव्यः । **कृतोपनयनस्य ब्रह्मचारिणो व्रतादेशनमिष्यते** क्रियते चाचार्यैः । शास्त्रवशेनैवमिष्यते । अतश्च

१ क्ष–द्विजातिपुरुषधर्मैरधिक्रियते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्तव्यतैवैषणा प्रतिपाद्यते । ततो ब्रह्मणो वेदस्य ग्रहणं क्रमेणानेन विधिपूर्वकमित्यर्थवादः श्लोकपूरणार्थः ॥ १७३ ॥

यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला ॥
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ॥ १७४ ॥

गृह्यकारैर्व्रतनामधेयकानि कर्माण्युपदिष्टानि 'संवत्सरं वेदं भागं वा किंचिज्जिघृक्षत' इयं व्रतचर्या यो यमनियमसमूहस्तत्र पूर्वव्रतसमाप्तौ व्रतान्तरारम्भे उपनयने ये विषयस्तादृश एव व्रतादेशेषु । अथ प्रागुपात्तानां का प्रतिपत्तिः । अप्सु प्रासनम् । ननु च तदुक्तं प्रागुपात्तानां विनष्टानां का प्रतिपत्तिः । विनाशे शास्त्रेनोदितं चैषां कार्यमन्योपादानाच्च तेषां निवृत्तिः । यच्चर्म यस्य ब्रह्मचारिणो विहितं यथा "कार्ष्णं ब्राह्मणस्य रौरवं क्षत्रियस्य" इति । एवं दण्डादिष्वपि द्रष्टव्यम् । तस्य व्रतेष्वपि कृतत्वात् । व्रतशब्दो व्रतादेशे वर्तते ॥ १७४ ॥

सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन् ॥
सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः ॥ १७५ ॥

वक्ष्यमाणस्य यमनियमसमूहस्य पृथक्प्रकरणत्वेन श्लोकोऽयं गौरवख्यापनार्थः । एवं तु यत्पूर्वमुक्तं तदवश्यकर्तव्यमिदं तु ततो गुरुतरमनुष्ठीयमानं महते फलाय । ब्रह्मचारिग्रहणं प्रकरणान्तरत्वेनातद्धर्माशङ्कयाऽनुसंधानार्थम् । यदि ब्रह्मचारिधर्म एव आसीत्किं तर्हीदमुच्यते प्रकरणान्तरमिति । पूर्वेभ्य एतेषामतिशयात्समानधर्मत्वादेतावता वैलक्षण्येन प्रकरणान्तरत्वव्यवहारः । परिशिष्टानि पदानि श्लोकपूरणार्थतयाऽनूद्यन्ते । **सेवेत** अनुतिष्ठेत । **इमान्**वक्ष्यमाणान् । बुद्धौ संनिहितत्वादिदमा निर्दिश्यन्ते । **गुरौ वसन्**गुरुसमीपे विद्याध्ययनार्थं वसन् । नियमानाह । **संनियम्येन्द्रियग्रामं** प्रागुक्तेन मार्गेण तपोवृद्ध्यर्थमध्यायविध्यनुष्ठानजन्यात्मसंस्कारार्थम् ॥ १७५ ॥

तानीदानीं प्रतिज्ञातान्पूर्वेण नियमानाह ।

नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ॥
देवताभ्यर्चनं चैव समिदाधानमेव च ॥ १७६ ॥

प्रत्यहं **स्नात्वा शुचिः** स्नानेनापनीताशुचिभावो **देवर्षिपितृतर्पणं कुर्यात्** । यदि पुनर्न शुचिः तदाऽवश्यं स्नायात् । शुचिग्रहणेन शुद्धिहेतुतयाऽत्र स्नानस्योपदिष्टत्वान्न स्नातकव्रतवत्तदनुष्ठेयम् । अत एव **स्मृत्यन्तरे** च स्नानं प्रतिषिद्धम् । स प्रतिषेधो मृदा स्नानस्य प्रसाधनलक्षणस्य । **गौतमेन** तु स्नानमेवं विहितम् । 'दण्ड इवाप्सु परिप्लवेत' । मलापकर्षणं करनिघर्षणादिना न कर्तव्यम् । असत्यमेध्यादिसंसर्गे न यत्स्वेदजं वस्त्रेणु-

१ क्ष—ननु च तदुक्तं विनष्टानां प्रागुक्तानां सा प्रतिपत्तिः । २ क—अस्त्यामेध्यादिसंसर्गेण ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संयोगादिसहजं मलं तदशुचित्वमापादयति तद्धि नियतरूपमेव । तथा च ब्राह्मणं 'किं नु मलं किमजिनं किमु श्मश्रूणि किं तप' इति । धर्मसाधनतामेवंविधस्य मलधारणस्य दर्शयति ।

कथं पुनः स्नानस्य शौचार्थता प्रतीयते । न पुनः स्नातः शुचिश्चोभयविशिष्टो देवकार्ये विनियुज्यते । स्नातस्याशुचित्वाभावात्कृतशौचाचमनादेः स्नानविधानात्स्नात्वा चाऽऽचान्तः पुनराचामेदिति च स्नातस्यापि शुचिरित्येतावता यादृशी शुद्धिस्तस्यां विज्ञायमानायां स्नानमपि सति निमित्ते प्राप्तं पुनरुच्यते । **स्मृत्यन्तरं** चेदं सत्यशुचित्वे निमित्ते प्रतिषेधार्थम् । तथा च ' वेदमधीत्य स्नायादिति ' समाप्ते स्वाध्यायविधौ प्रतिप्रसविष्यति कुर्याद्देवर्षिपितृतर्पणम् उदकदानं देवादिभ्यो गृहस्थधर्मेषु यदुक्तं तादृशमेव प्रतीयते तर्पणशब्दसाहचर्यात् । यदेव तर्पयत्यद्भिरिति तथा "देवतास्तर्पयति" (आश्व.गृ.३।४।३) इति **गृह्यकारै**रुदकसाधनोऽयं विधिरुक्तः । उदकतर्पणमिति चैतत्संविज्ञायते । ते देवा गृह्यकारैः पठिता अग्निप्रजापतिब्रह्मेत्यादयः । तेषां च तर्पणं न सौहित्योत्पादनं किं तर्हि तदुद्देशेनोदकाञ्जलिप्रक्षेपः । अतोऽयमुदकद्रव्यको याग एवोक्तो भवति । न ह्यन्यथा देवतात्वं भवति । यागसंप्रदानं हि सेति स्मर्यते न तृप्तेः कर्त्री ।

एतावद्धि देवतालक्षणम् । सूक्तभाजो हविर्भाजश्च देवताः । तत्र सूक्तं स्तुत्यतया भजन्ते हविः संप्रदानतया । तर्प्यत्वेन चोदकदानसंप्रदानतामेव गुणवृत्त्या वक्ति । गुर्वादिसंप्रदानं गवादिना तदुद्दिश्यमानं स्वाम्येन प्रतीयते देवताऽपि संप्रदानमतः संप्रदानत्वसाम्यात्तृप्यन्तीत्युच्यते । यदि देवतातृप्त्यर्थमेतत्स्यात्तदा संस्कारकर्मोदकतर्पणं स्यात् । न च देवतानां संस्कार्यत्वोपपत्तिः । न हि ताः क्वचिदुपयुक्ता उपयोक्ष्यन्ते । वा न वा कृताः करिष्यमाणकार्यस्य संस्कारतोपपत्तिः ।

ऋषयो ये यस्यार्षेयाः यथा पराशराणां वसिष्ठशाक्त्यपाराशर्येति । **गृह्यकारैस्तु** **मन्त्रदृश** ऋषयस्तर्पणीयत्वेनोक्ताः । मधुच्छन्दो गृत्समदो विश्वामित्र इति । अविशेषाभिधानादृषिशब्दस्योभयेऽपि प्राप्ताः विशेषस्मृतित्वात् गृह्यस्मृतेस्त एव ग्रहीतुं न्याय्याः ।

पितरः पूर्वप्रेताः पितृपितामहाः सपिण्डाः समानोदकाश्च । पितॄणां तर्पणं तर्पणमेव । एतच्च श्राद्धविधौ प्रत्यक्षेण वक्ष्यते ।

देवताभ्यर्चनं अत्र केचिच्चिरन्तना विचारयांचक्रुः, का एता देवता नाम यासामिदमभ्यर्चनमुच्यते । यदि तावच्चित्रपुस्तकन्यस्तः चतुर्भुजो वज्रहस्त इत्याद्याः प्रतिकृतय इति लौकिका व्यवहरन्ति अतो गौणस्तत्र देवताव्यवहारः । अथ याः सूक्तहविःसंबन्धिन्यो वैदिकीभ्यश्चोदनाभ्यो मन्त्रवाक्येभ्यश्चावगम्यन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शब्दार्थसंबन्धविदश्च स्मरन्ति 'अग्निः अग्नीषोमौ मित्रावरुणौ इन्द्रो विष्णुः' इति । यद्येवं तक्रियासंबन्धितयैव तेषां देवतात्वं नार्थसंबन्धितया । तत्रापि यस्यैव हविषो या देवता तेन चोदिता तस्यैव सा भवति । तथा हि आग्नेयोऽष्टाकपाल इत्याग्नेये देवतापुरोडाशेन सौर्ये चरौ । अयं च तेषां निर्णयः मुख्यासंभवाद्गौणस्यैव ग्रहणं न्याय्यं समाचाराच्च । अतः प्रतिमानामेवैतत्पूजाविधानम् । यच्चात्र तत्त्वं तद्व्रतवद्देवदैवत्य इत्यत्र *वक्ष्यामः । **समिदाधानं** सायंप्रातरग्नौ दारुशकलप्रक्षेपणम् ॥ १७६ ॥

वर्जयेन्मधु मांसं च गन्धं माल्यं रसान् स्त्रियः ॥
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ॥ १७७ ॥

मधु सारघम् । माध्वीकस्य तु मद्यत्वात्प्रागप्युपनयनात्प्रतिषेधो 'नित्यं मद्यं ब्राह्मणो वर्जयेत्' इति । **मांसं** प्रोक्षिताद्यपि । **गन्धशब्देन** सुरभित्वातिशययुक्तानि कर्पूरागरुप्रभृतीनि द्रव्याणि सम्बन्धिलक्षणया प्रतिषिध्यन्ते । तेषामनुलेपनाद्युपभोगप्रतिषेधः । गन्धस्तु स्वदेशान्निर्गत आगच्छतीत्यशक्यो निषेद्धुम् । तत्राप्याकस्मिकस्याप्यप्रतिषेधात् । भोगेच्छया त्वगरुधूपादौ दोष एव । अत उपाध्यायेन चन्दनवृक्षादिच्छेदने नियुक्तस्य तद्गन्धस्याघ्राणे वस्तुस्वभावत उत्पद्यमाने न दोषः । माल्यसाहचर्याच्चेदृशो गन्धः प्रतीयते । यस्तु नेदृशो हृदयोन्मादकरः कुष्ठघृतपूतिदार्वादिगन्धस्तस्य प्रतिषेधः । **माल्यं** कुसुमं ग्रथितम् । **रसाः** मधुराम्लादयः ।

ननु च नीरसस्य भोज्यत्वासंभवात्प्राणवृत्तिरेव न स्यात् । सत्यम् । उद्रिक्तरसाः केवला गुडादयो निषिध्यन्ते । संस्कारकरणे द्रव्यान्तर्गतानामपि प्रतिषेधः । अथवाऽत्यन्तमसंस्कृतस्यान्नस्य उक्तिप्रतिषेधेऽयम् । यथोक्तम् । "योऽहेरिव धनाद्भीतो मिष्टान्नाच्च विषादिव । राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति" इति । अन्ये तु शृङ्गारादीन्मन्यन्ते । नाटकादिप्रेक्षणेन काव्यश्रवणेन वा रसपुष्टिर्न वक्तव्या । अन्येषां तु दर्शनमिक्ष्वामलकादीनां योऽन्तर्द्रवरूपोदकवत् स रसस्तस्य निष्पीडितस्य प्रतिषेधो न पुनस्तदन्तर्गतस्य । तच्चैतदयुक्तम् । न हि रसशब्दो द्रवपर्यायः प्रसिद्धः । यत्र च यस्योचितमुपभोगान्तत्वं तदेव तस्य निषिध्यते । तेन मधुमांसयोर्भोजने प्रतिषेधो न दर्शनस्पर्शनयोः । गन्धमाल्यस्यापि शरीरमण्डनाभिमानतयोपादानं निषिध्यते, न तु कथंचिद्धस्तादिना ग्रहणम् । एवं स्त्रियो मैथुनसंबन्धेन । तदाशङ्कयैव च प्रेक्षणालम्भौ निषेत्स्यति । तथा च **गौतमः** (अ. २ सू. २२) 'स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायाम्' इति ।

शुक्तानि प्रासास्वरसानि केवलात्परिवासाद्द्रव्यान्तरसंसर्गाद्वाऽम्लतामापन्नानि । तेषां च द्विजातिधर्मत्वादेव सिद्धः प्रतिषेधः । पुनर्ग्रहणं गौणशुक्तपरिग्रहणार्थम् । तेन रूक्ष-

---

* अग्रे १८९ श्लोके १ फ—कुसुममथितम् । २ फ—अथच ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परुषा वाचो निषिद्धा भवन्ति । यदुक्तं **गौतमेन** (अ. २ सू. २१) 'शुक्ता वाच' इति । तदिदं सर्वग्रहणं चास्यैवार्थस्याविष्करणार्थम् । रसशुक्तान्यनूद्य सर्वाणीति विधीयते । ततो गौणपरिग्रहः सिद्धो भवति ।

ये त्वेवं व्याचक्षते शुक्तशब्देन रसप्रतिषेधः सर्वशब्देन मानसानि वचांसि त इदं प्रष्टव्याः । अर्थप्रतिषिद्धानां प्रतिषेधार्थं सर्वग्रहणं कस्मान्न भवति । तथा सति च दध्यादेः शुक्तीभूतस्य प्रतिषेधः प्राप्नोति । यदि तु प्राप्तिमाश्रित्य पुनः प्रतिषेध उक्तार्थो व्याख्यायते तथा सति न कश्चिद्दोषः ।

प्राणिनां मशकमक्षिकादीनां बाल्याद्धिंसने प्राप्ते यत्नतः परिहारार्थं पुनः प्रतिषेधः । स्वाध्यायविध्यङ्गत्वार्थो वा । न केवलं हिंसायां पुरुषार्थः प्रतिषेधातिक्रमो यावत्स्वाध्यायविध्यर्थातिक्रमोऽपि । शुक्तादिष्वप्येवं कस्मान्न कल्प्यत इति चेदस्ति तत्र विषयान्तरे सावकाशत्वमेकरूपस्य विषयस्य व्यर्थत्वं सति गत्यन्तरे गरीयः ॥ १७७ ॥

अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ॥
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ॥ १७८ ॥

घृततैलादिना स्नेहेन शिरःशरीरम्रक्षणमभ्यङ्गः । **अञ्जनं** चाक्ष्णोः । अक्षिग्रहणं वृत्तपूरणार्थम् । अनयोश्चापि देहमण्डनार्थतया प्रतिषेधो नौषधार्थतया । गन्धमाल्यादिसाहचर्यात् । उपानहौ चर्मपादुके न केवले छत्रधारणं च स्वहस्तेन परहस्तेन वोभयस्यापि निषेधः । **कामो** मन्मथस्य स्त्रीप्रतिषेधादेव सिद्धः । **क्रोधो** रोषः । **लोभो** मोहः । अहंकारममकारौ चित्तधर्मावेते । **नर्तनं** प्राकृतपुरुषाणां हर्षाय गात्रविक्षेपो भरतादिदृष्टाभिनयप्रयोगश्च । **गीतं** षड्जादिस्वरप्रदर्शनम् । **वादित्रं** वीणावंशादिभिः स्वरवच्छब्दकरणं पणवमृदङ्गाद्यभिघातश्च तालानुवृत्त्या ॥ १७८ ॥

द्यूतं च जनवादं च परिवादं तथाऽनृतम् ॥
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ॥ १७९ ॥

द्यूतमक्षक्रीडा । समाह्वयः कुक्कुटादिभिः प्रतिषिद्धो द्यूतशब्दस्य सामान्यशब्दत्वात् । जनैर्वादः अकारणेन लौकिकेष्वर्थेषु वाक्कलहः । देशवार्ताद्यन्वेषणं प्रश्नो वा **परिवादः** । असूयया परदोषकथनमनृतमन्यथा दृष्टमन्यथा च श्रुतं यदन्यथोच्यते । सर्वत्र वर्जयेदित्यनुषङ्गाद्द्वितीया । **स्त्रीणां च प्रेक्षणालम्भौ** अवयवसंस्थाननिरूपणं प्रेक्षणमिदमस्याः शोभतेऽङ्गमिदं नेति आलम्भ आलिङ्गनं मैथुनशङ्कायां चैतौ प्रतिषिध्येते बालस्य यथातथम् । **परस्योपघातोऽ**पकारः कस्यांचिदर्थसिद्धौ प्रतिबन्धः कन्यालाभादौ पृच्छ्यमानेन प्रयोगस्याप्ययोगत्वं न वक्तव्यम् । तूष्णीमासितव्यमनृतप्रतिषेधात् ॥ १७९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ॥
कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः ॥ १८० ॥

एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् । अयोनावपि योनौ स्त्रीप्रतिषेधादेव सिद्धत्वादत्रार्थवादः । कामाद्धि स्कन्दयन् । इच्छाऽत्र कामः हस्तव्यापारादिनाऽयोनौ मैथुनेन च रेतः शुक्रं स्कन्दयन् क्षरयन्हिनस्ति नाशयति ब्रह्मचर्यव्रतमात्मनः ॥ १८० ॥

स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ॥
स्नात्वाऽर्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥ १८१ ॥

कामाद्व्रतलोपो नावकीर्णिप्रायश्चित्तमकामात्त्विदमाह । **स्वप्नग्रहणमविवक्षितमकामत** इत्येतदेव निमित्तम् । न हि स्वप्ने कामसंभवः अतो यद्यसुप्तस्यापि कथंचिदनिच्छया स्वमलासृगवयववत्प्रक्षरति शुक्रं तत्राप्येतदेव प्रायश्चित्तम् । अकामतो रेतः सिक्त्वेदं प्रायश्चित्तं कुर्यादित्येतदृचं जपेत् ॥ १८१ ॥

उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ॥
आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ॥ १८२ ॥

यावद्भिरर्थः प्रयोजनमुपाध्यायस्य सिध्यति तावदुदकुम्भादि आहरेत् । प्रदर्शनार्थं चैतत् । अन्यदपि गृहोपयोगि यदगर्हितं कर्म तत्कुर्याद्गर्हितं गुरुव्यतिरेकेणोच्छिष्टापमार्जनादि न कारयितव्य इत्येवमर्थोऽयं श्लोकः । यतः सामान्येन शुश्रूषा गुरौ विहिता । यावानर्थ एषामिति विग्रहः । **भैक्षं चाहरहश्चरे**त्सिद्धमन्नमत्यन्ताल्पं यात्राविषयं भैक्षमत्रोच्यते । नैकान्नादि प्रतिषेधेऽन्नशब्दोपादानादन्नं प्रतीयते । 'समाहृत्य भैक्षं निवेद्याश्नीयात्' इति सामानाधिकरण्यात्सिद्धान्नप्रतिपत्तिः । शुष्के ह्यन्ने भिक्षिते कुतस्तस्याशनम् । समाहृतस्य गुरुगृहे पच्यमानस्य भैक्षप्रकृतिता स्यान्न भैक्षता । प्रसिद्ध्या चेदृशमेव भैक्षमुच्यते । अहरहः । ननु भैक्षेण वर्तयेन्नित्यमित्येतस्मादेव सिद्धमहरहश्चरणं सिध्यति । वृत्तिविधानार्थं नित्यग्रहणम् । पर्युषितेनापि घृतादिस्नेहसंयुक्तेन स्याद्वृत्तिस्तदर्थमिदमहरहर्भिक्षित्वाऽशितव्यम् । न पुनरेकस्मिन्नहनि भिक्षितमपरेद्युः परिवास्य यत्किंचित्स्नेहयुक्तमिति प्रतिप्रसवेन भुञ्जीत ॥ १८२ ॥

येभ्यो भैक्षमासादयितव्यं तान्वक्ति

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ॥
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥ १८३ ॥

वेदयज्ञैश्च य अहीना वेदाध्ययनेन संयुक्ताः यज्ञानां च सत्यधिकारे कर्तार अहीनाऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्जितास्तदुपेता इति यावत् । **स्वकर्मसु च प्रशस्ताः** येषा यज्ञेऽधिकारो नास्त्यन्यस्मिन् शास्त्रे कर्मणि तत्पराः । अथ वा स्वकर्मप्रशस्तास्त उच्यन्ते ये स्ववृत्तावेव संतुष्टा न वार्द्धुषिकादिवृत्त्युपजीविनस्तेषां गृहेभ्यो **भैक्षमाहरे**द्याचित्वा गृह्णीयात्**प्रयतः** शुचिः **अन्वह**मित्यनुवादः ॥ १८३ ॥

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ॥
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ॥ १८४ ॥

सत्यप्येतद्गुणयोगे **गुरुगृहे न भिक्षेत** । पूर्वं कुलं वंशस्ततो गुरोर्ये पितृव्यादयस्तेभ्योऽपि न ग्रहीतव्यम् । ज्ञातयो ब्रह्मचारिणः पितृपक्षास्तेषां कुले बन्धुषु च मातृपक्षेषु मातुलादिषु । नैवमभिसंबन्धः कर्तव्यो गुरुज्ञात्यादिष्विति यतो **गुरोः कुल** इति कुलशब्देनैव तेषां संगृहीतत्वात् । कुतस्तर्हि भिक्षेत । एतद्व्यतिरेकेणान्यगेहेभ्य **अलाभेऽ**संभवे **ऽन्यगेहानां** सर्व एव यदि ग्रामो गुरुज्ञातिबन्धुभिर्व्याप्तो भवत्यन्ये नैव संतो, वाऽन्नं न ददाति । एतेष्वपि गृहेषु भिक्षितव्यमन्याभावे प्रथमं बन्धुं भिक्षेत, तदभावे ज्ञातिं, तदभावे गुरुकुलम् ॥ १८४ ॥

सर्वं वाऽपि चरेद्ग्रामं पूर्वोक्तानामसंभवे ॥
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् ॥ १८५ ॥

पूर्वोक्तानां वेदयज्ञैरहीनानाम**संभवे सर्वं** ग्राममनपेक्षवर्णविभागं **विचरेत्** भ्राम्येज्जीवनार्थं केवलम**भिशस्ता**न्कृतपाकत्वेन प्रसिद्धानदृष्टपातकानपि वर्जयित्वा । तथा च **गौतमः** (अ. २ सू. ४१) " सार्ववर्णिकं भैक्ष्यचरणमभिशस्तपतितवर्जम् " । **नियम वाचं** भिक्षावाक्यं वर्जयित्वा आ भैक्षलाभादन्यां वाचं नोच्चरेत् ॥ १८५ ॥

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि ॥
सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥ १८६ ॥

दूरग्रहणमपरिगृहीतदेशोपलक्षणार्थम् । ग्रामात्किल दूरमरण्यं न च तत्र कस्यचित्परिग्रहः । अनुपलक्षणे हि दूरार्थे कियद्दूरमित्यनवस्थितः शास्त्रार्थः स्यात् । **आहृत्य** आनीय **संनिदध्या**त्स्थापयेत् । **विहायसि** गृहस्योपरि न हि निरालम्बनेऽन्तरिक्षे निधानं संभवति । **ताभिः** सायंप्रातर्जुहुयात् । आहरणं तु तात्कालिकमन्यदा वेच्छया । विहायसनिधानमदृष्टार्थमित्याहुः । अन्ये तु ब्रुवते संप्रत्यानीयमानं वृक्षाद्दारु आर्द्रं भवतीति गृहस्योपरि अन्यस्य वा प्रकारादेस्तत एवावगन्तव्यम् ॥ १८६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकृत्वा भैक्षचरणमसमिध्य च पावकम् ॥
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥ १८७ ॥

अग्नीन्धनभैक्षचरणे नैरन्तर्येण **सप्तरात्रं** सप्ताहम**कृत्वा** नियम्य विच्छिद्येते । कालो नियतस्तु तयोरपि । अनातुरस्याव्याधितस्य सतोऽ**वकीर्णिव्रतं** नाम प्रायश्चित्तमेकादशे (श्लो. ११८) वक्ष्यमाणस्वरूपं **चरे**त्कुर्यात् । दोषगुरुत्वख्यापनार्थं त्वेतदत्र प्रायश्चित्तमेव । **स्मृत्यन्तरे** ह्यत्राल्पमन्यत्प्रायश्चित्तमुक्तम् । 'आज्यहोमः सवितुर्वा रेतस्यास्याम्' इति । इहापि च लिङ्गं यदि प्रायश्चित्तमिदमभविष्यत्तदा स्त्रीगमनमिवावकीर्णिप्रायश्चित्तप्रकरणे निमित्तत्वेनापठिष्यत् । ये तु व्याचक्षते सप्तरात्रमेतदुभयमवश्यकर्तव्यमकरणात्तत्र दोषः कृतसप्तरात्रस्य तु परतोऽक्रियायां न दोषस्तानि च सप्ताहानि प्राथम्यादुपनयनात्प्रभृति गृह्यन्ते तदेतदयुक्तम् 'आ समावर्तनात्कुर्यादिति' विरोधात् । उपरितनानन्तर-श्लोकविरोधाच्च ॥ १८७ ॥

भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ॥
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥ १८८ ॥

ननु च भैक्षमहरहश्चरेदिति श्रुतमेवैतत् । एवं हि भैक्षचर्या दृष्टार्था भवति । उक्तं च "निवेद्य गुरवेऽश्नीयात्" इति । न च तदशनं भैक्षसंस्कारः येन वृत्त्यर्थः स्यात् । केचिदाहुरनूद्यते **नैकान्नादी भवेद्व्रतीति** वक्तुमेतदप्यसत् । भैक्षशब्देनैवैकान्नादनस्य निषेधात् । भिक्षाणां समूहो भैक्षमुच्यते । ततः कुत एकान्नादनप्राप्तिस्तस्य पित्र्ये-ऽप्यनुज्ञानार्थं सर्वमेतदनूद्यते । **भैक्षेण वर्तये**दात्मानं भैक्षभोजनेन पालयेत् । जीवितः स्थितिं कुर्यान्नैकस्य संबन्धि **अन्नमद्या**न्नैकभिक्षान्नं भुञ्जीत ।

न पुनरियमाशङ्का कर्तव्या नैकस्वामिकं भुञ्जीत अपि तु बहुस्वामिकमविभक्तभ्रातृ-संबन्ध्येकस्यान्नमेकं वाऽन्नमेकान्नं तदत्ति भुङ्क्ते **एकान्नादी** । **व्रती** ब्रह्मचारी प्रकरणादेव लब्धः श्लोकपूरणार्थो व्रतिशब्दोऽर्थवादः । **भैक्षेणैव** केवलेन व्रतिनो या वृत्तिः शरीर-धारणमुपवासतुल्यफला सा वृत्तिः स्मर्यते ॥ १८८ ॥

व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ॥
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ॥ १८९ ॥

अयमपवादो निमित्तविशेषे भैक्षवृत्त्युपदेशस्य । **देवदैवत्ये** देवोद्देशेन ब्राह्मणभोजने क्रियमाणे, **पित्र्ये** च पितॄनुद्दिश्या**भ्यर्थितो**ऽध्येषितः **काममेकान्नमश्नीयात्** न तु

१ [न भैक्ष्यं परपाकः स्यात् न च भैक्ष्यं प्रतिग्रहः ॥ सोमपानसमं भैक्ष्यं तस्माद्भैक्षेण वर्तयेत् ॥ १ ॥ भैक्ष्यस्यागमशुद्धस्य प्रोक्षितस्य हुतस्य च ॥ यांस्तस्य ग्रसते ग्रासांस्ते तस्य क्रतुभिः समाः॥ ॥२॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वयं याचेत । तस्य व्रतवद्व्रताविरुद्धमधुमांसवर्जितमित्यर्थः । व्रतवदृषिवदिति च शब्दद्वयेनैक एवार्थ उच्यते न पुनर्ग्रामारण्ययोः कर्मभेदेन व्यवस्था । वृत्तानुरोधात्तु द्विरभिधानम् । ऋषिर्वैखानसस्तदशनाभ्यनुज्ञाने मांसमपि ब्रह्मचारिणोऽनुज्ञातं स्यात्तस्य हि ' वैष्णवमप्युपभुञ्जीत " इति मांसाशनमप्यस्ति । देवा देवता यस्य तद्दैवदैवत्यं तच्चाग्निहोत्रदर्शपूर्णमासादिषु दैवेषु कर्मसु ब्राह्मणभोजनमाम्नातम् । आग्रहायण्यादिषु त्वाम्नातं ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयेदिति । तत्रेयमनुज्ञा ।

अन्ये तु सप्तम्यादावादित्यादिदेवोद्देशेन यत्क्रियते ब्राह्मणभोजनं तद्दैवदैवत्यं मन्यन्ते तदसत् । न हि भुजेर्देवतासंबन्धोऽस्त्ययागसाधनत्वात्तस्य । न तूद्देशमात्रं देवता । उपाध्यायाय गां ददाति गृहं संमार्ष्टीत्युपाध्याये गृहेऽपि प्रसङ्गात् । भुजेर्हि प्रत्यक्षो भोक्त्रा संबन्धः आदित्यस्तु न कारकं न चोद्देश्यो गृहवत् न तदर्थं भोजनम् । द्वितीया हि भोक्त्रर्थतां ज्ञापयति नादित्यार्थताम् । न चैतत्क्वचिन्नोदितमादित्याद्युद्देशेन ब्राह्मणान्भोजयेदिति ।

समाचाराद्विधिः । कल्प्यत इति चेन्न । तस्योपलभ्यमानमूलत्वात् । अस्ति हि मूलं बाह्याः स्मृतयः । तत्र तर्हि ब्राह्मणभोजनेन देवताः प्रीणयेदिति शास्त्रार्थः । न चायमर्थः शक्यः कल्पयितुम् । न हि देवताप्रीतिप्रधानः शास्त्रार्थः, किं तर्हि विध्यर्थप्रधानः । न चास्मिन्विध्यर्थ आदित्यादीनां देवताभिमतानां विषयद्वारकः संबन्धो नाप्यधिकारद्वारकः । न हि भेदनादिवन्निमित्तं नापि पश्वादिवत्स्वसंबन्धितया काम्यते । अभोग्यरूपत्वात् ।

अथ तद्गता तुष्टिः काम्यते साऽप्यात्मसिद्धौ प्रमाणान्तरमपेक्षते । न च तदस्ति । न ह्यादित्यादितुष्टिः प्रत्यक्षादिसिद्धा पश्वादिवद्येन काम्येन परेष्टिविधिना युज्येत ।

अथ तु मत्प्रभुरिति स्वाभिप्रेतेन फलेन योजयिष्यतीति । एतदपि प्रमाणाभावादुपेक्षणीयम् । न चास्मिन्नर्थे विधिः प्रमाणं स हि ज्ञातस्यानुष्ठातृविशेषणस्य स्वसंबन्धितया पुरुषं नियुङ्क्ते न पुनः काम्यमानस्य सद्भावमवगमयति । प्रमाणान्तरावगतं हि काम्यमनुष्ठातृविशेषणमनुष्ठातृसंबन्धीति विधिः प्रमाणं मिमीते ।

अथायं यागस्तस्य च भोजनं प्रतिपत्तिर्भवतु यदि शिष्टसमाचारः । भोजनं तावन्न देवतासंबन्धिसाक्षादिति न साध्यम् । यागव्यवहितस्तु संबन्धो न निवार्यते । न चात्र यागबुध्या प्रवर्तते किं तर्हि ब्राह्मणेषु भोजितेषु देवता तुष्यतीति । अतो न देवता भोजनकारकं न कारकविशेषणम् । ततो न विषयो न हि संबन्धः । उद्देश्यत्व-

१ ब—याचेत् । २ फ—मतविरुद्धम् । ३ ब—ब—कारणं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मप्यादित्यादीनां नास्ति। भोजने हि स उद्दिश्यते यस्मै भोजनं दीयते। तच्च ब्राह्मणेभ्यः न चोद्देश्यमात्रं देवता उपाध्यायाय गां ददाति गृहं सम्मार्ष्टीति गृहोपाध्याययोरपि प्रसङ्गात्।

ननु च पित्र्ये कथं ब्राह्मणभोजनं तत्रापि हि न पितरौ[1] देवताः स्युः न च होमस्य पित्र्यत्वं देवतान्तरश्रवणात्। आदित्यादिप्रीतेरिव पितृप्रीतेः प्रमाणान्तरासिद्धत्वान्न विधेः संबन्धः साध्यतया।

अत्र वदन्ति। सिद्धा ह्यत्र पितृप्रीतिः आत्मनामविनाशित्वात् पितरः सिद्धास्तेषां च शरीरसंबन्धः क्रियते। कर्माख्ये प्राधान्यमुपाध्यायाय गां ददाति तद्भोजनं ह्यत्र प्रधानम्। तस्य हि फलं श्रुतं भोजयन्पुष्कलं फलमाप्नोति। तच्च फलं पितॄणां तस्य तृप्तिः स्यादिति। तृप्तिश्च प्रीतिमात्रं न मनुष्याणामिव भुजिक्रियाफलं सौहित्यलक्षणमुत्पद्यते। कार्चित्पितॄणां प्रीतिः स्वकर्मवशतो यत्र तत्र जातावुत्पन्नानाम्। प्रीतिमात्रवचनोऽयं धातुः सौहित्यं तु विशेषः सप्रमाणान्तरावसेयः।

न चात्रैतच्चोदनीयं पुत्रः कर्ता कथं कर्तृगामिफलम्। न हीमानि कर्माणि वैदिकानि परस्परकर्मादीनीति न्यायविदो वदन्ति। यतः पितर एवात्राधिकारिणः कर्तारश्च। अपत्योत्पादनेनैव सर्वमेतत्पितृभिः कृतम्। एवमर्थमेवासावुत्पादितो दृष्टादृष्टमुपकारं करिष्यतीति। ततश्च यथा सर्वस्वारेऽमावादौत्तरकालिकेष्वङ्गेषु ब्राह्मणाः संस्थापयत मे यज्ञमिति प्रैष्यं मृतस्य कर्तृत्वम्। एवमत्रापि द्रष्टव्यम्। एतावान्विशेषः सूत्राधिकारान्तरप्रयुक्ता जीविकार्थिनो भृतिपरिक्रीता ऋत्विजः कर्तारः। इह तु तद्विधिप्रयुक्त एव पुत्रः यथैवोत्पत्तिविधिप्रयुक्तस्य पुत्रार्थेषु पितुः संस्कारेषु अधिकारानुशासनपर्यन्तत्वात्तस्य विधेः। एवं पित्रर्थे श्राद्धादौ पुत्रस्य तथैव जीविनः पितुः "वृद्धौ तु मातापितरौ" इत्यवश्यं कर्तव्यम्। एवं दिष्टं[2] गतं तस्यापि।

न चायं वैश्वानरवत्काम्योऽधिकारः "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" तस्मिन् जात एतामिष्टिं निर्वपति। "पूत एव स तेजस्व्यन्नाद इन्द्रियवान् ह भवति" इति। एवमादिपुत्रफलार्थिनोऽधिकारः पितुर्वैश्वानरे न चूडादिष्विवावश्यकः। इह तु पित्र्यमा निधनात्कार्यमिति यावज्जीविकात्वात्कर्तुर्वैदिकं फलमित्येतदन्यथा परिक्रियते। यथैव वैश्वानरविशिष्टपुत्रवत्ता लक्षणं पितुरेव फलं नाकर्तृगामिता फलस्य एवमिहापि पुत्रस्यैव

---

१ पितरः इति समीचीनः पाठः। २ क—इष्टान्तगतिस्तस्यापि इत्यपरः पाठः।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्फलं या पितुः प्रीतिः उभयथा पितृकर्तृगामिता फलस्य न विरुध्यते । अपत्योत्पादनेनैवैतादृशस्य फलस्येष्टत्वात् । पितॄणामपि नाकामितफलापत्तिः ।

यदि न श्राद्धेन पितरो देवताः कथं तर्हि पित्र्यमेतत्कर्मेति देवतातद्धितः । अनुद्देश्यत्वसामान्यादिति वदामः । युष्मदुपकारार्थमिदं ब्राह्मणभोजनमिति पितर उपदिश्यन्ते । पिण्डपितृयज्ञे तु पितरो देवता एव न श्राद्धे पितॄणां देवतात्वं मन्यन्ते । यत्तु ब्राह्मणा भोज्यन्ते तद्यथाऽग्नौ होमाज्यपुरोडाशादीनां हविदानस्य तादृशमेतत् । तथा च ब्राह्मणाः पितृत्वमापद्यन्त अतोऽन्नपरिवेषणकाले पितर एवोद्देश्या युष्मभ्यमिदं न ममेति । ब्राह्मणास्त्वाहवनीयस्थानीयाः । एतावान्विशेषो यदाहवनीये हविः प्रक्षिप्यते ब्राह्मणानां तु सन्निधाप्यते, ते तु स्वयमुपाददत इति ।

न च यागो न देवतार्थः स्वाहाकारः स्विष्टकृदादिषु दर्शनात् । अतो यागोऽपि सन् श्राद्धकर्म पित्र्यर्थं भविष्यति पितॄणां देवतात्वं फलभावित्वं न निरोत्स्यते । तृतीये किंचिदनुक्तमेव तत्संबद्धं वक्ष्यामः । तस्मान्नादित्यादयो ब्राह्मणभोजने देवता इति स्थितम् ।

ननु चाव्यापकमेतदपि लक्षणम् यागे उद्देश्यः । देवतेत्यन्तरेणापि यागसंबन्धे देवताव्यवहारदर्शनात् । "देवतानां च पूजनं" दैवतान्यभिगच्छेदिति न यागो नाप्याभिमुख्येन गमनं पादविहारात्मकं देवताः प्रतिसंभवति । नैष दोषः । यत्र देवताचोदना तत्रैतत्पूजाविधानं भविष्यति वैश्वदेवदेवतास्वग्निहोत्रादिसंबन्धिनीषु वा ।

ननु चैवमपि नोपपद्यते । न हि देवतायाः पूज्यत्वं संभवति स्वरूपहानिप्रसङ्गात् । पूजाकर्मत्वेऽपि यागसंप्रदानता स्यात् । उक्तम् । "न क्रियान्तरस्य किंचिद्भवति" इति । शक्तिर्हि कारकं सा च प्रतिक्रियं विभिद्यते । कार्यावगम्यत्वाच्च तस्या यावत्कार्यं भेदो न्याय्यः । अतो यत्संप्रदानं तत्संप्रदानमेव, न तस्य कर्मापत्तिः । कथं तर्हि 'पाचकाय देहि' पचेः कर्ता ददातेः संप्रदानम् । "शरैः क्षताङ्गः प्रियया कटाक्षैर्निरीक्ष्यमाणो विवशो जगाम" । उक्तोऽत्र परिहारः । शक्तिशक्तिमतोर्भेदस्यौपचारिकत्वात्सिद्धं 'व्रजति भुक्त्वेति' । तस्माद्यदि पूजाविषयमेतत् न देवतालाभः, अथ देवता आदित्यादयो न पूजाविधिः । न हि देवतायां सिद्धायामुद्दिश्य पूजा विधीयते । न ह्यादित्यादीनां देवतासामान्यशब्दो गोशब्दवच्छागलेयादीनाम् । अत्रोच्यते । सत्यं नादित्यादयः स्वरूपतो देवताः संबन्धिशब्दोऽयं विधित एव नार्थोऽवगन्तव्यो "यस्य हविषश्चोद्यते सा तस्य देवता" इति । स एवाग्निराग्नेयादन्यत्र न देवतेत्युक्तम् । किंतु

१ फ-द्रव्यदानस्य । २ ब-ब-ममेति । ३ फ-च्छागमेषाश्वादीनाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न पूजाविधिः पूज्यमानमन्तरेण संभवति । देवताश्च पूज्यत्वेन श्रुतास्तत्र यदि देवतार्थे मुख्येन पूजा संभवति तदा याग एव पूजा विज्ञेया । तस्य चारूपत्वादसति द्रव्यदेवताश्रवणे पूर्वाह्णकालविध्यर्थोऽयमनुवादो विज्ञेयः । अतः पूर्वाह्णे दैवतानि कर्तव्यानीत्युक्तं भवति ।

किमुच्यते देवता न श्रूयते यावता न साक्षाद्देवताशब्दोऽस्ति नायं सामान्यवचनो देवतार्थः यासामन्यत्र देवतात्वं दृष्टं तासामेतत्पूजाविधानम् । तेनाग्निरादित्यो रुद्र इन्द्रो विष्णुः सरस्वतीत्येवमादयः पूज्याः । पूजार्थं च धूपदीपमाल्योपहारादीनां निवेदनम् । तत्राग्नेस्तावत्साक्षात्संबन्धः । तच्चादित्यस्य दूरदेशवर्तित्वाच्छुचावकाशे तदुद्देशेन गन्धादिप्रक्षेपः । इन्द्रादीनां स्वरूपस्याप्रत्यक्षत्वादिन्द्रादिशब्दोद्देशेनैव तथा विधानम् । यद्यपि पूज्यमानप्रधाना पूजा तथापि हि पूज्यमानानां कार्यान्तरशेषाभावे पूजैव कर्तव्यतया विज्ञायते । द्रव्यप्रधाने हि न विधिविषयत्वसंभवः " तानि द्वैधं गुणप्रधानभूतानि " इति " यैस्तु द्रव्यं चिकीर्ष्यते " इति न्याय्यं तु स्तुतिशास्त्रादिवत् । यथा न स्तुतिः स्तुत्यर्था एवमियमपि पूजा न पूज्यार्था । स्तौतिशंसत्योर्निर्देशो नास्तीति चेत्, अत्रोक्तं द्वितीया । सक्तुषु दर्शनात् । एवं मृदं गां दैवतं प्रदक्षिणानि कुर्वीतेति दक्षिणाचारता विधीयते । दक्षिणेन दैवानि कर्माणि कर्तव्यानि । न हि मृदादि तद्देवताया दक्षिणेन मार्गेण स्थानममूर्तत्वात् ।

युज्यते एवं दैवतान्यभिगच्छेदिति । पादविहारव्यापारेण देवतासमीपप्राप्त्यसंभवाद्गमेश्च ज्ञानार्थत्वादभिगमनं स्मरणात्किं विशिष्यते । देवता अभिगच्छेत्कर्मकाले मनसा ध्यायेच्चित्तव्याक्षेपतामाकुलताख्यां परिहरेदित्यर्थः । तथा चोपलभ्यमानमूलैवेयं स्मृतिर्भवति । यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेदिति ।

ननु चैतदप्युद्देश्यत्वान्यथानुपपत्तेः प्राप्तमेव स व्याक्षेपस्याकुलस्य च संभवाददोषः । एवं देवस्वं देवपशवो देवद्रव्यमित्यादयो व्यवहारास्तादर्थ्येनोपकल्पितेषु पश्वादिषु द्रष्टव्याः ।

दण्डाधिकारे तु प्रतिकृतिविषयमेव देवताव्यवहारमिच्छन्ति । अन्यथा व्यवस्थाभङ्गः स्यात् । कल्पितदेवतारूपाणां प्रतिकृतीनां कल्पितेनैव स्वस्वामिभावेन यत्संबन्धि तदेव " देवब्राह्मणराज्ञां तु द्रव्यं विज्ञेयमुत्तमम् " इत्यादिषु देवद्रव्यम् । न हि देवतानां स्वस्वामिभावोऽस्ति मुख्यार्थासंभवाद्गौण एवार्थो ग्राह्यः ।

---

१ क—न्यायात्स्तुतिशास्त्रादिवत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कः पुनरत्र गौणोऽर्थः कार्यं प्रसाधये य एवाग्निर्माणवक इत्यादिषु नैवं शुक्लो माणवके तद्गुणदर्शनात् ।सर्वत्र हि साधारणगुणयोगाद्गौणार्थावगतिः। ते च गुणाः प्रत्यक्षा ध्यवसेयाः । इह तु देवतार्थस्य कार्यावगम्यत्वात्कार्यतः स्वरूपाविशेषानवगमात्कुतः प्रतिकृतिषु साधारणगुणावसायः । अत्रोच्यते । मन्त्रार्थवादेषु तथाविधरूपश्रवणात्तेषां च गुणवादेन व्याख्यानम् । तन्मूलमपश्यन्तो यथाश्रुतार्थग्राहिणस्ताद्रूप्यमिन्द्रादिषु प्रतिपाद्यमानाः प्रतिकृतिषु सादृश्यमपश्यन्तीति युक्तैव गौणता ।

यत्तु श्राद्ध एव वैश्वदेवब्राह्मणभोजनं दैवदेवत्यमाचक्षते तेषां पित्र्याङ्गत्वात् । तस्य पित्र्यग्रहणेन गृहीतत्वादनर्थकं पुनर्वचनम् । सामान्यशब्दत्वाच्च क्रतोर्विशेषावगतिसाहचर्यादितिवत् । यदि च पित्र्यशब्देन ग्रहणं भवेद्गोबलीवर्दन्यायोऽपि असति विषयभेदे भवति ॥ १८९ ॥

ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः ॥
राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते ॥ १९० ॥

यदेतदेकान्नभोजनकर्मादिष्टमेतद्ब्राह्मणस्यैव मनीषिभिर्विद्वद्भिर्वेदादुपलभ्योपदिष्टं क्षत्रियवैश्ययोस्तु नैतदिच्छन्ति न कदाचित्तयोर्भैक्षभोजनम् ।

ननु च श्राद्धभोजने ब्राह्मणानामेवाधिकारो " ये तत्र भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः । अर्हत्तमाय विप्राय " इति वचनाद्ब्राह्मणस्यैव प्रतिग्रहाधिकारं तत्र कुतोऽयं प्रतिषेधो राजन्यवैश्ययोरिति प्रतिप्रसवश्चायं नापूर्वविधिः । प्राप्तिसव्यपेक्षाश्च प्रतिषेधा भवन्ति । उच्यते । भुक्तवतां ब्राह्मणानामेव शिष्टस्यान्नस्य प्रतिपत्तिराम्नाता ' ज्ञातिप्रायं प्रकल्पयेत् ' इति । न च तत्र जात्यपेक्षा यस्य ज्ञातिः स तेन भोजयितव्यः । न च तत्र क्षत्रियादयः प्रतिग्रहीतृतया संबध्यन्ते अपि तु ज्ञातयः । अतोऽस्याः प्राप्तेः प्रतिषेधः ॥ १९० ॥

चोदितो गुरुणा नित्यमप्रचोदित एव वा ॥
कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ॥ १९१ ॥

नोदितो गुरुणाऽनियुक्तोऽपि कुर्यादध्ययने योगं **यत्नम्** । ननु चाहूतोऽधीत इत्युक्तं कथमप्रणोदितस्य योग उच्यते । गृहीतवेदैकदेशस्य परिशेषकगुणार्थमेतदुच्यते । न तत्राचार्यनियोगोऽपेक्षितव्यः । एवमाचार्याय हितं यदुदकुम्भाहरणादि श्रान्तसंवाहनादि तदप्यनियुक्तेन कर्तव्यम् ॥ १९१ ॥

---

१ फ–विधेः ।

For Private And Personal Use Only

शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च ॥
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥ १९२ ॥

कुतश्चिदागतो गुरोर्मुखं **वीक्षमाणास्तिष्ठेन्नो**पविशे**न्नियम्य च शरीरं** पादहस्तचालन-हसितानि न कुर्यान्न किंचिद्वदेत् अनुपयोगि । बुद्धीन्द्रियाणि नियच्छेत् । यदाश्चर्यरूपं किंचिद्रुरुसकाशे न तत्पुनः पुनर्भावयेत् श्रोत्रादीन्यपि । चक्षुर्नियमस्तु गुरुवक्त्रप्रेक्षणादेव सिद्धः । मनश्च नियच्छेच्छास्त्रीयान्विकल्पान्गृहकुशूलाद्यारम्भान्मनसा वर्जयेत् । उक्तस्तु 'संयमे यत्नम्' इति शक्तिप्रतिषेधार्थः । स प्रतिषेधः गुरुसन्निधौ स्वल्पोऽपीन्द्रियाणामप्रति-षिद्धेऽपि विषये प्रसरो न देयः । **प्राञ्जलिरूर्ध्वकृतकरकपोतः**[1] ॥ १९२ ॥

नित्यमुद्धृतपाणिः स्यात्साध्वाचारः सुसंवृतः[2] **॥**
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥ १९३ ॥

न केवलं सूत्रकात्पाणिरुद्धर्तव्योऽपि तु वाससोऽपि । नित्यग्रहणं न तिष्ठत एवायं पाण्युद्धारो नाप्यध्ययनवेलायाम् । किं तर्हि ततोऽन्यत्रापि । **साध्वाचारः** साध्व-निन्द्यः आचारो वाग्व्यवहारादिः कार्यः । अश्लीलादिभाषणमसंनिधानेऽपि गुरोर्नित्यग्रह-णान्न कर्तव्यम् । **सुसंवृतः** वाङ्मनश्चक्षुर्भिः नियतात्मा स्वल्पोऽपि दोषस्तं परिहरेत् । अनावृतो लोक उच्यते यो यथाकामी तद्विपरीतः सुसंवृतः । अन्ये तु मन्यन्ते वस्त्रे-णाच्छादितशरीरो गुरुसन्निधौ भवेत् नोत्तरीयमवतारयेदेवं तिष्ठेत् । यदा तु गुरुणा **ऽऽस्यतामित्युक्त** एतेन शब्देन भ्रूविक्षेपादिना वा विधेः प्रतिपादनार्थत्वात् प्रतिपादनं च न शब्दव्यापार एव तदाऽऽ**सीत**ोपविशेत् । **अभिमुखः** संमुखः ॥ १९३ ॥

हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ ॥
उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् ॥ १९४ ॥

हीनं न्यूनमन्नं भुञ्जीत **गुरुसंनिधौ** । न्यूनता च परिमाणतः क्वचित्क्वचित्सं-स्कारतः । यदि संस्कृतमाज्यघटितक्षीरादिव्यञ्जनं भिक्षातो लब्धं स्यात्तदा यदि गुरुणा तादृशमन्नं न भुक्तं स्यादेककाले च गुरुणा सह भोजने । यदि गुरोस्तादृशमन्नं गृहे न सिद्धं स्यात्तदा तत्तेन नाशितव्यम् । अथ गुरोरपि तादृशमन्नं स्यात्तदाऽपचयः कर्तव्यः । **वस्त्रं** यदि गुरोरौर्णं स्यात्तदा न कार्पासादि शिष्येण प्रावरीतव्यम् । **वेष** आभरणमण्डनादिः सोऽपि हीनः । सर्वदा ब्रह्मचर्यात्परोऽपि[3] । अतएव वेषग्रहणम् । न च ब्रह्मचारिणो मण्ड-नमिष्यते । उत्तिष्ठन्प्रथमं चास्य शय्याया रात्र्युपरमे आसनाद्वा उत्थानावसरं बुद्ध्वा

---

१ क–कपोलः । २ क–सुसंयतः । ३ ङ–परेणापि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रथमं पूर्वं **गुरोरुत्तिष्ठेत्** । चरमं पश्चात्स्वापकाले सुप्ते गुरौ **संविशेच्छ**य्यां समाश्रयेदासने चोपविशेत् ॥ १९४ ॥

प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ॥
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥ १९५ ॥

प्रतिश्रवणमाहूयमानस्य कार्ये नियुज्यमानस्य गुरुसंनन्धिवचनाकर्णनम् । **संभाषा** गुरुणा सहोक्तिप्रत्युक्तिकरणम् । ते प्रतिश्रवणसंभाषे । **शयानः** स्वे स्वस्तरे निक्षिप्तगात्रो **न समाचरेन्न** कुर्यात् । **नासीन** आसने चोपविष्टः । **न भुञ्जानः न तिष्ठन्ने**कस्मिन्नेव देशेऽविचलन्नूर्ध्वं स्थितः **न** पुनः **पराङ्मुखः** यस्यां गुरुर्दृश्यते ततः परावृत्य स्थितो न कुर्यात् ॥ १९५ ॥

आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः ॥
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ॥ १९६ ॥

कथं तर्हि आसीनो यदाऽऽज्ञां ददाति तदा **स्थित** आसनादुत्थाय प्रतिश्रवणसंभाषे **कुर्यात्** । **अभिगच्छंस्तु तिष्ठतः** तिष्ठन्गुरुर्यदाऽऽदिशति तदाऽऽभिगच्छंस्तदभिमुखः कतिचित्पदानि गत्वा **आव्रजत** आगच्छतः **प्रत्युद्गम्या**भिमुखमेव गत्वा प्रातिराभिमुख्ये **धावतो** वेगेन गच्छतः पश्चाद्धावन् पश्चाद्वा वसतस्तथा ॥ १९६ ॥

पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम् ॥
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥ १९७ ॥

तथा **पराङ्मुखस्य** गुरोः संमुखोपविष्टः शिष्यः यदि गुरुः परावृत्य कथंचित्स्थितः प्रेष्यति तां दिशं गत्वाऽभिमुखीभूय पूर्वोक्तं कर्तव्यम् । **दूरस्थस्य** समीपं **अन्तिकं एत्या**गत्य प्राप्यासीनस्यापि शयानस्य प्रणम्य प्रह्वो भूत्वा गात्राण्यवनमय्य निदेशे निकटे तिष्ठतोऽपि प्रणम्यैव यत्प्रागुक्तमभिगच्छन्निति ॥ १९७ ॥

नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ ॥
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥ १९८ ॥

नीचमनुन्नतं गुरुशय्याद्यपेक्षया च नीचत्वम् । नित्यग्रहणाद्ब्रह्मचर्यादुत्तरकालमपि गुरोश्च दृष्टिगोचरे नास्यातव्यम् । गुरुः पश्यति तत्र न यथेष्टमासीत पादप्रसारणाङ्गनिपक्षादिना । आसनग्रहणं चेष्टामात्रोपलक्षणार्थम् । यथेष्टचेष्टो न भवेत् ॥ १९८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नोदाहरेदस्य नाम परोक्षमपि केवलम् ॥
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥ १९९ ॥

नोदाहरेन्नोच्चारयेदस्य **गुरोर्नाम केवलं** उपाध्यायाचार्यभट्टाद्युपपदरहितं **परोक्ष**-मपि । **न चैवास्यानुकुर्वीत** सदृशं न कुर्यान्नाट्यकार इव । **गतिः** एवमस्मद्गुरुरपगमति । **भाषितं** द्रुतविलम्बितमध्यमत्वादि । **चेष्टितं** एवं भुंक्ते एवमुष्णीषं बध्नाति एवं परिवर्तत इत्यादि । उपहासबुद्ध्याऽयमनुकरणप्रतिषेधः ॥ १९९ ॥

गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते ॥
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ २०० ॥

यत्र देशे दुर्जनसंपाते **गुरोः परीवादः** संभूतदोषानुकथनं **निन्दा** अविद्यमानानां दोषाणामभिधानं प्रवर्तते तत्र **कर्णौ पिधातव्यौ**ऽङ्गुल्यादिना संवरीतव्यौ । ततः प्रदेशाद्वाऽन्यत्र **गन्तव्यम्** ॥ २०० ॥

परीवादात्खरो भवति श्वा वै भवति निन्दकः ॥
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥ २०१ ॥

पूर्वप्रतिषेधे शेषोऽयमर्थवादः। अत एवं व्याख्येयं **परीवादा**च्छ्रुत्वा **खरो भवति**। हेतौ ल्यप्लोपे वा कर्मणि पञ्चमी परीवादं श्रुत्वा । **निन्दको** निन्दाश्रावी उपचारान्निन्दक उच्यते । तथा संस्कर्ताऽवघातकः श्रवणनिषेधादेव साक्षात्करणनिषेधसिद्धिः । **परिभोक्ता** यो गुरुमुपजीवति कुसृत्याऽनुवर्तते । **मत्सरी** गुरुसमृद्धिमभ्युच्चयं न सहतेऽन्तर्दह्यते । अनयोरप्राप्तत्वादपूर्वो विधिः । परिवादपरीवादयो"र्घञमनुष्ये बहुलमिति"[2] । दीर्घत्वादीर्घत्वे ॥ २०१ ॥

दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ॥
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥ २०२ ॥

अत्र परप्रेषणेन गन्धमाल्यादेरर्पणं प्रतिषिध्यते । स्वयंकृते परेण च कारिते तुल्यं कर्तृत्वं प्रयोजकेऽपि कर्तृत्वस्मरणादित्येतया बुद्ध्या प्राप्ते परमुखेनार्चने प्रतिषेधः । अशक्तौ ग्रामान्तरस्थस्य न दोषः । ग्रामान्तरं गच्छत्युपाध्याये भवानभिवादयतां स गत्वा मातुलमभिवादयत इत्यादिव्यवहारदर्शनात् । **न क्रुद्धः** गुरौ क्रोधासंभवादन्यनिमित्तेऽपि क्रोधे पूजाकाले तत्त्यागेनायं प्रसादोऽभिधीयते । क्रुद्धामित्यन्ये पठन्ति । **नान्तिके** समीपे **स्त्रियाः**

---

१ परोक्षं सत्कृपापूर्वं प्रत्यक्षं न कथंचन ॥ दुष्टानुचारी च गुरोरिह वामुत्र चेत्यधः ॥
२ " उपसर्गस्य घञमनुष्ये बहुलमिति " (व्या. सू. ६।३।१२२)

२२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कामिन्याः स्थितं गुर्वाराधनपरत्वाच्छुश्रूषाकलापस्य येन चित्तखेद आशङ्क्यते स निषिध्यते अतः स्त्रिया इत्येवं व्याख्यातम् । **यानं** गन्त्र्यादि । **आसनं** पीठिकामञ्चादि । ततोऽवरुह्या-वतीर्याभिवादयेत् ।

शय्यासनस्थ इत्यत्रासनादुत्थानमुक्तमनेनावरोहणं विधीयते मञ्चाद्वाऽऽसनादुत्थानमनवरोहतोऽपि संभवति अवरोहणं तर्हि अनुत्थितस्य च न संभवत्यतोऽनेनैव सिद्धे शय्यासनेत्यत्रासनग्रहणमनर्थकम् । नानर्थकं यदि शिष्यः पराङ्मुखः प्रत्यग्देशादागतं गुरुं मन्येत तदासनस्थ एव संभ्रमपरावृत्तस्तदभिमुखीभूत उत्तिष्ठेन्न तूत्थायाभिपरावर्तेत तथा ह्युत्थानक्रियया संमुखीभवनं व्यवधीयेत ततः कुप्येद्गुरुः । पराङ्मुखस्योत्तिष्ठतो गुरुरेवमपि मन्येत नायं ममाभ्युत्थितो निमित्तान्तरकृतमेवास्याभ्युत्थानं तस्मादर्थवदुभयत्राप्यासनग्रहणम् ॥ २०२ ॥

प्रति[1]वातानुवाते च नासीत गुरुणा सह ॥
असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् ॥ २०३ ॥

यस्यां दिशि गुरुर्व्यवस्थितस्ततो देशाद्यदा वायुः शिष्यदेशमागच्छति शिष्यदेशात् गुरुदेशं ते **प्रतिवातानुवाते** । एकं प्रतिवातमपरमनुवातम् । तदपेक्षया **गुरुणा सह नासीत** अपि तु तिर्यग्वातसेवी गुरोर्भवेत् । अविद्यमानः संश्रवो यत्र तस्मिन्नसंश्रवे **न किंचिदपि** गुरुगतमन्यगतं वा **कीर्तयेत्** । यत्र गुरुर्व्यक्तं न शृणोति ओष्ठसंचलनादिना शिष्यसम्बन्धि नाजानाति किंचिदयमेतेन संभाषते तन्न कीर्तयेत् ॥ २०३ ॥

गोश्वोष्ट्रयानप्रासादप्रस्त[2]रेषु कटेषु च ॥
आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥ २०४ ॥

यानशब्दः प्रत्येकमभिसंबध्यते । गोश्वोष्ट्रैर्युक्तं यानं **गोश्वोष्ट्रयानम्** । दधिघटादिवत्समासे युक्तशब्दस्य लोपः । केवलेषु तु अश्वपृष्ठादिष्वारोहणं नास्ति । यदि स्वतन्त्रो यानशब्दो विज्ञायेत तदा स्यादप्यनुज्ञा । समाचारात्तु कदाचित्कमनुज्ञानं दृश्यते । **प्रासाद** उपरिगृहादीनां या भूमिस्तस्यां गृहादिभूमिवत्सिद्धं सहासनम् । **प्रस्तरः** दर्भादितृणाकीर्णः । **आस्तरः कटः** न तु शरवीरणादिकृतः प्रसिद्धः । **शिला** गिरिशिखरादावन्यत्र वा । **फलकं** दारुमयमासनं पोतवर्तादि । **नौ**र्जलतरणसंप्लवः । तेन पोतादावपि सिद्धं भवति ॥ २०४ ॥

---

१ फ–प्रतिवातेऽनुवाते । २ स्वस्तरेषु इत्यपरः पाठः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ॥
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥ २०५ ॥

उक्ता गुरुवृत्तिरिदानीमन्यत्रातिदिश्यते । अध्ययनधर्मत्वात्सर्वस्यास्य गुरुरत्राचार्यो विज्ञेयः । तस्य यो गुरुस्तस्मिन्संनिहिते गुरुवद्वर्तितव्यम् । संनिहित इति न तद्गृहगमनमभिवादनाद्यर्थं कर्तव्यम् । गुरुगृहे वसन् **गुरुणाऽनिसृष्टो** अननुज्ञातः **स्वान् गुरून्** मातापितृप्रभृतीन्नाभिवादयितुं गच्छेन्न पुनर्गुरुगृहे स्थितस्य यदि स्वे गुरव आगच्छन्ति तदा तदभिवादने गुर्वज्ञाऽपेक्षितव्या। कुत एतत् मातापित्रोरत्यन्तमान्यत्वात्। पितृव्यमातुलादीनामप्यभिवादनप्रवृत्तस्य न कश्चिद्गुरुवृत्तेर्विघ्नः । आराधनार्थं एवायं सर्वः प्रयासः । मातापितृगुरुसन्निपाते कः क्रमोऽभिवादनस्येत्युक्तं "सर्वमहती माता" । पित्राचार्ययोस्तु विकल्पः। यतः पितृत्वाध्यारोपेणाचार्यस्य गौरवं विहितम् । अतः पिता श्रेष्ठः। यतश्चोक्तं "गरीयान् ब्रह्मदः पिता" (श्लो. १४६) इति तत आचार्यः अतोऽयं विकल्पः ॥ २०५ ॥

विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ॥
प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि ॥ २०६ ॥

अयमप्यतिदेशः । आचार्यादन्ये उपाध्यायादयो विद्यागुरवः तेष्वेवमेव वर्तितव्यं शरीरं चैवेत्यादिकृत्या । **स्वयोनिषु** ज्येष्ठभ्रातृपितृव्यादिषु । **नित्या वृत्तिर्गुरुवृत्तिः ।** विद्यागुरूणां त्वाचार्यव्यतिरेकेण यावद्विद्याग्रहणम् । **अधर्माद**कार्यात्परदारगमनादेः **प्रतिषेधत्सु** वयस्येष्वपि अभ्यन्तरगत्या रूढतयाऽकार्ये चिकीर्षन्यः सुहृदादिस्तम् । "आकेशग्रहणान्मित्रमकार्येभ्यो निवर्तयेत्" इति । तस्मिन्समहीनवयस्केऽपि गुरुवद्वर्तितव्यम् । हितं च विधिरूपमग्रंथकमुपदिशत्सु अथवा हितस्योपदेष्टारोऽभिनना उच्यन्ते ॥ २०६ ॥

श्रेयस्सु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्रे[1] तथाऽऽचार्ये गुरोश्चैव स्वबन्धुषु ॥ २०७ ॥

श्रेयांस आत्मापेक्षया वित्तवयोविद्याद्यतिशययुक्ताः तेषु **गुरुवद्वृत्तिं** यथासंभवमभिवादनप्रत्युत्थानादि सर्वदैव **समाचरेत्** । बहवोऽत्र शब्दा गतार्थाः प्रयुज्यन्ते । तेषां वृत्तवशात्प्रयोगो न दुष्यति । श्रेयस्स्वित्येतावद्वक्तव्यम् । गुरुवदित्याक्षिप्यते वृत्तिमित्यादि प्राप्तमेव तदेतत्सर्वस्मिन्नेवास्मिन्ग्रन्थे स्वयमुत्प्रेक्ष्यम्। **गुरुपुत्रे तथाचार्ये** । आचार्यग्रहणेनाध्यापकत्वं लक्ष्यते । यद्यसन्निहिते गुरौ तत्पुत्रोऽध्यापयति कतिचिदहानि तदा तस्मिन्गुरुवद्वृत्तिः । पाठान्तरम् । गुरुपुत्रेष्वथाचार्ये । आचार्यशब्दो गुणवद्ब्राह्मणजाति-

---

१ ड-एवमेव । २ फ-गुरुपुत्रेषु चार्येषु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वचनः। शूद्राचार्यौ चर्माणि व्यायच्छेते तयोराचार्यं वर्णं जापयन्तीति प्रयोगदर्शनात्। न च सर्वस्मिन्गुरुपुत्रे वृत्तिरेषा विधीयते। **गुरोश्चैव स्वबन्धुषु**। स्वग्रहणं गुरुवंश्यर्थि गुरुवंशसंबन्धितैवात्र निमित्तं न वयोविद्याद्यपेक्ष्यते॥ २०७॥

बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति॥ २०८॥

ये न पठन्ति गुरुपुत्रविशेषणार्थं पूर्वत्राचार्यग्रहणं तेषामध्यापयितरि गुणवति समानजातीये सर्वगुरुवृत्तिः प्राप्ताऽनेन विशेषणावस्थाप्यते। **अध्यापयन्गुरुसुतो गुरुवन्मानं पूजामर्हति** नानाध्यापयन्। ननु च विद्याग्रहणनिमित्तत्वाद्गुरुवृत्तिरध्यापयद्गुरुवद्गुरुपुत्रेऽप्यध्यापयितरि प्राप्तैव शैशवब्राह्मणनिदर्शनात्कनीयसोऽपि सिद्धेत्यतो "बालः समानजन्मा वा" इत्येवमर्थमपि न वक्तव्यम्। सत्यम्। यो वेदं वेदैकदेशं वाऽध्यापयति तस्यानाचार्यस्याप्येषा वृत्तिरुक्ता। अयं तु न ग्राहकः केवलं कतिचिदहान्यहर्भागं वाऽध्यापयति अतो नाचार्यो नोपाध्याय इत्यप्राप्तौ विधिरयम्। अस्मादेव वचनादन्यस्य भग्नमन्त्रादेरध्यापकस्य न सर्वा गुरुवृत्तिः कर्तव्येति विज्ञायते। ये च पूर्वत्राचार्यशब्दं पठन्ति तेषामुत्तरार्थमिदमनूद्यते। "उत्सादनं[1] चेति" वक्ष्यति। **शिष्यो वा यज्ञकर्मणि**। यज्ञकर्मग्रहणं प्रदर्शनार्थं क्वचिदङ्गे वेदैकदेशे मन्त्रभागे कस्मिंश्चिद्ब्राह्मणभागे वा तथापि गुरुवत्पूज्यः यदि तु गुरुपुत्रः। तस्मादनेन प्रकारेण कांचिद्विद्यां शिक्षेत तदा तेन तस्मिन्गुरुवद्वर्तितव्यमित्युक्तमेवमर्थवादत्वादस्यारम्भस्य। ये तु व्याचक्षते अध्यापयन्नित्यनेनाध्यापनसामर्थ्यं लक्ष्यते अध्यापनसमर्थश्चेदध्यापयतु मा वाऽध्यापयेत् गृहीतवेदश्चेद्गुरुवद्द्रष्टव्यः तेषां शाब्दमेतद्व्याख्यानं सत्यं भवति। शता लक्षणार्थः स[2] तु क्रियायाः लक्षणहेत्वोः क्रियायाः (व्या. सू. ३।२।१२६) इति। क्रिया चात्र श्रुता। गुरुवन्मानमर्हति॥ २०८॥

उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम्॥ २०९॥

अभ्यक्तस्योद्वर्तनमुत्सादनं न कुर्यात्। **गुरुपुत्रस्य पादयोश्चावनेजनं** प्रक्षालनम्। अस्मादेव प्रतिषेधाद्गुरावेतदनुक्तमपि कर्तव्यतया प्रतीयते। यदा तु गुरुपुत्र एव गुरुः संपद्यते कृत्स्नवेदाध्यापनोपयोगितया तदा स्वनिमित्तं तत्रोच्छिष्टभोजनाद्यस्ति तदनेन प्रतिषिध्यते। आतिदेशिकस्यानेन निषेधो नौपदेशिकस्य॥ २०९॥

१ अग्रे २०९ श्लोके। २ फ–तत्तु।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ॥
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥ २१० ॥

गुरुयोषितो गुरुपत्न्यः **सवर्णाः** समानजातीयाः **गुरुवत्प्रतिपूज्या** आज्ञाकरणादिना । **असवर्णास्तु** केवलैः **प्रत्युत्थानाभिवादनैः** । बहुवचनादाद्यर्थोऽत्रान्तर्भवति । तेन हि प्रियहितादि गत्याद्यननुकरणाद्यप्यतिदिश्यते ॥ २१० ॥

अभ्यञ्जनं स्नापनं च गात्रोत्सादनमेव च ॥
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥ २११ ॥

घृततैलादिना केशकायोपदेहनमभ्यञ्जनम् । **गात्राणामुत्सादनमुद्वर्तनं** कार्यसामान्यात्पादधावनमपि । सर्वथा शरीरस्पर्शसाध्या या काचिदनुवृत्तिः सा सर्वा प्रतिषिध्यते । वक्ष्यति यं हेतुं "स्वभाव एष नारीणाम्" इति । **केशानां च प्रसाधनं** विन्यासरचनादिकरणं कुंकुमसिंदूरादिना सीमन्तोत्थापनम् । प्रदर्शनार्थं चैतदुक्तं तेन देहप्रसाधनमपि चन्दनानुलेपनानि निषिध्यन्ते ॥ २११ ॥

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ॥
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥ २१२ ॥

पूर्णविंशतिवर्षेण तरुणेनेत्यर्थः । बालस्य आ षोडशाद्वर्षाददोषः । पूर्णानि विंशतिवर्षाणि यस्य स एवमुच्यते । अयं न्यायो यौवनोद्भेदोपलक्षणार्थः । अत एवाह । **गुणदोषौ विजानता** । कामजे सुखदुःखे गुणदोषावभिप्रेतौ । स्त्रीगतौ च स्वाकृतिदुराकृतिलक्षणौ धैर्यचापले वा । सर्वथाऽतन्त्रा विंशतिसंख्या ॥ २१२ ॥

स्वभाव एष नारीणां नराणामिह दूषणम् ॥
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ॥ २१३ ॥

एषा प्रकृतिः स्त्रीणां यन्नराणां धैर्यन्यावर्तसङ्गाद्धि स्त्रियः पुरुषान्त्रतात्त्र्यावयेयुः । **अतोऽर्थात्**तस्माद्धेतोर्न **प्रमाद्यन्ति** दूरत एव स्त्रियः परिहरन्ति । प्रमादः स्पर्शादिकरणं वस्तुस्वभावोऽयं यत्तरुणी स्पृष्टा कामकृतं चित्तसंक्षोभं जनयति । तत्र चित्तसंक्षोभोऽपि प्रतिषिद्धः तिष्ठतु तावदपरो ग्राम्यधर्मसंरम्भः । **प्रमदाः** स्त्रियः ॥ २१३ ॥

अविद्वांसमलं लोके विद्वांसमपि वा पुनः ॥
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥ २१४ ॥

न चैतन्मन्तव्यं नियमितानि येन चिरमिन्द्रियाण्यतिगुरुपातकं गुरुदारेषु दुष्टेन भावेन प्रेक्षणमपीति य एवं वेद तस्य न दोषः पादस्पर्शादाविति । यत एवंविधानपि

---

१ अग्रे २१३ श्लोके ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दोषान्यो जानीते यो वा न किंचिज्जानीते तौ स्त्रीविषये समानौ यतो नात्र विद्वत्ता प्रभवति । शक्नुवन्ति स्त्रियः सर्वं मुख्यममार्गे लोकशास्त्रविरुद्धं विषयं नेतुं प्रापयितुं कामक्रोधवशानुगं सन्तम् । कामक्रोधाभ्यां यः संबध्यत इत्यर्थः । अवस्थाविशेषोपलक्षणार्थं चैतत् । अत्यन्तबालं अत्यन्तवृद्धं च प्राप्तयोगप्रकर्षणं च वर्जयित्वा येन निरन्वयमुत्थिताः संसारपुरुषधर्मास्तद्व्यतिरेकेण न कश्चित्पुरुषोऽस्ति यः स्त्रीभिर्नाकृष्यते । अयःकान्तेनेव लोहः । न चात्र स्त्रीणां प्रभविष्णुता वस्तुस्वाभाव्यात्तरुणीजनदर्शने पुंसामुन्मथ्यते चित्तं विशेषतो ब्रह्मचारिणाम् ॥ २१४ ॥

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ॥
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ २१५ ॥

अतो **विविक्तासनः** निर्जने शून्ये गृहादौ नासीत । नापि निःशङ्कमङ्गस्पर्शादि कुर्यात् । अतिचपलो हीन्द्रियसंघातो **विद्वांसमपि** शास्त्रनिगृहीतात्मानमपि **कर्षति** हरति परतन्त्रीकरोति ॥ २१५ ॥

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि ॥
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ॥ २१६ ॥

काममित्यरुचिं सूचयति । उत्तरेण चैतत्संबध्यते विप्रोष्य पादग्रहणमिति । **भुवि** तु पादवन्दनमिष्यत एव **युवतीनां युवा** द्वयोर्यूनोरयं विधिः । यदि बालो ब्रह्मचारी वृद्धा वा गुरुपत्नी तदा पादोपसंग्रहणमविरुद्धम् । **असावहमिति** प्रागुक्तस्य विधेरनुवादः । **विधिवदिति** व्यस्तपाणिना ॥ २१६ ॥

विप्रोष्य पादग्रहणमन्वहं चाभिवादनम् ॥
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ॥ २१७ ॥

प्रवासादेत्य पादयोर्ग्रहणं सव्येन सव्य इति । **अन्वहमहन्यहनि । अभिवादनं** भूमौ । **सतां** शिष्टानां एष धर्म आचार इत्यनुस्मरन् ॥ २१७ ॥

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ॥
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ २१८ ॥

सर्वस्य शुश्रूषाविधेः फलमिदं गुर्वाराधनद्वारेण स्वाध्यायविध्यर्थता । **यथा** कश्चिन्मनुष्यः **खनित्रेण** कुद्दालादिना भूमिं **खनन्वारि** प्राप्नोति नाक्लेशेन एवमयं **विद्यां गुरुगता शुश्रूषुः** गुरुसेवापरोऽधिगच्छति ॥ २१८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः ॥
नैनं ग्रामेऽभिनिम्लोचेत्सूर्यो नाभ्युदियात् क्वचित् ॥ २१९ ॥

मुण्डः सर्वतः केशवपनं कारयेत् । **जटिलो वा** जटाः परस्परमत्यन्तमितरेतरसंलग्नकेशाः तद्वाञ्जटिलः । शिखैव वा जटा यस्य जटाकारां शिखां धारयेत् परिशिष्टे मुण्डः तथा च कुर्याद्यथा **ग्रामे** स्थितस्य **सूर्यो नाभिनिम्लोचेन्नास्तं** गच्छेत् । ग्रामग्रहणं नगरस्यापि प्रदर्शनार्थम् । अस्तमयसमयमरण्ये संभावयेत् । एवं **ग्रामे नाभ्युदियादुदयोऽपि सूर्यस्य** यथाऽरण्यस्थस्य ब्रह्मचारिणो भवति तथा कुर्यात् । **एनं** प्रकृतं ब्रह्मचारिणम् । अन्ये तु ग्रामशब्दं ग्राम्येषु धर्मेषु स्वापादिषु वर्तमानं न निम्लोचेदित्येवमर्थं वर्णयन्ति । तथा च उत्तरत्र शयानमित्याह । ततोऽयं संध्ययोः स्वप्नप्रतिषेधो नारण्ये तत्कालावस्थानं बालो हि ब्रह्मचारी बिभीयात् । **गौतमेन** तु (अ. २ सू. १५।१६) बहिः संध्यत्वं परतो गोदानादुक्तम् । गोदानव्रतं च षोडशवर्षे तदा च प्राप्तः शक्नोत्यरण्ये संध्यामुपासितुम् ॥ २१९ ॥

तं चेदभ्युदियात्सूर्यः शयानं कामचारतः ॥
निम्लोचेद्वाऽप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥ २२० ॥

अत्रेदं प्रायश्चित्तं चरेत् । ब्रह्मचारिणं शयानं निद्रावगतमभ्युदियात्तेनोदयेनाभिव्याप्तदोषं कुर्यात् । प्रातरतिक्रमे दिनं जपोपवासौ रात्रौ तु भोजनं पश्चिमातिक्रमे तु रात्रौ जपोपवासौ प्रातर्भोजनमिति । दिनशब्दः प्रदर्शनार्थः । **गौतम**वचनं चाप्युदाहरन्ति । " तिष्ठेदहरभुञ्जानोऽभ्यस्तमितश्च रात्रिंजपन्सावित्रीमिति " तदयुक्तम् । उभयत्रापि दिवैव प्रायश्चित्तं युक्तं दिनशब्दस्य प्रदर्शनार्थत्वे प्रमाणाभावात् । न ह्यस्य तत्सापेक्षस्य स्वार्थप्रतिपादनं निरपेक्षं चैतत्तस्माद्विकल्पो युक्तः । तत्र यस्य सर्वां रात्रिं जाग्रतो न व्याधिः प्रवर्तते स रात्रौ जपिष्यति अन्यस्तु दिवैव । जपश्च **गौतम**वचनात्सावित्र्या एव ।

नन्वत्र कथं **गौतमः** प्रमाणीक्रियते । उच्यते । सापेक्षमिदं वाक्यं जपेदिति । जपनीयस्यानिर्देशात् । सत्यामपेक्षायां श्रुत्यन्तराद्युक्ताविशेषावगतिः । इह तु कालस्य निर्देशो नास्ति कालान्तरं प्रत्यपेक्षेति न **गौतमो**ऽपेक्षते । अथवा संध्यातिक्रमे प्रायश्चित्ताभिधानात्सावित्रीजपः सिद्ध एव । युक्तं च सावित्र्यास्तु परं नास्तीति कामकारतः ज्ञात्वैव संध्याकाले यः स्वपित्यज्ञानाच्चिरसुप्तस्य संध्याकालोऽयं वर्तत इत्यनवबोधोऽविज्ञानम् । एतदुक्तं भवति । इच्छया प्रमादकृते चातिक्रमे एतदेव प्रायश्चित्तं यः पुनरभ्युदितानस्तमितसंध्यामतिक्रामति तस्य प्रायश्चित्तमभोजनं नित्यानां कर्मणां समतिक्रम इति । अथवा यः कामकारेण शास्त्रातिक्रमणं करोति तस्य तदविज्ञानमेव ॥ २२० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूर्येण ह्यभिनिम्लुक्तः शयानोऽभ्युदितश्च यः ॥
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा ॥ २२१ ॥

पूर्वप्रायश्चित्तविधेरयमर्थवादः। निम्लोचनेनाभिदुष्टः **अभिनिम्लुक्तः**। एवमभ्युदितः **प्रायश्चित्तं** पूर्वोक्तं न करोति तदा **महता** पापेन संबध्यते न स्वरूपेन। नरकादिदुःखोपभोगनिमित्तमदृष्टपापमुच्यते ॥ २२१ ॥

आचम्य प्रयतो नित्यमुभे संध्ये समाहितः ॥
शुचौ देशे जपञ्जप्यमुपासीत यथाविधि ॥ २२२ ॥

एवं महान्दोषोऽभ्युदयनिम्लोचनयोः तस्मा**दाचम्य प्रयत**स्तत्परः **समाहितः** परिहृतचित्ततत्कर्मा विज्ञेयः। **शुचौ देशे जपञ्जप्यं** प्रणवव्याहृतिसावित्र्याख्य**मुपासीत**। **उभे संध्ये** संध्ययोरेवात्रोपास्यत्वम्। उपासनं च तत्र भावविशेषः। अथवोभे संध्ये प्रत्युपासीत भगवन्तं सवितारम्। मन्त्रो हि तद्देवत्योऽतस्तमेवोपासीत। संत्यक्तसकलविकल्पस्तद्गतैकमना भवेत्। प्रागुक्तस्य विधेः शेषोऽनुवादः उपासनं केवलं विधेयम्।

अन्ये तु शुचौ देश इत्येतद्विव्यर्थोऽयं श्लोक इत्याहुस्तेषां पौनरुक्त्यम्। सर्वस्यैव कर्तव्यस्य "शुचिना कर्म कर्तव्यमिति" विहितमशुचिदेशसंबन्धे च का शुचिता ॥२२२॥

यदि स्त्री यद्यवरजः श्रेयः किंचित्समाचरेत्।
तत्सर्वमाचरेद्युक्तो यत्र वाऽस्य रमेन्मनः ॥ २२३ ॥

यदि स्त्री आचार्यानी **अवरजः** कनीयानाचार्यादुपलभ्य श्रेयः कर्मादिना त्रिवर्ग **समाचरे**त्तत्सर्वमाचरेत्। संभवति हि तयोस्तदाचार्यसंपर्कात्परिज्ञानम्। शूद्रो वाऽऽचारजनक अवरजः स यद्युपदिशेदेवं पायुलिङ्गौ मृद्वारिणा प्रक्षाल्येते निपुणौ हस्तौ प्रक्षाल्य विस्मृतस्ते मृद्वारिक्रमः त्वदीय आचार्योऽसकृन्मया पायुप्रक्षालने जलं ददता दृष्टपूर्वः मृद्भिः शौचं करोति ततो मृद्भिरित्येवमादि**समाचरे**त्तत्समाचाराद्युत्पाद्योपदिशेत्। तथा चाचार्यानी आचमनं शिक्षये**त्तत्सर्वमाचरेद्युक्तः** श्रद्धया न स्त्रीशूद्राचरितमित्यवजानीतः। समाचरेदिति च समाचारपूर्वक उपदेश एवात्राभिप्रेतः। वक्ष्यति च " धर्मशौचं समं यानि सर्वत " इति। आचार्येणैव कदाचिदादिष्टं भवति ब्राह्मणि आचमय पुत्रस्थानीयमेतं तथा विधिपूर्वं च ब्रूयादस्य मूत्रपुरीषशुद्ध्यर्थं मृद्वारिणी देये इति तत्र तदीयवचनमनुष्ठेयमेवं मृदो गृहाण एवमद्भिः प्रक्षालयेदिति। अथवा गुरुगृहाल्लोहोपलजलशुद्ध्यादिः स्त्रीशूद्राभ्यां समाचार्यमाणः प्रमाणीकर्तव्यः। एतावदाचारस्य स्त्रीशूद्रसंबन्धिनः प्रामाण्यार्थोऽयं श्लोको युज्यते।

---

१ फ–निर्मुक्तं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु सर्वस्याचारस्यावेदवित्संबन्धिनः प्रामाण्यं घटते अयुक्तमेतन्न हि स्वल्पोऽप्याचार अवेदविदां प्रमाणीभवति । अथास्ति मूलं वेदवित्संबन्धः एवं तर्हि प्रमाणं शूद्रग्रहणे न । न चैवंविधे विषये स्त्रीशूद्राचारस्य प्रामाण्यमभिप्रेतम् । तथा हि सति प्रामाण्याभिधानप्रकरण एवावक्ष्यत् । तस्माच्छ्रेयः पदार्थनिरूपणार्थोऽयमुपोद्घात इति परमार्थः । यद्वाऽऽचार्यैराचरतां प्रामाण्यानुवादोऽयम् । स्त्रीशूद्रावपि ब्रूयातां तदप्यनुष्ठातुं युक्तं किं पुनराचार्योपदिष्टम् ।

यत्र चास्य रमेत्परितुष्येन्मन एतदप्यात्मनस्तुष्टिरित्यत्र व्याख्यातम् । सर्वथा नास्य श्लोकस्यातीव प्रयोजनमस्ति ॥ २२३ ॥

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ॥ २२४ ॥

यत्प्रशस्यं यदाचर्यमाणं दृष्टादृष्टे नोपहन्ति यच्छ्रेयो लोक उच्यते किंपुनस्तदिति सुहृद्भूत्वाऽन्वाचष्टे । नायं वेदमूलोऽर्थो नाचार्यादिशब्दवत्पदार्थकथनम् । किं तर्हि श्रेयोऽर्थी सर्वः पुरुषः प्रवर्तते । तत्रेदमुच्यते । इदं श्रेयः एतदर्थं यत्नः कर्तव्यः । तत्र मतान्तराणि तावदुपन्यस्यति । केषांचिन्मतं **धर्मार्थौ श्रेयः** । धर्मः शास्त्रविहितौ विधिप्रतिषेधौ । अर्थो गोभूमिहिरण्यादिः । एतदेव श्रेयः एतदधीनत्वात्पुरुषप्रीतेः । अपरं मतं **कामार्थविति** । कामस्तावन्मुख्य एव पुरुषार्थः प्रीतिर्हि श्रेयः अर्थोऽपि तत्साधनत्वात् । एवं हि **चार्वाकाः** आहुः । काम एवैकः पुरुषार्थस्तस्य साधनमर्थः धर्मोऽपि यद्यस्ति धर्म एव सर्वेभ्यः श्रेयान्सर्वस्य तन्मूलत्वाच्च । उक्तं च "धर्मादर्थश्च कामश्च" इति । अर्थत एव वणिजः प्रयोगजीविनः । सिद्धान्तस्तु **त्रिवर्ग इति तु स्थितिः** । अतो धर्माविरोधिनावर्थकामावपि सेवितव्यौ न तद्विरोधिनौ । तथा च **गौतमः** (अ. ९ सू. ४६)। "न पूर्वाह्णमध्यंदिनापराह्णानफलान्कुर्यात् यथाशक्तिधर्मार्थकामेभ्य" इति । त्र्यात्मको वर्गः **त्रिवर्गः**। त्रिषु समुदितेष्वयं रूढः ॥ २२४ ॥

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्त्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥ २२५ ॥

अन्योऽपि न कश्चिदवमन्तव्यः एते पुनर्विशेषतः प्रायश्चित्ताधिक्यमत्रेत्यर्थः । **आर्त्तेन** तैः पीडितेनाप्यवमानमवज्ञा प्राप्तायाः पूजाया अकरणं न्यक्कारश्चानादराख्यः । ब्राह्मणग्रहणं पूरणार्थम् ॥ २२५ ॥

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः ॥ २२६ ॥

---

१. २ अध्याये ६ श्लोकः ।

२३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वस्यायमर्थवादः । यत्परं ब्रह्म वेदान्तोपनिषत्प्रसिद्धं तस्याचार्यो मूर्तिः शरीरं मूर्तिरिव मूर्तिः । प्रजापतेर्हिरण्यगर्भस्य पिता । येयं पृथिवी सैव माता भारसहत्वसामान्यात् । भ्राता च स्वः सोदर्यः । आत्मनः क्षेत्रज्ञस्येति प्रशंसा । एते सर्वे देवतारूपाः महत्त्वयुक्ता अवमता घ्नन्ति प्रसादिता अभिप्रेतैः कामैर्योजयन्ति । एवं तत्समा आचार्यादय इति स्तुतिः ॥ २२६ ॥

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ॥
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥ २२७ ॥

भूतार्थानुवादेनेयमपरा प्रशंसा । क्लेशं दुःखं माता च पिता च नृणामपत्यानां संभवे गर्भात्प्रभृति यावद्दशमाद्वर्षात् । मातुः क्लेशः गर्भधारणं प्रसवः प्राणहरः स्त्रीणां जातस्य च संवरणयोगः क्लेशः स सर्वस्य स्वयं संवेद्यः पितुरप्युपनयनात्प्रभृति आ वेदार्थव्याख्यानात् । संभवशब्देनात्र गर्भाधानमुच्यते । तद्धि न क्लेशात्महं किं तर्हि तदुत्तरकालभाविन्य एताः क्रियास्ता हि क्लेशसाध्याः । न तस्य क्लेशस्य निष्कृतिरानृण्यं प्रत्युपकारसमत्वं शक्यं कर्तुं वर्षशतैर्जन्मभिर्बहुभिः किं पुनरेकेन जन्मना । असंख्यधनदानेन महत्या वाऽऽपद उद्धरणेन मातापित्रोर्निष्कृतिरिति ॥ २२७ ॥

तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ॥
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥ २२८ ॥

तस्मात्तयोर्मातापित्रोराचार्यस्य च सर्वदा यावज्जीवं यत्प्रियं तेषां तत्कुर्यान्न सकृद्द्विस्त्रिर्वा कृत्वा कृती भवेत् । तेष्वेवाचार्यादिषु त्रिषु पुरुषेषु भक्त्याराधितेषु तपः सर्वं बहून्वर्षगणांश्चान्द्रायणादितपस्तप्त्वा यत्फलं प्राप्यते तत्तत्परितोषादेव लभ्यत इति ॥२२८॥

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ॥
न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥ २२९ ॥

कथं पुनस्तपःफलमतपसा मात्रादिशुश्रूषया यस्मात् एतच्च सर्वोत्तमं तपो यत्तेषां पादसेवनं तैरननुज्ञातो माणवकः धर्ममन्यं तत्सेवाविरोधिनं तीर्थस्नानादिरूपं व्रतोपवासादि च शरीरशोषणया तेषां चित्तखेदकरम् । ज्योतिष्टोमानुष्ठानेऽप्यनुज्ञा ग्रहीतव्या । यत्ते मनःप्रतिषेधकृतो महारम्भेषु च कर्मसु बहुधनव्ययायाससाध्येषु व्यापृच्छ्य माता च मतंमत्या भवेयुः नित्यकर्मोऽनुष्ठाने त्वाज्ञा नोपकारिणी ॥ २२९ ॥

त एव हि त्रयो लोकास्त एव त्रय आश्रमाः ॥
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ॥ २३० ॥

कार्यकारणयोरभेदादेवमुच्यते । त्रयाणां लोकानां प्राप्तिहेतुत्वात्त एव त्रयो लोका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उच्यन्ते । **त एव च त्रयः** प्रथमाद्ब्रह्मचर्यादन्ये त्रय **आश्रमाः** गार्हस्थ्यादिभिस्त्रिभिराश्रमैर्यत्फलं प्राप्यते तत्तैस्त्रिभिस्तुष्टैः त एव **त्रयो वेदा** वेदत्रयजपतुल्यफलत्वात् । **त एव त्रयोऽग्नयः** अग्निसाध्यकर्मानुष्ठानफलावाप्तेस्तच्छुश्रूषातः । एषाऽपि प्रशंसैव ॥ २३० ॥

पिता वै गार्हपत्योऽग्निर्माताऽग्निर्दक्षिणः स्मृतः ॥
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ २३१ ॥

केनचित्सामान्येनायं पित्रादीनां गार्हपत्यादिव्यपदेशः । **साग्नित्रेता** आधानाग्नित्रेता या **गरीयसी** महाफला । त्राणं त्राणार्थमिता प्राप्ता त्रेता इति शब्दव्युत्पत्तिः ॥ २३१ ॥

त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकान्विजयेद्गृही ॥
दीप्यमानः स्ववपुषा देववद्दिवि मोदते ॥ २३२ ॥

एतेष्वप्रमाद्यन्नाराधनेऽस्खलन् । तथा च तदाराधनात्**त्रीन् लोकाञ्जये**त्स्वीकुर्यादाधिपत्यमाप्नुयात् । **गृही** गृहस्थावस्थस्य हि पुत्रस्य पित्रादीनां तत्कृतमाराधनमुपयुज्यते । तदा हि तौ वृद्धौ भवतः । **दीप्यमानः** शोभमानः प्रकाशमानो वा स्वेनैव तेजसा **देववदा**दित्यव**द्दिवि** लोके **मोदते** ॥ २३२ ॥

इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ॥
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ॥ २३३ ॥

अयं **लोकः** पृथिवीभारसहत्वात्तुल्या माता पृथिव्या । **पितृभक्त्या** । मध्यमो लोकोऽन्तारिक्षं प्रजापतिः पितोक्तः मध्यमस्थानश्च प्रजापतिर्नैरुक्तानाम् । स हि वर्षकर्मणां प्रजानां पाता वा पालयिता वा । **ब्रह्मलोकमा**दित्यलोकम् । आदित्यो ब्रह्मेत्यादेशः **लोकः** स्थानविशेषस्तम**श्नुते** प्राप्नोति । अर्थवादा एते तत्र नाभिनिवेष्टव्यम् । न च लोकाधिपत्यकामस्य तदाराधनाधिकारः । नायं काम्यो विधिः । पितृत्वमेवात्र निमित्तमकरणे शास्त्रातिक्रमः ॥ २३३ ॥

सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ॥
आनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ २३४ ॥

आदृताः सत्कृताः । आदृतवचनेन प्रत्युपकारपरत्वं लक्ष्यते यो ह्यादृतो भवति स परितुष्टः प्रत्युपकाराय यतते । अथवाऽऽदृतः परितुष्ट उच्यते । **धर्मस्य** चानन्त्यात्परितोषानुपपत्तेः फलदानोत्सुकत्वं लक्ष्यते । सर्वाणि तस्य कर्माण्याशु फलदायीनि भवन्ति । यस्यैते त्रय आदृताः शुश्रूषया परितुष्टाः एतैस्त्वनाराधितैर्यत्फलकामेन किंचित्क्रियते शुभं कर्म तत्सर्वं निष्फलम् । **सर्वाः क्रियाः** सर्वाणि श्रौतस्मार्तानि कर्माणि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्थवादोऽयं पुरुषार्थो ह्याराधनविधिस्तदतिक्रमे पुरुषः प्रत्यवयन्महता पापेन कर्मोपार्जितेऽपीष्टफलभोगे प्रतिबध्यते। अत उच्यते **सर्वास्तस्याफलाः क्रिया** इति ॥ २३४ ॥

यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् ॥
तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ॥ २३५ ॥

उक्तार्थोऽयं श्लोकः। **नान्यं** समाचरेद्दृष्टमदृष्टं वा तदनुज्ञानमन्तरेणेत्युक्तम्। **तेष्वेव नित्यं शुश्रूषां कुर्यात्। प्रियहिते रतः** प्रियं च हितं च तदा यत्प्रीतिकरं तत्प्रियं यत्पालनं तद्धितम् ॥ २३५ ॥

तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् ॥
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥ २३६ ॥

परत्र जन्मान्तरे यस्य फलं भुज्यते तत्**पारत्र्यम्**। छान्दसं रूपमेतत्। शुश्रूषाया अविरोधेनान्यं यं यं धर्मं समाचरेत्तं तं निवेदयेत्तेभ्यस्तान् ज्ञापयेत्। अनुपरोधग्रहणमेवमर्थं कृतम्। यत्तेषां विरोधि तत्तैर्नाज्ञापयितव्यम्। कश्चिदृजुप्रकृतिरभ्यर्थ्यमान आत्मपरोऽधर्ममवगणय्यानुजानाति तन्निवृत्त्यर्थमेतत्। **मनोवचनकर्मभिर्न** निवेदनमदृष्टार्थमपि तु यादृशमनुज्ञानं तादृशमेव कर्मणा दर्शयेत्। अथ चैवं संबन्धः कर्तव्यः। **मनोवचनकर्मभिः पारत्र्यं यद्यदाचरेत्तत्तन्निवेदयेत्तेभ्य** इति ॥ २३६ ॥

त्रिष्वेतेष्विति कृत्यं हि पुरुषस्य समाप्यते ॥
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ॥ २३७ ॥

इतिशब्दः समाप्तिवचनः कार्त्स्न्यं गमयति। यत्किंचन **पुरुषस्य** कर्तव्यं यावान्कश्चन पुरुषार्थः स **एतेष्वाराधितेषु समाप्यते** परिपूर्णमनुष्ठितो भवति। **एष धर्मः परः** श्रेष्ठः **साक्षात्त्वेन। अन्यश्चाग्निहोत्रादिरुपधर्मः** प्रतिहारस्थानीयो न साक्षाद्राजवदिति प्रशंसा। अवमानप्रतिषेधः। प्रियहितकरणं तद्विरोधिनः कर्तव्यस्याननुष्ठानमविरोधिनोऽप्यननुज्ञातस्य च परिशिष्टः श्लोकसंघातोऽर्थवादः ॥ २३७ ॥

श्रद्दधानः शुभां विद्यामाददीतावरादपि ॥
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥ २३८ ॥

श्रद्दधान आस्तिक्योपगृहीतान्तरात्माऽभियुक्तो यः शिष्यः स **शुभां विद्यां** न्यायशास्त्रादितर्कविद्यामथवा या शोभते केवलं सा विशदकाव्यभरतादिविद्याविभूषिता मन्त्रविद्या वा न धर्मोपयोगिनी ताम**वरादपि** हीनजातीयादप्या**ददीत** शिक्षते। न त्वत्र शुभा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदविद्या वेदितव्या आपदि विधिर्भविष्यति अनापदि तु नैवेष्यते । या च शुभा शाश्वती माया कुहकादि वा तां न क्वचित् । अन्त्यश्चाण्डालस्तस्मादपि यः परो धर्मः श्रुतिस्मृत्यपेक्षया परोऽन्यो लौकिकः । धर्मशब्दो व्यवस्थायामपि प्रयुज्यते । एषोऽत्र धर्म इति यदि चण्डालोऽपि ब्रूते । अत्र प्रदेशे मा चिरं स्थाः मा वाऽस्मिन्नम्भसि स्नासीरेषोऽत्र ग्रामणीनां धर्मो राज्ञा कृता वा मर्यादेति । न चैवं मन्तव्यमुपाध्यायवचनं मया कर्तव्यं धिक् चाण्डालं यो मां नियुङ्क्त इति । न पुनरियं बुद्धिः कर्तव्या परो धर्मो ब्रह्मतत्त्वज्ञानं न हि चण्डालादेस्तत्परिज्ञानसंभवो वेदार्थवित्त्वाभावात् । न चान्यतस्तत्संभवो न हि वृश्चिकमन्त्राक्षरवद्ब्रह्मोपदेशोऽस्ति । **स्त्री रत्नमिव** स्त्री चासौ रत्नं च तदिति वा "उपमितं व्याघ्रादिभिः" (व्या. सू. २।१।५६) "विशेषणं विशेष्येणेति" (व्या. सू. २।१।५७) वा यदा यत्किंचिदुत्कृष्टं वस्तु तद्रत्नमुच्यते तदा विशेषणमिति । अथ तु मरकतपद्मरागादीन्येव रत्नशब्दवाच्यान्युत्कर्षसामान्यादन्यत्र प्रयोगस्तदोपमितमिति । या स्त्रीसंस्थानलावण्यातिशयवती अथ धान्यबहुधनसुतादिशुभलक्षणा सा **दुष्कुलाद्धीन**क्रियादेरप्यानेया । अब्राह्मणादित्यस्य विधेरयमपवादोऽलाभेन तु प्रदर्शितः ॥ २३८ ॥

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ॥
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ॥ २३९ ॥

पूर्वे इमौ चापद्यब्राह्मणादध्यध्येतव्यमित्यस्य विधेः शेषः । अनेन लोकप्रवादो दृष्टं न क्रियते । एवं हि लौकिका आहुः । असतस्तदुपादेयं विषेऽपि यदमृतं तद्ग्राह्यमेव यथा हंस उदकात्क्षीरं गृह्णाति रसायनेषु केषुचिद्विषं इत्येतदभिप्रेत्योक्तम् । बालोऽपि यत्किंचिदकस्मात्सुभाषितं माङ्गलिकं प्रस्थानादौ वक्ति तद्ग्राह्यम् । **अमित्रादेरपि सतां यद्वृत्तं** शिष्टाचारः । न द्वेषस्तेनैतदाचरितमिति न्यायात्सिद्धतरोऽयं दृष्टान्तः । **अमेध्यादपि काञ्चनं** सुवर्णमसदाश्रयात्प्राप्यते तथा गृह्यते तद्वदब्राह्मणादध्ययनमिति ॥ २३९ ॥

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम् ॥
विविधानि च शिल्पानि समादेयानि सर्वतः ॥ २४० ॥

रत्नानि मणयः शम्बरपुलिन्दादिभ्योऽप्युपात्ताः शुद्धास्तद्वद्विद्याद्यपीति । **शिल्पानि** च विचित्रपत्रच्छेद्यादीन्यदुष्टान्यगर्हितानि चैलनिर्णेजनपटजनकबन्धनादीनि **सर्वतो** जातिविशेषमनपेक्ष्य **समादेयानि** स्वीकर्तव्यानि निश्चितातिधैर्यभावैः । विषादप्यमृतमित्येवमादिभिरनेकवाक्याद्वा समानप्रक्रमत्वेन सर्वे एतेऽर्थवादाः ॥ २४० ॥

अब्राह्मणादध्ययनमापत्काले विधीयते ॥
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥ २४१ ॥

अयं तत्र विधिः । आपन्नब्राह्मणाध्यापकभावः । आपदः काल **आपत्कालः** ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आपदित्येव सिद्धे कालग्रहणं वृत्तपूरणार्थम् । पाठान्तरमापत्कल्प इति । कल्पनं कल्प आपद्येषां कल्पना विधीयते उपदिश्यते । यदाचार्यः प्रारब्धाध्यापनः प्रायश्चित्तेनान्येन वा निमित्तेन शिष्यं हित्वा देशान्तरं व्रजेत् न च ब्राह्मणोऽन्योऽध्यापकस्तास्मिन्देशे लभ्यते बालत्वाद्दूरदेशगमनमशक्यं तदा ब्राह्मणः क्षत्रियात्तदभावे वैश्यादध्ययनं प्रकृतत्वात् । वेदः कृत्स्न इति वेदग्रहणं विधीयते । यद्यप्यत्राब्राह्मणशब्दो ब्राह्मणजातेरन्यत्र जातित्रये वर्तमानं पुरुषत्वमाचष्टे तथापि नेह शूद्रस्य ग्रहणं तस्याध्यापनाधिकाराभावात् । सत्यध्ययनेऽध्यापकत्वम् । अथ शास्त्रातिक्रमेण शूद्रस्याप्यधीतवेदत्वस्य संभवः क्षत्रियवैश्ययोरध्यापकत्वस्येव । तदपि न यतो धारणे शरीरभेदस्तस्याम्नातः न चेदं महत्वान्महदेतदाचार्यकमनुमीयते निन्दितकर्माभ्यासे पतनात्तत्संसर्गाच्च ब्रह्मचारिणाम् किंतु दुष्टता स्यान्निषेधात् तुल्यदोष इति चेदस्त्यत्र विशेषः । यत्र दण्डप्रायश्चित्ते गुरुणी तत्र महादोषता । स्वल्पयोस्तु स्वल्पदोषता । न च क्षत्रियवैश्ययोरध्यापने महती दण्डप्रायश्चित्ते शूद्रस्येव । किंच द्वे निन्दिते कर्मण्यध्ययनमध्यापनं च । क्षत्रियवैश्ययोस्त्वेकमेव । निषिद्धाध्यापनसंसर्गस्त्वनेनैवानुज्ञातो नासौ दोषकरः । निषिद्धाध्ययनेन तु शूद्रेण संसर्गे न किंचित्प्रमाणमस्ति । **अनुव्रज्या च** शुश्रूषा । न वन्दनपादप्रक्षालनादि । शुश्रूषाप्रतिषेधार्थमनुव्रज्यैव शुश्रूषा नान्येति । यावदध्ययनं यावद्ग्रहणम् ॥ २४१ ॥

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ॥
ब्राह्मणे चाननूचाने काङ्क्षन्गतिमनुत्तमाम् ॥ २४२ ॥

अब्राह्मणे गुरौ वासोऽध्ययनाय पूर्वेणोक्तो नैष्ठिकस्यापि प्राप्तो विशेषे निषिध्यते । **आत्यन्तिकं वासं** यावज्जीविकं **न वसेन्न** कुर्यात् । **वासं वसेदिति** सामान्यविशेषभावाद्वासं वसेदिति संबन्धः कल्प्यः गुरुविषयो वासस्तं वसेत् । समाप्ताध्ययनोऽन्यत्र गच्छेत् ।

ननु चाध्ययनमात्रमनुज्ञातमात्यन्तिकस्य वासस्य कुतः प्राप्तिः । नैष दोषः । गुरौ तस्य वास उक्तः अध्यापयिता च गुरुरुक्तः अतो भवत्याशङ्का ।

ब्राह्मणे वाननूचाने वाशब्दोऽप्यर्थः । ब्राह्मणोऽपि यद्यनूचानो वृत्ताभिजनसंपन्नो न भवति न च व्याख्यानाध्ययनशालिोऽनुवचनेनैतेऽपि गुणा लक्ष्यन्ते यतो ननु वक्तर्यथा भावादेवावासः सिद्धः । गतिरत्र सुखातिशयप्राप्तिर्विवक्षिता । अनुत्तमा यस्या अन्योत्तमा नास्ति तां काङ्क्षन्परमात्मानन्दरूपं मोक्षम् ॥ २४२ ॥

यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले ॥
युक्तः परिचरेदेनमा शरीरविमोक्षणात् ॥ २४३ ॥

For Private And Personal Use Only

अत्यन्तं भवमात्यन्तिकं वासं गुरोः कुले नैष्ठिकं ब्रह्मचर्यं यदि रोचये-त्तदा युक्तस्तत्परः परिचरेदेनं गुरुमा शरीरस्य विमोक्षणात् [illegible] इत्यर्थः ॥ २४३ ॥

आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम् ।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम् ॥ २४४ ॥

नैष्ठिकब्रह्मचर्यस्य फलविधिरयम् । शरीरस्य समाप्तिर्जीवितत्यागः । आ [illegible] तत्कालाद्यो **गुरुं शुश्रूषते** परिचरति स गच्छति **विप्रो ब्रह्मणः सद्म** सदनं स्थानं **शाश्वतं** न पुनः संसारं प्रतिपद्यत इति यावत् । **अञ्जसा**ऽक्लिष्टेन मार्गेण न गत्यन्तरेण तिर्यक्त्वेन मनुष्यादिजन्मना व्यवधीयते । ब्रह्मशब्देन चेति सहादर्शने देवविशेषश्च चतुर्वक्त्रस्तस्य सद्म स्थानविशेषो दिवि विद्यते वेदान्तवादिनां तु ब्रह्म परमात्मा तस्य सद्म स्वरूपमेव तद्भावापत्तिः ॥ २४४ ॥

न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् ॥
स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ॥ २४५ ॥

नैष्ठिकस्यायं गुरवेऽर्थदानं प्रतिषिध्यते । स्नास्यतो गुर्वर्थविधानात् न च नैष्ठिकस्य स्नानमस्ति प्रकृतश्च नैष्ठिक एव उपकुर्वाणस्य तु उपनयनात्प्रभृति यावत्स्नानमस्त्येव सति संभवे यथा शक्त्या दानं **पूर्वं** स्नानाद्गुरवे **किंचिदुपकुर्वीत** दद्याद्दात्यर्थे धातुः सोपसर्गोऽतश्च स्वसाध्या चतुर्थी । अथवा क्रियाग्रहणमपि कर्तव्यमिति । ततः संप्रदान-त्वं धर्मवित्पदमनुवादः । **स्नास्यंस्तु** स्नानकाले प्राप्ते **गुरुणा** आदिष्टममुमर्थमाहरेति ततः **शक्त्या** यावन्तं शक्नोति तावन्तं **गुर्वर्थं** गुरोरिदं गुर्वर्थं गुरोर्येन प्रयोजनं तमाहरेदुपनयेत् । नन्वयं नैष्ठिकस्य गुर्वर्थकरणप्रतिषेधः । न ह्येते द्वे वाक्ये एकेन प्रतिषेधः अपरेण गुर्व-र्थविधिः । स्नाने गुर्वर्थोऽवश्यं कर्तव्यमित्ययं विधिः प्रतिषेध उपकारप्रतिषेधे च सर्वशुश्रू-षाविधिरनर्थकः स्यात् । न च दानमेवोपकारो येन धनोपकार एव निषिध्येत नान्यः प्रियहितादिः । अर्थवादत्वेत्वयथार्थता न दोषः । गम्यते चात्रैकवाक्यता ॥ २४५ ॥

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् ॥
धान्यं शाकं च वासांसि गुरवे प्रीतिमावहेत् ॥ २४६ ॥

उक्तमुद्दिष्टं गुर्वर्थं कुर्यात्तत्र न सर्वं कर्तव्यमित्येवमर्थोऽयं श्लोकः । यदि गुरुर्वि-रुद्धमादिशेत् अमुष्यस्त्रियमाहरेति सर्वस्वं वा देहीति तन्न कर्तव्यम् । किं तर्हि **क्षेत्रं** धान्यानां भवनभूमिः क्षेत्रमुच्यते । **हिरण्यं** सुवर्णम् वा शब्दो विकल्पार्थो न समुदितानि देयानि । अन्ततः अन्याभावे **छत्रोपानहमपि** । द्वन्द्वनिर्देशात्साहित्यदानम् । **वासांसीति** सर्वत्र संख्या न विवक्षिता । प्रीतिमाहरन्निति एतदाहरेदिति पूर्वं संबन्धः । प्रीतिमाहरेदिति वा पाठे अत्रैव क्रियापरिसमाप्तिः । **प्रीतिमावहेदिति** वा प्रीतिमुत्पादयेद्धान्याद्याहरेत्

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वतन्त्रैव वा प्रीतिराहार्यतयोच्यते । ततश्च द्रव्योपदेशस्य दर्शनार्थता सिद्धा भवति । अन्यदपि यदेवंविधं प्रीतिजनकं मणिमुक्ताप्रवालहस्त्यश्वगन्त्रीरथादि तदपि देयमिति गम्यते । तथा च गौतमो (अ. ९ सू. ५४) "विद्यान्ते गुरुमर्थेन निमन्त्र्याहरेद्यदि स्यादात्मीयं शक्त्यागतं तदा दद्यान्नावेद्याद्यादिनार्जयेत्" ॥ २४६ ॥

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ॥
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥ २४७ ॥

नैष्ठिकस्यायमुपदेशः । असत्याचार्ये तत्पुत्रे श्रोत्रियत्वादिगुणयुक्ते गुरुपत्न्यामाचार्यान्यां वा सपिण्डे वा गुरोरेव वसेत्तत्र च गुरुवद्वृत्तिमाचरेद्भैक्षनिवेदनादि सर्वं कुर्यात् दारशब्दो बहुवचनान्तो भार्यावचनो वैयाकरणैः स्मर्यते । स्मृतिकारास्त्वेकवचनान्तमपि प्रयुञ्जते । "धर्मप्रयासयत्ने दारे नान्या कुर्वीतेति" इति ॥ २४७ ॥

एतेष्वविद्यमानेषु स्थानासनविहारवान् ॥
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥ २४८ ॥

अविद्यमानता सर्वेषामभावः यदि वा गुणहीनता । एतष्वसत्स्वग्निशुश्रूषां प्रयुञ्जीताग्निशरणोपलेपनमग्नीन्धनमाचार्यवत्सन्निधाननियमादृत्तवदहोरात्रासनमेषाऽग्नेः शुश्रूषैतां कुर्वन्देहं साधयेत् शरीरं क्षपयेद्यथाऽन्यश्चक्षुष्मानुच्यत एवं साधयेदिति । स्थानासनएव विहारः तद्वान्न कदाचिदासीत एवं विहरेत् । अन्ये तु मन्यन्ते स्थानाय स्वस्तिकादिना यदासनं ध्यानकाले तत्स्थानासनं विहारोऽन्यो भिक्षाचरणादिः ॥ २४८ ॥

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः ॥
स गच्छत्युत्तमस्थानं न चेह[2] जायते पुनः ॥ २४९ ॥

इति मनुस्मृतौ द्वितीयोऽध्यायः ॥ २ ॥

एवमिति नैष्ठिकवृत्तिं प्रत्यवमृशति । **एवं यो ब्रह्मचर्यं चरत्यविप्लुतः** अस्खलः **स प्राप्नोत्युत्तमस्थानं** धाम परमात्मप्राप्तिलक्षणम् । **न चेह पुनर्जायते** न संसारमापद्यते ब्रह्मरूपं संपद्यत इति ॥ २४९ ॥

"मान्या काऽपि मनुस्मृतिस्तदुचिता व्याख्या हि मेधातिथेः
सा लुप्तैव विधेर्वशात्क्वचिदपि प्राप्यं न यत्पुस्तकम् ।
क्षोणीन्द्रो मदनः सहारणसुतो देशान्तरादाहृतै-
र्जीर्णोद्धारमचीकरत्तत इतस्तत्पुस्तकैर्लेखितैः" ॥

इति मनुभाष्ये मेधातिथीये द्वितीयोऽध्यायः ॥ २ ॥

---

१ "धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत" इति आपस्तम्बीये पाठः (ध. सू. २।११।१२)
२ चेहा जायते इत्यन्यः पाठः ।

For Private And Personal Use Only

अथ तृतीयाध्यायः

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ॥
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥ १ ॥

द्विविधो ब्रह्मचारी पूर्वत्र प्रतिपादितो नैष्ठिक उपकुर्वाणश्चेति । "आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम्" (अ. २ श्लो. २४४) इत्यनेन नैष्ठिकब्रह्मचर्यमुक्तम् । "आ समावर्तनादिति" पक्षान्तरमपि सूचितम् । तत्र नैष्ठिकस्य नामधेयस्य प्रतिलम्भेनैव निमित्तवता अवधिशेषः सुगमितः । निष्ठां समाप्तिं गच्छति नैष्ठिकः । श्रुत्यैव कालो विहितः "आ समाप्तेरिति" । उपकुर्वाणस्य "अनेन क्रमयोगेन" (अ. १ श्लो. ८९) । "तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ॥ वेदः कृत्स्नोऽधिगन्तव्यः" (अ. २ श्लो. १६५) इति । संख्याया अविवक्षायां चैकद्वित्रिचतुःपञ्चषट्सप्तादिशाखाध्ययनं यथाशक्ति प्राप्तं नियम्यते ।

त्रैवेदिकं व्रतं चर्यम् । त्रयाणां वेदानां समाहारस्त्रिवेदी तद्ग्रहणप्रयोजनं त्रैवेदिकम् । ग्रहणक्रिया वृत्तावन्तर्भवति वेदाधिगमस्य प्राग्विहितत्वात् । व्रतं ब्रह्मचारिधर्मकलापः । चर्यं चरितव्यम् । कृत्यो विधौ ।

एवमाहरणादीना ग्रहणान्ततायां प्राप्तायामाह । षट्त्रिंशदाब्दिकमिति । गृहीतेऽपि वेदे कालः पूरयितव्यः । यदि स्वाध्यायाध्ययनविध्यर्थो धर्मस्तस्य च स्वाध्यायविधेर्ग्रहणे निवृत्तिः किमर्था तर्हि द्वादशवार्षिकी ग्रहणोक्तकालं व्रतचर्यानुवृत्तिः ? अत्यल्पमिदमुच्यते । दर्शपूर्णमासादिष्वप्याग्नेयादियागेभ्यः पराञ्चि यान्यङ्गानि तत्राप्येतद्वक्तव्यम् । समस्ताङ्गानुष्ठान एवमत्रारादुपकारकाङ्गयुक्ताद्विशिष्टक्रमकाद्विध्यर्थसंपद्यवगताया परिचोदनाशब्दादेव विधिः संवादोपगमो यतः । अथ महतो लघीयांसस्तदर्धिकपादिकग्रहणावधयः पक्षाः सन्ति तेषु सत्सु कः खलु महाप्रयासमतिचिरकालं तावद्द्वादशवार्षिकं व्रतचरणमाद्रियेतेति चेत्फलभूमार्थिनोऽङ्गभूयस्त्वमनुष्ठास्यन्ति । तदुक्तं प्रयत्नविशेषात्फलविशेषेण भवितव्यमिति ।

ननु च नार्थावबोधादृते ग्रहणद्वारेण स्वाध्यायाध्ययनस्य किंचिदपरं फलमस्ति ।

---

१ फ–नामधेयप्रतिलंभेनैव २ फ–अविवक्षोक्ता ३ अवकक्ष–एवं ब्रह्मचारिधर्मकलापः ४ फ–कृत्यो विधौ. "भैषातिसर्गे" (व्या. सू. ३ । ३ । १६३); "कृत्याः" (व्या. सू. ३ । १ । ९५) ख क्ष–धर्मव्रतं विधौ ५ क क्ष ख फ–विधिः सम्बन्धोऽपगतो.

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं ह्याहुः न तस्याध्ययनमात्रं तत्र भवन्तो याज्ञिकाः फलं समामनन्तीति । तथा "दृष्टो हि तस्यार्थं कर्मावबोधनं नामेति " शबरभाष्ये । तस्य न च कश्चिद्विशेषो दृश्यते । यद्येवं ग्रहणकालेऽप्यन्तरेण व्रतधर्मानुष्ठानं ग्रहणदर्शनानुष्ठानप्रसङ्गः ।

कश्चैवमाह अर्थावबोधार्थः स्वाध्यायविधिरिति । स्वाध्यायविधिः स्वार्थ एव । नान्यस्यान्यार्थतायां प्रमाणमस्ति । अर्थावबोधो हि ग्रहणे सति वस्तुस्वतोवृत्त उत्पद्यते न विधितः । स्वर्गादिफलार्थिनोऽयं विधिः । एतदपि कथं भविष्यति । का तर्हीयं वाचो युक्तिः फलविशेषेणेति । एषा वाचो युक्तिः संस्कारविधिस्तावदयं स्वाध्यायप्रधानस्तस्य स्वाध्याये कर्मण्युत्पन्नत्वात् । संस्कारविधयश्च न साक्षादधिकारमर्हन्ति किन्तु संस्कार्यद्वारेण साधिकारविध्यन्तरमनुप्रविशन्ति । यथा व्रीहिमवहन्तीति दर्शपूर्णमासाधिकारविषयाग्नेयादियागसाधनभूतपुरोडाशप्रभृतिव्रीहितुषकणविप्रमोचनादिसंस्कारद्वारेण दर्शपूर्णमासापूर्वसंबन्धमनुभवति । अवघातो न तन्निरपेक्षः । स एव कर्तव्यतया प्रतीयते । एवमिह वेदस्य संस्कार्यत्वमन्यत्राशेषभूतस्य निर्वहति । दृष्टस्वाध्यायाध्ययनानन्तरमर्थावबोधः । अत इदमध्ययनमर्थावबोधपर्यन्तमवघात इव तण्डुलनिष्पत्तिपर्यन्तः । एतावांस्तु विशेषः । प्रकरणेऽधीतत्वादवघातो झटिति लब्धाधिकारविध्यन्तरसंबन्धः । अयं त्वनारभ्याधीतत्वादवबोधपर्यवसायी सकलफलकर्मानुष्ठानोपयोगितया गम्यमानोऽधिकारः । तथा विध्यर्थनिवृत्तिरेव फलविशेषोऽभिप्रेतः । विधेर्हि पुरुषार्थत्वं व्युत्पन्नावगमं तत्साक्षाद्भवतु वा परम्परया वेति न विशेषः । गम्यमानाधिकारत्वाच्च स्वतन्त्र एवायं विधिः स्वात्मानमनुष्ठापयति यद्यपि नित्यकामश्रुतिष्वर्थावबोध उपयुज्यते ।

ये[1] त्वर्थावबोधद्वारेण ज्योतिष्टोमादिविध्येककार्यत्वमिच्छन्ति तत्फलस्यैव च प्रयत्नविशेषादतिशयमाहुस्तेषामाचार्यकरणविधिना किमपराद्धं येन महता यत्नेन तदेककार्यता निषिध्यते । अप्रामाण्यं वेदस्य भवतीति चेदस्तु । न प्रयोजनवशेन युक्तिसामर्थ्यायातोऽर्थो हातुं शक्यते । युक्तिस्तु युक्त्यन्तरेण बलीयसा बाध्यते । आचार्यकरणविध्येककार्यत्वे त्वस्य विधिरूपतैव हीयते स्वार्थस्याविवक्षितत्वात् । तत्तुल्यं ज्योतिष्टोमाद्यनुप्रवेशेऽपि । यदा तु स्वतन्त्रोऽयं विधिः स्वार्थानुष्ठापकस्तत्समानस्कन्धस्तदा स्वयमेवेतिकर्तव्यतया युक्तोऽनुष्ठीयते । तत्र ये विकल्पिताः कल्पा लघीयांसो गरीयांसश्च तेषां लघीयसा सिद्धे गरीयसामनुष्ठानं विध्यर्थ एव विशेषमावहति । यथाऽऽधाने एका देया तिस्रो देया द्वादश दश वेत्यादि । अनुष्ठिते चास्मिन्विधौ स्वसामर्थ्याच्छ्रुतौ वा भवतु प्रतीयमानो मा कल्पो वा प्रमाणभेदोऽयं न संबन्धभेदः सर्वथोभयतः स्पर्शतो न मुच्यामहे यद्यस्य विधिः स्वार्थानुष्ठापको ज्योतिष्टोमाद्युपकारकत्वम् ।

१ फ-प्रकृति २-फ तत्र ३ अकड-तत्साक्षात् ४ अकढ-एवं तु ५ ख-यथाधाने रूपका देया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु किमिदं पूर्वापरविरुद्धं प्रलप्यते ? प्रागुक्तं न साक्षात्संस्कारविषयोऽधिकार-संबन्धिनः। इदानीं तु स्वतन्त्र एवायं विधिः स्वार्थानुष्ठापक इति । अथवा विशेषश्रुतेना-न्वयिना न संबध्यते गम्यमानस्त्वधिकारः संस्कारविधीनामप्यविरुद्ध इति नायं विशेषो यद्यस्य विधिप्रयुक्तमनुष्ठानमर्थावबोधांश इष्यते । पाठमात्रस्याचार्यविधिप्रयुक्तत्वात्संस्कार-विधीनामधिकारसंबन्धोऽभ्युपगतः स्यात् । अथ विध्यन्तरोपकारकत्वात्तत्प्रयुक्तमनुष्ठानं तथा सत्यधिकृतस्याध्ययनस्यानधीतवेदस्याधिकारः । तदा च शूद्रस्याधिकारो दुर्निवारः । न चाध्ययनानन्तरं वेदार्थश्रवणं प्राप्नोति । यदैव हि यदृच्छया कुतश्चिदधिगतं भवति ज्योतिष्टोमनाम कर्म वैदिकं स्वर्गफलमिति तदैव तदितिकर्तव्यतां शिक्षेत् । तत्काल एव च तदुपयोगिनो मन्त्रान्याजमानानधीयीत ।

अत्र केचिदाश्रयिन्यायेन परिहरन्ति। यथैव हि स्विष्टकृदादय उभयरूपाः संस्कार्यार्थकर्मतया एवं स्वाध्यायाध्ययनमप्यभिधानविनियोगानुसारितया क्रियाफलावबोधदर्शनेन च संस्कारकर्म फलवत्कर्मार्थकर्म । अतः साधिकारत्वसिद्धिः । कः पुनरधिकारी । उपनीतस्त्रैवर्णिको माणवक इति ब्रूमः । ब्रह्मचारिधर्मेषु ह्येतदाम्नायते । लिङादयो ह्यविनाभूतनियोज्यार्थविध्यर्थप्रतिपादकाः तत्र विशेषाकाङ्क्षायां क्वचिच्छब्दसमर्पितो विशेषो भवति । स्वर्गकामो यावज्जीवमग्निहोत्रं जुहोति । क्वचिदश्रुतोऽप्यन्विताभिधान-सामर्थ्यबलेन कल्प्यो विश्वजिदादिषु । क्वचित्प्रकरणाद्वस्तुसामर्थ्याद्विध्यन्तरपर्यालोचनया-ऽपि च प्रतीयते । तदेतदिह सर्वमस्ति । प्रकृतो ब्रह्मचारी । वस्तुसामर्थ्येन चार्थावबोध उपजायते । स च सर्वविधिषूपयुज्यते विदुषोऽधिकारात् ।

तदिदमपरे न मृष्यन्ति । संस्कारविधित्वेनैवास्य प्रतीयमानाधिकारता । यतः संस्कारकर्माणि संस्कार्यार्थतयाऽनुष्ठीयन्ते । यदि च संस्कार्ये न दृश्येत विशेषस्ततः सक्तुवत्संस्काररूपता हीयेत । अस्ति चात्र फलवत्कर्मावबोधलक्षणो विशेषः । यत्तु स्विष्ट-कृदादिवदिति तत्प्रकृतिप्रत्ययविज्ञानागम्यत्वरूपहानितया युक्तोभयरूपता । तस्मात्स्थितं स्वतन्त्रोऽयं विधिर्माणवकस्येति । अतश्च स्वत एवानुष्ठेयो नावघातादिवद्दर्शपूर्णमासाद्यधि-कारनियोगाक्षेपेण ।

एवमनेकवेदाध्ययनमपि द्रष्टव्यम् । तत्रापि ह्येकेन वेदेन निर्वृत्ते विध्यर्थे किमित्य-नेकवेदाध्ययनं फलभूम्ना तु युज्यते । फलं च पूर्ववन्न तु वाक्यशेषाधीतं पयोदध्यादि । एवंस्थित एकवेदाध्यायिनः स्वशाखानधीतानां मन्त्राणां कर्मोपयोगिनां कर्मानु-ष्ठानकाले सामर्थ्यात्तदाक्षिप्तमध्ययनमनुज्ञातं भवति । यद्यप्यधीतवेदस्याधिकारे "अधीत" इति ।

१ क्ष-विशेषश्रुतेना २ क्ष फ-प्रयुक्तत्वम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये तु 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येय' इति निष्कारण इत्येतस्याधिकारपदतां मन्यन्ते । निष्कारणः कारणं प्रयोजनमनुद्दिश्य नित्यकर्मवत्कर्तव्यं न ह्यस्याधिकारसमर्पकत्वमन्तरेण विषयद्वारेण क्रियाकारकतद्विशेषणत्वादिनाऽन्वयः संभवति । तस्मात्सत्यपि संस्कारविधित्वे गम्यमानाधिकारत्वं श्रूयमाणाधिकारत्वं वाऽविरुद्धम् ।

अपरे तु संस्कारविधित्वादनधिकारतामेव ज्यायसीं मन्यन्ते । अनुष्ठानविशेषलाभार्थो ह्यधिकार उपास्यते । स चेह संस्कार्यविशेषदर्शनादेव सिद्धः । संस्कारविषयः प्रयोजनापेक्षया । क्रियाफलमेवात्र विधिसाध्यं तच्च कर्मस्थं ग्रहणलक्षणं दृश्यत एवाविरुद्धम् ।

अश्रुते विभागे स्मृत्यन्तराद्विभागावगतिः "प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानीति"। के पुनरत्र त्रयो वेदा अभिप्रेताः "ऋग्वेदो यजुर्वेदः सामवेद" इति । अथ किं नाथर्वणो वेद इति यद्येतत् पृथग्वाक्यम् । अथ तु ग्रहणान्तिकमेव चेत्येतन्नैकं वाक्यं तन्नास्ति गृहीते वेदे व्रतनिवृत्तिः । क एवमाह किंत्वत्र यथाश्रुतं संस्कार्यत्वनिबर्हणार्था अर्थावबोधनिष्ठतया तस्य विधेरनुष्ठानलाभः । अवबोधो हि सकलकर्मानुष्ठानोपयोगीति । आथर्वणश्चाभिचाराद्युपदेशबहुलः । तस्मान्न ज्योतिष्टोमादि कर्माणि विधीयन्ते । नापि तेषां किंचिदङ्गं त्रय्यैव हौत्राध्वर्यवौद्गात्रादिसकलतदङ्गपरिसमाप्तिः । प्रधानोत्पत्तिविधयश्च त्रय्यामेव ज्योतिष्टोमादीनां संति । ब्रह्मत्वमपि त्रय्यामेव विद्यते । त्रिशब्दश्च संख्यावचनः । न च संख्याशब्दाः कंचिद्धर्ममेकमनपेक्ष्य प्रवर्तन्ते । अतो येषामेवेह कार्योपदेशपरता त एव त्रिशब्देनाभिगदितुं शक्यन्ते । न चाथर्वणस्य तत्कार्यानुप्रवेशः । न तत्र प्रधानविधयो ज्योतिष्टोमादीनां नाङ्गविधयः । श्येनादिष्वभिचारयज्ञेषु त एवर्त्विजः सैवान्याऽपीतिकर्तव्यता । विशेषोऽपि यः सोऽपि त्रय्यामेवोपदिष्टः । अत ऋग्यजुषामृक्सामाभ्यां चैकत्र कर्माणि समावेशाभावात्त्रिवेदीव्यपदेशानुपपत्तेराथर्वणस्येह ग्रहणं स्वाध्यायशब्दवाच्यत्वात्त्वध्ययनविधेस्तद्विषयत्वमविरुद्धम् ।

तदर्धिकं षट्त्रिंशत्संख्या प्रत्यवमृश्यते ततोऽर्धमष्टादशवर्षाणि । अत्रापि विभागकल्पना षड्वर्षाणि । अत्रापि पादिकं पादश्चतुर्भागभागिनी सैव संख्या नव वर्षाणि चतुर्थो भागः । प्रतिवेदं त्रीणि ।

कथं पुनस्त्रिभिर्वर्षैर्वेदः शक्यो ग्रहीतुं असमासग्रहणस्य च व्रतनिवृत्तौ व्रतस्नातकव्यपदेशो, भवति कश्चिन्मेधावित्तमः । अपर आह न ग्रहणस्वरूपप्रयुक्ता धर्माः किं तर्हि तद्विषयेण विधिना प्रयुज्यन्ते । तत्रापि निवृत्ते ग्रहणे यदि कानिचिदहानि नियमानुपालनमध्ययनकाले क्रियते तावत्सम्पाद्यत एव शास्त्रार्थः भवेत्स्वाध्यायविध्यर्थे

१ क–त्रयाणामेव २ अ–नात्र ।

For Private And Personal Use Only

तावतैवाङ्गकलापानुष्ठानम् । असमासग्रहणस्य तद्व्रतनिवृत्तौ व्रतस्नातकव्यपदेशः । अतः कालविशेषविधानं युक्तम् । त्रिभिर्वर्षैः विना न व्रतस्नातको भवति तद्यद्यपि "स्नानं वेदसमाप्ताविति" केचित्स्मरन्ति तथापि तदर्थव्रतसमाप्तावपि प्रयोग उपचाराद्युक्त एव । तदयुक्तम् । सत्यपि विधिप्रयुक्ते यावदध्ययनभावितैव व्रतानां युक्ता । अध्ययनसंयोगेन हि तानि चोद्यन्ते यावदध्ययनं भवितुमर्हति वचनादेव हि त्रिसांवत्सरी व्रतचर्या प्रागपि ग्रहणाद्यद्येतत्पृथग्वाक्यम् । अथ तु ग्रहणान्तिकमेवेत्येकं वाक्यं ततो नास्त्यगृहीते वेदे व्रतनिवृत्तिः । एवकारेणैवमेव पक्षमनुमन्यन्ते । यदि नास्त्यगृहीते वेदे तन्निवृत्तिः कथं तर्हि व्रतस्नातको वेदस्नातक इति भेदेन व्यपदेशः । चतुर्थे वक्ष्यामः । षट्त्रिंशदब्दाः समाहृताः षट्त्रिंशदब्दं तत्र भवं षाट्त्रिंशदाब्दिकम् । एवं त्रैवेदिकम् । तदर्धपरिमाणं तदर्धिकम् । एवं पादिकं ग्रहणान्तिकमिति सर्वत्र "अत इनि ठनाविति" (व्या. सू. ५।२।११५) मत्वर्थीयः । न तु यस्य यत्परिमाणं तत्तस्यास्तीति शक्यतेऽपदेष्टुम् ॥ १ ॥

वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ॥
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥ २ ॥

त्रैवेदिकमध्ययनमुक्तम् । एकद्विवेदाध्ययनमप्राप्तं विकल्प्यते । वेदशब्दः शाखावचनो व्याख्यातः । तिस्रः शाखा अधीयीत द्वे एकां वैकैकस्माद्वेदात्त्वेकस्मादेव । त्रयी त्रिविद्येति पठ्यते । अधीत्य गृहीत्वा वेदमुक्तया व्रतचर्यया **गृहस्थाश्रममावसेत् ।** गृहस्थाश्रमस्य स्वरूपं वक्ष्यति "उद्वहेत द्विजो भार्याम्" इत्यादि । आवसे"दनुतिष्ठेत् । अनेकार्था धातवः । कृतदारपरिग्रहो रूढ्या गृहस्थ उच्यते । गृहशब्दो दारवचनस्तत्र तिष्ठति । आङ् मर्यादायां वर्तते । तस्य यो विहितः पदार्थसमूहो विधिनिषेधात्मकः स आश्रमशब्देनोच्यते । यथोपनीतस्य ब्रह्मचर्याश्रम आ समावर्तनात् कृतविवाहस्य गार्हस्थ्यमिति । अविप्लुतमखण्डितं ब्रह्मचर्यं स्त्रीसंप्रयोगनिवृत्तिर्यस्य स एवमुच्यते । वाक्यभेदश्चात्र द्रष्टव्यः । आख्यातव्यवहारेणाविप्लुतब्रह्मचर्यो भवेद्गृहस्थाश्रमं च प्रतिपद्यते । एकवाक्यतायां कदाचन विप्लवे गार्हस्थ्याधिकार एव हीयेत अद्य पुनः पुरुषार्थतया विधानेन तदतिक्रमे प्रायश्चित्तेन युज्यते न त्वधिकारी भवति ।

अधीत्यावसेदिति च पौर्वापर्यमात्रं विवक्षितम् । नाध्ययनसमनंतरभाविता विवाहस्य यत्कार्यात्पौर्वापर्यविधानादानन्तर्यं न शब्दार्थः । अतश्च स्वाध्यायाध्ययनविवाहयोरन्तराले व्याकरणादिशास्त्रश्रवणं वेदार्थज्ञानार्थं लभ्यते । विद्वानेव हि गार्हस्थ्येऽधिक्रियते । यथा नाध्ययनविधौ मूर्खो यद्यपि बाल्यावस्थाया तिर्यक्समानधर्मा स्वमधिकारं प्रतिपत्तुमसमर्थ-

---

१ फ–भवति २ अ–व्रतनिवृत्ति । ३ तदस्य परिमाणं "व्या. सू.–(५।१।५७)" ४ अग्रे ५ श्लोके

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तथापि पित्राऽऽचार्येण वाऽनुष्ठाप्यते । वस्तुतस्तयोरेवाधिकारोऽपत्यानुशासने पितुरधिकारोऽपत्योत्पत्तिविधौ तावताऽभिनिर्वर्त्यत्वात् । अनुशासनं च विधिनिषेधाधिकारद्वयप्रतिपादनम् । तत्र यत्प्रतिपाद्यमानोऽपि नावबुध्यते तदन्ध इव हस्तग्राहिकया कार्यते । यथाऽग्निसंस्पर्शकूपादिपाताद्गाढहस्तावष्टम्भो धार्यत एवमदृष्टादपि मद्यपानादेर्यथा वाऽनिच्छन्नौषधदानादौ प्रवर्तते एवं शास्त्रीयेष्वपि पदार्थेषु यदा त्वीषद्व्युत्पन्नस्तदैवं नियुज्यत 'इदमिदं कर्तुमर्हसीति' । एवं सत्यधीतवेदो माणवकः पित्राचार्येणैवं प्रतिबोधयितव्यो "गृहीतवानसि वेदं त्वमिदानीं तदर्थजिज्ञासायामधिक्रियसे ततस्तदङ्गानि श्रोतुमर्हसीति" । एतावता पितुरपत्योत्पादनाधिकारनिवृत्तिः । तदुक्तं कियता पुनरुत्पादितो भवति यावता स्वयमधिगतकृत्यो भवतीति । अतः स्थितमेतत् नाधीत्यैव विवाहो यावद्वेदार्थो नाधिगतः । एवं च पदयोजना कर्तव्या । अधीत्याध्ययने निवृत्तेऽप्यविप्लुतब्रह्मचर्यः स्यात् । प्राप्तायां च निवृत्तौ पुनर्वचनं नियमान्तराणां मधुमांसवर्जनादीनां निवृत्तिपरम् । तेन यावदध्ययनं तावत्सर्वे नियमा अनुष्ठातव्याः । समाप्ते त्वध्ययनेऽर्थावबोधकाले स्त्रीनिवृत्तिरेव । ब्रह्मचर्यशब्दो यद्यपि ब्रह्मग्रहणार्थे यद्व्रतग्रहणं तत्र व्युत्पाद्यते तथापि स्त्रीनिवृत्तिपर एवास्य तत्र प्रयोग इति दर्शयिष्यामः । यथाक्रमं य एवाध्येतॄणां पाठक्रमः प्रसिद्धस्तेनैव प्रथमं चतुःषष्टिस्ततो ब्राह्मणं पितृपितामहाद्यभिजनप्रबन्धोपक्रमं भवति । न हीदृशेऽर्थे वक्तारो न कुलेन न शीलेन न क्रमेणेति । एतेन चैतत्प्रतिपादितं भवति या एव पित्रादिभिः शाखाऽधीता साऽपि न त्याज्येति ॥२॥

तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः ॥
स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा ॥ ३ ॥

तं ब्रह्मदायहरं प्रथमं गवाऽर्हयेत् । ब्रह्म च दायश्च ते उभे हरति स्वीकरोतीति ब्रह्मदायहरः । दीयत इति दायो धनं, ब्रह्म वेदो, हरणमधिगमः । गृहीतवेदः पित्रा कृत[1]विभागो गार्हस्थ्यं प्रतिपद्यते निर्धनस्यानधिकारात् । यदि तु पिता निर्धनस्तदा सांतानिकतयां धनमर्जयित्वा विवाहयेत् । अन्ये तु ब्रह्मैव दायो ब्रह्मदाय इति पूर्वोक्तविध्यनुवादं मन्यन्ते पितुरिति । ननु चाचार्यस्य माणवकाध्यापनेऽधिकार उक्तः किमिदमुच्यते पितुर्ब्रह्मदायहरमिति । उच्यते । यस्य पिता विद्यते तस्य स एवाचार्यः । अभावे पितुरशक्तौ वाऽन्यस्याधिकारः । आचार्यान्तरोपादानेन पितुरधिकारो निवर्तत एव स्वयं वाऽध्यापयत्वन्योपादाने न वेति न विशेषः । यदप्याहुर्वरो दक्षिणेत्युपनयने नित्यवद्दक्षिणाम्नानात्परकर्तृकत्वमेवेति तदसत् । उपनयस्य ह्ययं विधिः वरो दक्षिणेति । उपनेता च पिता वाऽऽचार्यो वा तौ द्वावपि स्वाधिकारप्रवृत्तौ नानत्यन्तरमपेक्षेते आनमनार्थं हि दक्षिणादानम् ।

१क्ष–सैव । २फ–त्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न चाधिकारान्तरतः प्रवृत्तस्यानतिरुपयुज्यते । तेनायं दक्षिणाशब्द आनमनार्थाभावादर्थाद्धिरण्यदानवददृष्टार्थदानोपलक्षणार्थो विज्ञेयः । पित्रैव चासौ तावता धनेन स्वामी कर्तव्यो येन वरदानमस्य संपद्यते । अथायमाग्रहो नानत्यर्थाद्दानादृते दक्षिणाशब्दस्योपपत्तिः । न वा मुख्ये सति लक्षणा न्याय्येति । एवं तर्हि यस्य पिता न तत्स्थानीयो नाचार्यः स यदाऽऽत्मानमुपनयेत् सत्यकामवत्तद्विषयो दक्षिणाविधिर्भविष्यति । तस्यापि चेषदपेतशैशवस्यात्मसंस्कारायास्त्येवाधिकार इति प्रतिपादितम् । तस्मादुभयथा पितुरधिकारः । स्वयमुपनयमानस्यान्यमाचार्यमुपाददानस्य वा ।

प्रतीतमभिमुखीभूतं गृहाश्रमप्रतिपत्तौ न तु नैष्ठिकं समाप्ताध्ययनविध्यर्थमपि ग्रामप्रतिपत्तौ । स्रग्विणं यावन्तः केचन गृह्यकारैर्मधुपर्ककर्मणि धर्मा आम्नातास्तेषां प्रदर्शनार्थमेतत् । **तल्प आसीनं** महार्हपर्यङ्कशयनोपविष्टम् । **गवा** मधुपर्केण । मधुपर्केऽसौ विधिः पाक्षिक आम्नातः । अतो गोशब्देन तत्साधनकर्मविशेषो लक्ष्यते । **अर्हयेत्** पूजयेत् । अधिकारात्पिताऽऽचार्यो वा । **प्रथमं** पूर्वविवाहात् । पूजाधिकारार्हे शयानं **प्रतीतं स्वधर्मेणे**त्यनुवादः । स्वधर्मेण ब्रह्मदायहरं स्वधर्मेण चार्हयेदिति संबन्धे न विशेषः ॥ ३ ॥

गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि ॥
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥ ४ ॥

सत्यामपि वेदव्रतसमाप्तौ **गुरुणाऽनुमतः** अभ्यनुज्ञातः स्नायात् । स्नानशब्देन गृह्योक्तसंस्कारविशेषो लक्ष्यते । ब्रह्मचारिधर्मावधिः । यथा चात्र लक्षणा तथा प्राग्व्याख्यातम् । तदहरेव गृह्यकारोक्तं कश्चिन्मधुपर्कपूजाविहितसंस्कारं प्राप्य **समावृत्तो** गुरुकुलात्पितृगृहं प्रत्यागत इत्यनुवादः । उद्वहेतेत्येतद्विधिशेषमेतत्सर्वं प्राप्तमेव न तु समावर्तनं विवाहाङ्गम् । तेन यः पितृगृह एवाधीतवेदस्तस्य समावृत्तस्य संभवत्येव विवाहः । केचित्समावर्तनं विवाहाङ्गं स्नानं मन्यन्ते । क्त्वाश्रुत्या भेदप्रतिपत्तिरिति चेदेवं तर्हि समावर्तनं विवाहाङ्गं स्नानसंस्कारं वक्ष्यति सविशेषं हि तत्र स्नानमाम्नातमेव " स्नातकेनेत्यादि " ।

अथवा यमनियमत्यागाभिप्रायं समावृत्तिवचनम् । समावृत्तः प्राक्तनीमेवावस्थां नियमरहितां प्रतिपन्न इत्यर्थः । विशेषाभिप्रायं च नियमत्यागवचनम् । ब्रह्मचारिणो हि सातिशया यमनियमा न तथोत्तरेषाम् ।

यथाविधीति स्वधर्मेणेतिवत् । **उद्वहेत द्विजो भार्यां** उद्वहेतेति विवाहविधिः संस्कारकर्मविवाहो भार्यामिति द्वितीयानिर्देशात् । न च प्राग्विवाहाद्भार्या सिद्धाऽस्ति

१ क्षख—ननु । २ क्षड—तस्य समावृत्त्यसंभवोऽपि हि भवति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्या विवाहसंस्कारः क्रियते न चक्षुष इवाञ्जनसंस्कारः । किं तर्हि निर्वर्त्यते विवाहेन ? यथा यूपं छिनत्तीति छेदनादयः संस्कारा यस्य क्रियन्ते स यूपः एवं विवाहेनैव भार्या भवतीति । विवाहशब्देन पाणिग्रहणमुच्यते । तच्चात्र प्रधानम् । एवं हि स्मरन्ति "विवाहनं दारकर्म पाणिग्रहणमिति" । इहापि वक्ष्यति (श्लो. ४३) "पाणिग्रहणसंस्कार" इति लाजहोमाद्यङ्गम् । तच्च गृह्यादखिलं ज्ञातव्यम् । "नोद्वहेत्कपिलां कन्यामिति" (श्लो. ८) कन्याग्रहणात्कन्याया अयं संस्कारो न स्त्रीमात्रस्य । कन्याशब्दश्चात्र प्रकरणेऽप्रवृत्तपुंसंप्रयोगायां योषिति वर्तत इति वक्ष्यामः । **सवर्णा** समानजातीयाम् । **लक्षणान्विताम्** । लक्षणानि अवैधव्यप्रजाधनसूचकानि वर्णरेखातिलकादिचिह्नानि ज्योतिःशास्त्रावगम्यानि तैरन्वितां युक्तां शुभलक्षणान्वितामित्यर्थः । यद्यप्यनिष्टसूचकमपि लक्षणं भवति किंतु सूचकैरेव शास्त्रैस्तादृशीं विवाहयेत् अतः प्रशस्तलक्षणा लक्षणवती द्रष्टव्या । अभिप्रेतसूचक एव लक्षणशब्दो लोके प्रयुज्यते । सलक्षणोऽयं पुरुषः सलक्षणा स्त्रीति या शुभलक्षणा सैवमुच्यते ।

तत्राधिकारचिन्ता कर्तव्या । संस्कारविधित्वादेवाधानवदनुष्ठानलाभात् यथैव ह्याधानमाहवनीयादिद्वारेण नित्यकाम्यकर्मोपयोगि तदङ्गाहवनीयादिनिर्वृत्त्यर्थमनुष्ठीयते एवं विवाहोऽपि भार्यानिर्वर्तकत्वेन दृष्टादृष्टपुरुषार्थोपयोगित्वात् । तथाहि खेदात्पुंसः स्त्रीमात्रे विषयार्थं प्रवृत्तौ प्रसक्तायां कन्यापरदारानिषेधात्स्वदारेषु कामिनः खेदनिवृत्तिः । "सहधर्मश्चरितव्यः" इति तया सह सर्वधर्मेष्वधिकारादृष्टपुरुषार्थसिद्धिस्तदधीना ।

अत्र केचिन्मीमांसन्ते—रागिणः पूर्वोक्तेन प्रकारेण दृष्टसिद्ध्यर्थं विवाहं स्वतः कुर्वन्ति तेषां च कृतविवाहानां संभवेत्स द्विजातिकर्मविधित्वेन कर्मानुष्ठानसिद्ध्यर्थो विवाहः । यस्य कथंचित्स्त्रीनिष्ठा निवृत्ता न तस्य विवाहः । असति विवाहे कर्मानधिकारादनधिकृतस्य चाननुष्ठाने दोषाभावात्पुरुषार्थानुष्ठानान्यनुतिष्ठतो नाश्रमिणोऽप्यवस्थानमविरुद्धम् । तदेतदसत् । यथैव कामः पुरुषार्थस्तथैव धर्मोऽपि पुरुषार्थत्वे प्रयोजकः । सर्वोऽपि पुरुषार्थसिध्यर्थं प्रवर्तते । यदि चैतदेवं स्यात्संवत्सरमनाश्रमी भूत्वेत्यादि नोपपद्येतेति । निपुणं चैतदाश्रमविकल्पावसरे षष्ठे निर्णेष्यामः ॥ ४ ॥

असपिण्डा च या मातुरसगोत्रा च या पितुः ॥
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ ५ ॥

यादृशी कन्या वोढव्या तामिदानीं दर्शयति । **मातुर्याऽसपिण्डा पितुश्च याऽसगोत्रा सा दारकर्मणि प्रशस्ता** । सपिण्डग्रहणं मातृबन्धूपलक्षणार्थम् । मातुर्हि सापिण्ड्यं स्त्रीणां स्मृत्यन्तरे तृतीयपुरुषावधि । न तु त्रिभ्य ऊर्ध्वं मातृबन्धुभ्यो विवाह इष्यते । किं तर्हि ? पञ्चमादूर्ध्वम् । एवं हि **गौतमः** पठति (अ. ४ सू. ३) । " ऊर्ध्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तमात्पितृबन्धुभ्यो मातृबन्धुभ्यः पञ्चमादिति " । तेन यथाश्रुति समन्वयाभावात्सापिण्ड्याभावः स्मृत्यन्तरवशेन मातृसंबन्धितया व्याकरणीयः । तेनैवमुक्तं स्यात् मातुरन्वयजा या न भवति अवधिश्च गौतमीय एव तेन मातामहीमातामहयोर्योऽन्वये जाता सा पुत्रसंततेर्बान्धवसामीप्यात्पञ्चमीं यावन्न विवाहयितव्या । अतो मातृष्वसृतद्दुहितॄणां प्रमातामहीसंततिजानां च सर्वासां प्रतिषेधो बन्धुत्वाविशेषात् ।

असगोत्रा च या पितुः। गोत्रं वसिष्ठभृगुगर्गादिवंशः स्मर्यते । समानगोत्रा वसिष्ठा न वसिष्ठैर्विवहन्ते न गर्गा गर्गैः । **वासिष्ठे** तु मातृसगोत्राया अपि प्रतिषेधः । " परिणीय सगोत्रां तु समानप्रवरां तथा । कृत्वा तस्याः समुत्सर्गं द्विजश्चान्द्रायणं चरेत्"॥

" मातुलस्य सुतां चैव मातृगोत्रां तथैव च " ॥

गौतमेन तु पठ्यते (अ. ४ सू. २) " असमानप्रवरैर्विवाह " इति । तत्र गोत्रसमत्वे सत्यपि प्रवरभेदश्चेद्युज्यते विवाहः । यतः स्मृत्यन्तरे ह्युभयं निषिध्यते "असमानार्षगोत्रजामिति (याज्ञ. व. आ. ५३) " आर्षे प्रवर इत्येकोऽर्थः । कथं पुनर्गोत्रभेदे समानार्षेयत्वम् । किमिति न भवति यदि स्मर्यते श्रुतिस्मृतिप्रमाणकोऽयमर्थो न प्रत्यक्षगोचरो येन विरोधः स्यात् । के पुनरमी प्रवरा नाम । अत्यल्पमिदमुच्यते इदमपि वक्तव्यं किं पुनरेतद्ब्राह्मणत्वं नाम तथा कतरदेतद्गोत्रं नाम । यथैव समाने पुरुषत्वे ब्राह्मणत्वादिविशेषः एवं समाने ब्राह्मणत्वे वसिष्ठादिगोत्रभेदः प्रतिगोत्रं च समानार्षेयाणि । यस्यैतद्गोत्रं तस्य तैः शब्दैः प्रवराश्रयणं कर्तव्यम् । एवं विवाहनिषेधेऽपि स्मरन्ति च **सूत्रकाराः** "गोत्रभेदसंबन्धेन प्रवरान् यस्यैतद्गोत्रं तस्येमे प्रवरा " इति । गोत्रभेदस्तु तद्गोत्रजैरेव स्मर्यते वयं पराशरा वयमुपमन्यव इति । यद्यपि गोत्रवत्प्रवरानपि स्मरन्ति तथापि बहुत्वात्कदाचिद्विस्मरेयुरिति गोत्रमुपलक्षणीकृत्य प्रवरस्मृतिरुपनिबद्धा । गोत्रं तु स्मरन्ति। न च तस्य किंचिदुपलक्षणमस्ति । य एवंरूपस्तस्येदं गोत्रमिति । एतावत्तत्र स्मरणम् । यावद्गोत्रं संततिः समानजातीयत्वम् । एष च गोत्रप्रवरभेदः ब्राह्मणराजन्यविशाम् । तथाहि **कल्पसूत्रकारः** " पौरोहित्याद्राजन्यवैश्ययोरिति " ।

यद्यपि गोत्रविशेषव्यपदेशो सति प्राप्तप्रतिषेधेनापि प्रवराधिकारे वचनमिदमुपपद्यते किं तु न तेषां गोत्रस्मरणमस्ति । कस्तर्हि क्षत्रियवैश्ययोर्विवाहेऽपि बन्धूनामवधेर्नियमः । उच्यते । सर्ववर्णविषयमेतत् "ऊर्ध्वं सप्तमात् पितृबंधुभ्यः"इति । इहाप्यसगोत्रा । च शब्दादसपिण्डा । तथा चानुवर्त्यमानः सपिण्डशब्दः पूर्ववद्बन्धुसम्बन्धोपलक्षणार्थः । तेन पितृष्वसु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रन्वयस्त्रीणामन्यासां च प्रपितामहसंततिस्त्रीणामा सप्तमात्पुरुषात्प्रतिषेधः सिद्धो भवति । सप्तमपुरुषावधयः सपिण्डाः स्मर्यन्ते ।

अन्ये तु गोत्रं वंशमाहुः । न तत्रावध्यपेक्षा यावदेतज्ज्ञायते वयमेकवंशा इति तावदविवाहः । अस्मिन्नपि पक्षे असपिण्डा चेत्यनुवर्तते । तेन पूर्ववत्पितृष्वस्रादिदुहितॄणां प्रतिषेधः । अस्मिंस्तु पक्षे समानार्षगोत्राणां प्रतिषेधो दुर्लभः । न हि तत्रैतदस्ति वयमेकवंश्या इति । उच्यते । ऐतिहासिकेन तद्दर्शनेन समर्थयन्ते । तत्र हि वर्णयन्ति । "ऋषिर्वसिष्ठादिराद्यो वंशस्य कर्ता तद्गोत्रास्ततः प्रसूताः प्रवरा" इति तत्पुत्रपौत्रास्तपोविद्याद्यतिशयगुणयोगेन प्रख्याततमाः । स्मृत्यन्तरादेष एव नियमः । इदं त्वत्र निरूप्यं यदेतत्समानप्रवरैरिति तत्र नामधेयतस्तावत्समानत्वं न संख्यातः । नामधेयसमानत्वे च किं यत्र सर्वाण्येव समानानि तत्र प्रतिषेध उतैकस्मिन्नपि समाने । तत्र यदि समुदितानां प्रवरत्वं तत्र समाने कस्मिंश्चिद्भिन्नेऽन्यस्मिन्नन्यः समुदायः संजात इत्यसमानप्रवरत्वाच्च प्रतिषेधः । एवं चोपमन्यूनां पराशराणां च स्याद्विवाहः भिन्नं तयोर्गोत्रम् । एक उपमन्यवः अपरे पराशराः पूर्वेण च न्यायेन प्रवरभेदः । उपमन्यूनां वासिष्ठभारद्वाजैकपादिति प्रवराः । पराशराणां वासिष्ठगार्ग्यपाराशर्येति । अथैकैकस्य प्रवरत्वमेकस्मिन्नपि समानप्रतिषेधः । तद्यथा माषा न भोक्तव्या मिश्रा अपि न भुज्यन्ते । किं पुनरत्र युक्तम् एकैकस्य प्रवरत्वम् । तथाहि सामानाधिकरण्यं दृश्यते । एकं वृणीते द्वौ वृणीते त्रीन्वृणीत इति प्रतिपन्न एकः । तत्साम्येऽप्याहैषामविवाह इति ।

द्विजातिग्रहणमुपलक्षणार्थम् । शूद्रस्यापि आ सप्तमात्पितृतः इत्यप्यस्ति । दारकरणं दारक्रिया **दारकर्म** तत्र **प्रशस्ता** प्रशंसया विहितेत्यर्थः । मैथुनी मिथुने भवा मैथुनी, न मैथुनी अमैथुनी । पितुरिति संबध्यते । पितृबीजादेवोत्पन्ना जातमात्रा । नियोगे विहितस्तत उत्पन्नाया नास्ति पूर्वोक्तविशेषणैर्निषेधः । अतः पृथङ्निषिध्यते अमैथुनीति ततो नियोगोत्पन्ना कामतो न विवाह्या मैथुनीत्वात् । अन्ये तु अमैथुने इति पठन्ति । धर्मार्थे दारकर्मणि प्रशस्ता न मैथुने स्तुतिश्चेयं न प्रतिषेधः । ईदृशी योढा सा सत्यपि मैथुने धर्मार्थैव भवति ॥ ५ ॥

महान्त्यपि समृद्धानि गोजाविधनधान्यतः ॥
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥ ६ ॥

वक्ष्यमाणस्य प्रतिषेधस्य निन्दार्थवादोऽयम् । समृद्धिः सम्पत्तिः । धनं विभवः । **महान्त्यपि** प्रकृष्टान्यपि । धनविशेषणार्थमाह **गोजाविधनधान्यतः** । तृतीयार्थे तसिः । गोजाविधनेन च धान्येन च । धनग्रहणं गोजादीनां विशेषणार्थम् । धनरूपा ये गोजादयः कूटसंपन्नता हि धान्यम् । स्त्रीसम्बन्धो विवाहः स्त्रीप्राप्त्यर्थं संबन्धः **स्त्रीसंबन्धः** ॥ ६ ॥

For Private And Personal Use Only

हीनक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसम् ॥
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥ ७ ॥

हीनास्त्यक्ताः क्रिया यस्मिन् कुले जातकर्मादयः । संस्कारा न क्रियन्ते नित्याश्च पञ्चयज्ञादयः । **निष्पुरुषं** स्त्रीप्रसु यत्र प्रायेण कन्या जायन्ते न पुमांसः । **निश्छन्दः** वेदाध्ययनवर्जितम् । **रोमशार्शसम्** द्वन्द्वैकवद्भावेन कुलद्वयं निर्दिष्टम् । बहुदीर्घैर्बाह्वादिषु लोमभिर्युतम् । **अर्शांसि** गुदेन्द्रियगतान्यधिमांसनिबद्धानि तानि हि रोगरूपत्वात्पीडाकराणि । **क्षयो** राजयक्ष्माव्याधिः । **आमयावी** मंदाग्निर्यस्य भुक्तमन्नं सम्यङ्न जीर्यति । **अपस्मारः** स्मृतिभ्रंशाद्युपघातकृत् । **श्वित्रं** शरीरगता च्छेदवती श्वेतता । **कुष्ठं** प्रसिद्धम् । सर्वे एते व्याधिविशेषवचनाः शब्दा रोमशादारभ्य मत्वर्थीयप्रत्ययान्ता निर्दिष्टाः । पूर्वैर्व्याख्यातृभिर्दृष्टमूलताऽस्य प्रतिषेधस्य वर्णिता । मातुः कुले द्विपदोऽनुहरन्ति । ततो हीनक्रियादीनां या प्रजा साऽपि तच्छील स्यात् । व्याधयश्च संक्रामन्ति । एवं हि **वैद्यके** पठ्यते " सर्वे संक्रामिणो रोगा वर्जयित्वा प्रवाहिकाम् " ॥ ७ ॥

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ॥
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥ ८ ॥

पूर्वः कुलाश्रयः प्रतिषेधः । अयं तु स्वरूपाश्रयः । यस्या असुवर्णाः कनकवर्णा वा केशाः सा **कपिला** । **अधिकाङ्गी** षडङ्गुलिः । **रोगिणी** बहुरोगा दुष्प्रतिकारव्याधिगृहीता च । भूम्नीनि मत्वर्थीयो नित्ययोगे वा । **अलोमिका** अकेशा । लोमानि केशा अप्युच्यन्ते । बाहुमध्ये जङ्घाद्वये वा सर्वलोम्नामभावः । **वाचाला** स्वल्प एव वक्तव्ये बहुलं परुषं च भाषते । **पिङ्गला** अक्षिरोगेण मण्डलाक्षी कपिलपिङ्गलाक्षी वा ॥ ८ ॥

नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ॥
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ॥ ९ ॥

ऋक्षं नक्षत्रं तन्नामिका आर्द्रा ज्येष्ठा इत्यादि । वृक्षनाम्नी शिंशपा आमलकीति । **नदी** गङ्गा यमुना तन्नाम्नी । ऋक्षाणि च वृक्षाश्च नद्यश्चेति द्वन्द्वः तासां नामानीति **षष्ठीसमासः** । ततो द्वितीयेन नामशब्देनोत्तरपदलोपी समासः । अन्त्यनामिका बर्बरीशबरीत्यादि । पर्वता विन्ध्यमलयादयः पूर्ववत्समासात्कप्रत्ययः । पक्षिनाम्नी शुकी सारिका । **अहिः** सर्पस्तन्नाम्नी । व्याली भुजङ्गी । प्रेष्या दासी चेटी वाली । विभीषणं **नाम** भयजनकं डाकिनी राक्षसी ॥ ९ ॥

---

१ अत इनिठनौ (व्या. सू. ५।२।११५)
२ [नातिस्थूलां नातिकृशां न दीर्घां नातिवामनाम् ॥ वयोऽधिकां नाङ्गहीनां न सेवेत्कलहप्रियाम् ॥] इत्यपरः पाठः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ॥
तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियम् ॥ १० ॥

अव्यङ्गान्यङ्गानि यस्या सैवमुच्यते । अव्यङ्गशब्दोऽवैकल्यवचनः प्रवीणोदारादिशब्दवद्यद्यपि व्युत्पाद्यते विकलान्यङ्गानि यस्येति अतश्चाङ्गशब्दस्य द्वितीयस्यावयविनि शाकृतौचित्येन संस्थानस्य परिपूर्णता साऽव्यङ्गशब्देनोच्यते । सौम्यं मधुरं नाम स्त्रीणां सुखोद्यमत्र दर्शितम् । हंस इव वारण इव गच्छति यादृशी हंसानां हस्तिनां च विलासवती मन्थरा गतिर्यस्याः । तनुशब्दो नाल्पवचनः किंतर्ह्यनुपरिभावे वर्तते तन्वङ्गी सोच्यते । नातिस्थूला नातिकृशेति । मृदूनि सुस्पर्शा कठिना परुषाण्यङ्गानि यस्याः सा । **तामुद्वहेत्स्त्रियं** कन्याधिकारात्कन्याम् । यद्येवं नालोमिकामित्यादिप्रतिषेधोऽनर्थकोऽस्मादेव विधानात् या नैवंरूपा तस्या अविवाह्यता सिद्धा । सत्यमेवं एक एवार्थो द्वाभ्यां विधिमुखेन प्रतिषेधमुखेन चोद्यमानस्तु स्पष्टो बुध्यते । कन्याशब्दश्चात्र प्रकरणादननुभूतसंभोगासु स्त्रीषु प्रवर्तते । तथा च **वसिष्ठः** " अस्पृष्टमैथुनां सदृशीं भार्यां विन्देतेति " । न चान्येन संस्कृताऽन्येन पुनः संस्कर्तुं शक्या कृतस्य करणाभावात् । अतश्चोढाया अप्रवृत्तभर्तृसंयोगायाः कथंचित्स्वैरिणीत्वे भर्तृप्रवासादिना नान्येन विवाहोऽस्ति सत्यपि कन्यात्वे । तथा चेदृशी **वसिष्ठोक्तिर्मध्ये** पठिता । अन्यत्राप्युक्तम् (याज्ञ. व. आ. ५२) "अनन्यपूर्वी यवीयसीं भ्रातृमतीं स्त्रियमुद्वहेत" इति ॥ १० ॥

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता ॥
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥ ११ ॥

यस्या भ्राता नास्ति तां न विवहेत्पुत्रिकाधर्मशङ्कया । पुत्रिकात्वशङ्कया पुत्रिकाधर्मः कदाचिदस्याः कृतो भवेत्पित्रेत्यनया शङ्कया अनेन संदेहेन । कथं चेयं शङ्का भवति यदि न विज्ञायेत पिता देशान्तरे प्रोषितो मृतो वा सा च मात्रा पितृसपिण्डैर्वा दीयते । प्राप्तकाला[1] पितर्यसंनिहित एतैरपि दातव्येति स्मर्यते । स्मृतिं चोत्तरत्र[2] दर्शयिष्यामः । पितरि तु संविज्ञायमाने नास्ति पुत्रिकात्वशङ्का । स हि स्वयमेवाह "कृता वा न कृता वेति" । वाशब्दश्चेच्छब्दार्थे द्रष्टव्यः । यदि पिता न विज्ञायेत तदा कन्यका न वोढव्या । अन्ये तु स्वतन्त्रमेतत्प्रतिषेधद्वयमाचक्षते । यद्यपि **पिता न विज्ञायते** अनेनेयं जातेति गूढोत्पन्नायाः प्रतिषेधः । एवं च संबन्धः । **यस्या भ्राता** नास्ति तां पुत्रिकात्वशङ्कया **नोपयच्छेत** न विज्ञायत इत्यत्र पुत्रिकाशङ्कयेत्येतन्न संबध्यते । अस्मिन्प्रकरणे यत्र नास्ति दृष्टगतः

---

१ फ-प्राप्तकालाऽपि २ अ फ ख-उत्तरतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिषेधः यथा "असपिण्डा च" इत्यत्र श्लोके तदतिक्रमे विवाहस्वरूपा निर्वृत्तिरेव। अतः सगोत्रादिविवाहः कृतोऽप्यकृत एव विध्यवगमरूपत्वादाधानवद्विवाहस्य विध्यतिक्रमरूपादवगमात् । यथाऽऽधानविधौ यत्किंचिदङ्गं न ज्ञातं तदभावे नाहवनीयादिनिर्वृत्तिः एवमसगोत्रादिकाया न भार्यात्वम् । तस्मात्त्याज्यैव कृता तादृशसंस्कारप्रतिरूपिकाऽपि । तत्रभवन्तो वसिष्ठादयः प्रायश्चित्तमपि स्मरन्ति तादृशविवाहे यद्यपि कर्मण एव तदङ्गप्रतिषेधातिक्रमे वैगुण्यं न साक्षात्पुरुषस्य दोषः तथापि वाचनिकं प्रायश्चित्तम् । अथवा सगोत्रागमनं निषिद्धम् । तदर्थे व्यापारे प्रवर्तमाने यदुक्तं तत्प्रायश्चित्तं भवेत् । यस्तु हीनक्रियादिप्रतिषेधस्तस्य दृष्टदर्शनमूलत्वान्निर्वर्तते विवाहः, भवत्यसौ भार्या, नास्ति तस्यास्त्यागः । एवमर्थ एव महान्त्यपीति पूर्वस्मात्प्रतिषेधाद्भेदः स्तवनार्थं पठितः । एवमेव च शिष्टसमाचारः । कदाचित्कपिलादिरूपामुपयच्छति न सगोत्राम् ॥ ११ ॥

सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्मणि ॥
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ॥ १२ ॥

"उद्वहेत द्विजो भार्यामिति" सत्यपि द्वितीयानिर्देशे भार्यायाः प्रधानत्वे च गुणकर्मत्वे विवाहस्य विवक्षितमेकत्वम् अनुवादगतोद्देश्यत्वात्[1] । यथा यूपं छिनत्तीति । यस्यान्यतः स्वरूपमवगतं तस्यान्यत्र कार्यान्तरविधानार्थमनूद्यमानस्य यथावगतस्वरूपस्यैवानुवादो भवति यथा गृहं संमार्ष्टीति । पूर्वावगतिसापेक्षत्वादनुवादस्य । निर्ज्ञातसंख्याका हि ग्रहा दश एतानध्वर्युः प्रातःसवने गृहान्गृह्णातीत्यादिवाक्यैः । कार्यं चावगतं ग्रहैर्जुहोतीति । अतोऽवगत्यन्तरापेक्षत्वाद्ग्रहशब्दस्य न विवक्ष्यते संख्या । इह तु भार्यालक्षणोऽर्थो नान्यतः सिद्धोऽस्मादेव वाक्यादवगन्तव्योऽतो यथाश्रुति प्रतीयते प्रातिपदिकार्थवत्संख्याऽपि विवक्षितेति । पञ्चमे चैतद्विस्तरतस्तर्केण वक्ष्यते । स्थितायां संख्याविवक्षायां द्वितीयस्याः कृतेऽपि पाणिग्रहणे न भार्यात्वं यथा सत्यावहनीये न द्वितीय आहवनीयः। इष्यते च कचिन्निमित्ते भार्यान्तरपरिग्रहस्तदर्थमिदमारभ्यते । एतदेवाभिप्रेत्य गौतमीये पठितम् "धर्म प्रजासंपन्ने दारे नान्यां कुर्वीत अन्यतरापाये तु कुर्वीत " इति ।

सवर्णा समानजातीया सा तावदग्रे प्रथमतः कृतविजातीयदारपरिग्रहस्य[2] **प्रशस्ता** । कृते सवर्णाविवाहे यदि तस्यां कथंचित्प्रीतिर्न भवति कृतावपत्यार्थो व्यापारो न निष्पद्यते तदा कामहेतुकायां प्रवृत्ताविमा वक्ष्यमाणाः सवर्णावराः श्रेष्ठाः शास्त्रात्तु ज्ञातव्याः । अत एकत्वस्य सवर्णानियमस्य चायमपवादः

ननु च सवर्णाविवाहे पारतंत्र्यं प्रतीयते न सवर्णाया बहुत्वं एकत्वसंख्यातिक्रम-

१ ई-अनुपागतोद्दिश्यत्वात् । छ दानयागोद्देश्यत्वात् । अनुद्देश्यगतत्वात् २ फ अ कृतविजातीयम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तावत्प्रतीयते । असवर्णाभ्यनुज्ञानेनाप्यतिक्रान्तं चेत्कः सवर्णाया निषेधकः । तथा गौतमेनाविशेषेणैव पठितम् " अन्यतरापाये तु कुर्वीतेति " । उत्तरश्लोके " सा च स्वा चेति " सवर्णाविवाहोऽस्ति । १२ ।

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ॥
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः ॥ १३ ॥

वर्णभेदे सति सवर्णानियमो यथैव ब्राह्मणस्य क्षत्रियादिस्त्रियो भवन्ति एवं **शूद्रस्य** जातिन्यूना रजकतक्षकादिस्त्रियः प्राप्ताः । अतः सवर्णेयमुच्यते । उत्कृष्टजातीया तु पूर्वत्र क्रमग्रहणादप्राप्ता । **सा च शूद्रा स्वा च** वैश्या वैश्यस्य । **ते च** वैश्याशूद्रे **स्वा च** राजन्यस्य । एवम**ग्रजन्मनो** ब्राह्मणस्य क्रमेण निर्देशे कर्तव्ये शूद्रप्रक्रमेण निर्देशः पूर्वोक्तमेवार्थं उपोद्बलयति । यदुक्तं "विकल्प आनुपूर्व्येण नावश्यं समुच्चयः" ॥ १३ ॥

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः ॥
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते ॥ १४ ॥

यद्यप्यत्यन्तरूपवती शूद्रा विप्रराजन्यौ च वीरप्रकृती दशमीमपि दशामभुवीयातां तथापि शूद्रां नाधिवोढारौ । अत्रार्थवादः । **कस्मिंश्चिदपि वृत्तान्ते** न कचिदितिहासोपाख्यानेऽप्युपदिश्यते वर्ण्यते । **आपदि** गरीयस्यामधिकायामापदि पूर्वत्रानुज्ञाताऽनेन प्रतिषिद्धा अतो विकल्पः ।

ननु च शास्त्रलक्षणयोरेकविषयसंनिपाते षोडशिग्रहणाग्रहणवद्विकल्पो युक्तो न तु रागलक्षणायाः प्रवृत्तेर्निषेधेन । न च शूद्रा शास्त्रलक्षणा केवलं रागतस्तत्र प्रवृत्तिरप्रतिषिद्धेति पूर्वशास्त्रस्यार्थः । निषेधस्तु शास्त्रलक्षण इत्यविवाह्यैव शूद्रा । एतदेवाभिप्रेत्य **याज्ञवल्क्येन** पठितम्(आचारे५६)"यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः । न तन्मम मतमिति"। अत्रोच्यते । सर्वत्रोपदेशानर्थकतयैव विकल्प आश्रीयते । यदि चात्यन्तमेव शूद्राप्रतिषेधः स्यात्तदा क्षत्रियवैश्ये एव प्रतिप्रसूयेयाताम् । आपद्यभ्यनुज्ञाने प्रतिप्रसवशास्त्रमयं च प्रतिषेधः द्वयमपि व्यर्थं स्यात्सवर्णाया नियमेन सिद्धत्वात् । तदिदमनुज्ञातं प्रतिषेधश्चास्त्वविरुध्यमाने विकल्पते । ननु च विकल्पे कामचारस्तस्य च प्रतिप्रसवत एव सिद्धः प्रतिषेधो वक्तव्यो नैव । न यथाकामतः क्षत्रियावैश्ययोर्विवाह एवं शूद्राया अन्यत्रापदो गरीयः स्यात् । इदं तु प्रतिपत्तुं युक्तं यत्सवर्णानियमेनासवर्णानिवृत्तेरर्थतः कृतायाः पुनः शूद्रानिवृत्तिरसवर्णानिवृत्तेरानित्यत्वं ज्ञापयति । अनित्यत्वे चापदि सवर्णाया अलाभे वा भवति चायमवगमः शूद्रा न वोढव्या इतरे तु वोढव्ये ॥ १४ ॥

---

१ ङ सवर्णायामुपलभ्यमानायां क्षत्रियवैश्येऽपि वोढव्ये अतश्च गार्हस्थ्यान्मुख्यीभूतस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ॥
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥ १५ ॥

पूर्वस्य प्रतिषेधस्य शेषोऽयं निन्दार्थवादः । **हीनजातिः** शूद्रैव तस्या एव प्रकृतत्वात् । **ससंतानानि शूद्रतामिति** निगमनात्त एते **द्विजातयः मोहाद्**नलोभजादविवेकात्कामनिमित्तत्वाद्वा कुलानि शूद्रतां गमयन्ति । तस्यां जाताः पुत्राः शूद्रा भवन्त्येवं तत्पुत्रपौत्रा इति । अत उच्यते **ससंतानानीति** । संतानोऽपत्योत्पत्तिप्रबन्धः पुत्रपौत्रादिः ॥ १५ ॥

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च ॥
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः ॥ १६ ॥

शूद्रां विन्दति परिणयति **शूद्रावेदी** स पतति **पतित इव** । अत्रिरुतथ्यस्य तनयः पुत्रस्तयोरेतन्मतमित्युपस्करः । अयं तावदर्धश्लोकः पूर्वप्रतिषेधशेषः । **शौनकस्य सुतोत्पत्त्या** शास्त्रान्तरमिदम् । अभ्यनुज्ञाय शूद्रायामृतावुपगमनं निषेधति सुतोत्पत्तिर्हृतौ युग्मासु रात्रिषु भवति ऋतौ शूद्रां न गच्छेदित्यर्थः । **तदपत्यतया भृगोः** । इदमपि स्मृत्यन्तरम् । तान्येव शूद्रोत्पन्नान्यपत्यानि यस्य स तदपत्यः तद्भावस्तदपत्यता । **भृगो**रेतन्मतं ऋतावप्युपपन्नतरासु जातापत्य उपेयात् । पतितत्ववचनं चात्र निन्दैव न त्वस्य पतितधर्मता पतितस्योदकमित्यादि । एतच्च वक्ष्यामः ॥ १६ ॥

शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ॥
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥ १७ ॥

अर्थवादोऽयम् । यदि पुत्रमुत्पादयति **तस्यां** ततो **ब्राह्मण्यादेव हीयते** । अपत्यस्याब्राह्मणत्वमिति निन्दैव । **सुतमिति** च पुल्लिङ्गनिर्देशात्सुतोत्पत्तेरित्यत्र समानसंहितत्वेऽपि पुत्रोत्पत्तिरेवाभिप्रेता । तथा च दर्शितं "युग्मा रात्रयो वर्ज्याः" इति ॥ १७ ॥

दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु ॥
नाश्नन्ति पितृदेवास्तन्न च स्वर्गं स गच्छति ॥ १८ ॥

सार्वकालिकोऽयं निषेधः । यदि कथंचिच्छूद्राऽपि व्युह्यते तदैतानि **कर्माणि तत्प्रधानानि** न कर्तव्यानि । न च तया सह त्रैवर्णिकस्त्रीवद्धर्मेऽधिकारोऽस्तीत्यर्थः । भार्यात्वादधिकारे प्राप्ते निषेधोऽयम् । अतः स्वधर्मे धनं विनियुञ्जानस्य न तदीयानुज्ञोपयुज्यते यथा द्विजातिस्त्रीणाम् । अन्यत्र त्वर्थकामयोः साऽप्यनतिचरणीयैव प्रेष्यावत्तत्कर्मोपयोगो न निषिध्यते श्राद्धादाववहननादिकार्ये तत्र न दोषः स्यात् । परिवेषणादि न कारयितव्या । तत्र **दैवं** कर्म दर्शपूर्णमासादि देवतोद्देशेन च ब्राह्मणभोजनं व्रतवदित्यत्र

१ समासंहितत्वेति समीचीनः पाठः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथा व्याख्यातम् । पित्र्यं श्राद्धोदकतर्पणादि । आतिथेयमतिथेराराधनं भोजनपाद्यादि । ननु च सजात्या स्थितयाऽत्यये नास्त्येव प्रतिषेधः । नैव स्थितयेति तत्र श्रूयते । ऋतुमत्यां सवर्णायां कथंचिद्वाऽसंनिहितायां प्राप्नोति क्षत्रियावैश्यावत् । अपि च नासावधिकारे प्रतिषेधः । किं तर्हि आज्यावेक्षणादौ । पत्न्यावेक्षितमाज्यं भवतीत्यङ्गत्वेनोपादीयते । पत्नीत्यत्र ऋत्वर्थेषु यया कयाचिदुपात्तया सिद्धिरनियमेन प्राप्ता । यथा बह्वीषु सवर्णासु यया कयाचित्सवर्णया क्रियते एवमसवर्णयाऽपि मा कारीत्येवमर्थोऽसौ प्रतिषेधः । प्राधान्यमधिकारित्वात् । नाश्नन्ति पितृदेवास्तमिति कर्मनैष्फल्यमाह । न च स्वर्गं स गच्छति यद्यप्यतिथिरश्नाति तत्फलं स्वर्गादि न भवतीतिस्वर्गग्रहणमतिथिपूजाफलोपलक्षणार्थम् । अनुवादश्च धन्यं यशस्यमित्यादि ॥ १८ ॥

वृषलीफेनपीतस्य निःश्वासोपहतस्य च ॥
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥ १९ ॥

अर्थवादोऽयम् । वृषल्याः फेनो वृषलीफेनो वक्त्रासवः स पीतो येन पलाण्डुभक्षितादिवत्परनिपातः । पाठान्तरे वृषलीपीतफेनस्य पीतः फेनो यस्येति विग्रहः वृषल्या पीतफेनः । (तृतीयेति) (व्या. सू. २।१।३०) योगविभागात्समासः । पीतः फेनो वाऽनेनेति विग्रहे वृषल्या इति षष्ठीसमासः (व्या. सू. २।२।८) । अर्थस्तु सर्ववृत्तिष्वेक एव । संप्रयुज्यमानयोरधरपरिचुम्बनाद्यवश्यंभावितेन च सहचारिणा धर्मेण मैथुनसंबन्धो लक्ष्यते । प्रकरणाच्च विवाहप्रतिषेधशेषोऽयं न पृथग्वाक्यम् । तत्त्वे हि चुम्बनादिवर्जं नियोगधर्मो बहुमतः स्यात् । तस्माद्यच्छच्छूद्रां चुम्बनादिपरिफेनेन न किंचिच्छास्त्रार्थमनुतिष्ठति । तस्यां चैव प्रसूतस्य ऋतौ तु गच्छत इत्यर्थः । निष्कृतिः शुद्धिर्नास्ति इति निन्दातिशयोऽयम् ।

यतः संभव एवात्र कैश्चित्सप्तमीपञ्चम्यौ नानुज्ञाते "सप्तमी पञ्चमी चैव मातृतः पितृतस्तथा" इति अन्यैस्तु "ऊर्ध्वं सप्तमात्पञ्चमाच्च" तत्र विकल्पलभ्यमाना पञ्चमी न विवाह्या असंभवे तु न दोषः ॥ १९ ॥

चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् ॥
अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत ॥ २० ॥

वक्ष्यमाणस्य संक्षेपोपन्यासः । हिताश्चाहिताश्च केचिद्धिताः केचिन्न । अष्टाविति संख्यानिर्देशः । समासः संक्षेपः । स्त्रीसंस्कारार्था विवाहाः स्त्रीविवाहाः । कः पुनरेवं विवाहो नाम उपायतः प्राप्ताया कन्याया दारकरणार्थः संस्कारः सेतिकर्तव्यताङ्गः सप्तर्षिदर्शनपर्यन्तो पाणिग्रहणलक्षणः ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः ॥
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥ २१ ॥

संख्यायाऽष्टौ न्युद्दिष्टानां नामधेयानीमानि । अधमग्रहणं पैशाचस्य निन्दार्थम् ॥ २१ ॥

यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ ॥
तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् ॥ २२ ॥

धर्मादनपेतो **धर्म्यः** शास्त्रविहित इत्यर्थः । **यस्य च** विवाहस्य **यौ गुणदोषौ** इष्टानिष्टफलहेतुत्वाद्गुणदोषौ । **प्रसवे**ऽपत्यजन्मनि । **गुणा** गुणाः **अगुणो** दोषः । वोढुरेव स्वर्गनरकादिलक्षणौ गुणदोषौ तत्प्रयोजनमर्थात्स्वर्गादिकम् । या ईदृशा एव भवंति गतार्थमपि भूयः प्रतिपत्तये कथयन्ति ॥ २२ ॥

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् ॥
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥ २३ ॥

षड्विवाहा ब्राह्मणस्यानुपूर्व्या आनुपूर्वी क्रमं नामोद्देशःक्रमम् । **क्षत्रस्य** क्षत्रियवचनः क्षत्रशब्दः । तस्य **चतुरोऽवरानु**परितनानासुरगान्धर्वराक्षसपैशाचान्विद्यात् । **वैश्यशूद्रयो**स्तानेवा**राक्षसा**न्राक्षसं वर्जयित्वा ॥ २३ ॥

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः ॥
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥ २४ ॥

आसुरगान्धर्वयोरयं निषेधो **ब्राह्मणस्य** पुनर्ब्राह्मादिविधानेन । एवं **क्षत्रियस्य** राक्षस एवैको न गान्धर्वासुरौ । आसुर एव **वैश्यशूद्रयोः** । विहितप्रतिषिद्धानां विकल्पः । ततश्च नित्यवद्विहिताभावे विकल्पितेषु प्रवृत्तिः । यस्य च यो विहितः स तद्विवाहाभावमनपेक्ष्य प्रथमत एव यदि विहितप्रतिषिद्धेषु प्रवर्तेत तत्र पुरुषो दुष्येदपत्यं चानभिप्रेतमुत्पद्येतेति शास्त्रकारेण दर्शितं प्रसवे च गुणागुणानित्यादिना न तु सपिण्डादिपरिणयनविवाहस्वरूपा निवृत्तिः ॥ २४ ॥

पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह ॥
पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन ॥ २५ ॥

क्षत्रियादिविषयेयं स्मृतिर्न ब्राह्मणविषया राक्षसे विरोधात् । न हि वधभेदने ब्राह्मणः कर्तुमर्हति अस्याचरणस्य क्षत्रियादिविषयतयोपपत्तेः । **पञ्चानां तु** विवाहानां प्राजापत्या-

---

१ ङ—अष्टावुद्दिष्टानाम् २ फ—उद्देशक्रमेण ।

२६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्प्रभृति तयोर्विवाहौ धर्म्यौ । द्वौ न कर्तव्यौ पैशाचश्चासुरश्च प्राजापत्यः क्षत्रियादीनामप्राप्तोऽपि विधीयते । राक्षसोऽपि वैश्यशूद्रयोः । आसुरपैशाचयोः प्रतिषेधः ।

इयमत्र व्यवस्था । ब्राह्मणस्य षड्विवाहास्तत्र ब्राह्मः सर्वतः श्रेष्ठस्ततो न्यूनौ दैवप्राजापत्यौ ताभ्यामप्यार्षस्ततोऽपि गान्धर्वस्ततोऽप्यासुरः । येषामयं श्लोको ब्राह्मणविषयोऽपि तेषां राक्षसोऽपि ब्राह्मणस्य क्षत्रियवृत्ताववस्थितस्य भवति विकर्मस्थस्यापि वधभेदनाभ्यां प्रायश्चित्तीयतो राक्षसो न विवाह इति ते मन्यन्ते । तद्ब्राह्मस्य श्रैष्ठ्यं फलेनैव दर्शितम् । निषेधाभावेन चेतरेषां त्रयाणां न्यूनता फलापचयवचनादेव । आसुरस्य पुनर्वैश्यशूद्रयोर्विधानेन परिसंख्या ब्राह्मणक्षत्रिययोः प्रतीयते । षडिति च विधानम् । अतो विकल्पः । स च व्यवस्थया इतरासंभवेन तस्याश्रयणं तुल्यम् । विकल्पो हि व्रीहियववदनेकविवाहविधानेन च समुच्चयासंभवादेव सिद्धः । सति वा संभवे क्रियेत चेत्तथापि धर्मापत्ययोर्न्यूनफलोऽसौ । अथ क्षत्रियस्य राक्षसो मुख्यश्चतुर्भिः श्लोकैरविकल्पेन विधानात् । चतुर इत्यनेनासुरगान्धर्वपैशाचा अपि राक्षसं क्षत्रियस्यैकमित्यनेन ते प्रतिषिद्धः । अतो विकल्पिता न मुख्याः । प्रकृतापेक्षत्वाच्च राक्षसैकाविधिः । प्राजापत्ये नास्ति परिसंख्यानम् । अतः प्राजापत्योऽपि क्षत्रियस्य राक्षसतुल्यः । एवं वैश्यशूद्रयोरपि प्राजापत्यो नित्यवदाम्नातो न प्रतिषिद्धः । आसुरपैशाचौ तु तयोर्विहितप्रतिषिद्धौ । राक्षसोऽप्यराक्षसानित्यनेन प्रतिषिद्धः । त्रयो धर्म्या इत्यनेन विहितः । ब्राह्मणस्य पैशाचो नैवास्ति । क्षत्रियादीनां ब्राह्मदैवार्षा इति स्थितम् ॥ २५ ॥

पृथक्पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ ॥
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥ २६ ॥

पृथक्पृथगित्यनुवादः पूर्वेणैव सिद्धत्वात् । **मिश्रा**विति विधीयते निरपेक्षार्थो इतरेषां गान्धर्वराक्षसयोर्विहितत्वात् । व्रीहियववदप्राप्ते मिश्रणवचनमिदम् । व्रीहिभिर्यजेत यवैर्वेत्येकयागप्रयोगविषयत्वेनेतरेतरानपेक्षद्रव्यविधानाद्विकल्पो न मिश्रीभावः । मिश्रीभावे हि न व्रीहिशास्त्रार्थोऽनुष्ठितः स्यान्न च यवशास्त्रार्थः । एवमिहैकस्यां कन्यायां स्वीकर्तव्याया युगपदुपायद्वयमप्राप्तं विधीयते । तस्य विषयो यदा पितृगेहे कन्या तत्रस्थे कुमारेण कथंचिद्दृष्टिगोचरापन्नेन दूतीसंस्तुतेन इतराऽपि तथैव परवती न च संयोगं लभते तदा वरेण संविदं कृत्वा नय मामितो येनकेनचिदुपायेनेत्यात्मानं नाययति स च शक्त्यतिशयाद्धत्वा छित्त्वा चेत्येवं हरति तदेच्छयाऽन्योन्यसंयोग इत्येतदप्यस्ति गान्धर्वे रूपं हत्वा छित्त्वेति च राक्षसरूपम् । तावेतौ विवाहौ क्षत्रियस्यैव भवतः । **धर्म्यौ** क्षत्रियस्य **तौ** **पूर्वचोदितौ**वित्यनुवादः । अन्ये त्वाहुः यः क्षत्रियो बहुविवाहान्कुरुते स कांचिद्गान्धर्वेण

---

१ ङ– विमिश्रौ वा २ ङ– निरपेक्षयोः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विवाहे परिणयते कांचिद्राक्षसेनेत्येष मिश्रपक्षः अथवा सर्वा एवान्यतरेणेति पृथक्पृथक् अनेन चैतज्ज्ञायते । क्षत्रियस्यानयोरेवानियमेन प्रवृत्तिः प्राजापत्यादीनां तु य एव प्रथमं-कृतस्तेनैवान्याऽपि विवाह्या ॥ २६ ॥

आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् ॥
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ २७ ॥

इदानीं स्वरूपमेतेषामाह । **आच्छाद्येति** । आच्छादनविशेषोऽभिप्रेतः अन्यस्यौचित्येनैव प्राप्तत्वात् । उत्कृष्टेनाच्छादनेन यथादेशं यथासंभवं यथायोग्येन वाससा परिधाप्य । **अर्हयित्वा** अनेनालंकरणकटककर्णिकादिना प्रीतिविशेषसत्कारविशेषैरर्चनं कृत्वा । एतेनाच्छादनार्हणेन कन्याया वरस्य चान्यतरसंबन्धे प्रमाणाभावादुभयोपयोगः कार्यः । **श्रुतशीलवते** अन्येऽपि **स्मृत्यन्तरो**क्ता वरगुणा द्रष्टव्याः "युवा धीमाञ्जनप्रियः । यत्नात्परीक्षितः पुंस्त्व" इति । **स्वयं** प्रागयाचितः स्वपुरुषप्रेषणै**राहूया**न्तिकदेशमानाय्य वरं **यद्दानं स ब्राह्मो धर्मो** विवाहः । अविशेषवचनोऽपि धर्मशब्दः पूर्वापेक्षितत्वादस्य तत्पर एव द्रष्टव्यः । अयाचितलाभोऽभ्यर्हणापूर्वको ब्राह्मो विवाह इति लक्षणार्थः ।

ननु चेदमयुक्तं स्त्रीस्वीकारार्थो विवाह इति यावद्विवाहपर्यन्तं चैतद्दानम् । नाकृते विवाहे दानार्थनिवृत्तिः । स हि तस्याः प्रतिग्रहकालः । न चासति परिग्रहे दानं परिसमाप्यते न स्वत्वनिवृत्तिमात्रं दानं परस्वत्वापत्तिपर्यन्तं हि तत् । तथा च वक्ष्यति " तेषां तु निष्ठा विज्ञेया विद्वद्भिः सप्तमे पदे " इति ।

एवं विवाहकाल एव कन्या दातव्या । तथा च गृह्यकारस्तस्मिन्नेव काले ब्राह्मविवाहे काण्डिकधर्मं दर्शयति ।

यत्तु प्राग्विवाहाद्दानं तदुपसंवादनवाचनमात्रम् । न हि तास्मिन्नक्रियमाणेऽभिप्रेतकालेऽवश्यं विवाहनिर्वृत्तिः कश्चित्प्रागनिरूपिते न दद्यादपि इतरो वा कदाचिन्न प्रतिगृह्णीयात् तस्मात्प्राग्विवाहादुपसंवादः कर्तव्यः तदा त्वयेयं देया मया चेयं वोढव्येति यथैवान्तःक्रतुः सोऽपक्रियोऽचोदितत्वात्सिद्धार्थोऽर्थाद्बहिष्क्रियते ।

ये तु मन्यन्ते यथैव गवादेर्द्रव्यस्यादृष्टार्थतया दीयमानस्य मन्त्रपूर्वकेण प्रतिग्रहेण दानमपि निर्वर्तते तेनैवेदमुक्तं ददातिषु चैवं धर्मेष्विति । एवं चेह प्रतिग्रहमन्त्रस्थानीयो विवाह इति । तथा च उपयमनं विवाह इत्येकोऽर्थः । उपयमनं च स्वकरणम् । एवं ह स्म भगवान्पाणिनिः स्मरति (व्या.सू. १।३।५६) "उपाद्यमः स्वकरण" इति । अतो विवाहः कन्यास्वीकारार्थः । तदयुक्तम् । स्वीकृताया विवाहो भार्याकरणार्थः । नानेन कर्मणा प्रतिगृह्णीयादिति विधिरस्ति । न च वैवाहिका मन्त्रा प्रतिग्रहप्रकारकाः यथा "देवस्य त्वा प्रगृह्णामीति"

१ फ—श्रुति । २ याज्ञ० आचारे ५५ । ३ ड—संक्षेपार्थः ४ अ, ५ श्लो० १५२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्त्राः । यत्तु स्वकरण इति तन्न विरुद्धम् । विवाहस्याप्यस्ति स्वकरणरूपता । दानेन स्वत्वमात्रे प्रतिपन्ने विवाहेन विशिष्टं स्वत्वं क्रियते । नेयं गवादिद्रव्यवत्स्वं यथेष्टविनियोज्यतया अपि तु जायात्वेन । विशिष्ट एव हि स्वस्वामिभावो जायापतिलक्षणसंबन्धः । तथा च दर्शयिष्यति । " मङ्गलार्थं स्वस्त्ययनं............विवाहेषु प्रदानं स्वाम्यकारणमिति " ॥ २७ ॥

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ॥
अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥ २८ ॥

वितते प्रारब्धे तन्त्रे ज्योतिष्टोमादौ **यज्ञे** तत्कर्मकारिण ऋत्विजेऽर्च्यते सुताया दुहितुर्दानम् । **अलंकृत्ये**त्यनुवादः । कन्यादानस्य सर्वस्यैवंरूपत्वात् । " आच्छाद्यालंकृतां विवाहयेदिति" सामान्योऽयं विधिः । ननु गौश्चाश्वश्चाश्वतरश्चेत्यादृत्विग्भ्यो दक्षिणात्वेन श्रुतम् न क्वचित्कन्यादानं क्रत्वर्थतया चोदितम् । किमत्र क्रत्वर्थतया प्रवृत्ते यज्ञ ऋत्विजे यां ददाति स दैवो विवाहः । अस्ति चोपकारगन्धस्तदीयकरणम् । अकर्मोद्देशेनापि दीयमानं तत्कर्मकरणप्रवृत्तस्य जनयत्येवानुमानविशेषम् । एतावतोपकारसंबन्धेन ब्राह्माद्दैवो न्यूनः ॥ २८ ॥

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ॥
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ २९ ॥

स्त्री गवी पुङ्गवश्च **मिथुनम्** । **एकं द्वे** वा **वराद्**गृहीत्वा कन्याया दानमार्षो **धर्मः** । **धर्मत** इति **धर्म** एवायं नात्र विक्रयबुद्धिः कर्तव्या उच्चनीचपणाकरणाभावादित्यभिप्रायः ॥२९॥

सहोभौ चरतां धर्ममिति वाचानुभाष्य च ॥
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥ ३० ॥

सह धर्मो युवाभ्यां कर्तव्य इति वचनेन परिभाषां कृत्वा नियम्य यद्दानं स प्राजापत्यः । धर्मग्रहणमुपलक्षणार्थम् । धर्मे चार्थे च कामे च तुल्ययोगक्षेमतेति मिथोऽस्य परिभाषावचनस्यार्थः । धर्मशब्द एवोच्चार्यते सह धर्मश्चर्यतामिति न तु धर्मार्थकामाः सहेति । स तु धर्मशब्दः स्मृत्यन्तरवशादर्थकामयोरुपलक्षणार्थो व्याख्यातः । यद्येनां नातिचरसि धर्मार्थकामेषु तदा तुभ्यमियं दीयत इति कृतसंवित्कायाभ्युपगततदर्थाय विवाहकाले यद्दानं तत्रैवं समुच्चारयितव्यं सह धर्मं चरतामिति । अर्थकामयोरभिप्रेतेऽपि सहत्वे तद-

१ अ. ५ श्लो. १५२ २ ड अध्वर ३ अबड—उच्चनीचपणाभावात् ४ ब—कक्षस्वतु
५ ड—नियम्य सहस्वं यद्दानं अक्ष—सहस्व—क—स्व

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकृतत्वादनुच्चारणम् । तथा च गौतमः (अ.४ सू.६) "प्राजापत्ये सह धर्म चरतामिति" मन्त्रः । मन्त्रग्रहणेन चैतद्दर्शयत्यधिकृतरूपमेव प्रयोक्तव्यं मन्त्रवत् । न हि महासत्वानामर्थकामविषये सहितत्वं परिभाषितुं युक्तम् गम्यते तु स्मृत्यन्तरेभ्यः । अनयैव संविदा दोषेणास्य न्यूनता अस्ति अत्र दातुर्वरादुपकारलिप्सा । स्वशब्देनैतद्वचनं वाच्यते । न पुनरयं दातुरेव वचननियमः । अनुभाष्येत्यनेनैव सिद्धत्वाद्वाचेत्यनर्थकं स्यात् । अनुभाषणे वागिन्द्रियस्य साधनत्वात् । तथा च गृह्यकारः । " एतद्वः सत्यमित्युक्त्वा वरं वाचयेदेतन्नः सत्यमिति " । अनुशब्दश्च प्रातार्थस्यैव वाचा निश्चयमाह ॥ ३० ॥

ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः ॥
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥ ३१ ॥

ज्ञातिभ्यः कन्याया एव पित्रादिभ्यः कन्यायै च स्त्रीधनं दत्वा कन्याया आप्रदानमानयनमासुरो विवाहः । स्वाच्छंद्यात् स्वेच्छातो न शास्त्रत इत्यार्षाद्भेदमाह । तत्र हि शास्त्रं नियामकमस्ति । एकं गोमिथुनमिति । इह तु कन्याया रूपसौभाग्यादिगुणापेक्षं छन्दः ॥ ३१ ॥

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ॥
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः ॥ ३२ ॥

इच्छया च वरस्य कुमार्याश्च प्रीत्या परस्परसंयोग एकप्रदेशे संगमनम् । तस्येयं निन्दा मैथुन्यः कामसंभवः । मिथुनप्रयोजनो मैथुनः । तस्मै हितो मैथुन्यः । एष एवार्थो विस्पष्टीकृतः कामसंभव इति । संभवत्यस्मादिति संभवः । कामः संभवोऽस्येति ॥३२॥

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ॥
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ ३३ ॥

प्रसह्याभिभूय कन्यापक्षाद्बलात्कारेण कन्याया हरणं राक्षसो विवाह इत्येतावदत्र विवक्षितम् । हत्वेत्याद्यनुवादः । प्रसह्यापजिहीर्षतो यदि कश्चित्प्रतिबन्धो वर्तते तदा प्राप्तमेव हननादि । हन्तुः शक्त्यतिशयं ज्ञात्वा स्वात्मभयादुपेक्षेरंस्तदा भवत्येव राक्षसो न वधाद्यवश्यं कर्तव्यम् । हत्वा दण्डकाष्ठादिना ताडयित्वा । छित्त्वा खड्गादिप्रहारेणाङ्गानि खण्डशः कृत्वा । भित्त्वा प्राकारपुरदुर्गादि । क्रोशन्तीं रुदतीं कन्यामनिच्छाम् । अयं गान्धर्वाद्विशेषः ' अनाथापहियै परित्रायध्वम् ' इत्याद्युच्चैः शब्दकरणं क्रोशनम् । रोदनमश्रुकणमोक्षः । उद्विग्नितायाः स्त्रिया धर्मोऽयम् ॥ ३३ ॥

---

१ ड—विषयं २ अ-क-ड-फ-क्ष-ख-अर्थात् ३ ब—एकत्र देशे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ॥
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽधमः ॥ ३४ ॥

राक्षसपैशाचयोरनिच्छा तुल्या। राक्षसे हननं, पैशाचे वञ्चनम्। **सुप्तां** निद्रयाऽभिभूताम्। **मत्तां** क्षीबां मद्यपरवशाम्। **प्रमत्तां** वातसंक्षोभेण नष्टचेतनाम्। **रहोऽ**प्रकाशमुप**गच्छति** मैथुनधर्मे प्रवर्तते **स पैशाचो विवाहः सर्वविवाहानां पापिष्ठः** पापहेतुः धर्मापत्यं न ततः संपद्यते ॥

इह गान्धर्वराक्षसपैशाचानां प्रकृतविवाहसामानाधिकरण्यात्संयोगहरणोपगमा एव पाणिग्रहणसंस्कारनिरपेक्षा विवाहा इति मन्यन्ते। तेषां ब्राह्मादिष्वपि दानविवाहयोः सामानाधिकरण्यात्संस्कारो विनिवर्तते। यथा च न निवर्तते तथा दर्शितम्। लक्षणया विवाहप्रयोजनदाने विवाहशब्दः। गान्धर्वे तु भगवता **कृष्णद्वैपायनेन** दुष्यन्तशकुन्तलासंगमने वर्णितम् "अनग्निकममन्त्रकं" इति। तद्दर्शनेन पाणिग्रहणसंस्कारोऽस्ति वर्जितस्तु पैशाचे।

पुनर्विवदन्ते मुख्यं चोपगमनं च कन्यात्वमपैति संस्कारैस्तद्विनिवर्तनात्। अतश्च "पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः" (अ. ८ श्लो. २२६) इतिप्रतिषेधस्याप्रवृत्तेरस्त्येव मन्त्रवत्संस्कारसंबन्धः। स च प्रतिषेधः कृतः संस्कारप्रतिषेधार्थः। सा हि मन्त्रैः संस्कृतत्वाद्व्यपगतकन्याभावा। अत एव भवतु प्रथममुपगमस्ततोऽकन्यादोषो नास्ति। तथा च कानीनः कर्ण इति दर्शनम्। यदि तु पुरुषप्रयोगेण कन्यात्वमपेयात्कथमियं वाचो युक्तिः कन्यायाः पुत्रः कानीन इति। अथत्वसंस्कृता कन्योच्यते ततो युक्तम् "कर्णादयो ह्यनूढायाः पुत्रा" इति मुख्येऽभ्युपगमने कन्याया अपत्योत्पत्तेः संभवः। वर्ण्यते चेतिहासादिषु तथाभूताया विवाहः

अथ मद्यमदादिना निर्वृत्ते रतिसंबन्धे किमर्थः संस्कार इति। अत्रोच्यते। यद्यपि स्त्रीपुंसधर्मो निवृत्तोऽतिक्रान्तश्च कन्यागमनप्रतिषेधस्तथापि तया सहाधिकारार्थे पुनश्च गमने कन्यागमनं मा भूदिति तदर्थं संस्कारकरणम्। कन्यागमनप्रतिषेधातिक्रमसंबन्धेन पुरुषार्थतयाऽपि निन्द्यते विवाहोऽयं तदयुक्तम्। यतोऽयं लोके कन्याशब्दः पुंसाऽसंप्रयुक्तां स्त्रियमाचष्टे न संस्कारभावसापेक्षाम्। अकृतसंस्कारा अपि पुरुषैः क्षतयोनयो न कन्या इति व्यवह्रियन्ते। तासां च वेशाश्रितानां गमने न कन्यागमनदोषः। यद्यपि कुमारीकन्याशब्दौ प्रथमवयोवचनाविष्येते तथापि विवाहविधावनुपभुक्तपूर्वामेव स्त्रियमाचक्षते। तथा च कुमारवेशधारिणीं नातिप्रकाशप्रवृत्तपुंसं प्रयोगां भार्यात्वेनार्थयमानोऽन्यैरवबोध्यते नैषा कुमारी नष्टोऽस्याः कौमारो भावः संस्कारपरिलोपश्च स्यात् गर्भाधानं

१ ङ–विवाहस्य २ ब सापेक्ष्यम् ३ ब—वेषदूषितानाम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि मन्त्रवत्कर्तव्यं "विष्णुर्योनिं कल्पयतु" इति क्षतायाश्च कल्पनमशक्यम् । तत्रायथार्थो मन्त्रप्रयोगः स्यात् । न चानूढायाः पैशाचधर्मे मन्त्रप्रयोगः उढायास्तच्छ्रवणात् । पैशाचवर्जमन्येषु विवाहेषु तत्कल्पयितुं युक्तमविशेषश्रवणात् । तस्मान्मुख्योपगमपक्ष एवमादयो बहवो दोषः प्राप्नुवन्ति । अत आलिङ्गनोपगूहनपरिचुम्बनादिषूपगमनार्थेषु व्यापारेषु साहचर्यात्तादर्थ्याच्चोपपूर्वो गमिर्द्रष्टव्यः । यत्तु "कानीनः पुत्र" इति तत्र मुख्यार्थसंभवाल्लक्षणया संस्कारभावप्रतिपत्तिः । यत्तु संस्कारदर्शनं तत्तु क्वचिदेव । यद्यपि या गर्भिणी संस्क्रियते ज्ञाताऽपि चेति तत्र य एवोपगन्ता स एव संस्कर्ता । न त्वसौ पैशाचो विवाहः । पैशाचे हि येनैव समुपभुक्ता यस्मा एव दीयते । स एवैनां संस्करोतीति । गर्भिण्यास्तु संस्कारो वाचनिकः । एतच्च सर्वं निपुणतरं पुनर्नवमे वक्ष्यते ।

अपरे मन्यन्ते । सत्यं मुख्यमुपगमनममुख्यत्वे तु गमनप्रतिषेधानुपपत्तिरिति यदि हि मुख्यमुपगमस्तदा स एव विवाहोऽन्यस्यानन्तरोक्तेन न्यायेनाभावात् । ततश्च नास्ति तस्य प्रतिषेधस्य विषयो यत इच्छया गान्धर्वो हठाद्राक्षसोऽन्यथा पैशाचः । न चान्यः प्रकारोऽस्ति येन सर्वविषयप्रतिषेधः स्यात् । अस्ति त्वस्य विषयः यत्र हठाद्रहसि गमनं या वा पितृभ्यां दीयते न चोपसंस्क्रियते । ना चासौ तेषामपि गान्धर्वः कन्येच्छाया अभावात् । अत एव भर्तुरपि न कन्यागामित्वं विषयान्तरस्य संभवात् । तस्मात्क्षतयोन्याः संस्कारनिषेधाद्ब्राह्मादिवदुपायत्वात्तद्वच्च विवाहशब्दोपपत्तेः प्रकरणसामर्थ्याद्गौण एवोपगमार्थः ।

एषां च भेदः अप्रार्थितोपनतो भूमिहिरण्यादिवद्ब्राह्मः । ऋत्विक्त्वेन विशेषेण दैवः । गोमिथुनेनार्षः । याच्ञयाऽयाच्ञया वा सहोभौ चरतां धर्ममिति वचनव्यवस्थया प्राजापत्यः । शेषाः सुबोधभेदाः । ब्राह्मादीनामिदमर्थे तद्धितः ब्रह्मादिसम्बन्धिता च स्तुत्याऽऽरोप्यते । एवं सर्वेषु । पैशाचः पिशाचानामयं युक्त इति निन्दा ॥ ३४ ॥

अद्भिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते ॥
इतरेषां तु वर्णानामितरेतरकाम्यया ॥ ३५ ॥

द्विजाग्र्याणां ब्राह्मणानां **कन्यादानं** कन्यां ददतामद्भिरेव दानं शस्यते । ब्राह्मणाय यदा कन्यां ददाति तदाऽद्भिरेव दद्यात् । कथं पुनरापोदानकरणम् । न हि ताभिर्विना दानमस्ति "अद्भिर्वाच्यं न मे पूर्वं भिक्षा दानं ददाति वै । एवं धर्मोऽस्त्विति" नियमात् ।

---

१ फ–अकल्पनम् २ फ–सर्वे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा अद्भिरेवेत्यवधारणेनार्षासुरप्राजापत्यानपवदति । तत्र हि न केवला आपः कारणं गोमिथुनादिद्रव्यग्रहणमपि संविद्व्यवस्था च । तेनैतदुक्तं भवति । यथा गोहिरण्यादि द्रव्यं दीयते न किंचित्परिभाष्यते इयं गौस्त्वयैव संवाहनीयेदृशानि तृणान्यपि देयानि एवं कन्यापि देया न दुहितृस्नेहेन जामाता परिभाषणं कारयितव्यः । न च तस्माद्धनं ग्रहीतव्यमिति ।

क्षत्रियादीना तु यदि कन्यावरयोः परस्परमभिलाषो भवति तदा दानं कर्तव्यं नेतरथा ब्राह्मविवाहवत् । अन्ये तु व्याचक्षते धनं वा गृहीत्वाऽद्भिरेवेत्येष इतरेतरकाम्यार्थः । अस्मिन्पक्षे ब्राह्मणस्य सर्वविषयता ज्ञापिता भवति ॥ ३५ ॥

योयस्यैषां विवाहानां मनुना कीर्तितो गुणः ॥
सर्वं शृणुत तं विप्राः सम्यक् कीर्तयतो मम ॥ ३६ ॥

यदुक्तं " गुणदोषौ च यस्य याविति " तत्स्मारयति । नह्येवो वक्तव्यतया प्रतिज्ञातास्तत्र वक्ष्यमाणैः श्लोकैरयमर्थ उच्यत इति विशेषज्ञानार्थं युक्तः पुनरुपन्यासः । एषां विवाहानामिति निर्धारणे षष्ठी । एवं विवाहानां यस्य विवाहस्य यो गुणः कीर्तित आचार्येण मनुना सर्वं शृणुत तं गुणं विप्रा भृगुर्महर्षीनामन्त्रयते । सम्यग्-वैपरीत्येनानाकुलं कीर्तयतः कथयतः ॥ ३६ ॥

दश पूर्वान्परान्वंश्यानात्मानं चैकविंशकम् ॥
ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् ॥ ३७ ॥

पूर्वे वंश्या पितृपितामहादयः । अपरे पुत्रपौत्रादयः । तान्मोचयत्येनसो नरकादियातनाभ्य उद्धरति । ब्राह्मेन विवाहेन ऊढा तस्यां यो जातः पुत्रः स सुकृत-कृत्पुण्यकृद्यदि भवति । पितॄन्परलोकगतान् पितृशब्दोऽयं प्रेतपर्यायः न हि पुत्रादिसंततेरन्यथा पितृव्यपदेशसंभवः । दश शब्दः प्रत्येकमभिसंबध्यते पूर्वापर-शब्दाभ्याम् । एकविंशकमिति निर्देशात् । अर्थवादश्चायम् । तेनागताननुत्पन्नान्कथं मोचयतीति न वाच्यम् । पूर्वेषां त्वपत्यकृतेन शुभेन श्राद्धादिना भवत्येव पापान्मोक्ष इति श्राद्धाधिकारे कथयिष्यते । अतो दशापरानेनसो मोचयतीत्येतदुक्तं भवति दशपुरुषा यस्मिन्कुलेऽपापा जायन्त इत्यालम्बनम् ॥ ३७ ॥

दैवोढाजः सुतश्चैव सप्त सप्त परावरान् ॥
आर्षोढाजः सुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः ॥ ३८ ॥

---

१ ख नमःपूर्वं २ ख इतरेतरकाम्यया । ख ३ कीर्त्यते. । ४ फ सर्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दैवेन विधिनोढा दैवोढा तस्यां जातो **दैवोढाजः** । **सुतः** पुत्रः । कः प्रजापतिः स देवता यस्य विवाहस्य स कायः । संस्कारकर्मणि ग्रहणलक्षणेऽसत्येव देवतासंबन्धे प्रजापतेर्देवतात्वमध्यारोप्यते भक्त्या । यदपि तत्र प्राजापत्यो यागोऽस्ति स तु विवाह-साधारणः न कायव्यपदेशे कारणम् । आसुरादिषु च न काचिद्गतिः स्यात् । न ह्यासुरेभ्यो विवाहेभ्यो यागोऽस्ति । **कायोढज** इति ह्रस्वत्वं " ङ्यापोः संज्ञाछन्दसोर्बहुलमिति " ९
(ञ्या.सू.६।३।६३) । ननु च यद्यन्न्यूनफलं तत्तत्पश्चान्निर्दिष्टं तत्रार्षस्य प्राजापत्यात्पश्चादभि-धानं युक्तम् । अस्त्यत्र कारणं येनाधिकफलस्य प्राजापत्यस्य पश्चान्निर्देशः " पञ्चानां तु त्रयो धर्म्या " इत्यत्र प्राजापत्यस्य ग्रहणमिष्यते इतरथाऽऽर्षस्य स्यात् ॥ ३८ ॥

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ॥
ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसंमताः ॥ ३९ ॥ १०

प्रसवे च गुणागुणानित्युक्तं तदिदम**नुपूर्वश** आनुपूर्व्येणेत्यस्मिन्नर्थे स्मृतिकारैः प्रयुज्यते । श्रुताध्ययनविज्ञानसंपत्तिनिमित्ते च पूजाख्याति ब्रह्मवर्चसम् । तद्वन्तो **ब्रह्मवर्चसिनः** । इन्नन्तोऽयम् । शिष्टानां संमता अनुमता अगर्ह्या अद्विष्टाः प्रिया इति यावद्यतश्चामत्यर्थत्वान्मतिबुद्धीत्यस्याविषयत्वेन क्तेन च पूजायामित्येतेन नास्ति समासप्रतिषेधः । संबन्धसामान्यविवक्षायां च षष्ठी ॥ ३९ ॥ ११

रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ॥
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥ ४० ॥

रूपं मनोहराकृतिः **सत्त्वं** नाम **गुणो** द्वादशे वक्ष्यते । ताभ्या**मुपेता** युक्ताः । आढ्या **धनवन्तः** । श्रुतशौर्यादिगुणयुक्ततया ख्याताः **यशस्विनः पर्याप्तभोगाः** स्रगनुलेपनगीत-वाद्यादिभिः सुखसाधनैरविकलैर्नित्ययुक्ताः । सुखसाधनैः पूर्वोक्तैरवियोगो भोगः स पर्याप्तो- १०
ऽक्षतः समग्रो येषां ते पर्याप्तभोगाः । धर्मानुष्ठानतत्परा **धर्मिष्ठाः** । धर्मशब्दः केषां-चिद्गुणवचनः । अतो गुणवचनादित्यातिशायिकः । **शतं** वर्षाणि जीवन्ति ॥ ४० ॥

इतरेषु तु शिष्टेषु नृशंसानृतवादिनः ॥
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥ ४१ ॥

ब्राह्मादिव्यतिरिक्तेषु गान्धर्वादिविवाहेषु नृशंसमनृतं च वदन्ति **नृशंसानृतवादिनः** ११
नृशंसं मातृभगिन्यादावश्लीलाक्रोशवचनम् । **अनृतं** प्रसिद्धम् । नृशंसं चानृतं च

---

१ फ प्रजापत्ययोगोऽस्ति स तु विवाहादिसाधारण्येन कायव्यपदेशे कारणम् । २ फ योगोऽस्ति
३—व्या. सू. ३ । २ । १८८. ४—व्या. सू. २ । २ । १२. ५—अ. १२ श्लो. २४ । २६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नृशंसानृते ते वदितुं शीलमेषामिति शब्दव्युत्पत्तिः । ब्रह्मधर्मो वेदधर्मो वेदार्थस्तं द्विषन्ति निन्दति वा न श्रद्दधते वा । अत एव दुर्विवाहेष्विति निन्दा ॥ ४१ ॥

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा ॥
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान्विवर्जयेत् ॥४२॥

समासतो विवाहानां फलप्रदर्शनमेतत् । ये यस्य विवाहा विहितास्तेऽनिन्दिता- स्तैरूढानां या प्रजा पुत्रादिलक्षणा साऽनिन्द्या भवति प्रशस्येत्यर्थः । **निन्दितैः** प्रतिषिद्धैः **निन्दिता** गर्हिता । **तस्मा**द्दुःखभागिनी प्रजा मा भूदिति **निन्द्यान्विवर्जयेत्** ॥ ४२ ॥

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ॥
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ॥ ४३ ॥

पाणिग्रहणं नाम गृह्यकारोक्तः **संस्कारः सवर्णासु** समानजातीयासूह्यमानासू**पदिश्यते** शास्त्रेण विधीयते, कर्तव्यतया प्रतिपाद्यते । **असवर्णासु** यदुद्वाहकर्म तत्रायं वक्ष्यमाणो **विधिर्ज्ञेयः** ॥ ४३ ॥

शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ॥
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ॥ ४४ ॥

ब्राह्मणेनोह्यमानया **क्षत्रियया शरो** ब्राह्मणपाणिपरिगृहीतो **ग्राह्यः** पाणिग्रहणस्थाने शरस्य विधानात् । **प्रतोदो** बलीवर्दानामायासः क्रियते येन वाह्यमानाः पीड्यन्ते हस्तिनामिवाङ्कुशः । **वसनस्य** वस्त्रस्य **दशा ग्राह्या शूद्रया** उत्कृष्टजातीयैर्ब्राह्मणादिवर्णै**र्वेदने** विवाहे ॥ ४४ ॥

ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा ॥
पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ॥ ४५ ॥

उक्तो विवाहः । तस्मिन्निर्वृत्ते समुपयाते दारत्वे तदहरेवेच्छयोपगमे प्राप्ते तन्निवृत्त्यर्थमिदमारभ्यते । न विवाहसमनन्तरं तदहरेव गच्छेत् किं तर्हि ऋतुकालं प्रतीक्षेत । **गृह्यकारैस्तु** "अत ऊर्ध्वमक्षारालवणाशिनौ ब्रह्मचारिणावधःशायिनौ स्यातां । त्रिरात्रं द्वादशरात्रं संवत्सरं वा" इति(**आश्व.गृ.** १।८।१०।११)पठितम् । तत्र सत्यपि संवत्सरस्यान्तराऽऽपतितं ऋतौ गमनं नास्ति । एवमस्मात्कालादूर्ध्वमसत्यृतौ गमनं नास्ति । एवमेते स्मृती अविरोधिन्यौ भवतः । त्रिरात्रादीनां तु विकल्पः अत्यन्तरागपीडितयोर्गमनं धैर्यवतोस्तु ब्रह्मचर्यम् ।

ऋतुर्नाम स्त्रीणां शोणितदर्शनोपलक्षितः शरीरावस्थाविशेषो गर्भग्रहणसमर्थः

For Private And Personal Use Only

काल उच्यते । उपलक्षणत्वाच्च दर्शनस्य निर्वृत्तेऽस्मिन्वक्ष्यमाणकालानुवर्ती भवत्येव । तस्य काल ऋतुकालः । साहचर्याद्वा काल एव ऋतुः । तथा च समानाधिकरणसमासः । ऋतुकालेऽभिगन्तुं व्रतमस्येत्यृतुकालाभिगामी । "व्रते" इति णिनिः (व्या.सू.३।२।२०) यथा स्थण्डिलशायी अश्राद्धभोजीति । स्याद्भवेदित्यर्थः । यद्यप्यस्तिपरा विधिविभक्ति-स्तथाप्युपगमव्यापारं विदधाति । अभिगामी स्यादभिगच्छेदित्यर्थः । न ह्यनुपगच्छन्नभिगामी भवति ।

कीदृशं पुनरेतद्व्रतं किमृतावभिगन्तव्यमेव अथर्तावेव गन्तव्यमिति एतदुक्तं भवति । किमयं नियम उत परिसंख्येति । ननु च व्रतमिति शास्त्रतो नियम उच्यते । तत्रैव चायं णिनिः । अतः परिसंख्या कथमाशंक्यते ? उच्यते । परिसंख्यायामपि शास्त्रीयत्वं-नियमरूपता च विद्यत इति दर्शयिष्यामः । कस्तर्ह्यनयोर्विशेषः । विधिविशेषो नियमः । अथ विधिः कः । यः शब्दः कर्तव्यताबोधकः "अग्निहोत्रं जुहुयात्स्वर्गकामः" इति । न ह्यग्निहोत्रस्यैतद्वचनमन्तरेणान्यतः कुतश्चित्कर्तव्यतावगमः । नियमः पुनर्यत्रादृष्ट-सिद्ध्यर्थस्य[1] वचनमन्तरेण पाक्षिकी प्राप्तिः यथा "समे यजेतेति" दर्शपौर्णमासादि-यागविधानाद्देशमात्रमाक्षिप्तम् । न हि कश्चिद्देशमनाश्रित्य यागप्रयोगः संभवति । द्विविधश्च देशः समो विषमश्च । तत्र यदा तावत्समे यजेत तदैतद्वचनमनुवाद एव । यदा त्विच्छाया निरङ्कुशत्वाद्विषमे यियक्षति तदैतद्वचनं समदेशं विदधदर्थवत् । विहिते समे विषमस्यानाश्रयणमविधानात् । एतत्सामर्थ्यात्तन्निवृत्तिः । विधिनिबन्धने ह्यनु-ष्ठाने किमित्यविहितं क्रियेत तत्करणे हि न यथाचोदितानुष्ठानसिद्धिः । इदं चात्र स्मार्तमुदाहरणम् । "प्राङ्मुखोऽन्नानि भुञ्जीत । भुञ्जानस्य यदृच्छया यां कांचिद्दिशमाश्रित्य भोजनं प्राप्तं तत्र कदाचित्प्राची कदाचिदितरा या काचित्प्राप्ता तत्र यदा प्राची न तदेतरा, यदेतरा न तदा प्राचीति" । तत्राप्राप्तिपक्षे विध्यर्थं वचनं "प्राङ्मुखोऽन्नानि भुञ्जीतेति" तत्रातिक्रमाच्छास्त्रार्थं जहाति । एवमिह यदृच्छयोपगमनमृतावनुपगमनं पक्षे विधीयमानमुपगमनमनुष्ठीयमानं शास्त्रातिक्रमकारितां जनयेत् । यथाऽन्ये शास्त्रविहितार्था-अतिक्रम्यमाणाः प्रायश्चित्तहेतवो भवन्ति तथाऽनुगमनम् । अथर्ताविवनृतौ च गमने रागतः प्राप्ते वचनमृतावुपेयादिति । तदैवं वचनं मृग्यते ऋतावेवोपेयादनृतौ न गच्छेत् । यथा पञ्च पञ्चनखा भक्ष्या इति क्षुत्प्रतिघातेनार्थेन शशकादिष्वपि पञ्चनखेषु भक्ष्यता प्रसक्ता तद्व्यतिरिक्तेष्वपि वानरादिषु । न च तत्र पर्यायेणैव प्रवृत्तिः । युगपत्तत्र चान्यत्र च प्रसक्तौ पञ्च पञ्चनखा भक्ष्या इति वचनमितरपरिसंख्यानार्थं परिसंपद्यते । एवमिह परिसंख्येति ।

---

१ दृष्टसिध्यर्थस्य २ ब–वेदतः ३ फ–मथ

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु च परिसंख्यां दोषत्रयवतीमाचक्षते । त्रयो हि तत्र दोषाः प्रादुःष्युः स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्च । पञ्च पञ्चनखा भक्ष्या इति यदाऽन्वयतः पञ्चनखविषयं भक्षणं प्रतीयते तदा तत्त्यक्तं भवति तद्व्यतिरिक्तनिषेधपरत्वाद्वाक्यस्य । अश्रुतश्च निषेधोऽतः परार्थकल्पना । अर्थित्वाच्च सर्वविषयं भक्षणं यत्प्राप्तं तस्य बाधः । एवमेतेन परिसंख्यायां त्रयो दोषाः । नैतत्सारम् । सत्यर्थित्वे श्रुत्यर्थासंभवे वाक्यस्यानर्थक्यं मा भूदित्येतत्परता न विरुद्धा ।

" विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्या नखिष्विव " ॥

किं पुनरत्र युक्तं तत्र चान्यत्र च प्राप्तौ परिसंख्यालक्षणस्य विद्यमानत्वात्परिसंख्येति । ऋतावपि गमनं प्राप्तमनृतावपि । न तु यदर्तौ तदानृताविति । यथा सत्यर्थित्वे भोजनं तत्र नियमोऽश्राद्धम् न पुनराहारत्यागेन अश्राद्धमेव भुञ्जान आस्ते । एवमिह सति खेदे यद्गमनं तत्र नियमोऽनृतौ न गच्छेदित्यवगच्छति । अर्थित्वाच्च गमने प्रसक्ते कालविधानपरतैव युक्ता वाक्यस्य । अन्यथाऽनारंभ्योऽर्थ उपदिष्टः स्यात् । किंचापत्योत्पत्तिविधेः कृतविवाहस्यानुष्ठेयत्वादृतौ च तत्संभवात्प्राप्तमेव गमनम् । उत्पन्नपुत्रस्य च न द्वितीयपुत्रोत्पादनं वैधम् । अपत्यमुत्पादयेदित्येकत्वविवक्षायां विद्धचर्थनिवृत्तेः । न च गमनमेवादृष्टार्थतया शक्यं विधातुम् । संस्कारविधित्वादधिकारग्रहणात्कल्पनायाश्च शक्यत्वादपत्योत्पत्तिविध्याक्षेपादृतौ गमनस्य । यदि चात्रर्तावुपेयादिति तदनृतुप्रतिषेधार्थम् । तत्रानुवादः परं परिसंख्या । तत्र ह्यर्थान्तरलक्षणयाऽप्यर्थवत्ता भवति ।

एवं कृत्वा गौतमीयेनाविप्रतिपत्तिः । एवं तत्रोक्तम् । " ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम् " (अ.९ सू.१–२) इति । सर्वत्र वेत्येष विकल्पः कामचारानुज्ञानार्थः । न पुनः सर्वदर्तावनृतौ च नियमोपपत्तिः । यदि च पूर्वत्रर्तावुपेयादिति नियमः सर्वत्र वेत्यत्रापि स एवोपेयादित्यनुप्रयुज्यमानशब्दो नियमार्थः प्राप्नोति एकप्रक्रमत्वात्तर्हि स एव शब्दः पुनरनुच्चार्यमाणो भिन्नार्थो भवितुं युक्तः । न चर्तोरन्यत्र नियमार्थतोपपद्यते इत्युक्तम् । तस्मादृतौ गमनवचनमनृतौ प्रतिषेधार्थम् । तत्रानुत्पन्नपुत्रस्य विध्यन्तरान्नियम एव । उत्पन्नपुत्रस्तु यथाकामी ।

अनृतौ प्रतिषिद्धे गमने भार्येच्छया पुनः प्रतिप्रसूयते **पर्ववर्जं व्रजेच्चैनां तद्व्रत** इति । तदिति भार्यायाः प्रत्यवमर्शः । तच्चित्तग्रहणं व्रतमस्येति तद्व्रतः । रतिकाम्यया

१ तत्तावस्यक्तं भवति. २ अनर्थिनश्च अनारभ्योऽर्थ उपदिष्टः स्यात् । ३ ब—श्चाऽशक्यत्वाच्चाऽपत्योत्पत्तिः । ४ ब–न हि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनाऽप्यपत्यार्थेनोत्पन्नपुत्र ऋतावनुत्पन्नपुत्रो वाऽनृतौ सुरतसंभोगेच्छया तद्व्रत एनां व्रजेन्नात्मेच्छयेत्यर्थः । अथवा तच्छब्दो रतिकाम्ययेत्यत्रापेक्ष्यते स्मृतिशास्त्रत्वादस्य । तद्रतिकाम्यया पर्ववर्जमन्यत्रापि व्रजेत् तत्रैवाकारश्लेषो द्रष्टव्यः । अरतिकाम्यया आत्मन इति शेषः । यथा तु व्याख्यातं तथा न किंचिदत्राप्रश्लेषेणापि तच्छब्दस्य समासोपसर्जनस्यासंबन्धेन पर्वाणि वक्ष्यति । अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीमिति । **स्वदारेषु निरतः** स्यात्तत्प्रीतिभावनापरः । अथवा स्वदारेष्वेव रमते न परदारान्रमयेदिति परदारप्रतिषेधः । **सदा** यावज्जीवमेतद्व्रतं परिपालनीयम् । अतः स्थितमेतत्त्रीणि वाक्यान्यत्र ऋतुकालाभिगामी स्यादित्येतदेकम् । अनुत्पन्नपुत्रस्य नियमानुवादरूपं द्वितीयम् । भार्याप्रयुक्तस्य पर्ववर्जमृतावनृतौ च न सुरतेच्छया स्वदारनिरत इति तृतीयम् । एषां च पदयोजना ऋतुकालाभिगामी स्यादपत्यार्थम् रतिकाम्यया तु तद्व्रत एनां व्रजेत् स्वदारनिरतश्च स्यात् ॥ ४५ ॥

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ॥
चतुर्भिरितरैः सार्धमहोभिः सद्विगर्हितैः ॥ ४६ ॥

ऋतुलक्षणार्थं श्लोकोऽयम् । वैद्यकादिशास्त्रावगम्योऽयमर्थो न विधिमूल एव । एवं "युग्मासु पुत्राः" इत्येतावपि श्लोकौ । **षोडशरात्रयस्ताः स्त्रीणां** मासि मासि स्वाभाविक ऋतुः । प्रमाणान्तरमूलत्वाच्चाश्रुतमपि मासि मासीति गम्यते । स्वभावे भवः **स्वाभाविकः** स्वस्थप्रकृतीनां यो भवति व्याध्यादिना कस्याश्चित्प्राप्तकालोऽपि निवर्तते घृततिलाद्यौषधोपयोगेन रतिवशेन चाकालेऽपि संवर्तते । अतः स्वाभाविक ऋतुस्ता रात्रय उच्यंते । चतुर्भिरितरैः चत्वार्यहानि यानि सद्भिर्विगर्हितानि प्रतिषिद्धस्त्रीस्पर्शसंभाषणादीनि तानि च प्रथमशोणितप्रदर्शनात्प्रभृति । अहर्ग्रहणं च सर्वाहोरात्रोपलक्षणार्थम् तैः सह ॥ ४६ ॥

तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या ॥
त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः ॥ ४७ ॥

तासां रात्रीणां या **आद्याः** प्रथमशोणितदर्शनाच्चतस्रस्ता **निन्दिताः** न तत्र गमनमस्ति । तिसृषु तावत्स्पर्शोऽपि नास्त्यशुचित्वात् । चतुर्थ्यां तु स्नाताया वशिष्ठवचनात्सत्यपि शुचित्वे रतिसंभोगो नास्ति चतसृणां गर्हितत्ववचनात् । **या चैकादशी** या च **त्रयोदशी** साऽपि निन्दिता । एवं प्रतिषिद्धगमने ऋतुदर्शनात्प्रभृत्येकादशीत्रयोदश्यौ गृह्येते । न चन्द्रतिथी । तासामिति निर्धारणविषयत्वेन रात्रीणां संबन्धात्समानजातीयश्च

१ ड-क्ष—यथा

For Private And Personal Use Only

निर्धार्यतया प्रतीयते । कृष्णा गवां संपन्नक्षीरेति । षड्रात्रगमनप्रतिषेधोऽयमदृष्टार्थः । शेषाः प्रशस्ता दशरात्रयः । षण्णां प्रतिषेधाद्दशसु प्राशस्त्यं सिद्धमेवानूद्यते ॥ ४७ ॥

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ॥
तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ॥ ४८ ॥

तासु दशसु या युग्मा रात्रयः षष्ठ्यष्टमी दशमी द्वादशी चतुर्दशी षोडशी तासूपगच्छतः पुत्रा जायन्ते । युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् । अयुग्मासु स्त्रियो दुहितरस्तस्मात्पुत्रोत्पत्तिसिध्यर्थं युग्मासु संविशेद्व्रजेत मैथुनधर्मेण स्त्रियमार्तवे । अनुवादोऽयम् । अयमपि नियम एवानुत्पन्नपुत्रस्यायुग्मास्वगमनम् ॥ ४८ ॥

पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ॥
समे पुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः ॥ ४९ ॥

शुक्रं वीर्यं पुरुषस्य रेतः स्त्रियाः शोणितम् । उक्तं भगवता वसिष्ठेन (अ.१९ सू.१) "शुक्रशोणितसंभवः पुरुष" इति । स्त्रीबीजादधिके पुम्बीजेऽयुग्मास्वपि पुत्रो जायते युग्मास्वपि स्त्रीबीजस्याधिक्ये कन्यैव । अयुग्मास्वपि रात्रिषु पुत्रार्थिनो गमनानुष्ठानार्थमेतत् । यदा परिपुष्टमात्मानं वृष्याहारयोगेन समधिकवीर्यं मन्येत स्त्रियाश्च कथंचिदपचयं तदा पुत्रार्थी गच्छेदित्युपदिष्टं भवति । आधिक्यं चात्र न परिमाणतः किं तर्हि सारतः । समेऽपुमानमिश्रीकृते पुंस्त्रियौ । अपुमान्नपुंसकमिति केचित्साम्य इति पठन्ति । उभयोः साम्ये पुमानेव । पुंस्त्रियौ वा । गर्भधान्यां यदा वायुर्द्रवरूपत्वात्संसृष्टे शुक्रशोणिते समं विभजत एकत्र भागमन्यत्र तावदेव तदा यमौ जायेते तत्र समे विभागेऽपि स्त्रीबीजाधिक्ये स्त्री पुम्बीजाधिक्ये पुमान् क्षीणे बीजे सारतः विपर्ययोऽल्पग्रहणं गर्भस्य नपुंसकोत्पत्तिर्वा ॥ ४९ ॥

निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन् ॥
ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ॥ ५० ॥

निन्द्यासु षट्स्वन्यासु चानिन्द्यास्वप्यष्टासु रात्रिषु स्त्रियो वर्जयन्परिहरन्द्वे रात्री अवशिष्टे यदि गच्छति पर्ववर्जं तदा ब्रह्मचार्येव भवति ब्रह्मचर्यफलं प्राप्नोति । यत्र तत्राश्रमे वसन् । अर्थवादोऽयम् । न तु वानप्रस्थाद्याश्रमेषु रात्र्यभ्यनुज्ञाजितेन्द्रियत्वविधानात्सर्वाश्रमेषु गार्हस्थ्यादन्येषु वीप्सायाश्चार्थवादतयाऽप्युपपत्तेः । एताश्च रात्रयो वर्ज्या न क्रमेणैव किं तर्हि यथेच्छया पर्ववर्जं गमनं यथा न भवति तथा रात्रिद्वयम-

---

१ ड-विपर्ययं २ ड-अयुग्मास्वपगमनम् ३ ड-पुमान् ४ ड-परिपुष्टम् ५ ड-स समधातु मन्येत ६ ड-गच्छेत यदिष्टं भवति ७ फ-अल्पग्रहम्

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्मनुज्ञायते । किं पुनर्ब्रह्मचर्यस्य फलं विशेषाश्रवणात्स्वर्गः । क्वचित्तु श्रूयते । " न ब्रह्मचारी प्रत्यवैतीति " । स्वल्पैरतिक्रमैर्न दुष्यतीति ॥ ५० ॥

न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि ॥
गृह्णञ्छुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ॥ ५१ ॥

आसुरे शुल्कप्रतिषेधोऽयं उत्तरत्र च कन्यार्थसंग्रहोपादानात् । विद्वान्ग्रहदोषज्ञः । कन्यापिता स्वल्पमप्यर्थं धनं न गृह्णीयात् । गृह्णानोऽपत्यविक्रयदोषेण युज्यते । कः पुनरेषः शुल्को नाम आभाषणपूर्वं वराद्गृहीतम् । यत्र तूचनीचपणापणो भवति कन्यागुणापेक्षमूल्यव्यवस्था स क्रय एव । इह तु महागुणाया अपि कन्यायाः स्वल्पं धनमनाभाषणपूर्वं वा ग्रहणम् । न विक्रयस्यैष धर्मं इत्यतो विक्रयाध्यारोपेण निन्द्यते ॥ ५१ ॥

स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः ॥
नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ॥ ५२ ॥

स्त्रीनिमित्तानि धनानि कन्यादाने वराद्यानि गृह्यन्ते । पूर्वस्यैव शेषः । ये बान्धवाः पित्रादयः **मोहादुपजीवन्ति** यथोक्तं ज्ञातिभ्यो द्रविणं दत्वेति । सुवर्णरजतादि धनम् । **नारीयानानि** यानमश्वादि **वस्त्रं** वैतावन्मात्रमपि न जातूपजीवनीयं वासो यानादि किं पुनर्बहु । उपजीवतां फलमाचष्टे । **ते ते पापाः** शास्त्रप्रतिषिद्धसमाचरणा**दधोगतिं** नरकं यान्ति । अथवा स्त्रीधनानीति नवमे दर्शयिष्यति । तानि ये मोहादुपजीवन्ति बान्धवाः पिता तत्पक्षाश्च भर्ता भर्तृपक्षाश्च । एवं यानाद्येवं वस्त्रं स्त्रीणाम् बुद्धौ संनिधानाच्छब्दः संनिधिः कल्प्यते यथा "राजपुरुषः कस्य राज्ञः" इति ॥ ५२ ॥

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ॥
अल्पोऽप्येवं महान्वाऽपि तावानेव स विक्रयः ॥ ५३ ॥

स्त्रीगवी च पुंगवश्च **गोमिथुनम्** । **केचिदाहु**रेतद्देयमिति । **मनोस्तु** मतं **मृषैव तत्** मिथ्या नादेयमित्यर्थः । **अल्पोऽप्येवम्** । अल्पसाधनोऽल्पः एवं **महान्** भवति **तावानेव विक्रयः** ॥ ५३ ॥

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ॥
अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ॥ ५४ ॥

---

१ ख-उत्तरत्र च कन्याधेस्य गृह्यस्योपादानात् । २ ख-मातृभ्राश्वभाथ्यावरनिमित्तग्रहणम् ३ ख-कन्यादानेन ४ क-विक्रयस्तावदेव सः । ५ ख-एतद्देयमिति । ६ ख-अल्पमूल्यसाधनः । ७ ख-अर्हण

For Private And Personal Use Only

किं वरोद्धनाधिगमो विक्रयो भवति नेति ब्रूमः । ज्ञातयः कन्यायामधिकृताः स्वार्थमाददते गृह्णन्ति तदा स विक्रयः । अर्हणं कन्यार्थे धनग्रहणं कन्यानां तदर्हणं पूजनं भवति । बहुमानः कन्यानामात्मनि भवति । ईदृश्यो वयं यद्धनं दत्वा विवाह्यामहे । अन्यत्रापि पूज्या भवन्ति सुभगा एता इति । आभरणादि वा तेन धनेन कर्तव्यमतोऽभ्यर्हिताः शोभावत्यो भवन्ति । आनृशंस्यमपापत्वं केवलं न स्वल्पोऽप्यधर्मगन्धोऽस्ति । अतोऽनेनार्थवादेन कन्यार्थं धनग्रहणं विधीयते ॥ ५४ ॥

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ॥
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥ ५५ ॥

न केवलं वरादादातव्यं कन्याबन्धुभिरपि तु तैरपि दातव्यम् । पितृभिः साहचर्यात्पितृशब्दः पितामहपितृव्यादिषु वर्तते । ततो बहुवचनं व्यक्त्यपेक्षं वा बहुवचनम् । एवं पतिभिः श्वशुरादिभिर्व्यक्त्यपेक्षं वा । देवराः पत्युर्भ्रातरः । पूज्याः पुत्रजन्माद्युत्सवेषु निमन्त्रणपूर्वकमनाश्रयबहुमानमादरेण भोजनादिना पूज्याः । भूषयितव्या वस्त्राद्यलंकारेणाङ्गलेपनादिभिर्मण्डयितव्याः । अत्र फलं बहुकल्याणमीप्सुभिः कल्याणं कमनीयं पुत्रधनादिसंपदरोगताऽपरिभव इत्यादिबहुशब्दात्सर्वमीप्सुभिराप्तुमिच्छुभिः प्राप्तुकामैः । फलार्थो विधिरयम् ॥ ५५ ॥

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ॥
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥ ५६ ॥

देवता रमन्ते तुष्यन्ति प्रसीदन्ति । प्रसन्नाश्च स्वामिन एवाभिप्रेतेन फलेन योजयन्ति । यत्र तु न पूज्यन्ते तत्र सर्वाः क्रियाः यागहोमदानाद्या देवताराधनबुद्ध्या चोपहारादयो याः क्रियन्तेऽफलास्ता इत्यर्थवादः ॥ ५६ ॥

शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ॥
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥ ५७ ॥

जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ॥
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥ ५८ ॥

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ॥
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥ ५९ ॥

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ॥
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥ ६० ॥

---

१ अ–त्र–क–ड–क्ष किं वरात्मना गंधिनः विक्रयो भवति २ ड–अकन्यया आत्मनोऽधिकृताः
३ फ–वराय ४ ड–इव

यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् ॥
अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ॥ ६१ ॥
स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ॥
तस्यां त्वरोचमानायां सर्वमेव न रोचते ॥ ६२ ॥
कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च ॥
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ६३ ॥
शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ॥
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥ ६४ ॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम् ॥
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ॥ ६५ ॥
मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ॥
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः ॥ ६६ ॥
वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि ॥
पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही ॥ ६७ ॥

अतिक्रान्तं विवाहप्रकरणम् । कृतो विवाहो यस्मिन्नग्नौ तत्र कुर्वीत गृह्यं कर्म । अग्निसाध्यमष्टकापार्वणश्राद्धहोमादि गृह्यस्मृतिकारैरुक्तम् । पञ्चयज्ञा वक्ष्यमाणास्तेषां विधानमनुष्ठानम् । तस्मिन्नेवाग्नौ यद्यप्यविशेषेण पञ्चयज्ञविधानमित्युक्तं तथापि वैश्वदेवहोमोऽग्निसाध्यः । उदकतर्पणादौ तु न किंचिदग्निना कार्यम् । कथं तर्हि निर्देशोऽग्नौ पञ्चयज्ञविधानं कार्यमिति । केचिदाहुरेकाऽपि सप्तमी विषयभेदाद्भिद्यते । तस्मात्पञ्चयज्ञैकदेशे पञ्चयज्ञशब्दः प्रयुक्तः । अथवा पञ्चयज्ञविधानमित्यत्राग्नाविति न संबध्यते । वैश्वदेवहोमस्य पूर्वेणैवाग्न्यधिकरणस्य सिद्धत्वात् । एवं संबन्धः क्रियते । गृही तु पञ्चयज्ञविधानं कुर्यात् । अग्नौ तु वैवाहिके गृह्यधर्मपक्तिं चान्वाहिकीमग्नावित्यपेक्ष्यते । गृहशब्दो दारवचनः । गृही तु सत्कृतदारपरिग्रहो भार्याद्वितीय इदमिदं कुर्यादिति । विवाहे चाग्निः कैश्चिद्गृह्यकारैरराणिनिर्मन्थनादाधातव्य इत्युक्तम् अपरैर्यतःकुतश्चिद्दीप्यमानमानीय होतव्यमिति । अनेन तस्मिन्गृह्यमिति वचनेन धारणमग्नेरर्थादुक्तं भवति । अत्र केचिदाहुः शूद्रस्यापि वैवाहिकाग्निधारणमस्ति तस्यापि पाकयज्ञाधिकारात् । न चात्र जातिविशेष उपात्तः केवलं गृहीति श्रुतम् । शूद्रोऽपि गृही तस्यापि दारपरिग्रहस्योक्तत्वात् । एतदेवान्यत्र पठितं "कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही" इति । अत्रोच्यते । गृह्यं कर्म वैवाहिकेऽग्नाविति श्रुतम् ।

१ यदा भर्ता च भार्या च परस्परवशानुगौ । तदा धर्मार्थकामानां त्रयाणामपि संगतम् ॥
२ क-कृतविवाहस्य तस्मिन्नग्नौ ३ क-दर्शनमनम् । ४ याज्ञवल्कीये १९७

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न च गृह्यं नाम किंचित्कर्मास्ति । तत्र गृह्यस्मृतिकारोक्तं गृह्यमिति लक्षणया मन्तव्यम् । गृह्यकारैश्च त्रैवर्णिकानामेव कर्माम्नातं न शूद्रस्य "उक्तानि वैतानिकानि गृह्याणि वक्ष्याम" इति । उक्तानुकीर्तनस्य एतदेव प्रयोजनं येषामेव वैतानिकेष्वधिकारस्तेषामेव गृह्येष्विति न पुनर्यथाऽन्यैर्व्याख्यातं तद्धर्मप्राप्त्यर्थम् । तादर्थ्ये हि विवक्षिते तस्याग्निहोत्रेण प्रादुष्करण-होमकालौ व्याख्याताविति नावक्ष्यत् । न च गृहे भवं गृह्यमिति युक्तम् । शाला-वचनो गृहशब्दो दारवचनो वा । न तावत्कस्यचित्कर्मणः शालाऽधिकरणत्वेन विशेषतः समाम्नाता यद्गृह्यमित्यनूद्य गृहिणो विधीयते । यदपि गृहसंस्कारकं वास्तुपरीक्षादि तदपि त्रैवर्णिकानामेव न शूद्रस्य अथ दारवचनस्तत्रापि गृहीत्यनेनैव गतत्वान्न किंचित् । यद्यपि स्मृत्यन्तरं (या.आ.९७) "कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु" इति। अत्रापि किंचित्स्मार्तमिति विशेषानुपादानादन्यसापेक्षतैव। न हि सर्व-मग्नौ स्मार्तं कर्म संभवति। न च होमविषयत्वे प्रमाणमस्ति न ह्यवश्यमन्याधिकरण एव होमः। तस्माद्गृह्यकारोक्तं गृह्यमिति वक्तव्यम् । एते हि स्मृती गृह्यकारविहितं कर्मानुवदतः । तथा च कुतः शूद्रस्याग्निपरिग्रहः । किं च "श्रौतं वैतानिकाग्निषु" इति अपरं तत्राम्नायते तत्रे अवश्यमयं त्रैवर्णिकविषय एषितव्यः । स एव पूर्वत्र चातुर्वर्ण्यपर उत्तरत्र त्रैवर्णिक-पर इत्येकस्य शब्दस्य तात्पर्यभेदोऽभ्युपगतः स्यात् । न चाभेदे संभवति भेदो न्याय्यः । अन्वहं भवाऽऽन्वाह्निकी । प्रतिदिवसं यः पाको भुक्त्यर्थः स तस्मिन्नेवाग्नौ कर्तव्यः ॥६७॥

पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ॥
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥ ६८ ॥

पञ्चयज्ञविधेरधिकारनिर्देशोऽयम् । सूना इव सूनाः । मांसविक्रयार्थपशुवधस्थान-मापणादयो वा मांसस्योत्पादकतयाऽनुष्ठीयमानाः पापहेतव एवं चुल्यादयोऽपि पापहेतुत्वादध्यारोपेण सूनासमाः । न हि तेषां शास्त्रप्रतिषेधः साक्षात् नापि सामान्यः कश्चित्प्रतिषेधोऽस्ति । न हि तापघाताय कस्यचिन्न स्पृहां स्यात् न काचित्तत्साध्यक्रिया दृश्यते या वचनान्तरेण निषिद्धा । न चास्मादेव वचनात्प्रतिषेधा-नुमानं उत्तरेणैकवाक्यतावगमात् । प्रतिषेधपरत्वे वाक्यभेदः स्यात् । किं चैतत्पदार्थसाध्या-मर्थक्रियां पदार्थान्तरेण साधयेत्तस्याः प्राप्तिम् । पञ्चयज्ञानां न च लक्षणान्युक्तानि । येन तत्समानकार्यस्यान्यस्यापि प्रतिषेध उच्यते यो वा परकीयमन्नमद्यान्नद्यादावुदकार्थं कुर्यान्न तस्यैते यज्ञाः स्युः । यदि च चुल्ल्यादीना निषेधोऽभिप्रेतः स्यात्तदा प्रतिषेधार्थीयमेव

१ ङ–तत्र च न तद्विधानाभि ह्यस्य २ ङ–गृह्यम् ३ ङ–मन्तव्यम् ४ ङ–श्रूयते ५ ङ–तत्र तावत् ६ ङ–अवस्करः ७ फ–बध्यते ८ ङ–आभापणो वा ९ सूनात्वसमाः १० ङ–मास्पृश्या ११ ङ–शक्यं १२ ङ–तयोः माप्तिः १३ ङ–न च लक्षणयुक्ता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदमधीयीत किमनुमानेन । स्वशब्दाद्धि लघीयसी प्रतिपत्तिः । प्रायश्चित्तार्थत्वे त्वेका-
देशेऽभिधानं न युक्तं निषेधैरेवाननुष्ठानमेव स्यात् । अपरिहार्यत्वाच्च चुल्ल्यादी-
नामशक्यो निषेधः । असति च निषेधे कुतः प्रायश्चित्तम् । तस्मान्न दोषविघातार्थं
पञ्चमहायज्ञाः । किं तर्हि नित्यसंबन्धेषु चुल्ल्यादिधारणेऽपि तद्दोषः तन्निष्कृ- १
त्यर्थतया नित्यार्थतया नित्यत्वं यज्ञानामाह । वध्यते आदिवर्णे वेत्ये-
तद्दन्त्योष्ठ्यं पठ्यते । हन्यते दुष्कृतेन शरीरधनादिना नाश्यते । संबध्यते वा पापेन ।
परतन्त्रीकरणं वा बध्नातेरर्थः । वाहयन् स्वकार्ये व्यापरणं वाहनं यस्य चुल्ल्यादे-
र्यदौचित्यप्राप्तं स्वसाध्यं कार्यं तत्ताभिः कुर्वन्वाहयन्नित्युच्यते । चुल्ली पाकस्थानं
भ्राष्ट्रादि । पेषणी दृषदुपलो वा । उपस्करो गृहोपयोगि भाण्डं कुण्डकटाहादि । १०
कण्डनी यया व्रीह्यादि कण्ड्यते । कुम्भो जलाधारः ॥ ६८ ॥

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ॥
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥ ६९ ॥

तासां चुल्ल्यादीनां सूनानां निष्कृत्यर्थं तदुत्पन्नदोषनिर्घातनार्थं क्रमेणाधिश्रयणं
चुल्ल्यास्तक्षणं पेषण्या इत्येवमादिक्रमः । महर्षिभिः क्लृप्ताः कर्तव्यतया स्मृताः पञ्च १९
महायज्ञाः प्रत्यहं **गृहमेधिनां** गृहस्थानाम् । गृहमेधिशब्दो गृहस्थाश्रमे वर्तते ।
प्रत्यहमिति । अनुपादानात्कालविशेषस्य यावज्जीवमिति प्रतीयते । अतश्च
नित्यत्वसिद्धिः । महायज्ञा इति कर्मनामधेयमेतत् ॥ ६९ ॥

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ॥
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ ७० ॥ २०

एषामयं स्वरूपविधिः । अध्यापनशब्देनाध्ययनमपि गृह्यते येन जपो हुत इत्यत्र
वक्ष्यति (श्लो. ७४) । न च जपोऽपि शिष्यानपेक्षते सामान्येन श्रुतं स्वाध्यायेनर्षिभ्य
इत्यृणावेदनश्रुतौ । अत उभे अध्यापनाध्ययने यथासंभवं ब्रह्मयज्ञः । तर्पणमन्नाद्ये-
नोदकेन वेति वक्ष्यति (श्लो. ८२) । होमो वक्ष्यमाणाभ्यो देवताभ्योऽग्नौ । बलिः शिष्ट
उलूखलादौ च । स भौतः भूतादिदेवताऽस्येति भौतः नामधेयमेतत्कर्मविशेषस्य । दिवाचारिभ्यो २१
भूतेभ्य इति हि तत्र बलिहरणं भूतशब्देन विहितम् । साहचर्यात्सर्व एष कर्मगणो
भूतयज्ञशब्देनोच्यते[१०] । यथा चातुर्मास्येष्वेकं हविर्वैश्वदेवमामिक्षा कृत्स्नमेव च पर्व वैश्वदेवेन

---

१ ड–अवधीयीत २ ड–स्वशब्दाद्धि लघीयसी प्रतिपत्तिः ३ ड–निर्घातार्थं ४ ड–चुल्ल्या-
दिष्वारोपितासद्दोषनिष्कृत्यर्थं ५ ड–पच्यते ६ ड–व्यापारणम् ७ ड–अध्ययनं ८ ड–सूर्पणं
९ ड–भूतो १० इष्यत्वेन इति च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यजेतेति । बलिशब्दोऽनग्निहोमे वर्तते । देवेज्याबलिरिति स्मरन्ति । अतिथीनां पूजनमाराधनं नृयज्ञः

ननु च स्वाध्यायः कथं यज्ञो न हि तत्र देवता इज्यन्ते नापि श्रूयन्ते । केवलं वेदाक्षराण्यविवक्षितार्थान्युच्चार्यन्ते । उक्तं चाम्नायशब्दाभ्यासे केचिदाहुरनर्थकानीति । सत्यम् । स्तुत्यां यज्ञशब्दो भाक्तः महच्छब्दश्च । अतिथिपूजायामिति चोक्तो यज्ञशब्दः । यद्यप्यतिथेर्देवतात्वं संभवति तथाप्युत्पत्तौ भोजयेत्पूजयेदिति च श्रुतं नातिथिभ्यो यजेतेति । यथा पुरुषराजः* यत्कर्म वा इति ।

एते पञ्चयज्ञा न युगपत्प्रयोज्याः एकाधिकारासंबन्धात्पृथगधिकारश्रवणात् । एकाधिकारसंबन्धत्वे त्रिषु चतुर्षु वा कृतेषु न किंचित्कृतं स्याद्यावत्कृतं च न कृतम् । यथाऽऽग्नेयाग्नीषोमीयोपांशुयाजानां दर्शपूर्णमासयागानामेकस्याननुष्ठानेनाधिकारसिद्धिः यथाऽत्रैव वैश्वदेवहोमे स्विष्टकृदन्तानां देवतानां कस्याश्चिदन्तराये न होमाधिकारनिर्वृत्तिः। एकैकस्य चात्राधिकारः श्रुतः । स्वाध्याये नित्ययुक्तः स्यात् (श्लो. ७५) । दैवे च नित्ययुक्तः स्यादित्यधिकारपदानुषङ्गेण पृथक्प्रयोगः । आतिथ्ये चाधिकारान्तरं श्रुतं धन्यं यशस्यमिति । तत्र चत्वारः स्वाधीनाः । आतिथ्यं तु संनिहितेऽतिथौ । न चातिथिर्निमन्त्रयितव्यः आतिथ्याभावात् । स्वयमुपस्थितो ह्यतिथिर्भवतीति वक्ष्यामः । तस्मात्पञ्चानामन्यतमानुष्ठाने इतरेषामननुष्ठानाद्यदि नाम प्रत्यवेयान्न तु कृतमकृतं भवति । अतोऽनग्निकत्वाद्वैश्वदेवेऽनधिकृतस्य स्वाध्यायोदकतर्पणादौ भवत्येवाधिकारः । अग्निपरिग्रहस्य च स्मृत्यन्तरे कालान्तरस्यापि श्रुतत्वान्नावश्यं विवाह एव परिग्रहः । एवं हि स्मृतिः "भार्यादिरग्निर्दायादिर्वा" इति ।

ननु चाकृतविवाहस्य दायकालमाधानं भविष्यति । भवति ह्येतदेवम् । यथाऽऽधानविधिः स्वार्थः स्यात्, अग्न्यर्थं स्वाधानम्, अग्निश्च कर्मार्थः, कर्माणि च भार्याद्वितीयस्य न केवलस्य श्रुतानि । यद्यपि कैश्चिद्गृह्यकारैः परमेष्ठिप्राणाग्निमाधाय श्राद्धं कुर्यादित्युक्तं भवति तदपि सभार्यस्यैव स एवास्य दायकालः । न चानग्निकस्य श्राद्धं नास्ति अनुपनीतस्यापि ह्येतद्विहितमन्यत्र स्वधानिनयनादिति । न च तस्याधानमस्ति विदुषो ऽधिकारादिदानीं चाविद्यत्वात् । श्राद्धं तु वचनान्निषादस्थपतिवद्यथाशक्ति कार्यमिति । पितृव्याऽदिनाग्निपरिग्रहे तु विदुषां संभवान्नावैद्यस्याधिकारः । अथ श्राद्धप्रकरण एवास्याधानं विहितं तदा तदङ्गत्वेनाधाय निष्पन्ने श्राद्धे परित्यागो भविष्यति । केचित्तु स्मृत्यन्तरमुदाहरन्ति " लौकिकेऽप्यग्नौ वैश्वदेवहोमः कर्तव्यः " शुष्कान्नैरपरे ॥ ७० ॥

* जाता १फ–यावत्कृतम् नच यथाप्रेयम् २फ–स्वाध्यायो ३फ आतिथ्यभावात् ४ख–हेतुत्वात् ५ ख अवैद्यत्वात् ६ ख शुष्कधान्यैरपरे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः ॥
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते ॥ ७१ ॥

नित्यत्वमत्र विधीयते । अन्यदनूद्यते । विगुणा अप्येते यथाशक्ति कर्तव्याः । एतदपि नित्यत्वात्प्राप्तमेव तस्माद्यथासंभवं **शक्तित** इति । आद्यादित्वात्तसिः । **हापयतीति** प्रकृत्यर्थ एव णिजर्थस्याविवक्षितत्वात् । अथवा हननं हा संपदादित्वात्क्विप् तामापयतीति ण्यदाप्नोतेः कर्तरि क्विप् तदन्तात्प्रातिपदिकाद्धात्वर्थे णिच् । **न हापयति** न त्यजेदित्यर्थः ॥ स्वगृहे[3] **वसन्न**वश्यमाविनीषु सूनासु न तत्पापेन संबध्यत इति प्रशंसा ॥ ७१ ॥

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ॥
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ॥ ७२ ॥

अननुष्ठाननिन्दया प्रकृतविधिस्तुतिः । केचिच्चतुर्थ्या पठन्ति " देवतातिथिभृत्येभ्यः पितृभ्यश्चात्मने तथा । न निर्वपति पञ्चभ्यः " इति । निर्वापो ह्यत्र दानं न तादर्थ्योपकल्पनमात्रम् । तत्संबन्धेन प्रधानत्वाच्चतुर्थी युक्ता । एतेभ्यो यः प्रत्यहं न **ददात्युच्छ्वसन्नपि** प्राणन्नपि श्वासप्रश्वासवानपि न **जीवति** मृत एव जीवितफलाभावात् । भृत्याश्चात्र " वृद्धौ तु मातापितराविति " श्लोकनिर्दिष्टा वेदितव्याः । न दासाः कर्मनिमित्तत्वात्तेभ्यो दानस्य । अथवा गर्भदासादयो वार्द्धके कर्मस्वशक्ता अपि नियमतो लक्ष्यन्ते । भरणं जीर्णगवादीनामवश्यमिति विभागे वक्ष्यामः । उक्तं च **गौतमेन** "भर्तव्यस्तेन क्षीणवृत्तिः " । देवताभ्यश्च निर्वापोऽग्नौ होमः स्थण्डिले च बलिहरणं तु वैश्वदेवेभ्यो दर्शपूर्णमासदेवताभ्य इति च वा " अग्नये त्वा जुष्टं निर्वपामि " इति संबन्धादन्यः को वाऽस्ति निर्वापः । अतो देवताग्रहणेन गृहीतत्वाद्भृत्यानां पृथगुपादानम् । आत्मग्रहणं दृष्टान्तः । यथाऽऽत्मनो भोजनेन विना नास्ति जीवितं तदर्थमन्नोपयोगोऽवश्यंभावी जीवितस्येष्टविषयत्वात्सर्वत एवात्मानं गोपायेदिति विधेश्च । एवं देवतादिभ्योऽपीति ॥ ७२ ॥

अहुतं च हुतं चैव तथा प्रहुतमेव च ॥
ब्राह्म्यं हुतं प्राशितं च पञ्चयज्ञान्प्रचक्षते ॥ ७३ ॥

एतैः शब्दैः कस्यांचिद्वेदशाखायामेतेषां विधानम् । अतः श्रुतिमूलतां पञ्चयज्ञविधानस्य दर्शयितुं तत्प्रसिद्ध्या पुनर्निर्दिशति । यश्चाहुतादिशब्दैरुद्दिश्य तत्प्रकरणे

१ क–अत्राभिधीयते । २ ख–णिच्छान्दसत्वात् । ३ ख–स गृहे वसन् । ४ ख–जीवति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

या . कश्चिद्धर्मो विहित इति नोक्तः सोऽपि ग्रहीतव्य इति संज्ञान्तरनिर्देशे द्वितीयं प्रयोजनम् । यथा ब्रह्मयज्ञश्राद्धोद्वाहपरिक्रियेत्यादि ॥ ७३ ॥

जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ॥
ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम् ॥ ७४ ॥

योऽयमहुतो नाम यज्ञ उक्तः स जपो वेदितव्यः। "स्वाध्यायेनार्चयेदृषीन् इति" श्रवणाद्वेदाध्ययनं जपार्थः । यद्वा मानसे व्यापारे स्मरणम् । उभयत्रापि जपतिः पठ्यते व्यक्तायां वाचि मानसे चेति । अग्नौ होमो हुतम् । भूतबलिः प्रहुतम् । यद्ययं होमस्तथाप्यग्नौ बाहुल्येन होमानां प्रसिद्धेर्भूतयज्ञो न होम इत्याशङ्कायां प्रहुत इत्युक्तम् । प्रकर्षेणासौ होम इति स्तुत्या । द्विजाग्र्याणां ब्राह्मणानामर्चा ब्राह्मं हुतम् । आतिथ्यकर्म द्विजाग्र्यार्चा ॥ ७४ ॥

स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि ॥
दैवकर्मणि युक्तो हि बिभर्तीदं चराचरम् ॥ ७५ ॥

यदुक्तं पञ्चसु महायज्ञेष्वेकैकस्मिन्पृथगधिकारो न समुदाय एकोऽधिकार इति तदनेन प्रकटीकरोति । यदा दारिद्र्यादिदोषादन्यतो वा कारणात्कथंचिदसंपत्तौ नातिथ्यादिपूजा घटेत ततः स्वाध्याये नित्ययुक्तेन भवितव्यम् । दैवकर्मणि वैश्वदेवदेवताभ्योऽग्नौ होमो दैवं कर्म । भूतयज्ञपितृयज्ञयोः सत्यपि दैवत्वे प्रकरणादग्नावेव होमो दैवमुच्यते । अत्र अर्थवादमाह । दैवे कर्मणि युक्तः तत्परो बिभर्ति धारयति चराचरं स्थावरं जङ्गमं च सर्वस्य जगतः स्थितेर्हेतुर्भवतीत्यर्थः ॥ ७५ ॥

कथं पुनरग्न्याहुत्या सर्वस्य जगतः स्थितिर्भवतीत्यत आह

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ७६ ॥

अग्नौ यजमानेन प्रास्ता क्षिप्ताऽऽहुतिर्हूयमानं चरुपुरोडाशाद्युच्यते । आदित्यमदृश्येन रूपेण प्राप्नोति । सर्वरसानामाहर्ताऽऽदित्योऽत आहुतिरसस्यादित्यप्राप्तिरुच्यते । अतः स रस आदित्यरश्मिषु कालेन परिपक्वो वृष्टिरूपेण जायते । ततोऽन्नं व्रीह्यादि ततः प्रजाः सर्वप्राणिनः । एवमग्नौ जुह्वत्सर्वजगदनुग्रहे वर्तते यजमानः । पूर्वस्य विधेः शेषोऽयं न पुनर्यथाश्रुतार्थनिष्ठः । तत्त्वे हि वृष्टिकामस्याधिकारः स्यात् । न च तच्छ्रुतस्य प्रकृतशेषतयाऽन्वयसंभवेन कल्पनाया अवसरः ॥ ७६ ॥

यथा वायुं समाश्रित्य सर्वे जीवन्ति जन्तवः ॥
तथा गृहस्थमाश्रित्य वर्तन्ते इतराश्रमाः ॥ ७७ ॥

---

१ ङ–श्रातनिर्वृत्ते हि २ [यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम् । एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥] ३ फ–वर्तन्ते सर्वजन्तवः ४ ङ–सर्वे आश्रमाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपरेण प्रकारेण महायज्ञानामवश्यकर्तव्यतां दर्शयति । वायुः प्राणस्तमाश्रित्य सर्वे जीवन्ति । न ह्यप्राणस्य जीवितमस्ति, प्राणधारणमेव जीवनम्। जन्तुशब्दः प्राणिमात्रवचनः । सर्वग्रहणं देवर्षीणामप्यतिशययुक्तानां वाय्वायत्तमेव जीवनं एवं गृहस्थः प्राणतुल्यः सर्वाश्रमिणाम् । अतः सर्वोपजीवनीयेन भवितव्यमिति विद्धचर्थः । इतरग्रहणाद्यद्यपि गृहस्थादन्य आश्रमिणः प्रतीयन्ते तथापि न गृहस्थप्रतिषेधार्थमेतत् । स्नातकस्य हि विशेषेणातिथ्यादिदानं विहितम् । तस्मादितरग्रहणं गृहस्थाश्रमतुल्यतार्थम् । न च श्रूयते नात्मनात्मनि वर्तन्ते शरीरकुटुम्बस्थितिं प्राप्नुवन्ति । इतरे च त आश्रमा इतराश्रमा इति समासः ॥ ७७ ॥

यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् ॥
गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृहम्[1] ॥ ७८ ॥

यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेन वेदार्थव्याख्यानजन्येनान्नेन च **धार्यन्त** उपरि क्रियन्ते **गृहस्थेन तस्माज्ज्येष्ठः** श्रेष्ठ **आश्रमो गृहम्** । गृहीति पाठे बहुव्रीहिः । गृहमिति पाठे विशेषणसमासो ज्येष्ठाश्रम इति । अत्रापि गृहस्थैरेवेत्यौचित्यानुवादो न वानप्रस्थादीनामध्यापनादिप्रतिषेधः । वानप्रस्थस्य तावद्विहितमेतत् तानेव महायज्ञान्निर्वपेदिति । प्रव्रजितस्य यद्यपि हिंसानुग्रहयोनारम्भ इत्यनुग्रहः प्रतिषिद्धस्तथापि वेदार्थव्याख्यानं भिक्षुशास्त्रे विहितम् । ज्ञानवैराग्यभावताभ्यासातिशयविधानाच्च तयोर्नातिप्रयत्नो वेदार्थव्याख्याने । ब्रह्मचारिणस्त्वार्थलोपान्नाध्यापकत्वं भैक्षवृत्त्युपदेशाच्च कुतोऽन्नदानम् । अतो गृहस्थानामेव प्रायेण तत्संभवादेवमुक्तं गृहस्थैरेव ॥ ७८ ॥

स संधार्यः[2] प्रयत्नेन स्वर्गमक्षयमिच्छता ॥
सुखं चेहेच्छता नित्यं[3] योऽधार्यो[4] दुर्बलेन्द्रियैः ॥ ७९ ॥

स गृहाश्रमः । **प्रयत्नेन संधार्यो**ऽनुष्ठेयोऽक्षयस्वर्गकामेनेह **च सुखमिच्छता** । अत्यन्तशब्दो[5] नित्यतां गमयति । **य** आश्रमोऽ**धार्यो**ऽशक्यं धारयितुं **दुर्बलेन्द्रियैः** । एतदुक्तं भवति । यतः स्त्रीसंभोगसुसंस्कृतभोजनादि[6] गृहस्थस्यावश्यंभावि ततश्चेन्द्रियाणां विषयसक्तौ दोषेण किमुच्यते । प्रयत्नेन आश्रमान्तरेभ्यो धारयितव्यः । अत्रापि महानिन्द्रियसंयमः । अनृतौ न गन्तव्यं परदारा न गन्तव्याः शेषान्नं भोक्तव्यं विषयसंनिधाने यो नियमः स दुष्करः । स्वर्गमक्षयमिति नानेन सर्वेषां गृहस्थकर्मणां स्वर्गफल-

१ फ गृही । २ ब सुख । ३ ब अत्यन्तं । ४ फ सत्कार्यः । ५ ब अत्यन्तं यस्य सुखायन्तो नास्ति । ६ ब न स्त्रीसंभोगम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोच्यते केषांचिन्नित्यत्वात्केषांचित्फलान्तरश्रवणात् । येऽप्यश्रुतफलाः स्वर्गफलतया कल्प्यन्ते तेषामपि केवलानामनुवादे न कश्चिद्विशेषणे हेतुः । तस्माद्विहिताभिप्रेतफलानुवादोऽयम् । न चाधिकारान्तरमिदं तेषामेव यावज्जीविकं स्वर्गकामस्येति च शक्यं वक्तुं सुखं चेहेच्छतेत्यविधेयेन तुल्यत्वावगमात् । न हीह सुखकामेनेतरच्छक्यं कर्मफलतया ज्ञातुं विशेषस्यानिर्देशात् । सर्वा हि प्रीतिर्ग्रामपुत्रादिलाभैर्विशेषैरवच्छिन्ना प्रतीयते । अनवच्छेदेन प्रीतिमात्रं चेत्स्वर्ग एव । न च तस्यैहिकत्वम् । तस्माद्दृष्टसुखाप्तिकामानुवादोऽयम् । अनिकेता ह्यन्य आश्रमिणो वृक्षमूलनिकेतनाः परगृहवासिनो दुःखमासते । तस्मादयं तावदनुवादः ॥ ७९ ॥

ऋषयः पितरो देवा भूतान्यतिथयस्तथा ॥
आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता ॥ ८० ॥

तत्तुल्यतयाऽयमप्यनुवाद एव । एते कुटुम्बिभ्यो गृहिभ्यः सकाशादर्थयन्ते । आदित्सत आत्मोपकारलिप्साऽऽशासनमाकाङ्क्षा । अतस्तेभ्यो देवादिभ्यः कार्यं कर्तव्यं विहितहोमादि । विजानता शास्त्रस्थितिम् । कुटुम्बं दाराः । प्राकृतपुरुषेणापि या महायासोपनिबद्धा सा न युक्ता विफलीकर्तुं किं पुनर्देवतास्तुतिः ॥ ८० ॥

स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि ॥
पितृञ्छ्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्मणा ॥ ८१ ॥

"स्वाध्यायमधीयीत" इति य एवार्थः स एव स्वाध्यायेनार्चयेदृषीन् इति भवति श्राद्धादरेण पाद्यार्घमाल्यानुलेपनेन । अत्रोच्यते स्तुतिवचनं चेदम् । न चोभयोरपि स्वाध्यायऋषिपूजयोः करणम् । अग्न्यादिदेवतास्तावका मन्त्रा ऋषीनभिष्टुवन्ति । तस्मात्प्रशंसामात्रम् । ऋषीन्स्वाध्यायेनार्चयेदिति ।

अथवा नेह मरीच्यादय ऋषयोऽभिप्रेताः । किं तर्हि वेदा एव । स्वाध्यायशब्दश्च क्रियाशब्दो नात्र वेदवचनो यथा 'स्वाध्यायोऽध्येतव्य' इति । नैतदुक्तं भवति अध्ययनेन वेदान् पूजयेत् तथा विद्याभ्यासात् । अन्यथा पूजाया असंभवात् । अप्राण्यर्चाकारत एव न हि होमो देवता प्रधाना कारकं हि देवतेति । पितॄन् श्राद्धेन । अत्र यथाश्रुत एव नियोगः । स च श्राद्धविधौ निर्णेष्यते । नॄन् अतिथिभिक्षुप्रभृतीन् नार्चयेत् । अर्चापूर्वकमन्नं तेभ्यो दद्यादित्यर्थः ॥ ८१ ॥

---

१ ख विहिताविहितकालानुवादोऽयम् । २ ख—आदित्सन्ति ३ क—आकाङ्क्षा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ॥
पयोमूलफलैर्वाऽपि पितृभ्यः प्रीतिमावहन् ॥ ८२ ॥

दद्यात् कुर्यात् । **अहरहः** प्रतिदिवसम् । **श्राद्धं** नाम्ना धर्मातिदेशः । श्राद्धं नाम पित्र्यं कर्मामावास्यायां विहितम् । तदीयेतिकर्तव्यता श्राद्धमित्यनेन नाम्नाऽतिदिश्यते । **अन्नाद्येनेति** । तिलैर्व्रीहियवैरित्यादेरनुवादोऽयम् । उत्तरत्र विवक्षितार्थः । **उदकेनेति** ९
पयः क्षीरम् ॥ ८२ ॥

एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके ॥
न चैवात्राशयेत्कंचिद्वैश्वदेवं प्रति द्विजम् ॥ ८३ ॥

श्राद्धशब्देन विधानात्सर्वस्मिंस्तद्विधाने प्राप्ते कश्चिदितिकर्तव्यताभागो निवर्त्यते । **न चैवात्राशयेत्किंचित्** नात्रान्वाहिके श्राद्धे वैश्वदेवं प्रति विश्वान्देवानुद्दिश्य द्विजभोजनम् । १०
अत्र केचिदाहुः । प्राप्ते भोजन आशयेदिति पुनर्वचनमपूर्वत्वमस्य दर्शयति । तेनैतावदेवैतच्छ्राद्धं यत्पितॄनुद्दिश्य ब्राह्मण एको भोज्यते न त्वन्या काचिदर्घपात्रादिहोमाद्येतिकर्तव्यताऽस्ति । ब्रह्मचर्यं स्वाध्यायनिषेध इत्येवमादि न भवति । **एकमप्याशयेद्विप्रम्** । त्रयाणां नियमादेकैकमुभयत्रेत्यस्याविधित्वादप्राप्त एको विधीयते । एकमपि भोजयेत्सति संभवे बहूनपि । **पित्रर्थे** पितृतृप्त्यर्थम् । पाञ्चयज्ञिकं पञ्चयज्ञभवं पाञ्चयज्ञिकं तदन्तर्गतम् । ११
पाञ्चयज्ञिकशब्दः श्राद्धे प्रयुक्तः । न ह्येतत् पाञ्चयज्ञिकं तर्पणम् । तेन तर्पणभोजनयोः समुच्चयः । अस्य तु विकल्पो भविष्यति यदेव तर्पयत्यद्भिरिति ॥ ८३ ॥

वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् ॥
आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥ ८४ ॥

विश्वेदेवार्थो वैश्वदेवः पाक उच्यते। सर्वार्थः विश्वदेवशब्दोऽपि संप्रदानमात्रोपलक्षणार्थः। २०
तेनातिथ्याद्यर्थताऽयुक्ता भवति । सिद्धस्य होममाभ्यो वक्ष्यमाणाभ्यो **देवताभ्यः कुर्यात्** । सिद्धशब्देन देवतोद्देशेन देवस्य त्वेति मन्त्रवान्निर्वापो न कर्तव्य इति दर्शयति। केवलं सर्वार्थनिष्पन्नपाकेन होमादि कर्तव्यमिति विध्यर्थः । गृह्ये वा विधिहोमादिकरणनिर्देशाविधिपूर्वकं समाचारप्राप्तं परिसमूहनपर्युक्षणादिरूपामितिकर्तव्यतामाह । **ब्राह्मणशब्दस्त्रैवर्णिकाधिकारात्** प्रदर्शनार्थः । **अन्वहं** नित्यमित्यर्थः । देवताग्रहणं स्वाहाकार- २१
प्राप्त्यर्थम् । षष्ठीनिर्देशादग्नेरिदमिति प्रयोगः स्यात् । देवताशब्देन तु स्वाहाकारेण वा

१ फ कुर्यात् २ ड आहरन् क्ष फ–आदरन् ३ फ–पित्रर्थे ४ ड–नचैवान्वाशयेत् ५ ड–न तत्पाञ्चयज्ञिकं तर्पणम् फ–पाञ्चयज्ञिकतर्पणम् ६ ड–सर्वार्थे निष्पन्नपाके ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवेभ्यो हविः संप्रदीयत इति याज्यान्ते पुनर्वषट्कारस्य विधानात्। स्मार्तहोमे त्वभावः। स्वाहाकारस्तु सर्वत्र। तस्मिंश्च सत्यग्नये स्वाहेति प्रयोगः॥ ८४॥

अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः॥
विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च॥ ८५॥

आदावित्यनुवादः। पाठक्रमेणैवाग्नेरादौ सिद्धत्वात्ते पृथगाहुती। तयोश्च समस्तयोरग्नीषोमाभ्यामिति विश्वेभ्यो देवेभ्य इति प्रयोगः। एकैवाहुतिर्धन्वन्तरये स्वाहा॥ ८५॥

कुह्वै चैवानुमत्यै च प्रजापतय एव च॥
सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः॥ ८६॥

सह द्यावापृथिव्योः द्यावापृथिवीभ्यां स्वाहेति। **तथा स्विष्टकृतेऽन्ततः** स्विष्टकृदिति गुणपदम्। अग्निश्च गुणीभूतः स्वतः। स्मृत्यन्तरेऽग्नये स्विष्टकृत इति वचनात् श्रुतः सर्वहोमेष्वेव चाम्नानात्। अन्तत इति पाठात्सिद्धे वचनं स्मृत्यन्तरेऽधिकारमाहुतीनामाम्नानात्सति समुच्चये प्राक् स्विष्टकृत आवापः कर्तव्य इति दर्शयितुम्।

ननु चैकत्वाद्धोमस्य देवताविकल्पो युक्तः। कुतः पुनरेकत्वं होमस्य। इयमेव होमानामुत्पत्तिः "अग्नेः सोमस्य च" इत्यादि। तत्र चोत्पत्तावेव देवताविशेषेणावरुद्धत्वाद्भिन्ना एव होमाः प्रतीयन्ते॥ ८६॥

एवं सम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणम्॥
इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत्॥ ८७॥

सम्यगनन्यचित्ततया देवताध्यानपरः। एवमेताभ्यो देवताभ्योऽग्नौ हुत्वा ततः सर्वासु दिक्षु यथासंख्यं प्रदक्षिणं प्रथमं प्राच्यां ततो दक्षिणस्यां इत्येष प्रदक्षिणावर्तमिन्द्रः अन्तकः अप्पतिः इन्दुः प्रतिदिवसम्। अपरश्चाह अहविर्भागिन्दुरिति। यदि नैतेन शब्देन बलिहरणं स्यात्कथमिन्दोर्हविर्भाक्त्वम् बलिहरणं न होम एवेति व्याख्यातम्। वृत्तभङ्गभयाच्चात्र न शब्दस्य रूपविवक्षेति स्मृत्यन्तरोपात्तैरेव शब्दैरुद्देशः कर्तव्यः। **सानुगेभ्यः** अनुगा अनुचरास्तत्पुरुषाः। तथा चेन्द्रपुरुषेभ्य इत्यादि प्रयोगः॥ ८७॥

मरुद्भ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यपि॥
वनस्पतिभ्य इत्येवं मुसलोलूखले हरेत्॥ ८८॥

अन्नेतिकरणः रूपविवक्षार्थः। अप्स्वित्यधिकरणम्। **अद्भ्य** इति देवता

१ ङ–स्मार्ते होमे स्वाहाकारे स्वभावस्तु सर्वत्र। तस्मिंश्च सर्वमाश्रयेत्। स्वाहेति प्रयोगः।
२ ङ–हरेत् ३ फ–स्वरूपविवक्षार्थः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्देशः । **वनस्पतिभ्य इति** मुसलोलूखले । द्वन्द्वैकवद्भावेन विकल्पितमाधारद्वयम् । निर्देशगुणवृत्त्या प्रधानभूताया आहुतेरावृत्तिर्युक्ता । न च मुसलोलूखलस्यैकीकृतस्याहुतिसंबन्धः शक्यः कर्तुं पृथक्त्वस्य तत्राप्युपलम्भात्। न हि क्षीरोदकवत् अनयोर्व्यामिश्रणसंभवः । तत्र यद्युलूखले क्रियते नेतरत्र होमः कृतः । अथोलूखलेन मुसलेन च भागश आहुतिः संभवति नियतपरिमाणत्वात् । द्वन्द्वनिर्देशोऽत्र संयुक्तयोरन्यतरत्र होमो युक्तः ॥ ८८ ॥

उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै च पादतः ॥
ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत् ॥ ८९ ॥

उच्छीर्षकं प्रसिद्धदेवताशरणं शीर्षस्थानं तत्र **श्रियै** बलिं **कुर्यात्** । **पादतः** अधोभागे गृहस्य **भद्रकाल्यै** । तस्या अपि स्थानं द्वारस्य पूर्वभागे । अन्ये उच्छीर्षकं गृहशयनस्य शिरोभागमाहुः, पादौ चास्याधोभागम् । तेन खट्वादावयं होमो भूप्रदेशे वा । गृहस्यशयनस्थाने **ब्रह्मवास्तोष्पतिभ्यां** सत्यपि द्वन्द्वनिर्देशे पृथगेते आहुती ब्रह्मणे वास्तोष्पतय इति च । यत्र तूभयदेवतात्वमग्नीषोमवत्तत्र सहग्रहणं समस्तग्रहणं वा करोति । तयोश्चैव समस्तयोः सह द्यावापृथिव्योश्चेति अप्रसिद्धसहचर्यात्। वास्तुगृहं तन्मध्ये ॥८९॥

विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत् ॥
दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ॥ ९० ॥

च शब्दादेकैवेयमाहुतिः । **विश्वेभ्यो देवेभ्य** इति गृहाकाशे गृहान्निष्क्रम्य वा । दिवा दिवाचारिभ्यो नक्तं नक्तंचारिभ्यः । भूतेभ्य इत्यनुषज्यते । केचिदेते आहुती सायंप्रातर्विभागेनाहुर्दिवाचारिभ्य इति तदयुक्तम् । सायममन्त्रहोमं वक्ष्यति । एतेन मन्त्रप्रतिषेधेन शब्दोद्देश्यता मा भून्मानसस्तूद्देशः केन निवार्येते । न च तेन विना होमसिद्धिः । एतदेव तु वक्तव्यं कुतोऽयं विभागावगमो गृह्यकारैरेवेति चेदस्तु ॥ ९० ॥

पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये ॥
पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् ॥ ९१ ॥

पूर्वयोराहुत्योः शेषोऽयम् । आधारविधानार्थमाद्योऽर्धश्लोकः आवासकस्योपरि य आवासस्तत्पृष्ठवास्तु । एकशालाया अप्युपरिभागः । तत्र बलिं कुर्वीत दिवाचारिभ्यो नक्तंचारिभ्यश्च । सर्वान्नभूतये तादर्थ्ये चतुर्थी न संप्रदाने होमाद्यश्रुतत्वाद्बलिशब्दस्य पूर्वशेषत्वादाधारापेक्षत्वाच्च पूर्वयोराहुत्योः । न क्वचिदपि वैश्वदेवे सर्वान्नभूतिर्देवतात्वेन स्मृत्यन्तरे श्रुता । तस्मादयमस्यार्थः । सर्वेषामन्नानां क्लृप्त्यर्थमेतच्च कर्तव्यमेतस्मिन्बलिहरणे कृते सर्वाण्यन्नानि भवन्ति । अवयवप्रसिद्ध्या त्वर्थावगम उपपद्यमाने समुदायार्थकल्पन-

१ फ —न तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयुक्तम् । देवतापेक्षया वा दृष्टः कश्चिदर्थः कल्पयितव्यः । **बलिशेषं** शेषग्रहणात्पात्रे समुद्धृत्य ततो होमः कर्तव्यः । न तु स्थालीस्थादेव बलिदानानि ग्रहीतव्यानि । **दक्षिणतः** दक्षिणस्यां दिशि तदभिमुख इति यावत् । **सर्वं** यावन्मन्त्रगृहीतम् ॥ ९१ ॥

शुनां च पतितानां च श्वपचां पापरोगिणाम् ॥
वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि ॥ ९२ ॥

अन्नं पात्रे समुद्धृत्य श्वादीनामुपकाराय भुवि निःक्षिपेत् । पापरोगिणः कुष्ठिक्षय्यामयाव्यादयः । वयांसि पक्षिणः । शनकैर्भूम्युत्थितरजसा यथा न संसृज्येत । भूग्रहणं न पात्रप्रतिषेधाय किं तर्हि श्वपचपतितकुष्ठिभ्यो न हस्ते दातव्यम् । उपकारविधानं चेदम् । अत एव षष्ठ्याऽयं श्लोकः पठ्यते । न चतुर्थ्यन्तेन । पक्षिणां तादृग्देशे विधातव्यं यत्राबिभ्यतः श्वादयः खादन्ति । कृमीणामिति तादृशे देशे यत्र तेषां संभवः ॥ ९२ ॥

एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति ॥
स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना ॥ ९३ ॥

पूर्वस्योपसंहारः । सर्वग्रहणादन्येषामपि मृगकुक्कुटमार्जारादीनां ग्रामे संभवतामन्नेनोपकर्तव्यम् । अर्चतिरनुग्रहं न पूजायां, श्वादीनां तदसंभवात् । अवज्ञानप्रतिषेधार्थं चैवमुपात्तं नानुगृह्णातीति पठितम् । **परं स्थानं** धाम ब्रह्मप्राप्तिः । पथर्जुना न संसारयोनीर्बह्वीर्भ्राम्यति ।

किंपुनरेतत्फलविधानं नेति ब्रूमः। नित्योऽयं विधिरित्युक्तम् ॥ नित्ये च फलश्रवणमर्थवादः । न ह्यत्र विधिः श्रूयते । गच्छतीतिवर्तमानापदेशोऽयम् । **तेजोमूर्तिः** केवलतेजःशरीरः न पाञ्चभौतिकं शरीरमभिसंबध्यते बोधस्वभाव एव भवति । निष्कल्मषता वाऽनेन लक्ष्यते । शुद्धप्रकृतिर्भवतीत्यर्थः । भूतानुकम्पनं चेदम् । असति शास्त्रातिक्रमे पापसंबन्धस्याभावाच्छुद्धता युक्ता । इतरथा पापस्य मलरूपत्वान्न तेजोमूर्तिः । असति च पापे परं धाम श्रेष्ठमदुःखरूपं प्राप्नोतीत्येवं[1] युक्तमेव ॥ ९३ ॥

कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत् ॥
भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ॥ ९४ ॥

अतिथिलक्षणं वक्ष्यति । तमभ्यागतं सन्तं **पूर्वमाशयेद्**भोजयेत् । सर्वभोक्तृभ्यो गृहसंनिहितेभ्यः **भिक्षां भिक्षवे** च याचमानाय दद्यात् । भिक्षाशब्देन स्वल्पपरिमाणमन्नदानमुच्यते । उक्तं हि "प्रसृतिर्भिक्षा" । अन्तःपुरप्रसिद्धं चैतत् । ब्रह्मचारिणे विधिवत् अन्यस्मा अपि पाखण्डादिरूपाय भिक्षवे न विधिवद्दातव्या । ब्रह्मचारिणे तु विधिवत्स्वस्तिवाचनपूर्वं भिक्षादानमित्येष विधिः ।

---

१ ह—एतदपियुक्तमेव.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा भिक्षुः परिव्राड् ब्रह्मचारी प्रथमाश्रमी चशब्दश्चास्थाने वृत्तानुरोधात् ब्रह्मचारिणे चेति पठितव्यम् । एवं तु वानप्रस्थाय न दानं स्यात् । तस्माद्भिक्ष इति भिक्षुस्तस्यैव विशेषणं ब्रह्मचारिग्रहणम् । तेन त्रिभ्योऽप्याश्रमिभ्यो भिक्षादानं नियमतो ऽनुज्ञातं भवति । पाखण्डादीनां तु पतितादिवत् । सर्वग्रहणेन भिक्षोपकारो यथाशक्ति विहित एव ॥ ९४ ॥

यत्पुण्यफलमाप्नोति गां दत्त्वा विधिवद्गुरोः ॥
तत्पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही ॥ ९५ ॥

नित्यं भक्तदानमर्थिने शक्तितो दातव्यम् । इदं त्वधिकारान्तरम् । यद्गुरवे गा दत्त्वा फलमाप्नोति तद्भिक्षां दत्त्वा गोव्रतस्याविशिष्टमिति । स्मृत्यन्तरे सर्वफलता पापप्रमोचनार्थताऽपि गोदानस्य श्रुता यावतामल्पोपकाराणां महोपकारैः फलसाम्यमुच्यते तेषां लोकवत्परिमाणतः फलविशेषोऽवगन्तव्यः । प्राप्यते तदेव फलम् । न तु चिरकालमावर्च्यो ह्ययं न्यायः । "पणलभ्यं हि तत्प्राज्ञः क्रीणाति दशभिः पणैः" इति समानफलत्वे महाप्रयासानर्थक्यं प्राप्नोति । "अगुर्यथाविधीति" केचित्पठन्ति । तत्र नञल्पवचनो द्रष्टव्योऽल्पगुरिति । पुण्यं धर्मस्तस्य फलम् ॥ ९५ ॥

भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम् ॥
वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥ ९६ ॥

अथ विधिवदित्युक्तं सोऽयं विधिरुच्यते । अप्रकृतस्योदपात्रस्य श्रवणं सर्वदा नृणां न भिक्षादानस्यैवेति दर्शयितुम् । **सत्कृत्य** पूजयित्वा । विधिः पूर्वो यस्य दानस्य **तद्विधिपूर्वकम्** । पूर्वशब्दः कारणवचनः । शास्त्रनिमित्तकमेतदित्यर्थः । इतिकर्तव्यता वा विधिः सा पूर्वं कर्तव्या । उक्तं च पूर्वं भिक्षादानं ददाति वेदस्य तत्त्वार्थः पारमार्थिको निःसंशयोऽर्थस्तं वेत्ति तस्मै ब्राह्मणायोपपादयेद्दद्यात् । ब्राह्मणायेति जातिनियमः । विदुष इति गुणनियमः । तेन यत्किंचिद्दातव्यं तद्ब्राह्मणाय तस्मै च वेदार्थविदे पूजापूर्वकमित्यर्थः । त्रयविधानं सर्वं ददात्यर्थोद्देशेन पौरुषेयत्वान्नानाकारार्थविधानं प्राप्ते दाने दोषः ॥ ९६ ॥

नश्यन्ति हव्यकव्यानि नराणामविजानताम् ॥
भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ॥ ९७ ॥

पूर्वेण यादृशे देयं तत्पात्रमुक्तम् । अनेनापात्रे ददतः प्रतिषेधः । **नश्यन्ति** निष्फलानि भवन्ति हव्यानि देवतोद्देशेन यानि ब्राह्मणभोजनादीनि क्रियन्ते । पित्र्यकर्माङ्ग-

---

१ गां दत्वाऽगुर्यथाविधि । २ फ आवाच्यो

For Private And Personal Use Only

भूतान्यन्यानि कव्यानि श्राद्धानि भस्मभूतेषु भस्मतां प्राप्ता भस्मभूता । उपमाने वा भूतशब्दः । भस्मानीव यथा काष्ठभूत इति । किं पुनर्भस्मना साम्यं यथा तन्न क्वचिदुपयुज्यतेऽवकररूपमपोह्यमेवमीदृशो ब्राह्मणः क्रियाभ्योऽपोहितव्य इति तात्पर्यार्थः । **नराणामविजानतां** नश्यन्तीति संबन्धः । **मोहाद्दत्तानि दातृभिः** । अविजानतां मोहादिति चानुवादः । यच्छास्त्रेणापोहितं तन्मोहादेव क्रियते ॥ ९७ ॥

कीदृशाः पुनरभस्मभूतास्तानाहः ।

विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु ॥
निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ॥ ९८ ॥

विद्यातपोभ्यां समृद्धास्तव्द्यतिरिक्ता भस्मभूताः । समृद्धिरतिशयिनी संपत्तिः । बहुविद्यय महता च तपसा युक्ता एवमुच्यन्ते । समुदायसंबन्धिनी अपि विद्यातपसी संबन्धिसंबन्धाद्वयवभूतमुखैः सामानाधिकरण्यं प्रतिपद्येते । विप्राणां मुखान्यग्नय इत्यत्र व्याघ्रादेराकृतिगणत्वात्समासः । यथाऽग्नौ हुतं फलवद्भस्मनि हुतं निष्फलमेवमीदृशं भोजनंब्राह्मणमुखनिक्षिप्तं हुतमिति भोजनमेव स्तुत्योच्यते । यागहोमादिमहाफलतया प्रसिद्धम् अतः प्रख्याततमगुणेनाप्रख्यातमुपमीयते । **निस्तारयति दुर्गात्** दुर्गं व्याधिशत्रुराजपीडादि । जीवितमुपस्थितम् । ततो निस्तारयति रक्षति न तेन संमृश्यते । महतश्च पापात्परलोकेऽपि नरकादिगतेस्त्रायते । न केवलमाभ्युदयिककर्मेहक्यात्रविषयम् । प्रायश्चित्तार्थमपि तद्गुणायैव दातव्यम् ॥ ९८ ॥

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके ॥
अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम् ॥ ९९ ॥

संप्राप्ताय स्वयमुपस्थिताय न तु निमन्त्रिताय । न हि निमन्त्रितोऽतिथिर्भवति प्राप्तिदेशं च वक्ष्यति (अग्रे १०२ श्लो.) "भार्या यत्राग्नयोऽपि वा" इति । **आसनोदके** दद्यात् पादधावनोपयोगि प्रथममुदकं तत आसनं भोजनं च । **यथाशक्ति** संस्कृत्येत्यन्न विशेषणम् । सविशेषमन्नं संस्कृत्य दद्याद्भोजयेत् । विधिपूर्वकं विधिः पूर्वो यास्मिन्दाने तदेवमुच्यते । विधिः शास्त्रं तत्पूर्वं निमित्तं प्रमाणमित्यर्थः ॥ ९९ ॥

शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः ॥
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् ॥ १०० ॥

---

१ अनर्हते यद्दाति न ददाति यदर्हते ॥ अर्हानर्हापरिज्ञानाद्दानी धर्मान्न हीयते ॥ १ ॥
काले न्यायागतं पात्रे विधिवत्प्रतिपादितम् ॥ ददाति परमं सौख्यमिहलोके परत्र च ॥ २ ॥
प्रतिग्रहेण शुद्धेन शस्त्रेण क्रयविक्रयात् ॥ यथाक्रमं द्विजातीनां धनं न्यायादुपागतम् ॥ ३ ॥]

* २ ड–अतिशयवती ३ ड–भूतेः ४ ड–क्ष–कर्मणाम् ५ अ–क–ड–व–क्ष–फ–प्रायश्चित्तार्द्धमपि ६ ड–प्रदेशं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्यन्तदरिद्रस्याप्यतिथिपूजाव्यतिक्रमो न युक्तः । **शिलान्** केदारलवनशेषान् । **उञ्छत** उच्चिन्वतः । एतच्च वृत्तिसंकोचोपलक्षणार्थम् । **पञ्चाग्नीनपि जुह्वतः** अनेन शास्त्रानुष्ठानसंपन्नोऽत्यन्तदरिद्रश्च यद्यतिथिमागतं न पूजयत्यन्नदानादिना तदा तदनुष्ठानं स वृत्तिसंयमो निष्फलतामेति । ततश्च **सर्वं सुकृतं** पुण्य**मादत्ते** अतिथिर्गृह्णाति निष्फलीकुरुते । **अनर्चितो वसन्** तस्मादर्चयेदिति विध्यर्थः ।

वसन्निति लिङ्गात्सायमागते विधिरयम् । पञ्चाग्नयस्त्रेता गृह्यः सभ्यश्च । अथ कोऽयं सभ्यो नामाग्निः । एवं ह स्माहुः ग्रामान्तरे प्रोषितस्य यत्र लौकिकपाकः क्रियते महासाधनस्य बहुवेश्मसु यो गृहागारादेव शीतापनोदार्थं विह्रियते स सभ्यः । होमस्तर्हि तत्र कः ? यावता "तस्मिन्गृह्याणि" इति नियमः । अस्मादेव वचनात् वैश्वदेवहोमः प्रोषितस्य लौकिकेऽप्यस्तीति मन्यन्ते । व्रीहियवैः शुष्कधान्यैर्यत्र लेलिहानं सुसमिद्धं पश्येत्तत्राभिजुहुयादिति स्मृतिवचनमुदाहरन्ति । इह भवन्तस्त्वाहुः उपनिषत्सु पञ्चाग्निविद्योक्ता । तत्र तेषां कल्पिताग्निरूपाणि तद्रूपेण यदुपासनं यच्च वेदनं स होम इति कल्प्यते । सा हि सर्वश्रौतेभ्यः कर्मभ्योऽतिशयफलेष्यते । एवं हि तत्राम्नायते " स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन् ब्रह्महा च ते पतन्ति चत्वारः संसर्गी च " । पञ्चानामपि यत्फलं तदतिथावाराधितेऽविमुखीकृते नश्यतीति प्रशंसातिशयेनावश्यकर्तव्यतां दर्शयति । यद्यपि प्रातराशेऽप्यतिथिभोजननियमः सायं तु तद्व्यतिक्रमे प्रायश्चित्ताधिक्यम् । यथाशक्तीति पूर्वश्लोकेऽन्नविषयं ये मन्यन्ते त एवमाहुर्यथाशक्त्यतिथयः पूजयितव्या एको द्वौ बहव इति ॥ १०० ॥

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ॥
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ १०१ ॥

यदि दारिद्र्यात्सायमन्नदानं न घटते तदा नैवं मन्तव्यं प्रधानमतिथेर्भोजनं तच्च मे नास्तीति किमनेन मद्गृहे प्रविष्टेनेति । यतोऽशक्तस्य तृणादिदानेनाप्यातिथिपूजाविधिः स्यात् । अथवा नायं विधिर्भोजन एव पर्यवस्यति । किं तर्हि निवत्स्यतः शयनादि दातव्यम् । तृणग्रहणं स्रस्तरोपलक्षणार्थम् । भूमिरासनशयनविहारस्थानम् । **सूनृता वाक्** प्रियहितवचनं कथाप्रस्तावादि वा । एतान्यप्यन्नाभावे सतामागतस्यातिथे**र्नोच्छिद्यन्ते** किंतु दीयन्ते सर्वकालम् ॥ १०१ ॥

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः ॥
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ १०२ ॥

१–गृहागारादेव । २ ब–दारिद्र्यदोषात् । ३ अ क च क्ष फ–समुच्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नातिप्रसिद्धो लोकेऽतिथिशब्दार्थ इति तदर्थलक्षणमाह । **एकरात्रं वसतः परगृहेऽतिथित्वम्** । तच्च ब्राह्मणस्य न जात्यन्तरे । द्वितीयेऽह्नि पूजाविधौ कामचारोऽभ्युदयविशेषार्थिनस्तदधिकारो न नैयामिकः । तथा **चापस्तम्बः** (२।७।१६) "एकरात्रिं वासयेत् पार्थिवाँल्लोकानभिजयति । द्वितीयामान्तरिक्षांस्तृतीयां दिव्यान्" इति फलकामस्य द्वितीयादिरात्रिष्वधिकारं दर्शयति । अत्रैव निर्वचनं दाढर्यार्थमाह । **अनित्यं हि स्थितिः** । ~~[illegible]~~पूर्वस्यायं शब्दः । औणादिकैः कथंचिद्व्युत्पत्तिः ॥ १०२ ॥

नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा ॥
उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा ॥ १०३ ॥

एकस्मिन्ग्रामे यो वसति वैश्वदेवकालेपस्थितोऽपि नातिथिः । **सांगतिकः** सहाध्यायी संश्लिष्टः । सख्युरन्यः तस्य ह्युत्तरत्र विधिर्भविष्यति (अग्रे११० श्लोके) "वैश्यशूद्रौ सखा चेति" । योऽपि सर्वेण संगच्छते विचित्रपरिहासकथादिभिः सांगतिकशब्देन युक्तः प्रतिषेद्धुं प्रागदृष्टपूर्वोऽपि ।

न च गृहस्थस्य प्रोषितस्यास्य सर्वलक्षणलक्षितोऽप्यतिथिः । किं तर्हि **उपस्थितं गृहे विद्यात्** यत्रास्य नित्यं स्थानम् वसतिस्थानम् यदुच्यते प्रोषितस्यापि भार्या यत्राग्नयश्च तत्रासंनिहितस्यापि गृहस्थस्य भवत्येवातिथिः । अतो यथा संविधायाग्निहोत्रदर्शपूर्णमासादिषु प्रवसति तद्वदतिथयेऽपि संविधातव्यम् । वाशब्दात्त्वेवं प्रतीयते । भार्याग्निभिः सह यदा प्रवासस्तदा भवत्येव ग्रामान्तरस्थस्याप्यतिथिः । असंनिहितस्यापि गृहे भार्याग्निषु सत्सु ततश्च यदि भार्यया सह प्रवसेदग्नयश्च गृह एव भवेयुस्तदा नातिथिपूजानियम इति । वाशब्द उपस्थितं गृहे विद्यादित्येतदपेक्षया न परस्परापेक्षया भार्याग्नीनाम् ॥ १०३ ॥

उपासते ये गृहस्थाः परपाकमबुद्धयः ॥
तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनाम् ॥ १०४ ॥

उपासनं तदभ्यासः । यो ब्राह्मणोऽनयैव बुद्ध्या तत्र तत्रोपतिष्ठेत यथाऽतिथिरवश्य भोजनं लभेत तस्येयं निन्दा । यस्तच्छीलः परस्य संबन्धिनं पाकमन्नमुपास्ते न तु कदाचित् । **तेन** कर्मणा **प्रेत्य पशुतां** बलीवर्दादिजातिं **व्रजति** प्राप्नोति । अन्नादिदायिनस्तद्गृहे दन्तितां गर्दभतामश्वतां वा प्राप्नोति । गृहस्थस्यैष दोषः । उत्पन्नस्थालीपाकस्य ॥ १०४ ॥

१ निर्वचनेन २ फ—यत्तस्यानित्यं स्थानम् । ३ परपाकान्नपुष्टस्य सततं गृहमेधिनः ॥ दत्तमिष्टं तपोऽधीतं यस्यान्नं तस्य तद्भवेत् ॥ ४ अ क क्ष—नो स्थालपाकस्य फ—दोषोत्पन्न स्थालीपाकस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना ॥
काले प्राप्तस्त्वकाले वा नास्यानश्नन्गृहे वसेत् ॥ १०५ ॥

सायंकालोऽस्तमयादिः प्रदोषांतः । तस्यां वेलायामतिथिरागतोऽ**प्रणोद्यः** अप्रत्याख्येयो भोजनशयनासनादिभिः प्रतिपूज्यः । केन **गृहमेधिना** मेधो । यज्ञः । गृहमेधो महायज्ञानामियमाख्या । तत्राधिकारी गृहमेधी । गृहस्थ इति यावत् । **सूर्योढ** इत्यर्थवादः, सूर्येणोढः प्रापितः । दैवोपनीतत्वादवश्यं पूजार्हः । **काले** द्वितीये वैश्वदेवकाले **प्राप्तः अकाले** वा सायं भोजने निवृत्तेऽपि **नास्य** गृहस्थस्या**नश्नन्गृहे वसेत्** । यदि शेषमस्ति तन्निवेदनीयम् । न चेद्धि पाकः कर्तव्यः ॥ १०५ ॥

न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ॥
धन्यं यशस्यमायुष्यं स्वर्ग्यं वाऽतिथिपूजनम् ॥ १०६ ॥

सूपघृतदधिशर्करादि यदुत्कृष्टमन्नं तत्स्वयं नाश्नीयादतिथौ संनिहिते यावत्तस्मै न दत्तम् । यत्तु आतुरस्य यवागूरसकटुकादि तदनिच्छते न देयम् । तादृशमदत्तमश्नतो न दोषः । सर्वथा न संस्कृतमन्नं स्वयं भोक्तव्यं कदन्नमतिथिर्न भोजनीय इत्येवंपरमेतत् । धनाय हितं धनस्य निमित्तं वेति[3] **धन्यम्** । एवं यशस्यादयः शब्दाः । अर्थवादोऽयं नित्यत्वादतिथिभोजनस्य सति संनिधानेऽतिथेः पूर्वशेषत्वाच्च । स्तुतित्वेनान्वये संभवति नाधिकरणान्तरकल्पना युक्ता ॥ १०६ ॥

आसनावसथौ शय्यामनुव्रज्यामुपासनम् ॥
उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् ॥ १०७ ॥

बहुष्वतिथिषु युगपदुपस्थितेष्वितरेतरं समहीनज्यायस्त्वासनादिप्रकल्पनं गुणापेक्षं नाविशेषेण । **आसनं** वृस्यादि । **आवसथं** विश्राममभूमिः । **शय्या** खट्वादि । **अनुव्रज्या** गच्छतोऽनुगमनम् । **उपासनं** तत्समीपे कथाप्रस्तावेन संनिधानम् । **एतदुत्तमेषूत्तमम्** । दूरमनुव्रज्यत उत्तमः नातिदूरं मध्यमः कतिचिदित्पदानि हीनः ॥ १०७ ॥

वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् ॥
तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ॥ १०८ ॥

सर्वार्थमन्नं वैश्वदेवशब्देनोच्यते । तस्मिन्निर्वृत्ते निष्पन्ने भुक्तवत्सु सर्वेषु निःशेषितेऽन्ने यद्यन्योऽतिथिरागच्छेत्तस्मै दद्यात्पुनः पक्वान्नम् । न तु तस्मात्पाकबलिं **हरेत्** ।

---

१ ड-क्ष गृहमेधिनाम् २ ड पटुकादि ३ अ क क्ष फ चेति ४ ड यशस्यादयोऽपि ५ ढ अधिकारान्तर कल्पना ६ अ क क्ष ब न विशेषेण ८ ड तस्मै पात्रं क द क्ष तथाऽप्यन्नं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्नावपि होमो नेष्यते । न केवलं बलिहरणम् । यतः सायंप्रातः पाके होमो बलिहरणम् । न चान्तरालिके । तथा च वक्ष्यति (१२१ श्लोके) "सायं त्वन्नस्य" इति । एवं च यद्यप्यसकृदह्नः पचेत्तथापि न प्रतिपाकं वैश्वदेवमावर्तेत । यथाशक्ति संस्कारविशेषेणेतरथा वा ॥ १०८ ॥

न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् ॥
भोजनार्थं हि ते शंसन्वान्ताशीत्युच्यते बुधैः ॥ १०९ ॥

प्रासङ्गिकोऽतिथेरयमुपदेशः । भोजनार्थ्येतत्कुलीनोऽमुष्य पुत्रोऽस्मीति न निवेदयेन्न कथयेत् । स्वे कुलगोत्रे आत्मीयं कुलं पितृपितामहाद्यभिजनो गोत्रं गर्गभार्गवादि नामधेयं वा । गोत्रस्खलितं नामान्तरविवक्षायां यन्नामान्तरमुदाह्रियते तदुच्यते । अध्ययनमपि स्मृत्यन्तरप्रतिषिद्धं तदपि न निवेद्यम् । अस्यार्थवादः भोजनार्थं भोजनं लिप्से प्रख्यातकुलजातित्वादित्यनेनार्थेन हेतुना कुलगोत्रे शंसन्कथयन्वान्ताशी वान्तमुद्गीर्णमश्नाति निगिरतीत्येवमुच्यते बुधैः ॥ १०९ ॥

न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते ॥
वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च ॥ ११० ॥

क्षत्रियो ब्राह्मणस्याध्वनीनोऽपि प्रथमभोजनकाल उपस्थितोऽपि नातिथिः । अतो न तस्मै नियमतो देयम् । एवं वैश्यशूद्राभ्यामपि । सखिज्ञाती आत्मसमे नातिथी गुरुः प्रभुवदुपचर्यः " निवेद्य वचनक्रिया " इत्युक्तम् ॥ ११० ॥

यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् ॥
भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ॥ १११ ॥

तत्रातिथेर्धर्मः क्षीणपथ्योदनत्वं परग्रामवासो भोजनकालोपस्थानम् । तादृशेन रूपेण यदि क्षत्रियो गृहमागतो भवति तदा तमपि भोजयेत् । भोजनवचनादन्या परिचर्या निवर्तते । प्रियहितवचनं त्वविशेषेण गृहाभ्यागतस्य विहितम् । अयं च तस्य भोजनस्य कालः । भुक्तवत्सु विप्रेषु ब्राह्मणेष्वनतिथिषु वा गृहसंनिहितेषु प्रथमंभोजिषु ततः स भोजयितव्यः । काममिति नियमाभावमाह । काम्योऽयं विधिर्न नित्य इत्यर्थः । कामश्चानिर्दिष्टः विशेषफलेषु स्वर्गः । यदि वा " धन्यं यशस्यम् " इत्याद्यत्र संबन्धनीयम् ॥ १११ ॥

वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ ॥
भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥ ११२ ॥

अतिथेर्धर्मोऽतिथिधर्मः । स ययोरस्ति तावतिथिधर्मिणौ । अतिथिधर्मश्च प्राग्व्या-

---

१ ड विशेषेण गृहस्थस्या । २ श्लोके १०६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ख्यातः । कुटुम्बं गृहं तत्र प्राप्तावागतौ वैश्यशूद्रावपि भोजयेत् । क्षत्रियवत्तयोस्तु भोजनकालः क्षत्रियकालात्परेण । यत आह । **भोजयेत्सह भृत्यैस्तौ** । भृत्या अत्र दासा उच्यन्ते । तेषां च भोजनकालो भुक्तवत्स्वतिथिज्ञातिबान्धवेषु सर्वेष्ववाग्दम्पतिभ्याम् । सहशब्द एककालतामात्रलक्षणार्थः । **आनृशंस्यं** कारुण्यमनुकम्पां **प्रयोजयन्** प्रमाणीकुर्वन्नाश्रयन्निति यावत् ।

अनेन पूज्यतां वारयति । अनुग्राह्यो ह्यनुकम्प्यो न पूज्यः । अनुकम्प्येषु यदि च शक्यतेऽनुग्रहः कर्तुं ततः क्रियतेऽभ्युदयार्थिना न त्वकरणादतिथेरतिक्रमः । एतदुक्तं भवति । यादृशोऽतिथिभोजनादुत्कृष्टो धर्मः । अनुकम्प्यानुग्रहान्न तादृशस्ततो निकृष्टः ॥ ११२ ॥

इतरानपि सख्यादीन्संप्रीत्या गृहमागतान् ॥
प्रकृत्यान्नं यथाशक्ति भोजयेत्सह भार्यया ॥ ११३ ॥

सखा मित्रं स आदिर्येषाम् । आदिशब्दः प्रकारे ज्ञातिबन्धुसंगतसहाध्यायिप्रभृतीन्गृह्णाति गुरुवर्जम् । **संप्रीत्याऽऽगतान्** । अतिथेर्धर्मस्य प्रकृतत्वान्निषेधार्थं संप्रीतिग्रहणम् । **तान्भोजयेत्** । **प्रकृत्य** प्रकर्षेणान्नं कृत्वा संस्कृत्य **यथाशक्तीति** उपलक्षणार्थः शक्तिशब्दः । यावती शक्तिर्यादृशं च योऽर्हति तमुद्दिश्य तादृश एव संस्कारः कर्तव्यः । **भार्यया सह** यो भर्तुर्भोजनकालः स एव भार्याया अपि । पृथक्तस्या भोजनकालस्याभावात् । एवं ह्युक्तम् " अवशिष्टं तु दम्पती " (११६ श्लोके) इति । महाभारते पत्युरूर्ध्वं भार्याया भोजनं दर्शितम् । द्रौपदीसत्यभामासंवादे द्रौपद्या स्त्रीधर्मान्कथयन्त्योक्तं " सर्वेषु पतिषु भुक्तवत्सु शेषान्नमश्नामि " । पतिशेषान्नभोजनं स्त्रीणां धर्मः । तस्माद्भार्याभोजनकाले सख्यादीनां भोजनं विधीयते । नाप्येकपात्राशनं सहार्थः । किं तर्हि नैकाकिनस्ते भोजयितव्याः । अपि तु भार्याऽपि तत्र भुञ्जीत । ततश्चावशिष्टं तु दम्पतीति तदत्र बाध्यते । यदि पत्युः कश्चिदभ्यर्हितः प्रतीक्ष्यः स्यादन्यो वा न भुञ्जीत । तदा भार्या तद्देशे भुञ्जीत । एवं सौहार्दं प्रकाशितं भविष्यति ॥ ११३ ॥

स्ववासिनीः कुमारीश्च रोगिणो गर्भिणीः स्त्रियः ॥
अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन् ॥ ११४ ॥

स्ववासिन्यो वध्वो नवोढा स्त्रियः स्नुषा दुहितरश्च । अन्ये तु जीवच्छ्वशुरा जीवत्पितृकाश्च प्रसूता अपि स्ववासिन्य उच्यन्ते इत्याहुः । अतिथिभ्योऽनन्तरमेवैताननुगतानेव

१ ड अनुग्रहात्त्वन्यादृशोऽन्तन्तो निकृष्टः । २ फ भोक्तृ ३ ड अविशिष्टं ४ फ प्रतीक्ष्यः
५ फ सुवासिनीः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजयेत् । प्रारब्धभोजनेष्वेवातिथिषु तत्समकालं भोजयेत् । अन्ये त्वग्र इति पठन्ति । **अविचारयन्** कथमतिथिष्वभोजितेषु बाला भुञ्जत इत्येवं विचिकित्सा न कर्तव्या ॥ ११४ ॥

अदत्वा तु य एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः ॥
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः ॥ ११५ ॥

एतेभ्योऽतिथ्यादिभ्यो भृत्यपर्यन्तेभ्यो **यो** भोजन**मदत्वा पूर्वं** प्रथम**मविचक्षणः** शास्त्रार्थमजानानो **भुङ्क्ते स श्वगृध्रैरद्यते** प्रेतः । **तां जग्धिमात्मनस्तैः** खादनं **न जानाति** । एवं हि स मन्यते मूढमतिरत्राहमेव भुञ्जे एवं तु न बुध्यते यदीदृशमशनं तत्स्वशरीरस्य श्वगृध्रैरदनम् । तत्फलत्वादेवमुच्यते ॥ ११५ ॥

भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि ॥
भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती ॥ ११६ ॥

विप्रा अतिथयः स्वा ज्ञात्यादयः । तेषु कृतभोजनेषु तदवशिष्टं दम्पती जायापती अश्नीयाताम् । पश्चात्कदाचित्तेभ्यः कल्पयित्वा शिष्टव्यपदेशो सत्यादौ भोजनं स्यात्तदर्थमुक्तं पश्चादिति । दम्पत्योर्भोजनकालविधानार्थमस्यार्धश्लोकोऽनुवादः ॥ ११६ ॥

देवानृषीन्मनुष्यांश्च पितॄन्गृह्याश्च देवताः ॥
पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ॥ ११७ ॥

अनुवादमात्रमिदं पूर्वस्य पञ्चयज्ञानुष्ठानविधेर्गृहस्थभोजनकालस्य च । अन्ये त्वर्थान्तरविधानमपि वर्णयन्ति । पूर्वत्र जायापत्योरेककालमवशिष्टभोजनं विहितम् । अनेन स्त्रिया अपोह्य पुंस एव विधीयते । ततश्च भृत्येभ्यः प्राक् पत्युर्भार्या भुञ्जीत । एवं वा कृत्वा भोजयेत् । एतदप्युपपन्नं भविष्यति । इतरथा तैः सह भार्या न भुञ्जीतेत्यर्थकल्पनायां तेथाश्रुतपदान्वयभङ्गः स्यात् । यत्तु **महाभारते** दर्शनं तद्दर्शनमेव विधानं विधौ विकल्पयिष्यते तदयुक्तमनुवादत्वादस्य । न च गृहस्थ इत्येकवचनविरोधः सहाधिकाराज्जायापत्योः तत्र च सहार्थस्य प्राधान्यान्न द्विवचनापत्तिः । यथा "ब्राह्मणोऽग्नीनादधीत" इति सत्यपि भार्यया सहाधिकारे नैकवचनं विरुध्यते । तत्कस्य हेतोः एको हि तत्र प्रधानमपरो हि गुणभूतः । न च गुणः स्वसंख्यामुपजनयितुं शक्नोति । अतः प्रधानस्यैकसंख्यत्वात्सत्यपि पत्यर्थानुप्रवेश एकवचनमेव युक्तम् । एक एव गृहस्थशब्दः पत्न्यां वर्तते । स च सहविवक्षायाम् । सा चैकबुद्धिविषयत्वेन प्रधानयोर्गुणयोर्वा । तस्मान्न पत्न्याः प्राक् पुंसो भोजनम् । अतः स्थितमनुवादोऽयं प्रतिपत्तिदार्ढ्याय ।

---

१ फ यदिदं श्मशानगतस्वशरीरस्य २ अ ब क ड क्ष अविशिष्टं ३ क क्ष फ अ पूर्वं भृत्यभ्यः प्राक् पत्युः ४ फ एवं च ५ ड यथाश्रुतं ६ ड दर्शितम् । तद्दर्शनमेव न विधानं विधौ वा कल्पयिष्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येऽपि गृह्याश्च देवताः पूजयेदित्यर्थवादवचनं देवतापदं मत्वा पूजयेदितिसंबन्धाद्गौणमेवार्चाविधित्वं समर्थयन्ते। न हि मुख्यस्य देवतार्थस्य पूज्यत्वसंभवो यजिस्तुतिसम्बन्धेनैव देवतात्वस्य मुख्यत्वात्। तथा च गृह्या इत्याह। गृहे भवा गृह्याः। ताश्च प्रतिकृतय एव। न हि यागसंप्रदानभूतानां गृहसंबन्धितासिद्धिः तेषामपि देवतार्थो गौणो न पूजार्थः। कुत एतद्गृहस्थस्य या यष्टव्यास्ता गृह्या इत्युपपद्यते॥ ११७॥

अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्॥
यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते॥ ११८॥

पापं केवलं स भुङ्क्ते हृदये निधत्ते गृह्णाति नान्नस्य मात्रामपि यः पचेत्पाकं कारयेदात्मकारणादात्मानमुद्दिश्य क्षुधितोऽहमिदं वा मह्यं रोचत इति तदेव पच्यताम्। तस्मादनातुरेण नात्मार्थमन्नं मृषा पचनीयम्। आतुरस्य तु शरीरधारणं येनोपायेन भवति विध्यन्तरेणातिक्रमेणापि तस्याश्रयणं युक्तम्। "सर्वत एवात्मानं गोपायेत्" इति वचनात्। एवं केचिदस्यार्थमाहुः। एतदयुक्तं स्मृत्यन्तरविरोधात्॥ ११८॥

राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान्॥
अर्हयेन्मधुपर्केण परिसंवत्सरात्पुनः॥ ११९॥

अतिथिपूजाप्रसङ्गेनान्येषामपि केषांचित्पूज्यानां गृहागतानां पूजाविशेषो विधीयते। राजाऽभिषिक्तो न क्षत्रियमात्रम्। अतिमहती ह्येषा पूजा न तां सर्वः क्षत्रियोऽर्हति। न हि स्नातकगुरुभ्यां तस्य सहोपदेशो युक्तः। पूजासाम्यं गुरुणा न तस्य युक्तम्। लिङ्गदर्शनाच्च। तद्यथैवान्यो मनुष्यराज आगत इत्यातिथ्येष्टिब्राह्मणं गोवधो मधुपर्कविधावुक्तो गोघ्नोऽतिथिरिति पुरुषराजविषयं दर्शयति। तेन क्षत्रियेऽक्षत्रिये वा जनपदेश्वरे पूजेयं प्रयोक्तव्या। शूद्रे तु नास्ति मन्त्रवत्त्वम्।

ननु च शूद्रस्य मन्त्रोच्चारणं निषिद्धं न पुनः शूद्रसंप्रदानके कर्मणि ब्राह्मणादी-

---

१ [यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे। तत्तद्गुणवते देयं तदेवाक्षयमिच्छता॥

[(१) मेधातिथिः। एवं ह्याहुः **दयितमिष्टं** स्पृहणीयम्। यदि च न पच्येत कुतस्तादृशस्य दानसंभवस्तस्मादयमस्यार्थः। तदुद्देशस्तावन्नित्यस्य पाकस्य नैव विद्यते सुहृत्स्वजनादिष्वागतेषु तदुद्देशः। अन्यथा त्वनुद्दिष्टविशेषपाके अतिथ्यादिभ्यो दानं विधीयते तेनैतदुक्तं भवति। य एतेभ्योऽदत्त्वा भुङ्क्ते तस्यायं दोषः। अथवा सर्वस्मिन्नतिथ्यादिभिर्भुङ्क्ते नात्मार्थं पुनः पाकः कर्तव्यः तथा।च **वसिष्ठः**(अ.११ सू-११।१२)' शेषं दम्पती भुञ्जीयाताम्'।सर्वोपयोगे न पुनः पाकः।

यज्ञशिष्टाशनं पूर्वस्य शेषभोजनस्य प्रशंसैव। यज्ञो ज्योतिष्टोमादिः। शिष्टमुपयुक्तशेषं तस्य चैतद्दर्शनम्। तत्तुल्यफलं यत्सतां शास्त्रानुष्ठानपराणां गृहस्थानामतिथ्यादिभुक्तशिष्टं **विधीयते**॥ १॥

२ ङ उपभुक्त

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम् । नैष दोषः । अर्घाणामपि " भूतेभ्यस्त्वा " इत्यादिमन्त्रोच्चारणमस्ति । ननु च **महाभारते** शूद्रकर्तृकमपि मधुपर्ककर्म श्रूयते ।

" तदर्हमासनं चैव यथावत्प्रत्यवेदयत् । मधुपर्कं च गां चैव तस्मै भगवते स्वयम् "॥

भगवते वासुदेवाय विदुर इति तत्साधने दैवानि भक्त्या मधुपर्कशब्दः प्रयुक्तः । तादर्थ्यात्तच्छब्दो भवति । आयुष्यमिति।राजशब्दस्तावज्जानपदेश्वरवचनो न क्षत्रियमात्रे वर्तते । **प्रियो** जामातेत्याहुः । **स्नातको** विद्याव्रताभ्यामुभाभ्यां अन्यथार्त्विग्गुरवः सर्वे स्नातका एव ।

आश्रमान्तरस्थानां भैक्षचर्या विहिता न त्वतिथिधर्मेण भोजनम् । अथवाऽचिरनिर्वृत्तवेदाध्ययनः स्नातको गृह्यते । एतानर्हयेत्पूजयेत् । मधुपर्कशब्दः कर्मनामधेयम् । गृह्यात्तस्य स्वरूपावगमः। परिसंवत्सरानिति राजादिपूज्यविशेषणम् । परिगतोऽतिक्रान्तः संवत्सरो येषां तान् । यदि संवत्सरेऽतीत आगच्छन्ति तदा मधुपर्कार्हा अर्घार्हाः॥केचिदेवं व्याचक्षते । यदि संवत्सरादर्वागागच्छन्ति तदाऽनतीतेऽपि संवत्सरे प्रथमपूजायाः, पुनर्लभंते पूजाम् । अन्ये त्वाहुः । सांवत्सरिकी तेषां पूजा न यावदागमनम् । अस्मिन्पक्षेऽर्वागागमनं न पूजाप्रतिबन्धकम् । पाठान्तरं **परिसंवत्सरा।दिति** । यावदेव संवत्सरं तावत्परिसंवत्सराच्चत ऊर्ध्वं पुनः पूज्या इत्यर्थः ॥ ११९ ॥

राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थिते ॥
मधुपर्केण सम्पूज्यौ न त्वयज्ञ इति स्थितिः ॥ १२० ॥

यज्ञे निर्वृत्तेऽर्वागपि संवत्सरात्प्राप्त्यर्थोऽयमिति केचित् । अन्ये तु पूर्वस्यैव राजश्रोत्रिययोरुपसंहारमाहुः । अनुपसंहारे हि न त्वयज्ञ इति नोपपद्यते । अत्र श्रोत्रियो यः स्नातकः प्रागुक्तो यदि वा ऋत्विगेव तस्य हि यज्ञकर्मणि प्रारिप्स्यमाने गोर्मधुपर्कदानं विहितम् । यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुः । एवं कृप्तमूलैषा स्मृतिर्भविष्यति । इतरथा कल्प्येत मूलम् । अन्ये तु सर्वानृत्विगादीञ्छ्रोत्रियशब्देन निर्दिष्टान्मन्यन्ते।तथा चाविशेषेण **गौतमेन** पठितम्(अ.९सू.२५।२७)"ऋत्विक्श्वशुरपितृव्यमातुलानामुपस्थाने मधुपर्क"इत्युक्त्वा "यज्ञविवाहयोरर्वाग्" इति पठितवान् । अतश्च सर्वेषामेवार्घ्याणां यज्ञे निर्मितेऽर्वागपि संवत्सरादर्घार्हता स्यात् । न त्वयज्ञ इति च प्रतिषेधो

---

१ ड अर्ह्य २ ड तदन्यमधुपर्क ३ ड तादर्थ्यात्तुच्छिष्टं भवति ४ ड श्वशुरगुरव ५ फ गृह्यान्नस्य ड गृह्यास्तस्य ६ फ अर्वाक् ७ फ उपस्थितौ ८ ड विधिस्थितिः ९ ड यज्ञे निवृत्ते अर्वागपि क अ क्ष–यज्ञे इति इतोऽर्वागपि फ यज्ञानिमित्ते १० क्ष–अपि ११ ड सर्वानेव १२ फ दद्यान्

ऽर्वाक्संवत्सरान्नोर्ध्वमित्येवं ज्ञेयः । इह द्वितीये पादेऽनेकधा पाठप्रतिपत्तिः । केचित्पठन्ति । तते यज्ञ उपस्थिताविति । तेषामयमर्थः । तते प्रारब्धे यज्ञे यदि प्राप्तौ भवतो निमन्त्रानीतौ तदेयं मधुपर्कक्रिया तयोः । न पुनः प्रारभ्यमाणे ।

एष पक्षः कैश्चिद्दूष्यते । दीक्षितो न ददातीति दीक्षितस्य सर्वदानप्रतिषेधान्मधुपर्कदानमनुज्ञायमानं तद्विरुद्धं स्यात् । न च शक्यं वक्तुं दानमेतन्न भवत्यर्हयेदिति नोदनात् । पूजैषा विधीयते । यतोऽस्ति मधुपर्के अर्थिदानं मांसभोजनादिदानं च । अथोच्यते । स्वयमेव तत्परकीयं भुज्यत इति । एवं सति स्तेयदोषः स्यात् । वचनान्नेति चेदस्त्येव तर्हि ददात्यर्थः चोदितं च ददादिति मधुपर्कं च दद्यादिति । तस्माद्विरुद्धं दीक्षितो न ददातीत्यनेन स्याद्विरोधः । यदि यज्ञशब्दः सोमयागेष्वेव वर्तते । दर्शपूर्णमासादयोऽपि यागास्तद्विषयोऽयं विधिर्भविष्यति ।

नैतद्युक्तम् । एवं सति समाचारविरोधः । न हि शिष्टाः सोमयागेभ्योऽन्यत्र कंचिदर्घ्याय मधुपर्कमाहरन्ति । आचारो वेदादरः । अतोऽयमेव पाठो युक्तः । यज्ञकर्मण्युपस्थित इति । प्रारभ्यमाणयज्ञ आगतं शिष्टा मधुपर्केण पूजयन्ति न प्रवृत्तयज्ञाः । अतश्चैतदपि न विचारयामः । सामान्यतः प्राप्तस्य दानस्य भवतु निवृत्तिर्न पुनस्तद्विषयतयैव श्रुतस्य । यज्ञश्चासौ कर्म च तद्यज्ञकर्म तस्मिन्नुपस्थिते प्राप्ते ॥ १२० ॥

सायं त्वन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत् ॥
वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयते ॥ १२१ ॥

उक्तः प्रथमः । इदानीं द्वितीयः पाक उच्यते । **सायं** दिनान्तः प्रदोषस्तत्र सिद्धस्यान्नस्य सर्वः पाकयज्ञियो विधिरावर्तनीयो ब्रह्मयज्ञपितृयज्ञवर्जम् ।

ननु च बलिं हरेदित्येतावच्छ्रुतम् । बलिहरणं च प्रसिद्ध्या भूतयज्ञ एव । तत्र कुतोऽग्नौ होमोऽतिथ्यादिदानं च । अथ वैश्वदेवं हि नामैतदिति वैश्वदेवशब्दः सर्वार्थतां प्रतिपादयति । विश्वेषां देवानामिदं विधीयते । सायंप्रातर्यादृशं प्रातस्तादृशमेव सायमेतदर्थमेव प्रातःशब्दः । अन्यथा प्रातर्विहितमेव किमनेन सायंप्रातर्विधीयते । एवं तर्हि ब्रह्मयज्ञपितृयज्ञावपि कर्तव्यौ ।

उच्यते । अन्नस्य सिद्धस्येतिवचनाद्यदन्नसाध्यं तदेव कर्तव्यम् । न त्वध्ययनसाध्यो ब्रह्मयज्ञो नाप्युदकसाध्यं तर्पणम् । एवं च संबन्धः क्रियते । सिद्धस्यान्नस्य

१ ड अर्थवाक्यम्—नेयम् २ ड निमन्त्र्य चानीतौ ३ ड पूर्वेषा ४ ड अथान्ये तत्स्वयमेवमेतत्परकीयम् ५ ड चोदितं च मधुपर्कं दद्यादिति ६ ड कस्मैचित् ७ ड अत्रोच्यते ८ ड भाक्तिको विधिः ९ ड पात्रयज्ञिको १० ड कृतोऽग्नौ होमः ११ ड विधिगर्हितमेव १२ ड अन्नस्य च

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलिं हरेत् । एतद्वैश्वदेवाख्यं कर्मान्नस्य सिद्धस्योभयोः कालयोर्विधीयते । अन्नशब्दाद्वैश्वदेवशब्दाच्चैवं व्याख्यायते ।

अमन्त्रं मन्त्रशब्देन देवतोद्देशेन शब्दवान् स्वाहाकारान्तोऽग्नये स्वाहेत्येवमादिर्निषिध्यते । न ह्यन्ये मन्त्रा वैश्वदेवेषु विनियुक्तास्तेषु च मन्त्रत्वं प्रशंसयोच्यते । ननु स्वाध्यायेऽपठितानां मन्त्रत्वमस्ति स्वाध्यायैकदेशः कश्चिदृग्यजुःसामाद्यात्मको वेदाध्यायिभिर्मन्त्र इति व्यवह्रियते । व्यवहारतश्च पदार्थावगमनं यैः शब्दैर्बलिहरणादि क्रिय-ते ते कुत्रचित्पठ्यन्ते ' केवलमग्न्यादिभ्यो देवेभ्यो होमं कुर्यादिति ' श्रुतेः 'स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः संप्रदीयत ' इति वाक्यान्तरेण सर्वहोमेषु स्वाहाकारो विहितो याज्यान्ते वषट्कारो नियमितो याज्यायां वषट्करोतीति । स्वाहाकारशब्द-योगे चतुर्थी स्मर्यते । अतो यागो देवताया उद्देश्यत्वात् उद्देश्यत्वं च देवतायाः शब्दावगम्यरूपत्वात् शब्देनैवोचितत्वादियं घटना क्रियते "अग्नये स्वाहेत्यादि"

यद्येवं तेषां निषेधः कथं तर्हि यागनिर्वृत्तिः । न हि तुभ्यमिदं न मदीयमिति यावदुद्देशो न कृतस्तावद्यागस्वरूपनिर्वृत्तिः । न हि त्यागः केवलो याग उद्देशशून्यः । सत्यम् । शब्दैर्निषिद्धे मनसोद्देशं देवतायाः पत्नी करिष्यति । यथा शूद्रो नमस्कारमुच्चारयति । नमस्कारेण प्रत्याम्नातः शूद्रस्य मंत्र इति नमस्कारोऽनुज्ञातोऽस्य न देवतापदम् । न च देवताया विनियोगसिद्धिरित्युक्तम् । इह भवन्तस्त्वाहुः । स्वाहाकारो नमस्कारेण प्रत्याम्नातः शूद्रस्य देवतापदं त्वनिषिद्धम् । अथ सायंवैश्वदेवहोमे कः कर्ता ? उक्तं पत्न्येव संनिधानाद्बलिहरणवदमन्त्रकं करिष्यतीति ॥ १२१ ॥

पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान् ॥
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥ १२२ ॥

वैश्वदेविकाद्वैकल्पिकाच्छ्राद्धान्नित्यमिदं श्राद्धान्तरमुच्यते । चन्द्रक्षयेऽमावास्यायां तत्रापि न यस्यां कस्यांचन वेलाया किं तर्हि पितृयज्ञं निर्वर्त्य श्रौतो यः पिण्डपितृयज्ञस्तं कृत्वा । एवं च यस्तस्य कालः स एवास्यापि लभ्यते । तदुक्तममावास्यायामपराह्णे पिण्डपितृयज्ञ इति अनाहिताग्नेरप्यौपासनेयोगोऽस्त्येव । तथा चाह । एवमनाहिताग्निर्नित्ये श्रपयित्वेत्यादि अग्निमान् वैवाहिकेनाग्निना तद्दायादायकालाहृतेन वा विप्रग्रहणमविवक्षितम् । क्षत्रियवैश्ययोरपीष्यते । एवं स्मृत्यन्तरेषु ह्यविशेषणोक्तम् ॥ पिण्डान्वाहार्यकमिति नामधेयमिदमस्य श्राद्धस्य पिण्डानामनु पश्चादाह्रियतेऽनुष्ठीयते ।

---

१ ड अन्नशब्दो वैश्वदेवशब्दश्च २ फ ननु स्वाध्याये पठितानां ३ ड अवगमः न च यैः ४ ड आदित्यादि देवताभ्यो-श्रुतः ५ फ उद्देश्यत्वं च ६ ड शब्दे निषिद्धे ७ ड अनुज्ञातोऽस्य ८ फ श्रुतो ९ ड तत्रेत्युक्तम् १० ड औपासनेऽप्योगो अस्त्येव ११ अ ब क क्ष-इदं विशेषेणोक्तम् ।

For Private And Personal Use Only

तत्पिण्डान्वाहार्यकं भवति । मासश्चानुमासश्च तयोर्भवं **मासानुमासिकम्** । मासानुमासशब्दसमुदायो मासगतां वीप्सामाचष्टे । मासि मासि कर्तव्यमित्युक्तं भवति । अतश्च नित्यतासिद्धिः । यद्यप्यनुमासशब्दाद्वीप्सावगतिर्भवति मासशब्दोऽतिरिच्यते तथापि पद्यग्रन्थे गौरवं नाद्रियते । श्राद्धमित्येतदपि नामैव । कुर्यादिति विधिः ॥१२२॥

पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः ॥
तच्चामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः ॥ १२३ ॥

अन्वाहार्यं दर्शपौर्णमासयोः श्रौतयोर्दक्षिणर्त्विजाम् । यदेतन्मासिकं श्राद्धममावास्यायामेतत्पितॄणामन्वाहार्यम् । यथाऽन्वाहार्येणर्त्विजः प्रीयन्ते तद्वत्पितरः श्राद्धेन । एतेन पित्रर्थतां श्राद्धस्याह । यथाऽग्न्यादिदेवतार्थो दर्शादियाग एवं न श्राद्धे पितरः किं तर्हि तदुपकारार्थमेव श्राद्धम् । तथा च पितॄणामिति षष्ठी । केवले हि देवतात्वे चतुर्थ्याविरहायोगः । पक्षे पाठान्तरमर्थान्तरं च पिण्डानां मासिकमिति । अन्वाहार्यं विदुर्बुधाः । अनेनापि पितृयज्ञवदवश्यकर्तव्यतोच्यते । न त्विदमङ्गम् । तदेतदा**मिषेण** मांसेन **कर्तव्यम्** । **प्रशस्ते**नाप्रतिषिद्धेन विशेषविहितेन वा । "द्वौ मासौ मत्स्यमांसेन" इति यद्वक्ष्यति अयं च मुख्यः कल्पः । तदभावे दधिघृतपयोऽपूपादि विधायिष्यते । मांसं च व्यञ्जनं भक्तादिभोज्यस्य । न पुनरेतदेव केवलं भोज्यं येन वक्ष्यति " गुणांश्च सूपशाकाद्यान् " तथा " यावन्तश्चैव यैश्चान्नैरिति " ।

किं पुनः श्राद्धे होमब्राह्मणभोजनपिण्डनिर्वपणादीनि कर्माणि सर्वाण्येव समप्रधानानि श्राद्धशब्दवाच्यान्युत किंचिदङ्गमत्र किंचित्प्रधानम् । उच्यते । श्राद्धं भोजयेच्छ्राद्धं भुक्तमनेनेति सामानाधिकरण्याद्ब्राह्मणभोजनं मुख्यं प्रतीयते ॥ १२३ ॥

तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः ॥
यावन्तश्चैव यैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः ॥ १२४ ॥

तथा चाह । **तत्र** तस्मिञ्छ्राद्धे **ये द्विजोत्तमा** ब्राह्मणा **भोजनीया ये च** परिहर्तव्या **यावन्तो** यत्संख्याका 'द्वौ दैव' इत्यादि । **यैश्चान्नैः** तिलैर्व्रीहियवैरित्यादि तदेतत्सर्वमिदानीं **वक्ष्यामि** । तच्छृणुत । एतदत्र प्राधान्येन संपाद्यम् । एतेन विना श्राद्धं न कृतं भवति । अन्यच्च यच्चाङ्गजातमारादुपकारकं संनिपत्योपकारकं वा तस्मिन्नसंपन्ने श्राद्धं न कृतं भवति । सगुणं तन्न स्यात् । अत एतेषां प्राधान्यख्यापनार्थं पुनरुपन्यासः ॥ १२४ ॥

---

१ [न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः ॥
इन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः]

२ ख–अनाहार्यं पिण्डपितृयज्ञस्यानुगते तत्सम्बन्धं विदुर्बुधाः । ३ फ–अस्य कर्तव्यतोच्यते । ङ–ऋत्विगसङ्गातम् । ४ अ–३ श्लो. २६८ । ५ अ–श्लो. २२६ । ६ अमे १२४ श्लो.

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥
भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ॥ १२५ ॥**

यद्यपि प्रतिज्ञातस्य वस्तुनस्तेनैव क्रमेण विशेषकथनं युक्तं तथापीह स्वल्पवक्तव्यत्वाद्भोजनीया इति प्राप्तं परित्यज्य संख्यानिर्देशोऽनेन क्रियते । देवानुद्दिश्य द्वौ ब्राह्मणौ भोजयेत् । पितॄणां कृत्ये त्रीन् । **उभयत्र वा** दैव एकं पित्र्ये चैकम् । यद्यपि पित्र्य इत्यत्र पितुरिदमिति पितृशब्देन देवताचोदना तथापि पितृपितामहप्रपितामहा उद्देश्याः । तत्रैकैकस्यैकैकं भोजयेत् । न त्वेवैकं सर्वेभ्यः पृथक्पृथग्देवतात्वात् । उक्तं च **गृह्यकारेण** "न त्वेवैकं सर्वेषाम्"। "पिण्डैर्व्याख्यातम्" इति । यथैकः पिण्डः सर्वेभ्यो न निरुप्यते तथैव ब्राह्मणोऽपि न भोज्यत इत्यर्थः । इहापि वक्ष्यति । "निमन्त्रयेत त्र्यवरान्" इति । भोजनार्थमेव तन्निमन्त्रणं नादृष्टार्थम् । अतश्च पितृकृत्ये त्रींस्त्रीनिति द्रष्टव्यम् । तथा चाह । "न चावरान्भोजयेत्" इति । एवं च कृत्वैकैकमपि विद्वांसमित्येतदप्येवमेव द्रष्टव्यम् । "एकैकस्यैकैकमिति" । अपि च नैवात्रैकैकमुभयत्रेत्येताद्विधीयते । विस्तरप्रतिषेधार्थोऽयमनुवादः । यथा " विषं भक्षय मा चास्य गृहे भुङ्क्ष्वेति " । यद्येवं ' द्वौ दैव ' इत्येषोऽपि विधिर्न स्यादस्याप्यन्यार्थतयोपपत्तेः । अथायं विधिरप्राप्तत्वादेकैकमित्येषोऽपि कस्मान्न भवति । अत्राह । मा भूद्द्वयोरेकोऽपि विधिः । कुतस्तर्हि संख्यावगमो 'निमन्त्रयेत त्र्यवरानिति' । ननु तत्र दैवग्रहणं नास्ति स्मृत्यन्तरात्तर्हि संख्यावगमः अयुजो वा यथोत्साहमिति' 'युग्मान्दैव' इति । यदि वाऽयं संख्याविधिः स्याद्विस्तरप्राप्त्यभावात्प्रतिषेधोऽनर्थकः । तस्माद्यावद्भिर्ब्राह्मणैर्भोजितैर्विस्तरे ये दोषास्ते न भवन्ति तावद्भोजनीयाः । अत्राह । मा भूद्द्वयोरेकोऽपि तावन्तो भोजनीयाः । पित्र्येऽयुग्माः दैवे तु द्वावेव । अतिसमृद्धोऽप्यत्यर्थमाढ्योऽपि । न प्रवर्तेत विस्तरे । न चायमदृष्टार्थो विस्तरप्रतिषेधः ॥ १२५ ॥

किं तर्हि

**सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः ॥
पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥१२६ ॥**

एतान्दोषानापादयति । विस्तरोऽतो नेष्यते । यदि तु शक्यन्ते सत्क्रियादय उपपादयितुं तदा यथोत्साहम् । **सत्क्रिया**ऽन्नसंस्कारविशेषः । **देशो** दक्षिणप्रवणादिः । "अवकाशेषु चोक्षेष्विति" वक्ष्यमाणः । **कालः** अपराह्णः "मध्याह्नाच्चलिते सूर्य" इति ।

---

१ ङ-पितॄणां कृत्यमुपकारः पितॄनुद्दिश्य त्रीन् । देवरूपतया ब्राह्मणद्वयं कल्प्यम् । पितृरूपतया त्रयम् । इति एष उदेदर्थः । एकैकमुभयत्र वा । २ आश्वलयनगृ-सू. ४ । ७ । २-४ । ३ अग्रे १८७ श्लोके । ४ अग्रे २०७ श्लोके.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शौचमात्मब्राह्मणप्रेष्यगतम् । ब्राह्मणानां संपत् गुणवद्ब्राह्मणलाभः । एते गुणा अवश्यं संपाद्याः । ते च विस्तरेण नश्यन्ति । विस्तारो वैगुण्यम् । ब्राह्मणबहुत्वे चासौ प्रसज्जति । तस्मान्नेहेत न कुर्यात् ॥ १२६ ॥

प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये ॥
तस्मिन्युक्तस्यैति नित्यं प्रेतकृत्यैव लौकिकी ॥ १२७॥

न यथा दैवानि कर्माण्यदेवतार्थान्येवं पित्र्यं नाम तत्कर्मैतत् । **विधुक्षये** तस्मिन् युक्तस्यैति नित्यं प्रेतकृत्यैव लौकिकी न यथा दैवानि कर्माणि। किं तर्हि? **प्रथिता** ख्याता वेदविदाम् । **प्रेतकृत्या** प्रेतोपक्रिया । **विधुक्षये** विधुश्चन्द्रस्तस्य क्षये । 'अमावास्यातिथिक्षय' इति पाठान्तरम् । विधुक्षय इति तु पाठो निर्दुष्टः। एवं हि तत्र योजनम्। पित्र्यं नाम विधिचोदितं कर्म क्षये गृहे **तस्मिन्** कर्मणि पित्र्ये **युक्तस्य** तत्परस्य नित्यं कर्तुरुपतिष्ठते । प्रेतकृत्यैव तस्यापि प्रेतस्य कृत्योपकारः श्राद्धादि पुत्रैः क्रियते । पुत्रपौत्रादिसंतत्यविच्छेदः श्राद्धफलमनेन प्रकारेण प्रतिपाद्यते । न च तत्फलकामस्यायमधिकारो नित्यत्वस्य प्रतिपादितत्वात् । अन्ये त्वधिकारान्तरमिदं संतत्यविच्छेदकामस्येच्छन्ति । लौकिकीयं कर्तव्यता स्मार्तेत्यर्थः ॥ १२७ ॥

श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः ॥
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥ १२८ ॥

श्रोत्रियः छांदसः कृत्स्नमंत्रब्राह्मणिकां शाखां अधीते यस्तस्मै **हव्यानि** श्राद्धांगभोजनानि विश्वान्देवानुद्दिश्य यानि विहितानि तानि देयानि। **कव्यानि** पितृभ्य उद्दिश्य यानि भोजनानि । **अर्हत्तमाय** अर्हता पूज्यता योग्यता च । महाकुलीनः पूज्यते महाकुले जातो विद्यावृत्तसंपन्नश्च तस्मै दत्तं श्राद्धादन्यदपि महाफलम् । एवं चाश्रोत्रियाय दानं निष्फलम् । अश्रोत्रियाय अभिजनविद्यादिगुणरहिताय स्वल्पफलमर्हत्तमाय महाफलम् ॥ १२८ ॥

एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् ॥
पुष्कलं फलमाप्नोति नामंत्रज्ञान्बहूनपि ॥ १२९ ॥

यदुक्तमर्हत्तमायेति तद्दर्शयति । **विद्वांसमेकमपि भोजयेत्। पुष्कलं फलमाप्नोति।** विद्वत्ता च व्याख्याता । वेदार्थवेदनं यत आह । **नामंत्रज्ञान् बहूनपि** । मंत्रग्रहणं वेदोपलक्षणार्थम् । असंभवे पंचानां वेदविदुषामेकैकमपि विद्वांसं भोजयेदिति विध्यर्थः । **पुष्कलं** पुष्टं विपुलम् ॥ १२९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् ॥
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥ १३० ॥

न वेदपारग इत्येव भोजयितव्यः। किं तर्हि दूरात् परीक्षेत निपुणतो मातापितृवंशद्वय-परिशुद्धिज्ञानं यथोक्तं "ये मातृतः पितृतश्च दशपूरुषं"। समनुष्ठितविद्यातपोभ्यां पुण्यैश्च कर्मभिः येषामुभयतो ब्राह्मण्यं निर्णयेयुरित्येषा दूरात्परीक्षा। तथा तत्त्वतोऽध्ययनविज्ञान-कर्मानुष्ठानवेदनं च। वेदस्य पारगः समाप्तिगः **वेदपारगः**। न वेदसंहितां ब्राह्मणमात्रं वा पठन्नर्हो भवति। अस्मादेव दर्शनात् श्रोत्रियशब्देन वेदैकदेशमप्यधीया न उच्यत इति गम्यते। **तीर्थं तद्धव्यकव्यानाम्** तीर्थमिव तीर्थं येनोदकं ग्रहीतुमवतरंति तत्तीर्थम्। तेन यथामार्गेणोदकार्थिनो गच्छंत उदकं लभंते एवं तादृशेन ब्राह्मणेन हव्यकव्यानि पितॄन् गच्छंतीति प्रशंसा। अन्यस्मिन्नपि इष्टापूर्तदानेन ब्राह्मणो यथातिथिर्यथातिथये स्वयमुप-स्थिताय निर्विचिकित्सं दीयते दत्तं महाफलम्। एवमीदृशाय ब्राह्मणाय हव्यकव्ये निर्विचि-कित्सं दातव्ये महाफले भवतः ॥ १३० ॥

सहस्रं हि सहस्राणामनृचां यत्र भुंजते ॥
एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति धर्मतः ॥ १३१ ॥

अनृचां अनृगर्थविदां[1] उपलक्षणं ऋचो यतोऽनृचानां प्राप्तिरेव नास्ति श्रोत्रियायैवेति नियमात्। समासांतः छांदसत्वान्न कृतः वृत्तानुरोधाच्च। एवं हि पठंति। "अपि माषं मषं कुर्यान्न तु छंदो विचालयेत्" इति। अथवा अनृचा इति प्रथमाबहुवचनम्। अनृचाः सहस्रं यत्र भुञ्जत इति संबन्धः। यथा सहस्रं गाव इति। एकः प्रीतस्तर्पितो भोजितो मन्त्र-विद्वेदार्थवित् सर्वांस्तान् **अनृचानर्हति** स्वीकरोति[2]। तैरभेदमाप्यते। अभेदे च यत्तेषु सहस्रेषु भोजितेषु फलं तदेकस्मिन्नवाप्यते इत्यवगतिरुत्पद्यते। निन्देयमविदुषो विद्व-द्विध्यर्था न पुनः सहस्रसंख्यातानामेकस्य च समफलत्वमुच्यते। विदुषां विधानादविदुषां प्राप्तिरेव नास्ति अथाप्यसति विदुषि श्रोत्रियायैवेत्यनेन पाक्षिकी अविदुषोऽपि प्राप्तिराशंक्यते तथापि विस्तरस्य प्रतिषेधो मा भूदित्यतो यथाश्रुतार्थसंभवः ॥ १३१ ॥

ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च ॥
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः ॥ १३२ ॥

ज्ञानेन विद्यया उत्कृष्टा अधिकाः तेभ्यो देयानि कव्यानि। तैर्यदर्थं श्राद्धमारब्धं

१ ङ-अवेदार्थविदाम्। २ ङ-आत्मसाक्षात्करोति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संदीप्तान् तप्तायःपिण्डान् यमपुरुषैराश्यते । अयमसौ हस्तरुधिरदिग्धोपमार्थः रुधिरदिग्धौ रुधिरेणोपमृज्यमानावधिकतरं रज्येते । न निर्मलौ भवतः । एवमविद्वान् ब्राह्मणः भोज्यमानः पितॄनधो नयतितराम् । पाठान्तरं प्रेत्येति भोक्तुरेव प्रेत्यता । नाविदुषा दैवपित्र्ययोर्भोक्तव्यम् ॥ १३२ ॥

यावतो ग्रसते ग्रासान्हव्यकव्येष्वमन्त्रवित् ॥
तावतो ग्रसते प्रेतो[1] दीप्तशूलर्ष्ट्ययोगुडान् ॥ १३३ ॥

सत्यपि श्राद्धप्रकरणे वाक्याद्भोक्तुरयं दोषानुवादः[2] । तथा चोक्तं "तस्मादविद्वान् बिभियाद्यस्मात्तस्मात्प्रतिग्रहात्" इति। **शूलर्ष्ट्ययो** आयुधविशेषे अयोलगुडः आयसः पिण्डः। व्यासदर्शनात्तु भोजयितुरयं दोषो न भोक्तुः । न पितॄणां न तावन्मृतानामन्यकृतेन प्रतिषेधातिक्रमेण दोषसंबन्धो युक्तः, कृताभ्यागमादिदोषापत्तेः । यदि हि पुत्रेण तादृशो ब्राह्मणो भोजितः कोऽपराधो मृतानाम्। ननु चोपकारोऽपि पुत्रकृतः पितॄणां अनेन न्यायेन न प्राप्नोति । प्राप्नुयाद्यदि[3] तादर्थ्येन श्राद्धादिनोदितं स्यात् । इह तु नास्ति चोदना, पितुरुपकारकामेनैवं कर्तव्यं स्यात्, श्येनवत् । यत्तु "तावतो ग्रसते प्रेत" इति तद्भोजयितृसंबन्धेऽप्युपपद्यते । यस्य ब्राह्मण ईदृशः श्राद्धं भुङ्क्ते स इदं फलमाप्नोति इति युक्तः संबन्धः । प्राकरणिकश्चायं अविद्वद्भोजनप्रतिषेधस्तदतिक्रमणे कर्मवैगुण्यं तद्वैगुण्ये च श्राद्धाधिकारान्निवृत्तिरेव दोषः । पितॄणां श्राद्धोपकाराल्लाभः ततोऽपि विध्यतिक्रमे पुत्रस्य युक्तः प्रत्यवायः । किंतर्हि तद्भगवतो **व्यासस्य** वचनम् । " ग्रसते यावतः पिंडान् यस्य वै हविषो विदः । ग्रसते तावतः शूलान् गत्वा वैवस्वतक्षयम् "॥ १३३ ॥

ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथाऽपरे ॥
तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथाऽपरे ॥ १३४ ॥

सर्वगुणेभ्यो विद्यां प्रशंसितुं गुणविभागकथनप्रशंसा च विदुषे दानार्था। ज्ञाने विद्यायां निष्ठा प्रकर्षो येषां ते **ज्ञाननिष्ठाः** ज्ञानाधिकारिणः । गमकत्वाद्व्यधिकरणानामपि बहुव्रीहिः । भृशमभ्यस्तवेदार्थास्तत्परा एवमुच्यन्ते । एवं सर्वत्र निष्ठान्तेषु द्रष्टव्यम् । तपश्च स्वाध्यायश्चेति द्वन्द्वगर्भो बहुव्रीहिः । तपांसि चान्द्रायणादीनि, स्वाध्यायो वेदाध्ययनं[4], कर्माण्यग्निहोत्रादीनि । सर्व एते गुणाः सर्वेषु समुच्चिता इति द्रष्टव्याः । न हि एकगुणसद्भाव[5] इतरगुणहीनस्य पात्रतामापादयति । किं तु कस्यचित्कोऽपि प्रकर्ष उच्यते । यथा च

१ फ-प्रेत्य. २ ङ-न दोषानुवादः । ३ फ-नप्राप्नुयात् । ४ ङ-विद्याध्ययनं । ५ फ-एकगुणः सद्भाव-ङ-षद्भावे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निष्ठाशब्दः समाप्तिवचनः प्रकर्षं लक्षयति । तस्मिन्निष्ठस्तत्पर उच्यते । सर्वगुणसद्भावेऽपि यदि तत्र प्रकर्षोऽस्त्येव, गुणाः मध्यमाः, तथा च भवत्येव पात्रम् । अप्रकृष्टे त्वेकस्मिन् सर्वगुणसद्भावेऽपि न पात्रतां लभते । समुच्चयश्च व्याख्यायते । तेन ज्ञानरहितस्य कर्मानुष्ठानसद्भाव इत्युक्तं द्वितीये । अन्यैस्तु ज्ञाननिष्ठपरिव्राजको व्याख्यायते । तस्य हि आत्मज्ञानाभ्यासः कर्मन्यासेन विशेषतो विहितः । तपोनिष्ठो वानप्रस्थः । स हि तापस इत्याख्यायते । "ग्रीष्मे पञ्चतपास्तु स्यादिति" (अ. ६ श्लो. २३) । तपःस्वाध्यायनिष्ठाः ब्रह्मचारिणः कर्मनिष्ठा गृहस्थाः । अतश्च नाश्रमिणो निषिध्यन्ते । तथा च पौराणिकाः "चातुराश्रम्यबाह्येभ्यः श्राद्धं नैव प्रयोजयेत्" ॥ १३४ ॥

ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः ॥
हव्यानि तु यथान्यायं सर्वेष्वेव चतुर्ष्वपि ॥ १३५ ॥

गुणविभागे प्रयोजनमाह । **कव्यानि** पितॄनुद्दिश्य यद्दीयते तत्कव्यम् । तानि **ज्ञाननिष्ठेषु प्रतिष्ठाप्यानि** प्रदेयानीत्यर्थः । यत्नवचनात्तदभावे चतुर्ष्वपि हव्यवत् । पित्र्ये ज्ञाननिष्ठाः पात्रतमाः । उक्तं हि " पात्राणामपि तत्पात्रं " इति । अन्नदानमविशेषेण चतुर्भ्योऽपि इति श्लोकार्थः । **न्यायः** शास्त्रीयो विधिः ॥ १३५ ॥

अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः ॥
अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः ॥ १३६ ॥

संशयोपन्यासार्थः श्लोकः ॥ १३६ ॥

ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता ॥
मन्त्रसंपूजनार्थं तु सत्कारमितरोऽर्हति ॥ १३७ ॥

यस्य पिता अपाठः स्वयं तु वेदपारगः सांगवेदाध्यायी, इतरस्य तु पिता वेदपारगः स्वयं तु मूर्खः, तयोः कः श्रेयानिति संशयं कृत्वा सिद्धान्तमाह । अनयोः स्वयं श्रोत्रियपितृमूर्खस्वयंमूर्खपितृश्रोत्रिययोः स्वयंमूर्खपितृश्रोत्रियं ज्यायांसं प्रशस्यं श्राद्धे योग्यं जानीयात् । यद्यस्य श्रोत्रियः पिता । इतरो मन्त्रपूजनार्थं न ब्राह्मणबुद्ध्या किं तु मन्त्रास्तेन येऽधीतास्ते तत्र पूज्यंते । न मन्त्राणां श्राद्धे पूजा विहिता तस्मान्नासौ भोजयितव्यः । श्लोकद्वयेन संशयसिद्धान्तरूपोपन्यासेनार्थवादभंग्यापितृश्रोत्रियत्वं आत्मश्रोत्रियत्वं च श्राद्धभोजने कारणमित्येतदुच्यते । न केवलमात्मश्रोत्रियत्वं न तु स्वयं अनधीयानस्य

---

१ ङ-येन न ज्ञानरहितस्य कर्मानुष्ठान इत्युक्तम् । २ अ-ब-क्ष-ज्ञानोत्कृष्टेषु । ३ ब-तेभ्यो देयानि । ४ ङ-अपठः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितृश्रोत्रियत्वेन भोज्यता विधीयते । तदुक्तं " दूरादेव परीक्षेत " इति । अत्राध्ययनपरीक्षा पुरुषद्वयविषयाऽनेन नियम्यते । जातिगुणपरीक्षा तु ततोऽधिकपुरुषविषयाऽपि यथा अतस्तस्यैव विशेषाभिधानार्थत्वादपौनरुक्त्यम् ॥ १३७ ॥

न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः ॥
नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजम् ॥ १३८ ॥ ९

सत्यामेव श्रोत्रियत्वादिपूर्वगुणसंपदि मैत्र्यादिनिमित्तेन प्रतिषेधोऽयम् । **मित्रं** समानसुखदुःखं आत्मनिर्विशेषं **न श्राद्धे भोजयेत्** । **धनै**रन्यैरस्य मित्रस्य स्वीकारो मैत्रीकरणम् । अविच्छेदो वा मैत्र्यं उपकार इति यावत् । न केवलं न मित्रं भोजयेत् यावदरिं शत्रुमपि । नारिं न मित्रं यं विद्याद्यत्र न रागो न द्वेषो न चान्यः कश्चित्संबंधो यत्र
प्रीतिनिमित्ता कार्यार्थता शंक्यते अरिमित्रयोः प्रदर्शनार्थत्वात् । तथा संबंधाशंकयैव १०
मातामहादयोऽनुकल्पपक्षोक्ताः । शत्रावपि मैत्रीकरणार्थदानसंभावनां यदि मैत्रीकरणमिति संग्रहः अरिसंग्रहणं न कर्तव्यं विस्पष्टार्थं भविष्यति ॥ १३८ ॥

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ॥
तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च ॥ १३९ ॥

पूर्वस्य प्रतिषेधस्यार्थवादोऽयम् । मित्रशब्दोऽयं भावप्रधानः । मित्रप्रधानानि १९
मैत्रीप्रधानानि तेनोभयोरपि मित्रयोः शेषः देवतोद्देशेन दानमदृष्टार्थं वा केवलयोर्ब्राह्मणयोर्भोजनं हवींषि इति लक्ष्यते । **प्रेत्य फलं नास्ति** । ननु चासमानकर्तृत्वात्कार्यानुत्पत्तिः प्रायेण कर्ता पुरुषःश्राद्धकृच्छ्रताया नञर्थोपहितायाः फलं केचिदाहुः। प्रेत्येतिशब्दान्तरं परलोकवचनं निर्यतसंज्ञम् । अथ प्रायेणापि फलं कर्तृ तस्य फलं प्रेत्य प्रकर्षेण निकटं आप्यापि न भवति
न भोग्यतां याति ॥ १३९ ॥ २०

यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः ॥
स स्वर्गाच्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः ॥ १४० ॥

संगतानि मित्रभावाद्यः **कुरुते श्राद्धेन मोहात्** शास्त्रार्थमजानानः **स स्वर्गात् च्यवते** । न प्राप्नोति स्वर्गमित्यर्थः । असंबन्धसामान्यात् च्यवत इत्युच्यते यथा प्राप्तः स्वर्गं ततश्च्युतः
स्वर्गेण न संबध्यते एवमयमपि। अनेन च श्राद्धफलप्राप्तिरेव कथ्यते। सैवशेषता हि तथा भवति। २१
श्राद्धमित्रः श्राद्धं मित्रमस्येति मित्रलाभहेतुत्वात्। श्राद्धमेव मित्रमतो बहुव्रीहिः।**द्विजानामधमः**।

---

१ १३० श्लो. पृ. २४४ १ फ--संभवाय नापदि मैत्रीकरणम् । २ फ-अशेषः । ३ ङ-निपातसंज्ञं । ३ ङ-श्राद्धार्थं मजानतः । ४ पूर्वेहि शेषता हि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विजग्रहणं प्रदर्शनार्थम् शूद्रेणापि न मित्राणि भोजनीयानि । ननु चाब्राह्मण्यादेव शूद्रस्य मित्रत्वप्राप्तिर्नास्ति केनैषा परिभाषा कृता । शूद्रस्य ब्राह्मणैर्मित्रैर्न भवितव्यम् । समानजातीयानामेव मित्रव्यवहारो नोत्तमजातीयानां हीनजातीयैः सहेति चेत् । एतदपि न । एवं ह्याह । "श्वेतकेतुर्ह वा आरुणेयः" । "अस्ति मे पञ्चालेषु क्षत्रियो मित्रम्" इति । किं च संबन्धोपलक्षणार्थं च मित्रप्रतिषेधो व्याख्यातः । भवंति च शूद्रस्य ब्राह्मणा अर्थसंबन्धिनः पारशवस्य ज्ञातयोऽपि ॥ १४० ॥

संभोजनी साऽभिहिता पैशाची दक्षिणा द्विजैः ॥
इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि ॥ १४१ ॥

संशब्दः सहार्थे वर्तते । सह भुज्यते यया सा **संभोजनी** । मैत्र्यादिसहभोजनं प्रवर्तते । गोष्ठीभोजनं वा संभोजनमिष्यते । पिशाचानामयं धर्मो यत् श्राद्धे मित्रसंग्रहः । रथ्याः पुरुषाः पिशाचाः । सा दक्षिणा इहैव लोके आस्ते नानुत्र फलं दातुं समर्था गौर्यथाऽन्धैकस्मिन्नेव गृहे तिष्ठति एवमियं दक्षिणा इहैवास्ते मित्रजनार्थैव भवति । न पितृभ्य उपकारार्थाय प्रभवति दानं दक्षिणा ॥ १४१ ॥

यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् ॥
तथाऽनृचे हविर्दत्वा न दाता लभते फलम् ॥ १४२ ॥

इरिणं ऊषरम् । यस्मिन् क्षेत्रे भूमिदोषात् बीजमुप्तं न चोद्गच्छति तदिरिणं यत्र **वप्ता** न कर्षको **लभते फलम्** । एवमनृचे वेदाध्ययनरहिते **हविर्दैवं** पित्र्यं च दत्त्वा न लभते फलम् । अनृच इति सप्तम्यंतं ऋचो वेदोपलक्षणार्थम् ॥ १४२ ॥

दातॄन्प्रतिग्रहीतॄंश्च कुरुते फलभागिनः ॥
विदुषे दक्षिणां दत्त्वा विधिवत्प्रेत्य चेह च ॥ १४३ ॥

विदुषे या दक्षिणा दीयते सा दातॄन् फलभागिनः कुरुते इति युक्तम् । प्रतिग्रहीतारस्तु कतरत् फलं भुञ्जते यदि तावददृष्टं तदयुक्तं अनोदितत्वात् प्रतिग्रहस्य दृष्टफललाभेन प्रवृत्तेः । अथ दृष्टं तदविदुषोऽपि दृश्यते । सत्यं प्रशंसैषा ईदृशमेतद्विदुषे दानं यत्प्रतिग्रहीताऽप्यदृष्टफलभाग्भवेत् । सत्यपि दृष्टे । किंपुनर्दातेति प्रेत्य स्वर्गं इह कीर्तिर्यथाशास्त्रमनुतिष्ठतीति जैनः साधु[1] वादोदीयते विधिवदित्यनुवादो ददाति चैव धर्म्येविष्वति ॥१४३॥

---

१ क-साधुवादीयते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम् ॥
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥ १४४ ॥
यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ॥
शाखान्तगमथाध्वर्यु छन्दोगं तु समाप्तिकम् ॥ १४५ ॥

वेदपारगशाखांतगसमाप्तिकाः शब्दा एकार्थाः समन्त्रब्राह्मणिकायाः कृत्स्नायाः शाखाया अध्येतृनाचक्षते। न मन्त्रसंहिताया नापि ब्राह्मणस्य। तदेकदेशस्य वा। वेदैकशाखाध्यायिनोऽपि श्रोत्रिया उच्यन्ते। अतस्तन्निवृत्त्यर्थमुक्तं श्रोत्रियाय देयमिति। श्रोत्रियश्च वेदाध्यायी। वेदशब्दश्च समन्त्रब्राह्मणिकां शाखामाचष्टे। तदेकदेशमपि या कृत्स्नशाखा तत्राध्यायी कथं गृह्येतेत्येवमर्थमिदम्।

ननु चाश्रमिणो भोजनीया इत्युक्तं तत्रानधीतसकलस्वाध्यायानां नैव गार्हस्थ्याश्रमसंभवः। एवं ह्युक्तं "वेदः कृत्स्नोऽधिगंतव्य" इति। ब्रह्मचारिणस्तर्हि प्रक्रांतवेदाध्ययनस्य असमाप्तिगस्यापि स्यात् वेदपारगशाखांतगसमाप्तिकशब्दैरेकार्थैः कात्स्न्ये सर्वैरेव प्रतिपाद्यते। एकेनैव सिद्धे वृत्तानुरोधान्नानारूपैकार्थानेकशब्दोच्चारणम्। वेदानां पारं गच्छति। शाखाया अंतः समाप्तिरस्यास्तीति समाप्तिकः। अध्वर्युर्यजुर्वेदशाखाध्यायी, नायमृत्विग्विशेषवचनोऽध्वर्युशब्दः। अध्वर्यवः प्रवचनमुच्यते। तदध्ययनसंबन्धात् पुरुषोऽध्वर्युः। छन्दोगः सामवेदाध्यायी। स्मृत्यन्तरे त्रिसाहस्रविद्यः समाप्तिक उक्तः। तत्र सहस्रशब्दः सहस्रगीतिसंबंधात् सामवेदे वर्तते। तस्य इमाः साहस्र्यस्तिस्रः साहस्र्यः विद्या यस्य त्रिसाहस्रविद्यः। ताण्डवमौक्तिक्यं सामगानामिति। सहस्रवर्त्मनः सामवेदस्य तस्य तिस्रो विधाः दशतयी चतुःषष्टि ॥ ब्राह्मणं च बाह्वृच्यम्।

अन्ये त्वाथर्वणिकनिषेधार्थमिमं श्लोकं मन्यंते। कार्त्स्न्यात् विवक्षायामेतदेवावक्ष्यत्

"अधीते वेदशाखां यः कृत्स्नां तं भोजयेद्द्विजम्" इति।

ननु चाथर्वणिकनिषेधेऽप्येतत्समानं तत्रापि शक्यमेवं वक्तुं तन्निषेधे प्रायेण न भोज्य आथर्वणिक इत्येवमेवावक्ष्यत्। स्वशब्देन निषेधप्रतिपत्तिर्लाघवं च। नैतदेवम्। किमन्यविधानेनान्यनिषेधोऽवगम्यते स्वशब्देन वा निषेधो विचित्रा धर्मोपदेशस्य कृतिर्मनोः ॥ १४५ ॥

एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः ॥
पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ॥ १४६ ॥

१ ढ-शाखान्तकम्। २ र-वा ३ फ-मन्त्रसंहितायामपि ड-मंत्रसहितायानामपि। ४ फ-गृहेन ५ फ-भोजयितव्या। ६ र-एकार्थे। ७ फ-आध्वर्यवः ड-आध्वर्यव। ८ फ ड-तस्या। ९ फ-तिस्र १० फ-सामगानमिति। ११ फ-विधाः। १२ फ-दाशतयी १३ फ-विचित्रात्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कश्चिन्मन्येत पितृकृत्ये त्रीनित्युक्तम् । पूर्वश्लोके च नानाशाखाध्यायिन उपात्ताः । तत्र सब्रह्मचारिणां नास्ति प्राप्तिरिति तदाशङ्कानिवृत्त्यर्थं इदम् ।

एषां त्रयाणां त्रैविद्यानाम**न्यतमो** भोजनीयः । एतदुक्तं भवति । समानशाखाध्यायिनो नानाशाखाध्यायिनो वा भोजनीयाः । **अर्चितः** पूजितः प्रार्थित अर्घ्यादिना । **साप्तपौरुषी तृप्तिः** । सप्तपुरुषान्व्याप्नोति । अनुशातिकादेराकृतिगणत्वादुभयपदवृद्धिः । कालमहत्त्वोपलक्षणार्थं चैतत् । दीर्घकाला पितॄणां तृप्तिर्भवति । यावत्सप्तपुरुषा आगामिनः पुत्रपौत्रादयो जाता जनिष्यन्ते वा तावत्तथाविधब्राह्मणादानात् पितरस्तृप्यन्ति । **शाश्वती** नान्तरा विच्छिद्य पुनरुद्भवति । किंपुनः सर्वदा स्थितैव ॥ १४६ ॥

एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ॥
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥ १४७ ॥

पितृयज्ञमित्यारभ्य विंशतिमात्राः श्लोका अतिक्रान्तास्तत्रैतावानर्थोऽभिहितः । अमावास्यायां श्राद्धं कर्तव्यम् । श्रोत्रियो विद्वान् साधुचरणः प्रत्याख्याताभिजनः श्रोत्रियापत्यं असंबन्धी भोजनीयः । परिशिष्टं सर्वमर्थवादार्थम् । **एषो**ऽनन्तरोक्तः **प्रथमो** मुख्यः **कल्पो** विधिः श्राद्धे यदसंबन्धिने दीयते । **अयं तु** वक्ष्यमाणो**ऽनुकल्पो ज्ञेयः** । मुख्याभावे योऽनुष्ठीयते प्रतिनिधिन्यायेन सोऽनुकल्प उच्यते । **सदेत्यादि** स्तुत्यर्थः ॥ १४७ ॥

मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् ॥
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥ १४८ ॥

स्वस्रीयो भगिन्याः पुत्रो **विट्पति**र्जामाता प्रजावचनत्वात् विट्शब्दस्य । अतिथिर्मन्ये । स हि सर्वविशांपतिः गृहाभ्यागतो लोकेऽपि विट्शब्देनोच्यते । **बन्धुः** शालः सगोत्रादिः ॥ १४८ ॥

***न ब्राह्मणं परीक्षेत दैवे कर्माणि धर्मवित् ॥**
पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥ १४९ ॥

नायं दैवे कर्माणि ब्राह्मणपरीक्षाप्रतिषेधः किंतर्हि काणश्लीपद्यादीनां कदाचिद्दैवेऽप्यनुज्ञानार्थः । **पित्र्ये कर्मणि** श्राद्धकाले प्राप्ते परीक्षां यत्नेन कुर्यात् । न दैवे । कदाचिद्वक्ष्यमाणानपि भोजयेत् । ये चाभ्यनुज्ञायन्ते तान्दर्शयिष्यामः । अग्रे तु वक्ष्यमाणस्य प्रतिषेधप्रकरणस्य यत्नतो वर्जनार्थं काणादिवर्जनार्थं उपक्रममात्रं श्लोको न तु काणादीनां दैवेऽभ्यनुज्ञानार्थः ॥ १४९ ॥

---

१ फ-ब्राह्मणदानात् । २ अ. ३ श्लो. १२२। ३ फ-तत्रैव नार्थोऽभिक्षः । ४ फ-प्रत्याख्यातमभिजनः । ५ ह-अतिथिः मान्यः । फ-अतिथिर्न्यः । * केषुचित्पुस्तकेषु दृष्टो रामचन्द्रेण व्याख्यातश्च पाठः ।
[तेषामन्ये पंक्तिदूष्यास्तथान्ये पंक्तिपावनाः ॥ अपांक्तेयान्प्रवक्ष्यामि कव्यानर्हान्द्विजाधमान् ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः ॥
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ १५० ॥

स्तेनः चौरः। **पतितः** पञ्चानां महापातकानां अन्यतमस्य कर्ता। **क्लीबो** नपुंसकः उभयव्यञ्जनो वांतरेताः पंढश्च। **नास्तिका** लोकायतिकादयः। नास्ति दत्तं नास्ति हुतं नास्ति परलोक इति ये स्थितप्रज्ञास्तेषां वृत्तिराचारः अश्रद्दधानता नास्तिकवृत्तिर्येषां ते **नास्तिकवृत्तयः**। उत्तरपदलोपीसमासः। नास्तिका इत्येव सिद्धे वृत्तिद्वयसमाश्रयणं श्लोकपूरणार्थम्। अथवा नास्तिकेभ्यो वृत्तिर्जीवनं येषां त एवमुच्यन्ते। **तान् हव्यकव्ययो**र्दैवे पित्र्ये च **अनर्हान्मनुरब्रवीत्**। मनुप्रतिषेधादरार्थं मनुग्रहणम्। सर्वधर्माणां मनुनोक्तत्वात् ॥ १५० ॥

जटिलं चानधीयानं दुर्वालं कितवं तथा ॥
याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥ १५१ ॥

जटिलो ब्रह्मचारी तस्य ह्ययं केशविशेषः पाक्षिको विहितो "मुण्डो वा जटिलो वा स्यात्" इति। उपलक्षणं च जटा ब्रह्मचारिणस्ततो मुण्डोऽपि प्रतिषिध्यते। तस्य चानधीयानस्य प्रतिषेधः।

ननु 'श्रोत्रियायैव देयानि' इति चानधीयानस्य प्राप्तिरेव नास्ति। प्रक्रान्ताध्ययनः अनधीतवेदश्चेत् अगृहीतवेदश्चेत्प्राप्नुयात्।

ननु च 'वेदपारग' इति वचनात् कुतः प्रक्रान्ताध्ययनस्य प्राप्तिः। एवं तर्हि अधीतवेदोऽप्यस्वीकृतवेदोऽनधीयानोऽभिप्रेतः। व्रतस्थमित्यनेन वा दौहित्रतैवात्र तत्र नाध्ययनमिति कश्चिन्मन्येत तदर्थमिदम्। अनधीयानस्य प्रतिषेधाद्विदुषस्तस्याधिकारोऽस्तीत्यवगम्यते। **दुर्वालः** स्खलितलोहितकेशो विकेशेन्द्रियो वा। तस्य च हि निर्वचनं कुर्वन्ति। दूर्वांशाद्वलेनाप्यलं तस्य वासो भवतीति। स हि दूर्वयैव प्राव्रियते लज्जया च वाससामभावे तावन्मात्रेणापि दधाति शेफम्। **कितवो** द्यूतकारः। **याजयंति च ये पूगान्** संघान्। व्रात्यस्तोमादिभिर्व्रात्यानां हि संहितानां यागो विहितः। प्रतिषिद्धं च तद्याजनं व्रात्यानां याजनं कृत्वेति वयं ब्रूमः। यः क्रमशः प्रत्येकमपि बहून्याजयति बहुकृत्व आर्त्विज्यं करोति सोऽपि न भोज्यः। तथा च **वसिष्ठः** "यश्चापि बहुयाज्यः स्याद्यश्चोपनयते बहून्" इति। केचिदाहुः श्राद्धग्रहणात्पित्र्य एवैषां प्रतिषेधो न तु दैवे तदयुक्तम्। तदपि श्राद्धांगमेव श्राद्धशब्देन युक्तं वक्तुम् ॥ १५१ ॥

चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा ॥
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥ १५२ ॥

---

१ ङ–गतरेताः। २ फ–विधि। ३ ङ–तदुक्तम्। ४ फ–अश्राद्धशब्देन।

भिषजः **चिकित्सकाः** । **देवलकाः** प्रतिमापरिचारकाः । आ जीवनसंबन्धेनैतौ प्रतिषिध्येते । धर्मार्थत्वे तु चिकित्सकदेवलत्वयोरदोषः । **मांसविक्रयिणः** सौनिकाः । द्वितीयान्तपाठे पूर्वश्लोकादाख्यातानुषङ्गः । **विपणेन जीवन्तः** प्रतिषिद्धेन पणेन । दशमाध्याये वक्ष्यन्ते । तेन ये जीवन्ति ते वर्ज्याः । उभयत्र मांसविक्रयिणस्तु धर्मार्थमपि निषिध्यन्ते । यस्य केनचिन्मांसमुपहृतम् अन्यस्य च तेनार्थः । उपहृतमांसस्य घृतेन होमोपयोगिना समांसं घृतेन विनिर्मिमीते भवत्यसौ धर्मार्थो विनिमयो विक्रयशब्दवाच्यतः विनिमयस्यापि भवतीत्यत ईदृशा धर्मार्थमांसविक्रयिणोऽपि प्रतिषिध्यन्ते ॥ १९२ ॥

प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः ॥
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥ १९३ ॥

प्रेष्य आज्ञाकरः[1] । ग्रामेण यो यत्रकुत्रचित् कार्येण प्रेष्यते । एवं राजप्रेष्यः । **कुनखी श्यावदन्तकः** । **प्रतिरोद्धा** गुरोर्वाग्व्यवहारेऽन्यत्र च यो गुरोः प्रतिबन्धे प्रातिकूल्ये च वर्तते । **त्यक्ताग्नि**स्त्रेतावसथ्ययोरन्यतरस्यापि । **वार्धुषिः** सत्यन्यस्मिन् जीविकोपाये वृद्धिजीविकः । " वृद्धिस्तु योक्ता धान्यानां वार्धुषित्वं तदुच्यते " इति यत्स्मरणं तत्स्वप्रक्रियायामेव[2] । वैयाकरणा हि वृद्धिजीविनो धान्यादन्यत्रापि वार्धुषिकशब्दं स्मरन्ति । ते च शब्दार्थस्मरणे प्रमाणतरा अभियोगवशात् ॥ १९३ ॥

यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ॥
ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥ १५४ ॥

यक्ष्मी व्याधितः । राजयक्ष्मगृहीत इत्यन्ये । **पशुपालः** यष्टिहस्तस्तद्वृत्तिजीवनः । **निराकृतिः** सत्यधिकारे महायज्ञानुष्ठानरहितः । अद्यत्वेऽप्यनुपजीव्यः[3] । अनद्धा निराकृतिरुच्यते । एवं हि शतपथे " यो न देवानर्चति न पितॄन्न मनुष्यान् " इति । यैस्तु पठ्यते " अस्वाध्यायश्रुतधनैर्निराकृतिरुदाहृतः " इति न ते शब्दार्थसंबन्धविदस्तत स्तस्येहाप्राप्तिरेवं[4] श्रोत्रियनियमात् । निराकर्ता देवादीनां निराकृतिरिति धात्वर्थानुगमोऽस्ति । धर्मधर्मिणोश्चाभेदविवक्षायां केनापि प्रयोग उपपन्न इति निपूर्वोऽयं धातुरपवर्जने वर्तते । निराकृता अपवर्जिता उच्यन्ते । भोजनान्निराकृता अधिकारान्निराकृता इति । अवजर्नं चाकृतिः सा निर्गताऽस्मादिति निराकृतिः । संस्थानं चाकृतिस्तथा च कुत्सायां निर्दिष्टव्यो दुराकृतिर्निषिध्यते । आह च " वाग्रूपवयःशीलसंपन्नो वाक्संपन्नो वाग्मी पटुवागिन्द्रियश्च बहुजिह्वो न भोज्याः" । रूपसंपन्नमनोहरावयवसंनिवेशवयःसंपन्नः । युवभ्यो दानं प्रथमं

---

१ फ-आज्ञाकारः । २ ड-प्रक्रियायामेव । ३ र-आद्यत्वे वाऽप्युपजीव्यः । अनद्धा । ४ र-अवति । ५ प्राप्तिरेव नास्ति । ६ फ-ऊर्ध्वजनने ।

प्रतिवयस इत्येक इति संज्ञाशब्दो वाऽयं क्तिनंतः[1] । ब्रह्मद्विट् ब्राह्मणानां वेदस्य वा द्वेष्टा । ब्रह्मशब्दस्योभयार्थवाचित्वात् " ब्रह्मज्ञो[2] ब्राह्मणः स्मृतः " इति । गणः सङ्घः सहैकया क्रियया जीवन्ति ये ते गणशब्दवाच्यास्तदन्तर्गताश्चातुर्विद्यब्राह्मणाः । परिवेत्तृपरिवित्ती वक्ष्यमाणस्वरूपौ ॥ १५४ ॥

कुशीलवोऽवकीर्णी च वृषलीपतिरेव च ।
पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ १५५ ॥

चारणनटनर्तकगायनादयः **कुशीलवाः** । **अवकीर्णी** विप्लुतब्रह्मचर्यो **वृषली** शूद्रा तस्याः पतिः । अप्रत्यक्षन्यायं[3] च मन्यन्ते । वृषल्या एव च यः पतिः यस्य स्त्र्यन्तरं भार्या नास्ति कुत एतत् प्रकरणान्तरे विगर्हिताचारसंग्रहं श्रूयते "एतान्विगर्हिताचारान्[4]" इति । शूद्राविवाहश्च सर्वेषामनुज्ञातत्वात् न गर्हितः । स च कृतसजातीयापरिणयनस्यानुज्ञातः । अतोऽसत्यां सजातीयायां वृषल्या भर्ता प्रतिषिध्यते । तत्र **पौनर्भवः** पुनर्भूः । पुनरूढां वक्ष्यति नवमेऽध्याये " पत्या वा परित्यक्तेति[5] " । **काण** एकेनाक्ष्णा विकलः । **यस्य च उपपति**-र्जायाजारोऽवस्थितायां भार्यायामस्ति उपेक्षया निन्द्यते । तदुक्तं " अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणीति[6] " ॥ १५५ ॥

भृतकाध्यापको यश्च भृतकाध्यापितस्तथा ॥
शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥ १५६ ॥

भृतकाध्यापकः भृतकः सन् यो स्थितोऽध्यापकः भृतक इति यदीयद्दास्ति वेदमध्यापयामीति यः प्रवर्तते पणेन स भृतकाध्यापकः । एषा हि भृतिः प्रसिद्धा कायवाहादिषु । यस्त्वियता धनेनेयदध्यापयामीति न निश्चित्य वचनव्यवस्थया पूर्वमध्यापयति लभते चाध्यापनार्थं नासौ भृतकाध्यापकः । अनिरूपितपरिमाणपूर्वं चार्थवादे विहितमध्यापनम् । एवं भृतकाध्यापितः यो ह्युत्पन्नबुद्धिः[7] सत्यकामवत् स्वयं भृतिं दत्वाऽधीते स एवमुच्यते । यस्तु पित्रादिना भृतिं दत्वा उपाध्यायान्तराभावेऽध्याप्यते न तस्य विगर्हिताचारत्वं बालो हि पित्रा प्रतिषिद्धेभ्यो निवर्तनीयः । एतदुक्तं " गुरौ शिष्यश्च याज्यश्चेति[8] " । शूद्रस्य शिष्यो व्याकरणादिविद्यासु गुरुश्च शूद्रस्यैव । उपसर्जनीभूतस्यापि संबन्धः स्मृतिशास्त्रत्वात् विगर्हिताचारत्वस्य सर्वशेषत्वात् शूद्रगुरुत्वं च गर्हितं नान्यत् । वाचा दुष्टः परुषानृतभाषी । अभिशस्त इत्यन्ये । **कुण्डगोलकौ** वक्ष्यमाणौ ॥ १५६ ॥

---

१ फ–क्तिनंतः । " क्ति च क्तौ च संज्ञायाम् "(व्या. सू. ३।३। १७४) र–क्तिनंतः । २ ब–ब्रह्माऽपि ब्राह्मणः स्मृतः । ३ र–अप्रत्यक्षन्यायां चात्र मन्यन्ते । ४ अग्रे श्लो. १६७ । ५ श्लो. १७५ । ६ अ. ८ श्लो. १६७ । ७ फ–व्युत्पन्नबुद्धिः । ८ अग्रे श्लो. १७४ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकारणे परित्यक्ता मातापित्रोर्गुरोस्तथा ॥
ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥ १५७ ॥

असति कारणे यः परित्यजति मातरं पितरं आचार्यं च । गुरुशब्दः सामान्यशब्दत्वादुपाध्यायेऽपि प्रवर्तते । यत्तु तथा सति मातापितृग्रहणं न कर्तव्यं स्यात् गुरुत्वादेव सिद्धेरत आचार्य एवेह गुरुरिति व्याचक्षते तदयुक्तम् । असति मातापितृग्रहणे गुरुशब्दः पितर्येव कृत्रिमाकृत्रिमन्यायेन प्रवर्तते । पृथगुपादाने तु शास्त्रान्तरवदाचार्यः श्रेष्ठो गुरूणामिति सामान्यशब्दता सिद्धा भवति । परित्यागकारणं च "त्यजेत् पितरं राजघातकम्" इत्यादि । मातापित्रोः परित्यागस्तत्पादसेवादेः शुश्रूषायाः अकरणं तदाराधने अतत्परत्वम् । गुरोरेवमेव अध्यापनसमर्थेऽध्यापयितरि च तत्त्यागेनान्यत्राध्ययनम् । पतितैः संयोगं गतः संबन्धं कृतवान् । ब्राह्मैर्याजनाध्यापनादिभिर्यौनैः कन्यादानादिभिः । ननु च पतितत्वादेवासौ वर्ज्यः । केचिदाहुः "संवत्सरेण पतति पतितेन सहाचरन्" । नार्वागयं प्रतिषेधः । अथ केयं वाचो युक्तिः संबंधसंयोगं गत इति । नात्र संबन्धशब्दो वैशेषिकादिप्रसिद्ध्या संयोगादिवचनः, किं तर्हि क्रियैवात्र संबन्धहेतुत्वात्संबन्धशब्देनोच्यते याजनादिलक्षणे संयोगशब्दश्च संबन्धमात्रमुपलक्षयति ॥ १५७ ॥

अगारदाही गरदः कुण्डाशी सोमविक्रयी ॥
समुद्रयायी बन्दी च तैलिकः कूटकारकः ॥ १५८ ॥

अगारस्य गृहस्य दग्धा । गरं ददातीति । प्रदर्शनार्थं च गरग्रहणं विषादीनामपि । कुण्डस्य अन्नमश्नाति । एवं गोलकस्य । प्रदर्शनार्थत्वात् कुण्डस्य । सोमं विक्रीणीते । ओषधिः सोमस्तं यो विक्रीणीते यागार्थमौषधार्थं वा । अन्ये तु सोमसाधनान् ज्योतिष्टोमादियागानाहुः । तेषां च विक्रयो यद्यपि न संभवति अमूर्तत्वात् क्रियायास्तथाप्यविदुषामेवंविधस्याचारस्य दर्शनादयं प्रतिषेधः । दृश्यन्ते ह्यविद्वांस एवं वदन्तो यन्मया सुकृतं कृतं तत्तेऽस्त्विति शपथेन विहितं सुकृतैः साधितान् स्वैरिति । तथा च यां च रात्रीमजायेथा यां च प्रेतासि तदुभयमन्तरेणेष्टापूर्तं ते लोकं सुकृतमायुः प्रजां वृञ्जियं यदि मे द्रुह्युरिति । यथैव शपथा एवं दानविक्रयावपि वाचा यः करोति स वर्ज्यते । अकार्यता चात एव ईदृशानां शपथदानविक्रयादीनां वाचा क्रियमाणानामनुमीयते । समुद्रं उदधिस्तं यो याति । बन्दी स्तुतिपाठकः । तैलिकः तिलादीनां बीजानां पेष्टा । कूटकारकः साक्ष्येष्वनृतवादी ॥ १५८ ॥

---

१ र–ये तु । २ 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति न्यायः । तद्यथा–लोके गोपालकमानय कटजकमानयेति यस्यैषा संज्ञा भवति स आनीयते न यो गाः पालयति यो वा कटे जात इति । ३ अ० ९ श्लो० २९० । ४ ड–आगारं ५ फ–विक्रयादौ । ६ ड–कूटहारकः । ७ ड–कूटं कारयतीति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पित्रा विवदमानश्च कितवो मद्यपस्तथा ॥
पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥ १५९ ॥

पित्रा यो विवदते परुषं भाषते । राजकुले व्यवहरतीति पूर्वपक्षोत्तरपक्षभंग्या भागादिनिमित्तम् । तथा च **गौतमः** (अ. १९ सू. १९) "पित्राऽकामेन विरक्तानिति" । प्रतिरोद्धा गुरोरित्यनेनैतत्कथं पुनरुक्तमुच्यते । अन्यः प्रतिरोधः अन्यश्च विवादः । यत्किंचित् गुरोरभिप्रेतं वस्तु कथमिदं सिध्येदिति तत्र संबन्धकथनमप्रतिरोधः । न्याय्येऽपि वस्तुनि तदिच्छाप्रतिघातः प्रतिरोद्धृत्वम् । प्रतिराद्धेति तत्र पाठान्तरम् । आभिमुख्येन हिंसिता हस्तादिना गुरोः प्रतिरोद्धा चपेटादिदानेन अस्मिन्पक्षे स्थितमन्यत्वं विवादस्य । **कितवो** द्यूतस्य कारयिता सभिकः । यस्तु स्वयंदेविता स प्रागेव निषिद्धः । केकरमन्ये पठन्ति । केकरो मद्यप इति । स च वलितप्रेक्षी अध्यर्धदृष्टिः । कातरमन्ये । स च शुकपक्षतारकः । **मद्यपः** सुराया अन्यस्यारिष्टादेर्मद्यस्य पाता सुरापः पतितत्वेनैव निरस्तः । **पापरोगी** कुष्ठी । स हि लोकेऽत्यन्तनिन्द्यः पापरोगीत्यभिधातुं युक्तः । अस्मादेव च प्रतिषेधात् यक्ष्मीत्यत्र न सर्वो व्याधिगृहीतो गृह्यते । कस्तर्हि क्षयी । यदि हि सर्वो गृह्येत तेनैव सिद्धत्वात्पापरोगीति नाकरिष्यत् । **अभिशस्तः** पातकोपपातकयोः कर्तेति लोके प्रसिद्धः । असत्यपि तत्कर्तृकत्वनिश्चये । **दाम्भिकः** छद्मना धर्मं वदति लोकपंक्त्यर्थं न कर्तव्यमिति कृत्वा करोति । **रसविक्रयी** विषस्य विक्रेता । तस्य ह्येतदभिधानम् । उपांशुबधिरशब्दः रसदः सत्रीत्यादि विषदो रसद उच्यते ॥ १५९ ॥

धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः ॥
मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ १६० ॥

धनुः शरांश्च यः शिल्पीव करोति । **यश्चाग्रेदिधिषूपतिः** । दिधिषूशब्दः काकाक्षिवदुभयेन संबध्यते । स्मृतिशास्त्रत्वाच्चेदृशः संबन्धो लभ्यते । लेखा लोष्ठादयोऽपि स्मृत्यर्थे संकेत्यन्ते भवन्ति चार्थकराः । अत एतन्न वाच्यं कथमेकशब्दः समासान्तर्गतो द्वाभ्यां भिन्नप्रस्थानाभ्यां अभिसंबध्येत इति । **गौतमेन** हि द्वयं निषिद्धम् । इहापि संबन्धभेदे लिङ्गम् । द्विपदः समासः । न ह्यग्रेदिधिषूपतिर्नाम कश्चिदस्ति । एतौ च वक्ष्यमाणलक्षणौ । **मित्रध्रुक्** मित्रं यो द्रुह्यति मित्रस्य यः कार्योपघाते वर्तते । द्यूतज्ञः **द्यूतवृत्तिर्जीविका** यस्य । ननु च 'कितवो मद्यप' इत्यत्रोक्तमेव नावश्यं द्यूतवृत्तिरेव द्यूतस्य प्रयोजकः किंतर्हि यः स्वयं देवितुं न जानाति गुरुभयाद्वा न दीव्यति । व्यसनी तु देवैः शास-

१ फ–अन्यस्मिन् । २ र–नाकरिष्यतः ३ ड फ–लोकपंक्त्यर्थं । ४ ड–धनुः शराणां शिल्पी विकरोति ड–अत्र द्वयं निषिध्यते । ६ फ–संकल्पतो । ७ क–अर्थकाराः ८ फ–प्रतिषिद्धम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तयाऽन्यं देवयति । तदर्थो द्वितीयः कितवशब्दः । अथवा अनृतंश्रीकद्यूतसमास्थाणवो द्यूतवृत्तयः । पुत्र आचार्योऽध्यापको यस्य मुख्यमाचार्यत्वं न पुत्रे संभवति ॥ १६० ॥

भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ॥
उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥ १६१ ॥

व्याधिविशेषवचना एते । भ्रामरी अपस्मारी । गण्डमाली कपोले कण्ठे पिटका मालाकारा जायन्ते । श्वित्री श्वेतकुष्ठः । पिशुनः परमर्मप्रकाशकः कर्णेजपः । उन्मत्तः अनवस्थितचित्तो धातुःसंक्षोभेण पिशाचगृहीतः यत्किंचनवादी यत्किंचनकारी वा । अन्धः चक्षुर्विकलः । वेदनिन्दकः । ननु च ब्रह्मद्विट्शब्देनैव ब्रह्मशब्दस्यानेकार्थकत्वात् वेदनिन्दको गृहीत एव । नैवम् । अन्या निन्दा अन्यो द्विषः । चित्तधर्मो द्वेषः । तद्विपर्ययप्रीतिशब्देन कुत्सनं निन्दा ॥ १६१ ॥

हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ॥
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ १६२ ॥

हस्त्यादीनां विनेता दमनकः । गतिशिक्षयिता । नक्षत्रैर्यश्च जीवति । नक्षत्रशब्देन ज्योतिःशास्त्रं लक्ष्यते तेन जीवति ज्योतिषिकः । पक्षिणां श्येनादीनां आखेटार्थं पोषयिता । युद्धाचार्यो धनुर्वेदोपदेशकः ॥ १६२ ॥

स्रोतसां भेदको यश्च तेषां चावरणे रतः ॥
गृहसंवेशको दूतो वृक्षारोपक एव च ॥ १६३ ॥

स्रोतांसि उदकागमाः तेषां भेदकः । सेतुं भित्वा देशान्तरे व्रीह्यादिसेकार्थं नयति । तेषां च स्रोतसामेवावरणे रतः । आवरणं आच्छादनं यतः प्रदेशादुदकमुद्भवति तत् स्थगयति । गृहाणां संनिवेशोपदेशकः वास्तुविद्याजीवी स्थपतिः सूत्रधारादिः । न त्वात्मनो गृहाणां सन्निवेशयिता । दूतो राज्ञः प्रेष्यो दासवद्विनियोज्यः । दूतस्तु सन्धिविग्रहादावेव प्रेष्यते । वृक्षान् रोपयति मूल्येन । धर्मार्थं तु न दोषः । अविगर्हिताचारत्वात् 'विहितं वृक्षारोपणं " दशाम्रवापी नरकं न याति " ॥ १६३ ॥

श्वक्रीडी श्येनजीवी च कन्यादूषक एव च ॥
हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः ॥ १६४ ॥

श्वभिः क्रीडति श्वक्रीडी । क्रीडार्थं शुनो बिभर्ति । श्येनैर्जीवति क्रयविक्रयादिना । प्रागुक्तपक्षिणां पोषकः पञ्जरादिसंस्थितानां धारयिता । कन्यामकन्यां यः करोति स

---

१ ड-कृतश्रीक । २ फ-यस्यामुख्यम् । ३ र-श्वित्र्यर्शी । ४ ड-कपाले । ५ फ-यत्किंचित्कारी । ६ फ-राज्ञा ।

कन्यादूषकः । **हिंस्रः** स्वभावक्रूरः वधरतः । **वृषलवृत्तिः** शूद्रेभ्यः सेवादिना यो जीवति । वृषलपुत्र इति पाठान्तरम् । केवला एव वृषलाः पुत्रा यस्य "शूद्रापत्यैश्च केवलैः" इति गर्हिताचारः । **गणानां** देवतायाजकः । गणयागाः प्रसिद्धाः ॥ १६४ ॥

आचारहीनः क्लीबश्च नित्यं याचनकस्तथा ॥
कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च ॥ १६५ ॥

आचारो गृहाभ्यागतानां पूजादिप्रयुक्तैर्लौकिकसमाचारः तेन वर्जितः । **क्लीबो**ऽल्पसत्वः । भग्नोत्साहः कर्तव्येषु । **याचनकः** सदैव यो याचते यश्च याच्ञया परानुद्वेजयति । वस्तुस्वभावोऽयं याच्ञया याच्यमानोद्वेजनम् । ' नन्द्यादिभ्यो युः ' स्वार्थे कः । **कृषिजीवी** स्वयंकृतया कृष्या जीवति, सति चोपायान्तरे अस्वयंकृतयाऽपि । **श्लीपदी** एकः पादो महान्यस्य । **सद्भिर्निन्दितः** दुर्भगः । विनाऽपि दोषेण सतां द्वेष्यः ॥ ६५ ॥

औरभ्रिको माहिषिकः परपूर्वापतिस्तथा ॥
प्रेतनिर्यापकश्चैव वर्जनीयाः प्रयत्नतः ॥ १६६ ॥

उरभ्रा मेषास्तैश्चरति क्रयविक्रयादिना व्यवहरति तद्धनप्रधानो वा । एवं **माहिषिकः** । परः पूर्वो यस्याः तस्याः पतिः भर्ता । या अन्यस्मै दत्ता अन्येन वा ऊढा तां पुनः यः संस्करोति पुनर्भवति भर्ता पौनर्भवो नरो भर्त्ताऽसाविति शास्त्रेण । प्रेतान्यो निर्यापयति वहति । एते यत्नतो **वर्जनीयाः** ॥ १६६ ॥

एतान्विगर्हिताचारानपाङ्क्तेयान्द्विजाधमान् ॥
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥ १६७ ॥

विगर्हितो निन्दितः आचारः कर्मानुष्ठानमेषामिति । काणादयः पूर्वदोषलिङ्गेन । स्तेनादयोऽनुभूयमानदोषाः प्रत्यक्षादिना । **उभयत्र** दैवे पित्र्ये च **वर्जयेत्** परिहरेत् । अपाङ्क्तेयाः पंक्तिं नार्हन्ति । भवार्थे ढकर्तव्यः । अनर्हत्वमेव पंक्तावभवनेन प्रतीयते । अन्यैर्ब्राह्मणैः सह भोजनं नार्हन्ति । अत एव पंक्तिदूषका उच्यन्ते । तैः सहोपविष्टा अन्येऽपि दूषिता भवन्ति ॥ १६७ ॥

ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति ॥
तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥ १६८ ॥

यथैते स्तेनादयः पंक्तिदूषकाः एवमनधीयानस्तत्तुल्यदोष इत्येवमर्थं पुनर्वचनम् । अन्ये तु व्याचक्षते । अधीयानानां काणादीनामसति वर्तमाने विगर्हिताचारत्वे दैवे कदाचित्-

---

१ ङ–देवतानां । २ देवानां च । फ–प्रयुक्तो । ३ ' नन्दिग्रहिपचादिभ्यो '–(व्या. सू. ३ । १।१३४.) । ४ अकफङ–निर्यातकश्चैव । ५ फ–अभवनं ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्त्यर्थम्। अनधीयानो ब्राह्मणो वर्ज्यः। यस्तु अधीते तस्मै हव्यं कव्यमिति न दीयते एवमर्थमेवात्र हव्यग्रहणम्। हव्ये अनधीयानः केवलो वर्ज्यः। ये च दृश्यमानगर्हिताचाराः अतो ये च वचनेन उभयत्र प्रतिषिद्धास्ते दैवे पित्र्ये च वर्ज्याः। अन्ये तु पित्र्य एव। तथा च वसिष्ठः "अथ चेन्मंत्रविद्युक्तः शारीरैः पंक्तिदूषणैः। अदूष्यं तं यमः प्राह पंक्तिपावन एव सः" ॥ इति ॥ तृणाग्निरिव शाम्यतीति। तृणाग्निर्यथा न शक्नोति हवींषि पक्तुं हुतमात्रेण हविषा शाम्यति उद्वाति च। यस्मिन्नग्नौ हुतं न भस्मीभवति न ततो होमात्फलम्। एवं हि श्रूयते "असमिद्धे न होतव्यम। अग्निर्वै सर्वा देवता" इति। एवमनधीयानो ब्राह्मणस्तृणाग्नितुल्यः। एतदेवाह। न हि भस्मनि हूयत इति। यथा तृणाग्निः प्राग् भस्मीभवति न तत्र हूयते एवं तादृशो ब्राह्मणो न भोज्यते ॥ १६८ ॥

अपङ्क्त्यदाने यो दातुर्भवत्यूर्ध्वं फलोदयः ॥
दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः ॥ १६९ ॥

अस्य प्रतिषेधविधेः फलमाह। पंक्तिमर्हन्तीति पङ्क्त्याः। न पङ्क्त्याः अपङ्क्त्याः। दण्ड्यादिदर्शनाद्रूपसिद्धिः। तेभ्यो दाने यः फलोदयः फलोत्पत्तिर्भवति दातुः तं सर्वमिदानीं ब्रवीम्यवहिता भवतेति ॥ १६९ ॥

अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा ॥
अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते ॥ १७० ॥

अव्रताः असंयताः शास्त्राचारवर्जिताः। परिवेत्तृप्रभृतयो यद्यपि शास्त्रबाह्यास्तथापि भेदेन स्मरणार्थं दोषगुरुत्वार्थं वा कथ्यन्ते। अन्ये चापाङ्क्तेयाः काणश्लीपद्यादयः। तैर्यद्दत्तं भुक्तं श्राद्धे भवति तद्रक्षांसि देवद्विषो भुञ्जते। न च पितरः। अतो निष्फलं तच्छ्राद्धं भवतीत्युक्तं भवति। रक्षोग्रहणमर्थवादः ॥ १७० ॥

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ १७१ ॥

अग्रे आदौ जातः अग्रजः सोदर्यो भ्रातोच्यते। एवं हि पठ्यते॥ "पितृव्यपुत्रान् सापत्नान्परनारीसुतांस्तथा। दाराग्निहोत्रसंयोगे न दोषः परिवेदने" इति। अत्र सोदर्योऽग्रजः। तस्मिंस्थितेऽकृतदाराग्निसंयोगे तिष्ठति। प्रकृतव्यापारनिवृत्तौ प्रयुक्तः अग्निहोत्रशब्दः कर्मवचनोऽपि तदर्थेऽग्न्याधाने वर्तते। स्मृत्यन्तरे विशेषः पठ्यते। "उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव च। राजयक्ष्माऽऽमयावी च न योग्यः स्यात्प्रतीक्षितुम्" ॥ एतदप्यनधिकारोपलक्षणार्थम्। अतश्च पंक्तावपि गृह्येते। काश्चिद्विशेषो

---

१ फ-तद्वत् न च। २ फ-प्रायो। ३ फ-अपांक्त। ४ फ-पंक्त्यान्। ५ फ-अव्रत ६ फ-अत्रं।

For Private And Personal Use Only

ऽधिको व्यपेक्षते । तथा च स्मृतिः । "अष्टौ वर्षाण्युदीक्षेत षडित्येके" इति । एषा च वर्षसंख्या यदा कनीयान् प्राप्तविवाहकालः ततः प्रभृति प्रष्टव्यः । विवाहकालश्च स्वाध्यायविधिनिवृत्तिः ।

ननु च प्रोषिताधिकारे तत्पठितं भर्तरि प्रोषिते यः स्त्रीणां प्रवासकालस्तमुपक्रम्य
भ्रातरीत्यादि पठितम् । सत्यम् । वाक्यान्तरे प्रोषितशब्दस्य प्रत्यक्षः संबन्धोऽवगतः । वाक्या- ९
न्तरे तु संबन्धे प्रमाणं वक्तव्यं न च तदस्ति । यथा स्वरितेनाधिकार इति । न चात्र तच्छब्दो-
ऽस्ति । न च तदपेक्षया विनैव तस्य वाक्यस्यापरिपूर्णत्वम् । वसिष्ठेन चाविशेषेणाग्निशब्देन
स्मार्तस्याप्यग्नेर्ग्रहणं कृतम् । केचित्पितर्यप्यकृताधाने विधिमिच्छन्ति । अग्रजशब्दस्य
यौगिकत्वात् पिताऽप्यग्रजो भवतीति । यद्यप्येवमन्योऽपि योऽग्रजस्तत्राप्येवं प्राप्नोति । न
चायमग्रजानुजव्यवहारः पितापुत्रयोर्विद्यते । स्मृत्यन्तरेऽपि तु पठ्यते (न्या. ४।१।१६४)। १०
"भ्रातरि च ज्यायसीति" । परिवित्तिः पूर्वजो ज्येष्ठः ॥ १७१ ॥

परिवित्तिः परीवेत्ता यया च परिविद्यते ॥
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ १७२ ॥

प्रसंगात्परिवेदनसंबन्धिनामन्येषामपि दोषदर्शनद्वारेण निषेधं करोति । निषेधपरिवर्जने
वर्जितः परिभूतो वा वेदनेन परिवित्तिः परिवर्ज्य ज्येष्ठं करोति परिवेदनं परिवेत्ता । यया १९
कन्यया च परिविद्यते सर्वे ते नरकं यान्ति । दाता याजकश्च येषां नरकगामिनां पञ्चमो
दाता कन्याया एवंप्रकृतत्वात्पित्रादिः । याजको विवाहे यः करोति होमं यो वा तत्रोपदेष्टा ।
अथवा तेषामेव परिवेत्तृपरिवित्तितत्कन्यादातॄणां ज्योतिष्टोमादीनामपि यज्ञानामृत्विक् तस्मा-
ज्ज्येष्ठेन तथा कर्तव्यं यथाऽस्य कनीयसो भ्रातुर्विवाहे विघ्नकर्तृत्वं न भवति । कनीयसाऽपि
कालप्रतीक्षा द्वादशाष्टषड्वर्षादिविषया कर्तव्या । कन्ययाऽपि तादृश्यया दातुं न देयम् । २०
दातृयाजकौ पञ्चमौ येषामिति द्वन्द्वगर्भो बहुव्रीहिः ॥ १७२ ॥

भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः ॥
धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥ १७३ ॥

नियोगधर्मेण प्रवृत्तो भ्रातुर्मृतस्य तद्भार्यागमने योऽनुरज्येत प्रीतीं भावयेत् ।
कामतः नियोगधर्मातिक्रमेण "सकृत्सकृदृतौ" इत्येवं विधिं हित्वा इच्छानुरागं गाढालिङ्गन- २९
परिचुम्बनादि कुर्यादसकृद्वा प्रवर्तेत, चेतसा वा विक्रियेत, कामिनीप्रेमदृष्टिबन्धवचनादि-
लिङ्गेनानुरागित्वेन विभावितो दिधिषूपतिर्वेद्यः । अग्रेदिधिषूपतिलक्षणं तु स्मृत्यन्तरात्
ज्ञेयम् । "जीवत्यग्रे दिधिषूपतिः" इति ।

---

१ ड-व्यपेक्ष्यते । २ फ-द्रतः । ३ ड-द्रष्टव्यः । फ-पृष्टव्या । ४ ड-यद्येवम् । ५ र-या च स्त्री परिविद्यते । ६ फ-निषेधपरिवर्जिते । ७ र-वेदनपरिवित्तिः । ८ र-या च कन्या । ९ फ-अकृतत्वात् । १० फ-तद्भार्यायां । ११ फ-अनुरागतः प्रीतिभावात् । १२ र-माश्लेष ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केचित्तु नैवायं समाम्नाये श्लोकोऽस्तीत्याहुः । अपरिपूर्णं च लिङ्गं ब्रुवते । द्वयस्य लक्षणे कर्तव्ये नापूर्वकारिणामेकस्योपपद्यते । स्मृत्यन्तरे चैतदुभयं लक्ष्यते

"परपूर्वापतिं धीरा वदन्ति दिधिषूपतिम् । यस्त्वग्रेदिधिषूर्विप्रः सैव यस्य कुटुम्बिनी ॥"

न त्विह सम्भवति परपूर्वापतेः पृथगेव निषिद्धत्वात् । तस्मादन्यो दिधिषूपतिः ॥ १७३ ॥

* परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ॥
पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः ॥ १७४ ॥

पत्यौ जीवति तद्गृहे स्थितायां तद्भार्यायां यो गूढोत्पन्नः भंग्या उपपतित्वेन वा पत्युः क्षमया जायते सोऽन्यजातः कुण्ड उच्यते । मृते तु गोलकः । एतावनियुक्तासुताविति केचित् । तदयुक्तम् । तयोरब्राह्मण्यादेवाप्राप्तिः । तस्मान्नियोगोत्पन्नौ कुण्डगोलकौ । कथं पुनरनियुक्तासुतयोरब्राह्मण्यमितरयोस्तु ब्राह्मण्यं जातिलक्षणे पत्नीग्रहणात् । सर्ववर्णेषु तुल्यासु पत्नीष्विति संबन्धिशब्दश्च पत्नीशब्दो भर्तृशब्दवत् । यज्ञसंयोगे च पत्नीशब्दो ह्युपोह्यते न चान्यदीयया भार्यया सहान्यस्य यज्ञाधिकारः । यद्येवं नियोगोत्पन्नयोरपि समानन्याय-त्वान्नैव ब्राह्मण्यम् । दशमे एतन्निर्णेष्यामः । माभूद्वा नियुक्तानियुक्तासुतयोः कस्य-चिदपि ब्राह्मण्यम् ।

ननूक्तमसति ब्राह्मण्ये प्राप्त्यभावात्प्रतिषेधानुपपत्तिः । पतितप्रतिषेधादेव एतद्भविष्यति द्विजातिकर्मभ्यो हानिः पतनम् । द्विजातिकर्मत्वे सति श्राद्धभोजनस्य कुतः पतिते प्राप्तिः । आम्नायते च प्रतिषेधो "ये स्तेनपतिता" (१५० श्लो.) इति ॥ १७४ ॥

ते[3] तु जाताः परक्षेत्रे प्राणिनः प्रेत्य चेह च ॥
दत्तानि हव्यकव्यानि नाशयन्ति प्रदायिनाम् ॥ १७५ ॥

"जात्याख्यायामिति" (न्या. सू. १।२।५८) बहुवचनं प्राणिन इति । ब्राह्मण्यादिव्यपदेशमवजानते प्राणिन इत्येवं व्यपदेशार्हा, न व्यपदेशान्तरमर्हन्ति अतस्ते नाशयन्ति हव्यकव्यानि निष्फलीकुर्वन्ति प्रदायिनां दातॄणाम् । परिवेत्रादीनां लोके नातिप्रसिद्धत्वात् शब्दैश्चास्मृतत्वाद्व्यवस्थार्थं लक्षणप्रणयनम् ॥ १७५ ॥

अपंक्त्यो यावतः पंक्त्यान् भुञ्जानाननुपश्यति ॥
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥ १७६ ॥

---

१ फ–व्युत्पाद्यते; र–पत्नीशब्दो त्युपोह्यते । २ फ–एवन्निर्णेष्यामः । ३ ङ–तौ पजातोः–प्राणिनः । ४ फ–अस्य स्मृतत्वात् । ५ फ–अपांक्त्यो ।

* उत्पन्नयोरधर्मेण हव्यकव्ये च नैत्यके ॥
यस्तयोरन्नमश्नाति स कुण्डाशी द्विजः स्मृतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पंक्तिमर्हन्तीति पंक्त्याः । सद्भिरेकत्रासनभोजनाद्यर्हता पंक्त्यता तदभावादपंक्त्यः । **स यावतः पंक्त्यान्विद्वत्तपस्विश्रोत्रियान् भुञ्जानाननुपश्यति तावतां न तत्र** पितृतृप्त्याख्यं फलं भवति । अतः स्तेनादयः श्राद्धं कुर्वता ततः प्रदेशादपसारणीयाः । **बालिशो** मूर्खः ॥ १७६ ॥

वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य च ॥
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥ १७७ ॥

ननु चान्धस्य कुतो दर्शनम् । येनेदमुच्यते **वीक्ष्यान्धो नवतेरिति** । सत्यम् । तत्प्रदेशसंनिधानमनेन लक्ष्यते । यावान् देशश्चक्षुष्मतो दृष्टिगोचरस्तावतो देशादनावृतादन्धो विवासनीयः । **काणः षष्टेः** । नात्रायमर्थोऽस्त ऊर्ध्वं भोज्या इति । केवलं सङ्ख्यापचयेन दोषलाघवं प्रायश्चित्तविशेषार्थं ज्ञाप्यते । **श्वित्री** कुष्ठी भण्यते । **पापरोगी** प्रसिद्धः ॥ १७७ ॥

यावतः संस्पृशेदङ्गैर्ब्राह्मणाञ्छूद्रयाजकः ॥
तावतां न भवेद्दातुः फलं दानस्य पौर्तिकम् ॥ १७८ ॥

यावतो ब्राह्मणान् स्पृशत्यङ्गैः पङ्क्तिं गतः अत्राप्यङ्गस्य स्पर्शनं न विवक्षितम् । किं तर्हि पूर्ववत्तद्देशसंनिधिः । **पौर्तिकं फलं** पूर्ते भवं पौर्तिकम् । बहिर्वेदिदानाद्यत्फलं तत्पौर्तिकम् ॥ १७८ ॥

वेदविद्वापि विप्रोऽस्य लोभात्कृत्वा प्रतिग्रहम् ॥
विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि ॥ १७९ ॥

प्रसङ्गाच्छूद्रयाजकस्याप्रतिग्राह्यताऽनेन कथ्यते । **वेदविदपि** यदि तस्य शूद्रयाजकस्य संबन्धिनो द्रव्यस्य प्रतिग्रहं करोति । लोभादित्यनुवादः । सोऽपि **विनाशं व्रजति** । अभिलषितेनार्थेन[2] वियुज्यते धनपुत्रपशुशरीरादिना । किंपुनरवेदवित् । वेदविदः किल प्रतिग्रहे नातीव दोष इति वक्ष्यति । **आमपात्रमपक्वं** शरावादिभाजनम् । **अम्भसि** जले क्षिप्तम् ॥ १७९ ॥

सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम् ॥
नष्टं देवलके दत्तमप्रतिष्ठं तु वार्धुषौ ॥ १८० ॥

तस्यां जातौ जायते यत्र विष्ठाऽस्य भोजनं भवति । एवं भिषजे । **नष्टं** निष्फलं उद्वेगकरं वा । नष्टं हि द्रव्यं उद्वेगं जनयति । अविद्यमाना प्रतिष्ठा स्थितिर्यस्य **तदप्रतिष्ठम्** । नानारूपैः शब्दैरेवंविधस्य दानस्य नैष्फल्यम् । कर्तुश्च दोषसंबन्धः[3] प्रतिपाद्यते । नष्टमप्रतिष्ठमिति नानयोरर्थभेदशङ्का[4] कार्या कार्यविभेदात् ॥ १८० ॥

यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥
भस्मनीव हुतं द्रव्यं तथा पौनर्भवे द्विजे ॥ १८१ ॥

---

१ फ-तु । २ र-आभिप्रेतेन । ३ र-न दोषसम्बन्धः । ४ र-नानयोरपिभेदाशङ्का कार्या, कार्याभेदात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयमपि पूर्ववत् व्याख्येयः। वाणिजकस्य भोजनं निषिद्धम्। न तद्देशसंनिधिः। न हि यथा पूर्वत्र वीक्ष्येति दृष्टिगोचरे देशे लक्षणया संनिधिस्तद्वदिह तादृशं किंचिन्निबन्धनमस्ति। पौनर्भवो नवमे वक्ष्यते (अ. ९—श्लो. १७९)॥ १८१॥

इतरेषु त्वपंक्त्येषु यथोद्दिष्टेष्वसाधुषु ॥
मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः ॥ १८२ ॥

यस्मिन्नपंक्त्यदानफलप्रदर्शनप्रकरणे पठिताः अन्धादयस्तेभ्योऽन्ये स्तेनादयः प्रतिकाण्डोद्दिष्टास्तेषु यथोद्दिष्टेषु भोजितेषु दातुरिमान्युपतिष्ठन्ते। मेदोऽसृङ्मांसादीनि तादृशजातौ जायते यत्रैतदाहारो भवति कृमिक्रव्याद्गृध्रादिजाताविति **मनीषिणो** वेदविदो वदन्ति। सर्वस्यायमर्थः। अपांक्तेषु भोजितेषु श्राद्धाधिकारो न कृतो भवत्यकरणे च विध्यतिक्रमदोषोऽवश्यंभावी नित्यत्वादस्य विधेः॥ १८२॥

अपंक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः ॥
तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पंक्तिपावनान् ॥ १८३ ॥

अपंक्त्यैः पूर्वोक्तैः **उपहता** दूषिता **पंक्तिः** परिपद्यैर्ब्राह्मणैः **पाव्यते** निर्दोषा क्रियते। **तान्**वक्ष्यमाणैः श्लोकैः शृणुत। **कार्त्स्न्येन** निःशेषेण ब्रवीमि। अर्थवादरूपाण्यन्यानि पदानि। यथैवैकत्र भुञ्जानो दुष्टो दूषयति अदुष्टान् एवं पंक्तिपावनः स्वगुणातिशयादन्येषामपि दोषानपनुदतीत्यस्यार्थः। न चानेनापंक्त्यानां भोजनमनुज्ञाप्यते। किंतर्हि पंक्तिपावनोऽवश्यमन्वेषितव्यः। तस्मिंश्च लब्धे यद्यन्ये नातिनिपुणतः परीक्षिताः त्रिपुरुषं यावत् तथापि न चेदुपलभ्यमानदोषा वृथाऽपि भोजयितव्या इत्येवमर्थः पंक्तिपावनोपदेशः॥ १८३॥

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ॥
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः ॥ १८४ ॥

अग्र्याः उत्तमाः सर्वसंशयव्युदासेन निपुणतः स्वीकृतवेदाः। **सर्वेषु च प्रवचनेषु अग्र्याः** इत्येवम्। प्रोच्यते व्याख्यायते यैर्वेदार्थः प्रवचनान्यङ्गानि तानि। षडङ्गो वेदो यैरभ्यस्तोऽभ्यस्यते च। श्रोत्रियान्वये जाताः पितृपितामहादयो येषां तादृशा एव।

ननु चेदृशा एव भोज्यतया विहितास्तत्र कोऽतिशयो नेदानीं पंक्तिपावनत्वमुच्यते। किंचिद्विद्वद्भ्यो दानं सति श्रोत्रियत्वाद्विगुणयोगे अधिकोऽयं गुणो द्रष्टव्यः पंक्तिपावनहेतुतया न बहुवचनं व्यक्तचोदनम्। चकारः समुच्चये॥ १८४॥

---

१ फ—तस्मिन्नलब्धे यदि यत्नेन अतिनिपुणतः परीक्षितपुरुषं यावत्। २ ङ—श्रोत्रियान्त्विजांश्चैव। ३ ङ—वेदार्थप्रवचनानि अंगानि। ४ फ—श्रोत्रियत्वे विहितम्। न चेह विद्वत्तोपात्ता। न च तया पंक्तिपावनत्वोपपत्तिः। गुणविशेषापेक्षं हि पंक्तिपावनत्वम्। न गुणाप्रत्यये युक्तम् तस्माद्विद्वदभावे केवलश्रोत्रियाय दानार्थमेतत्। असति विदुषि श्रोत्रियाय दानं मुख्यमेव, न गौणमित्युक्तं भवति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥
ब्रह्मदेयानुसन्तानो ज्येष्ठसामग एव च ॥ १८५ ॥

त्रिणाचिकेतं यजुर्वेदैकदेशः तद्व्रतं च । तद्व्रताचरणेन तदध्यायी त्रिणाचिकेतः । अत्रापि लक्षणयैव पुरुष उच्यते ।

न चैवं मन्तव्यं तावन्मात्रेण पङ्क्तिपावनत्वम् । किं तर्हि सति श्रोत्रियत्वादिगुणयोगेऽधिकोऽयं गुणो द्रष्टव्यः पंक्तिपावनहेतुतया । पञ्चाग्निविद्या नाम छान्दोग्योपनिषदि विद्याऽऽम्नायते (५।१०।९) "स्तेनो हिरण्यस्येत्यादि" यस्याः फलं तदध्ययनसंबन्धात् पुरुषोऽपि पञ्चाग्निः पूर्ववत् । अन्ये तु पञ्चाग्नयो यस्य त्रयस्त्रेताऽग्नयः सभ्यावसथ्यौ च द्वौ पञ्चाग्निः । तत्र सभ्यो नाम यो महासाधनस्य शीतापनोदार्थमेव बहुषु देशेषु व्यवह्रियते । **त्रिसुपर्णो** नाम मंत्रस्तैत्तिरीयके ब्राह्मणे च । " ये ब्राह्मणास्त्रिसुपर्णं पठन्ती " त्यादिः । षडङ्गो वेदस्तं वेत्तीति **षडङ्गवित्** । ब्राह्मधर्मेण आहूय दानेन या दत्ता तस्याऽनुसन्तानस्ततो जातः । **ज्येष्ठसामगश्च** ज्येष्ठदोहानि आरण्यके सामानि तानि गायति स एवमुच्यते । अत्रापि सामगानेन तद्व्रताचरणेन वा पुरुष इत्युच्यते ॥ १८५ ॥

वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः ॥
शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः ॥ १८६ ॥

वेदस्यार्थं जानाति । ननु च षडङ्गविदुक्त एव । सत्यम् । अङ्गैर्विना स्वयमप्यूहति प्राज्ञया यः स इह **वेदार्थविद**भिप्रेतः । अथवा तस्यैवायमनुवादः पुनःपुनःक्रियते । न वेदार्थज्ञानेन विना सत्यप्यन्यगुणयोगे श्राद्धार्हाः । **प्रवक्ता** व्याख्याता वेदार्थस्यैव । **ब्रह्मचारी सहस्रदः** । अविशेषोपादानेन गवां सहस्रं यो दत्तवान् । इदं च युक्तं सहस्रशब्दस्य बहुनामत्वात् बहु यो ददाति उदारो वेत्यर्थः । न हि गवां संख्येयत्वे प्रमाणमस्ति । वेदेऽप्युक्तं " गावो वै यज्ञस्य मातर " इति । अविशेषचोदनायां गावः प्रतीयन्ते । **शतायुर्वृद्धवयाः** । स हि परिपक्वकषायतया पावनत्वमश्नुते शतमायुरस्येति शतायुः । वर्षाणि संख्येयानि प्रसिद्धेः । अथवा शतशब्दो बह्वर्थः । बह्वायुः । वृद्धवयस्त्वं चात्राभिप्रेतम् । उक्तं तु गौतमीये " युवभ्यो दानं प्रथमं एके पितृवत् " इति (अ. १५ सू. १०–११) । एवमर्थमेव च ब्रह्मचारिग्रहणमिह व्याचक्षते । स हि पूर्वतया भवति ॥१८६॥

---

१ त्रिणाचिकेताख्यो वेदभागोऽध्वर्यूणाम् । " पीतोदका जग्धतृणा " इत्यादि तदध्ययनसम्बन्धात् पुरुषोऽत्र **त्रिणाचिकेत** उच्यते । अन्ये च त्रिणाचिकेतमधीयानां न येनाधीतं नाचिकेतचरितं स त्रिणाचिकेतः । **ड**–त्रिणाचिकेतेतमधीयानं व्रतमाम्नातम् । तयेना चारितम् य—। २ **ड**–अथर्ववेदस्योपनिषद्याम्नायते । ३ **र ड**–तद्वेदनसम्बन्धात् । ४ **र**–विक्रियते । ५ **र**–आज्यदोहानि । ६ **फ**–तावदर्थज्ञानेन ७ **र**–इदं तु प्रयुक्तम् । विना सत्यप्यन्यगुणयोगे श्राद्धानर्हाः । ८ **फ**–केभ्यो दानं प्रथमं पितृभ्य इत्येक इति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते ॥
निमन्त्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान् ॥ १८७ ॥

उक्ता यादृशा ब्राह्मणा भोजनीयाः। इदानीमन्येतिकर्तव्यतोच्यते। **पूर्वेद्युर्**यदहः श्राद्धं कतव्यममावास्यायां त्रयोदश्यां वा ततः पूर्वस्मिन्नहनि चतुर्दश्यां द्वादश्यां वा श्वः श्राद्धे कर्तव्ये ब्राह्मणान्निमन्त्रयेत्। **अपरेद्युस्**तदहरेव वा। विकल्पश्चात्र नियमापेक्षः। यः शक्नोति नियमान्पालयितुं स पूर्वेद्युः, अशक्तस्तदहरेव। अधिकनियमानुपालनाच्च महाफलम्। निमन्त्रणे कर्तव्ये अध्येषणपूर्वकम् व्यापारणमभ्युपगमनं च। त्रयोऽवरा येषां ते **त्र्यवराः**। यद्यत्यन्तं न्यूनास्तदा त्रयः। शक्तौ त्वयुजो यथोत्साहमित्युक्तम्। अवशिष्टः पदसंघातः श्लोकपूरणार्थः। **उपस्थिते** प्राप्ते। **यथोदितान्** यथोक्तान् ॥ १८७ ॥

निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा ॥
न च छन्दांस्यधीयीत यस्य श्राद्धं च तद्भवेत् ॥ १८८ ॥

पित्र्ये श्राद्धे **निमन्त्रितो नियतात्मा** योऽसौ **भवेत्**। संयतात्मा ब्रह्मचर्यं परिरक्षेत। अन्यांश्च यमनियमाननुतिष्ठेत स्नातकव्रतादीन्। पुरुषव्रतानां नृत्यगीतादिप्रतिषेधाना कर्माङ्गता विधीयते। तथाकर्तव्यं श्राद्धकृता यथाऽसौ ब्राह्मणो निमन्त्रणात् प्रभृति संयतेन्द्रियो भवति, अन्यथा श्राद्धं दुष्येत्। न च छन्दांसि वेदान् नाधीयीत। यच्च वेदाक्षरोच्चारणमध्ययनं तन्निषिध्यते। जपस्तु सन्ध्योपासनादावप्रतिषिद्धः। **यस्य** तत्कर्तव्यं **श्राद्धं भवेत्**। पित्र्ये श्राद्धे निमन्त्रितवन्नियतात्मा भवेत्। संयतात्मा च सोऽपि नियतात्मा भवेदिति पदयोजना। अतो भोक्तुः कर्तुश्च निमन्त्रणात्प्रभृति तुल्यो नियमोऽनध्ययनं च ॥१८८॥

निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान् ॥
वायुवच्चानुगच्छन्ति तथासीनानुपासते ॥ १८९ ॥

निमन्त्रितेन नियतात्मना भवितव्यमित्यस्य विधेरर्थवादोऽयम्। यस्मान्निमंत्रितान् ब्राह्मणान् अदृश्येन रूपेण **पितर उपतिष्ठन्ति** तच्छरीरमनुप्रविशन्ति। यथा भूतग्रहाविष्टं वायवोऽनुगच्छन्ति। यथा वायुप्रमाणः पुरुषो गच्छत्यनुगच्छति न गच्छन्तं प्राणो जहाति एवं पितरो वायुभूता भवन्ति। **तथाऽऽसीनान्** ब्राह्मणा**नुपासते**। गच्छत्स्वनुगच्छन्ति उपविष्टेषूपविशन्ति। निमन्त्रिता द्विजा पितृरूपापन्ना भवन्तीत्यर्थः। तस्मान्न स्वतन्त्रैर्निमन्त्रितैर्भवितव्यम् ॥ १८९ ॥

---

१ फ–अवधिनियमापेक्षः। २ क ख यद्भवेत्। ३ फ–आतिष्ठेत्। ४ फ–न च। ५ ख–पितरि।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केतितस्तु यथान्यायं हव्ये कव्ये द्विजोत्तमः ॥
कथंचिद्प्यतिक्रामन् पापः सूकरतां व्रजेत् ॥ १९० ॥

केतित उपनिमन्त्रितः। हव्ये कव्ये दैवे पित्र्ये च। अङ्गीकृत्य निमन्त्रणमभ्युपगम्य श्राद्धभोजनम् । यदि कथंचिदतिक्रामति भोजनकाले न संविधीयते ब्रह्मचर्यं च न रक्षति तदा सूकरतां गच्छति स ब्राह्मणः । **कथंचित्**कामाद्विस्मृत्य वा । **यथान्याय**मिति वृत्तपूरणम् । अन्ये त्वाहुः । प्रार्थ्यमानस्यानभ्युपगम एवातिक्रमः । तथा च **श्राद्धकल्पे** उक्तम् "अनिन्दितेनामन्त्रितो नातिक्रामेत्" इति । एतच्चार्थुक्तम् । लिप्सया प्रवृत्तिः श्राद्धे न पुनः शास्त्रतः । तत्र सत्यां लिप्सायां यदि नाङ्गीकरोति तदा को दोषः ॥ १९० ॥

आमंत्रितस्तु यः श्राद्धे वृषल्या सह मोदते ॥
दातुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ १९१ ॥

वृषलीशब्दः स्त्रीमात्रोपलक्षणार्थः सामान्येन ब्रह्मचर्यस्य विधानात् । अतो ब्राह्मण्यपि वृषल्येव । वृषस्यति चालयति भर्तारमिति यौगिकत्वं दर्शयति । अतोऽयमर्थः । भोजनमङ्गीकृत्य तदहः यः स्त्रिया **सह मोदते** रमते तया सह सुरतसंभोगेच्छया संलापालिङ्गनाद्यपि यो जनयति तस्यायं दोषः । **दातुः** श्राद्धस्य कर्तुः **यद्दुष्कृतं** पापं **किंचित्तत्सर्वं** तस्मिन् सङ्क्रामति । अनिष्टफलयोगमात्रमनेन निर्दिश्यते । अन्यथा यत्र दाता पुण्यकृत् तत्र न कश्चिद्दोषः स्यात् । मोदनं हर्षोत्पत्तिः । तेन संलापालिङ्गनाद्यपि न कर्तव्यम् ॥ १९१ ॥

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥
न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः ॥ १९२ ॥

अक्रोधनाः क्रोधवर्जिताः । **शौचपराः** शौचं शुद्धता मृद्वारिभ्यां प्रायश्चित्तेनान्तःशुध्या वा । **सततं** शुद्धेर्विशेषणम् । तेन निष्ठीवनाद्याचमनादि तत्क्षणमेव कर्तव्यम् । **ब्रह्मचारिणः** स्त्रीसंभोगं परिहरति । **न्यस्तशस्त्राः** न्यस्तं त्यक्तं शस्त्रं यैः । शस्त्रग्रहणं दण्डपारुष्योपलक्षणार्थम् । **महाभागाः** औदार्यधनित्वादिगुणयोगो महाभागता । यैत् एवंविधं पितृणा रूपं ब्राह्मणानाविशन्ति अतस्तैस्तद्रूपधारिभिर्भवितव्यमित्यर्थवादेनायमर्थो विधीयते । पूर्वं **पूर्वदेवताः** पितरो नाम कल्पान्तरेण तेऽप्येते देवता एवेति स्तुतिः । पूर्वकालं पितृणामर्चनीयत्वात्पूर्वग्रहणम् ॥ १९२ ॥

---

१ क-हव्ये द्रव्ये । २ ख-कामेत् । ३ क-रक्षीति; अ-ड-क्ष-चरति; क-ख-चलति । ४ फ-क्ष-तच्च । ५ क-ख-ड-लिप्साया; क्ष-लिप्सायां । ६ अ-क-ख-त-स-चलती ड-चलयति । ७ ड-भोक्ष्ये इत्यंगकृत्य । ८ फ-अ-क-ख-स-तदाहर्षात् । ९ फ-अदृष्टफलं । १० अ-क-ख-ड-क्ष-योगमानम् ११ र-अर्धशुध्या । १२ अ-क-ख-ड-क्ष-य एवंविधं; क-अत एवंविधं । १३ ड-अनुवादेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः ॥
ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत ॥ १९३ ॥

य एतेषां पितृणा**मुत्पत्तिर्ये च** पितरो **यैरुपचर्या** ब्राह्मणेन सोमपाः क्षत्रियेण हविष्मन्तः इत्यादि तत्सर्व**मप्यशेषत** इदानीमुच्यमानं **निबोधत** बुध्यध्वम् । **नियमै**रित्यनुवादः । पूर्वमेव विहितत्वात् "नियतात्मा भवेत्" इति (श्लो० १८८) । बहुवचनं बहुत्वान्नियमा[1]नाम् ॥ १९३ ॥

मनोर्हैरण्यगर्भस्य[2] ये मरीच्यादयः सुताः[3] ॥
तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः ॥ १९४ ॥

हिरण्यगर्भः प्रजापतिः । तस्य पुत्रो **हैरण्यगर्भो** मनुः । तथा चोक्तं प्रथमाध्याये (९१ श्लो०) " एवं सर्वं स सृष्ट्वेदं मां चेति " । तस्य मनोर्ये **मरीच्यादयः** पुत्राः अत्र्यङ्गिरसावित्यादयस्**तेषामृषीणां ये पुत्रास्त एते पितृगणाः** ।

ननु च पित्रादयः सर्वस्यात्मीया[4]पितरः । एवं हि चोदितः पित्रे पितामहाय प्रपितामहाय पिण्डान्निर्वपेत् । तथा 'अत ऊर्ध्वं पुत्रास्त्रिभ्यो दद्युरिति'[5] । तत्र किमिदमुच्यते ऋषीणां पुत्राः पितरः सोमपा नाम विप्राणामिति । न च विकल्पः[6] शक्यः प्रतिपत्तुं सोमपेभ्यो दद्यात्पितृपितामहेभ्यो वेति । अत[7] उत्पत्तौ पुत्रेण कर्तव्यमिति श्रूयते । संबन्धिशब्दश्च पुत्रशब्दः । तथा " पिता यस्य तु वृत्तः स्यादिति " (अग्रे २२१ श्लो०) तस्माद्वक्तव्योऽस्य प्रकरणस्यार्थः । उच्यते । स्तुतिरियं पूर्वविधिशेषभूता[8] । नात्र तेषां संप्रदानता श्रुता ।

ननु चोपचर्या इति विधिरस्ति । नायं चरतिः[9] सामान्यक्रियारूपो विधिविषयो भवितुमर्हति । उपचारो नाम कश्चिद्दानयागादिवद्भेदेन[10] प्रतीयते । प्रायेण ह्ययं[11] करोतिवत् संनिहितक्रियापरतया प्रयुज्यते । सन्निहितं च श्राद्धम् । तत्र वसिष्ठसंप्रदानकं विहितं न शक्यं पुनर्विधातुं विधेयत्वे च न सन्निधिरस्ति[12] । संनिहितस्य[13] चरतिर्बाधकः । योऽपि लोके 'गुरव उपचर्या' इतिप्रयोगस्तत्रापि शुश्रूषालक्षणार्थः पादधावनादिः प्रतीयते । सोऽपि यथोदितानां पितृणां न संभवति प्रकृत्यैकवाक्यतया चार्थवत्तोपपत्तेर्नार्थान्तरकल्पनाऽपि संभवति । यदि च सोमपादयो यथावर्णश्राद्धे देवतात्वेनाभिप्रेताः स्युस्ततोऽभिजनवर्णनमुपयोगि तावकत्वे तु सर्वमुपपद्यते । यःकश्चित्पितृद्वेषात्पित्र्ये कर्मण्युपहतबुद्धिरनादरवान्स्यात्तस्य प्रवृत्त्यर्थमिदमारभ्यते ।

---

१ अ-क-ख-ड-छ-क्ष-नियमानं । २ ड-हिरण्यगर्भस्य । ३ र-पुत्रादयः । ४ अ-क-ख-ड-क्ष-आत्मीयाः । ५ अ-क-ख-ड-क्ष-तत ऊर्ध्वं पित्रादिभ्यस्त्रिभ्यो दद्युरिति । ६ फ-वचनविकल्प । ७ फ-यतः । ८ अ-क-ख-ड-क्ष-भूतानां तेषां संप्रदानता । ९ ड-स्तुत्यंशः । १० फ-भेदेन । ११ फ-प्रायेणान्वयं करोति । १२ फ-सन्धिरस्ति । १३ फ-असन्निहितस्यखतिर्प्राच ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मावमंस्थाः मृतमनुष्यरूपाः पितरो येन न तर्पिताः श्राद्धे कं दोषं करिष्यन्ति, तर्पिता वा कं गुणमिति । यत एते महाप्रभावाः सर्वस्य जगतः प्रभुर्हिरण्यगर्भस्तस्य पुत्रो मनुः तस्यैते पौत्रा अत एव ऋषीणां चेत्युच्यते । न मनोर्येकेचिदन्ये पुत्राः किंतर्हि षयस्ते च प्रथितप्रभावाः । ऋषयश्च प्रथितप्रभावा मरीच्यादयः । तेषां पुत्राः पितरो ुविधाश्च प्रतिपत्तारो य एतादृशेभ्योऽर्थवादवाक्येभ्यः प्रवर्तन्तेतराम् ।

ये च व्याचक्षते । सोमपादिदृष्टिः पितृषु कर्तव्येति ते प्रमाणाभावादुपेक्षणीयाः । न हि यथाऽऽदित्ये ब्रह्मदृष्टिः उपदिश्यते एवमिह तादृशं किंचन वचनमस्ति ।

येऽप्याहुः 'गृहीत्वा गोत्रनामनी पितृभ्यो दद्यादिति' तच्चैतद्गोत्रं सोमपाः इत्यादिवर्णभेदेन । तदप्ययुक्तम् । नामनिर्देशोऽयं न गोत्रनिर्देशः सोमपानामितिश्रवणात् । गोत्रनामधेयत्वेऽपि नामशब्द उपपद्यत एवेति चेत् । एवं तर्हि गोत्रनिर्देशवैयधिकरण्यं स्यात् । पितृणां सोमपा गोत्रमिति । न तु पितरः सोमपा इति ।

अथाभेदोपचारेण गोत्रेण सन्तानव्यपदेशो दृष्ट इत्युच्यते । यथा बभ्रुर्मन्दुरिति । अत्रोच्यते । इदमिह निरूप्यं किमेतद्गोत्रं नाम आदिपुरुषः संज्ञाकारी विद्यावित्तशौर्यौदार्यादिगुणयोगेन ख्याततमो येन कुलं व्यपदिश्यते पुत्रिकानुलिङ्गा इति । एवं तर्हि सर्वेषामेव ब्राह्मणादीनामवान्तरगोत्रभेदाः सन्तीति । स्मरन्ति च । यादृशं पुरुषं तत्सन्तानजाः पुरुषा वयममुष्यकुले जाता इत्यतस्तेनैवं व्यपदेशो युक्तः । न हि सोमपा वयमिति कश्चिद्गोत्रत्वेन सोमपान्स्मरति यथा मृगुगर्गगालवान् । ब्राह्मणानां च तैरेव गोत्रव्यपदेशो युक्तः । तानि हि मुख्यानि गोत्राणि । रूढिरूपेण न तत्र गोत्रशब्दः प्रवर्तते । न हि तेषां गोत्रत्वे एतल्लक्षणमस्ति । आदिपुरुषः संज्ञाकारी गोत्रमिति । अनादित्वादेतद्गोत्राणां ब्राह्मणादिजातिवत् । न हि पराशरजन्मत ऊर्ध्वं पाराशरव्यपदेशः केषांचिद्ब्राह्मणानाम् । एवं सति आदिमत्ता वेदस्य प्रसज्यते । अतो नित्यत्वादेतस्य गोत्रस्य गोत्रव्यपदेशस्योदकतर्पणादौ तदेव गोत्रं श्रयितव्यम् । ये तु संज्ञाकारिणस्ते न नित्याः । इदानींतनाः न च नित्ये संभवत्यनित्यसोमपादानं वैदिके कर्मणि युक्तम् ।

अतो ब्राह्मणैर्यथागोत्रं गार्ग्याय गर्गगोत्राय वा स्वधा इदं उदकमस्त्विति एवमादिशब्देनोद्देशं कृत्वा ततो नामोच्चार्य उदकदानादि कर्तव्यम् । क्षत्रियादीनां नैतादृशो गोत्रव्यवहारो विद्यते ।

न हि यथा ब्राह्मणो गोत्रं नियतं स्मरति एवं क्षत्रियादयः । तस्मात्तेषां लौकिकमेव

---

१ फ–मैव मंस्थाः । २ फ–समुद्दिश्यते । ३ ङ–क–यथाहुः । ४ फ–नामधेयत्वेति । ५ फ–उत्पद्यते । ६ फ–निर्देश्ये । ७ क–सोमपानां गोत्रमिति ! ८ फ–गोत्रसंतान— । ९ फ–इत्येतत्स्वेनैव— । १० फ–इदानींतना नित्या इत्येवं भवत्यनित्यानां सोमपानामुपादानं... ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोत्रं आदिपुरुषः संज्ञाकारी ख्याततम इति। अतस्तेन गोत्रेण श्राद्धादौ व्यपदिश्यन्ते। आदिमत्त्वाऽपि नामधेयेनैव। न तु तेषां क्षत्रियाणां हविर्भुगित्यादिगोत्रतया श्राद्धादौ व्यपदेशमर्हन्ति।

येऽप्याहुरज्ञातपित्रादिनामकास्तेषामेतैः शब्दैः श्राद्धादि चोद्यते "सोमपानाह्वयामि सोमपेभ्यः स्वधेति" एतदपि न सम्यक्। उक्तं हि "नामान्यविद्वांस्ततः पितामहप्रपितामहेति"। यदि चार्थवादतया न प्रकृतशेषत्वेनार्थवत्ता लभ्येत तत एव कल्पा आश्रियेरन्। न त्वेकवाक्यतयाऽन्वये संभवति वाक्यभेदकल्पनेनार्थो न्याय्यः॥ १९४॥

विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः॥
अग्निष्वात्ताश्च देवानां मारीचा लोकविश्रुताः॥ १९५॥

श्राद्धार्थवादा अमी श्लोकाः। अशेषेणैकवाक्यत्वात्। न हि साध्यानां पितरः श्राद्धसंप्रदानं शिष्यन्ते। देवतात्वात्साध्यानां च देवतानां कर्मस्वधिकारो न नियोज्यत्वाभावात्। न हि देवता नियोक्तुं शक्यते देवतात्वहानिप्रसंगात्। अधिकारे सति प्रतिपत्तव्यं कर्तृत्वम्। कर्तृत्वे च कुतः सम्प्रदानभावः। न चान्यद्देवतारूपम्। विराजः सुताः **विराट्सुताः** सोमसदो नाम ते **साध्यानां पितरः**। ईदृशमेव नित्यं कर्मावश्यं कर्तव्यम्। यत्साध्याः पूर्वदेवाः कृतकरणीयतया अपि पितॄनर्चयन्ति। अग्नौ पक्वं चरुपुरोडाशादिकं स्वदन्ते। **अग्निष्वात्ताः देवानाम्**इन्द्राग्न्यादीनां पितरः। मरीचेर्जाता **मारीचाः**। **लोकविश्रुताः** प्रसिद्धाः॥ १९५॥

दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्॥
सुपर्णकिन्नराणां च स्मृता बर्हिषदोऽत्रिजाः॥ १९६॥

सर्व एते दैत्यादयः शास्त्रानधिकृताः अर्थवादार्थं संकीर्त्यन्ते। तेषां च स्वरूपमितिहासप्रसिद्धम्। **सुपर्णाः** पक्षिविशेषाः। **किन्नराः** अश्वमुखास्तिर्यञ्चः। एवंविधमेतन्नित्यं कर्म। यद्दैत्यदानवरक्षांसि यज्ञविध्वंसकराण्यपि नातिवर्तन्ते तथा तिर्यञ्चोऽप्यसंज्ञाः स्मृतिकाः। अत्रेर्जाता **बर्हिषदो नाम**॥ १९६॥

सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः॥
वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः॥ १९७॥

उक्तार्थः प्रागवायं श्लोकः। सोमं पिबन्ति ज्योतिष्टोमादि। देवतास्त्विन्द्रादयः। **हविर्भुजश्चरुपुरोडाशादिदेवताः। आज्यपा** आघाराज्यभागप्रयाजादिदेवताः। **सुकालिनः**

१ फ–बोधने। २ फ–उक्ता हि। ३ अ–क्ष–क–ख–याज्यत्वाभावात्। ४ फ–पित्र्यं। ५ फ–सर्वदेवाः। ६ फ–कृतकरणीयाः। ७ फ–अदन्त्यतः। ८ फ–देवतानाम्। ९ क–अत्रजाः। १० झ–शास्त्रनंगीकृताः। ११ अ–क–ख–ङ–क्ष–अर्थवादाः। १२ क–ख–अ–क्ष–यक्षविशेषाः। १३ फ–पित्र्यं। १४ अ–क–ख–ङ–क्ष–असंज्ञाः स्मृतिकः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालयंति अपवर्जयन्ति कर्मेति सुकालिनः । कर्मापवर्गहोमदेवता "अयाश्चाग्नेस्यनभिशस्तिश्चेत्यादि "विहिताः ॥ १९७ ॥

सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरःसुताः ॥
पुलस्त्यस्याज्यपाः पुत्रा वसिष्ठस्य सुकालिनः ॥ १९८ ॥

हविर्भुज एव हविष्मन्तः । कविर्भृगुः । 'काव्यं वदन्त्युशनसमिति' स्मरंति मार्गवं च । यथैता देवता ऋषीणां पुत्रा एवं त्वदीयाश्चापि पितरो देवतारूपा एवेति माऽवमंस्थाः ॥ १९८॥

अनग्निदग्धानग्निदग्धान्काव्यान्बर्हिषदस्तथा ॥
अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत् ॥ १९९ ॥ *

अनग्निदग्धः सोमः न ह्यग्निना तस्य पाकोऽस्ति तेन यां देवता इज्यन्ते ता अप्यनग्निदग्धाः समृद्धास्तद्गुणत उच्यन्ते । एवमग्निदग्धानि चरुपुरोडाशादीनि हवींषि अग्निना पच्यन्ते । तैर्या देवता इज्यन्ते ता अग्निदग्धाः । पूर्ववदेवमभिसंबन्धः क्रियते । ये अग्निदग्धा उच्यन्ते तानग्निदग्धान्निर्दिशेत् । ये अनग्निदग्धास्तान्त्सोमपानेव निर्दिशेत् । **एवं काव्यान्बर्हिषद इति ।** कवेः पुत्राः काव्यास्ते च "सोमपास्तु कवेः पुत्राः" (श्लो. १९८) इत्युक्ता **बर्हिषदो**ऽत्रिजा उक्ताः । नायमेवकारो[3] यथादेशं द्रष्टव्यः । तथा ह्ययमर्थः स्यात् । विप्राणामेवेति पितरो न क्षत्रियादीनाम् । तच्च प्रागुक्तेन विरुध्यते । न चैते वर्णभेदेन पितृत्वेनोक्ताः । येन तस्मादाच्छिद्य ब्राह्मणादिसंबन्धितां[4] एषामुच्यते । तस्मादपकृष्य एवकारोऽग्निष्वात्तानेव सौम्यानेवं निर्दिशेदित्येवं संबन्धनीयः । विप्रग्रहणमनुवादत्वात्क्षत्रियादिप्रदर्शनार्थम् । एवंनामानश्चैते पितरो वेदे श्रूयन्ते "अग्निष्वात्ताः पितरो येऽग्निदग्धा ये अनग्निदग्धा" इति तान्मन्त्रानुदाहृत्य विवृणोति ।

अथ चैवं संबन्धः क्रियते । य एतैः शब्दैः पितर उच्यन्ते तान् विप्राणामेव निर्दिशेत् स्वपितॄन् । न च शब्दभेदेनार्थभेदशङ्का कर्तव्या । विप्रग्रहणमधिकार्युपलक्षणार्थं प्राधान्यात् । प्रधानेन ह्युपलक्षणं भवति राजा गच्छतीति ॥ १९९ ॥

य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः ॥
तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् ॥ २०० ॥

एते तु मुख्या गणाः सोमपादयः पितॄणाम् तेषामपि पुत्रपौत्राः अनन्ता विद्यन्ते । तेऽपि पितर एव । अस्माद्वा नियमवचनादेतद्गम्यते । न सोमपादय उद्देश्याः । यदि हि तेषामपि पुत्रपौत्राः पितरस्ते ह्युद्देश्याः स्युर्न च तेषां किंचिन्नामधेयमाम्नातं तस्मा-

---

* **अग्निष्वात्ताहुतैस्तृप्ताः सोमपास्तुतिभिस्तथा । पिण्डैर्बर्हिषदः प्रीताः प्रेतसुद्विजभोजने ॥**

१ अ-क-ख-क्ष-सोमे । २ अ-क-ख-ड-क्ष-यायदेवता । ३ फ-मायम् । ४ फ-सम्बन्धिनः पितृत्वेनोक्ता येन तेषामुच्यन्ते । ५ फ-न्ते च । ६ र-तान्मंत्रः सुहृद्धृत्वा विवृणोति । ७ फ-अस्मान्नियम वचनात् । ८ अ-ख-ग-क-क्ष-फ-उद्देश्यास्युः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्थवादत्वेनावसीयते । गवाश्वप्रभृतित्वात्पुत्रपौत्रमित्येकवद्भावः । अनन्तकमपरिमितम् । स्वार्थे कः ॥ २०० ॥

ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः ॥
देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः ॥ २०१ ॥

न पित्र्यं कर्म दैवात्कर्मणो न्यूनं द्रष्टव्यं अपि तु तदेव प्रधानतमम् । यतो जन्मज्येष्ठाः पितरो देवानाम् । तथाहि **ऋषिभ्यः** पितर उत्पन्नाः पितृभ्यो देवा इत्येष सृष्टिक्रमः । **देवेभ्यो**ऽन्यत्**सर्वं जगत् चरं** जंगमं **स्थाणु** स्थावरं **अनुपूर्वशः** प्रथमेऽध्याये उक्तः क्रमः । अतिक्रान्तोऽर्थवादसंपातः ॥ २०१ ॥

राजतैर्भाजनैरेषामथो वा राजतान्वितैः ॥
वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते ॥ २०२ ॥

राजतानि च भाजनानि रूप्यमयानि पात्राणि तदभावे रजतान्वितैः दारुमयानि ताम्रमयानि सौवर्णेन वा रौप्येणैकदेशयुक्तानि कर्तव्यानि । एतच्च पात्रं देयं घृतमध्वादिव्यञ्जनैसौहित्याक्षिप्तं पात्रं तत्रेयं रूप्यमयता विधीयते । पात्रे यच्च पिण्डनिर्वपणादि तद्धस्ताभ्यामेव कर्तव्यम् । यदप्युदकनिनयनं पिण्डेष्ववनेजनादि च तदपि हस्ताभ्यामेव । 'अपसव्येन हस्तेनेति' वचनात् । यत्तूदकतर्पणमान्वहिकं तदपि हस्तेनापसव्येन सव्येन वा कर्तव्यम् । इदं हि श्राद्धप्रकरणे पठितम् । तन्न । अप्राकरणिकस्य कर्मणोऽगमप्यनारभ्याधीतम् । तत्रैव वचनमस्ति ' भवतुवादः स्यात् । हर्षयेद्ब्राह्मणानिति ' । तथा कश्चिन्मधुररसप्रियोऽपरो क्षाररसप्रियस्तत्र भक्ष्यं भोज्यं च विविधं पानानि सुरभीणि चेति बहुषु पानकेषु सत्सु यद्यन्यानुरोधेन भवतु **वार्यपि** । अपिशब्दः पात्रप्रशंसां सूचयति । तिष्ठतु तावत्संस्कृतभोजनदानं वारिमात्रमपि यदि रूप्यपात्रेण दीयते तद्रूप्यगुणसंबन्धादक्षयं भवति **अक्षयायोपकल्पते** । अक्षय्यायास्तृप्तेर्हेतुर्भवतीत्यर्थः । **श्रद्धयेति** सर्वदानेषु विहितत्वादनुवादः ॥ २०२ ॥

देवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते ॥
दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम् ॥ २०३ ॥

देवानुद्दिश्य यत्क्रियते तद्दैवं कार्यम् । ततः **पितृकार्यं विशिष्यते विशेषेण** कर्तव्यमुद्दिश्यते । अनेन पित्र्यस्य प्राधान्यमाह । दैवं तत्राङ्गं कर्मेत्युक्तं भवति । अङ्गकर्मतामेव स्पष्टयति । दैवं हि यद्ब्राह्मणभोजनं **तत्पितृकार्यस्याप्यायनं** वृद्धिकरम् । न स्वतःप्रधानं पित्र्यस्यैव पोषकम् ॥ २०३ ॥

---

१ व्या. सू. (२।४।१०) । २ र–देवदानवाः । ३ क–फ–क्ष–स्थास्नु । ४ अ–क–ख–ड–अथ वा । ५ अ–क–क्ष–व्यञ्जनं मनोचित्याक्षिप्तं ।; फ–सौहित्य— । ६ फ–ततु । ७ अ–क–क्ष–तं तां कर्मणोऽहं - अथानारभ्याधीतम् ।; फ–तं नाप्राकरणिकस्य... । ८ अ–क–ख–क्ष–स्यादृष्ट्ये वृष्ट्ये ।; ड–वर्षये व्राह्म । णातीती । ९ फ–वा तत्संकृत– । १० क–ख–फ–लक्ष्यते । ११ फ–अक्षयतृप्तिहेतोः– । १२ फ–उपदिश्यते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषामा रक्षभूतं तु पूर्वं दैवं नियोजयेत् ॥
रक्षांसि विप्रलुम्पन्ति श्राद्धमा रक्षवर्जितम् ॥ २०४ ॥

रक्षैव आ रक्षं तत्प्राप्तं **आ रक्षभूतं** आ रक्षार्थमित्युक्तं भवति । उपमायां वा भूतशब्दः । यदा[1] तु रक्षार्थं अतः **पूर्वं दैवं** ब्राह्मणं **नियोजयेत्** निमन्त्रयेत[2] आसने चोपवेशयेत् । अपरोऽर्थवादः । रक्षांसि अदृश्यानि कानिचित्सत्वानि इतिहासे[3] क्रिया **विप्रलुम्पन्ति** आच्छिन्दन्ति पितृभ्यः श्राद्धम् । के पुनर्देवा उद्देश्याः ? गृह्ये तावत् " विश्वान्देवान् हवामहे " इतिमन्त्रस्य विनियोगाद्विश्वेदेवाः प्रतीयन्ते । पुराणे[4]ऽप्युक्तं " विश्वेदेवा इति श्रुतिरिति " ॥ २०४ ॥

दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत् ॥
पित्र्याद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः ॥ २०५ ॥

आदिश्च अन्तश्च आन्द्यतौ । दैवं[5] आद्यन्तावस्येति **दैवाद्यन्तम्** । दैवेन कर्मणा आदि[6]रुपक्रमः श्राद्धस्य कर्तव्यः । अतश्च निमन्त्रणं देवानां पूर्वं कर्तव्यम् । अंतः समाप्तिः । विसर्जितेषु पित्र्येषु ब्राह्मणेषु पश्चाद्देवानां विसर्जनं कर्तव्यम् । गन्धादिदानेऽपि दैवोपक्रमतां मन्यन्ते । न तु तेषां पदार्थानां दैवेनोपक्रमसमाप्ती संभवतः आवृत्तिप्रसङ्गात् । प्रयोगधर्मश्चायं दैवाद्यन्तता । न[7] प्रतिपदार्थधर्मः । पदार्थानां तु गन्धमाल्यादीनां दैवोपक्रमं विशेषेण कर्तव्यमुद्दिश्यते । तावत्प्रावृत्तिकेनैव क्रमेण सिध्यति । निमंत्रणं तावद्दैवपूर्वं कर्तव्यं यत एव प्रथमः पदार्थ आरब्धस्तत एवान्येषामारंभो युक्तः पदार्थः पदार्थान्तरारम्भं नियच्छति । यतस्तदुक्तं ' प्रकृत्या कृतकालानां गुणानां तदुपक्रमादिति ' पदार्थधर्मः । तच्छ्राद्धकर्म[8] ईहेत कुर्यात् । परिशिष्टोऽर्थवादः । **पित्र्याद्यन्तं[9] न तद्भवेत्** । दैवाद्यन्तत्वस्य विहितत्वात् पित्र्याद्यन्तप्रतिषेधोऽर्थवादतया लौकिकवाक्यवन्नेयः । लोके हि किंचिद्विधाय तद्विपरीतमप्राप्तमपि निषेधति । क्रिया हि द्रव्यं विनयति नाद्रव्यमिति । **क्षिप्रं[10] नश्यति सान्वयः**. संतानाफलप्रदर्शनरूपोऽयं निन्दार्थवादः । अतश्च सर्वं परिवेषणादिदैवपूर्वकं कर्तव्यम् ।

यस्त्वन्तरा भक्ताद्युपनयनं पिपासतां च पानादिदानं तद्यस्यैवेच्छा प्रथममुपजाता तस्मा एवोपनेतव्यं अनर्थिनस्तदनुरोधेनोपनीयमाने प्रधानविधि[11]र्बाधः स्यात् 'हर्षयेत् ब्राह्मणानिति " । तथा कश्चिन्मधुररसप्रियोऽपरोऽम्लरससात्म्यस्तत्र भक्ष्यं भोज्यं च विविधं पानानि सुरभीणि चेति बहुषु पानकेषु सत्सु यद्यन्यानुरोधेन न[12] अन्यत्र रससात्म्यमापा-

---

१ अ-क-ख-ड-क्ष-यदावनुरक्षार्थं; र-यदा चतुर्थरक्षागतः । २ अ-क-ख-ड-क्ष-निमन्त्रयेतासनायोपवेशयेत् । ३ क-र-इतिहासप्रक्रिययोर्विलुप्रम्पन्ति । ४ अ-क-ड-फ-क्ष-पुराणेत्युक्तं-ख पुरुषेत्युक्तं । ५ फ-दैवो । ६ र-आद्यः । ७ फ- दैवपूर्वं कर्तव्यं यत एष पदार्थधर्मः । पदार्थानां तु गन्धमाल्यादीनां दैवोपक्रमताप्रावृत्तिकेनैव क्रमेण सिध्यति । निमन्त्रणं तावद्दैवपूर्वं कर्तव्यं । ८ र-तच्छुध्यं; फ-तच्छ्राद्धकर्मीहे तत्कुर्यात् । ९ फ-न पित्राद्यन्तः । १० इदं पदं फ-पुस्तके न दृश्यते । ११ र-विधि, स्यात् । १२ फ-अन्यत्र ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दयेत्ततो व्याधिरस्य जनितः स्यात् ॥ [1]तस्मादुपक्रमसमापने एव भोजने देवादिना ॥ २०५ ॥

शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् ॥
दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् ॥ २०६ ॥

शुचिर्भस्मास्थिकपालिकाद्यनुपहतः । **विविक्तो** विस्तीर्णो बहुभिर्जनैरनाकीर्णः । **दक्षिणाप्रवणो** दक्षिणस्यां दिश्यवनतस्तादृशं देशं यत्नेन संपादयेत् । स्वभावतश्चेत्तादृशो न लभ्यते तथा कर्तव्यं यथा स्वल्पव्यापारेण संपाद्यते । तं च गोशकृतोपलेपयेत् । मृदादयो निवर्तन्ते । गोमयेनोपलेपनियमात् ॥ २०६ ॥

अवकाशेषु चोक्षेषु जल[2]तीरेषु चैव हि ॥
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥ २०७ ॥

अवकाशो देशः । **चोक्षाः** स्वभावशुचयो मनःप्रसादजनका अरण्यादयः । **जलतीराणि** सरित्समीपपुलिनादीनि । **विविक्ते**षु विजनेषु तीर्थेषु च । विध्यन्तरमिदम् । अतश्च गोमयोपलेपननियमो नास्ति । उपपादयेदिति वचनात् । यत्र संपाद्यं शुचित्वं तत्रासौ नियमः । स्वभावतःशुचिषु दृष्टमद्भिर्निर्णिक्तमित्येतावतैव योग्यता । एतेषु देशेषु **दत्तेन** कृतेन श्राद्धे नित्य[3]तुष्टाः **पितरो** भवन्तीति ॥ २०७ ॥

आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक् पृथक् ॥
उप[4]स्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेत् ॥ २०८ ॥

उपक्लृप्तेषु कल्पितेषु विन्यस्तेषु **पृथक्पृथक्** विभागेन । [5]नैकमासनं दीर्घधौतफलकादि सर्वेभ्यो दद्यात् । परस्परं यथा न स्पृशन्ति तथोपवेशनीया इति पृथग्ग्रहणम् । **बर्हिष्मत्सु** दर्भविष्टरास्तीर्णेषु **उपस्पृष्टोदकान्** स्नातान् कृताचमनविधींश्च **तान्** पूर्वनिमन्त्रितानुपवेशयेत् ॥ २०८ ॥

उपवेश्य तु तान्विप्रानासनेष्वजुगुप्सितान् ॥
गन्धमाल्यैः सुरभिभिरर्चयेद्देवपूर्वकम् ॥ २०९ ॥

उपवेशनानन्तरं **गन्धमाल्यैरर्चयेत्** । **गन्धान्** कुङ्कुमकर्पूरादीन् दद्यात् । **माल्यानि** कुसुमस्रजः । **सुरभि**ग्रहणं माल्यविशेषणम् । निर्गन्धानि पुष्पाणि न दद्यात् । गन्धेष्वपि युक्तं विशेषणं सन्ति गन्धा असुरभयस्तन्निवृत्त्यर्थम् । अथवा सुरभिभिर्धूपैः । स्वतन्त्रं सुरभिग्रहणम् । दैवेभ्यो ब्राह्मणेभ्यः पूर्वं दत्वा ततः पित्र्ये[6]भ्यो दातव्यम् ।

---

१ फ–तस्मादुपक्रमः समानो देवादि । २ फ–नदीतीरेषु । ३ फ–नाति तुष्टाः । ४ र–उपसृष्टोदशत् । ५ फ–विभागेनैवमासनं । ६ फ–पितृदेभ्यो; ल–पितृभ्यो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदं तु दैवपूर्वग्रहणं प्राग्भोजनप्रवृत्तेः पदार्थानां तदादिनियमार्थम् । प्रवृत्तभोजनानां तु पानव्यञ्जनादिषु न नियम इत्येवमर्थमाहुः । अन्यथा कोऽर्थः पुनरभिधाने स्यात् । अजुगुप्सितान् अनिन्दितान् विप्रान् । अनुवादोऽयं तादृशानामेव विधानम् । अथवा सत्यपि भूतप्रत्ययनिर्देशे प्रकृत्यर्थकर्तव्यतानिषेध एवायम् । उपरिष्टान्न जुगुप्सेत न निन्देतेत्युक्तं भवति । प्रत्ययार्थमात्रत्यागो वरं न सर्वपदार्थत्याग इति मन्यन्ते । अनुवादे हि कृत्स्नमेव पदमनर्थकम् ॥ २०९ ॥

तेषामुदकमानीय सपवित्रांस्तिलानपि ॥
अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह ॥ २१० ॥

अनुलिप्तेषु स्रग्विषु सुरभिधूपाघ्रितेषु अर्घोदकमुपनेतव्यम् । तेनैव सहपवित्रांस्तिलानपि । पवित्रशब्दो दर्भेषु वर्तते । तेषां ब्राह्मणानामुदकमानीय दत्वा तैरनुज्ञातोऽग्नौ होमं कुर्यात् । ब्राह्मणैरनुज्ञातः कुर्यादिति संबन्धः । सह सर्वे युगपदनुज्ञां दद्युः । अनुज्ञापनवाक्यमपि सामर्थ्यप्राप्तम् । तेर्न[1] हि ते प्रार्थिता अनुजानीरन् । ततश्चाग्नौ करवाणि करिष्ये इत्येवमादीनि प्रश्नवाक्यानि लभ्यन्ते । अनुज्ञावाक्यमपि सामर्थ्यात्प्राप्तम् । सर्वं चैतत्साधुभिः शब्दैः कर्तव्यम् । प्रदर्शितं चैतत् गृह्यकारैः "अग्नौ करवाणि करिष्य इति चानुज्ञापयेदोंकुर्वित्येवं ब्रूयुः" ॥ २१० ॥

अग्नेः सोमयमाभ्यां च कृत्वाऽऽप्यायनमादितः ॥
हविर्दानेन विधिवत्पश्चात्संतर्पयेत्पितॄन् ॥ २११ ॥

यदग्नौकर्तव्यं तदुच्यते । अग्नेः चतुर्थ्यर्थे षष्ठी । अग्निरेका देवता[2] । सोमयमाभ्यामिति द्वन्द्वस्य देवतात्वं अग्नीषोमवत् । अनयोर्देवतयोरादित आप्यायनं हविर्दानेन कृत्वा पश्चात्सन्तर्पयेत्पितॄन् पिण्डनिर्वपणं ब्राह्मणभोजनं च कुर्यादित्यर्थः । गृह्ये त्वन्या देवताः समाम्नाताः । येषां गृह्यं नास्ति तेषामिदं देवतावचनम् । आप्यायनं पोषणम् । हविषा देवताः पुष्यन्तीत्यर्थवादः[3] ॥ २११ ॥

अग्न्यभावे[4] तु विप्रस्य पाणावेवोपपादयेत् ॥
यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते ॥ २१२ ॥

स्मार्तस्य वैवाहिकस्य दायादेर्वा अग्नेरभावे विधिरयमुच्यते । लौकिकस्य तु पितृयज्ञनिषेधात् भावाभावावचिन्त्यौ[5] "न पैतृयज्ञिको[6] होमो" लौकिकेऽग्नाविति वक्ष्यति(२८२ श्लो.)। कथं पुनस्तस्याग्नेरभावः । प्रोषितस्याग्निना विना द्रव्यब्राह्मणदेशसंपत्तौ च श्राद्धकाल

---

१ र–न हि तेऽप्रार्थिता...। २ फ–देवता । ३ र–अर्थः । ४ क–ख–ख–अग्न्याभावे । ५ ख–भावाभावविधिचिन्त्यौ । ६ फ–पैतृयज्ञियो ।

१५

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उक्तो नामावस्यैव[1]। प्रोषितेन यदि पङ्क्तिपावनः प्राप्तो द्रव्यं वा कालशाकादि तत्रायं विधिरुच्यते।

ननु च प्रोषितस्य कथं श्राद्धाधिकारः। * यदि तावद्भार्या[2] प्रवसति अग्निनाऽपि तत्रैव सान्निधातव्यम्। यतो नोभाभ्यामग्नेर्विरह इष्यते। भार्यया यजमानेन च। एवं हि श्रूयते "नाग्निरन्तरितव्यः प्रवसताम्" इति। अथ केवल एव गृहस्थः प्रवसेत्तदा भवेदग्न्यभावः। किन्तु मध्यकत्वादेतस्य सहाधिकाराच्च भार्यायामसंनिहितायां तदिच्छाया अभावात् कथं साधारणस्य श्राद्धे विनियोगः। साधारणे हि द्रव्ये अन्यतरानिच्छायां त्याग एव न संवर्तते। *

अथोच्यते। तीर्थेष्वपि श्राद्धकरणमनेन न्यायेन प्राप्नोति। तत्रेमानि वचनानि विरुध्यन्ते

"पुष्करेष्वक्षयं श्राद्धं तपश्चैव महाफलम्। महोदधौ प्रभासे च तद्वदेव विनिर्दिशेत्"॥ इति।

नैष दोषः। भार्यया सह तीर्थयात्रां गच्छतः साग्निकस्योपपत्स्यते। इह तु भार्यया सह प्रवासस्तदा नास्त्यग्नेरभावः। अथ केवलस्य तदा भार्येच्छाया अपरिज्ञानादनधिकारा उच्यन्ते। प्रवसन् भार्यामनुज्ञापयति "धर्माय विनियोगं द्रव्यस्य करिष्यामि" इति तत्प्राप्तानुज्ञोऽधिकरिष्यते। प्राक् चोपनयादसत्याग्निपरिग्रहे विधिरयं भविष्यति। अस्ति चानुपनीतस्य श्राद्धाधिकारः "स्वधानिनयनादिति" दर्शितम्। स्नातस्य च प्राग्विवाहात् पितृमरणादावग्न्यभावः।

ननु च परमेष्ठिमरणेऽग्निपरिग्रहः काठके पठ्यते। कृतदारस्यासौ द्रष्टव्यो न स्नातकमात्रस्य। द्वौ हि कालौ स्मार्तकस्याग्नेर्विहितौ भार्याविवाहे। तत्र येन विवाहकाले न परिगृहीतोऽग्निः पित्राऽविभक्तत्वात् ज्येष्ठेन वा सह वसता "भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तेत" इति अनेन तस्यासौ द्वितीयः कालः "दायकालाहृते वा" इति। एष एव दायकाले यदा पिता म्रियते तदपेक्षमेवैतत्। शुचिर्भूतः पितृभ्यो दद्यात्। "प्राग्नो ह्यग्निमानीय प्रतिजागृयात्" इति। न चेदग्न्याधानं श्राद्धाङ्गं तदा सति तदर्थाग्न्यस्योत्पत्तिः श्राद्धं वा वर्तते। न चाप्यत्यागोऽस्ति "एष औपसदोऽग्निस्तस्मिन् पाकयज्ञः" इति पठ्यते। न च पाकयज्ञेऽप्यभार्यस्याधिकारः[3]। "पत्न्यवेक्षितमाज्यं भवति। व्रतं च पत्न्युपेयादिति" दर्शपूर्णमासयोः श्रूयते। न च यदा पत्नी तदैतत् व्रतोपायनाज्या-

---

१ फ–नामाबास्यैव। तत्र प्रोषितेन स...। * * एतचिन्हान्तर्गतः पाठः फ–र–ढ–पुस्तकेष्वेव दृश्यते। २ अ–क–ख–ड–श–यदि तावद्भार्यायासन्निहिताया तदिच्छया त्याग एव न संवर्तेत। अथोच्यते। ३ ड–पाकयज्ञेष्वभार्यस्ये......।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेक्षणे पत्नीकर्तृके भविष्यत इति शक्यमत्रकल्पयितुं नित्यवदाम्नानात् । तत्रौपसदोऽग्निरित्येष विधिर्होतव्यः प्राप्नोति ।

ननु च न पितृमरणमेव दायकालः । एवं हि पठ्यते । " सपिण्डीकरणं कृत्वा विभजेरन् ततः सुताः " इति विभागस्यायं कालो न दायस्य विभागेऽपि नायं नियमो यतो धर्मात्पृथक् क्रियेति[1] पठ्यते । तस्याश्च धर्मत्वं विभक्तानां पृथक् पृथक् श्राद्धकरणेनातिथ्यादिपूजया च । ततश्च " नव श्राद्धं सह दद्युः " इत्यादीनि वाक्यानि समाप्तविद्याविषयाणि । ईषद्भिद्यो[3] रागोद्रेकात्स्वदारनियमं मातिक्रमिषमिति कृतविवाहः प्रक्रान्तवेदार्थप्रवणस्तस्य संवत्सरमात्रेण विद्यासमाप्ताविदमुच्यते "सपिण्डीकरणं कृत्वा विभजेरन्निति" । तदा मृतभार्यस्य पुनर्दारांश्चिकीर्षत आ दारप्राप्तेर्भवत्यग्नेरभावः । सर्वथा पत्न्या सह यष्टव्यमित्यस्तित्ववचने सति नाकृतविवाहस्याग्निपरिग्रहः ।

एवं स्थितेऽग्नेरभावे आहुती ब्राह्मणस्य हस्ते प्रक्षिपेत् । कस्य ब्राह्मणस्य । य एव निमन्त्रितास्तेषामन्यतमस्य दैव उपवेशितस्यान्यस्य वा निमन्त्रितस्यार्थवादो ' यो ह्यग्निरिति' मन्त्रदर्शितः संमतश्चेदर्थविद्भिः ॥ २१२ ॥

अक्रोधनान्सुप्रसादान्वदन्त्येतान् पुरातनान् ॥
लोकस्याप्यायने युक्तान् श्राद्धे देवान् द्विजोत्तमान ॥ २१३ ॥

अयमर्थवाद एव । ब्राह्मणानां देवतारूपत्वं संपादयति । अग्निर्देवता । तत्र हुतं तन्मुखेन देवता अश्नन्ति । ब्राह्मणोऽप्येवंरूपः । तद्धस्तेऽपि क्षिप्तं देवता अश्नन्त्येव । किंपुनर्देवतानां रूपं येन ब्राह्मणोऽपि देवतारूप उच्यते । अत आह । **अक्रोधनानिति** वेदं ब्रुवते तदर्थं दर्शयति । य एवंस्वभावा ब्राह्मणास्तेषां हस्ते आज्याहुती प्रक्षेप्तव्ये । अन्ये त्वाहुः । पूर्वत्राक्रोधना इत्यादिना पितॄनुद्दिश्य निमन्त्रितानां स्तुत्यानामक्रोधनादिधर्मो विहितः । अनेन देवनिमन्त्रितानामिति विशेषः । तथा चाह । **श्राद्धे देवानिति** । पुरातनमुनय एवं वदन्ति । द्वितीयान्तो वा पठितव्यः । **पुरातनानेतान्देवान्**साध्यदेवानस्मिन्कल्पे समुत्पन्नान् **लोकस्याप्यायने युक्तान्** एवं श्राद्धं भुञ्जते । तत्र नैवं मन्तव्यम् दृष्टसुखार्थिनो लोभात्स्वार्थे[6] प्रवर्तन्तेऽतश्च किमित्येषां पूजा क्रियते । यत आप्याययन्ति लोकं पृथिवीमन्तरिक्षं दिवं चातो नैषामवज्ञा कर्तव्या ॥ २१३ ॥

अपसव्यमग्नौ कृत्वा सर्वमावृत्परिक्रमम् ॥
अपसव्येन हस्तेन निर्वपेदुदकं भुवि ॥ २१४ ॥

अग्नौ यत्कर्तव्यं ' अग्नये स्वधा नम ' इति आहुतिप्रक्षेपलक्षणं कार्यं **तदपसव्यम्** ।

---

१ ड–क्रियतेति; फ–क्रियेते । २ ड–ख–नच । ३ फ–ईषद्विद्यो रागोद्रेकात्स्वदारनियमं मातिक्रमिषमिति । ४ फ–श्राद्धदेवान् । ५ फ–ते आज्याहुती । ६ क–ड–स्वार्थे । ७ फ–सर्वमावृत्य विक्रमम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणेन हस्तेन कर्तव्यं न सव्येन नोभाभ्यां । "उभयोर्हस्तयोर्मुक्तम्" इतिनिषेधात् । हस्तद्वयसंयोगेन कर्तव्यताशङ्कायामपसव्येनेत्युक्तमिति केचित् । इदं त्वयुक्तम् । या अग्नावाहुतयो हूयन्ते तासां च यः आवृत्परिक्रमस्तस्यापसव्यता विधीयते । दक्षिणासंस्था आहुतीः कुर्यात् नोदक्संस्थाः । यथा दैवे दर्व्या वा हविर्भिस्तु कारयितव्यं नोदीच्यां किंतर्हि दक्षिणाभिमुखं यथोदकं पित्र्येण तीर्थेन कार्यते । सर्वग्रहणादन्यदपि परिवेषणाद्यपसव्यमेव कर्तव्यमपसव्येन हस्तेनोदकं निर्वपेत् । 'शनैरिति' वा पाठः । अत्रार्थः । अन्यथा "राजतैर्भाजनैः" इत्यनेन राजतभाजनप्राप्तये सव्यहस्तविधिः । आवृत्तिराहृत् । २१४

त्रींस्तु तस्माद्धविःशेषात्पिण्डान्कृत्वा समाहितः ॥
औदकेनैव विधिना निर्वपेद्दक्षिणामुखः ॥ २१५ ॥

यत्तद्धोमार्थं पात्रे गृहीतमन्नं तस्माद्धुतशिष्टात् त्रीन् पिण्डान् कृत्वा दक्षिणस्यां दिशि मुखं कृत्वा निर्वपेत् । दर्भेषु पितॄनुद्दिश्य प्रक्षिपेत् । संहतं द्रव्यं पिण्डशब्देनोच्यते । तेन विशदमन्नं न दातव्यम् । औदकेन औदको विधिर्यः समनन्तरमेवोक्तः 'अपसव्येनेत्यादि' (२१४ श्लोके) ।

अत्रेदं संदिह्यते । किं यत्तदन्नं ब्राह्मणभोजनार्थं साधितं ततोऽप्युद्धृत्य हविःसंस्कारः कर्तव्यः । ततः पृथक् चरुसाधनीय इति । किं परिमाणं च तद्धविरिति । न ह्यत्र 'चतुरो मुष्टीनि'त्यादिपरिमाणसंभवः । विचारितमेतत् विशेषाश्रवणात् । कामचारः परिमाणं यावता अर्थसिद्धिर्भवति । औदकविध्यतिदेशाच्च स्वहस्तेनापसव्येन पिण्डनिर्वपणं न राजतैः पात्रैः । समाहितग्रहणं वृत्तपूरणार्थम् ॥ २१५ ॥

न्युप्य पिण्डांस्ततस्तांस्तु प्रयतो विधिपूर्वकम् ॥
तेषु दर्भेषु तं हस्तं निर्मृज्याल्लेपभागिनाम् ॥ २१६ ॥

न्युप्य दत्वा दर्भेषु तान् पिण्डान् तं हस्तं निर्मृज्याद्दर्भेषु तेषु येष्वेव पिण्डनिर्वपणं कृतम् । स्मृत्यन्तरदर्शनात् । दर्भमूलेषु मार्जनम् । अपरे च न हस्तसंलग्नस्यान्नस्योदकस्य वा दर्भेषु संश्लेषणं यदि न किंचिदपि हस्ते संश्लिष्येत्तथापि हस्तं दर्भेषु निमृज्यादेव । न ह्येतत्प्रतिपत्तिकर्मैव । येनासति वचनप्रयोजने न क्रियते । नेह श्रूयते हस्तलग्नं निर्मृज्यात् किंतर्हि हस्तमेव ।

ननु च लेपभागिनामिति श्रूयते तत्रासति लेपे न प्राप्नोति । अतः किमुच्यते यदि न किंचिदपि हस्ते संश्लिष्येत्तथापि कर्तव्यमिति । उच्यते । साक्षात्

१ अग्रे २२५ श्लोके । २ अ-क-ळ-क्ष-फ-चरुसाधनाय । ३ ळ-उदकविधि । ४ फ-वृत्तपूरण वृत्तपूराणार्थम् । ५ फ-निमृज्यात् । ६ ड-दर्भस्तलेषु । ७ ड-क्ष-दर्भे हस्तेषु । ८ ड-न ह्येतत्प्रतिपत्तिस्तस्यैव । ९ अ-फ-फ-क्ष-निर्मृज्यते ।

For Private And Personal Use Only

मूर्तमन्नं कदाचिन्न श्लिष्यति। पिण्डेष्वनुवर्त्यमानेषु अन्नरस उष्मा च संक्रामति हस्ते स एव लेप उच्यते। लेपभागिनामिति षष्ठी। निर्माजनस्य तत्संबन्धिताम् आह। न च लेपभागिनः प्रत्यक्षदृश्याः सन्ति येषां स्वस्वाम्यादिसंबन्धो लेपस्य क्रियेत। तस्माल्लेपभागिनामयं भागोऽस्त्विति मनसा ध्यायेत। शब्देन वोद्दिशेत्। अन्ये तु प्रपितामहात्पूर्वे ये पितरस्तान् लेपभागिन आहुः। अस्मिन्दर्शने प्रपितामहपित्रे प्रपितामहपितामहायेत्यादिभिः शब्दैरुद्देशः कर्तव्योऽसति तन्नामनिवेदने। हस्तमित्येकवचननिर्देशादेकेनापसव्येन हस्तेन पिण्डनिर्वपणं दर्शयति। प्रयत इत्यनुवादो विहितत्वात्। विधिपूर्वकमितिशास्त्रान्तरदृष्टं विधिं परिगृह्णाति। 'गन्धमाल्यधूपाच्छादनसिद्धोपहारैः पिण्डं निर्वपेदिति' शङ्खः। यस्त्विह विधिः श्रुतः स स्वमतेनैवोक्त इति विधिपूर्वकमित्येतदेनर्थकं तस्माच्छास्त्रान्तरविध्युपसंहारार्थं विधिपूर्वकमिति वचनम्॥ २१६॥

आचम्योदक्परावृत्य त्रिरायम्य शनैरसून्॥
षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मन्त्रवित्॥ २१७॥

दर्भेषु पिण्डान् दत्त्वोदीचीं दिशं परावर्तेत। सव्येन मार्गेण। स्मृत्यन्तरे हि 'सव्यावृदुदक्परावृत्येति' पठ्यते। उत्तराभिमुखः स्थित्वा आचामेत्। आचम्य त्रीन् प्राणायामान् कुर्यात्। असून्प्राणानायम्य सन्निरुध्य इत्येव। अत्र च "गायत्रीं शिरसा" इत्यादिविधिर्नास्ति। शनैर्यथा नातिपीडा भवति। तथा चाह। यथावाक्यं प्राणा नासिका तदभिमुख एव सकृन्नमस्कुर्यात्। वसन्ताय नम इत्यादि पितॄंश्च नमस्कुर्यात्। मन्त्रवत् 'नमो वः पितर' इत्यादिना मन्त्रेण। पितॄणां नमस्कारः पिण्डाभिमुखेन कर्तव्यः। 'अभिपर्यायवृत्त्येति' हि स्मृत्यन्तरम्॥ २१७॥

उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः॥
अवजिघ्रेच्च तान्पिण्डान्यथान्युप्तान्समाहितः॥ २१८॥

यत एव पात्रादुदकेन प्राक्पिण्डदानाद्दर्भेषूदकनिनयनं कृतं तत एव पुनर्निनयनं पिण्डान्तिके पिण्डसमीपे कर्तव्यमिति। शेषग्रहणं प्रतिपत्त्यर्थं तस्योदकस्य। तथाहि शेषशब्द उपपन्नो भवति। अतश्च कथंचित्तस्याभावे नास्ति पुनर्निनयनम्। गृह्ये तु 'नित्यं निनयनमि'त्युक्तम्। अवजिघ्रेच्च तान् पिण्डान् अवघ्राणं गन्धोपलब्धिः। गृह्ये

१ ड-मूर्तिप्रदत्रं। २ फ-ऊष्मावसंपर्कात्। ३ क-ड-क्ष-क्रियते। ४ फ-ध्यायते। ५ फ-ड-क्ष-चोद्दिशेत् अ चाद्दिशेत्। ६ अ-क-ड-क्ष-पित्र्ये। ७ फ-इत्याद्यनुवादो। ८ र-स्वमतेनैवोक्तमिति। ९ अ-क-ड-क्ष-अर्थकं। १० अ-क-ड-क्ष-आचम्य। ११ र-वरावर्त्येत। १२ अ-क-ड-क्ष-अतिपर्यायवृत्त्येतिहिस्मृत्यंतरम्।

Shri Mahavir Jain Aradhana Kendra　www. kobatirth.org　Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तु " चरोः प्राणभक्षं भक्षयेत् " इत्युक्तम् । यथान्युप्तान् येन क्रमेण निरुप्तान् पित्रे पितामहाय प्रपिताहायेति । समाहित इति श्लोकपूरणम् ॥ २१८ ॥

पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः ॥
तानेव विप्रानासीनान्विधिवत् पूर्वमाशयेत् ॥ २१९ ॥

अत्यन्ताल्पिका मात्रा अवयवो भागस्तमेव यो ब्राह्मणोऽयं पितरमुद्दिश्य उपवेशितः तदीयात्पिण्डात् किंचिन्मात्रं स एवाशयितव्यः । अनुपूर्वश इत्युक्तार्थं इह तच्छब्दात्प्रकृतपरामर्शकादन्यभाव इत्यत्र न प्रकृतवचनैरेवापूर्वमन्यस्माददनीयात् ॥ २१९॥

म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् ॥
विप्रवद्वाऽपि तं श्राद्धं स्वकं पितरमाशयेत् ॥ २२० ॥

उक्तं "पितृभ्यः पिण्डान्निर्वपेत् " इति । क एते पितरो नाम अनेकार्थो हि पितृशब्दो जनयितरि वर्तते । जनकः पितेति संबन्धिशब्दो दृश्यते । पूर्वप्रमीताः पित्रादयोऽन्ये च संबन्धिनः प्रेताः पितर उच्यन्ते । तथा च "नमो वः पितरः" इत्यादि-मन्त्रा बहुवचनान्ताः समर्था निगदा भवन्ति । । अत एव स्त्रीश्राद्धे नोह्यन्ते । नमस्ते मातर्नमस्ते पितामही इत्यादि न क्रियते । अत एकोद्दिष्टे संख्योहः क्रियते न प्रातिपदिकोहः । तथा च सूत्रकारः " एकवन्मन्त्रानूहेत " इत्यादि । 'नमस्ते पितरि'त्येवमूहः क्रियते । यो भ्रातुः पितामहादेर्वा एकोद्दिष्टं करोति स चैवमूहति । नमस्ते पितामह नमस्ते पितृव्येत्यादि । पितृव्यादीनामनपत्यानां श्राद्धं विहितम् । यो यत आददीत स तस्मै दद्यादिति देवता-विशेषवचनोऽप्यस्ति पितृशब्दः कूटस्थनित्येऽर्थे वर्तते । निरुक्तकारा हि दैवते मध्यस्थान् पितॄन् समामनंति "मरुतः रुद्राक्षभृतः पितर" इति । एवमनेकार्थे पितृशब्दे विशेषाव-धारणार्थमाह । म्रियमाणे जीवति पितरि सति पूर्वेषां पितामहप्रपितामहतत्पितॄणां निर्वपेत्त्रयाणां बहुवचननिर्देशात् । तथा च गृह्ये " येभ्यः पिता दद्यात्तेभ्यः पुत्रो दद्यात्पितापुत्रौ चेदाहिताग्नी स्यातामिति " ।

ननु च न चतुर्थं पिण्डो गच्छतीत्याहुः । सत्यम् । नैवात्र चतुर्थः पिण्डो दीयते । पक्षान्तरमाह । विप्रवद्वा यथाब्राह्मणनिमन्त्रणापूर्वकं ब्रह्मचारिणो नियमवंतश्च पूज्यन्ते तथैव जीवत्पितृकेण पिता भोजनीयः । श्राद्धं श्राद्धार्थमन्नं श्राद्धम् । अत्र च पितृत्वमेव भोज्यत्वे कारणं न जातिगुणावपेक्ष्यौ । एवं ह्याहुः पितृप्रीत्यर्थं श्राद्धं तत्र मृतस्य प्रीतौ कर्तव्यायां को जीवति पितरि परिमंत्रो येनासौ न भोज्येत् । स्वक-मित्यनुवादः संबन्धिशब्दत्वादेव सिद्धेः ।

---

१ फ-नियतक्रमेण । २ फ-श्राद्धे । ३ फ-नित्यार्थे । ४ र-मरुतरुद्राविभयऽपितर इति । ५ फ-परिभावो।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजनमत्र पितृभ्यो हितं पिण्डनिर्वपणं तु दर्भेषु पितॄणां कर्तव्यमेतत्त इति विरोधात् । यदि हि पात्रस्थानीया दर्भास्तदा जीवतः पितुः स्वाम्ये दानोत्पत्तौ अल्पिकां मात्रामाशयेदिति न युज्यते । जीवतो हि स्वमिच्छाविनियोज्यम् । न च तस्मिन्पिण्डेऽञ्जनादि दानमुपपद्यते अर्धजरतीयप्रसङ्गात् । न ह्यत्राञ्जनादिसंस्कृतेन पितुः किंचित्प्रयोजनमस्ति तस्मादृष्टार्थमञ्जनादिदानम् । अञ्जनादिरहितं तु कदाचिदात्मनः पितुः परस्य वा भोजनयोग्यं भवतीत्येवमर्धजरतीयम् । तस्मादस्मिन्पक्षे पिण्डनिर्वपणं द्वयोः पितामहप्रपितामहयोः । गृह्यकारास्तु स्मरन्ति "जीवत्पितृकस्य न पिण्डपितृयज्ञो न श्राद्धम्" । किंतर्हि "अनारम्भ एव तस्य कर्मणो होमान्तता वा" ॥ २२० ॥

पिता यस्य निवृत्तः स्याज्जीवेच्चापि पितामहः ॥
पितुः स नाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् ॥ २२१ ॥

पितुर्नामसंकीर्तनेन तदीयावाहनपिण्डदानब्राह्मणभोजनानि लक्ष्यन्ते । **कीर्तयेत्प्रपितामहम्** । जीवते पितामहाय न दद्यात् । किंतर्हि ततः पूर्वाभ्यां पितुःपितृभ्यो निपृणीयादिति स्मरन्ति ॥ २२१ ॥

पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः ॥
कामं वा समनुज्ञातः स्वयमेव समाचरेत् ॥ २२२ ॥

यथा जीवत्पिता भोज्यते तद्वत्पितामहोऽपि अनुज्ञात्वाऽपि मातामहम् प्रार्थ्य समाचरेत्स्वयम् । परतो द्वयोर्दद्यात् । प्रपितामहाय एकस्मा एव वा । एष्वकामं स्वयमित्यनयोरर्थः ॥ २२२ ॥

तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम् ॥
तत्पिण्डाग्रं प्रयच्छेत्तु स्वधैषामस्त्विति ब्रुवन् ॥ २२३ ॥

यदुक्तं पिण्डेभ्यः स्वल्पिकां मात्रामाशयेदिति तस्यायं कालविधिर्देशविधिश्च । अग्रदेशात्पिण्डस्य मात्रा आदातव्या । दर्भास्तिलोदकं च दत्वा तदनन्तरं पिण्डभागं **प्रयच्छेत्स्वधैषामस्त्विति ब्रुवन्** एषामिति सर्वनाम्ना विशेषनामानि गृह्यन्ते । एवं संबन्धः क्रियते । येषां यानि नामानि तान्युच्चार्य स्वधाऽस्त्विति ब्रूयात् । अतः स्वधाशब्दयोगे चतुर्थ्या निर्देशः कर्तव्यः । स्वधा देवदत्तायास्तु स्वधा यज्ञदत्तायास्त्विति । एवंव्याख्याने शास्त्रान्तरविरोधो न भवति ॥ २२३ ॥

पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्द्धितम् ॥
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥ २२४ ॥

१ क—अनुज्ञां पितामहात्प्राप्य समाचरेत् । २ क—एवं च संबन्धम् । ३ क—व्याख्यायमाने ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उभाभ्यां हस्ताभ्यां स्वयं गृहीत्वा **अन्नस्य वर्धितं** अन्नेन पूर्णं भाजनं **विप्रान्तिके** रसवत्यगारादीनां यत्र ब्राह्मणा भोज्यंते तस्मिन्देशे **उपनिक्षिपेत्** ब्राह्मणानां समीपे स्थापयेत्।

अन्ये तु व्याचक्षते। वर्धितं परिवर्तुमन्नमुच्यते। तद्विप्रान्तिके पितॄन् ध्यायन् 'तुभ्यमिदमिति' ध्यात्वा निक्षिपेत् यथा विकिरं तदयुक्तम्। "उपनीय सर्वं परिवेषयेत्" इति वक्ष्यति (अग्रे २२८ श्लोके)। अतः परिवेषणार्थं प्रदेशान्तरादानीय तस्योपनिक्षेपोऽयम् ॥ २२४ ॥

उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते ॥
तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः ॥ २२५ ॥

उभाभ्यां हस्ताभ्यामन्नमुपनेतव्यं परिवेष्टव्यं न चैकेनेति। परिवेषणमुपनयनमेव। तस्मिंस्तत्राप्ययमेव धर्मः पूर्वोक्तः। तस्यार्थवादः।

उभाभ्यां हस्ताभ्यां मुक्तं वर्जितमपरिगृहीतं यदन्नमुपनीयते परिवेषणार्थं **तद्विप्रलुम्पन्ति** विनाशयंत्यसुराः। **सहसा** बलेन **दुष्टचेतसः** पापात्मानः **असुरा** देवद्विषः। **उभयो**रित्यधिकरणे सप्तमी। मुक्तमक्लिष्टमस्थितं। भवन्ति च प्रतिषेधोपसन्निधानेऽपि कारकविभक्तयः। ग्रामान्नागच्छत्यासने नोपविशति त्रिरात्रं नोपवसति वसेरर्थस्येति ॥ २२५ ॥

गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु ॥
विन्यसेत्प्रयतः पूर्वं भूमावेव समाहितः ॥ २२६ ॥

गुणा व्यञ्जनानि। एषामेतत्प्रदर्शनार्थमुत्तरः प्रपञ्चः। **सूपशाकाद्यान् विन्यसेद्भूमावेवोपयच्छेत**। न दारुमये फलकादौ ॥ २२६ ॥

भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च ॥
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥ २२७ ॥

धानाशष्कुल्यादयो **भक्ष्याः** खरविशदमभ्यवहरणीयं हि **भक्ष्य**मित्युच्यते। **भोज्यं** घृतपूपादिः ॥ २२७ ॥

उपनीय तु तत्सर्वं शनकैः सुसमाहितः ॥
परिवेषयेत प्रयतो गुणान्सर्वान्प्रचोदयन् ॥ २२८ ॥

उपनीय विप्रान्तिके सर्वमेतदुढौकयित्वा ततः **परिवेषयेत्**। भुज्यधिकरणोपादानमावर्जनम्। भुञ्जानस्य परिवेषणं यद्यप्यन्तिकदेश अपेक्षितं तथापि तेषामन्तिके निधातव्यं

१ फ–उक्रमाकृष्ट उपसन्धाने। २ फ–ग्रामा नागच्छेत्यासनेनोपविशति त्रिरात्रयुपवसति। ३ र–अथापि तादृशे अन्तिके निधातव्यम्।

For Private And Personal Use Only

यथा भुञ्जानानामुच्छेपणेन न संसृज्यते । **गुणान्** भक्ष्यभोज्यादेर्द्रव्यस्य ये गुणा अम्लत्वादयस्तान्प्रणोदयमान इदमम्लमिदं मधुरमिदं खाण्डवमित्येवमावेदिते तेषां यद्रोचते तत्तद्द्यादिति वक्ष्यमाणेन संबन्धः । **शनकै**रित्याद्यनुवादः श्लोकपूरणार्थः ॥ २२८ ॥

नास्रमापातयेज्जातु न कुप्येन्नानृतं वदेत् ॥
न पादेन स्पृशेदन्नं न चैतदवधूनयेत् ॥ २२९ ॥

अस्रं अश्रुरोदनं तत्र **पातयेन्न** कुर्यात् । प्रायेण प्रेतश्राद्धादाविष्टवियोगजेन दुःखानुस्मरणेनाश्रुपातो जायते तस्य निषेधः । आनन्दाश्रुणस्त्वकस्मात्पततो न दोषः । न **जातु** कदाचिदप्यश्रुविमोचनं कुर्यात् । न **कुप्येत्**क्रोधं न गृह्णीयात् । अनृतवचनस्य पुरुषार्थतया निषिद्धस्य कर्मार्थोऽयं प्रतिषेधः । न **पादेन स्पृशेदन्न**मुच्छिष्टमनुच्छिष्टं च । न **चैत**दन्नम**वधूनयेद**वकम्पयेत् । हस्तादिनोत्क्षिप्य पुनर्न विक्षिपेत् ।

अन्ये तु व्याचक्षते वाससा धूल्याद्यपनयनार्थं यदवधूननं न तदन्नस्योपरि कर्तव्यम् ॥ २२९ ॥

अस्रं गमयति प्रेतान् कोपोऽरीननृतं शुनः ॥
पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम् ॥ २३० ॥

अस्यार्थवादः । अश्रुविमोचनं क्रियमाणं **प्रेतान् गमयति** प्रापयति श्राद्धम् । न पितॄणामुपकारकं भवति । प्रेताश्चात्र पिशाचवद्भूतविशेषा विवक्षिताः । न त्वसपिण्डीकृताः सम्प्रतिमृताः । **रक्षांसि** भूतप्रेतवत् अवगन्तव्यानि । **अरयः** प्रसिद्धाः । तथा **दुष्कृतीन्** दुष्कृताचरणान् पातकिनः ॥ २३० ॥

यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः ॥
ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितम् ॥ २३१ ॥

यद्यदन्नं व्यञ्जनं पानं चाभिलषेयुस्तत्तदमत्सरः अलुब्धो **दद्यात्** । मत्सर इति लोभनाम । **रोचेत** प्रीतिं जनयेत् । **ब्रह्मोद्या** ब्रह्मणि वेदे या उद्यन्ते कथ्यन्ते ता ब्रह्मोद्या देवासुरयुद्धं वृत्रवधःसरमादूत्यमित्याद्याः । अथवा कःस्विदेकाकी चरतीत्यादि । ब्रह्मोद्यं च कथा इति पाठः । तत्प्रधानमन्त्रार्थनिरूपणाद्याः कथाः संलापालौकिकैः शब्दैः । **पितॄणामेतदीप्सित**मभिलषितमित्यर्थवादः ॥ २३१ ॥

स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि ॥
आख्यानानीतिहासांश्च पुराणानि खिलानि च ॥ २३२ ॥

---

१ र-अश्रुं । २ र-ब्रह्मोद्य ब्रह्मणा इति वा पाठः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाध्यायो वेदः । मन्वादिग्रन्था **धर्मशास्त्राणि** । **आख्यानानि** सौपर्णमैत्रावरुणादीनि बाहृच्ये पठ्यन्ते । **इतिहासा** महाभारतादयः । **पुराणानि** व्यासादिप्रणीतानि सृष्ट्यादिवर्णनरूपाणि । **खिलानि** श्रीसूक्तमहानाम्निकादीनि ॥ २३२ ॥

हर्षयेद्ब्राह्मणांस्तुष्टो भोजयेच्च शनैः शनैः ॥
अन्नाद्येनासकृच्चैतान्गुणैश्च परिचोदयेत् ॥ २३३ ॥

सत्यपि निमित्ते न स्वं दुःखं केनचित्प्रकारेण दीर्घेणोच्छ्वासादिना प्रकटयेदपि त्वहृष्टवत् स्यात् । **ब्राह्मणान् हर्षयेत्** । गीतादिना परियुक्तेन अविरुद्धेन वा प्रसंगागतेन परिहासेन स्वाध्याये पठ्यमाने चिरं कश्चिदुद्विजेत्[१] तदा ततो विरम्याख्यानकैर्गीतादिना च रमयेत् । **शनैर्भोजयेत्** । कतिनिङ्ग्रासा ग्रहीतव्या ह्येतत्सम्यक् भोजनमित्येवमादिभिः प्रियवचनैर्भोजयेत् । शनैर्न संरंभेण ब्रूयात् । **अन्नाद्येन** पायसादिना । **गुणैश्च** व्यञ्जनैर्दानार्थमुद्यतै रसवत्तया योजयन् भोजनार्थमुत्साहयेत् । स्वाद्याः इमाः शष्कुल्यः सुरसेयं क्षीरिणीति पात्रस्थमेवमादिहस्तगृहीतं कृत्वा पुरस्थितः पुनः पुनर्ब्रूयादित्येषा परिचोदना[२] ॥ २३३ ॥

व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् ॥
कुतपं चासनं दद्यात्तिलैश्च विकिरेन्महीम् ॥ २३४ ॥

अनुकल्पपक्षे दौहित्रस्य यत्नेन भोज्यतोच्यते । **कुतपो**ऽजलोमसूत्रैः कम्बलाकारः पटः । उदीच्येषु कम्बल इति प्रसिद्धः । तं आसनं दद्यात् । न दौहित्रपक्षे । किंतर्हि अन्यदापि । यतो वक्ष्यति " त्रीणि श्राद्धे पवित्राणीति "[३] श्राद्धमात्रविषयत्वात् । **तिलैश्च विकिरेत्**[४] । तिलांश्च मह्यां भुवि निक्षिपेत् ॥ २३४ ॥

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ॥
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ॥ २३५ ॥

पवित्राणि पावनानि साधुत्वसंपादकानि । आद्यः श्लोकार्धोऽनुवादः । उत्तरस्तु विधेयार्थः । **शौच**मशुचिसंसर्गपरिहारः । प्रमादाद्वा जातस्याशुचित्वस्य मृद्वार्यादिना यथाशास्त्रं शुद्धिः । **अत्वरा** विश्रब्धं भोजनाद्यनुष्ठानम् ॥ २३५ ॥

अत्युष्णं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः ॥
न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणान् ॥ २३६ ॥

---

१ क–उद्वेजयेत । २ क–परितोदना । ३ अग्रे २३५ श्लोके । ४ क–अवकिरेत् ।

For Private And Personal Use Only

उष्णमेवात्युष्णं अतिगतमुष्णामिति प्रपतितपर्णः प्रपर्ण इति यथा सर्वमन्नं गुणाश्च। यस्योष्णस्य भोजनमुचितं तत्रैवेदमुष्णताविधानं न तु दध्योदनादेः यत्तदुष्णं अप्रीतिकरं व्याधिजनकं च। तत्र 'हर्षयेद्ब्राह्मणानिति' विरुध्येत। उष्णभोजनविधानाच्च न सकृत्सर्वमन्नं परिवेष्टव्यम्। तथाहि बहुभोजिनां शीतं भवेदन्नम्। तस्माद्भुक्ते पुनर्देयान्न च भुञ्जानेभ्य उच्छिष्टदानत्वात् दानमयुक्तमितिवाच्यम्। भोजनविधिरेवंरूप एव। आ तृप्तेर्भोजयितुर्व्यापारो न ह्यत्रौदनादिप्रतिग्राह्यतया संबध्यते। अत एव न तत्र प्रतिग्रहमन्त्र ओदनादिषु प्रयुज्यते। वाग्यताः वाक् यता नियमिता यैः। छान्दसः परनिपातः। वाचा वा यताः। साधनं कृतेति समासः। कर्तृवचनश्च तदायतशब्दः व्यापारनिषेधो नियमनं वाचश्च व्यापारः शब्दोच्चारणं तत्प्रतिषेधः क्रियते। व्यक्ताव्यक्तशब्दोच्चारणं न कर्तव्यं हविषो गुणा न च वक्तव्याः। इष्टैः सद्भिर्भुञ्जानैर्दात्रे न विवक्षितमिति स्मरन्ति। ननु वाङ्नियमादेवैतात्सिद्धं सत्यमपि भयादिनाऽपि न कर्तव्यम्। ब्रूविः प्रतिपादने वर्तते। ब्रूयुरिति न शब्दोच्चारणमेव ॥ २३६ ॥

यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः ॥
पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः ॥ २३७ ॥

पूर्वस्य विधेरर्थवादोऽयम्। उष्मा औष्ण्यम् ॥ २३७ ॥

यद्वेष्टितशिरा भुङ्क्ते यद्भुंक्ते दक्षिणामुखः ॥
सोपानत्कश्च यद्भुंक्ते तद्वै रक्षांसि भुञ्जते ॥ २३८ ॥

वेष्टितमुष्णीषादिना। उदीच्या हि शाटकैः शिरो वेष्टयन्ति। यत्तु व्याचक्षते चूडाकारैरपि केशैर्वेष्टितशिरा भवतीति न ते युक्तिवादिनः। केशास्ते वेष्ट्यन्ते न शिरो न च केशा एव शिरः। शिरःस्था हि ते दक्षिणाभिमुखस्य दोषवचनात् स्वल्पे प्रदेशे दक्षिणेतरदिगभिमुखस्यापि भोजनमनुजानाति। अन्यथा उदङ्मुखानां विधानात् कुतो दक्षिणस्याः प्राप्तिः। प्राक्पित्र्यादेस्तु न निषेधः। न हि तत्र वेष्टनव्यवहारो लोके। उपानहौ चर्ममय्यौ पादत्राणं । अन्ये तु चर्मपादुके उपानहाविति व्याचक्षते। **रक्षांसि भुञ्जते** न पितर इति निन्दा ॥ २३८ ॥

चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च ॥
रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ॥ २३९ ॥

---

१ रामचन्द्रकृतटीकायां तद्यथा—चूडाकारः केशैर्वेष्टितशिरा भवती। २ फ—न हि तत्र वेष्टनव्यवहारो लोके। ३ फ—अतः। ४ फ—विधाने। ५ द—सुक् स्रुवादेस्तु न निषेधः। ६ द—विषादि।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वराहः शूकरः। स च ग्राम्यः। श्वसान्निधानतो नेक्षेरन्निति यद्यपि श्रुतम् तथापि तत्प्रदेशसान्निधिमेव शिष्टा नानुमन्यन्ते। तथा च 'घ्राणेन शूकर' इत्यादि क्रियान्तरमर्थवादेन श्रूयते । न चानीक्षमाणस्य घ्राणं संभवति। सन्निहितानां तु स्वरूपानुवादोऽयम्। सूकरो विजिघ्रति। कुक्कुटः पक्षानुद्धुनोति। तस्मात्परिश्रिते दद्यादिति विधिः प्रयोजनमेतद्दोषाभावेऽपरिश्रितेऽपि दद्यात्। षण्ढो नपुंसकम्॥ २३९॥

होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते ॥
दैवे कर्मणि पित्र्ये वा तद्गच्छत्ययथातथम् ॥ २४० ॥

होमे अग्निहोत्रादौ शान्त्यादिहोमे वा। **प्रदाने** गोहिरण्यादिद्रव्यविषये। अभ्युदयार्थे **भोज्ये** ब्राह्मणा यत्र धर्माय भोज्यन्ते। **दैवे** हविषि दर्शपौर्णमासादौ । **पित्र्ये** श्राद्धे **यदभिवीक्ष्यते** क्रियमाणमात्रं कर्म **तद्गच्छत्ययथातथम्**। यदर्थं क्रियते तद्विपरीतं भावयति। यद्यपि श्राद्धप्रकरणं तथापि वाक्यादन्यत्रापि होमादावयं प्रतिषेधः॥२४०॥

घ्राणेन सूकरो हन्ति पक्षवातेन कुक्कुटः ॥
श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ॥ २४१ ॥

पक्षकृतेन वायुना कुक्कुटो हन्ति। व्याख्यानमेतत् । तावति देशे निवारणीयमेषां संनिधानं यावति स्थिताः पश्यन्ति। **अवरवर्णज**श्चाण्डालः जडप्रकृतित्वात्। स्पर्शादयश्च प्रकृतक्रियापरा न व्यवक्षितत्वरूपा इति व्याख्यातम्। अतोऽवद्यमेतत्। चण्डालस्य सामान्यतः स्पर्शप्रतिषेधादसत्यां प्राप्तौ प्रतिषेधानर्थक्यम्। अतः शूद्रोऽवरवर्णजस्तस्य च द्विजातिश्राद्धस्पर्शनिषेधो नात्मीये इति विवक्षितेऽपि नान्नपानादिस्पर्शदोषोऽयमुच्यते। किंतर्हि यो देशः परिगृहीतो नदीपुलिनादिरपरिश्रितस्तस्य स्पर्शो तस्य हि वाय्वादित्यादिना शुद्धिरुक्ता। अतः सत्यां प्राप्तौ युक्तः प्रतिषेधः॥ २४१॥

खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत् ॥
हीनातिरिक्तगात्रो वा तमप्यपनयेत्पुनः ॥ २४२ ॥

प्रेष्यो भृतकः। अपिशब्दादन्योऽपि यदृच्छया संनिहितो बान्धवादिरपनेयस्तस्मात्प्रदेशादपसारयेत्। **खंजो** गतिविकलः अनङ्गमादि। **हीनातिरिक्तगात्रः षण्ढः** कुणिखण्डीकः श्लीपद्यादिः॥ २४२॥

ब्राह्मणं भिक्षुकं वाऽपि भोजनार्थमुपस्थितम् ॥
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥ २४३ ॥

---

१ र–भृत्यः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतिथित्वेनागतं **ब्राह्मणं भिक्षुकं** भिक्षार्थिनं ब्राह्मणमपि भोजनप्रवृत्तै**र्ब्राह्मणैरनुज्ञातः शक्त्या पूजयेत्** । भोजनेन भिक्षादानेन वा युक्तार्थतयाऽर्चयेत् यतः स पाकस्तदहस्तदर्थ एव ॥ २४३ ॥

सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा ॥
समुत्सृजेद्भुक्तवतामग्रतो विकिरन् भुवि ॥ २४४ ॥

वर्णशब्दः प्रकारे द्रष्टव्यः । सर्वप्रकारैर्व्यञ्जनैर्युक्तमन्नाद्यं सन्नीय एकीकृत्य **वारिणा आप्लाव्य भुक्तवतां** तृप्तानां 'तृप्ताः स्म' इतिवचनानन्तरं अग्रतः समुत्सृजेत् विकिरेत् नैकस्मिन्नेव देशे किंतर्हि विशीर्णं भुवि । न पात्रेषु । भूमावपि न शुद्धायां किं तर्हि वक्ष्यति " दर्भेषु विकिर " इति । " सकृत्त्रिर्वा विकिरं कुर्यात् " इति शङ्खः ।

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः ॥ २४५ ॥

नास्य कार्योऽग्निसंस्कार इत्यात्रिवर्षा **असंस्कृतास्तेषां प्रमीतानां** पात्रस्थं **उच्छिष्टं** दर्भेषु विकिरश्च तेषां **भागधेयम्** भागधेयशब्देनोच्यते न हि तेषां श्राद्धोपकारो नास्ति । **त्यागिनां** गुर्वादीनां अथवा **कुलयोषितां** कुलस्त्रीणामदृष्टदोषाणां भार्याणां त्यक्तारः स्वतन्त्राः । अन्ये तु कुलयोषितामित्यस्मिन्ननूढाः कन्याः कुलयोषित इति व्याचक्षते । अत उच्छिष्टं तेभ्य उद्देष्टव्यम् । न च वाच्यमपवित्रमुच्छिष्टं कथं भागधेयेन कल्पतामिति । वचनान्नास्त्यपवित्रता सोमोच्छिष्टवत् ॥ २४५ ॥

उच्छेषणं भूमिगतमजिह्मस्याशठस्य च ॥
दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते ॥ २४६ ॥

पात्रस्थस्य पूर्वेण प्रतिपत्तिरुक्ता । भूमौ निपतितस्योच्छिष्टस्य दासवर्गार्थताऽनेन कथ्यते । **अजिह्मो**ऽकुटिलः । **अशठः** अनलसः । तादृशस्य दासवर्गस्य स भागः तस्मात् प्रभूतं दातव्यं येन भूमौ भुञ्जानस्य पततीति ॥ २४६ ॥

आ सपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु ॥
अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् ॥ २४७ ॥

संस्थितस्य द्विजातेरा सपिण्डक्रियाकर्म प्रथममृतस्या सह पिण्डकरणाख्यं कर्म कर्तव्यम् । सहपिण्डदानं पूर्वाभ्यां न कर्तव्यं कथं तर्हि कर्तव्यं **पिण्डमेकं च निर्वपे**दिति । चशब्द एवशब्दस्यार्थे तस्मा एव प्रेतायैकं पिण्डं निर्वपेत् । ब्राह्मणो हि तस्मा एव

---

१ राघवानन्दः । २ ह—अजिह्मः कुटिलः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजयितव्यः । **स्मृत्यन्तरे** अन्याऽपीतिकर्तव्यता वैशेषी स्मर्यते । आवाहनाग्नौकरणरहितमिति । अग्नौकरणशब्देन चात्र ' अग्नौ करिष्य ' इत्यनुज्ञापनं प्रतिषिध्यते न पुनर्होमः । तथाहि गृह्ये प्रेतश्राद्धमेवाधिकृत्य होम आम्नायते । यस्मिंश्च काले कर्म कर्तव्यं यावन्तं च कालं स्मृत्यन्तरादन्वेष्टव्यम् । आद्यमेकादशेऽहनि ।

"मृताहेऽपि च कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैव श्राद्धं वै मासिकार्थवत्" ॥ इति । तथा च **काठके** ' एवं सांवत्सरिकमिति ' । एकादशग्रहणं चाशौचनिवृत्त्युपलक्षणार्थम् । यतः ' शुचिर्भूतः पितृभ्यो दद्यादिति ' श्रूयते । संवत्सरान्ते हि सपिण्डीकरणं **गृह्यकाराः** स्मरन्ति । एतच्च श्राद्धमेकोद्दिष्टं तदङ्गभूतं च निर्वपणम् । यत्तु श्रौते पितृभ्यो दद्यादितिवचनात् पितृपितामहाय प्रपितामहाय चेति अकृते सपिण्डीकरणे नेह दानं युक्तं न हि स्मृत्या श्रुतिर्बाधितुं शक्यत इति ॥ २४७ ॥

सहपिण्डक्रियायां तु कृतायामस्य धर्मतः ॥
अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः ॥ २४८ ॥

यदा तु सपिण्डीकरणं कृतं भवति तदा **अनयैवावृता** पार्वणश्राद्धविधिना त्रिभ्यो दद्यात् । आवृदितिकर्तव्यता । न सपिण्डीकरणश्राद्धं दैवपूर्वं नियोजयेत् । पितॄनावाहयेत् । अत्र पुनः प्रेतं पितरश्चात्र प्राक्सपिण्डीकृताः पितृवर्गमनुप्रवेशिताः पितामहादय उच्यन्ते तानाशयेत् । तत्र पुनः शब्दस्तेष्वेव ब्राह्मणेषु प्रेत आवाहयितव्यः । तत्र हि सर्वैस्तैः सह संसर्गस्तस्य संसृजनाय तत्कर्म । यदपि **विष्णुना** पठितं " प्रेताय ब्राह्मणान् भोजयेत् प्रेतपित्रे प्रेतपितामहाय च प्रेतप्रपितामहायेति " । अत्रापि नैवं श्रूयते पृथक् भोजयेदिति । तत्र यथा बहुदैवत्यं हविर्बह्वीर्देवता उद्दिश्य सकृदेकं हूयते एवं ब्राह्मणोऽपि विद्वानुद्दिश्य भोज्येतेति न किंचिदनुपपन्नम् । तथाहि सहवचनगृहीतं भवति पित्र्ये च न युग्मा भोजिता भवन्ति । यथा एकैकमुभयत्र वेति येषां विधिस्तन्मते एकः सर्वोद्देशेन भोज्यते । एवमेतद्द्रष्टव्यम् । नन्वेवं सति पितृकृत्ये त्रीनिति सर्वदेवसहोद्देशः प्राप्नोति एकैकस्मिन ब्राह्मणे सर्वे उद्देश्येरन् तत्रापि न पृथक्ग्रहणमस्ति कथं नास्ति । **गृह्ये** हि पठ्यते " न त्वेवैकं सर्वेषां पिण्डैर्व्याख्यातम् " । किंच प्रेतपात्रं पितृपात्रेषु सेचयेदर्घार्थमित्याह तत्र कृतासन्नपात्राभावे प्रेतपात्रोदकस्य कुतः पात्रादर्घदानं यदि तावत्संमीलितास्तदयुक्तं पितामहादेस्तत्कल्पितं न पितुर्न चान्यार्थं कल्पितादित्यन्यार्थता युक्ता । अथ कृत्वाऽर्घदानं पश्चात्संनयनं कुर्यात् । तदा कृत्वाऽर्घदानं तदर्थं सन्नयनस्य स्वतंत्रार्घार्थं प्रसेचयेदिति विरुध्येत वचनम् । उक्तेनात्र प्रकारेण न कश्चनविरोधः ।

अथ कोऽयं प्रेतो नाम प्रपितामहाय पिण्डः सपिण्डीकरणादूर्ध्वं न दीयते यतस्तेष्वेवानुप्रविष्टः । तथा च **स्मृतिः**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"यःसपिण्डीकृतं प्रेतं पृथक् पिण्डेन योजयेत् । विधिघ्नस्तेन भवति पितृहा चोपजायते" ।। इति

पृथगेव हि तस्मै निरूप्यते। न त्वेकः सर्वेभ्य इति। मन्त्राश्च एतमेवार्थमभिवदन्ति 'ये समाना' इत्यादयः। अत्रोच्यते। नायं प्रेतशब्दोऽयतः क्रियायोगेन वर्तते। रूढिरियं
मृतः प्रेत इदानीं प्रेत उच्यते। न हि दूरमध्वानं गतः प्रेत उच्यते। अस्ति च क्रियायोगः ९
अविशेषेण पूर्वप्रेत इदानीं प्रेते च। तथा च श्रुतिः "प्रयन्नेवास्माल्लोकाद्ये समाना" इति अचिरमरणे प्रेतप्रयोगं दर्शयति 'प्रेतायान्नं दिनत्रयमिति' सद्यःसंस्थितमधिकृत्य। यत्तु पृथक्पिण्डेनेति अस्यायमर्थः। सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं न कर्तव्यम्। यदा यदा श्राद्धं तदा तदा त्रिभ्यः मृताहनि पितृभ्यस्त्रिभ्य एव कर्तव्यम्। नैकस्मा एव पित्रे।
तथा अनयैवावृता कार्यमिति पार्वणश्राद्धे कर्तव्यता वाऽतिदिश्यते। १०

ननु चानयैवेति प्रकृतपरामर्शाः प्रतीयन्ते सन्निहितवचनत्वात्सर्वनाम्नां सन्निहितश्चैकोद्दिष्टविधिः। नैवम्। यदि हि कृतेऽपि सपिण्डीकरणे एकस्यैव क्रियेत तदा भेदनिर्देश एव नोपपद्यते। तुशब्दश्च प्रकृतायामितिकर्तव्यतायां भेदं सूचयति। असपिण्डक्रियायामेष विधिः। सहपिण्डक्रियायां पुनः कृतायां नायं मन्तव्य इति। अतो व्यव-
हिताऽपि बुद्धिस्थत्वात्पार्वणताऽतिदिश्यते। किंच कृते सपिण्डीकरणे यदैकोद्दिष्टं स्यात्कर्तव्यं १५
तदा त्रिभ्योनमिति अमावास्यायामिति केचित्। को विशेषस्तत्रापि सह पिण्डक्रियामित्येवमर्थः किं नास्ति। न च मानवशास्त्रे कालान्तरमृताहे प्रतिसंवत्सरं चेत्यादि प्रतीतं येन तद्विषयमेतद्व्याख्यायते। अतो विशेषात्सर्वत्रैकोद्दिष्टानि प्राप्नुवन्ति। तत्र महाभारतवचनं विरुध्येत। तीर्थानि प्रकृत्योक्तं "श्राद्धेन तर्पयामास स वै पूर्वं पितामहान्" इति।

यदपि स्मृत्यन्तरं प्रतिसंवत्सरं चैव श्राद्धं वैमासिकार्थवत्। तत्रापि मासिक- २०
शब्देनामावास्यायामेव श्राद्धमुच्यते। सर्वश्राद्धानां तस्य प्रकृतित्वात्। तत्र हि धर्माः समाम्नाताः। न तु "प्रतिमासं तु वत्सरमिति" एतन्मासिकशब्देनाभिधातुं युक्तम्। न हि तस्य विशिष्टाः केचिद्धर्माः समाम्नाता यैर्भिद्येत। एकोद्दिष्टं त्वाद्यमेकादशे क्षत्रियस्य त्रयोदशे इत्याद्यत्रापि विद्यते। अतो नैकोद्दिष्टं मासिकशब्देनाभिधातुं युक्तम्। मास-
कालसंबन्धाद्धि तन्मासिकमुच्यते। न च तस्य मासेनैव संबन्धः। कालान्तरेणापि २१
संबन्धस्य दर्शितत्वात्। 'शुचिर्भूतः पितृभ्यो दद्यादिति' मासादूर्ध्वमपि करणान्मासे चाकरणादत्र मासिकशब्देन तस्याभिधानम्। अमावास्यायास्तत्प्राप्तौ मासिकशब्दश्रवणा-

---

१ क-संवत्सरमिति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्पिण्डानां मासिकश्राद्धमिति नियतत्वात्कालान्तरसंयोगस्याभावाद्धर्मवत्त्वाच्च युक्तस्तदीयधर्मातिदेशः । आमश्राद्धमपि पार्वणप्रकृतिकमेव तत्प्रकृतित्वे च त्रिभ्यो दाने प्राप्ते एकोद्दिष्टता विधीयते । यदपि **याज्ञवल्क्य**वचनं (आचारे २५६ श्लो०)

"मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि" ॥

तत्राप्येवमेतादृशीतिकर्तव्यता उच्यते । तत्रापि ह्यमावास्यमेव प्रकृतत्वेनावगतं अतो न मासकालयोगेऽपि एकोद्दिष्टे तदीयधर्मातिदेशो अन्यत्र युक्तः । भिक्षुको भिक्षुकाद्याचते सोऽपि यतो यस्य विकारः ।

किंच एकमेव श्राद्धं तस्मान्न मासिकमेव श्राद्धं तस्मान्न मासिकशब्दस्यैकोद्दिष्टविशेषविषयतायां प्रमाणमस्ति । **याज्ञवल्क्ये**ऽप्येवमिति । यद्यनन्तरावमर्शः तदा सपिण्डीकरणेतिकर्तव्यतातिदेशः प्राप्नोति । तदनन्तरं ह्येतच्छ्रुतम् । एतत्सपिण्डीकरणमिति पठित्वाऽर्वाक्सपिण्डीकरणादिति च ततोऽनन्तरमुक्तम् "**मृताहनीत्यादि**" । तस्मात्सन्निधानमकारणीकृत्य धर्मवत्त्वेनामावास्यस्यैवमिति निर्देशः । मन्त्राश्चास्मत्पक्षमेव सुतरामवद्योतयन्ति । " संसृजयध्वं पूर्वैः पितृभिः सहेति" पूर्वैः पितृभिः सह वर्तमाना उच्यन्ते । संसृज्यध्वमिति बहुवचनं पूजायाम् । तथा च **निरुक्तकारः** " एता उ त्या उषस इति । एतास्ता उषास इत्येकस्या एव पूजनार्थे बहुवचनमिति " । अथ संसृज्यध्वमिति येषु पिण्डेषु निक्षिप्यन्ते त उच्यन्ते यश्च निक्षिप्यते बहुवचनेन पूर्ववत्पूर्वेभिः पितृभिरिति । एवं च पूर्वेभिरित्येवमेव बहुवचनं प्रायोगिकं भविष्यति । इतरथा संसृज्यध्वमितिनिक्षिप्यमाणपिण्डाभिधाने उभयत्र बहुवचनमयथार्थं कल्प्यमिति । तदेतदपि न किंचिद्यत एकैकेन पिण्डेन पिण्डांशः संसृज्यते । चतुर्थं पिण्डमुत्सृज्य त्रेधं कृत्वा पिण्डेषु निदध्यादिति । अतो नैवात्र युगपदधिकरणवचनताऽस्ति येन बहुवचनमवकल्पेत । एकैकाभिधाने न कुत आन्वयिकं संसृज्यध्वमिति बहुवचनं परोक्षवत्त्वाभिधानं न कल्प्यते । पूर्वेभिरिति निक्षिप्यमाणपिण्डवचनाच्च न एभिरिति निर्देशो युक्तः स्यात् । न चायं मन्त्रो विधायको येन तदर्थनिर्णये प्रयतामहे । अभिधायकोऽयम् । अभिधान[3]गुणं च विनियोगतो विनियोगश्च संसर्जनं न प्रकाशयति । संख्याऽत्र न विनियुक्ता न प्रकाशाद्या संभवमात्रेणान्वीयते तस्मान्न मन्त्रात्पूर्वप्रतिपत्तिः ।

येऽप्याहुश्चतुर्थः शब्दः पूर्वतर उपपद्यते पिता हि प्रथमःतदपेक्षया प्रपितामहात्पूर्वश्चतुर्थ इति एतदपि न सम्यक् । पूर्वेषां पिण्डान्निधाय चतुर्णां पूर्णश्चतुर्थः प्रेतपिण्ड एव भवति ।

---

१ **र**–सामान्यर्थेद (ष्ट) स्य । २ **क**–परोक्षाभिधानं । ३ **क**–अभिधानं च गुणविनियोगतो । ४ **र**–वत्र । ५ **क**–च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पित्रुपक्रमं चेदं श्राद्धं न प्रेतोपक्रमम् । एवं ह्युच्यते " पितॄनावाहयेत्पुनः प्रेतं न निर्दिशेदिति " यथाऽयं प्रेताय प्रथमः पिण्डस्ततस्तत्पित्रे इत्यादिक्रमः । तस्यापि कुतोऽयन्नियमः । य एवासौ चतुर्थस्तस्यैवेदं त्रैधं करणं पिण्डेषु निधानं विधीयते । एतावद्धि तद्वाच्यं चतुर्थं पिण्डमुत्सृजेत्त्रैधं कृत्वेति । तत्रानन्तर्यादुत्सृजति नासंबन्धश्चतुर्थ-पिण्डमित्यनयोः प्रतीयते । त्रैधं कृत्वेत्यत्र तु कस्येदं त्रैधं करणमित्यपेक्षायां सन्निहितः पिण्डः संबध्यते । तावतैव निराकांक्षीकृते वाक्ये चतुर्थमित्यस्य संबन्धे न किंचित्प्रमाणमस्ति । तत्र यस्य कस्य विभागे प्राप्ते स्मृत्यन्तरान्निर्णयः

"निरूप्य चतुरः पिण्डान्पिण्डदः प्रतिनामतः । ये समाना इति द्वाभ्यामाद्यं तु विभजेत्त्रिधा" इति॥

आद्यत्वं दानाभिप्रायेण न पुनरादिपुरुषसंबन्धात्[1] । तथाहि प्रपितामहादिः स्यात्पितामहात्पूर्वः पितामहोऽपि पितुः पूर्व इत्यनवस्थानादप्रतिपत्तिः । दानं[3] तु नियत-क्रमतो व्यवस्थितमादित्वम् ।

एवं च चतुर्थमितिपदेन विशिष्टे पिण्डे क्रियात्रयेऽपि स्मृत्यन्तरवशाद्दानक्रमेणै-वाद्यस्य विभागो युक्तः । अतो यदुक्तं काठके " पूर्वप्रेतस्येष्टो विभागः प्रतीयते " इति कासावस्येष्टता । यच्चोक्तम् । अत एव तस्मै अदानं यत एव वाऽसावन्तर्भावितः तत्र किंचिद्वचनान्न दीयते । न चतुर्थं[4] पिण्डो गच्छतीति । तथा त्रिषु पिण्डः प्रवर्तते इति यत्स्वयं स्वकृतः पाठः । पुनः प्रेतं न निर्दिशेदिति व्याख्यातं च । अन्तर्भाविते पूर्वप्रेते पुनर्दानं निषेधति नैवायं पाठोऽस्ति प्रतिषेधार्थीयो[5] न पठ्यते समुच्चयार्थो यश्चकारः पठ्यते । सत्यपि वा तत्र पाठे च सपिण्डीकृतमित्यत्र पृथक्पिण्डप्रतिषेधस्य या गतिरुक्ता सैवात्र वेदितव्या ।

यानि तु वाक्यानि

"सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतः । एकोद्दिष्टं तु कुर्वीत पित्रोरन्यत्र पार्वणम्" ॥

इत्यादिनि यद्येतानि[6] वाक्यानि सन्ति तदा किमयामावास्यायां नामग्रोषणिकया । न चैतानि वाक्यानि शिष्टपरिगृहीतासु प्रसिद्धासु स्मृतिषु कासुचिदुपलभ्यन्ते । तस्मान्न किंचिद्विशेषे लिङ्गमस्ति येन पूर्वप्रेतपिण्डान्निधीयत इति प्रतिपद्येमहि । तस्मात्समाचारो न त्याज्यः । अयमेव पक्षो युक्तियुक्त इति दर्शितः । तस्मान्मतभेदेनापच्छेदतः पूर्वं प्रेतनिधानपक्षोपन्यासः केषांचित् ।

---

१ र-निदानं २ ख-तथाहि पितामही * न पुनरादिपुरुषसंबंधात् * ३ क-दातुं । ४ र-चतुर्थः । ५ क-प्रतिषेधार्थं । ६ र-यद्येतानि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"असपिण्डक्रियाकर्म द्विजातेः संस्थितस्य च । अदैवं भोजयेच्छ्राद्धं पिण्डमेकं च निर्वपेत्"॥

सपिण्डीकरणं मृते पितरि जीवति पितामहे पाक्षिकं ज्ञेयम् । यदा न जीवन्तमतिक्रम्य ददातीत्येवं नाश्रीयते। यदा तु स एषाग्रता स्यादिति पक्षस्तदा पितामहमतिक्रम्य पूर्वैः संसर्जनीयः। एवं तु पुत्रस्यापि मृतस्य पित्रा विकल्पेनैव कर्तव्यमेवमनपत्यभार्यामरणे जीवन्मातृकस्यैष एव विधिः । "प्रमत्तानामितरे कुर्वीरंस्ताश्च तेषामिति" । सुतैरपत्यैरित्यर्थः । यद्यपि सुतग्रहणं तत्स्थानापन्नानामन्येषामपि ग्रहणं यदि स्वशब्देन नास्ति निषेधः ॥ २४८ ॥

श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति ॥
स मूढो नरकं याति कालसूत्रमवाक्शिराः ॥ २४९ ॥

यद्यपि श्राद्धभुजो दोषग्रहणं तथापि कर्तुरयमुपदेशः । तेन तथा कर्तव्यं यथा न प्रयच्छति ऋत्विङ्नियमवत् । **वृषलः** शूद्रः । **अवाक्शिरा** ऊर्ध्वपादः । प्रकृत एव सपिण्डीकरणमाविज्ञायीति श्राद्धग्रहणम् ॥ २४९ ॥

श्राद्धभुग्वृषलीतल्पं तदहार्योऽधिगच्छति ॥
तस्याः पुरीषे तं मासं पितरस्तस्य शेरते ॥ २५० ॥

वृषली स्त्रीमात्रोपलक्षणार्थमेतादित्याहुः । निरुक्तं कुर्वन्ति । वृषस्यन्ती चलयति भर्तारमिति वृषली । सा च ब्राह्मणी अन्या वा सर्वा निषिध्यते । तथा च **स्मृत्यन्तरं** "तदहर्ब्रह्मचारी स्यान्नियत" इति । तल्पशब्देन मैथुनसंयोगो भण्यते । न शयनारोहणप्रतिषेध एव । अहर्ग्रहणमहोरात्रलक्षणापरम् । रात्रावपि निषेधः स्यात् । **पुरीष इति** निन्दार्थवादो निवृत्त्यर्थः । **पितरस्तस्य** श्राद्धभुजः । अयमपि पूर्ववद्वचनीयः । इदं तु युक्तं यदुभयोर्नियम इति । नैमित्तिकोऽयं भोक्तुर्धर्मः । श्राद्धभोजने निमित्ते विधीयते । प्रकरणार्थश्च कर्मार्थोऽपि ॥ २५० ॥

पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः ॥
आचान्तांश्चानुजानीयादभितो रम्यतामिति ॥ २५१ ॥

आचमनिकमप्पानं दत्वा प्रष्टव्याः । **स्वदितमित्यनेन** शब्देन स्मृत्यन्तराच्चान्नं परिगृह्य प्रश्नोऽयं कर्तव्यः । भवति हि कस्यचिदयं स्वभावो यदसंनिहितमन्नं सत्यपि तदभिलाषे यन्त्रणयात्रं मृग्यते । संनिहितं गृह्णाति । **तृप्तानामाचामयेत्** । अन्ये तु तृप्ताः स्थ इत्येनेन शब्देन प्रष्टव्याः । ज्ञात्वा च तृप्तान्स्वदितमिति अनेन शब्देन बृंहणीयाः ।

---

१ गौतमधर्मसूत्रे अ. १५ सू. २४ । २ ड–भोक्तृधर्मः । ३ र–अवसानिकं *–* एतत्पुस्तके न दृश्यते । क्वचिदं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्ष्यति (श्लो.२५४) "पित्र्ये स्वदितमित्येव वाच्यमिति "। **आचान्तांश्चानुजानीयादभितो रम्यतामिति** अभितः उभयतः इहैव स्वगृहे वा यथेष्टमास्यतामित्यर्थः ।

स्वधाऽस्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनन्तरम् ॥
स्वधाकारः परा ह्याशीः सर्वेषु पितृकर्मसु ॥ २५२ ॥

भुक्तवद्भिर्गृहगमनाभ्यनुज्ञातैरनन्तरं स्वधेति वाच्यम् । **स्वधाकारः** स्वधाशब्दोच्चारणम् । प्रकृष्टा आशीः पितृकार्येषु सर्वेषु पक्वान्नापक्वान्नश्राद्धेषु ॥ २५२ ॥

ततो भुक्तवतां तेषामन्नशेषं निवेदयेत् ॥
यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः ॥ २५३ ॥

भुक्तमन्नं तेभ्यो निवेदयितव्यम् । प्रष्टव्यास्ते इदमस्तीति यथा ब्रूयुस्तथा कुर्यादनुज्ञातोऽननुज्ञातेन नान्यत्र विनियोक्तव्यम् ॥ २५३ ॥

पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम् ॥
संपन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥ २५४ ॥

अन्येनापि तत्कालोचितोपस्थितेनैवमेभिः शब्दैः मोदयितव्यः । अन्यस्त्वाह । अनुज्ञापनमेतैः शब्दैर्भोजनादिप्रवृत्तैः कर्तव्यम् । अतश्च श्राद्धकृता परिशिष्टचैवं वक्तव्यम् । स्वदध्वमिति न हि स्वादितम् । स्वदित इतिवा पाठः । एतस्यार्थस्य प्रतिपादकं एतद्व्याख्यानं स्मृत्यन्तरसमाचारसापेक्षं तस्मात्प्रवृत्तभोजनाः श्राद्धकृताऽन्येन वैवं प्रीणयितव्याः। **गोष्ठे** गोषु तिष्ठन्तीष्वेकदेशेषु श्रुतमिति वाच्यम्। आस्त्विति सर्वत्र प्रतीयते । **दैवे रुचितं** रोचितमिति वा ॥ २५४ ॥

अपराह्णस्तथा दर्भा वास्तुसंपादनं तिलाः ॥
सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु सम्पदः ॥ २५५ ॥

अपराह्णे श्राद्धं कर्तव्यं **श्राद्धकर्मसु संपदः** संपादयितव्याः । अन्यानि वस्तूनि । अविशेषाभिधानेऽप्यपराह्णे अतः सर्वश्राद्धेषु । एवं हि **स्मृत्यन्तरम्**
" पूर्वाह्णे दैविकं कार्यमपराह्णे तु पैतृकम् । एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् " इति ॥
वास्तु वेश्म तस्य **संपादनं** सम्मार्जनं सुधादिना भित्तीना गोमयेन भूमेरुपलेपनं दक्षिणाप्रवणता च **सृष्टिर्विसर्गः** । अकार्पण्येनान्नव्यञ्जनदानम् । **मृष्टिर्मार्जनं** । अन्नसंस्कारविशेषः । अन्ये तु व्याचक्षते संपदेषा विभवशक्तिर्न त्वेतैर्विना अकरणम्॥ २५५ ॥

---

१ फ-तत्कालोचितोपस्थितेन । २ र-सहर्षयितव्यः । ३ फ-प्रवृत्तैः । ४ फ-रुचिरं ५ फ-विधाने ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः ॥
पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसंपदः ॥ २५६ ॥

दर्भाः प्रसिद्धाः । **पवित्रं** मन्त्राः । हविषे हितानि योग्यानि **हविष्याण्युत्तर**श्लोके तानि वक्ष्यन्ते । **पवित्रं** पावनं शुच्याचारता यच्चोक्तं पूर्वोक्तं वा वास्तुसंपादनं सृष्टिर्मृष्टिर्ब्राह्मणाश्च श्रेष्ठाः श्रुतशीलसंपन्नाः । **हव्यसंपदः** हव्यं दैवतोद्देशेन यागादि ब्राह्मणभोजनं च । हव्यशब्दः कर्म दैविकमुलपक्षयति ॥ २५६ ॥

मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् ॥
अक्षारलवणं चैव प्रकृत्या हविरुच्यते ॥ २५७ ॥

मुनिर्वानप्रस्थः तस्यान्नानि आरण्यानि नीवारादीनि । एतच्च प्रदर्शनं ग्राम्याणामपि व्रीह्यादीनाम् । तथाऽर्वाचीने श्लोके सर्वग्रहणम् । उत्तरत्र च " हविर्यच्चिररात्रायेति "[1] प्रक्रम्य "तिलैर्व्रीहियवैर्माषैरिति"[2] ग्राम्याणामप्यनुक्रमणम् । **पयः** क्षीरं तद्विकारा अपि दध्यादयो गृह्यन्ते स्मृतिसमाचाराभ्याम् । **सोम** ओषधिविशेषः । **अनुपस्कृत**मविकृतमप्रतिषिद्धं । सुनामासाद्यनुपस्कृतं **अक्षारलवणम्** । अत्र संदिह्यते किं द्वंद्वगर्भो नञ्समासः उत नञ्समास एव । अक्षारलवणम् । उत लवणविशेषः क्षारलवणं ततोऽन्यदभ्यनुज्ञायते । लवणमेवं भवितुमर्हः । किं द्वन्द्वगर्भे हि वृत्तिद्वयमाश्रयणीयम् । प्रतिपदं च नञः संबन्धभेदस्तद्गुरु भवति प्रकृत्या हविरनाश्रितविशेषेण तद्धविर्ज्ञेयं हविष्येण वर्तेते । " हविष्यात्प्रातराशाद्भुङ्क्त " इत्यादि सामान्यचोदनासु तद्धविष्यं ज्ञेयम् ॥ २५७ ॥

विसृज्य[3] ब्राह्मणास्तांस्तु नियतो वाग्यतः शुचिः ॥
दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन् ॥ २५८ ॥

प्रासङ्गिकः पूर्वश्लोकः । इदानीं प्रकृतशेषमेवाह । **विसृज्यानु**ज्ञाय यथासुखविहारे **ब्राह्मणां**स्तान्प्रभुक्तवतः । अनन्तरं **दक्षिणां दिशमी**क्षमाण इमान् वरानभिलषितार्थान्पितॄन्याचेत स्वपितॄन्प्रार्थयेत् । स्वपितॄन् ध्यायन् युष्मासु प्रसन्नेष्विदं नः संपद्यतामित्येवं याचितव्यम् ॥ २५८ ॥

के पुनस्ते वरा याचितव्या इत्यत आह

---

१ अग्रे २६६ श्लोके । २ अग्रे २६७ श्लोके । ३ फ–विसृज्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥
श्रद्धा च नो माव्यगमद्बहुधेयं च नोऽस्त्विति ॥ २५९ ॥ *

मन्त्रवदयं श्लोकः पठितव्यः ॥ २५९ ॥

एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम् ॥
गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् ॥ २६० ॥

तदनन्तरं वरयाचनानन्तरं पिण्डान्पितृभ्यो निरुप्तान् गवादीन्प्राशयेत् । अग्नौ प्रक्षेप एव । प्राशनं पापयेदिति पाठान्तरम् ॥ २६० ॥

पिण्डनिर्वपणं केचित्पुरस्तादेव कुर्वते ॥
वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा ॥ २६१ ॥

ब्राह्मणभोजनात्पुरस्तात्कृते ब्राह्मणभोजने हविः कुर्वन्ति । वयोभिः पक्षिभिः खादयन्त्यन्येऽधिकेयं पूर्वस्मात्प्रतिपत्तिः । अनलोऽग्निः । एतत्पूर्वोक्तमेवानुदितम् । उच्छिष्टसन्निधौ चैतत्पुरस्तात्पिण्डदानमिष्यते ॥ २६१ ॥

पतिव्रता धर्मपत्नी पितृपूजनतत्परा ॥
मध्यमं तु ततः पिण्डमद्यात्सम्यक् सुतार्थिनी ॥ २६२ ॥

आद्यन्तयोः पिण्डयोरेषा प्रतिपत्तिः । मध्यमं तु ततस्तेषां पिण्डानां यो मध्यमः तं धर्मपत्नी पुत्रार्थिनी अद्यात् । या न कामार्थमूढा[1] पतिरेव मया परिचरणीयो मनसाऽपि व्यभिचारो न कर्तव्य इति यस्या नियमः सा पतिव्रता पतिकव्रता पितृपूजने श्राद्धादिकर्मणि तत्परा श्रद्धावती प्रयत्नेन तदाराधनादौ प्रवर्तते। सम्यगद्यादाचमनादिविधिना नियमेन च ॥ २६२ ॥

आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम् ॥
धनवन्तं प्रजावन्तं सात्विकं धार्मिकं तथा ॥ २६३ ॥

भक्षयित्वा तु तं पिण्डं सुतं पुत्रं सूते जनयति । मेधा ग्रहणशक्तिः तया समन्वितं युक्तम् । सत्वं नाम गुणः साङ्ख्येषु प्रसिद्धः धैर्योत्साहादिद्योत्यस्तद्युक्तम् ॥२६३॥

प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ॥
ज्ञातिभ्यः सत्कृतं दत्वा बान्धवानपि भोजयेत् ॥२६४ ॥

पिण्डेषु प्रतिपादितेषु तौ हस्तौ प्रक्षालयेत्। ततः आचमनविधिं कुर्यात् । ज्ञातीन् प्रैति गच्छति प्राप्नोतीति ज्ञातिप्रायं कुर्यात् । ज्ञातिभ्यो दद्यात् । तेभ्यः सत्कृतं दत्वा बान्धवेभ्योऽपि दद्यात् । ज्ञातयः सगोत्रा मातृश्वशुरपक्षा बान्धवाः ।

[अन्नं च नो बहुभवेदतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु मा च याचिष्म कंचन ॥ १ ॥ * श्राद्धभुक् पुनरश्नाति तदहर्यो द्विजाधमः ॥ प्रयाति शूकरीं योनिं कृमिर्वा नात्र संशयः ॥ २ ॥ ऽऽ]

१ फ–कामार्था मूढा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्र चोच्यते यदुक्तं यथा ब्रूयुस्तथा कुर्यादिति । यदि तैरुक्तं गृहाणस्मदीयानेतदन्नं प्राप्यतामिति तदा वैश्वदेवहोमादीनां का गतिः । पाकान्तरं कर्तव्यम् । अथवाऽदृष्टार्थमेवान्नशेषनिवेदनं नित्यवदाम्नायते । शेषमन्नमित्युक्तेऽदृष्टेभ्य इति ब्रूयुरिति पाक्षिकं चैतत्स्याद्यदि ते गृह्णीयुः ॥ २६४ ॥

उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ॥
ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः ॥ २६५ ॥

भुञ्जानानां यत्किञ्चिद्भुज्यधिकरणपात्रसंलग्नं भूमिपतितं च तत्र तस्माद्देशादवमार्ष्टव्यं यावद्ब्राह्मणा न निष्क्रान्ताः । ततो गृहबलिं निष्पन्ने श्राद्धकर्मण्यनन्तरं वैश्वदेवहोमान्वाहिकातिथ्यादि भोजनं कर्तव्यम् । बलिशब्दस्य प्रदर्शनार्थत्वात् ।

अन्ये तु भूतस्य यज्ञ एव बलिशब्देन प्रसिद्धतरस्ततश्चाग्नौ होमो न प्राग्विरुध्यत इत्याहुः । न चैतद्ब्राच्यं पित्र्ये कर्मणि प्रारब्धे कथं कर्मान्तरस्य तदन्तःकरणम् । यथैव पूर्वेद्युर्निमन्त्रितेषु ब्राह्मणेषु सायंप्रातर्होमकरणं त्र्यहकल्पे श्राद्धस्य विरुद्धमेवं वैश्वदेवहोमोऽप्यौपसदाग्निकः । तेन भूतयज्ञात्पराञ्चः पदार्था उत्कृष्यन्ते नार्वाञ्चः ।

अत्रोच्यते । यदि प्रागग्नौ वैश्वदेवहोमः क्रियते ततः श्राद्धानन्तरं बलिहरणं तथा सति देवयज्ञभूतयज्ञौ व्यवधीयेताम् । ततश्च क्रमोपरोधो न च वैश्वदेवस्य कालबाधः क्रियते । पितृश्राद्धकालहानेः । तस्मात्सर्वं महायज्ञानुष्ठानं श्राद्धादौत्तरकालिकम् ॥ २६५ ॥

हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते ॥
पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः ॥ २६६ ॥

चिररात्रशब्दो दीर्घकालवचनः । यच्चानन्त्याय केनचिद्वचनं नैवैतदुभयं ब्रवीमीति प्रणिधानार्थमुच्यते । कल्पते प्रेत इत्यध्याहार्यम् ॥ २६६ ॥

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ॥
दत्तेन मासं तृप्यन्ति विधिवत्पितरो नृणाम् ॥ २६७ ॥

तिलादिग्रहणं नेतरधान्यपरिसंख्यानार्थमपि तूक्तानां फलविशेषप्रदर्शनार्थम् । एतैर्विविधदत्तैरपि मासं प्रीयन्ते । विधिवत्पितरो नृणामित्याद्यनुवादपदानि वृत्तपूरणार्थानि ॥ २६७ ॥

द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु ॥
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै ॥ २६८ ॥

उरभ्रा मेषाः । शकुनय आरण्याः कुक्कुटाद्याः । मत्स्याः पाठीनाद्याः ॥ २६८ ॥

---

१ र–पितृश्राद्धे । २ फ–कल्प्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षण्मासांश्छागमांसेन पार्षतेन च सप्त वै ॥
अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥ २६९ ॥ *

रुरुपृषतैणा मृगजातिविशेषवचनाः । रौरवेण पार्षतेन । ऐणेयेति विकारे तद्धितः ॥ २६९ ॥

दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ॥
शशकूर्मयोस्तु मांसेन मासानेकादशैव तु ॥ २७० ॥

वराहश्चारण्यसूकरः ॥ २७० ॥

संवत्सरे तु गव्येन पयसा पायसेन च ॥
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ २७१ ॥

श्रुतानुमितयोः श्रुतसंबन्धस्य बलीयस्त्वाद्गव्येन पयसेति संबन्धो न मांसेन प्राकरणिकेन । अन्ये तु चशब्दं समुच्चयार्थीयं पठित्वा व्याख्यानयन्ति । **मांसेन** गव्येन पयसा पायसेन वा । पयोविकारः पायसं दध्यादि पयःसंस्कृत ओदनः प्रसिद्धः । **वार्ध्रीणसो** जरच्छागः । एवं हि **निगमेषु** पठ्यते

"त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाःपितृकर्मणि"॥ पिबतो यस्य त्रीणि जलं स्पृशन्ति कर्णौ जिह्वा च स त्रिभिः पिबतीति त्रिपिबः । यत्तु **गव्येन** गोमांसभक्षणे प्रायश्चित्तमाम्नातं तन्मधुपर्काष्टकाश्राद्धेभ्योऽन्यत्र ज्ञेयम् ॥ २७१ ॥

कालशाकं महाशल्काः खङ्गलोहामिषं मधु ॥
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः ॥ २७२ ॥

कालशाकं विशिष्टशाकं प्रसिद्धम् । कृष्णे वास्तुकभेदे वा यथा **महाशल्काः** शल्यका उच्यन्ते ।

अन्ये तु मत्स्यान् सशल्कानाहुः । **खङ्गो** गण्डकः **लोहः** कृष्णश्छागः सर्वरक्तश्च । तथा **पुराणम्** " कृष्णश्छागस्तथा रक्त आनन्त्यायैव कल्पते " । लोहशब्दो वर्णलक्षणया तद्वर्णयुक्ते छागे वर्तते । अयःकृष्णं ताम्रं लोहितं उभयत्रापि लोहशब्दः प्रयुज्यते । यद्यपि चैष वर्णो मेषादिष्वपि संभवति तथापि स्मृत्यन्तरप्रसिद्ध्या छाग एव गृह्यत इति व्याचक्षते ।

अन्ये तु शकुनिर्लोहितपृष्ठः नामैकदेशेन देवदत्तो दत्त इतिवत्प्रतिपाद्यत इत्याहुः । समाचारश्चोभयत्राप्यन्वेष्यः ।

[अष्टावैणेयमांसेन पार्षतेनाथ सप्त वै ॥ अष्टावैणेयमांसेन रौरवेण नैवव तु ॥ १ ॥]

१ र-कृष्णवासुदेवो यथा । २ क-प्रतिपद्येते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मधु माक्षिकम् । सर्वत्रात्र प्रीत्यतिशयोत्पत्तिर्विवक्षिता । न तु यथाश्रुत एव कालः । तथाहि द्वादशवर्षाण्यकरणं स्यात्तत्र विरुध्येत "पित्र्यमा निधनात्कार्यमिति" ॥२७२॥

यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ॥
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥ २७३ ॥

यत्किंचिदन्नं मधुना संयुक्तम् । त्रयोदश्यां **वर्षासु च मघासु** चाधिकमिति । तदा च **तदक्षयमेव** । ऋतुनक्षत्रतिथीनां च समुच्चयः । **आपस्तम्बवचनात्तु** वर्षासु त्रयोदश्यष्टमीदशमीष्वपि । मघासु चान्तरेणाविवक्षा । एवं ह स्माह "मघासु चाधिकमिति" (२ । ८ । १९ । १० ।) ॥ २७३ ॥

अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम् ॥
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥ २७४ ॥

प्रकृतां त्रयोदशीं वर्षादिगुणयुक्तामधिकृत्येदमुच्यते । एवं पितर आशासते । **अस्माकं कुले भूयात्स** तादृशो जायतां उत्कृष्टगुणः यः प्रागुक्तायां त्रयोदश्यामस्मभ्यं **दद्यात्पायसं मधुसर्पिःसंयुक्तम्** । तथा कुञ्जरस्य हस्तिनः **प्राक्छाये** प्राच्यां दिशि गतायां छायायां अपराह्णेतरे काल इत्यर्थः । शेषेऽहनि हस्तिनो दीर्घा प्राची छाया भवति । 'प्राक्च्छायां' इति वा पाठः । छायायां हि ब्राह्मणा भोज्यन्ते । अग्रिमं कर्म तु यद्यल्पत्वाच्छायायां न संभवति तद्देशान्तरे तत्समीपे कर्तव्यम् । अङ्गत्वात्सतिसंभवे तत्सर्वाङ्गोपेतं प्रधानं हस्तिच्छायायामेव । यत्तु व्याचक्षते ग्रहोपरागो हस्तिछायोच्यते हस्ती वै भूत्वा स्वर्भानुरासुरिरादित्यं तमसाविध्यदिति तदयुक्तम् । **तत्र हि गौणो** हस्तिशब्दप्रयोगः । **स्मृत्यन्तरे** च पृथगेव हस्तिछाया ग्रहोपरागादाम्नाता "हस्तिछाया ग्रहणं चन्द्रसूर्ययोरिति" ॥ २७४ ॥

यद्यद्ददाति विधिवत्सम्यक् श्रद्धासमन्वितः ॥
तत्तत्पितॄणां भवति परत्रानन्तमक्षयम् ॥ २७५ ॥

यद्यदिति वीप्सायां अप्रतिषिद्धं सर्वमन्नमनुजानाति । **विधिवत् सम्यक्**शब्दानुवादः । **श्रद्धासमन्वित** इत्येतदत्र विधीयते । श्रद्धया दातव्यं तथादत्त**मनन्तमक्षयं भवति पितॄणां** परलोके । अनन्तमिति वा कालावधिनिषेधः । अक्षयमिति मात्रयाव्ययाभावमाह । सर्वकालं भवति प्रभूतं च ॥ २७५ ॥

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ॥
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥ २७६ ॥

---

१ अग्रे २७९ श्लोके । २ क–राहूपरागो । ३ र–अप्रसिद्धं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशम्यादीनां वचनात्फलातिशयोत्पत्तिः । अन्यास्वपि तु सत्यां श्रद्धायां कर्तव्यम् । चतुर्दश्यां तु निषेध एव ॥ २७६ ॥

युक्षु कुर्वन् दिनर्क्षेषु सर्वान्कामान्समश्नुते ॥
अयुक्षु तु पितॄन्सर्वान्प्रजां प्राप्नोति पुष्कलाम् ॥ २७७ ॥

युग्मिदिनानि द्वितीयाचतुर्थ्यादीनि । ऋक्षं नक्षत्रं तानि भरण्यादीनि युग्मि भवन्ति । प्रतिपत्तृतीयापञ्चमीसप्तमीनवम्यस्तिथयोऽयुज उच्यन्ते । द्वितीयाचतुर्थीषष्ठ्यष्टमीदशम्यो युजः । एवमेकादश्ययुक्प्रभृतौ द्रष्टव्यं नक्षत्रेष्वपि । **सर्वान् कामान्** ते च कामा इतिहासपुराणयोर्भेदेनोपत्ताः । **पुष्कलां प्रजां** । धनविद्याबलपुरुषैः पुष्टा पुष्कला ॥ २७७ ॥

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ॥
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते ॥ २७८ ॥

पूर्वपक्षः शुक्लपक्षः **अपरः** कृष्णपक्षः चैत्रसिताद्या मासा इति । **यथा श्राद्धस्य** शुक्लपक्षात् कृष्णपक्षो **विशिष्यते** प्रकृष्टफलदो भवति । **तथा पूर्वाह्णादपराह्णो** विशेषवचनात् पूर्वाह्णेऽपि कदाचित्कर्तव्यमेवेति प्रतीयते ।

ननु च प्रसिद्धेन दृष्टान्तेन भवितव्यम् । न चापरपक्षस्य पूर्वपक्षाच्छ्राद्धं प्रति विशेष उक्तः । केचिदाहुः । 'कृष्णपक्षे दशम्यादावि'त्येतस्मात्प्रतीयते । एवं तु ब्रूमः । " वचनानि त्वपूर्वत्वात् " इत्यनेन न्यायेनाप्रसिद्धस्य दृष्टान्ततास्तीति विधिरपि दृष्टान्तवचनादेव शक्योऽवगन्तुम् ॥ २७८ ॥

प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा ॥
पित्र्यमा निधनात्कार्यं विधिवद्दर्भपाणिना ॥ २७९ ॥

यत्किंचित्पित्र्यं तत्र कर्मण्ययं विधिः । पदार्थाः प्राग्व्याख्याताः । **अतन्द्रिणा** अनलसेन श्रद्दधानेनेतियावत् । **आ निधनादा** मरणाद्यावज्जीविकोऽयं विधिरित्यर्थः । **दर्भपाणिना** । तदुक्तं "दर्भाः पवित्रमिति" । तद्ग्रथितशीर्षकं दर्भमयं पवित्रमुच्यते ॥ २७९ ॥

*** रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा ॥**
संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ॥ २८० ॥

---

१ र–तथा । २ र–असिद्धस्य । ३ अ. ३ श्लो. २५६ ।

* [कुर्वन् प्रतिपदि श्राद्धं स्वरूपां लभते प्रजाम् ॥ कन्यकाश्च द्वितीयायां तृतीयायां तु वाजिनः ॥ १ ॥
पशून् क्षुद्रांश्चतुर्थ्यां तु पञ्चम्यां शोभनान्सुतान् ॥ षष्ठ्यां द्यूतमवाप्नोति सप्तम्यां लभते कृषिम् ॥२॥
अष्टम्यामपि वाणिज्यं लभते श्राद्धदो नरः ॥ नवम्यां वै चैकशफान् दशम्यां द्विऽऽखुरान् बहून् ॥ ३ ॥
एकादश्यां तथा रौप्यं ब्रह्मवर्चस्विनः सुतान् ॥ द्वादश्यां जातरूपं च रजतं कुप्यमेव च ॥ ४ ॥
ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु कुप्रजाः ॥ प्रीयन्ते पितरश्चास्य ये च शस्त्रहता रणे ॥ ५ ॥
पक्षाद्यादिषु निर्दिष्टान्विपुलान्मनसः प्रियान् ॥ श्राद्धदः पञ्चदश्यां च सर्वान्कामान्समश्नुते ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु चापराह्णे विधानात्कुतो रात्र्यादिषु प्राप्तिः । अथ मतं विशेषवचनेनान्यत्राप्यस्तीति ज्ञापितं सत्यम् । “ पूर्वाह्णादपराह्णो विशिष्यत ” इति यदपेक्षं विशेषवचनं तत्रैवास्तीति सामान्यज्ञानं प्रवर्तते । तेन पूर्वाह्ण एव कदाचित्तस्यान्य उत्तरकाल इति केचिदाहुः “ ग्रहणं चन्द्रसूर्ययोरिति ” चन्द्रग्रहादिषु रात्र्यादावपि प्राप्तस्तन्निषेधार्थम् । अतश्च सन्ध्यायां चन्द्रसूर्ययोरुपरागेण रात्रौ चन्द्रग्रहणे प्रतिषेधाविधानाद्विकल्पः ।

अन्ये त्वाहुः मध्याह्नकालः पूर्वाह्णापराह्णाभ्यामन्यस्तत्राप्येतेन प्रतिषेधेन कर्तव्यमिति ज्ञाप्यते । सूर्ये चैव पूर्वाह्णकालत्वात्प्रथमोदिते सूर्ये प्रतिषेधः । **राक्षसीत्यर्थवादः** ॥ २८० ॥

अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ॥
हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम् ॥ २८१ ॥

पूर्वोक्तेन **विधिना** इतिकर्तव्यताकलापेन पूर्वेद्युर्निमन्त्रणादिभिः संवत्सरस्य **त्रिः श्राद्धं** कुर्वीत । केषु मासेष्वित्यत आह । **हेमन्तग्रीष्मवर्षासु** । मासानुमासिकमित्यस्य त्रिः संवत्सरविधिर्वैकल्पिकः । **पाञ्चयज्ञिकः** पञ्चमहायज्ञमध्ये यः पठितः सोऽन्वहं कर्तव्यः । अस्य च प्राचीनावीत्यपसव्योदङ्मुखब्राह्मणभोजनमित्येतावत्येवेतिकर्तव्यता । एवमर्थमेव पुनरुपन्यासः । एवं त्रिःसंवत्सरविधिरनाहिताग्नेरित्येवं पूर्वे व्याचक्षते । प्रमाणं तु त एव विदंति ॥ २८१ ॥

न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते ॥
न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ॥ २८२ ॥

पितृयज्ञाङ्गभूतो होमः **पैतृयज्ञिकः** स **लौकिके** स्मार्तेऽग्नौ **न विधीयते** । शास्त्रेण कर्तव्यतया न चोद्यते । तस्मात्त्रिः संवत्सरस्यानाहिताग्निना कर्तव्यम् । यद्यपि त्रिःकृतमपि भवत्येव कृतं लौकिकेऽग्नौ तथापि संवत्सरापेक्षया अकृतमेव तद्भवति । प्रस्थभोजनो हि न्यूने भुक्ते भवंति वक्तारो नास्माभिरत्यभुक्तमिति । अर्थवादतया पूर्वशेषमिदं पूर्वे व्याचक्षते ।

इदं तु युक्तम् । यल्लौकिकोऽग्निर्विवाहादावपरिगृहीतस्तस्मिन् श्राद्धाङ्गभूतो होमो न कर्तव्य इत्युच्यते । होमप्रतिषेधेन च तद्व्यतिरिक्तमन्यत्कर्म कर्तव्यमित्युक्तं भवति । इतरथा परिगृहीताग्नेर्होमस्य पार्वणश्राद्धाङ्गत्वेन विधानादनग्निकस्य श्राद्धानधिकार एव स्यात् । यथाऽन्धस्याज्यावेक्षणाशक्त्यां दर्शपौर्णमासयोरनधिकारः । अस्मिंस्तु सति साग्निकस्य होमवत् श्राद्धम् अनग्निकस्य तद्वर्जितमपि ज्ञापितं भवति । तथा च “अग्न्यभावे” (अ. ३ श्लो. २१२) इत्यस्यायमेव विषयः

---

१ श्लो. २७८ । २ र–पैतृकयज्ञिको । ३ इदंत्वयुक्तम् । ४ फ–यदि । ५ फ–परिगृहीतान्यपि । ६ फ–न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येऽपि व्याचक्षते पिण्डपितृयज्ञोऽभिप्रेतः तत्र यो होमः स लौकिके स्मार्तेऽग्नौ नास्ति तेऽपि न युक्तमाहुः । अस्त्येव एवम् अनाहिताग्नेर्नित्ये श्रपयित्वा जुहुयादित्यादि । न दर्शेन विना श्राद्धं ग्रहोपरागादावाहिताग्नेः प्रतिषेध इत्याहुः । एतत्तु समाचारविरुद्धम् ।

अन्ये तु पठन्ति न विनादर्श इत्यत आहिताग्निना मासानुमासिकं कर्तव्यम् । नास्य त्रिःसंवत्सरविधिः । नैवायं पाठोऽस्तीत्यन्ये । कस्तर्ह्यस्यार्थः । दार्शात् श्राद्धादन्यदाहिताग्नेर्मघाश्राद्धादि न नियमेन भवतीति दार्शमेव तस्य नियतम् । अनाहिताग्नेस्तु हेमन्तादिविहितान्यपि नियतानीति ॥ २८२ ॥

यदेव तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः ॥
तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् ॥ २८३ ॥

पाञ्चयज्ञिकं यच्छ्राद्धं अहरहरित्युक्तं तस्य वैकल्पिकत्वमनेनोच्यते । उदकतर्पणं यत्क्रियते स्नात्वा **तेनैव पितृयज्ञक्रियाफलं प्राप्नोति** । यदुक्तम् "कमप्याशयेत्" इति तस्य नास्ति नियमेन कर्तव्यता । उदकतर्पणमवश्यं कर्तव्यम् ॥ २८३ ॥

वसून्वदन्ति तु पितॄन् रुद्रांश्चैव पितामहान् ॥
प्रपितामहांस्तथाऽऽदित्यान् श्रुतिरेषा सनातनी ॥ २८४ ॥

पितृद्वेषादप्रवर्तमानस्य प्रवृत्त्यर्थमिदम् । त्रिस्थानावस्थाद्या देवताः पितरोऽपि य एव पिण्डभाजः अतो देवतात्वेनैते द्रष्टव्याः । **श्रुतिरेषा** श्रूयते एतद्वेदे तु अतः पुरातनी नित्यत्वाद्वेदस्य ॥ २८४ ॥

विघसाशी भवेन्नित्यं नित्यं वाऽमृतभोजनः ॥
विघसो भुक्तशेषं तु यज्ञशेषं तथाऽमृतम् ॥ २८५ ॥

आद्येन श्लोकपादेनातिथ्यादिभुक्तशिष्टस्यान्नस्य यद्भोजनं विहितं तदनूद्यते । माङ्गलिकतया मङ्गलावसानानि शास्त्राणि प्रथन्ते । पित्र्याद्दैवं कर्म शस्ततरम् । **यज्ञशेषम्** । अनेन ज्योतिष्टोमादिहविःशेषस्य भोजनं विघसस्य तुल्यतयोच्यते । उत्तरेणार्धश्लोकेन सौहार्दमेव । तस्य वेदार्थव्याख्यानम् । कस्यांचिच्छाखायामाभ्यां शब्दाभ्यां विधानं दृष्टमतो व्यामोहं निवर्तयति । विघसमश्नातीति **विघसाशी** । अमृतं भोजनमस्येत्य**मृतभोजनः** । **भृत्यशेषं** भृत्यभुक्तशिष्टमिति द्रष्टव्यम् । भुक्तशेषमितिपाठे सामर्थ्यादतिथ्यादिभुक्तमिति द्रष्टव्यम् । अन्यत्तु प्रकृतत्वाच्छ्राद्धभुक्तशेषमिति द्रष्टव्यम् । तथा च

१ फ–पिण्डपितृयज्ञः पितृयज्ञोऽभिप्रेतः । २ फ–अस्त्वेवमनाहिता— । ३ फ–दर्शेन । ४ फ–इत्यस्यानाहिताग्निना; आहिताग्निना । ५ फ–मंगला वसधानि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मृत्यन्तरं " भुञ्जीत पितृसेवित " इति । श्राद्धाङ्गं चैतद्भोजनं केचिदाहुः । अन्ये तु पुरुषार्थो भोजननियमोऽयमित्याहुः । ' वसून्वदन्ती'त्यनेनैव श्राद्धप्रकरणस्याप्रवृत्तत्वात् । **यज्ञशेषं** यज्ञोपयुक्तद्रव्यशेषमिति द्रष्टव्यम् ॥ २८५ ॥

एतद्वोऽभिहितं सर्वं विधानं पाञ्चयज्ञिकम् ॥
द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति ॥ २८६ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां तृतीयोऽध्यायः ॥ ३ ॥

पूर्वं हि व्यवहितस्य **पाञ्चयज्ञिकमिति** महायज्ञविधेरुपसंहारो माङ्गलिकतयैव उत्तरेण श्लोकार्धेन वक्ष्यमाणाध्यायार्थैकदेशोपन्यासोपगते चोक्तप्रयोजनानि । **द्विजातिमुख्या** ब्राह्मणास्तेषां वृत्तयो जीविकाः कर्माणि । द्विजातीनां वा मुख्यवृत्तय इति । उत्तरत्रैव दर्शयिष्याम इति प्रसिद्धम् ॥ २८६ ॥

मान्या काऽपि मनुस्मृतिस्तदुचिता व्याख्या हि मेधातिथेः ।
सा लुप्तैव विधेर्वशात्क्वचिदपि प्राप्यं न यत्पुस्तकम् ॥
क्षोणीन्द्रो मदनः सहारणसुतो देशान्तरादाहृतै-
र्जीर्णोद्धारमचीकरत्तत इतस्तत्पुस्तकैर्लेखितैः ॥ १ ॥

शुभं भवतु ॥

इतिश्रीभट्टवीरस्वामिसूनोर्भट्टमेधातिथिस्वामिनः कृतौ मनुभाष्ये
तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

ॐनमो भगवते विश्वेश्वराय ।

---

१ **फ**-अप्रवृत्तत्वात् । २ र- उपन्यासं, । तौ चोक्तप्रयोजनौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ चतुर्थाध्यायप्रारम्भः ॥

चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः ॥
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ १ ॥

संक्षेपेणातिक्रान्तस्याध्यायद्वयस्यार्थं कथयत्यनुस्मरणाय । गार्हस्थ्यधर्मस्यायं वृत्तिविधिरिति द्वितीयं श्लोकप्रयोजनम् । अनियतपरिमाणत्वादायुषश्चतुर्थभागव्यवस्था-विधानमाश्रमिणामनुपपन्नमतः श्लोकोऽयं विहिताश्रमकालानुवादार्थः । यद्यपि च "शतायुर्वै पुरुष" इत्येतदपेक्षया कथंचिदुपपद्येतापि तथापि स्वप्रकरणे ग्रहणान्तिकमिति अवध्यन्तरस्य ब्रह्मचर्यविहितत्वात् । "गृहस्थस्तु यदा पश्येत्" इति गार्हस्थ्येऽपि कालान्तरप्रतिपत्तेरनुवादतैवानुमीयते । **चतुर्थमाद्यमायुषो भागं** जन्मापेक्षमाद्यत्वं **गुरौ उषित्वा** ब्रह्मचर्यं कृत्वा ततो **द्वितीयं** चतुर्थमायुषो भागं कृतविवाहो **गृहे वसेत्** । गृहस्थाश्रममनुतिष्ठेत् । तत्र वसेत् ॥ १ ॥

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ॥
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ २ ॥

'देहि देहीति' याच्यमानस्य यः परस्य चित्तविकारः खेदात्मको जायते स द्रोहोऽभिप्रेतो न पुनर्हिंसैव तस्याः सर्वसामान्येनैव प्रतिषेधात् । **अल्पद्रोहेणेति** । याञ्चया विना यदि न वर्त्यते तदा स्वल्पं याचितव्यम् । एषोऽल्पद्रोहो या वृत्तिर्जीवनोपायः कृषिसेवादि । यस्यां वृत्तौ परस्य पीडा न भवति सा आश्रयितव्या । सामान्योप-देशोऽयम् । **समास्थाय** आश्रित्य जीवेत् । आपदि दशमे विधिर्भविष्यति । अस्माच्चोपदेशाद्वक्ष्यमाणाभ्य इत्यादिवृत्तिर्भवतीति गम्यते । अन्यथा वक्ष्यमाणविशेषनिष्ठत्वे सामान्यैरस्योपदेशस्यानर्थक्यमेव स्यात् । तेन च याजनाध्यापने कुसीदं अमृतादि-मध्ये अपठितमपि लभ्यते । अल्पीयसी या उञ्छवृत्तिर्गृहीता असौ ह्यल्पद्रोहः । तथा

१ अ. ६ श्लो. २ । **फ**–निष्ठत्व ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च **गौतमः** (अ. १० सू. ५) " कृषिवाणिज्ये वा स्वयं कृते कुसीदं च " । जीवनमात्रोऽयं विधिर्धनसंचयस्तु वक्ष्यमाणैरेव नियतैः कर्मभिः ॥ २ ॥

यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ॥
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ॥ ३ ॥

पूर्वेणान्त्याह्निकजीवनविधावुपाय उक्तोऽनेन धनसञ्चये नियम उपदिश्यते । **स्वैः कर्मभिः धनसंचयं कुर्यात्** । तानि च कर्माण्युत्तरत्र वक्ष्यन्ते । संचयप्रयोजनमाह । **यात्रामात्रप्रसिध्यर्थं** न भोगाय धनसंचयक्लेशः कर्तव्यः । किंतर्हि यात्रामात्रप्रसिद्ध्यर्थम् । आत्मकुटुंबस्थितिर्यात्रा तत्परिमाणं यात्रामात्रं तस्य प्रसिद्धिर्निष्पत्तिः तदर्थस्तत्प्रयोजनं नित्यकर्मनिवृत्तिरात्मस्थितावेवान्तर्भूतानि न ह्यकुर्वत आत्मस्थितिः । आह च (अ. ३ श्लो. ७२) " न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति " । अथवा सत्यपि शास्त्रीयत्वे यत्र लोके गर्हते तद्वर्ज्यमेव । यथा नरस्य महाकुलीनस्य भुक्तविभवस्य निकृष्टकुलात्प्राप्तश्रीकात् समानजातीयादपि प्रतिग्रहादिना केनचिदुपायेन जीवनम् । **अक्लेशेन शरीरस्य** सेवावाणिज्ये महाक्लेशो दूराध्वगमनादिना तादृशो न कर्तव्यः । **संचयो** राशीकृतपरिरक्षणम् ॥ ३ ॥

ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ॥
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥ ४ ॥

तानीदानीं कर्माणि नामतस्तावदाह । नाम्नैव केषांचित् स्तुतिः प्रतीयते । प्रयोजनं वा प्रशस्ताभावे निन्दितेषु प्रवृत्तिः । तत्र मृतप्रमृते अत्यन्तनिन्दिते । ततोऽपि सत्यानृतं यत आह तेनैव वाऽपि जीव्यत इति । अपिशब्द अरुचिस्तवनार्थः ॥ ४ ॥

नामतो निर्दिश्य स्वरूपतो व्याचष्टे ।

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ॥
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ ५ ॥

उञ्छश्च शिलश्च **उञ्छशिलं तदृतं ज्ञेयम्** । सत्यव्रततुल्यं क्षेत्राल्लूनस्य व्रीह्यादेर्गृहं खलं वा नीयमानस्य यः पुलाकः पतितः स्वामिनोऽनपेक्षितस्तस्योच्चयनमुञ्छस्तदृतम् । न तत्रेयं बुद्धिराधेया । परकीयमेतन्न गृह्णामीति ।

एवं च स्वत्वात्परिभ्रष्टस्य लूनस्यालूनस्य वाऽनेकप्ररोहवतो ग्रहणं शिलः । **अमृतं स्यादयाचितम्** । अत्यन्तप्रीतिकरत्वात् । **मृतमिव याचितम्** भैक्षितमिति ।

---

१ **अ क**–यात्रामात्रा । २ **फ**–गर्हते । ३ **ख**–न कर्तव्यः । ४ **अ क र ण** कथचंन । ५ **फ**–तानि कर्माणि । ६ **फ**–स्थितिः । ७ **अ फ**–पुलकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याचितमित्येव सिद्धे भैक्षशब्देन सामूहिकतद्धितान्तेन बहवो याचितव्या इत्युच्यते । नैकः कदर्थनीयस्तदुक्तम् "अल्पद्रोहेणेति" । प्रायेण च भैक्षशब्दस्य भैक्ष्यस्यात्मविशुद्ध्यर्थमित्येवमादौ सिद्धान्नविषये प्रयोगसिद्धेः सामान्यविषयार्थं याचितशब्दोपादानम्। तेन नेदं सिद्धान्नभिक्षणमेव । अग्निमतः पराग्निपक्केन वैश्वदेवादिविरोधात् । न चेदं भोजनार्थमेव भिक्षणम् । किंतर्हि ? स्थित्यर्थम् । स्थितिश्च न भोजनमात्रसाध्या गृहस्थस्य । किंतर्हि ? । यत्किंचिद्गृहोपयोगि । अत एवोदकपरिधानाद्यपि भिक्षितव्यम् । गृहोपकरणं च स्थाल्यपिधानादि । ब्रह्मचारिणस्तु भोजनकाले विधिना पाकासंभवान्नियमतः सिद्धान्नविषयं भैक्ष्यं प्रतीयते । भिक्षाशब्दश्चायं भिक्ष्यमाणद्रव्यगतं परिमाणमप्याचष्टे । भिक्षामात्रं न ददाति याचितः । प्रसृतिमात्रं भिक्षेति तेन गोहिरण्यादिभिक्षणं न प्रसृतशब्देनाभ्यनुज्ञायते । प्रतिग्रहाद्यर्था याञ्चेति ।

ननु भैक्षग्रहणमपि प्रतिग्रह एव । नैवं ग्रहणमात्रं प्रतिग्रहः । विशिष्ट एव स्वीकारे प्रतिपूर्वो गृण्हातिर्वर्तते तेन न स्वीकारमात्रे "प्रतिग्रहसमर्थोऽपि" (अ. ४ श्लो. १८६) "प्रतिग्रहः प्रत्यवरः" इति (अ. १० श्लो. १०९) । अदृष्टबुद्ध्या दीयमानं मन्त्रपूर्वं गृह्णतः प्रतिग्रहो भवति। न च भैक्षे 'देवस्य त्वादि' मन्त्रोच्चारणमस्ति । न च प्रीत्यादिना दानग्रहणे न च तत्र प्रतिग्रहव्यवहारः । अतः प्रतिग्रहादर्थान्तरमेवेदमृतामृतशब्दाभिधेयम् । अतश्च नात्र याच्यमानस्य अयाच्यमानस्य वा महासत्वतया उपकारान्तरापेक्षा जायते येन वा ददतो जात्याद्यपेक्षा युक्तिमता प्रतिग्राह्यस्यैव करुणया च प्रदीयमानं गृह्णतो न प्रतिग्रहः ।

ननु च करुणया दानमदृष्टायैव नेति ब्रूमः । न च तत्र दानधर्मः । किंतर्हि करुणाभ्यासात्परोपकाराद्वा । तत्र यथा हितोपदेशादावनुग्राह्यस्य । यथा विधिर्जात्यादिर्ना पेक्षते तद्वत्करुणया दाने । तथा च शिष्टा नैवंविधे दाने वेदतत्त्वार्थविदुषे ब्राह्मणायेत्येतदनुरुध्यन्ते । अत एवाब्राह्मणा अपि दैन्यमापन्नाः परेण दत्तं गृण्हाना न ब्राह्मणवृत्तं प्रतिग्रहमाश्रिता भवन्ति । स्थितमेतत् । प्रतिग्रहे यद्यपि याचितायाचितपूर्वकत्वं विद्यते तथापि न तेनैवं मृतामृतशब्दार्थः । विषयान्तरस्य दर्शितत्वात् । याजनाध्यापनयोरप्येतद्रूपमस्ति । कश्चिद्याजयित्वा याजकत्वं लभते । कश्चित्प्रार्थ्यते । एवमध्यापने योज्यम् । अतो यावता काचिद्वृत्तिर्याच्ञा या सा दैन्यावहत्वात् मरणमिवेति मृतशब्देनाभिधीयते । कर्षणं तु मरणादपि पापीयः । लाङ्गलाकर्षणं हि भारवाहत्वं तच्च खलजनपदकर्म ॥ ५ ॥

१ उपरि २ श्लोके । २ रण—तानेवत्वं । ३ अ क—याचित्वा याचकाविद्यते ।

For Private And Personal Use Only

सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ॥
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ ६ ॥

नैवं मन्तव्यं सत्यानृतोभयरूपता शास्त्रेण वाणिज्येऽभ्यनुज्ञायेत इति । किंतर्हि वस्तुस्वभाववादोऽयं, लोभग्रहणमेवानृतं जीव्यत इतिवचनाद्वाणिज्या जीवनायैव न धनसंचयाय सेवा श्ववृत्तिर्यथा हि श्वा प्रेर्यते कृच्छ्रेण च लभते तथा च सेवकः सेवा प्रेष्यत्वं यत्रकुत्रचित्कर्माणि प्रेष्यते उचितेऽनुचिते वा स सेवकः । अत उत्कृष्टेनायुधकर्मादिना ये स्वामिनमुपसर्पन्ति ते न श्ववृत्तयः ॥ ६ ॥

कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा ॥
त्र्यहैहिको वाऽपि भवेदश्वस्तनिक एव वा ॥ ७ ॥

उक्तमात्मकुटुम्बस्थित्यै धनसंचयः कार्यो न भोगाय क्लेश आश्रयणीयः । तत्तु किमन्वहमर्जनीयं उतैकदैव चिरकालपर्याप्तमिति नोक्तम् । तत्र कालविलम्बार्थमिदमारभ्यते ।

कुसूले धान्यमस्येति गमकत्वाद्व्यधिकरणो बहुव्रीहिः । पाठान्तरं कुशूलधान्यक इति । कुसूलपरिमितं धान्यं कुसूलधान्यं तदस्यास्तीति मत्वर्थीय इक् शब्दः । धान्याधिकरणमिष्टकादिकृतम् । कुसूलः कोष्ठ इति चोच्यते । तेन चात्रापरिमाणं लक्ष्यते । तत्र यावन्माति तावत्संचेतव्यम् । न पुनराधारनियमोऽस्ति । कुसूले च महापरिग्रहणस्यापि बहुभृत्यबन्धुदारदासपुत्रगवाश्वादिमतोऽपि यावता सांवत्सरी स्थितिर्भवति तावदनुज्ञायते । यतो वक्ष्यति (अ. ११ श्लो. ७) " यस्य त्रैवार्षिकं भक्तमिति " धान्यग्रहणमप्यविवक्षितम् । सुवर्णरूप्याद्यपि तावत्याः स्थितेः पर्याप्तमर्जयतो न दोषः । सर्वथाऽधिकं ततो नार्जनीयमिति वाक्यार्थः ।

कुम्भी उष्ट्रिका षण्मासिको निचय एतेन प्रतिपाद्यत इति स्मरन्ति । त्र्यहमैहिकमस्येति त्र्यहैहिकः कुटुम्बस्य नित्यकर्मार्थं च भक्तचयं करोति यः स त्र्यहैहिकः । श्वो भवं श्वस्तनं भक्तं तदस्यास्तीति पूर्ववत् मत्वर्थीयं कृत्वा नञ् समासः कर्तव्यः । सद्यस्तात्कालिको भवेत्तदहरर्जितं व्ययीकर्तव्यम् ॥ ७ ॥

अस्य विकल्पस्य व्यवस्था माह

चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् ॥
ज्यायान्परः परो ज्ञेयो धर्मतो लोकजित्तमः ॥ ८ ॥

---

१ अ क–ज्ञायते । २ ण–त्र्यहैहिके । ३ फ–उक्त । ४ ख–धान्यिक । ५ द–तथा ।

यो यः स्वल्पकालसंचयः स स धर्मैर्ज्यायानधिकः । धर्माधिक्याच्च फलाधिक्यं भवति । **लोकजित्तमः** । लोकाञ्जयत्याधिपत्येनावतिष्ठते । भोग्यतया स्वीकरोति । प्रकर्षविवक्षायां तमः । अविशेषोपादानाल्लोकः स्वर्गः प्रतीयते । तेनेयमत्र व्यवस्थामाह । परिग्रहो यो बह्वपत्योऽप्राप्तपुत्रोऽसंविभक्तपुत्रः अकृतकन्याविवाहश्च स कुसूलधान्यकः । यस्तु परिणतवयाः प्राप्तपुत्रः कृतकरणः स यावद्यावच्छममेति तावत्तावदितरान्कल्पानाश्रयेत् ॥ ८ ॥

षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते ॥
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥ ९ ॥

एषां कुसूलधान्यकादीनां गृहस्थानामेकः **षट्कर्मा भवति** । यो महापरिग्रहः प्रागुक्तस्तस्य षड्वृत्तिकर्माणि भवन्ति । कानि पुनस्तानि उञ्छशिलायाचितयाचितलाभकृषिवाणिज्याध्यापनयाजनप्रतिग्रहाः याचितायाचितग्रहणादन्तर्भवन्ति । बहुकुटुम्बको नित्यकर्मसंपत्त्यर्थं च सर्वा वृत्तीः समुच्चिताः कुर्यात् । कृषिवाणिज्ये अपि येऽप्यध्यापनमध्ययनमित्यादीनि प्रथमाध्यायपठितानि षट्कर्माणि व्याचक्षते तेषां प्रकरणविरोधो निष्प्रयोजनं वाऽध्ययनादीनामुपादानमन्यत्रैव तेषां विहितत्वात् ।

अन्यो द्वितीयः कुम्भीधान्यस्त्रिभिः **प्रवर्तते** । प्रोऽनर्थको यावद्वर्तते तावत्प्रवर्तते इति वर्तनं च स्थितिसंपत्तिः प्रकृतानां च यानि कानिचित् क्वचित् कृषिवाणिज्ये विहाय प्रशस्ततरो हि पूर्वस्मात्कुम्भीधान्यको यतो वक्ष्यति सा वृत्तिः सद्भिर्गर्हिता । " गोरक्षकान्वाणिजिकानिति" । यदप्युक्तं **गौतमेन** (अ. १० सू. ५-६) " कृषिवाणिज्ये वाऽस्वयं कृते कुसीदं च"त्यनापद्येव तत्राप्यस्वयंकरणपक्षे दोषोऽस्त्येव लघीयांस्तु भविष्यति ।

द्वाभ्यामेकः । अत्रापि याचितलाभं वर्जयित्वा त्रयाणां यथासंभवं द्वे गृह्येते । अयाचितमपि तावद्गृह्यते यावत्त्र्यहपर्याप्तम् । **चतुर्थस्तु ब्रह्मसत्रेण जीवति** । ब्रह्मसत्रं शिलोञ्छयोरन्यतरा वृत्तिः । सततभवत्वात्सत्रमिव न तदहःपरिसमापनीया वृत्तिरतः सत्रमित्युच्यते अहरहर्नित्यमनुष्ठानात् । ब्रह्मशब्दो ब्राह्मणपर्यायस्तेषामिदं सत्रम् । अस्माद्ब्रह्मशब्दात्पूर्वोऽयं वृत्तिप्रपञ्चो ब्राह्मणविषय एव विज्ञेयः । क्षत्रियादीनां तु तत्र वक्ष्यति ।

कथं पुनः शिलोञ्छवृत्त्या जीवनं संभवति यावता शरद्ग्रीष्मयोरेव क्षेत्रे खले वा शिलपुलाकपातसंभवः । अथोच्यते । ग्रैष्मेभ्यो ग्रैष्माणि शारदानि शारदेभ्योऽर्जयिष्यतीति

१ फ-व्यवस्था । महापरिग्रहो । २ फ-यावद्-तावत् । ३ अ-प्रकृतानि । ४ श्लो. ८८ । ५ फ-पवर्तते । ६ अ. ८ श्लो. १०२ । ७ फ-ग्रीष्मेभ्यो ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षाण्मासिकवृत्तिरेव स्यान्नाश्वस्तनिकः । अथान्यथाऽपि संभवति यावतस्तावतो व्रीह्यादेः कथंचित्पतितस्योपादानम् । सत्यम् । न तद्भोजनाय पर्याप्तम् । संचिन्वानो यदा पर्याप्तं प्राप्स्यति चेदशिष्यति पश्चाहार्यसंभवात्[1] । तथा च **महाभारते** शिलोञ्छवृत्तिः पक्षान्ताशनो वर्ण्यते । सोऽयमस्यामवस्थायां गृहस्थस्तापसः संवृत्त इति चेत् । किंत्वेवमप्यश्वस्तनिकत्वं विरुध्यते । यथोपपादस्थितिकस्तदा[2] स्यान्नाश्वस्तनिकः । अश्वस्तनिको ह्युच्यते य अहन्यहन्यर्जयति यात्रिकं तदहरेव च व्ययीकरोति । न द्वितीयेऽह्नि स्थापयति ।

यदि च न प्रत्यहं शिलोञ्छवृत्तेर्भोजनं निवर्तते । कुतोऽश्वस्तनिको भवेत् । कथं च तथाविधस्य जीवनं पुत्रदारभरणं च । अत एव केचित्त्रिभिरन्यः प्रवर्तत इत्यत आरभ्यान्यथा व्याचक्षते । त्रिभिर्याजनाध्यापनप्रतिग्रहैर्द्वाभ्यां "प्रतिग्रहः प्रत्यवर" इति प्रतिग्रहव्युदासेन याजनाध्यापने प्रतिगृह्येते । **ब्रह्मसत्र**मध्यापनं तद्धि वृत्तये पर्याप्तम् । यत्तु "वर्तयंश्च शिलोञ्छाभ्यामिति" स चतुष्टयव्यतिरिक्तोऽन्य एव । अत्रोच्यते । यः शिलपरिमाणान्दशद्वादशान्यवान्व्रीहीन्वा बहुभ्य आदत्ते यावदेकाहया त्रिकं स शिलवृत्तिः । यस्त्वेकैकं यात्रार्थमाहरति स उञ्छवृत्तिः । **स्मृत्यन्तरे** चायं ज्यायान्वरवृत्तिरुक्तः । अतश्च सार्वकालिकमप्युपपद्यते । न च वैश्वदेवादिक्रियाविरोधः तत्र पुत्रदाराणामभरणभेदश्च याचितभैक्षादत्यन्ताल्पग्रहणात् ॥ ९ ॥

वर्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ॥
इष्टीः पार्वायणान्तीयाः[3] केवला निर्वपेत्सदा ॥ १० ॥

पर्व चायनान्तश्च तयोर्भवाः **पार्वायणान्तीयाः** । स्वार्थिकमणं कृत्वा वृद्धाच्छः (व्या. सू. ४ । २ । ११४) कर्तव्यः । पर्वेष्टिर्दर्शपूर्णमासौ अयनांते च यज्ञ आग्रयणाख्यः । केवलग्रहणात्काम्या इष्टयो निषिध्यन्ते । वैश्वदेवहोमबलिहरणेऽपि तस्यै[4] नान्वहं भवतः । न हि तस्य सर्वदा तावद्धनं भवति । अतः केवलग्रहणान्महायज्ञनिवृत्तिः । ननु चाग्निहोत्रमपि तत्तस्य नैव भवति । तदपि द्रव्यसाध्यमेव । पक्षहोमान्होष्यति । भार्याभरणं कथमिति चेत्साऽपि तां वृत्तिमाश्रयिष्यति । यदा च भार्याव्रतमेतद्धारयितुमशक्ता तदा भर्तुरपि नास्त्यधिकारः । अथ चान्द्रायणादिषु प्रवृत्तस्य कथं भार्याया जीवनमिति चेत् । अचोद्यमेतद्विद्यमानत्वात् । अतिथ्यादिशिष्टमशिष्यत इति तु वैश्वदेवहोमाभावात् । विद्यमानेऽपि स्त्रीधने न भोजनं युक्तमुभयोर्विघसाशित्वविधानात् । अतः स्त्रीधनेन वैश्वदेवं करिष्यति धर्मकार्येऽनुज्ञानात्स्त्रीधनग्रहणस्य । नैवम् । तस्यामवस्थाया[5]-

१ रण-पश्चाहान्यासम्भवाद्दशाहान्यासंभवात् । २ फ-यथोपयादिक—। ३ फ-पार्वायनान्तीयाः । ४ र-तस्या । ५ फ-अस्याम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मग्निहोत्रमात्रं धर्मो न वैश्वदेवहोमः । भवतु वा । यस्यास्तर्हि धनं नास्ति कथं जीवतु तस्माद्यस्यासमर्था भार्या नासौ शिलोञ्छवृत्तावधिक्रियते । वर्तयन्नात्मानं जीवयन् ॥ १० ॥

न लोकवृत्तं वर्तेत वृत्तिहेतोः कथंचन ॥
अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् ॥ ११ ॥

लोकवृत्तं नामोच्यते येन प्राकृतजनोऽल्पसत्वो वर्तते, दम्भेनासत्प्रियाख्यानेन च 'त्वं विष्णुस्त्वं ब्रह्मा जय जीवेति' तथा विचित्रपरिहासकथाभिः । **वृत्तिहेतो**र्जीविकार्थतया न कर्तव्यमेतत् । यस्तु नर्मशीलस्तस्य न दोषः । **अजिह्माम्** यस्यान्यच्च ह्रदयेऽन्यच्च बहिः स जिह्म उच्यते द्वेषमत्सरात्मा दर्शयत्यप्रियं वदताम् । **अशठाम्** अग्निहोत्रकर्मानुष्ठानं लोकार्जनेन प्रतिग्रहादिलाभार्थं न शास्त्रार्थश्रद्दधानतया कुर्यात्स शठः । आत्मधर्मत्वेऽपि जैह्म्यशाठ्ययोर्जीविकाऽप्यभेदोपचाराव्द्यपदिश्यते । 'अजिह्मामशठां शुद्धामिति' । शुद्धिर्वृत्त्यन्तरेणामिश्रीकरणं पूर्वदोषद्वयेन च एकपदलभ्योऽप्ययमर्थो वृत्तानुरोधाद्गोबलीवर्दवद्बहुपदैः प्रतिपाद्यते । अथ कथं ब्राह्मणजीविकां जीवेदिति द्वितीया यावता जीवतिरकर्मकः । कथं चैकस्यैव धातोरेकत्र द्विप्रयोगः न हि भवति गमनं गच्छेदिति साध्यसाधनभावः । उच्यते । सामान्यविशेषभावात्साध्यसाधनभावो न विरुद्धः । यथाऽश्वपोषं पुष्ट इति । अनुष्ठानाङ्गे वर्तनार्थे जीवतिर्वर्तते । तेन सकर्मकत्वमिति न दोषः । जीवेज्जीवनार्थमनुतिष्ठेत् ॥ ११ ।

संतोषं परमास्थाय सुखार्थी संयतो भवेत् ॥
संतोषमूलं हि सुखं दुःखमूलं विपर्ययः ॥ १२ ॥

त्र्यहैहिकाश्वस्तनवृत्तिदार्ढ्यार्थं प्रसंख्यानमिदमाह । सन्तोष आश्रयितव्यो । न बहूनामुपजीव्यः स्यामिति याञ्चाक्लेश आस्थेयः । **सुखार्थी संयतो भवेत्** । संयमो यात्रिकाद्धनादधिके नाभिलाषः । सन्तोषो मनस्विनां सुखमूलं दुःखस्य मूलं **विपर्ययः** असंन्तोषो महद्भिदुषां दैन्यं अभिलषिते वस्तुन्यसंपत्तिस्तस्मात्सन्तोषमाश्रयेत् ॥ १२ ॥

अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः ॥
स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् ॥ १३ ॥

वृत्तिविषयो विधिर्वृत्तिशब्देनोक्तः । तेना**न्यतमये**ति तदपेक्षमेकजीवितं अन्यतमेन निवृत्तिविधानात् । अतो वृत्तिसमुच्चयजीविनः पितृधनं प्राप्तवतश्च व्रताधिकारो न युज्यते ।

---

१ **रण**—जपेत् । २ **फ**—लोकावर्जनेन । ३ **रण**—चस्त्वार्थे ४ **रण**—असंतोषं । ५ **फ**—जीवनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्यथा एकवृत्तिजीवन एव स्यात् । **व्रतानीमानि** । मानसः सङ्कल्पो व्रतमुच्यते । शास्त्रविहितमिदं मया कर्तव्यमिदं वा न कर्तव्यमित्येवं स्वर्गायुष्ययशस्यानि व्रतधारणफलानि केचिदाहुः । अतश्चैतत्फलार्थिनो व्रतेष्वधिकारस्तदयुक्तम् । अनित्यत्वमेवं सति प्रसज्येत । तत्रोत्तरश्लोके नित्यग्रहणं बाध्यते । **श्रुतौ** चैषां नित्यता ज्ञापिता ' यावत् हि न सा युक्ता भवतीति ' । न च स्वर्गादीनां काम्यत्वे नान्वये नाधिकृतविशेषणत्वं प्रतिपद्येरन् ॥ १३ ॥

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ॥
तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥ १४ ॥

वेदमूलत्वात् स्मृतीनां **वेदोदितमिति** श्रूयते । **स्वकं कर्म** वक्ष्यमाणो व्रतसमूहः । विहितत्वात् स्वकमित्युच्यते । **नित्यं कुर्यात्** यावज्जीवम् । **अतन्द्रितो**ऽनलसः एतद्व्रतधारणं कुर्वन्**यथाशक्ति** अनेन सत्यां शक्तौ यथासंभवमनुष्ठानमाह तदुक्तं " मनसा वा तत्समग्रमाचारमनुपालयन् " । **परमां गतिं** ब्रह्मत्वप्राप्तिरूपाम् ॥ १४ ॥

नेहेतार्थान्प्रसङ्गेन न विरुद्धेन कर्मणा ॥
न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततः ॥ १५ ॥

प्रसज्येत यत्र पुरुषः स हि प्रसङ्गोऽभिप्रेतो गीतवादित्रादिस्तत्र हि रागिणः सज्जन्तीव । अतो गीतवादित्रादिभि**रर्थान्ध**नानि **नेहेत** नार्जयेत् । विरुद्धं कर्म प्रतिषिद्धं शास्त्रेण अकुलोचितं च । न च पित्राद्यागतेषु धनेषु कल्प्यमानेषु स्थितिसमर्थेषु अन्यानि नेच्छेत् । **नार्त्यां** आपद्यपि **यतस्ततः** प्रसह्य सत्प्रतिग्रहेण प्रवर्तितव्यमेकस्यापद्येनमप्यनुज्ञास्यति ॥ १५ ॥

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः ॥
अतिप्रसक्तिं चैतेषां मनसा सन्निवर्त्तयेत् ॥ १६ ॥

इन्द्रियाणामर्था विषया रूपरसादयः तेषु न प्रसज्येत न सक्तिमत्यंतां सेवां कुर्यात् । मनोहरा युवतयः वंशगीतं स्वादुवद्रसः कर्पूरादिगन्धः रागवत्स्पर्शः एते विषयास्तान्नात्यन्तं सेवेत । **कामतः** कामप्रधानतया सर्वेषु अप्राचितोपमं तेष्वपि नित्यसेवी स्यात् । **अतिप्रसक्ति**श्चैषां निवृत्त्युपायोऽनेन कथ्यते । न हि वस्तुप्रसक्तिर्निवर्तितुं शक्या मनसा तु प्रतिपक्षभावनया निवर्त्य आदौ तावदुरूपपादकत्वे उपस्थितेष्वपि भुक्तपूर्वेषु

---

१ **रण**–संकल्पनिषेको । २ **प**–काम्यके । ३ **रण**–वेदमूलात् । ४ **रण**–नेछेत । ५ **रण**–सन्निवेशयेत् । ६ **फ**–एतेषु । ७ **फ**–सक्तिम् । ८ **र**–पादकं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षणविरसता स्वभावश्च विनाशित्वं शास्त्रनिषेधाच्च सङ्गस्य नरकापात इत्येवमादि चिन्तयेत् । यथोक्तं (अ. २ श्लो. ९६) " न तथैतानि शक्यंत " इति ॥ १६ ॥

सर्वान्परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ॥
यथातथा यापयंस्तु सा ह्यस्य कृतकृत्यता ॥ १७ ॥

ये वेदाभ्यासविरोधिनोऽर्थास्ते सर्वे त्यक्तव्याः राजामात्यगृहोपस्थानादयः येऽप्यनया लोकयात्रया सक्तस्य कृषिकुसीदाद्यधिकलाभा भवन्ति तेन च पोषयिष्यते । तदा कुटुम्बविभवतश्च दासीदासं बहु भविष्यतीति **सा ह्यस्य** स्नातकस्य **कृतकृत्यता** कृतार्थता । यं नित्यस्वाध्यायी यथाकथंचित्कुटुम्बकं जीवयतीति ॥ १७ ॥

वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ॥
वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह ॥ १८ ॥

वयस इति सारूप्यापेक्षा षष्ठी । **वेषवाक्बुद्धी**ति समाहारे द्वन्द्वः । **सारूप्यमिति** स्वार्थे ष्यञ् । तेनायमर्थो भवति । वयाद्युचिता वेषादयः कर्तव्याः । सारूप्यमौचित्यमन्यस्याकृत्यादेः सादृश्यासंभवात् । **वेषः** केशाभरणादिविन्यासः । तत्र प्रथमे वयसि शिखण्डकः, यौवने कौन्तलादिधारणं, वार्धके जटामुण्डनादि । वयोनुरूपा **वाक्** । एवं बुद्धिस्त्रिवर्गानुष्ठानधारणम प्रथमं नीयते केवलं धर्मप्रधानकर्मानुरूपो वेषः अर्थानुरूपतः । तेन हि भवितव्यं कुलानुरूपेण दशनरागधम्मिल्लादि उद्धतमपि नौद्धत्यमावहति । तदुक्तं " अस्य लोकव्यवहारो विषय " इति । एतदुक्तं भवति । नायं विध्यर्थः अपरैर्निश्चितार्थत्वात् । लोकव्यवहारमूलस्त्वयमनुवादः । एवं वर्तमानो लोकवृत्तानुवर्ती भवति । न लोकद्वेष्यतामेति ॥ १८ ॥

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ॥
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ॥ १९ ॥

बुद्धिवृद्धिकराणीतिहासपुराणानि तर्कशास्त्राणि बार्हस्पत्यौशनसादीनि **हितानि** उपकारकाणि दृष्टार्थानि वैद्यकज्योतिषादीनि अर्थशास्त्रस्य पृथगुपदेशात् । **वैदिका निगमा** वेदार्थज्ञानहेतवो निगमनिरुक्तव्याकरणमीमांसारुढिग्रहणे त्वदृष्टार्थता स्यात् ॥ १९ ॥

***यथायथा हि पुरुषः शास्त्रं समधिगच्छति ॥**
तथातथा विजानाति विज्ञानं चास्य रोचते ॥ २० ॥

---

१ **फ**—वेदाभ्यासविरोधिनो । २ **फ**—वयं आद्युचित ३ **फ**—न उद्धत्यमावहति ।

[शास्त्रस्य पारं गत्वा तु भूयोभूयस्तदभ्यसेत् ॥
तच्छास्त्रं शबलं कुर्यान्न चाधीत्य त्यजेत्पुनः १ ॥ १]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समधिगमोऽभिनिवेशः अभ्यास इति यावद्विजानाति विशेषेण जानाति । प्रत्यक्षं चैतदभ्यस्यमाने ग्रन्थेऽपि यद्विद्यत इति । तदा **विज्ञानं चास्य रोचते**। उज्ज्वलं भवतीत्यर्थः । पूर्वस्याः स्मृतेर्मूलकथनमेतत् । रुचेरनभिलाषार्थत्वाद्रुच्यर्थानामिति संप्रदानत्वाभावः ॥ २० ॥

ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा ॥
नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् ॥ २१ ॥

तृतीयाध्याये विहितानां महायज्ञानामनुवादो विशेषाभिधानार्थः । स च विशेष उत्तरत्र वक्ष्यते (अग्रे २२ श्लो.) "अनीहमान" इति । अन्ये तु मन्यन्ते । व्रताधिकारे पुनर्वचनं नियमसिद्ध्यर्थम् । तेनेदृशः सङ्कल्पः कर्तव्यो यावद्गार्हस्थ्यं मया महायज्ञा न हापयितव्याः । न त्वियमाशंका कर्तव्या द्विर्वचनं द्विर्विधानार्थम् । न ह्यत्र विधिः श्रूयते । केवलं **न हापयेदि**त्युच्यते । नित्यत्वाच्च हानिः प्राप्तैव । अतो विहितप्रत्यभिज्ञानतः कश्चित् कर्मभेदहेतुरस्ति । **यथाशक्ति** पक्वान्नेन ग्रासेन वा मूलफलैर्वा ॥ २१ ॥

एतानेके महायज्ञान्यज्ञशास्त्रविदो जनाः ॥
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥ २२ ॥

एतान् महायज्ञान् एके यज्ञशास्त्रविदो गृहस्था **इन्द्रियेष्वेव जुह्वति** संपादयन्ति । कतमे पुनस्ते अनीहमाना ये न चेच्छन्ति धनं त्यक्तगृहव्यापार देहसान्यासिकादयः । शिलोञ्छवृत्तेरप्येवं विधिमिच्छन्ति पङ्ग्वादीनां च; तेषां हि दारकरणं वक्ष्यति (अ. ९ श्लो. २०) "यद्यर्थिता तु दारैः स्यादिति" । न चैतेषां पञ्चयज्ञाधिकारः । अद्रव्यत्वाद्भरणमात्रं ते लभन्ते । नाधिकं कर्मानुष्ठानार्थमपि । जुहोतिः कर्त्यर्थनिर्वर्त्यतां लक्षयति । न हि क्रियाविशेषो यागः क्रियाविशेषस्य होमस्य कर्मतां प्रतिपद्येत । न हि भवति पचति पाकमिति । भवति तु पाकं करोति यागं करोतीति । सामान्यविषयाकांक्षास्तु क्रिया द्रव्यकर्माणि साधनीकुर्वन्ति । इच्छति भोक्तुं शक्नोति भोक्तुं जानाति भोक्तुं दृष्टश्च विशेषः सामान्यलक्षणार्थः । अयं गौः पदा द्रष्टव्य इति । एवं च होमं केचिदिन्द्रियेषु तत्सङ्क्रममेव व्याचक्षते । अपरेषां प्राणसंवादोपनिषदि यदुक्तं प्रथममागच्छेत्तद्धोमीयं सायंप्रथमाहुतिं जुहुयात्प्राणाय स्वाहेत्यादिना । अन्ये तु । य एवोत्तरश्लोके उपासनाविधिरुक्तः स एवायं होमः । तथा च तयोरेकवाक्यता प्रतीयते ।

---

१ क—अविनिवेशः । २ अ-क-क्ष—जुहोति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु चोत्तरत्र वाचि प्राणं नेन्द्रियं नैष दोषः । आध्यात्मिकत्वोपलक्षणार्थमिन्द्रियग्रहणम् । बाह्यसाधनसाध्यता नास्तीत्येतदत्र विवक्षितम् ॥ २२ ॥

वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा ॥
वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम् ॥ २३ ॥

यदाऽयं पुरुष उच्छ्वसिति तदैवमनेन ध्यातव्यम् । 'वाचं प्राणे जुहोमीति' । भाषमाणेन[2] च वाचि प्राणं जुहोमीति[3] । एतावतैव पञ्चयज्ञा निर्वृत्ता भवन्ति । यदि नित्याः फलार्थं[4] न वक्तव्याः आत्मज्ञयाश्चात्राधिक्रियन्ते । विहितो ह्ययमर्थः पञ्चाग्न्युपासनायां उपनिषत्सु **कौषीतकी ब्राह्मणे** विस्तरेण । **अक्षयं** फलतः अपुनरावृत्तिफलत्वात् ॥ २३ ॥

ज्ञानेनैवापरे विप्रा यजन्त्येतैर्मखैः सदा ॥
ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा ॥ २४ ॥

तैर्मखैः प्रकृतैर्महायज्ञैर्यजन्ते तद्विषयमधिकारं निष्पादयन्ति अतोऽर्थभेदाद्यजन्ते । यज्ञैरिति साध्यसाधकभावोपपत्तिः । यथाऽग्निष्टोमयाजीति ।

कथं पुनर्ज्ञानेन यागनिर्वृत्तिः । देवतोद्देशेन द्रव्यस्यागात्मको यागो न च ज्ञानमेवं रूपम्[5] । उच्यते । यजन्त इति यागकार्यनिर्वृत्तिरत्राभिप्रेता । यदि ज्ञानात्कार्यनिर्वृत्तिः किमर्थं तर्हि कर्मणामनुष्ठानम् । न ह्यविषयः[6] कर्मानुष्ठानसंभवः । अथेयं बुद्धिः "य उ चैनमेवं वेदेति" ज्ञानस्यापि फलसाधनत्वेन आश्रवणात्[7] । तुल्यं कर्मानुष्ठानेनेति तदसत् । अन्यशेषतया तस्यार्थवादत्वात् । अत्रोच्यते । उक्तमस्माभिरनीहमाना आत्मज्ञो अधिक्रियन्ते त एव ज्ञानिनोऽप्रेभिता न कर्मानुष्ठानवेदिनः तेषां वेदसंन्यासिकतया गृहे अवतिष्ठमानानां महायज्ञानां भावनेयमुच्यते । द्रव्यसाध्यानां[10] च महायज्ञानां आत्मज्ञानसंपादनमेवमुच्यते । स्वाध्यायोदकतर्पणयोस्तु कर्मसाध्यतामेव षष्ठे वक्ष्यति ।

अत्र कारणरूपमर्थवादमाह । ज्ञानमूलां[11] ज्ञानं मूलमस्याः[12] क्रियायाः सर्वस्य कर्मानुष्ठानस्य ज्ञानं मूलं न ह्यविद्वान् किंचिदनुष्ठातुं शक्नोति । तदुक्तं "विद्वान्यजेत[13] इति" । **पश्यन्तो ज्ञानचक्षुषा** । ज्ञानं चक्षुरिव । यथा चक्षुषा रूपं गृह्यते एवं ज्ञानात् ज्ञायते न तत् ज्ञानं वेद एवाभिप्रेतः ॥ २४ ॥

अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा ॥
दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि ॥ २५ ॥

१ फ–प्राणानेन्द्रिये । २ फ–भाषणेन ३ फ–जुहोति । ४ फ–फलायतेन । ५ र–ज्ञातेव; ण–ज्ञातरूपम् । ६ फ–अविषयकर्मानुष्ठान । ७ फ–आश्रयणात् । ८ फ–कृतं । ९ फ–आत्मज्ञाने । १० फ–द्रव्य । ११ फ–ज्ञानात् । १२ फ–यस्यात् । १३ क–यजयेत् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्निहोत्रादयः शब्दाः श्रुतौ गृह्यस्मृतिषु च कर्मविशेषवचनतया प्रसिद्धाः सेतिकर्तव्यताकाः तत्र विहिताः । तेषामयमनुवादो न त्वत्रापूर्वविधिः रूपवचनात् । केवलं होमविषया कर्तव्यता श्रुता । न द्रव्यं न देवता । अग्निहोत्रादि नामधेयं च विशेषाकांक्षम् । अतः शास्त्रान्तरावगतविशेषवचनतैव प्रतीयते । यद्येवं तत एव कर्तव्यतावगमादनर्थकमिदं वेदसंन्यासिकायां प्रकृतोपासनासंवादनार्थम्[1] । यथैव " वाच्येके जुह्वति प्राणं " ज्ञानेनैवेति च पञ्चमहायज्ञाः संपाद्यन्ते । तद्वदेतदपीति कश्चायमुपालम्भः किमर्थं पुनर्वचनमिति । सर्वश्रुतीनां स्मृतीनां च यदेकदेशेऽभिहितं तस्यैवान्यत्र पुनर्वचनस्य चोद्यापत्तेः[2] । उक्तश्च[3] सामान्यतः परिहारः प्रतिपत्तिभेदान्न पौनरुक्त्यमिति । यथा प्रतिपत्तिभेदादिन्द्रियभेदो नैकेन चक्षुषा सर्वे द्रष्टुं शक्नुवन्ति बहूनीन्द्रियाणि प्रयोजनवन्ति एवं शाखाभेदः स्मृतिभेदश्च ।

अथोच्यते । कस्माद्रूपाद्वचनमिति[4] एषोऽपि न दोषः प्रतिशाखमितिकर्तव्यताया[5] भेदः कस्याभिधानं क्रियताम् । सर्वाभिधाने गौरवम् । एकतराभिधाने अन्यतरपरित्यागः। तदपि चोद्यमेव । उक्तं चानुवादोऽयं न विधिः । विधौ हि चोद्यमेतत् स्यात् । अन्यत्र विहितं किमर्थं पुनर्विधानमिति ।

आद्यन्ते द्युनिशोर्नात्र यथासंख्यं किंतर्हि दिव आदौ निशायाश्चादौ एवं दिवोऽन्ते निशायाश्चान्त इति सायंप्रातः कालावेतेन परिगृह्येते । तत्रोदितहोमिनां अहरादौ अनुदितहोमिनां निशान्ते । द्युशब्दो दिवसपर्यायः । सदा यावज्जीवं सायंप्रातर्होमः कर्तव्यः । दर्शेन यजेतेत्यत्राध्याहर्तव्यं दर्शेन यजेत् । न हि तत्रोत्पत्तौ जुहुयादित्यस्ति किंतर्हि दर्शेन यजेतेति तदनुवादश्चायं अत एवाध्याहारः क्रियते । अत एव अविशेषश्रवणेऽपि[6] अर्धमासान्त इति कृष्णपक्षान्ते दर्शः शुक्लान्ते पौर्णमासः। तथा च श्रुतिः " दर्शे च दर्शेन यजेत पूर्णमास्यां पूर्णमासेन यजेतेति " ॥ २५ ॥

सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः ॥
पशुना त्वयनादौ[7] ते समांते सौमिकैर्मखैः ॥ २६ ॥

सस्यशब्दो व्रीह्यादिधान्यवचनः । तस्यान्तः क्षयः । पूर्वसस्येषु क्षीणेषु नवसस्येष्ट्या यजेत आग्रयणेनेत्यर्थः । न चात्र पूर्वसस्यक्षय आग्रयणनिमित्तं नापि नवसस्यागमः किंतर्हि अकृताग्रयणस्य नवान्नाशनं प्रतिषिद्धं येनाह " नानिष्ट्वा नवान्नमद्यादिति " अतो नवसस्यभक्षणमाग्रयणेनेत्यर्थः । तेन यजेतेति व्याचक्षते । अस्मिंस्तु पक्षे

---

१ फ–वेदसंन्यासिकानां अकृणोपासनाना संवादनार्थे २ फ–चोद्यस्यापत्तेः । ३ ण–उक्तस्य सामान्यपरिहरः । ४ ण–रूप । ५ प–इतिकर्तव्यताभेदः । ६ फ–श्रमणेऽपि । ७ र ण–ह्ययनांते ।

For Private And Personal Use Only

पूर्वसस्याभावात् नवसस्यस्य भावादन्यतो वा असत्यां चाशिशिक्षायां न नियमतया आग्रयणं प्राप्नोति । अथेदं सस्यान्त इति नवोत्पत्त्युपलक्षणं तदाऽनिष्ट्वा भक्षणं प्राप्नोति ।

तस्माद्वे एते वाक्ये । 'नानिष्ट्वाऽश्नीयादि'त्येकं, 'सस्यान्त' इति द्वितीयं, सस्यान्तग्रहणेन च सस्योत्पत्तिरेवाभिप्रेता नियतत्वात्तस्यानिमित्तस्योपपत्तिः । क्षयस्त्वनियतो धनिनां हि त्रैवार्षिकान्यपि धान्यान्यत्र प्रवर्तन्ते । अत एव **सूत्रकारः** "सस्यं नाश्नीयादाग्निहोत्रमहुत्वेति" तथा "यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेतेति" । तथेदमपरं "शरदि नवान्नमिति" कालविशेषविधायकम् । तत्र यस्य पूर्वसस्यक्षयो नास्ति स शरदमाद्रियते । इतरस्तु न । एवमुभयोरर्थवत्ता च भवति । इतरथा एवमेवावक्ष्यत् । 'नवसस्योत्पत्तौ नवसस्येष्ट्या यजेतेति' । यतस्त्वाह "नानिष्ट्वा नवसस्येष्ट्या न चान्नमश्नीयादिति" । तेन उत्पन्नेष्वपि नवसस्येषु विद्यमानस्य अस्ति शरत्प्रतिपालनम् । नवसस्योत्पत्तिनिमित्तत्वाच्च असत्यामपि नवान्नाशनेच्छायां नियमतः आग्रयणम् ।

ऋत्वन्ते 'ऋतुः संवत्सर' इतिदर्शनेन चातुर्मास्यानामेतत्करणमुच्यते । अध्वरशब्देन तान्येवाभिप्रेतानि ।

अयनयोरादी अयनान्ते । ते च द्वे अयने दक्षिणमुत्तरं च । तत्र पशुयागः कर्तव्यो द्विः संवत्सरस्य । **सूत्रकारस्त्वाह** "षाण्मास्यः सांवत्सरो वेति" ।

समान्ते समाशब्दः संवत्सरपर्यायस्तस्य चान्तः समाप्तिः शिशिरे । न च तत्रेदं सौमिकयागविधानं किंतर्हि गते तस्मिन्वसन्त आगते । तथा च **श्रुतिः** "वसन्ते वसन्ते ज्योतिषा यजेतेति" । एतावंति नित्यानि कर्माणि तानि यथाकथंचिद्वेदसंन्यासिकेनापि संपाद्यानीति सर्वस्य तात्पर्यम् ॥ २६ ॥

नानिष्ट्वा नवसस्येष्ट्या पशुना चाग्निमान् द्विजः ॥
नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः ॥ २७ ॥

अग्निमानाहिताग्निरत्राभिप्रेतो व्रताधिकारात् तस्य होमस्य याजुर्वैदिकं[4] व्रतम् । **नानिष्ट्वा पशुना** मांसं समश्नीयान्नाग्रयणेन नवान्नमिति । नियमानुपालने फलमाह । **दीर्घमायुर्जिजीविषुः** । आयुःशब्देन प्रबन्धवत्यः प्राणापानवृत्तय उच्यन्ते । द्वितीया च सत्यपि जीवतेरकर्मकत्वेऽपि इषिक्रियापेक्षया सन्नन्तोऽपि धातुरिच्छायां वर्तते । यद्यपि दर्शने[5] इषेः कर्मप्रकृत्यर्थो न बाह्यमिच्छा वेक्ष्यमाणं प्रतिगुणभूता प्रकृतिप्रत्ययौ प्रत्ययार्थं सह

१ फ-नियमत । २ फ-आचक्षते । ३-ण अनेन ४ ख-वैदिकं । ५ "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च" सि. कौ. वार्तिके ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रुवत इति सन्नंतादन्यत्रापि । अस्मिन्नपि दर्शने आयुःशब्देन कालो लक्षयिष्यते । दीर्घकालं जीवनमिच्छन् । तत्र कालतोऽवाऽवगंतव्या कर्मसंज्ञा ह्यकर्मणामिति कर्मत्वम् । एष चाहिताग्नेः पशुबन्धे नियमः आग्रयणेऽपि । गृह्याग्निमतोऽपि गृह्यस्मृतिषु नियमतया आग्रयणं विहितम् । यच्चेदं शरदि नवान्नमिति तत् व्रीहिश्यामकयोर्न यवानाम् । न च सस्यमात्रेण सस्येष्टियागो न च माषमुद्गादिना यत इदं शास्त्रान्तरसापेक्षं न स्वतो विधायकमित्युक्तम् । शास्त्रान्तरेषु च व्रीहिश्यामाकयवैराग्रयणेष्टिर्विहिता । किं त्वन्यदपि सस्यं नाशितव्यमकृतायामाग्रयणेष्टौ । यदुक्तमविशेषेण सस्यं नाश्नीयादिति तन्निषेधे ह्यभिप्रेते इयदेवावक्ष्यदाग्रयणं व्रीहिश्यामाकयवानां एतं नाश्नीयादग्निहोत्रमहुत्वेति । एवं **सूत्रकारेण** पठितम् । "आग्रयणं व्रीहिश्यामाकयवानां सस्यं नाश्नीयादग्निहोत्रमहुत्वेति"। अतोऽयं सस्यशब्दो न प्रतिनियतविषय एव ॥ २७ ॥

नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः ॥
प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः ॥ २८ ॥

नित्यतामेव समर्थयते । अकरणदोषदर्शनेन **नवेन** सस्येन अनर्चिता अकृतहोमा अग्नयोऽस्याहिताग्नेः **प्राणानेवात्तुमिच्छन्ति** भक्षयितुम् । **गर्धिनः** गर्धं आभिलाषातिशयः तदस्यास्तीति मत्वर्थीय इनिः ॥ २८ ॥

आसनाशनशय्याभिरद्भिर्मूलफलेन वा ॥
नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः ॥ २९ ॥

उक्तमिदमुत्तरार्थमनूद्यते । न **कश्चिदतिथिरनर्चितो** गृहे वसेत् । सर्वोऽतिथिरर्चितो गृहे वसनीयः । **शक्तित** एको द्वौ बहवो यावन्तः शक्यन्तेऽर्चयितुं सर्वे आसनादिभिरर्चनीयाः । अर्चापूर्वकमेतदेभ्यो वसतां प्रकल्पनाय न तु सर्वेण सर्वमासनाशनशय्यानां सत्वनिर्वृत्तिरुच्यते । भक्तयूषमांसान्नाज्याशनासंभवे पृथगुपादानात् मूलफलं दातव्यम् ॥ २९ ॥

पाषण्डिनो विकर्मस्थान्बैडालव्रतिकाञ्छठान् ॥
हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥ ३० ॥

अत्र वसेदिति लिङ्गात्सायमातिथ्यप्रतिषेधोऽयं पाखण्ड्यादीनामित्याहुः । तदयुक्तं अर्चनीयताऽत्र निवार्यते । न तु सर्वेण सर्वभक्ताद्यदानमेवोच्यते । दिवाऽपि भुञ्जानानां कतिचित् क्षणावास उपपद्यत एव । अतो न लिङ्गं सायंकालस्य वसेदिति । तत्र

---

१ फ–कालभावा वधतव्या । २ फ–नियमत । ३ फ–नवसस्यमात्रेण ४ ' एतं ' पदं फ–पुस्तके नास्ति । ५ फ–दर्शनं ६ रण–पूष । ७ फ–भक्तावदान ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाखण्डिनो बाह्यलिङ्गिनो रक्तपटनग्नचरकादयः । **विकर्मस्था** अत्रानापदि ये वर्णान्तरवृत्त्या जीवन्ति यथा ब्राह्मणः क्षत्रवृत्त्या क्षत्रियो वैश्यवृत्त्यादि । **बैडालव्रतिका** दाम्भिकाः । ये च लोकावर्जनार्थं अग्निहोत्राद्यनुतिष्ठन्ति । इति गृहादि लिप्सामह इति न शास्त्रचोदितत्वेन स्वधर्मतया । **शठा** येषामन्यत् हृदयेऽन्यद्वाचि उपकारं कस्यचित्प्रतिज्ञाय कर्तव्यतया अवधीरयन्ति न कुर्वन्ति । **हैतुका** नास्तिका नास्ति परलोको नास्ति दत्तं नास्ति हुतं इत्येवं स्थितप्रज्ञाः । **बकवृत्तयः** दाम्भिका एव ईषद्भेदभिन्नाः । भेदः परस्परं दर्शयिष्यते । **वाङ्मात्रेणापि** तिष्ठतु तावदासनादिदानं पूजापूर्वकं स्वागतमास्यतामत्रेत्येवमाद्यपि न वक्तव्याः । अन्नदानं तु श्वपचादिवदिष्यते । तथा च भगवान् **कृष्णद्वैपायनो**ऽन्नदानमेवाधिकृत्य स्मरति स्म " न पृच्छेज्जन्म न श्रुतमिति " । नात्र पात्रगवेषणा कर्तव्येत्यर्थः ॥ ३० ॥

वेदविद्याव्रतस्नाताञ्छ्रोत्रियान् गृहमेधिनः ॥
पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत् ॥ ३१ ॥

वेदश्च विद्या च व्रतानि च तैः स्नातास्तत्र परिसमाप्तिं गताः । त्रिविधा स्नातका गृह्यन्ते । तत्र वेदस्नातका अधीतवेदाः । विद्यास्नातका विद्यार्थं जिज्ञासितवन्तः । विद्यासन्निधानाद्वेदविषयैव गृह्यते । तस्या एव वस्तुतो विद्यात्वम् । व्रतानि " षट्त्रिंशदाब्दिकम्" इत्यादीनि (अ. ३ श्लो. १)। सत्यामपि वेदतदर्थजिज्ञासासमाप्तौ न तावत्येव स्नानं किंतर्हि षट्त्रिंशदब्दादिकालः पूरयितव्यः इति पक्षोऽप्यस्ति । अन्ये तु येऽनधीत्यैव वेदं वर्षत्रयात् स्नान्ति ते व्रतस्नातका इत्याचक्ष्यन्ते[1] । अनधीतवेदस्य कुतः स्नानमित्यपेक्षो[2]ऽयम् ।

ननु च श्रोत्रियग्रहणं किमर्थं स्नातकत्वेनैव सिद्धत्वात् । अतिशयार्थं तेन वेदाभ्यासरता गृह्यन्ते । **श्रोत्रिया गृहमेधिनो** गृहस्था नानेन भिक्षुतापसब्रह्मचारिणामपूजनीयत्वमुच्यते । किंतर्हि भैक्ष्यभोजित्वात्तेषां नातिथित्वसंभवः । ब्रह्मचारिणो गुरुगृहात्तापसस्य च वनादन्यत्र वासः । प्रव्रजितस्यापि ' भैक्षार्थी ग्राममियादिति '[3] न ग्रामे वासः । अतोऽन्येषामाश्रमिणां गृहादन्यत्र वासात्कथंचित्सम्भवेऽपि प्रायिकमेतद्गृहमेधिन इति । **हव्येन कव्येन** दैवकर्मणि शान्त्यादौ पित्र्ये वा श्राद्धे त एव पूज्याः । **विपरीताः** अस्नातकाः वर्ज्याः पूर्वोक्तदोषाभावेऽपि ॥ ३१ ॥

---

१ फ–आचक्षते । २ फ–अपेक्षायाम् । ३ गौतमसूत्रे–अ. ३ सू. १३ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना ॥
संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ॥ ३२ ॥

अपचमाना ब्रह्मचारिपरिव्राजका इत्याहुः । तदुक्तं ' मृताय नित्यवद्दानं ' विहितमेव । ' भिक्षां च भिक्षवे दद्यादिति ' । तस्माद्ये दरिद्रा भैक्षजीवनाश्च पाखण्ड्यादयः तेभ्यः **शक्तितो दातव्यम्** । यावद्द्वयः शक्यते यावच्च पच्यते पचिक्रियाविरहनिमित्तत्वाच्च सिद्धान्नदानमेवेदम् । **संविभागश्च** अन्येनापि धनेन इन्धनपरिधानौषधाद्युपयोगिना **संविभागः कर्तव्यः** कश्चिदंशो दातव्यः ।

सर्वभूतेभ्यः । भूतशब्दोऽयं चेतनात्मकं जगदाचष्टे । यथा " गायत्री वा इदं सर्वं भूतमिति " । अचेतनानां चेतनवदुपकारार्थतया संविभागानुपपत्तेः चेतनावत्स्वेवावतिष्ठते । अतश्च " प्ररोहधर्मकाश्चेतनावन्तः " इति **दर्शने** वृक्षादीनामपि जलसेकाद्यर्थो धनसंविभागः कर्तव्यः । बह्वर्थोऽयं भूतशब्दः । कश्चित्प्राधान्ये वर्तते ' भूतमियं ब्राह्मण्यस्मिन् गृहे ' । कचित्पैशाचवचनो ' भूतोपसृष्ट ' इति । कचिद्विपरीतेऽर्थे वर्तते ' भूतमाहेति ' । कचिदतिक्रान्तकालवचनो ' भूतो धात्वर्थ ' इति । क्वचिद्देवताविशेषे ' भूतेभ्यो बलिरिति ' । कचिच्चेतनावन्मात्रवचनो ' न हिंस्याद्भूतानीति ' । कचित्प्राप्तिवचनो 'महद्भूतश्चन्द्रमा' इति । कचिदुपमायां वर्तते ' यथा काव्यभूत ' इति । कचिदुत्पत्तिवचनो यथा ' देवदत्तस्य पुत्रो भूत ' इति । इह तु यः पदार्थस्तद्व्याख्यातम् । भूतेभ्य इति तादर्थ्ये चतुर्थी । **अनुपरोधतः** आत्मकुटुम्बपीडा यथा न भवति तत्पर्याप्तं स्थापयित्वा अधिकेन संविभागः कर्तव्यः । **तदुक्तं** (मनुस्मृ. अ. ११ श्लो. १०) " भृत्यानामुपरोधेनेति " ॥ ३२ ॥

राजतो धनमन्विच्छेत्संसीदन्स्नातकः क्षुधा ॥
याज्यान्तेवासिनोर्वाऽपि न त्वन्यत इति स्थितिः ॥ ३३ ॥

राजग्रहणमाढ्यवर्णोपलक्षणार्थम् । तथा च वक्ष्यति (अ. १० श्लो. ११३) " सीदद्भिः कुप्यमिच्छद्भिर्धनं वा पृथिवीपतिः । याच्यः स्यादिति " । तेन राजशब्दः क्षत्रियजातौ मुख्यः । तथापि शास्त्रान्तरपर्यालोचनया जनपदेश्वरवचन इति गम्यते । जनपदेश्वरा हि बहुधना भवन्ति । तेनैतदुक्तं भवति । येऽत्यन्तसम्पन्ना गोऽजाविधनधान्यैस्तेभ्यः प्रतिग्रहीतव्यम् । तथा सत्यद्रोहेणेत्येतदाहृतं भवति । आढ्या हि ददतो नातिपीड्यन्ते । स्वल्पधनेभ्यस्तु परिगृह्णतो दोषः स्यात् । मुख्यार्थवृत्तौ च राजशब्दे

१ फ–व्याख्यानम् । २ र ण–तथा च सति । ३ रफ–आहृतं । ४ रण–परिगृह्णतो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणादिभ्यः प्रतिग्रहः प्रतिषिध्यते । तत्र सर्वस्मृतिविरोधः स्यात् । स्मृत्यन्तरे हि पठ्यते "आददीत प्रशस्तद्विजातिभ्यः शुश्रूषेश्च शूद्रादपक्वान्नमिति" । प्रतिषेधेऽपि "न राज्ञः प्रतिगृह्णीयादिति" राजशब्दो जनपदेश्वरवचन एव । किंच न क्षत्रियस्य तत्र प्रतिषेधः "अराजन्यप्रसूतित" इति वचनात् । अत एव न क्षत्रियजातीयात्तत्र तन्निषेधस्तथा सत्यराजन्यप्रसूतित इति न वक्तव्यं स्यात् । न ह्यराजन्यप्रसूतितः क्षत्रिया भवन्ति । तेनेयमत्र व्यवस्था । क्षत्रियाद्राज्ञो यथाशास्त्रवर्तिनः प्रतिग्रहः कर्तव्यः । अन्यस्मात्पुनर्नरकैकविंशत्या योगः ।

याज्यान्तेवासिनोः धनापेक्षा[2] षष्ठी । तसंतो वा पठितव्यः । क्रियानिमित्तत्वादेतयोः शब्दयोर्याजनाध्यापनाभ्यां जीवेदित्युक्तं भवति । अन्ये त्वाहुरन्येषां उपपातकप्राप्तिश्चौर्यादीनां चोपायानां निषिद्धत्वात् । ईश्वरमाराध्य जीवेत्प्रीतिदायेन स्वस्तिवाचनकेन वा । न चायं सेवकः । सा वृत्तिर्निषिद्धा । एवं कृतोपकारादयाजयन्नपि याज्यादाददीत वृत्तेऽपि संबन्धे कृत्यो वर्तत इति ।

संसीदन्निति । पित्रादिधने सति न कर्तव्यम् । तदुक्तम् "न कल्पमानेष्वर्थेषु[3]" तस्यैवायमनुवादः । न चायमापद्धर्मः । न ह्यवसाद आपत् । किंतर्हि आर्जितधनाभावः । आपत्तु विहितोपायाभावो धनक्षयश्च । सत्यपि धान्यधनवत्त्वे अन्नपरिक्षये दुर्भिक्षादावातिथ्यसन्निहितान्नता क्षुत्पीडितस्यापत्[4] । अक्षुधितस्यापि धनाभावादवसाद इत्येष एतयोर्विशेषः । न त्वन्यतः स्वल्पधनान्नानुपकार्यात[5] गृह्णीयात् ॥ ३३ ॥

न सीदेत्स्नातको विप्रः क्षुधा शक्तः कथंचन ॥
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥ ३४ ॥

यदि च[6] कुतश्चिद्धनार्थाद्व्यापाराद्व्याहन्येत न तदैवापद्धर्मानाश्रयेत् । किंतर्हि पुनरुत्पद्यते? तदुक्तम्[7] "आमृत्योः श्रियमन्विच्छेदिति"(अ. ४ श्लो. १३७)अतश्च यदि कथंचित् कृषतो वर्षाद्यभावेन सस्यनाशो[8] भवेन्नेयता त्यागेन सहसैव परपिण्डोपजीविनायाश्चापरेण भवितव्यम् । सत्यां युक्तौ जीर्णमलिने[9] च वाससी धनविभवे सति नेष्यते ॥ ३४ ॥

कृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः ॥
स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ॥ ३५ ॥

कल्पनं 'छेदनम् दन्तवासस' इत्येतदपेक्षं चैतत्कल्पनं नियमतः । अत एव

---

१ अ. ४ श्लो. ८४ । २ रण–धर्मापेक्षा । ३ ख–न कल्प्यमानेषु । ४ फ–न क्षुत्पीडितस्यापत् ५ रण–कुर्यात् । फ–अनुपकुर्यात् । ६ रफ–न । ७ ख–न तदुक्तम् । ८ ख–सस्याभावेन । ९ फ–जीर्णे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुचिरित्याह । दीर्घकेशस्य हि स्नानादिपु क्लेशसाध्यत्वात् अलसः स्यात्तथाऽशुचित्वप्रसङ्गः । यदि तु केशादिप्रसृतोऽपि स्नानपरः स्यान्नैव धारणं दुष्येत् । **दान्तः** दर्पवार्जितः । **शुचिः** अर्थेपु श्रुतिनिमित्तैर्मृद्वार्याचमनादिभिश्च । वेदाध्ययने च नित्याभियुक्तः । उक्तोऽप्ययमर्थ आदरार्थः पुनः पुनरुच्यते । **आत्महितानि** व्याधेः प्रतीकारादिना अजीर्णातिवेलगुरुविदाहिभोजनवर्जनादीनि ॥ ३५ ॥

वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ॥
यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥ ३६ ॥

यज्ञोपवीतकुण्डलयोर्धारणं शरीरसंयोगः । अस्य च यस्मिन्नङ्गे समुचितः सन्निवेशः स तत्रैव विनियोजनीयः । यथा कुण्डलं कर्णयोरुपवीतं काय इति कर्णाभरणस्य कुण्डलाख्यत्वात् । कण्ठसक्तस्य च सूत्रस्य दक्षिणबाहूद्धारणेनोपवीतत्वात् । दृष्टप्रयोजनत्वाच्च यष्ट्यादिना सर्वदाऽङ्गसङ्गः । तथाहि यष्टिधारणं श्रान्तस्यावलंबनार्थं संमुखागतघातकगवादिनिवारणार्थं च । उद्धृतोदकेन शौचस्य विहितत्वात् आधारापेक्षया कमण्डलुर्नियम्यते । स च तुल्यकार्यत्वात् कलशादीन् निवर्तयति न कुण्डलकटकादीन् । अतश्च पुरीषनिमित्तस्योदकशोध्याशुचित्वापनोदार्थं सोदकत्वं कमण्डलोः । उक्तं च । " मुहूर्तमपि शक्तिविषये नाशुचि तिष्ठेदिति " । शक्तिविषय इति । यदि पूर्वगृहीतमुदकमुपयुक्तमन्यथाप्राप्तमशुचित्वनिमित्तं च श्लेष्मनिष्ठीवनाद्युत्पन्नं तत्रोदकालाभादशुचिरवस्थाने न दोषः । तथापि मूत्रपुरीषविस्रंसने स्नानं वक्ष्यति (अ.११ श्लो.२०) "विनाऽद्भिरप्सु तर्पेत शारीरं संनिषेध्य तु । सचैलो बहिराप्लुत्येति " । शुचिश्च स्मृत्यन्तरे प्रतिपदमाम्नातः । एवं ह स्माह भगवान्वसिष्ठः [अ. १२ सू. १५-१७]

"अप्सु पाणौ च काष्ठे च कथितः पावकः शुचिः। तस्मादुदकपाणिभ्यां परिमृज्य कमण्डलुम्॥
" पर्यग्निकरणं होमं मनुराह प्रजापतिः । कृत्वा चावश्यकार्याणि आचामेच्छौचवित्तमः"॥

बौधायनेनाप्युक्तम् " अथ कमण्डलुं धार्यम् " इत्युपक्रम्य

" तस्माच्छौचं ततः कृत्वा परिमृज्य कमण्डलुम् । पर्यग्निकरणं ह्येतद्यद्ब्रह्मनुपरिमार्जनम् ॥
"तथा कमण्डलुं परिहरेत्पूर्वावस्थोऽप्यशौचतः । न चैनं कुत्सयेद्विद्वान्न शङ्केन्न च दूषयेत्॥"

आकारविशेषनिमित्तश्चायं शब्दो न जातिमाद्रियते । अतो मृन्मयस्य सौवर्णस्य राजतस्य वा एषैव शुद्धिर्न प्रकृतिजातिसंबन्धिनी । मूत्रादिस्पर्शे तु प्रकृतिजाति-

१ फ-आचारापेक्षया । २ रण-उदकलाभात् ।

For Private And Personal Use Only

शुद्धिरवधेया । हस्तमार्जनं तूच्छिष्टपुरुषसंस्पर्शाद्यशुचित्वात् । तथा च **गौतमः**, " कचिच्छौचार्थं संनिधाय " इत्याह । अत इहापि संनिधानमेवाभिप्रेतं न स्वात्मना ग्रहणम् । **वेदो** दर्भमुष्टिस्तस्य च " प्राणोपस्पर्शनं दर्भैः " इत्यादि प्रयोजनम् । अतश्चादृष्टार्थानां सार्वकालिकशरीरसंबन्धो दृष्टार्थानां तु संनिधिर्नित्यं प्रयोजनतः[1]स्तु ग्रहणमिति । **शुभे** दर्शनीये आकारतः तापच्छेदकपैश्च[2] सुवर्णशुद्ध्या ॥ ३६ ॥

नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ॥
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥ ३७ ॥

उपसृष्टो ग्रहोपरक्तः । उदके प्रतिबिम्बितो **वारिस्थः** । नभः अन्तरिक्षं तस्य मध्यगतं पश्येन्न मध्यान्हकाले ॥ ३७ ॥

न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति ॥
न चोदके निरीक्षेत स्वरूपमिति[3] धारणा ॥ ३८ ॥

वत्सबन्धनार्था रज्जुर्वत्सतन्त्री वत्सपङ्क्तिर्वा तां **न** लङ्घयेन्नापक्रामेत् । तथा च **गौतमः** (अ. ९ सू. ५२) " नोपरि वत्सतन्त्रीं गच्छेत् " । **स्वरूपं** शरीरसंस्थानं स्वग्रहणात्परस्य रूपप्रेक्षणं न पर्युदस्यते । इति **धारणा** एष निश्चयः शास्त्रेषु ॥ ३८ ॥

मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् ॥
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ॥ ३९ ॥

प्रस्थितस्याभिमुखागतान्[4] मृदादीन् प्रत्ययं विधिः । मृदादयो येन दक्षिणो हस्तः तेन कर्तव्याः । उद्धृता च मृदेवं कर्तव्या । एवं हि शास्त्रान्तरं प्रस्थानाधिकारे पठति ' प्रदक्षिणमावर्त्येति[5] ' । **दैवतं** पटादिलिखितम् अर्चा । **गौतमस्तु** " देवतायतनानि सप्रदक्षिणमनुवर्तेतेति" पठति । लोकप्रसिद्ध्या चतुर्भुजमार्तण्डागारादि देवतायतनं विज्ञेयम् । ' यज्ञगृहाणि चेति ' वक्ष्यति । मधुवृतमहाचर्यान् सारथं मङ्गल्यमध्यपाठाच्च । **प्रज्ञाता वनस्पतयो** महाप्रमाणाः प्रसिद्धा वनस्पतयो महावृक्षाः प्रमाणतः पुष्पफलातिशयतो वा प्रसिद्धा उदुम्बरादयः । " ऊर्ध्वा उदुम्बरः " इत्यर्थवादः । ये तु गुणाधिकान्प्रज्ञाताना-चक्षते ते निर्मूलप्रसिद्धिमात्रप्रमाणका उपेक्षणीयाः ॥ ३९ ॥

नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने ॥
समानशयने चैव न शयीत तया सह ॥ ४० ॥

---

१ **फ**–प्रयोजनं वस्तु । २ **र**–कपैश्च । ३ **फ**–स्वं रूपमिति । ४ **फ**–मुखागतान् । ५ **फ**–आवर्तेति । ६ **फ**–महावर्यान् । ७ **रण**–सीर्वा उदुम्बरः ।

प्रमत्तः कामशरैः पीडितोऽपि । **आर्तवं** स्त्रीलिङ्गशोणितं मासि मासि प्रसिद्धं **तद्दर्शने** न गच्छेत् । एकस्यां च शय्यायां **तया सह न शयीत** । स्पर्शप्रतिषेधादेव तत्सिद्धमिति चेत् नायं प्रतिषेधः । व्रतमिदं प्रायश्चित्तभेदश्च ॥ ४० ॥

रजसाऽभिप्लुतां नारीं नरस्य ह्युपगच्छतः ॥
प्रज्ञा तेजोबलं चक्षुरायुश्चैव प्रहीयते ॥ ४१ ॥

रजः पूर्वोक्तमार्तवं **अभिप्लुतां** तेन संबद्धां । पूर्वस्यार्थवादः ॥ ४१ ॥

तां विवर्जयतस्तस्य रजसा समभिप्लुताम् ॥
प्रज्ञा तेजोबलं चक्षुरायुश्चैव प्रवर्धते ॥ ४२ ॥

वृद्धिवचनं स्तुतिरेव ॥ ४२ ॥

नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम् ।
क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम् ॥ ४३ ॥

" नित्यमास्यं शुचिस्त्रीणामिति " (मनुः अ० ५ श्लो: १३०) शुचित्ववचनं "स्त्रीशूद्रोच्छिष्टमिति"[1] च प्रतिषेधद्वयमपि विषयविभागेन व्यवस्थितम् । तत्र शुचित्ववचनं "स्त्रियश्च रतिसंसर्गे" इति स्मृत्यन्तरदर्शनेन रतिस्त्रीविषयं विज्ञायते । अतः प्रतिषेधोऽपि पारशेष्याद्[2]रतिस्त्रीषु मातृभगिन्यादिषु द्रष्टव्यः । यतो रतिर्नेह प्रीतिमात्रं किंतर्हि मन्मथनिमित्तो भावविशेष इति शृङ्गारपर्वकोऽभिलाषादिरूपः । अतस्तद्युक्तासु शुचित्वं विपरीतासु प्रतिषेधः ।

रतिनिमित्तार्थतया भार्यया सह भोजने प्राप्ते वचनमिदमारभ्यते **नाश्नीयाद्भार्यया सार्धमिति** । अथ संसर्गग्रहणेन वृषस्यैतो[3] संप्रयोगविशेषः कथ्यते । तदानीं परिचुम्बनादेव शुचित्वमिति नास्ति भार्यया सह भोजनप्राप्तिः । तत्रेदं पुनर्वचनं व्रतज्ञापनार्थम् । ततश्च यावज्जीविकः संकल्पः कर्तव्यो यथा भार्यया सह भोजनं न भवति । एतच्च सहभोजनमेकाधिकरणमेककालदेशं नर्न्थ[4]विषयतया चोद्यत इति गत्वोच्छिष्टे प्रतिषेधगतार्थशङ्केति । स पुनरयमीदृशः सहार्थविशेषः प्रमाणान्तरतः स्मृत्यन्तरसमाचारादेरे[5]शेषशब्दार्थो ह्यन्यानेक्षितमात्रम् । तथा " इतरानपि सख्यादीन्....भोजयेत् सह भार्ययेति " (अ. ३ श्लो. ११३) ।

---

१ वासिष्ठे अ. २८ सू. ८ । २ फ-परिशेष्यात् । ३ " अश्ववृषयोर्मैथुनेच्छायाम् " इति (व्या. सू. ७।१।५१); ' अश्वक्षीर-' वार्तिके । ४ ण न अर्थविषयतया । ५ फ-स्मृत्यन्तमाचारादे; ड-अवशेष शब्दर्थेद्यप्यापेक्षित मात्रम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नात्रैकाधिकरणता भुजेरवगम्यते । किंतर्हि भार्यया समानदेशता भोक्तुः समानकालता वा । अन्ये स्वन्यदुच्छिष्टमिति व्याचक्षते । भुक्तोज्झितमुच्छिष्टमेकस्यां तु पत्न्यां एकस्मिन् कार्ये सह भोजनम् । एवं तु व्याख्यायमाने शूद्रेण सह भोजनं प्रतिषिद्धं स्यात् प्रसिद्धिश्च त्यक्ता भवेत् । अस्य संस्पर्शादुच्छिष्टव्यवहारः सहभोजनेनापि तेष्वस्ति । केचित्तु समानदेशकालमेव भोजनं प्रतिषिद्धं दृष्टार्थत्वादुपदेशस्येति । पुंसा स्वभावभेदात् कश्चिद्बहुभोजिन्या न तुष्येत् अन्यः स्वल्पभोजिन्यामपि विश्रंभयतीति छद्मना वर्तते मम पुरतः स्वल्पमश्नाति इति ।

तथासदृशा एवमन्येऽपि नियमाः । **नैनामीक्षेत चाश्नतीं** पश्यतो हि भुञ्जाना विवृतास्यतया रूपविकारेण भर्त्रे न रोचेत । क्षवथुः शिरस्थेन वायुना पूर्यमाणायां नासिकायाः शब्दस्तत्रापि वक्त्रवैकृत्यात् प्रीतिर्न स्यात् । **जृम्भमाणाऽऽस्येन** विडम्बितं वायोरुच्छ्वसनमङ्गप्रत्यङ्गप्रसारणं वा तदप्येवमेव **यथासुखं चासीनां** अनवग्रथितकेशी भूमौ निपतितगात्री वा ॥ ४३ ॥

नाञ्जयतीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ॥
न पश्येत्प्रसवन्तीं च तेजःकामो द्विजोत्तमः ॥ ४४ ॥

परस्याञ्ज**यन्तीं** शोभत एव **अनावृतां** अपावृतवसनां अवगुण्ठितामेव हि विशेषेण स्पृहयंती निर्वसनाङ्गी निपुणतरं वक्ष्यमाणां न सर्वतः सर्वासु संस्थाना भवतीति निरम्बरा वेक्षणीया । **तेजःकामः** तेजः वर्णोज्ज्वलता उत्साहप्रयोगश्च ॥ ४४ ॥

नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् ॥
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ॥ ४५ ॥

सत्यपि यज्ञोपवीते नित्यानुगतत्वात्तस्य अनाच्छादकत्वादुपनयनविभेदेनोपदेशात् एकवासा अन्योन्यच्छादकादि द्वितीयं वासो भोजनकाले स्यात् । **न मूत्रम्** । मूत्रग्रहणमत्रोत्सर्गस्योपलक्षणार्थम् । **पथि** रथ्यायाम् । **गोव्रजे** येन यत्र वा गावश्चरितुं व्रजन्ति ॥ ४५ ॥

*** न फालकृष्टे न जले न चित्यां न च पर्वते ॥**
न जीर्णदेवायतने न वल्मीके कदाचन ॥ ४६

चित्य। अभ्यर्थ इष्टकाकूटे पर्वतग्रहणं अरण्योद्यानोपलक्षणार्थम् । तथाहि विशेष-

---

*** [उपेत्य स्नातको विद्वान्नेक्षेन्नग्नां परस्त्रियम् ॥**
सरहस्यं च संवादं परस्त्रीषु विवर्जयेत् ॥ १ ॥]

१ **फ**–भुक्त्वो । २ **फ**–प्रतिषिद्धो । ३ **रण**–तदस्तिः ।

४१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिषेधो भविष्यति "पर्वतमस्तक इति" सामान्येन च इति प्रतिषेधः । पर्वतवासिनाममेहनप्रसङ्गः । **वल्मीकः** क्रमिकृतो मृत्तिकासञ्चयः ॥ ४६ ॥

न ससत्त्वेषु गर्तेषु न गच्छन्नापि च स्थितः ॥
न नदीतीरमासाद्य न च पर्वतमस्तके ॥ ४७ ॥

न गच्छन्नापि च स्थितः । गच्छतस्तिष्ठतश्च प्रतिषेधादासीनस्याभ्यनुज्ञानम् । न चासने नद्यास्तीरे नदीजले न संसर्गशङ्का यत्र भवति तथाऽऽसन्नपर्वतस्य मस्तकं शृङ्गम् ॥ ४७ ॥

वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः ॥
न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम् ॥ ४८ ॥

संमुखीनत्वाद्वाय्वादीनामङ्गविप्रेक्षितेनापि न मूत्रयन्पश्येत् । वायोश्चारूपत्वाद्दर्शनं तत्प्रेरितवर्णलोष्ठादिभ्रमणादवसेयम् । वाक्यचक्रे स्वयं प्रतिषेधो विप्रयुक्तः । सर्वतो हि वायुर्वाति ॥ ४८ ॥

तिरस्कृत्योच्चरेत्काष्ठलोष्ठपत्रतृणादिना ॥
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ॥ ४९ ॥

तिरस्कृत्यांतर्धाय काष्ठादि तदुपरि मूत्रयेत् । आवरणं वा तिरस्कारः काष्ठादिभिर्भूमिं छादयित्वो**च्चरेत्** । तृतीयान्तपाठस्तदा स्पष्टतरः । काष्ठे पत्रेण तृणेन वाऽ**भ्युच्चरेत्** मूत्रं पुरीषं चोत्सृजेत् । **नियम्य वाचं प्रयतः** लोष्ठैः अनुच्छिष्टः । **संवीताङ्ग** आच्छादितशरीरः । **अवगुण्ठितः** शिरः प्रावृत्य अन्यत्रोक्तं "कर्णस्थब्रह्मसूत्रेति" ॥ ४९ ॥

मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः ॥
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥ ५० ॥

मूत्रोच्चारसमुत्सर्गं त्यागम् ॥ ५० ॥

छायायामन्धकारे वा रात्रावहनि वा द्विजः ॥
यथासुखमुखः कुर्यात्प्राणबाधभयेषु च ॥ ५१ ॥

छाया कुड्यकपाटादिभिः सूर्यरश्मीनामावरणम् । **अन्धकारः** मेघधूमिकास्वर्भानुरात्रिभूतोज्योतिरन्तरायः । **यथासुखमुखमस्येति** । यया हि प्राङ्मुखं भवति तस्या-

---

१ रण—न कथंचन । २ ख—वाय्वादीश्वीत्तादंगविप्रेक्षिते । ३ रण—स्थगयित्वा । ४ फ—परः । ५ फ—नियमो विधानं । ६ याज्ञवल्कीये आचारे १६ श्लोकः ७ फ—प्राणबाधाभयेषु च ।

For Private And Personal Use Only

मेवोचरेत् । यत्र दिग्भागो न ज्ञायते अन्धकारे तत्रायं विधिः । **प्राणबाधः** प्राणपीडा । **भयं** चौरादिकृतम् ॥ ५१ ॥

प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकद्विजम् ॥
प्रतिगुप्रतिसंध्यं च प्रज्ञा नश्यति मेहतः ॥ ५२ ॥

केचिदिमं श्लोकमस्मिन्नध्याये नाधीयते ।

अस्यार्थवादः । ननु चोदङ्मुखस्य मेहनविधानात्पूर्वस्यामुदयाच्च सूर्यस्य कुतस्तदाऽऽभिमुख्यं भवेद्येन प्रतिसूर्यं निषिध्यते । अर्थवादोऽयम् । "नान्तरिक्षे न दिवीतिवत्" । अथवोदगयने उदीचीं दिशमाक्रमेत । स्यात्संभवः प्रकृतविषयो वा प्रतिषेधः । प्रतिसन्ध्यमिति पठन्ति तदयुक्तम् । "सन्ध्ययोश्च यथा दिवे" त्यनुज्ञानाद्वेगधारणस्य च निषिद्धत्वात् । तस्मात्प्रतिवातमिति पठितव्यम् । पूर्वशेषोऽयम् । **मेहतः** शकृतस्तसन्तो वा । मेहतः पुरुषस्य मेहनाद्वा ॥ ५२ ॥

नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम् ॥
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥ ५३ ॥

पवित्रादिनाऽग्निर्ध्मातव्यः । **नग्नां नेक्षेत स्त्रियम्** 'अन्यत्र मैथुनादिति' **स्मृत्यन्तरम्** । **नामेध्यं** मेध्यो यज्ञस्तदर्थं मेध्यं अमेध्यं यदयज्ञियं पलाण्डुमूत्रपुरीषादि तन्नाग्नौ क्षिपेत् । उत्क्षिप्य साक्षादग्नौ **न तापयेत्** । अवच्छाद्य तापयित्वा स्वेदाद्यर्थमग्नितापनमदोषः ॥ ५३ ॥

अधस्तान्नोपदध्याच्च न चैनमभिलंघयेत् ॥
न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत् ॥ ५४ ॥

खट्वास्थः अधस्ताद्वन्हिधानीं न कुर्यात् । उपधानं स्थानं, अवलङ्घनमुत्प्लुत्य गमनम् । **पादतः** अप्लुतस्य पादौ येन **कुर्यात्प्राणाबाधं** प्राणपीडाकरमतिश्रमवेगागमनादि नाचरेत् ॥ ५४ ॥

नाश्नीयात्संधिवेलायां न गच्छेन्नापि संविशेत् ॥
न चैव प्रलिखेद्भूमिं नात्मनोपहरेत्स्रजम् ॥ ५५ ॥

सन्ध्याकालः **सन्धिवेला** । **संवेशनं** स्वापः स्वाध्यायं निषेत्स्यति । **स्मृत्यन्तरे** स्त्रीसंबन्धोऽपि प्रतिषिद्धः

---

१ अ-ड-क-ख-समाश्रये । २ र-ण-पुस्तकयोरयं श्लोकः ४८, ४९ श्लोकयोर्मध्ये दृश्यते ।
३ ण- यत + ।

"चत्वार्येव तु कर्माणि सन्ध्याकाले तु वर्जयेत् । आहारं मैथुनं निद्रां तथा संपाठमेव च ॥"[1]

न चैव प्रलिखेत् प्रकर्षेण लेखनं विदारणं भूमेर्निषिध्यते । न तु वर्तिकादिनाऽक्षरविन्यासः । **नात्मनोपहरेत्स्रजं** ग्रथितानि पुष्पाणि स्रक् तां स्वयं कण्ठे शिरसि वा प्रधृता म्लानतया गुरुत्वेन वाऽऽत्मनो न व्यपनयेत्[2] । अर्थादन्येनापनयेदित्युक्तं[3] भवति । सर्व एवायं सन्ध्यायां विधिरिति केचित् ॥ ५५ ॥

नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ॥
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥ ५६ ॥

लोहितं रुधिरम् । **विषाणीति** बहुवचनं कृत्रिमाकृत्रिमभेदेन स्थावरजङ्गमभेदेन रागादिप्रकारभेदेन वा ॥ ५६ ॥

***नैकः शून्यगृहे[4] स्वप्यान्न श्रेयांसं प्रबोधयेत् ॥**
नोदक्ययाऽभिभाषेत यज्ञं गच्छेन्न चावृतः ॥ ५७ ॥

शून्यं गृहं यत्र न कश्चित्प्रतिवसति । **न श्रेयांसं** कनीयान्वृत्तादिभिर्ज्येष्ठमिदं ते युक्तमिदमयुक्तमिति हेतूपदेशादिना **न प्रबोधयेत्** । **उदक्या** रजस्वला तया सह संभाषणं न कुर्यात् । **यज्ञं गच्छेन्न चावृतः** यज्ञभूमिमनिमन्त्रितो न गच्छेत् " दर्शनाय तु कामम् " इति **गौतमः** (अ. ९ सू. ११) । अतो यज्ञे भोजनादिप्रतिषेधोऽयमवृतस्य ॥ ५७ ॥

अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ ॥
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ॥ ५८ ॥

गोष्ठशब्दोऽयं निवासवचनः समासप्रतिरूपकालः शब्दान्तरं ब्राह्मणानामिति बहुवचनं विवक्षितम् । पाणिग्रहणं बाहूपलक्षणार्थम् । **भोजने** आत्मकर्तृके ॥ ५८ ॥

न वारयेद्गां धयन्तीं न चाचक्षीत कस्यचित् ॥
न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः ॥ ५९ ॥

गामात्मीयां परकीयां वा पिबन्तीं अपः पयो वा न वारयेत् । न चान्यस्मै कथयेत् । प्राग्दोहकालादयं विधिः । दोहकाले तु प्रस्रवणं विहितम् । स्त्रीलिङ्गनिर्देशात्

*** [एकः स्वादु न भुञ्जीत स्वार्थमेको न चिन्तयेत् ॥**
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ १ ॥]

१ ण–संपठमेव च । २ र–ण–आत्मना व्यपनयेत । ३ र–ण–अनेन । ४ फ–नैकः सुप्याच्छून्यगेहे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुंवत्सनिवारणे न निषेधः । इंद्रायुधं शक्रधनुर्विज्ञानच्छायेति या काश्मीरेषु कथ्यते । दिवीत्यनुवादः । केचित्तु पर्वतादिस्थस्य दर्शने न दोष इत्याहुस्तदर्थं दिवीति ॥ ५९ ॥

नाधार्मिके वसेद्ग्रामे न व्याधिबहुले भृशम् ॥
नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत् ॥ ६० ॥

अधार्मिकाः पातकोपपातकिनो यत्र बाहुल्येन वसन्ति स ग्रामस्तत्संबन्धादधार्मिक इत्युच्यते तत्र न वसेत् । ग्रामग्रहणं निवासदेशोपलक्षणार्थम् । तेन नगरेऽपि प्रतिषेधः। व्याधिबहुलोऽनूपो देशो **व्याधिबहुले** जाङ्गलदेशे न वसेत् । यत्र दैवदोषाद्व्याधयः प्रवृत्तास्तं देशं त्यजेत् । **एकः** असहायो **नाध्वानं प्रपद्येत** ॥ ६० ॥

न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते ॥
न पाषण्डिगणाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः ॥ ६१ ॥

नृपतिजनपदैश्वर्यं राज्यं । यो जनपदः शूद्रवशवर्ती तत्र न वसेत् । मन्त्रिसेनापतिदण्डकारिकाद्याः सप्त प्रकृतयो राज्यम् । यत्र सर्वाः शूद्रजातीयाः तत्र निवासनिषेधोऽयम् ।

ननु च "नाधार्मिके वसेत्" इत्यनेनैव तत्सिद्धमधार्मिकजनावृत इति । नैष दोषः । पूर्वप्रतिषेधो यत्र ते निवसन्ति । अयं पुनरन्यत्रापि निवासतोऽन्यत्र सन्निहिता यदि भवन्ति तथापि तत्र प्रदेशे न वसितव्यम् । तथा चावृतग्रहणमत्र यः प्रदेश एतैरावृतो न तत्र स्थातव्यम् । एवं पाखण्डिजनैर्य आक्रान्तो देशः यद्यप्यधार्मिकास्ते वेदबाह्यत्वात्तथापि तेषां धर्मबुद्धिरिति भेदेन निर्देशः । **अन्त्यैरुपसृष्टे** संबद्धे । अथवा उपतप्ते **उपसृष्टे** यथा वाहीका म्लेच्छैः ॥ ६१ ॥

न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् ॥
नातिप्रगे नातिसायं न सायं प्रातराशितः ॥ ६२ ॥

उपनीतः स्नेहो यस्य स नाशितव्यः । पिण्याकयूषमांसानि तस्य ऋतुपर्युषितानां पयोविकाराणां प्रतिप्रसवं करिष्यति । तक्रकिलाटाद्यपेक्षयैव बहुवचनं साक्षाद्विकारो हि दध्येव । तन्मात्रप्रसवेऽभिप्रेते दधिग्रहणमेवाकरिष्यत् । तेनाविधानार्थः । न हि दध्नः पर्युषितत्वमस्ति तस्मादुदश्वित्तक्रकिलाटादिकानां पयोविकाराणां नायं प्रतिषेधः । **नातिसौहित्यं** तृप्तिं न कुर्यात् । तत्र कुक्षेर्भागः । एको ह्यन्नस्य अपरो हि द्रवस्योदकादेः अपरो दोषसंचरणार्थ इत्येवं भोक्तव्यमिति न तत्कार्यम् । **अतिप्रगे** प्राह्णे प्रथमोदित

१ र–ऋतु । २ र–ह–तत्र । ३ र–ण–ऽतत्र । ४ फ–द्रुतस्य ५ र–ण–इति च तत्कार्यं ।

For Private And Personal Use Only

एव सूर्ये न भुञ्जीत । प्रहरे अतीते कृशानां पूर्वाह्णे इतरेषां मध्यान्हे । नातिसायं अस्तसमयमये न भुञ्जीत । न सायं भुञ्जन्प्रातराशितस्तृप्तस्तस्मात्साकांक्षमशितव्यं कालद्वयेऽपि । तदुक्तम् "सायं प्रातर्मनुष्याणामशनं देवनिर्मितम्ति" इति । यदि तु प्रातस्तृप्तः स्यात्सायं न भुञ्जीत । अथवैवं व्याख्यायते । न सायं प्रातराशितः स्यात् उभयो रन्नकालयोर्न तृप्येत् । तथा च याज्ञवल्क्यः सायमीषद्वोननमाह ॥ ६२ ॥

न कुर्वीत वृथाचेष्टां न वार्यञ्जलिना पिबेत् ॥
नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात्कुतूहली ॥ ६२ ॥

वृथाचेष्टा दृष्टादृष्टयोर्व्यापारयोरनुपकारः । यथा इतरदेशादिवार्तापरत्वम् । संहतौ पाणी अञ्जलिः तेनोदकं न पिबेत् । वारिग्रहणात् क्षीरादीनामप्रतिषेधः । न उत्सङ्गे भक्ष्या धानाशष्कुल्यादयस्तानुत्सङ्ग ऊर्वोरुपरि न भक्षयेत् । भक्ष्यग्रहणात्फलानामपि प्रतिषेधः । सर्वत्वोदनादेस्तु निरुपसेचनीयस्यानदनीयत्वादुत्सङ्गे प्राप्तिरेव नास्ति । कुतूहलं असति प्रयोजने किमेतत्स्यादिति निश्चये अत्यर्थमुत्कलिका । न जातु कदाचित् ॥ ६३ ॥

न नृत्येन्नैव गायेच्च न वादित्राणि वादयेत् ॥
नास्फोटयेन्न च क्ष्वेडेन्न च रक्तो विरावयेत् ॥ ६४ ॥

नर्तनं गात्रविक्षेपविशेषः लोकप्रसिद्ध एव । गायनं षड्जादिस्वरतः शब्दस्य करणम् लौकिकस्य चायं प्रतिषेधो न वैदिकस्य विहितत्वात् । वादित्राणि वीणावंशमृदङ्गादीनि तेषां स्वयं कर्तृकं वादनं प्रतिषिध्यते । वादकैस्तु वाद्यमानानामयं प्रतिषेधो न । न हि ण्यन्तादयं णिजन्त इति प्रमाणमस्ति । आस्फोटनं करमर्दास्फोटनादि पाणिना भूमौ बहुनिर्घातः स शब्दः । क्ष्वेडेति अव्यक्तं दन्तैः शब्दकरणं क्ष्वेडनिकेति प्रसिद्धा । वल्गनं अन्यो रागी परितुष्ट्य न विरोधयेत् विरोधं न कुर्यात् । पीडिते न निषेधः घञन्ताण्णिच् कर्तव्यः ॥ ६४ ॥

न पादौ धावयेत्कांस्ये कदाचिदपि भाजने ॥
न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते ॥ ६५ ॥

कांस्ये भाजने पादौ न प्रक्षालयेत् । भिन्नभाण्डे एकदेशभिन्नेऽपि । सर्वभिन्नेष्वर्थत एव प्रतिषेधः । पत्रपुटकादीनां तु भिन्नभाण्डाव्यवहारात् छिद्रितानामपि

१ ण–दूर । २ फ–सक्तोदनादे । ३ फ–न नृत्येदथवा गायेन्न । ४ र–ण–भूमिबहुनिर्घातः । ५ अ–क–ड–रोगी । ६ ह–परिमुष्ये ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न दोषः । भावः अन्तर्हृदयाभिप्रायः यत्र मनो न परितुष्यति । शब्ददुष्टे वा एतद्गृहादौ तत्रापि नैवं भावप्रसादो भवति ॥ ६५ ॥

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥
उपवीतमलङ्कारं स्रजं करकमेव च ॥ ६६ ॥

पित्रादिभ्योऽन्यैर्धृतं **न धारयेत्** । 'निर्णिज्यांशक्ताविति' **गौतमः** (अ.९सू.७) । **करकः** कमण्डलुस्तस्य पित्रादिधृतस्यापि धारणं समाचारविरुद्धं संबन्धिरूपो ऽसाविष्यते । यस्यैव संबन्धी तस्यैव शुचिर्नान्यस्य । **अलङ्कारो** दन्तवलयादिः करकादिभिरल्पार्थैः साहचर्यात् । मणिमुक्तादेस्तु न निषेध इति केचित् ॥ ६६ ॥

नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः ॥
न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ॥ ६७ ॥

अविनीता अदान्ता गावोऽश्वाश्वतरादयः । **धुर्या** धुरं वहन्ति युज्यंते । गन्त्र्यादेरुपलक्षणम् । **च**ग्रहणं अनियुक्तैरपि धुरि केवलैरदान्तैः । अविनीता अदान्ताः गमनं नेष्यते । भग्नं शृङ्गं अनडुहः तस्यैव शृङ्गसंभवो नाश्वादेः । **वालधिः** पुच्छस्तेन **विरूपिताः** छिन्नपुच्छादयः । तादृशेन न यायात् । आरोहणमेव **स्मृत्यन्तरे** प्रसिद्धम् ॥ ६७ ॥

विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः ॥
वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशम् ॥ ६८ ॥

दृष्यमाना अपि केचिद्विनयं न संगृह्णन्ति तदर्थमाह । **विनीतैरिति** । सुशिक्षितैः **आशुगैः** क्षिप्रगामिभिर्**लक्षणान्वितैः** प्रशस्तावर्तादियुक्तैर्न शून्यमस्तकादिभिः । **वर्णरूपयुक्तैः** शोभनेन वर्णेन कर्णशोभादिना रूपेण संस्थानविशेषेण । शोभनत्वं च लक्षणविद्यातो ज्ञातव्यं । **भृशमक्षिपन्** अपीडयन् पुनः पुनः **प्रतोदेन** अङ्कुशादिना अत्यंतं उद्वेक्ष्यमाणा विघटयन्ति ॥ ६८ ॥

***बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथाऽऽसनम् ॥**
न छिन्द्यान्नखरोमाणि दन्तैर्नोत्पाटयेन्नखान् ॥ ६९ ॥

प्रथमोदिते सवितरि मुहूर्तत्रयं **बालातप**व्यपदेशः । **प्रेतधूमो** दह्यमानस्य शवस्य यः । **आसनं** छिन्नं छिद्रितं भग्नं एतद्वर्ज्यम् । **नखानि रोमाणि च न छिन्द्यात्**स्वयं व्यसनेन अतिप्रवृद्धानि तु नापितेन कारयेत । **दन्तैश्च नखान्नोत्पाटयेत्** प्रवृद्धानपि ।

१ 'निर्णिक्तमशक्तौ' इति मुद्रतगौतमीये पाठः । २ फ–सम्बन्धिः । ३ र–गंत्राय । ४ र–क्षिप्रगादिर्लक्षणा–

***श्रीकामो वर्जयेन्नित्यं मृन्मये चैव भोजनम् ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये त्वेवमभिसंबध्नन्ति । न छिन्द्यान्नखरोमाणि दन्तैरिति । नखांश्च दन्तेनापि न पातयेत् । नखभङ्गयोजनासु हि कामिन्यो नाना नखान् दारयन्ति ॥ ६९ ॥

न मृल्लोष्टं च मृद्नीयान्न च्छिन्द्यात्करजैस्तृणम् ॥
न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम् ॥ ७० ॥

विमर्दनं खण्डशः करणं लोष्टस्य मृत्संबन्धिनः । केचित्तु मृदो लोष्टस्य सुधादिसंबन्धिनोऽपि मृदश्च मर्दनं उत्क्षिप्योत्क्षिप्य पातनं हस्तेन संहननं वा । एतच्च मर्दनं यत्किंचनकारितया प्राप्तं निषिध्यते । न तु शौचाद्यर्थे प्रयोजने निष्फलग्रहणस्य पुरस्तादपकर्षात् । तेनैव सिद्धे प्रायश्चित्तविशेषार्थः पुनरारम्भः ।

करजा नखाः । **न कर्म** । ननु च "न कुर्वीत वृथाचेष्टाम्" (श्लो. ६३) इत्यनेनैव निष्फलं कर्म । अत्राहुः । चेष्टा भौतिको व्यापारः । इह तु सामान्यस्य पर्युदासः । तेन मनोराज्यादिकल्पाः परिहरणीयाः । **आयति**रागामी कालः । यस्मात्कर्मणं आगामिनि काले **असुखं** दुःखमुत्पद्यते । यथा अजीर्णभोजनं कुटुम्बभृतिमचिन्तयित्वा महतो धनस्य व्ययश्च तं न कुर्यात् ॥ ७० ॥

अत्रार्थवादः

लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः ॥
स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च ॥ ७१ ॥

अस्मादेव केवलाल्लोष्टग्रहणात् पूर्वोक्तमृल्लोष्टमिति षष्ठीसमासो विज्ञायते उभयप्राधान्ये हि मृद्ग्रहणं लोष्ट इव अत्राकरिष्यता तस्यैव अस्तेन सुमर्दत्वात्प्राप्तः पर्युदासः । सुधायास्तु काठिन्याद्यत्नसाध्यं मर्दनं तत्रैवासति प्रयोजने प्राप्तम् । मृल्लोष्टमर्दनं तु हस्तेन पुरुषाणां स्वभावतः केषांचित्प्राप्नोति तस्य पर्युदासः । **तृणच्छेदी** प्रकृतो दन्तैर्नखान् खादति । **सूचकः** पिशुनः कर्णेजपः । यः परस्य दोषानसतः सतो वा परोक्षं व्याख्यापयति । अशुचिरुक्तार्थः । **विनाशमाशु व्रजति** । न यथाऽन्यानि वैदिकान्यनियतकालानि फलानि एवमेतत् । किंतर्हि ? इहैव जन्मनि अचिराद्धनादिना वियोगो विनाशः ॥ ७१ ॥

---

१ फ-नखभङ्गे । २ फ-ननु । ३ फ-यस्मात्कर्मणागामिनि । ४ फ-तत्रैव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न विगृह्य कथां कुर्याद्बहिर्माल्यं न धारयेत् ॥
गवां च यानं पृष्ठेन सर्वथैव विगर्हितम् ॥ ७२ ॥

अभिनिवेशेन पणबन्धादिना यल्लौकिकेषु शास्त्रेषु वाऽर्थेष्वितरेतरं जल्पनमहोपुरुषिका या सा **विगृह्य कथा** । **बहिर्माल्यं** वाससो बहिःकण्ठस्थां स्रजं वाससा छादयेत् । तथा च समाचारः ॥

अपरे बहिरित्यनावृतो देश उच्यते । तत्र नगररथ्यादौ न प्रकटमाल्यो भ्राम्येदित्याहुः । अथवा बहिर्गन्धं बहिर्माल्यं यस्य गन्धो नातिसंवेद्यते । एवं स्मृत्यन्तरम् । "नागन्धां स्रजं धारयेदन्यत्र हिरण्मय्या" इति । **गवां च पृष्ठे** यानं पर्याणं विना साक्षाद्वारोहणं प्रतिषिध्यते । **सर्वथेति** पर्याणाद्यन्तरायेऽपि गन्ध्यादियुक्तेऽपृष्ठयानत्वादप्रतिषेधः ॥ ७२ ॥

अद्वारेण च नातीयाद्ग्रामं वा वेश्म वा वृतम् ॥
रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ॥ ७३ ॥

आवृतस्य वाटपरिक्षेपादिना ग्रामस्य अद्वारप्रवेशप्रतिषेधः । अनावृतस्य तु द्वारवतोऽपि यथाकामम् ॥ ७३ ॥

नाक्षैर्दीव्येत्कदाचित्तु स्वयं नोपानहौ हरेत् ॥
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने ॥ ७४ ॥

अन्तरेणापि ग्लहं परिहासेन **नाक्षैर्दीव्येदिति** । **कदाचिद्**ग्रहणं शलाकादीनामपि दर्शनार्थम् । तेन सर्वस्य द्यूतस्य प्रतिषेधः । **स्वयं** चर्ममयं पादत्राणमु**पानहौ** च ते आत्मना हस्तेन दण्डादिना वा गृहीत्वा देशान्तरं नानयेत् । आत्मीययोश्चायं प्रतिषेधः । स्वयमिति प्रकृतत्वात्तेन च गुर्वादिसंबन्धिन्योरनिषेधः । **शयने** खट्वादौ उपविश्य न **भुञ्जीत** । **पाणौ** च कवलं स्थापयित्वा भाजनाद्यनन्तरितेन आसने अन्नं स्थापयित्वा आनन्तर्याद्भोज्यस्य प्रतिनिर्देशः न भोक्तुः ॥ ७४ ॥

सर्वं च तिलसंबद्धं नाद्यादस्तमिते रवौ ॥
न च नग्नः शयीतेह न चोच्छिष्टः क्वचिद्व्रजेत् ॥ ७५ ॥

अस्तमिते आदित्ये प्रतिर्लक्षणे कर्मप्रवचनीयत्वात् द्वितीया । **न चोच्छिष्टः** । ननु च ब्रह्मचर्यधर्मेष्वेतत्प्रतिषिद्धम् । पुरुषधर्मता च तस्य ज्ञापिता न तादर्थ्यमेव । सत्यं व्रतरूपताज्ञापनार्थ उपदेशोऽयम् । तेन यावज्जीविकः संकल्पः कर्तव्यः ॥ ७५ ॥

---

१ " अहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि " इत्यमरः । २ फ—वासस्छादयेत् । ३ फ—अनावृतादेशं । ४ फ—पर्याणादान्तरायेऽपि । ५ फ—क्रीडेत् ६ फ—चर्मपादत्राणं । ७ फ—निर्देशो । ८—लक्षणेत्थंभूताख्योन " (व्या. सू. १।४।९०) । फ—न लातृसो ।

For Private And Personal Use Only

आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ॥
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात् ॥ ७६ ॥

आदिकर्मणि विधिमिमं समाचरेत् । आर्द्रपादो भोजनमाचरेत् । न चातृसे: पादौ सिंचन्नासीत संविशेत् । शयने गात्राणि नावक्षिपेत् । संवेशनं शयने गात्रसंयोजनम् । अस्य फलमाह । **दीर्घमायुरिति** । नायमायुष्कामस्य विधिः । किंतर्हि ? पूर्ववन्नित्यः । आयुरनुवादस्त्वर्थवाद एव ॥ ७६ ॥

अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् ॥
न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत् ॥ ७७ ॥

दुर्गं दुरारोहं पर्वतादितरुगुल्मलतागहनं चारण्यं **तन्न प्रपद्येत** । नाक्रामेन्न गच्छेदचक्षुर्विषयं सर्पचौरादैरन्तर्हितस्य भावाशङ्कया । चक्षुर्ग्रहणमागमादेरपि प्रमाणस्य लक्षणम् । **न विण्मूत्रं** उदीक्षणं वर्णादिना निरूपणं च चिरकालप्रेक्षणानि भवन्ति इति । अत एव तन्न कर्तव्यम् । दैवात्कचिद्दृश्यमाने न दोषः । नदीबाहुतरणं च स्वस्थस्य निषिध्यते । न वृकमये ॥ ७७ ॥

अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः ॥
न कार्पासास्थि न तुषान्दीर्घमायुर्जिजीविषुः ॥ ७८ ॥

कपालिकाः भग्नस्य शकलानि **दीर्घमायुः** । व्याख्याता द्वितीया ॥ ७८ ॥

*** न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः ॥**
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥ ७९ ॥

ननु च “ नाधार्मिकजनावृते ” “ नोपसृष्टेऽन्त्यजैः ” इति चोक्तमेवैतत् । नेति **ब्रूमः** । तत्र निवासः प्रतिषिद्धः । इह तु संवासः । यत्र ग्रामे ते वसन्ति न तत्र वस्तव्यं गृहस्थित्येति तत्रोक्तं; संवासस्तु तैः सह संव्यवहारो दानग्रहणादिभिर्मैत्रीकरणम् । तद्गृहसमीपे च वासोऽपि एकतः छायोपजीवनमित्यादि । आवृतग्रहणाच्च तत्र बाहुल्यं गम्यते । यस्मिन् ग्रामे भूयांसस्ते तथा समीपेऽपि न वस्तव्यमिति तस्यार्थः । इह त्वबाहुल्येऽपि समीपवासादि प्रतिषिध्यत इत्येष विवेकः । **पुल्कसा** निषादाः शूद्रायां जाताः । **अन्त्या** मेदप्रभृतयो म्लेच्छा **अन्त्यावसायीति** निषादस्त्रियां चण्डालाज्जातो वक्ष्यते (अ. १० श्लो. ३९) “ निषादस्त्री चण्डालात् ” इत्यादि । **अवलिप्ता** मदोद्धताः धनादिना गर्विताः ॥ ७९ ॥

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ॥
× न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ ८० ॥

---

* [न कृतघ्नैरनुद्युक्तैर्न महापातकान्वितैः । न दस्युभिर्नाशुचिभिर्नामित्रैश्च कदाचन]
× [अन्तरा ब्राह्मणं कृत्वा प्रायश्चित्तं समादिशेत् ॥]

१ फ—न लातृसे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शूद्रस्य दृष्टादृष्टविषये हिताहितोपदेशो न कर्तव्यः । शूद्रस्य मन्त्रित्वं न कर्तव्यमिति यावत् । वृत्त्यर्थश्चायं निषेधः । सौहार्दादिना तु न दोषः । भवन्ति हि शूद्राः कुलमित्राणि मैत्र्या चावश्यं हितमुपादिश्यते । अनुज्ञाता च सर्ववर्णे ब्राह्मणस्य मैत्री " मैत्रो ब्राह्मण उच्यते । "

ये तु व्याचक्षतेऽपृच्छतो न ब्रूयादित्युपन्यस्य युक्तं शास्त्रान्तरसिद्धत्वात् । "नापृष्टः कस्यचिद्ब्रूयादिति" (अ. २ श्लो. ११०) तदयुक्तम् । तत्र हि स्वाध्यायविषयं स्वरवर्णगतमन्यत्वमसंगतं वा कुर्वतो विनाशितं त्वयेत्यादावपृष्टेन न वक्तव्यम् । यथा चामी नाध्याप्या इत्यस्मिन्प्रसङ्ग इदमुक्तं " नापृष्टो ब्रूयादिति " । अशिष्यस्यापृच्छतो विस्वरं व्यक्षरं वा पठतो न किंचिद्वक्तव्यामिति तस्यार्थः ।

नोच्छिष्टमिति । उच्छिष्टशब्दोऽयं भुजिनिमित्तेऽप्राशस्त्ये वर्तते । कृतमूत्रपुरीषोऽप्यनाचान्त उच्छिष्ट उच्यते । यथा वक्ष्यामो "न स्पृशेत्पाणिनोच्छिष्टः" । बाहुल्येनोच्छिष्टप्रयोगो भुजिसंबन्धेन भुञ्जानस्य ह्यन्तरास्यसंस्पर्शेन बहिरन्तः स्थितस्योच्छिष्टत्वं भवति । तथा च "न श्मश्रूणि गतान्यास्यमिति " श्मश्रुभ्योऽन्यदास्यानुप्रविष्टमुच्छिष्टं करोतीति ज्ञापयति । अतश्च भोक्तुर्भुज्यमानस्य पात्रादेरधिकरणस्य चोच्छिष्टव्यवहारः । क्वचिच्चायं उपयुक्तेतरवचनोऽपि । हविरुच्छिष्टं दक्षिणेति । तत्र समाचारात्पात्रगृहीतमुच्छिष्टमुपसंबन्धमीषद्युक्तमुच्छिष्टमुच्यते । यदपि विशदमोदनादिपात्रस्थमस्पृष्टमपि भोक्त्रा तदपि संबन्धात्समाचारतः परिह्रियते । तत्रोच्छिष्टमपि दातव्यम् । नोच्छिष्टमिति विधिप्रतिषेधावेकविषयावृतामृतशूद्रव्यवस्थया हविःशेषभेदेन वा विकल्पेते । अथवा स्थालीस्थमतिथ्यादिभुक्तशिष्टं *पर्युषितप्रायं उच्छिष्टं* तन्न शूद्राय दातव्यम् । तत्रोच्यते । जीर्णवसनसाहचर्याच्चैतदेव प्रतिपत्तुं युक्तम् । उपयुक्तेतरवचनत्वाच्च शिषेरुपसर्गस्य तदर्थानुगुण्येन वर्तनाद्धविरुच्छिष्टं दक्षिणेतिवत्प्रयोगोऽप्यविरुद्ध एवमनयोः स्मृत्योरविरोधो भविष्यति । यद्यपि रुढ्याऽऽचमनार्हाः प्रायोऽत्र वचने दृश्यन्ते । यत्तु " वैश्यवच्छौचकल्पश्चेति " तद्दासशूद्रविषयम् । भुक्तोज्झितमेव प्रतीयत इति दर्शयिष्यामः ।

न हविष्कृतम् । हविषे कृतं हविरर्थं कल्पितं बहुवचनः समासस्तादर्थ्येनोपकल्पितप्रतिषेधात् । दण्डापूपिकया यत्र हविर्गन्धोऽस्ति तत्सर्वं प्रतिषिध्यते । तेन हविरर्थितया

---

१ रण–वक्तव्यः । २ र–अप्रायत्ते वर्तते; ण–प्रवर्तते । ३ श्लो. १४२ । ४ अ. ५ श्लो. १४१ ५ फ–भोक्ता । ६ रण–मृतानामृतशूद्रव्यवस्थाया । * * एतत्पद्दयं रण–पुस्तकयोरेव दृश्यते । ७ फ–एव । तयोः ८ रण–आचमनार्हा प्रयाव्यवचने दृश्यते । ९ अ. ५ श्लोक १४०.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संकल्पितस्य हविषः प्रवृत्तस्य हविःशेषस्याभुक्तोज्झितस्य हविषः प्रतिशेषः सिद्धो भवेत् । तथा च कृतमिति करोतिः क्रियासामान्यवचनः प्रयुक्तः हविरर्थे यत्कृतं संकल्पितं वचनं तेनोच्छिष्टस्यापि यावत्प्राकृतेन संकल्पेन हविष्कृतव्यपदेशो न यथावत्सर्वावस्थस्य प्रतिषेधो विज्ञायते ।

अन्यैस्तु हविर्मिश्रं हविष्कृतमिति व्याख्यातम् । संसृष्टप्रतिषेधाच्च केवलस्यापि प्रतिषेधः । विप्रसंसृष्टप्रतिषेधे विप्रस्यैवेत्युक्तम् । कथं पुनः संसृष्टप्रतिषेधे केवलप्रतिषेधः । केवलप्रतिषेधेनाप्रधानः कदाचित्संसृष्टप्रतिषेधः शक्यते वक्तुम् । यत्र संसृष्टावपि पृथक्त्वेन प्रतिभासेते यत्र वा चक्षुषा[1] प्रतिभासमाने रूपे रसादिना तत्प्रयोगो भवति तत्रापि भवत्येव तदाश्रयो व्यवहारः । यथा सुरादिसंपृक्तासु सक्तु[2]पिण्डीष्वन्तर्हितेऽपि सुरादिरूपे रसे तत्प्रत्ययादस्त्येव सुरापानप्रायश्चित्तम् ।

ननु चैवमप्यद्रवरूपत्वात्पिण्डीभिरेकतापन्नायाः सुराया न पानापपत्तिः[3] । नैष दोषः । प्रायिकेणौचित्यानुवादेन पानमुपादीयते । अभ्यवहार एव तु निषिध्यते । यथा च भक्ष्याभक्ष्यप्रकरणमेतत् । भक्षणं चाभ्यवहारमात्रं तस्य विशेषाः पानखादनचर्वणादयः । गन्धस्य पुनरनाश्रयस्याप्युपलब्धेर्न ततो द्रव्यसद्भावावगमः । दूरस्थेऽपि कर्पूरादौ गन्ध उपलभ्यते । सूक्ष्मद्रव्यावयवावगमकल्पनायां द्रव्यस्य परिमाणावयवः स्यात् । यत्र तु संसृष्टयोरेकीभावो न चान्यस्तत्प्रत्ययो न, न तत्र केवलाश्रयौ विधिप्रतिषेधौ प्रवर्तितुमर्हतः । यथा क्षीरं पातव्यमिति संमिश्रितयोः क्षीरोदकयोः पीतयोर्न क्षीरं भवति नोदकं द्रव्यान्तरत्वात् । अन्यद्धि तत्र रूपमन्यश्च रसोसंस्थानादितत्प्रत्ययहेतुरस्तीतिद्रव्यान्तरं तत् ।

यद्येवं मद्योदके सह पीते यदि भवेतां तदा मद्यपानप्रायश्चित्तं न प्राप्नोति । द्रव्यान्तरत्वात् । नैष दोषः अभिभवति रसान्तराणि मद्यं तिक्तरसवत् । ततो रसप्रत्यभिज्ञानाद्भवत्येव तत्प्रायश्चित्तम् । यत्र तु बहूदकं स्वल्पं मद्यादि तत्र संसर्गप्रायश्चित्तमपि निपुणमेकादशे निरूपयिष्यामः । तस्मात्केवलाश्रयः प्रतिषेध आस्कन्देदपि संसर्गम् । यथा माषा न भोक्तव्या इति मिश्रा अपि न युज्यन्ते । संसर्गाश्रयस्तु केन हेतुनाऽसंसृष्टे वर्तेत । गङ्गायमुनयोः संगमाज्जलमानयेत्युक्ते न केवलाया गङ्गाया आनयति न यमुनायाः । समाचार एवेति चेत्समाचार एवोदाहर्तव्यः ।

न चास्योपदिशेद्धर्मम् । ननु च 'न शूद्राय' इत्यविशेषेण दृष्टादृष्टविषयमतिदानप्रतिषेधाद्धर्मोपदेशनिषेधोऽपि सिद्ध एव । सत्यम् । पुनर्वचनं शेषार्थम् । ततः

---

१ क–चक्षुषः । २ क–सुपक्व । ३ क–सुरापानपानोपत्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रायश्चित्तोपदेशोऽनुज्ञातो भवति । "शरणागतं परित्यज्ये"त्यत्र (अ. ११ श्लो. १९८) चैतद्दर्शयिष्यामः । अन्ये तु पार्वणश्राद्धपाकयज्ञादिष्वितिकर्तव्यतां न शिक्षयेत् याजकत्वादि रूपेणेत्याहुः ।

अत्र चोदयन्ति यदि धर्मोपदेशः शूद्रस्य निषिध्यते कुतस्तर्हि धर्मवित्त्वम् । अविदुषश्च नानुष्ठानसंभवस्ततः शूद्रानुष्ठानिकधर्मशास्त्रानर्थक्यम् । अचोद्यमेतत् । अतिक्रान्तनिषेधस्य लिप्सया ब्राह्मणस्य चोपदेष्टृत्वसंभवात् । न हि ब्रह्महत्या सर्वस्वदानचोदनाप्रतिग्रहं प्रयुंक्ते । संभवति लिप्सा प्रयोक्त्री । न चास्ति वचनं " प्रब्रूयादितरेभ्यश्चेति " वृत्त्युपायप्राप्तौ । अत एवं प्रकृतं " सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि । प्रब्रूयादितरेभ्यश्चेति " (अ.१० श्लो. २) । यस्त्वाश्रितशूद्रस्तस्यावश्यमुपदेशः कर्तव्यः । अविदुषा विधिप्रतिषेधाधिकृतक्रमात्संवासो निषिद्धः "न मूर्खैर्नावलिप्तैश्चेति " (श्लो. ७९) ।

यत्तु व्याचक्षते धर्मशास्त्रोपदेशस्तदर्थव्याख्यानं वाऽनेन निषिध्यते शास्त्रद्वयेन न वाऽस्योपदिशेदिति । एकेन शास्त्राध्ययनमपरेणार्थव्याख्यानम् । अग्रन्थकस्तूपदेशो न केनचिन्निषिद्धः तेषामेवंवदतां तस्य शास्त्रविचार इति सिद्धत्वात्पुनरुक्तम् । इदं तु बहुयुक्तम् । व्याकरणादौ धर्मावबोधार्थशास्त्रे धर्मशब्दः । तद्धि न धर्मशास्त्रमतीन्द्रियार्थमितिप्रतिषेधानुपदेशाद्भवति तु धर्मशास्त्रावबोधार्थम् । शक्नोति हि वैयाकरणः पदार्थानुसारेण न गहनं वाक्यार्थमुन्नेतुम् । धर्मशास्त्रत्वाच्च तस्य शास्त्र इत्यनेनैव गतत्वात्पृथगुच्यते । युक्तमेतत् । यदि कश्चिन्न ब्रूयात्प्रधानेऽनधिकृतस्य कुतोऽङ्गेषु प्राप्तिरिति । वेदः स्मृतिशास्त्रे च प्रधानम् । न च तत्र शूद्रस्याधिकारः ।

न चास्य व्रतमादिशेत् । व्रतशब्देन कृच्छ्राण्युच्यन्ते । एतैर्व्रतैरितिप्रयोगदर्शनात् । तान्यभ्युदयकामस्य नोपदिशेत् । प्रायश्चित्तार्थतयाऽन्विष्यत एवोपदेशः । स्नातकव्रतानां प्राप्तिरेव नास्ति अस्नातकत्वात् । एवं सावित्रादीनामप्यध्ययनाभावादध्ययनं चोपनयनाभावादुपनयनं च तद्विधौ जातित्रयश्रवणात् ॥ ८० ॥

यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् ॥
सोऽसंवृतं नाम तमः सह तेनैव मज्जति ॥ ८१ ॥

पूर्वस्य प्रतिषेधस्य निन्दार्थवादः । तेनैव सहेति । उभयोर्दोषमाह । शृण्वतः श्रावयतश्च मज्जत्यवगाहते । तत्प्राप्नोतीति यावत् ॥ ८१ ॥

---

१ फ-याचकत्वात् । २ र-ण-धर्मं वेत्तु । ३ फ-अनुष्ठानुक । ४ र-म-उपदेष्टव्यत्व । ५ र-ण-ये तु । ६ र-ण-विकार । ७ फ-इत्यनेनागतत्वां । ८ फ-वेदस्मृतिशास्त्र ।

For Private And Personal Use Only

न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ॥
न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः ॥ ८२ ॥

संहताभ्यां संश्लिष्टाभ्यामितरेतरसंसृष्टाभ्यां युगपद्वाभ्यां प्रतिषेधः । **पाणिभ्यामिति** बाहू संहतौ निषेधति । **आत्मन इति** न परस्य । अतश्चान्येन संहताभ्यां कण्डूयतो न दोषः । शिरोग्रहणात्पृष्ठादावदोषः । **न स्पृशेच्चैव** शिरो हस्तेनात्मनोऽन्यहस्तेन वाऽवयवेनेति केचित् । तत्र पाणिभ्यामिति प्रकृतत्वात् । **न च स्नायाच्छिरसा विना** । नित्यनैमित्तकयोः स्नानयोरयं विधिः ।

ननु स्विन्नस्य लौकिके स्नाने कुत एतत् । स्नानविधिनैकवाक्यत्वात् । विहितस्नानापेक्षा प्रत्यासत्त्या युक्तिमती लोके तु विधेरभावादप्राप्तिः । स्नातिश्चायं सर्वाङ्गसंबन्धिनि सलिलगोमूत्रादि प्रक्षालने वर्तते । शिरोवर्जिते च तत्र चण्डालादिस्पर्शने शिरोवर्जितमपि यदृच्छाप्रसक्तं निवार्यते । **न च स्नायाद्विना ततः** । अस्ति च लौकिकमशिरस्कमपि स्नानं येन शिरःस्नानं " शिरः स्नातस्तु तैलेनेति " ॥ ८२ ॥

केशग्रहान्प्रहारांश्च शिरस्येतान्विवर्जयेत् ॥
शिरःस्नातश्च तैलेन नाङ्गं किंचिदपि स्पृशेत् ॥ ८३ ॥

आत्मनः परस्य वेत्यविशेषेण केचिदिच्छन्ति । अन्ये त्वात्मन इति प्रकृतमभिसंबध्नन्ति । क्रोधनिनिमित्तश्चायं प्रतिषेधः । सुरतसंभोगे तु कामिन्याः केशग्रहः स न निषिध्यते। शिरःस्नानं क्षालितमनेनेति राजदन्तादेराकृतिगणत्वात् परनिपातः । **शिरःस्नात** इति बाहुलकेन समासः । **नाङ्ग**मात्मीयम् ॥ ८३ ॥

न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ॥
सूनाचक्रध्वजवतां वेशेनैव न जीवताम् ॥ ८४ ॥

उक्तं " राजतो धनमन्विच्छेदिति " (अ. ४ श्लो. ३३) । राजशब्दश्चायं क्षत्रियजातावक्षत्रियेऽपि जनपदेश्वरे दृष्टप्रयोगो ' ब्राह्मणानां राज्यमिति ' । तत्र प्रतिग्रहविधौ तन्निषेधे च जनपदेश्वरवचनो गृह्यते । येनाह **अराजन्यप्रसूतित इति** । जनपदैश्वर्यं हि सर्ववर्णसंभवि लिप्सया । अतो विशेष्यते । राजन्यात्क्षत्रियाद्यस्य प्रसूतिरुत्पत्तिर्नास्ति तस्माद्राज्ञो जनपदेश्वरान्न गृह्णीयात् । क्षत्रियादपि लुब्धादुच्छास्त्रवर्तिनो वक्ष्यमाणेन प्रतिषेधेन । **सूना** पशुमारणसंज्ञकपूर्वकेण मांसक्रयेण यो जीवति स सूनावान् ।

१ र-ण-कण्डूयते । २ र-ण-सहंतो संश्लिष्टौ । ३ फ-युक्तिमति । ४ र-तर । ५-व्या. सू. 'राजदन्तादिषु परम्' (२।२।३१) । ६ व्या. सू. (२।१।३२) ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खटिक इति लोके प्रसिद्धः। ध्वजी मद्यपण्यस्तत्क्रयविक्रयजीवी। वेशः पण्यवृत्तिस्तया यो जीवति स्त्री वा पुमान्वा ॥ ८४ ॥

दशसूनासमं चक्रं दशचक्रसमो ध्वजः ॥
दशध्वजसमो वेशो दशवेशसमो नृपः ॥ ८५ ॥

उत्तरस्योत्तरस्य दोषगुरुत्वज्ञापनार्थमेतत्। आपद्युपायो वक्ष्यते ॥ ८५ ॥

दशसूनासहस्राणि यो वाहयति सौनिकः ॥
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥ ८६ ॥

सूनया चरति सौनिकः। वाहयति स्वार्थसाधने व्यापारयति। घोरः भीषणोऽयं नरकादिहेतुत्वात् अवयुत्यवादेन राजप्रतिग्रहे निन्दा ॥ ८६ ॥

यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः ॥
स पर्यायेण यातीमान्नरकानेकविंशतिम् ॥ ८७ ॥

लुब्ध आदानशीलः सामन्तकादिभ्यः[1] श्रुतशीलं[2] च विज्ञायेत्यादि। उच्छास्त्रवर्ती शास्त्रमतिक्रम्य व्यवहरति। असद्दण्डपरस्त्रीहरणादिना पर्यायेणैकत्र फलमनुभूयान्यत्र गच्छति। नरकशब्दो निरतिशयदुःखवचनः। केवलदुःखश्रवणार्थापत्त्या वाऽऽदेशविशेषवचनः। एकविंशतिसंख्याऽर्थवादः ॥ ८७ ॥

तामिस्रमन्धतामिस्रं महारौरवरौरवौ ॥
नरकं कालसूत्रं च महानरकमेव च ॥ ८८ ॥
संजीवनं महावीचिं तपनं संप्रतापनम् ॥
संहातं च सकाकोलं कुड्मलं पूतिमृत्तिकम्[3] ॥ ८९ ॥
लोहशंकुमृजीषं च पन्थानं शाल्मलीं नदीम् ॥
असिपत्रवनं चैव लोहदारकमेव च[4] ॥ ९० ॥

श्लोकत्रयं स्पष्टार्थम् ॥ ९० ॥

एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः ॥
न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकांक्षिणः ॥ ९१ ॥

पूर्वस्य प्रतिग्रहनिषेधविधेरुपसंहार एषः[5]। राज्ञः प्रतिग्रहो विविधदुःखनरकादिहेतुरिति जानन्तो विद्वांसो ब्राह्मणा न राज्ञः प्रतिगृह्णीयुः। प्रेत्य भवान्तरे। श्रेयः कल्याणम्। ये कांक्षन्ति कामयन्ते। प्रेत्येति तु ल्यबन्तप्रतिरूपकं शब्दान्तरम्। ब्रह्म

१ र-ण-सांतनकादिभ्यः। २ अ. ११ श्लो. २२। ३ फ-प्रतिमूर्तिकम्। ४ र-ण-वा। ५ र-ण-एतत्।

For Private And Personal Use Only

वेदस्तं वदान्ति पठन्ति । विद्वद्ग्रहणं ब्रह्मवादिग्रहणं च दुःखातिशयदर्शनार्थम् । तेषां चातीव प्रतिग्रहाद्दोषः । वक्ष्यति "तस्मादपि विद्वान्बिभीयादिति" ॥ ९१ ॥

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ॥
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥ ९२ ॥

त्रियामा रात्रिस्तस्याः पश्चिमो ब्राह्मो **मुहूर्तस्तत्र** निद्रां त्यजेत् । विबुद्धश्च तस्मिन्काले **धर्मार्थावनुचिन्तयेत्** । यस्मिंश्च धर्म आसेव्यमाने यादृशः शरीरक्लेशो भवति तमपि चिन्तयेत् । स्वल्पश्चेद्धर्मो महान्तं कायक्लेशं जनयति यो धर्मान्तरविरोधी तं परिहरेत् । अर्थोऽपि सेवादिः अतिक्लेशकरः सोऽपि वर्ज्यः । सर्वत एवात्मानं गोपायेदिति । अनिश्चित्य न किंचित्कुर्यात् । न च मनोराज्यादिविकल्पान् कुर्यात् । स्वभावो ह्ययं पुरुषाणामसति बाह्ये व्यापारे मनसो विकल्पाः परद्रव्याभिलाषादिरूपाः समुद्भवन्ति । तन्निवृत्त्यर्थमिदं पुरुषार्थम् । तस्यां वेलायां साध्यसाधनभावेन चिन्त्यो **वेदस्य तत्त्वार्थः** । रहस्यमात्मज्ञानं चिन्तयेद्वेदान्तविधिनाऽभ्यस्येत् । अथवा कर्मकाण्डेऽपि यो वेदस्तस्यार्थस्तं निरूपयेत् । अयं विधिरयमर्थ इदं कर्मैवं रूपमियमत्र देवतेदं द्रव्यमयमत्राधिकारीयमितिकर्तव्यतेत्यादि स्वबुद्ध्या निश्चिनुयात् । व्याख्यातॄणां मतभेदाद्धेतून्निरूपयेदस्य सम्यग्ज्ञानमस्य भ्रान्तिरिति ॥ ९२ ॥

उत्थायावश्यकं कृत्वा कृतशौचः समाहितः ॥
पूर्वां सन्ध्यां जपंस्तिष्ठेत्स्वकाले चापरां चिरम् ॥ ९३ ॥

अनन्तरं प्रभातायां शयनं रात्रौ जह्यात् । **आवश्यकं** मूत्रविट्त्यागः । प्रायेण तस्यां वेलायां पुरुषस्तं कुर्वीत । तत्र आवश्यकस्त्याग उच्यते मुखदन्तधावनादिश्च तं कृत्वा **कृतशौचः** 'एका लिङ्गे'त्यादिविधिनाऽऽचान्तः । **समाहितो** विकल्पान्तरतिरस्कारेण **सन्ध्यां तिष्ठेत्** । **जपन्सावित्रीं** भगवति सवितरि मनो दध्याच्चिरम् । अर्कदर्शनावधिः काल उक्तः सन्ध्यासमयः । ततोऽप्याधिकं कालं जपेदायुःकाम इत्येवमर्थमयं प्रागुक्तः सान्ध्यो विधिरन्तर्हितः । **अपरां** च सन्ध्यां स्वे काले अस्तमयसमयादारभ्य तारकोदयादूर्ध्वमपि ॥ ९३ ॥

ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ॥
प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च ॥ ९४ ॥

---

१ अ. ५ श्लो० ११६ ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदर्थोऽयं पुनर्विधिस्तद्दर्शयति । आयुरादिफलकामो दीर्घकालसन्ध्या जपं कुर्यात् । सत्यपि नित्यत्वे दैर्ध्याद्गुणात्फलमिदं अनग्निकस्य प्रोषितस्यैतत्संभवति । अन्यस्य त्वग्निहोत्रकालोपरोधो दीर्घसन्ध्याविधिसंपादनात् । दीर्घसन्ध्या गुणत उच्यते । सन्ध्यासहचरिते जपादिविधौ सन्ध्याशब्दो वर्तते । दीर्घा सन्ध्यैषामिति बहुव्रीहिः । ऋषिग्रहणमर्थवादः ॥ ९४ ॥

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ॥
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ॥ ९५ ॥

श्रवणयुक्ता पौर्णमासी श्रावणी । एवं प्रौष्ठपदी । तत्रोपाकृत्योपाकर्माख्यं कर्म कृत्वा यथाविध्यधीयीत । "प्राक्कूलान्" इत्यादिप्रागुक्तो[1] विधिः स्मर्यते । युक्तस्तत्परः । छन्दांसि वेदान् छन्दःशब्दोऽयं वेदवचनो न गायत्र्यादिवचनस्तेन ब्राह्मणादीनप्यधीयानस्यैष परमविधिः । उभयत्रापि चायं युक्त एव प्रत्ययाविशेषात् । अयं विकल्पो व्यवस्थितः । "छन्दोगाः प्रौष्ठपद्यामुपाकुर्वन्ति, बह्वृचा अध्वर्यवः श्रावण्याम्" ॥ ९५ ॥

पुष्ये तु च्छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ॥
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ ९६ ॥

अर्धपञ्चमेषु मासेषु गतेषु यः पुष्यो नक्षत्रं तत्रोत्सर्जनं कर्तव्यम् । उत्सर्गोक्तं कर्म गृह्यकारैराम्नातम् । बहिरित्यनावृते देशे । अनयोरुपाकर्मोत्सर्गयोर्गृह्यात्स्वरूपं ज्ञातव्यम् ॥ ९६ ॥

यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ॥
विरमेत्पक्षिणीं रात्रिं तदेवैकमहर्निशम् ॥ ९७ ॥

उत्सर्गं कृत्वा द्वे अहनी रात्रिमियन्तं[2] नाधीयीत तदहर्निशं द्वितीयं चाहरेव न रात्रिरित्येतावन्तं कालं विरमेन्नाधीयीत । उभयतोहःपक्षा रात्रिः पक्षिणी ।

यद्वा[3] यस्मिन्नहन्युत्सर्गः कृतस्तदहः सैव च रात्रिः अनध्याये । द्वितीयस्मिन्नहन्यध्येतव्यम् । आद्ये तु पक्षे द्वितीयमहरनध्यायो रात्रौ त्वध्ययनमुच्यते ॥ ९७ ॥

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ॥
वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत् ॥ ९८ ॥

अतोऽस्मादुत्सर्गकर्मणः कृतादूर्ध्वं परतः शुक्लपक्षेषु छन्दांसि मन्त्रब्राह्मणसमुदायात्मकान्वेदान्पठेत् । अङ्गानि च शिक्षायज्ञसूत्रव्याकरणादीनि कृष्णपक्षेषु संपठेत्॥ ९८॥

---

१ अ. २ श्लो. ७५ । २ क–रात्रिरियन्त । ३ क–यद्वा ।

४३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ॥
न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् ॥ ९९ ॥

यत्र वर्णस्वराभिव्यक्तिः स्फुटा न भवति **तदविस्पष्टम्** । तच्च द्रुतायां वृत्तौ प्रायेण भवति । **निशान्ते** पश्चिमरात्रिभागे । सुप्तोत्थितो यदाऽधीयीत पुनः श्राम्येत्तदा न शयीत । " न निशान्ते परिश्रान्तो ब्रह्माधीत्य शयीत तु " एवं युक्तः पाठः ॥९९॥

यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत् ॥
ब्रह्मच्छन्दस्कृतं चैव द्विजो युक्तो ह्यनापदि ॥ १०० ॥

छन्दांसि गायत्र्यादीन्यभिप्रेतानि तैः कृतं युक्तं ब्रह्मक्साम । अनेकार्थत्वात्करोतेरयमत्रार्थो व्याख्यायते । यथा गोमयान्कुर्विति संहारे पृष्ठं कुर्वित्युन्मर्दने एवमत्र युजेरर्थे वर्तते । ब्रह्म च छन्दश्च ब्रह्मच्छन्दसी ताभ्यां युक्तं **ब्रह्मछन्दस्कृतम्** । यजूंषि गायत्र्यादियुक्ताश्च मन्त्राः । एकस्मिन्नेवावस्थानके पठन्ति । न यथा बाह्वृच्ये छान्दोग्ये[1] च विभागेनैकस्मिन्ग्रन्थे अन्यत्र ब्राह्मणम् । एवंप्रकारभेदाद्वेदानामेवं[2] युक्तमिति पूर्वे व्याख्यातवन्तः । **यथोदितेन** पूर्वो विधिरनापद्युपसंह्रियते । आपदि अध्यापकस्यासंनिधानं बहुदेवताविभागमपेक्षमाणस्य[3] तत्रागुणवतः सह[4] विस्मृत्य स्यात् । तस्मान्नापद्ययं[5] विभागो नादरणीयः ॥ १०० ॥

इमान्नित्यमनध्यायानधीयानो[6] विवर्जयेत् ॥
अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकम् ॥ १०१ ॥

इमान्वक्ष्यमाणाननध्यानधीयानो विवर्जयेत् । अध्यापनं च कुर्वाणः । अध्यापनग्रहणमनधीयतो ग्रहणार्थमभ्यासार्थं च । **नित्यम्** नोत्सर्गादेव प्रभृति । किंतर्ह्यर्धपञ्चमेष्वपि मासेषूपाकर्मणः प्रभृति । **शिष्याणाम्** अनुवादः ॥१०१॥

कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने ॥
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥ १०२ ॥

अनिलो वायुः । वेगेन वाति वायौ वाय्वन्तरसंवर्षोद्ध्वनिः श्रूयते यत्र स कर्णश्रवो वायुः । कर्णाभ्या श्रूयते यः **स कर्णश्रवः** । साधनंकृतेति समासः । अवस्थाविशेषोपलक्षणार्थं कर्णग्रहणम् । श्रूयते कर्णाभ्यामेव । तेन यदैवं वायुशब्दः श्रूयते तदा नाध्येतव्यम् । पांसून्समूहति पांसून्समाहरति **पांसुसमूहनः** । पांसुर्धूलिः ।

---

१ र-ण-बाह्वृचछंदोग्येच । २ र-भेदोद्वेदनाम् । ३ र-विभागयं त्यपेक्षमाणस्य ४ ड-यदविस्मृत्य । ५ र-न त्ययं विभागो । ६ अ-क-ड-क्ष-इमांनित्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपलक्षणं चैतत् । तथाभूतस्य वायोर्वा यतस्ततश्च वृष्टे देवे यदि वायुरीदृशो वाति तावत्कालेऽनध्यायः । अध्यायज्ञा अध्यापनविधिज्ञाः ॥ १०२ ॥

विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे ॥
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥ १०३ ॥

विद्युत्ताडित् । **स्तनितं** गर्जितम् । द्वन्द्वनिर्देशाद्युगपदेतेषु समुच्चितेष्वनध्यायः । **महोल्का** दिवः पततां ज्योतिषां प्रभा उल्कास्तासां संप्लवः अत्रामुत्र च पतनम् । **आकालिक**शब्दो निमित्तकालादारभ्यान्येद्युर्यावत्स एव कालः स उच्यते । मनुग्रहणं श्लोकपूरणार्थम् । विकल्पार्थमन्ये ॥ १०३ ॥

एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु ॥
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥ १०४ ॥

नायमनध्यायो यस्यांकस्यांचन वेलायामुपजातेष्वेतेषु । किंतर्हि ? **प्रादुष्कृताग्निषु** सन्ध्याकाल इत्यर्थः । तदा ह्यग्नयो जुहूषया नियमतः प्रादुष्क्रियन्ते । प्रादुःशब्दः प्राकाश्ये । **अनृतौ** ऋतुर्वर्षास्ताभ्योऽन्यः शरदादिः । तत्र वाऽ**भ्रदर्शने** प्रादुष्कृताग्निष्वित्यपेक्ष्यते ॥ १०४ ॥

निर्घाते भूमिचलने ज्योतिषां चोपसर्जने ॥
एतानाकालिकान्विद्यादनध्यायानृतावपि ॥ १०५ ॥

निर्घात आन्तरिक्ष उत्पातध्वनिः । **ज्योतिषां** चन्द्रादित्यगुरुप्रभृतीनां **उपसर्जनं** परिवेषणमितरेतरपीडनं च । **ऋतावपि** । अपिग्रहणं वर्षासु किल नोत्पाता गण्यन्त इत्यभिप्रायेण ॥ १०५ ॥

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने ॥
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥ १०६ ॥

त्रिसंनिपाते पूर्वेणाकालिकमुक्तम् । अनेन द्वयोः सन्निपातेऽपि **सज्योति**रुच्यते । स्तनितं च तन्निःस्वनश्चासौ स्तनितनिःस्वनः । विद्युच्च स्तनितनिःस्वनश्च **विद्युत्स्तनितनिःस्वनम्** । समाहारद्वन्द्वः । तस्मिन्सन्ध्यायामुपजाते द्वये **सज्योति**रनध्यायः । सूर्योज्योतिः **दिवा** । नक्तमग्निर्ज्योतिः । प्रातःसन्ध्यायामुत्पन्ने दिवैवानध्यायो रात्रौ तु नास्ति । एवं पश्चिमसन्ध्यायां रात्रावनध्यायो न प्रातरध्ययनदोषः । विद्युत्स्तनितवर्षाणां त्रयाणां प्रकृतानां विद्युत्स्तनितयोर्विभज्य निर्देशो भवति । वर्षाः शेषस्तस्मिंस्तृतीये दृश्यमाने

१ र-ण—नृणानेष छन्दद्वयप्रयोगः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वोक्त आकालिकोऽनध्यायः । प्रसिद्धतरं ज्योतिष्टोमादि । तदपेक्षयोक्तं **यथा दिवा तथा रात्रावपि** । शेषमिति पाठः । शेषं हूयमानमहरनध्यायहेतुर्भवतीति । अथ कस्मान्नैवमुक्तं शेषं त्वाकालिकं स्मृतमिति । विचित्रा श्लोकानां कृतिर्मनोः ॥ १०६ ॥

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ॥
धर्मनैपुण्यकामानां पूतिगन्धे च सर्वशः ॥ १०७ ॥

निपुणं धर्मं ये कामयन्ते ते ग्रामनगरयोर्नाधीयीरन् । धर्मशब्दश्च स्वर्गादौ धर्मफले वर्तते । यदि वाऽधर्मेणाननुवेधो[1] धर्मस्य नैपुण्यं तेन सुपरिपूर्णो विध्यर्थोऽनुष्ठितो भवति । अतश्चाशक्तस्यानुज्ञानं भवति । **पूतिगन्धः** कुत्सितगन्धस्तस्मिन्नासिकापथं गच्छत्यनध्यायः । **सर्वशः** सर्वस्मिन् शवगन्धेऽपि ॥ १०७ ॥

अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ॥
अनध्यायो रुद्यमाने समवाये जनस्य च ॥ १०८ ॥

अन्तर्गतः शवो यस्मिन्ग्राममध्ये स्थितो यावन्न निर्हृतः । **वृषलस्य** नात्र शूद्रो वृषलस्तस्य प्रागेव निषिद्धत्वात् । न शूद्रजनसंनिधाविति । किंतर्हि तत्प्रायिकेणाधर्मेणाधार्मिकत्वं लक्ष्यते । तेन यः पापाचारस्तत्संनिधानाच्च तेन निषेधः । **रुद्यमाने** रुदनशब्दे सति । भावमात्रे रुद्यमानशब्दः । **समवायो** जनस्य । यत्र बहवो जनाः कार्यार्थमेकत्र संघटिता भवन्ति[2] तादृशे देशे नाध्येयम् । अथवा जनस्य समवाये रुद्यमाने रुदतीत्यर्थः । बहुषु रुदत्सु प्रतिषेधः । छान्दसं कर्तर्यात्मनेपदम् ॥ १०८ ॥

उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने ॥
उच्छिष्टः श्राद्धभुक्चैव मनसाऽपि न चिन्तयेत् ॥ १०९ ॥

चतुर्मुहूर्तोऽर्धरात्रः सैव महानिशा प्रथमादर्धरात्राद्द्वौ मुहूर्तावुत्तराद्द्वौ । **उदके** नदीतडागादिस्थः । अन्तर्जले जपस्त्वनध्यायरूपत्वादघमर्षणादिर्न निषिध्यते । **उदय** इत्यन्ये पठन्ति । प्रथमोदयकाले सूर्यस्यानध्यायः । **उच्छिष्टो** भुजिसंबन्धेनाकृताचमनो यावत् । कृतमूत्रपुरीषोऽपि प्रागाचमनादुच्छिष्ट उच्यत एव । आचमनार्हप्रत्ययमात्रवचन इत्यन्ये । तेन कृतनिष्ठीवनादिरपि गृह्यते । **मनसाऽपि** नान्यत्राध्याये मनसा चिन्तनमभ्यनुज्ञायते । किंतर्हि दोषगौरवार्थमेतेषां निमित्तानाम् ॥ १०९ ॥

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ॥
त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥ ११० ॥

---

१ र-ण–अधर्मेण नानुवेधो । २ ड–सम्भवन्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एक उद्दिश्यते यस्मिंस्तदेकोद्दिष्टं नवश्राद्धम् । तत्र निकेतनं निमन्त्रणं प्रतिगृह्य अङ्गीकृत्य त्र्यहमनध्याय आमन्त्रणात्प्रभृति । एवं राजा चन्द्रमास्तस्य सूतकं राहुं प्रत्यमृतस्रवणम् । चशब्दात्सूर्यस्य च । अथवा जनपदेश्वरस्य राज्ञः सूतकं पुत्रजन्मोत्सवः । राहोः सूतकं चन्द्रसूर्ययोरुपरागः । ग्रहणमिति प्रसिद्धम् ॥ ११० ॥

यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति ॥
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ॥ १११ ॥

एकमनुदिश्य आमश्राद्धं तस्य यावच्छ्राद्धकृतो गन्धलेपौ तिष्ठतस्तावदनध्यायः । पूर्वस्माद्विधौ विध्यन्तरम् । द्वितीयस्मिन्नहनि कृतस्नानोऽपनीततद्गन्धोऽध्ययनार्हः । उपलक्षणं चैतदसतोरपि गन्धलेपयोर्यावद्भुक्तमन्नं न जीर्णं तावन्नाधीयीत । **विदुष** इति तस्यैव श्राद्धभोजनाधिकारमनुवदति ॥ १११ ॥

शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ॥
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥ ११२ ॥

प्रसारितपादः पादारोपितपादो वा खट्वासनादौ वा संहतपादः । **अवसक्थिका** वस्त्रादिना जान्वोर्मध्यस्य च बन्धः । **आमिषं** मांसम् । सूतकग्रहणं शावाशौचादेरपि प्रदर्शनार्थम् ॥ ११२ ॥

नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ॥
अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥ ११३ ॥

नीहारो दिङ्मोहो धूमिकेत्यनर्थान्तरम् । बाष्परजोवृता इव येन दिशः क्रियन्ते । बाणशब्दः शरनिर्घोषः । दन्त्योष्ठ्यमन्ये पठन्ति व्याचक्षते च वीणावाण इति महाव्रते हि प्रयोगो दृश्यते । शततन्त्रीको भवति वीणावितन्त्रीति च । **चतुर्दश्यां** उभयोरपि पक्षयोः । **अष्टकाश्च** सर्वा अष्टम्यः । स्मृत्यन्तरसमाचाराभ्याम् । अन्ये त्वष्टमीष्वित्येवं पठन्ति ॥ ११३ ॥

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ॥
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥ ११४ ॥

पूर्वस्यार्थवादो नित्यार्थः । तेन यत्र नित्यत्वज्ञापकं न किंचित्स विकल्पतेऽनध्यायः । वक्ष्यति च "द्वावेव वर्जयेत् नित्यमिति"। **ताः परिवर्जयेत्** अध्ययनक्रियातः ॥ ११४॥

पांसुवर्षे दिशां दाहे गोमायुविरुते तथा ॥
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥ ११५ ॥

---

१ अग्रे १२७ श्लोकेः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोमायुः शृगालः तस्य **विरुतं** शब्दकरणं श्वखरोष्ट्राणां पङ्क्त्यवस्थितानां शब्दं कुर्वतामनध्यायः । एकैकस्य समानजातीयपङ्क्तौ ॥ ११५ ॥

नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ॥
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥ ११६ ॥

अन्तःशब्दः सामीप्यवचनः श्मशानसमीपे ग्रामसमीपे च । **गोव्रजे** गावो यत्र चरितुं व्रजन्ति । गोष्ठो वा गोव्रजः । स्त्रीसंप्रयोगकाले यत्प्रावृतं वासस्तदेव प्रावृत्य नाधीयीत । **मैथुन**शब्दः साहचर्यात्तत्कालप्रवृत्ते वाससि वर्तते । **श्राद्धिकं** श्राद्धनिर्मितं शुष्कान्नाद्यमपि गृहीत्वा नाधीयीत ॥ ११६ ॥

प्राणि वा यदि वाऽप्राणि यत्किंचिच्छ्राद्धिकं भवेत् ॥
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः ॥ ११७ ॥

श्राद्धनिमित्तं दीयमानं भक्तादि **श्राद्धिक**मिति प्रसिद्धं तन्निवृत्त्यर्थमिदमुच्यते । न केवलं व्रीहितण्डुलादिप्रतिग्रह एव श्राद्धेऽनध्यायहेतुः । यावदन्यदपि **प्राणि वा** गवादि तथा**ऽप्राणि** वासोयुगादि **तदप्यालभ्य** प्रतिग्रहकाले हस्तेन स्पृष्ट्वा नाधीयीत । यतस्तदेव तस्य भोजनम् । पाणिरेवास्यमस्येति **पाण्यास्यः** । श्राद्धे भोजनं तन्निमित्तं च द्रव्यग्रहणं तुल्यमिति दर्शयति ॥ ११७ ॥

चौरैरुपप्लुते ग्रामे सम्भ्रमे चाग्निकारिते ॥
आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ॥ ११८ ॥

उपप्लुत उपद्रुतः यत्र बहवश्चौरा ग्रामे घातार्थं पतन्ति तत्र नाध्येयम् । **संभ्रमे** यत्राग्निना संभ्रमो भयं जन्यते गेहदाहादिप्रवृत्तेनादग्धेऽपि गेहादा**वाकालिकोऽनध्यायः** । प्रवृत्तिकालादारभ्य यावदन्येद्युः स एव कालः । अन्येषु **चाद्भुतेषू**त्पातेषु दिव्यभौमान्तरिक्षेषु शिलाप्लवादिषु दिवा दर्शनादिषु ॥ ११८ ॥

उपाकर्माणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ॥
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥ ११९ ॥

उत्सर्गे पक्षिण्यहोरात्रं च पूर्वमुक्तम् । अनेन त्रिरात्रेण विकल्प्यते । **उपाकर्मण्य**पूर्वो विधिः । **अष्टका** ऊर्ध्वमाग्रहायण्यास्तमिस्रपक्षेऽष्टम्यस्तिस्रश्चतस्रो वा । यद्यपि सर्वास्वष्टमीष्वहोरात्रमुक्तं तथापि नित्यार्थोऽयमारम्भो युक्त एव । विकल्पश्च सर्वत्रास्मिन्प्रकरणे कृतार्थत्वापेक्षः । **ऋत्वन्तासु** अहोरात्रमित्यनुषज्यते । षडृतवः । तेषां यत्र पूर्वो निवर्तते अपरश्च प्रवर्तते तत्रानध्यायः । रात्रिग्रहणमुपलक्षणार्थम् ॥ ११९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् ॥
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥ १२० ॥

इरिणं बहिर्ग्रामं जलतृणवर्जितो देश ऊषरापर[1]पर्यायः । यानं गन्त्रीशकटशिबिकादि तेन गच्छतो निषेधः ॥ १२० ॥

न विवादे न कलहे न सेनायां न सङ्गरे ॥
न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके ॥ १२१ ॥

विवादः क्रोशपूर्वको व्याक्रोशः । **कलहो** दण्डादिनेतरेतरताडनम् । **सेना** हस्त्यश्वरथप[2]दातिः । **सङ्गरः** सङ्ग्रामः असङ्गरेऽपि सेनास्थस्य निषेधः । **भुक्तमात्रं** " यावदार्द्रपाणिरिति " स्मृत्यन्तरम् । **अजीर्णं** पूर्वेद्युर्भुक्तमपरेद्युरपरिणतमुच्यते । **वमनं** प्रसिद्धम् । **शुक्तके** उद्गारेऽसत्यप्यजीर्णे तदहरपरेद्युर्वा ॥ १२१ ॥

अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशम् ॥
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥ १२२ ॥

अतिथिग्रहणं शिष्टोपलक्षणार्थम् । अनित्यागमनः शिष्टश्चातिथिस्तस्मिन्गृह आगतेऽसावध्येतव्यमधीमह इति नानुज्ञातोऽधीयीत । तथा च **स्मृत्यन्तरं** "शिष्टे च गृहमागत" इति । **मारुते** वायौ **वाति** वेगेन ।

ननु ' कर्णश्रव ' इत्याद्युक्तमेव । सत्यम् । ततोऽधिकतरे ततो वर्षाभ्योऽन्यत्र वाति प्रतिषेधः । अथ वाति परिशुष्यति वातस्य शोषणार्थत्वात् । मारुतग्रहणं च वातमात्रोपलक्षणार्थम् । अध्ययनश्रमेण धातुषु क्षीयमाणेष्वप्यनध्यायः । मारुते वर्धमाने विधायिन्यध्येतरीति भिन्नसंबन्धे व्यधिकरणसप्तम्यौ । **रुधिरे** जलौकादिना परिस्रुतेऽथवा **शस्त्रेण च परिक्षते** शरीरे रुधिरे स्रुते । गात्रादिवाक्येनैकवाक्यता ॥ १२२ ॥

सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥
वेदस्याधीत्य वाऽप्यन्तमारण्यकमधीत्य च ॥ १२३ ॥

ऋचो यजूंषि सामध्वनौ श्रूयमाणे नाधीयीत । ऋग्वेदयजुर्वेदब्राह्मणयोरप्रतिषेधः । पञ्चविंशे च श्रूयमाणऋग्यजुषयोरप्ययं प्रतिषेधः । वेदस्यान्तो यत्र वेदः समाप्तिमुपैति मन्त्रान्तो ब्राह्मणान्तश्च । **आरण्यको** नाम वेदैकदेशस्तमधीत्यान्यो ग्रन्थो नाध्येतव्यः ॥ १२३ ॥

---

१ फ–ऊषरपर्यायः । २ फ–पादातम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः ॥
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥ १२४ ॥

सामगीतध्वनावृग्यजुषस्यानध्याय उक्तः । तत्रायमर्थवादः । देवा देवता अस्य **देवदैवत्यो** देवतास्तुतिपर इत्यर्थः । ऋचः प्रायेण स्तुतिप्रधानाः । अत उक्तं " देवदैवत्य " इति ।

मनुष्याणां कर्मप्रधानत्वाद्यजुर्वेदे च कर्मणां बाहुल्योपदेशादेतेन साम्येन यजुर्वेदो मानुष इत्युच्यते । मानुषशब्दो मनुष्यजातिवचनः । अभेदाध्यासा**द्यजुर्वेदो मानुष** इत्युक्तम् ।

पित्र्यः पितृभ्यो हितः । पितरो वा देवता अस्येति यथाकथंचित्पितृशब्दसंबन्धेन श्रूयते । त्रयो लोकास्तेषां त्रय एवाधिष्ठातारः । दिवो देवता भूमेर्मनुष्या अन्तरिक्षस्य पितर एवं त्रयो वेदाः । द्वयोर्देवमनुष्यसंबन्धोक्तत्वात्पारिशेष्यात्पित्र्यः सामवेदः । **तस्याशुचिर्ध्वनिः** । नात्र तदीयस्य ध्वनेरशुचित्वं परमार्थतो विज्ञेयम् । किंतर्हि यथाऽशुचिसंनिधाने नाध्येतव्यम् एवं तत्सन्निधान इति सामान्यमशुचित्वालम्बनम् । अयं चाध्ययनविधौ प्रकरणात्साम्नि गीयमानऋग्यजुषः (? षोः) प्रतिषेधो न यज्ञप्रयोगे ॥ १२४ ॥

एतद्विदन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम् ॥
क्रमतः पूर्वमभ्यस्य पश्चाद्वेदमधीयते ॥ १२५ ॥

एतत्त्रिलोक्याधिष्ठातृसंबन्धित्वं ' ऋग्वेदो देवदैवत्य ' इत्यादि **विदन्तो विद्वांसः** प्राज्ञास्त्रय्या निष्कर्षं सारभूतं पूर्वमभ्यस्य प्रणवव्याहृतिसावित्र्याख्यमुक्तेन क्रमेण **पश्चाद्वेदमधीयते** पठन्ति । तेन त्रयो लोकास्तिस्रो देवता एतत्त्रिकाध्ययनेन परिगृहीता भवन्ति । उक्तोऽप्ययमर्थो द्वितीयेऽध्याये पुनरुच्यते । यथाऽनध्यायेषु पठ्यते तथा **त्रयी** निष्कर्षे प्रागनधीते ॥ १२५ ॥

पशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः ॥
अन्तरागमने विद्यादनध्यायमहर्निशम् ॥ १२६ ॥

अन्तरागमनेऽध्याप्याध्यापकयोर्मध्येनाधीयानानां वा । **अहर्निश**महोरात्रम् । **गौतमे** तु " त्र्यहमुपवासो विप्रवासश्चोक्तः " । श्मशानाध्ययने च एतदेव । अत्र विकल्पो विज्ञेयः ॥ १२६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः ॥
स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥ १२७ ॥

नित्यग्रहणात्पूर्वत्रानध्यायानां विकल्पः । तत्रापि येषां नित्यत्वमात्रं तत्प्रदर्शितमेव । यत्र नित्यग्रहणमर्थवादो वा यथा "अमावास्या गुरुं हन्तीति" । **भूमेश्चाशुद्धि**रस्थिभगलिङ्गादिकामेध्यादिसंसर्गः । **आत्मनस्तु** पञ्चमे वक्ष्यते । यद्यप्यध्ययनविधिप्रकरण एतावनध्यायौ तथापि नैत्यके भवतः । न ह्यशुचिरधिक्रियते तथा च ब्राह्मणं "तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽऽशुचिर्यद्देश" इति । ब्रह्मयज्ञश्च नित्यो जपः ॥ १२७ ॥

अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ॥
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥ १२८ ॥

ब्रह्मचारी भवेद्ब्रह्मचारिधर्मो मैथुननिवृत्तिरतिदिश्यते न पुनर्भिक्षाचरणादिः । अप्यृताविति संबन्धात्तदेव प्रथमं हृदयमागच्छति । अन्ये तु मधुमांसनिवृत्तिमपीच्छन्त्येतेष्वहःसु । तत्र स्मृत्यन्तरमुदाहार्यम्

"षष्ठ्यष्टमीममावास्यामुभयत्र चतुर्दशीम् । वर्जयेत्पौर्णमासीं च तैले मांसे भगे क्षुरे ॥"

अन्ये त्वाहुर्ब्रह्मचारीति विशिष्टाश्रमिणो नामधेयमेतत् । अत आश्रमान्तरवर्तिनि गृहस्थादौ प्रयुज्यमाने वेदग्रहणार्थधर्मलक्षणयाऽतिदेशार्थो भवति । ब्रह्मचारी भवेत् परशब्दो हि परत्र प्रयुज्यमानो वत्यर्थं गमयति । सर्वेषु ब्रह्मचारिधर्मेषु प्राप्तेष्वग्नीन्धनभैक्ष्यचरणादयः । 'आ समावर्तनात्कुर्यादिति'वचनात् । 'गृहस्थः शेषभुगिति' च प्रत्यक्षे विनिवर्तन्ते । केवलं मधुमांसमैथुनप्रतिषेधमात्रमतिदिश्यत इति । प्रसिद्धस्तु ब्रह्मचारिशब्दो मैथुननिवृत्तावेवेति यत्किंचिदेतत् ॥ १२८ ॥

न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ॥
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥ १२९ ॥

नित्यस्य स्नानस्य भुक्तवतः प्राप्त्यभावान्नायं प्रतिषेधः । **स्मृत्यन्तरे** हि "स्नानं महायज्ञाः शेषभोजनम्"इत्यर्थक्रमः श्रुतः । न चण्डालस्पर्शनादिनिमित्तकस्यापि "नाशुचि क्षणमपि तिष्ठेदिति"विरोधात् । अत इच्छालक्षणस्य धर्मायापनोदहेतोरयं प्रतिषेधः । **आतुरो** व्याधिगृहीतः तस्य सर्वप्रकारस्नानप्रतिषेधोऽशुचित्वेऽपि "सर्वत एवात्मानं गोपायेदिति" । का तर्हि तस्य शुद्धिर्मार्जनं मन्त्रवत्प्रोक्षणं वस्त्रत्याग एवमादि कर्तव्यम् । महानिशा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुन्युक्त उभयतोऽर्धरात्रिकः । ये तु महती निशा यस्मिन्काले हेमन्तादाविति व्याचक्षते तेषां माघफाल्गुनयोः प्रातःस्नानविधिविरोधादपव्याख्यानम् । नापि हैमन्तिकीषु रात्रिषु निषेध इति प्रमाणमस्ति द्वितीयस्य निशाशब्दस्याभावात् । वासोभिरतिसामर्थ्यलक्षणे शीतादौ वाससां बहुत्वे सति प्रतिषेधः । एकेन विहितमेव " न नग्नः स्नायादिति " । द्वाभ्यामनियमो बहूनां प्रतिषेधः । जलाशयो जलाधारोऽविज्ञातः गाधागाधतया ग्राहादिभयेन च अजस्रं सर्वदेत्यर्थः ॥ १२९ ॥

देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा ॥
नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ॥ १३० ॥

प्रतिकृतयोऽत्र **देवतास्तासां** छायासंभवात् । **गुरुः** पिता । **आचार्य** उपनेता । भेदोपादानमातिदेशिकगौरवानिवृत्त्यर्थम् । तेन मातुलादिषु नायं विधिरिति । केचित्समाचारविरोधान्नैतद्युक्तम् गोबलीवर्दवद्भेदो विज्ञेय इति वदन्ति । **बभ्रुः** कपिलो वर्णः । तद्गुणयुक्तं द्रव्यं बभ्र्वत्र गौः कपिला सोमलता वा । उभयोर्बभ्रुशब्देन वेदे प्रयोगदर्शनात् । **कामत** इत्यबुद्धिपूर्वमदोषः ॥ १३० ॥

मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ॥
सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ॥ १३१ ॥

मध्याह्नेऽर्धरात्रे महानिशायां समांसं च श्राद्धं भुक्त्वा **न सेवेत** चिरं न तत्रासीत । यदि कथंचिद्ग्रामादि गच्छतो नान्तरेण चतुष्पथं मार्गान्तरमस्ति तदा तावन्मात्रसंबन्धो न निषिध्यते । केचित्तु चकारमेवं योजयन्ति । श्राद्धं भुक्त्वा सामिषं चान्यदपि भोजनम् । अस्मिंश्च संबन्धे समाचारोऽन्वेष्यः । नान्यथा व्यवहितः संबन्धो लभ्यते ॥ १३१ ॥

उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च ॥
श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः ॥ १३२ ॥

उद्वर्तनमभ्यङ्गमलापकर्षणं पिष्टादि । **अपस्नान**मुपयुक्तमुदकम् । **निष्ठ्यूत**मश्लेष्मरूपमपि भुक्त्वा त्यक्तं ताम्बूलवीटिकादि । अधिष्ठानं तदुपरिस्थानम् । **कामतः** । अज्ञानपूर्वमदोषः ॥ १३२ ॥

वैरिणं नोपसेवेत सहायं चैव वैरिणः ॥
अधार्मिकं तस्करं च परस्यैव च योषितम् ॥ १३३ ॥

---

१ **रण**-महानिशा चतुर्भुक्तः । २ **र**-+एकेन विहितमेव । **रण**-मध्यान्हे ।

For Private And Personal Use Only

वैरी शत्रुस्तस्य सदैव उपायनप्रेषणान्येकत्र स्थानासने गृहमानादिकथाप्रवृत्तिरित्येवमादि न कार्यम् । **अधार्मिकः** पातकी यश्च कुसृत्या वर्तते । **तस्करश्चौरः** । अस्मादेव च भेदोपादानादधार्मिको न सर्वः किंतर्हि यथा व्याख्यातम् । **परस्य योषितम्** । योषिद्ग्रहणान्न पत्न्येव किंतर्ह्यवरुद्धाऽपि । वैरकरणत्वादुभयोर्दृष्टदोषनिमित्तैश्च प्रतिषेधः साहचर्यात् । उत्तरत्र च दारग्रहणमदृष्टदोषातिशयदर्शनार्थम् । पुनरेवं वक्तव्यं योषितामिति सामान्यनिर्देशे दारशब्दार्थवादाद्विशेषावगतिः । नायमस्यार्थवादो भिन्नमेवैतद्वाक्यम् ॥ १३३ ॥

न हीदृशमनायुष्यं लोके किंचन विद्यते ॥
यादृशं पुरुषस्येह परदारोपसेवनम् ॥ १३४ ॥

अजीर्णकारभोजनादि सुवर्णापहरणादि चेद्**दृशमनायुष्य**मायुष्यक्षयकरं **यादृशं** परदारगमनम् । अदृष्टेन दृष्टेन च दोषः ॥ १३३ ॥

क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ॥
नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥ १३५ ॥

अवमान अनादरो गौरवाभावास्तिरस्कारश्च । **कृशानपि** तदात्वे प्रीतिं कर्तुमसमर्थानपि ॥ १३५ ॥

एतत्त्रयं हि पुरुषं निर्दहे[1]दवमानितम् ॥
तस्मादेतत्त्रयं नित्यं नावमन्येत बुद्धिमान् ॥ १३६ ॥

अवमन्तारं पुरुषम् । **त्रयमवमानितम्** । क्षत्रियः सर्पोऽदृष्टचा शक्त्या ब्राह्मणो जपहोमैरदृष्टेन च दोषेण **तस्मादेतत्त्रयं नित्य**मित्युपसंहारः । विधाय दोषदर्शनं पुनरुपसंहारो यत्नेन परिहारार्थः । यत्नातिशयाच्च प्रायश्चित्ते गौरवमप्यनुमीयते ॥ १३६ ॥

नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः ।
आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥ १३७ ॥

असमृद्धिर्धनाद्यसंपत्तिः कृष्यादिना धनार्जनावसरे । तत्र **नात्माऽवमन्तव्यो** दुर्भगोऽहमकृतपुण्यो नास्मिन्नवसरे धनं मया लब्धं कुतोऽन्यदा प्राप्स्यामीति नावसादो भावनीयः । **आ मृत्योः श्रियमन्विच्छेत्** आन्त्यादुच्छ्वासाद्धनार्जनकामो न त्यक्तव्यः । **न चैनां श्रियं दुर्लभां मन्येत** । अवश्यं मम संपद्यते मद्व्यवसाय इति गृहदौःस्थित्याद्यपरिगणय्य तदर्जने प्रवर्तितव्यम् । अस्ति कस्यचित्सुभाषितम्

---

१ **र-ण**-निर्दहति ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" हीनाः पुरुषकारेण गणयन्ति गृहस्थितिम् । सत्त्वोद्यमसमर्थानां नासाध्यं व्यवसायिनाम् ॥"

अनेन चैतद्दर्शयति । नाहं दुर्गतः क्लेशप्राप्यधन आधानादौ नाधिक्रिये ततोऽग्निहोत्रहोमक्लेशादुत्तीर्णोऽस्मीति यस्य बुद्धिः स न सम्यग्जानीत इति । अतस्तदर्थं प्रयतेत ॥ १३७ ॥

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥ १३८ ॥

अर्थप्रयुक्तवचनं सत्ये नियम्यते । यथादृष्टं श्रुतं च **सत्यं प्रियं ब्रूयात् ।** द्वितीयोऽयं विधिः । औदार्यादिगुणानुकथनं परस्यादृष्टेनापि केनचिदवसरेण । तथा पुत्रजन्मादि 'ब्राह्मण पुत्रस्ते जात' इत्यसत्यपि स्वप्रयोजने यदि सत्यं तद्वक्तव्यम् । यदि तस्य तत्र विदितं सत्यं प्रियमप्रियं वाऽस्ति । प्रियं दर्शितं ब्राह्मण पुत्र इत्यादि । अप्रियं यथा 'ब्राह्मण कन्या ते गर्भिणी' तदसत्यं न ब्रूयात्सत्यमपि कन्यागर्भग्रहणमप्रियत्वादप्रकाश्यम् । सत्यां गतौ तूष्णीमासितव्यम् । ननु गर्भिण्या गर्भिणीति वक्तव्यं प्रियत्वादत आह । **प्रियं च नानृतं ब्रूयादिति** । एवं च यस्य प्रथमः साक्षात्कारस्तेन तत्र तूष्णीमासितुं न लभ्यते । **एष सनातनो धर्मः** । सनातनो नित्यो वेदस्तेन विहितत्वाद्धर्मोऽपि सनातनः ॥ १३८ ॥

भद्रंभद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ॥
शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ॥ १३९ ॥

अत्र प्रथमस्य भद्रशब्दस्य नञ्लोपं व्याचक्षते । यदभद्रं तद्भद्रमिति ब्रूयात् । इतिकरणः प्रदर्शनार्थः । कल्याणं मङ्गलं सिद्धं श्रेय इत्यादयः सिद्धाः शब्दाः प्रयोक्तव्याः । पूर्वपदस्यापि प्रदर्शनार्थत्वेऽन्धे चक्षुष्मान्मूर्खे प्राज्ञ इत्यादिवचनं लभ्यते । अथवा भद्रमित्येष एव शब्द एवमादिषु वक्तव्यः । शुष्कवैरं असत्यर्थादिप्रयोजन आहोपुरुषिकं वाक्यं न कर्तव्यम् । एवं राजाधिकरणे **विवादं** शुष्कमेवेत्यादि संपद्यते । **केनचिद्**समर्थेनापि ॥ १३९ ॥

नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते ॥
नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ॥ १४० ॥

अतिकल्यशब्दश्चाहर्मुखे वर्तते । उषःकाले न गन्तव्यम् । **अतिसायं** पश्चिमसन्ध्यासमयेऽज्ञातेन पुरुषेण **सह न गच्छेत्** । असहायश्च **वृषलैः** शूद्रैश्च **सह** ॥ १४० ॥

---

१ र-प्रयुक्ता । २ क्ष-तदसत्यं प्रियमप्रियं वाऽस्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हीनाङ्गानतिरिक्तांगान्विद्याहीनान्वयोतिगान् ॥
रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत् ॥ १४१ ॥

हीनाङ्गाः काणकुष्ठिकुब्जादयः । **अतिरिक्तम**धिकं अंगे येषां श्लीपद्यादयाः । **विद्याहीना** मूर्खाः । **वयोतिगा** अत्यन्तवृद्धाः । **रूपहीना** दुःसंस्थानाश्चिपिटकेकरादयः । **द्रविणहीनाः** दरिद्राः द्रविणं धनं तेन हीना वर्जिताः । **जात्या हीना** निकृष्टजातयः कुण्डगोळकाद्यास्ता**न्नाक्षिपेत्** । आक्षेपः कुत्सा । एतेषां एतैः शब्दैराह्वानमेव कुत्सा ॥ १४१ ॥

न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलान् ॥
न चापि पश्येदशुचिः स्वस्थो ज्योतिर्गणान्दिवि ॥ १४२ ॥

उच्छिष्टो भुक्तवाननाचान्तः कृतमूत्रपुरीषश्च अशुचिमात्रमिहोच्छिष्टशब्देनोच्यते । तथा चोच्छिष्टस्य गवादिस्पर्शः प्रतिषिध्यतेऽशुचिशब्देन । प्रायश्चित्तं वक्ष्यति । **पाणि**ग्रहणमतन्त्रम् । अन्येनाप्यङ्गेन स्पर्शो नेष्यते । वस्त्राद्यन्तरिते न निषेधः ॥ **दिवि ज्योतिर्गणं** न पश्येत् । **स्वस्थो**ऽनातुरः । दिवीतिवचनाद्भूमौ ज्योतिषोऽग्रे चाप्रतिषेधः ॥ १४२ ॥

स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् ॥
गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु ॥ १४३

अविशेषवचनेऽपि प्राणाश्चक्षुरादय एव मूर्धन्या उच्यन्ते । प्राणशब्दश्चक्षुरादिवचनो वेदे प्राणसंभव उपनिषदि दृश्यते । **गात्राणि** अंसजानुपादादीनि । **पाणितलेना**पो गृहीत्वा स्पृशेत् ॥ १४३ ॥

अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः ॥
रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ॥ १४४ ॥

अनिमित्ततः कण्डूयनादिनिमित्तं विना **स्वानि खानि** चक्षुरादीनि छिद्राणि न स्पृशेत् । **रहस्यानि** कक्षोपस्थगतानि **विवर्जयेत्**प्रकृतेन स्पर्शेन । श्लोकपूरणार्थमाख्यातान्तरोपादानम् । अन्ये त्वाहुः आख्यातान्तरनिर्देशाद्दर्शनं प्रतिषिध्यते ॥ १४४ ॥

मङ्गलाचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः ॥
जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः ॥ १४५ ॥

---

१ फ–वयोधिकान् । २ फ–द्रव्यहीनांश्च । ३–फ सुस्थो । ४ ण–निषेधः । ५ अ–क–ड–क्ष–फ–संभवोपनिषदि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिलषितायुर्धनादिसिद्धिर्**मङ्गलम्** । तदर्थमाचारो **मङ्गलाचारो** गोरोचनातिलकशुभफलादिस्पर्शस्तेन युक्तो नित्यं तत्सेवापरः स्यात् ।

ननु चाचारस्य प्रामाण्यमुक्तमेव । सत्यम् । अदृष्टस्यार्थस्यानेनोच्यते । दृष्टबुद्ध्या हि क्रियमाणस्य व्यभिचारदर्शनेन कश्चिदनादरपरः स्यात् । तदर्थं पुनरुच्यते । यथा प्रस्थानकाले संनिहिते पुनः कथनं दध्यादौ वन्दनं शुक्लनिवसनदर्शनं दक्षिणतः कपिञ्जलवासितं फलिते वृक्षे दक्षिणत एव वायसस्य । एवमादि मङ्गलार्थमादरणीयं विपरीतं विपरीतं वर्जनीयम् । **जितेन्द्रियो** विषयेष्वलालसः । पुरुषार्थतयैतदसकृदुक्तमपि विनिपातनिवृत्त्यर्थमुच्यते । अग्नेरन्यत्रापि होमसंभवाज्**जुहुयादग्निमि**त्याह । **अतन्द्रित** इत्युक्तानुवादः ॥ १४५ ॥

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ॥
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥ १४६ ॥

विनिपातः प्राकृताशुभनिमित्तको दैवोपद्रवो व्याधिर्धननाश इष्टवियोगादिः । स एवमाचाराणा माङ्गल्यकान्निवर्तते । अनेनापि नित्यतैवोक्ता भवति सत्यपि फलार्थत्वे । न हि कश्चिद्दैवोपद्रवानिवृत्तिमर्थयते । अतो नित्यग्रहणमनुवादः । अथापि कश्चिदनर्थी स्यात्तथापि नित्य एवायं विधिः । एवं चोभयार्थता तस्य नित्याधिकारवृत्तिर्विनिपातनिवृत्तिश्च ॥ १४६ ॥

वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः ॥
तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ॥ १४७ ॥

जपेच्च जुहुयाच्चैवेत्युक्तम् । तत्र तावज्जपस्य साधनमाह **वेदमेव** जपेदिति । अवशिष्टोऽर्थवादः । **यथाकालं** यस्मिन्यस्मिन्काले वीप्सायामव्ययीभावः । यदैव ह्यैहिकी चेष्टा नातिपद्यते तदैव जपेत् । अन्यान्यग्निहोत्रादिकर्माणि नियतकालानि । जपस्य तु शुचित्वमेव कालः । अयं मुख्यो धर्मः । **उपधर्मो** धर्मस्य समीपे उपधर्मः । समीपप्रधानस्तत्पुरुषो नाव्ययीभावः । " उपमानानि सामान्यवचनैरिति " (व्या. सू. २।१।५५) यथा । धर्मान्तरनिन्दा वेदजपस्तुत्यर्था न तन्निषेधार्था ॥ १४७ ॥

वेदाभ्यासेन सततं शौचेन तपसैव च ॥
अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् ॥ १४८ ॥

---

१ र–दृष्टबुद्ध्ये । २ अ–ब–क–ड–क्ष–दैवोपद्रवनिवृत्तिम् ।

For Private And Personal Use Only

अद्रोहोऽहिंसा । **भूतानि** स्थावरजङ्गमानि । जातिस्मरफलान्येतानि कर्माणि चत्वारि यावज्जीवमनुष्ठीयमानानि भवन्ति । **जातिर्जन्मान्तरम्** । पूर्वभवा **पौर्विकी** ॥ १४८॥

पौर्विकीं संस्मरन् जातिं ब्रह्मैवाभ्यस्यते द्विजः ॥
ब्रह्माभ्यासेन चाजस्रमानन्त्यं सुखमश्नुते ॥ १४९ ॥

ननु चेष्टफलकामः सर्वं समीहते । जन्मान्तरानुस्मरणमेकतरसुखं येन फलत्वेन वेदाभ्यासादिचतुष्टयस्य वर्ण्यते । तत आह **पौर्विकीं जातिं स्मरन् ब्रह्म** वेद **अभ्यस्यते** तत्र श्रद्धावान् भवति । ईदृशो ब्रह्माभ्यासो येन जन्मान्तरं स्मर्यते इति । स्मरन्पुनस्तदभ्यासे वर्तते । तस्माच्चानेकजन्माभ्यस्तादनन्तरं ब्रह्मप्राप्तिलक्षणं सुखम् । **अजस्रमपुनरावृत्ति अश्नुते** प्राप्नोति । अनन्तशब्देन सुखविशेष उपलक्ष्यते । असाधना परितृप्तिरात्मनः तस्याजस्रपदेन शाश्वतं प्रतिपाद्यते । तादृशं सुखं प्राप्यते न चैतत्क्षीयते ।

समानार्थावप्यपुनरुक्तौ यथा वृत्तकं वहतः पुरीषमिति । वृत्तकमुदकं पुरीषं च । तत्रैको रूढोऽपरः क्रियाशब्दः । पुरीषं पूरणसमर्थं वृत्तकमुदकम् ॥ १४९ ॥

सावित्रान् शान्तिहोमांश्च कुर्यात्पर्वसु नित्यशः ॥
पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु च ॥ १५० ॥

पूर्वोक्तानां होमानां स्वरूपमुच्यते । **सावित्राः** सवितृदेवताकाः । **पर्वसु** च पौर्णमास्यमावास्ययोः कर्तव्याः शान्त्यर्था होमा अनिष्टनिवृत्तिप्रयोजनाः । द्रव्यं चात्राज्यमेवानुपात्तद्रव्यविशेषेषु सर्वहोमेषु श्रूयते "सर्वस्मै वा एतद्यज्ञाय गृह्यते यत् ध्रुवायामाज्यमिति"। पर्वस्विति च सप्तमी द्वितीयार्थे द्रष्टव्या । अधिकरणमग्निर्होमस्य न कर्म कचित् । होतव्यानि पठ्यन्ते लाजाज्यमांससक्तुदधिपयोधानाः पिष्टमित्यादि । एते च होमा अपूर्वाः । यावती च समाचारादितिकर्तव्यता सा प्राग्दर्शिता । **अष्टका** ऊर्ध्वमाग्रहायण्यास्तामिस्रपक्षाणां तिस्रोऽष्टम्यः केषांचित् " हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामिति " वचनम् । तत्र **पितॄनर्चयेच्छ्राद्धेन** । पितृशब्दः पूर्वप्रमीतपित्रादिवचनः । **अन्वष्टकास्ता** एव नवम्यः ॥ १५० ॥

दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ॥
उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत् ॥ १५१ ॥

पादाववसिच्येते येनोदकादिना तत्**पादावसेचनं** तद्दूरात्क्षिपेत् । अथवा पादप्रक्षालनमेव दूरात्कुर्यात् । **निषेकः** परिषेकः । तैलादिकृतस्नानोदकमपि शक्यते निषेक-

---

१ फ–अभ्यसते पुनः । २ फ–अनन्तं । ३ र–फलत्वे । ४ फ-अभ्यासान् । ५ उकरण–उपलभ्यते ६ र–पर आत्ममनः प–परि आत्मनः । ७ फ–अथ । ८ रण–शब्दबहुवधूकं पुरीपमुदकम् । ९ फ–शान्त्यर्थेहोमा । १० क–ड–क्ष- सर्वस्मैवा एतद्यज्ञायाज्यमिति, रण–...एतद्यदाज्यमिति,

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शब्देनाभिधातुम् । उपयुक्तशेषस्य त्याज्यस्यायं दूरतो निक्षेप उच्यते । तद्धि **निषेक**-शब्देन प्रसिद्धतरम् ॥ १५१ ॥

मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ॥
पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम् ॥ १५२ ॥

अर्थवादेषु पर्यङ्कसंस्तवे **मैत्रः** पायुरिति श्रूयते । तदिहाप्यभेदोपचारान्मित्रः पायुस्तत्र भवं शौचं मैत्रम् । **प्रसाधनं** केशरचनामुपलेपनादि । अथवा विशेषणविशेष्ये पदे मैत्रं प्रसाधनम् । अकृतशक्तताऽपि प्रातः पायुप्रक्षालनं कर्तव्यम् । यथा हि सुप्तस्य लालास्रावादेरवश्यं भावित्वान्मुखधावनं विहितम् । एवमेतदपि विनैव वा निमित्तेन मुखस्य जघन्ययोरङ्गयोः प्रक्षालनमवश्यं कर्तव्यम् । अन्ये त्वाहुर्मित्रकार्यं मैत्रं तत्सर्वकार्येभ्योऽन्तरङ्गेभ्योऽपि पूर्वं कर्तव्यम् । तत्राप्यशुचेः क्षणमप्यवस्थाभावात्स्वकार्यापेक्षया पूर्वत्वं द्रष्टव्यम् । तदा च पूर्वाह्णशब्दः कार्यान्तरेभ्यः पूर्वतामात्रोपलक्षणार्थो न पुनरपराह्णप्रतिषेधार्थः । अथवा मित्र आदित्यस्तदुपस्थानं मैत्रम् ॥ १५२ ॥

दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ॥
ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥ १५३ ॥

अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकम् ॥
कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात् ॥ १५४ ॥

श्रुतिस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्मसु ॥
धर्ममूलं निषेवेत सदाचारमतन्द्रितः ॥ १५५ ॥

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥ १५६ ॥

न चायमेप विद्वत्तादिगुणसंपन्नैः साध्यते । प्रजाया ह्येते गुणाः प्रार्थ्यन्ते । तदुक्तम्

"तया गवा किं क्रियते या न धेनुर्न गर्भिणी। कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः॥"

अक्षय्यमपि प्रभूतं यदसद्व्यसनैरन्यलक्षणं स्कन्धोपरि तिलकादि दारिद्र्यादिदौर्भाग्यसूचकं तदप्याचारो हन्ति । तेन ह्यधर्म आचारपरत्वेन नश्यति ॥ १५६ ॥

दुराचारो हि पुरुषो लोके भवति निन्दितः ॥
दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥ १५७ ॥

---

१ क–पश्चिमाङ्गसंस्तवे । २ र–ण–संपन्ना साध्यते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ॥
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥ १५८ ॥
यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ॥
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ॥ १५९ ॥

यत्परप्रार्थनया स्वपरहितादि क्रियते **तत्परवशं** वर्ज्यते न तु यद्वृत्तिसाध्यमार्त्विज्यादि तद्धि स्ववशमेव । तद्विषयकमेव भृत्यादि स्वीक्रियते । यत्त्वात्मनो वश्यं स्वल्पया धनमात्रया परोपकारः स्वल्पोऽपि स्वयं तत्कर्म कुर्यात् । न चानेन परवशमपि दीक्षितस्य निषिध्यते । स्मृत्या श्रुतिं बाधितुमन्याय्यत्वात् । उक्ते च विषये सावकाशत्वात्स्मृतेः । नित्यकर्मासंपत्तौ कुटुम्बोपयोगिनि धनेऽसति कर्तव्यैव याञ्चोपायान्तराभावे । किंतु विशेषतो यक्ष्ये विशेषतो दास्य इति सत्यां कस्यांचिद्धनमात्रायां संतोषपरेण भवितव्यमित्येवमस्य तात्पर्यम् ॥ १५९ ॥

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ॥
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥ १६० ॥

याच्ञां निन्दति । **यत्परवशं तत्सर्वं दुःखम्** । तिष्ठतु तावत्परस्य गृहद्वार्युपस्थानमनुवृत्तिरत्र चामुत्र च भ्रमणम् । यत्तु
“ संकल्प एव याच्ञायां हृदयं न प्रसह्यते । नूनं मायामसंदिग्धां सृष्टिर्नासौ स्वयंभुवः ” ॥
समासेन संक्षेपेणैतद्दुःखस्य लक्षणं या याच्ञा । सुखं चैतद्याऽस्पृहा ॥ १६० ॥

यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः ॥
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥ १६१ ॥

आत्मतुष्टेः प्रागुक्तायाः पुनर्वचनं स्मरणार्थम् । विषयश्च तस्या दर्शन एव । यत्र कर्मणि क्रियमाणे किंकथिका न भवति तत्कर्तव्यम् । यत्र तु हृदयं न तुष्यति तद्वर्जनीयम् ॥ १६१ ॥

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् ॥
न हिंस्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः ॥ १६२ ॥

आचार्य उपनेता । **प्रवक्ता** अध्यापको व्याख्याता । **गुरु**स्ताभ्यामन्यः पितृव्यमातुलादिः । **सर्वांश्चैव तपस्विनः** । प्रायश्चित्तप्रवृत्तान्पातकिनोऽपीति **सर्व**ग्रहणम् । अविशेषेण सर्वभूतानां तत्र तत्र हिंसा निषिद्धा । **पुन**र्वचनमाचार्यादीनामाततायिनामपि

---

१ फ-तद्विषयकमेव भृत्यादिः । २ फ-तं स्वयमेव कुर्यात् । ३ फ-योगिनि धने । ४ ख-मायां संदिग्धांस्ते । ५ फ-अपि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निषेधार्थमिति केचित् । यस्तु " गुरुं वा बालवृद्धौ वा" इत्यादिरर्थवादोऽस्यैव प्रतिप्रसवः । उपाध्यायस्त्वाह नायं प्रतिषेधः पर्युदासोऽयं संकल्पविधानार्थो "नोद्यन्तमादित्यमीक्षेत" इतिवत् । अतः प्रयैत्नेनातिक्रान्तं भवति संकल्पप्रतिषेधश्चेति । अथवा दुरुक्तभाषणं हिंसा " वाग्भिस्तैस्तैर्जघान ताम् " इति प्रयोगदर्शनात् । अथवा प्रतिकूलाचरणे हन्तिः प्रयुक्तः ॥ १६२ ॥

नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ॥
द्वेषं स्तंभं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ॥ १६३ ॥

वेदप्रमाणकानामर्थानां मिथ्यात्वाध्यवसाये[2] नास्तिक्यम् । शब्देन प्रतिपादनं निन्दा । पुनरुक्तौ वेदोऽन्योऽन्यव्याहतो नात्र सत्यमस्तीति भावदोषेण न पूर्वपक्षभङ्ग्या । अग्न्यादयो देवतास्तासां कुत्सनं निन्दैव यथा दग्धदैवेन हताः स्म इति दैवे भवन्ति वक्तारः । द्वेषो मात्सर्यादिहेतुकाऽप्रीतिः । स्तम्भोऽहंकारादनम्रता । मानोऽहंकार आत्माभिमानः पण्डितोऽहमाढ्योऽहमिति । अमर्षः क्रोधस्तैक्ष्ण्यं पारुष्यं द्वेषपूर्वकः क्रोधः ॥ १६३ ॥

परस्य दण्डं नोद्यच्छेत्क्रुद्धो नैनं निपातयेत् ॥
अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ ॥ १६४ ॥

येन दम्यते स दण्डः करलगुडशिफारज्जुविदलादि । तं परस्य क्रुद्धः सन्नोद्यच्छेन्नोत्क्षिपेत् । प्रहारार्थं तिर्यगपि न निपातयेत् । निपातनं वेगेन तदङ्गसंयोगः । पुत्रशिष्यावनुताडयेच्छिफावेणुदलचपेटाभिर्यथाऽष्टमे वक्ष्यति न दण्डेन तौ च न क्रोधेन तर्हि शिष्ट्यर्थमनुशासनार्थं बाल्याद्यदि चापलमाचरतः । तथा " पृष्ठतस्तु शरीरस्य " इतीषताड्यौ । शिष्यग्रहणं दासीदासस्यापि प्रदर्शनार्थम् । समानकार्यत्वात् ॥ १६४ ॥

ब्राह्मणायावगुर्यैव द्विजातिर्वधकाम्यया ॥
शतं वर्षाणि तामिस्रे नरके परिवर्तते ॥ १६५ ॥

अविशेषेण सर्वविषये ताडने निषिद्धे ब्राह्मणे तत् क्रियाया दोषातिशयदर्शनार्थं पञ्चश्लोकी । अवगूर्य उद्यम्यैव दण्डादि वधकाम्यया ताडनेच्छया । विनैव निपातेन । शतं वर्षाणि नरके पच्यते परिवर्तते तत्फलमुपभुङ्क्ते ॥ १६५ ॥

ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् ॥
एकविंशतिमाजातीः पापयोनिषु जायते ॥ १६६ ॥

---

१ ण-द-स्वयं तेनातिक्रान्तं भवति । २ फ-अवसायस्य ।

For Private And Personal Use Only

संरंभः क्रोधावेशो न तु नर्मणा बुद्धिपूर्वम् । **एकविंशतिमाजातीः** जातिर्जन्म । आकारोऽनर्थकः प्रलम्बत इतिवत् । पापानां योनय इति तिर्यग्जन्तवो दुःखबलातिपत्तावदंडादिपीडाकरपदार्थः (?) । तृणेनापि ताडने दीर्घकालो नरकानुभवः ॥ १६६ ॥

अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः ॥
दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ॥ १६७ ॥

असृग्लोहितम् । **तदङ्गतो**ऽङ्गाद्यत्रोत्पादयति **ब्राह्मणस्य** खङ्गप्रहारादिनाऽयुद्ध्यमानस्य न तु द्रोणाचार्यवत्क्षात्रेण धर्मेण युयुत्सोः **सुमहद्दुःखं** नरकादि **प्रेत्य** मृतो जन्मान्तरे । **अप्राज्ञतये**त्यनुवादः । प्राज्ञो हि शास्त्रार्थज्ञानाच्च कथमेवं कुर्यात् ॥ १६७ ॥

शोणितं यावतः पांसून्संगृह्णाति महीतलात् ॥
तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते ॥ १६८ ॥

ईषत्प्रहारे पूर्वफलम् । अधिके तु **पांसवो** रजांसि भूरयवयवास्तान्**यावतो** यत्परिमाणान्**गृह्णाति** संहन्ति । ब्राह्मणाङ्गच्युतं भूमिपतितं लोहितं **तावतोऽब्दां**स्तावन्ति वर्षाण्य**मुत्र** परलोके**ऽद्यते** श्वशृगालैर्यः **शोणितस्योत्पादकः** प्रहर्ता ॥ १६८ ॥

न कदाचिद्द्विजे तस्माद्विद्वानवगुरेदपि ॥
न ताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक् ॥ १६९ ॥

पूर्वस्य क्रियात्रयप्रतिषेधविधेरुद्यमननिपातनविषयस्योपसंहारः । **न कदाचिदा**पद्यतीत्यर्थः ॥ १६९ ॥

अधार्मिको नरो यो हि यस्य चाप्यनृतं धनम् ॥
हिंसारतिश्च यो नित्यं नेहासौ सुखमेधते ॥ १७० ॥

सामान्यतः सर्वहिंसाप्रतिषेधशेषोऽयम् । अधर्मः । शास्त्रप्रतिषिद्धोऽगम्यागमनादिस्तं **चरत्यधार्मिकः** । **यस्य चानृतमेव** धनं साक्ष्ये व्यवहारनिर्णयादौ चासत्यमुक्त्वा उत्कोचधनं साधयति यश्च **हिंसारति**र्हिंसायां अभिरतो वैरानुबन्धादर्थहेतोर्वा परान्हिनस्ति **नासौ सुखमेधते** न सुखं प्राप्नोति । इहास्मिंल्लोके ॥ १७० ॥

न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् ॥
अधार्मिकाणां पापानामाशु पश्यन्विपर्ययम् ॥ १७१ ॥

धर्मः शास्त्रमर्यादा तेन वर्तमानः **सीदन्न**प्यवसादमपि प्राप्नुवन्न**ाधर्मे मनो निवेशयेत्** । यत **अधार्मिका** यद्यपि चौर्योत्कोचदम्भादिभिर्धनसमृद्धा दृश्यन्ते तथापि तेषामा**शु विपर्ययो** दृश्यते धननाशादि । अतो न धर्माद्विचलेत् सुहृद्भूत्वा दृष्टमर्थं दर्शितवान् ॥ १७१ ॥

---

१ फ–कर्मणा । २ ख–वा ।

इदानीं शास्त्रार्थमाह

नाधर्मश्चरितो लोके सद्यः फलति गौरिव ।
शनैरावर्त्यमानस्तु कर्तुर्मूलानि कृन्तति ॥ १७२ ॥

अनियतकालत्वाद्वैदिकानां शुभाशुभफलानां कर्मणामेवमुच्यते । **नाधर्मश्चरितो**ऽनुष्ठितः **सद्यः फलति** फलं ददाति । वेदे हि केवलं कर्मणां विहितप्रतिषिद्धानां सुखदुःखफलत्वं श्रुतम् । कालविशेषस्तु नावगमितः । वाक्यव्यापारो हि कर्तव्यतावगमपरत्वेऽपि कर्मफलसंबन्धबोधमात्रे पर्यवस्यति न कालविशेषमाक्षिपति । फलवतां कर्मणां नित्यानां तु फलतः कर्तव्यताप्रतिषिद्धपरिहारेऽपि नैव नरकादिदुःखनिवृत्तिकामस्याधिकारः किंतु शास्त्रप्रतिषेधसामर्थ्यात् । स तु प्रतिषेधो दुःखफलत्वं प्रतिषिद्धानुष्ठानस्य बोधयति । निपुणत एतदुच्यमानमतिग्रन्थविस्तरमाक्षिपतीत्युपरम्यते ।

गौरिव साधर्म्यवैधर्म्याभ्यामयं दृष्टान्तः । यथा गौः पृथिवी न्युप्तबीजा न तदैवानेकसस्यशालिनी भवति । किंतर्हि ? परिपाकमपेक्षते तादृशं वैदिकं कर्मेति साधर्म्यम् । वैधर्म्येणापि यथा गौः पशुर्वाहदोहाभ्यां सद्यः फलति । नैवं धर्माधर्मौ । अधर्मग्रहणं धर्मस्यापि फलदानंप्रति कालानियमप्रदर्शनार्थम् । **आवर्त्यमानः** कालेनोपचीयमानः **कर्तुः** प्रतिषिद्धानुष्ठातुः **मूलानि कृन्तति** च्छिनत्ति । मूलकर्तनेन सर्वेण सर्वविनाश उपलक्ष्यते । यथा मूलच्छेदाद्वृक्षादिस्थावराणामपुनर्भवस्तद्वदधर्मकारिणाम् ॥ १७२ ॥

यदि नात्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु ॥
न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः ॥ १७३ ॥

इदमयुक्तं यदन्यकृतस्य कर्मणोऽन्यगामिता फलस्योच्यते । कर्तुः फलदानि वैदिकानि कर्माणि । न वैश्वानरन्यायोऽस्ति । श्रवणाभावात् । न हि पुत्राद्यर्थताऽत्र श्रुता । सत्यम् । पुत्रे पीड्यमाने पीडितस्य पितुरधिकतरं दुःखं भवति । अतः कर्तुरेव दुःखम् । पुत्रस्यापि स्वकृतात्पौर्वदेहिकात्कर्मणस्तत्फलमित्यविरुद्धम् । एवं **नप्तृष्वपि** द्रष्टव्यम् । नप्तारः पौत्राः । कृतो धर्म इति संहितायास्तुल्यत्वाद्धर्माधर्मौ द्वावप्युपात्तौ ॥ १७३ ॥

अधर्मेणैधते तावत्ततो भद्राणि पश्यति ॥
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥ १७४ ॥

अधर्मेण प्रभुद्रोहादिना **एधते** वृद्धिं लभते तावत्तस्मिन्नेव काले ततो धनं ग्रामं वा प्राप्य **ततो भद्राणि** बहुभृत्यगवाश्वादि संपत्तिलक्षणानि **पश्यत्य**नुभवति । **ततः** सपत्ना-

---

१ र–यदा । २ ख–पृथिव्यपूर्वजो न तु दैवानेकसस्यशालिनी भवती । ३ **णर**–परिवासम् । ४ **फ**–पशुर्वा दोहाभ्यां । ५ **ण**–मूले । ६ **र**–तत्र । ७ **रण**–तदीयानुवृत्तो धन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नरीन्दरिद्राञ्जयति परिभवति । तर्हि धर्मे स्थितान्कुतश्चन कुसृतिहीना लभन्ते । अतस्तेषां दारिद्र्यशब्द ऐश्वर्ये परिभवः । समूलं च कियन्तं कालमेवं भूत्वा सपुत्रज्ञातिधनबान्धवा उच्छिद्यन्ते । तस्माद्धर्मो न हातव्यः ॥ १७४ ॥

सत्यधर्मार्यवृत्तेषु शौचे चैवारमेत्सदा ॥
शिष्यांश्च शिष्याद्धर्मेण वाग्बाहूदरसंयतः ॥ १७५ ॥

सत्यं यथादृष्टार्थवादिता । **धर्मः** श्रुतिविषयौ विधिप्रतिषेधौ । सत्यस्य ताद्रूप्येऽपि भेदेन निर्देशोऽतिशयार्थः । अनृतं पुरुषाणां स्वभावभूतम् । अतो यत्नेन पुनः पुनः प्रतिषिध्यते । **आर्यवृत्तं** सदाचारः । आर्याः शिष्टास्तेषां वृत्तमाचरितं तत्र आरमेत्[1] । रतिः परितोषः । एतेष्वर्थेषु परितोषोऽनेन विधीयते । अन्यानप्येवमाचारान्दृष्ट्वा मनः-प्रसादं कुर्यात् । **शिष्याश्च** भार्यापुत्रदासच्छात्रा धर्मेणानुशासनीयाः । " पृष्ठतः शरीर-स्येत्यादि" धर्मः । **वाग्बाहूदरसंयतः** सत्यसति[2] च प्रयोजने । अबहुभाषिता वाक्सं-यमः । बाह्वोः संयमो बाहुबलाश्रयणेन कस्यचिदपि[3] पीडनम् । उदरस्य संयमोऽनौ-दरिकता अबहुभोजित्वम् । औदरिकता बहु भोजित्वं भोज्यविशेषे गर्धयो[4] परगृहे बाहुल्येन भोजनम् । उक्तोऽप्यर्थः पुनरुच्यते बहुकृत्वोऽपि पथ्यं वदितव्यमिति सर्वत्र पौनरुक्त्यपरिहारः ॥ १७५ ॥

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ॥
धर्मं चाप्यसुखोदर्कं लोकसंक्रुष्टमेव च ॥ १७६ ॥

उक्तस्त्रिवर्गः पुरुषार्थः । कश्चित्तुल्यतां मन्यमानोऽर्थकामपरिहारेण यथा धर्मः सेव्यते तद्विरोधी ज्योतिष्टोमादिः । स ह्यर्थविरोधी दक्षिणादिदानेन कामविरोधी दीक्षितस्य ब्रह्मचर्यविधानात् । एवमर्थकामावपि धर्मपरिहारेण न सेवेत । तत्र " न हिंस्याद्भू-तानीति " यत्र कामो हिंसाया वैरानुबन्धायः कश्चिद्वक्तुमिष्यते तत्र स विषयप्रतिषेधाय, यत्र तु कस्यचिद्धिंसयाऽर्थकामौविष्येते[5] तत्र नास्ति हिंसादोष इति प्रवर्तते तद्भ्रान्तिनिवृत्त्यर्थ-मिदमुच्यते । **परित्यजेत्परिहरेत्तादृशार्थकामौ** यत्र धर्मविरोधः ।

एवं सर्वतो धर्मस्य बलीयस्त्वमुक्त्वा कस्मिंश्चिद्विषये तस्यापि परिहर्तव्यतामाह । **धर्मं चाप्यसुखोदर्कम्** । उदर्क उत्तरकालः सोऽसुखो यस्य । यथा सर्वस्वदानं वा ददाति धर्मकोयं महापुण्य इति । यथा नदीतीरेष्वेकान्तेष्वपि प्राकृतजना बहवः पश्यन्ति तत्र स्नानं भवतीत्यर्थस्नानं धर्मार्जनसमक्षापेक्षा[6] तु साधुवादाय, यथा च तीर्थकाकेभ्यो दानं भवति दानं धर्मो दातृत्वप्रसिद्ध्युत्पादनार्थत्वात्तेभ्यो निन्द्यते । अथवा यद्गर्ह्यतया

१ फ–तत्रारमेत् । २ ण–र–सत्यसति प्रयोजने । ३ फ–अपीडनम् । ४ ण–र–गर्द्द २ । ५ ण–र–अर्थकामवप्येते । ६ फ–समक्षतापेक्षम ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकः संक्रोशति यथा गौरवध्यस्य वधो मांसस्य भक्षणं[1] च तद्विगर्हिततरं पश्वन्तरेभ्यो लोके। दृष्टमूलश्चायमहिस्पर्शवत्प्रतिषेधः। विहितोऽयमर्थ[3] इत्यवेक्षितया प्राकृतजना अजानाना अधार्मिकत्वं यष्टुः प्रख्यापयेयुस्तेषां च बहुत्वतः प्रसिद्ध्या शिष्टा अप्येवं[2] प्रसिद्धमूलमनवगच्छन्तः परिवर्जयेयुस्तदुक्तं "धार्मिके सति राजनीति" एतदुक्तं पूर्वैर्व्याख्यातमित्यनुगतम्। न हि प्रत्यक्षश्रुतिविहितस्य स्मृत्या बाधो न्याय्यः। इदं तु युक्ततरमुदाहरणम्। नियोगधर्मः स्मृत्या विहितो लोकसंकुष्टत्वान्न क्रियते। तथा यः कश्चिदनाथतरुणीं स्त्रियं कारुण्याद्बिभर्ति तत्र यदि लोकसंक्रोश आशङ्क्यते स्त्रीत्वेनैवास्मा एषा रोचते स लोकसंकुष्टधर्मः ॥ १७६ ॥

न पाणिपादचपलो न नेत्रचपलोऽनृजुः ।
न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः ॥ १७७ ॥

पाणिपादाभ्यां चपलः। 'तृतीयेति' (व्या. सू. २।१।३०) योगविभागात्समासः। चापलं च हस्तेनानुपयुज्यमानस्यापि वस्तुनो ग्रहणापसारणे। परस्त्रीप्रेक्षणचित्रसंदर्शनादि **नेत्रचापलम्। परद्रोहार्थं कर्मबुद्धिश्च** न कर्तव्या ॥ १७७ ॥

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यति[4] ॥ १७८ ॥

यो धर्मः पित्रादिभिरनुष्ठितो यैश्च सह प्रीतिर्भाविता यैः सह कन्याविवाहादिः कृतो यैर्वा[5] च शाखा अधीता[6] स एव पन्था आश्रयणीयः। तथा कुर्वन्न **रिष्यति** न बाध्यते लोके न निन्द्यते। अन्ये त्वविदुषः पुरुषधर्मेष्वहिंसादिषु प्रत्युपायोऽयं राजपटह इव म्लेच्छादीनाम्। अग्निहोत्रादयस्तु स्वप्रत्ययपेक्षा[7] एव।

अत्र चोदयन्ति। यदि निर्मूलः पित्रादिभिरनुष्ठितोऽर्थः कथं तस्य धर्मत्वम्? अथास्ति मूलं तत् पुत्रस्यापि भविष्यति किं पित्रादिग्रहणेन? तदेतत्परिहृतमविदुषां मूलमजानानामुपदेशोऽयमिति।

अन्ये तु यत्र निपुणतोऽपि निरूप्यमाणे संदेहो न निवर्तेत उभयथा वाक्यार्थप्रतिपत्तिस्तत्र पित्राद्याचरितः पन्था आश्रयणीय इत्याहुः। एतदपि चिन्त्यम्।

न हि नित्यसंदिग्धं नाम प्रमाणमस्ति। अवश्यं ह्येकार्थनिष्ठेन वाक्येन भवितव्यम्। विकल्पितेषु वा पदार्थेषु पित्राद्याचरितं कर्मानुचरणीयम्। यतोऽन्य आचरितवन्तः[8]।

---

१ ण-र-मांसभक्षणं। २ फ-शिष्टा अपि येनाप्रसिद्धमूलम्। ३ ण-वित्त। ४ फ-रिष्यते। ५ फ-यैश्च। ६ फ-अधीताः। ७ र-प्रेक्षा। ८ फ-अन्यदाचरितवन्तः; ण-र-अन्याचरितवतः।

For Private And Personal Use Only

सतां मार्गमिति । यदि पितृपितामहादिभिः कैश्चित्कथंचिदधर्म आचरितपूर्वः स न आश्रयणीय इति सतां मार्गमित्याह ॥ १७८ ॥

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ॥
बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबान्धिबान्धवैः ॥ १७९ ॥
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ॥
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥ १८० ॥

न समाचरेदित्येकैकेन संबध्यते ।

संश्रिता आश्रयागता उपजीविनः । **वैद्या** विद्वांसो भिषजो वा । **ज्ञातयः** पितृपक्षाः । **संबंधिनो** वैवाह्याः । **बान्धवा** मातृपक्षा मातृष्वस्रीयप्रभृतयः ॥ १७९ ॥

जामयो भगिन्याः स्ववासिनश्च । **विवादो** विरोधः प्रतिकूलाचरणं वाक्कलहश्च एतैर्न कुर्यात् ॥ १८० ॥

एतैर्विवादान्संत्यज्य सर्वपापैः प्रमुच्यते ॥
एतैर्जितैश्च जयति सर्वांल्लोकानिमान्गृही ॥ १८१ ॥

एतैर्विवादैः क्रियमाणैर्यः पापयोगो भवत्यकर्तुस्तेन न संबन्धः । **सर्वपापैः प्रमुच्यत** इत्युच्यते । **एतैश्च जितै**रुपेक्षितैः **सर्वांल्लोकाञ्जयति** स्वीकरोतीत्यर्थवादः ॥ १८१ ॥

आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ॥
अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ॥ १८२ ॥

आचार्यो ब्रह्मलोकस्येशः प्रभुस्तस्मिन्परितुष्टे ब्रह्मलोकः प्राप्यते । अतो गुणतो ब्रह्मलोकेश इत्युच्यते । **प्राजापत्ये** लोके **पिता प्रभुः** ॥ १८२ ॥

जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः ॥
संबन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ॥ १८३ ॥
आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः ॥
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः ॥ १८४ ॥

भार्या पुत्रः स्वकीया तनुरात्मीयमेव शरीरम् ॥ १८४ ॥

छाया स्वा दासवर्गश्च दुहिता कृपणं परम् ॥
तस्मादेतैरधिक्षिप्तः सहेतासञ्ज्वरः सदा ॥ १८५ ॥

यो भृत्यवर्गः स आत्मीया च्छाया यथा छाया नित्यानुगता न क्रोधविषय एवं भृत्यवर्गोऽपि । **दुहिता कृपण**मनुकम्पा दया । **एतैः** पूर्वोक्तै**रधिक्षिप्तः** परुषवचनैराक्रुष्टः कोपितः **सहेत** क्षमेत । **असज्वरो**ऽविद्यमानज्वरः ज्वराभावेन च चित्तस्यासंक्षोभो

१ फ–एभिः । २ र–परितुष्टये । ३ ण–ब्रह्मलोकस्य । ४ फ–पृथिव्यां । ५ ण–स्वदासवर्गश्च, फ–स्वो दासवर्गश्च ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्ष्यते । ज्वरितस्य हि चित्तसंक्षोभो भवति तद्वत्क्रुद्धस्य । अथवा पाठान्तरं । असंज्वरः । संतापः संज्वरः (अमरकोशे १।१।६०)। स नञा प्रतिषिध्यते ॥ १८५ ॥

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ॥
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ॥ १८६ ॥

परस्माददृष्टप्रयुक्ताद्यल्लभ्यते स **प्रतिग्रहः** । तत्र **समर्थः** शक्तोऽपि प्रसंगं पुनः प्रवृत्तिं **वर्जयेत्** । श्रुताध्ययनशीलसंपत्तिर्द्रव्यविधिज्ञता च सामर्थ्यम् । तस्मादविद्वान्न बिभीयादित्यत्रोक्तमप्येतदुत्तरार्थं पुनरनूद्यते ॥ १८६ ॥

न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे ॥
प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा ॥ १८७ ॥

तद्दर्शयति । **अविज्ञाय** कामोपभोगाद्यर्थं न प्रतिग्रहः कर्तव्यः । एतदुक्तं भवति। आत्मनः कुटुम्बस्थित्यै नित्यकर्मसंपत्त्यै च प्रतिग्रहः कर्तव्यो नान्यथा। **अवसीदन्नपि क्षुधा** । अप्रतिगृह्णन्यद्यप्यवसादं गच्छति । अवसादः शरीरस्यानभिवृद्धिः अथवा द्रव्याणां विधिं धर्म्यं प्रतिग्रह इत्येवं संबन्धः क्रियते । कोऽसौ धर्म्यो विधिः । धर्म्यं प्रयोजनं विज्ञाय प्रतिग्रहमन्त्रद्रव्याणां च देवता "अग्नये हिरण्यं रुद्राय गाम्" इत्यादिः ॥ १८७॥

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतम् ॥
प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत् ॥ १८८ ॥

अविदुषो द्रव्यविशेषं प्रति प्रतिग्रहे दोषातिशयमाह । **भस्मीभवति दारुवत्** । यथा दार्वग्निना दग्धं भस्मीभवति तथा यो ब्राह्मणो विद्यासंपन्नो न भवति स एतानि हिरण्यादीनि द्रव्याणि प्रतिगृह्णन्भस्मीभवति ॥ १८८ ॥

हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुम् ॥
अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः ॥ १८९ ॥

भूर्गौश्च तनुं शरीरमोषतो दहतः । **हिरण्यमायु**र्विभक्तिपरिणामः ओषतीति- कर्तव्यः । एवं **अश्वश्चक्षु**रित्यादिषु क्रियापदानुषङ्गः कर्तव्यः ॥ १८९ ॥

अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः ॥
अम्भस्यश्मप्लवेनेव सह तेनैव मज्जति ॥ १९० ॥

फ-अदृष्टः । २ ण-र-यद्यवसादं गच्छति । ३ ण-र-उषतीति ।

For Private And Personal Use Only

यस्य तपो नास्त्यनधीयानो न चाधीते । अध्ययनेन प्रकृता विद्वत्ता लक्ष्यते । समुदिते चैते विद्यातपसी प्रतिग्रहाधिकारनिमित्तम् । उभयगुणभ्रष्टः प्रतिग्रहे चाभिलाषी **स तेन सह मज्जत्यधोगच्छति** । केन सह अन्यस्यानिर्देशाद्दातुश्च सन्निधानात्तेन सहेति गम्यते । प्रतिग्रहीतारं प्लवमिवात्मोत्तारणायाश्रयते । यस्त्वीदृशोऽपात्रभूतः स दातारमात्मानमुभावप्यधो नयति **यथाऽम्भस्यश्मप्लवो**ऽश्ममयः प्लवः अश्मप्लवः । पारं तरति येन स प्लवो नावादिः । तत्र यथाऽश्मन्यारूढो नदीतरणार्थमम्भसि मज्जत्यश्मप्लवेन सह गम्यते । दाता हि ब्राह्मणाय ददानश्च तादृशो ब्राह्मण उभावपि नरकं गच्छतः ॥ १९० ॥

तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात् ॥
स्वल्पकेनाप्यविद्वान्हि पङ्के गौरिव सीदति ॥ १९१ ॥

अतो नरकभयादविद्वान्मूर्खः प्रतिग्रहात **बिभियात्** नश्येत्त प्रतिगृह्णीयादिति यावत् । तिष्ठतु तावद्धिरण्यादीनि द्रव्याणि । **स्वल्पकेनापि** त्रपुसीसादिना असारेण स्वल्पया मात्रया प्रतिगृहीतेनाविद्वान्पङ्के कर्दमे **गौरिव सीदति** ॥ १९१ ॥

न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे ॥
न बकव्रतिके पापे नावेदविदि धर्मवित् ॥ १९२ ॥

प्रतिग्रहीतुर्धर्म उक्तः । इदानीं दातुरुच्यते । अपिशब्दात्सर्वं देयं निवार्यते । यत्र वारि न कस्मैचिद्वार्यते तदपि नैभ्यो दातव्यं कुतोऽन्यद्द्रव्यं दीयते । अतिशयोक्त्या द्रव्यान्तरदाननिषेधोऽयम् । वारिणस्तु सर्वार्थत्वादनिषेधः ।

ननु च "बैडालव्रतिकान्वाङ्मात्रेणापि नार्चयेत्" इत्युक्तमेव । सत्यम् । तत्रार्चा निषिद्धा । इह तु दानम् । तच्च धनस्य नान्यस्य । एवं द्विःप्रतिषेधोऽर्थवान्भवति । तथा चोत्तरत्र वक्ष्यति "विधिनाऽप्यर्जितं धनमिति" (श्लो. १९३) । अतः पाषण्ड्यादिभ्यः सान्नमन्नदानं न निषिध्यते । अत्र कश्चिदाह यद्यवेदविदीति श्रुतं तथाऽप्यनधीयान इत्यपि द्रष्टव्यम् । तथाहि केवलवेदाध्यायिभ्यो दानमुक्तम् । न च दाम्भिकेभ्यः काम्ययुक्तम् । स इदं प्रष्टव्यः पुनर्वेदाध्यायिमात्राय विद्यारहिताय दानमुक्तम् श्रोत्रियायैव देयानीति चेत् । न त्वर्हत्तमायेत्यप्रासिकत्वादत्र विद्यया विना वाक्यान्तराणि च "विदुषे दक्षिणे" त्यादीन्येकप्रकारगतानि सन्त्येव । अतस्तत्पर्यालोचनयोभयविशेषणत्रेष्टया देयमिति गम्यते । अतः श्रौतार्थपरित्यागे न किंचित्कारणं पश्यामो यस्य तु साम्यमयुक्तमिति वचनगम्येऽर्थे का नामायुक्तता ।

१ फ—ददावनक्षरश्च । २ फ—तन्निषिध्यते । ३ स—अधीयान । ४ अ—यथापि । ५ फ—तत्तु । ६ फ—श्रौत्रार्थ— ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बिडालव्रतेन चरति **बैडालव्रतिकः**। बकानां व्रतं तदस्यास्तीति **बकव्रतिकः**। अधिकरणविवक्षायां सप्तमी। संप्रदानविवक्षायां चतुर्थी युक्ता ॥ १९२ ॥

त्रिष्वप्येतेषु दत्तं हि विधिनाऽप्यर्जितं धनम् ॥
दातुर्भवत्यनर्थाय परत्रादातुरेव च ॥ १९३ ॥

धनग्रहणादन्नदानं न निषिध्यत इत्युक्तं भवति। **विधिनाऽप्यर्जितं** सत्प्रतिग्रहक्रयादिना शास्त्राभ्यनुज्ञातेन प्रकारेण **दातुरादातुश्च** तादृशं दानं **परत्रो**भयोर**नर्थाय** ॥ १९३ ॥

यथा प्लवेनौपलेन निमज्जत्युदके तरन् ॥
तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ ॥ १९४ ॥

औपल आश्मनः। जलसंतरणाय नावादिः प्लवस्तेन यस्तरति तरितुं प्रवर्तते। सोऽधस्ताज्जलस्य **मज्जत्य**न्तर्धीयते। एवम**ज्ञौ दातृप्रतीच्छकौ**। प्रतीच्छकः प्रतीच्छां करोतीति णिचं कृत्वा ण्वुल्कर्तव्यः। प्रतीप्सक इति पाठान्तरम्। तत्र सन्नन्तादाप्नोतेर्ण्वुल्। अर्थस्तूभयोरेक एव ॥ १९४ ॥

धर्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः ॥
बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः ॥ १९५ ॥

उपचारेणैतौ शब्दौ प्रयुज्येते। अनेकस्मिंश्चोपचारहेतौ स एव संभवति। यन्निमित्तं प्रयोगस्तदवधारणप्रतिषेधविषयप्रक्लृप्त्यर्थम्। धर्मो ध्वजमिव व्याघ्रादेराकृतिगणत्वात्समासः। कदाचित्कर्मधारयः सर्वधनाद्यर्थे इति। ततः सोऽस्यास्तीति मत्वर्थीयः। ख्यात्यर्थमेव धर्मं करोति न शास्त्रपरतया स एवमुच्यते। यस्तत्रैव धर्मं करोति यत्र जनाः पश्यन्ति स्वपुरुषैश्च ख्यापयन्ति धार्मिकत्वप्रसिद्ध्या। प्रतिग्रहादि लप्स्य इति लुब्धो मत्सरी कृपणश्च। लोकं दभ्नोति वञ्चयति **लोकदम्भकः**। छद्मना चरति **छाद्मिकः**। छद्म व्याजः। प्रकाशं धार्मिको रहसि निक्षिप्तमपहरत्यप्रकाश्यं प्रकाशयति। धार्मिकोऽयमेतस्य यत्समक्षं कथितं तन्नान्यत्र यातीति केनचिद्विश्वस्य कथितं दृश्यते यावद्यत एव गोप्यं तस्यैव मुखाज्जातमिति परद्रोहः। सर्वेषां चाभिसंधाताऽऽक्षेपकः परगुणान्न सहते। ईदृशो बैडालव्रतिको ज्ञेयः। **अभिसंधकः** अभिसंधत्त इति "आतश्चोपसर्गे' (व्या. सू. ३।१।१३६) इति कः। ततः स्वार्थे कः। सर्वेषामभिसंधक इति षष्ठीसमासः।

---

१ अ–अपादानविवक्षायां। २ र–ण–अपलः। ३ —प्रतिच्छायां। ४ अ–ण–सर्वातिसंधकः। ५ र–ण–विषयः। ६ व्या–सू–(३।१।५६)। ७ र–लुब्धोत्यमत्सरः; ण–मत्सरः। ८ फ–नान्यत्र।

For Private And Personal Use Only

केचिदत्र श्लोकं पठन्ति ।

"यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः । प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतमिति"॥ एष एवार्थः संक्षेपेण कथ्यते । एकैकगुणसंबन्धे बैडालव्रतिको ज्ञेयः । अस्मादेव श्लोकादेवमनुमीयते । प्रच्छन्नानि च पापानीति विशेषाश्रवणात् सर्वेषां चैषां पापत्वादु[1]भयथाऽऽचार्येण शिष्याः प्रति[2]पादिताः । केचिदिमं श्लोकमध्यापिताः केचित्पूर्वम् । उभयं च प्रमाणम् । तेन यद्यपि अङ्गदी कुण्डली पीनस्कन्धः पृथुवक्षा देवदत्त इति समुदितानां लक्षणत्वं प्रतीयते तथापीह प्रत्येकमेतानि लक्षणानि ॥ १९५ ॥

अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ॥
शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः ॥ १९६ ॥

बकव्रतलक्षणमधोनिरीक्षणम् । अथवा नीचदृष्टिः। नीचो दीनः । सर्वदैव व्या[3]पारयति कथंचित्कुतश्चन लभतेऽधमादपि गृह्णाति । नि[4]ष्कृतिर्निष्ठुरता तया चरति तत्प्रधानो नैष्कृतिकोऽसम्यग्भाषी । अलीकविनीतिः श्रयति प्रश्रयं नम्रतां कार्ये तु व्या[5]घातकः । बिडालोऽलीकनिद्रां करोत्यामिषं लि[6]घृक्षन् । एवं सोप[7]धौ धर्म[8]चरणे बैडालव्रतिक उक्तः। तथैव बकव्रतचरोऽपि।बका हि मत्स्यान् गृह्णन्तो जलचरे[9]ष्ववज्ञां दर्शयन्ति । अथ च मत्स्यग्रहणबुद्धय एव । व्रते[10]नं शीलितं कर्मोच्यते । प्रदर्शितं पदानामपौनरु[11]क्त्यम् । अथापि स्याल्लक्षणत्वाददोषः । अविज्ञातं हि लक्षणं भवति। पौनःपुन्याभिधानेन सुग्रहोऽर्थो भवति । कः पुनः बैडालव्रतिकबकव्रतिकयोर्भेदः ? उच्यते । अयं स्वार्थसाधनपरो नान्यस्य कार्यं विहन्ति । पूर्वस्तु मात्सर्यात्स्वार्थसिद्धावसत्यामपि परस्य नाशयति ॥ १९६ ॥

ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः ॥
ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा ॥ १९७ ॥

[12]स्वशब्दैश्च व्याख्यातः श्लोकः ॥ १९७ ॥

न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ॥
व्रतेन पापं प्रच्छाद्य कुर्वन्स्त्री शूद्रदम्भनम् ॥ १९८ ॥

पापं कृत्वा व्रतं प्रायश्चित्तं न कुर्यात् । धर्मस्यापदेशेन धर्ममपदिश्य लोके ख्यापयति धर्मार्थमहं व्रतं करोमि न मे प्रायश्चित्तनिमित्तमस्तीति परमार्थतस्तु प्रायश्चित्तार्थमेव करोति एवं न कर्तव्यम् । पापं प्रच्छाद्यापहुत्य तेन व्रतेन स्त्रीशूद्रदम्भनं न कुर्यात् । प्रकटं प्रायश्चित्तं कर्तव्यमन्यत्र रहस्यात् ॥ १९८ ॥

---

१ र-ण-उभयं यथा । २ फ-पाठिताः । ३ र-ण-व्यापयति । ४ र-ण-नि. कृति । ५ ण-व्याघातः ६ र-ण-गर्गराजलिघृक्षः । ७ फ-सोपाधेः । ८ र-ण-चरण । ९ र-जलचरेवज्ञां; ण-जलचरणवज्ञां । १० फ व्रतानि । ११ फ-अपौनरुक्तम् । १२ र-ण-स्वशब्दश्च व्याख्याताःश्लोकाः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**प्रेत्येह चेदृशा विप्रा गर्ह्यन्ते ब्रह्मवादिभिः ॥
छद्मना चरितं यच्च व्रतं रक्षांसि गच्छति ॥ १९९ ॥**

इह पदार्थस्वाभाव्येनान्योद्देशेनापि कृतं यत्फलं ततो भवत्येव । तथाहि गुरुनियोगे प्रवृत्तो धर्मोद्देशेन गुरुवचनं करोमीति न कामहेतोः । अर्थः स्वाभाव्यात्तु कामं प्रतिजनयति । एवं कश्चिन्मन्यते व्रतानि पापापनोदार्थानि । तानि अन्योद्देशेनापि क्रियमाणानि न स्वभावं जहति । एवमेतन्मम प्रायश्चित्तमुभयार्थं भविष्यति । लोके तपस्वीति ख्यातो भविष्यामि । पापं चापनोत्स्यते । तस्यैवं बुद्धिमतो निवृत्त्यर्थमिदमारभ्यते । तदेतद्व्रतं **छद्मना चरित**मनुष्ठितं **रक्षांसि गच्छति** निष्फलं भवति न पापमपनुदतीत्यर्थः । न केवलं कार्याकरणं भवति याव**दीदृशो विप्रा** व्रतचारिणो **गर्ह्यन्ते** निन्द्यन्ते **ब्रह्मवादिभिः** वेदप्रमाणज्ञैः शिष्टैः ॥ १९२ ॥

**अलिङ्गी लिङ्गिवेषेण यो वृत्तिमुपजीवति ॥
स लिङ्गिनां हरत्येनस्तिर्यग्योनौ च जायते ॥ २०० ॥**

प्रत्याश्रमं लिङ्गधारणं यथा ब्रह्मचारिणो मेखलादिधारणं गृहस्थस्य वैणवदण्डकुण्डलकमण्डल्वादि वानप्रस्थस्य चर्मचीरजटादि परिव्राजकस्य कषायवसनदण्डादि । एतेन वेषेणानाश्रमी यो भिक्षाहेतोर्लोके चरति **वृत्तिमुपजीवति स लिङ्गिनामेनः पापं हरति** आनृण्यं तर्पयति । **तिर्यग्योनौ** तिरश्चां श्वशृगालादीनां योनौ **जायते** । न चात्रैतदाशङ्कनीयं लिङ्गिनां यत्पापं तत्तेभ्योऽपसृत्य तस्मिन्संचरतीत्यसंभाव्यम् । अकर्तव्यता परलिङ्गधारणात्प्रतीयते । अश्रुतेऽपि प्रतिषेधे निन्दार्थवादादेव तदवगतिः ॥ २०० ॥

**परकीयनिपानेषु न स्नायाद्धि कदाचन ॥
निपानकर्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥ २०१ ॥**

निपिबंत्यस्मिन्नतो वेति निपानं जलाशयः । स च वापीकूपतडागादिः । तस्मिन् परकीये परेण यदात्मार्थं कृतं सर्वार्थं नोत्सृष्टं तत्र न कदाचित्स्नायात् । नित्यं चण्डालादिस्पर्शने च नैमित्तिकं घर्मस्वेदापनोदार्थं च सर्वं स्नानं प्रतिषिध्यते । अत्र व्यतिक्रमे दोषमाह । निपानस्य यः कर्ता तस्य यत्किंचिद्दुष्कृतं तस्य केनाचिदंशेन भागेन लिप्यते संबध्यते । निन्दार्थवादोऽयं प्रतिषेधशेषः ॥ २०१ ॥

**यानशय्यासनान्यस्य कूपोद्यानगृहाणि च ॥
अदत्तान्युपभुञ्जान एनसः स्यात्तुरीयभाक् ॥ २०२ ॥**

फ–अर्थस्वाभाव्यत्तु; र–ण–फ–कर्म । २ फ–परोद्देशेनापि । ३ र–ण–लिङ्गवेषेण । ४ ण–दण्डधारणादि । ५ फ–परलिङ्गाधारणात् । ६ र–ण–दुःकृतांशेन । ७ फ–प्रतिषेधः ।

For Private And Personal Use Only

यानादिनि परकीयान्यदत्तान्युपयुञ्जान एनसस्तदीयस्य **तुरीयभाक्** चतुर्थं भागं प्राप्नुयात् । अत्र कश्चिदाह । अदत्तानीतिवचनात्सर्वार्थितयाऽप्युपकल्पितानि नोपयोज्यानि । तदयुक्तम् । परकीयाधिकारात् । न च तानि परकीयानि । त्यक्तं हि तत्सम्यक् । तुरीयग्रहणमविवक्षितमिति प्रागेव व्याख्यातम् ॥ २०२ ॥

नदीषु देवखातेषु तडागेषु सरःसु च ॥
स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ॥ २०३ ॥

सर्वा नद्यो देवखाता अतस्तासामुभयथा संभवाद्देवखातग्रहणवाच्यत्वेन तल्लिङ्गं पठितव्यम् । तडागादीनि हि देवखातानि मनुष्यखातान्यपि सन्ति । न च देवैः खन्यन्ते । केवलं महत्त्वं स्मर्यमाणकर्तृकत्वेन लक्ष्यते ॥ २०३ ॥

यमान्सेवेत सततं न नित्यं नियमान्बुधः ॥
यमान्पतत्यकुर्वाणो नियमान्केवलान भजन् ॥ २०४ ॥*

प्रतिषेधरूपा **यमा** "ब्राह्मणो न हन्तव्यः" "सुरा न पेया"इत्यादयः । अनुष्ठेयरूपा **नियमाः** "वेदमेव जपेन्नित्यं" इत्यादयः । **न नित्यं नियमान्** नानेन नियमानामसेवोच्यत किंतु यमानां नियमेभ्यो नित्यत्वम् । तथा चाह । **यमान्पतत्यकुर्वाणः** । ब्रह्महत्यादिर्यमलोपे सति पतितत्वात्सन्ध्योपासनादिभिर्नाधिक्रियते । न तु तथा नियमलोपे । तथा च शिष्टस्मरणम्

"पतति नियमावान्यमेष्वसक्तो न तु यमवान्नियमालसोऽवसीदेत् ।
"न नियमानसमीक्ष्य बुद्ध्या यमबहुलेष्वतिसंदधीत बुद्धिम" ॥ इति

येषामपि पारिभाषिका यमनियमाः

"अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता । अस्तेयमपि पञ्चैते यमाश्चैव व्रतानि च ॥
"अक्रोधो गुरुशुश्रूषा शौचमाचरलाघवम् । अप्रमादश्च नियमाः पञ्चैवोपव्रतानि च ॥"

तेषामपि गुरुलाघवमनेन श्लोकेन प्रतिपाद्यते । अतो नानेन यमानां सेवोच्यते । नापि नियमानामसेवा । उभयेषां तैः शास्त्रैर्विहितत्वात् ॥ २०४ ॥

---

१ र-ण—+च । २ फ—ब्रह्महादिः । ३ क्ष—तथा संध्योपासनादिभिर्नाधिः । ४ फ—ननु । ६ र-ण—अप्रमादाश्च ।

*[आनृशंस्यं क्षमा सत्यमहिंसा दममस्पृहा ॥ ध्यानं प्रसादो माधुर्यमार्जवं च यमा दश ॥१॥]
[अहिंसा सत्यवचनं ब्रह्मचर्यमकल्पता ॥ अस्तेयमितिपञ्चैते यमाश्चोपव्रतानि च ॥२॥]
[शौचमिज्या तपोदानं स्वाध्यायोपस्थनिग्रहौ॥व्रतोपवासौ मौनं च स्नानं च नियमा दश।३।
[अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम्॥अप्रमादश्च नियमाः पञ्चैवोपव्रतानि च॥४॥।]

पूर्वेण श्लोकेन व्रताधिकारो विच्छिन्नः । इदानीं प्रतिषेधप्रकरणमारभ्यते

नाश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा ॥
स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्वचित् ॥ २०५ ॥

तत्र भोजनमेव तावदर्थि[1]त्वाद्यत्रकुत्रचित्प्राप्तं निषिध्यते । **अश्रोत्रियो**ऽनधीयानस्तेन **तते** प्रारब्धे यज्ञ ऋत्विग्भिर्वाऽश्रोत्रियैस्तते न भुञ्जीत ब्राह्मणः । **ग्रामयाजी** ग्रामयाजकस्तेन यत्र हूयते यत्र च स्त्री होमं करोति । **छान्दोग्ये** हि स्त्रीणां गृह्यस्मृतिकारैरग्निहोत्रहोम उक्तोऽतस्तं पश्यन्प्रतिषेधति । अथवा यत्र यज्ञे स्त्री प्रधानं भर्ता दारिद्र्यादिदोषैरुपहतः स्त्री चासौदायिकेन धनेन ज्ञातिबलेन च दर्पिता तत्रायं प्रतिषेधः । **क्लीबो** नपुंसकम् ॥ २०५ ॥

अश्लील[2]मेतत्साधूनां यत्र जुह्वत्यमी हविः ॥
प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत् ॥ २०६ ॥

पूर्वस्य प्रतिषेधविधेरर्थवादोऽयम् । **अश्लील**मश्लाघ्यं **साधूनाम्** शिष्टानाम् । **यत्र** ह्येते **हविर्जुह्वति** यज्ञं कुर्वन्ति **देवानां प्रतीपं** प्रतिकूलं **तस्मा**दीदृशे गमनं **परिवर्जयेत्** ॥ २०६ ॥

मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन ॥
केशकीटावपन्नं च पदा स्पृष्टं च कामतः ॥ २०७ ॥

यावन्मदादियोग एतेषां तावदभोज्यता । अन्ये बाहुल्यं मन्यन्ते । बाहुल्येन यः क्षीबो भवति मद्यशौण्डस्तदन्नं न भोक्तव्यम् । एवं क्रोधप्रधानस्य भृशंकोपनस्य च प्रायेण चातुरस्य रोगामयव्याधेः । **केशकीटैरवपन्नं** संसर्गेण दूषितम् । कीटाश्च केचिन्मृता दूषयन्ति न जीवन्तो यथा मक्षिका गृहगोधाश्च । अन्ये तु जीवन्त एव । कीटग्रहणं क्षुद्रजन्तूनां कृमिपतङ्गानामपि प्रदर्शनार्थम् । केशग्रहणं नखरोम्णां दूषिकादीनां मलानां समाचारात् । **पादेन** बुद्धिपूर्वं कामकारेण स्पृष्टम् । प्रमादे[3]तस्तु न दोषः ॥ २०७ ॥

भ्रूणघ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया ।
पतत्रिणाऽवलीढं च शुना संस्पृष्टमेव च ॥ २०८ ॥

भ्रूणहा ब्रह्मघ्नस्तेनावेक्षितं निपुणतो दृष्टम् । प्रदर्शनं चैतदन्येषामपि । पातकिना स्पृष्टस्य तु प्रतिषेधः स्नानविधानादेव सिद्धः । उदक्या रजस्वला तया स्पृष्टस्य प्रतिषेधो नावेक्षितस्य ।

---

१ फ–दर्शित्वात् । २ फ–अश्लीकम् । ३ र–प्रमादस्तु ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु च तत्स्पर्शिनोऽपि यावत्स्नानं वक्ष्यत्यतस्तेनैवाशुचित्वे सिद्धे कुतस्तत्स्पृष्टस्य भोजनप्राप्तिः ? उच्यते । प्रक्षाल्य[1] तदन्नं भोज्यमथवा भ्रूणहग्रहणं प्रदर्शनार्थमित्युक्तं तत्र कश्चिन्मन्येत दिवाकीर्ति[2]श्लोकपठितानां प्रदर्शनार्थमिति । तथा चोदक्यावेक्षितस्यापि प्रतिषेधः स्यात् । एतेन **शुना संस्पृष्टं** व्याख्यातम् । अत उक्तं पतितानामेवान्येषां प्रदर्शनार्थम् । तदत्र[3] युक्तः पतितसूतिकेत्यादीनाम् । उदक्याग्रहणं सूतिकाया निदर्शनार्थम् । **पतत्रिणा** पतत्री पक्षी स च क्रव्यादो गृध्रवायसादिः समाचारान्न तु हंसादिः ॥ २०८ ॥

गवा चान्नमुपाघ्रातं घुष्टान्नं च विशेषतः ॥
गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम् ॥ २०९ ॥

घुष्टान्नं यदुद्घुष्य दीयतेऽनामन्त्रिताय कस्मैचिदर्थिने मठसत्रभक्तादि विशेषानुद्देशेन, यद्वाऽन्यस्मै प्रतिश्रुत्यान्यस्मै दीयते । प्रतिपत्तिज्ञाने ह्ययं धातुः पठ्यते । तदभावे बाधितं स्मरन्ति यज्ञविवाहादिष्वनामन्त्रितभोजनम् । अयं च गणसंघातस्तस्माद्भ्रातॄणां त्वविभक्तानां न गणव्यपदेशः । "भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते" (अ. ९ श्लो. २१९) इति वचनादेकश्च धर्मस्तेषामातिथ्यादिक्रियैवेति **नवमे** दर्शितम् । "ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः" (अ. ९ श्लो. १०५) इति । तस्य च ग्रहणमवश्यकर्तव्येष्वधिकार इति दर्शयति साधारणस्यापि । अन्यस्यातन्मध्यगतस्य प्रतिषेधः । **गणिका** वेश्या । **जुगुप्सितं** निन्दितम् । **विदुषा** वेदार्थविदा भक्ष्यमपि विसखल्यादि ॥ २०९ ॥

स्तेनगायनयोश्चान्नं तक्ष्णो वार्धुषिकस्य च ॥
दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च ॥ २१० ॥

गायनो यो गीतेन जीवति । अन्यस्य त्वपरान्तकादिगानं विहितमेव । **कदर्यः**[4] कृपणः । बद्धनिगडयोर्विशेषः । एको वाङ्मात्रेणावरुद्धः अपरो रज्ज्वायसनिगडैर्यन्त्रितः । विशदस्य चेत्यन्ये पठन्ति । कष्टं च विशदमाचक्षते ॥ २१० ॥

अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च ॥
शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च ॥ २११ ॥

पुंश्चली यस्य कस्यचिन्मैथुनसंबन्धेन घटते । ननु च गणिकान्नं प्रतिषिद्धमेव । नैतदेवम् । अन्या गणिकाऽन्या पुंश्चली । गणिका वेश्यावेशेन जीवति । पुंश्चली त्विन्द्रि-

---

१ र-ण-प्रक्षालिन । २ र-ण-दिवाकीर्त्ये । ३ र-ण-तदस्तयुतः । ४ ण-कदर्यं कृपणं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यचपला । **दाम्भिको** बैडालव्रतिकादिः सोपधोधर्मचरणः । प्रायश्चित्तविशेषार्थं **शूद्रोच्छिष्टं** प्रतिषिध्यते । सर्वस्यैवोच्छिष्टभोजनप्रतिषेधात् । अन्ये तु शूद्रोच्छिष्टं स्थालीस्थं भोज्यान्नं शूद्रभुक्तशिष्टमुच्छिष्टमुच्यत इत्याहुः । पाठान्तरं तु "उच्छिष्टमगुरोस्तथेति"। उच्छिष्टमुच्यते यत्परस्य स्पर्शनादशुद्धं भुक्तोज्झितं च । आत्मीये ह्यभुक्तोऽज्झित एकग्रासाशनमेव स्यात् । न चैष शिष्टानां समाचारो यत्सकृदन्नं दत्तं भुक्त्वा पुनराचम्य पात्रान्तरे गृहीतं भुज्यते । तथा नाद्यादन्नम् । तथान्तरेऽभ्युत्थानादिक्रियान्तरस्य प्रतिषेधः । अत आतृप्तेः प्रागाचमनात्पश्चात्स्पर्शे न दोषः । सहभोजनं तु सत्यपि परस्य स्पर्शे पदार्थान्तरत्वान्नोच्छिष्टभोजनम् । अत्र पित्रा पुत्रादिभिः शिष्टं सह भुज्यते । तथा **चापस्तम्बादयो** देशग्रहणात्प्रसङ्गेन "अनुपनीतेन सह भोजनं" निन्दन्ति । नोपनीतेन । अस्मिंस्तु पक्षे विजातीयैः सह भोजनप्रतिषेधः । व्यवधानान्तरमाश्रयणीयम् । भुक्तोज्झितं तु धात्वर्थयोगादुच्छिष्टमन्यदीयमपि ॥ २११ ॥

चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः ॥
उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशम् ॥ २१२ ॥

स्मृत्यन्तरे विशेषः श्रूयते । "शैल्या नर्तकजीविनः" । **मृगयुर्**मृगव्याधः । आखेटकार्थं मांसविक्रयार्थं वा यो मृगान्हन्ति । **क्रूर** अनृजुप्रकृतिः दुष्प्रसादः । **उच्छिष्टभोजी** निषिद्धोच्छिष्टभोजी । **उग्रो** जातिविशेषः । राजेत्येतस्य वेदे प्रयोगो दृश्यते । "उग्रो मध्यमशीरि वेति" । न च तस्यान्यः प्रतिषेधोऽस्ति दोषप्रदर्शनप्रकारेण च न श्रूयते "राजान्नं तेज आदत्ते" इत्यर्थवादाच्च प्रतिषेधः । **सूतिकान्नं** सूतिकामुद्दिश्य यत्कृतं तत्कुलीनैरपि तदभोज्यम् । तदनाद्यम**निर्दशं** दशाहानि यावत् । तेन यद्यपि क्षत्रियादीनां दशाहादूर्ध्वमाशौचं तथापि दशाहानि न भोज्यम् । पाठान्तरं सूतकान्नमिति । सूतकशब्देन च तद्वन्तः पुरुषा लक्ष्यन्ते । येषां कुले सूतकं ते दशाहं न भोज्यान्ना इति । यस्मिन्पक्षे सर्वेषां दशाहं सूतकाशौचं तत्रायं प्रतिषेधः । यदा तु मातापित्रोः सूतकं मातुर्वेति पक्षस्तदा यावदाशौचं न भोज्यम् । अनिर्दशग्रहणमाशौचनिवृत्त्युपलक्षणार्थम् । तेन क्षत्रियादीना यस्य यावदाशौचकालः स तावत्कालमभोज्यान्नः । "सूतकान्नमनिर्दशमिति" पठितव्ये वृत्तानुरोधात्पर्याचान्तपदेन व्यवधानम् । अन्यैस्तु स्वतन्त्रमनिर्दशग्रहणं व्याख्यातम् । सूतकशब्देन आशौचकालोऽनुद्योत्यते । **अनिर्दशं** गवादीनां पयः **पर्याचान्तं** शौचाचमनव्यपेतमर्धभुक्ते केनचित्कारणेन यद्याचामति तदा पुनर्भुक्तोज्झितं नाशितव्यम् ॥ २१२ ॥

---

१ फ–सोपधियोगधर्मचरणः । २ फ–शल्यान्नर्तकजीविनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनर्चितं वृथामांसमवीरायाश्च योषितः ॥
द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् ॥ २१३ ॥

अर्चार्हस्य यदवज्ञया दीयते तदनर्चितम् । न तु सुहृदादेः । **वृथामांसं** देवाद्यर्चनशिष्टं यन्न भवत्यात्मार्थं यत्साधितम् । **अवीरा** स्त्री यस्या न भर्ता नापि पुत्रः । **द्विषच्छत्रुः** । **नगरी** नगरस्वाम्यराजाऽपि । अवक्षुतमुपरि यस्मिन्क्षवथुः कृतः ॥ २१३ ॥

पिशुनानृतिनोश्चान्नं क्रतुविक्रयकस्य च ॥
शैलूपतुन्नवायान्नं कृतघ्नस्यान्नमेव च ॥ २१४ ॥

पिशुनो यो विश्रब्धमर्थं कथितं भिनत्ति परच्छिद्रवादी वा परोक्षम् । **अनृती** कृतकौटसाक्ष्यः । **क्रतुविक्रयकः** क्रतुर्यज्ञस्तं कृत्वा विक्रीणीते क्रतुफलं मदीयं तवास्त्विति मूल्येन ददाति । यद्यपि परमार्थतः क्रतोर्विक्रयो नास्ति तथापि यस्यैवंविधा यात्राऽन्यविप्रलम्भेन वा प्रवृत्तिस्तस्य प्रतिषेधः । **शैलूषो** नटः भार्यापण्य इत्यपरे । **तुन्नवायः** सौचिकः । **कृतघ्नः** कृतमुपकारं यो नाशयति । प्रत्युतोपकर्तुरपकारे वर्तते न च शक्तः सन्प्रत्युपकारेऽपि ॥ २१४ ॥

कर्मारस्य निषादस्य रङ्गावतरकस्य च ॥
सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा ॥ २१५ ॥

कर्मारोऽयस्करः । **निषादो** दशमे वक्ष्यते । **रङ्गावतरको** नटगायनकेभ्योऽन्यो मल्लादिः । अथवा प्रतिरङ्गमुपतिष्ठते कुतूहली । **वेणु**वादित्रजीवितः । **शस्त्रविक्रयी** कृतस्य खड्गादेरकृतस्य वाऽऽयसो विक्रेता ॥ २१५ ॥

श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च ॥
रजकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥ २१६ ॥

आखेटकाद्यर्थं ये शुनो बिभ्रति ते **श्ववन्तः** । **शौण्डिका** मद्यव्यसनिनस्तत्पण्यजीविनो वा । चैलं वस्त्रं तन्निर्णेनेक्ति प्रक्षालयति । कारुकनामधेयमेतत् । **रजको** वाससां नीलादिरागकारकः । **नृशंसो** नृन्मनुष्याञ्छंसति स्तौति यो लोके बन्दीति प्रसिद्धः । अथवा निर्दयो नृशंसः उपपतिर्जारो भार्याया गृहे जारो वर्तते ॥ २१६ ॥

मृष्यन्ति ये चोपपतिं स्त्रीजितानां च सर्वशः ॥
अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च ॥ २१७ ॥

---

१ फ–विक्रयिणस्तथा । २ फ–यश्च । ३ फ–एवं विषयात्रा । ४ फ–रङ्गावतारकस्य । ५ श्लो. ८
६ फ–र–जीविनः ७ फ–रजकस्य । ८ फ–निर्णेक्ति; र–ण–निर्णेनिक्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वोऽविदितभार्याजारः । अयं तु विदित्वा क्षमते न भार्याया निग्रहं करोति । नापि तस्य अविदुषोऽन्यत्र गृहाज्जारिणो भोज्यान्नं नैवं स्त्रीजिताः । येषां भार्यैव गृहे कर्त्री हर्त्री च स्वयं परिजनस्यस्य च नेशस्तेन सर्वत्र तद्वशवर्तिनः । प्रेतान्नं मरणाशौचे तत्कुलीना अभोज्यान्नाः । अनिर्देशग्रहणं कालोपलक्षणार्थम् । यदाऽनिर्देशग्रहणं पूर्वत्र स्वतन्त्रमाशौचसंबन्धिनामविशेषेणान्नं प्रतिषेधति तदिह प्रेतान्नं कृतं यस्याप्याशौचं नास्ति सुहृद्बान्धवादेः । कारुण्याच्चतुर्थीश्राद्धादिप्रवृत्तस्य यदन्नं तन्न भोज्यम् । "दशाहिकं नावमिकं चतुर्थीश्राद्धमष्टमी "इत्यादिरामायणे वर्णितमन्यैरपि गृह्यकारैः । अतुष्टिकरं यस्मिन्भुज्यमाने चित्ततुष्टिर्न भवेत् ॥ २१७ ॥

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ २१८ ॥

अथेदानीमतिक्रमफलं दर्शयति । राजान्नभोजिनस्तेजोनाशः । एवं सर्वत्र द्रष्टव्यम् । सुवर्णकारादयः शब्दाः शिल्पिविशेपजीविनां वाचकाः । ये सुवर्णं जीविकार्थं घटयन्ति सुवर्णकारा उच्यन्ते । एवं रजकादिष्वपि द्रष्टव्यम् । चर्मावकृत्तं छिन्दति चर्मावकर्तिनः । तेन कर्मणा ये जीवन्ति तेषामेषा रूढिः । इह येषां पूर्वत्र प्रतिषेधो नास्ति केवलं दोषः श्रूयते तेषां तत एव प्रतिषेधोऽनुमेयः ॥ २१८ ॥

कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च ॥
गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ॥ २१९ ॥

कारुकाः सूपकारादयः नातिगर्हितकर्माणः । एष एतेषां शिल्पिभ्यो भेदः । प्रजाया विघातोऽनुत्पत्तिः ॥ २१९ ॥

पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ॥
विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥ २२० ॥

पूयतुल्यं चिकित्सकस्यान्नं भोजनम् । इन्द्रियं शुक्रम् । विष्ठामलमेकमेव॥२२०॥

य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः ॥
तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥ २२१ ॥

प्रतिपदनिर्दिष्टेभ्यो येऽन्येऽप्यभोज्यान्ना अस्मिन्प्रकरणे पठितास्तेषां यदन्नं तत्त्वगस्थिरोमादि । यस्तदीयायास्त्वचो भुक्ताया दोषः स एवान्नस्यापि ॥ २२१ ॥

---

१ फ–अविदितान्यगृहजारस्य । २ फ–सूपकारा ।

३ अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् ।
वैश्यान्नमन्नमित्याहुः शूद्रस्य रुधिरं स्मृतम् ॥ १ ॥ इति फ-पुस्तकेऽपरः पाठो दत्तः ।

For Private And Personal Use Only

भुक्त्वाऽतोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ॥
मत्या भुक्त्वाऽऽचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च ॥ २२२ ॥

त्र्यहं क्षपणमभोजनम् । अमत्याऽबुद्धिपूर्वम् । बुद्धिपूर्वे तु कृच्छ्रं चरेत् । तच्च कृच्छ्रं स्मृत्यन्तरैकवाक्यत्वात्तप्तकृच्छ्रम् । तत्र रेतोविण्मूत्रप्राशने तप्तकृच्छ्रमाम्नातम् । मत्या पाने पयोघृतमुदकं वायुः प्रतित्र्यहं तप्तातिकृच्छ्रः । ततोऽस्य संस्कार इति । अप्रकरणे च प्रायश्चित्तवचनं दोषातिशयदर्शनार्थम् । अन्यतमस्येतिषष्ठीनिर्देशात्परिग्रहदुष्ट एवेदं प्रायश्चित्तं मन्यन्ते न कालस्वभावसंसर्गदुष्टे । शुक्तपर्युषितादौ चतुर्विधं ह्यभोज्यम् । कालदुष्टं शुक्तपर्युषितादि । संसर्गदुष्टं मद्यानुगतादि । स्वभावदुष्टं लशुनादि । परिग्रहदुष्टं प्रकृताभोज्यान्नानां यत् । अत्रोच्यते । सत्यं । चतुर्विधमभोज्यं भवति । षष्ठीनिर्देशोऽप्यस्ति । किंतु यदि शुक्तादेर्नेदं प्रायश्चित्तं स्यात्तदिह प्रकरणे तेषामुपादानमनर्थकमेवापद्येत । पञ्चमे हि तयोः प्रतिषेधो नास्ति । तस्मादिह प्रायश्चित्तार्थमेवैवमादीनामुपादानम् । तत्र तर्हि किमर्थं ? तत्रैव वक्ष्यामः । यद्यपि 'गर्हितो नाद्ययोर्जग्धिः' 'अभोज्यानां तु भुक्त्वाऽन्नमिति' च तत्सर्वमेकादशे विभागतो निर्णेष्यते ॥ २२२ ॥

[4]नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ॥
आददीताममेवास्मादवृत्तावेकरात्रिकम् ॥ २२३ ॥

अविशेषेण शूद्रान्नं प्रतिषिद्धं तस्येदानीं विशिष्टविषयतोच्यते । अश्राद्धिनः । क्व पुनः शूद्रान्नं प्रतिषिद्धम् । " शूद्रस्योच्छिष्टमेव च " इत्यत्र । ननु च तत्र शूद्रस्योच्छिष्टं प्रतिषिद्धं नान्यदन्नम् । नेति ब्रूमः । एवं तत्र संबन्धः । शूद्रस्यान्नं नाद्यादुच्छिष्टमन्यस्यापि । यत्तु प्राग्व्याख्यातं तत्पूर्वेषां दर्शनमित्यस्माभिरपि संवर्णितम् । **अश्राद्धिनः** श्राद्धशब्देन पाकयज्ञादिक्रिया शूद्रस्य विहिता लक्ष्यते ततस्तत्क्रियाननुष्ठायिनः सच्छूद्रादन्यस्य यत्पक्वमन्नं तन्नाद्यात् । अश्रद्धिन इति वा पाठः । अश्रद्धावानित्यर्थः । तथा चोत्तरश्लोके श्रद्धायाः प्राधान्यमेवाह " वदान्यस्येति " । **आमं** शुष्कं धान्यं तण्डुलादि । **तथैकरात्रिकमे**कस्मिन्नहनि पर्याप्तं न बहु ॥ २२३ ॥

श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः ॥
मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ॥ २२४ ॥

---

१ फ–मन्यते । २ अ. ११ श्लो. ५६ । ३ अ. ११ श्लो. १५२ ।
४ [चन्द्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा तु मुक्तयोः ॥
अमुक्तयोरस्तगतयोरद्याच्चैव परेहनि ॥१॥*] इति फ पुस्तकेऽधिक पाठो दर्शितः ।
५ फ–यत्पक्वं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यो ब्राह्मणः सर्वगुणोपेतः श्रोत्रियग्रहणस्य प्रदर्शनार्थत्वात् । **श्रोत्रियो** विद्वान्विहितधर्मानुष्ठानपरः । किन्तु **कदर्यः** कृपणो मित्रं ज्ञातिमतिथिमर्थिनं नाभिनन्दति न कस्मैकिंचिदपि दातुमीहते । इतरो **वार्धुषिर्दुष्टकर्मा** वृद्धिजीवी । अथ **वदान्य** उदारः **श्रद्दधानो** गृह्यागतेषु परितुष्यति श्रद्धया भोजनादिना पूजयति । तयोरन्नं **देवाः समं** तुल्यमकल्पयन्व्यवस्थापितवन्तः । यदि नामैको गुणवान्साधुचरणस्तथापि कदर्यतयोपहतः । उक्तं हि " लोभः सर्वगुणानिव" इति । इतरो यदि नाम श्रद्दधानः तथापि कर्मदोषादप्रशस्तः । एवं मीमांसित्वा विचार्य देवैर्व्यवस्था कृता तुल्यमेतदिति ॥२२४॥

तान् प्रजापतिराहैत्य मा कृढ्वं विषमं समम् ॥
श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ॥ २२५ ॥

देवान्प्रजापतिरागत्याचष्ट **मा कृढ्व**मेवम् **विषमं** समीकरणमन्याय्यम् । कः पुनरनयोरधिक इति देवा ऊचुः । पुनः प्रजापतिराह । **वदान्यस्य** श्रद्धावतो यदन्नं तत्पूतं पवित्रं श्रद्धया वार्धुषेः । इतरद्यदन्नं श्रोत्रियस्य तत्कर्मणोपहतमप्रशस्तम् । देवप्रजापतिसंवादोऽर्थवादः । अश्रद्दधानस्य गुणवतोऽपि न भोक्तव्यमादरेण शूद्रस्यापि भोक्तव्यम् ॥ २२५ ॥

श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः ॥
श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः ॥ २२६ ॥

इष्टमन्तर्वेदि यत्क्रियते यज्ञादि कर्म । **पूर्तं** ततोऽन्यत्र संमानाद्यदृष्टार्थम् । ते श्रद्धया कर्तव्ये । तथा **स्वागतैश्च धनैः** शोभनेनागच्छन्ति यानि धनानि श्रुतशौर्यतपःकन्यादिना । एवम**क्षये**ऽक्षयफले भवतः । यानि तु न स्वागतानि नाक्षयफलानि न पुनर्निष्फलानि । तथाहि तैरपि स्वाम्यमुत्पद्यते । तेन च यागादयः कर्तव्याः । न च यागदानादिप्रकरणे कुसीदादिप्रतिषेधः श्रुतो येन तदङ्गं स्यात् । तस्माद्यावन्न स्वर्गोत्पत्तिहेतवः तैरर्जितेन धनेन यागादयः कर्तव्याः । फलस्य तु प्रकर्षापकर्षौ भवतः ॥ २२६ ॥

*के पुनस्ते प्रशस्तधनोपाया अत उच्यते

श्रुतशौर्यतपःकन्यायाज्यशिष्यान्वयागतम् ।
धनं सप्तविधं शुद्धं उभयोऽप्यस्य तद्विधः ॥ २२७ ॥

तत्र **श्रुततपसी** प्रतिग्रहनिमित्ते एकोऽपि प्रतिग्रहो निमित्तभेदाद्भेदेनोक्तः ।

---

१ र-श्रुतत्रशोर्यनया । २ फ-कन्यादीनि । * अतःपरं २२९ श्लोकान्तपर्यंतं श्लोकत्रयं मेधातिथिटीकायामेवोक्तम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिग्राह्यगुणा अपि सामर्थ्यात्तत्र द्रष्टव्या यदि नात्यन्तदुष्टो दाता भवति दायागतं शुद्धं भवति। **याज्यशिष्य**शब्दाभ्यां याजनाध्यापने गृह्येते। **अन्वयागतं** पितृपैतामहादि। कन्यादानकाले श्वशुरगृहाल्लब्धम्। **शौर्येण** क्षत्रियस्य। कन्यान्वयौ सर्वसाधारणौ।

कुसीदकृषिवाणिज्यशिल्पसेवानुवृत्तितः ।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ॥ २२८ ॥

सेवा प्रेष्यकरत्वं यथेच्छविनियोज्यताऽनुवृत्तिः प्रियतानुकूला। तत्र कुसीदकृषिवाणिज्यान्यवैश्यस्य। वैश्यस्य प्रशस्तान्येव। **सेवा** द्विजातिशुश्रूषा शूद्रस्य प्रशस्तैव। अन्या तु तस्य निन्दिता। **शबल**ग्रहणेनाचिरस्थायिता फलस्योच्यते। यावज्जीवं तत्फलं भवति ॥ २२८ ॥

पार्श्विकद्यूतचौर्यार्तिप्रतिरूपकसाहसैः ।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ॥ २२९ ॥

पार्श्विकः पार्श्वस्थः उत्कोचादिना धनमर्जयति। ज्ञात्वा धनागमं कस्यचिदहं ते दापयामि मह्यं त्वया किंचिद्दातव्यमिति यो गृह्णाति स पार्श्विकः। न कर्ता कारयिता तटस्थो न त्वेज्ञतया गृह्णाति। यथा च गृहीत्वाऽधमर्णाय प्रतिभूत्वेनावतिष्ठते। **प्रतिरूपको** दाम्भिकः। कुसुम्भाद्युपहितकुङ्कुमादिविक्रयो **व्याजः**। **आर्तिः** परपीडा। प्रच्छन्नहरणं **चौर्यम्**। प्रसभं **साहसम्**। ननु चौर्यसाहसाभ्यां स्वाम्यमेव नास्ति तन्निमित्तेष्वपठितत्वात्। "स्वामीरिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति"। तथा "विद्याशिल्पं भृतिमेवे"त्यादि। तथा "सप्त वित्तागमा धर्म्या" इति च। अथास्मादेव वचनात्स्वाम्यकारणत्वमनयोरिति। कथं तर्हि बलाद्भुक्तं न जीर्यतीति।

केचित्तावदाहुः। नैवायं पाठोऽस्ति "द्यूतचौर्यार्त्तीति"। शौर्यार्तीति। अपि तु वैरिणः सकाशाद्यद्गृह्यते संधानकाले यद्येतावद्ददासि तदा त्वया संधिं करोमि शक्तिविहीनतया ददाति। साहसमपि न प्रसह्य हरणं किंतर्हि यत्प्राणसंदेहेनार्ज्यते पोतयात्रतया रहसि राजप्रतिषिद्धप्रतिक्रयेण च। अन्ये तु मन्यन्ते। नैव बलादपहरणेन स्वाम्यं भोगेन वा जरणं विरुध्यते यतो बलं प्रथममपहारकाले त्वसत्यपि बल उपेक्षया भोगस्तत्र स्वाम्यम्। यत्र त्वारम्भात्प्रभृति सर्वकालिको बलोपभोगस्तत्र जीर्यतीति कथ्यते। तस्मादुभयमविरुद्धम्।

---

१ णक्षर–दायागतः शुद्धो भवति। २ *फ–शौर्याति। फ–द्विजातीनां। ३ फ–च। ४ गौतमीये अ. १० सू. ३९। ५ अ० १० श्लो० ११६। ६ अ० १० श्लो० ११५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदं युक्तं यच्चौर्यसाहसाभ्यां स्वत्वानुत्पत्तिपाठविभागकृतां अन्यैश्च स्मृतिकारैः स्वत्व-हेतुष्वपरिगणनात् ।। २२९ ।।

दानधर्मं निषेवेत नित्यमैष्टिकपौर्तिकम् ।।
परितुष्टेन भावेन पात्रमासाद्य शक्तितः ।। २३० ।।

दानधर्मश्च तडागादिः । समाहारद्वन्द्वः । अथवा दानं च तद्धर्मश्चासाविति[1] धर्मग्रहणेन प्रीत्यादिना नियमभावमाह । भावेनं तुष्टेन प्रसन्नेन चित्तेन पात्रमासाद्य व्रतादिदानं च । एवं पौर्तिकं बहिर्वेदिकम् ।। २२७ ।।

यत्किंचिदपि दातव्यं याचितेनानसूयता ।।
उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः ।। २३१ ।।

यत्किंचित्स्वल्पमपि याचितेनाभ्यर्थितेन दातव्यम् । पात्रापात्रसंदेहे असति निश्चये किंचिद्दातव्यं नाति बहु । वचनाच्च संदेहे न दातव्यम् । उत्पत्स्यते कदाचित्पात्रमसौ भविष्यति । किंभूतं यत्पात्रं तारयति रक्षति सर्वतो नरकपातहेतोः सर्वस्मादेनसः। यदुक्तं "वेदतत्वार्थविदुषे ब्राह्मणायेति" तत्रायं संदेहाश्रय ईषद्द्रव्यविषयोऽपवादः ।।

वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।। २३२ ।।

तृप्तिः क्षुत्पिपासाभ्यामपीडनम् । तच्चाढ्यस्यारोगस्य च भवति । तेन बहुधनत्व-मरोगता च फलमुक्तं भवति । अक्षय्यं सुखम् । अविशेषितत्वान्नोपकरणं सुखं प्रतीयते अक्षय्यं यावज्जीविकमित्यर्थः । अन्नदःसक्त्वोदनादि सिद्धमन्नमामं च तण्डुलादि । दीपस्य दानं चतुष्पथे ब्राह्मणसभायां वा ।। २३२ ।।

भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ।।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।। २३३ ।।

भूमेराधिपत्यं प्राप्नोति । हिरण्यं सुवर्णम् । रूप्यद उत्तमं रूपं लभते ।। २३३ ।।

---

१ [पात्रभूतो हि यो विप्रः प्रतिगृह्य प्रतिग्रहम् ।
असत्सु विनियुञ्जीत तस्मै देयं न किंचन ॥ १ ॥]
[संचयं कुरुते यस्तु प्रतिगृह्य समंततः ।
धर्मार्थं नोपयुक्ते च न तं तस्करमर्चयेत् ॥२॥ इति फ पुस्तकेऽधिकः पाठः ।

२ ण-र-क्ष-समाहारादिद्वन्द्वः । ३ फ-विना । ४ फ-भावे । ५ फ-अनसूयया । ६ ण-ड-र-संदेहात । ७ अ० ३ श्लो० ९६ । ८ फ-अक्षय्यं । ९ फ-च । १० क-ड-ण-र-क्ष-रूपदो ।

For Private And Personal Use Only

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥
अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् ॥ २३४ ॥

चन्द्र इव लोक्यते सर्वस्य प्रियदर्शनो भवति । इतिहासदर्शने चन्द्रलोको नाम स्वर्गस्थानविशेषस्तमाप्नोति । **अश्विनामश्ववतां सालोक्यं** बह्वश्वतां प्राप्नोति । दर्शने पुनरश्विनोर्लोकमाप्नोति । **अनड्वान्**पुङ्गवः शकटवहनसमर्थस्तं ददतः **पुष्टा** महती श्रीर्गोजाविधनधान्यादिसंपद्भवति । **ब्रध्न** आदित्यस्तस्य **विष्टपं** स्थानमाप्नोति । महातेजाः सर्वस्योपरि भवति।स्वर्गो वा ब्रह्मविष्टपम् । स्मृत्यन्तरेऽनसो विशेषाश्रयः फलविशेषः श्रूयते ॥
"हेमशृङ्गी रूप्यखुरा सुशीला वस्त्रसंवृता । सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥"

सुदक्षिणेति पाठेऽन्यदपि सुवर्णादि तत्र दातव्यम् । शोभनार्थे वा सुशब्दः पठितव्यः । सा गौः शोभना दक्षिणादीनाम् । कांस्योपदोहेति पाठान्तरम् । कांस्यं नाम परिमाणविशेषः । तत्रोपदुह्यते बहुक्षीरेत्यर्थः । "मुक्त्वा लाङ्गलभूषितां भूमिं तु रूपसंच्छन्नां कृत्वा" इत्यादिस्मृत्यन्तरदृष्टो विधिः फलविशेषार्थिनाऽऽश्रयणीयः । तथा
"कपिला चेत्तारयति भूय आ सप्तमात्कुलात् । सवत्सा रोमतुल्यानि युगान्युभयतोमुखी ॥"

वत्सवत्याः कपिलाया दान एतत्फलम् । उभयतोमुखी दीयमाना रोमतुल्यानि वर्षसहस्राणि स्वर्गः प्राप्यते **तारयति** पापान्मोचयति । भारते सर्वफलं गोदानमुक्तम् । (अनु. १०६–१०९ । २३९(३१–५०); अश्व १०२९)वार्यादीन्यपि स्वर्गफलानि श्रूयन्ते ।

"भूमिपश्वन्नवस्त्राम्भस्तिलसर्पिष्प्रतिश्रयान् । नैवेशिकस्वर्णपुर्यौ दत्त्वा स्वर्गे महीयते ॥"
नैवेशिकं वेश्म ॥ २३४॥

यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ॥
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टिताम् ॥ २३५ ॥

ऐश्वर्यमीश्वरत्वं प्रभुत्वम् । सुखित्वं **सौख्यम्** । **धान्यानि** व्रीहिमाषमुद्गादीनि । तिलानां फलान्तरमुक्तम् । **ब्रह्म** वेदः तद्ददाति योऽध्यापयति व्याख्याति च । **ब्रह्मसार्ष्टिता** । अर्षणमृष्टिः । समा ऋष्टिर्यस्य असौ सार्ष्टिः । छान्दसत्वात्समानस्य स भावः । ऋषि गतौ । अर्षणं वा सार्ष्टिः । तद्भवा सार्ष्टिता । उभयथाऽपि ब्रह्मणः समानगतित्वमेतत्तुल्यत्वमित्युक्तं भवति ॥ २३५ ॥

१ क–ख–ग–क्ष–व्याख्यायति । २ ग–र–ब्रह्मसार्ष्टितानां रेषणम् ।

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।
वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम् ॥ २३६ ॥

पूर्वस्य विधेरर्थवादः । दीयन्त इति दानानि देयद्रव्याणि । दानक्रियैव वा दानम् । **ब्रह्मदानं** वेदाध्ययनव्याख्याने । वार्यादीनां सर्वदानोत्तमत्वाग्द्रहणम् ॥ २३६ ॥

येन येन तु भावेन यद्यद्दानं प्रयच्छति ॥
तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः ॥ २३७ ॥

भावशब्दोऽयं चित्तधर्मे वर्तते । यादृशेन भावेन प्रसन्नेन चित्तेन श्रद्धयाऽऽदरेण ददाति तादृशेनैव लभते । अथाश्रद्धयाऽवज्ञया क्लिष्टं परिभूय ददाति सोऽपि तथैव प्राप्नोति । यद्यदपि न द्रव्यजात्यभिप्रायम् । किंतर्हि फलं ? एतदुच्यते । तां तां प्रीतिं तत्तद्द्रव्यसाध्यां प्राप्नोति । जात्यभिप्राये ह्यातुरायौषधदाने औषध एवं लभ्येत । तच्चाव्याधितस्यानुपयोगीति सोऽप्याक्षिप्येत । तस्मात् यादृश्युल्लासाद्यस्य प्रीतिस्तादृशीं चैव प्राप्नोति । अतश्च सर्वदैवौषधदान अरोगित्वमुक्तं भवति । अथवा इदं मे स्यादिति या फलकामना स भावः । यत्फलमभिसंधाय यद्यद्द्रव्यं ददाति तत्तत्प्राप्नोति । तेनैव भावेन तयै-वेच्छया यदेवेच्छति तदेव लभत इत्युक्तं भवति । सर्वफलत्वं सर्वद्रव्याणां प्रदर्शितं भवति ॥ २३७ ॥

योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव वा ॥
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥ २३८ ॥

पूजापूर्वकं दातव्यम् । तादृशमेव च प्रतिग्रहीतव्यं नावज्ञया दातव्यमिति श्लोकस्य तात्पर्यम् । अर्चितमिति क्रियाविशेषणम् ॥ २३८ ॥

न विस्मयेत तपसा वदेदिष्ट्वा च नानृतम् ॥
नार्तोऽप्यपवदेद्विप्रान्न दत्वा परिकीर्तयेत् ॥ २३९ ॥

तपसाऽनुष्ठितेन विस्मयं न कुर्यात् । अतितीव्रं तपो मया कृतं सुदुश्चरमित्येवं मनसि न कर्तव्यम् । इष्ट्वा यागं कृत्वाऽनृतं न वदेत् । अविशेषेण प्रतिषिद्धस्यापि पुरुषार्थ-तया पुनः प्रतिषेधो यागाङ्गत्वज्ञापनार्थः । प्रतिषेधातिक्रमे हि ज्योतिष्टोमादेरङ्गहीनता भवति । **आर्त्तः** पीडितोऽपि ब्राह्मणैर्न **तानपवदेन्न** निन्देत । **दत्वा** गवादि द्रव्यं न कस्यचिदग्रतः परिकीर्तयेदिदं मया दत्तम् ॥ २३९ ॥

---

१ **क–ण–क्ष**–ह्यातुरायौषधवम् । २ **फ**–लभ्यते तत्तद्वाच्या तस्यानुपयोगीति सोऽप्याक्षिपेत् । तथा यादृचस्या । ३ **क्ष**–अरोगितत्वम् । ४ **फ**–च । ५ **ण**–स्वर्गे । ६ **फ**–कुर्यादिति ।

यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ॥
आयुर्विप्रापवादेन दानं च परिकीर्तनात् ॥ २४० ॥

पूर्वस्य प्रतिषेधस्यार्थवादोऽयम् । **अनृतेन** हेतुना **यज्ञः क्षरति** स्रवति निष्फलो भवति । यदर्थंकृतं तन्न संपद्यते । एवं सर्वत्र ॥ २४० ॥

धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः ॥
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥ २४१ ॥

महति दाने महति च तपसि महति च यज्ञे ज्योतिष्टोमादौ यद्यसमर्थस्तदा नोदासीनेन भवितव्यम् । किंतर्हि **शनैः** शनैः स्वल्पेन दानेन स्वल्पेन तपसा यथाशक्ति परोपकारेण जपहोमाभ्यां स्मार्ताभ्यां धर्मः संचेतव्यो यथा मृत्संघातं **पुत्तिकाः** पिपीलिकाः संचिन्वन्ति । **परलोकसहायार्थ**मिति धर्मफलानुवादः । **सर्वभूतान्यपीडयन्** पीडया धर्मार्थया भूतानां पीडा न कर्तव्या ॥ २४१ ॥

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ॥
न पुत्रदारं न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥ २४२ ॥

भूतानुवादोऽयम् । **अमुत्र** जन्मान्तरे **सहायार्थं** नरकादिदुःखादुद्धरणार्थं न कस्यचित्सुहृद्बान्धवादेः शक्तिरस्ति । केवल एव जीवता यो धर्मः कृतः स तमुद्धरति ॥ २४२ ॥

एकः प्रजायते जन्तुरेक एव प्रलीयते ॥
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥ २४३ ॥

यथा **जन्तुः** प्राण्येक एव **जायते** न सुहृद्बान्धवादिना सहैक **एव प्रलीयते** न सुहृदो बान्धवाः सहमरणमनुभवन्ति । यदि नाम भार्याऽन्यो वा भक्तो जनस्तन्मरणकाल आत्मानं हन्यात्तथापि पृथगेवासौ मरणक्रिया । अनेया न गर्भैक्यमत्रिवदनुभवन्ति । एवं सुकृतदुष्कृते अपि पृथगेवानुभवन्ति । ननु च 'न पुत्रदारम्' इत्युक्तं यावता पुत्रः श्राद्धादिक्रियया पितुरुपकरोत्येव मृतस्यैवं भार्याऽपि । सत्यम् । धार्मिकस्यैव तादृशः पुत्रो भवतीति तत्परमेतत् । यथा जीवतः कस्यचिद्धस्तग्राहिकया कश्चित्सहायो भवत्येवं मृतस्य पुत्रो धर्मद्वारेणैवोपकरोति ॥ २४३ ॥

मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ॥
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥ २४४ ॥

---

१ फ–पुत्रदारा । २ र–ण–नयानयं गर्भोरोदत्रिवदनुभवति । ३ फ–लोष्ट । ४ र–ण–धर्मस्तिष्ठति केवलः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सह गच्छति । इदं प्रत्यक्षसिद्धप्रसंख्यानार्थमुच्यते । मृतस्य शरीरं क्षितावुत्सृज्य काष्ठमिव निष्प्रयोजनं विमुखा बान्धवाः प्रतिगच्छन्ति । **धर्मस्तु** केवलं **पुरुषमनुगच्छति** ॥ २४४ ॥

तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः ॥
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ २४५ ॥

उपसंहारोऽयम् । **दुस्तरं तमः** कृच्छ्रेण यत्तीर्यते । **तमो** दुःखम् । तदपि धर्मेण सहायेन सुतरं भवति । न हि तादृशे तमसि मज्जतीत्यर्थः ॥ २४५ ॥

धर्मप्रधानं पुरुषं तपसा हतकिल्बिषम् ॥
परलोकं नयत्याशु भास्वन्तं खशरीरिणम् ॥ ४४६ ॥

धर्मः प्रधानं यस्यासौ **धर्मप्रधानो** धर्मपरायणो यथाविहितकर्मानुष्ठायी[1] । **तपसा हतकिल्बिषं** कथंचित्प्रमादकृतव्यतिक्रमे[2] तपसा प्रायश्चित्तेन हतकल्मषं[3] शास्त्रव्यतिक्रमे जातोऽसौ दोषस्तस्मिंस्तत्प्रायश्चित्ते नष्टे **परलोकं नयति भास्वन्तं** परलोकं देवस्थानं स्वर्गादि नयति प्रापयति। कः? प्रकृतत्वाद्धर्म एव। शरीरिणं पुरुषं खेन शरीरेण शरीरी । न यथाऽन्येषां पुरुषाणां पाञ्चभौतिकं शरीरमेवं तस्य । किं तर्हि ? खमेव शरीरं ब्रह्मविभुत्वमनेनोच्यते ॥ २४६ ॥

उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत्सह ॥
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥ २४७ ॥

बहुप्रकारत्वादुत्तमस्य तदपेक्षा वीप्सा । कश्चिज्जात्योत्कृष्टः कश्चिद्विद्यया कश्चिच्छीलेनाथवा संबन्धिभेदाद्यः कश्चित्संबधः केनचिदुत्तमेन योग्यः । **उत्तमैरुत्तमै**[4]र्जात्यादिभिरुत्कृष्टैः कन्यादानादिलक्षणान्**संबन्धानाचरे**त्कुर्यान्निनीषुर्नेतुं प्रापयितुमिच्छुः **कुलमुत्कर्षं** श्रेष्ठ्य**मधमानधमांस्त्यजेत्** । उत्तमैरेव विधानादधमानां त्यागे सिद्धे उत्तमासंभवे मध्यमानुज्ञानार्थं त्यागवचनम् । **अधमा** निकृष्टाः ॥ २४७ ॥

उत्तमानुत्तमानेव गच्छन् हीनांस्तु वर्जयन्[5] ॥
ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम् ॥ २४८ ॥

उत्तमान्गच्छंस्तैः सह संबन्धं कुर्वन्**ब्राह्मणः श्रेष्ठतामेति** । ब्राह्मणग्रहणं क्षत्रियवैश्ययोरपि प्रदर्शनार्थम् । **प्रत्यवायेन** विपरीताचरणेन हीनैः सह संबन्धिनः प्रातिलोम्येन **शूद्रतां** गच्छति । जातेरनपायस्तां तुल्यतां प्राप्नोतीत्युक्तं भवति ॥ २४८ ॥

---

१ र–ड–धर्मानुष्ठायी । २ क्ष–प्रमादव्यतिक्रमे । ३ फ–किल्बिषम् । ४ क–ड–फ–क्ष–उत्तमैश्च ।
५ फ–उत्तमानुत्तमाम् गच्छन् हीनान् हीनांश्च वर्जयन् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन् ॥
अहिंस्रो दमदानाभ्यां जयेत्स्वर्गं तथाव्रतः ॥ २४९ ॥

कर्तव्येषु दृढनिश्चयो **दृढकारी** । यत्करोति तदवश्यं समापयति न पुनः कार्यमारभ्यासमाप्य निवर्तते नानवस्थित इत्यर्थः । तदुक्तं "प्रारब्धस्यान्तगमनम्" । **मृदुर**निष्ठुरः **क्रूराचारैः** स्तेनादिभिर्न संबन्धः । तैः सह संबन्धमकुर्वन् यथा **दमदानाभ्यां स्वर्गं जयेत्**प्राप्नुयात् तथा॑व्रतः । एतद्व्रतं नियमं धारयन् । दमस्य पृथगुपादानाद्दान्तो द्वन्द्वसहिष्णुर्द्रष्टव्यः ॥ २४९ ॥

एधोदकं मूलफलमन्नमभ्युद्यतं च यत् ॥
सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् ॥ २५० ॥

एध इन्धनं काष्ठादि । **अन्नं** पक्वमामं वा । **अभ्युद्यतम**भिमुखमुपनीतम् । एतत्सर्वतः प्रतिग्रहीतव्यम् । पतिताभिशस्तचण्डालादिप्रतिलोमवर्जं शूद्रादन्यस्माद्वा ईषत्पापकर्मणः । मधु माक्षि॑कम् । **अभयं दक्षिणेव** दृष्टान्तार्थमेतत् । प्रतिग्रहो हि परकीयस्य द्रव्यस्य तदिच्छया स्वीकारो न चात्र॑रूपता (?) । न ह्यत्र कस्यचित्स्वाम्यं निवर्तते न च कस्यचिदुपजायते । अतः स्तुत्या दक्षिणाशब्दप्रयोगः । यथा चण्डालादिभ्योऽप्यरण्ये कान्तारे वा रक्षा चौरादिभ्योऽङ्गीक्रियमाणा न दोषायैवमेतदेधादिगृह्यमाणं न दोषाय । अनापदि चायं विधिः । आपदि तु चण्डालादिभ्योऽपि वक्ष्यति । अभ्युद्यतशब्दश्चान्नेनैव सह संबध्यते प्रत्यासत्त्या नैधादिभिः । अत एधादिषु याञ्च्ञाऽविरुद्धा । "धार्मिकेभ्यो द्विजातिभ्यः कर्तव्यस्तु परिग्रहः" इत्यधार्मिकेभ्यो द्विजेभ्यः शूद्राच्चाप्राप्तः । इष्यते च द्रव्यविशेषोपयाञ्च्ञा । तदर्थमिदम् ॥ २५० ॥

आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदिताम् ॥
मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्मणः ॥ २५१ ॥

एधादतिरेकेण यदन्यद्द्रव्यं तस्याप्यनेन विशेषेण ग्राह्यतोच्यते । भिक्षाशब्दश्च प्रशंसायां प्रयुक्तो न भिक्षैव विवक्षिता यद्यप्ययं सिद्धान्नाल्पतावचनः । भिक्षा किल स्वल्पत्वान्नातीव दोषावहा । ब्रह्मचारिणश्च सार्ववर्णिकी विहिता । एवमन्यदप्यनेन विशेषेण तत्तुल्यं दृष्टम् । भिक्षाशब्दस्यैवं॑विधार्थविवक्षया प्रयोगः ।

तथाहि **महाभारते** (१।२०९।१)

" गत्वा ह्युभौ भार्गवकर्मशालां पार्थौ पृथां प्राप्य महानुभावौ ।
तौ याज्ञसेनीं परमप्रतीतौ भिक्षेत्यथावेदयतां नराग्र्यौ " इति ।

---

१ फ-संबंध न कुर्वन् । २ ण-क्ष-तथा च व्रतः । ३ फ-माक्षिको । ४ फ-ड-क्ष-अत्र रूपता; ण-वध्म चैवंरूपता । ५ फ-भिक्षेयथा ।

For Private And Personal Use Only

आहृतोपहृता तं देशमानीता यत्र प्रतिग्रहीता स्थितः । अभ्युद्यताऽग्रे स्थापितवचनेनेङ्गितेन वा गृह्यतामिति निवेदिता । पुरस्तात्पूर्वमप्रचोदिताऽयाचिता प्रतिग्रहीत्रा । स्वयं परमुखेन वा दात्रा पूर्वं नोक्तमिदं मे द्रव्यमस्ति तत्प्रसादमाश्रित्य गृह्यतामिति केवलमतर्कितोपपादिता तत्काल एव दर्शिताभिप्राया तादृशीं भिक्षां प्रजापतिर्हिरण्यगर्भो मेने मन्यते स्म । किमिति दुष्कृतकर्मणोऽपि सकाशाद्ग्राह्येति । दुष्कृतं पापं कर्म यस्यासौ दुष्कृतकर्मा ॥ २५१ ॥

नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च ॥
न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥ २५२ ॥

अर्थग्रहणनिन्दार्थवादः । अथ यो यत्रैतामवधीरयति **तस्य पितरः** श्राद्धं **नाश्नन्ति** न प्रतीच्छन्तीति । **अग्निश्च** देवेभ्यो **हव्यं न वहति** पित्र्याद्दैवाच्च कर्मणो न फलं लभ्यत इत्यर्थः ।

अत्र कश्चिदाह । अनुपयुज्यमानमपि दातुरनुग्रहार्थमवश्यमीदृशं ग्रहीतव्यं तत्त्वयुक्तम् । निर्दोषिताऽस्यायाचितप्रतिग्रहस्योच्यते । प्रतिप्रसवो ह्ययम् । प्रतिषिद्धस्य च प्रतिप्रसवो भवति । लौकिक्या चार्थितया प्राप्तिः प्रतिषिद्धा सैव प्रतिप्रसूयते ॥ २५२ ॥

शय्यां गृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि ॥
धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत् ॥ २५३ ॥

शय्यादीन्यनाहृतान्यपि **न निर्णुदेन्न** प्रत्याचक्षीत । यदि गृहेऽवस्थितानि द्रव्याणि कश्चिदुच्यते चेदमिदमाहराम्येतत्प्रतीष्यतां तदा न प्रत्याख्येयानि ॥ २५३ ॥

गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन् देवतातिथीन् ॥
सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥ २५४ ॥

गुरव उपदेशातिदेशैर्बहवः । भृत्या आश्रिताः स्मृत्यन्तरे तु संख्याताः ।

"वृद्धौ तु मातापितरौ भार्या साध्वी सुतः शिशुः" । तानुद्धर्तुमिच्छुः क्षुधावसन्नान् देवतातिथींश्चार्चिष्यन्नित्यकर्मसंपत्त्यर्थमित्यर्थः । **सर्वतः प्रतिगृह्णीयात्**साधुभ्योऽसाधु-

---

१ फ-प्रतिग्राही । २ दुःष्कृतकर्मा ।

३ [**चिकित्सककृतघ्नानां शिल्पकर्तुश्च वार्धुषेः ॥**
षण्ढस्य कुलटायाश्च उद्यतामपि वर्जयेत् ॥ १ ॥]
[**न विद्यामानमेवं वै प्रतिग्राह्यं विजानता ॥**
विकल्प्याविद्यमाने तु धर्महीनः प्रकीर्तितः ॥ २ ॥]

४ क्ष-क-ड-अर्थग्रहणनिन्दा— । ५ फ-निर्नुदेर । ६ र-प्रमीष्यतां ३ फ-'प्रभृष्यता' । ७ फ-सर्वतः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यश्च । **न तु तृप्येत्स्वयं ततः** तृप्तिः क्षुन्निवृत्तिरुपभोगश्च तन्न कुर्यात् । गुर्वादिप्रयोजनमेव तद्गृहीतव्यं न त्वात्मार्थम् ॥ २५४ ॥

कथं तर्ह्यात्मा यापयितव्योऽत आह ,

गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् ॥

आत्मनो वृत्तिमन्विच्छन् गृह्णीयात्साधुतः सदा ॥ २५५ ॥

अभ्यतीतेष्वतीतेषु विना वा तैर्जीवन्तोऽपि यदि पृथग्वसन्ति । गुरुग्रहणं सर्वेषां च भृत्यानामपि प्रदर्शनार्थम् । **आत्मनो वृत्तिं** जीवनं प्रतीच्छन्नर्थयमानः **साधुभ्यो** धार्मिकेभ्यः प्रति**गृह्णीयात्** । जातेरत्रानुपादानाच्छूद्रादपि धार्मिकादस्ति परिग्रहः । तदुक्तं " नाद्याच्छूद्रस्य " इत्यादि ॥ २५५ ॥

आर्धिकः कुलमित्रं च गोपालो दासनापितौ ॥

एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥ २५६ ॥

अर्धसीरी **अर्धिकः** कुटुम्बी भूमिकर्षक इति य उच्यते । **गोपालदासौ** संबन्धिशब्दौ । यो यस्य गाः पालयति स तस्य भोज्यान्नः । **यश्चात्मानं निवेदयेत्** । अहं त्वच्छरणः त्वयि विश्रब्धो वत्स्यामीत्येवं य आत्मानमर्पयति सोऽपि भोज्यान्नः ॥ २५६

यादृशोऽस्य भवेदात्मा यादृशं च चिकीर्षितम् ॥

यथा चोपचरेदेनं तथाऽऽत्मानं निवेदयेत् ॥ २५७ ॥

आत्मनिवेदनमेव व्यक्तीकरोति । **अस्य शूद्रस्य यादृश आत्मा भवेत्** यत्कुलीनो यद्देशो यच्छिल्पश्च यच्चिकीर्षितम् । अनेककार्येण त्वामहमाश्रितो धर्मेण अन्येन वा प्रयोजनेन राजकुलरक्षादिना । **यथा चोपचरे**च्छिल्पेनानेन त्वां सेवे पादवन्दनादि गृहकृत्यकरत्वे सर्वस्मिन्निवेदित आत्मा निवेदितो भवति । अन्ये तु " आत्मा वै पुत्रनामासि " इत्यपत्यवचनमात्मशब्दं मन्यमानाः यस्य शूद्रस्य कामतः प्रवृत्ता दुहिता विवाह्यते तस्यानेन भोज्यान्नतोच्यत इत्याहुः । तदयुक्तम् । न तावदयमात्मशब्दो दुहितरि विस्पष्टं प्रयुक्तः । पुत्रशब्दो हि पुंस्येव प्रसिद्धतरः । न च परोक्षशब्दोपदेशेन किंचित्प्रयोजनम् । एतावदेव वक्तुं युक्तं दद्याद्दुहितरं च य इति । अन्ये त्वर्धिकादिग्रहणं शूद्रोपलक्षणार्थं वर्णयन्ति । तेन पारशवस्य श्वशुरस्य च भोज्यान्नता सिद्धा भवति ॥ २५७ ॥

---

१ र-ण-सर्वेमाश्च । २ क्ष-ण-सर्वेषांच गुरुग्रहणम् । ३ फ-अनुपादाच्छूद्र । ४ फ-यच्छिल्पं । ५ ड-ण-क्ष-र-प्रवृत्तः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योऽन्यथासन्तमात्मानमन्यथा सत्सु भाषते ॥
स पापकृत्तमो लोके स्तेन आत्मापहारकः ॥ २५८ ॥

अन्यथाभूतमधार्मिकं **सन्तं सत्सु** शिष्टेष्वन्यथा **भाषते** धार्मिकोऽहमिति। अन्येन वा प्रयोजनेन चाश्रितोऽन्यद्दर्शयति स सर्वेषां पापकृतामधिकतमः पापकृत्। **स्तेन**श्चौरः। **आत्मापहारको**ऽन्यश्चौरो द्रव्यमपहरत्ययं पुनरात्मानमेवेति निन्दातिशयः[1]॥ २५८॥

वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः ॥
तांस्तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः ॥ २५९ ॥

शब्दार्थयोर्नित्यसंबन्धाद्वाचि शब्देऽर्था **नियता** उच्यन्ते। **वाङ्मूला** वक्तुः स्वाभिप्रायप्रकाशनस्य तदधीनत्वात्तन्मूला उच्यन्ते। वाचो **विनिःसृताः** संभूताः श्रोतुरपि प्रतिपत्तेस्तत्तुल्यत्वाद्वाग्विनिःसृता उच्यन्ते। न चात्र पौनरुक्त्याशङ्कापरिहारे प्रयतितव्यम्। अनुवादत्वादस्य यथाकथंचिद्वस्तुपरिहारत्वात्। तां वाचं यश्चोरयति मुष्णात्यन्यदुक्त्वाऽन्यदनुतिष्ठत्यन्येनाभिप्रायेण संगच्छतेऽन्यच्च दर्शयति स **सर्वस्तेयकृत्**। नास्ति तद्द्रव्यं सुवर्णादि यत्तेन नापहृतं भवतीति निन्दार्थवादोऽनृतवचनस्य ॥ २५९॥

महर्षिपितृदेवानां गत्वाऽऽनृण्यं यथाविधि ॥
पुत्रे सर्वं समासज्य वसेन्माध्यस्थ्यमास्थितः[2] ॥ २६० ॥

गृहस्थस्यैवेदं प्रकारान्तरमुच्यते। महर्षीणामानृण्यं स्वाध्यायेन पितॄणामपत्योत्पादनेन देवानां यज्ञैर्यथोक्तं "त्रिभिर्ऋणैर्ऋणवा" इति[3] **गत्वा** कृत्वैतत्त्रयं **पुत्रे** प्राप्तव्यवहारे सर्वगृहकुटुम्बव्यवहारं **समासज्य** संन्यस्य वसेद्गृह एव **माध्यस्थ्यमास्थित**स्त्यक्ता[4]हंकार इदं मे धनमिदं मे पुत्रदारमिदं मे दासीदासमिति स्वबुद्धिं संत्यज्यासीत। नाहं कस्याचिन्न कश्चिन्ममेति त्यक्तस्वतृष्णता माध्यस्थ्यम्। अयं च संन्यासः कामानां च दृष्टानां च कर्मणां सर्वेषामुत्तरत्र दर्शयिष्यामः ॥ २६०॥

एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनि ॥
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति ॥ २६१ ॥

कृते सर्वकर्मसंन्यास इदं तस्य विशेषतः कर्तव्यम्। **एकाक्य**सहायः सन्नविद्यमानसंभाषणोऽनाकुले **विविक्ते** निर्जने रहसि **चिन्तये**द्ध्यायेद्**हितमात्म**न्युपनिषत्सु या[5] ब्रह्मोपासना विहितास्ता अभ्यसेत्। तच्चिन्तया तदभ्यासे **परं श्रेयो** मोक्षाख्यम**धिगच्छति** प्राप्नोति ॥ २६१ ॥

---

१ फ–निन्दाशयः। २ फ–माध्यस्थमाश्रितः। ३ फ–त्रिभिर्ऋणैर्ऋणवानिति मत्वा। ४ –माध्यस्थ्येनास्थितस्त्यक्ता। ५ फ–आत्मनः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ॥
स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः ॥ २६२ ॥

अध्यायार्थोपसंहारः । **एषा वृत्तिर्विप्रस्य गृहस्थस्योक्ता** । **शाश्वती** नित्या । अनित्यो त्वापदि या वक्ष्यते । विप्रग्रहणाद्ब्राह्मणस्यैव **स्नातकव्रता**नां **कल्पो** विधिः । **सत्वं** नामात्मगुणस्तस्य **वृद्धिकरः** । **शुभः** प्रशस्तः । प्रशंसैषा ॥ २६२ ॥

अनेन विप्रो वृत्तेन वर्तयन् वेदशास्त्रवित् ॥
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ॥ २६३ ॥
इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां चतुर्थोऽध्यायः ॥ ४ ॥

सर्वस्यास्य फलकथनमेतत् । **अनेन विप्रो वर्तयन्**वर्तमानो **वेदशास्त्रविद्व्यपेत-कल्मषः** प्रतिषेधापराधजं पापकल्मषं तद्व्यपेतं व्यपनीतं प्रायश्चित्तैः । तेनैतदुक्तं भवति । विहितकरणात्प्रतिषिद्धस्यानासेवनात्कथंचित्कृतस्य प्रायश्चित्तैर्निष्क्रीतत्वात् । **ब्रह्मलोके महीयते** ब्रह्मलोके स्थानविशेषे महिमानं प्राप्नोति । दर्शनान्तरं ब्रह्मरूपः संपद्यत इति सिद्धम् ॥ २६३ ॥

॥ इति भट्टवीरस्वामिसूनोर्भट्टमेधातिथिविरचिते मनुभाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

---

१ फ–गृहस्य । २ फ–अनित्याह्यापदि वक्ष्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ पञ्चमाध्यायप्रारम्भः ॥

श्रुत्वैतानृषयो धर्मान् स्नातकस्य यथोदितान् ॥
इदमूचुर्महात्मानमनलप्रभवं भृगुम् ॥ १ ॥

ब्रह्मचारिगृहस्थयोरध्यायत्रयेण ये धर्मा विहितास्तान्छ्रुत्वा ऋषयो मरीच्यादयो भृगुमाचार्यमिदं वक्ष्यमाणं वस्त्वब्रुवन् पृष्टवन्तः ।

ननु चात्र स्नातकस्येति श्रूयते । तत्र ब्रह्मचारिग्रहणं किमर्थम्? । उच्यते । वृत्तसंकीर्तनमेतत् । ब्रह्मचारिणो धर्मा उक्ता एव ।

महात्मानमनलप्रभवामिति च भृगुविशेषणम् । अनलादग्नेः प्रभव उत्पत्तिस्तस्य । ननु प्रथमेऽध्याये " अहं प्रजाः सिसृक्षुः " इत्यत्र मनोरपत्यं भृगुरुक्तः । सत्यमर्थवादः । अमुत्र अग्नेः सकाशाद्भृगोर्जन्म श्रुतं तद्दर्शने नैवमुक्तम् । तथा च नामनिर्वचनम् । "भृष्टाद्रेतसः प्रथममुददीप्यत तदसावादित्योऽभवत् यद्द्वितीयमासीत्तद्भृगुरिति"। उपचारतो वैतदुच्यते । तेजस्वितासामान्यादग्नेरिव प्रसव इति । न चात्राभिनिवेष्टव्यं कतरः पक्षो युक्त इति । अनिदंपरत्वादस्य शास्त्रस्य सर्व एवायं प्रश्नप्रतिवचनसंदर्भो वक्ष्यमाणस्यान्नदोषस्य गौरवज्ञापनार्थं परिग्रहदुष्टादन्नस्वभावदुष्टं गुरुतरमिति । संबन्धिदोषात्स्वरूपदोषो बलवानन्तरङ्गत्वात् ।

ननु च पूर्वं बहुतरं प्रायश्चित्तं श्रूयते " असत्या क्षपणं त्र्यहमिति " । इदं तु "शेषेषूपवसेदहरिति "। तत्कथमस्य गुरुतरत्वम्? । उच्यते । लशुनाद्यपेक्षमेतत् । तेषु हि मत्या जग्ध्वा पतेदिति पतितप्रायश्चित्तं भवति ॥ १ ॥

एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम् ॥
कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो ॥ २ ॥

---

१ फ–त्रये.

For Private And Personal Use Only

यन्महर्षिभिः पृष्टं तदिदानीं दर्शयति । **एवमिति** शास्त्रव्यापारपरामर्शः । **यथोक्तमिति** शास्त्रार्थं परामृशति । एतेन शास्त्रसंदर्भेण यादृशो धर्म उक्तस्तत्पुनस्तमनुतिष्ठतां द्विजातीनाम् । विप्रग्रहणस्य दर्शनार्थत्वाद्वक्ष्यति (श्लो २६) " एतदुक्तं द्विजातीनामिति "। कथं मृत्युः प्रभवति स्नातकावस्थायां ब्रह्मचर्यावस्थायां वा यतः परिपूर्णायुर्भिस्तैर्भवितुं युक्तं पुरुषायुषजीविभिः शतवर्षं पुरुषाणामायुस्ततः पुरा मृत्युर्मरणमेषां न युक्तम् । यत उक्तम् "आचाराल्लभते ह्यायुः" (अ. ४।१५६) "जपतां जुह्वतामिति" (अ. ४ श्लो. १४६)॥२॥

स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः ॥
श्रूयतां येन दोषेण मृत्युर्विप्रान् जिघांसति ॥ ३ ॥
अनभ्यासेन वेदानामाचारस्य च वर्जनात् ॥
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥ ४ ॥

ननु च स्वधर्ममनुतिष्ठतामिति प्रश्नेन युक्तं 'येन दोषेणेति' उत्तरश्च ग्रन्थो नैवोपपद्यते ॥ उच्यते । अनभ्यासेनेत्यादिदृष्टान्तत्वेनोच्यते । यथा भवद्भिः प्रतिपन्ना वेदानभ्यासादयः पुरायुषो मरणहेतवः । एवं वक्ष्यमाणोऽन्नदोषः । सत्स्वपि वेदाभ्यासादिषु न तावत्स्वधर्मो यः पूर्वत्र कथितः किं त्वयमन्नदोषो गरीयस्तरः पृथक् प्रकरणाच्चैतदभिधीयते । नास्नातकस्य विज्ञानलेपमात्रमधर्मोऽयम् ॥ ४ ॥

लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च ॥
अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ॥ ५ ॥

लशुनादयः पदार्था लोके प्रसिद्धा एव । **कवकशब्दो** जातिशब्दः । क्वचित्कुयाकुरिति प्रसिद्धेऽर्थे मन्यते । छत्राकानि कवकान्येव । तथाहि कवकशब्देन प्रतिषिद्धं छत्राकशब्देन प्रायश्चित्तं वक्ष्यति (श्लो. १९) "छत्राकं विड्वराहं चेति" । न च छत्राकं नाम पदार्थान्तरं प्रसिद्धम् । न चाक्षरवर्णसामान्येन यो यच्छत्राकारस्तं तं छत्राकमिति युक्तं प्रतिपत्तुम् । तथा सति सुवर्चलादीनां समाचारविरोधी प्रतिषेधः प्राप्नोति । तस्माद्यान्येव कवकानि तान्येव छत्राकाणि । तथा च **निरुक्तकारः** "क्षुण्णमहिच्छत्रकं भवति यत् क्षुद्यत इति " । तेन पादप्रहारेण यान्येतानि भूमावकृष्टायामनुपूर्वजायां च सितवर्णानि जायन्ते तानि च कवकानि । वक्ष्यति च " भौमानि कवकानीति " । दर्शितं च पदा क्षुण्णमिवेति । पादप्रहारेण यानि क्षुद्यन्ते । यतो यानि वृक्षाद्गुल्माज्जायन्ते तेषां तदाकाराणाम-

---

१ **क-ड**-षोडशवर्षयुतं वा । २ **फ**-प्रतिपन्नं ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिषेधः । कुकुण्डानि कवकानि **वैद्यके** व्याख्यातानि । एतच्च व्याख्यानं न गवादिशब्दवत् । कवकशब्दो लोके च प्रयुज्यते । अतोऽस्य समाचाराद्वैद्यकादिशास्त्रार्थे निश्चयः प्रदर्शितश्चासौ लशुनादीनां तु समानवर्णगन्धा अपि **विष्णुना** प्रतिषिद्धाः । **पाराशरिकायां** तु शब्देनैव निषेधः प्रायश्चित्तविशेषार्थ उक्तः "चान्द्रायणमिति" (अ. ११ श्लो. १०६)। तेन लवर्तककर्णिकारादीनां प्रतिषेधः । **अमेध्यप्रभवान्यमेध्यजातानि च संसर्गजातानि ।**

अन्ये त्वाहुर्मूलत्वात्तूकवत्केवलामेध्यप्रभवानां युक्तः प्रतिषेधः । ततश्च यान्यधिकपुष्ट्यर्थं धान्यशाकादीन्यमेध्यक्षेत्रजातानि संसृज्यन्ते तानि न दुष्यन्तीति । तदयुक्तम् । अस्ति हि तत्र पुनः श्रुतेर्न वृत्तौ सर्वस्याप्यभक्ष्यत्वादिहापि च । यद्यमेध्यसंसर्गमन्तरेण न किंचिद्वस्तूत्पद्यते ततः स्यादपि । यतस्तु किंचिन्मेध्याज्जायते किंचित्संसृष्टात्ततोऽयं प्रतिषेधः । केवलेऽमेध्यप्रभवे न संसृष्टेऽत्रतिष्ठते । मांसस्य सत्यपि शुक्रशोणितामेध्यप्रभवत्वे नायं प्रतिषेधः । पृथक्प्रकरणारम्भात्तस्य ॥ ५ ॥

लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ॥
शेलुं गव्यं च पीयूषं प्रयत्नेन विवर्जयेत् ॥ ६ ॥

वृक्षकोटरस्रावेण हेत्वन्तरेण वा बहिर्यन्मूलस्कन्धफलपलाशशाखाकुसुमव्यतिरिक्तं वृक्षलग्नं जायते स **वृक्षनिर्यासः** । लोहितग्रहणात्कर्पूरादीनामप्रतिषेधः । **व्रश्चनाच्छेद**नाद्येषां प्रभवो जन्म एवं वृक्षादेर्वल्कप्रदेशास्तत्रैव जायन्ते तेषामलोहितानामप्रतिषेधः । **शेलुः** श्लेष्मातकः प्रसिद्धो वैद्यकादिशास्त्रेभ्यः । न तु सुतस्य क्षीरस्य संतानिका अप्रसिद्धत्वात् । यत्तु पियूषसाहचर्यात्संतानिका युक्तेति भवति साहचर्यं विशेषहेतुरुभयत्र प्रयोगे सति न पुनः साहचर्यमदृष्टप्रयोगाणां प्रयोगज्ञापकम् । **गव्यं** च । गव्यग्रहणान्माहिषादेरप्रतिषेधः । अनाद्यं यदि तदग्निमात्रसंयोगात्पिण्डीभूतमनासक्तं च । सद्यः प्रसूताया गोः क्षीरं पीयूषशब्देनोच्यते । ननु च क्षीरस्य सविकारस्य दशाहं चाभक्ष्यतां वक्ष्यति । त्रिचतुराणि वाऽहानि तादृशं क्षीरं भवति । सत्यम् । यदि कथंचित्कस्यापि दशाहात्परेण भवति तदिदमर्थवत् । **प्रयत्नेत्यादि** पदद्वयं श्लोकपूरणार्थम् । अभक्ष्याणीत्यनुवर्तते ॥ ६ ॥

---

१ क-ड-तुशब्दे नैव । २ अ-क-ड-लवतकोकरणिकारतादीनां प्रतिषेधः । ३ अ-क-ड-श्रुतेतरनिवृत्तौ । ४ अ-क-ड-केवलो । ५ फ-पेयूषं । ६ फ-वल्कल । ७ अ-ड-मर्घ्य च ।

For Private And Personal Use Only

वृथाकृसरसंयावं पायसापूपमेव च ॥
अनुपाकृतमांसानि देवान्नानि हवींषि च ॥ ७ ॥

अत्र **कृसरसंयावमिति** समाहारे द्वन्द्वः । तिलैः सह सिद्ध ओदनः कृसरशब्देनोच्यते । **संयावो** भोज्यविशेषः सर्पिर्गुडतिलादिकृतः पुरेषु प्रसिद्धः । ये तु यैतैर्मिश्रणार्थत्वाद्यानि मिश्रीकृत्यान्नानि साध्यन्ते मुद्गमकुष्ठकादिभिस्तानि संयावशब्देनोच्यन्त इति तेषां कृसरग्रहणमनर्थकम् । सोऽपि ह्यनेन प्रकारेण संयाव एव । **वृथा**शब्दः सर्वत्रानुषज्यते । यदात्मार्थे क्रियते न देवपित्रतिथ्यर्थं तदा कृसरादीनामुपदेश इति । तदुक्तम् । न हि गृहस्थाः केनैर्थतः पठन्ति हविष इवावाषात्प्रभृति तादर्थ्येनोद्देशः। अत्र हि कस्य पाकः स्यात् । किंतर्हि अनुद्दिष्टविशेषस्य सामान्यतः कृतस्यान्नस्य पञ्चयज्ञानुष्ठानं विहितम् । तत्राकृतवैश्वदेवस्य भोजने विहितातिक्रमो न पुनः प्रतिषेधः समस्ति । तथा हि द्वे प्रायश्चित्ते भवतः । विहितातिक्रमात्प्रतिषिद्धसेवनाच्च । कृसरादयस्तु देवताविशेषं वास्तुयज्ञादिविषयमनुद्दिश्य कृताकृतत्वादाह्निकविधयोऽपि प्रतिषिध्यन्ते । यश्चापि 'नात्मार्थं पचेदिति' सोऽप्यवश्यकर्तव्यत्वात् कृतान्नस्य भोजनप्राप्त्यनुवादो न पुनः प्रतिषेधः । तथा सति द्विमूलकल्पनाप्रायश्चित्तं स्यादित्युक्तम् । न चान्यार्थत्वेनापि कृतस्यात्मार्थता पाकस्य निषेद्धुं शक्यते । पच्यमानार्थो हि पाकस्तस्य तद्द्वारिका न शक्या आत्मार्थता निषेद्धुं तेनैव वृत्तिविधानात् । न हि वृत्त्यादिशिष्टभोजनं गृहस्थस्य शेषसंस्कारो न चात्र संकल्पःश्रुतो येन मदर्थं पच्यतामिति पाककाले संकल्पमात्रं निषिध्यते । आत्मार्थं चोत्तरकालमविचार्येत्युच्यते । मिथ्यासंकल्पदोषश्च स्यात् । देवतार्थतया संकल्पितस्यात्मार्थतया योग इति । तस्मादयमनुवादो यत्पचेनात्मार्थमेवोपयोज्यं प्राग्विधेर्वैश्वदेविकादिति । तथा च अपक्वभोजनेऽपि विधिमेतं स्मरन्ति । "यदन्नः पुरुषो राजंस्तदन्नास्तस्य देवता" इति (**रामायणे अयोध्याकाण्डे**) । न च बुभुक्षमाणस्यैवाधिकारो गार्हस्थ्यप्रतिपत्तिनिमित्तत्वात् । तेन यदहर्न भुञ्जीत तदहरप्यकुर्वन्प्रत्यवैति । एतदुक्तं भवति । स्वार्थं वा पचतु परार्थं वा पाक्षीदिति सर्वथा कृतवैश्वदेवातिक्रमणव्रता अपि न प्रवर्तन्ते इति नित्यतामनुवदति । यच्चापि पठति ॥ "लौकिके वैदिके वाऽपि हुतोत्सृष्टे जले क्षितौ । वैश्वदेवस्तु कर्तव्यः पञ्चसूनापनुत्तये" ॥ इति

अनेनापि नित्यतैवोच्यते । न हि वैदिके वैश्वदेवसंभवः न च स्मार्तवचने प्रमाणमस्ति ।

---

१ अ-ड-भोजन विशेष । २ ... केमार्थ्यतं । ३ अ-ड-कृशर । ४ अ-ड-देवविशेषं । ५ फ-अनुदिश्य. ६ फ-यच्चापि । ७ अ-क-ड-कृशानियैपादिकयस्थ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पायसापूपमिति पयसा सिद्ध ओदनः पायसो न दध्यादिपयोविकारः । **अपूपाः** पुरोडाशाः । **देवान्नानि** समाचारप्रमाणकानि । **हवींषि** श्रुतिविहितानि होतव्यानि प्राग्ग्रहहोमाद्यतो हविःशेषस्य भक्ष्यतां वक्ष्यति । **अनुपाकृतस्य** अयज्ञे हुतस्य **पशोर्मांसानि** । उपाकरणं पशोः संस्कारविशेषः स पशुयागेषु विहितः । एतेन च यज्ञोपयुक्तशेषभक्ष्यता मांसस्य लक्ष्यते । वृथाशब्दाधिकारेऽप्यनुपाकृतग्रहणमतिथ्यादिशिष्टस्यापि गोव्यजमांसस्य प्रतिषेधार्थं गोव्यजमांसमेव वाऽनुपाकृतशब्देन विवक्षितम् । गोव्यजस्यैव तत्रालम्भश्चोदितो यतः शिष्टं प्रोक्तम्[1] ॥ ७ ॥

अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ॥
आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः ॥ ८ ॥

यदीहानिर्दशाहं गोः क्षीरमिति पाठः उष्ट्रादीनामपि दाशाहादिकः प्रतिषेध आशङ्क्यते । अनिर्दशाग्रहणानुवृत्त्या तत्र समाचार आत्यन्तिकप्रतिषेधार्थ आश्रयणीयः । अनिर्दशाया इति तु स्त्रीलिङ्गपाठे आशङ्कैव नास्ति । न हि तद्धितान्तैरनिर्दशाया उष्ट्रमित्यादिभिः संबन्धोपपत्तिरुत्तरत्र च पुनः क्षीरग्रहणात्समाचाराच्च उष्ट्रैकशफाविकानिर्दशगवीक्षीराणि सविकाराणि प्रतिषिध्यन्ते । सन्धिनीविवत्सयोस्तु क्षीरमेव । **अनिर्दशा** च गौरुच्यते यस्याः प्रसूताया दशाहान्यनतिक्रान्तानि । **सन्धिनी** या उभयोः प्राप्तदोहा कथंचिदन्यतरस्मिन्दुह्यते । सायमप्रदुग्धासायं दुह्यते । सा तु स्वल्पक्षीरत्वादेकस्मिन्नेव काले साऽसौ संधिनी । कश्चिदाह या मृतस्ववत्सा परकीयं वत्सं संचार्य दुह्यते सा सन्धिनी । विवत्सा तु या सत्येव वत्से विनाकृतवत्सा वत्सप्रस्रवणमनपेक्ष्य मकुष्ठकयवशालितुषादिना भोजनविशेषेण दुह्यात् । **विवत्साया इति** । तेनैव वत्सग्रहणे नावत्सा धेनुरानीयतामितिवद्गोरिति लब्धे गोग्रहणमजामहिष्योरप्रतिषेधार्थम् । न पुनरनिर्दशाया इत्यत्र । अतश्च गोग्रहणं तत्राजाद्युपलक्षणार्थम् । तथा च **गौतमः** (अ. १७ सू. २२–२३) "गोश्च क्षीरमनिर्दशायाः सूतके । अजामहिष्योश्च" इत्याह । **पयोग्रहणं** सन्धिनीक्षीरमिति समासान्तवर्तिनः क्षीरपदस्य नातिसुकरः संबन्धो यतः ॥ ८ ॥

आरण्यानां च सर्वेषां मृगाणां माहिषं विना ॥
स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि[2] ॥ ९ ॥

---

१ अ–क–ड–शिष्टं प्रेक्षितश्चके ।

२ [**क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ॥**
सप्तरात्रव्रतं कुर्यात्प्रयत्नेन समाहितः ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आरण्या गोहस्तिमर्कटादयः । पुंसां क्षीराभावः । **सर्वेषां मृगाणा**मिति जातिमात्रविवक्षायां पुंल्लिङ्गनिर्देशसामर्थ्यात्स्त्रीभिः संबन्धः । मृगक्षीरं कुक्कुटाण्डमितिवत् । दर्शितं चैतत्पुम्भावविधौ **महाभाष्यकारेण** । माहिषं विना पयोपेक्षया नपुंसकनिर्देशः । **स्त्री** मानुषी । यद्यपि स्त्री गौः सोमक्रयणीत्यादौ सास्नादिमत्यर्थे प्रयोगदर्शनं तथापि जात्यन्तरस्याप्रकृतत्वात् प्रसिद्धतरत्वात् तत्र प्रयोगः स्यात् । " स्त्रियो मधुरमिच्छन्ति स्त्रियो रत्नमनुत्तममिति " नार्येव प्रतीयते । **एवकार**मञ्जनादिप्रतिषेधे व्याचक्षते । न केवलं स्त्रीक्षीरं भक्षणे वर्ज्यं किंतर्ह्यन्यास्वप्येवंविधासु क्रियासु । एष तु स्मृत्यन्तरसमाचारसापेक्ष एव शब्दः सूचको[1] युक्तो न त्वस्यार्थस्य वाचकः ॥ ९ ॥

दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् ॥
यानि चैवाभिषूयन्ते पुष्पमूलफलैः शुभैः ॥ १० ॥

अविशेषेण सर्वशुक्तेषु प्रतिषिद्धेषु केषुचिदयमर्थवादः । शुक्तान्युच्यन्ते यानि प्राप्तस्वरसावस्थानि[2] कालात्ययेन द्रव्यान्तरसंसर्गेण वाऽऽम्लतामापद्यन्ते । यथाऽऽम्रातकादीनि मधुराणि चिरकाल अतिरसत्वाच्छुक्तानि भवन्ति निष्पीडितो मधुररसः कालतोऽम्लतामेतीत्यादिना एवंविधानि तु यानि तु स्वभावतोऽम्लानि दाडिमामलकजम्बीरादीनि तानि नैव शुक्तानि यानि च प्राप्तकालोत्पत्त्यादीनि । न ह्ययमाम्लपर्यायः शुक्तशब्दस्तत्र केवलानि पाकतः शुक्तानि प्रतिषिध्यन्ते । द्रव्यान्तरैश्च पुष्पमूलकादिभिर्योजितान्यत्र ज्ञायन्ते । तथा च **गौतमः** (अ. १७ सू. १४) " शुक्तं केवलमदधि "।

अभिषूयन्ते अभिषव उदकेन संसृज्य परिवासनम् । यद्येवं काल एव तर्ह्यम्लताहेतुः । सत्यम् । एतान्यपि द्रव्याणि । तृतीया च करणे सहयोगे वा । पुष्पादिभिरुदकेन सह अभिषूयन्ते सन्धीयन्ते ।

केचित्त्वाहुः । यत्र पुष्पमूलान्यम्लतां जनयन्ति । यानि दाडिमामलकादीनि शुक्तानि तानि भक्ष्याणि यानि द्राक्षादिभिर्मधुरैरभिषूयन्ते सन्धीयन्ते तानि न भक्ष्यन्ते । अभिषवो ह्युच्यते शुक्तताजननम् । यानि पुष्पादिभिः शुक्तीक्रियन्ते न च द्राक्षादीनि शुक्ततापादकानि । किंतर्हि केवल एव कालः । एतत्तु न सम्यक् । अशब्दार्थत्वान्न हि सोममभिषुणोतीति शुक्तं करोतीति प्रतिपत्तिः । किंतर्हि य एव प्राग्व्याख्यातोऽर्थः । दधिसंभवं उदश्विन्मस्तुकिलाटकूर्चिकादि ॥ १० ॥

---

१ अ-क-ड-सूतको । २ ड-सुरसावस्थानि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रव्यादः शकुनीन् सर्वान् तथा ग्रामनिवासिनः ॥
अनिर्दिष्टांश्चैकशफांष्टिट्टिभं च विवर्जयेत् ॥ ११ ॥

क्रव्याद आममांसभक्षकाः कङ्कगृध्रादयः। अभक्ष्यवत्केवलाममांसभक्षका गृह्यन्ते। तत्रोभयरक्ता मयूरादयः। **ग्रामनिवासिनः** अक्रव्यादा अपि। **एकशफा** अश्वाश्वतरगर्दभादयः। **अनिर्दिष्टास्तु** नाभक्ष्यत्वेनोक्तास्ते न भक्ष्या इति। ये तूक्तास्तत्रैव भक्ष्याः ये [3]त्वाष्ट्रवडवऋक्षगौरगर्दभाः प्रजाकामस्तेषां च मांसम[4]श्नीयादिति।

ननु च श्रुतित एव तत्र भक्ष्यावाप्तिः प्रत्युत निर्दिष्टग्रहणे सति श्रुतौ चोदितानामन्यत्र भक्ष्यताशङ्का। अनिर्दिष्टान्वर्जयेन्न निर्दिष्टानिति वाक्यार्थप्रतिपत्तेः। न च स्मृतौ केचिद्भक्ष्यत्वेन निर्दिष्टाः। येन तद्व्यतिरिक्तविषयमनिर्दिष्टग्रहणं व्याख्यायेत। अतः श्रुतौ ये निर्दिष्टास्ते न भक्ष्या इति प्राप्नोति। उच्यते। आचाराविरोधी स स्मृत्यर्थः। अनिर्दिष्टग्रहणमनुवादः। **टिट्टिभः** शकुनिरेव टिटीति यो वाशते। प्रायेण शब्दानुकरणनिमित्तं शकुनीनां नामधेयप्रतिलम्भस्तदुक्तं **निरुक्तकारेण** 'काक इति शब्दानुकृतिस्तदिदं शकुनिषु बहुलमिति' ॥ ११ ॥

कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम् ॥
सारसं रज्जुदालं च दात्यूहं शुकसारिके ॥ १२ ॥

कलविङ्को ग्रामचटको निगमेषूक्तः। ग्रामवासित्वात्तस्य सिद्धे प्रतिषेधे पुनः प्रतिषेधः स्त्रियाश्चटकाया अभ्यनुज्ञानार्थः। पुंशब्दो ह्ययं वृषभवत्। अन्ये त्वारण्यस्य निवृत्त्यर्थं मन्यन्ते। ते हि वर्षासु वनवासिनो भवन्ति। बाहुल्यव्यपदेशाच्च ग्रामचटका उच्यन्ते। यथा महिषा आरण्याः। **प्लवहंसचक्रवाकानां** वक्ष्यमाणजालपादप्रतिषेधात्सिद्धे प्रतिषेधे नित्यार्थं ग्रहणम्। अत आट्यादीनां विकल्पेन भक्षणं गम्यते। **ग्रामकुक्कुटम्**। ग्रामग्रहणादारण्यास्याभ्यनुज्ञानम्। कुतः पुनरारण्यस्याभक्ष्यताशङ्का। **स्मृत्यन्तरे** हि "कुक्कुटो विकिराणामिति" पठ्यते। अतश्चाविशेषेणाभक्ष्यता प्राप्ता वचनेन तस्य सामान्यप्रतिषेधस्य विशिष्टविषयता प्रज्ञायते।

ननु विकल्पः कस्माद्भवत्यनेन शास्त्रेणास्याभ्यनुज्ञानाच्छास्त्रान्तरेण चाविशेषेण तस्यापि प्रतिषेधात्। नायं विकल्पस्य विषयः। विरोधे हि तुल्यबलानां विकल्पो न चात्र विरोधोऽस्ति। न ह्यनयोः स्मृत्योः शास्त्रभेदोऽपि। सामान्यस्य विशेष उपसंहर्तुं न्याय्यत्वात्। शाखान्तरतस्तृतीयस्याप्येकशास्त्रस्य दर्शितत्वात्। यद्येवं जालपादप्रतिषेधस्यापि हंसादिविशेष

---

१ फ-क्रव्यादान्। २—येतक्तास्तेनैव। ३—त्वौष्ट्रवडकक्षगोवानरगर्दभाः। ४ फ-नाश्नीयादिति। ५—रज्जुवालं। ६ अ-ड-तृतीयामपि।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवोपसंहारो युक्तो नाविशेषेण काकजालपादानां सर्वेषां प्रतिषेधो भवेदेवं यद्यपौरुषेयोऽयं ग्रन्थः स्यात् । भिन्नकर्तृके त्वपौरुषेयत्वे न सामान्यस्य न किंचित्प्रयोजनम् । हंसादिविशेषमात्रपर्यवसाने भिन्नकर्तृकश्च पौरुषेयत्वे सति सामान्यदर्शिनो विशेषविषयमज्ञानं संभवति । विशेषदर्शिनोऽपि सामान्यविषयः । उभयोश्च मूलकल्पनायामेकस्य सामान्यवेदनं[1] वचनमूलं कल्प्यते । अन्यस्य विशेषवचनम् । तयोश्च वैदिकयोर्भिन्नशाखाधीतयोरसति शाखाभेदे एकवाक्यतैव न्याय्या । न च वेदे पर्यनुयोगोऽस्ति । किं सामान्येन यदि विशेषनिष्ठता तस्य कर्तुरभावात् । श्रुताद्धि तत्र प्रतिपत्तिः केवलशब्दशक्तिसमाश्रिता । न प्रयोजनवशेनार्थान्तरकल्पनम् । **रज्जुदालादयः** शाकुनिकेभ्य उपलब्धव्याः ॥ १२ ॥

प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान् ॥
निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च ॥ १३ ॥

प्रतुद्य प्रहृत्य चञ्च्वा ये भक्षयन्ति । स्वभाव एष एषां पक्षिणाम् । **प्रतुदाः** शतपत्रादयः । **जालपादाः** आड्यादयः । तेषां विकल्प उक्तः ।

ननु च यत्र विकल्प अन्यतरत् नेच्छातः प्रवृत्तिः[2] । सा चाप्रतिषिद्धेष्वपि स्थितैव । लौकिकं हि भक्षणं तत्सत्येवार्थित्वे[3] न शास्त्रीयं येन नियमतः स्यात् । तत्र विकल्पितस्य प्रतिषेधस्य न किंचित्प्रयोजनं पश्यामः । उच्यते । दत्तोत्तरमेतत् । यत्राबुद्धिपूर्वप्रयोगाच्छब्दादेवार्थावगतिः । पौरुषेयः स्त्वयं[4] ग्रन्थः समाहितचेतसा प्रयत्नवता शतसाहस्रिकं संक्षेप्तुमाचार्येण प्रणीतो यत्राशक्यमनर्थकं प्रयोक्तुं अत आचार्याभिधानं उन्नीयते । नूनं जालपादे प्रतिषेधे त्वसति[5] येन तद्विशेषं हंसं स्वशब्देन निषेधयति । यत एतदपि स्मरणमेव । अन्ये त्वन्येन जालपादस्त्विति प्रमादपाठः स्यात् । उक्तं चैतदिङ्गितेन चेष्टितेन महता वा सूत्रप्रणयनेनाचार्याणामभिप्राया लक्ष्यन्ते । विशेषश्चात्रानुमीयते । “ अनापदि न भक्षयेत् ” इति विवक्षिते सामान्यप्रतिषेध उभयोरर्थवत्वाय । यत्र मांसविक्रयार्थाः पशवो हन्यन्ते सा सूना । आपणो मांसस्येत्येके । **वल्लूरं** मांसं संशोष्य चिरस्थापितम् । नखैर्विकीर्य भक्षयन्ति ते **नखविष्किराः** । मयूरबलाकादयः । आपत्स्विति वचनात्तु तेषां पाक्षिकी भक्ष्यताऽप्यस्ति । स हि पठति 'कुक्कुटो विकिराणामिति' । न चास्य मानवस्य वचनस्य कुक्कुटोपसंहारः शक्यो वक्तुं[6] कुक्कुटनामग्रहणस्यानर्थक्यप्रसंगात् ॥ १३ ॥

---

१ अ–ड–सामान्यवेदिनं । २ फ–यत्र विकल्प उच्यते तत्रेच्छातः प्रवत्तिः । ३ फ–आर्थित्व । ४ फ–स्वयं ५ अ–क–ड नास्त्यसति । ६ फ–वक्ष्यति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बकं चैव बलाकां च काकोलं खञ्जरीटकम् ॥
मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्वशः ॥ १४ ॥

बकबलाकाकाकोलनिमज्यन्मत्स्यादीनां मत्स्यादग्रहणात्सिद्धे प्रतिषेधे तदन्येषां विकल्पार्थं पुनर्वचनम् । मत्स्यादा अपक्षिणोऽपि मत्स्यादग्रहणादभक्ष्या विज्ञेयाः नक्रादयः क्रियानिमित्तत्वान्मत्स्यादशब्दस्य । **काकोलश्च** श्येनो देशान्तरप्रसिद्धेरयं बाह्लीकेष्वेवमुच्यत इति प्रसिद्धम् । विड्वराहप्रतिषेधाच्चारण्याभ्यनुज्ञायामप्रतिषेधश्च पूर्वसूत्रे प्रकरणाच्छकुनिविशेषणार्थो विज्ञेयः । एवं हि चेह विड्वराहग्रहणमर्थवद्भवति । ग्रामवासी शूकरो विड्वराहः । ननु च यदि तत्र प्रकरणाद्ग्रामवासिनः पक्षिणो गृह्यन्ते । इहापि मत्स्यादाः पक्षिण एव [1]ग्रहीतुं न्याय्याः । नैवम् । न [2]चात्र शकुनीनां प्रकरणमस्ति विड्वराहमत्स्यानामिति पक्षिणामपि निर्देशार्थम् । **सर्वशः** सर्वदा । उत्सर्गोऽयं अस्यापवादं वक्ष्यामः ॥ १४ ॥

यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ॥
मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान् विवर्जयेत् ॥ १५ ॥

पूर्वस्य मत्स्यप्रतिषेधविधेरर्थवादोऽयम् । यत्संबन्धिमांसं योऽश्नाति स तन्मांससंबन्धिन्याऽशनक्रियया व्यपदिश्यते । यथा सर्पादो नकुलो मार्जारो मूषकाद इत्यादि । यस्तु मत्स्यादः स सर्वमांसाशी भवति । [3]यो मांसाद इत्यपि व्यपदेष्टुं युक्तः । अतो निन्दातिशयान्मत्स्यान्विवर्जयेत् ॥ १५ ॥

पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः ॥ १६ ॥

पाठीनरोहितौ मत्स्यजातिविशेषौ तयोर्हव्यकव्यनियोगेन श्राद्धादौ भक्ष्यताऽभ्यनुज्ञायते । [4]नान्वाहिके भोजने । राजीवसिंहतुण्डसशल्कानां सर्वशः हव्यकव्याभ्यामन्यत्राप्यनिवृत्तिर्भोजने । **राजीवाः** पद्मवर्णाः कैश्चिदिष्यन्ते । अपरैस्तु राजयो रेखा येषां सन्ति । **सिंहतुण्डाः** सिंहाकृतिमुखाः । **सशल्काः** शकलिनः ॥ १६ ॥

न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान् ॥
भक्ष्येष्वपि समुद्दिष्टान सर्वान पञ्चनखांस्तथा ॥ १७ ॥

एकचराः सर्पोलूकादय एकाकिनश्चरन्ति । **अज्ञाता**न्नामतो जातिविशेषतश्च ।

---

१ फ-ग्रहीतुं । अ-ड-नात्र । ३ फ-गोमांसाद । ४ अ-क-ड-नान्वहिके ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मृगद्विजान् मृगाः पक्षिणश्च न भक्ष्याः । **भक्ष्येष्वपि समुद्दिष्टान्** ये प्रतिषिद्धास्ते तादृप्ये असति भक्ष्यतां प्राप्ताः समुद्दिष्टा इव भवन्ति । न तु भक्ष्याणां समुद्देशोऽस्ति । परिहर्तव्यतया विशेषतोऽविज्ञातान् भक्ष्यपक्षपतितान् भक्षेष्वपि समुद्दिष्टा इत्येवमुच्यन्ते[2] । **पञ्चनखाश्च** वा[3]नरशृगालादयः । सर्वग्रहणं पादपूरणार्थम् ॥ १७ ॥

श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा ॥
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः ॥ १८ ॥

पञ्चनखानां मध्याच्छ्वावित्कादयो भक्ष्याः । स्मृत्यन्तरे तु खड्गे विकल्पः । तथा च **वसिष्ठः** (अ. १४ सू. ४७) "खड्गे तु विवदन्ते" इति । **उष्ट्रवर्जिता एकतोदतो** गोव्यजमृगा भक्ष्याः[1] । ननु च श्वावित्प्रभृतीनां पञ्चनखानां भक्ष्यत्ववचनादन्येषामभक्ष्यतासिद्धेः सर्वान्पञ्चनखानिति प्रतिषेधवचनमनर्थकम् । नैष दोषः । सर्व[4]शब्देन प्रतिषेधे स्पष्टा प्रतिपत्तिर्भवति । भक्ष्यविशेषनिर्देशेन तदन्येषां या अभक्ष्यताप्रतिपत्तिः सा आनुमानिकी प्रतिपत्तिः । गौरवं हि तथा स्यात् ॥ १८ ॥

छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् ॥
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥ १९ ॥

छत्राकं कवकानि । **विड्वराहः** ग्रामशूकरः स्वतन्त्रविहारः । एतानि भक्षयित्वा पतितो भवेत् । पतितप्रायश्चित्तं कुर्यात् । वक्ष्यति च (अ.११ श्लो.५६) "गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्" ॥ १९ ॥

अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् ॥
यतिचान्द्रायणं वाऽपि शेषेषूपवसेदहः ॥ २० ॥

अमत्या अबुद्धिपूर्वं **षड् जग्ध्वा** षण्णामन्यतममपि भक्षणस्य अविधेयत्वनिमित्ततया साहित्यस्याविवक्षा । **शेषेषु** अभक्ष्येषु भक्षणे लोहितवृक्षनिर्यासादिषु एकमहोरात्रं न भुञ्जीत । अहःशब्दो रात्रावपि दृष्टप्रयोगः । "अहश्च कृष्णमहरर्जुनं चेति" । येषु चात्र प्रकरणे प्रतिषिद्धेषु प्रायश्चित्ताधिकारे प्रतिपदं प्रायश्चित्तमन्यद्वक्ष्यते "क्रव्यादसूकरे[5]"त्यादि तत्र तदेव द्रष्टव्यं प्रतिपदविहितत्वात् । अस्य चोपवासस्यान्यत्र चरितार्थत्वात् ॥ २० ॥

---

१ अ-ड-जनभक्ष्या । २ अ-ड-उच्यते । ३ अ-क-ड-नरशृगालादयः । ४ अ-ड-स्वशब्देन
५ फ-शुकरेत्यादि, अ ११ श्लो. १५६ ।

५०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः ॥
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ॥ २१ ॥

भोज्यशूद्रगृहभोजिनो ब्राह्मणस्येदमुच्यते । यस्य शूद्रस्य गृहे यानि ब्राह्मणानामभोज्यान्यन्नानि संभवन्ति न दूरतः परिह्रियन्ते तादृशस्य गृहे यो ब्राह्मणोऽन्नं भुङ्क्ते तस्य प्रतिषिद्धान्नभोजनाशङ्कायां प्राजापत्यकृच्छ्रचरणमुपदिश्यते । अविशेषनोदनायां प्राजापत्यं कृच्छ्रं प्रतीयत इति वक्ष्यामः । अज्ञातभुक्तशुद्ध्यर्थमज्ञातदोषशङ्कायामाह । दोषो यदि भुङ्क्ते तस्य शुद्ध्यर्थम् । ननु च ईदृशस्य शुद्धिं वक्ष्यति (अ. ५ श्लो. १२७) " अदृष्टमद्भिर्निर्णिक्तमिति " । तस्य विषयं तत्रैव दर्शयिष्यामः । ज्ञातस्य तु दोषस्य विशेषतः वैशेषिकं प्रायश्चित्तं कर्तव्यम् । यस्य यद्विहितं प्रतिपदम् । ॥ २१ ॥

यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः ॥
भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा ॥ २२ ॥

भक्ष्यप्रसंगेन हिंसाऽभ्यनुज्ञायते । अत्यर्थं क्षुत्पीडायां भृत्यादेर्भोजनान्तरासंभवे भक्ष्यमृगपक्षिवधः कर्तव्यः । भृत्याः प्राग्व्याख्याताः । अगस्त्यस्तथाकृतवानित्यगस्त्यग्रहणं प्रशंसार्थम् । यज्ञार्थमित्याद्योऽर्धश्लोकोऽर्थवाद एव । तत्र हि वधः प्रत्यक्षश्रुतिविहितत्वादेव सिद्धः[1] । **प्रशस्ता** ये भक्ष्यतयाऽनुज्ञाताः । एष एवार्थ उत्तरश्लोके विस्तरतः[2] कर्मार्थवादतया कथ्यते ॥ २२ ॥

बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम् ॥
पुराणेष्वृषियज्ञेषु ब्रह्मक्षत्रसवेषु च ॥ २३ ॥

षट्त्रिंशत्संवत्सरं नाम सत्रं तत्र मृगपक्षिवध आम्नातः सोऽनेनानूद्यते । इदं तत्र **ब्राह्मणं** "संस्थितेऽहनि गृहपतिर्मृगयां याति स तत्र यान्यान्मृगान्हन्ति तेषां तरसाः पुरोडाशा भवन्ति" । अर्थवादत्वाद्बभूवुरिति भूतप्रत्ययेन विवक्षा तेनाद्यत्वेऽपि भवन्ति । एवं **पुराणेष्व**पि । न केवलं कश्चिदद्यत्वे सत्राणां व्यवहार इति दर्शनाभिप्रायमेतत् । **पुराणेष्विति** । न पुनरद्यत्वे यदि केचित्सर्वाण्येव हरेयुस्तेषामेष विधिर्न भवतीति मन्तव्यम् । अथवा यः स्वयं शास्त्रार्थं वेदितुमसमर्थः केवलं[3] परप्रसिद्ध्या " महाजनो येन गतः स पन्थाः " (**म. भा. वनपर्वे**) इति न्यायेन प्रवर्तते तत्रत्वे तदुच्यते । पुराणेष्विति नायमिदं प्रथमको धर्मः । किंतर्हि ? अनादिः । पौराणा ऋषयो ब्राह्मणाःकेचन तपःसिद्धाः जात्यन्तरं

१ **फ**-प्रसिद्धः । २ **अङ**-उत्तरतः । ३ **फ**-केवल- ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा यथा **महाभारतादौ** वर्णितम् । न चात्र निर्बन्धः कर्तव्यः ऋषीणां जात्यन्तरत्वे गन्धर्वादिवत्कथं यागेष्वधिकार इति । यतोऽयमर्थवादो येनकेनाचिदालम्बनेन प्रतीयते । **ब्रह्मक्षत्रसवाः** ब्रह्मक्षत्रिययज्ञाः ॥ २३ ॥

यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगार्हितम् ॥
तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् ॥ २४ ॥

भक्ष्यं यत्किंचित्स्नेहसंयुक्तं । भोज्यमोदनादि । भुक्तिभुज्योरेकार्थत्वेऽपि पृथगुपादानाद्विषयभेदोऽयं प्रतीयते । **अगर्हितं** शुक्ततामनापन्नं **तत्पर्युषितमप्याद्यम्** । रात्र्यन्तरे पर्युषितमुच्यते । पूर्वेद्युः सिद्धमप्यपरेद्युः पर्युषितं भवति । स्नेहसंयुक्तमिति एवं संदिह्यते । किं यत्स्नेहसंयुक्तं तत्पर्युषितं रसमिश्रशाकादि तत्पर्युषितमाशितव्यम् । उत शुक्तस्यापि पर्युषितस्य भक्षणम् । काले स्नेहसंयोगः कर्तव्यः । भक्षापूपाद्यपि पर्युषितं भोजनकाले स्नेहेन संयोज्य भक्षयितव्यमिति । अतः संदिह्मं यावता यत्स्नेहयुक्तानां भक्ष्यतोच्यते तत्पर्युषितमाद्यमिति । उद्दिश्यमानं स्नेहसंयुक्तमिदं निपतनं न पुनर्विधेयार्थे न हि तच्छब्दसंबन्धोऽस्य श्रुतो यत्पर्युषितं स्नेहसंयुक्तमाद्यमिति । उच्यते । हविःशेषाणां पर्युषितानामस्नेहसंयुक्तानां तेषां वचनमनर्थम् । न च तेषां स्नेहसंयुक्तानां परिवासः संभवति । एवं च तेषां वचनमर्थवद्भवति यदि भोजनकाले तेषां स्नेहसंयोगो नापेक्ष्यते । अतस्तेषां तावद्भोजनकाल एव स्नेहसंयोगनिरपेक्षतया वचनस्यार्थवत्त्वम् । यद्येवं तथापि न संदेहोऽर्थवत्त्वाद्विशेषपदस्य विधेयार्थता स्नेहसंयुक्ता शब्दस्य न्याय्या । उच्यते । एतावदत्र सन्देहे बीजं यथाश्रुतसंबन्धस्य बलीयस्त्वात्किं हविःशेषपदमनुवादोऽस्तु उतानर्थकत्वं मा प्रापदिति यत्पर्युषितं तेन स्नेहसंबन्धः क्रियताम् । तत्रानर्थक्याद्व्यवहित-कल्पना ज्यायसी । समाचारान्निर्णयः । सर्पिस्तैलवसामज्जाः **स्नेहाः** ॥ २४ ॥

चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः ॥
यवगोधूमजं सर्वं पयसश्चैव विक्रिया ॥ २५ ॥

चिरस्थितं द्विरात्राद्यन्तरितं अपिशब्दादाक्तमित्यत्रापि संबन्धयितव्यम् । **स्नेहाक्त-मपि** यवगोधूमजं सक्तुपूपादि । **पयसो विक्रिया** विकारा दधिमथितादयः ॥ २५ ॥

एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः ॥
मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने ॥ २६ ॥

१ अ-ख-तद्भवेत् । २ अ-क-ड-+यभ्यंतो भक्षितोखरावेशदमभ्यवहार्यमाह । अन्नांतरं स्यात् प्रत्ययान्तः । ३ फ-उक्तशुक्तस्यापि । ४ अड-संबंध । ५ अ-ड-यतः । ६ फ-स्नेहसंयुक्तमिति न पुनर्विधे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आद्येन श्लोकार्धेन पूर्वप्रकरणमवच्छिनत्ति । तदेतदनन्तरमनुक्रान्तं प्रकरणमेवं द्विजातीनां न शूद्राणामिति[1] उत्तरं तु यद्वक्ष्यते तच्छूद्राणामपीति प्रकरणव्यवच्छेदप्रयोजनम् । अतश्च मांसभक्षणे प्रकारो वक्ष्यते । यच्च तद्वर्जनेन फलं तच्छूद्रस्यापि भवतीति । अन्यथा "अभक्ष्याणि द्विजातीनाम्" (श्लो.५) इत्यधिकाराल्लशुनादिष्वथ शूद्रस्य मांसभक्षणेऽपि कामचारः स्यात् । यद्येवं देवाद्यर्चने शिष्टस्य मांसस्य भक्ष्यता वक्ष्यते (अग्रे श्लो. ३२) "देवान्पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यतीति" देवाद्यर्चनं मेध्येन मांसेन । ये[3] च द्विजातीनां प्रतिषिद्धा मृगशकुन्तास्तेऽमेध्याः । अतश्च तेषां मांसेन देवार्चनासंभवादतच्छेषस्य भक्ष्यत्वादन्येऽपि प्रकरणभेदा यथा ब्राह्मणादीनां मृगपक्षिणः प्रतिषिद्धास्ते शूद्रस्यापि प्रकारान्तरेण प्रतिषिद्धा भवन्ति । तत्र प्रकरणभेदेन केनचिदुच्यते । लशुनादिप्रतिषेधः शूद्रस्य न भवति । अस्ति तावत्प्रकरणभेदेन प्रयोजनं लशुनादिप्रतिषेधे शूद्रस्याधिकारो मा भूदिति मांसेऽपि देवाद्यर्चने गृहस्थस्याधिकारादगृहस्थस्य शूद्रस्य यथाकाम्यम् ।

ननु च पाकयज्ञे शूद्रस्याधिकारतः स्थितस्य भोजनं गृहस्थानां च विहितम् । न च लशुनादिभिः पाकयज्ञाः क्रियन्ते । ततश्च नापि शूद्रस्य यथाकाम्यं लशुनादयो भक्ष्याः स्युः । को दोषः । द्विजातिग्रहणमनर्थकम् । परिहृतमेतदगृहस्थस्य प्रोषितस्य वा कामचारः । न च गृहस्थेन यदहुतं तन्न भोक्तव्यम् शेषभुग्भवेदित्यस्यायमर्थः अकृतवैश्वदेवक्रियेण न भोक्तव्यम् । तत्र यस्यैव यागसाधनता द्रव्यस्य तदेव मेध्यं होतव्यम् । अन्ये तु भोजनकाले कुतश्चिदाहृतस्य मध्यगेहे वा भुज्यते[6] तच्च हुतशेषमपि न प्रतिषिद्धं मांसे तु पुनर्वचनान्नियमः । न कदाचिद्देवानुपयुक्तं[7] भोज्यमिति । यदि चातुर्वर्ण्यस्यात्राधिकारस्तदा यद्वक्ष्यति[8] परस्तात्तु शुद्धिविधौ[9] चतुर्णामपि वर्णानामिति तदनर्थकम् । तत्रैव तस्य प्रयोजनं वक्ष्यामः । अथ श्वमांसाद्यपि शूद्रस्य भक्ष्यं प्राप्नोति द्विजातिग्रहणात्पूर्वत्र । किं त्वेकादशे विड्वराहखरोष्ट्राणामित्यादिश्लोकत्रयनिर्दिष्टाः शूद्रस्यापि न भक्ष्या इति ज्ञापकं दर्शयिष्यामः ॥ २६ ॥

प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया ॥
यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ॥ २७ ॥

अग्नीषोमीये पशौ हुतशिष्टं मांसं लक्षणया प्रोक्षितमुच्यते । ननु प्रोक्षितशब्दो यौगिक उक्षसेचन इत्यस्य धातोः प्रक्षालनक्रियानिमित्तकः । तथा च प्रोक्षणीरासादय घृतं प्रोक्षणीयमिति प्रोक्षणीभिरुद्वेजिताः स्थ इति सर्वत्र क्रियायोगात्प्रयुज्यते । यद्यसेचनसाधनं[10] तत्र कुतो वैदिकसंस्कारनिमित्तकानां स्वसंबन्धे पशुलक्षणाद्वारेण मांसे प्रवर्तते ।

१ फ-एतत् । २ फ-शूद्राणाम् । इत्युत्तरं तु । ३ अ-ड-यच्च । ४ अ-ड-केचित् । ५ गौतमीये अ. २ सू, १ । ६ फ-भुज्यते । ७ अ-क-ड-युक्ते । फ-न कदाचिद्देवानुपयुक्तं । ८ अ-क-ड-यदा यद्वा यद्वक्ष्यति । ९ अ-क-ड युद्धविधौ । १० अ-क-ड-यद्यरोचनसाधनं ।

For Private And Personal Use Only

मुख्यं च शब्दार्थमतिक्रम्य किमिति लक्षणाऽऽश्रीयते ! अतः प्रक्षालितमुदकादिना मांसं क्रियादिना युक्तम् । सत्यम् । यद्यत्र वाक्यान्तराण्यर्थवादाश्चेति निःशेषभूता न स्युः अनुपाकृतमांसानि असंस्कृतान्पशून्मन्त्रैरिति । अतस्तत्पर्यालोचनयाऽयमेवार्थोऽवतिष्ठते । यद्येवं तत एव सिद्धत्वात्किमनेन । केचिदाहुः अनुवादोऽयम् । मांसेच्छया भक्षणस्य विधिस्तावदयं न भवति क्षुत्प्रतिघातार्थिनो लिप्सया प्रवृत्त्युपपत्तेः । स हि विधिरुच्यते यः पुरुषस्य दृष्टेन प्रयोजनेन प्रवृत्तावसत्यां प्रवृत्त्यवबोधको 'यावज्जीवमग्निहोत्रं जुहुयादिति'। शास्त्रमेवात्र प्रमाणम् । यत्रास्मिन्कृते इदमभिमतमभिनिवर्तते अकृते वाऽयमनर्थ आपतत्येवमन्वयव्यतिरेकाभ्यामवगम्यते तत्र शास्त्रमेव मृग्यते । यत्र तु नायमन्यतोऽवगतः केवलागमैकगोचरैर्यः स विधिरिति चोच्यते । इह तु भोजने कृते पुष्टिरुपजायते यद्दुःखं तन्निवर्तत इति । बाला अपि स्तनपायिनोऽनुपदिष्टमवयन्ति । नियमोऽपि भवति तद्रूपानवधारणात् । यदि तावत्प्रोक्षितं च भक्षयेदेवेति नियमस्तदा कालविशेषावच्छेदाभावादाहारविहारकाला अप्यवसीदेयुरनवरतमश्नन्नेवासीत अशक्यश्चार्थ उपदिष्टः स्यात । यथोक्तम् " अश्राद्धभोजीति " 'यदहरेव प्रत्यवेयादिति' महाभाष्यकारेण विधिविशेष एव च नियम उक्तः । असंभवति च विधौ कुतो नियमः । न चान्येन प्रोक्षितमन्येन लभ्येत । तस्मादर्थमनर्थः । अथ प्रोक्षितमेवेति अप्रोक्षितं नेति परिसंख्या । न हि प्रोक्षिताप्रोक्षितोभयभक्षणस्य त्यागादशनाया निवृत्तौ युगपत्पर्यायेण वा प्रवृत्त्या परिसंख्यालक्षणस्य विद्यमानत्वात् । तथाऽप्यनुपाकृतमांसानीत्येव सिद्धम् ।

अन्ये त्वस्य पक्षस्यैवं दोषमुपपादयन्ते । विशेषेण सर्वाप्रोक्षितप्रतिषेधः शकुनीनामपि प्रतिषेधः प्राप्नोति । न च येषामेव प्रोक्षणं विहितं तेषां तु प्रतिविधानाद्यभावादिति न विशेषपरिग्रहे प्रमाणमस्ति । तदयुक्तं मन्यन्ते । एवं सति भेदेन शकुनीनां प्रतिषेधानुक्रमेण गमकत्वात् । तस्मात्तं क्रतुकर्माङ्गत्वेन नियमस्य प्रोक्षितमांसभक्षणस्यायमनुवाद इति युक्तं दृष्टान्ततया । यथा यज्ञेऽवश्यंभक्षणमभक्षणाच्छास्त्रातिक्रमः । एवमुत्तरेष्वपि निमित्तेषु । अनुवादश्चेत्परिसंख्यापेक्षाऽप्यस्तु । गोव्यजमांसमप्रोक्षितं भक्षयेदित्यनेनैतदनुपाकृतानामेवासद्रूपमनूद्यते । अप्रोक्षितस्यापि ब्राह्मणकाम्यादिनिमित्तेष्वनुज्ञापनार्थः । अन्यच्च " अनर्चितं वृथामांसमपि " चातुर्थिकेन वृथामांसशब्देन एतदनुपरिज्ञानार्थमितरथा विज्ञायेत किं तद्वृथामांसमिति । अथवा एकत्र भोक्तुरुपदेशोऽन्यत्र कल्पयित्वा येन देवाद्यर्चनं कृतं तदीयं मांसमन्येनाप्यतिथ्यादिना न भोक्तव्यम् । अनधिकृतेनापि देवाद्यर्चनेन

---

१ अ-क-ड-लक्षण । २ फ-निःशेषभुञ्जानेस्युः । ३ फ-तत्र । ४ अ-क-ड-केवलागमैकगोचरमूर्छास्ते विधिरिति चोच्यते । ५ अ-फ-उद्दिष्टः । निर्दिष्टः ६ फ-अर्थः । ७ अ-क-ड व्यायामशयनाय । ८ फ-शकुनीनामप्रतिषेधः । ९ अ-क-ड-तत्तु विधानेन पुरुषेणादविधानाद्यभावातिति । १० अ-ड-श्रुति । ११ फ-काम्यानिमित्तेषु ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्यतिथ्यादर्थः परगृहे तदीयेन मांसेन देवार्चनेऽधिक्रियते। अथ कल्पयित्वा यदि कृतं तदाऽर्हत्याशितुम्। द्वितीयस्तु प्रतिषेधो "देवान्पितॄनिति" (श्लो. ३२) स्वगृहेऽधिकृतानामकृतवतां भक्षणादयस्तर्हि "असंस्कृतान्पशून्मन्त्रैरिति" (श्लो. ३६) उक्तः प्रोक्षणशब्दार्थः। एवं पञ्चापि निषेधवाक्यानि पृथगर्थानि दर्शितानि।

ब्राह्मणानां च काम्यया। कामना इच्छा। काम्याशब्दः छान्दसः। यदा ब्राह्मणादीनामप्रोक्षितानामिदमनुज्ञानं तदा किंपुनरयं नियमः। अभक्षणे शास्त्रातिक्रमः। उत प्रतिप्रसवमात्रम्? प्रतिप्रसवे भोक्तव्यं विवाहे पुनर्भोक्तव्यमिति वचनादपि प्रतिषेधावृत्तिर्विवाहे गम्यते। न भोजनार्थमावश्यकं किं तु ब्राह्मणा यदि गरीयांसस्तदा तद्वचनातिक्रमो न युक्तः।

अन्ये तु 'क्रीत्वादि[3]' श्लोके ब्राह्मणानामित्यनुवर्त्य शशादिमांसस्यापि विधिमिछन्ति। यज्ञविवाहयोरन्यत्र च गोष्ठीभोजनादौ यदि ब्राह्मणा अर्थयन्ते तदा तेषां मांसं स्वरूपेण देवौद्देशिकया[4] न प्रतिषिद्धमवस्थाविशेषेण प्रोक्षणं देवार्चनादीनि कर्तव्यानि। विशेषः प्रतिषिद्धः। तस्य ब्राह्मणकामनानिमित्ते अभ्यनुज्ञाते[5]।

ननु "क्रव्यादान्शकुनान्" इत्यादेरत्र प्रतिषेधस्यापि "निवृत्तिस्तु महाफलेति" (श्लो. ११) कृतसंकल्पस्तस्याप्यनुज्ञानमिष्यते प्रोक्षितेऽप्रोक्षिते च कृतार्चनेऽकृतार्चने वा।

यथाविधिनियुक्तस्तु प्राणानामेव चात्यये। मधुपर्के च श्राद्धे च नियुक्तोऽप्रोक्षणेनापि भक्षयेत्। एष हि यथाशास्त्रं नियोगस्तत्र श्राद्धे नियमा उक्ता एव। "केतितस्तु यथान्यायं" "कथंचिदप्यतिक्रामन्निति" (अ. ३ श्लो. १००)। श्राद्धं भोक्ष्य इत्यभ्युपत्येदमहं नाश्नामीति न लभ्यते वक्तुम्। अभक्ष्यमशुचिकरं व्याधिजननं च वर्जयित्वा हविष्यविधानान्न भक्ष्यं यद्यद्रोचते तत्तत्प्रीतिकरं दीयते। अत इदं वचनं मधुपर्क एव। ननु मधुपर्के नास्ति नियोगः। अशितव्यं मधुपर्कार्हेण च नियमो नासौ मधुपर्कस्य[6] विधिः। स हि तत्राधिकृतो नधन्यो राजादिः। यथैव "नास्यानश्नन्गृहे वसेदिति" गृहस्थस्य नियमो दृश्यते। एतेनावगम्यते अमतिके न दातव्यमिति। यैस्तु कामचार एवं पूजितसमादानेन पूज्यस्याशनेन न हि तत्तदर्थं कर्म।

ननु चातिथ्यमेवानित्यम्। सत्यम्। दृष्टं त्वात्युत्पादनेन धर्मार्थमनुष्ठानम्। तस्य नियमोक्तधर्मार्थमेव दातुस्तस्य हि गोरुत्सर्गपक्षे विहितो "नामांसो मधुपर्कः स्यादिति"। नार्त्विज्ये वचनस्यापि विषय इति चेत्। अस्त्व-

---

१ ङ–अतिथ्यादये परगृहे न दीयेत; ङ–गारग्रहे। २ अ–ङ–यथा। ३ श्लो. ३२। ४ अ–क–ङ तामौदेशिकया। ५ अ–क–ङ–अभ्यनुज्ञातोनेतुनतु। ६ अ–क–ङ–अशितव्यं चानुमूत्रो नियमो दृश्यते। अ–ङ–मधुपर्कस्याविधिः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यमपि पूर्ववदनुवादः श्राद्धे आर्त्विज्ये च । ननु चार्त्विज्ये उक्तमेव इडादिभक्षणं यजमानस्य तत्र शास्त्रनिबन्धनो नियमो नर्त्विजाम् । सत्यम् । किंतु ऋत्विजो यदि न भक्षयन्ति ते प्रबाध्यन्ते । अविदितेन अदृष्टेनापि दोषेण युज्यन्ते । ननु तेषां भक्षणमधिकृतानां भासतां न हि ते कर्मफलेन युज्यन्ते । भृत्यादिर्हि परिक्रीतानविहितान्पदार्थाननुतिष्ठति । विहितश्च " यजमानपञ्चमा इडा भक्षयन्तीति" । तेषां भक्षणतोऽस्याभ्युपगत्यार्त्विज्यानां नियतं भक्षणं तदा तेनानूद्यत इति युक्तम् । न हि श्राद्धभुजामृत्विजां च भक्षणे शास्त्रीययोगो यजमानस्यैवानुवादः किमर्थ इति चेन्नानुवादः प्रयोजनमपेक्षते । किंतर्हि प्राप्तमस्ति चात्र । उच्यते । अत्रापि यदा गोपेन गोवधपूजाऽभ्युपगता तदाऽवश्यमशितव्यम् । तदनुग्रहार्थमसौ मधुपर्कपूजां प्रतीच्छति । अतः पूर्वा तेन क्रिया संपादनीया । अन्यथा प्राक्रमिकः स्याच्च परिपूर्णेन मधुपर्केण तदनुग्रहासंपत्तेस्तस्मिन्प्रतिषिद्धमांसाशने मधुपर्कपूजार्त्विज्यं च प्रथममेवाभ्युपगन्तव्यम् । ब्राह्मणभोजने च । ब्रह्मचारिणस्तु व्रतवदित्यनुज्ञादानमेव ग्राह्यं मांसस्य ' प्राणानामेव चात्यये ' प्रकृतत्वाद्देवाद्यर्चनमन्तरेण । अभक्ष्यमाणे व्याधिना क्षुधा भोजनान्तरासंभवे जीवनाशशङ्कायां गोजोति भक्षयितव्यम् । सर्वत एवात्मानं गोपायेदित्येतच्छ्रुतिमूलोऽयं नियमः । अतश्चेदृशे निमित्ते मांसमश्नन्नात्महा संपद्यते । आत्मवधश्च " सर्वत एवात्मानं गोपायेत्तस्मादुह न पुरायुषः स्वः कामी प्रेयादलोक्यं ह्येतद्भवतीत्यादि" श्रुतिभिर्मन्त्रार्थवादैश्च तैर्दोषवान्नेति ज्ञापितः । तथाहि **मन्त्रः** (ईशावास्योपनिषद् ३)

" असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः " ॥ इति

ब्रह्मचारिणोऽपि प्राणात्यये भक्षणमिष्यते । तस्यैव बाल्याद्यवस्थानिमित्तं वाचनिकं प्रायश्चित्तं भविष्यतीति । " ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कदाचनेति " । क्षुधा तु प्राणात्ययाशङ्कायां प्रतिषिद्धमांसाशनमपीति **व्यासः** (ब्र. सू. अ. ३।४।२८) । जार्धनीनिदर्शनेनैकाहिकं चेष्यते । एतावता कान्तारं अतीतव्याधौ तु न शक्यमेतत् ज्ञातुमवश्यमशितेनानेन जीवतीति । तत्र न प्रतिषिद्धग्राम्यकुक्कुटादिमांसभक्षणमिष्यते । प्रोक्षणं देवाभ्यर्चनरहितस्य तु प्रकृतत्वादस्त्यनुज्ञानम् । व्याधेश्च न केवलमुत्पन्नस्य निवृत्त्यर्थं यावत्कृशक्षय्यातुरदुर्बलादीनां सर्वकालं मांसाशनं नियमत इष्यते ।

१ अ–ड-प्रतिषिद्धं । २ अ–क–ड-जीवितो । ३ फ--तस्यै । ४ फ–जानातीति । ५ फ--ड ६ फ-रहितस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"स्त्रीमद्यनित्याःक्षयिणःश्रमव्याध्या च कर्शिताः । नित्यमांसरसाहारा आतुराश्चापि दुर्बलाः"। अप्रोक्षितस्यापि छागमांसस्य देवताद्यर्चनं तु तैरवश्यं कर्तव्यम् । असंभवे तु कस्मिंश्चिदहनि न दोषः ॥ २७ ॥

प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् ॥
स्थावरं जङ्गमं चैव सर्वं प्राणस्य भोजनम् ॥ २८ ॥

प्राणः कौष्ठ्यो[1] वायुः जीवबीजभूतः पञ्चवृत्तस्योदानादिकस्य शरीरस्थित्यर्थम् । **इदं सर्वं** जगत्प्रजापतिरेकत्वेनाकल्पयत् । इदमिति सामान्यतो निर्दिश्य विशेषणं निर्दिशति[2] । **स्थावरं जङ्गममिति** । अतो हेतोः **सर्वं प्राणस्य भोजनम्** । तिर्यक्पक्षिमनुष्यसरीसृपावस्थे[3]हेतुमद्भेदनिर्देशात् द्वितीयं सर्वग्रहणमपुनरुक्तम् । यतः प्रजापतिना सर्वमापदि प्राणस्य कल्पितम् । अतः सर्वमेतस्य भोजनम् । तथा च **प्राणसंवादो**पनिषदि श्रूयते (५।२।१)"सहोवाच किं मेऽन्नं भविष्यतीति[4]।यदिदं किंचित् आऽश्वभ्य आ कीटपतङ्गेभ्य" इति

चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः
अहस्ताश्च सहस्तानां शूराणां चैव भीरवः ॥ २९ ॥

चराश्चरणपतनरणो[5]त्साहयोगिनः श्येननकुलादयः तेषाम**चराः** सर्पकपोतादयः **अन्नम्** । एवं **दंष्ट्रिणां** सिंहव्याघ्रादीनां **अदंष्ट्रिणः** रुरुपृषतादयो मृगाः । **अहस्ताः** सर्पमत्स्यादयः **सहस्तानां** नकुलनिषादादीनाम् । **शूराणां** महोत्साहयुक्ताना जीवितानिरपेक्षाणां **भीरवः** प्रियजीविताः । अल्पसत्वा अन्नत्वेन हन्यन्ते[6] ॥ २९ ॥

नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि ॥
धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ॥ ३० ॥

अत्ता भक्षयिता । **आद्यान्प्राणिनः** अत्तुं शक्यान् प्रतिदिवसं भक्षयन्न **दुष्यति** । **धात्रैव** प्रजापतिना **अत्तार आद्या** उभयेऽपि सृष्टास्तस्मात्प्राणात्यये मांसमवश्यं भक्षणीयमिति त्रिश्लोकी विधेरस्यार्थवादः ॥ ३० ॥

यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ॥
अतोऽन्यथाप्रवृत्तिस्तु राक्षसो विधिरुच्यते ॥ ३१ ॥

यज्ञार्थे **मांसस्य** पिण्डप्राशित्रादिजग्धिरशनम् । **एष दैवो विधि**र्देवैरेतद्विहितम् । **अन्यथा** तु मांसाशी यतः शरीरपुष्ट्यर्थकमांसाशने **प्रवृत्तिः स राक्षसो विधिः** । पिशाचानां मांसभक्षणे स्थितिरिति निन्दा ॥ ३१ ॥

---

१ फ-कौक्षो । २ अ-क-ड निर्दिश्यते । ३ फ-अवस्था । ४ फ-त्वं भविष्यसीति । ५ अ-क-ड-शरणोत्साह- । ६ अ-क-ड-दृश्यंते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रीत्वा स्वयं वाऽप्युत्पाद्य परोपकृतमेव वा ॥
देवान्पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति ॥ ३२ ॥

मृगपक्षिमांसविषयमिदं शास्त्रम् । रुरुपृषतादीनां शशकपिञ्जलादीनां मांसं देवानां पितॄणां चार्चनं कृत्वा खादतो न दोषः । यथा गृहे वैश्वदेवाद्यर्थकृते संविधानं विनाऽपि वैश्वदेवेनोदनादि भोजनमस्ति न तथा मांसस्य । एवमर्थमेतत्पुनर्वचनं देवान्पितॄंश्चार्चयित्वेति । अन्यया गृहस्थस्य पूर्वमेव भोजनमेवं रूपं देवेभ्य इति । तेन शब्देनोद्दिश्य शुचौ देशे मांसस्य प्रक्षेपः । यदि वा अग्नये वायवे सूर्याय जातवेदस इति देवार्चनं कर्तव्यम् । फलैर्वा वर्तयन्नग्नौ जुहुयादाहुतयः कृत्वा अग्निमतोऽन्यत्र न भवन्ति । न चाग्नौ होमेन विना बलिहरणं न कर्तव्यम् । कर्मान्तरस्य प्रयोगान्तरस्य च प्रतिपादितत्वात् । आस्तां तावदेतत् । अन्ये तु श्राद्धं पितॄणामर्चनमाहुः । दृष्टश्च श्राद्धेऽर्चनप्रयोगः । पितॄंश्चैवाष्टकान्वदन्ति । ततश्च सर्वस्मृतिकारैः श्राद्धमेव विहितं न पुनरन्या काचिदेव क्रिया । कथं पुनर्मांसस्य क्रयसंभवः यावता आपणभूमेर्मांसं क्रीयमाणं सौनमापद्यते । अथोच्यते । सौनिकैरहतस्य स्वयं मृतस्य पशोर्मांसमभक्ष्यमनारोग्यकरत्वात् । उच्यते । व्याधशाकुनिकादिभिराहृतं क्रेष्यते न च ते सौनिका इति प्रसिद्धास्तैश्च विक्रयार्थं ग्राम्यद्भिर्गृह आनीतं भवति तदा संभवति क्रयः न हि तत्सौनमुच्यते । स्वयं वाऽप्युत्पाद्य ब्राह्मणो याञ्चया क्षत्रियो मृगयाकर्मणा ॥ ३२ ॥

नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः ॥
जग्ध्वा ह्यविधिना मांसं प्रेतस्तैरद्यतेऽवशः ॥ ३३ ॥

पूर्वोक्तादेवाद्यर्चनविशिष्टात् ब्राह्मणकामनादिनिमित्तान्तरं यद्भक्षणं यो विधिस्तेन नाश्नीयात् मांसम् । उक्तानुवादोऽयम् । आपदि प्राणात्यये देवाद्यर्चनमपि नापेक्ष्यम् । ननु चैतदपि निमित्ततयोक्तमेव । ततश्च विधिरेवायं नाविधिः । सत्यम् । प्रोक्षितसंबन्धाद्ब्राह्मणस्यैव तत्र संनिधानमाशङ्कायां शशादिविषयेऽभ्यनुज्ञानार्थमनापदीत्युच्यते । किंतर्हि विध्यर्थानुष्ठानपरो विधिज्ञ उच्यते । तथा लौकिकानुष्ठानेऽपि जानातिरुपचारात्प्रयुज्यते । एष स तज्जानातीति अनुष्ठानपरे प्रयुञ्जते । अत्र फलकथायां जग्ध्वा अशास्त्रीयेण निमित्तेन प्रेतो मृतस्तैः प्राणिभिरवशोऽद्यते । येन विषयेण यो येषां मांसमश्नाति तस्य विविधा पीडा भवति एतावन्मात्रपरमेतत् । अन्यथा प्रायेण छागादिमांसमश्नाति लोका न

१ फ-श्राद्धं च । २ ड-क्रियमामाणं । ३ फ-प्रेत्य । ४ अ-क-ड-+अनापदि । ५ अ-क-ड-मृतस्य ।

५१

For Private And Personal Use Only

च छागादयो मांसाशिनः । अथवा तत्कृतेनै पापेन क्रव्याद्भिरप्यद्यमानस्तैरद्यत इत्युच्यते ॥ ३३ ॥

न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ॥
यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥ ३४ ॥

प्रसिद्धार्थः श्लोकः ॥ ३४ ॥

नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ॥
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥ ३५ ॥

जन्मानि अवश्यम् । प्राणात्ययसंभवे देवार्चनं यो न करोति अथ च मांसमश्नाति स दुष्यत्येव ॥ ३५ ॥

असंस्कृतान्पशून्मन्त्रैर्नाद्याद्विप्रः कदाचन ॥
मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ॥ ३६ ॥

प्रोक्षणादयः पशुबन्धे मन्त्रवन्तः संस्कारा विहितास्ते येषां क्रियन्ते पशूनां वैदिकयागशेषाणां मांसमद्यात् । सीतायज्ञादिषु च सत्यपि सामयाचारिकयागशेषत्वे मन्त्रसंस्काराभावादभक्ष्यता । **शाश्वतं** शाश्वतो नित्यो वैदिक इत्यर्थः । **आस्थित** आश्रितः ॥ ३६ ॥

कुर्याद्घृतपशुं सङ्गे कुर्यात्पिष्टपशुं तथा ॥
न त्वेव तु वृथा हन्तुं पशुमिच्छेत्कदाचन ॥ ३७ ॥

यद्येषां बुद्धिः स्यात्सीतायज्ञखलज्ञिकायज्ञखण्डिकायागादिषु समाचारप्रमाणेषु पशुवधः फलकामस्य त्याज्यः । दृष्टा हि पशुवधोपयाचितकेनातिशयवती सस्यसंपत्तिरिति तन्निषेधार्थमाह । **सङ्गे** प्रस्तावात्पशुवधप्रसङ्गे **घृतपशुं कुर्यात्** घृतपशुमेव कुर्यात् । पशुना यष्टव्ये तत्स्थाने घृतेन यजेत देवताः । तद्धि सामान्येन यागद्रव्यम् । अथवा **पिष्टपशुं** पिष्टमयपशुप्रतिकृतिं कृत्वा देवताभ्य उपहरेत्पिष्टेन वा पुरोडाशादि कृत्वा । कथमयं वृथा पशुवधः । उच्यते । शिष्टानां समाचारः प्रमाणम् । ननु स्त्रीशूद्रजनानामवैद्यत्वान्नात्र वेदमूलता शक्या कल्पयितुम् । देवताराधनार्थं न ह्येतदाचरन्ति । न च देवताराधनार्थानि वैदिकानि कर्माणि गुणत्वेन देवताश्रुतेः । अन्वयव्यतिरेकमूलतां चात्रेच्छन्ति दृश्यते पशुवधोपयाचितकेन फलसंपत्तिरिति मन्यमानाः । अतो न वेदमूलता । अन्वयव्यतिरेकान्नपि

---

१ फ–तत्कृतेनापायेन । २ अ–क–ड–चण्डिकायज्ञ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रान्तिमात्रम् । असकृद्व्यभिचारात् । अतोऽयं श्लोको न्यायप्रासार्थानुवाद एव सौहार्दादाचार्येण पठितः ॥ ३७ ॥

यावन्ति पशुरोमाणि तावत्कृत्वोह मारणम् ॥
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥ ३८ ॥

तावतीर्जन्मनामावृत्तीर्मारणं प्राप्नोति । वृथापशुघ्नः श्रुतिस्मृत्योरचोदितं[1] पशुवधं यः करोति । तच्च प्रकरणान्महानवम्यादिषु लौकिकैर्यत्क्रियते । पशुघ्न इति कप्रत्यये छान्दसं रूपम् ॥ ३८ ॥

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥
यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥ ३९ ॥

नायमनन्तरोक्तो[2] दोषः श्रुतिस्मृतिचोदिते वधे यज्ञाङ्गभूते या भृतिस्तन्निर्वृत्त्यर्थमेव[3] स्वयंभुवा प्रजापतिना पशवः सृष्टा उत्पादिताः । स्वयमेवेत्यर्थवादः । अस्यै जंगतो विश्वस्य यज्ञो ज्योतिष्टोमादिः । भूत्यै भूतिर्विभवः पुष्टिः स्फीतिः । तस्मात्तत्र यो वधः सोऽवधो विज्ञेयः । हिंसाजन्यस्य पापस्यै निवृत्तेरेवमुच्यते ॥ ३९ ॥

ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा ॥
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः ॥ ४० ॥

कथं पुनर्यज्ञे हिंसादोषो नास्ति । उच्यते । हिंसा हिंस्यमानस्य महानपकारः । प्राणवियोगेन पुत्रदारधनविभवादिवियोगेन सर्वानर्थोत्पत्तेर्दुष्कृतस्य च समनन्तरं नरकादिफलविपाकस्य प्रत्यासत्तेः । यज्ञे तु हतानामुपकारो नापकारः नरकादिफलानुत्पत्तेः । यतो यज्ञे निधनं विनाशं गता उच्छ्रितीरुत्कर्षं जातितो देवगन्धर्वयोनित्वं द्वीपान्तरेषूत्तरकुरुप्रभृतिषु वर्षान्तरे वा जन्म प्राप्नुवन्ति ।

अर्थवादश्चायम् । न ह्यत्र विधिः श्रूयते प्राप्नुवन्तीति वर्तमानोपदेशात् । न चार्थवादात्प्रतितिष्ठन्तीतिवद्विधिप्रतिपत्तिर्युक्ता । विध्यन्तरस्याभावादसंभवाच्च सर्वोऽयमविधिमांसभक्षणप्रतिषेधशेषः । ऐहलौकसंपाद्यतयाऽप्ययं[4] प्रतिषेधो "न त्वेव तु वृथा हन्तुं पशुमिच्छेदिति" । यच्चाभ्यनुज्ञानं "यज्ञार्थं पशवः सृष्टा" इति तत्सर्वं भक्षणप्रतिषेधतया प्रतीयते । तथा च वक्ष्यति "नाकृत्वा प्राणिनां हिंसाम्" इत्यादि ।

न चात्र विधेरस्ति संभवः । न तिरश्चामधिकारः संभवति विशेषविज्ञानाभावात् ।

---

१ अ-क-ड-यागं पशुवधं । २ अ-क-ड-अनन्तरोक्तो । ३ अ-क-ड-अभिवृत्ते । ४ अ-क-ड-जुह्वता । ५ अ-क-ड-श्लोकसंपाद्यतया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न चानधिकृतस्य कर्तृत्वम् । नाप्यकर्तृत्वे शास्त्रीयात्कर्मणः फलोत्पत्तिः । न ह्यत्र दृष्टवस्तुस्वाभाव्येन फलोत्पत्तिः । यथा विषमविदुषोऽपि पीतवतो जनयत्येव स्वफलम् । नैवं वैदिकार्थाः । अचैतन्याचौषधादीनामृत्विङ्न्यायोऽपि नास्ति । दृष्टं किल कुतश्चन कर्मणः परप्रयुक्तादप्यृत्विजां फलम् " यः कामयेत पापीयान् स्यात् " इत्यादि तत्र विध्यन्तरशेषत्वाभावात्स्पृष्टत्वाच्च विधिप्रतिपत्तेर्मनुष्याधिकारत्वाच्च । शास्त्रस्य युक्ताङ्गव्यापारसमाश्रितो वाचनिकस्तावन्मात्रोऽधिकारः । यथा परकीयाश्वमेधावभृथे ब्राह्मणस्य प्रायश्चित्तमुक्तम् । इह त्वधिकार एव नास्तीत्युक्तम् ।

ओषध्यो दर्भादयः । **पशवश्छागादयः** । **वृक्षाः** पूज्याः । **तिर्यञ्चोऽ**पशवोऽपि पशवो येषां हविष्येन चोदना " कपिञ्जलानालभेत " इति । भीमप्रवहणादनडुाहस्तिर्यञ्चो वाजपेयादौ तिर्यञ्च इति व्यपदिश्यन्ते । यद्यपि तेषां तत्र निधनं नास्ति तथापि यावती च पीडा विद्यत इति सा निधनशब्देन लक्ष्यते । **पक्षिणः** कपिञ्जलादयो यद्यपि ते पशुत्वेन चोच्यन्ते । अप्रसिद्धतरप्रयोगास्तु " सप्तग्राम्याः पशवः सप्तारण्याः " इति । गवादयोऽपक्षिणश्चतुष्पाज्जातिवचनः पशुशब्दः । गोबलीवर्दवद्वा भेदो द्रष्टव्यः ॥ ४० ॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि ॥
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥ ४१ ॥

यावत्यः काश्चिच्छास्त्रचोदितहिंसास्ताः संक्षिप्य दर्शयति । **मधुपर्को** व्याख्यातः । तत्र गोवधो विहितः । **यज्ञो** ज्योतिष्टोमादिस्तत्र संस्थैकादशिन्यादि । पशुवधो निरूढपशुवधादिः स्वतन्त्र एव च । **पितृदैवतं** पितरो देवता यस्मिन्कर्मण्यष्टकादौ । न तु श्राद्धम् । तद्धि सिद्धेन मांसेन विहितम् । न च पशुवधश्चोदितः । न चेदमेव विधायकं युक्तम् । उत्पत्तौ श्राद्धस्य हिंसाया अचोदितत्वात् । अस्य च विस्पष्टविधानादष्टकापशुवधेनापि नेतुं शक्यत्वाद्विधित्वे चास्य मूलकल्पनाप्रसङ्गाद्विध्यन्तरशेषतायाश्च वक्ष्यमाणत्वात् । येषां तु मतं पितॄणां देवतानां च कर्म महायज्ञादि । ब्राह्मणैर्वध्या भृत्यानां चैव वृत्त्यर्थमापदि पशुहिंसनमप्राप्तं प्राणात्ययेऽप्यनुज्ञायते ॥ ४१ ॥

एष्वर्थेषु पशून् हिंसन्वेदतत्त्वार्थविद्द्विजः ॥
आत्मानं च पशुं चैव गमयत्युत्तमां गतिम् ॥ ४२ ॥

For Private And Personal Use Only

गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः ॥
नावेदविहितां हिंसामापद्यपि समाचरेत् ॥ ४३ ॥

अवेदविहितहिंसाप्रतिषेधोऽयम् । न च वेदविहिताऽभ्यनुज्ञायते । न च गुरौ वसतो ब्रह्मचारिणोऽरण्ये च तपस्यतोऽन्या काचिद्धिंसाऽस्ति । अवकीर्णिनो ब्रह्मचारिणः स्यादपि वानप्रस्थस्य तु नैवास्ति । ब्रह्मचारिणोऽप्यात्मोपेक्षणं नैवेष्यते । अतोऽयं विधिरेव श्राद्धे । **गृह** इत्यनुवाद एव । यदि चायं विधिः स्यादरण्य आपद्यपीति किमालम्बनमेतत्स्यात् । न च वानप्रस्थस्य साग्निकस्यापि पशुयागोऽस्ति " पुरोडाशांश्चरूंश्चैव " इत्यत्र दर्शयिष्याम इति केचित् । **उपाध्याय**स्त्वाह युक्तं ब्रह्मचारिणो वानप्रस्थस्य तु " अपराजितां वाऽऽस्थाय " इत्यादिनाऽऽत्मत्यागोऽपि विहितस्तस्य नास्ति जीवितार्था हिंसेति स्फुटतरं तत्रैव निरूपयिष्यते (अ. ६ श्लो. ३१) ।

ननु चापद्ययं प्रतिषेध उच्यते । तत्कृतस्तत्रैवानुज्ञानं व्याख्यायते । सत्यम् । अन्यथा न किंचिदनेन कृतं स्यात् । अर्थवादार्थमिति चेदर्थवादस्याप्यालम्बनमन्वेषणीयम् । अतो नापद्ययं प्रतिषेधो विधिश्चापद्यविरुद्धः । बहुभेदादापदाम् अशीयस्यामापदि मासिकमर्धमासिकं वा भोजनं भविष्यतीति बुद्ध्या प्रवृत्तिर्निषिध्यते । यदा त्वेषा बुद्धिरधुनैवानश्नन्न जीवामि यदा वाऽभिमुखागत उद्यतशस्त्र आततायी तदाऽऽपद्यनुज्ञा । एवं सर्वत एवात्मानं गोपायेदिति श्रुतिरनुगृहीता भवति ॥ ४३ ॥

या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे ॥
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥ ४४ ॥

वेदविहितो यः प्राणिवधः सोऽस्मिञ्जगति चराचरे स्थावरजङ्गमे नित्योऽनादिः । यस्तु तन्त्रादिः सोऽन्वयव्यतिरेकभ्रान्त्या इदानींतनः । अतो वैदिकीमहिंसामेव विद्यात् अमुत्र प्रत्यवायाभावात् । अहिंसेति कार्यत उच्यते न स्वरूपतः । ननु च सैव हिंसारूपा । अभेदात् कथं कार्यो भेदः । उच्यते । **वेदाद्धर्मो हि निर्बभौ** धर्मस्याधर्मस्य च यत्प्रथनं तद्वेदादेव पौरुषेयाणामप्रामाण्यात् । वेदश्च तस्या एवाभ्युदयहेतुत्वं क्वचित् ज्ञापयति । स्वरूपाभेदोऽपि नास्ति । क्रत्वर्थपुरुषार्थत्वेन भेदादाशयभेदेन प्रवृत्तेः । लौकिक्यां मांसीयतो द्विषाणस्य वा प्रवृत्तिः वैदिक्यां तु शास्त्रेण चोदितमिदं क्रत्वर्थमिति । **निर्बभौ** निःशेषेण भातः प्रकाशतां गत इति यावत् ॥ ४४ ॥

---

१ अ–क–ड–अतश्चापद्ययं प्रतिषेधो विधिश्चाविरुद्धः । २ फ–न ३ अ–क–ड–तस्यामापदि । ४ अ–क–ड–विषहिंसारूपाभेदात् । ५ अ–ड–प्रथमं; फ–प्रणयनम् । ६ ड–वेदतश्च; फ–वेदस्य स्वत एव ७ फ–मांसं यतो–च—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया ॥
स जीवंश्च मृतश्चैव न कचित्सुखमेधते ॥ ४५ ॥

अकारोऽत्र प्रतिषेधार्थीयः प्रश्लिष्टो द्रष्टव्यः । अहिंसकानां च प्रतिषेधात्सर्पव्याघ्रादीनामप्रतिषेधः ॥ ४५ ॥

यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति ॥
स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ॥ ४६ ॥

बन्धनवधा एव **क्लेशाः** । अथवा वित्ताशनादयः । तान्यो न कर्तुमिच्छति वित्ताशनमेव येन न कृतं तद्विषयेच्छैव यस्य निवृत्ता न केवलं पीडां न करोति यावद्धितं प्रेप्सितुमिच्छति सर्वस्य **स सुखमत्यन्तमश्नुते** ॥ ४६ ॥

यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च ॥
तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ॥ ४७ ॥

यच्चिन्तयति शुल्कमर्हणादि यत्र च रतिमभिलाषं बध्नात्याभिप्रेत्य वस्तुनि **तद**. **यत्नेन** स्वल्पेनैव कालेना**वाप्नोति** । यत्तु कुरुते कर्मणा तत्कर्मनिष्पत्तिसमनन्तरमेवाविघ्नेन प्राप्नोति ॥ ४७ ॥

नाकृत्वा प्राणिनां हिंसा मांसमुत्पद्यते कचित् ॥
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ ४८ ॥

सर्वस्य हिंसाप्रतिषेधश्लोकसंघातस्य मांसभक्षणशेषतां दर्शयति । यावत्प्राणिनो न हतास्तावन्मांसं नोत्पद्यते । हिंसा चातिशयेन दुःखावहा । तस्मान्मांसं विवर्जयेत् । ननु च स्वयं मृतानां भवत्येव मांसं किमिदमुच्यते ' नाकृत्वेति ' । अर्थवादोऽयम् । स्वयं मृतानां च मांसं रोगहेतुत्वादप्राप्तमेव । न ह्यदत्वा मांसं भक्ष्यते । न च रोगहेतोर्दानमास्ति । **उत्पद्यत इति** मांसस्य हिंसानिमित्तत्वात्कर्तृव्यपदेशसमानकर्तृकत्वं भवत्येवाविरुद्धम् । अथवोत्पद्यत इति **न च स्वर्ग्य इति** न स्वर्गानुत्पत्तिहेतुमात्रमाभिप्रेतमपि तु नरकादिदुःखहेतूनाम् ॥ ४८ ॥

समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम् ॥
प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ॥ ४९ ॥

अशुचिस्थाने कुक्षौ गर्भवृद्धिः शुक्रशोणिताभ्यां वाऽशुचिभ्यां प्रभावः । तथा **वधबन्धौ** शरीरवतां तत्कृतौ । एतत्सर्वं **प्रसमीक्ष्य** निपुणबुद्ध्या तत्वतो निरूप्य **निवर्तेत**

---

१ फ–वित्र । २ फ–अग्राह्यमेव । ३ अ–क–ड–स्वर्गानुत्पत्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वमांसस्य भक्षणात्सर्वस्याप्रतिषिद्धस्यापि । किंपुनः प्रतिषिद्धस्य । अर्थवादोऽयम् । न पुनस्तत्वतः अशुच्येव मांसं ज्ञेयं न हि तदशुचित्वविधिपरं वाक्यम् ॥ ४९ ॥

न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ॥
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ॥ ५० ॥

विधिर्देवार्चनं तद्धित्वा यो **न भक्षयति** किंतर्हि विधिना भक्षयति **स** लोकस्य **प्रियतां** प्राप्नोति प्रियः सर्वस्य भवति । **व्याधिभिश्च** कृशादुर्बलादेर्मांसमश्नतो व्याधिरुपजायते । तेनापि विधिनैवाशितव्यम् । तथा भक्षयन् **व्याधिभिश्च न पीड्यते** । अन्यथा अश्नन्नपि मांसं पीड्यत एव व्याधिभिः । **पिशाचवदिति** पिशाचास्तिर्यग्जातिविशेषास्ते विधिमनपेक्ष्य मांसमश्नन्ति । ततोऽन्योऽपि तथा भक्षयन्पिशाचसदृशो भवतीति निन्द्यते ॥ ५० ॥

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ॥
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥ ५१ ॥

अन्येन हन्यमानं स्वप्रयोजनतो यद्यन्योऽनुमोदते साध्वयं हन्ता करोतीत्य**नुमन्ता** । **विशसिता** हतस्याङ्गविभागकारः । **उपहर्ता** परिवेषकः । **खादक** इत्येते सर्वे घातकाः ।

अघातकेषु खादनसंस्कारविक्रयादिकर्तृषु घातकत्वेऽध्यारोपिते निन्दा न पुनस्तत्वत एते घातका एव । लौकिकी हि वधक्रिया प्राणत्यागफला । तस्य कर्ता घातकः स्मृतितो गम्यते । स्वतंत्रः कर्तेति विशेषशास्त्रादिना यः प्राणवियोजनं प्राणिनां करोति स हन्तोच्यते । क्रयविक्रयाद्याश्च क्रियास्ततोऽन्या एव । ननु चेयमपि स्मृतिरेव । एते अनुमन्तृप्रभृतयो घातका इति नेदं शब्दार्थसंबन्धे प्रमाणम् । किंतर्हि ? धर्माधर्मयोरभियुक्ततरो हि । तत्र भवान्पाणिनिः **मन्वाद**यश्च लोकप्रसिद्धैः पदार्थैर्व्यवहरन्ति न शब्दार्थसंबन्धविधिं स्मरन्ति । प्रयोक्तारो ह्येते न स्मर्तारः ।

ननु च " तमाचार्यं प्रचक्षते " इत्यादेः स्मरन्त्येते । सत्यम् । न तत्र शास्त्रस्मृतिविरोधः । न च तेषां वाक्यानामन्यत्प्रयोजनमस्ति । इह तु गौणेनापि प्रयोजनेनार्थवादतयाऽप्युपपत्तेर्न घातकत्वं शक्यमवसातुम् । येऽप्याहुर्भक्षकैश्चेन्न विद्यते वधकोऽपि न विद्यत इति भक्षणप्रयुक्त एव वधः प्रयोजकश्च कर्ता स्मर्यते । ततो मुख्यमेव घातकत्वमतो घातकप्रायश्चित्तमेव खादकस्य युक्तमिति ब्रूमः । पृथक्-

१ फ–व्याधिभिर्न । २ ख–स्वभियुक्ततरो । ३ अ–क–ड–भक्षतश्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रायश्चित्तं हतानां रसास्वादकस्य " जग्ध्वा मांसमभक्ष्यं चेति " (अ. ११ श्लो.१९२)। यदि प्रयोजकत्वेन कर्तृत्वमुक्तं तदपि नैवास्ति । इदं हि तस्य लक्षणम् । प्रेषणाध्येषणाभ्यां तु यः स्वतन्त्रस्य चोदकः स कर्ता स एव हेतुश्च मुख्योऽपर इति । वधको हि जीवनप्रयुक्त्या प्रवर्तते मांसविक्रयेण जीविष्यामीति न तु खादकेन विनियुज्यते । अथ तत्समर्थाचरणं प्रयोजकत्वम् । योऽयं क्रियां कर्तुमध्यवसितस्तत्रानुकूल्येन यः संविधित्सुः स प्रयोजक इति । एतदप्यत्र नैवास्ति, साधनोपनिधानं त्रसतः पशोरस्वतन्त्रीकरणं खड्गोपनयमित्येवं संविधानशब्दवाच्यं युक्तम् । तेन विना क्रिया न निष्पद्यते । अथ यदर्थः क्रियारम्भः स प्रयोजकश्चेति चेन्माणवकमध्यापयतीत्यध्यापकहेतुकर्तृसंज्ञाप्रतिलम्भो न ह्यध्ययनमध्यापयति । न चासौ किंचिदुद्दिश्य हनने प्रवर्तते । येनास्य तदर्थनिरूपणाय भक्षणेऽनर्था प्रवृत्तिः स्यात् । सर्वे इमे स्वभूत्यै यतन्ते न केन कश्चित्परोऽनुग्रहीतव्य इति मुहूर्तमप्यवतिष्ठत इत्यपि पूर्णकामः । अथ स्वार्थे प्रवृत्तस्य भक्षयितारमन्तरेण प्रवृत्तिरनर्थिका तस्मिंस्तु सति फलवती फलं च प्रयोजकम् । तच्च खादकाधीनमिति पारंपर्येण खादकः प्रयोजक इति । एवं तर्हि यो द्वेषाद्वध्यते स हन्तुः प्रयोजकः स्यात्ततश्च हन्यमान एव हन्ता संपद्यते । न हि द्वेषेण विना हन्तृत्वोपपत्तिरिति । तथा ब्रह्महत्यायामपि सर्वस्वं दद्यात्पातकसंप्रयोजकम् । न हि प्रतिग्राहयितारमन्तरेण प्रतिग्रहोपपत्तिस्ततश्च प्रतिग्राही न केवलं प्रत्यवेयादपि तु दाताऽपि । रूपवती च स्त्री स्मरशरदह्यमानहृदयेन रागिणा दर्शितस्पृहातिशयेन शीलं रक्षन्ती प्रत्यवेयात् तस्मान्नेदं प्रयोजकलक्षणम् । तौ हि वधकखादकौ स्वार्थप्रवृत्तौ नष्टाश्वदग्धरथवदितरेतरोपकारमनुभवन्तौ न पुनरन्यतरप्रयोजकस्मृतिशङ्कया च " शूद्रविट्क्षत्रविप्राणाम् " (अ. ८ श्लो. १०४) इत्यत्र श्लोके निपुणमेवनिर्णीतम् ॥ ५१ ॥

स्वमांसं परमांसेन यो वर्धयितुमिच्छति ॥
अनभ्यर्च्य पितॄन्देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ॥ ५२ ॥

अधिकपुष्टयर्थं यो मांसमश्नाति तस्येयं निन्दा । न तु रोगोत्पत्तिभयाशङ्कया । यत आह । **यो वर्धयितुमिच्छतीति** । तस्याप्यनभ्यर्च्य **पितॄन्देवान्** । न तु रोगहेतोस्त्वर्चनमकुर्वतोऽपि कथंचिदसंभवान्न दोषः ॥ ५२ ॥

वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ॥
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥ ५३ ॥

---

१ फ-अध्यापने २-नष्टाश्वदग्धरथन्यायः । ३ अ-क-ङ-अत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवाद्यर्चनशिष्टस्य शशादिमांसस्य भक्षणमनुज्ञातम्। ततो निवर्तमानोऽश्वमेधफलमश्नुते अश्वमेधस्य फलं " सर्वान्कामानवश्यं सर्वाविजितीः " इत्यादि ।

न चात्र चोदनीयम् कथं महाप्रयासेन बहुधनव्ययेन च तुल्यफलता मांसनिवृत्तेः स्यात् । यत एषोऽपि संयमोऽतिदुष्करः । किंच लोकवत्परिमाणतः फलविशेषः स्यादित्ययं न्यायो जृम्भत एव । अतः फलविधौ न दोषः। वयं तु ब्रूमः। अर्थवाद एवायम्। यतो वर्षे शतं समा इति वाऽर्थवादपक्षे सुघटम्। न हि प्रतिवर्षमश्वमेधस्य विधेयत्वसंभवः। नापि वर्षे शतं तावतः कालस्याधिकारिणो जीवनाद्यसंभवात्। पुण्यं च फलं च **पुण्यफलम्** । समाहारद्वन्द्वः । षष्ठीसमासे ह्यसामर्थ्यम् ॥ ५३ ॥

फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः ॥
न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥ ५४ ॥[1]

मेध्यैर्देवार्हैः । **मुन्यन्नानि** नीवाराद्यन्नान्यकृष्टपच्यजनितानि । अयमर्थवाद एव ॥ ५४ ॥

मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ॥
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥ ५५ ॥

नामधेयनिर्वचनमर्थवादः । **मां स भक्षयिता** । स इति सर्वनाम सामान्यापेक्षं योग्येनार्थेन मतिराकांक्षीकरोति यस्य मांसमश्नाति ॥ ५५ ॥

न मांसभक्षणे दोषो न मद्ये न च मैथुने ॥
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ ५६ ॥

प्राणस्यान्नमित्यत आरभ्य यावदयं श्लोकोऽर्थवादसंघात एव द्वित्राः श्लोका विषयार्थाः । **न मांसभक्षणे दोषो** यथा "क्रीत्वा स्वयंवाऽप्युत्पाद्येति" (श्लो० ३२) तथाऽयमपि श्लोकः । **निवृत्तिस्तु महाफलेत्येतदत्र** श्रूयते । बहुभिर्निन्दार्थाकैरीदृशः संस्कारो जातो यन्न किंचिन्मांसमशितव्यम् । भूतानां वृत्त्यर्थमाह । **न मांसभक्षणे दोष इति** । देवार्चनशिष्टे ब्राह्मणकाम्यादिषु निमित्तेषु प्रागुक्तेषु न दोषः किंचिदशितुमिच्छन्ति । निवृत्तिर्न भक्षयामीति संकल्पपूर्विका महाफला । फलविशेषाश्रुतेः स्वर्गः फलमिति मीमांसकाः । एवं मद्ये क्षत्रियादीनां मैथुने तु सर्ववर्णानां दिवोदक्यापर्वकालादन्यत्र । अल्पस्वल्पा प्रवृत्तिरेषा शास्त्रीया भूतानां शरीरस्थितिहेत्वर्था प्रवृत्तिः तथा **चायुर्वेदकृत्** ।

१ अयं श्लोकस्तट्टीका च फ पुस्तके एव दृश्यते । अ-क-ख-ड-क्ष-पुस्तकेषु तु श्लोको न विद्यते । टीका तु ' अयमप्यर्थवाद एव ' इति वर्तते ।

२ अ-क-ख-ड-क्ष-निन्दायां करैरीदृशः

३ अ-क-ख-ड-क्ष-किंतुमिच्छन्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" आहारो ब्रह्मचर्यं च निद्रा चेति त्रयं मतम् । मादकं च स्त्रियश्चैव सूपस्तम्भनमायुषः " ॥ इति ।

यस्तु तेन विनाऽपि शक्नोति जीवितुं तस्य **निवृत्तिर्महाफला** । प्रदर्शनार्थं चैतदशिष्टाप्रतिषिद्धविषयाणामन्यासामपि निवृत्तीनामेवमेव । यत्र विधानं पुरुषस्य प्रवर्तमानस्य प्रीत्यतिशयोत्पत्तिप्रयोजनमनिन्द्यं गर्हेत वा यतो निवृत्तिः फलाय यथा मध्वशनं संपन्नभोजनं राङ्कवं परिधानमित्येवमादि तथा च **शिष्टसमाचारः व्यासश्च** भगवानेवमेवाह । ये तु संसक्तितोऽशिष्टाप्रतिषिद्धा अपि यथा हसितकण्डूयनादयस्ततो निवृत्तिर्धर्माय ॥५६॥

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च ॥
चतुर्णामपि वर्णानां यथावदनुपूर्वशः ॥ ५७ ॥

चतुर्णामपीतिवचनं सामान्यविहिता धर्माः शूद्रस्य नेदृशं यत्नमन्तरेण भवन्तीति ज्ञापनार्थम् । प्रेतेषु जीवतां शुद्धिः । सुप्सुपेति समासः । प्रायणं चाप्रेतवन्निमित्ता शुद्धिरियं विशेषस्य । अतश्च यद्यपि शुद्धिवचनं प्रतिज्ञायते तथाऽप्यशुद्धिसापेक्षत्वाच्छुद्धेः शास्त्रप्रत्ययकारकत्वादुभयोरप्रतिज्ञाताऽपि प्रथममशुद्धिरुच्यते ॥ ५७ ॥

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ॥
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥ ५८ ॥

अनुजातो दन्तजाताद्बालतर इति स्मरन्ति । तथाविभागेनोद्देशमात्रमिदं यतस्तदपेक्ष आशौचकालभेदो भविष्यति । तद्यथा स्मृत्यन्तरे " आ दन्तजन्मनः " तथा " बाले देशान्तरस्थे च " इत्यादिना सद्यःशौचं श्रुतम् । बाल अजातदन्तो विज्ञेयः । एवं च नृणामकृतचूडानामित्येतदेकरात्रिकमाशौचं दन्तजातेऽप्यवस्थाप्यते । एवमेते स्मृतिविषयव्यवस्थया अविरोधिन्यौ बालविषये भवतः । नैशिकी च शुद्धिराचूडाकरणात् । यतो निवृत्तमुण्डकानां त्रिरात्रं वक्ष्यति । तच्च त्रिरात्रं प्रागुपनयनात्परतः " शुद्धचेद्विप्र " इत्यादि । ये तु " दशाहं शावमाशौचम् " इत्येतान्पक्षान्वयोविभागेन वर्णयन्ति स्मृत्यन्तरात्समाचाराच्च व्युत्क्रमेण संबन्धयन्ति दशाहमुपनीतस्य अनुपनीतस्य चतुरहं कृतमुण्डस्य त्र्यहं जातदन्तस्यैकाहमनुजातस्य सद्यःशौचिकादयस्तु विकल्पाः । एवं त्र्यहचतुरहयोः कृतचूडस्य तेषां मते स्मृत्यन्तरप्रसिद्धो वृत्तस्वाध्यायापेक्षो न विकल्पः प्रतिपादितः स्यात्तच्चोत्तरत्र दर्शयिष्यामः । सर्वव्यापारनिवृत्त्या मृत उच्यते । संपूर्वस्य तिष्ठतेर्व्यापारोपरमदर्शनात् । **बान्धवाः** सपिण्डाः समानोदकाश्च । **सूतके च** पुत्रजन्मादौ **तथोच्यते अशुद्धा बान्धवाः सर्वे** इत्येतेनास्य संबन्धः ।

---

१ अ-क-ख-ड-क्ष-शास्त्रप्रत्ययात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथं पुनरत्र वयोभेदप्रतिपत्तिर्यावता कृतमुण्ड इति संस्कारसंबन्धो गम्यते । कृतोपनयने चेत्यत्र श्रुतमेव । अत एव कृतचौडः कियन्तं कालमुच्यत इति नैव श्रूयते । उच्यते । दन्तजातानुसाहचर्यात्कृतमुण्डः काललक्षणार्थो विज्ञायते । स च कालोऽत्र प्रथमतृतीय इत्येषः । यद्यपि प्रथमे वर्षे वैकल्पिकं मुण्डीकरणं तस्मिन्नसमाश्रीयमाणे "आ दन्तजन्मनः सद्य" इत्येतद्बाधितं भवति तदप्ययुक्तम् । कियानवधिः कृतमुण्ड इति । चशब्दात्कृतमुण्डे चेति कृतोपनये चेति लभ्यते । संस्कारान्तरप्राप्तौ व्यपदेशान्तरप्रवृत्तेः । एवं चैतया स्मृत्या एकवाक्यता भविष्यति "आ दन्तजन्मनः सद्यः" इत्यत्रापि । "त्रिरात्रमाव्रतादेशादिति" व्रतादेशग्रहणं कालोपलक्षणार्थमेव । न च ब्राह्मणस्यानित्योऽष्टमवर्षे एवं क्षत्रियवैश्ययोर्यश्च कालः तदा शूद्रस्य न कश्चित्काल उक्तः स्यात् । तत्राप्यतीतशैशवस्य "परिपूर्णे सर्वेषाम्" इतिवचनात् । अतश्चा ष्टमाद्वर्षादूर्ध्वं चतुर्णामपि वर्णानां सर्वाशौचं शूद्रस्यापि तस्य कालस्य सद्भावात् । यस्मिंस्तु पक्षे एकादशे वर्षे क्षत्रियवैश्ययोरुपनयनं लक्ष्यते तदा शूद्रस्य न कश्चित्काल उक्तः स्यात् । तत्राप्यतीतशैशवस्य परिपूर्णमर्वाक् त्रिरात्रम् । शैशवस्य निवृत्तिश्च स्मृत्यन्तरे "प्रागष्टमाच्छिशुः प्रोक्तः" अन्यैस्तु "आ षोडशाद्भवेद्बालः" इति । येऽपि षोडशाद्बाल्यनिवृत्तिमाहुस्तेषामप्यष्टमादूर्ध्वं मासिक्येव शुद्धिः । एवं पठ्यते "ऊर्ध्वं तु षड्भ्यो वर्षेभ्यः शुद्धिः शूद्रस्य मासिकी" । अन्यत्र पठितमष्टवर्षस्य मास इति ।

ननु वक्ष्यमाणेभ्य एव वाक्येभ्य एषा वयोभेदव्यवस्था लभ्यते । किमनेन दन्तजात इत्युद्देशेन । सत्यम् । सुखावबोधार्थम् ॥ ६८ ॥

दशाहं शावमाशौचं सपिण्डेषु विधीयते ॥
अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा ॥ ६९ ॥

सापिण्ड्यलक्षणं वक्ष्यते । **अर्वाक्संचयनादिति** चतुरहोपलक्षणं वक्ष्यति । "आहिताग्नेः संचयनं चतुर्थ्याम्" इति वचनमस्ति । अयं च विकल्पो वृत्तस्वाध्यायापेक्षो वृत्तापेक्षो वा । तथाच **स्मृत्यन्तरम्**

"एकाहाद्ब्राह्मणः शुद्धो यस्तु ब्रह्माग्निसंयुतः । त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः" ॥ तत्र त्रिवेदस्याग्निमत एकाहः । द्विवेदस्य तु त्र्यहम् । निर्गुणस्य दशाहम् । **गौतमेन** पठितं सद्यः शौचं तच्च विशेष एव ब्राह्मणस्य स्वाध्यायानिवृत्त्यर्थं तत्र क्रियान्तराणि उभयत्र दशाहानि कुलस्यान्नं न भुज्यते "दानं प्रतिग्रहो होमः

---

१ **फ**– समये । २ **याज्ञव०** स्मृ. प्रा. २३ । ३ अ. १४ सू. ४१ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाध्यायश्च निवर्तेत " इत्याद्याः क्रिया निवर्तन्ते । केवलं बहुवेदस्यागुण्यमानं प्रणश्यतीति स्वाध्यायो न निवर्तते । तथा वृत्त्यपेक्षो युक्तो विकल्पः । षट्कर्मजीविनो दशाहः त्रिभिरन्य इत्यस्य चतुरहोद्वाभ्यामेक इत्यस्य त्र्यहः । दाशाहिक आशौचे प्रतिग्रहादावनधिकारात्प्राणयात्रैव दुर्लभा। ये तु वयांसि चत्वारि चत्वारश्चाशौचकालाः अतो यथावयो यथासंख्येन संबन्धः तेषां दन्तजाते दशाहः प्राप्नोति उपनीते तु मृते एकाह एव। तत्र स्मृत्यन्तरसमाचारविरोधः । अथ विरोधपरिहारार्थं प्रातिलोम्येन संबन्धः क्रियते । उपनीते दशाहः कृतमुण्डे चतुरहः त्र्यहो दन्तजाते एकाहोऽनुजात इति। अत्रापि निवृत्तचौडकानां त्रिरात्रादिति विरोधेन विकल्पो युक्तः । स्वशब्देन त्रिरात्रस्यानुविधानात् । चतुरहस्य वृत्तिभेदेन संचयभेदेन विषयत्वसिद्धेः स्मृत्यन्तरेणैवमेकवाक्यता भवति एकाहादित्यनेन अन्यथा वयोभेदेन विकल्पे व्याख्यायमाने वृत्तस्वाध्यायापेक्षो मानवे शास्त्रे केन विकल्पो लभ्यते। अतो गौतमवचनाद्यस्य प्रात्यहिकेन प्रतिग्रहेण विनाऽपि वृत्तिरस्ति कुसूलधान्यादेस्तस्य बहुस्वाध्यायस्य स्वाध्यायाध्ययनमात्रे सद्यः शुद्धिः । येऽपि त्र्यहादयः कल्पास्तत्रापि त्र्यैहिकादीनां तावन्मात्र एव विशुद्धिर्वृत्त्यर्थे प्रतिग्रहेऽनेनैव गौतमदर्शनेन अन्यथा ब्राह्मणस्य स्वाध्यायिन इत्येवावक्ष्यत् न स्वाध्यायानिवृत्त्यर्थमिति । अतो यद्यप्यविशेषेणैकाहाच्छुद्धिरित्यादि श्रुतं तथापि नियतक्रियाविषयं विज्ञेयम् । येन नित्यवद्ब्राह्मणस्य दशाहमाह "शुद्ध्येद्विप्रो दशाहेन"इति (अ. ५ श्लो. ८३) । न ह्यन्यत्पुनर्वचने प्रयोजनमस्ति । तस्माद्विकल्पोऽयं युक्तेन मार्गेण व्याख्येयः । यत्र पुनर्बालादौ सद्यःशौचं निवृत्तमुण्डकादौ त्रिरात्रं तत्र विकल्पाभावात्सर्वक्रियासु शुचित्वम् ॥ ५९ ॥

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ॥
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥ ६० ॥

अन्वयसंज्ञाविज्ञानाद्बान्धवग्रहणानुवृत्तेश्चान्वयजाः सप्तमपुरुषावधयः सपिण्ड उच्यन्ते।येभ्यः पिता दद्यात्तेभ्यःपुत्र इति जीवत्पूर्वपित्रादेर्विधानात् षट् तावद्योग्यतया सपिण्ड भवन्ति। यद्यपि पितृभ्यो दीयते आत्मना सप्तम अतः पितामहप्रपितामहाद्याः पूर्वमन्वयजातास्ते सपिण्डा इति व्यपदिश्यन्ते । पूर्वे षट् सपिण्डाः । अपरे पुत्रादयः षडेव। यत एकस्याः पिण्डदानक्रियायाः सहभावात्सपिण्डाद्युपदेशो लभ्यते । पुत्रादेरपि सहभावः पौत्रादिना क्रियमाणोऽयम् तेन येभ्यो दीयते यैश्च सह संप्रदानवान्भविष्यति सर्वे ते सपिण्डा व्यपदिश्यन्ते । यतो न तत्र पिण्डदानमप्युपलक्षणत्वाच्छर इव वेलायोमागन्तव्यमिति ।

---

१ गौतम सू. अ. १४ स. ४३ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेन यावदुक्तं स्यात् प्रपितामहस्य यः प्रपितामहस्तदन्वयजा ये यावत्सप्तमास्ते सपिण्डा एव स्वसन्ततौ पित्रादिसन्ततौ द्रष्टव्यम् । यत एव भेदस्तमुपादाय गणना कर्तव्या यावत्सप्तमावधि । यथा पितामहो येषामेकस्ते तत आरभ्य सप्तमावधयः सपिण्डा इत्येव सर्वत्र तदन्वयजत्वे चोपलक्षणे जातेरनाश्रयणाद्विजातीया अपि क्षत्रियादयो ब्राह्मणादीनां सपिण्डा भवन्ति । अत एव तज्जननाद्याशौचे ब्राह्मणस्य दशाह एव, तेषां तु स्वकाल एव द्वादशाहादिः । अतः सर्वस्य विजातीयनिमित्ते विजातीयसपिण्डनिमित्ते वा जन्मादौ स्वकाल एव शुद्धिः । क्षत्रियादीनां ब्राह्मणापेक्षया त्रिपुरुषं सापिण्ड्यम् । तथा च शङ्खः

"यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः । एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु ॥"

पृथक्क्षेत्राः भिन्नजातीयासु स्त्रीष्वित्यर्थः । पृथग्जनाः पृथक्क्षेत्रसमानजातीया अप्यनेकमातृका भवन्ति तदर्थमुभयोरुपादानम् । एकपिण्डाः सपिण्डा भवन्ति । किंतु पृथक्शौचा स्वजातिनिमित्त एव तेषां शुद्धिकालः । ब्राह्मणस्य क्षत्रियादेः सूतकादौ दशाहः । ब्राह्मणस्य सूतके तेषां द्वादशाहश्च । तथा चान्योऽपि विशेषः पिण्डस्त्रिष्वावर्तते त्रिष्वेव भवति पुरुषेषु । समानजातीयापेक्षया क्षत्रियादीनां ब्राह्मणवत् षट्पुरुषस्य सापिण्ड्यम् 'एकजाताः पृथक्क्षेत्रा' इत्यादिविशेषणोपादानादसमानजातीयापेक्षं त्रिपुरुषत्वमनेन वाक्येन शक्यते प्रतिपादयितुम् । एष एवार्थोऽनया स्मृत्या स्पष्टीक्रियते

"क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्य बान्धवाः । तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥"

षड्भिस्त्रिभिरथैकेनेत्यादि च ॥ स्त्रीणां तु विजातीयानां भर्तृकालेन जीवति भर्तरि शुद्धिः । आह च

"सूतौ मृते तु दासीनां पत्नीनां चानुलोमतः । स्वामितुल्यं भवेच्छौचं मृते स्वामिनि पैत्रकम् ॥"

अन्ये पठन्ति "असवर्णासुतानामिति" प्रथमं पादम् । यद्ययमस्ति पाठस्तदा पुत्राणामपि शूद्राणां पितृगृहे व्यवस्थितानां तत्परतन्त्राणां पितृजात्यपेक्षया दशाहादिरेव शुद्धिकालः । दासाश्चात्र वैतनिका गृह्यन्ते । ये तु गर्भदासास्तेषां विध्यन्तरं श्रूयते

"कारवः शिल्पिनो वैद्या दासीदासं तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्तिताः ॥" इति

स्पर्शने चैवमेतेषां शुचित्वं विज्ञेयम् । न पुनर्दानभोजनादिक्रियासु यतः कर्मनिमित्ता एते शब्दा अतः किंविपर्यये शुद्धिः किं सर्वाः क्रियाः प्रतिप्रसवा उत काश्चिदेवाभ्यनुज्ञायन्ते । यतो राज्ञश्च कार्याविघातार्थमित्याकांक्षायां यान्येव कर्माणि तान्येव हृदयमागच्छन्ति । तथैव च समाचारः ।

---

१ ड–क्ष–इत्यादिवत् । २ तपः —।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु च नात्र स्पर्शप्रतिषेधः श्रुतो यावता स्मृत्यन्तरे पठ्यते " अस्थिसंचयनादूर्ध्वमङ्गस्पर्शो विधीयते " । तथाऽन्यच्च

"त्रिभिश्चतुर्भिर्वाऽहोभिर्ब्राह्मणः स्पृश्यतामियात् । एकादशेन शुद्धिः स्यान्मृतके सूतके तथा"॥

" राज्ञः षष्ठे सप्तमे वा स्पर्शो द्वादशाहे नान्नशुद्धिः । वैश्यस्य स्पर्शनमष्टमे नवमे वा पक्षेणान्नशुद्धिः । शूद्रस्य स्पर्शनमेकादशे द्वादशे वा मासेनान्नशुद्धिः । " हारीतस्तथा वाक्यन्तरमपि

"स्पर्शो क्रमेण वर्णानां त्रिचतुःपञ्चषैर्दिनैः । भोज्यान्नो दशभिर्विप्रः शेषाद्वित्रिषडुत्तरैः " ॥

एते च विकल्पाः प्रयोजनापेक्षया गुणवदगुणापेक्षया व्यवस्थापनीयाः । सर्वेषां तावद्ब्राह्मणस्य भक्तदासास्त्रिचतुरैरहोभिः स्पर्शनेन दूषयन्ति । गर्भदासास्तु सद्यः । एवमितरेषामपि वर्णानां यत्रेदं सद्यःशौचं तत्र सर्वत्र स्नानं वाससा च । द्रव्यस्य शुद्धिर्या " यस्य विहितेति " ज्ञापयिष्यते ।

कन्यानामपि त्रिपौरुषेयी सापिण्डता । " सपुत्राणां तु स्त्रीणां त्रिपुरुषं विज्ञायते " इति वसिष्ठः ॥ आशौच एवैतत् । विवाहे तु विधिर्दर्शितः । स्थितमेतत् । सप्तमपुरुषो मर्यादा षट्पुरुषाः सपिण्डा इति । सप्तमे प्राप्ते विनिवर्तते ।

समानोदकभावः समानोदकव्यपदेशः जन्मनाम्नोरवेदने जन्म चायमस्मत्कुले जातः। नाम अमुष्यादिदं नामकातिपितृपितामहादेरुभयोरवेदने निवृत्तिरतश्चान्यतरे ज्ञानेऽप्यनिष्टोदकं ज्ञेयम् । "अवतीर्य नदीमन्यद्वा जलाशयं नाभिदघ्नमभुग्नो दक्षिणाभिमुखः सव्योत्तराभ्यां पाणिभ्यामुदकं कृत्वाऽनवेक्षमाणाः प्रत्याव्रजेयुरिति " ॥ ६० ॥

जननेऽप्येवमेव स्यान्मातापित्रोस्तु सूतकम् ॥
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥ ६१ ॥

एवमेतत्सपिण्डानां जनने यथैव दशाहादयः कल्पाः षट्कर्मादिवृत्त्यपेक्षया स्वाध्यायाल्पमहत्वापेक्षया च व्यवस्थिता मरणे तथैव जननेऽपि आशौचमात्रमतिदिश्यते कालानवच्छिन्नम् । सामर्थ्याचागृह्यमाणविशेषतया तत्संबन्धसकलप्लाभः । कालावच्छिन्ना-

---

१ यथेदं शावमाशौचं सपिण्डेषु विधीयते ॥
जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् ॥ ६२ ॥
अयं श्लोकः मंडलीकसंशोधितपुस्तके ६१ इति दर्शितः ।
[सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ॥
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः] ॥ ६२ ॥
तथाच अयं श्लोकः तत्रैव ६२ इति दर्शितः ।
[उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते ॥ १ ॥
अयं श्लोकः ६२ इति तेनैव दर्शितः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिदेशे तु एकेनैव मुख्यत्वाद्दशाहेन संबन्धः स्वाध्यायादिष्वपाठप्रत्यासत्त्या दशाहाद्यपेक्षया एकाहेन शक्येनैव च निराकांक्षीकृतत्वादन्यैस्त्र्यहादिभिर्न संबन्धः स्यात् । तत्रेयं स्मृतिरविशेषेण वृत्तस्वाध्यायापेक्षायां व्यवस्थायां मृतसूतकयोर्विदधती जनने गुणाद्यनपेक्षया जातिमात्रे स्थाप्यमाना विरुध्यते समाचारश्च बाधितः स्यात् ।

नन्वेवं स्त्रीणामपि त्र्यहैकाहादयः कल्पाः सूतिकानां प्राप्नुवन्ति समाचारविरोधिनः । अत्रोच्यते । यद्ययं विकल्पः स्यात्तदेव व्यवस्थित एवासीत्कल्पः । तथाहि तुशब्द उपपन्नतरो भवति सूतकशब्दश्च नाशौचे वर्तते । लक्षणया सूतकसंबन्ध्यशौचं लक्षयेत् । लक्षणायाः साहचर्यादस्पृश्यतैव लक्षयितुं युक्ता यदि च सर्वमाशौचमभिप्रेतं स्यादाशौचग्रहणमेवाकरिष्यत् 'अशौचं मातुरेवेति' । अतश्च स्मृत्यन्तरे त्रिरात्रमस्पृश्यतोक्त्या इह तदभावस्तयोर्विकल्पः **सूतकं मातुरेव** । मातापित्रोर्मातुरेवेति पितुर्विकल्पः । **उपस्पृश्य** स्नात्वा **शुचिर्भवतीति** । उपक्रममात्रमिदं वक्ष्यमाणेन श्लोकेन पितुरपि त्र्यहमेव ॥ ६१ ॥

निरस्य तु पुमाञ्छुक्रमुपस्पृश्यैव शुध्यति ॥
बैजिकादभिसंबन्धादनुरुन्ध्यादघं त्र्यहम् ॥ ६२ ॥

सहेतुकं त्र्यहमुपदिशन्नपस्पर्शनशुद्धिं पूर्वोक्तामनुमन्यते । किमर्थमुच्यत इति चेत् सरूपविधितयाऽर्थवादार्थं न विधेयतया " जर्तिलयवाग्वा वा जुहुयादिति" वत् ।

निरस्य तु शुक्रं मैथुनधर्मेण संप्रयुज्य शुक्रोत्सर्गादनन्तरं **उपस्पृश्य** स्नात्वा शुचिर्भवति । अतो **बैजिकादभिसंबन्धात्** । बीजनिमित्तो बैजिकः । अभिसंबन्धः अपत्योत्पत्तिः । अतस्तत्र कथं **नानुरुन्ध्यान्नानुवर्तेत** । **अघमाशौचं त्र्यहं** यादृशं च शुक्रनिरसनेन अकृतस्नानस्याशुचित्वं न तादृशमेव प्रसवे । अपि तु त्र्यहं पूर्वश्लोकार्धे त्र्यहशेषतयाऽनूद्यते । अत एवोपस्पृश्येति स्नानमुच्यते । " स्नानं मैथुनिनः स्मृतम् " इति वचनान्नाचमनम् । पुत्रे तु जाते तदहः स्पृश्यतैवेति केचित् । तथा च **शंख** आह " कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेष्वदोषस्तदहरित्येके " ॥ "तस्मात्स दिवसः पुण्यः पितॄणां प्रीतिवर्धनः । स्मरणाच्चैव पूर्वेषां तदहर्न प्रदुष्यति" ॥ इति ।

[**सत्रधर्मप्रवृत्तस्य दानधर्मफलैषिणः** ॥
त्रेताधर्मापरोधार्थमरण्यस्यैतदुच्यते ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा श्राद्धमप्येके कुर्वन्तीति च । अनेन पितुः सर्वथाऽऽशौचाभाव एव । तत्रैते स्मृती पूर्ववद्वृत्तिसदसद्भावापेक्षया विकल्प्येते ॥ ६२ ॥

अन्हा चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः ॥
शवस्पृशो विशुध्यन्ति त्र्यहादुदकदायिनः ॥ ६३ ॥

त्रयस्त्रिरात्रा नवाहानि । **एकेन च अन्हा** एकया **च रात्र्या** अहोरात्रः । एवं दशाहोवृत्तानुरोधादेवमुपदिष्टः । **शवस्पृशः** शवस्य स्नानालंकारादिकारिणः । अन्येषां स्नानमात्रं वक्ष्यति तन्निर्यापकानां च । तथा च प्रकटीकरिष्यति "प्रेताहारैः समम्" इत्यत्र । एतच्च समानोदकानां मूल्येन वा निर्हरताम् । अनाथनिर्हरणे तु स्मृत्यन्तरे

"न तेषामशुभं किंचिन्नाशौचं शुभकर्मणाम् ॥ जलावगाहनात्तेषां सद्यः शौचं विधीयते" ॥

यत्तु असपिण्डं द्विजमिति तत्र वै वक्ष्यामः । उदकदायिनः समानोदकाः तेषां च "पृथक्पिण्डे च संस्थित" इति सद्यःशौचमपि वक्ष्यते । तत्र विकल्पः । सपिण्डेष्वेतदस्वाध्यायाद्यपेक्षम् ॥ ६३ ॥

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् ॥
प्रेताहारैः समं तत्र दशरात्रेण शुध्यति ॥ ६४ ॥

पितृमेधः चरमेष्टिः । अन्ये तु सर्वं कर्मैव लक्ष्यत इति प्राहुः । तत्कुर्वन् **शिष्यो दशरात्रेण शुध्यति ।** ब्रह्मचारिणोऽप्ययं विधिरस्त्येव । **प्रेताहारैः समः** प्रेतं हरन्ति निर्यापयन्ति तथा तेषां दशाह एवं शिष्यस्यापीत्यर्थः ॥ ६४ ॥

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ॥
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥ ६५ ॥

गर्भस्रावे गर्भमाससमा रात्रीः स्त्रिया एव शुद्धिर्युक्ता इह वाक्ये तस्याः श्रुतत्वात् । सपिण्डानां तु स्मृत्यन्तरसमाचारादन्वेषणीयौ । **वासिष्ठेन** तु सपिण्डानां त्र्यहः समाम्नातः [अ. ४ सू. ३४] "ऊनाद्विवर्षे प्रेते गर्भपतने सपिण्डानां त्रिरात्रमशौचम्" ॥ स्रावस्तु गर्भस्य मासत्रयादूर्ध्वं प्राग्दशमान्मासात् । केचित्तु प्राङ्नवमादित्याहुः । अप्राप्तकालस्य पातः स्राव उच्यते । न पुनर्द्रवरूपस्यैव । तथा **गौतमेन** गर्भविस्रंसने "गर्भमाससमा रात्रीरिति" पठितम् [अ. १४ सू. १५] । सप्तमास्याश्च जीवन्ति । अतः

For Private And Personal Use Only

सप्तमे मासे पूर्णमाशौचम्। एतत्तु जीवतो जातस्य युक्तमन्यथा तु गर्भमाससमा इत्येव। इह रजस्वलाया रजस्युपरते स्नानेन शुद्धिराम्नाता। स्मृत्यन्तरे त्र्यहादूर्ध्वम्। तत्रैवं व्यवस्था। प्राक्त्र्यहाद्रजोनिवृत्तावपि नास्ति शुद्धिरूर्ध्वमनुपरतेऽपि भवति। किंतु विशुद्ध्यतीति। प्रकृते पुनः साध्वीति वचनादनिवृत्ते रजसि वैदिककर्माधिकारानुप्रवेशो नास्ति न पुनः स्पर्शादिनिषेधः। उक्तम् "आद्याश्चतस्रो निन्दिताः" इति। **रजस्वला स्त्री रजस्युपरते स्नानेन साध्वी** भवति शुद्धा कर्मयोग्येत्येवं पदयोजना। स्त्रीग्रहणं वर्णमात्रकृत्यर्थम्। पूर्वे तु श्लोका ब्राह्मणविषया व्याख्यातास्तदाशङ्कानिवृत्त्यर्थं स्त्रीग्रहणम्। उत्तरत्रापि यत्र विशेषप्रमाणं नास्ति तत्रापि वर्णमात्रविषयतयैव यथा "नृणामकृतमुण्डानाम्" इति ॥ ६९ ॥

*** नृणामकृतमुण्डानां[1] विशुद्धिर्नैशिकी स्मृता ॥**
निर्वृत्तमुण्डकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥ ६६ ॥

इमाः षष्ठीः "कर्तृकर्मणोः[2] कृतीति" कर्तृलक्षणाः केचिद्व्याचक्षते। अकृतचूड एकाहेन शुद्ध्यति। तथा वयोवस्थापेक्षोऽपि विकल्प इत्येकीयमतमुक्तम्। तस्यैव श्लोकस्य व्यवस्थावाक्ये इमे। अन्ये त्वध्याहारेण संबन्धलक्षणा आहुः। **अकृतमुण्डानां** मृतानां ये सपिण्डास्तत्रोत्तरपक्षः समाचाराभिप्रेतः। स्मृत्यन्तरे सद्यःशौचमप्याम्नातम्। विषयस्तत्रैव दर्शितः। आदन्तजन्मनः सद्यः आचूडान्नैशिकी निर्वृत्त[3]चूडकानां त्रिरात्रमिति ॥ ६६ ॥

ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः ॥
अलंकृत्य शुचौ भूमावस्थिसंचयनादृते ॥ ६७ ॥

ऊने असंस्कृतस्य द्वे वर्षे यस्य जातस्य गते स उच्यते **ऊनद्विवार्षिकस्तं प्रेतं बान्धवा बहिर्ग्रामं निदध्युर्भूमौ** निखातायां स्थापयेयुः। **स्मृत्यन्तरे** निखनेदिति पठ्यते।

---

* [प्राक्संस्कारप्रमीतानां वर्णानामविशेषतः।
त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्नो विधीयते ॥ १ ॥]
[अदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता।
त्रिरात्रमाव्रता देशाद्दशरात्रमतःपरम् ॥ २ ॥]
[परपूर्वासु भार्यासु पुत्रेषु प्रकृतेषु च।
मातामहे त्रिरात्रं तु एकाहं त्वसपिण्डतः ॥ ३ ॥]

१ फ–चूडानां। २ व्या. सू. २।३।६५। ३ फ–निवृत्त।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अलंकृत्य प्रेतालंकारैः । ऊनद्विवर्षेऽपि श्रूयमाणोऽलंकारः समाचारात्कृतोपनयनादावपि विज्ञेयः । शुचौ यत्रास्थीनि भूप्रदेशे न सन्ति अस्थिसंचयरहितत्वेन या शुद्धा तत्र निखाय स्थाप्यः । स्मशाने किलास्थीनि संचितानि भवन्ति । अत एव तेन वचनेन ततोऽन्यत्र निधानमुच्यते । न पुनस्तादृशस्यास्थिसंचयो न कर्तव्य इत्येव वाक्यार्थः । अग्निसंस्काराभावादेव तदप्राप्तेः ॥ ६७ ॥

नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया ॥
अरण्ये काष्ठवत्त्यक्त्वा क्षपेतं त्र्यहमेव तु ॥ ६८ ॥

काष्ठवदिति निरपेक्षतामाह । श्राद्धमपि न कर्तव्यं न चोदकम् । उदकक्रियानिषेधेन श्राद्धनिषेधः सिद्धः अङ्गाङ्गिभावात् । अतः समाचारप्रसिद्धः श्राद्धनिषेधो लिङ्गेन साधयितव्यः । अन्ये तु स्मृत्यन्तरदृष्टनिखननप्रतिषेधार्थं वर्णयन्ति । ततश्च विकल्पः । **क्षपेतं** उदास्येत । शास्त्रचोदितं व्यापारं न कुर्यात् ॥ ६८ ॥

नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया ॥
जातदन्तस्य वा कुर्युर्नाम्नि वाऽपि कृते सति ॥ ६९ ॥

आ त्रिवर्षस्येति आ तृतीयाद्वर्षात्प्रतिषेधः । न पुनश्चतुर्वर्षादौ । एवमर्थमेवादिशब्दं केचित्पठन्ति । **नात्रिवर्षस्य कर्तव्या** त्रिवर्षादेरिति । समाचारश्चैवमेव । **जातदन्तस्य वा कुर्युः** । उदकक्रियासाहचर्यादग्निसंस्कारोऽभ्यनुज्ञायते ।

ननु च विकल्पे कामचारः । तत्र कः प्रयाससाध्यं वित्तक्षयकरमनुष्ठानपक्षमाश्रयेत । व्यर्थस्तदुपदेशः । उच्यते । सर्वविलक्षणोऽयं पित्रोरधिकारः । प्रेतोपकारार्थमेतत्क्रियते । नैमित्तिकत्वादवश्यकर्तव्यमित्येतत्प्रागेवोक्तम् । तत्रावश्यकर्तव्यताप्रतिषेधोऽस्तीतीह निश्चीयते । प्रेतोपकारार्थत्वमस्तीत्यभ्यनुज्ञानेन ज्ञाप्यते । तत्राकरणे नास्ति विध्यतिक्रमः । प्रेतोपकारस्त्वनुष्ठानाद्भवतीति विधिप्रतिषेधयोर्नासामञ्जस्यम् ॥ ६९ ॥

सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् ॥
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥ ७० ॥

सब्रह्मचारी समानचरणोऽत्र **एकोदका ऊर्ध्वं** सपिण्डेभ्यः परिगृह्यन्ते । तेषामितरेतरं जन्मनि सूतके त्रिरात्रम् । सद्यःशौचमपि स्मृत्यन्तरादुदकदायिनां विकल्पितं द्रष्टव्यम् ॥ ७० ॥

---

१ फ–क्षपेयुस्त्र्यहमेव च । २ फ–क्षपेयुः उदास्येयुः । ३ फ–वित्त । ४ फ–एकोदका अभ्यासपिण्डेभ्यः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुद्धयन्ति बान्धवाः ॥
यथोक्तेनैव कल्पेन शुद्धयन्ति तु सनाभयः ॥ ७१ ॥

असंस्कृता या वाङ्मात्रेण प्रतिगृहीता न च विवाहितास्तासां मरणे **बान्धवाः** पतिपक्षास्त्रिरात्रेण **सनाभयस्तु** सपिण्डाः स्वपितृपक्षा यथोक्तेन कल्पेन " निवृत्तचौडकानामिति " जातेरधिकारात्त्रिरात्रेण ।

अन्यैस्तूक्तं " सोदर्या दशरात्रेणेति" । तेषां चाभिप्रायः । अष्टवर्षायाः कन्याया दानं विहितम् । अदत्तायाश्च निवृत्तचौडकल्यपदेशाभावात्पुंस इवोपनीतस्य तदानीं कल्पान्तरस्यानाम्नानाद्दशाह एव युक्तः । अन्यैस्तु पठितम् " अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् " इति । तत्र व्याख्यातारः पञ्चदशाब्ददेशीयाऽपि या ह्यदत्ता कन्या तिष्ठेत्तदहरेवाशौचम् । यतो मुख्यमाम्नानमतिक्रम्य कालक्षपणे प्रमाणाभावात् ।

तत्रोच्यते । बालेषु चेति कोऽस्यार्थो यावता उक्तमेव योगविभागे " आ दन्तजन्मनः सद्य " इति । न चैतेन तद्बाधितुं युक्तं सामान्यरूपत्वादस्य तस्य च विशेषव्यवस्थापनरूपत्वादतोऽयमेकाहः पृथगुक्तोऽपि आचूडादेव व्यवतिष्ठते । सामान्यस्य विशेषापेक्षत्वात् । तस्मादनार्ष एवायमर्धश्लोकः प्रतिपद्यते स्पर्शविषयतया नेयः । स्पर्शप्रतिषेधो हि मृतकसूतकयोर्बालस्यापि पुंवत्प्राप्तः । तदर्थमेतदुक्तं स्यात् " अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् " इति । एवं च विषयसप्तम्याश्रिता भवति । सा च युक्ता कारकविभक्तित्वात् । इतरथा अध्याहृत्य भावलक्षणा सप्तमी व्याख्यायेत । बालेषु मृतेषु जीवतां शुद्धिरिति । न च तदुपस्पर्शनादाशौचमेतेनैतत्सिद्धयतीति । विषयान्तरे तस्य च चरितार्थत्वात् भूमौ परिवृत्तत्वात् भूमौ परिवृतस्य च स्पर्शनसंभवात् । अविशेषोक्तौ कुतो विशेषप्रतिपत्तिरिति चेत् तस्याचमनकल्पो विद्यत इत्येतत्सन्निधौ तादृशस्यैव स्पर्शस्य प्रतीयमानत्वात् । तथा च रजस्वलास्पृष्टिनो बालस्य स्पर्शनं नेच्छन्ति । अथास्य विशेषणं स्यात् । तथा **गौतमेन** तदुक्तं स्वस्यां स्मृतौ । युक्तमेवाधातुमेतस्य । तस्माद्युक्तैवाधीनकाललक्षणा ॥ ७१ ॥

अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् ॥
मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ॥ ७२ ॥

क्षारलवणं च यत्क्षारादिक्षारं लवणं सैन्धवादि तन्न भुञ्जीरन् । लवणविशेषणं वा क्षारग्रहणं तेन सैन्धवस्य प्रतिषेधः । निमज्जनं च नदीतडागादौ च तीर्थस्नान-

---

२ अ-क-ख-ड-क्ष-दत्तायाः । ३ फ-पञ्चा । ४ फ-ख-परिवृत्तत्वात् । ५ अ-क-ड-क्ष-आदाकाललक्षणा । ६ अ-क-ख-ड-क्ष-नदी-तडागादावतीर्थस्नानम् ।

१ [परपूर्वासु पुत्रेषु सूतके मृतकेषु च ।
मातामहे त्रिरात्रं स्यादेकाहं तु सपिण्डने]

For Private And Personal Use Only

मङ्गपरिघर्षणादिवर्जनम् । **मांसाशनं च** यावदाशौचं स्मृत्यन्तरात्प्रतिषिध्यते । एवं पठ्यते " न स्त्रियमुपेयुर्न मार्जयेयुर्न मांसमश्नीयुः " । **गृह्यकारस्तु** " त्र्यहमनश्नन्त आसीरन् क्रीतोत्पन्नेन वा वर्तेरन् " इत्याह । **शयीरंश्च** स्थण्डिले परसंगवर्जम् । सूतकेऽपि ब्रह्मचर्यं स्मृत्यन्तरे प्रदर्शितम् ॥ ७२ ॥

सन्निधावेष वै कल्पः शावाशौचस्य कीर्तितः ॥
असन्निधावयं ज्ञेयो विधिः संबन्धिबान्धवैः ॥ ७३ ॥

संनिधौ यत्रासौ मृतस्तत्र तत्संनिधीयते । अन्ये तु प्रयाणकाले ये संनिहितास्तेषामेवायं विधिरित्याहुः । **संबन्धिनः** समानोदकाः । **बान्धवाः** सपिण्डाः । अन्ये तु ग्रामान्तरे नगरान्तरेऽवस्थानमसंनिधानं मन्यन्ते तेषां च ॥ ७३ ॥

***विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ॥**
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥ ७४ ॥

देशो ग्रामान्तरादिः पूर्ववत् । **विगतं** मृतम् । **अनिर्दशं** उपलक्षणमेतद्यस्य य आशौचकालस्तच्छेषं तस्याशौचम् । पुनर्दशरात्रग्रहणं श्लोकपूरणार्थम् । उत्पत्त्यपेक्षया जन्ममरणयोराशौचकालविकल्पेनावश्यमपेक्षा यदा सूतकाद्युत्पन्नं तदा प्रभृति दशाहादिकल्पेन यदा सपिण्डैर्ज्ञातमिति । अतश्च यदाऽतिथिना ज्ञातं सूतकादि न तु गृहस्थेन तदाऽप्यभोज्यमन्नं तथैवोत्पत्तिनिमित्तमात्रमिदमुभयत्रेति । दशाहमाशौचिनां तत ऊर्ध्वं त्रिरात्रैकाहाशौचिना तु सचैलस्नानजः सद्यः शुचिः ॥ ७४ ॥

अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ॥
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ॥ ७५ ॥

यस्य यः कृत आशौचकालो दशाहादिस्तस्य तदूर्ध्वं त्रिरात्रम् । यस्य तु त्र्यहैकाहादिस्तस्य तत ऊर्ध्वं सवाससः स्नानमात्रमेव । तथा चोत्तरत्र वक्ष्यति " सवासाः " इत्यादि । **संवत्सरे अतीते** अतिक्रान्ते **स्पृष्ट्वैवापः** स्नात्वा शुध्येदित्यर्थः । " हस्तेन च सपादेन " इत्यादिवचनात्सर्वाङ्गस्पर्शनं प्रतीयते तच्च स्नानमेव ॥ ७५ ॥

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ॥
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥ ७६ ॥

---

*[मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा ॥
अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुद्ध्यति ॥ १ ॥]

१ श्लो. ७७ ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समानोदकानामयं विधिस्त्र्यहैकाहपक्षे च सपिण्डानामपि । **सवासा** वाससा सहितः । **जलमाप्लुत्य** स्नात्वेत्यर्थः ॥ ७६ ॥

बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ॥
सवासा जलमाप्लुत्य सद्य एव विशुध्यति ॥ ७७ ॥

बालेऽदन्तजाते सूनौ **देशान्तरस्थे** पृथक्पिण्डे । **च संस्थित** इत्येकार्थानि पदानि । **पृथक्पिण्डः** समानोदक इति यावत् । तस्मिन् **देशान्तरस्थे संस्थिते** सद्यः शुद्धिः । संनिधौ "त्र्यहात्तूदकदायिनः" इत्युक्तम् ॥ ७७ ॥

अन्तर्दशाहे चेत्स्यातां पुनर्मरणजन्मनी ॥
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ॥ ७८ ॥

अत्रापि दशाहग्रहणमाशौचकालोपलक्षणार्थम् । यस्य य आशौचकालस्तस्मिन्ननिवृत्ते यदि पुनरन्यदाशौचनिमित्तमुत्पद्यते तदा पूर्वशेषेणैव शुद्धिर्न त्वन्तरा निपतितं यत्तदीयादहः प्रभृति दशाहादिगणना कर्तव्या । तथा च **गौतमः** (अ. १४ सू. ९) "तच्चेदन्तःपुनरापतेत्तच्छेषेण शुद्ध्येयुरिति" । **मरणजन्मनी** इति समासे यत्नमन्तरेण क्रमाप्रतिपत्तेर्व्यन्तरेणाप्युपनिपातनप्राप्तौ समाचारात्समानजातीय एवेति द्रष्टव्यम् । **पुनः**शब्दश्च समानजातीयापेक्षया समर्थतरो भवति । विप्रग्रहणमप्याशौचिनामुपलक्षणार्थम् । **स्मृत्यन्तरे** तु विहितं "रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिः"इति । एतस्य ब्राह्मणस्य प्रेतस्पर्शे दशरात्रमाशौचमिति प्रकृत्य "न चेदन्तरा म्रियेत जायेत वा शिष्टैरेव दिवसैः शुद्ध्येत" इतीयं **स्मृतिः** समानजातीयासमानजातीयभेदं नानुमन्यते ॥ ७८ ॥

त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति ॥
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ॥ ७९ ॥

आचार्य उपनेता तस्मिन् **संस्थिते त्रिरात्रं** शिष्यस्य । **तस्या**चार्यस्य **पुत्रे पत्न्यां च** संस्थितायामहोरात्रम् ॥ ७९ ॥

श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् ॥
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ॥ ८० ॥

वेदशाखाध्यायी **श्रोत्रियः** । **उपसंपन्नः** मैत्र्या प्रयोजनेन वा केनचित्संगतः शीलेन युक्तो वा । पूर्वं तु सब्रह्मचारिण्येकाहमगृहीतवेदे दृष्टम् । अभिधानकोशे तु

---

१ क–अन्तर्दशाहे स्यातां चेद ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपसंपन्नो मृतपर्यायः । बहुकालत्वादाशौचस्य पूर्वैव व्याख्या ज्यायसी । अन्ये तु श्रोत्रिये मातुले त्रिरात्रमित्येव संबन्धन्ति पक्षिणीं रात्रिमिति शिष्यादिभिः । बान्धवाः शालकमातृष्वस्रेयादयः । यदा तु मातुले पक्षिणीमिति सबन्धस्तदा मातुलबान्धवत्वादेव सिद्धा पक्षिणी । पुनर्वचनं नित्यार्थं तेनान्येषु बान्धवेषु यथाकामम् ॥ ८० ॥

प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ।
अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ॥ ८१ ॥

राजशब्दोऽयमभिषेकादिगुणयोगिनि वर्णमात्रे लक्षणया वर्तते । यत आह **यस्य स्याद्विषये स्थितः** । जातिविशेषावच्छिन्नविषयेश्वरवचनत्वे लक्षणा न च शब्दार्थः । **सज्योतिः** सह ज्योतिषा वर्तते दिवा प्रेते दिवैव रात्रौ तु तन्नास्ति । एवं रात्रौ रात्रिरेव नाहः । इदमेव ज्ञापकमन्यत्र रात्रिग्रहणेऽहर्ग्रहणेऽप्यहोरात्रिप्रतिपत्तेः । यथा रात्रिभिर्मासतुल्याभिस्त्र्यहमेकाहमिति । अन्हा चैकेनेत्यत्र तु रात्रिग्रहणं पादपूरणार्थं रात्रावग्निर्ज्योतिः । एवं ह्यग्निहोत्रब्राह्मणे ' अग्निना वै तेजसा तेजस्विन्यादित्येन तेजसा भवति ' ।

अश्रोत्रियेऽवेदाध्यायिनि अनूचाने कृत्स्नमहः । रात्रौ न भवत्येव उत्पन्नेऽपि रात्रौ निमित्ते कथं पुनरश्रोत्रियेऽनूचाने एवं हि स्मर्यते प्रवचने साङ्गेऽधीतीति स्वयं प्रवक्ताऽप्यनूचान उच्यते । तेनैवं कथंचिदङ्गादिग्रन्थार्थान्यः प्रवक्ति तस्मिन्नयमहर्विधिः । उपसन्ने वा उपसन्ने च गुरौ पूज्यत्वेन मुख्ये आचार्ये वा विध्यन्तरभावात् । केचित्तु अश्रोत्रिये त्वित्यत्र नञं संबध्नन्ति । इह नञः प्रश्लेषेण योऽन्येषामुपाध्यायस्तस्य च न कश्चित्तत्रेमं विधिमाचक्षते ॥ ८१ ॥

*** शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ॥**
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥ ८२ ॥

---

१ ड–तेजस्विनि ।

* क्षत्रविट्शूद्रदायादाः स्युश्चेद्विप्रस्य बान्धवाः ।
तेषामशौचं विप्रस्य दशाहाच्छुद्धिरिष्यते ॥ १ ॥
राजन्यवैश्ययोश्चैवं हीनयोनिषु बन्धुषु ।
स्वमेव शौचं कुर्वीत विशुद्ध्यर्थमिति स्थितिः ॥ २ ॥
विप्रः शुध्येद्दशाहेन जन्महानौ स्वयोनिषु ।
षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ॥ ३ ॥
सर्वे चोत्तमवर्णास्तु शौचं कुर्युरतन्द्रिताः ।
तद्वर्णं विधिदृष्टेन स्वं तु शौचं स्वयोनिषु ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षत्रियादीनां प्रागुक्तवृत्ताद्यपेक्षत्र्यहचतुरहादिकल्पव्यावृत्त्यर्थमिदम् । ब्राह्मणे दशाहस्त्वनूद्यत एव । अत्र त्विदं वाच्यं केन क्षत्रियादीनां द्वादशाहेन नियतकालप्राप्तिर्येन कल्पान्तरव्यावृत्त्यर्थताऽवगम्यते । इयमेव ह्येषामियत्कालस्य प्रापकं सत्यस्मिंस्तत्र दशाहोऽयमाशौचकालस्तदुपलक्षणार्थो विज्ञायते ।

ननु च सत्यप्यस्मिंस्तस्योपलक्षणार्थता सत्यपि चातुर्वर्ण्याधिकारे यस्यैव दशाह उक्तस्तस्यैवेतरे कल्पा इति । स्मृत्यन्तरे च ब्राह्मणविवक्षयैवोक्तम् "एकाहाद्ब्राह्मणस्य स्यात्स्वाध्याय" इत्यादि । तेषा तु स्मृत्यन्तरे यानि कल्पान्तराण्याम्नातानि विकल्पन्ते । एकादशो आशौचकालः कश्चिद्विवरणकार आह "शुद्धयेद्विप्रो दशाहेनेति" । अत्राहर्ग्रहणं विवक्षितं तेन दशम्यां रात्रौ नास्त्याशौचम् । ततः पूर्वेद्युर्निमन्त्रणादि युक्तम् । अग्निं चाधास्यतः पौर्वाह्णिकजागरणादिनाऽऽशौच उपक्रान्तं भविष्यति । तदयुक्तं अहर्विवक्षा यामाद्यास्वपि रात्रिषु न स्यादाशौचम् । अथ दशाहं शावमिति एतस्मात्तत्र भविष्यति । अत्राविवक्षायां किंप्रमाणं तस्मादहःशब्दोऽयमहोरात्रवचन इति प्रदर्शितम् । तथा च पूर्वश्लोकेऽहः कृत्स्नमिति रात्रिनिवृत्यर्थं कृत्स्नग्रहणम् ॥ ८२ ॥

न वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः ॥
न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ॥ ८३ ॥

यस्यैषा बुद्धिः । य उक्तास्त्र्यहादयः कल्पास्तुल्यं दशाहेन विकल्प्यन्ते । न वृत्ताद्व्यवस्थयेति ततश्चिरतरकालमन्यस्य संभवे किमित्येकाहपक्षं नित्यस्वाध्यायाक्लेशकरं प्रतिपत्स्ये दशाहमपाश्रयामि निष्कर्मसुखमासिष्य इति तं प्रति सौहार्देन सा व्यवस्था स्पष्टीक्रियते । नैते तुल्या अपि तु व्यवस्थिता एव । व्यवस्था च प्राग्दर्शिता । अन्यथा यस्याशौचकालो विहितस्तस्य ततः कालावधिकस्य कुतो वृद्धिप्राप्तिः । येनैवमर्थवत्स्याद्विस्पष्टार्थत्वे को दोषः ।

अन्ये त्वाहुरतीतेष्वप्यहःसु यावत्स्नानादिक्रिया न कृता तावन्नैव शुद्धिः "विप्रः शुध्यत्यप" इत्यादि वक्ष्यति । तत्राशुचित्वादननुष्ठानेन दुष्यामीति स्नानादिषु शुद्धये न प्रवर्तते तत्रैवमुच्यते । न वर्धयेन्नातीतेष्वहःसु बाह्याशौचे विलम्बितव्यम् । ये त्वहःशब्दो

१ ङ–एकाहान् । २ अ-क-ङ–अभ्यस्यतः । ३ अ-क-ङ-क्ष-ख–स्वाध्यायक्लेशकरम् । ४ श्लो. ९९ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशमस्यान्हो या रात्रिस्तस्यामाशौचं न भवतीति ते न सम्यङ्मन्यन्त इत्युक्तम् । तथा च **गौतमः** (अ. १४ सू. ६.) "आशौचमध्य आशौचान्तर उत्पन्ने तच्छेषेण शुद्धिः" इत्युक्त्वा एकस्यां रात्रौ शेषायां तथैव शुद्धिं मन्यमान आह "रात्रिशेषे द्वाभ्यामिति"।

प्रत्यूहेन्नाग्निषु क्रियाः । अशुचित्वात्सर्वश्रौतस्मार्तक्रियानिवृत्तौ[1] प्राप्तायामिदमुच्यते । अग्निषु याः क्रियाः सायंहोमाद्यास्ता न प्रत्यूहेन्न प्रत्यस्येत्[2] । प्रत्यूहो निर्हास अननुष्ठानम् । न च स्वयं कुर्यादत आह **न च तत्कर्म कुर्वाणः सनाभ्योऽपीति** । सनाभ्योऽपि नाशुचिः स्यात्किंपुनरन्यस्तथा गृह्ये "नित्यानि निवर्तेरन्वैतानवर्जं शालाग्नौ चैक" इत्युक्त्वा आह "अन्य एतानि कुर्युरिति" । न च यदङ्गप्रधानं होममात्रमेव क्रियते किंतर्हि साङ्गप्रयोगस्तत्रैव कर्तुरन्यस्य संभवात्प्रधानहोमस्य तु द्रव्यत्यागरूपत्वात्स्वयंकर्तृतैव । अतो होमवैश्वदेवदर्शपूर्णमासाद्या निवर्तन्ते । अन्येषां तु जपसंध्योपासनादीनां निवृत्तिर्न दर्शिता । तानि च नित्यानि । अतो अन्येषामेवाभ्यनुज्ञानं यतः **स्मृत्यन्तरे** प्रतिषिद्धं "होमः स्वाध्यायश्च निवर्तेत" इति । अतो नित्यकाम्यभेदेन व्यवस्था । काम्यं तु नैव कर्तव्यमशुचित्वादधिकारापगमात् ।

ननु च नित्येष्वपि नैवाशुचेरधिकारः । न च शौचमङ्गं यदि विगुणं नित्यमनुष्ठीयते न काम्यमित्युच्यते । अथास्माद्वचनाद्भवति । नैवम् । इह यदपि मानं तदस्यान्य एतानि कुर्युरिति परकर्तृत्वमभ्यनुज्ञायते । तच्च विगुणत्वान्नित्येषूपपद्यते[3] न काम्येषु । वैश्वदेवे तु विवदन्ते । स्मृत्यन्तरं चोदाहरन्ति

"होमं तत्र न कुर्वीत शुष्कधान्यफलैरपि । एवं यज्ञविधानं[4] तु न कुर्यान्मृत्युजन्मनोः ॥"
अतः सन्ध्याहोमौ दर्शपूर्णमासौ सांवत्सरिकं चाश्वयुज्यादि कर्तव्यम् । उपाकरणं तु नक्षत्राश्रयमेव न पौर्णमास्याश्रयम् ॥ ८३ ॥

दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा ॥
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति ॥ ८४ ॥

दिवाकीर्तिश्चाण्डालः अत्यन्ताशुचिसाहचर्याद्भारते च प्रयोगदर्शनान्मार्जारमूषिकसंवादे "तस्मिन्नपि च कालेऽभूद्दिवाकीर्तिभयार्दितः" इति । न नापितस्तस्य स्पृश्यत्वात् भोज्यान्नत्वाच्च । यत्तु श्मश्रुकर्मणि तस्येदं स्नानमित्याहुस्तदपि सिद्धत्वादवाच्यम् आवश्यं श्मश्रुकर्माणि कारयतो रोमाणि गात्राणि स्पृशन्ति तानि शरीराच्युतान्य-

---

१ ङ-ख-विनिवृत्तौ । २ ङ-प्रत्यस्येत् । ३ ङ-प्रपद्यते । ४ फ-पञ्चय ज्ञविधानं ।

For Private And Personal Use Only

शुद्धानीति सिद्धं स्नानम् । तत्स्पृष्टिनं तस्य स्पृष्टं तत्स्पृष्टं तदस्यास्तीति तत्स्पृष्टी । येनैते स्पृष्टास्तदपि स्नानमेव । इह सर्वस्याप्रत्यासत्तेः तत्स्पृष्टिनमित्यनेन संबन्धः शवस्यैव केचिदाहुर्न दिवाकीर्त्यादीनाम् । अन्ये तु एकवाक्योपनिपातादन्ते श्रुतत्वात्सर्वेषां बुद्धौ संनिधानात्तच्छब्देन सर्वनाम्ना परामर्श इति । अत्र हि शवपर्यन्तानां द्वन्द्वं कृत्वा स्पृष्टीत्यनेन सम्बन्धः । तत्र तत्स्पृष्टीति समासार्थस्य बुद्धौ सन्निहितत्वात्तच्छब्देनावमर्शः । न हि शवस्पृष्टिपदेन सबन्धो लक्ष्यते पतितादिभिरितरैर्युक्तत्वात् । किंतु केवलस्य पदान्तसंबन्धः । द्वन्द्वे ह्येकैकः शब्दः सर्वार्थाभिधायी । ततः सर्वे प्रत्यासन्नाः । अथापि शवस्पृष्टिशब्दस्य तत्स्पृष्टिपदेन संबन्धं कृत्वा ततोऽन्यैरभिसंबन्धः । तथा सति पतितादीनां स्पृष्टिपदेन संबन्धो न स्यात् । तस्मात्समाचारत एव निर्णयः ॥ ८४ ॥

आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ॥
सौरान्मन्त्रान्यथोत्साहं पावमानीश्च शक्तितः ॥ ८५ ॥

अशुचयः संनिधानात्पूर्वोक्ता एव । सूर्यदैवत्या मन्त्राः **सौराः** " उदुत्यं जातवेदसम् " इत्यादयः । **पावमान्यः** दाशतयीषु नवमे मण्डलेऽधीताः 'स्वादिष्ठयेत्याद्याः' । **यथोत्साहं शक्तित** इति च एक एवार्थः । वृत्तवशाच्छब्दद्वयं पठितम् । बहुवचननिर्देशात्त्रित्वसंख्याऽवश्यं कर्तव्या । परतस्तु यदि गुरुतरकार्यात्ययो न भवति तदा कर्तव्य एव जपः । मन्त्रग्रहणात्पावमानीरिति च ऋचामुपादानादसमासेऽपि सूक्ते त्रिभ्य उर्ध्वं भवत्येव शुद्धिः । श्वाऽप्यत्र प्रक्षेप्तव्यः । सोऽप्यशुचिरेव । पठितं च **गौतमीये**ऽस्मिन्नेव वर्गे "शुनश्च। यदुपहन्यादित्येक इति " (अ.१४ सू. २९।३०) । **प्रयतः** अनन्यमना मन्त्रदेवतादिध्यानपरः । अथवा प्रयतो देवतादिपूजाप्रवृत्तो यदा पश्येत्तदैव कुर्यान्नान्यदेति ॥ ८५ ॥

नारं स्पृष्ट्वाऽस्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ॥
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥ ८६ ॥

नरो मनुष्यस्तस्येदं नारम् । **सस्नेहं** मांसमज्जादियुक्तम् । गोरालंभनं स्पर्शः । अर्कदर्शनगवालम्भौ विकल्पेते ॥ ८६ ॥

आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात् ॥
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति ॥ ८७ ॥

आदेश आदिष्टं व्रतादेशनसंबन्धाद्रूढिरूपेण ब्रह्मचार्युच्यते तस्य ब्रह्मचर्याश्रमस्थस्य सतो ये सपिण्डाः प्रमीयन्ते तेषामयमनिष्टोदकदानप्रतिषेधः । प्राक्प्रमीतानां तु विहित-

१ अ-क-ख-ड-व-सर्वनाम्नो ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्वाहिकं कुर्याद्देवपितृतर्पणमिति । **आ व्रतस्येति** आ समावर्तनादित्यर्थः । न पुनरान्तरालिकसाहसिकादित्यर्थः । व्रतचरणसमाप्तेः समावृत्तः स सर्वेषामेकैकस्योदकं कृत्वैकस्मिन्नहनि त्रिरात्रमाशौचं कुर्यात् । मातुस्तूदकदानं व्रतिनोऽपीष्यते न च व्रतलोपः । स्मृत्यन्तरमुदाहरन्ति । अपराध्य आदिष्टी नोदक इति ॥ ८७ ॥

वृथासंकरजानां प्रव्रज्यासु च तिष्ठताम् ॥
आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ॥ ८८ ॥

जातशब्दः प्रत्येकमभिसंबध्यते । **वृथाजातो** यो न देवानर्चयति न पितृन्न मनुष्यानिति । सत्यधिकारेऽनाश्रमी । हुताहुतपरित्यक्तः । ' संवत्सरमनाश्रमी भूत्वा ' इत्यादि चिरकालावस्थाने महादोषश्रवणात् । ब्रह्मचारिपरिव्राजकाभ्यामन्यस्य परपाकरतित्वम् आत्मार्थस्तु पाको निषिद्धः । **संकरजाता** इतरेतरजातिव्यतिकरेण प्रतिलोमा आयोगवादयः । निन्दितत्वाद्वृथाजातसाहचर्येण । अनुलोमास्तु सत्यपि संकीर्णयोनित्वे मातृजातीयत्वादधिकारित्वाच्च नेह गृह्यन्ते । न चानुलोमेषु संकीर्णयोनिव्यवहारः । " संकीर्णयोनयस्त्वेताः प्रतिलोमानुलोमजा " इति । अनियुक्तासुतादयश्चानेकपुरुषसंपर्कजाः । वेश्याजाताश्च । पारस्त्रैणेयास्तु असत्यनेकपुरुषसंसर्गेण संकरजाताः ।

अयं च सपिण्डानां निषेधो न तत्पुत्राणामिति केचित् । आत्मत्यागिनां तु पुत्राणामपि तदुक्तमविशेषश्रवणात् । प्रव्रज्यासु बाह्यासु भगालैवरक्तपटाद्यास्वनधिकाराद्बहुवचननिर्देशाच्च व्रतादिदर्शनभेदेन बाह्याः ।

आत्मनस्त्यागिनां पुरुषाणामायुषोऽक्षये स्वेच्छया शरीरं त्यजन्ति वृद्धानामचिकित्स्यमहाव्याधीनां च भिषक्प्रत्याख्यातानामिष्यत एव । **यथोक्तम्**

"वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥"
"तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः । तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् ॥" इति ।

कुष्ठ्यादेस्तु व्याधिगृहीतस्य इष्यत एव । यथोक्तं लुप्तचेष्टस्य गृहस्थावस्थायामपि " महाप्रस्थानगमना वृथा नेच्छन्ति जीवितुम् " । लुप्तचेष्टश्चोच्यते यः शौचादिष्वसमर्थः संध्योपासनादिषु च । अपरिक्षीणशरीरो वा । सादयेद्यस्त्वात्मानमलुप्तचेष्टो वा ।

---

१ अ-क-ख-ड-क्ष-आंतरालिकमाहनाज्ञिकादित्यर्थः । २ फ-संसर्गे । ३ अ-क-ख-ड-क्ष-भगात् धररक्तपट्यासु । ४ फ-निर्देशात् । व्रतादि दर्शनभेदेन । ५ फ- आयुषोक्षये । ६ ड-वा । ७ फ-कुष्ठ्यादेः । क्षुद्व्याधिगृहीतस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतस्तद्विपरीतस्यानुज्ञानं भवति । स्मृत्यन्तरेऽन्येषामप्युदकक्रियानिषेधो विहितः। **यथोक्तं**

"राजभिर्निहतानां च शृंगिदंष्ट्रिसरीसृपैः । आत्मनस्त्यागिनां चैव श्राद्धमेषां न कल्पयेत् ॥

" उदकं पिण्डदानं च प्रेतेभ्यो यच्च दीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥

" नारायणबलिः कार्यो लोकगर्हाभयान्नरैः । तस्मादेभ्योऽपि दातव्यमन्नमेव सदक्षिणम् " ॥

तथाऽन्यत्र

" चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् "॥

तथा **चोक्तम्**

"नृणां चैवाग्निदानां च स्नानालंकारकारिणाम् । तप्तकृच्छ्रद्वये शुद्धिरश्रुपातेऽनुयायिनाम्[1]॥

"तेनोद्दिष्टं न चैवान्यैः कार्यमस्यौर्ध्वदेहिकम् । न च नामापि कर्तव्यं तद्वंशस्य तदीयकम् ॥

"अत्यन्तनरकस्थस्य तस्य पापीयसोऽधिकम् । कारणं कीर्तनं नाम सर्वं चैव भयावहम्"॥

संवर्तेन आस्वेव क्रियासु सान्तपनमाम्नातम् । **पराशरेण** तप्तकृच्छ्रं **वसिष्ठेन** तप्तकृच्छ्रसहितं चान्द्रायणम् । तत्रापूर्वादिविशेषा[2] उपेक्ष्याः ।

यदुक्तम् 'चण्डालादुदकात्' इत्याद्युपक्रम्य 'मरणं पापकर्मणामिति' तत्रेदं सान्दिह्यते । किं यश्चाण्डालादिर्बुद्धिपूर्वमात्मानं घातयति तस्यायं विधिरौर्ध्वदेहिकाकरणं तत्करणे च प्रायश्चित्तमुत प्रमादहतस्यानिच्छत इति । कुतः संदेह इह **गौतमेन** "प्रायानाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनम्"इत्युक्तम्(अ.१४सू११)। इह चाविशेषेण श्रुतं 'चण्डालादुदकात्' इति। तत्र स्मृत्यन्तरेणै कशास्त्रत्वादुदकादित्यत्र तावदवश्यमिच्छतामिति संबध्यते। साहचर्यादन्यत्रापि तथैवेत्याशङ्का जायते । किंच पापकर्मणामिति श्रूयते। पापं च कर्म प्रतिषिद्धम्। अत्र प्रतिषिद्धं योऽनुतिष्ठति स पापकर्मेत्युपपद्यते । अनुष्ठातृत्वं च स्वव्यापारेण परप्रयोक्तृतया च । तत्र न वैद्युतदंष्ट्रिशृङ्ग्यादयः । ते च न प्रयुज्यन्ते । नापि ते श्वभ्रोदकखड्गादिस्थानीयाः । येन तदुपादानेनात्मानं घ्नन् स्वतन्त्रः कर्ता स्यात् । किंतर्हि यस्येदृशं मरणमुपनतं स पूर्वजन्मनि कृतपापक इति शास्त्रेण ज्ञाप्यते । यथा श्यावदन्तप्रभृतयस्तत्रापि किमेतेन ज्ञापितेन । अङ्गहीनादीनां पूर्वपापसंबन्धित्वं ज्ञाप्यते । प्रायश्चित्तमनुष्ठेयं यथा **वसिष्ठेनोक्तम्** । कस्यचित्कृच्छ्रद्वयचरणं कस्यचिदभ्य-

---

१ ङ–अश्रुपातेन यायिनाम् । २ ख–ङ–तत्र पूर्वादि–।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिकमपि । इह मृत्युना सम्बन्धिक्कारस्यापह्नतत्वान्नार्थोऽनेन । यदि वाऽसौ कृतपातक इत्यवसीयते । तेन सह येकेचन केनचित् यौनमौखस्रौवाः संबन्धाः कृताः सोऽपि पापकारी स्यात् । न चैवं शिष्टानामाचारः । न हि तादृशेन संबन्धं कृतवन्तः केनचिद्विचिकित्स्यन्ते । प्रायश्चित्तं नाचरन्ति । अत इच्छतामनुमीयते ।

ये तु 'गोब्राह्मणहतानाम्' इति स्मृत्यन्तरे पठित्वा 'आत्मनस्त्यागिनामिति' पृथक् पठन्ति तेन विशेषपक्षः प्रतिभाति । अतः संशयः किं पुनरत्र युक्तम् । इच्छतामिति कुतः पापकर्मवचनात् । स्वेच्छया यश्चात्मव्यापत्तिहेतौ व्यापारे प्रवर्तते तेन "तस्मादुह न पुरायुषः स्वः कामी प्रेयादिति" शास्त्रमतिक्रान्तं भवति । स च युक्तः पापकर्मेति व्यपदेष्टुम् ।

ननु चोक्तं न हि ते खड्गादिस्थानीयाः । येनेच्छया वधोपपत्तिः । उच्यते । यः प्रमादं न रक्षति तेन तत्कृतमेवेति । तेन यश्चाण्डालदस्युभूयिष्ठेऽरण्य एकाकी गच्छति तस्य यद्यपि चण्डाला मां घ्नन्त्वितीच्छा न भवति तथापि तत्समर्थाचरणेन प्रमादस्यापरिहृतत्वाद्भवत्येव शास्त्रातिक्रमः । एवं यो बाहुभ्यां नदीं तरति संदिग्धां वा नावमधिरोहत्यकुशलकर्णधाराधिष्ठिताम् । एवं तस्य व्यापद्यमानस्य वेगक्षयेण नौपरिवर्तनादिना वा युक्तैव पापकारिता । तथा चागाधतां दण्डादिना ग्राहमकरसंगं चाज्ञात्वा स्नातारो यद्यपह्रियेरन्न दुष्येयुरेवम् । यस्तु दृढबन्धनां तन्वरित्रां तरिं तीव्राम्भसि कुशलावहितसमर्थप्रेरकप्रेर्यमाणामधिरूढः सहसोत्पतिते जविनि पवने चक्रवातेन विच्छिन्नमवाप्तवान् प्लवव्यापत्त्या म्रियेत शास्त्रमतिक्रमेत् । एवं सर्पोपहतं देशं च अपरिहरन्दष्टो व्यापद्येत प्रत्यवेयादेव नान्यथा । एवं तीक्ष्णशृङ्गां गां हस्तिनं वा दृष्ट्वा दूरमनपक्रामतो हन्यमानस्य युक्तोऽतिक्रमः । एवमरण्ये वर्षासूच्चरन्तीषु विद्युत्सु ग्रामनगरयोरप्रवेशे दुष्टैव । ग्रामस्थस्योपरि कथंचिद्विद्युत्पातः स्यात्तदा न किंचिदपराध्यति । अतो युक्तमीदृशं यथाविहितक्रियाकरणम् । तत्र चोदकक्रियानिषेधः सर्वौर्ध्वदेहिकप्रदर्शनार्थः स्मृत्यन्तरेऽस्योदाहृतत्वात् ॥ ८८ ॥

पाषण्डमाश्रितानां च चरन्तीनां च कामतः ॥
गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम् ॥ ८९ ॥

शास्त्रपरित्यागेन बाह्यदर्शनाश्रयं नरशिरःकपालरक्ताम्बरादिधारणं पाषण्डं तदाश्रिताः कृततल्लिङ्गपरिग्रहाः तद्दर्शनवशवर्तिन्यः । चरन्तीनां च कामतः तदा-

१ फ-सर्वाधिकारस्य । २ अ-क-ख-ड-क्ष-तथा यो वां गाधतां । ३ फ-चा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारकुलस्थितित्यागेनेच्छामात्रानुवृत्त्यैकानेकपरपुरुषसंप्रयोगः कामचारः । भर्तुर्विषगरादिदानेन गर्भस्य च पातनं द्रोहः । सुराप्यः यथाप्रतिषेधं प्रतिषिद्धायाः पानेन ।

अत्र कश्चिदाह ब्राह्मणो न पिबेत्सुरामिति । सत्यपि जात्यर्थाविशेषे लिङ्गात्पुंस एव ब्राह्मणस्य प्रतिषेधो न स्त्रिया इति । यद्यपि स्त्रीपुंसयोरेका जातिस्तथापि स्त्रीत्वपुंस्त्वलिङ्गे भिद्येते । इह च ब्राह्मण इति पुंलिङ्गस्य शब्दस्य श्रवणादश्रुतायाः कः प्रसङ्गः । यथा ब्राह्मणीं पाययेत्पुत्रार्थमिति न पुंसः पाययेदिति तद्वत्पुंलिङ्गश्रुतौ न स्त्रिय उपादीयन्ते । क्वचिल्लिङ्गं न विवक्ष्यते । यथा ब्राह्मणो न हन्तव्य इति स्त्रिया अपि प्रतिषेधो विज्ञायते । तत्र द्वितीयया श्रुत्या ब्राह्मणस्येप्सिततमत्वात्प्राधान्यम् । न च प्रधाने प्रातिपदिकार्थव्यतिरेकेणान्यल्लिङ्गसंख्यादि विवक्ष्यते । यथा 'ग्रहं संमार्ष्टीति' नैकस्य संमार्गः । इह पुनर्ब्राह्मणेन सुरा न पेयेति कर्तृतया साधनभावेन क्रियां प्रतिनिर्देशात् ब्राह्मणो न पिबेत्सुरामित्याख्यातानाभिहितेऽपि तादर्थ्यतानामपि वृत्तेः[1] प्रातिपदिकार्थोपपत्त्या प्रथमाऽपि तृतीयानुगुण्येति[2] गुणभावात् गुणे च सर्वं श्रुतं विवक्ष्यते । यथा 'पशुना यजेतेति' पुमान्पशुरालभ्यते एकश्च ।

अत्रोच्यते । नात्र द्वितीयातृतीये गुणप्रधानभावेनाविवक्षाविवक्षयोः कारणं किंतर्हि प्राप्त्यप्राप्ती यदप्राप्तं विधिविषयतयोपपद्येत तद्विवक्ष्यते । अनन्यपरशब्दावगम्यत्वात् । यत्त्वन्यतोऽवगतमर्थान्तरं विध्यर्थमुपादीयते तद्यादृशमेव प्रमाणान्तरावगतं तादृशमेव विधेयकार्यान्तरसंबन्धितया शब्देन प्रतिपाद्यते । ब्राह्मणो न हन्तव्य इत्यत्र वाक्ये विधिः[3] प्रतिषेध एव पर्यवस्यति यदन्यत्तदन्यतोऽवगतम् । प्रातिपदिकार्थविवक्षा तु[4] श्रुत्यानर्थक्यप्रसंगात् । लिङ्गसंख्यादेस्तु प्रत्ययार्थस्य नान्तरीयकत्वेनाप्युपादानसंभवाद्विवक्षाविवक्षे उच्येते । तत्रेह न ब्राह्मणादिभिः पुरुषो विधिना प्रवर्त्यः । तद्वेषात्स्वतः[5] प्रवृत्तेः । तत्सर्वस्य[6] चात्र स्वयं प्रसंगात् । न ह्यविधीयमानः प्रतिषेधः कथंचिदन्वेतुमलम् । अन्यतः प्राप्त्यभावात् । अकारकत्वादकारकविशेषणत्वात्स्वभावानुप्रवेशेनापि संबन्धं लभ्यते[7] । तस्मादस्यान्वयसिद्ध्यर्थं विषयभाव एषितव्यः । तस्मिंश्च विधिना विषयीकृतेन भावार्थो विषयतयाऽपेक्ष्यते । भावार्थश्च प्रतिषेधेन विषयांशस्य गृहीतत्वात्ततः प्रच्युतलौकिक्या च प्रवृत्त्या सिद्धानुष्ठान आत्मविधिसिध्यर्थमनुप्रवेशमप्यकांक्षन्नधिकारमात्रसापेक्षविधौ प्रमाणान्तरतः प्रतिपन्नहननकर्तृभावस्य पुंसोऽधिकारतां प्रतिपादयं-

---

१ फ–तादर्थ्यनामनिवृत्तेः । २ फ–गुणेति । ३ फ–विप्रतिषेध एव । ४ अ–क–ख–ड–क्ष–तु । ५ फ–तद्वेषात् । ६ क–तत्सर्वस्य वा नस्तुय प्रसऽगान् । अ ड–तत्सर्वं सर्वानस्तुप्रसङ्गात् । ७ अ–क–ख–ड–क्ष–लभत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तद्विशेषणद्वारेणान्वयं प्रतिपद्यत इत्युपपन्नमन्विताभिधानं तेन भावार्थस्य सविशेषणस्याविधेयत्वाल्लौकिकी प्रवृत्तिरभ्युपेतव्या । अस्ति च रागलक्षणा प्रवृत्तिर्न तस्या लिङ्गसंख्यानियमोऽस्ति द्वेषाद्वा तस्मादविधेयार्थशब्दोऽवगतार्थपरत्वादभिधानं शक्तिमुत्सृज्य प्रमाणान्तरतो यथावधृतस्वरूपमर्थं लक्षयति । तत्र लिङ्गसंख्ययोस्तात्पर्यतः शब्देनानभिधानात्कुतो विवक्षा केवलं प्रातिपदिकनिर्देशार्थं येन केनचिद्वचनेन निर्देशः कर्तव्यो न केवला प्रकृतिः प्रयोक्तव्येति तदर्थं लिङ्गसंख्ययोरुपादानम् ।

अत इयमत्रावगतिः हननेऽध्यवसितकर्तृभावः स नञर्थे नियुज्यते । अतः प्रतिषेधवाक्ये द्वितीयाश्रुतिरविवक्षया नातन्त्रं यत्रापि हि तृतीया श्रूयते प्रथमा वा ब्राह्मणेन न पातव्या ब्राह्मणो न पिबेदिति तत्रापि तदर्थश्चान्यतः प्राप्तेरविधेयत्वादनूद्यते । या अधिकारविशेषणत्वेनैव संबध्यते । एते द्वितीयाविशिष्टे प्रथमातृतीये । सत्यामपि च द्वितीयाश्रुतौ यदप्राप्तं तद्विधेयत्वाद्विवक्ष्यते यथा "भार्यामुपगच्छेत्" "अपत्यमुत्पादयेदिति" न हि लौकिको भार्यार्थः । उपयमनेनैव तत्सिद्धेः । नापि वाक्यान्तरे विधिना क्वचिदुपात्तो येन यथावगममुद्दिश्येत यथाऽश्विनं गृह्णाति मैत्रावरुणं गृह्णाति दशैतानध्वर्युर्गृह्णातीति संख्याविशिष्टा एव ग्रहा उपादीयन्ते । अतो निर्ज्ञातसंख्यत्वात्संमार्गविधौ यथासंख्यावगमं निर्दिश्यते । अत्र पुनर्वाक्यान्तराभावादस्यैवोत्पत्तिवाक्यत्वाच्छ्रुतसंख्यापरित्यागे प्रमाणाभावान्निरपेक्षाभिधानशक्तिसमर्पितस्यैकस्य परित्यागः पुरुषबुद्धिप्रभव एव स्यात् । एवं पशुना यजेतेति यागविषयत्वाद्विधेस्तस्य च साध्यस्वभावत्वात्साधनाकांक्षायां समर्पितसविशेषणकारितसहितस्य विधेयत्वे यद्यर्थमात्रे विधिव्यापारपरिसमाप्तेः स्वार्थपरशब्दाभिहितापेक्षितस्वार्थाः किमिति नयन्ति । प्रमाणाशास्त्रविदस्तु स्वयं विधिंविदिति अन्योक्तमवगाहन्ते । यत्त्वस्माभिरुक्तं तत्सुखोपायग्राह्यं नातिमहती व्युत्पत्तिरत्रोपयुज्यते । इयदेव च तत्सारम् इयती सा विद्याऽनुष्ठानोपयोगिनी यदधिकमाहोपुरुषिकामात्रं तदर्थवाद एव । तत्र ह्यर्थवादाद्विशेषावगतिर्भवति यत्राकांक्षाविधेरनिवृत्तिरिति यथोक्तमुपदधातीति । बहुषु भोजनसाधनेषु सर्पिस्तैललवणादिषु सत्सु केनेत्यनवसाये घृतेनेति गम्यते । यथा तु रात्रिष्वनुष्ठानाश्रवणादाकांक्षायां प्रतितिष्ठन्तीत्यर्थवादः । अतः प्रतिष्ठाकामस्येति गम्यते । इह पुनर्ब्राह्मणा इतिपरिसमाप्तत्वात्पदार्थस्य निवृत्ताकांक्षेति स्तुतिमात्रापेक्षयाऽर्थवादः । अथ लिङ्गदर्शनमात्रतयोपन्यस्यते " देवानामश्नता हविरिति " (अ. ११ श्लो. ९९)

---

१ फ–तात्पर्येन्तः । २ फ–अविवक्षायामतन्त्रं । ३ फ–तदर्थस्य । अन्यतः प्राप्तिः ४ फ–श्रुतै; फदप्राप्तं । ५ फ–विधिं विन्दति । ६ फ–इयदेवतत्सारंइयती सा । ७ ङ–विध्यनुष्ठानात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्माच्छ्रेयः संपन्नं पापीयानन्वेतीतिवत्तदपि पुंसः प्रतिषिद्धत्वात्पाक्षिकेनानुवादेन सालम्बनमिति न किंचित् । स्त्रीणामपि देवान्नशेषमाज्यादिप्राशनमस्त्येव वेदोदाहरश्च दर्शपूर्णमासादिषु "[1] षिदेयैकर्मासीति "। न च श्राद्धस्य कर्तुः सुरां पाययेदिति चोदनया तासां पानमनुमीयते । ब्रह्महत्यादानेनैव ग्रहः तस्माज्जातिमात्रस्य प्रतिषेध इत्येष एतस्यां विप्रतिपत्तौ निर्णयः ॥ ८९ ॥

आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ॥
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥ ९० ॥

स्वग्रहणमाचार्यविशेषणं मन्यते । " गुरोर्गुरौ संनिहित"(अ. २ श्लो. २०५) इत्यतिदेशात्तदाचार्येऽपि प्राप्ते प्रतिषेधः । अन्ये तु स्वशब्दं बान्धववचनं व्याचक्षते । अत्र तु पितरं मातरमिति न वक्तव्यं नित्यार्थं त्वभिधानमिति गुरुः " अल्पं वा बहु वाऽपि " (अ. २ श्लो. १४९) इत्यनेन य उक्तः । एतान्निर्हरतो व्रतवियोगो नास्तीति श्रुतसामर्थ्याद्दर्शयति । अन्यान्निर्हृत्यानेन वियुज्यत इति पदार्थसिद्धिः ॥ ९० ॥

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ॥
पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ॥ ९१ ॥

पुरद्वारेणेति पुरग्रहणं ग्रामादीनामप्युपलक्षणार्थम् । यत्रानेकद्वारसंभवस्तत्रायं नियमः । यो यत्रेष्टे तस्यायमुपदेशः । अमङ्गल्यत्वाच्च शूद्रादारभ्य क्रमेणोपदिष्टम् । अतश्च **यथायोगमिति** वैश्यक्षत्रियब्राह्मणाः पश्चिमादिभिर्यथासंख्यं संबन्धनीयाः ॥९१॥

न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम् ॥
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा ॥ ९२ ॥

राजशब्दो यद्यपि क्षत्रियजातौ वर्तते तथापीह **ऐन्द्रं स्थानमुपासीना** इति कारणस्योपादानाज्जनपदेश्वरवचनो लक्षणया विज्ञायते । उत्तरश्लोके निपुणं वक्ष्यामः । **व्रतिनो** व्रतचारिणः चान्द्रायणादिस्थाश्च । सत्रिणो गवामयनिका अन्यस्मिन्वा यज्ञे दीक्षिताः । तथा च **गौतमः**[3] " ऋत्विग्दीक्षितब्रह्मचारिणामिति " । अत्रार्थवादः **ऐन्द्रं स्थान**माधिपत्यं पदं प्रजैश्वर्यमुपासीनाः कुर्वाणा राजानो ब्रह्मत्वं प्राप्ताः । व्रतिनः सत्रिणश्च । **अघदोष**माशौचम् । अन्ये तु सततदानप्रवृत्तान्सत्रिणो मन्यन्ते । मुख्ययाऽनुवृत्त्या क्रतुविशेषे वर्तते ॥ ९२ ॥

---

१ फ—वैश्वदेविकर्मासीतेति । २ फ—दाविवः नैवं प्रतिग्रहस्त । ३ अ. १४ सू. १ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्ञो माहात्मिके स्थाने सद्यः शौचं विधीयते ॥
प्रजानां परिरक्षार्थमासनं चात्र कारणम् ॥ ९३ ॥

महानात्मा यस्य स्थानस्य तन्माहात्मकं यस्मिन्स्थाने स्थितस्य पुंसः प्रजानां परिरक्षा। माहात्म्यं तदेव[1] उच्यते । तच्च प्रजैश्वर्यम् । यदाह "आसनं चात्र कारणमिति" । तदुक्तम् । नात्र जातिमात्रं किंतु प्रजापालनाधिकारः। आसनशब्दोपीह नासनशय्यादिवचनः । अपि तु तत्पदं प्राप्तवतो यत्कर्तव्यं तदाह। अतः[2] अक्षत्रियोऽपि यदि प्रजापालने समर्थः तस्याप्याशौचाभाव एव पूर्वैर्व्याख्यातः। **प्रजानां परिरक्षार्थमिति** । न सर्वेण सर्वाशौचनिवृत्तिः किंतर्हि प्रजापालनाविरोधि यदाशौचधारणं तन्निवर्तते। यथा दुर्भिक्षादौ स्वकोशादन्नदानेन प्रजाभरणम् । तथा दिव्यन्तरिक्षभौमेषूत्पातेषु शान्तिः । अकस्मात्सभ्यैः कर्तव्येन राज्ञा अथवा [3]श्रमेषु द्विजातीनां धर्मसंशयसत्त्वेन प्रथमेज्यादावप्यस्ति प्रवक्तृत्वं तदपि प्रयोजनम् ॥ ९३ ॥

डिम्बाहवहतानां च विद्युता पार्थिवेन च ॥
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥ ९४ ॥

डिम्बो बहुजनसंकुलः अशस्त्रकलहो वा । **आहवः** संग्रामो युद्धं[4] तत्र हतानां सद्यः शौचम् । विद्युदशनिः एतद्व्याख्यातम् । **पार्थिवः** पृथिव्या ईश्वरश्चातुर्वर्ण्यस्य यः कश्चित् । ब्राह्मणार्थे गवार्थे च युद्धादन्यत्रापि जलाग्निदंष्ट्रिहतस्य । **यस्य चेच्छति पार्थिवः** स्वकार्यार्थपरिपालनाधिकृतस्य । कुत एतद्यतो राज्ञां परिपालन एवाशौचनिवृत्तिस्तत्र कुतोऽन्यस्याविशेषेण तदिच्छया विनिवृत्तिः स्यात् ॥ ९४ ॥

सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ॥
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥ ९५ ॥

वपुस्तेजोंऽशः । **वित्तपतिर्वैश्रवणः** । **अपांपतिर्वरुणः** । अत्रैव द्वितीयोऽर्थवादः ॥ ९५ ॥

लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ॥
शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् ॥ ९६ ॥

एतैर्लोकेशैरधिष्ठितो राजा नास्य शौचाशौचम् । यतो **मर्त्यानां** मनुष्याणामाभ्यामधिकारः। तयोश्च **प्रभवाप्ययौ** प्रवृत्तिनिवृत्ती लोकेभ्यः सकाशान्मर्त्यानां न तु लोकेशानामेव ॥ ९६ ॥

---

१ फ–माहात्मं तदेवमुच्यते । २ फ–अतश्च । ३ फ–श्रमेषु । ४ फ–युद्धः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ॥
सद्यः संतिष्ठते यज्ञस्तथाऽऽशौचमिति स्थितिः ॥ ९७ ॥

येन शस्यते हन्यते तच्छस्त्रम् । अतः पाषाणलगुडादिनाऽपि हतस्य यज्ञसंस्था निष्पद्यते नायुधैरेव खड्गादिभिः । आहूयन्ते यत्रेतरेतरं स्पर्धमाना युद्धाय स आहवः संग्रामः । क्षत्रधर्मः अपराङ्मुखत्वं प्रजार्थं प्रभुप्रयुक्तं च । सद्यः संतिष्ठते समाप्तिमेति । यज्ञो ज्योतिष्टोमादिस्तत्पुण्येन युज्यत इति यावत् आशौचमपि सद्य एव ।

अत्र केचित् क्षत्रधर्महतस्येत्यनेन सद्य इत्यभिसंबध्नन्ति । ततश्च यः संग्रामभूमौ मृतः तस्यैवायं विधिर्न तु योऽन्येद्युस्ततोऽन्यत्र गतस्तदेतद्विचार्यम् ॥ ९७ ॥

विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् ॥
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ॥ ९८ ॥

दशाहादीनां कल्पानां परिपूर्ण आशौचकाल इदमपरं कर्तव्यम् । अपः स्पृष्ट्वेति स्नानमुपदिश्यत इति प्राग्व्याख्यातम् । कृतक्रिय इति क्षत्रियादिभिरभिसंबध्यते । क्रिया च स्नानमेव अन्यस्याश्रुतत्वात् । स्नात्वा वहनादीनि स्पृशेयुः । अन्ये तु श्राद्धक्रियामाहुः । श्राद्धादि कृत्वा सर्व एव विशुध्यति । तत्रापि ब्राह्मण उदकं हस्तेन स्पृष्ट्वा क्षत्रियादयस्तु वाहनादिभिः ॥ ९८ ॥

एतद्वोऽभिहितं शौचं सपिण्डेषु द्विजोत्तमाः ॥
असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत ॥ ९९ ॥

पूर्वोत्तरवस्तूपसंहारोपपत्त्युपन्यासार्थौ पूर्वोत्तरावर्धश्लोकौ ॥ ९९ ॥

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ॥
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥ १०० ॥

बन्धुवदिति धर्मेण न मूल्येन । मातुराप्तांश्च आप्तग्रहणं प्रत्यासन्नबान्धवमातुलादिग्रहणार्थम् । अस्माच्चानुमीयते असपिण्डः असमानोदको न सर्वसपिण्डादन्यः ॥ १०० ॥

यद्यन्नमत्ति तेषां तु दशाहेनैव शुद्ध्यति ॥
अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् ॥ १०१ ॥

अनश्नतो निवसतश्च पूर्वोक्तस्त्रिरात्र एव । अनश्नतो न निवसतश्च एकाह एव । अश्नतः निवसतश्च दशाह एवं ॥ १०१ ॥

---

१ अ-क-ख-ड-क्ष-रश्मि वा । २ फ-स्नात्वा । ३ ड-सर्वोऽसपिंडादन्यः । अ-क-ख-क्ष-सर्वासपिण्डान्यः । ४ अ-क-ख-ड-क्ष । अनिवसतोऽप्यश्नत. दशाह एवेति चतुर्थः प्रकारः । स तु गोविन्दराजेन दर्शितः ॥

५५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ॥
स्नात्वा सचैलं स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुद्ध्यति ॥ १०२ ॥

अनुगमनं बुद्धिपूर्वमनुव्रजनम् । यथाकथंचिदधिगमने न च सचैलम् । स्नानं अग्निस्पर्शो घृतप्राशनं च समुच्चितं शुद्धिहेतुः ॥ १०२ ॥

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ॥
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ॥ १०३ ॥

न नाययेन्न निर्हारयेत् । **स्वेषु तिष्ठत्सु** समानजातीयेषु सत्सु । आहुतिग्रहणान्न दाहयेदिति । विप्रग्रहणमतन्त्रम् । क्षत्रियवैश्ययोरपि शूद्रसंस्पर्शो दोष एवेत्यर्थवादात्प्रतिषेधः प्रतीयते ॥ १०३ ॥

ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपाञ्जनम् ॥
वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम् ॥ १०४ ॥

ज्ञानादीनि कालशुद्धेः दृष्टान्ततयोपादीयन्ते । तथैतानि स्वविषये शुद्धिकारणानि। एवं कालोऽपि नात्रातिशङ्कितव्यः । एतेषां यस्य यत्र शुद्धिहेतुत्वं तदिहैव प्रकरणे तेषां वक्ष्यते । अन्येषां तत्र तत्र देशे ।

तत्र ज्ञानमाध्यात्मिकं साङ्ख्ययोगोपदिष्टं तेन हि अविद्यावासनापासनेन रागादिक्षये निर्दोषज्ञानमुपैति । वक्ष्यति च (श्लो. १०८) " बुद्धिर्ज्ञानेन शुद्ध्यतीति " । **तपः** कृच्छ्रचान्द्रायणादि तत्पातकोपपातकानां शुद्धिहेतुः । **अग्निर्मृन्मयादिषु** " पुनःपाकेनेति " (श्लो. १२१) । आहारः पवित्राणां पयोमूलानां सोऽपि तप इव शोधयति । मृद्वारिणां शुद्धिहेतुता प्रसिद्धैव । **मनसो** वक्ष्यते " मनः सत्येनेति " । (श्लो. १०८) । **उपाञ्जनं** मठादेः सुधागोमयादिना संमार्जनानुलेपने । वायुश्चण्डालादिस्पृष्टे तृणकाष्ठादौ रथ्यापतिते । **कर्माणि** संध्योपासनादीनि । उक्तं च (अ. २ श्लो. १०२) " पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहतीति " । एतच्च द्वितीये व्याख्यातम् ।

सत्यपि तपसः कर्मत्वे प्राधान्यख्यापनार्थं पृथगुपदेशः प्रायेण च शास्त्रे भेदेनैव कर्मणस्तपो निर्दिश्यते " कर्मनिष्ठास्तपोनिष्ठा " इति (याज्ञवल्कीये आचारे. २२१) ॥ १०४ ॥

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ॥
योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ॥ १०५ ॥

---

१ अ-क-ख-ड-क्ष- घृतप्राशनं च शुद्धिहेतुः । २ अ क ख ड क्ष-शोधयति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोऽस्य प्रसंगः । यथा मृद्वारिशुचावविलम्बं कृतोत्सर्गः प्रवर्तते तथा प्रमादस्खलिते परद्रव्यापहरणादावविलम्बितं प्रायश्चितं शुद्धये समाश्रयणीयम् ॥ १०५ ॥

क्षान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्यकारिणः ॥
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ॥ १०६ ॥

एकादशे वक्ष्यति । ये विद्वांसस्ते क्षान्त्यैव शुध्यन्ति । ते हि द्वेषेर्ष्यामत्सरैर्नोपहन्यन्ते ततो दुष्कृतेषु प्रवृत्तेषु नित्यशुद्धा भवन्ति । क्षान्तिर्नाम चित्तधर्मः सर्वत्र साम्यम् । **दानस्याप्यकार्यकृच्छुद्धिरुक्ता** " दानेन वधनिर्णेकम् " [अ. ११ श्लो. १३९] इत्यादिना प्रच्छन्नपापानामपि रहस्याधिकारे जप उक्त एव । तपो वेदविदां वेदाभ्यास एव ज्ञानं च यथोक्तं " ब्राह्मणस्य तपो ज्ञानम् " इति [अ. ११ श्लो. २३५]। कृच्छ्रादि तु सर्वेषां शुद्धिहेतु न वेदविदामेव ॥ १०६ ॥

मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति ॥
रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमाः ॥ १०७ ॥

नद्यः पारावारे क्षीणोदकाया अशुध्युपहते तस्या एव वेगागताया: कूलंकषाया उदकं वेगेन शुध्यति । यथान्यस्या भूमेः " भूमिः शुध्यति पञ्चभिरिति " । (श्लो. १२३) शुद्धये प्रतीतिर्नैवं नदीतीरेषु । अथवा वेगवत्या अशुचिप्रवाहसंसर्गेणाशुच्याशङ्कायामिदमुच्यते **नदी वेगेनेति** । नैवं मन्तव्यं इतश्चामुतश्चाशुचिप्रवाहैः संस्पृष्टा न शुध्यति । शारीरे व्यभिचारेऽनुपलभ्यमाने परपुरुषरूपगुणानुचिन्तनेन मनोदुष्टा **रजसा** ऋतौ शोणितेन स्रुतेन **शुध्यति स्त्री** । **सन्यासः** षष्ठे वक्ष्यते । तेन द्विजोत्तमाः शुद्धा भवन्ति । न कथंचिन्मानसापचारे यदविदुषा चिन्तितसूक्ष्मप्राणिवधादि तद्दोषमपनीयते ॥ १०७ ॥

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ॥
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥ १०८ ॥

इयानेवाधिकारी कर्ता च पुरुषो यदान्तरात्मा अन्तःकरणं **मनः** बुद्धिः । शरीरं भोगायतनं इन्द्रियाणां भौतिकत्वान्न पृथक्त्वम् । अत्र किंचित्केनचिच्छोध्यते । ' कालेन तु सर्वमिति ' स्तुतिपरम् । गात्राणीत्यवयवैरवयविनं लक्षयति । अद्भिः स्नानेन शरीरं शुध्यति । मनस्तु सदसदात्मकं तस्यासत्संकल्पादशुद्धिः सत्येन साधुसंकल्पेन निवर्तते । पूर्वं मनसः शुद्धिहेतुत्वमुक्तं तदध्याहारेण नेदं वाचोमनःशुद्धिकरणम् । तथा च श्रुतिः " मनसा वा इषिता वाग्वदति यां ह्यन्यमना वाचं वदत्यसुर्या वै सा

१ अ-क-ख-ड-क्ष-अकार्यव (च्छु ?) द्धिरुक्ता । २ फ-सुतेन । ३ अ-क-ख-ड-क्ष-यद्वा किंचिदशाचिन्तितं सूक्ष्मप्राणिविधादि न दोषामपनीयते । ४ फ-र्यां ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वागदेवजुष्टेति " । या वाऽनुपभुक्तजन्मान्तरकृताशुभकर्मजा एकैकदुष्कृतजा वा बुद्धिरात्मनो यावत्सहजा अविद्यात्मकाऽभेदग्रहणलक्षणा गुणात्मविवेकाभावलक्षणा वा धनपुत्राद्यभिषङ्गरूपा तृष्णातिशयहेतुः सा तु **विद्यया** साङ्ख्यवेदान्ताभ्यासजन्यया **तपसा** च कृच्छ्रादिनाऽभ्युपेतः शुध्यति । **भूतात्मा** भूतशब्दस्तत्त्ववचनः । पारमार्थिकोऽयमात्माऽनुपचिताहंप्रत्ययवेद्यो न तु भूतमय आत्मा शरीरात्मेति मन्तव्यम् । **बुद्धिरविद्यमाना**र्थाकारदर्शनाय स्वप्नादिष्वसत्सिद्धान्तप्रकल्पितार्थाभिनिवेशतया वस्त्वात्मार्थाकारयोरसद्भेदाध्यवसायेन दुष्यन्ती **ज्ञानेन** स्वप्रकाशाश्रयया प्रमाणव्युत्पत्त्या **शुध्यति**। बुध्द्यर्थयोर्भेदादाकारवत्वादर्थस्य विषयाकारेण च परिणामासिद्धिर्निर्विकारत्वनिश्चयाद्बुद्धिशुद्धिः पूर्वत्र च विद्यावेद्यार्थवेदनमेव। तस्याश्च हेतुत्वं "यथैधस्तेजसा वह्निः" (अ. ११ श्लो. २४६) इतिवदिति । एवं शुद्धः पूतो ब्रह्मलोकमवाप्नोतीत्येषा सा चतुर्विधा शुद्धिः । यथैता शुद्धयः पॅरपुरुषार्थहेतवस्तज्जननादिष्वियमिति प्रशंसा । ॥ १०८ ॥

एष शौचस्य वः प्रोक्तः शारीरस्य विनिर्णयः ॥
नानाविधानां द्रव्याणां शुद्धेः श्रृणुत निर्णयम् ॥ १०९ ॥

नानाविधानां द्रव्याणां बहुप्रकाराणां तैजसमार्तिकद्रवकठिनव्यस्तसंहतकार्यद्रव्यादिभेदैर्द्रव्याणामुपकरणभूतानां पूर्वस्याः शुद्धेर्भेदमेतेनाह । तत्र बुद्ध्यात्मनः प्रधानता शुद्धिः । द्रव्याणां तु तत्संपरिग्रहात् । इह तु विपरीतं **श्रृणुत निर्णयं** पूर्वेणार्थस्यासांकार्यार्थः श्लोकः ॥ १०९ ॥

तैजसानां मणीनां च सर्वस्याश्ममयस्य च ॥
भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥ ११० ॥

तैजसान्युच्यन्ते यान्यग्निसंयोगाद्द्रवीभवन्ति रजतसुवर्णताम्रायसत्रपुसीसादीनि । **मणयः** स्फटिककलशाः। **अश्मा** पाषाणः। तद्विकारः पात्रमश्ममयम् । **सर्वस्येति** पादपूरणार्थम् । पर्वतग्राव्णो नदीस्थस्य चेत्यालंबनम् । भस्मन एककार्यत्वान्मृद्भस्मनी विकल्प्येते । आपः समुच्चीयन्ते । किंपुनरत्र कार्यं लेपगन्धापमार्जनम् । उक्तं (श्लो. १२६) " लेपगन्धापकर्षणे शौचममेध्यस्य " इहापि " यावन्नापैत्यमेध्याक्तादिति " । तत्र रूपतोऽपारुष्यं समानं मृद्भस्मनोः स्नेहनिमित्तकार्यभेदे शुद्धिः । अशुचेः शुचित्वापादनप्रत्यवायापनयेन संव्यवहारयोग्यता । यद्येवमशुद्धिर्वाच्या इदमनेन संपृक्तमशुचीति । ननु लौकिकाः पदार्थास्तत्रलोके एव ज्ञास्यन्ते । नैकसामान्यमात्रं लोकाज्ज्ञायते । यज्जुगुप्सितं मूत्रपुरीषशोणितसंसर्गेण तादृशं लोकेऽशुचीत्याह । यदयोग्यं स्पर्शनादिक्रियासु

१ फ–सहजाविद्यात्मका । २ अ–क–ख–ड–क्ष–सत्पुरुषार्थहेतवः । ३ फ–लोका ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदशुचि । कथं च तस्यायोग्यतेत्येतच्छास्त्रादेव विवेक्तव्यम् । किंच परद्रव्यादौ यो न स्खलति स शुचिरुच्यते । अतोऽनया पदार्थप्रसिध्येह किंचिदिसिध्यति अपहतमशुचीति सिद्धेऽपि इदमनेनापहन्यत इति । नान्तरेण शास्त्रविशेषः सिद्धयति कथं पुनः शास्त्रात्पदार्थविशेषावसायो यावता कर्तव्यतापरत्वेन शास्त्रं प्रमाणं न पदार्थप्रसिद्धौ पाणिनिवत् । वेदमूलत्वाभ्युपगमान्मन्वादिस्मृतीनामुच्यते । अनेन द्रव्येण यद्दुष्टं तेन न व्यवहर्तव्यमित्यस्त्येव विध्यनुमानम् । यत्संसर्गेण व्यवहारप्रतिषेधः स उपघातहेतुरित्यवगमो न विरुध्यते । एवं शुद्धावपि यदुपहतं द्रव्यं तेन यथाविहितं कृतप्रक्षालनादिक्रियेण व्यवहर्तव्यमिति शक्यते विधिमूलता प्रतिपत्तुम् । न च शुद्धिः कर्तव्येतिविध्यर्थः । तथा सत्यकुर्वन्प्रत्यवेयात् । किंतु दृष्टार्थे व्यवहारे येनके(न)चित्पात्रेण शुचिनाऽन्येन वा कर्तव्येऽर्थित्वात्प्राप्ते नियमः शास्त्रीयः । इत्थंभूतेन व्यवहर्तव्यं सत्यर्थित्वे नानित्थंभूतेन ।

ननु च नियमपक्षेऽभ्युदयार्थिनोऽधिकारः । अन्यस्य तु कामप्रसंगः । यथा कुसाधुत्वचिन्तायां वाचकत्वाविशेषेऽपि "नियमः पुण्यपापयोरिति" । सत्यम् । यद्यशुद्धे पात्रस्य प्रतिषेधो न स्यात् । प्रतिषेधे तु सति कुतोऽकृतशुद्धिना व्यवहारः । शुद्धिविधिस्तु प्रतिप्रसवमात्रम् । प्रतिप्रसवे कुतोऽभ्युदयः । केवलं प्रतिषेधातिक्रमो न भवति । भवतु वा पदार्थाधिगमपरैव स्मृतिरियं साध्वसाधुविवेकवत्स्वरूपस्मृतिवच्च यत्तु कार्यमूलत्वं मन्वादिवाक्यानामिति । केनैतदुक्तं यत्र यादृश्यं मूलत्वेन शक्यतेऽवगन्तुं तत्र तदेवाभ्युपगम्यते । अष्टकादौ कार्यरूपे तादृशमेव वाक्यं मूलं सिद्धार्थमेव । पदार्थव्यवस्थायामिदंप्रथमता व्यहारमूलेति न कदाचित्कृतिः । इह तु न कथंचिद्व्यवहारमूलं संभवति वैदिकमन्त्रसाध्यायां च शुद्धौ का व्यवहारमूलता शक्या विधिश्चानर्थकः स्यात् ।

ननु च पाणिनेरपि विधिरस्ति साधुभिर्भाषितव्यं नासाधुभिरिति नैषा पाणिनेः स्मृतिः । सा ह्येतावति पर्यवसिता साधुरयमयं नेति एतत्तु धर्मसूत्रकारिणां स्मरणं यद्यप्यस्ति अभिधानसाराच्चैतन्निपुणतोऽवगन्तव्यम् । ननु तत्स्मृतावपि विधिः श्रूयते । दायादा एवं विभजेरन् "चतुरोऽशान् हरेज्ज्येष्ठः" (अ. ९ श्लो. १५३) । "ज्येष्ठ एव तु गृह्णीयादिति" (अ. ९ श्लो. १०५) । किं विध्यर्थ एव लिङ्गान्तरे प्रैषादौ स्मर्यते । पदार्थो विधिरूपा विधिशेषाः प्रैषादयः सर्वत्र प्रवर्तनाप्रतिपत्तेरिति चेत् । हेतुहेतुमतोराशिषि प्राप्तकालादिषु का प्रवर्तना न च अर्हणं विधेयं अर्थितया प्राप्तत्वात् ।

---

१ अ-क-ख-ड-क्ष-विशुध्यर्थः । २ अ-क-ख-ड-क्ष-सत्यनार्थित्वे । ३ अ-क-ख-ड-क्ष-सिद्धे स्वर्थेऽविषयमेव । ४ फ-धर्मसूत्रकारिणां यद्यप्यस्ति । ५ फ-परिभजेरन् । ६ ड-श्रवणं । ७ फ-विधेयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वपरांशयोरविशिष्टतायामार्थतायां नियमार्थो विधिरिति चेत् अदृष्टकल्पेन विहितांशातिरेकेण विधिनियमानुपपत्तेः । प्रतिषेधाख्यापरिसंख्येति चेत् युक्तमेतत् । विभागकाल एव यः कश्चिदधिकमंशं भ्रातृभिरनुज्ञातमाददीत स प्रत्यवेयात्सत्यामप्यनुज्ञायामेकवस्त्वंशः[1] । न च स्वत्वं ज्ञाप्येत ग्रहणविधौ हि स्वत्वापत्तिरुपात्ता । तस्य यदन्यत्तदस्वमिति विज्ञायते प्रतिषेधः । पुनस्[2]तदतिक्रमेणापि परिग्रहे स्यादेव स्वाम्यं अतश्च चौर्यादिनाऽपीष्यते न तदा इदमस्य स्वमिदं नेति परिगृह्णाद्दते निश्चीयते तस्माद्विधिनियमपरिसंख्यानामसंभवादियत्यंशेऽयं स्वामीयत्यंशेऽयमिति । एतावान्विभागार्थः । अतोऽयमर्थान्तरे लिङ् भजेरन्निति । प्राप्तकालतायां हरेयुरित्यादिषु लौकिकप्रवृत्त्यनुवादो यथा "क्षुधितो भुञ्जीत" "योगक्षेमार्थमीश्वरमभिगच्छेदिति" । गौतमश्च स्पष्टमेवाह "रिक्थक्रय" इत्यादि । तस्माददृष्टकादिस्मृतेः शुध्यशुद्धिवचनस्य संस्कारविधितैव शिष्यते । विधिमूलत्वाद्विधिशिष्टैव । अतः शुद्ध्यशुद्धी उभे अपि शास्त्रावसेये । ततः शुद्धिरपि वाच्या । उच्यते । उक्तैव तर्हि वसा शुक्रमिति । नृग्रहणं च तत्र स्मृत्यन्तरदर्शनेन प्रदर्शनार्थम् । श्वमार्जारखरोष्ट्रकपिकाकविड्वराहग्राम्यकुक्कुटाखुशृगालक्रव्यादमृगशकुन्तनखिनकुलानां वसादिग्रहणं च । रोममांसानां शुद्धिवचनाचाशुद्धानां मूत्राद्युपहतानामयं संस्कारः कर्तव्यो न पुनरेवमेव प्रयुज्यमानानाम् । न हि सुवर्णादयो भावाः स्वरूपेणाशुद्धा येन प्रयोगकाले शुद्धिमपेक्षेरन् । अथवाऽदृष्टार्थो दृष्टप्रयोगाश्रयः संस्कारो विधीयते । प्राङ्मुखेनैव भोजने । तत्र शुद्धिवचनं विरुध्यते । ये तु पात्राणां भोजनारम्भे संमार्जनप्रक्षालने ते समाचारतः न पुनरस्याः शुद्धि[3]स्मृतेः । यदप्यन्यद[4]स्पृश्यं पुरुषस्य पतितचाण्डालादि तथा लशुन[5]पलाण्डुसुरामांसादि तदपि द्रव्याणामुपघातकम् । तत्र कस्मिन्नुपघाते का शुद्धिरिति स्मृत्यन्तरसमाचारावन्वेषणीयौ । उक्तश्च विशेषो हारीतापस्तम्बपराशरमुनिभिः । तानि तु वचनान्यस्माभिरिह सर्वाणि न परिवर्तितानि । लेखकविशेषप्रसंगाच्चन्द्र[6]गोपतन्त्रकारवत् ॥ ११० ॥

निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुद्ध्य[7]ति ॥
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥ १११ ॥

तैजसविशेषयोः काञ्चनराजतयोर्निर्लेपयोरयं विधिः । अन्येषां तु ताम्रादीनां यथोच्छिष्टस्पर्शे धावनादिष्टकादिभिः क्षीरं वा पानीयं वा पीतं तत्र न भवति लेपः । यत्र मांसघृतक्षीरादिभिरुच्छिष्टैः संश्लिष्यन्त्यवयवास्तत्र वक्ष्यति "तस्मात्तयोः स्वयोन्यैवेति"

१ फ-वस्त्वांश । २ अ-क-ख-ड-स-पक्षे पुनः । ३ फ-शुद्धिः । ४ अ-क-ख-ड-क्ष-अन्यसदस्य । ५ फ-लशुना । ६ ड-चन्द्रगोपिस्तत्रकारवत् । खश-गौभिः । ७ फ-विशुद्धति । ८ श्लो. ११२.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेपगन्धापकर्षणवचनाच यो लेपो येनैवापकष्टुं शक्यते तत्र तदेवोपादेयं न भस्मवारिणी एव । तथा च हारीतः " गोधूममकुष्ठककलायवमुद्गमसूरचूर्णैः " इत्यादि पठति । एवं " श्वचाण्डालोदक्यादिस्पर्शे तु निर्लेपयोरपि भस्मना त्रिःसप्तकृत्वः परिमार्जनमिति " हारीतः । शङ्खस्तु " तैजसानां कुणपरुधिररेतोमूत्रपुरीषोपहतानामावर्तनमुल्लेखनं भस्मना वा त्रिःसप्तकृत्वः परिमार्जनमिति " । तत्र चिरकालमूत्रादिवासितानामावर्तनम् । नामाकृतिमुपमृद्येच्छातस्तदाकृतिसंपादनमावर्तनम् । उल्लेखनं तीक्ष्णेन शस्त्रेणाश्मना वा निघर्षः । स्मृत्यन्तरे त्वाकारदाहावचूलनान्याम्नातानि तत्र सुवर्णकारैर्वर्णाङ्कितस्य शुद्धिः । दाहः अग्नौ सुवर्णकारैर्निष्टापनम् । अवचूलनं दाहो नातीतानां सुवर्णकाराणां सुवर्णघनभाण्डे तेन सर्वत अहननम् । तस्मिन्स्वर्णाकारे । तथा चोक्तं " आकराः शुचयः सर्वे" इति । अब्जं शङ्खस्फोटनादि । शङ्खस्य तु सलेपस्य गौरसर्षपकल्केन गोमूत्रोदकाभ्यां क्षीरेण च । स्मृत्यन्तरे हि पठ्यते " अद्भिः शङ्खस्येति " " क्षीरोदकाभ्यां गौरसर्षपकल्केनोच्छिष्टस्नेहयुक्तस्येति " । अनुपस्कृतमखातपूरितमथवाऽत्यन्तानुपहतम् । सर्वशोपश्चायम् । तेन शुष्कामेध्यचण्डालादिस्पर्शे सत्यपि निर्लेपत्वे प्राक्प्रदर्शितैव शाखान्तरीया शुद्धिः ॥ १११ ॥

अपामग्नेश्च संयोगाद्धेमं रौप्यं च निर्बभौ ॥
तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः ॥ ११२ ॥

अर्थवादोऽयम् । " अग्निर्वै वरुणानी"त्यारभ्याकामयतेत्याद्यर्थवादेषु हेम्नः सुवर्णस्य रूप्यस्य चोत्पत्तिः श्रुता । पुरुषधर्मेणाग्निर्वरुणानीरपोऽकामयत मैथुनधर्मेण समयुज्यत तत एतद्द्वयं निर्बभौ उद्भूतं अतस्तयोः स्वयोन्या स्वेनोत्पत्तिकारणेनाग्निना अत्यन्तोपघात उदकेन च । " सयोन्येति " पाठे समानोत्पत्तिना भस्मनेति व्याख्येयम् । तद्दर्शनाच मृदोऽपि कदाचिदनुज्ञायन्ते । निर्णेकः शोधनं गुणवत्तरः ॥ ११२ ॥

ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च ॥
शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ॥ ११३ ॥

यथार्हं यस्य यदर्हति येन यस्य मलमपकष्टुं शक्यत इत्यर्थः । अत एव स्मृत्यन्तरोक्तमपि लभ्यते " वाहनीयास्त्रपुसीसकविकारा गोमयतुषैरिति " । यथा

---

१ फ-कसाय । २ फ-निष्टपनम् । ३ अ-क-ख-ड-क्ष-णानीनाम् । ४ अ-क-ख-ड-क्ष-अनुषजायन्ते । ५ अ-क-ड-क्ष-रौप्यानां ।

For Private And Personal Use Only

" गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च।
शुद्ध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च॥ " इति।

अत एव क्षारभेदाश्च काञ्जिकदाडिमादियोजिताः सिद्धा भवन्ति ॥ ११३ ॥

द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम् ॥
प्रोक्षणं संहतानां च दारवाणां च तक्षणम् ॥ ११४ ॥

क्षरणधर्माणो **द्रवाः** । घृततैलोदश्वित्प्रभृतयस्तेषां च काकाद्युच्छिष्टानां प्रस्थमात्रपरिमाणानामु**त्पवनं** कस्यचिदंशस्यापनयनं पूर्वभागस्थितस्य । **स्मृत्यन्तरे** त्वेवमाम्नातम् "कुशाग्राभ्यां पवमानः सुवर्जन" इत्यनुवाकेन । अन्ये तु प्लावनमुत्पवनमाहुरन्यत्समानजातीयं तावदासिच्यते यावत्पूर्णे भाण्डे काश्चिन्मात्रा अवस्रवन्ति । साक्षादुपघात एतत् अल्पानां त्याग एव । भाण्डोपघाते तु पात्रान्तरनयनमुच्छिष्टसंस्पर्शे तु तैलसर्पिषी उदकेऽवधाय जपेदित्युक्तम् । तत्रार्थात्पात्रोत्क्षेपः । न हि तैलस्य उदके क्षिप्तस्य पात्ररहितस्योपयोगः संभवति साहचर्यात् घृतस्यापि । एतच्चोत्पवनं द्रवाणाम् । मद्यामेध्यसंसर्गेकृतौ गन्धवर्णौ न दृश्येते तयोस्तु सत्योस्त्याग एव । सर्वं **चैतद्बौधायनस्मृतौ** परिगृहीतम्। पक्वानां तु द्रव्याणां पुनःपाकोऽपि **शङ्खेनाम्नातः** । सर्वेषां येऽप्यमेध्या मद्यादयस्तेषामप्येषैव शूद्रादीन्प्रति शुद्धिः । अत्र तूत्पवनं प्लावनमेव । यथा **वसिष्ठेनोक्तं** " भूमिष्ठानां तूदकवत् " ।

संहताः कठिनाः । शीतं घृतं आमिक्षागुडपर्पटकादयस्तेषां यः प्रदेश उपहतस्तमपनीय शेषस्य शुद्धिः । उक्तंच **शङ्खेन** " शुष्काणामुद्धृतदोषाणामिति " । अथवा समुदायादवयविनः संहताः शयनासनसरणादयः सजातीयविजातीयद्रव्यसंघातात्मकाः । उद्धृतदोषाणामिति सर्वत्र द्रष्टव्यम् । शवशुष्कामेध्यसंसर्गेषु यः प्रदेशो वृत्तसंसर्गस्तस्य प्रक्षालनमवशिष्टस्य प्रोक्षणम् ।

दारवाणां केवलदारुकृतानां बृसीफलकादीनां काष्ठमयानां च शवचण्डालपुरीषसंसर्गे तक्षणम् । अन्ये तु पुरीषसंसर्ग एवेच्छन्ति । तक्षणेन गन्धलेपाद्यपनेतव्यम् । अवशिष्टस्य मृद्वारिभ्यां प्रक्षालनं प्रोक्षणं वा । श्वाद्युपघाते तु प्रक्षालनमेव पुरीषवत्खट्वाशय्याद्यादीनां च दारुचर्मसूत्रघटितानां संहतत्वेन शुद्धिः ॥ ११४ ॥

मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ॥
चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥ ११५ ॥

---

१ क–स्पर्शे । २ क–बृशी ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्लोकद्वयं श्रुतिसिद्धार्थानुवादेन दृष्टान्ततया नेयम् । ग्रहचमसादीनां यज्ञपात्राणां प्रयोगान्तरे प्रयुज्यमानानां पूर्वप्रयोगलग्नाज्यहविर्लेपादिसंसर्गपरिहारार्थमुष्णेन वारिणा लेपाद्यपकर्षः कर्तव्यः । ततो यथाश्रुति क्वचित्पाणिना क्वचिद्दर्भैः क्वचिद्दशापवित्रेण संमार्गः कर्तव्यः । इयं प्रायोगिकी शुद्धिः । उच्छिष्टाद्युपघाते तु लौकिकपात्रवत् । " न सोमेनोच्छिष्टा भवन्तीति " विशेषश्रुतेरन्यत्रोपघाते सामान्यशुद्धिरस्तीति ज्ञायते । ग्रहचमसस्फ्या याज्ञिकेभ्य आकारविशेषेणावसातव्याः ॥ ११५ ॥

चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा ॥
स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च ॥ ११६ ॥
*** अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ॥**
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥ ११७ ॥

बहुत्वं धान्यानां द्रोणाधिक्ये स्मर्यते । अन्ये तु पुरुषापेक्षया देशकालापेक्षया च वर्णयन्ति । कस्यचिद्दुर्गतस्य कुडवार्धमपि बहु भवति । तथा कस्यांचिदवस्थायां वर्धितकोशो बहुतामेति । यथाह **बौधायनः** (धर्म सू. १।५।४७)

"देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां तु ज्ञात्वा शुद्धिं प्रयोजयेत् ॥"

एवं वासःस्वपि केचिदाहुः " त्रिभ्य ऊर्ध्वं बहूनि " । यद्यपि त्रिप्रभृतिषु बहुत्वं **यतोऽल्पानामिति** बहुवचनं श्रुतमतस्त्रिपर्यन्तान्यल्पानि । **अद्भिरित्युपलक्षणम्** । तेन यस्य वाससो येनैव दोषसंसर्गो व्यपैति तदपि द्रष्टव्यम् । तच्च प्राग्दर्शितम् । प्रोक्षणसंबन्धोऽव्यहणनियमार्थः । उदकेनैव प्रोक्षणं कर्तव्यम् । एतेनैव च भेदेन द्विःपाठः । एतच्च महत्युपघाते शवपुरीषचाण्डालादिस्पर्शे अन्यथा त्वल्पानामिति प्रोक्षणमेव । यदि पर्यन्तस्यतोऽपि लेपादि वाससो नापैति तदा तन्मात्रच्छेदनम् "उत्सर्गो वेति" **गौतमेनोक्तम्** ॥ १६ ॥ ११७ ॥

चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च ॥
शाकमूलफलानां तु धान्यवच्छुद्धिरिष्यते ॥ ११८ ॥ ८/

चर्मणां वर्ध्राणां स्पृश्यानां न तु श्वशृगालादिसमन्वितानां स्वभावाशुचीनां उपानत्कवचादीनामपि तद्विकाराणामेष एव विधिः । अत्र हि प्रकरणे प्रकृत्याऽपि विकृति-

---

* [त्र्यहकृतशौचानां तु वायसी शुद्धिरिष्यते ।
पर्युक्षणाद्धूपनाद्वा मलिनामतिधावनात् ॥ १ ॥

१ अ-क-ख-ड-क्ष–पर्यवस्यतोऽपि । २ अ. १ सू. ३३ । ३ अ-क-ख-ड-क्ष–त्र्यहाणाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्यते । विकृत्याऽपि प्रकृतिः । तथा च दारवाणामित्यत्र दारूणामप्येषैव शुद्धिः । वसिष्ठेन हि दारवाणां शुद्धिमभिधाय "दार्वस्थिभूम्यानि"इत्युक्तम् । यदि च विकृत्या प्रकृतिर्न गृह्येत तदनुक्तशुद्धिविधानेन दारूणां कथमतिदेशः क्रियेत । प्रकृतेस्तु विकारग्रहणं तदवुध्यनपायाद्युक्तमेव । वैदलानि वार्क्षत्वगादीनि । स्मृत्यन्तरे पक्षपवित्र-चर्मचामरतृणवेत्रवालवल्कलानां चैत्यादिनैषैव शुद्धिर्विहिता । तत्र मयूरादिपक्षास्तन्नि-र्वृत्ताश्च छत्रपिच्छिकादयो गृह्यन्ते । पवित्रं दर्भस्तेषां दर्भमयानां च वाससाम् । तृणशब्देन तालपत्राण्युच्यन्ते । "तृणराजं विदुस्तालम्" इति स्मर्यते । तत्रैकदेशात्समुदाय-प्रतिपत्तिर्दत्तशब्दाद्देवदत्ते । वाला गवाश्वाजानां न मनुष्याणां तेषां च्युतानामस्पृश्यत्वात् । सर्वा चेयं द्रव्यान्तरोपघाते शुद्धिरुच्यते न स्वभावोपहतौ । चेलधान्ययोरेकरूपत्वा-च्छुद्धेः शाकादेर्धान्यवद्वचनम् । यथा धान्यानामवघातादिसंस्कारान्तररहितानां धान्यावस्थानामेव प्रोक्षणप्रक्षालने शुद्धिहेतू तद्वच्छाकादीनामपि । तेनापक्वानामयं विधिः । पक्वानां तु सत्यपि शाकादिशब्दवाच्यत्वे शुद्ध्यन्तरमन्वेषणीयम् । यथोक्तम् "सुवर्ण-वारिणा पावकज्वालया च" इत्यादि । आकरादाहृतानां तु शाकादीनामुदश्विद्दधिक्षीरादीनां प्रोक्षणपर्यग्निकरणे विशेषतो हारीतेनाम्नाते । तथा शिम्बीधान्यानामुद्धर्षणदलनपेषणादि । एतच्च पादस्पर्शे शङ्कानिवृत्त्यर्थम् । तदुक्तम् "आकराः शुचयः सर्वे" इति ॥ ११८ ॥

कौशेयाविकयोरूषैः कुतपानामरिष्टकैः ॥
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः ॥ ११९ ॥

ऊषाः काञ्चनमृदः । अरिष्टकादयः प्रसिद्धाः । स्नेहादिलेपे सत्युदके न तेषां द्रव्याणां चूर्णसंमिश्रेण न लेपनोच्छेदनादि कर्तव्यम् । कौशेयः पट्टविशेषः । एवमंशुपट्टमाविकमूर्णा-मयं तस्य हारीतेनोक्तं "आदित्येनोर्णामयानां" तन्नित्यं प्रध्रियमाणानामनेकपुरुषस्य शरीर-संस्पर्शे द्रष्टव्यम् । नान्यस्मिन्नुपघाते वाससत्वादेः तेषां केवलयोः प्रोक्षणप्रक्षालनयोः प्राप्तयोः स्नेहादिलेपापकर्षणे अतिदिश्येते । क्षौमग्रहणं शाणादीनामपि प्रदर्शनार्थम् ॥ ११९ ॥

क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च ॥
शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा ॥ १२० ॥

अस्थिशृङ्गदन्ताः स्पृश्यानां गोमेषहस्त्यादीनां न श्वगर्दभादीनाम् । गोमूत्रोदकयो-र्विकल्पः । गौरसर्षपकल्कस्तु समुच्चीयते ॥ १२० ॥

---

१ धर्म सू. अ. ३ सू. ५२ । २ फ—वा । ३ फ—नैतेषां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**प्रोक्षणात्तृणकाष्ठं च पलालं चैव शुध्यति ॥
मार्जनोपाञ्जनैर्वेश्म पुनः पाकेन मृन्मयम् ॥ १२१ ॥**

व्रीह्यादिकाण्डं स्रस्तरादिप्रयोजनं **पलालम्** । तृणानि कुशशाद्वलादीनि । ननु च दारवाणामित्यत्र विकृतिः प्रकृतेर्ग्राहिकेत्युक्तं किमर्थं काष्ठग्रहणम् । नियमार्थम् । प्रोक्षणमेव । तेन यावन्न महानुपघातस्तावद्दारूणि तक्ष्यन्ते । चण्डालादिस्पर्शे तु " सोमसूर्यांशुमारुतैः " इत्यनेनैव शुद्धिः । तद्विकारणां तु दर्व्यादीनां प्रक्षालनतक्षणे स्वल्पोपघाते ऽल्पाद्युपयोगिनां कर्तव्ये । **मार्जनं** शोधनं गृहस्य धूमांधकाराद्यपनयनम् । **उपाञ्जनं** सुधागोमयादिभिर्भूमिविलेपनम् । एतच्च शवचण्डालोदक्यादिभिर्भित्तिसंस्पर्शे व्यापिनि द्रष्टव्यम् । अभ्यासौ तु तावन्मात्रस्यैव । उर्ध्वं शवोपघाते तु भित्तितक्षणं सूर्यरश्म्यनुप्रवेशोऽग्निज्वालाभिमर्शनम् । क्वचित्पुनर्नवीकरणमित्यादिपठितं संमार्जनम् । मृन्मयानां पुनःपाकः । पर्यग्निकरणमुच्छिष्टपुरुषसंस्पर्शादौ द्रष्टव्यम् । पुनःपाकस्तु मद्यभाण्डादिसंस्पर्शे द्रष्टव्यः । साक्षात्स्पर्शे तु त्याग एव । **यथोक्तम्**[1] (वासिष्ठे अ. ३–५९,) "मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः।संस्पृष्टं नैव शुध्येत पुनः पाकेन मृन्मयम्"॥इति॥ १२१॥

**संमार्जनोपाञ्जनेन सेकेनोल्लेखनेन च ॥
गवां च परिवासेन भूमिः शुद्ध्यति पञ्चभिः ॥ १२२ ॥**

सेको गोमूत्रणोदकेन वा । क्षीरेणापि क्वचिदुक्तः । **उल्लेखनं** शस्त्रादिना लेखाकरणं आवापनं च । " आवापनं च भूमेरिति " **गौतमनिर्देशादेव** (अ. १ सू. ३१) । **पञ्चभिरिति** पुनर्वचनमभिघातापेक्षया व्यस्तसमस्तप्रयोगदर्शनार्थम् । तत्र **संमार्जनशून्यं** शोधन**मुपाञ्जनं** त्वव[2]करर हितायाः केवलमपि । मूत्रपूरीषादिलेपे उल्लेखनसंमार्जने । सेको नदीपुलिनवनादिषु । **गवां परिवासः** एकाहमात्रं गोष्ठीकरणम् । एतच्च श्मशानभुवः सर्वं कर्तव्यम् । आवपनं तु यत्र पूर्वमस्थिकपालिकाद्यस्ति तदुद्धृत्य मृदामन्यासां प्रक्षेपो यत्र चान्तर्हितमेवमादिकालान्तरेणाशङ्क्यमानसद्भावमित्यादिवत्तत्रापि ॥ १२२ ॥

**पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतम् ॥
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति ॥ १२४ ॥**

---

१ अयं हि श्लोकः कुल्लकादिभिः मनुवचनत्वेन व्याख्यातः । **मेधातिथिना** तु स्मृत्यन्तरोक्त इति संगृहीतः । गोविंदराजेन वसिष्ठस्मृतिस्थ इति कृत्वोद्धृतः । २–**फ**–आकारहितायाः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्र नभिपदालिङ्गादन्नविषयताऽस्य श्लोकस्य प्रतीयते । पक्षिभिस्तु शुकादिभिरन्यैश्च भक्ष्यैर्यदन्नमुच्छिष्टीकृतम् । न तु काककङ्कगृध्रादिभिस्तत्र हि महत्प्रायश्चित्तं "पतत्रिणाऽवलीढमिति" तदेतदुक्तम् । प्रकृतशुद्धे भोजनप्रायश्चित्तम् । तथा च तत्तुल्यप्रायश्चित्तस्य गवाघ्रातस्य नैव शुद्धिः । भवेदयं न्यायः । तथापि स्मृत्यन्तरसमाचारावन्वेष्यौ । एवं हि शिष्टा दशशरावाधिकं काकादिकृन्यादोपहतं तावन्मात्रमपनीयावशिष्टं शोधयित्वोपयुञ्जते अर्वाक्तस्त्यजन्ति । अत्राप्यवस्थाविशेषोऽपेक्ष्यः । स्मृत्यन्तरे तु कृष्णशकुनिनोपहतमपि निषिद्धम् । **अवधूतं** मुखश्वासेनावकम्पितम् । वाससो वा यस्योपरि रजोपनयनार्थमुत्क्षेपणादि क्रियते आकाशदेशात् । **अवक्षुतं** यस्योपरि क्षुतं तदेव । **केशा** मनुष्याणां च्युताः । **कीटाः** क्षुद्रजन्तवः कृमयः । ते केचिद्गृहस्वेदान्नाद्यनास्ते जीवन्तो मक्षिकावन्नोपघ्नन्ति मृतानां तेषामन्नसंस्पर्शे शुद्धिरियम् । ये त्वमेध्यसंसर्गजास्ते विड्भोजिनश्च तेषां जीवतामपि । गौतमीयम् (अ.१७सू.८१९) "नित्यमभोज्यं केशकीटावपन्नमिति" । बहुव्यासौ सर्वत्र त्यागः । महाराशावशुचिकीटसंसर्गेऽपि स्वल्पे तन्मात्रापनयनमवशिष्टस्य शुद्धिः । काञ्चनरजतदर्भमणीनां वारिसहितानां स्पर्शः स्मृत्यन्तरे केशाद्यवपन्ने विहितः । अवज्वलनमपि क्वचित् । ये तु भूमेरिमां शुद्धिमाहुस्तैः स्मृत्यन्तरसमाचारो वाक्यार्थश्च त्यक्तः ॥ १२४ ॥

यावन्नापैत्यमेध्याक्ताद्गन्धो लेपश्च तत्कृतः ॥
तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु ॥ १२५ ॥

अमेध्यमस्पृश्यं तच्च यद्यस्य यदभोज्यं तस्य तदशुद्धिहेतुर्यथा ब्राह्मणस्य सुरामद्ये न शूद्रस्य तदयुक्तम् । प्राग्घोमाद्धविष्यभोज्यानि न च तान्यस्पृश्यानि । सुरामद्यादीनि तु स्पर्शेऽपि प्रतिषिद्धानि ब्राह्मणस्य । तस्माद्यस्यैव स्पर्शः प्रतिषिद्धः स एव संसर्गेणाशुचित्वमापादयति । अतो नायं नियमो यदभोज्यं तदस्पृश्यं यत्त्वस्पृश्यं तदभोज्यमिति । **आक्तं** लिप्तं उपदिग्धं **तावदि**त्यावृत्तिविधानं मृद्वारि सति प्रयोजने प्रयोजनं च गन्धलेपापनयनं शुष्कामेध्यसंसर्गे चिरवृत्तसंसर्गे वा कालेनापि तयोर्गन्धलेपयोः सकृदेव मृद्वारिभ्यां मार्जनम् ।

ननु मृद्वार्यादीनां शुद्ध्यर्थमादानं दृष्टार्थं तत्रैव शुद्ध्यत्यपगते लेप इति किमनेन यावन्नापैतीति उच्यते । **एका लिङ्गे** इत्यादौ संख्यातिक्रमार्थम् । उक्तया संख्यया

---

१ अ-क-ख-ड-अशुचिवांकीटसंसर्गेऽपि । २ अ-क-ख-ड-क्ष-अवपन्नेनेवहितः । ३ श्लो.१३५ पृ.४४८ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशक्ये पुरीषादिलेपापनये अनादृत्याश्रुतसंख्याऽधिकाऽप्याश्रयणीया । संख्यावचनं तु ततो न्यूनतयाऽप्यपनीते लेपे संख्या पूरयितव्येत्येवमर्थम् । मृद्वारिग्रहणं शुद्धिसाधनोपलक्षणार्थं वर्णयन्ति । अतश्च यद्यप्यशुद्धिहेतुर्भूतं वारिणा क्षालितमपि क्षारादिना संमार्ष्टव्यमन्यथा न दृश्येत । अपैति अपगच्छति निवर्तत इति यावत् । तत्कृतस्तेनामेध्येन कृतः । अतश्च कस्तूरिकादि वस्त्रगंधो नापैति नैव दुष्येत । कुंकुमाद्यनुलिप्तस्य यः प्रदेशोऽमेध्येन संसृज्येत्तत्र कुंकुमाद्यप्यपमार्जितव्यम् । अमेध्यसंसृष्टं हि तत् । तत्रापि गन्धलेपग्रहणात् । यदि गात्ररूढः कुंकुमवर्णो निघृष्यमाणो न शक्येतापक्रष्टुं स्यादेव शुद्धिः ॥ १२५ ॥

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् ॥
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥ १२६ ॥

पवित्राणि शुद्धानि । देवग्रहणं स्तुतिः । ब्राह्मणग्रहणमपि समाचारात्तत्सर्ववर्णार्थम् । **अदृष्टं** यदन्तरक्षप्रदेशस्थं द्रव्यमदुष्टश्वकाकादिसंसर्गं न च सद्भावमात्रेण तदुपघाताशङ्का निष्प्रमाणिका कर्तव्या । एवं महानसादौ सूदादिभिरकृतशौचैर्व्यवहरद्भिः पाक्यं द्रव्यमदृष्टं परिभोक्तुं न दुष्यति न पुनरियमाशङ्का कर्तव्या उत्तरकाले तत्प्रागविज्ञातोपघाते न दोषः । तथाहि "अमत्यैतानि च" इत्यादि विरुध्येत । एवं तावद्यत्र दोषसंबन्धो न केनचित्प्रमाणेनावगम्येत तच्छुद्धम् । यत्र पुनरसत्यपि निश्चायके प्रमाणे कुतर्केण संभाव्यते तत्राद्भिर्निर्णेक्तव्यम् । यथा समानदेशस्थालीपीठरादिश्वकाकादिभिरुपहन्यमानं दृष्टम् । अन्यददृष्टमप्यद्भिर्निर्णेक्तव्यम् । तथैवंविधमेव **वाचा प्रशंसनीयम्** । शुद्धमेतदस्त्विति शिष्टा वाचयितव्याः । ब्राह्मणवचनाच्छुद्धिर्भवतीत्याहुः । प्रशस्यत इति लड्यं विधौ द्रष्टव्यः । ये त्वाहुर्दृष्टोपघातं यत्तस्य व्यवहर्त्रा साक्षाच्छुद्धौ क्रियमाणायामदृष्टायां शिष्टाश्चेदाहुः कृतमस्य शौचमिति तत्र प्रत्येतव्यमिति वाक्प्रशस्तस्यार्थस्तदयुक्तम् । आप्तवचनस्य सर्वत्रैवाप्रामाण्यस्यानङ्गीकृतत्वात्पौनरुक्त्यप्रसङ्गः । अन्ये त्वद्भिर्निर्णिक्तमिति दृष्टान्ततया व्याख्यानयन्ति । अदृष्टवाक्प्रशस्ते विधीयेते । यथाऽद्भिर्निर्णिक्तं शुद्धमेवंमदृष्टं वाक्प्रशस्तं विधीयते । ननु च यद्यदृष्टदोषं प्रत्यक्षानुमानागमैः शुद्धं तत्कथं संवत्सरस्यैकमपीति भक्ष्यविषयं तत्स्पृश्यविषयाशुद्धिरियं गुरुलघुतया वा आपदनापद्भेदेन वा व्यवस्था ॥ १२६ ॥

आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् ॥
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥ १२७ ॥

---

१ अ-क-ख-ड-क्ष-हेतुभूतवारिणा । २ फ-क्षीरादिना ३ फ-न पश्येत् । ४ अ-क-ख-ड-क्ष-प्राणाप्यस्य । ५ फ-शुद्धमेव न दृष्टं ।

For Private And Personal Use Only

भूमिग्रहणमुपलक्षणार्थम् । तेन प्रणालिकागता अपि शुचय एव । स्वभावशुचयो ह्यापो भूमिगता आकाशगताश्च । किंतु भूमेरमेध्यद्रव्यसंसर्गात्किंचिदशुचित्वं तत्र गतानां संर्गतोऽशुचित्वप्राप्तौ यावतीनां च शुद्धिस्तदर्थमिदं **वैतृष्ण्यं यासु गोर्भवेदिति** । वैतृष्ण्यं पिपासाविच्छेदः परिमाणोपलक्षणार्थं चैतत् । तत्र चिरन्तनैर्व्याख्यातं लिङ्गदर्शनेन "यथा वै गोः सास्नाम्भसि प्लाव्येति" । यत्र गोः सास्नादि मज्जति तृष्णा च विच्छिद्यते तावत्यः । यास्तु मेध्यभूमिगतास्ताः स्वल्पा अपि शुद्धाः । कथं पुनरमेध्यव्याप्तिरवसेया **गन्धवर्णरसान्विताः** । अमेध्येनेति तृतीयान्तं षष्ठ्या विपरिणम्यते । अमेध्यसम्बन्धिभिर्गन्धादिभिर्यद्यन्विताः संयुक्ता भवन्ति । ततो व्याप्ता उच्यन्ते । एवं च कृत्वा पानीयं तडागादिषु यद्येकस्मिन्प्रदेशेऽमेध्यं दृश्यते प्रदेशान्तरे गन्धादिशून्यं शुद्ध्येदेव ॥ १२७ ॥

नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम् ॥
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः ॥ १२८ ॥

कारवः शिल्पिनः सूदरञ्जकतन्तुवायादयस्तेषां **हस्तो नित्यं शुद्धः** । अतश्च जननमरणाशौचयोस्तत्स्पृश्यताऽस्ति न तु पुरीषादिलेपे दृश्यमाने शुद्धता विज्ञेया । यदुक्तं "सद्यः शौचाः प्रकीर्तिताः" इति तदेवेदम् । अत्र चापौनरुक्त्यं मनुशास्त्रेऽस्यानुपदेशात् । विषयान्तरमप्यस्ति । "अनाचान्तास्तन्तुवाया वयन्ति" तन्तूनां स्तम्भविश्लेषणार्थं यत्पिष्टमण्डादि दीयते तद्भाजनं च यत्र तत्र भूमौ निधीयते तावती याऽशुद्धिः साऽनेन निवर्त्यते । न तु स्वभावाशुचीनां स्पर्शस्तैस्तस्य शुद्धता विज्ञेया न हि तेषां तत्कारुकर्मविहितम् । एवं चैषैवोपपत्तिरिति म्लेच्छसृष्टानामपि नाशुचित्वम् । तत्र शङ्खवचनात्प्रोक्षणाभ्युक्षणे । तत्र हि पठितम् "कारुहस्तः शुचिस्तथाऽऽकरद्रव्याणीति" । **पण्यं** व्यवहाराय यद्द्रव्यं रूपकैर्विक्रीयतेऽन्येन वा द्रव्येण मीयते तत्पण्यं तच्च **प्रसारित**मापणभूमौ शुचि अनेकक्रेतृसंस्पर्शाद्भूमौ च लेपनादिरहितायां स्थापनाद्युपघातस्तेन नाशुचि । पुनःपुनर्दृश्यमानोपघातम् । प्रसारितग्रहणाद्गृहावस्थितस्य बुद्धौ स्थितेऽपि पण्येन शुद्धिः । सिद्धान्नानां तु सक्तवपूपादीनां सत्यपि शुचित्वेऽभक्ष्यता **शङ्खवचना**देव "आपणीयान्यभक्ष्याणीति" । **ब्रह्मचारिगत**मस्मादेव साहचर्यात्पूर्वोक्ता शुद्धिरीदृश उपघाते विज्ञायते । भिक्षमाणस्य रथ्याक्रमणमशुचिदर्शनं क्षवथुनिष्ठीवनमनेकहस्तसंपातो भिक्षाया इत्याद्युपघातः संभाव्यते ॥ १२९ ॥

---

१ अ-क-ख-ड-क्ष-स्वसर्गतो २ फ-वाप्ति । अ-क-ख-ड-क्ष-रथ्याक्रमणस्य ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने ॥
प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥ १२९ ॥

मेध्यतयाऽशुचित्वमाह । सर्वस्त्रीणामास्यं शुचि परिचुंबनादौ "स्त्रियश्च रतिसंसर्गे" इति स्मृत्यन्तरम् । रतिसंबन्धिनीष्वेव न मातृभगिन्यादिषु । अत्र उच्छिष्टप्रतिषेधोऽयं न मन्तव्यो योषितः । सत्यपि रतिसंबन्धित्वे "नाश्नीयाद्भार्यया सार्धम्" इतिवचनान्न भुज्येतेति सिद्धं चतुर्थाध्याये । नित्यग्रहणान्न संयोगवेलायामेव किंतर्हि तदर्थायां मन्त्रप्रवृत्तौ ।

शकुनिः फलपातने पक्षिमात्रवचनेऽपि शकुनिशब्दः काककङ्कादीनां विट्भुजा नेष्यते । समाचारात्पातनग्रहणाद्वृक्षस्थस्य फलस्यायं विधिः । **प्रस्रवे** दुह्यमानाया गोर्वत्सः पयः प्रक्षरणार्थं स्तनेषु संश्लिष्यते । अथवोच्यते "गावो मेध्या मुखादृते" इति वचनादशुचित्वे प्राप्ते तन्निवृत्त्यर्थं वचनमतस्तदीयास्यसंस्पर्शस्य । न तु श्वा शुचिः । मृगं तु यदाऽऽखेटकादौ गृह्णाति हन्तुं तदा शुचिः ॥ १२९ ॥

*** श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ॥**
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः ॥ १३० ॥

पूर्वं "श्वा मृगग्रहण" इति मृगवधे श्वा शुचिरित्येतावदेवं विवक्षितं इह तु तेन गृहीतोऽन्यैर्वा दण्डादिघातेनेति विशेषः ।

उत्तरार्धश्लोकार्थो विधीयते । **क्रव्याद्भिः** श्येनजम्बूकप्रभृतिभिः । **चण्डालाद्यैः** आदिग्रहणं श्वापदादीनामबाधाय । **दस्यवो** निषादव्याधादयः प्राणिवधजीविनः ॥ १३० ॥

ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः ॥
यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥ १३१ ॥

खशब्दोऽयमिन्द्रियवचनः । तेन कर्मेन्द्रियाणि पादयोर्ग्रहणे **यान्यधस्तान्यमेध्यानि** । बहुवचनं एतदयुक्तं ऊर्ध्वं नाभेरित्यनेन विरोधात् । तत्र नाभेरूर्ध्वं मेध्यतरत्वमुक्तम् । प्रकर्षश्च । यद्यधस्तान्मेध्यत्वं भवति तत उपपद्यते । न हि भवति शुक्लः कृष्णतर इति । न चायमिन्द्रियवचनः । किंतर्हि छिद्रार्थोऽयम् । तदुक्तं "सप्तशीर्षण्याः प्राणाः" इति ।

---

१ अ-क-ख-ढ-क्ष-तदर्थायामेव प्रवृत्तौ । २ अ-क-ख-ड-क्ष यथा । ३ अ-क-ख-अत्र

* शुचिरग्निः शुचिर्वायुः प्रवृत्तो हि बहिश्चरः ।
जलं शुचि विविक्तस्थं पन्था संचरणे शुचिः ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधो द्वे छिद्रे स्त्रीपुंसोपस्थभेदाद्बहुवचनम् । एवं सत्यन्तरास्पर्शेऽपि हस्तादेः शुद्धता । यदि तद्गतश्लेष्मसंबन्धो न भवति ॥ १३१ ॥

मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः ॥
रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥ १३२ ॥

तथा दूषिकादुष्टेन पुनश्चासंस्पर्शनाय स्वेदजानाम् । **गोग्रहणमनैडकस्य** । अश्वग्रहणं हस्त्यश्वतराणाम् । **सूर्यग्रहणं** ज्योतिषाम् । **विप्रुष** उदबिन्दवः स्पर्शमात्रानुभवेन या अदृश्यमानरूपविशेषाः। **छाया** चण्डालादीनाम् । भूश्चण्डालादिस्पृष्टा पद्भ्यामाक्रम्यमाणा शुद्धा । अन्यस्यास्तु संमार्जनादि विहितम् । एते मक्षिकादयः पुरीषादि स्पृशन्तो न दूषयन्ति॥ " अजाश्वं मुखतो मेध्यं गावो मेध्या मुखादृते । मार्जारनकुलौ स्पृश्यौ शुभाश्च मृगपक्षिणः॥" इति **स्मृत्यन्तरे** ॥ १३२ ॥

विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत् ॥
दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि ॥ १३३ ॥

" देहाच्चैव मलाः च्युताः " इत्यशुद्धतायामिदमुच्यते । विण्मूत्रे उत्सृज्येते येन स **विण्मूत्रोत्सर्गः** पाय्वादिस्तस्य शुद्ध्यर्थं **मृद्वार्यादेयमर्थवत्** अनादृत्य संख्यां यावतीभिर्गन्धलेपावपसर्पतस्तावतीरपो मृदश्च गृह्णीयात् ।

देहे भवा **दैहिका** मला अशुचित्वापादकाः तदर्थास्वपि **शुद्धिषु** मृद्वारिणी उभे अप्यर्थवती आदेये । **स्मृत्यन्तरे** पठ्यते

" आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये । उत्तरेषु तु षट्स्वद्भिः केवलाभिस्तु शुध्यति "॥ विशुद्धेषु श्लेष्मादिषु स्मृत्यन्तरे पठितम् । स्नेहविस्रंसनं नासिक्यं श्लेष्माऽऽचक्षते तेषामेव सत्यप्युत्तरषट्कतया न मृद आदातव्या एव ॥ १३३ ॥

वसाशुक्रमसृङ्मज्जामूत्रविड्घ्राणकर्णविट् ॥
श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥ १३४ ॥

यान्येतानि द्वादशमलानि दर्शितानि । नृग्रहणं पञ्चनखानां प्रदर्शनार्थम् । श्वसृगालादीनां त्वस्पृश्यत्वादेव सिद्धम् । विण्मूत्रे तु सर्वस्याजाविकगवाश्वेभ्योऽन्यत्र ॥ १३४ ॥

एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ॥
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥ १३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विण्मूत्रोत्सर्गानन्तरं मेढ्रस्य शुद्धयर्थमेका मृद्दातव्या वामेन । स्मृत्यन्तरे शुद्धि-विधानाद्यावती तस्मिन्हस्ते याति तावती सोदका ग्रहीतव्या । अर्हं तु व्रणे । अर्थवादिति वचनेनोक्तमेव परिमाणम् । केचित् पठन्ति

"प्रथमा प्रसृतिर्ज्ञेया द्वितीया तु तदर्धिका । तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणे ।।"
एतच्च परिमाणं पायावेव । अन्यत्र त्वर्थवदित्येकोत्सर्गेऽपीयत्येव संख्या । आवृत्तिविधानं चेदं मृदां मेदे गवादिवत् । तथा चात्रोच्यते " वल्मीकाद्दूरतराद्ध्वस्थानाच्चान्येत्यादि " । एवमिह सिता कृष्णा लोहितेत्याद्यपि नादरणीयम् । अभीप्सता इच्छतेति ।। १३५ ।।

एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।।
त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम् ।। १३६ ।।

शौचविधिराश्रमविशेषेण । अनाश्रमिणस्तु मृद्वार्थदेयमर्थवदित्येतदेव शूद्रस्यापि गार्हस्थ्येऽधिकारोऽस्त्येवेत्येषा संख्या ।। १३६ ।।

कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत् ।।
वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा ।। १३७ ।।

मूत्रोत्सर्गदेशान्मूत्रादिसंबन्धात् **कृत्वा** शोधयित्वा यथोक्तेन विधिना **आचान्तः खानि** इन्द्रियाणि **उपस्पृशेत्** । **वेदमध्येष्यमाणश्च** द्वितीये स्वाध्यायविधौ प्राथमिकार्थत्वा-[1]त्करोतेः कृत्वा उत्सृज्येति प्रतीयते । उन्मृज्य मूत्रं पुरीषं च पायूपस्थं क्षालयित्वा आचामेद्वेदमध्येष्यमाणश्च स्वाध्यायविधेर्धर्मतयोक्तमध्येष्यमाणस्त्वाचान्त इति । इदं त्वध्याप-यतोऽन्यतो वा अन्यथा वेदमुदाहरन्त उच्यन्ते । लौकिकानि क्रियान्तराणि कृत्वा नाना-चान्तो वेदाक्षराण्युच्चारयेत् । **अन्नमश्नंश्च** । ।। १३७ ।।

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ।।
शारीरं शौचमिच्छन्हि स्त्री शूद्रस्तु सकृत्सकृत् ।। १३८ ।।

अयमनुवादः स्त्रीशूद्रार्थः । उक्तमप्येतत्स्त्रीशूद्रार्थमुच्यते । केचिद्व्याचक्षते शूद्रः स्पृष्टाभिरद्भिरिति स्पर्शमात्रमपां शूद्रेण कर्तव्यं अतः परिमार्जनं श्रोत्रादिस्पर्शनं वा प्राप्तं सच्छूद्रविषयतया विधीयते । स्त्रीणां तु "हृद्गाभिः पूयते विप्रः" इति जातिनिर्देशात्पुंवत्प्राप्ता-विदमुच्यते । शारीरं शौचमन्विच्छन्निति वचनसामर्थ्याद्वेदाध्ययनभोजनयोः शुद्धः प्रवर्तेत तदा नावश्यं त्रिरावृत्तिः स्यात् । नापि प्रमार्जनम् । किंतर्हि आचमनं यावतीनां तावती-नामपामिन्द्रियस्पर्शनं च । नान्यो ब्रह्मचारिधर्मोक्त आचमनाविधिः ।। १३८ ।।

---

१ अ-क-ख-ड-क्ष-मतनिकार्थत्वात् ।

५७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम् ॥
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनम् ॥ १३९ ॥

सामान्योक्तः सच्छूद्राणां प्रसंगेनायं धर्म उच्यते । **न्यायवर्तिनो** द्विजशुश्रूषवो महायज्ञानुष्ठायिनश्च तैर्वपनं मुण्डनं **मासिकं** कर्तव्यम् । तृतीयार्थे षष्ठी । अथवा ब्राह्मणाश्रितास्तत्परतन्त्रा ब्राह्मणैः कार्यम् । अनेकार्थत्वात्करोतेरुपदेष्टव्यमिति प्रतिपत्तिः। **वैश्यवत् शौचकल्प**विशेषाः । सूतकादावाचमने च । **द्विजोच्छिष्टं च भोजनं** एतत्प्राग्व्याख्यातम् ॥ १३९ ॥

* नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं न यन्ति याः ॥
न श्मश्रूणि गतान्यास्यं न दन्तान्तरधिष्ठितम् ॥ १४० ॥

निष्ठीव्योक्तानृतानि चेति निष्ठीवनआचमनविधानादनाचान्तस्याशुद्धिता ज्ञापिता । विप्रुषामपि मुखान्निष्क्रमणं निष्ठीवनमेव । अतो विप्रुषां श्लेष्मनिरसनरूपानिष्ठीवनादाचमनप्राप्ताविदमाह । मुखे भवा मुखनिर्गता वा **मुख्याः**। विप्रुष इत्यनुच्छिष्टं कुर्वन्ति न चेदङ्गे निपतन्तीति । ननु च "विप्रुषः शुद्धा इत्युक्तं" "मुखजा विप्रुष" इत्यत्र उक्तं । दैहिकमलव्यतिरेकेणान्यत्र । इदमेव ज्ञापकं न सर्वो विषयः संदर्शितः । **श्मश्रूणि** दाडिकालोमानि । **आस्यगतानि** प्रविष्टानि । नोच्छिष्टं कुर्वन्तीत्यनुषङ्गः । अतश्चान्यत्पूगफलादि जनयत्येव । तथा **दन्तान्तराधिष्ठितं** लग्नं । **स्मृत्यन्तरे** विशेषः । "दन्तश्लिष्टे तु दन्तवदन्यत्र जिह्वाविमर्शनात् प्राक्च्युतेरित्येके च्युतेष्वास्राववद्विद्यान्निगिरन्नेव तच्छुचिरिति" । च्युतेष्वजिह्वयेति विद्यात् जिह्वासंस्पर्शे शुचित्वनिषेधात् ॥ १४० ॥

× स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् ॥
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥ १४१ ॥

परानाचमयतः परेभ्य आचमनं ददत इत्यर्थः । एतदुक्तं भवति । यः परस्मा आचमनं ददाति तस्याचमयितृहस्तादधोऽङ्गुलिविवरेभ्यः पतद्भिरुदबिन्दुभिर्भूम्यभिघातोत्थैर्य-

---

१ अ-क-ख-ड-क्ष-मासि ।

* [अजाश्वं मुखतोऽमेध्यं गावोऽमेध्याश्च पृष्ठतः ॥
ब्राह्मणाः पादतो मेध्याः स्त्रियोऽमेध्याश्च सर्वतः ॥ १ ॥
गौरमेध्या मुखे प्रोक्ता अजाऽमेध्या ततः स्मृता ॥
गोः पुरीषं च मूत्रं च मेध्यमित्यब्रवीन्मनुः ॥ २ ॥]

२ फ-विप्रुषोऽङ्गे पतन्ति याः । ३ अ-क-ख-ड-क्ष -मक्षिकाविप्रुष इत्यत उक्तं । ४ ड-व्यतिकरेण। ५ ड-दाढिका । ६ गौतमीये अ. १ सू. ४१-४३ । ७ फ-रा ।

× [दन्तवद्दन्तलग्नेषु जिव्हास्पर्शेषु चेन्न तु ॥
परिच्युतेषु तत्स्थानान्निगिरन्नेव तच्छुचिः ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्याचमनस्य दातुः पादौ स्पृश्येते तदा न तैरशुचिर्भवति । भौमिकैर्यथाऽनुपहतायां भूमौ स्थिताः काश्चिदुदकमात्राः शुद्धा एवं तेऽप्युच्छिष्टा हस्तात्पतन्त उदबिन्दवः । **न तैः** स्पृष्टः **अप्रयतः** अशुचिः । परग्रहणाद्य आचामति तेन तत्संसर्गो रक्षितव्यः अन्येन च समीपस्थेन । पादग्रहणाच्च जङ्घाद्यन्तस्पर्शो दुष्ट एव ॥ १४१ ॥

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन ॥
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥ १४२ ॥

आचमनार्हेण प्रायश्चित्तेन युक्तः पुरुष उच्छिष्ट उच्यते । तद्यथा कृतमूत्राद्युत्सर्गश्चाकृतशौचाचमनादिश्च यश्चामेध्यादिसंस्पर्शदूषितो यदि पुरुषो द्रव्यहस्तो हस्तेन च गृहीतं भक्ष्यभोज्यादि द्रव्यवस्त्रादि वा येन स उच्यते **द्रव्यहस्तः** । वज्रहस्तादिवत्प्रयोगवव्यवस्था । स चेत्स्पृष्टो भवति तदा अनिधायैव तद्द्रव्यमनपनीय हस्तगृहीतद्रव्य एवाचामेत् । कथं पुनर्हस्तस्थे द्रव्य आचमनसंभवः । आ मणिबन्धनात्पाणी प्रक्षालयेदिति तत्र विधिः । केचिदाहुः । शरीरसंस्पर्शमात्रं द्रव्यस्य विवक्षितं न हस्तस्यैव एवमशुद्धावपि स्कन्धाद्यारोपितेऽपि द्रव्ये उच्छिष्टस्याशुद्धतैव तथैवाचान्ते शुद्धिः । अतो हस्तात्प्रदेशान्तरे प्रकोष्ठोत्सङ्गादिके तु द्रव्यं गृहीत्वाऽऽचामेत् । अभिप्रायो यथैव पुरुषाशौचसंबन्धादशुच्येवं तस्यैवान्नशुद्धिः । **गौतमेन** तु "द्रव्यहस्त उच्छिष्टो निधायाचामेत्" इत्युक्तम् (अ. १ सू.२७) । अत्र व्याख्यानयन्ति । सत्यपि तुल्यसहितत्वेऽत्र निधानमेवाभिप्रेतम् । इतरथा द्रव्यहस्तस्योभयोः शुद्धौ कर्तव्यायां कः प्रसंगो द्रव्यनिधानस्य अतोऽन्तरेण वचनं निधानाप्राप्तेर्वचनं निधानार्थमेव । कथं तर्हि द्रव्यस्य शुद्धिः प्रयतेन पुरुषेण ग्रहणात् । स्मृत्यन्तरविहितेन वा प्रोक्षणेन ॥

"प्रचरन्नन्नपानेषु उच्छिष्टं संस्पृशेद्यदि । आचामेद्द्रव्यमभ्युक्ष्य एवं चैव न दुष्यति॥" इति । यद्यन्तरेण वचनमत्र निधानं लभ्यते अप्यनिधायैवेति वचनमनर्थकम् । एकवाक्यत्वात् स्मृतीनामिह निश्चितेन विधानेन तथाऽप्येवं विज्ञायते । अत्र पुनर्मतभेदो गम्यते । ततश्च विकल्पः । तस्य च व्यवस्था । गरीयो द्रव्यं निधीयते अन्यदङ्गस्थं कृत्वाऽवगम्यते । यदाऽपि स्वयमन्नमश्नाति भूयिष्टं वा उच्छिष्टं स्पृशति आचमनार्हेन वा कृताचमनेन स्पृश्यते । सर्वोऽपि द्रव्यस्योच्छिष्टं संस्पर्शः ॥ १४२ ॥

*** वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् ॥**
आचामेदेव भुक्त्वाऽन्नं स्नानं मैथुनिनः स्मृतम् ॥ १४३ ॥

---

* [अनृतौ तु मृदा शौचं कार्यं मूत्रपुरीषवत् ॥
ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याचमनस्य दातुः पादौ स्पृश्येते तदा न तैरशुचिर्भवति । भौमिकैर्यथाऽनुपहतायां भूमौ स्थिताः काश्चिदुदकमात्राः शुद्धा एवं तेऽप्युच्छिष्टा हस्तात्पतन्त उदबिन्दवः । न तैः स्पृष्टः अप्रयतः अशुचिः । परग्रहणाद्य आचामति तेन तत्संसर्गो रक्षितव्यः अन्येन च समीपस्थेन । पादग्रहणाच्च जङ्घाद्यन्तस्पर्शो दुष्ट एव ॥ १४१ ॥

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन ॥
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥ १४२ ॥

आचमनार्हेण प्रायश्चित्तेन युक्तः पुरुष उच्छिष्ट उच्यते । तद्यथा कृतमूत्राद्युत्सर्गश्चाकृतशौचाचमनादिश्च यश्चामेध्यादिसंस्पर्शदूषितो यदि पुरुषो द्रव्यहस्तो हस्तेन च गृहीतं भक्ष्यभोज्यादि द्रव्यवस्त्रादि वा येन स उच्यते **द्रव्यहस्तः** । वज्रहस्तादिवत्प्रयोगव्यवस्था । स चेत्स्पृष्टो भवति तदा अनिधायैव तद्द्रव्यमनपनीय हस्तगृहीतद्रव्य एवाचामेत् । कथं पुनर्हस्तस्थे द्रव्य आचमनसंभवः । आ मणिबन्धनात्पाणी प्रक्षालयेदिति तत्र विधिः । केचिदाहुः । शरीरसंस्पर्शमात्रं द्रव्यस्य विवक्षितं न हस्तस्यैव एवमशुद्धावपि स्कन्धाद्यारोपितेऽपि द्रव्ये उच्छिष्टस्याशुद्धतैव तथैवाचान्ते शुद्धिः । अतो हस्तात्प्रदेशान्तरे प्रकोष्ठोत्सङ्गादिके तु द्रव्यं गृहीत्वाऽऽचामेत् । अभिप्रायो यथैव पुरुषाशौचसंबन्धादशुच्येवं तस्यैवाचान्तशुद्धिः । **गौतमेन** तु "द्रव्यहस्त उच्छिष्टो निधायाचामेत्" इत्युक्तम् (अ. १ सू. २७) । अत्र व्याख्यानयन्ति । सत्यपि तुल्यसहितत्वेऽत्र निधानमेवाभिप्रेतम् । इतरथा द्रव्यहस्तस्योभयोः शुद्धौ कर्तव्यायां कः प्रसंगो द्रव्यनिधानस्य अतोऽन्तरेण वचनं निधानाप्राप्तेर्वचनं निधानार्थमेव । कथं तर्हि द्रव्यस्य शुद्धिः प्रयतेन पुरुषेण ग्रहणात् । स्मृत्यन्तरविहितेन वा प्रोक्षणेन ॥

"प्रचरन्नन्नपानेषु उच्छिष्टं संस्पृशेद्यदि । आचामेद्द्रव्यमभ्युक्ष्य एवं चैव न दुष्यति॥" इति । यदन्तरेण वचनमत्र निधानं लभ्यते अप्यनिधायैवेति वचनमनर्थकम् । एकवाक्यत्वात् स्मृतीनामिह निश्चितेन विधानेन तथाऽप्येवं विज्ञायते । अद्य पुनर्मतभेदो गम्यते । ततश्च विकल्पः । तस्य च व्यवस्था । गरीयो द्रव्यं निधीयते अन्यदङ्गस्थं कृत्वाऽऽचम्यते । यदाऽपि स्वयमन्नमश्नाति भूयिष्ठं वा उच्छिष्टं स्पृशति आचमनार्हेन वा कृताचमनेन स्पृश्यते । सर्वोऽपि द्रव्यस्योच्छिष्टसंस्पर्शः ॥ १४२ ॥

*** वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् ॥**
आचामेदेव भुक्त्वाऽन्नं स्नानं मैथुनिनः स्मृतम् ॥ १४३ ॥

---

* [अनृतौ तु मृदा शौचं कार्यं मूत्रपुरीषवत् ॥
ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वमनविरेचने[1] प्रसिद्धे । अशितमन्नं येन मुखेनोद्गीर्णं स वान्तः पुरुषः । यस्योच्चारवेगा अष्टसंख्याया ऊर्ध्वं जाता हरीतक्यादिभक्षणेन व्याधिना वा स **विरिक्तः** । तौ स्नानं प्रथमं कुर्याताम् । ततोऽन्ते घृतप्राशनं कृत्वैतदन्यदन्नमद्याताम् । न चानेन घृतप्राशनेन भोजनान्तरनिवृत्तिः । प्रायश्चित्तेषु द्रव्यशुद्धिरियं भस्मोदकमार्जनवद्घृतप्राशनम् । **आचमेदेव भुक्त्वाऽन्नम्** । अन्नं भुक्त्वा तदहरेव यदि वमनविरेचने स्यातां तदाऽऽचमनमेव केवलं न स्नानघृतप्राशने । अपरैस्तु स्वतन्त्रं व्याख्यायते । भुक्त्वाऽऽचामेदेव भोजनानन्तरमाचनं विहितं तस्यैवायमपवादः । **मैथुनिनः** स्त्रियां कृतशुक्रोत्सर्गः स्नानेन शुध्यति ॥ १४३ ॥

सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वाऽनृतानि च ॥
पीत्वाऽपोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥ १४४ ॥

क्षुत्वा अनिच्छतो वायुप्रेर्यमाणस्य यो नासिकाच्छिद्रादुपजायते शब्दः स क्षवथुस्तं कृत्वा । **प्रयतोऽपि सन्** एतदध्येष्यमाणपदेनैव संबन्ध्यते । प्रयतोऽप्यध्येष्यमाण आचम्याधीयीत अध्ययनविध्यङ्गतयाऽऽचमनं कुर्यादित्यर्थः । स्नानादिभ्यस्त्वनन्तरं सकृदेव । यत्पुनरुक्तं

" सुप्त्वा क्षुत्वा च भुक्त्वा च पीत्वाऽऽपो वै मुनिस्तथा ।
आचान्तः पुनराचामेन्निष्ठीव्योक्त्वाऽनृतं वचः ॥ " इति

एवमभिसंबन्धोऽत्र कर्तव्यः । आचान्तो भुक्त्वा पुनराचामेत् । यत्र पुनर्द्विराचामेदिति पठ्यते तत्रानन्तर्येणैकक्रियावृत्तिः ॥ १४४ ॥

एष शौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च ॥
उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत ॥ १४५ ॥

आद्येन पादत्रयेण शुद्धिप्रकरणोपसंहारश्चतुर्थेन वक्ष्यमाणसंक्षेपवचनम् । **शौचविधिशब्दः** सामान्यशब्दोऽपि द्रव्यशुद्धिसंनिधानाद्गोबलीवर्दवदितरविशेषपरः संपद्यते । स्त्रीणां धर्मा असाधारणस्त्रीकर्तृका एव । यस्तु साधारणो यागादिः स इह नोच्यते ॥ १४५ ॥

बालया वा युवत्या वा वृद्धया वाऽपि योषिता ॥
न स्वातन्त्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि ॥ १४६ ॥

स्वातंत्र्यं स्त्रीषु कस्यांचिदवस्थायां नास्तीत्युपदेशार्थः । वयोविभागवचनं तु यत्रास्याः पारतन्त्र्यं[2] तत्प्रदर्शनार्थमविवक्षितस्वरूपम् । तथा चोक्तम्

"तत्सपिण्डेषु वा सत्सु पितृपक्षे प्रभुः स्त्रियाः । पक्षद्वयावसाने तु राजा भर्ता स्त्रिया मतः" ॥ १४६ ॥

---

१ अ-क-ड-क्ष-वामनविरेचने । २ अ-क-ड-क्ष-पारतंत्र ।

For Private And Personal Use Only

बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने ॥
पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ॥ १४७ ॥
पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः ॥
एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥ १४८ ॥

तत्सपिण्डेष्वित्यादिना चासति स्वामिनि कर्तव्यम् । अव्यवस्थानं वचनीयताहेतुः कथितो **गर्ह्ये कुर्यादिति**। एषां हि विरहेण निवसन्ती गच्छन्ती वा ग्रामान्तरमित्यध्याहार्यम् ॥ १४७ ॥ १४८ ॥

सदा प्रहृष्टया भाव्यं गृहकार्ये[1] च दक्षया ॥
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥ १४९ ॥

आभीक्ष्णवचनः सदाशब्दो नित्यशब्दवत् । नित्यप्रहसितये इति सत्यप्यन्यत्र क्रोधशोकवेगे भर्तुर्दर्शने मुखप्रसादस्मितनर्मवचनादिना प्रहर्षो दर्शनीयः । कुमार्यो भर्तृमत्याश्चायमुपदेशः । **गृहकार्ये च दक्षया** । अर्थसंग्रहव्यययोः धर्मकार्ये स्नानादौ च "अर्थस्य संग्रहे चैनाम्"[2] इत्यादिना गृहकार्यमुक्तम् । तत्र **दक्षया** चतुरया भवितव्यम् । अत्र: संस्कारादि शीघ्रं निष्पाद्यम् । **सुसंस्कृतोपस्करया** उपस्करं गृहोपयोगि भाण्डं कुण्डघटिकादि तत्सुसंस्कृतं सुसंमृष्टं शोभावत्कर्तव्यम् । व्यये च मित्रज्ञात्यातिथ्यभोजनार्थे धने **अमुक्तहस्तया**[3] उदारया न भवितव्यम् । न बहुव्ययितव्यमित्यर्थः । सुसंस्कृतान्युपस्कराणि यस्या इति बहुव्रीहिः। एवं मुक्तो हस्तो यस्या इति विग्रहः। पश्चान्नञ्समासः । रूढ्या उदारवचनो मुक्तहस्तशब्दः ॥ १४९ ॥

यस्मै दद्यात्पिता त्वेनां भ्राता वाऽनुमते पितुः ॥
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥ १५० ॥

भ्राता वाऽनुमते पितुः यथैव पित्राऽनुज्ञातस्य भ्रातुर्दातृत्वमेवं पितुर्निरपेक्षस्यापि दातृत्वश्रुतौ भार्याया अनुमते सति दानं बोद्धव्यम् । सर्वत्र सहाधिकारादुभयोश्च दुहितरि स्वाम्यात् । असति पितरि मात्राऽपि देयेति **नवमे** दर्शितम् । मातापित्रोरपत्यं तन्निमित्तं च स्वाम्यमिति युक्ता इतरेतरापेक्षा । **शुश्रूषेत** आराधयेत् । **संस्थितं च** मृतं **च न लङ्घयेत्** लङ्घनमतिक्रमणं न स्वातन्त्र्येणासीतेत्यर्थः । यथा जीवति भर्तरि तत्परवती एवं मृतेऽपि तदैव तत्परतन्त्रया[4] भवितव्यम् । यत आह-प्रदानं स्वामिकारकम् "। यदैव पित्रा दत्ता तदैव पितुः स्वाम्यं निवर्तते । यस्मै दीयते तस्योत्पद्यते । अतश्च न विवाहकाल एव दानं प्रागपि विवाहाद्वरणकाले अस्ति दानं **किमर्थस्तर्हि** विवाहः ? ॥ १५० ॥

---

१ **फ**-गृहकार्येषु । २ अ. ९ श्लो. ११ । ३ **अ-क-ख-ड-क्ष**-अतिमुक्तहस्तया । ४ **अ-क-ड-क्ष**-तत्तन्त्रया ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः ॥
प्रयुज्यते विवाहे[1] तु प्रदानं स्वाम्यकारणम् ॥ १५१ ॥

अभिलषितार्थनिष्पत्तिर्मङ्गलं तत्साधनं तदर्थं प्रयुज्यते । तत्र "प्रजापतेर्यज्ञ" इति क्रियाविशेषणत्वान्नपुंसकम् । स्वस्ति ईयते प्राप्यते येन **तत्स्वस्त्ययनम्** । यदस्य प्रियं वस्तु विद्यते तन्न नश्यतीत्यर्थः । **आसां** स्त्रीणाम् । तेषु विवाहेषु । **यज्ञः प्रजापतेः** । प्रजापतेर्देवतायाः क्रियते "प्रजापते न त्वदेतान्य" इति विवाहे आज्यहोमाः केषांचिदाम्नाताः । उपलक्षणं चैतदन्यासामपि देवतानां पूषवरुणार्यम्णाम् । तथाहि । तत्र मन्त्रवर्णाः । "पूषणं नु देवं वरुणं नु देवम्" इत्यादयो देवतान्तरप्रकाशनपराः । प्रदानादेवासत्यपि विवाहे स्वाम्यमुत्पद्यत इत्येतदत्र ज्ञाप्यते । विवाहयज्ञस्तु मङ्गलार्थं इत्याद्यविवक्षितम् । दारकरणं विवाह इति स्मर्यते । सत्यपि स्वाम्ये नैवान्तरेण विवाहं भार्या भवतीति ॥ १५१ ॥

अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः ॥
सुखस्य नित्यं दातेह परलोके च योषितः ॥ १५२ ॥

सर्वत्रैवाप्रतिषिद्धवर्जमिति **अनृतावपि सुखस्य दाता** । मन्त्रसंस्कारो विवाहविधिस्तस्य कर्ता **मन्त्रसंस्कारकृत्** । परलोके च पत्या सह धर्मेऽधिकाराच्च तत्फलावाप्तेः परलोकसुखस्य दातेत्युच्यते ॥ १५२ ॥

*** विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः ॥**
उपचार्यः[2] स्त्रिया साध्व्या सततं देववत्पतिः ॥ १५३ ॥

द्यूतातिसक्तो **विशीलः** । कामप्रधानं वृत्तमस्येति **कामवृत्तः** । **गुणैर्वा परिवर्जितः** । श्रुतधनादिगुणै[3]र्विहीनः । **उपचार्यः** आराधनीयः ॥ १५३ ॥

× नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्[4] ॥
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥ १५४ ॥

भर्त्रा विना कृतानां यज्ञाधिकारो नास्तीत्येतदसकृत्प्रतिपादितं तेन व्रतोपवासावपि कुर्वती तदनुज्ञां गृह्णीयात् । व्रतं मद्यमांसादिनिवृत्तिसंकल्पः न तु कृच्छ्राणि । तत्र जप-

---

१ फ-विवाहेषु । २ फ-उपचर्यः । ३ अ-क-ख-ड-क्ष-गुणहीनः । ४ फ-उपोषणम् ।

* [दानप्रभृति या तु स्याद्यावदायुः पतिव्रता ॥
भर्तृलोकं न त्यजति यथैवारुन्धती तथा ॥ १ ॥

× [पत्यौ जीवति या तु स्त्री उपवासं व्रतं चरेत् ॥
आयुष्यं हरते भर्तुः नरकं चैव गच्छति ॥ १ ॥]

For Private And Personal Use Only

होमयोरङ्गत्वात्तदभावाच्च स्त्रियाः । न च वक्तुं युक्तं जपहोमविकलं कृच्छ्रानुष्ठानमस्या भविष्यति न हि स्वेच्छयाऽङ्गत्यागो युक्तः सर्वाङ्गकल्पयुक्तस्य कर्मणोऽभ्युदयसाधनत्वेनावगतत्वात् । न हि पुरुषशक्तिभेदापेक्षयाऽङ्गानामुपचयापचयौ भवतः । सन्ति च सर्वाङ्गोपसंहारेण सवर्णास्त्रैवर्णिकाः प्रयोगमनुष्ठातुम् । अतो न स्त्रीशूद्रस्याभ्युदयकामस्य कृच्छ्रेष्वधिकारः । प्रायश्चित्तेषु विशेषं वक्ष्यामः । उपोषितं उपवासः आहारविच्छेद एकरात्रद्विरात्रादिषु । शुश्रूषते परिचरति ॥ १५४ ॥

पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा ॥
पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियम् ॥ १५५ ॥

पत्युर्लोकः पत्या सह धर्मानुष्ठानेन योऽर्जितः स्वर्गादिः स पतिलोकस्तमभीप्सन्ती प्राप्तुकामा नाचरेत्किंचिदप्रियं परपुरुषसंसर्गादिशास्त्रप्रतिषिद्धम् । न हि मृतस्य किं प्रियमप्रियं चाशक्यमवसातुम् । न च जीवतो यत्प्रियं तदेव मृतस्य । भवान्तरोपपन्नानां तु प्रीतिभेदात् । तस्माद्यत्प्रतिषिद्धं स्वातन्त्र्यं तदेवाप्रियं तन्नाचरेत् ॥ १५५ ॥

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ॥
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ॥ १५६ ॥

तदेव सविशेषं दर्शयति । पुंवत्स्त्रीणामपि प्रतिषिद्ध आत्मत्यागो यदप्याङ्गिरसे "पतिमनुम्रियेरन्" इत्युक्तं तदपि नित्यवदवश्यं कर्तव्यम् । फलस्तुतिस्तत्रास्ति फलकामायाश्चाधिकारे श्येनतुल्यता । तथैव "श्येनेन हिंस्याद्भूतानि" इत्यधिकारस्यातिप्रवृद्धतरद्वेषान्धतया सत्यामपि प्रवृत्तौ न धर्मत्वमेवमिहाप्यतिप्रवृद्धफलाभिलाषायाः सत्यपि प्रतिषेधे तदतिक्रमेण मरणे प्रवृत्त्युपपत्तेर्न शास्त्रीयत्वमतोऽस्त्येव पतिमनुमरणेऽपि स्त्रियाः प्रतिषेधः । किंच " तस्मादुह न पुरायुषः प्रेयादिति" प्रत्यक्षश्रुतिविरोधेऽयं स्मृतिरप्येषा शक्यते कल्पयितुम् । यथा " वेदमधीत्य स्नायात्" इत्यध्ययनानन्तरमकृतार्थावबोधस्य स्नानस्मरणमतो मृतपतिकाया अनपत्याया अप्राप्ते भर्तृधनादौ दायिके च कर्तनादिना च केनचिदुपायेन जीवन्त्या जीवितस्यातिप्रियत्वात्तदुपेक्षणस्याशास्त्रत्वात्प्रतिषिद्धत्वादापदि सर्वकर्माभिचाराणां ' विश्वामित्रजापनीम्" इत्यादिनाऽनुज्ञातत्वाद्व्यभिचारोपजीविताप्राप्ताविदमुच्यते । काममस्यामवस्थायां शरीरं क्षपयेत् क्षयं नयेत्पुष्पमूलफलैर्यथोपपादं वृत्तिं विदधीत । न तु नामापि गृह्णीयात्पतिर्मे त्वमेवाध्येत्यन्यस्य । यत्तु

"नष्टे मृते प्रव्रजिते क्लीबेऽथ पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" ॥ इति ।

तत्र पालनात्पतिमन्यमाश्रयेत सैरन्ध्रकर्मादिनाऽऽत्मवृत्त्यर्थं नवमे च निपुणं निर्णेष्यते ।

---

१ ङ-अभ्यधिकारः । २ ङ-क-एकरात्रादिषु । ३ फ-र्थो— । ४ फ-सर्वाभिचाराणां ।
५ फ-त्वमधेत्यन्यस्य । ६ नारदस्मृतौ अ. १२ श्लो. ९७ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रोषितभर्तृकायाश्च स विधिः । कामशब्दप्रयोगोऽरुचिसंसूचनार्थम् । देहक्षपणमप्यकार्यमिदं त्वन्यदकार्यतरं यदन्येन पुरुषेण संप्रयोगः ॥ १५६ ॥

आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी ॥
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥ १५७ ॥

एष एवार्थो विस्पष्टीक्रियते । **आ मरणाद्ब्रह्मचारिण्यासीत** अस्यामापदि न व्यभिचारेणात्मानं जीवयेत् । क्षान्ता तत्कृतं दुःखमवधीरयन्ती न ब्रह्मचर्यं क्षुदुपसृष्टं येन चित्तं कल्लोलेन खण्डयेत् । एकः पतिर्यासां ता एकस्य वा पत्न्य एकपत्न्यस्तासां सावित्रीप्रभृतीनां यो **धर्मो** यस्य फलं वरदानाभिशापादिषु शक्तता तं **काङ्क्षन्ती** कामयमाना ब्रह्मचर्यं न जह्यात् । अस्यामवस्थायां मूलफलाशिन्या यदि भवति मरणं ततो न दोषः ॥ १५७ ॥

अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् ॥
दिवं गतानि विप्राणामकृत्वा कुलसंततिम् ॥ १५८ ॥

पूर्वेणापदि जीविकार्थः परपुरुषसंसर्गो निषिद्धोऽनेन पुत्रार्था प्रवृत्तिर्निषिध्यते । एवं किल श्रूयते "नापुत्रस्य लोकोऽस्ति" इति । लिङ्गं च तत्राविवक्षितमतः पुत्रार्थे प्रसङ्ग इदमुच्यते । बहूनि सहस्राणि कुमारा एव ब्रह्मचारिणोऽकृतदारा नैष्ठिकास्तेषामनेकानि सहस्राणि दिवंगतानि स्वर्गं प्राप्नुवन्ति । नियोगस्तु **नवमे** (श्लो. ५९ इ.) । चतुर्विंध्यया विहितो नात्मतन्त्रतया पुत्रार्थिन्याः । **अकृत्वा कुलसंततिं** कुलवृध्द्यर्था संततिस्तामकृत्वा पुत्रानजनयित्वेत्यर्थः । **अनेकानीति** नञ्समासस्योत्तरपदार्थप्राधान्येन बहुवचनं चिन्त्यम् । सत्यप्येकत्वप्रतिषेधे द्व्यादिसंख्यावचनं दुर्लभम् । तथा ह्ययं स्वधर्मविशेषेण परित्यक्तस्वगतिकत्वेनाच्छादिततद्रूपोऽप्यतिदीर्घसंख्याविशेषानाचष्टे यथा मोदो[3] ग्राम इति । उक्तं च **चूर्णिकाकारेण** " अनेकस्मादितिसिध्यतीति " । एकवचनप्रयोगशिष्टिसिद्धिं दर्शितवान् असहायवचनो वाऽयमनेकशब्दः । असहायानि गतानि भार्या सहायभूता एषां नासीदित्यर्थः ॥ १५८ ॥

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ॥
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः ॥ १५९ ॥

एष एवार्थो भूय उच्यते प्रतिपत्तिदार्ढ्यार्थम् ॥ १५९ ॥

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते ॥
सेह निन्दामवाप्नोति परलोकाच्च हीयते ॥ १६० ॥

---

१ फ–उपसृष्टं । २ अ–क–ख–ङ–क्ष–चतुर्विंच्छया । ३ फ–गोदौ ङ–मीदो ग्रामइति; क–मेलौ ग्राम इति । ४ फ–पतिलोकाद् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रो मे जायतामित्यभिलाषः सोऽपत्यलोभस्ततो हेतोर्या **भर्तारमतिक्रम्य** वर्ततेऽन्येन संप्रयुज्येत सा इह लोके निंदां गर्हां प्राप्नोति स्वर्गं न प्राप्नोति ॥ १६० ॥

नान्योत्पन्ना प्रजाऽस्तीह न चान्यस्य परिग्रहे ॥
न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ॥ १६१ ॥

अन्येन भर्त्रा या उत्पादिता प्रजा सा नैव तस्याः प्रजा । अन्यदारेषु च या ९
पुंसोत्पादिता साऽपि तस्य न भवति ॥ १६१ ॥

पतिं हित्वाऽपकृष्टं स्वमुत्कृष्टं या निषेवते ॥
निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते ॥ १६२ ॥

न केवलं निन्दामेव येन

"व्यभिचारात्तु भर्तुःस्त्री लोके प्राप्नोति निन्द्यताम् । शृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते॥" १०
अतो नातिचरेद्भर्तारं दृष्टादृष्टफललोभेन ।

स्त्रीधर्मोपसंहारश्लोका ऋनवश्च स्त्रीधर्मा इत्यतो मयाऽत्र व्याख्यानादरः कृत एता-
वत्तत्रोपदेशार्थः । यथा पुंसोऽन्यया सह पुनःप्रवृत्तिकर्म "नेह संस्थितं च न लङ्घयेत्"इत्य-
नेन न्यायेन पुनः सहप्रवृत्तिरिति तथा "स्वर्गं गच्छत्यपुत्राऽपि"इत्यनेनापत्यजननमापादि
प्रतिषिध्यते नियोगस्मृत्या तु तत्पुनरभ्यनुज्ञास्यते । तदेतदपत्योत्पादनमुक्तप्रतिषिद्धत्वा- १५
द्विकल्प्यते । अनयोस्तु स्मृत्योः कतमा स्मृतिर्ज्यायसीति न शक्यं कर्तुमतिशयावधारणं
नैकत्रापत्यमन्यत्रास्याः संयमः । उभयोरपि वस्तु निर्वहति ॥ १६२ ॥

व्यभिचारे तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ॥
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥ १६३ ॥
पतिं या नाभिचरति मनोवाग्देहसंयता ॥ २०
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ॥ १६४ ॥
अनेन नारी वृत्तेन मनोवाग्देहसंयता ॥
इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च ॥ १६५ ॥
एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् ॥
दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥ १६६ ॥ २१

न्यायप्राप्तानुवादः श्लोकः । एवं तस्याः साध्वीत्वाद्युक्त एवात्राग्निहोत्रिणः संस्कारः
"न वाऽग्नयो ह वा एते पत्न्यां प्रमीतायां धार्यन्ते"इति ॥ १६६ ॥

---

१ अ-क-ख-ड-क्ष-संप्रयुज्यते । २ फ-न चाप्यन्यपरिग्रहे । ३ फ-अपकृष्टं । ४ फ-व्यभिचारात्तु । ५ अ-क-ख-ड-क्ष-पापरोगौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भार्यायै पूर्वमारिण्यै दत्वाऽग्नीनन्त्यकर्मणि ॥
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥ १६७ ॥

तदेतत्पुनरधिकारार्थमुदाह्रियते । इदमप्यन्यया सहाधिकारप्रतिप्रसवः । यदा त्वर्थे प्रयोजने धर्मकर्मानुष्ठाने वा तदाऽप्यसहायभावाद्वानप्रस्थपारिव्राज्ये वाऽधिकारस्याप्रतिषेधः।
५ तथा च श्रुतिः "जरसा ह वा एतस्माद्विमुच्यत" इति । अर्थलोपेन वा । अपरे त्वाहुः अत्र यदेति कल्पयिष्यते । एतेन यावज्जीवहोमीयश्रुतेरविरोधः सिद्धो भविष्यति ॥ २६७ ॥

अनेन विधिना नित्यं पञ्चयज्ञान्न हापयेत् ॥
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ १६८ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां शौचविधिः पंचमोऽध्यायः ॥ १ ॥

उपसंहारश्लोकः । **पञ्चयज्ञग्रहणं** च सर्वप्रसिध्यर्थमिति ॥ १६८ ॥

इतिश्रीभट्ट**वीरस्वामि**सूनोर्भट्ट**मेधातिथि**स्वामिनः कृतौ **मनुभाष्ये** पञ्चमोऽध्यायः समाप्तः॥ ५ ॥

---

१ **अ-क-ख-ड-क्ष**-अधिकारस्यापि प्रतिषेधः । २ **अ-क-ख-ड-क्ष**-गृहेषुब्राह्मणो वसेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री ॥

श्रीगणेशाय नमः

अथ षष्ठोऽध्यायः प्रारभ्यते ।

* एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः ॥
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ॥ १ ॥

गृहोपलक्षित आश्रमो **गृहाश्रमः** । गृहा दाराः तत्र स्थित्वा तमनुष्ठाय वने वसेदिति विधिः । स्थित्वेति क्त्वाप्रत्ययेन पौर्वकाल्यं गार्हस्थ्यस्य वनवासाद्दर्शयति । क्रमेणाश्रमः कर्तव्यः । कृतगार्हस्थ्यो वनवासेऽधिक्रियते । समुच्चयपक्षमाश्रित्यैतदुक्तम् । अन्यथाऽविप्लुतब्रह्मचर्यादपि वनवासो विद्यत इत्येतदपि वक्ष्यते । **विजितेन्द्रियः** पक्वकषायः क्षीणराग इत्यर्थः । एवं विधिवद्यथावदितिपदानि वृत्तपूर्णा[1]नि तानि प्राक्तत्र तत्र व्याख्यातानि । एतावद्विधीयते । गार्हस्थ्यं कृत्वा वनवास आश्रयितव्यः ॥ १ ॥

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ॥
अपत्यस्यैव चापत्यं तदाऽऽरण्यं समाश्रयेत् ॥ २ ॥

यदुक्तं त्यक्तविषयोपभोगगर्धोऽधिक्रियत इति तदेव दर्शयति । **वली** त्वक्शैथिल्यम् । **पलितं** केशपाण्डुर्यम् । **अपत्यस्यापत्यं** पुत्रस्य पुत्र इत्याहुः । सत्यपि दुहितुरपत्ये[2] दौहित्रे कन्यायां पुत्रस्यापि जातायां नैवं विधिमिच्छन्ति शिष्टाः । अन्ये तु शिरःपालित्यं पौत्रोत्पत्तिं च वयोविशेषलक्षणार्थमाहुः । यस्य कथंचित्पालित्यं न भवेत्सोऽपि वार्धक्ये वनं समाश्रयेत् । यथैव ' जातपुत्रः कृष्णकेशस्तु ' आधानेऽधिक्रियते एवं जातपौत्रः पलितशिराः । तदापि पुत्रजन्मकृष्णकेशता च वयोविशेषोपलक्षणार्थमेवं[3] । नातिशीघ्रं नातिचिरमित्यर्थस्योपलक्षणत्वे तु प्रमाणं वक्तव्यम् ॥ २ ॥

संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् ॥
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥ ३ ॥

---

* [अतःपरं प्रवक्ष्यामि धर्मं वैखानसाश्रमम् ।
वन्यमूलफलानां च विधिं ग्रहणमोक्षणे ॥ १ ॥ ऽऽ]

१ फ-पूर्णार्थानि २ अ-क-ख-ड-क्ष-अपत्यत्वे । ३ अ-क-ख-ड-क्ष-लक्षणार्थतैव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्रीहियवमयमन्नं ततः प्रभृति नाश्नीयादित्येतत्संत्यज्येत्युच्यते । तदुक्तं मूलाशीत्यादि । परिच्छदः गवाश्ववस्त्रासनशय्यादिः । यदि भार्याया इच्छा तदा सहगमनम् , अन्यथा एकाकिनः । अन्ये तु तरुणीं निक्षिप्य वृद्धया सहेति वर्णयन्ति । सत्यां भार्यायामयं विधिः । पुत्रेषु निक्षेपैः वनगमनं वा । असत्यामपि मृतायां वनवास आपस्तम्बादिभिः स्मर्यते " पुनराधान " इत्यत्र । यस्येन्द्रियचापल्यं नास्ति स वानप्रस्थः । इतरः पुनर्दारान्परिगृह्णीयादिति व्यवस्था ॥ ३ ॥

अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम् ॥

ग्रामादरण्यं निष्क्रम्य निवसेन्नियतेन्द्रियः ॥ ४ ॥

अग्नय एवाग्निहोत्रशब्देनोक्ताः । श्रौतानग्नीन्त्समादाय गृहीत्वा गृह्यं च अग्निहोत्रपरिच्छदं स्रुक्स्रुवादि । ग्राम्यस्यै परिच्छदस्य त्यागविधानादग्निसंबद्धस्य प्रतिप्रसवोऽयम् ॥ ४ ॥

मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ॥

एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥ ५ ॥

एतानेव ये गृहस्थस्यै विहिताः । निर्वपेदनुतिष्ठेत् । विधिपूर्वकमित्यनुवादः श्लोकपूरणार्थः ॥ ५ ॥

वसीत चर्मचीरं वा सायं स्नायात्प्रगे तथा ॥

जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥ ६ ॥

चर्म गोमृगादीनाम् । चीरं वस्त्रखण्डम् । सायं दिवसावसानसमयः । प्रगे चान्हः प्रथमोदये । एवं सायं स्नानविधानाद्रात्रौ भोजनमस्याहुँः भुक्तेँ स्नानप्रतिषेधात् । तदयुक्तमित्यन्ये । यतः स्नातकव्रतमतः स्नानमाचरेद्भुक्त्वेति । महाभारते तु पुरुषमात्रधर्मतया स्मर्यते । त्रैकालिकमप्यस्य स्नानं भविष्यति वैकल्पिकम् । जटाश्मश्रुलोमनखानि न कर्तयेत् ॥ ६ ॥

यद्भक्षैः स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः ॥

अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतम् ॥ ७ ॥

मुन्यन्नैरित्युक्तं तानि च नीवारादीनि वन्यानि धान्यानि तथा शाकादीनि वन्यान्येव । अन्नशब्दो बाहुल्येन धान्यविकारे भक्तसक्तुपिष्टादौ प्रयुज्यते । ततः शाकादीनां सत्यपि मुन्यन्नत्वे पृथगुपादानम् । मुनयस्तापसास्तेषामन्नानि मुन्यन्नानि । अग्नौ पाकधर्मान्महायज्ञान्निर्वपेत् । यदा कालपक्वफलाशी तदा न निर्वपेदित्याशङ्कायामाह ।

अ-क-ख-ड-क्ष-पक्षे वनगमनं वा । २ फ-ग्राम्यपरिच्छदस्य । ३ फ-गृहस्थविहिताः । ४ फ-मप्याहुः; र-अस्येत्याहुः । ५ र-भुक्ते स्नानप्रतिषेधात्तदुक्तमित्यन्ये । ६ फ-यद्भक्ष्यं । ७ फ-आगतान् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्भक्षः स्यात् । यदेवं भक्षयेत्तदेव पिष्टादि यथासामर्थ्यं दद्यात् । **बलिं** अनग्निहोत्रं इन्द्रायेन्द्रपुरुषेत्यादि यद्विहितम् । अग्नौ त्वस्मिन्पक्षे होमो नास्ति । तदयुक्तम् । बलिशब्दस्य चेज्यामात्रवचनत्वादग्नावनग्नौ च तुल्यमेतत् । अथाप्ययं पक्षः स्याद्यदेव भक्षयेत्तदेव । अग्नावेव पक्वेनाग्नौ होमः कर्तव्यस्तथापि तावन्मात्रप्रयोजनं शाकादि वक्ष्यति स्वयं कालपक्वं भोक्ष्यते । सर्वथा कालपक्वाशिनोऽप्यस्ति वैश्वदेवोऽग्नावेव । अबादिभिर्द्वन्द्वोऽयम् । अद्भिर्मूलफलैः भिक्षया च नीवारादिनाऽर्चयेदाश्रमागतं पान्थम् ॥७॥

स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ॥
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥ ८ ॥

आश्रमबुद्ध्या स्वाध्यायादीनां निवृत्तिमाशङ्कमान आश्रमान्तरत्वादस्यानिवृत्त्यर्थमाह । **नित्ययुक्तः** न यथा गार्हस्थ्ये । तत्र हि गृहचेष्टार्था अपि व्यापाराः सन्ति तेष्वनुष्ठीयमानेषु नास्ति स्वाध्यायः । **दान्तो** दमयुक्तः मदवर्जितः । **मैत्रः** मित्रकर्मप्रधानः प्रियहितभाषी । सन्निहितस्य चित्तानुकूलनपरः स समाहितः । नासंबद्धं नाप्राकरणिकं बहु पराधीनोऽपि ब्रूयात् । दाता अपां मूलभिक्षाणां च । **अनादाता** पथ्यौषधार्थमाश्रमान्तरादागतं न याचेत् । **सर्वभूतानुकम्पकः** अनुकम्पा कारुण्यम् । सत्यपि कारुणिकत्वे न परार्थमन्यं याचेत ॥ ८ ॥

वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ॥
दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ॥ ९ ॥

वितानो विहारस्तत्र भवं **वैतानिकम्** । त्रेताग्निविषयं **कर्म** श्रौतं **तज्जुहुयात्कुर्यात्** । अग्निहोत्रशब्दो यवागवादौ होमसाधने द्रव्ये वर्तते न कर्मनामधेयम् । ततश्च तज्जुहुयादाहवनीयेऽग्निहोत्रादिभिर्जुहोतीत्यर्थः । उपपन्नः प्रथमपक्षेऽग्निहोत्रशब्दो जुहोतिनाऽभिन्नार्थः ।

ननु च " पुत्रेषु भार्यां निक्षिप्येति " पक्षान्तरमुक्तं तत्र कथं तया विना श्रौतेष्वधिकारः । प्रोषितस्य यथेति चेत् । यथा प्रोषितो वा यजमानः संविधानादिना दूरस्थोऽप्यधिक्रियते संविधाने एवं भवति कर्ता तद्वत्पत्न्यपि वनं प्रतिष्ठमानमनुज्ञास्यति न सहाधिकारो विरोत्स्यत इति तदपि वार्तम् । दैवान्मानुषाद्वा प्रतिबलात्कथञ्चित्प्रवासोपपत्तेः । युक्तमीदृशमनुष्ठानं न स्वेच्छया । सत्यां शक्तौ बहूनि चाङ्गानि परिलुप्येरन् । दर्शपौर्णमासयोः " वेदोऽसि वित्तिरसि"इत्यादि पत्नीं वाचयेदित्युक्तं तद्धीयेत । अथोच्येत

---

१ अ-क-ख-ड-क्ष-अग्निहोत्रं । २ अ-क-ख-ड-क्ष-वेदेज्यामात्र- । ३ अ-क-ख-ड-क्ष-गृहचेष्टाया । ४ अ-क-ख-ड-क्ष-दम्भवर्जितः । ५ अ-क-ख-ड-क्ष-प्रियहिताभाषा । ६ फ-चित्तानुकूलतापरः । ७ अ-क-ख-ड-क्ष-अप्राकरणिकं. । ८ अ-क-ड-क्ष-बहुपराधतोऽपि । ९ फ-आपद्यौषधाद्यर्थमाश्र—। १० क-ख-ड-क्ष-आश्रमाचारादागतं । ११ अ-ड याचते । १२ अ-क-ख-ड-क्ष-तत्रभवो वैतानिकः । १३ फ-साधनद्रव्ये । १४ अ-क-ख-ड-क्ष-अग्निहोत्रशब्देन । १५ अ-क-ख-ड-क्ष-पदान्तरमुक्तम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहप्रस्थानपक्षे विधिरयं भविष्यतीत्येतदपि न । विशेषस्याश्रुतत्वात् । निक्षेपपक्षे चाग्नीनां प्रतिपत्त्यन्तरमनाम्नातं किञ्च सहत्वपक्षेऽपीदं विरुध्यते ।

"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् " ॥ इति (श्लो. ११) । आरण्यानि मुन्यन्नानि नीवारादीन्यभिप्रेतानि । ग्राम्यस्य परिच्छदस्य त्यागविधानात् । व्रीह्यादिभिश्च वेदे पुरोडाशा विहितास्ते च ग्राम्याः । न च स्मृतिश्रुतिषु उत्पन्नन्यायेन व्रीहिशास्त्रविधिन्यायेन वा केनचिन्मेध्येनारण्येनान्नेन प्रयोगः परिसमाप्येत निक्षेपे । ते च भार्यया दुरुपपादाः । कथं यावज्जीवश्रुतौ सत्यामग्नीनां त्यागो भार्यया वा तस्मादाश्रमान्तरविधानं वैतानिकानां च कर्मणामनुष्ठानं न संवदेत् । कर्तव्योऽत्र यत्नः ।

केचिदाहुः वैतानिकशब्दः स्मार्तेष्वेव कर्मसु स्तुत्या प्रयुक्तः । न च स्मार्तेषु व्रीह्यादि नियमशास्त्रमस्ति । तत्र ह्याम्नायते (**रामायणे अयोध्याकाण्डे**)—

" यदन्नः पुरुषो राजंस्तदन्नास्तस्य देवताः " इति । अतश्च मुन्यन्नैरनुष्ठानमविरुद्धं भवेद्व्रीह्यादिशास्त्रविरोधः परिहृतः स्यात् । सहाधिकारस्तत्रापि विद्यते । तस्य कः परिहारः । उभयोः स्मार्तत्वादस्यामवस्थायां बाधिष्यते ।

यत्तु श्रौतवचनं "पत्न्या सह यष्टव्यमिति" तच्छ्रौतेष्वेव । अथवा नैवायं विधिर्गृहस्थाग्नेः । किंतर्हि 'श्रावणिकेनाग्निमाधायेति' **गौतमेन** पठितम् । इहापि वक्ष्यति "वैखानसमते स्थित " इति (श्लो. २१) । तस्माच्छास्त्रविहितानि कर्मान्तराण्येवैतानि ।

दर्शपूर्णमासादयस्तु शब्दाः भक्त्या तत्र प्रयुक्ताः । अतस्तत्र तदाधानमभार्यस्यैव । गार्हस्थ्योपात्तानां प्रतिपत्तिरुक्ता " अग्नीस्वात्मनि वैतानानिति " (श्लो. २५) । यत्तु यावज्जीवश्रुतौ सत्यां कथमग्नीना त्याग इति एतच्चातुराश्रम्यानुक्रमणप्रकरणे निरूपयिष्यते ।

अन्ये पुनराहुः । होमो ग्राम्यानामन्नानां प्रतिषिद्धो न तु देवताद्यर्थ उपयोगः । ननु च " यजमानपञ्चमा इडां भक्षयन्तीति " तत्रापि विद्यते भक्षः । सत्यम् । स तु शास्त्रीयो न लौकिकः । लौकिकस्य च प्रतिषेधः । संत्यज्येति ग्रामप्रवेशश्च तस्य तदर्थो न विरुध्यते । तथा वक्ष्यति "ग्रामादाहृत्य वाऽश्नीयादिति" (श्लो. २८) । तदेतदसत् । मुन्यन्नैरिति विधानात् । तदेवं श्रावणिकेनाग्निमाधायेत्यादि सर्वमुपपन्नम् ।

तथा "ह्यग्निहोत्रं समारोप्येति" पठ्यते । न तु सत्यज्येति । समारोपणमपि मुमूर्षोस्तत्सतपसो वक्ष्यते प्रथमप्रवासे न च तुरायणादिशब्दानां श्रावणिकाग्निविषयत्वे कथंचिदुप-

---

फ–विनिक्षेप । २ **अ–क–ख–ड–क्ष**–अनुष्ठाने स तु विरुद्धं भवत । ३ अ. ४ सू. २६ "श्रावणकेन" इति गौतमीयपाठः । ४ **अ–क–ख–ड–क्ष**–प्रतिषिद्धो तु । ५ **फ**–तदेव सत् । ६ **र–फ**–समाधायेति । ७ **फ**–प्रवासेन नतुरागादि शब्दानां—; **र**–न चातुरायणादिशब्दानां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्तिः । मृतभार्यस्य तदाधानं वाचनिकं भविष्यति । यदा वा ब्रह्मचर्यादेव वनवासमिच्छेत्तदा श्रावणिकाधानम् । तस्मादाहिताग्नेः महाग्निभिर्वनप्रस्थानं सभार्यस्य ।

तत्र **च यथाविधि** व्रीह्यादिना श्रौतकर्मानुष्ठानम् । व्रीह्यादीनामपि मुन्यन्नता कथंचिदुपपाद्या । व्रीहियवावपि पवित्रम् । भार्यानिक्षेपश्चानाहिताग्नेः कथंचित्स्मार्तेऽग्नौ गतिः । उभयोः स्मार्तत्वात् । यस्य च द्वे भार्ये जाते एकया चाग्नयो नीतास्तस्य द्वितीयां भार्यां निक्षिप्येति वचनम् । **अस्कन्दयन्** । स्कन्दनं विध्यतिक्रमः । यथाविहितमनुष्ठानस्यासंपादनम् । एतच्च पादपूरणं योगेत इत्येतदपि । **योगत अस्कन्दयन्** युक्त्याऽविनाशयन् । युक्तिर्विधिरेव ॥ ९ ॥

दर्शेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् ॥
तुरायणं च क्रमशो दाक्षस्यायनमेव च ॥ १० ॥

दर्शेष्टिश्च आग्रयणं चेति समाहारद्वन्द्वः । चातुर्मास्यतुरायणदाक्षायणाः श्रौतकर्मविशेषवचना नित्या एव तुरायणादयः केषांचित् ॥ १० ॥

वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ॥
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ॥ ११ ॥

यदा मुन्यन्नैरिति न पूर्वेण संबध्यते तदा नास्ति चोद्यं वैतानिकानि कथं व्रीह्यादिचोदितानि क्रियेरन् । अत्र चरुपुरोडाशा वैखानसशास्त्रोक्ता एव वेदितव्याः । वसन्ते जायन्ते पच्यन्ते वा **वासन्तानि** । एवं शारदैर्मेध्यैरित्यनुवादः । **स्वयमाहृतैः** प्रतिग्रहादीनि वृत्तिकर्माणि निषिध्यन्ते । स्मार्तानामुक्तानां कर्मणामनुष्ठानार्थं पुनर्हृत्यादिनाहरणम् । **विधिवत्पृथगितिपूरणे** ॥ ११ ॥

देवताभ्यस्तु तध्दुत्वा वन्यं मेध्यतरं हविः ॥
शेषमात्मनि युञ्जीत लवणं च स्वयं कृतम् ॥ १२ ॥

पर्वसु यद्देवताभ्यो दत्तं तच्छिष्टमेव भक्षयेत्र शाकमूलफलादि । **शेषमात्मनि युञ्जीत** आत्मनिमित्तमुपयोजयेत् । आत्मार्थं शरीरस्थित्यर्थमित्यर्थः । **स्वयंकृतं च लवणं** सैन्धवादि निषेवेत ॥ १२ ॥

स्थलजौदकशाकानि पुष्पमूलफलानि च ॥
मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् ॥ १३ ॥

स्थलजानि उदकजानि अद्यात् । तथा पुष्पमूलफलानि च ॥ १३ ॥

वर्जयेन्मधु मांसं च भौमानि कवकानि च ॥
भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च ॥ १४ ॥

भौमानि कवकानि । कवकशब्दः प्राग्व्याख्यातः छत्राकशब्दपर्यायः ।

१ फ-विहितस्यानुष्ठान-२ फ-योग । फ-ऋक्षेष्टया- । ४ फ-आग्रहमं । ५ अ-ङ-संबध्यते । ६ अ-ङ-च । ७ फ-छत्राकपर्यायः

For Private And Personal Use Only

तानि च कवकानि भूमौ जायन्ते वृक्षकोटरादावपि । अतो विशेषणार्थं भौमग्रहणम् । [1]समाचारविरोधो गृहस्थधर्मेषु चाविशेषेण कवकानां प्रतिषेधः । वानप्रस्थस्य च [2]नियमातिशयो युक्तः । तस्माद्भौमानीति स्वतन्त्रपदं तत्र गोजिह्विका नाम कश्चित्पदार्थो वनेचराणां प्रसिद्धस्तद्विषयं बोद्धव्यम् । न तु यत्किंचिद्भुविजातमात्रस्य । कवकानां प्रतिषिद्धत्वात्पुनःप्रतिषेधो भूस्तृणादीनां तत्समप्रायश्चित्तार्थः । भूस्तृणशिग्रुकशब्दौ शाकविशेषवचनौ [3]वाह्लिकेषु प्रसिद्धौ ॥ १४ ॥

त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितम् ॥
जीर्णानि चैव वासांसि शाकमूलफलानि च ॥ १५ ॥

षण्मासनिचयसमा[4]निचयपक्षयोराश्वयुजे त्यागः ।

ननु मुन्यन्नं तावदेव संचेयं यत्कर्म पर्याप्तं तत्र नैवाधिकमस्ति । कस्य त्यागः । उच्यते । न शक्या तुला ग्रहीतुमर्जनकाले अतो यत्किंचिदवशिष्टमस्ति तस्याश्वयुजे त्यागः । जीर्णानि चैव वासांसि । अजीर्णानां नास्ति त्यागः ॥ १५ ॥

न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ॥
न ग्रामजातान्यार्तोऽपि पुष्पाणि च फलानि च ॥ १६ ॥

आरण्यस्यापि फालकृष्टस्य प्रतिषेधः । ग्रामजातान्यफालकृष्टान्यपि संत्यज्य "ग्राम्यमाहाराम्" इत्यनेन प्रतिषेधः । पुष्पफलानां क्रियते नोपयोगः । ग्राम्याणां देवताभ्यर्चनादौ पुष्पफलानां निषेधः । आर्तोऽपि अन्यासंभवेऽप्यवश्यकर्तव्यत्वाद्देवताद्यर्चनस्य प्रतिनिधिपक्षेऽपि नोपादेयमित्यर्थः । अपिशब्दो भिन्नक्रमो द्रष्टव्यः । पुष्पाण्यपि नोपादेयानि किं पुनर्धान्यानि ॥ १६ ॥

अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा ॥
अश्मकुट्टो भवेद्वाऽपि दन्तोलूखलिकोऽपि वा ॥ १७ ॥

अग्निना पक्वं शाकौदनादि तदशनं यस्य सोऽग्निपक्वाशनः । काले स्वयमेव यत्पक्वं तदेव भुञ्जीत वार्क्षं फलम् । अथवा धान्यानामेव नीवारादीनां निष्पिष्येदं भक्षणम् । अश्मभिः पाषाणैः कुट्टयित्वा पिष्टरूपं कृत्वा भुञ्जीत । यद्वा यदुत्पन्नं वृन्तकादिभिर्बहिः[8] कपाटकं तदश्मभिरपनीय कवाटमन्तः फलं भक्षयेत् । दन्ता उलूखलम् अस्य दन्तोलूखलिकः । दन्तैस्तुषकवाटमपनीय भक्षयेत् । असत्यपि संस्कारे स न कर्तव्यः । यदि वा पूर्ववदशनविशेषोपलक्षणं तादृशमश्नीयाद्यदस्य दन्ता एव उलूखलकार्यमवघातं संपादयन्ति ॥ १७ ॥

---

१ अ-क-ख-ड-क्ष-समाचारविरोधो । २ अ-क-ख-ड-क्ष-नियमाविध्यायुक्तम् । ३ अ-ड-वाह्लीनेषु । ४ र-समानि च पक्षयो । ५ फ-मूलानि । ६ फ-नार्दे । ७ ड-निष्कुट्य । ८ फ-बहिस्तुषकपाटक । ९ अ-क-ख-क्ष-उपनीय ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सद्यः प्रक्षालको वा स्यान्माससंचयिकोऽपि वा ॥
षण्मासनिचयो वा स्यात्समानिचय एव वा ॥ १८ ॥

यत्पूर्वमशनमुक्तं तदैकाहिकभोजनपर्याप्तमेवार्जयेत् । मासोपयोगी वा संचयो मासपर्याप्तः संचयो मासंसंचयः । सोऽस्यास्तीति ठन् कर्तव्यः । यदि वा माससंचयक इति बहुव्रीहिसमासोऽत्र कर्तव्यः । मासपर्याप्तः संचयोऽस्येति । एवमुत्तरयोरपि ॥ १८ ॥

नक्तं चान्नं समश्नीयाद्दिवा वाऽऽहृत्य शक्तितः ॥
चतुर्थकालिको वा स्यात्स्याद्वाऽप्यष्टमकालिकः ॥ १९ ॥

द्विर्भोजनस्य पुरुषार्थतया विहितत्वादन्यतरस्मिन्काले निर्वृत्तिर्विधीयते । यथा यथा वयोऽतिक्रामति तथा तथा भोजनकालं जह्यात् । **चतुर्थ**मप्यष्टमावधिकतयाऽऽश्रयेत् । त्रीण्यहोरात्राण्यतीत्य चतुर्थेऽहनि सायं भुञ्जानोऽष्टमकालिको भवति । भोजनस्य प्रकृतत्वात्तद्विषयश्चतुर्थकालसंबन्धः प्रतीयते ॥ १९ ॥

*** चान्द्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत् ॥**
पक्षान्तयोर्वाऽप्यश्नीयाद्यवागूं क्वथितां सकृत् ॥ २० ॥

पक्षान्तौ पूर्णमास्यमावास्ये । अत्र श्रितां **यवागूमश्नीयात्** । **सकृ**दिति सायं प्रातर्वा ॥ २० ॥

पुष्पमूलफलैर्वाऽपि केवलैर्वर्तयेत्सदा ॥
कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः ॥ २१ ॥

कालपक्वैः पनसादीनाम् अग्निनाऽपि पाकः क्रियते तन्निषेधार्थम् । तदग्निपक्वं गृहस्थस्यानिषिद्धम् । वैखानसं नाम शास्त्रं यत्र वानप्रस्थस्य धर्मा विहितास्तेषां **मते स्थितः** । अन्यामपि तच्छास्त्रोक्तां चर्या शिक्षेत ॥ २१ ॥

भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ॥
स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः ॥ २२ ॥

विपरिवर्तनं केवलायां भूमावेकेन पार्श्वेन निषेद्य पुनः पार्श्वान्तरेणावस्थानम् । आहारविहारकालौ वर्जयित्वा एवं वर्तेत । नोपविशेन्न चङ्क्रमेत् न शय्यायां नासने न भित्तौ निषीदेदित्यर्थः । **प्रपदैः** पादाग्रैर्वा **तिष्ठेत्** । स्थानासनाभ्यां च दिने । रात्रौ तु केवलस्थण्डिलशायितां वक्ष्यति । सवनेषु प्रातर्मध्यन्दिनापराह्णेषु **उपयन्नप** इति च । असंभवे नद्यादीनामुद्धृतोदकेनापि स्नानं दर्शयति ॥ २२ ॥

---

१ ख–फ–र–याति । २ र–अथाष्टमावधितया; फ–चतुर्थमष्टमावधितया ।

* [यतः पत्रं समादद्यात्त ततः पुष्पमाहरेत् ॥
यतः पुष्पं समादद्यात्त ततः फलमाहरेत् ॥ १ ॥]

३ अ–क–ख–ड–क्ष–र–निषिद्य । ४ अ–क–ख–ड–क्ष–र–वा ।

५९

For Private And Personal Use Only

ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ।।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ।। २३ ।।

पञ्चभिरात्मानं तापयेत् । चतसृषु दिक्षु अग्नीन्सन्निधाप्य मध्ये तिष्ठेदुपरिष्टादादित्यतापं सेवेत । प्रावृष्यभ्राण्येवावकाशाऽऽश्रयो यस्मिन्देशे देवो वर्षति तं प्रदेशमाश्रयेद्वर्षनिवारणार्थं छत्रवस्त्रादि न गृह्णीयात् । हेमन्ते शीतोपलक्षणार्थम् । एतेन शिशिरेऽप्येष एव विधिः । **आर्द्रवासस्त्वं क्रमशः** क्रमेण ।। २३ ।।

उपस्पृशंस्त्रिषवणं पितॄन्देवांश्च तर्पयेत् ।।
तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ।। २४ ।।

उपस्पर्शनं स्नानम् । अन्यदपि ऊर्ध्वबाह्वादि मासोपवासद्वादशरात्रादि तपः । **उग्रतरं** प्रकृष्टतरं शरीरपीडाजननं कुर्वन् **शोषये**च्छरीरम् ।। २४ ।।

अग्नीनात्मनि वैतानान्समारोप्य यथाविधि ।।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ।। २५ ।।

विताने भवा **वैतानाः** श्रौताः । तान्समारोपयेद्भस्मपानादिविधानेन । आत्मनि समारोपणविधिश्च श्रवणकादवगन्तव्यः । चिरकालं यदा तपश्चरितं भवति सप्तत्यवस्थां वयः प्राप्तं तदा वानप्रस्थ एव सन्ननग्निरनिकेतः पर्णकुटीं[1] निवासार्थी जह्यात् । क्व तर्ह्यासीत उपरिष्टाद्वक्ष्यति " वृक्षमूलनिकेतने " इति (श्लो. २६) । मुनिः स्यादिति संबध्यते । तेनायमर्थ उक्तो भवति । वाङ्नियमं कुर्यादिति मौनव्रतधारी नियतवागुच्यते लोके । **मूलफलाशनः** अन्यान्ननिवृत्त्यर्थमेतत् । नीवारादीन्यारण्यान्यपि नाश्नीयात् ।। २५ ।।

अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ।। २६ ।।

सुखप्रयोजनेषु वस्तुषु प्रयत्नं[2] न कुर्यात् । आतपपीडितः छायां नोपसर्पेत् । शीतार्दितो नाग्निं समिन्धीत । यदि तु दैवोपपादितादित्यतापादिना शीतादिदुःखनिवृत्तिर्भवतीत्यत्रैव तद्दुःखापनोदः क्रियते । न निषिध्यते । वर्षादिकालादन्यत्रैतद्विधीयते । तत्र प्रतिपन्नस्य धर्मस्य विधानात्[3] । अथवा व्याधितस्तस्यौषधप्रयत्नो निवार्यते । व्याधिनिवृत्तिरपि सुखमुच्यते । अतस्तन्निवृत्त्यर्थं यत्नं न कुर्यात्[4] । **धराशयः** केवलैस्तृणैराच्छादिते स्थण्डिले शयीत । **शरणे**ष्वाश्रयेषु गृहवृक्षमूलादिषु ममकारमात्मीयाभिनिवेशं न कुर्यात् । वृक्षमूलानि निकेतनं गृहस्थानीयं कुर्यात् । तदसंभवे शिलातलगुहादयोऽपि विहिताः ।।२६।।

---

१ ड—पत्रकुटी । २ फ—यत्नं । ३ ख—ड—प्रतिपन्नस्य विधानाम् । ४ फ—यत्नं कुर्यात् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ २७ ॥

पञ्चम्यर्थे सप्तमी । तापसेभ्यः फलमूलासंभवे **भैक्षमाहरेत्** । गृहमेधिभ्यो गृहस्थेभ्यो वा वनवासिभ्यः । **यात्रिकं** यावता सौहित्यं भवति ॥ २७ ॥

असंभवे तु

ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान्वने वसन् ॥
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ २८ ॥

ग्रासग्रहणान्न मूलफलभिक्षैव ग्राम्यान्नाशनमन्यासंभवेऽनेनानुज्ञातम् । गृहीत्वा पुटेनैव पाणिना भाजनरहितेन **शकलेन** शरावाद्येकदेशखण्डेन ॥ २८ ॥

एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् ॥
विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥ २९ ॥

एता **दीक्षा** नियमानन्यांश्चान्तर्जलस्थानचक्षुर्निमीलनादिकं सेवेत । **श्रुतीरौपनिषदीः** रहस्याधिकारपठितानि वेदवाक्यानि अधीयीत चिन्तयेद्भावयेच्चाऽऽत्मसंसिद्धये ब्रह्मप्राप्त्यर्थं वा उपासना उक्ताः । **विविधा** इत्यनुवादः ॥ २९ ॥

ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः ॥
विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥ ३० ॥

अविशेषेणोक्ता अन्याश्च सेवेत । शाक्यपाशुपतादिदीक्षादिसेवनमपि प्राप्तं तन्निषेधति । **ऋषिभि**र्महाभारते संतप्य वनेष्वाद्यैः सेविता वर्ण्यन्ते । **ब्राह्मणैश्च गृहस्थै**र्याः सेविताः । तदुक्तम् "उत्तरेषां चैतदविरोधीति" (गौतमीये अ. ३ सू. ९) । **विद्या** आत्मैकत्वविज्ञानं तच्छ्रुतिसेवनेन वृद्धिं नयेत् दृढीकुर्यात् । **शरीरस्य च शुद्धये** आहारनियमदीक्षाः सेवेत ॥ ३० ॥

अपराजितां वाऽऽस्थाय व्रजेद्दिशमजिह्मगः ॥
आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः ॥ ३१ ॥

प्राच्या उदीच्याश्च दिशोरन्तरालमपराजिता दिक् लोकेष्वैशानीत्युच्यते । **दिशमास्थाय** चेतसि निधायैषा मया गन्तव्येति ततस्तामेव व्रजेत् । **अजिह्मगः** अकुटिलगामी । श्वभ्रनदीस्रोतांसि न परिहरेत् । **आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः** । प्राच्या उदीच्याश्च गमनविधिरयम् । यावन्न पतति तावद्वायुभक्षोऽम्बुभक्षश्च स्यात् । **युक्तः** योगशास्त्रैरात्मानं युक्त्वा । तदेतन्महाप्रस्थानमुच्यते ॥ ३१ ॥

---

१ फ–मूलफलासंभवे । २ ड–वनवासिकेभ्यः । ३ फ–प्राणमात्रसौहित्यं, र–याकमात्र– । ४ फ–पत्रपुटेनैव । ५ अ–क–फ–र–क्ष–ब्रह्मप्रात्यर्था या–६ र–वनाद्याद्यैः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आसां महर्षिचर्याणां त्यक्त्वाऽन्यतमया तनुम् ॥
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥ ३२ ॥

पूर्वोक्तानि तपांसि महाप्रस्थानं चानन्तरोक्तं **महर्षिचर्या** । **आसामन्यतमया** नदीप्रवेशेन भृगुप्रपतनेनाग्निप्रवेशेनाहारनिवृत्त्या वा शरीरं त्यजेत् । अस्य फलं **वीतशोकभयस्य** ब्रह्मलोकप्राप्तिः । नरकादिदुःखानुभवः शोकः । भयं नरकं गमिष्यामीति तदस्य व्येति । अव्यवधानेनैव नार्चिरादिक्रमेण ब्रह्मलोकं प्राप्नोति । इह स्थानविशेषो ब्रह्मलोकः स्वर्गादपि निरतिशयस्तत्र **महीयते** पूज्यमान आस्ते । न तु ब्रह्मणः स्वाराज्यं प्राप्नोति लोकग्रहणात् । चतुर्थे ह्याश्रमे मोक्षं वक्ष्यति । न केवलकर्मकृतो मोक्ष इत्याहुः ।

ननु चास्याप्युक्तं " विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीरिति " । आत्मसंसिद्धिश्च आत्मोपासनतया तद्भावापत्तिः । न ह्यन्यः संसिद्धिशब्दस्यार्थ उपपद्यते । औपनिषदीषु श्रुतिषु तद्भाव्यं योगिनामात्मानं " ब्रह्मसंस्थोऽमृतत्वमेतीति " च । अथ सायुज्यं गच्छतीत्यादि । अथोच्यते । अन्या अपि तपःसिद्धयः श्रूयन्ते । " स यदि पितृलोकवासो भवति " इत्यादि संकल्पितार्थोपपादिता सार्ष्टिता सालोक्यं च पुरुषस्य भविष्यति । न पुनर्मोक्ष इति । तदयुक्तं विशेषाभावात् । यथैव परिमितफलासूपासनास्वधिक्रियते एवममृतत्वप्रासावपि । न क्वचिच्छ्रूयते परिव्राजकेनैवोपासनान्यद्वैतविषयाणि कर्तव्यानि ।

ननु च " त्रयो धर्मस्कन्धाः" इत्युपक्रम्य " यज्ञोऽध्ययनं दानम्" इत्यनेन गृहस्थधर्मा उक्ताः । तप एवेत्यनेन वानप्रस्थः । ब्रह्मचार्याचार्यकुलवासीत्यनेन नैष्ठिकः । ब्रह्मसंस्थ इत्यनेन परिव्राजकः । एतेषां त्रयाणां पुण्यलोका उक्ताः । पारिशेष्यादेतद्व्यतिरिक्तस्यामृतत्वम् । नैवम् । ब्रह्मणि संतिष्ठते प्रयतते तत्परस्य ब्रह्मसंस्थस्य यौगिकत्वादस्य शब्दस्य । ननु च यदि सर्वेषामधिकारस्तदैतावदेव वक्तव्यं ब्रह्मसंस्थोऽमृतत्वमेतीति । नैवम् । आश्रमाणां स्वविधिवाक्यावगतं फलं संपत्क्षयिणः पुण्यलोका भवन्तीति ब्रह्मसंस्थस्य तदाश्रमावस्थितस्यैवामृतत्वमपुनरावृत्तिलक्षणं विधीयते । ननु चाद्वैतरूपं ब्रह्मेत्यात्मविदः । स च निवृत्तकर्माख्यः । आश्रमाश्च प्रवृत्तमार्गाख्याः क्रियाकारकफलभेदानुष्ठानात्मकाः । तत्राद्वैतात्मविज्ञाने समानभेदाश्रयाणि च गृहस्थाद्यग्निहोत्रकर्मादीनीति परस्परविरोधः । अत्रोच्यते । समानमेतत् पारिव्राज्येऽपि यमनियमानामिष्टत्वात्ते च भेदाश्रयाः ।

अथाप्युच्येत कर्मसंन्यासिनो निवृत्तिमार्गावस्थायिनो नैव केचिच्छास्त्रार्थविषयः सन्ति । नायं शास्त्रार्थः । अहंकारममकारत्याग एव संन्यासो वक्ष्यते । नाशेषशास्त्रार्थत्यागः । तस्यापि क्षुधाद्युपहतस्य भिक्षादौ प्रवर्तमानस्यास्त्येव क्रियाकारकसंबन्धः ।

फ– + च । २ फ–अर्चिरादिक्रमेण ३ फ–चाप्युक्तं । ४ फ–आत्मोपासनया । ५ फ–यस्तपति । ६ ड–स– पादः । र–पादि । ७ ड–र–उपासनाद्वैतविषयाणि । ड–फ–उपासनाय । ८ ड–अननैव । ९ ड–पुनरावृत्तिलक्षणं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र लौकिके दृष्टार्थभेदे प्रवर्तमानस्य अद्वैतात्मविज्ञानभावनमविरुद्धम् । शास्त्रीये त्वग्निहोत्रादौ विरोधादिति को युक्तकार्येवं वदेत् । अथोच्यते । क्षुधाद्युपहतस्याप्यद्वैतत्यागो विरोधिना भोजनेन तावत्काल एव । यथाऽन्धतमसि चलितस्य गच्छतः कण्टकप्रदेशे पादन्यासः सवितरि पुनरुदिते लब्धप्रकाशस्य पुनर्न्याय्यमेवाध्वन्यस्याकण्टकेऽवस्थानम् । तथा क्षुधाद्युपघाते विच्छिन्नात्मविज्ञानस्य क्षणमालोकस्थानीयायां क्षुन्निवृत्तौ पुनर्दृढसंस्कारवशादद्वैत एवावस्थानमिति । तत्तापसेऽप्यविरुद्धम् । गृहस्थस्यापि पुत्रदारादितयोपासनमविरुद्धम् । बहुव्यापारतस्तु भेदसात्म्यतां गतस्य कुतोऽद्वैतसंस्कारोत्पत्तिः । उक्तं च गृहस्थधर्मेषु "एकाकी चिन्तयेदिति" (अ. ४ श्लो. २५८) । तथा "पुत्रे सर्वं समासज्येति" (अ. ४ श्लो. २५७)।

ननु च "तस्मादुह न पुरायुषः स्वः कामी प्रेयात्" इति श्रुतिस्तत्र कुतो वानप्रस्थस्य शरीरत्यागः । न हि सा श्रुतिर्वानप्रस्थादन्यत्रानया स्मृत्या विषय उपस्थापयितुं शक्यते । बलीयसी हि श्रुतिः सा च स्मृत्यनुरोधेन न संकोचमर्हति । उच्यते । जरसा विशीर्णस्यानिष्टसंदर्शनादिना वा विदिते प्रत्यासन्ने मृत्यौ मुमूर्षतो न श्रुतिविरोधः । एवं हि तत्र श्रूयते "न पुनरायुष"इति । अवस्थाविशेषे ह्यनभिप्रेते मरणे एतावदेवावक्ष्यन् "न स्वः कामी प्रेयादिति" अरिष्टोपदेशश्चोपनिषत्स्वेवमर्थवान्भवति । यस्य त्वेतन्निमित्तं मरणं नास्ति ॥ ३२ ॥

वनेषु च विहृत्यैवं तृतीयं भागमायुषः ॥
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥ ३३ ॥

इतःप्रभृति चतुर्थाश्रममतिः । **तृतीयं भागमिति** । कञ्चित्कालं स्थित्वेत्यर्थः । यावता कालेन तपः सुतप्तं भवति विषयाभिलाषश्च सर्वो निवृत्तः । न हि मुख्यतृतीय आयुषो भाग एवानेन शक्यो ज्ञातुम् । न हि वर्षशतापेक्षाऽऽश्रमाणां यतो वलीपलितापत्योत्पत्तीस्तृतीयाश्रमप्रतिपत्तौ काल उक्तः । न च सर्वस्य पञ्चाशद्वर्षदेशीयस्य तदुत्पद्यते । उक्तं चान्यत्र "तपसि ऋद्धे परिव्रजेदिति" ।

ननु च यथाऽन्येषामाश्रमाणां कालो विवृतो ग्रहणान्तं ब्रह्मचर्यं वलीपलिताद्यवधि गार्हस्थ्यम् । नैवमिह कश्चित्परिच्छेदहेतुरस्ति । यदि यथाश्रुतं तृतीयो भागः समाश्रियेत । यच्च तपसि ऋद्ध इति । तत्रापि कालापेक्षा युक्तैव । न ज्ञायते कियता तपसा ऋद्धिर्भवति । अतः कालपरिच्छेदो न वचनार्हः । उक्तमत्र न शतवर्षापेक्षया

१ ङ–वर्तमानस्य । २ क–र–ङ–द्वैतत्यागो । ३ फ–वशादेवावस्थान । ४ र–वशातद्वैत एवावस्थानमिति । ५ र–पुत्रदारादिस्तथोपासनविरुद्धं । क्ष–तथोपादान । ६ फ–बहुव्यापारः । ततस्तु । ७ अ–क–ङ–क्ष–आश्रममिति । ८ अ. ६ श्लो. २ । ९ ङ–तपःसिद्धेः परिव्रजेत् । १० फ–परिच्छेदे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृतीयायुर्भागनिश्चयः संभवति । उक्तश्च कालः कायपाके प्रव्रज्या प्रतिपत्तव्या । यावता तपसा यावति च वयसि पुनर्मदवृद्धिर्नाशंक्यते तदा परिव्रजेत् । **विहृत्यासित्वा** यथोक्तं विधिमनुष्ठायेति यावत् । संगत्यागश्च ममतापरिग्रहः एकारामता ॥ ३३ ॥

आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ॥
भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते ॥ ३४ ॥

समुच्चयपक्षमुपोद्बलयति । **आश्रमादाश्रममिति** । गृहस्थाश्रमाद्वानप्रस्थाश्रमं गत्वा **हुतहोम** उभयोरप्याश्रमयोर्यदा **जितेन्द्रिय**स्तदा परिव्रजेत । **प्रेत्य वर्धते** मृत्वा विभूत्यतिशयं प्राप्नोति । **भिक्षाबलि**दानेन **परिश्रान्तः** चिरम् । आश्रमधर्मानुवादोऽयम् ॥ ३४ ॥

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ ३५ ॥

अपाकरणम् ऋणसंशुद्धिः । **मनो मोक्षे निवेशयेत्** । मोक्षशब्देन प्रव्रज्याश्रमो लक्ष्यते । तत्र प्राधान्येन मोक्षैकफलतोच्यते । न तथाऽन्येष्वाश्रमेषु । अतो मोक्षः परिव्रज्या ॥ ३५ ॥

कानि पुनस्तानि त्रीणि ऋणान्यत आह

अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः ॥
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ ३६ ॥

" त्रिभिर्ऋणैर्ऋणवाँ जायते । यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेनर्षिभ्यः " इति श्रुत्यनुवादिनी स्मृतिरियम् ।

ननु च " गृही भूत्वा प्रव्रजेदथवेतरथा, ब्रह्मचर्यादेव प्रव्रजेत् " इति **जाबालश्रुतिः** । उच्यते । उत्पत्तिमात्रमाश्रित्योक्तमुदाहरति । तत्रेदं विरुध्यते " अनुत्पाद्य तथा प्रजामिति " । यद्येषा श्रुतिरस्ति किंतर्हि इदमुच्यते । प्रत्यक्षविधानाद्गार्हस्थ्यस्येति प्रव्रजेदिति । न तु प्रव्रजितेनेमानि कर्माणि कर्तव्यान्यनया वेतिकर्तव्यतयेत्येतन्नास्ति गृहस्थस्य त्वग्निहोत्रादीनि साङ्गकलापान्याम्नातानीत्येतदभिप्रायमेतत् । ये त्वेतां श्रुतिमदृष्ट्वा स्मार्ता एव नैष्ठिकादयस्ते च गृहस्थाश्रमेण प्रत्यक्षश्रुतिविधानेन बाध्यन्ते । ये च क्लीबाद्यनधिकृतविषयतया स्मृतिवाक्यानामर्थवत्तां वर्णयन्ति तेषामभिप्रायं न विद्मः । यदि तावदाज्यावेक्षणविष्णुक्रमाद्यङ्गाशक्तौ श्रौतेषु नाधिक्रियते यतस्तथाविधाङ्गयुक्तं कर्म संपादयितुं समर्थस्तं प्रत्यधिकारश्रुतीनामर्थवत्त्वे जाते न तदसमर्थमपि कुर्वीतेति । यद्येवं स्मार्तेष्वपि नैष्ठिकस्य गुर्वर्थमुदकुम्भाद्याहरणं भैक्षपरिचरणम् पारिव्राज्येऽपि न द्वितीयामपि रात्रिं ग्रामे वसेदिति कुतः पंग्वन्धयोः स्मार्तकर्मक्रमाधिकारः । उपनेयनं चैषा-

---

१ ड–यतेन्द्रियः । २ फ–शयेन । ३ फ–द्विराश्रम– । ४ फ–परिव्राज्यकेन । ५ फ–तानि ऋणानि । ६ ड–तु । ७ फ–वान्; " ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः " इति तु श्रुतौ पाठः । ८ अ–क–ख–ड–क्ष–तथाऽऽत्मजानिति । ९ फ–चेति– । १० फ–जो । ११ ख–ण–उपनयता; ड–उपनयनात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मस्ति लिङ्गम् । तत एषां विवाहार्थनं " यद्यर्थिता तु दारैरिति " । यद्यप्युपनयनमादित्यदर्शनमग्निप्रदक्षिणं परीत्येति च विहितं यतो नानुपनीतस्य विवाहसंभवो व्रात्यत्वात् । अतो यावच्छक्यं गुरुशुश्रूषणं विगुणमपि ब्रह्मचर्यमेवमस्ति । क्लीबस्य तु प्रकृतेरनुपनेयतैव । स च पतितश्च न क्वचिदधिकृतः । तस्मादनधिकृतविषयं पारिव्राज्यं नैष्ठिकता चेति न मनः परितोषमादधाति । सत्यं उदितहोमैनिन्दावद्भविष्यति । समुच्चयपक्षमाश्रित्य अनपाकृत्येति निन्दावचनं न पुनः प्रतिषेध एव । अथवा यदाऽकृतदारपरिग्रहस्य प्रव्रज्यायामधिकार इत्येवमेतज्ज्ञेयम् ॥ ३६ ॥

अनधीत्य द्विजो वेदाननुत्पाद्य तथा प्रजाम् ॥
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥ ३७ ॥

यज्ञैराहिताग्निर्नित्यैः पशुसोमैः ॥ ३७ ॥

प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ॥
आत्मन्यग्नीन्त्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ ३८ ॥

प्राजापत्याऽध्वर्युवेदे विहिता । तस्यां च सर्वस्वदानम् विहितम् । तां कृत्वाऽऽत्मन्यग्नयः समारोप्यंते । समारोपणेऽपि विधिस्तत एवावगन्तव्यः । सार्ववेदसं दक्षिणाऽस्यास्तीत्यन्यपदार्थः । वेदो धनं तत्सर्वं देयम् । इदमर्थे विहितः स्वार्थिको वा प्रज्ञादेराकृतिगणत्वात् । अन्ये तु पुरुषमेधं प्राजापत्यामिष्टिमाहुः । तत्र " ब्रह्मणे ब्राह्मणमालभत " इति प्रथमः पशुर्ब्रह्मा च प्रजापतिः मुख्येन व्यपदेशप्रवृत्तेः प्राजापत्यः पुरुषमेधः सर्वस्वदानमग्निसमारोपणं प्रव्रज्या च तत्रैव विहिता । एवं हि तत्र श्रुतिः "अथात्मन्यग्नीन्त्समारोप्य तत्रारोपणेनादित्योपस्थानादपेक्षमाणैररण्यमभिप्रेयात्तदैव देवमनुष्येभ्यः स्थिरो भवतीति " । ये त्वात्मन्यग्नीन्त्समारोप्य प्रव्रज्यया व्यपदिष्टा अथाह एत एव आत्मनो यज्ञा इत्यतस्तन्मरणात्तस्यै दत्ता आत्मन्येव समारोपिता भवन्ति । अतो भार्यामरणपक्षे प्रव्रज्या नावश्या " पुनर्दाराक्रियेति " तत्र किंतु तस्याः पूर्वमरणे भार्यायै दत्वाऽग्नीनन्त्यकर्मणीति पठितमिति वक्तव्यमिति पौरुषेयो ह्ययं ग्रन्थो न वेदो येनोक्तमुपालम्भमर्हतीति परिहारः स्यात् ॥ ३८ ॥

यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ॥
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥ ३९ ॥

गार्हस्थ्यनिन्दया चतुर्थाश्रमप्रशंसा । यज्ञे हि पशवो हन्यन्ते । " प्ररोहधर्मकाश्चेतना" इति दर्शने तृणौषधीनां छेद इत्येतद्भूतभयम् । तद्गृहात्प्रव्रजितस्य समारोपिताऽग्नेर्ना-

१ ङ–एषामस्ति । २ अ–प्रकृतेऽनुप ३ फ–उदितहोमेन तावद्भविष्यति; ङ-ण-क्ष–उदितहोमानि । ४ फ–सुतान् । ५ ख–ङ–सर्ववेदसी । ६ फ–प्रवृज्या । ७ फ–योऽदत्त्वा । ८ ख–ण–निन्दां । ९ ङ–यज्ञेषु; ख–यज्ञैरिह । १० फ–इत्येतभयम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तीत्युक्तम् । **अभयं सर्वभूतेभ्यो दत्वेति** अनेनाशुष्काणां तृणपलाशानामनुपादानमाह । **तेजोमया** नित्यप्रकाशा । उदयास्तमयौ यत्रादित्यस्य न विभाव्येते । यथोक्तम् " अत ऊर्ध्वमादित्यो नैवोदेति न वाऽस्तमेति" इत्युपनिषात्स्वित्येवमाहुर्वचांसि ॥ ३९ ॥

यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ॥
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥ ४० ॥

एष एवार्थः पुनरुक्तः । **देहाद्विमुक्तस्य** वार्तमानिकं शरीरं यस्य पततीत्यर्थः॥४०॥

आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ॥
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ४१ ॥

पवित्रैर्मन्त्रजपैर्दर्भकमण्डलुकृष्णाजिनै**रुपचितो** युक्तः । अथवा पावनैः कृच्छ्रैः । **मुनिर**किंचिद्वादी । **समुपोढेषु** केनचित्**कामेषु** स्पृहणीयेषु मृष्टभोजनादिषु यदृच्छातो गीतादिशब्देषु संनिहितेषु पुत्रादिषु वा समुपस्थितेषु **निरपेक्षो** भवेत् । नैतांश्चिरं स्निग्धेन चक्षुषा पश्येन्नाकर्णयेन्न तैः सहासीत ॥ ४१ ॥

यत आह

एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ॥
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥ ४२ ॥

एकारामताऽनेन विधीयते । **एक एवे**त्यनेन पूर्वसंस्तुतपरित्याग उच्यते । **असहायवानिति** भृत्यादेः पूर्वस्यापि परिग्रहो न कर्तव्यः । संविद्रागद्वेषविनिर्मुक्तस्य सर्वसमता एवं भवति । अन्यथा एष एव भृत्यादिरन्तिकस्थः तत्रैवं बुद्धिः स्यादयं मदीयो नायमिति । एष एव संगोऽवैधिहेतुर्यथा त्वेष संपत्स्यते यदा **न जहाति न** कश्चित्पुत्रादिस्तेन त्यक्तो भवति । अतो **न हीयते** न वियुज्यते पुत्रादिभिस्तद्वियोगदुःखं नासादयति । इतरथा संगात्पुनस्त्यागे महद्दुःखं न तस्य कश्चिन्म्रियते स न कस्यचिदिति ॥ ४२ ॥

अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ॥
उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः ॥ ४३ ॥

श्रौतानामग्नीनां पूर्वमभाव उक्तोऽनेन गार्हस्थ्यस्योच्यते । अथवा पाकप्रतिषेधोऽयमग्न्यर्थस्य चेन्धनस्य शीतादिनिवृत्तिप्रयोजनस्य । **निकेतो** गृहम । **ग्राममेकां रात्रिमन्नार्थमाश्रयेत्** । कृतप्रयोजनोऽरण्ये शेषं कालम्। एषा चैकरात्रिर्ग्रामे **गौतमेनोक्ता** । तत्र यदि समया ग्रामं तदाऽन्नार्थ एव प्रवेशः । अथ दूरतस्तदैकां रात्रिं वसेत् ।

---

१ क–तस्य; ग–नास्य; ख–नास्ति । २ क–पुत्रादिषु– ३ ख–धर्मं । ४ क–पूर्वसंस्तुपरित्याग । ५ ख–ड–बन्धहेतुः । ६ क–ऽशंकुसुको ।

For Private And Personal Use Only

द्वितीयामरण्ये संभावयेत् । **उपेक्षकः** अचेतनेष्वपि भावेषु कमण्डल्वादिषु न तन्निजायत्तं कुर्यात् । अथवा शरीरस्य व्याधिप्रतीकारं[1] न कुर्यात् । अन्ये तु सङ्कुसुक इति पठन्ति । अस्थिरः सङ्कुसुकः[2] तन्निषेधेन चित्तवृत्तिधैर्यमुपदिशति । **मुनिः** संयतवागिन्द्रियः । **भावेन** चित्तेन **समाहितः** मनसा विकल्पान्वर्जयेत् । भावेनैव समाहितो न वाङ्मात्रेण॥४३॥

कपालं वृक्षमूलानि कुचैलम्[3]असहायता ॥
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ ४५ ॥

भिक्षाभोजनपात्रं **कपालं** कर्परम् । निकेतो **वृक्षमूलानि** । **कुचैलं** स्थूलजीर्णवस्त्रखण्डम् । **समता** शत्रौ मित्रे उभयरूपरहिते स्वात्मनि च । **मुक्तस्य लक्षणं** अचिरप्राप्यता[4] मोक्षस्योच्यते न पुनरियतैव मुक्तो भवति ॥ ४४ ॥

*** नाभिनन्देत मरणं नाभिनन्देत जीवितम् ॥**
कालमेव प्रतीक्षेत निर्वेशं[5] भृतको यथा ॥ ४४ ॥

अनेनाक्रोशिताऽभिहिता[6] । **न मरणं कामयेत** । नापि[7] ज्ञानातिशयलाभार्थी जीवितं कालमेव प्रतीक्षेत । यद्यदा भविष्यति तत्तदैवास्त्विति चिन्तयेत् । **यथा भृतको निर्वेशं** भृतिं गृहीत्वा कालं परिपालयति । अहरेतस्य[8] मया कर्त्तव्यमिति नान्तरा विच्छेदे मूल्यलाभः एवं संसारक्षयाच्छरीरपाते मोक्षो भवत्येतेन विधिना न स्वेच्छावृत्तेन ॥ ४५ ॥

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ४६ ॥

चक्षुषा मार्गं निरूप्य यस्मिन्प्रदेशे प्राणिनः पीडां न गच्छन्ति तत्र पादं निदध्यात् । **सत्यां वाचं** वदेदिति सिद्धे पूतग्रहणं सत्यशब्दस्योपलक्षणतां दर्शयति । तेनापविद्धं भवति । मनसा पूतो **मनःपूतः** सदा स्यात् । परद्रव्याभिध्यानादि न कुर्यात् ॥ ४६ ॥

---

१ फ–प्रतिकारं । २ फ–स्वशङ्कुसुक । ३ फ–कुचेलम् । ४ फ–अविलम्बाप्यतो ।

* ग्रैष्म्यान्हैमान्तिकान्मासानष्टौ भिक्षुर्विचक्रमेत् ॥
दयार्थं सर्वभूतानां वर्षास्वेकत्र संवसेत् ॥ १ ॥
नासूर्यं हि व्रजेन्मार्गं नादृष्टां भूमिमाक्रमेत् ।
परिभूताभिरद्भिस्तु कार्यं कुर्वीत नित्यशः ॥ २ ॥
सत्यां वाचमहिंस्रां च वदेदनपकारिणीम् ।
कल्कापेतामपरुषामनृशंसामपैशुनाम् ॥ ३ ॥

५ फ–निर्देशं । ६ ख– अक्रोशिता । ७ फ–नाप्यतिशय । ८ फ–आहरेत्तस्य ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ४७ ॥

शास्त्रमतिक्रम्य यः कश्चिद्वदति सोऽतिवादः अप्रियाक्रोशः । **तितिक्षेत** क्षमेत न प्रत्याक्रोशेत् न च मनसा क्रुध्येतेत्[1]यतो वक्ष्यति "आ क्रुष्टः कुशलं वदेदित्" इति । अनेन मनसः[2] क्षोभो विनिवार्यते न कुशलशब्दाभिधानं विधीयते । तदा हि मिथ्यावादी स्यादन्यद्धृदयेऽन्यत्तु वाचा वदन्नावमन्येतेति । अवज्ञानं न कस्यचित्कुर्यात् । गुर्वादिपूजनं नातिक्रामेत् । न चेमं देहं यदि कश्चित्प्रहरेच्छरीरे तेन सह वैरं कुर्यात । किमनेन मे शरीरेण नष्टेनानष्टेन वा तेजोमयं मे शरीरं भवत्विति ध्यायेत् ॥ ४७ ॥

क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ४८ ॥

सप्तद्वाराणि च धर्मार्थौ धर्मकामावर्थकामौ कामार्थौ कामधर्मौ अर्थधर्मौ त्रिवर्ग इति । अत्राऽवकीर्णां विक्षिप्तामेतद्विषयां न वाचं वदेदनृतां भेदाश्रयत्वादेतेषां भेदस्य सर्वस्यासत्यत्वादनृतामित्युक्तम् । किंतर्हि मोक्षाश्रयामेव वदेत् । अथवा सप्त शीर्षण्याः प्राणास्ते वाचो द्वाराणि अथवा षडिन्द्रियाणि बुद्धिः सप्तमी । एतैर्गृहीतेष्वर्थेषु वाक् प्रवर्तते । सुऽविभक्तय[3] इत्यन्ये ॥ ४८ ॥

अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ॥
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ४९ ॥

आत्मतत्वप्रतिविधानापादानपरमे[4]काग्रत्वम**ध्यात्मं** तद्रतिस्तदर्थचिन्तापर आसीत । **निरपेक्ष** इत्युक्तानुवादो विषयान्येभ्यो धर्मेभ्योऽनुष्ठानार्थः । **निरामिषो** निःस्पृहः । **मांसमामिषम्** । तेन स्पृहां लक्षयित्वा प्रतिषेधस्तत्रातिशयवती प्राणिनां स्पृहा । अन्यत्प्रागुक्तमेव ॥ ४९ ॥

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ॥
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ ५० ॥

उत्पाता दिव्यान्तरिक्षभौमा उपरागग्रहोदयकेतूदयदिग्दाहावनिचलनादयस्तत्फलं न कथयेद्भिक्षालिप्सया । **निमित्तं** गृहादौस्थित्यादि । नक्षत्रविद्या अद्य कृत्तिकाकर्मण्यायात्रानक्षत्रमित्यादि । **अंगविद्या** हस्तलेख्यादिलक्षणम् । **अनुशासनं** राज्ञस्तत्प्रकृतीनां । एवं युक्तं वर्तितुं एतेन सन्धिरनेन विग्रह इदं त्वया किमिति कृतमिदं किन्न करोषीतिवादोऽभिमानहेतुकः शास्त्रार्थविप्रतिपत्तौ साधनदूषणाद्युपन्यासः ॥ ५० ॥

---

१ क–क्रुध्येदित्यतो । २ ख–मनंक्षोभो । ३ क–सुप्तविभक्तय । ख–सुविभक्तय इत्यन्ये
४ क–प्रतिबोधापादनपरम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ॥
आकीर्णं भिक्षुकैर्वाऽन्यैरागारमुपसंव्रजेत् ॥ ५१ ॥

आकीर्णं यत्र बहवोऽन्नलाभाय संघटितास्तं प्रदेशं भिक्षार्थं वर्जयेत् ॥ ५१ ॥

क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ॥
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ॥ ५२ ॥

पात्राणि वक्ष्यति । दण्डास्त्रयः । त्रिदण्डी हि सः । **कुसुम्भः** कमण्डलुः । न महारजनम्[1] । उत्तरश्लोकार्धस्यार्थः प्राग्विहित एव ॥ ५२ ॥

अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ॥
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ ५३ ॥

अतैजसानि सुवर्णाद्यघटितानि पात्राणि भिक्षाया जलस्य च **निर्व्रणान्य**च्छिद्राणि । अद्भिरम्मात्रेण चमसानामिव निर्लेपत्वे । लेपसंभवे तु तदपनयोऽपि द्रव्यान्तरेण कार्य इति ग्राह्यम् ॥ ५ ॥

अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा ॥
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥ ५४ ॥

वैदलं वंशादिविदलकृतम् । **यतिपात्राणि** भिक्षार्थं जलार्थं च ॥ ५४ ॥

एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे ॥
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ ५५ ॥

भैक्षकार्यस्य भोजनस्यैककालता विधीयते । न पुनर्भैक्षचरणस्यैव । द्विर्भोजनप्रतिषेधोऽत्राभिसंहितस्तत्र सकृच्चरित्वा द्वितीयस्मिन्काले शेषयित्वा न भुञ्जीत तदर्थो भोजनप्रतिषेधः । अत एवाह **न प्रसज्जेत विस्तर इति** । द्वितीयभोजनार्थितया हि विस्तरः प्राप्नोति । एकारामस्य न भृत्यार्थेन भैक्षविस्तर इति हेतुं ब्रुवन् सकृद्भोजनेऽपि सौहित्यं निषेधति ॥ ५५ ॥

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ॥
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥ ५६ ॥

भुक्तवन्तो जना यस्मिन्काले स **भुक्तवज्जनः** । एवं विधूमादयोऽपि । शरावाणां संपात उच्छिष्टानां भूमौ त्यागः स यदाऽतीतो भवति । सर्वेणैतेन प्रथमे पाककाले भिक्षादानावसरो निवृत्तो यदा भवति तदा भिक्षितव्यमित्याह । **विधूम** इत्यादिना द्वितीयपाकप्रवृत्तिमाह । सन्ना मुसला[2] अवघातान्निवृत्ताः स्थापिताः ॥ ५६ ॥

अलाभे न विषादी स्याल्लाभे[3] चैव न हर्षयेत् ॥
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ ५७ ॥

---

१ **ण**–महारजनी । २ **फ**–मुसलावघट्टनान्निवृत्ताः । ३ **ङखण**–लाभश्चैनं न हर्षयेत् ।

For Private And Personal Use Only

ईदृशे काले[1] यदि कुतश्चिन्न लभ्यते तदा विषादश्चित्तपरिखेदो न ग्रहीतव्यः । लाभालाभयोर्हर्षविषादौ न ग्राह्यौ । **प्राणयात्रिकी** प्राणधारणार्था **मात्रा** परिमाणं भैक्षस्य[2] । अनेनैतद्दर्शयति । भैक्षासंभवे प्राणयात्रा मूलफलमूलोदकादिभिरप्यपरिगृहीतैः[3] कर्तव्या । मात्रा पात्रदण्डादि तत्र **सङ्गः** प्रयत्नेनोपार्जनम् । ततो विनिर्गतो निवृत्तः । अकाम इति यावत् ॥ ५७ ॥

अभिपूजितलाभांस्तु[4] जुगुप्सेतैव सर्वशः ॥
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥ ५८ ॥

अभ्यर्च्य यं ददाति सोऽभिपूजितलाभः । तं जुगुप्सेतेति निन्देद्गर्हेत । अतश्च निन्दितं न समाचरेत् । **सर्वशः** सर्वकालं एकमप्यहस्तादृशं भैक्षं न गृह्णीयात् । उत्तरेऽर्थवादः । न हि मुक्तस्य बन्धसंभवः[5] ॥ ५८ ॥

अल्पान्नाभ्यवहारेण[6] रहःस्थानासनेन च ॥
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ ५९ ॥

रहो निर्जनो देशस्तत्र **स्थानासने** कर्तव्ये । एकारामतायाः फलमिन्द्रियजयोऽनेन प्रदर्श्यते । अथवा निष्कुतूहलताऽनेनोच्यते । यत्र बहवो जनसंघाताः स्त्रीपुंसात्मका विचित्राभरणा दृश्यंते न तत्र क्षणमपि तिष्ठेत् ॥ ५९ ॥

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ॥
अहिंसया च भूतानाममृतत्वाय कल्पते ॥ ६० ॥

निरोधः स्वविषयप्रवृत्तिप्रतिबन्धः । **अमृतत्वाय कल्पते** अमृतत्वाय समर्थो योग्यो[7] भवतीत्यर्थः । यथा[8] आत्मज्ञानमेवमेतदपीति दर्शयति ॥ ६० ॥

अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः ॥
निरये चैव पतनं यातनाश्च यमक्षये ॥ ६१ ॥

परमार्थभावनाप्रसंख्यानमिदमुच्यते दुःखात्मकसंसारस्वरूपनिरूपणम् । कथं नामायं प्रव्रज्याभैक्षचर्यादिशरीरक्लेशांस्तु सुहृत्स्वजनपुत्रदारधनविभवत्यागदुःखहेतुं परिणमय्य[9] विरोधतः[10] स्वच्छन्दतश्चाविगुणमनुष्ठास्यति । मनुष्याणां गतयो[11] दुःखबहुलाः कर्मदोषेभ्यः प्रतिषिद्धसेवनेभ्यो हिंसास्तेयपारदार्यपारुष्यपैशुनानिष्टसंकल्पादिभ्यः[12] समुद्भवन्ति । इहैव जीवलोके दारिद्र्यव्याधिपरिभवाद्वा वैकल्यादयो[13] गतयः[14] फलोपभोगादयः[15] । अमुत्र **निरये** नरके

१ फ–काले कुतश्चिन्न । २ फ–भैक्ष्यं यस्य । ३ फ–अनन्यपरिगृहीतै. । ४ ङ–लाभांश्च । ५ ख–बन्धन । ६ ङ–अभ्यस्ताभ्यवहारेण । ७ खङक्ष–योगी भवति । ८ इदं वाक्यं फ–पुस्तके ६१ श्लोक टीकारम्भतो दर्शितम् । ९ फ–परीगणय्य । अखकङक्ष–परिगणय्य । १० खण–विषश्यषयश्चा धगुणमनुष्ठास्यति । ११ अकखङक्षफ–गतिः । १२ फ–संकल्पादयः । १३ फ–विघल्पादयो । १४ फ–दातव्या, अकखङसण–दातयः । १५ फ–फलोपभोगाः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पतनं मूत्रपुरीषाद्यमेध्यस्थाने कृमिकीटादिजन्म यमगृहे च यातनाः कुम्भीपाकादयः ॥६१॥

तथेदमपरमवेक्ष्यम्

विप्रयोगं प्रियैश्चैव संयोगं च तथाऽप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥ ६२ ॥

अवेक्षेतेति क्रियापदसंभवात् द्वितीया । **प्रियाः** पुत्रादयो बान्धवास्तै**र्वियोगो**ऽप्राप्तकाले मृतैः । **अप्रियैः** शत्रुसंग्रहगमनादिभिः संयोगः । **जरया** चतुर्थे वयस्यवस्थाविशेषो जरा तयाऽ**भिभवनं** शरीराकारनाशः । अशक्तिः इन्द्रियवैकल्यकासश्वासादिव्याधिबाहुल्यं सर्वेषामकाम्यता उपहास्यतेत्यादिर्जराभिभवः । व्याधिभिः प्रागपि जरस उपपीडनं केषांचित् ॥ ६२ ॥

अथ महती तृष्णा एवंस्थितस्यापि भवति एवं तर्हि इदमप्रतीकारं अनिच्छतोऽप्युत्पद्यते

देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवम् ॥
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ६३ ॥

प्राणानामु**त्क्रमण**मन्तर्विच्छेदः । दुःसहा च सा पीडा । **गर्भे च संभवः** । तत्र नानाविधं दुःखं इन्द्रियाणामनुद्भेदात्तमोरूपता कुक्षिस्थस्य मातृसंबंधिनाऽऽहारेण अतिशीतोष्णेन हीनातिमात्रेण वैद्योक्ता पीडा । **योनिकोटिसहस्रेषु सृतीः** सरणानि प्राप्तास्तिर्यक्प्रेतकृमिकीटपतङ्गश्वाद्याः क्षेत्रज्ञस्य ।

ननु च विभुरन्तरात्मेष्यते नित्यश्च । तस्य सकलजगद्व्यापिनः कुत उत्क्रमणं क च योनिसरणं संभवोऽपरि गर्भे नित्यस्यानुपपन्नः । उच्यते । अस्ति केषांचिद्दर्शनं यथाऽयमन्तःशरीरमङ्गुष्ठमात्रः पुरुषस्तिष्ठति तन्मात्रमनोबुध्यहंकारात्मकः स यावत्संसारमेति धर्मस्तस्य चोपचितस्य चैतन्यशक्तिराविर्भवति । अतस्तदीयधर्मा अन्तरात्मन उपचर्यन्ते । अथवा तस्य भावार्था ये प्राणादयस्तेषूत्क्रामत्सु समुत्क्रामतीत्युच्यते । एवं संभवोऽपि द्रष्टव्यः । पुनश्चैतद्द्वादशे वक्ष्यामः । किं बहुना ॥ ६३ ॥

अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम् ॥
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥ ६४ ॥

अधर्मात्प्रभव उत्पत्तिः । **दुःखेन** यो **योगः** पीडानुभवः । धर्मे उक्तलक्षणो यः पदार्थस्ततः सुखेनाक्षयेन संयोगः । एतदप्यवेक्ष्यम् । पारिव्राज्यं च मुख्यो धर्म इत्यभिप्रायः ॥ ६३ ॥

१ ण–इत्यादिभिः । २ फ–जरमा । ३ फ–ध्ययम् । ४ फ–प्राणिपीडा । ५ फ–अनुद्भेदकमातुभयतः । ६ फ–चोक्ता; फ त्रिधोक्ता । ७ फ–चित्तस्य । ८ फ–गर्भोभवति । ९ फ–एतदप्यन्यं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूक्ष्मतां चान्वे[1]क्षेत योगेन परमात्मनः ॥
देहेषु चैवो[2]पपत्तिमुत्तमेष्वधमेषु च ॥ ६५ ॥

योगश्चित्तवृत्तिस्थैर्यं यथा **पतञ्जलिना** दर्शितम् (१।२) । तेनात्मनः क्षेत्रज्ञस्य **सूक्ष्मतामन्ववेक्षेत** शरीरादौ प्राणादौ वा नात्मबुद्धिः कर्तव्या । किं तर्हि योगजेन ज्ञानातिशयेन सर्वेभ्य एतेभ्योऽन्तर्बहिस्तत्त्वेभ्यो व्यतिरिक्तो बोद्धव्य इत्येवंपरमेतत् । न तु स्थूलादिविकल्पा आत्मनः सन्ति । यथा चोत्तमेषु देवादिशरीरेष्वस्योपपत्तिः । शरीराधिष्ठातृतया फलोपभोगः सर्वगतस्यापि सतः एवमधमेषु तिर्यक्प्रेतपिशाचादिषु । एकत्वपक्षे परमात्मविभूतय एव क्षेत्रज्ञा इति स्थितिः । अतः परमात्मनो गतीरन्ववेक्षेतेत्युक्तम् ॥ ६५ ॥

भू[3]षितोऽपि चरेद्धर्मं यत्र तत्राश्रमे र[4]तः ॥
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ६६ ॥

भूषितः कुसुमकटकाद्याभरणैः । **धर्मः** परिव्राजकस्य यद्विहितमात्मोपासनादि तद्यत्नतश्चरेत् । यस्मिन्नाश्रमे यो विहितस्तं चरेत् । न त्रिदण्डादिलिङ्गधारणमात्राद्यतिमात्मानं मन्येत । अपि तु **समः सर्वेषु भूतेषु स्यात्** । रागद्वेषलोभान्यत्नतः परिहरेदिति तात्पर्यम् । न लिङ्गत्यागे न भूषणा[5]भ्यनुज्ञानम् ॥ ६६ ॥

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ॥
न नामग्रहणादेव तस्य वारि प्रसीदति ॥ ६७ ॥

कलुषितमुदकं कतकवृक्षफले निक्षिप्ते प्रसीदति स्वच्छशुद्धरूपतामापद्यते । किंतु न तस्य फलस्य नामग्रहणेन तन्निर्मलीभवति । अपि त्वनुष्ठानमपेक्षते । एवं लिङ्गधारणं फलनामस्थानीयं न तावन्मात्रात्सिद्धिर्यावदेकारामतोपासनसर्वसमतादिधर्मो नानुष्ठितः । पूर्वशेषार्थवादः ॥ ६७ ॥

संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ॥
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥ ६८ ॥

यदुक्तं " दृष्टिपूतं [6]न्यसेदिति " तस्य प्रयोजनप्रदर्शनश्लोकोऽयम् । **शरीरस्यात्ययेऽपि** शरीरपीडायामपि सत्यां रात्रावहनि वा तृणास्तरणे शयनार्थमास्तीर्णेऽपि शरीरनिषङ्गोऽनवेक्ष्यादृष्ट्वा कर्तव्योऽस्मिन्व्यतिक्रमे प्रायश्चित्तम् । अथवाऽत्यँ[7]न्तसूक्ष्माः केचन क्षुद्रजन्त[8]वो ये सर्वे शरीरावयवसंवलनमात्रेणैव नश्यन्ति तदर्थमिदम् ॥ ६८ ॥

---

१ ड–चाप्यवेक्षेत । २ फ–समुत्पत्ति । ३ फ–दूषितोऽपि । ४ ड–दसन् । ५ ड–भूषणाधनुज्ञानम् । ६ फ–दृष्टिपूतं पादं न्यसेदिति । ७ फ–अल्पाः । ८ फ–क्षुद्रजन्तवः सर्वे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अह्ना राञ्या च याञ्जन्तून्हिनस्त्यज्ञानतो यतिः ॥
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥ ६९ ॥

जन्तून् क्षुद्रजन्तूनिति द्रष्टव्यम्। तेषां हिंसाया यत्पापं तद्विशुद्ध्यर्थमिति संबन्धः ॥६९॥

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ७० ॥

ब्राह्मणशब्देन जातिधर्मतामाह । न परिव्राजकस्यैव विधिरयम् । त्रयोऽपि त्रिभ्य ऊर्ध्वं फलाधिक्यम्। त्रयस्त्ववश्यं कर्तव्याः। व्याहृतयः "ओंकारपूर्विका" इत्यत्र या उक्ताः। प्रणव ओंकारस्तैर्युक्ताः । प्राणायामकाल एतद्ध्यातव्यम् । एते त्रिविधाः कुम्भकरेचकपूरकाख्याः । तत्र च मुख्यस्य नासिक्यस्य च वायोर्बहिर्निष्क्रमणनिरोधेन कुम्भकपूरकाख्याः अनुच्छ्वसतो बहिर्नैरन्तर्येण वायोरुत्सर्गेण रेचको भवति । अवधिर्द्वितीयाध्याये निदर्शितः । यदि वा तपसां पुनर्यावता कालेन न पीडोपजायते ॥ ७० ॥

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ॥
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥ ७१ ॥

धातवः सुवर्णादयः तेषां ध्मायमानानां सुवर्णमेवावशिष्यते तथेन्द्रियाणां विषयदर्शने यौ प्रीतिपरितापौ जायेते तयोर्यत्पापं तस्य दाहः प्राणनिरोधात् । प्रीतिपरितापोत्पत्तिर्मुमुक्षोर्निषिद्धा । सा तु शरीरिणः त्यक्तसंगस्यापि यादृच्छिकरूपशब्दाद्युपनतौ कयाचिन्मात्रया वस्तुसामर्थ्येन नियतेन्द्रियस्याप्युपजायते अतस्तद्दोषनिवृत्त्यर्थाः प्राणायामाः ॥ ७१ ॥

प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम् ॥
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ७२ ॥

प्राणायामैरित्येतत्पूर्वश्लोकेन दर्शितम् । अपरे त्वाहुः । दोषा रागादयस्तान्दहेत् । कथं प्राणायामैर्दग्धुमेते शक्यन्ते युक्तः पापस्य तैर्दाहः । अदृष्टा च तस्योत्पत्तिः शास्त्रलक्षणं तथा निवृत्तिरपि । रागादयस्तु प्रत्यक्षवेद्याः । * तेषां च निवर्त्यनिवर्तकभावः प्रत्यक्षादिवेद्य एव युक्तो भवितुं न शास्त्रीयः । यदि शास्त्रमेवं वदेद्विरमणशीलं निवर्तयेदिति किंप्रमाणं भवेत् । तस्माद्रागादिनिमित्तमशुभाचरणं दोषशब्देनोच्यते । तस्य कार्यदाहाद्दाहः स्वरूपतो हि स्वरसत एव कर्मणां क्षणिकत्वान्नाशः । एष एव च दाहो न त्वन्यस्येव भस्मीभावः * । एवं च पूर्वश्लोकार्थोऽनुवादः ।

---

१ ङ–अह्नि रात्रौ । २ फ–जातिमैता तामाह; ङ–वर्णतामाह । ३ ख–तपःसंयुते; ङ–संस्तुतेः । ४ ङ–कालेन पीडोपजायते । ५ ङ–तारसुवर्णादयः । ६ फ–यादृच्छिकशब्दाद्युपनतौ । ७ *—* एतच्चिन्हान्तर्गतभागः ख–ण–पुस्तकयोः ७१ श्लोकस्य टीकायामन्तर्हितः । ८ फ–प्राणायामानां । ९ फ–हिमेन शीतं; ण–विरमनसीतं । १० फ–किंप्रमाणी भवेत्; फ–प्रमाणी भवेत् । ११ फ–दाहोदाहः ।

For Private And Personal Use Only

धारणाभिश्च। ननु च किल्बिषं पापं दोषश्च तदेव तत्रैतावद्वक्तव्यम्[1] प्राणायामैर्धारणाभिश्च दोषान्दहेत्। किं किल्बिषमित्यनेन? किल्बिषमिति वाऽस्तु। किं दोषग्रहणेन? उच्यते। दोषग्रहणमवश्यं कर्तव्यं विशिष्टस्य पापस्य प्राणायामैर्दाहो यथा विज्ञायेत न सर्वस्येति। दोषशब्देन हि रागादय उच्यन्ते। अतस्तन्निमित्त एव पापे उपचारो यथोक्तः। एवं तर्हि तदेवं क्रियतां किंकिल्बिषमित्यनेन? पादपूरणार्थमित्यदोषः। तत्रोत्पन्नस्य[2] पापस्य प्राणायामा दहना उच्यन्ते[3]। धारणास्तु दोषानुत्पत्तिमेव[4] कुर्वन्ति। काः पुनरेता धारणाः? शमयमादिभिर्नियमाद्विषयदर्शनाभिलाषेण प्रकृष्यमाणं मनो धार्यते तत्रैव स्थाने नियम्यते। ताश्च विषयगतदोषभावना "अस्थिस्थूणाम्"[5] इत्याद्याः कान्तिलावण्यतारुण्यसंस्थानशौर्यादयः स्त्रीषु दृश्यमाना अभिलाषहेतवः। ते च सविकल्पं प्रत्यक्षग्राह्याः। विकल्पाश्च मनोधाराः। अतो विकल्पान्तरैर्मूत्रपुरीषपूर्णं नामेति तस्मिन्विषयगतदोषभावे कटककर्पटान्वितं स्त्रीद्रव्यं नामाधिकं प्राणिनो यत्प्रयत्नतः परिहर्तव्यमभिलषन्ति याऽप्येषा सुखलेशभ्रान्तिः सा क्षणभङ्गिनी तदासेवनेन घोरा दीर्घकालाश्च यमयातना इत्यादिभिः शक्यन्ते निरोद्धुम्। एतदेव[6] तत्प्रसंख्यानमुच्यते। एवं भोजनादिष्वपि भावयितव्यम्। यदेतच्छर्कराघृतपूरहैयङ्गवीनपायसादि यच्च[7] भैक्षं कदन्नादिभिः सममेतच्छरीरधारणतया[8] विशेषाभावात्कस्याचित्प्रकृतेर्जिह्वाग्रे क्षणलवमात्रवर्तमानस्य विशेषो यः सविशेषतया[9] प्रतिभासेत गन्धर्वनगरप्रख्योऽयं क्षणिकावभासः इति। एवमन्यत्रापि स्पर्शदोषो भावयितव्य इत्येवमुपदिशति।

अन्ये त्वाहुः। कौष्ठ्यस्य वायोर्मुखनासिकासंचारिणः शरीरैकदेशान्तर्हृदयाकाशादभ्यासवशतो धारणं धारणा। ननु च प्राणायामेभ्य एतासां साधारणानां को भेदः। बाहुल्लाटादावपि यथेच्छं व्याहृत्यादिध्यानरहितं धारणा। प्राणायामा रेचनेनाधिक्रियन्त इति विशेषः।

अन्ये तु "मैत्री मुदिता करुणा उपेक्षा एता धारणा" इति मन्यन्ते (योगसू० १।१३)।

"मैत्री कृपा मुदोपेक्षा सर्वप्राणिष्ववस्थिता। ब्रह्मलोकं नयन्त्याशु ध्यातारं धारणास्त्विमाः"॥

तत्र मैत्री द्वेषाभावो न तु सुहृत्स्नेहस्तस्य बन्धात्मकत्वात्। कृपा करुणा चित्तधर्मः। दुःखितजनदर्शनेन कथमयमस्माद्दुःखादुद्ध्रियेतेति समुद्धरणकामना। न त्वहिंसानुग्रहयोरनारम्भ इत्युक्तम्। अत एवेदमुच्यते। चित्तधर्मोऽयमभ्यसितव्यः। मुदिता शोकव्यावृत्तिर्व्याध्यादिनिमित्ते दुःखे नरकादिभयजे वा न तु हर्षः तस्य राग-

---

१ फ—चेत्तत्रैतावद्वक्तव्यम्; ङ—तत्रैव तावद्वक्तव्यम्। २ ङ—उपपन्नस्य। ३ ङ—दह्यन्ते। ४ ङ—ख—रागानुत्पत्तिमेव। ५ अग्रे ७६ श्लोके। ६ ङ—इदमुच्यते। ७ फ—तच्च। ८ क—शरीरधारणफलतया। ९ फ—सहितं।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हेतुत्वात् । उपेक्षा विषय अनुग्राहकेषु उपघाते च प्रसिद्धैव । मनसो वांऽतर्हृदयाकाशे ब्रह्मचिन्तापरतया निश्चलता धारणा ।

प्रत्याहारेण संसर्गमिन्द्रियाणां विषयैः सह सम्बन्धस्तत्र प्रवृत्तिः संसर्गस्तन्दहेत्प्रत्याहारः ततोऽपसरणमिन्द्रियाणां प्रतिबन्धकरणं वा । आश्चर्यरूपेण न कटकादौ रूपवत्स्त्रीसंदर्शने वा स्थगयितव्ये चक्षुषी । अन्यत्र वा दृष्टिरुपनेया । एवं सर्वेन्द्रियेषु । एवं च समाधानं योगिनोऽप्रतिबद्धं भवति ।

ध्यानेनानीश्वरान् गुणान् । गुणान्सत्वरजस्तमांसि । ते चानीश्वराः परतन्त्राः चेतनाधीनमूर्तयः पुरुषस्यानतस्य सुखादिरहितस्य योऽभिमानोऽहं सुख्यहं दुःखीति निर्गुणस्य गुणमन्यताभिमानस्य गुणपुरुषविवेकध्यानेन दग्धव्यः । चिद्रूपः पुरुषो निर्गुणो गुणमयी प्रकृतिरित्येवं गुणपुरुषविवेकः कर्तव्यः ॥ ७२ ॥

स कथं कर्तव्यो ? ध्यानेन किंपुनर्ध्येयमत आह

उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ॥
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥ ७३ ॥

अन्तरात्माऽन्तर्यामी पुरुषस्तस्य गतिः स्वरूपं यथावद्विज्ञेयं सुखदुःखाभिमानो न केवलं मनुष्यजन्मनि किंतर्हि उच्चावचेषु नानाविधेषु भूतेषु तिर्यक्प्रेतपिशाचादिष्वहं ममेति प्रत्ययोऽविद्याकृतो निवर्त्यः । अथवा " कथमयं विभुरन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः सर्वकामः सर्वरसः सर्वगन्धः सर्वस्पर्श इदमभ्यस्यतो विजिघत्सोर्विपिपासोः " । एवंविधेऽपि सुखे दुःखे शरीरस्य शरीरेष्वसर्वभोगतया सोहं नामाहोकर्मणां माहात्म्यं यदयं सर्वात्मकः स्वतन्त्रः परतन्त्रीक्रियते कर्मभिर्नैतानि करिष्ये दुष्टस्वामिस्थानीयानि भृतक इव कर्माणि प्रतिपालयिष्ये यथा भृतकः कश्चित्स्वामिनं निर्बन्धेनाराधयितुं प्रविष्टः सन्यं मन्यते यावदुराधर्ष इव नोदण्डशालिस्तर्जनापरः परुषभाषी नैनं भूयः परिचरिष्यामि यन्मयाऽस्मात्किंचिद्भृत्यादि गृहीतं तदेवास्य कर्मकरणेन शोधयामि एवं ध्यायन्नासीत । कृतानां कर्मणां फलोपभोगेनान्तं यास्यामि अन्यानि च न करिष्यामीत्येवमादि ध्येयम् । तथा किमेते क्षेत्रज्ञाः परमात्मनो विभूतय उत स्वतन्त्राः नैवंपरवान्यः कश्चिदस्तीति वेदान्तनिषेवणादिना निश्चित्य ध्यातव्यम् ।

अन्ये पुनराहुः । ध्यानं च योगश्च ध्यानयोगं तेनांतरात्मनः गतिं संपश्येन्निरूप्योप्यासीत गतिं ध्यानेन योगेन च । अथवा ध्यानार्थो योगः चित्तस्थैर्यं तत्कृत्वाऽऽत्मनो

---

१ फ–हरणम् । २ ख–नटकादौ; ड–नटापेक्षादौ । ३फ–गुणिताभिमानस्सुगुण–। ४ अ–फ–ख–ड–क्ष–निर्वर्त्यः । ५ फ–महात्म्यं । ६ ड–नितम्बेन ।

For Private And Personal Use Only

गतिं संपश्येदुपासनाभिरनपावृतादिगुणविशिष्टं वेदान्ताभिहितरूपं निष्कल्मषमभिमुखीकुर्यात् । अकृता असंस्कृताः शास्त्रेणाऽऽत्मानो यैस्तैर्न शक्यं ज्ञातुम् ॥ १७३ ॥

सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते ॥
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ ७४ ॥

अनन्तरस्य[1] विधेः फलमाह । **सम्यग्दर्शन**मनन्तरोक्तमात्मनो[2] यथार्थज्ञानं तेन **संपन्नः** कृतसाक्षात्कारः **कर्मभिर्न निबध्यते** । **संसारं** नानुवर्तते कृतानां कर्मणां भोगेन क्षयादन्येषामकरणात् । न पुनरनेन केवलात् ज्ञानान्मोक्ष उक्तो भवति । **दर्शनेनाऽऽ**ध्यात्मिकेन वेदान्तोपदिष्टेन यो विरहितः केवलकर्मकारी संसारमेति ॥ ७४ ॥

अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ॥
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥ ७५ ॥

इदं तु ज्ञानकर्मणोः समुच्चयान्मोक्ष इति श्लोकद्वयं ज्ञापकम् । पूर्वेण ज्ञानमुक्तमनेन कर्माण्युच्यन्ते । कानि पुनर्वैदिकानि कर्माणि येषां फलं तत्पदं प्राप्नोतीत्युच्यते । यानि तावत्काम्यानि येषां स्वविधिवाक्ये श्रुतमेव स्वर्गादिफलम् । तद्व्यतिरेकेण फलान्तरकल्पनायामतिप्रसङ्गः । संकीर्णफलताश्रयणं वाऽनर्थकं स्यात् । तावता च वाक्यार्थस्य समाप्तेर्विध्यनपेक्षिततत्पदप्राप्तिलक्षणफलेन कथं संबन्धः । श्रुतेनैवान्वयिना विध्यर्थसंपत्तेर्नै[3] विधिर्नापेक्षते । अत्रोच्यते । अस्त्येवात्र वाक्यान्तरं ' यज्ञेन तदाप्नोतीति ' **रहस्याधिकारे** । ततश्च संयोगपृथक्त्वात्फलद्वयं युक्तम् । अतश्च सर्वेषामेव काम्यानामविच्छिन्नफलयोगिता परमपदप्राप्त्यर्थता च न विरोत्स्यते । तत्र च यागद्वयेन प्रयोगभेदेन स्वर्गापवर्गौ भवतः । न चात्र[4] यज्ञविशेषः श्रुतो येन नित्यानामेतत्फलं स्यान्न काम्यानाम् । अथोच्यते[5] । नित्येष्वश्रुतत्वात्फलावच्छेदस्याविरोधात्तद्विषयता युक्ता । न काम्येषु । तावतैव यज्ञेनेत्यस्य सर्वं विषयत्वालाभादिति चेत् किमत्र फलश्रवणेन ? कर्तव्यतानिष्ठानि च वैदिकानि वाक्यानि । सा च कर्तव्यताऽन्तरेण वैदिकं फलपदं यावज्जीवादिपदैरवगमितेति । तत्रापि फलसंबन्धो नापेक्षित एव कल्प्यमानोऽधिकत्वान्नैरर्थक्यं यायात् । अतो यज्ञेनेति वाक्यमप्रतिष्ठमानं विविक्ते विषये सर्वं यज्ञशब्दवाच्यं नित्यं काम्यं च गोचरयति । न चैतत्फलं काम्यानाम् । अपवर्गकाम इत्यश्रुतत्वात् । एतदभिप्रायमेवोक्तं "कामात्मता न प्रशस्तेति" (अ.२श्लो.२)। **महाभारतेऽपि** (गीता अ २ श्लो.४७) "मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि" इति ॥ अतश्च भेदग्राहपरि[illegible]ष्टितान्तःकरणस्य तृष्णाविद्यावतोऽनिर्मुक्ताहंकारममकारस्याभिसंहितपरिमितफलप्राप्तिः । इ[illegible] त्वनभि[illegible]यफलविशेषचोदितत्वात्कर्तव्यमितिबुद्ध्या वर्तमानस्यापरिमितनिरा[illegible]श[illegible] [illegible]रूपब्रह्म[illegible]प्ति[6] ।

---

१ फ–आन्तरस्य । २ ङ [illegible] न-संपन्नं विधिर्नोपेक्षते । ४फ–न च तत्र । ५ फ-अथोच्यते । ६ फ–५५-

न चैतच्चोदनीयं एकसप्तशतं क्रतवो यावन्तो वा तेषां सर्वेषामनुष्ठानस्याशक्यत्वादनारभ्योपदेशता स्यादिति । यतो दर्शनसंपत्त्यैवात्रानुष्ठानसंपात्तिरेत एवोक्तं " सम्यग्दर्शनसंपन्न " इति (श्लो. ७४)। सर्वे च क्रतवो दर्शनसंपादनीयाः। तथा चोक्तं "ज्ञानेनैवापरे विप्रा यजन्ते" इति । अथवा यांल्लोकानेतीत्यवच्छेदनिर्देशः स्वर्गकामः पुत्रकाम इति । अतीतानादिभेदग्रहवासितान्तरात्मानो दृष्टफललोभेनासत्येनैव प्रधाने पुरुषार्थे प्रवर्तन्ते । यथा बालः पुष्टचर्थे औषधेन शिखा ते वर्धिष्यत इत्यसत्ययैव शिखावृद्धचा प्रवर्त्यत इति केचित् ।

अपरं मतं नित्यान्यत्र कर्माण्यभिप्रेतानि तान्यक्रियमाणानि प्रत्यवायहेतुतया प्रतिबंधकानि । अतस्तैरनुष्ठीयमानैरसति प्रतिबन्धे उक्तं **वैदिकैश्चैव कर्मभिरिति** । यद्यपि तानि न मोक्षार्थतया चोदितानि ।

उग्रैरत्यन्तं शरीरतापहेतुभिः । **तस्य ब्रह्मणः** । **पदं** स्थानं ब्रह्मलोकं **साधयन्ति** स्वीकुर्वन्ति । अथवा तदीयपदं यादृशस्तस्याधिकारः सर्वेश्वरत्वं स्वातन्त्र्यं तद्रूपप्राप्तिरिति यावत् ॥ ७५ ॥

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ॥
चर्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥ ७६ ॥

वैराग्यजननमेतत् । तिष्ठन्तु तावत् कृमिकीटपतङ्गादिशरीराणि जलौको भूमिसूतकोन नान्यदिदं मानुषशरीरं स्पृहणीयत्वेनाभिप्रेतम् । यत्पीताशङ्किनो नित्यभीता मनुष्यास्तन्मूत्रपुरीषकुटीगृहकमिव तदिदानीं कुटीगृहकेन निरूपयति । अस्थीनि **स्थूणा** इव तैरवष्टब्धम् । **स्नायुना बद्धम्** । **मांसशोणिताभ्यां** उपरि दिग्धलेपनम् । उपरि देहचर्मणा अवनद्धं तत उपरि अथवा आच्छादितम् । **पूर्णं मुत्रपुरीषयोः** । ओदनस्य पूर्ण इतिवत् षष्ठी ॥ ७६ ॥

जराशोकसमाविष्टं रोगायतनमातुरम् ॥
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ७७ ॥

जरा च चरमे वयसि शरीरापचयहेतुरवस्थाविशेषः । **आतुरं** नित्यगृहीतं रोगैः । **रजस्वलं** स्पृहयालुः सर्वपदार्थेषु तदसंपत्त्यां च महद्दुःखं सर्वस्मिन्सोढे अप्रतीकारमनिवर्त्यं *अत एतदवेक्ष्यम् । त्यजेदिदं शारीरं भूतानां भूविकाराणां मेदोमज्जाश्लेष्ममूत्रशुक्रशोणितानामयं वासस्ते ह्यत्र वसंति नात्मनोऽयं वासः *सर्वगतत्वात्तस्य अतस्तृप्तता शरीरेण कर्तव्या ॥ ७७ ॥

---

१ फ-रिति । मेवं च- । २ फ-स्वेदजादीनां अन्यदिदं । ३ फ-यत्राशीङ्किन्मेनित्यभिता; अ-च-क-ड-क्ष-भूमिसूतिभूमि । *——*-अयं पाठः अ पुस्तक एव दृश्यते ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ॥
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥ ७८ ॥

यस्तावदयं कुटीरूपको देहस्तस्य दृष्टान्ते **नदीकूलं वृक्ष इति** न स्वेच्छयाऽग्निप्रवेशादिना त्यक्तव्यः । किन्तु तृष्णा तत्र न कर्तव्या । अनुद्दिष्टपूर्वं आपातस्तदा भविष्यति कर्मक्षयात् । वृक्षस्येव कूलस्थस्य न प्रत्युक्तं "नाभिनन्देत मरणम्" इति । (श्लो. ४५) यस्तु लब्धज्योतिर्वशीकृतप्राणसंचारो मोहविकारानिगृहीतमनास्तेन पूर्वमुत्क्रमणं कर्तव्यं **यथा शकुनिर्वृक्षं** त्यजति । ग्राह इव ग्राहः । दुःखहेतुत्वसाम्यात् । तदाह **कृच्छ्रात्** प्राप्तिपूर्वकस्यापि यावच्छरीरं वस्तुसामर्थ्याद्भवत्येव कृच्छ्रपूर्वविप्रतिपत्तावेतदुच्यते ॥ ७८ ॥

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ॥
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥ ७९ ॥

प्रीतिपरिताचकृतश्चित्तसंक्षोभो हर्षशोकादिलक्षणोऽनेनोपायेन परिहर्तव्यः । यत्किञ्चित्प्रियं करोति तन्मम सुकृतस्य विशेष्यते तस्येदं फलं नैष कर्ता मम स्नेहबुद्ध्या प्रियं न चायं मे शात्रवं शक्नोति कर्तुं दुष्कृतं पीडाकरमित्येवं विमृश्य ध्यानयोगेन चित्ते भावयेत् । अतोऽस्य न प्रियकारिणि रागो नाप्रियकारिणि द्वेषो जायते । एवं कुर्वाणः **सनातनं** शाश्वतं **ब्रह्माभ्येति** अभिमुखं प्राप्नोति । अर्चिरादिपथेन न व्यवधीयते । शाश्वतग्रहणादनावृत्तिः प्रतीयते ॥ ७९ ॥

यदा भावेन भवति सर्वभावेषु निःस्पृहः ॥
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥ ८० ॥

चित्तधर्मोपदेशोऽयम् । न स्पृहा कार्याऽभिप्रेतवस्तूपादानपरिहारेण निस्पृहत्वं अपि तु तत्कारणत्यागेन । **भाव**श्चित्तधर्मो वाऽऽत्मनो वाऽभिलाषलक्षणः **सर्वभावेषु** पदार्थवचनो द्वितीयो भावशब्दः । सर्वग्रहणेनावश्यकर्तव्येष्वपि पानभोजनादिषु शरीरस्थितिहेतुष्वभिष्वङ्गो निषिध्यते । न पुनरिच्छा । सा ह्यस्य भाविनी वस्तुसामर्थ्यजा बुभुक्षा पिपासा च । भिन्ना चेच्छा स्पृहातः । रागानुबन्धिनी दैन्यनिमित्ता स्पृहा । इच्छा तु भोजनादौ भुक्तपीताहारपरिणामसमनन्तरं स्वयं उपजायते ॥ ८० ॥

अनेन विधिना सर्वांस्त्यक्तसङ्गाञ्छनैः शनैः ॥
सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥ ८१ ॥

---

१ फ–अनुद्दिष्टोऽपूर्वं । २ ख–ङ–ण–यदा भविष्यति । ३ ख–फ०प्रयुक्तं । ४ अ–ख–ङ–सामान्यात् । ५ अ–ङ–परितापकृच्चित्तसंक्षोभः । ६ फ–यत् । ७ फ–निष्पन्नं अहं भर्ता । ८ फ–एवं शक्नोति कर्तुं यन्ममायमप्रियं करोति तन्ममैव दुष्कृतं– । ९ अ–आभिमुखः । १० अ–अनावृत्तः यतः । ११ अ–स्पृहा च । १२ फ–द्रव्य । १३ अ–ब–ङ–समनन्तरमुपजायते ।

For Private And Personal Use Only

संगांस्त्यक्त्वा सर्वान् । गवाश्वहस्तिहिरण्यदासभार्याक्षेत्रायतनादिषु ममेदमिति बुद्धिः **संगः** । तत्त्यागादेकारामतायाः परिग्रहणेन च । एवं प्रथममुपाश्रित्यैनं प्राधान्येन ततोऽनेन विधिना पूर्वोक्तेन क्रियाकलापेन बाह्याध्यात्मिकेनानुष्ठितेन **ब्रह्मणि** चिद्रूपेऽव-तिष्ठते । न कर्माणि बध्नन्ति । **सर्वद्वन्द्वैः** शुभाशुभकर्मार्थैः सुखदुःखैर्निर्मुक्तो भवति ॥ ८१ ॥

ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितम् ॥
न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ॥ ८२ ॥

ध्याने सति भवति **ध्यानिकम्** । ध्याने क्रियमाणे लभ्यते । किंतद्**यदेतदनन्तर-मभिशब्दित**मुक्तमाभिमुख्येन न तात्पर्येण प्रतिपादितम् । सुकृतदुष्कृतयोस्तयोः प्रिया-प्रियहेतुत्वन्यासः । पुरुषस्य यदप्रियकर्तृत्वं तज्ज्वरस्येव पीडाहेतुत्वमग्नेरिवं दुरुपसर्पण-दग्धृत्वम् । यथा नाग्निदग्धोऽग्निं द्वेष्टि एवं पुरुषमप्यप्रियकारिणं मन्येत न प्रतिषेद्धा स्यात् । एतच्च ध्याने सति एकाग्रे चित्ते भवति । सर्वकालमेतद्धृदयेनाभ्यासितव्यम् । यथा सुख-दुःखे इमे कर्मणः फलं न राजा सुखस्य ग्रामादेर्दाता अपि तु मदीयायासेन प्रथमोपसर्पण-लाभः । पूर्वकृतं पुण्यं कर्म दातृ न राजा । एवं दण्डो नोद्वेजयिता कर्माणि मामुद्वेजयन्ति न राजा नापि शक्तोऽन्यः कश्चित् । एतत्सर्वदा ध्यातव्यं चिन्तयितव्यम् । यद्यपि संसारवैराग्यजननायोक्तमस्थिस्थूणामित्यादि तदपि नित्यं भावनीयम् ।

न ह्यनध्यात्मवित् । अध्यात्मं चित्तमत्रोच्यते । यदेतदभिशब्दितं न वेत्ति न निश्चिनोति नाभ्यासेन भावयति । अन्नक्रियार्थं दलेषु परितुष्टः परिव्राजकस्य या भैक्षचर्या क्रिया ग्रामैकरात्रवासादिश्च न तत्फलं मोक्षाख्यं लभते । यावदस्थिस्थूणादिभावनया भावे-नैव निरभिलापता सर्वत्र नोत्पन्ना यावच्च कर्मसु फलन्यासेन रागद्वेषप्रहाणं न कृतमित्यर्थः । तच्च नित्यं यदा एवं चित्तं युज्यते "तदा भवति नाकस्मादिति" अथवा "ब्रह्मण्येवावतिष्ठते" इति । एतस्य यदेतदभिशब्दितमिति परामर्शः । ब्रह्मण्येवस्थानं ध्यानिकं न तु क्रियानुष्ठानमात्रलभ्यं किंतद्धृच्येयमित्यत आह । **न ह्यनध्यात्मविदिति** । आत्मानमधिकृत्य यो ग्रन्थो वेदान्तादि सोऽध्यात्मं न वेद । अथवाऽऽत्मन्यधि यो निर्वृत्त-स्तदध्यात्मम् । यथाऽयमात्मा देहेन्द्रियमनोबुद्धिप्राणादिव्यतिरिक्तः नैषां नाशे नश्यति । कर्ता कर्मणां भोक्ता तत्फलानां भेदग्राहाकृष्टस्य सर्वमेतद्भवति । यदा त्वयमपहतपाप्मा न दोषैर्न कार्यैः स्पृश्यत एकत्वादेष एव सर्वमिदं न ततोऽन्यद्व्यतिरिक्तमस्ति । प्रभासमात्रं

---

१ फ–परिग्रहप्रहणेन । २ फ–एवं । ३ फ–कर्माणि वक्ष्यति । ४ अ–वा; फ–तात्पर्येण । ५ फ–स्तयोः । ६ फ–अग्निरिव । ७ फ–दग्धत्वं । ८ फ–+भवति । ९ फ–मित्याद्यपि । १० फ–परामर्शनम् । ११ ब्रह्मण्याव । १२ फ–प्राग्भोक्ता । १३ अ–ब–ड–सर्वमेतद्वचनम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृथक्त्वम् । हरिसवर्णसोदकादिका उपनिषदो यो न वेद ध्यानेनैकाग्रया संततया मत्या न दार्ढ्यमुत्पादयति स न यथोक्तं क्रियाफलं लभते । अत आत्मा वेदान्ताभिहितस्वरूपो नित्यमाहारविहारकालं वर्जयित्वा ध्येय इति श्लोकार्थः ।

अथवा यद्यपि प्रव्रज्याधिकारस्तस्यापि गृहस्थस्यापि क्रियाफलग्रहेण निर्देशः यदि क्रियाप्रधानः । अत एतदुक्तं भवति । यद्यप्यग्निहोत्रादीनि कर्माणि कुर्वते गृहस्था रहस्यविद्याविदश्च न भवन्ति या विद्याः कर्मसूपविष्टा उद्गीथा "अथवा यावती उद्गीथमन्वयन्ते" इत्यादिना तेन निपुणाः कर्मकाण्डज्ञा अपि न ततः परिपूर्णफलं चिरकालभावि लभन्ते । एषोऽर्थो वाजसनेयके छान्दोग्ये च श्रुतिद्वये निदर्शितः । "यो वा एतदक्षरं गार्ग्यविदित्वा यजते जुहोति तपस्तप्यते बहून्यपि वर्षसहस्रांण्यंतवदेव तद्भवतीति" । तथा यदेव विद्यया करोति श्रद्धया उपनिषदा तदेव वीर्यवत्तरं भवति । छन्दोग्योक्तयस्तु यथोक्तामध्यात्मोपदिष्टां विद्यां विदित्वा करोति तस्यैव फलातिशयः । उक्तं च "तद्य इत्थं विदुर्य इमेऽरण्ये श्रद्धा तप इत्युपासते" इति (छान्दोग्ये ५।१०।१) । यमभिसंभवन्तीत्यादिविजानतां कर्मकारिणामर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमेषां श्रुतिराह ॥ ८२ ॥

एवमात्मज्ञानार्थं ध्येये विहिते वेदजपो न प्राप्तः तत्साधनतयाऽतस्तं विधत्ते

अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ॥
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥ ८३ ॥

जपमात्रमस्याभ्यनुज्ञायते न पुनर्गृहस्थादिवदभ्यासार्थमध्ययनम् । यज्ञेष्वधि **अधियज्ञं** विधायि कर्म ब्राह्मणम् **आधिदैविकम्** आधिदैवं भवं देवताप्रकाशकमन्त्रास्तेषामेव विशेष **आध्यात्मिकमिति** । "अहं मनुरभवमहं भवमहं रुद्रेभिः" इत्यादि । वेदान्त इति यदभिहितं तदपि कर्मज्ञानसमुच्चयं ब्रह्मत्वाय दर्शयति ॥ ८३ ॥

इदं शरणमज्ञानामिदमेव विजानताम् ॥
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥ ८४ ॥

इदमिति वेदाख्यं ब्रह्माचष्टे । सोऽपि ब्रह्मैव । तथा चोक्तं

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" ॥ इति ।

अध्ययनेविज्ञानं तदर्थानुष्ठानेन निष्णातता । पूर्वस्य विधेरयमर्थवादः । **अज्ञानाम**तदर्थविदां जपादिष्वधिकारेण । तथा च **भगवता व्यासेन** सिद्धिर्जापकान

१ अ–आहारविहारनिबद्धकालान; ख–आहारविहारकालानवर्जयित्वा— । २ अ–सद्धि । ३ ख–चिरकालं । ४ फ–वर्षसहस्राणि तावदेव । ५ फ–परिषदा । ६ फ–विध्याय । ७ फ–अधिदैवं भवं । ८ फ–ब्रह्मत्वाद्दर्शयति । ९ ड–क्ष–अध्ययनं तदार्थानुष्ठाने । १० अ–क–ख–ड–जपादिष्वधिकारेण; क्ष–जपादिष्वधिकारणे; फ–जपादिष्वनधिकारेण ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्शिता । अथवा अज्ञा अनात्मज्ञाः शास्त्रादवगतात्मतत्त्वानवगतात्मतत्त्वा अपि तदुपासनापरा अलब्धचित्तस्थैर्यास्तेषां वेदः शरणं जपेन कर्मानुष्ठानेन तावत्या च विद्यया नरकेषु कीटपतङ्गादियोनिषु चानुपपत्तेः ।

इदमेव विजानतां कथं पुनर्विदुषां शरणमत आह । इदमन्विच्छतां स्वर्गं एतावदेते कर्मकाण्डज्ञा आत्मन्यलब्धमनःप्रतिष्ठा वा तेषां कर्मानुष्ठानात्स्वर्गादिफलं लभ्यते । इतरे त्यक्तसङ्गाः प्रेक्षणीयरागादिदोषज्ञा आत्मतत्त्वोपासनापरास्तेषामानन्त्यमपुनरावृत्तिरिति सर्वेषां वेद एव शरणं नान्यः पन्था अस्तीत्यर्थः ॥ ८४ ॥

अनेन क्रमयोगेन परिव्रजति यो द्विजः ॥
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥ ८५ ॥

क्रमेण योगोऽनुष्ठानम् । आत्मज्ञानकर्मणोः समुच्चये यः क्रम उक्तस्तेन ऋणापाकरणं कृत्वेत्यर्थः । **विधूय पाप्मानम**श्व इव रोमराजिं तथैवात्मविद्यया । यथोक्तं "यथा पुष्करपलाश आपो न श्लिष्यन्त्येवमेतद्विदि पापं कर्म न श्लिष्यतीति" । **परं ब्रह्माधिगच्छति** तद्रूपः संपद्यते निवृत्तभेदग्रह इति विद्याश्रमफलविधिः ॥ ८५ ॥

एष धर्मोऽनुशिष्टो वो यतीनां नियतात्मनाम् ॥
वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥ ८६ ॥

वेदस्य संन्यासः त्यागः स एषामस्तीति **वेदसंन्यासिकाः** । वेदशब्देन यागहोमादेः कर्मणस्त्याग उच्यते । न पुनर्जपत्यागः । आत्मचिन्तनं तु विहितमेव । केवलं धनसाध्याः शरीरक्लेशसाध्याश्च तीर्थयात्रादय उपवासादयश्च निषिध्यन्ते । यानि त्वात्मैकसाधनसाध्यानि सन्ध्याजपादिककर्माणि तेषामनिषेधः । तदेतत्स्वस्थान एव दर्शयिष्यामः । आद्येनार्धेन प्रव्रज्याश्रमोपसंहारः । उत्तरेण वेदसंन्यासिकस्य कर्मोपदेशप्रतिज्ञा ॥ ८६ ॥

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ ८७ ॥

ननु च संन्यासिककर्माणि वक्ष्यामीति प्रतिज्ञयाऽऽश्रमानुक्रमणमप्रकृतं केचिदाहुर्न संन्यास आश्रमान्तरमत्रैवान्तर्भावोऽस्येति दर्शयितुम् । स च कस्मिन्गृहस्थेऽन्तर्भावितः गृहे हि वासस्तस्य । अन्यैस्तु प्रव्रज्यायां संगत्यागसामान्याद्यतो नास्यान्तर्भावे प्रयोजनं पुरुषधर्मैर्यतिधर्मैश्च न यागादावधिकरिष्यति । वैशेषिकैश्च

१ फ–शास्त्रादनवङतात्मत्यात्मत्वात् । अ–क–ड–क्ष–शास्त्रादवयतात्मतत्वा । २ फ–वा वृत्त्या । ३ अ–लाभेन न वेति । इतरे–ड–ख–ण–लाभेन त्वितरे । ४ फ–सङ्गाप्रेक्षणीय । ५ फ–रोमाम्भसि । ६ अ–निवृत्ति; ण–निष्कृत । ७ ण–योग । ८ फ–अतः स्वाध्यायः । ९ ख–ण–संन्यासिकर्माणि ।

For Private And Personal Use Only

स्वशब्दविधानादनाश्रमित्वात् " संवत्सरमनाश्रमीति " प्रायश्चित्तप्रसङ्गा[1]दिति चेत् वचनेनैवास्या व्यवस्थाया विदितत्वात्कुतः प्रायश्चित्त[2]प्राप्तिः । तस्माद्गृहस्थादितुल्यतया संन्यासिकं प्रशंसितु[3]माश्रमान्तरसंकीर्तनम् । तच्च समुच्चयं द्रढयितुं गृहस्थानमवस्थितिरेषामित्यर्थः । **गृहस्थः प्रभवः** स्थितिहेतुरेषामिति विग्रहः ॥ ८७ ॥

सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ॥
यथोक्तकारिणं विप्रं[4] नयन्ति परमां गतिम् ॥ ८८ ॥
सर्वेषामपि चैतेषां वेदश्रुति[5]विधानतः ॥
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ॥ ८९ ॥

इदमयुक्तं वर्तते । वेदशास्त्रश्रुत्या गार्हस्थ्यस्य विधानं प्रतिज्ञायते । इतरेषां च भर्तव्यत्वम् । गार्हस्थ्यस्य प्रत्यक्षश्रुतिविधानेनैवाश्रमान्तराणां सद्भावः । सन्निहिततपःस्मृतिभ्यो बलीयसी श्रुतिः । अथोच्येत नैवायमभिसंबन्धः क्रियते वेदश्रुत्याविधानादित्याभिसंबन्धः । सत्यपि चैतान्विविधाने गृहस्थस्य श्रैष्ठ्यं तद्भरणनिमित्तं स त्रीनेतानित्यनेन प्रतिपाद्यते । तत्र वक्तव्यं कथमाश्रमान्तराणां श्रुतत्वात् श्रौतत्वे च स्पष्टेयं स्मृतिर्विरुध्यते । प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादिना यः संबन्धान्तरसंभवः ।

अथोच्येत "गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्" इति **जाबाल**श्रुतिमपेक्ष्य सर्वाण्येवाश्रुतानीति स्मृतिविरोधस्तावदपरिहृत एव । किं च नैषा श्रुतिर्विधात्री । न ह्येतत् श्रुतं " एवं वने वा विहर्तव्यं[6]मिमानि वनस्थेनैव कर्माणि कर्तव्यानीमानि प्रव्रजितेनेति "। यथाऽऽधानात्प्रभृत्या चरमेष्टी सर्वं गृहस्थकर्म प्रत्यक्षतैव । ना[7]श्रमान्तरणाम् । केवलं नाममात्रं श्रूयते ' गृही भूत्वेत्यादि ' । तस्मात्पूर्वापरविरुद्धं गार्हस्थ्य[8]वेदमूलमाश्रामामाणोमिवोपदेश्य[9]म्[10] । अत्रोच्यते । सत्यमाधानात्प्रभृति गृहकर्माणि प्रत्यक्षश्रुतानि[11] कृतदारपरिग्रहस्य तत्र विवाहे प्रयुक्तिनिरूपणात्किंकर्म श्रुतिभिः प्रयुज्यते अग्निहोत्रादिभिः स्वाहाकारः श्रुतेरथापत्योत्पत्तिविधिना उत दृष्टेन पुरुषार्थेन ।

ननु[12] रागः स्त्रीमात्रं प्रयुङ्क्ते न विवाहम् । येन विना यन्न निष्पद्यते तत्तस्य प्रयोजकमिति न्यायः । रागिणां च स्त्रीमात्रेण गृह्यकर्मानिर्वृत्तिः किमिति विवाहमपेक्षेरन् । सत्यम् । यदि वचनान्तरे स्त्रीमात्रगमनं निषिद्धं स्यात् । समानेऽपि सर्वत्र वेदाधिगमे शास्त्रतो गम्यागम्यविवेकः । अतश्च धीरप्रकृतीनां न विवाहमन्तरेण स्वार्थसंपत्तिरिति युक्तैवं[13] । वेदस्य

---

१ अ–ख–ड–ण–क्ष–प्रसङ्ग । २ फ–प्राप्तम् । अ–ड–प्रशंसयितुम् । ४ फ–विप्रां । ५ फ–स्मृति । ६ फ–परिहर्तव्यानीमानि । ७ फ–आश्रमान्तराणां । ८ फ–गार्हस्थ्यं । ९ फ–आश्रमाणां चोपदेश्यम् । १० ड–ख–उपदिश्यते । ११ ख–ड–ण–प्रत्यक्षश्रुतानि तु । १२ फ–अनुरागः । १३ फ–युक्तेरेव ।

प्रयोजकाशंका यद्येवं सर्वस्य न प्रयोजकानि सन्तु[1] सर्वेषाम् । तस्मिन्सत्यर्थानिवृत्तौ[2] किं तेन निरूपितेन । योऽस्ति[3] विवाहप्रयोजकः सोऽस्तु । आश्रमान्तराणि प्रत्यक्षविधाने गार्हस्थ्यस्य कथमुपपद्यन्त इत्येतदधिकृतं[4] विवाहप्रयुक्तिं विना तु केनांशेन[5] संगच्छते । उच्यते । यावदुक्तं सर्वेषामर्थसिद्धिरिति । सत्यम् । एकेन प्रयुक्तावन्यस्य प्रसंगादुपकारसिद्धौ न पृथक्प्रयोक्तृत्वकल्पना । यथा व्रीहयः पुरुषार्थेन जीवनेन प्रयुक्ताः कर्मसु विनियुज्यन्ते । न कर्मणि धनार्जनं प्रयुज्यते । यथा वा विद्या सत्यपि वेदस्यानधिकारे[6] न प्रयुज्यते स्वाध्यायविधिनैव तत्सिद्धेः । एवमिह कामतः प्रवृत्तिसिद्धेर्न कर्मश्रुतयः प्रयोक्त्र्यः । तेनाकृतविवाहमपि कृत्यकर्मविषय उपपत्स्यन्ते । अतश्च यो ब्रह्मचर्य एव कथंचित्परिपक्वकषायः स न विवक्षते । ततः[7] स द्वितीयत्वाभावान्नाधिकरिष्यते । अतश्च श्रौतेष्वनधिकारात्तादृशस्याश्रमान्तरताऽऽपत्स्येत[8] । अन्ये मन्यन्ते । नायं धनतुल्यो विवाहः । यथा धनेन विना जीवनमनुपपन्नमिति । स वै जीवेद्धनतः । एवं न स्त्रियमन्तरेण जीवनाभाव इत्यत एव न दृष्टं नियमिनः प्रयोजनं संभवतीति धर्माधिकारार्थोऽपि प्रयुक्तो[9] विवाहः । अवश्यं चैतदेवं विज्ञेयमधिकारोत्पत्त्यर्थे यत्नः कर्तव्य इति । इतरथा हि कृतोत्सर्गस्याशुचित्वादधिकारापनये जननादि शुद्धकाला[10]वस्थे[11] च संपादयतो न नित्यकर्मातिक्रमः स्यात् । ततश्च केनार्थेन मृतादिशुद्धौ[12] क्लेशमादध्यात् । तदपि विहितमेवेति चेत् । एवं तावन्मात्रस्यातिक्रमो न पुनर्विधिसहस्रस्य[13] । अथोच्येत कस्य पुनर्विधेरयं व्यापारो यदधिकृतत्वसंपत्त्यर्थमधिकृतः[14] स्यामिति पुरुषेण यत्नः कर्तव्य इत्युपदिशति । एतावदग्निहोत्रादिविषयस्ते यस्याम्नायस्त[15]द्विषयां कर्तव्यतां गमयन्ति । न त्वग्नीनामुत्पत्तिं प्रयुञ्जते । अग्नयोऽपि काम्येषु लिप्सया प्रवर्तमानेन तदधिकारसिद्ध्यर्थमाधीयन्ते । तथाहि तेषु जातेष्वाहिताग्नित्वे यावज्जीवश्रुतयः । भार्यावतश्चाधानेऽधिकारः । यथैवाधिकारिणमात्मानं कर्तुमग्नीनाधत्ते एवं भार्यामप्युपयच्छते अतो न कस्याचिद्विधेरर्थो विहितो यदि नाग्निहोत्रादिष्वधिकारो जनयितव्यः । न च विवाहविधिरेव स्वार्थकर्तव्यतामवगमयति । नित्याग्निहोत्रादि[16]श्रुतिवत्संस्कारकर्मत्वादधिकारश्रवणाभावाच्च[17] । अत्र पूर्वे वदन्ति । ऋणत्रयापाकरणश्रुतिरस्ति "जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते[18]" इत्यादि । एषा श्रुतिर्जातमात्रनिबन्धना । न चात्र जन्मद्वितीयमुपनयनाख्यमभिप्रेतं प्राक्ततस्तिर्यक्समानधर्मत्वात् ।

---

१ फ–सन्ति । २ अ–क–ड–ण–क्ष–अर्थनिवृत्ते । ३ अ–क–ड ण–क्ष–योऽस्तु । ४ अ–ड–इत्येतदधिकृता विवाहप्रयुक्तिर्विवाहं विना तु केनांशेन–। ५ फ–केन संगच्छते । ६ ख–सत्यप्यवैद्यस्यानधिकारे । ७ अ–ड–न त्वस्याद्वितीयस्याभावात् । ८ अ–क–ख–ड–क्ष–आश्रमान्तरणामापत्स्यते । ९ फ–युक्तो । १० अ–ख–ड–ब–क्ष–शुद्धिकालपादयतो । ११ ख–ण–अवस्थौ । १२ फ–शुद्ध्यवधि । १३ फ–सहस्य । १४ –यदपि कृतत्व–; अ–ड–क्ष–यदधिकृतमधिकृतःस्यामिति पुरुषेण । १५ ख–ण–यस्यास्त्रयः । १६ ख–दिषु । १७ फ–श्रवणाभावाच्च । १८ फ–ऋणवानूजायते ।

आधाने जन्मनि सति यावता कालेनाधिकारावगमो भवति तदेव ऋणश्रुत्या परिगृह्यते । ततश्च विदुषः[1] सतः सत्यधिकारे यः कन्यां याचमानो न प्राप्नुयाद्यावत्सर्वतः पलितस्तस्य वानप्रस्थादावधिकारः । स ह्येतन्निश्चिनोति । यौवने वा[2] या कन्या सर्वतरमिदानीं याचते कथयन्त्यन्ये[3]—कृष्णकेशस्यैवाधानं श्रुतं भार्यामरणं वर्जयित्वा न सर्वतः पलितेनाधातव्यमिति श्रुत्यर्थं व्याचक्षते । कर्मसंबन्धाद्गृहस्थः श्रेष्ठः । अत आश्रमस्यैव श्रैष्ठ्यमुक्तं भवति । त्रीनेतानिति । इदमपरं श्रैष्ठ्यकारणं यदन्येषामाश्रमाणां भरणम् । तदुक्तं "ज्ञानेनान्नेन च" इति ॥ ८९ ॥

एष एवार्थो दृष्टान्तेन दृढीक्रियते

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ॥
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥ ९० ॥

नद्यो गङ्गादयो भिद्यादयो **नदाः** केनचिदाधारसन्निवेशभेदेन रसभेदेन च नदीनदयोर्निर्देशभेदः । एकत्वविधानं तु रूढ्या लिङ्गभेदे भार्यादारशब्दवत् । **संस्थितिराश्रयः** समुद्रो यथा सर्वजलाश्रय एवं गृहस्थः सर्वधर्मान्धिकृतवान्[4] ॥ ९० ॥

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ॥
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥ ९१ ॥

वक्ष्यमाणोपन्यासार्थः श्लोकः । **दशलक्षणानि** यस्येति बहुव्रीहिः । **लक्षणं** स्वरूपम् । **सेवितव्यः** सर्वकालमनुष्ठेयः । उक्तानामप्येतेषां प्रधानत्वाय पुनर्वचनम् । ज्ञानकर्मसमुच्चयपक्षश्चानेन पुनर्वचनेन दृढीकृतः ॥ ९१ ॥

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ॥
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ ९२ ॥

धृत्यादय आत्मगुणाः । तत्र धृतिर्नाम धनादिसंक्षये सत्याश्रयः । यदि क्षीणं ततः किं? शक्यमर्जयितुमिति । एवमिष्टवियोगादौ संसारगतिरियमीदृशीति प्रचलतश्चित्तस्य यथापूर्वमवस्थापनम् । **क्षमा** अपराधमर्षणम् । कस्मिंश्चिदपराद्धरि प्रत्युद्वेजननानारम्भः । **दमः** अनौद्धत्यं विद्यामदादित्यागः । **अस्तेयं** प्रसिद्धम् । **शौचमाहारादिशुद्धिः** । **इन्द्रियसंयम** अप्रतिषिद्धेष्वपि विषयेष्वप्रसंगः । **धीः** सम्यग्ज्ञानं प्रतिपक्षसंशयादिनिराकरणम् । **विद्याऽऽत्मज्ञानं** कर्माध्यात्मज्ञानभेदेन धीविद्ययोर्भेदः । एतत्पौनरुक्त्यतया धीविद्येति पठन्ति तन्न सम्यक् । भेदस्य दर्शितत्वात् । अन्यत्प्रसिद्धम् । **अक्रोधः** उत्पत्स्यमानस्यानुत्पत्तिः । **क्षमा** कृतेऽप्यपकारेऽपकारानारम्भः ॥ ९२ ॥

---

१ फ–विदुषः सत्यधिकारे; अ–क–ड–ण–क्ष–ततसत्यधिकारे यः । २ अ–ख–ड–यौवनेप्सया कन्या । ३ फ–कथमसौ कृष्णकेशस्यैवाधानं–। ४ अ–ड–ख–क्ष–समधिकृतवान्; फ–सर्वधर्माधिकृतवान् । अ–ड–प्रधाद्वये ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दश लक्षणानि धर्मस्य ये विप्राः समधीयते ॥
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ ९३ ॥

पूर्वस्य विधेः फलकथनम् । अध्ययनात्फलश्रुतिरनुष्ठानश्रुत्यर्था ॥ ९३ ॥

दशलक्षणकं धर्ममनुतिष्ठन्समाहितः ॥
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥ ९४ ॥

संन्यस्येदनृणः । यदा ऋणत्रयमपाकीर्णं तदा संन्यास इत्येवमर्थमेतत् । समानकाले प्रव्रज्यायां नाधिक्रियते । एवं संन्यासेऽपि । **वेदान्तान्विधिवत्** । अविदितवेदान्तार्थस्य नास्ति संन्यासः । यद्यपि स्वाध्यायविध्यनुष्ठानाक्षिप्तं कर्म विधिशास्त्रवद्वेदान्तज्ञानमपि स्वाध्यायशब्दवाच्यत्वाविशेषात् तथापि वेदान्तानां पुनरुपन्यासो विशेषार्थः । तत्परेण भवितव्यम् । अथ संन्यस्येदिति कः शास्त्रार्थः । कोऽयं संन्यासो नाम ? ममेदमिति परिग्रहत्यागः । ननु वेदसंन्यासिका इत्युक्तं तत्रेदं प्रतीयते । वेदस्य वेदार्थस्य वा संन्यासः । न च वैदिककर्मसिद्ध्यर्था ये प्रतिग्रहादयस्तेषां संन्यासः । इदमानंत्यमिच्छतामित्यध्ययनस्य ज्ञानप्राधान्येऽपि विहितत्वात् । अग्निहोत्रादीनां तु द्रव्यसाध्यत्वादसति ममकारे त्याग एव । स चायं धर्मापादको मृतभार्यस्य परनिष्ठस्य वा कृतसंप्रतिविधानस्य । **वाजसनेयके** हि पठ्यते "यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह" इत्यादि । अग्निसमारोपणं च तदा विहितम् अजीर्णस्य च "जरया ह वा एतस्मान्मुच्यत इत्यामनन्ति" । यानि चाद्रव्यसाध्यानि संध्योपासनादीनि नित्याग्निहोत्रादीनि तेषामनिषेधात्तत्र आ अन्त्यादुच्छ्वासादधिकारः ॥ ९४ ॥

*** संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् ॥**
नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥ ९५ ॥

वेदमभ्यस्येति वेदस्यात्यागमाह । दर्शितमेतत् । अभ्यस्यन्निति शतृप्रत्ययान्तपाठो वा । **पुत्रैश्वर्ये सुखं वसेत्** । पुत्रग्रहणमुत्पन्नस्य पुत्रस्य अन्योऽपि यस्तत्स्थानः पौत्रादिस्तत्रापि युक्तो गृहान्तरन्यास इत्याहुः ॥ ९५ ॥

एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः ॥
संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥ ९६ ॥

*** [संन्यसेत्सर्वकर्माणि वेदमेकं न संन्यसेत् ॥**
वेदसंन्यासतः शूद्रस्तस्माद्वेदं न संन्यसेत् ॥]

१ अ–वेदान्ते कः शास्त्रार्थः । २ फ–तत्रान्त्यादुच्छ्वासाद– ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वकार्यमात्मोपासनं परमं प्रधानमस्येति स्वकार्यपरमः । **अस्पृहः** मनसाऽपि स्पृहा न कचित्कर्तव्या ॥ ९६ ॥

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ॥
पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥ ९७ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां षष्ठोऽध्यायः ॥ ६ ॥

चतुर्विधो धर्मश्चातुराश्रम्यम्। ब्राह्मणस्य सर्वमेतद्विहितम्। ननु च "एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विज" इति द्विजग्रहणमुपक्रमे श्रुतम्। तस्य चानुपजातविरोधित्वात्त्रैवर्णिकार्थिता निश्चिता। अतश्चेदं ब्राह्मणग्रहणं त्रैवर्णिकप्रदर्शनार्थमेव युक्तम्। यद्येकवाक्यतोपक्रमोपसंहारयोर्न स्यात्। एकवाक्यत्वे तु बलवदुपक्रमार्थः शक्यः प्रतिपत्तुं कृत्स्नवाक्यपर्यालोचनया योऽर्थः स निश्चीयते। अतो द्विजग्रहणं ब्राह्मणपरतयोपसंहर्तव्यम्। अस्ति ब्राह्मणस्य द्विजातित्वम्। न तु सर्वेषु द्विजातिषु ब्राह्मण्यम्। अत्रापि द्विजशब्दार्थे संभवति नान्वयिनि लक्षणा न्याय्या। तथा च **महाभारते** शूद्रस्यापि त्रय आश्रमाः श्रूयन्ते "शुश्रूषा कृतकृत्यस्येति" उपक्रम्य "आश्रमा विहिताः सर्वे वर्जयित्वा निरामिषम्"। पारिव्राज्यमित्यर्थः। नैवं तस्यायमर्थः। सर्वे आश्रमास्तु न कर्तव्याः। किंतर्हि ? शुश्रूषयाऽपत्योत्पादनेन च सर्वाश्रमफलं लभते। द्विजातीन् शुश्रूषमाणो गार्हस्थ्येन सर्वाश्रमफलं लभते परिव्राजकफलं मोक्षं वर्जयित्वा। अतो ब्राह्मणधर्म एव चातुराश्रम्यमिति सिद्धम् ॥ ९७ ॥

इति **भट्टवीरस्वामिसूनोर्भट्टमेधातिथिकृतौ मनुभाष्ये** षष्ठोऽध्यायः ॥ ६ ॥

१ फ-पूर्वं। २ अ-ङ-उपाश्रमाः श्रूयन्ते। ३ अ-क-ख-ङ-ण-क्ष-+जगतीपतेः। ४ ख-मान्य काऽपि विधेर्वशादिति श्लोकः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ सप्तमोऽध्यायः प्रारभ्यते ॥

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ॥
संभवश्च यथा तस्य सिद्धिश्च परमा यथा ॥ १ ॥

धर्मशब्दः कर्तव्यतावचन इत्युक्तम्। यद्राज्ञां कर्तव्यं तदिदानीमुच्यत इति प्रतिज्ञा। कर्तव्यं च दृष्टार्थं षाड्गुण्यादि अदृष्टार्थमग्निहोत्रादि । तत्रेह प्राधान्येन दृष्टार्थमुपदिश्यते। तत्रैव च राजधर्मप्रसिद्धिः। राजशब्दस्तु नेह क्षत्रियजातिवचनः किंतर्ह्यभिषेकाधिपत्यादिगुणयोगिनि पुरुषे वर्तते । अत एवाह । **यथावृत्तो भवेन्नृपः** । नृपग्रहणेन जनपदैश्वर्यवतोऽधिकारमाह । प्रमाणान्तरमूला ह्यत्र धर्मा उच्यन्ते । न सर्वे वेदमूलाः अन्यमूलत्वे च यदत्र धर्मशास्त्राविरुद्धं तदुच्यते । तथा च **कात्यायनः** "अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेदिति" । **यथावृत्तः** यद्वृत्तं यत्प्रकारं वाऽस्येति च बहुव्रीहिः । अन्यपदार्थो राजा । यथार्थप्राधान्येऽव्ययीभावः स्यात् । **वृत्तं** परिपालनार्थो व्यापारोऽदृष्टार्थश्च । **संभवश्चो**त्पत्तिः । स उक्तो "राजानमसृजत्प्रभुः" इत्यादिना । **परमा** प्रकृष्टा सिद्धिर्विजिगीषोरैकाधिपत्यम् । राजवृत्तस्य फलप्रतिज्ञेयम् ॥ १ ॥

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ॥
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥ २ ॥

ब्रह्म वेदः। तत्कृतः संस्कारो ब्राह्मः। स वेदाध्ययनजन्यो ग्रहणवतोऽर्थलक्षणो वेदस्य स्वाध्यायविधिनिर्वर्त्य इत्यर्थः । उपनयनं तु ब्रह्मग्रहणार्थत्वाद्ब्राह्ममिति युक्तम् । तथा च वक्ष्यति (अग्रे ४३ श्लो.) "त्रैविद्येभ्यस्त्रयीं विद्यामिति"। इतरथा विदितवेदितोपदेशः स्यात्। गर्भाधानादिस्मृतिशास्त्रादिष्टाचत्वारिंशसंस्कारम् । **क्षत्रियेणेति** । एतेन क्षत्रिय एव राज्याधिकारीति सूचितम्। क्षत्रियाभावे तदतिदेशोऽपि ग्राह्यः। अन्यथा प्रजालोपः स्यादिति भावः। **सर्वस्य** करदस्य दीनानाथादेश्च । **अस्येति** स्वविषयवासिनां यथास्वं जनपदपुरनिर्देशः । **यथान्यायं** न्यायः शास्त्रं धर्मशास्त्ररूपं नार्थशास्त्रमौशनसादिप्रणीतं तमनतिक्रम्य । परिरक्षणं परिपालनम् । अपायपरिहारो दुर्बलानां बलवद्भिरनभिभवः शास्त्रमर्यादानतिक्रमश्च । दुःखत्राणं **परिरक्षा** । शास्त्रातिक्रमे चादृष्टं दुःखम् । अतस्तदनतिक्रमे राज-

१ क–राज्ञः । २ ग–दृष्टं । ३ ण–च । ४ फ–यदाकारं । ५ फ–अदृष्टार्थः । ६ फ–परमा सिद्धि- ७ फ–तत्र श्रुतः । ८ फ–शास्त्रादृष्टा–९ ड–नाथादेशश्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भयेन रक्षिता भवन्ति । राजदण्डे दुःखमिति चेन्महतो नरकादिदुःखाद्राजदण्डनमल्पीयः। कर्तव्यमिति विधिः । अधिकारश्चाष्टमे निरूपितः ॥ २ ॥

अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात् ॥
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥ ३ ॥

विद्रुते पीडितेऽप्रतिष्ठिते वा । **प्रभुः** प्रजापतिः । स्तुतिरियम् ॥ ३ ॥

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ॥
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ ४ ॥

अनिलो वायुः । **वित्तेशो** धनपतिर्वैश्रवणः । **मात्रा** अवयवाः । **शाश्वतीः** सारभूताः । **निर्हृत्य** निष्कृष्य ॥ ४ ॥

यस्मादेषां सुरेंद्राणां मात्राभ्यो निर्मितो नृपः ॥
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ ५ ॥

एषामिन्द्रादीनां सुरश्रेष्ठानां मात्राभिस्तेजोंशैर्निर्मितस्तस्माद्धेतोरभिभवति दुर्निरीक्ष्यमुखो भवति । **तेजसा** हेतुना । निष्कृष्य निर्मित उत्पादितः यतः कृषिरुत्पादने धातुर्वर्तते । तेनापायावधित्वान्मात्राभ्य इति पञ्चमी तृतीया वा पठितव्या ॥ ५ ॥

तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ॥
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥ ६ ॥

तपति तपतीव[1] संमुखोऽशक्यदर्शनत्वादेवमुच्यते । तदाह । **न चैनं भुवि शक्नोति** ब्राह्मणजात्युत्कृष्टा ब्रह्मवर्चस्विनोऽपि नैनमभिमुखं वीक्षितुं शक्नुवन्ति । तदुक्तं "तमुपर्यासीनमधस्तादुपासीरन्" ॥ ६ ॥

सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ॥
स कुबेरः स वरुणः स चेंद्रः[3] स्वप्रभावतः ॥ ७ ॥

अग्न्यादिदेवतानां मात्राशयत्वात्तच्छक्तियोगितयैवमुच्यते । **प्रभावो**ऽलौकिकी या शक्तिः ॥ ७ ॥

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ॥
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८ ॥

मनुष्योऽयमित्येवं बालोऽपि भूमिपो राजा नावमन्तव्यः। किंतर्हि ? **महती** काचिदेषा देवतैतेन मानुषेण रूपेण स्थितेति । अतोऽदृष्टेनापि दोषेण राजन्यवज्ञा न युज्यते ॥ ८ ॥

---

१ फ–तापयतीव । क्ष–असन्मुखशक्यदर्शनत्वात् । ३ फ–स महेन्द्रः स्वभावतः । ४ अ–ड–क्ष–प्रभावतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ॥
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥ ९ ॥

अस्य विधेरर्थवादश्लोका एते । राजधर्मोऽपि सन् सर्वपुरुषार्थोऽयम् । अग्नियोऽग्निं हस्तादिना स्पृशति समिद्धस्याप्यन्तिको भवति स दुरुपसर्पिनरः प्रमादस्खलितो दह्यते । राजा तु क्रुद्धः सपुत्रधनदारबान्धवं दहति । कुलं ये केचिद् ज्ञातयः स्वजनाश्च । तानप्य-पराधसंबन्धात्पशुभिर्धनसंचयैश्च सह नाशयति ॥ ९ ॥

कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ॥
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥ १० ॥

नैतन्मन्तव्यं बन्धुर्मे राजा सुहृद्वेति । " कस्य राजा भवेन्मित्रं कानि मित्राणि राजनि " । प्रयोजनापेक्षया च शत्रौ मित्रवदाचरन्ति मित्रे शत्रुवत् । तथाऽशक्ताः कंचिदपराधं क्षमन्ते । शक्तिं प्राप्योन्मूलयन्ति । एवं देशकालावपि । अतो धर्मसिद्ध्यर्थं कार्यसिद्ध्यर्थं विश्वरूपं कुरुते क्षणान्मित्रं क्षणेन शत्रुः नैकरूप एव राजा भवति । अतो न विश्वसितव्यं राजनि । मैत्र्याद्वाल्लभ्यात्सौजन्याद्वा तत्तुल्यवयोदृष्ट्या न वर्तितव्यम् । अपि तु सर्वदा नयेन द्रष्टव्यः ॥ १० ॥

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ॥
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ११ ॥

प्रसन्न आराधनया श्रियं ददाति । क्रुद्धो मृत्युना योजयति । अतः श्रीकामेनाराध-नीयः । न केवलं श्रिया योजयति यावदस्य शत्रवः सन्ति तानपि पराक्रम्य परितोषितो हन्ति । अतः शत्रुवधकामेन यथावत्परिचरणीयः । **पद्मा** श्रीः पर्यायोऽपि पद्माशब्दो महत्त्वप्रतिपादनार्थः प्रयुक्तो महतीं श्रियं ददातीत्यर्थः । एते चार्था राज्ञः प्राप्यन्ते । यतः **सर्वतेजोमयो**ऽसौ अग्न्यादित्यचंद्रमसां तेजो बिभर्ति ॥ ११ ॥

तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयम् ॥
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥ १२ ॥

प्रत्यवायाद्यथा विन्दति जनो नैवमभिप्रेतार्थलोभेनातः पुनः पुनराह । तं राजानं **यो द्वेष्टि** प्रातिकूल्येन वर्तते तस्मिन्सं **स्वसंशयं नश्यति । तस्य ह्याशु विनाशाय ।** अन्यः कश्चिदपराधं क्षमते अशक्यराजनिवेदनेन । तत्र व्यवहारभागस्य धनपरिक्षयो भवति । भूतोऽप्यर्थः साक्षिणां चित्तवैचित्र्यादन्यथात्वमायाति ह्यपेक्ष्यमाणः कश्चित्क्रमेणापि ।

---

१ **फ**-यतः । २ **फ**-योऽग्नि । ३ **अ-ड-क्ष**-सहजसन्नत्र कबंधो भवति । तदुपाससप्रमादान्मूलितो ददाति । ४ **फ**-हन्ति । ५ **अ-ड-क्ष**-अशुभिः । ६ **फ**-किंचित् । **ख-ड-क्ष**-तं मोहात् । ८ **फ**-सम्यंशयं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्ञा तद्विनाशार्थमपराधेन मनसि स्थितेन बाध्यत एवासौ शक्तिमत्वाद्राज्ञः प्रयतमानस्य स्वतन्त्रविरोधापत्तेः ॥ १२ ॥

तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ॥
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥ १३ ॥

यतः सर्वतेजोमयो राजा तस्माद्धेतोरिष्टेषु वल्लभेषु मन्त्रिपुरोहितादिषु कार्यगत्या धर्मं कार्यव्यवस्थां शास्त्राचाराविरुद्धां व्यवस्येन्निश्चित्य स्थापयेन्न विचालयेत् । सा तादृशी राज्ञोऽनुज्ञा नातिक्रमणीया । अद्य पुरे सर्वैरुत्सवः कर्तव्यः । मन्त्रिगेहे विवाहो वर्तते । तत्र सर्वैः संनिधातव्यम् । तथा पशवो नाद्य सैनिकैर्हन्तव्या न शकुनयो बन्धयितव्याः । नर्तिका धनिकैराराधनीया एतावन्त्यहानि । एवमनिष्टेष्वपि । एतेन संसर्गो न कर्तव्य एतस्य गृहे प्रवेशो न देयः । एवंविधोऽत्र धर्मः पटहघोषादिना राज्ञाऽऽदिष्टो नातिक्रमणीयः । न त्वग्निहोत्रादिधर्मव्यवस्थायै वर्णाश्रमिणां राजा प्रभवति । स्मृत्यन्तरविरोधप्रसङ्गात् । अविरोधे चास्मिन्विषये वचनस्यार्थवत्वात् ॥ १३ ॥

तदर्थं सर्वभूतानां गोप्तारं धर्ममात्मजम् ॥
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥ १४ ॥

उक्ता राजोत्पत्तिः । दण्डोत्पत्तिरिदानीमुच्यते । तस्मा इदं तदर्थं राज्ञः प्रयोजनसिद्धये दण्डमसृजदीश्वरः प्रजापतिः । को राज्ञोऽर्थो दण्डेन ? उच्यते । गोप्तारं सर्वभूतानां गोप्ता रक्षिता दण्ड एव न दण्डेन विना राजा रक्षितुं शक्नोति । अतो राजत्वसिद्ध्यर्थं एव दण्डः सृष्टः । धर्ममात्मजं ब्रह्मतेजोमयमिति दण्डस्तुतिः न यागदानादिधर्मः । किं तर्हि दण्ड एव । न चायं प्राणधनहारित्वादधर्मो विज्ञेयः । अपि त्वेष एव धर्म आत्मजः शरीरादिव जातः प्रजापतेः । न च पाञ्चभौतिकः । किंतर्हि ब्राह्मणो यत्केवलं तेजस्तेन निर्मितः पूर्वं राजसृष्टेः ॥ १४ ॥

तस्य सर्वाणि भूतानि स्थावराणि चराणि च ॥
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥ १५ ॥

तस्य दण्डस्य **भयात्** । संबन्धिमात्रविवक्षायां भयहेतुत्वं नास्तीति षष्ठी । दण्डभयात्स्थावराणि भूतानि **भोगाय** फलकुसुमच्छायादिभिर्भोगार्थं कल्पन्ते तत्समर्था भवन्ति । यो हि स्थावरः फलं न ददाति स परिशोष्यते । न चेत्परिशुष्यति

---

१ ख–ड–क्ष–विरोधो जायते । २ ख–ड–क्ष–कार्यं धर्मं । ३ ख–ड–क्ष–न कर्तव्य एव । तस्य गृहे– । ४ ख–ड–क्ष–व्यवस्थायैव; क्ष–व्यवस्थंयव । ५ ख–ड–क्ष–स्मृत्यन्तरविरोधेषु चास्मिन्विषये वचनस्यार्थत्वात् । ६ फ–तस्यार्थे । ७ अ–क–ख–ड–ब–क्ष–को राज्ञा दंडेन उच्यते । ८ अ–क–ख–ड–ब–क्ष–संगोप्तारं । ९ अ–क–ख ड–ब–क्ष–धर्मजंदनब्रह्मा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वतो व्याप्तदेशत्वाच्छित्वाऽगारीक्रियते । एतया वृक्षोपमया दण्ड्यस्य राजापथ्यकारिणः पुरुषस्यैवं कर्तव्यं च्छेदनमूलोत्पाटनादिना दण्डः प्रणेयः । स्थावरग्रहणस्तुत्या दृष्टान्तार्थमीदृशोऽयं दण्डो यत्स्थावरा अपि दण्ड्यन्ते किं पुनश्चराः । न तु स्थावराणां दण्डोऽयमित्येषा बुद्धिरस्ति । स्वधर्मान्न चलन्ति अकाले न पुष्यन्ति न प्रसुवते ॥१५॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्वतः ॥
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥ १६ ॥

अन्यायवर्तिनो ये राजापथ्यकारिणो महामात्यादयस्तेषामयं दण्ड उच्यते । अन्येषां तु परस्परव्यवहारिणामनुबन्धमनुज्ञात्रापरिज्ञायेत्यत्रोच्यते । तत्रैव चायं श्लोको व्याख्यातः । **विद्या**ऽत्राधिका सा च वेदार्थविषया । **यथार्हतः** यथार्हं यो यस्य योग्य इत्यर्थः । **संप्रणयेत्** प्रवर्तयेत्कुर्यादिति यावत् । एतत्सर्वमवेक्ष्य निरूप्य तत्तदपेक्षो[3] दण्डः कर्तव्यः । अन्यथाप्रणीतो राज्ञो दृष्टमनर्थमावहेत् । दृष्टादृष्टभेदेन स्वप्रकृतिजनपद-भेदेन सप्तमाष्टमयोर्दण्डमातृकाश्लोकयोर्भेदः ॥ १६ ॥

स राजा पुरुषो दण्डः स नेता शासिता च सः ॥
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥ १७ ॥

स एव वस्तुतो **राजा** । तस्मिन्सति राजशक्तिः । स एव **पुरुषः** । येन बलीयसोऽपि पुरुषान् स्त्रीवन्न्यकृत्य वशीकरोति । **स नेता** कार्याणि तेन नीयन्ते । **शासिता** । शासनं राजाज्ञा तस्याः शासनीभावः दण्डे सति । धर्मतः कर्तृत्वमौपचारिकम् । **चतुर्णामाश्रमाणां** यो धर्मस्तत्र स **प्रतिभूरिव** । यथा प्रतिभूश्चलितुं न ददाति तद्वद्दण्डोऽपि ॥ १७ ॥

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ॥
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥ १८ ॥

न राज्ञो शास्त्रं **शास्ति** कर्तव्याकर्तव्योर्विधिनिषेधयोः किं तर्हि दण्ड एव । **दण्ड एवाभिरक्षति** बलवद्भ्योर्दुर्बलान् । सुप्तेषु राजपुरुषेषु दण्डभयादेव न यथाकामं लोको व्यवहरति । द्विविधो दण्डो राजदण्डो यमदण्डश्च ॥ १ ॥

समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ॥
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥ १९ ॥

---

१ ख-ड-क्ष-यत्स्थावराण्यपि—चराणि । २ ख-ड-क्ष-दण्डयमाह । ३ ख-ड-क्ष-तदपेक्षं । ४ फ-राजशक्तियोगे । ५ फ-तस्याभावे दण्डः स्मृतः । ६ ख-ड-क्ष-राजशास्त्रं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धृतः प्रणीतः प्रवर्तितः समीक्ष्य पूर्वोक्तदेशकालाद्यपेक्ष्य समीक्ष्य। रञ्जयत्यनुरागं प्रजासु जनयति । विपरीतं प्रणीयमानो न केवलं स्वकार्यं न करोति यावद्गुरुपयुक्तो विषवद्विनाशयत्यर्थं जनस्य ॥ १९ ॥

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ॥
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥ २० ॥

अप्रणयनाद्दण्डस्य ये **बलवत्तरा** बलीयांसो बलेनाधिका महाप्राणतया शस्त्रहस्तमनुष्या भूयस्त्वेन वा ते दुर्बलानपक्ष्यन् शूले मत्स्यानिव यथा मत्स्या शूल्या क्रियन्ते भोजनार्थमेवमशक्तो जनोऽधिकशक्तिभिरुपहीयेत धनशरीरदारहरणादिना तस्माद्दण्डार्हानतन्द्रितोऽनलसो दण्डयेत्। कुतो मया समीक्षा शक्या कर्तुं नैव दण्डं करोमीति नैवं बुद्धिः कर्तव्या ॥ २० ॥

अद्यात्काकः पुरोडाशं श्वावलिह्याद्धविस्तथा ॥
स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम् ॥ २१ ॥

श्वकाकादयोऽप्यत्यन्ताधमा देवैः सह संस्पर्धेरन्। देवेभ्यो दातव्यं हविश्चरुपुरोडाशादि तत्ते अद्युर्यदि दण्डेन न निवार्येरन् । अन्यदपि यत्स्वाम्यं स्वस्वामिभावः स न स्यात् । जायापत्योः पितापुत्रयोः । जायायाः पतिर्न स्यात्स्वातन्त्र्येण स्त्रियः प्रवर्तेरन्। **अधरोत्तरं** यदधरं वृषलादि तदुत्तरं प्रधानं स्यात् । यदुत्तरं ब्राह्मणादि तदवरतां निकृष्टतामियात् । शूद्रा धर्ममुपदिशेयुः । वैदिको धर्मो नानुष्ठीयेत[1] ॥ २१ ॥

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ॥
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ॥ २२ ॥

स्वभावेनैव प्रकृत्यैव **शुचिः** शुद्धो धर्मार्थकामेषु स तादृशो नरो **दुर्लभः** दुःखैर्लब्धुं शक्यः। किंतु **दण्डजितो** दण्डेन जीयते पथि स्थाप्यते । तद्भयात्र यथाकामं प्रवर्तते। **जगद्भोगायेति** प्रागुक्तमेव ॥ २२ ॥

देवदानवगन्धर्वा रक्षांसि पतगोरगाः ॥
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥ २३ ॥

ये **देवाः** पर्जन्यो वायुरादित्य इत्यादयः। **भोगाय कल्पन्ते** शीतोष्णवर्षैर्नियतैरोषधीः पाचयन्ति तद्दण्डभयाशङ्किनः। अन्यथा किमिति सूर्याचंद्रमसौ धातृपर्जन्यौ वा

---

१ ङक्ष—नानुष्ठीयताम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वस्मात्कार्यकालान्नियतान्न विचलेताम् । कदाचिद्वे अहनी त्रीणि वा नोदियात्सूर्यः सति स्वातन्त्र्ये । दण्डात्तु बिभ्यन्नातिक्रामति मर्यादाम् । तथा च श्रुतिः

" भयात्सूर्यः प्रतपति भयात्तपति चंद्रमाः । भयादग्निश्च वायुश्चेति " [1] दानवादयश्च यदिदमखिलमहर्निशं न जगदुपघ्नन्ति दण्डमाहात्म्यमेतत् । पतङ्गवयांसि गृहमण्डनाः शुकसारिकादयो यद्बालानामक्षिणी नोत्पाटयन्ति श्येनकाककङ्कगृध्रादयो यज्जीवतो नादन्ति तदप्येवमेव । उरगाः सर्पाः केवलं क्रोधविषात्मकाः संभूय सर्वे न दशन्ति सर्वं प्राणिजातं तद्दण्डसामर्थ्यम् । अतः स्तुतिरेषोच्यते । यद्देवादयो महर्धिका अचेतना वा स्वमर्यादातो न विचलन्ति भयात्किं पुनर्मनुष्याः । अत्र श्लोकः पूर्वैः पठितः ॥
" दृष्ट्वा तु दैन्यं वनपाटलानां पुष्पप्रगल्भं कुटजप्रहासम् ।
संबन्धदानेन तदा जहास नीपोऽपि रन्ध्रं प्रहरत्यवश्यम् " ॥ इति ॥ २३ ॥

दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः ॥
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥ २४ ॥

दण्डस्य विभ्रमोऽकरणमन्यायेन वा करणम् । तस्मिन्सति सर्ववर्णा दुष्येयुः । इतरेतरस्त्रीगमनेन संकरप्रवृत्तेः । सेतवो मर्यादाः । ताः सर्वा भिद्येरन् । सर्वमर्यादापरिलोपः स्यादित्यर्थः । ब्राह्मणाश्च शूद्रवद्वर्तेरञ्छूद्राश्च ब्राह्मणवत् । अतश्च सर्वलोकप्रकोपः स्यात् । त्रयोऽपि लोका इतरेतरं वृष्ट्यातपादिना नोपकुर्युः ॥ २४ ॥

यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ॥
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥ २५ ॥

एतद्द्वयं मनुष्याणां प्रशस्ततमम् । अतस्तेनासता रूपकभंग्या स्तौति । द्विरूपो दण्डः । दुःखदो भयदश्च । भयहेतुत्वं श्यामतया । दुःखहेतुत्वं लोहिताक्षत्वेन । परिसमाप्ता दण्डस्तुतिः । दण्डोऽवश्यं कर्तव्यः । स च देशाद्यपेक्षयेति । अन्यः सर्वोऽर्थवादः । नेता चेत् । नेता दण्डस्य नायकः । स चेत्साधु पश्यति सुनिरूपितं दे[illegible]ल्लादिकं कृत्वा पालयति तत्र प्रजा न मुह्यन्ति न केनचिद्दोषेण युज्यन्ते ॥ २५ ॥

तस्याहुः संप्रणेतारं राजानं सत्यवादिनम् ॥
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥ २६ ॥

इदं संप्रणेतुः साधु दर्शनं सत्यवादिता समीक्ष्यकारिता प्राज्ञता त्रिवर्गे कौशलं च । सत्यवादी यः शास्त्रानुसारितया दण्डं कृत्वा कुतश्चिन्महाधनत्वं विज्ञाय न तं

१ ङक्ष–सर्वलोपः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्धयति न च वल्लभस्य रागाद्वनं करोति । **प्राज्ञो** देशादीनां बाध्यबाधकभावार्थमवस्था विशेषज्ञः । कदाचिद्देशेन कालो बाध्यते कालेन वा देशः । उभौ वा तौ विद्याशक्तितयोश्च परस्परमुत्सर्गापवादभावज्ञः । कार्यवशादर्थश्च बाधक एव बाध्यतामित्यतः प्राज्ञत्वमुपयुज्यते । धर्मादीनां च गुरुलघुताभावः । स्वल्पो यत्र धर्मस्तस्मिन्साध्यमाने महाननर्थो भवति । तत्र धर्मस्त्यज्यते । प्रायश्चित्तेन समाधास्यत इत्येवमादि बोद्धव्यम् ॥ २६ ॥

तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते ॥
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥ २७ ॥

कामात्मा रागप्रधानः । **विषमः** क्रोधनः । समत्वेन दण्डपातनेन शत्रौ मित्रे च **वर्धते** । **क्षुद्रः** छलान्वेषाद्दण्डेनैव **निहन्यते** । प्रकृतिकोपेनादृष्टेन वा दोषेण ॥ २७ ॥

दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः ॥
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥ २८ ॥

सुमहद्यत्तेजः स दण्डः । **अकृतात्मभिः** शास्त्रेण गुरूपासनया सहजेन वा विनयेन येऽनभिविनीतास्तैर्दुर्धरो न शक्यते सम्यक् प्रणेतुम् । नैवं मन्तव्यमाज्ञामात्रेण दण्डः प्रणीयते । का तस्य दुर्धरता । यतो यस्तत्र न जागर्ति प्रयत्नवान्न भवति तं प्रमादिनं सबान्धवं दण्डो हन्ति । न शरीरेण केवलेन राजा नश्यति यावत्पुत्रपौत्राद्यन्वयेन सह ॥ २८ ॥

ततो दुर्गं च राष्ट्रं च लोकं च सचराचरम् ॥
अन्तरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् ॥ २९ ॥

देशाद्यनपेक्षया यत्र दण्डः प्रणीयते तत्र सराजकस्य जनपदस्य तिर्यक्स्थावरसहितस्य नाशः । ततो मन्त्रिभिर्जनपदैश्च राजा विज्ञापनीयः । त्यक्तव्यो वा तादृशो देशः । देवमुनयः पीड्यन्ते इतःप्रदानजीवना देवाः । अस्मिंश्चानुष्ठानाद्युच्छेदान्नष्टा एव देवमुनयः । तथा च **पुराणकारैः**

" वर्णाश्रमेभ्यः स्थित्वा तु लोकेऽस्मिन्यः प्रवर्तते ।
स्वर्गादौ देवयोनीनां स्थितिहेतुः स वै स्मृतः "—इति ॥

प्रथमात् श्लोकादारभ्य यावदयं श्लोकस्तत्रायमर्थसंग्रहः । समवृत्तेन क्षत्रियेण जनपदपरिपालनं कर्तव्यम् । तच्च दण्डेन विना न भवतीति स देशाद्यपेक्षयाऽवश्यं निपुणतो निरूप्य स्वराष्ट्रे परराष्ट्रे वा यथाशास्त्रं प्रणेयः । अन्यथा तु प्रवृत्तावुभयलोकनाशः । अन्यः सर्वोऽर्थवादः ॥ २९ ॥

---

१ खडक्ष–विद्या तु शक्ति । २ फ–कामात्मा । ३ खडक्ष–क्रुद्धः । ४ खडक्ष–छलान्वेषणाम् । ५ फ–प्रकृतेः ६ फ–शरीरेण केवलेन राजा न नश्यति । ७ खडक्ष–स्वराष्ट्रे वा परराष्ट्रे वा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ॥
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ॥ ३० ॥

सहायसंग्रहार्थं प्रकरणमिदानीमारभ्यते ।

यस्य च निरूपणा वक्ष्यमाणा तत्सहायादिगुणयोगिनश्चार्यसभ्यसेनापतिदण्डाधिकारिणो न सन्ति तेन स्वयमेव निःशङ्कं नयकालगुणसंपन्नेनापि न्यायतो न प्रणेतुं शक्यः । न्यायः शास्त्रानुसारिणी देशाद्यपेक्षया च व्यवस्था । अतः सहायाः शोभनाः कर्तव्याः । यथा स्वयं मूढो विचित्तोऽसंस्कृतबुद्धिरस्ति सक्तो विषयेषु लुब्धो धनविनियोगं यथावन्न करोति तेन तादृशैनैतैर्दोषैर्युक्तेन न सम्यक् क्रियते एवमसहायेनापीति तात्पर्यम् । यस्तु विपरीतस्तेन शक्यते ॥ ३० ॥

एष एवार्थो वैपरीत्येनोच्यते

शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा ॥
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ॥ ३१ ॥

शुचिरलुब्धः । **सत्यसन्धः** सत्यप्रधानः । सत्यमेव पुरोधाय सर्वक्रियासु प्रवर्तते स । विजितेन्द्रियः । अजितेन्द्रियस्य कुतः सत्यम् । **यथाशास्त्रमनुसरति** वर्तते । **सुसहायः** शोभनाः सहाया अस्येति । अमूर्खैर्भक्त्यनुरक्तैः सहायैर्युक्तः । **धीमता** प्राज्ञेन । योऽसौ मूढः प्रागुक्तस्तस्यायं प्रतिपक्षतयोक्तः ।

अतः पञ्चभिर्दोषैर्हीनस्तावद्भिरेव गुणैर्युक्तो दण्डप्रणयनेऽधिकृतो दृष्टादृष्टफलातिशयभाग्भवतीति श्लोकद्वयस्यार्थः ॥ ३१ ॥

स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु ॥
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥ ३२ ॥

पितृपितामहादिक्रमागतो देशो व्यपदेशहेतुः । काश्मीरकस्य काश्मीरः पाञ्चालस्य पाञ्चालाः **स्वराष्ट्रम्** । तत्र न्यायप्रवृत्तिः न्यायेन वर्तेत न्याययोगाद्वृत्तन्यायः । अतो बहुव्रीहिः । न्यायवृत्तिरिति वा पाठः । एतत्पूर्वसिद्धमनूद्य शत्रुषु **भृशदण्डता** विधीयते । परराष्ट्राणि पुनः पीडयेन्न तत्र विघ्नाद्युपेक्षणीयम् । राष्ट्रीयोपरोधो वा । तथाकुर्वतः प्रताप उपजायते । प्रतापवर्धनस्य शत्रवो नमन्ति । **ब्राह्मणेषु** सर्वत्र **क्षमान्वितः** । अपराधेष्वपि साम्ना दण्डः प्रयोज्यो न क्रोधेन । परराष्ट्रवासिनोऽपि राष्ट्रघातकाले

१ **खडक्ष**–मूर्खेण । २ **खडक्ष**–अशक्यो । ३ **खडक्ष**–कालगुणसंपन्नानामन्यायता । ४ **खडक्ष**–भक्तानुरक्तैः । ५ **खडक्ष**–दण्डप्रणयनेऽपि कृते । ६ **खडक्ष** न्यायवत इति वा पाठान्तरम् । ७ **खडक्ष**–विघ्नाद्यपेक्षणीयो राष्ट्रीयोपरोधः । ८ **फ**–प्रतापतश्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि शक्यन्ते रक्षितुं तदा न हन्यन्ते । **स्निग्धेषु सुहृत्सु अजिह्मोऽ**कुटिलबुद्धिः । कार्यसिद्धिकृत्तत्कार्ये प्रधानं स्यात् ॥ ३२ ॥

एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ॥
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥ ३३ ॥

प्रकान्तवृत्तेः स्तुतिरियम् । **शिलोञ्छेनापि जीवतो**ऽत्यन्तक्षीणकोशस्य **विस्तीर्यते यशः** प्रथते । ततश्च परराष्ट्राणि स्वयं नमन्ते स्वराष्ट्रिकश्चानुरागादविचलितो भवति ॥ ३३ ॥

अतस्तु विपरीतस्य नृपतेरजितात्मनः ॥
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥ ३४ ॥

अतो वृत्ताद्**विपरीतस्य** चलितस्य । अत्र हेतुर**जितात्मता** । यथाशास्त्रमनियतात्मा यः ॥ ३४ ॥

स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः ॥
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ॥ ३५ ॥

स्वधर्माणां च **राजा सृष्टोऽभिरक्षिता** । स्वधर्मनिष्ठानामपालने राज्ञः प्रत्यवायो धर्मच्युतास्तु यदि केनचिदुपहन्येरन् न तत्र राज्ञोऽतीव दोष इति **स्वे स्वे धर्मे** इत्यनेन दर्शयति । अथवा न लिप्यते अनिविष्टानामिति । ये तु शास्त्रान्मित्राद्युपदेशाद्वा स्वधर्मापन्नाः न तेषां राजा द्वैधेन वर्तेत । वर्णग्रहणं स्त्रीबालवृद्धानां रक्षार्थम् । न हि ते आश्रमस्थाः । आश्रमग्रहणं तर्हि किमर्थं ? प्राधान्यार्थम् । ब्राह्मणवसिष्ठवत् । प्रयोजननिर्देशो वाऽयम् । आश्रमसन्ध्योपासनादिधर्माच्चलितुमेषामकरणान्नु । न चैवं दण्डाद्युपघातः कर्तुमेतेषां देयः । इतरथा बाधापरिहारः । एवं रक्षा विज्ञायन्ते । संन्ध्योपासनाद्युपकरणेषु नामान्यस्य कस्यचिद्भवति । द्विरूपा राज्ञः कर्तव्यतेति वर्णाश्रमग्रहणम् । एतदेवोक्तं " वर्णाश्रमांश्च न्यायतोऽभिरक्षेदिति " ॥ ३५ ॥

तेन यद्यत्सभृत्येन कर्तव्यं रक्षता प्रजाः ॥
तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ॥ ३६ ॥

वक्ष्यमाणावबोधार्थः श्लोकः । **तेन** राज्ञा **सभृत्येन** तदीयैः सहायैर्यत्कर्तव्यं प्रजारक्षणार्थं तदिदानीमुच्यते ॥ ३६ ॥

---

१ फ–श्रुतिः खडक्ष–कुटिलबुद्धिः । २ खडक्ष–कार्यसिद्धिः कृतकार्यसिद्धिः कृतकार्यप्रधानः स्यात् समानाभ्युदयः प्रत्यवायाः सुहृदः स्निग्धाः । ३ खडक्ष–यथाशास्त्रमनियतीति न्यायः । ४ फ–पुत्रा । ५ फ–प्रमुखेन । ६ फ–प्रकरणेषु । ७ फे–बाधनीयश्लोकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः ॥
त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ॥ ३७ ॥

प्रातरुत्थाय शयनं त्यक्त्वा यथाविधानं कृतसंध्योपासनः प्रथमं ब्राह्मणानां दर्शनं दद्यात् । उपासनमन्तिकोपवेशनकुशलप्रश्नादिकरणम् । **परिः** पादपूरणः । **तिष्ठेत्तेषां च शासने** आज्ञाकरणं तेषां शासनं यदि कस्यचिदुपकारायाविशेयुस्तद्विरुद्धं न शक्यं नाप्यनर्थकमनुतिष्ठेत् । **त्रैविद्यवृद्धान्** तिसृणां विद्यानां समाहारः त्रैविद्यं तदधीतिनः । **त्रैविद्या** रूढ्या ऋग्वेदादिवेदत्रयाध्यायिन उच्यन्ते । **विदुषस्तदर्थवेदिनश्च** । एवंविधा ये ब्राह्मणास्तानुपासीत । तदीयामाज्ञां कुर्यात् । **वृद्धास्त्रैविद्यानां** श्रेष्ठाः प्रकर्षवन्तोऽध्ययनविज्ञानयोः ॥ ३७ ॥

वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् ॥
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥ ३८ ॥

वृद्धान्वयस्थब्राह्मणान् । एतदपूर्वं अन्यत्पूर्वसिद्धं **विप्रानित्यादि** । **शुचीन्** निरुपाधीन् । एतदप्यपूर्वम् । यथैवाध्ययनविज्ञाने उपास्यत्वकारणमेवं शुचित्वमपि द्वितीयश्लोकार्थोऽर्थवादः । **रक्षोभिः** रक्षांसि निर्दयानि महाबलानि सर्वधर्मशून्यानि । तान्यपि वृद्धसेविनं पूजयन्ति ॥ ३८ ॥

तेभ्योऽधिगच्छेद्विनयं विनीतात्माऽपि नित्यशः ॥
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ॥ ३९ ॥

वृद्धसेवायाः प्रयोजनमाह । **तेभ्यो** विद्वद्ब्राह्मणेभ्यो वृद्धेभ्यः **विनयं** राजवृत्तम**धिगच्छे**च्छिक्षेत । **विनीतात्मा** यद्यपि स्वयंबुद्ध्याऽपि विनीतोऽर्थशास्त्रैर्वा तथापि वृद्धोपदेशे यत्नवान् स्यात् । दृष्टकर्माणः **शास्त्रज्ञेभ्यो** निपुणतराः । अथवा पाटवातिशयजननार्थं विनीतेनापि स्वभावतो वृद्धेभ्य आर्येभ्य आत्मा विनेयः । स्वभावशुद्धस्य सुवर्णस्य तेजःसंयोगादिनाऽधीयमानसंस्कारो विशुद्धतररूपवानसौ दृश्यते । यस्य विनयाधानस्य फलं न **विनश्यतीति** ॥ ३९ ॥

बहवोऽविनयान्नष्टा राजानः सपरिग्रहाः ॥
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ॥ ४० ॥

पूर्वोक्त एवार्थः श्लोकत्रयेणैव दृढीक्रियते । अविनीताः **सपरिग्रहा नष्टाः** । पुत्रदारहस्त्यश्वादिसंपत्परिग्रहः । ये तु विनयिनो न ते राष्ट्रं प्राप्य हारयन्ति । यावत्ते दूरस्था **वनस्था अपि** कोशहीना अपि राज्यं **प्रतिपेदिरे** लब्धवन्तः ॥ ४० ॥

---

१ **खडक्ष**–तेषां समन्वयस्त्वे कस्यचिदुपकाराय आविशेयुस्तदविरुद्धं शक्यम् । २ **फ**–तदधीयते । ३ **क**–वृद्धेभ्यश्च । ४ **खडक्ष**–अर्थे शास्त्रे वा । ५ **फ**–सपरिच्छदाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः ॥
सुदाः पैजवनश्चैव सुमुखो निमिरेव च ॥ ४१ ॥

उभयत्राप्युदाहरणानि लोकसिद्धानि वर्णयन्ति । एतानि महाभारतादाख्यानानि ज्ञेयानि ॥ ४१ ॥

पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च ॥
कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ॥ ४२ ॥

ब्राह्मण्यं चैव गाधिजः । ननु च राज्याधिकारे को ब्राह्मण्यप्राप्त्युपन्यासावसरः ? राष्ट्रप्राप्तिरेव यथापूर्वं वर्णयितव्या । उच्यते । धनैश्वर्यादपि जात्युत्कर्षो दुष्प्रापः, सर्वाधिकारहेतुत्वात् ।

ननु च कथं तस्य विनयो हेतुः ? षाड्गुण्यप्रयोगः अप्रमादः अतिव्ययवर्जनं अलोभः व्यसनासेवनं एवमादीनि विनयः । तदेतद्ब्राह्मण्यस्यैकमपि न कारणम् । तपो हि तत्र कारणत्वेन श्रुतं "विश्वामित्रस्तस्तेपे नानृषेः पुत्रः स्यामित्येवमादि"। उच्यते । नार्थशास्त्रोक्तैव नीतिर्नयः । किं तर्हि ? शास्त्रीयो विधिर्लोकाचारश्च । शास्त्रे च तपसा जात्युत्कर्षो जन्मान्तरे प्राप्यते इति विहितमेव । विश्वामित्रस्य ब्राह्मण्यं तु तस्मिन्नेव जन्मनि क्षत्रियस्य सत इत्याख्यातमेव ॥ ४२ ॥

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ॥
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ॥ ४३ ॥

विद्यामिति द्वितीयान्तपाठेऽधिगच्छेदित्यनुषञ्जनीयम् । समाप्तब्रह्मचर्यस्य सद्योपदेशाऽत्र्यर्थाधिगमेनैं तन्निष्पत्तेरभ्यासार्थोऽयमुपदेशः । अथवा विद्या त्रिविद्या तामधीयते त्रैविद्यास्तेभ्यस्त्रयीमृग्वेदादिवेदत्रयं **विद्यात्** । संदिग्धेषु पदार्थेषु वेदेभ्यो निर्णयं कुर्यात् । तैः सह वेदार्थं चिन्तयेदिति यावत् । न राजत्वाभिमानान्मदावलेपेन सर्वज्ञोऽहमिति बुद्ध्या संदिह्यमानानर्थानुपेक्षेत ।

दण्डनीतिं च दण्डविषया नीतिः । "दण्डो दमनमित्याहुः" येन शत्रवः स्वप्रकृतयो विषयवासिनश्चान्यायकारिणो दम्यन्ते स दण्डोऽमात्यादिसंपत् । **नीतिस्तस्य** प्रयोजनं तत्र विधिस्तं शिक्षेत । तद्विद्भ्यश्चाणक्यादिग्रन्थविद्भ्यः । **शाश्वतीमिति** स्तुतिः ।

---

१ महाभारते द्रो. प. ६९; शां. प. २८।१२७; ५८।१०२ । आ. प. ६३।५; ६९।२९; उ. प.–१०९।१२ भी. प. ६।१४ स. प. ८. ९. । २ शां. प. ५८।१०७. स. १०। आ. १९१। भागवते. ४।१३;४।१५ ३ **खडक्ष**--अधिगच्छेत्यनु- । ४ **फ**--राज्योपदेशात् । ५ **फ**–च । ६ **खडक्ष**--वाऽभ्यासनिर्णयं कुर्यात् । ७ **फ**–चाणाक्यादि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यपि दण्डनीत्याऽप्यस्य सर्वलोकः शक्यते ज्ञातुं अन्वयव्यतिरेकमूलत्वादस्यार्थस्य तथाऽप्यबुधबोधनार्थानि तानि शास्त्राणि बुधानां च संवादार्थानीति युक्तो दण्डनीतिशास्त्राधिगमः । एवं **आन्वीक्षिक्यपि** तर्कविद्यार्थशास्त्रादिका । **आत्मविद्या**ऽध्यात्मविद्या । विशेषणविशेष्ये वा पदे आत्मने या हिताऽऽन्वीक्षिकी सा तर्काश्रया तां शिक्षेत सा ह्युपयुज्यते । व्यसनाभ्युदयोपरमचित्तसंक्षोभोपशमाय । या तु बौद्धचार्वाकादितर्कविद्या सा नातीवकृत्वा कचिदुपयुज्यते । प्रत्युतास्तिक्यमुपहन्ति यो नातिनिपुणमतिः । यदा तु स्वतंत्रामान्वीक्षिकीं वेद तदा तस्य दूतसंवादादिषु वाक्यवैशद्यानामुपयोगो नोपहास्यो भवति । **वार्तारम्भांश्च** पण्यानामर्थपरिज्ञानं वाणिज्यकौशलं समयेन बार्हस्पत्येन तत्र परिज्ञानं **वार्ता** । तन्निमित्ता आरम्भा वार्तारंभाः । वार्तास्वरूपं ज्ञात्वा तद्विषयकार्यो प्रवृत्तिरारंभः । एतल्लोकतो विद्यात् । वणिज्याजीवनोऽत्र लोकोऽभिप्रेतः । ते हि तत्र कुशला भवन्ति । **लोकत** इति च पूर्वयोरनुषङ्गः कर्तव्यस्तेन सर्वत्र तद्विद्भ्यः इति लभ्यते ॥ ४३ ॥

इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ॥
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥ ४४ ॥

इन्द्रियजयस्य ब्रह्मचारिधर्मेषु सर्वपुरुषार्थतयोपदिष्टस्य पुनरिहोपदेशो राजधर्मेषु मुख्योऽयं विनय इति ज्ञापयितुम् । तदिदमाह **जितेन्द्रिय** इत्यादि । सर्वस्यैतत्प्रसिद्धं अजितेन्द्रियस्य न प्रजा वशे तिष्ठन्ति । **योग**स्तात्पर्यम् । **दिवानिश**महोरात्रम् ॥ ४४ ॥

दश कामसमुत्थानि तथाऽष्टौ क्रोधजानि च ॥
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ॥ ४५ ॥

इदमपरमिन्द्रियजयोपदेशस्य प्रयोजनम् । अजितेन्द्रियस्य दुष्परिहराणि व्यसनानि । **दुरन्तानि** दुःखकरोऽन्तोऽवसानं येषाम् । प्रथमं प्राप्तिकाले सुखयन्ति व्यसनानि पश्चात्तु वैरस्यं जनयन्ति ततो दुरन्तान्युच्यन्ते । अथवा दुष्प्रापोऽन्त एषाम् । न हि व्यसनिनस्ततो निवर्तितुं शक्नुवन्ति । कामाद्धेतोः समुत्थानं जन्म येषाम् ॥ ४५ ॥

एषां वर्जने प्रयोजनमाह । गुरुलघुभावं च ।

कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ॥
वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ ४६ ॥

अर्थधर्मवियोगेन व्यवहित आत्मवियोगः । **क्रोधजेषु** सर्वैर्वियुज्यत इति विशेषः ॥ ४६ ॥

---

१ खडक्ष-यथापि । २ ख-ड-क्ष-संवादार्थो नीतिशास्त्राधिगम एव नान्वीक्षिक्यपि तर्कविद्या । ३ ख-ड-क्ष-विशेषणं । ४ फ-आन्विक्षिकी तर्काश्रया । ५ ख-ड-क्ष-तर्कसंश्रयणम् । ६ ख-ड-क्ष-बौद्धाचार्यदिकी विद्या । ७ ख-वाक्यावेशाद्येन उपभोगः; ड-क्ष-वाक्यावेशारद्येन उपभोगः नापोहास्ये भवति । ८ ख-ड-क्ष-तन्निमित्ता वाहरेयास्य न तत्र परिज्ञानं । ९ फ-कार्याय । १० ख-ड-क्ष-न हि । ११ ख-ड-क्ष-ज्ञानयितव्यमन्यामहे जितेन्द्रियोर्हित्यादि । १२ फ-वैरस्य- । १३ ख-ड-क्ष-जनयति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तानीदानीं व्यसनानि स्वनामतो दर्शयति

मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ ४७ ॥

आखेटकार्थो मृगवधो **मृगया** । **अक्ष**स्तद्विषयक्रीडा । एतयोस्त्वानर्थत्वं प्रसिद्धम् । **दिवास्वप्नः** कर्मानुष्ठानकाले कर्मस्वव्यापारः । न दिवाशब्देनाहरेव विवक्षितम् । तदुक्तं "जागर्तव्ये प्रसुप्तकेति" । अथवा मुख्य एव दिवा स्वप्नः । स हि प्रतिषिद्धः सर्वकार्यविघाती । स च दर्शनार्थिनामन्येषां तदसंपत्तेर्द्वेष्यताजनकः प्रजासु । **परिवादः** रहसि परदोषोवर्जनम् । तेन सर्वाः प्रकृतयो विरज्यन्ति अपरिवाद्यानां च परिवादेऽधर्मः स्थित एव । **स्त्रियो मद** इत्येतयोरनर्थरूपता सुप्रतीता । **तौर्यत्रिकं** नृत्यगीतवादित्राणाम् । **वृथाट्या** अप्रयोजनमीषत्प्रयोजनं वा इतस्ततश्च परिभ्रमणम् । दश परिमाणो **दशकः** । **कामजः** काम इच्छा । ततो जायते विशिष्टसुखोपभोगार्थो वा अनुभूतविशेषाद्वा जायमानः कामजः ॥ ४७ ॥

पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थदूषणम् ॥
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ ४८ ॥

अमात्यादितो ये सुकृतबान्धवास्तत्र यन्निगोपनीयं तस्य प्रकाशनं **पैशुन्यम्** । **साहसं** ज्यायसो नीचकर्माणि विनियोगः । स्वल्पेनैवापराधेन कराधानं करावरोधो वा । **द्रोह** उपांशुवधः । तत्रोपघातो वा जीवतः **ईर्ष्या** । सर्वसाधारणस्य विषयस्य साधारण्यव्यावृत्तिः । असहनं वा गुणिनां गुणेषु दोषाविष्करणं **असूया** । **अर्थदूषणं** अर्थानामदानं हरणं वा । **वाग्दण्डपारुष्ये** प्रसिद्धे । **क्रोधो** द्वेषः । तत्प्रधाना एतत्कुर्वन्ति ॥ ४८ ॥

द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः ॥
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥ ४९ ॥

उक्तं तावत्कामस्य व्यसनवर्गस्य लोभो मूलम् । विषयोपभोगस्पृहा कामः । इच्छा अभिलाषो लोभः इत्यनर्थान्तरम् । यतः क्रोधजस्य कथं लोभो मूलं येनोच्यते । "तज्जावेतावुभौ गणाविति" । उच्यते । नात्र लोभकारणता तयोर्वर्गयोरभिप्रेता । किं तर्हि वर्गद्वयतुल्यता लोभस्य । यमेतानि सर्वाणि व्यसनान्यनर्थमुपजनयन्ति तमेवैको लोभो व्यसनहीनस्यापि । तदुक्तं "लोभः सर्वगुणानिव" इति । अत उपचारत एतदुक्तं **तज्जावे-**

१ ख–ङ–क्ष–रहसि च परदोषवर्जनं । २ ख–ङ–क्ष–परिवादः । अधर्मस्थित एव स्त्रियो मद इत्येत्र योनर्थता । ३ फ·अमात्यादयो । ४ ख–ङ–क्ष–तत्र योत्र योपयंति । ५ ख–ङ–क्ष–व्यायामो । ६ ख–ब–क्ष–अपघातो । ७ ख–ङ–क्ष–वार्जवेनाव ईर्ष्या । ८ ख–ङ–क्ष–विषस्य । ९ ख–ङ–क्ष–गुणानां । १० ख–ङ–क्ष–अर्थानां मदेनोपहरणं वा । ११ ख–ङ–क्ष–गतः । १२ ख–ङ–क्ष–मात्र ।

For Private And Personal Use Only

तावितिं । यदि लोभो न जायेत कथं समानफलानि स्युः । कारणदोषो हि कार्यदोषं भासयति । अतस्तत्कार्यत्वाद्व्यसनेषु चेद्दोषो ध्रुवं कारणस्याप्यसौ दोष उक्तो भवति । अथवा लुब्ध एव पैशुनादिबाह्यकार्येष्वभिष्वङ्गं गच्छति[1] । इतरस्तु स्वल्पके विषये[2] अनुनयेन वोपशाम्यति । सेयमुपचाराल्लोभमूलता[3] व्यसनवर्गद्वयस्योच्यते ॥

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ॥
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे[4] ॥ ५० ॥

दिवा स्वप्नादिभ्योऽस्य चतुष्कस्य गणस्य बहुदोषतरत्वं प्रसिद्धमेव ॥ ५० ॥

दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे ॥
क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥ ५१ ॥

अयमपि त्रिकः पैशुनादिभ्यः पापीयानिति सुप्रतीतम् ॥ ५१ ॥

सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषंगिणः ॥
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥ ५२ ॥

पानद्यूतयोः पानं गरीयः । तत्र[5] हि संज्ञाप्रणाशः । अनुन्मत्तस्योन्मत्तत्वं अप्रेतस्य प्रेतत्वं कौपीनप्रकाशनं श्रुतप्रज्ञाप्रहाणं[6] मित्रहानिः सद्भिर्वियोगः । असद्भिश्च संप्रयोगः।गीतादिष्वर्थघ्नेषु प्रसङ्गः। रतमन्त्रप्रकाशनं च मानिनोऽप्युपहास्यता[7] गम्भीरप्रकृतेरपि यत्किञ्चनवादिना[8] मदवेगेनेति पानदोषः[9] ।

द्यूते तु जितमेवाक्षविदुषा अनक्षज्ञस्यापि पाक्षिकः पराजयः । स्त्री द्यूतव्यसनयोर्द्यूतव्यसनं गरीयः । येन तदेव जितं द्रव्यं तस्यापि विषं[10] भवति । तथा च तन्निमित्तो वैरानुबन्धः जयः साधारणः केवलं पराजयः भुक्तनाशः । मूत्रपुरीषवेगधारणाच्च शरीरे[11] शैथिल्यं व्याधिनिदानमेव । *तेन[12] क्षुद्भ्रादिभिः स्वपीडातिशयात् । मातर्यपि च मृतायां दीव्यत्येव । कृतकृत्येषु च न सुहृद्भिरपि कृष्यते । तप्तायसपिण्डवत् परद्रव्याणि परिहरतो न प्रत्ययते च । क्षुधिते दुर्गतेऽन्नाद्युपपत्त्युपेक्षा विपयता सर्वगुणसंपन्नस्यापि तृणवदवज्ञायेत इति द्यूतदोषाः* । स्त्रीव्यसने त्वपत्योत्पत्तिः प्रतिकर्म भोजनभूयिष्ठानुभवनं धर्मार्थपरिग्रहः । शक्या च स्त्री राजहिते नियोक्तुमपवाहयितुं वा ।

स्त्रीमृगयाव्यसनयोः स्त्रीव्यसनं गरीयः । अदर्शनं कार्याणां स्त्रीव्यसनसंगेन राजकार्येषु च निर्वेदः कालातिपातनं[13] धर्मलोपः पानदोषानुबन्धः अर्थघ्नेषु चानृतादिषु प्रसंग इति ।

---

१ ख-ड-क्ष-पैशुनादिषु ते गच्छन्ति । २ ख-ड-ह्यल्पके विषये । ३ ख-ड-क्ष-यः समुपचारालोभमूलता । ४ ख-ड-क्ष-गण । ५ ख-ड-क्ष-तत्र संज्ञाप्रणाशः । ६ ख-ड-क्ष-द्यूतप्रज्ञाप्रहरणं । ७ ख-ड-क्ष-मानिनोऽप्ययश गम्भीर—। ८ ख-ड-क्ष-वादिना मेदयोगेनेति । ९ फ-पानदोषः । १० ख-ड-क्ष-विषांभवति । ११ ख-ड-क्ष-शरीरल्य । *एतच्चिह्नान्तर्गतं ख-ड-क्ष-पुस्तकेषु नैव दृश्यते । १२ ख-ड-क्ष-गमनेन । १३ ख-ड-क्ष-कल्पेतिपतनं ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मृगयायां तु व्यायामः पित्तश्लेष्मबन्धः मेदादिनाशः चले स्थिरे वा काले लक्षः परिचयः । प्रहरणे वैशारद्योपजननं ग्राम्यजनपरिजयश्चेति । एवं कामजस्य चतुष्कस्य वर्गस्य स्ववर्गे पूर्वं पूर्वं पापीयः ।

क्रोधजस्यापि च दण्डपातदोषानुबन्धः अर्थेष्वेवानृतादिषु संगः । दण्डपातवाक्पारुष्ययोर्दण्डपातनं गरीयः । दण्डपातने हि शरीरविनाशादिशक्यं प्रतिसंधानम् । वाक्पारुष्ये त्वमर्षजः क्रोधाग्निः शक्यते दानमानाम्भोभिः शमयितुम् ।

वाक्पारुष्यार्थदूषणयोर्वाक्पारुष्यं गरीयः । तेजस्विनो हि पारुष्यवचनचित्तसंक्षोभे भयं नासादयन्ति । तथा च प्रवादः

"स्थिरं साध्वसितं काण्डं भित्वा वाऽस्थिप्रवेशितम् । विशल्यमङ्गं कुर्वन्ति न वाचो हृदयादपि ।
"रोहते सायकैर्विद्धं वनं परशुना हतम् । वाचा दुरुक्तं बीभत्सन्न संरोहति वाक्क्षतम् ॥"

भाग्यायत्तत्वादर्थस्येति न तेजस्विनोऽर्थदूषणं गणयन्ति । एवमेतयोर्वर्गयोः पूर्वस्य पूर्वस्य गरीयस्त्वं निदर्शितम् ॥ ५२ ॥

व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ॥
व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ॥ ५३ ॥

यद्यपि मृत्युव्यसने सर्वं हरेताम् तथाप्येवं विशेषः । मृत्युरस्मिँल्लोके सर्वहरः । व्यसनं पुनरिह चामुत्र च । तदिदमाह । **व्यसन्यधोऽधो व्रजति** नरकं गच्छतीत्यर्थः । व्यसनशब्देन अत्यन्तोऽभ्यास एतद्वर्गविषय उच्यते । अतश्चाभ्यासः प्रतिषिध्यते । न त्वीषदासेवनम् । व्यसनभूता ह्येते धर्मार्थकामप्राणहरा भवन्त्यन्यस्यापि पुरुषस्य । किं पुना राज्ञः । किंच असेवनमप्ययुक्तं पानादीनामाशङ्क्य चेति । यतोऽभ्यासप्रतिषेधः ॥ ५३ ॥

मौलाञ्छास्त्रविदः शूराँल्लब्धलक्षान्कुलोद्गतान् ॥
सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ॥ ५४ ॥

पितृपितामहान्वयोगता बहुसुतधनबान्धवाः प्रकटगोभूमिधनास्तद्देशवासिनो **मौलाः** । मूलं प्रतिष्ठा तत्र भवा मौलाः । **शास्त्रविदः** शास्त्रं शासनं भृत्यविधिज्ञानं तेनान्येऽपि गुणा गृह्यन्ते । तद्यथा । प्राज्ञः दृढकारी धारयिष्णुर्दक्षः वाग्मी प्रबलः प्रतिपत्तिमानुत्साहप्रभावयुक्तः क्लेशसहः शुचिर्दानशीलः योग्यसत्वयुक्तः स्तंभचापल्यहीनः प्रियो वैरिणामकर्तेति । **शूरशब्देन** राजकार्ये शरीरकलत्रापत्यधनादिष्वपि निरपेक्ष

---

१ ख-ड-क्ष-मेदादिनाम च ते स्थिते च कालाय लक्ष्यपरिचय । २ फ-प्रहरणं । ३ फ-कुलोद्भवान् । ४ ख-ड-क्ष-परीक्षकान् । ५ ख-ड-क्ष-पितामहाद्यागता । ६ ड-शास्त्रविदः समानं शास्त्रविदः समानं शास्त्रविधानं; ख-क्ष-शास्त्रविदः समानं शास्त्रविधानं । ७ ख-ड-क्ष-भृत्यविधिज्ञाः । ८ फ-शुचिदान शील ।

For Private And Personal Use Only

उच्यते । तथा मरणेऽभीरुः । युद्धोत्साही । एक एव परिभवभयाद्बहुभिर्विरुध्यते । दृढप्रहारी बलवान् । **लब्धलक्षाः** परिदृष्टकर्मतामनेनाहाः दृष्टखड्गव्यापाराः कृतार्थाधिकाराः अनुभूतमन्त्रिभूमयः । **कुलोद्गतान्** कुलांकुशनिगृहीता ह्यकार्ये न वर्तन्ते । **सचिवान्** सहायान् । नित्यमेते राज्ञः पार्श्ववर्तिनो भवेयुः । सप्त वाऽष्टौ वा । नियमोऽयं येन चाल्प एकचित्ता भवन्ति । ततश्च राजमन्त्र उद्घाटकः स्यात् । बहूनामपि मन्त्रभेदः । तस्मादेतावन्त एव कर्त्तव्याः । **सुपरीक्षितान्** धर्मार्थकामभयोपधाभिः सेयं परीक्षोच्यते । पुरोहितः स्वल्पकार्ये राज्ञा व्याजेनाधिक्षिप्तः बहुनाऽर्थसंप्रदानेनाप्तपुरुषैरेकैकममात्यमुपजपेत् राजविनाशाय । एतच्च सर्वं मन्त्रिभ्यो रोचते । अथ कथं भवत इति प्रत्याख्याने धर्मोपधाशुद्धः । *सेनापतिः केनचिदुपदेशेन पूर्ववदधिक्षिप्तः बहुना च संप्रदानेनाप्तपुरुषैरेकैकमात्यमुपजपेत् राजविनाशाय । एतच्च सर्वमन्त्रिभ्यो रोचते । अथ कथं भवत इत्याख्याने अर्थोपधाशुद्धः । परिव्राजिकान्तःपुरे लब्धविश्वासा एकैकममात्यमुपजपेत् । सा राजमहिषी भवन्तं कामयते कृतसमागमोपायेति प्रत्याख्याने कामोपधाशुद्धः । राजप्रयुक्ता एव केचित्पुरुषाः प्रमादमाविष्कुर्युः कृतसमयैरमात्यै राजा हन्यत इति । उपलब्धप्रमादः पुरोहितस्याप्तः कश्चिदमात्येषु मन्त्रं श्रावयेत् । इमं प्रवादमुपश्रुत्य भवतां निग्रहो राज्ञा क्रियत इति तेषामेव चान्यतमः पूर्वमेव कृतसंवित्कः प्रत्येकं राजामात्येषूत्साहयेत् । तत्र ये प्रत्याचक्षते ते भयोपधाशुद्धाः ।

अथवा मौलांस्तावत्कुर्यादर्थप्रमादिकर्तृसंनिधातॄन् ये अर्थं ग्रामेभ्यः समाहरन्ति समाहृतं च रक्षन्ति विनियुञ्जते च । सर्वथाऽर्थव्यवहारिणो मौलाः कर्त्तव्या इत्युक्तं भवति । **शास्त्रविदो** बुद्धिसचिवा मंत्रिणः । **शूरान्** बलाध्यक्षान् । लब्धलक्षानित्यादि सर्वेषां विशेषणमेकैकस्य समुदितपरीक्षा च योक्ता राजविषया राजामात्येषूत्साहनमिति सा न युक्तेति मन्यन्ते । एष एव हि बुद्धिभेदो भवेदमात्यानाम् । तस्मादन्या काचित्स्त्री साध्वी प्रयोज्या अन्यश्च विनाशविषय उदाहार्यः ॥ ५४ ॥

अपि यत्सुकरं कर्म तदप्येकेन दुष्करम् ॥
विशेषतोऽसहायेन किं तु राज्यं महोदयम् ॥ ५५ ॥

यत्सामान्यं गृहस्थस्य गृहकृत्यं गोऽश्वादिपालनं सुकरमिति स्थितम् । स एव गां पालयति स एव दोग्धि । न शक्यमेतदेकेन कर्तुं तदप्येकेन दुष्करं विशेषतोऽसहायेन दुष्करमशक्तेन न शक्यं कर्तुम् । कथं ह्येको गां चारयति । कथं च भार्यां रक्षतु कथं सेवतु ।

१ ख–ड–क्ष– मरणेतीवोत्साही । २ ख–ड–क्ष–भयादीनि विरुध्यते; ख–क्ष–भयादिनिर्विरुध्यते । ३ ख–ड–क्ष–छलप्रहारी । ४ फ–तामननोहा । ५ ख–ड–क्ष–कुलाकुल । ६ ख–ड–क्ष–येनाल्प । ७ ख–ड–क्ष–यतः पुरोहितः स्वकार्यः—। ८ फ–उपजयेत् । ९ फ–राजा । १० ख–ड–क्ष–सर्वमन्त्रोभ्यो । ११ ख–ड–क्ष–इत्याख्याने । १२ फ–अर्थोपधा—। *—*एतच्चिन्हान्तर्गतपाठः फ–पुस्तके नोद्धृतः । १३ फ–अर्थप्रसिसिद्धिः । १४ फ–मौल्यं । १५ फ–समानकर्तृ । १६ फ–राजपाप्यस्य साहनमित्यादिन्यसाय्युक्तानि । १७ फ–न वेद । १८ फ–विनाशा । १९ ख–ड–क्ष–विशेषतः सहायेन । २० ख–ड–क्ष–तत् । २१ ख–एवं; क्ष–स एवं । २२ ख–ड–क्ष–न वात्र रक्षाकर्तुं च गृहेष्वत्रमेव तु राज्यं च प्रतिनिहारं शक्यं । तस्मादात्मसमाः– ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्यं तु प्रति महारंभमुदयकर्म तद्योगः फलवांश्चानपेक्षमाणस्य महत्फलमुपोहेति । न चैकेन षाड्गुण्यं वेदितुं शक्यम् । तस्मादात्मसमाः परीक्षिताः सहायास्तेषु तेषु कार्येषु कर्तव्याः ॥ ५५ ॥

तैः सार्धं चिंतयेन्नित्यं सामान्यं संधिविग्रहम् ॥
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥ ५६ ॥

तैर्बुद्धिसचिवैर्मुख्यैश्चार्थाधिकारिभि[1]ः सह सामान्यं यन्नातिरहस्यं तच्चिन्तयेत्सन्धिविग्रहम् । किं सन्धिः संप्रति युक्तोऽथ विग्रह उभयत्र गुणदोषान्विचारयेत् । इदं कर्तव्यावधारणं तु स्वबुद्ध्या कुर्याद्यथाऽस्य परप्रयोज्यता न भवति । इदं चापरं चिन्तयेत्स्थानं तच्चतुर्विधं दण्डकोशपुरराष्ट्राणि । तत्र दण्डो हस्त्यश्वरथपदातयः । तेषां प्रति कर्म पोषणरक्षणादि चिन्त्यप्रतिकर्म । न ह्यसमाधानं प्रधानं च यथा कोशस्य हेमरूप्यबाहुल्यं प्रचुररूप्यताऽऽयव्ययलक्षणं च । कोशस्य यानि[2] न्यायस्थानानि तानि न व्ययितव्यानि न विलम्बनीयानि भृत्यानाम् । तथा[3] राष्ट्रस्य देशपर्यायस्य स्वाजीव आत्मसंधारेण[4] परसंधारणेन नदीवृक्षाः पशवः शत्रुद्वेषाक्रान्तप्रायः गुप्तिगोचरः पशुमान् अदेवमातृकः आपदि च दण्डकरग्रह इत्येवमादि । पुरस्य वक्ष्यति "तस्मादायुधसंपन्नमिति"। अथवा स्थानं स्वदेशाच्चाप्रच्यवनम्[5] । एवं समुदायोऽपि चिन्त्यः । तत्र कृषिर्व्रजगुल्मस्थानानि वाणिज्यमुक्तदण्ड इत्येवमादि । गुप्तिं स्वराष्ट्रगतां वक्ष्यति । लब्धप्रशमनं च देवतासमं विद्यावतां धार्मिकाणां च मानदानत्यागायोगः । अजितानां[6] चाभ्यनुज्ञानं सर्वबन्धनमोक्षः । अनुग्रहो दीनव्याधितानां उत्सवानां चापूर्वाणां प्रवर्तनं प्रवृत्तानामनुवृत्तिः । यच्च कोशदण्डोपाधिकमधार्मिकचरित्रं तदपनीय धर्मव्यवहारान् स्थापयेत् । अधर्मचारित्रमकृतमन्यस्य कृतं वाऽन्यैः प्रवर्तयेत् । न वा धर्मकृतं चान्यैर्निवर्तयेदिति । एवं स्थानादीनि चिन्त्यानि ॥५६॥

तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ॥
समस्तानां च कार्येषु विदध्याद्धितमात्मनः ॥ ५७ ॥

तेषां पृथक्पृथगेकैकस्य रहस्याभिप्रायं हृदयनिहितं[7] भावमुपलभ्य समस्तानां संहतानां यत्कारणं कश्चित्पुरुषः परिषदि अप्रतिभानवान्भवति रहसि प्रगल्भः कश्चित्परिषद्यासादितप्रज्ञः ततश्च तान्समस्तान्पृच्छेत् । ततः स्वयं यद्युक्ततरं हितमात्मने तद्व्यवस्येद्विदध्यात् । तत्प्रामाण्यं तेषामेवान्यतमेनोपदिष्टं वा यदप्रत्यर्तीकं निर्दोषं च ॥ ५७ ॥

सर्वेषां तु विशिष्टेन[8] ब्राह्मणेन विपश्चिता ॥
मंत्रयेत्परमं मंत्रं राजा षाड्गुण्यसंयुतम् ॥ ५८ ॥

१ ख–ड–क्ष–कारणैः । २ ख–ड–क्ष–परप्रमाणवान् । ३ फ–तथा । ४ ख–ड–क्ष–यथ । ५ ख–ड–क्ष–संधारणपरः संधारणेन नदरक्षये रात्रच्य । शत्रुद्वेषी शीताप्रायो— । ६ ख–ड–क्ष–प्रच्यवन । ७ ख–ड–क्ष–उदितानां । ८ ख–ड–क्ष–विहितं । ९ ख–ड–क्ष–च विशिष्टानां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विपश्चिता विदुषा अर्थशास्त्रज्ञेन परं मन्त्रमत्यन्तं गोपनीयं **मन्त्रयेत्** षाड्गुण्य-**युक्तम्** । अधिकतरप्रज्ञो हि ब्राह्मणो धार्मिकत्वाच्च विश्वसनीयः ॥ ५८ ॥

नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् ॥
तेन सार्धं विनिश्चित्य ततः कर्म समारभेत् ॥ ५९ ॥

तादृशि ब्राह्मणे सर्वराष्ट्रमण्डलं निक्षिप्य विश्वस्तो राज्यसुखं भुञ्जीत च । सह **विनिश्चित्य** यानासनादि **कर्म** व्यवहारसंग्रहादि समाचरेत् ॥ ५९ ॥

अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान् ॥
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ॥ ६० ॥

यदुक्तं ' सप्त चाष्टौ वेति ' तस्यायमपवादः । **अर्थसमाहर्तॄन्**संनिधातॄन्सुपरीक्षितानुपधाभिः कुर्यात् ॥ ६० ॥

निर्वर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः ॥
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ॥ ६१ ॥

सर्व एते मन्त्रज्ञा **विचक्षणाः** विद्वांसश्चाधिकारिकाः कर्तव्याः । **दक्षान्** भयसंनिधानेऽप्यव्ययहेतावत्युत्साहवन्तः । **अतन्द्रितान्** अनलसान् । उक्तं **चाध्यक्षप्रचारे** " बुद्धिमाननुरक्तश्च युक्तो धर्मार्थकोविदः । शुचिर्दक्षःकुलीनश्च मन्त्री यस्य स राज्यभाक् ॥ "तस्मिन्निक्षिप्य कार्याणि भोगसंगी न नश्यति । राजवश्यविधिस्तेन दानानुग्रहणैरिति" ॥ ६१ ॥

तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्गतान् ॥
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥ ६२ ॥

अर्थे आयव्ययव्यवहारे । **शुचीन**र्थेष्वस्पृहान्नियुञ्जीत । तान्यर्थस्थानान्युदाहरणेन दर्शयति । **आकरकर्मान्त इति** । आकराः सुवर्णरूप्याद्युत्पत्तिसंस्कारस्थानानि । कर्मान्ता भक्ष्यकार्पासावापादयः । **अंतर्निवेशने** अन्तःपुरंभोजनशय्यास्त्रीगृहाणि । **भीरवस्तत्र** नियोज्याः । **शूरा** हि राजानमेकाकिनमुपजप्ता हन्युः । **दक्षाः** सर्वेऽपि व्युत्थानशीलतया द्वन्द्वोपरिपातमपरिगणय्य स्वामिनः कार्यकाले नातिपातयन्ति ॥ ६२ ॥

---

१ ख-ड-क्ष-क्रम । २ ख-ड-क्ष-तादृशे । ३ ख-ड-क्ष-राज्यं । ४ ख-ड-क्ष-राज्यं सुखं । ५ ख-ड-क्ष-विधिश्चेतदाना अनुग्रहैरितीभिमायभि । ६ ख-ड-क्ष-कर्मारत् । ७ ख-ड-क्ष+आये व्यये च नियतान् गणितज्ञानकोविदान् । ८ ख-ड-क्ष-अर्थेशान् । ९ ख-कर्मांता इति कर्पासमदादय ; ड क्ष——मदादय , १० क-पुनर्भोजन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ॥
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥ ६३ ॥

दूतस्यायमधिको गुणः इङ्गिताकारचेष्टज्ञता । परविषये राज्ञे मन्त्रिणां च संधित्सतामिङ्गितानि दूतस्यादरेण संपरिग्रहः । विश्वसनं मुहुर्मुहुः संपूर्णतद्वाक्यस्य तस्य चाभिनंदनं एतानि विपर्यस्तान्युपेक्षेत । आकारशरीरवैकृत्यं म्लानिर्मुखस्य वर्णवैकृत्यम् । तूष्णींभावो दीर्घोष्णनिःश्वासता एवमादिविकारैर्दैन्यं सूचयति । अस्ति काचिदापदस्य तेनायं विवर्ण इति वाक्यवैशारद्यम् । शारीरसंस्कारः प्रसन्नमुखता एवमादि हर्षं सूचयति । शुचिस्त्रीगतेऽर्थे गमनविशेषैर्यतः स्त्रीसंबन्धे मन्त्रभेदः परिभवश्च ॥ ६३ ॥

***अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् ॥**
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥ ६४ ॥

अनुरक्तः अहार्यो भवति । **दक्षः** देशकालौ नातिक्रामति । **स्मृतिमान**मुषितस्मृतिप्रसङ्गेन स्वामिसंदेशं कथयति । **देशकालवित्** देशकालौ ज्ञात्वाऽन्यदपि संदिष्टं तत्कालयोग्यं कथयति । **वपुष्मान्**स्वाकृतिः प्रियदर्शनत्वान्निपुणमुचितं वक्ति । **वीतभीः** अनेन निपुणमुच्यते । **वाग्मी** संदेशस्योत्तरे प्रतिवचनसमर्थो भवति ॥ ६४ ॥

उक्तदूतगुणानां संपादनाय तत्प्रयोजनमाह

अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया ॥
नृपतौ कोशराष्ट्रे च दूते संधिविपर्ययौ ॥ ६५ ॥

---

१ ख–ड–क्ष–अतो गुणविधानार्थमन्यदुचितानुवादपदपूरणं । २ ख–ड–क्ष–स्मृतिप्रसङ्गेन ।

*सन्धिविग्रहकालज्ञान् समर्थानायतिक्षमान् ॥
परैरहार्यान् वृद्धांश्च धर्मतः कामतोऽर्थतः ॥ १ ॥
समाहर्तुं प्रकुर्वीत सर्वशास्त्रविपश्चितः ।
कुलीनान् वृत्तिसंपन्नान् निपुणान् कोशवृद्धये ॥ २ ॥
आयव्ययस्य कुशलान् गणितज्ञानलोलुपान् ॥
नियोजयेद्धर्मनिष्ठान् सम्यक्कार्यार्थचिन्तकान् ॥ ३ ॥
कर्मणि चातिकुशलान् लिपिज्ञानायतिक्षमान् ।
सर्वविश्वासिनः सत्यान् सर्वकार्येषु निश्चितान् ॥ ४ ॥
अकृताशांस्तथा भर्तुः कालज्ञांश्च प्रसंगिनः ॥
कार्यकामोपधाशुद्धा बाह्याभ्यन्तरचारिणः ॥ ५ ॥
कुर्यादासन्नकार्येषु गृहसंरक्षणेषु च ।] +

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमात्ये सेनापतौ दण्डो हस्त्यादिबलमायत्तं तदिच्छया कार्येषु प्रवृत्तेः । दण्डे वैनयिकी यो विनेयः स्वपरराष्ट्रगतः स दण्ड्यो यतः विनयाश्रिता वैनयिकी क्रिया कार्यम् । नृपतौ कोशराष्ट्रे आयत्ते । सञ्चयस्थानं कोशः । राष्ट्रं जनपदः । द्वे च ते पराधीने न कर्तव्ये । स्वयमेव विलम्भनीयफलग्रासाच्च । दूते सन्धिविपर्ययौ । प्रियवचनेन स्वामिकार्यप्रदर्शनेन सन्धिः । तद्वैपरीत्येन विग्रहः । एतदुभयं दूतायत्तम् ॥ ६५ ॥

एवं दूतार्थानुवादः । एष एवार्थः पुनरुच्यते

दूत एव हि[1] संधत्ते भिनत्त्येव च संहतान् ॥
दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवाः ॥ ६६ ॥

यथा दूतः संधत्ते । यथोक्तं संहतानेकीभूतान्स एव भिनत्ति । अनुक्तमपि प्रियं संदिशति । प्रतिकूलमनाचरितमित्यादि । सुवर्णादिद्रव्यमप्रतिश्रुतमित्याह । एवं भिनत्ति दूतः । तदेतत्कर्मानन्तरोपदिष्टं येन राजानो भिद्यन्ते न वाक्पारुष्यापन्ना एवं संभवन्ति ॥ ६६ ॥

अन्यदपि दूतकार्यं दर्शयति ।

स विद्यादस्य कृत्येषु निगूढेङ्गितचेष्टितैः ॥
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम् ॥ ६७ ॥

स दूतो यातव्यस्य राज्ञः कृत्येषु कार्येषु ॥ ६७ ॥

बुध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम् ॥
तथा प्रयत्नमातिष्ठेद्यथाऽऽत्मानं न पीडयेत् ॥ ६८ ॥
जाङ्गलं सस्यसंपन्नमार्यप्रायमनाविलम् ॥
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥ ६९ ॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ॥
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ॥ ७० ॥

उक्तप्रकारेण द्विगुणोत्सेधेनेष्टकेन शैलेन द्वादशहस्तादूर्ध्वमुद्धतेन तालमूलेन कपिशीर्षचिताग्रेण दृढप्रणाल्या परिक्षितं धनुर्दुर्गम् । महीदुर्गमगाधेनाश्रयणीयेन चोदकेन परिवेष्टितं दुर्गम् । समंततोऽर्धयोजनमात्रं घनमहावृक्षान्वितं वार्क्षम् । चतुरङ्गबलाधिष्ठितं प्रवरायुधवीरपुरुषप्रायं नृदुर्गम् । गिरिपृष्ठे दुरारोहमेवैकमार्गानुगतमन्तर्नदीप्रस्रवणोदकं गिरिदुर्गम् ॥ ७० ॥

---

१ ख-ङ-क्षी-च

६५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ॥
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥ ७१ ॥

त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाप्सराः
त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः ॥ ७२ ॥

आद्यानि त्रीणि धनुर्दुर्गादीनि । आश्रिताः आश्रयं कृतवन्तः । मृगा गर्ताश्रया गर्गरनकुलादयः । अप्सरा ग्राहकूर्मादयः । एषां दुर्गाणां तदाश्रितानां च यादृशा गुणदोषास्तादृशा एव राज्ञामपि भवन्तीति प्रदर्शनार्थं त्रीण्युत्तराणि । प्लवङ्गमाः कपयः॥७२॥

यथा दुर्गाश्रितानेतान्नापहिंसन्ति शत्रवः ॥
तथाऽरयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ॥ ७३ ॥

दुर्गविधानप्रयोजनश्लोकोऽयम् । अत्यल्पबला[1] अपि दुर्गाश्रिता महाबलैररिभिर्न सहसा शक्यन्तेऽभिभवितुमतो दुर्गाश्रयो युक्तः ॥ ७३ ॥

एकः शतं योधयति प्राकारस्थो धनुर्धरः ॥
शतं दशसहस्राणि तस्माद्दुर्गं[2] विधीयते ॥ ७४ ॥

सुप्रसिद्धमेतद्दुर्गप्रयोजनं प्राकारदृष्टान्तेन गिरिदुर्गबलमेतदिति[3] तदयुक्तं महीदुर्गेऽपि प्राकारसम्भवात् । तस्मात्सर्वेषां दुर्गाणां तत्प्रयोजनं स्वबुद्ध्या रूप्यते ॥ ७४ ॥

तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः ॥
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥ ७५ ॥

आयुधैः खड्गप्रासादिभिः संपन्नमुपेतम् । आयुधग्रहणं वर्मशिरस्त्राणोपस्करादेरन्यस्यापि युद्धोपकरणस्य प्रदर्शनार्थम् । धनं रूप्यसुवर्णादीनि । वाहनानि रथाश्वादयः । शिल्पिभिर्यन्त्रावाहतक्षप्रभृतिभिर्यवसेन ब्राह्मणैर्मन्त्रिपुरोहितैरन्यैर्वा दण्डिकापोतेन ध्वजशङ्कया कदाचिन्नृपधर्मसाहाय्येन प्रवर्तन्ते । प्रदर्शनार्थत्वाच्च भिषगौषधाद्यरोगेत संरोहणाद्युपयोगिसंनिधापयितव्यम् ॥ ७५ ॥

तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः ॥
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥ ७६ ॥

[मंदरस्यापि शिखरं निर्मानुष्यं न शिष्यते ।
मनुष्यदुर्गं दुर्गाणां मनुः स्वायंभुवोऽब्रवीत् ॥ १ ॥

१ ख-ड-क्ष-मद्भ्रश्च प्रल्पबला । २ ख-ड-क्ष—तस्माद्दुर्गाणि कारयेत् । ३ + एतत् तदयुक्तं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुपर्याप्तं यावदात्मनो राज्ञो राजपुत्रकोशायुधाश्वागारादिषूपयुज्यते । **गुप्तं** बहुकक्षाकं । **गृहं कारयेत्** । **सर्वर्तुकं** सर्वर्तुमाल्यफलैः शोभितं । सर्वे ऋतवो यत्रेति । ऋतुशब्देन तत्कार्याणि पुष्पफलादीनि लक्ष्यन्ते । 'सर्वर्तुगमिति' पाठे सर्वानृतून्गच्छति प्राप्नोतीति व्युत्पत्तिः । अर्थस्तु स एव । यो यत्र भवति स तेन व्याप्त इत्युच्यते । **शुभ्रं** सुधाधवलितम् । **जलवृक्षसमन्वितं** धारागृहोद्यानवनसंपन्नम् ॥ ७६ ॥

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम् ॥
कुले महति संभूतां हृद्यां रूपगुणान्विताम् ॥ ७७ ॥

तद्गृहमाश्रित्य भार्या तत्र सहायार्थं महतः कुलादुद्वोढव्या । एतत्संबन्धेन संरक्षणार्थम् । **सवर्णा**मित्यादावुच्यते तत्प्राक् प्रदर्शितम् । **हृद्यां** मनोरमां कान्तिलावण्ययुक्ताम् । **रूपं** संस्थानं **गुणा** वचनकरणादयस्तै**रन्वितां** युक्ताम् ॥ ७७ ॥

पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः ॥
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ॥ ७८ ॥

सत्यपि द्वितीयानिर्देशे न प्राधान्यावगमे विवक्षितमेवैकत्वं अन्यत्राप्युपादानात् यूपं छिनत्ति भार्यां विन्देतेतिवत् । **ऋत्विजो वृणुयात्** । तेषां च संङ्ख्या श्रुतित एवावगन्तव्या । गुणाश्च " नातिस्थूलो नातिकृशः नातिदीर्घो नातिह्रस्वः नातिवृद्धो नातिबालः । सप्तपुरुषान्विद्यातपोभ्यां पुण्यैश्च कर्मभिः समनुष्ठितोभयमावनान्प्रतिनान्नाब्राह्मण्यमाशङ्कयते विद्वान्याजयति " इत्यादि । **गृह्याणि कर्माणि** शान्तिस्वस्त्ययनादीनि । **वैतानिकानि** वैहारिकाणि त्रेताग्निविषयाणि ॥ ७८ ॥

यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः ॥
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ॥ ७९ ॥

आप्तदक्षिणैर्भूरिदक्षिणैः पौण्डरीकादिभिः । **भोगान् धनानि च** वस्त्रगन्धविलेपनादयो भोजनविशेषाश्च भोगाः । धनानि सुवर्णादीनि । नित्यमेव तद्दानमिच्छन्ति । **धर्मार्थं** तस्योत्पत्त्यर्थमेव ॥ ७९ ॥

सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ॥
स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ॥ ८० ॥

---

१ ख–ड–क्ष–समनुष्ठित उभय भावतः । पुरुषा नाना ब्राह्मण्यमाशंक्यते विप्रान्याजयतीत्यादि ।
२ ख–ड–क्षी–स्यावा प्रायपरो ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलिं करं धान्यादीनां षष्ठाष्टमादिभागमाप्तैरर्थोदुपधाशुद्धैः । यथोक्तमाम्नायपरश्च स्यात् । आगमप्रधानतर्कशास्त्राण्याश्रयेत् । अथवा पारंपर्यागतमेव भागं गृह्णीयान्नाधिकम् । वर्तेत पितृवन्नृषु करादेष्वन्येषु च स्नेहबुद्ध्या वर्तेत ॥ ८० ॥

अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः ॥
तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वताम् ॥ ८१ ॥

अध्यक्षा अधिकृताः प्रत्यवेक्षितारस्तान्कुर्यात् । **विविधान्** बहुप्रकारान् मृदून्नुग्रान् धार्मिकान् अर्थार्जनपरांश्च । **तत्र तत्र** सुवर्णकोष्ठागारे पण्यकुप्यकर्मस्वधिकृताप्रत्यवेक्षितारस्तान् शुल्कनौहस्त्यश्वरथपदात्यादीन **विपश्चितः** स्थापयेत् । सर्वे एते अमात्यगुणसंप्रयुक्ता विज्ञेयाः । यथोक्तमध्यक्षप्रचारे "ते अध्यक्षाः सर्वाणि कार्याण्यवेक्षेरन्नन्येषां नृणां तत्स्थानोपयोगिनां कार्याणि कुर्वतां हस्त्यध्यक्षेण हस्तिपकाः अश्वाध्यक्षेण तुरङ्गमाद्याः गवाध्यक्षेण कर्षणादयः" ॥ ८१ ॥

आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् ॥
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ॥ ८२ ॥

गुरुकुलेऽधीतावगतवेदार्था गार्हस्थ्यं प्रतिपित्सवो धनेन पूजयितव्याः । इदमपि नैध्यमिकदानम् । अत एवाह **नृपाणामक्षय** इति । नित्यत्वादक्षयो यावज्जीविकः काम्यत्वे वा फलभावि निवर्तते । यदुक्तं सांतानिकं वक्ष्यमाणमिति तदेवेदम् ।

अन्ये त्वाहुः । तत्रार्थिभ्यो दानं विहितम् । इह त्वनर्थिनामधिकारात् विधानमात्रया वस्त्रयुगादिदानेन च नराणां पूजा कर्तव्या । तथा चाह । **विप्राणां पूजको भवेदिति** ॥ **निधिरिव निधिः** । उत्तमफलत्वात् । ब्रह्मसंनिहितो **ब्राह्मः** ॥ ८२ ॥

न तं स्तेना न चामित्रा हरन्ति न च नश्यति ॥
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥ ८३ ॥

ब्राह्मणेभ्यो योऽर्थो दत्तः **न तं स्तेना** आटविकादयोऽमित्राश्च शत्रवो हरन्ति । ना भूमिष्ठमिव विस्मृत्य प्रातिभाव्येन वा **नश्यति** ॥ ८३ ॥

न स्कन्दति न व्यथते न विनश्यति कर्हिचित् ॥
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ॥ ८४ ॥

एष एवार्थोऽवश्यानुष्ठेयः प्रकारान्तरेण पुनरुच्यते । अग्नौ यद्धूयते तत्कदाचित् **स्कन्दत्यधः** पतति हूयमानम् तथा च्यवते पुरोडाशादिक्षामतया । ततश्च कर्मवैगुण्या-

---

१ ष—अक्षय । २ ख—ड—क्ष—प्रतिपत्सव, । ३ ख—ड—क्ष—नित्यत्वावेक्षणयायावज्जीविक कर्तृघीतयो फलेभावि— । ४ ण—कामत्वेवीतायां निवर्तते । ५ ण—अर्थिनामधिक यानमात्रया— । ६ ण—ब्रह्मसुनिहितो ७ ड—ण—क्ष—प्रतिभवेन । ८ फ—ख—ड—क्ष—स्कन्दते । ९ फ—ड—ण—क्ष—अवश्यानुष्ठेयार्थः ।

For Private And Personal Use Only

द्विनश्यति शिष्टानाम् । इदं तु यद् ब्राह्मणेभ्यो दानं न तस्यैते दोषाः सन्ति । अत एवाह । वरिष्ठमग्निहोत्रेभ्योऽग्नौ होमेभ्य इत्यर्थः । मुख्यार्थवृत्त्या कर्मनामधेयमेवाग्निहोत्रशब्दस्तदा चाग्निग्रहणं व्याख्येयम् । मुखे हुतमिति पाणिरेव ब्राह्मणस्य मुखं " पाण्यास्यो हि द्विजः स्मृत " इति वचनात् । वरिष्ठं श्रेष्ठम् । अर्थवादश्चायं न पुनर्होमनिन्दैव ॥ ८४ ॥

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ॥
आचार्ये शतसाहस्रमनन्तं वेदपारगे ॥ ८५ ॥

विप्रेभ्य इति च प्रकृतम् । तथा च प्रागप्युक्तम् (३।९६) " वेदतत्वार्थविदुषे ब्राह्मणायेति" । नच यथाश्रुतदानफलोपपत्तिः । कीदृशं हि तत्साम्यं जातितः परिमाणतः उपकारतो वा । *यदि तावज्जातितस्तदिति औषधपानोद्देशेन देवलेभ्यो दत्तं खाद्यदानं दुःखायैव स्यात् । तिक्तकटुकषायानि प्रायश औषधानि विरेचनीयानि[10] न प्रीतिजननानि । अथ परिमाणतः तत्रापि यदि द्रव्यमनपेक्ष्य केवलपरिमाणसाम्यं सुवर्णे दत्तं तत्परिमाणं ताम्रं लभ्येत । अन्यथा मृत्काष्ठादि । अथ जातितः परिमाणतश्च । तत्र प्रागुक्ता एव दोषाः । अथोपकारतः । तत्रापि हि यदि तज्जातीय एवोपकारः व्याधिनिवृत्तिरौषधोपकारः । असति च व्याधौ फलस्य विनिवृत्तिरतो व्याधिनिवृत्तिफलकेनौषधदानेन व्याधिराक्षेप्तव्यः । सुसमं[13] वा अन्यदुःखं इति प्राप्तं तस्मात् यथा निवीतं मनुष्याणां उपवीतं देवानामुपव्ययते देवलक्षममेव तत्कुरुत इत्युपव्यानविशेषान्निवीतादयो न पृथग्वाक्यानि तथेदमपि द्रष्टव्यम् ।

अत्रोच्यते । नात्राख्यातश्रवणस्याप्यस्ति सर्वेषां समत्वात् तत्र यथार्थवादः ' सहस्रं वेदपारगे' इति तदर्थवादोऽस्तु । अथायं विधिः । विध्यन्तरशेषभावात्सर्वत्र विधिरभ्युपेतव्यो विशेषाभावात् निवीतादिषु तूपव्ययत इत्यत्राख्यातदर्शनात् तदर्थस्य विधिविषयत्वयोग्यत्वाभावादेकत्वावगमाच्च युक्तार्थवदेव तद्ध्युक्तो विशेषः । यत्तु नाब्राह्मणेभ्यो दानमस्तीति तद्विस्मृतं भवेत् । दीनानाथादिभ्यः सर्ववर्णेभ्यो दानस्य विहितत्वात् । एतान्येव च विधायकानि वाक्यानि ब्राह्मणेभ्यो राज्ञां दानस्य तूक्तं यथाश्रुतफलानुपपत्तिः सर्वप्रकारेणास्याभ्युपगम्यमानत्वादिति । *

अत्रोच्यते । लौकिकीयं वाचो युक्तिः । सममिति यल्लोके नात्युत्कृष्टं तदेवमुच्यते । समलवणाः सक्तव इति । उपकारापेक्षा च द्विगुणमिति संख्याश्रुतिर्यावत्तस्योपकारस्तावद्द्विगुणो भवति । न तद्द्रव्यप्राप्तिर्नापि तज्जातीय एवोपकारः । किंतु प्रीत्यतिशयो-

१ ण–सर्वशमं । २ ख–ड–फ–क्ष–नितरां । ३ ड–ण–क्ष–तृप्तिता । ४ ण–निन्दके । ५ फ–प्राधीते । डक्ष–अधीते । ६ ण–समकलोपपत्तिः, डक्ष–सफलोपपत्तिः । ७ ण–तत्सम्यक् जातिपरिमाणतः । *–* एतच्चिन्हांतर्गतं खडक्ष पुस्तकेषु नैव दृश्यते । ८ ण–जातित औषधपाने दत्ते तदेव लभ्येत । ततश्च तद्दान *दुःखायैव स्यात् ।* ९ ण–*कटुकरसानि ।* १० फ–*विरेचनीयानीति* प्रतिपत्तिः । ११ फ–*अन्यथा* । १२ ण–प्रलेन । १३ फ–सुसंभवा दुःख प्राप्ता १४ ण–निवीतथो । १५ फ–भावितव्यम् १६ फ–श्रवणमस्ति । १७ फ–समत्वात् । १८ फ–यो । १९ फ–तदर्थं । २० फ–तदर्थविधि । २१ फ–सर्वेभ्यो ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्पत्तिः । न चेह फलविशेषश्रुतिर्येनेयमाशङ्काऽपि स्यात्किंतदेव द्रव्यं प्राप्येत उतं स एवोपकार इति । अश्रुतफलविशेषेषु स्वर्गः फलम् । किंच तिलादिदाने प्रजाप्तिः फलं श्रूयते । तत्र का द्रव्यसाम्याशङ्का । तस्माचायमप्यर्थ उत्तरोत्तरोऽत्र च पात्रातिशयदानात्फलातिशयसिद्धिः । तथा चाह " पात्रस्य हि विशेषेणेति " ।

ब्राह्मणब्रुवे ब्रुवशब्दः कुत्सायाम् । जातिमात्रब्राह्मणोऽध्ययनादिगुणहीन इत्यर्थः । **आचार्य** उपनेता । **वेदपारगो**ऽध्ययनश्रवणाभ्यां वेदस्यान्तं गतः ॥ ८५ ॥

पात्रस्य हि विशेषेण श्रद्दधानतयैव च ।
अल्पं वा बहु वा प्रेत्य दानस्य फलमश्नुते ॥ ८६ ॥

पातयते धर्मकर्मणः पात्यमानं वा त्रायत इति **पात्रं** संप्रदानम् । अथवा घृततैलाद्याधारः पात्रमुपचारादिदमपि पात्रम् । अत्रापि हि द्रव्यं निधीयते । आह च (७।८२) " नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयत " इति । तस्य **विशेषो** भेदः सगुणनिर्गुणत्वादिः । तेन हेतुना दानस्य फलमवाप्यते । **अल्पं वा** गुणवते वृत्तस्वाध्यायसंपन्नाय दत्तं **बहु** निर्गुणाय स्वल्पम् ॥ ८६ ॥

देशकालविधानेन द्रव्यं श्रद्धासमन्वितम् ।
पात्रे प्रदीयते यत्तु तद्धर्मस्य प्रसाधनम् ॥ ८७ ॥

तत्र **देशः** स्वनिवासदेशादन्यो जानपदः । दूरदेशप्रोषितायां संनिहितत्वाद्दत्तमस्य हेतुरुपघातः । यज्ञप्रवृत्तस्य केनचिदंगेन न्यूनता ग्रहोपराग इत्येवमादिः । **विधानम्** । उदकपूर्वकस्वस्तिवाचनसंस्कारातिशयो भावः प्रसाद इत्यादि । **द्रव्यं** गोभूहिरण्यादि । **श्रद्धा** प्राप्त्यभिलाषातिशयः । कथमिदं मे निवर्तेति बुद्धिसंतानः प्रत्येति । क्रियासमनन्तरं फलोत्पत्तेरनियममाह । न पुनर्जन्मान्तरफलतामेव । वैदिकानां कर्मणां फल एव कामस्य नियमावगमात् ॥ ८७ ॥

समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः ॥
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन् ॥ ८८ ॥

सर्वोपायपरिक्षये राज्ञो विहितं युद्धम् । तत्र संग्रामभूमिगतस्याहूतस्य समन्यूनाधिकबलेनापेक्षाप्रतिषेधार्थमिदं पदं न मन्तव्यं निकृष्टबलं न हन्मीति ।

अथवा ये शत्रव आटविकादयः प्राक्स्थितां मर्यादामतिलंघ्य देशमुत्क्रामन्ति शत्रुभिर्वा राज्ञः संदधते न चेत्ते युद्धेन विना नियन्तुं शक्यन्ते तदा निकृष्टबलैरपि

फ-ख-ड-क्ष-आशंकास्यादपि तु किंतदेव । २ फ-ख-ड-क्ष-ततः । ३ ण-प्राप्यतिफलं । ४ ख-ड-क्ष-तथैव । ५ ण-तत्रापि; ख-ड-क्ष-न तत्रापि । ६ फ-ब्राह्मणो निधीयते । ७ ण-तथा तथा श्रद्धानतयाऽपि वा । ९ ण-देशे । ९ ण-कालस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैर्योद्धव्यमेव । यद्यपि तैरसौ शब्देन नाहूतो वस्तुतस्त्वाहूत एव भवति । एष हि क्षत्रियाणां धर्मः । यदाहूतः प्रकृतैस्तैर्युद्धे सर्वेण सह योद्धव्यमेव । जातिवयशिक्षापुरुषकारादि नापेक्षितव्यम् । एष धर्मः स्मर्तव्यः ॥ ८८ ॥

संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् ॥
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥ ८९ ॥

त्रयाणां धर्माणां तुल्यफलत्वाय श्लोकोऽयम् ॥ ८९ ॥

आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ॥
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥ ९० ॥

आहूयन्ते युद्धार्थमितरे यत्र वीराः स **आहवः** संग्रामः । **मिथः** स्पर्धमाना **अन्योन्यं** परस्परं **जिघांसन्तो** हननेच्छवः **युद्ध्यमानाः** प्रहरन्तः **परं शक्त्या** परया यथा शक्त्या यथाबलमित्यर्थः । छांदसत्वात्परेत्यस्य स्थाने परमिति रूपम् । **अपराङ्मुखा** युद्ध्यमाना इति संबन्धः । **स्वर्गं यान्ति** ।

ननु च राज्यलोभात्प्रवृत्तानां दृष्टस्य[2] फलस्य संभवात्कुतः स्वर्ग उच्यते । वक्ष्यमाण-युद्धनियमापेक्षः स्वर्गः । न हि तेषां नियमानामन्यत्प्रयोजनमस्ति । न कूटैरायुधैरित्यादिना त्यक्तराज्यस्यापि शक्तप्रणिपातेन तदनुजीवनसंभवात् भवेत् । तस्मादर्हस्तत्फलसंभवः । अथवा निश्चिते पराजये निराशस्य यद्युद्धावतरणं[3] तच्च स्वर्गायैव । अस्मादेव वचनान्नात्म-त्यागनिषेधस्य विषयोऽयम् । **महीक्षितो** मण्डलेश्वरा न पुनस्तदनुजीविनस्तेषां हि स्वाम्यर्थैव प्रवृत्तिर्न स्वार्था । अतश्च कुतस्तेषां फलसंबन्धः । ऋत्विजामिव दक्षिणापणेन परिक्रीताना-मेवमेषामपि भृतिपरिक्रीतानां[4] कुतः स्वर्गादिफलोत्पत्तिः । ननु च अविशेषेणैतदुक्तम् (५।९७) " उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च । सद्यः सन्तिष्ठते यज्ञ " इति । तथा "द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च शूरश्चाभिमुखो हतः" । इति ।

तथा **भारते** युद्धप्रेक्षिणामपि स्वर्गः संदर्शितः । **मन्त्रलिङ्गानि** च सन्ति " ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः । ये वा सहस्रदक्षिणास्ताँश्च देवापि गच्छतात् ॥"

सहस्रदक्षिणानां यजमानानां शूराणां च रणशिरसि त्यक्तप्राणानां महाफलत्वं दर्शयति । ये युध्यन्ते न च मरणायैव म्रियन्ते[5] । न हि संपरिग्रहकालेऽयमुपसंवादोऽस्ति ।

---

१ ण–यदाहूते प्रवृते । २ फ–नार्हस्तस्य फलस्य संभवः कुतः । ३ फ–युद्धावतारः तत् । ४ फ–वृत्ति । ५ फ–ह्रियन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथा होत्रोद्गात्रादीना स्वप्रवचनसमाख्या नियतार्त्विज्यपदार्थानुष्ठानायैव वरणं तस्मात्प्रभुकार्योद्देशेन यन्मरणं तदनुक्रान्तफलायैव । न च परप्रयुक्तात्कर्मणोऽन्यस्य फलं नास्ति । अश्वमेधावभृथे हि ब्रह्मघ्नस्य स्नानादयजमानस्यैव शुद्धिः । अत्रोच्यते । यदुक्तम् 'उद्यतेऽहव' इति तदा भृतिपरिक्रीतस्यास्वतस्य प्रजार्थे युद्धे प्राणत्यागो धर्मायैव । यस्य वा कुर्विति प्रयाणं रण इत्येव परिकरो बद्धस्तदपेक्षमेतत् यज्ञसंस्थावचनं एवंभूतश्चाभिमुखो हत इति । अथवा नरकाभाव एव सूर्यमंडलभेदनं युद्ध्यमानस्य भविष्यति । यत्र विषयान्तरेश्वरेण राज्ञा परस्य राज्ञो :विषयो हन्यते भज्यते जनो लुप्येत्तत्र तदर्थं युद्धे प्राणत्यागो धर्मार्थः । अन्धतमो हि नरके तदभावात्सति प्राकाश्ये सूर्यमण्डलभेदनवचनं सूर्यमण्डलं भिनत्ति । उपरिष्टाल्लोकानाप्नोति । नाधःप्रपततीत्यर्थः । भृतिपरिक्रीतस्य प्रभोः संग्रामे समुपस्थिते तमेव जहतो नरकनिर्वर्तनं तदर्थं युध्यमानस्य भर्तृपिण्डानृण्यं गतवतो दुष्कृतेनाप्रतिबध्यमानस्य स्वैः सुकृतैर्युक्त एव स्वर्गादिलाभः । अत उक्तं "सद्यः संतिष्ठते यज्ञ" इति । अव्यवधानेन यज्ञफलमविशेषश्रुतौ स्वर्गमवाप्नोतीत्यर्थः । एवं भारतेऽपि भृतिपरिक्रीतानां स्वर्गफलावाप्तिवचनमुपपद्यते । युद्धप्रेक्षिणां तु स्वर्गावाप्तिरर्थवाद एव । अथवा बहुषु जीवनोपायेषु सत्सु यच्छस्त्रेण जीवनं ततो नियमात्स्वर्गः । यत्तु न मरणाय क्रीयन्त इति शस्त्रभृतां भृतिदानेनान्ययुद्धात्प्रयोजनमस्ति विशेषानुपदेशात् सर्वकार्योद्यताः सर्वप्रकारं मदर्थः संपादनीय इति परिक्रीयन्ते तत्र यदा युद्धमुपस्थितं भवति तदा आ शरीरपातात्प्रभोरर्थः कर्तव्यस्तथाऽऽनृण्यं भवति । अनुपस्थिते तु युद्धे यदि भृत्यस्य मरणं भवति तदा सर्वेऽनृणा एव । उद्युक्ते ह्यसौ तत्कार्ये तादृश एवास्योपसंवादः । युद्धकाले योद्धव्यं भवतीति लिङ्गदर्शनमपि तूपपद्यत एव । अश्वमेधावभृथे तु स्पष्टं वचनं 'तस्मात्समागमे तेषामिति' । इह तु युद्धसाध्यमिति विशेषः ॥ ९० ॥

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् ॥
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥ ९१ ॥

तानिदानीमदृष्टार्थान्नियमान्दर्शयति । कूटानि यानि बहिःकाष्ठमयान्यन्तर्निशितशस्त्राणि । कर्णिनः शराग्रे शल्यस्य मूले मध्ये वा कर्णाकारैः फलकैः क्रियन्ते ते हि प्रविष्टा दुरुद्धरा भवन्ति । उध्द्रियमाणाः प्रहारैरभिन्नमपि शरीरैकदेशं भिन्दन्ति । दिग्धा विषोपलिप्ताः । अग्निना ज्वलितमादीपितं तेजोमयफलकं येषां एतैर्न योद्धव्यम् ॥ ९१ ॥

---

१ ण–भेदित । २ ण–भृत । ३ ण–नरक नियत तत्तदर्थे । ४ फ प्रतिबाध्यमानस्य । ५ फ–जीयन्ते । ६ फ–प्रभुर्गुरु । ७ ण– मरणं भवति तदाऽसौ भृत एव । ८ ण साध्यमिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम् ॥
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥ ९२ ॥

रथस्थेन रथारूढ एव हन्तव्यः स्थलस्थितो न हन्तव्यः। **क्लीबो** नपुंसकः पौरुषहीनो वा। अन्यत्र इह आसीन उपविष्टो रथपृष्ठे भूमौ वा तवास्मीति वदति यस्तमपि न हन्यात्। शब्दनियमोऽत्र न विवक्षितः। दीनं वदन्नेवंजातीयकैरपि शब्दैस्त्वदीयो-ऽहं त्वाश्रितोऽस्मीति न हन्तव्यः॥ ९२ ॥

न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ॥
नायुध्यमानं पश्यन्तं न परेण समागतम् ॥ ९३ ॥

न नग्नं 'न भग्नमिति' वा पाठः। विसन्नाहस्य प्रतिषेधान्नग्नस्य प्राप्तिरेव नास्ति। तेन शिरस्त्राणाद्यभावेनैकदेशेन नग्नतया नग्नो द्रष्टव्यः। भग्नस्यापि परावृत्त-प्रतिषेधात्संमुखस्योऽपि त्वया सह न युध्येयमिति वक्ति स नानुबन्धनीयोऽवश्यं योद्धव्य-मिति। **नायुध्यमानं** पश्यन्तं यः प्रेक्षक एव केवलः स न हन्तव्यः। यस्तु प्रेक्षते युध्यते च न तत्र प्रतिषेधः। **परेण समागतः**। अन्येन सह युध्यमानोऽन्येन न हन्तव्यः॥ ९३ ॥

नायुधव्यसनंप्राप्तं नार्तं नातिपरिक्षतम् ॥
न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ॥ ९४ ॥

आयुधव्यसनमायुधकृच्छ्रमायुधभङ्गः कुण्डलिभावः खङ्गस्य ज्याछेद इत्येव-मादिस्तं प्राप्तम्। **आर्तः** हतपुत्रभ्रात्रादिः। **भीतं** मुखरागादिना विज्ञाय शस्त्रसंमुखमपि **परावृत्तं** प्रत्यावृत्य स्थितम्। एते नियमाः प्रतिषेधापेक्षः प्रत्यवायस्तदा च स्वर्गप्राप्ति-वचनमर्थवादः। किं पुनरत्र युक्तं पुरुषार्थः प्रतिषेधात् "न कलञ्जं भक्षयेत्" इतिवत्। तथा हि नञो मुख्यार्थवृत्तिता भवति। **सतां धर्ममिति** शिष्टानामेष आचार इत्याह **अनुस्मरन्निति** ॥ ९४ ॥

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ॥
भर्तुर्यद्दुष्कृतं किञ्चित्तत्सर्वं प्रतिपद्यते ॥ ९५ ॥

नैवं मन्तव्यं परावृत्तो यदि हन्यते तदा दुष्कृत्य हतस्तु नेति किंतर्हि परावृत्त-मात्रानिबन्धनं दोषवचनम्। किंचन परावृत्तहते नेयं बुद्धिः कर्तव्या अनुभूतखङ्गप्रहारोऽ-स्म्यनृणः कृतमर्तृकृत्य इति। तथाविधाः प्रहारा न कस्मैचिदर्थायेति दोषातिशयदर्शनेन

१ ण–युद्धेदिति। २ ण–न युध्यमानं पश्यंतं यः प्रेक्षको बले स न हन्तव्यः। यस्तु प्रेक्षते न युद्धते च। ३ ण–समागतम्। ४ ख–ङ–क्ष–नायुधव्यसना॒वासं; ण–व्यसनाप्रासं। ५ ण–नाभिपरिस्कृतं; ण–नातिपरी-क्षितम्। ६ ण–अनुभूतश्च प्रहारोऽस्मृतृपः। ७ फ–तथाविधः। ८ फ–प्रहारो न कार्यो।

For Private And Personal Use Only

दर्शयति । भर्तृसंबन्धिदुष्कृतमिति यच्च वचनमुत्तरत्र तदीयसुकृतग्रहणमिति तदर्थवादः । न ह्यन्येन कृतं शुभमशुभं वाऽन्यस्य संभवति । न च सुकृतस्य नाशः । किन्तु महता दुष्कृतेन प्रतिबन्धे चिरकालभाविता सुकृतस्य फलस्योच्यते ॥ ९५ ॥

यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम् ॥
भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ॥ ९६ ॥

यच्चास्य सुकृतं किंचिद्भर्ता तत्सर्वमादत्त इति । अमुत्रार्थमुपार्जितम् । अर्थोऽस्यास्तीत्यर्थः । अर्श आदित्वादच् । अमुत्रामुष्मिँल्लोके यत्प्रयोजनं तदर्जितं तदस्य निष्फलं भवति । अमुत्रार्थोऽस्येति वा अमुत्रार्थं व्यधिकरणो बहुव्रीहिर्गमकत्वात्प्रायोजकाच्च ॥ ९६ ॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रियः ॥
सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ॥ ९७ ॥

कुप्यं शयनासने ताम्रभाजनादि यो यज्जयति तस्य तत् । राज्ञः स्वामित्वाद्ग्रहणे प्राप्ते तदपवादार्थमेतत् । सुवर्णरूप्यभूम्यावासकादि राज्ञ एव । एवमर्थं परिगणनम् । आयुधसंवाहनादि राज्ञ एव । धान्यादीनां पृथगुपादानाद्धनशब्देन गोमहिष्यादिकमुच्यते । तथा राजधनं चार्धमिति प्रयुञ्जते ॥ ९७ ॥

* राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ॥
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम् ॥ ९८ ॥

येन यज्जितं तेन तद्गृहीतव्यमित्यस्यायं विशेष उच्यते । स्वयमुद्धारं राज्ञे दद्युरुत्तमद्रव्यमुद्धृत्य दद्युरित्यर्थः । न सर्वं तैर्ग्रहीतव्यमित्येषा वैदिकी श्रुतिः "इन्द्रो वै वृत्रं हत्वा" इत्याद्युपक्रम्य "स महान् भूत्वा देवता अब्रवीदुद्धारं म उद्धरतेति"। राज्ञा वा पृथग्जये स्वयंजये यत्रायं विभागो नास्त्यनेनायं ग्रामो जितः। एष च परकीयः सामन्तादिः सर्वेण सर्व उत्खातमूलः सकृत्कृतः तत्र राज्ञा लब्धप्रशमनन्यायेन भृत्याः संविभजनीयाः ॥ ९८ ॥

एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः ॥
अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन् रणे रिपून् ॥ ९९ ॥

---

*[भृत्येभ्यो विभजेदर्थान्नैकः सर्वहरो भवेत् । नाममात्रेण तुष्येत छत्रेण च महीपतिः ॥१॥]

१ ब–तथाश्वं । २ ख–ड–फ–क्ष–विनायुधो । ३ ण–गोमहिष्यादि । ४ फ–तथा च हीना धनं प्राप्य तद्धनं ममार्धमिति । ५ फ–पृथग्भूयस्त्वयमुद्गृहीयमत्रार्थविभागये । ६ फ–वा ७ ख–ड–क्ष–यो धर्मः ; ण–योऽयं धर्मः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपसंहारोऽयम् । योधा योद्धारस्तेषां धर्मो **योधधर्मः । अनुपस्कृतः** अगर्हितः । अविकृतो वा । अत एवाह **सनातनः** स्वेच्छया प्रवर्तितो विकृतः स्यात् । **न च्यवेत** न चलेत । सर्वदाऽनुतिष्ठेत् । क्षत्रियग्रहणं मुख्यस्तस्यात्राधिकार इति दर्शयितुं न त्वन्यस्य तत्स्थानापन्नस्य नायं धर्म इति ॥ ९९ ॥

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः ॥
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥ १०० ॥

न क्षत्रियः संतुष्टः स्याद्ब्राह्मणवत्किन्त्वलब्धार्जने यत्नं कुर्यात् । अर्जितं च धनं रक्षेद्रक्षितं च वर्धयेत्कोशसंचयं कुर्यात् ततः पात्रेभ्यो दद्यात । न यथायव्ययं कुर्यात् । तदुक्तं " आयादल्पतरो व्यय " इति ॥ १०० ॥

एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनम् ॥
अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः ॥ १०१ ॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया ॥
रक्षितं वर्धयेद्वृध्या वृद्धं पात्रेषु निक्षिपेत् ॥ १०२ ॥

पुरुषस्य येऽर्थास्तेषां प्रयोजनं चतुर्विधम् (१०१) । चतस्र एताः क्रियास्तत्र प्रयोज्या अर्जनवर्धनरक्षणदानानि । उपकारवचनोऽर्थशब्दः । पुरुषार्थसिद्ध्यर्थमेतत्प्रयोजनं तस्य चतुर्विधस्य प्रसक्तस्य नित्यमनुष्ठानं कुर्यात् ॥ १०२ ॥

नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ॥
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः ॥ १०३ ॥

उद्यतो दण्डोऽनेनेत्युद्यतदण्डः । उद्यत उद्युक्तः सव्यापार इति यावत् । तत्र हस्त्यादिबलं नित्यं योग्याभिरभिविनयेत् । शिक्षा वाहनदमनादिभिर्विधेया । करणयोग्या अभ्यासाश्च । तद्वाहनादिषु वस्त्राभरणसंस्कार इत्यादिरुद्यतदण्डता । तथा कुर्वतोऽस्योत्साहशक्तियोगो मण्डले प्रकाशीभवति । तथा **नित्यं विवृतपौरुषः ।** विवृतं प्रकाशतामागतं पौरुषं कर्तव्यम् । सन्धिपालाटवीस्थानादिष्वाप्तपुरुषैरधिष्ठिताः सन्निरुद्धाः कवाचिनः सततं जागरणार्थं नियोज्याः । **नित्यं संवृतसंवार्यः** संवरणीयं संगोपनीयमात्मगतं कृत्वा तत्स्थानं संवृतं कर्तव्यमुपग्रहेण परोपजापरक्षणेन च नित्यं छिद्रानुसरणेन सर्वे शत्रोः कृत्यपक्षं ज्ञात्वा झटिति तदुपजापः ॥ १०३ ॥

---

१ ख-ङ-ण-क्ष-वैकृतः । २ ण-मुख्यं । ३ ख-ङ-क्ष-तत्राधिकार इति । ४ फ-नायथार्थव्ययं इति ।; ख-ङ-क्ष-न यथाव्ययः स्यात् । ५ फ-कुर्यादल्पतरव्ययमिति; ख-ङ-क्ष कुर्यादल्पतरंव्ययमिति । ६ ख-ङ-क्ष-अर्जनेक्षणवर्धनानि । ७ ख-ङ-क्ष-उपचारवचनो व्यर्थशब्द । ८ ण-प्रयोजनांतरस्य । ९ ख-ङ-क्ष-प्रयोक्तव्यनित्य—। १० ण-तत्रहस्त्यादिबलं । ११ फ-योग्याभिविनयेत् । १२ ख-ङ-क्ष-शिक्षाच हननदमनादिभिर्विधायीकरणयोग्या अभ्यासाच । १३ ख-ङ-क्ष-शक्तियोगो । १४ फ-र्थैः । १५ फ-करणेन । १६ ण-छिद्रानुसार्ये सतोः । १७ फ-जयः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत् ॥
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत् ॥ १०४ ॥

अनन्तरस्य फलम् । **सर्वं जगदुद्विजते** बिभेति प्रतापख्यातिर्भवति चेति । **तस्मात्सर्वाणि** भूतानि स्वप्रकृतीः परांश्च **दण्डेनैव प्रसाधयेत्** । एवं यत्नवतो भीताः शत्रवो नमन्त्ययत्नेनैव ॥ १०४ ॥

अमाययैव वर्तेत न कथंचन मायया ॥
बुध्येतारिप्रयुक्तां च मायां नित्यं सुसंवृतः ॥ १०५ ॥

माया छद्म । तेन न वर्तेत अविश्वसनीयस्तथा स्यात् । न च परप्रकृतीरज्ञातरूपा उपजपेत् । अरिणा प्रयुक्तां च मायां यथावद्बुध्येत । बुद्ध्वा ज्ञात्वोपजापं कुर्यात् । तत्र कृत्यपक्षश्चतुर्विधः । क्रुद्धलुब्धभीतावमानितैः । तत्र येन कृतं शिल्पं किंचिदुपकारो वा दर्शितः तौ विप्रलभ्येते प्रसादेन नियोज्येते अवमन्येते वा । तदर्थोऽपि तत्समानः शिल्पोपकारी क्रुध्यति नास्यास्मदीयं शिल्पमुपकारो वोपयुज्यते । तादृशा उपजापसहा भवन्ति । तथा वाल्लभ्येनोपगृहीतः पश्चान्मानाधिकाराभ्यां भ्रष्टः प्रवासितबन्धुस्तद्वल्लभः प्रसभमभिपूज्य स्वीकृतः सकुल्यैरन्तर्हितः सर्वस्वमाहारितस्तत्समानकर्मविद्योऽन्यः पूज्यते सोऽवधीर्यते इत्येवमादिक्रुद्धः । केनचित्कृतं पैशुन्यं तत्समानदोषेभ्यो दण्डितं अंतर्भ्रमदण्डपाताः सर्वाधिकारस्थाः सहसोपचितार्था इत्यादि लुब्धवर्गः । परिक्षीणः कदर्यो व्यसनी बहुऋण इत्यादिर्भीतवर्गः । आत्मसंभावितः शत्रुपूजामर्षितः नीचैरुपहतः तीक्ष्णः साहसिको भोगेनासंतुष्ट इत्येवमादिरवमानितवर्गः । एतत्परस्योपजपेत् आत्मनश्च रक्षेत् ॥ १०५ ॥

*** नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य च ॥**
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥ १०६ ॥

एष एवार्थः पुनरुच्यते । तथा यत्नातिशयं कुर्याद्यथा परस्य छिद्रमन्विच्छेदात्मनश्च रक्षेत् । य एवं क्रुद्धादिः कापटिकादिचारपुरुषैर्ज्ञायते स एवात्मीयोऽनुनीयत इति । **कूर्मवदङ्गं गूहेद्रक्षेद्विवरमात्मनः** परोपजापात्स्वच्छिद्ररक्षणं महाप्रयोजनमित्येतदनेनाह ॥ १०६ ॥

---

*[न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् । विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ॥]

१ ण– अशान्तः । २ ख-ड–ण–क्ष–नमते । ३ फ–माया यथावत् । ४ ण–फ–कृत्वा । ५ ड–क्ष–क्रुद्धलब्धभीतवैमानिकमदैः । ६ फ–हतं शल्यं...स विप्रलभ्यते । ७ फ–शल्योपभारी । ८ फ–शिल्पं [९ ड–क्ष–मनोविकाराभ्यां । १० फ–बन्धुः । ११ फ–दण्डिन, । १२ फ–उपपादितार्थाः । १३ फ–बहुल । १४ फ–पूजार्चनरतः ।

For Private And Personal Use Only

बकवाच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत् ॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥ १०७ ॥

यथा अप्सु दुर्गाश्रयमपि मत्स्यबलं स्वभावतस्तद्ग्रहणार्थी बकः पर्युदासनपरतया तद्ग्रहणोपायं ध्यानादियोगादासादयति एवमर्थचिन्ताभियोगातिशयेन सुदुष्प्रापा अप्यर्था आसाद्यन्त इति मन्वानो निर्वेदं गच्छेत् । यथा च शशोऽल्पकायत्वाच्छक्नोति निष्पतितुमुपरि संघादपि तथा एकोऽप्यसहायः सर्वतः समुत्थितसामन्तप्रकोपोऽशक्तोऽवस्थातुं दुर्गेऽरिसंपातं कृत्वा तस्माद्विनिष्पतेद्गुणवति संश्रयार्थम् । यथा च वृकः पशुग्रहणाभियोगाद् बालप्रमादमासाद्यावलुम्पते एवं स्वोरक्षापर इति मत्वा तद्ग्रहणाभियोगो न मोक्तव्यो भविष्यति स कालो यत्रायं वृकवदवलुंपिष्यते । यथा सिंहो महाकायानपि हस्त्यादीन्हन्ति पराक्रमोत्साहशक्तियोगात् एवं महदरिबलमिति न भेतव्यं अल्पप्राणेनापि कदाचिदुत्साहवता महाप्राणो निर्हन्यत इति ॥ १०७ ॥

एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः ॥
तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः ॥ १०८ ॥

ये परिपन्थिनः प्रतिपक्षतया वर्तन्ते ते **वशमानेतव्याः** । न त्वानुकूल्येन ये वर्तन्ते । तेऽपि सामादिभिः पूर्वं न प्रथमत एव दण्डेन ॥ १०८ ॥

यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः ॥
दण्डेनैव प्रसह्यैतांश्छनकैर्वशमानयेत् ॥ १०९ ॥

सामादिभिरशक्या दण्डेन वशमानेतव्या इति यदुक्तं तदिदं दण्डेन प्रसह्याभिभूय शनकैर्यादृशो दण्डोपक्रमस्तेन । न साहसिकतया ॥ १०९ ॥

सामादीनामुपायानां चतुर्णामपि पण्डिताः ॥
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥ ११० ॥

वक्ष्यमाणानां सामादीनामुपायानां सामदण्डौ निर्गद्येते प्रशस्यतया सति साम्नि क्षिप्रं कोपो न भवति दण्डे तु सर्वसिद्धिः ॥ ११० ॥

यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति ॥
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ॥ १११ ॥

---

१ ड-क्ष-पर्युदासनापरतया । २ ड-क्ष-दि-सुदुःप्राया अप्यर्थो । ३ ण-मध्यादपि; क्ष-निष्पतितुं परिसंध्यादपि । ४ ड-फ-समुत्थितामामं च; फ-समुत्थिन । ५ ड-क्ष-पशुग्रहणाभिलाषात् अभियोगान् बले प्रमादमासाद्यावलुप्यते; ण-बालप्रमादमासाद्य; फ-अयचलप्रमांसाधर । ६ फ-स्व । ७ ण-निहन्यात् । ८ फ तद्दंडेन प्रसह्य भूयः आसन्न-शनकैर्यो वद्धा । ९ ड-ण-क्ष-निवार्यंते । प्रशस्यतया सविवक्षया सा न भवति दंडे तु सर्वसिद्धि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये राजानमभिद्रुह्यन्ति तेषां ये सुहृद्बान्धवाः संबन्धोपसर्पिणो वा न ते विनाशयितव्याः । यदि न तत्कार्याभ्यन्तराः । य एव दुष्टास्त एव निग्राह्या न तत्संबन्धिन इत्येतन्निर्दातृदृष्टान्तेन प्रतिपाद्यते । यथा धान्यकक्षयोः सहोत्पन्नयोरत्यन्तसहितयोरपि नैपुण्येन धान्यं रक्षति कक्षमुद्धरति । एवं स्वराष्ट्रे यावन्तस्तेषां सुहृदावपि तयोर्दोषवान्यः स एव निग्राह्यो न यः सुसङ्गतोऽपि । अतः साध्वसाधुविवेकेन साधवो रक्ष्या असाधवो निग्राह्याः ॥ १११ ॥

मोहाद्राजा स्वराष्ट्रं यः कर्शयत्यनवेक्षया ॥
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥ ११२ ॥

यस्तु राजा पूर्वोक्तविवेकमकृत्वा मोहेनानवेक्षया स्वराष्ट्रं कर्शयति स दण्डैः सह भ्रश्यत्यचिराद्राज्याज्जनपदानुरागेण प्रकृतिकोपेन जीविताच्च साहसिकैरेकाकिभिरपि जीवितनिरपेक्षैर्हन्यते ॥ ११२ ॥

शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा ॥
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥ ११३ ॥

स्वराष्ट्रेऽत्यन्तमवहितेनानुराग उत्पादनीयस्तद्धि शरीरस्थानीयं शरीरे कर्शितेऽपथ्यभोजनरूक्षभोजनादिभिर्यथा प्राणा उत्क्रामन्ति एवं राष्ट्रकर्शनादपि ॥ ११३ ॥

राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् ॥
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥ ११४ ॥

संग्रहो रक्षति धनं सुसंगृहीतं रक्षाविधानेन वशीकृतं परिपालितं वा येन स्वराष्ट्रं स पार्थिवः सुखमेधते ॥ ११४ ॥

द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ॥
तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहम् ॥ ११५ ॥

द्वयोर्ग्रामयोर्मध्ये गुल्मं कुर्यात् । गुल्मो रक्षितृपुरुषसमूहस्तेनैवाधिष्ठितं संग्रहं कुर्यात् । तद्युक्तमधिष्ठातारं पुरुषं कुर्यात् । अधिकारिसंग्रह इहोच्यते । एवं त्रयाणां पञ्चानां च । अथवा राजमान्यार्थग्रहणस्थानं संग्रहः ॥ ११५ ॥

ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा ॥
विंशतीशं शतेशं च सहस्रपतिमेव च ॥ ११६ ॥

एकैकस्मिन् ग्रामेऽधिपतिं कुर्यात् । तदुपरि दशग्रामपतिम् । एवं सर्वत्र ॥ ११६ ॥

ग्रामदोषान्समुत्पन्नान् ग्रामिकः शनकैः स्वयम् ॥
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने ॥ ११७ ॥

---

१ ण-यावत्यन्तस्सुहृदावपि । २ फ-कर्शयति । ३ ख-ङ-ण-क्ष-धमस्थाति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् ।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् ॥ ११८ ॥

ये ग्रामदोषा एकग्रामाधिकृतेन न शक्यन्ते समाधातुं तान्दशेशाय निवेदयेत् । एवमशक्तौ यावत्सहस्रपतिर्विज्ञाप्यः ॥ ११७ ॥ ॥ ११८ ॥

यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः ॥
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥ ११९ ॥

एकग्रामाधिकृतस्य वृत्तिरियम् । ग्रामिको ग्रामाधिकृतस्तान्यवाप्नुयाद्गृह्णीयात् । वृत्त्यर्थं राज्ञे प्रदातव्यानि ग्रामवासिभिः । अन्नादीनि तु धान्यादेः षष्ठाष्टमभागादिः यथा वक्ष्यति " धान्येऽष्टमं विशाम् " (अ. १० । १२०) इत्यादि ॥ ११९ ॥

दशी कुलं तु भुञ्जित विंशी पञ्चकुलानि च ॥
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ॥ १२० ॥

दशसु ग्रामेष्वधिकृतो दशी । एवं विंशी । छान्दसः शब्दसंस्कारः । कुलं ग्रामैकदेशः । क्वचिद्धट्ट इति प्रसिद्धः क्वचिद्दुष्ट इति । एतदेव पञ्चगुणं विंशतिग्रामेष्वधिकृतः सर्वं ग्रामशताध्यक्षः । पुरं नगरं सहस्रेशः स्थानकमानुरूपेण वृत्तिं कल्पेतेत्येतभ्यम् ॥ १२० ॥

तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि ॥
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः ॥ १२१ ॥

तेषां ग्रामकार्येष्वितरेतरं विप्रतिपत्तिः । अन्यः स्वकार्येऽन्यः सचिवः महत्तमः स्निग्धो रागद्वेषवर्जितो दर्शनाय नियोक्तव्यः ॥ १२१ ॥

नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकम् ॥
उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहम् ॥ १२२ ॥

उच्चैःस्थानं प्रधानभूतमित्यर्थः । घोररूपं प्रतापवन्तम् । नक्षत्राणामिव ग्रहं अंगारकं हस्त्यश्वादिबलसंपन्नम् ॥ १२२ ॥

स तानुपरिक्रामेत्सर्वानेव सदा स्वयम् ॥
तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः ॥ १२३ ॥

स नगराधिकृतस्तान्सर्वानपि पतीननुपरिक्रामेत्सबलेन पूरयेत् । सति प्रयोजने तेषां सर्वेषामधिपतीनां तद्वृत्तं सम्यक् परिणयेत् सम्यग्रूपतया परिजानीयात् । के राजचरैः कार्पटिकादिभिः ॥ १२३ ॥

१ ण-क्ष-तु । २ ण-हाट । ३ क्ष-उष्ट । ४ क्ष-ग्रामाणि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः ॥
भृत्या भवंति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः ॥ १२४ ॥

परस्वमादातुं शीलं येषां ते **परस्वादायिनः शठाः** सम्यक्कारिणः प्रायेणाधिकृताः सन्तो भवन्ति । प्राक्शुचयोऽपि रक्षन्ति वित्तानि । अतः प्राक्शुचित्वानुमानेनोपेक्षणीयाः । यत्नतः प्रतिजागरितव्याः । **तेभ्यो रक्षेदिमाः प्रजाः** । न केवलं राजार्थनाशः अनवेक्षया यावत्प्रजा अपि निर्धनीकुर्वन्ति ॥ १२४ ॥

ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः ॥
तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम् ॥ १२५ ॥

ये रक्षाधिकृताः **कार्यिकेभ्यो** व्यवहर्तृभ्यो व्यापारवद्भ्यो हल्लेशोद्देशिकया दण्डयन्ति जनपदांस्तेषां सर्वस्वहरणप्रवासने राजा कुर्यात् ॥ १२५ ॥

राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च ॥
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः ॥ १२६ ॥

युक्तानां नियुक्तानां **स्त्रीणा**मन्तःपुरदास्यादीनां **प्रेष्यजनस्य** दोलकवाहादेः **प्रत्यहं वृत्तिं कल्पयेत्** सांवत्सरीयं सकृद्द्याद्ग्रामं तदेकदेशं वा । **स्थानकर्मानुरूपतः** प्रधानं नियोगः शय्यारक्षादि कर्म शरीरव्यापारस्तदनुरूपेण वृत्तिर्देया । प्रधाने स्थाने स्वल्पेऽपि कर्मणि महती वृत्तिर्निकृष्टे स्थाने महत्यपि कर्मणि स्वल्पेतदुभयानुरूपम् ॥ १२६ ॥

पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् ॥
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः ॥ १२७ ॥

अवकृष्टः संमार्जनशोधनविनियुक्तस्तस्य भक्तार्थं **पणो देयः** । **उत्कृष्टस्य** षट्सु षट्सु मासेषु गतेष्वाच्छादवस्त्रम् । **धान्यद्रोणश्च मासिकः** । चतुराढको द्रोणः । पणपरिमाणं वक्ष्यति । वृत्तिकल्पनार्था एते ॥ १२७ ॥

क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम् ॥
योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् ॥ १२८ ॥

करग्रहणविधिः कियता मूल्येन क्रीतमेतत्कियच्च विक्रीयमाणं लभते कियता च कालेन विक्रीयते कियत्प्रतिभावेन नश्यत्यथ नेत्येवमादिरूपक्रयविक्रयपरीक्षा । **अध्वानं** चिराचिरगमनप्राप्यताम् । **भक्तं** सक्त्वोदनादिमूल्यं । **परिव्ययस्त**दुपकरणं सर्पिः सूप-

१ ज–नलेशोद्देशिकया । २ फ–राजा । ३ प–दोदक । ४ प–किंप्रतिभवेन न नश्यति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शाकादि धनादि च । योगक्षेममरण्ये कान्तारे वा गच्छतो राजभयं चौरभयं निश्चौरता वेत्यादि । एतदपेक्ष्य वणिग्भ्यः करा आदातव्याः । " वणिग्भिर्दापयेत्करान् " इति पाठो युक्तः । गत्यादिनियमेन कर्मसंज्ञाया अभावात् । दण्डवचनो वा धातुस्तदा दण्डिवद्विकर्मकत्वम् ॥ १२८ ॥

* यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः ॥
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥ १२९ ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्मणाम् ॥
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् ॥ १३० ॥

क्षीणकृषेर्न्यूनः करो ग्रहीतव्य इत्येवमर्थमेतत् । वार्योकसो जलौकसः । षट्पदा भ्रमराः । यथा ते स्वल्पमाददानाः परिपुष्टा भवन्ति तथा राज्ञा मूलच्छेदो न कर्तव्यः ॥ १२९ ॥

एतदेवाह । कर्मणां कर्त्ता वाणिजकः । राजा च फलेन युज्येत । तथा करान्कल्पयेन्न परिमाणानियमकारणमस्ति । यत्र महाल्लाभस्तत्राधिकमप्युक्तपरिमाणातिक्रमेण ग्रहीतव्यम् ॥ १३० ॥

पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ॥
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥ १३१ ॥

मूल्याधिकयोः पशुहिरण्ययोः पञ्चाशद्भागो ग्राह्यः । धान्यानां भागविशेषः सुकरदुष्करापेक्षया मन्तव्यः पंचाशत्पूरणः पञ्चाशः । विंशत्यादिभ्य इति पक्षे तमट् । पञ्चशद्भाग इति पाठे द्विभागादिवत्संख्यान्तरम् ॥ १३१ ॥

आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ॥
गन्धौषधिरसानां च पुष्पमूलफलस्य च ॥ १३२ ॥

द्रुमशब्देन वृक्षा उच्यन्ते । शेषं प्रसिद्धम् । एतेषां षष्ठो भागो लाभाद्ग्रहीतव्यः ॥ १३२ ॥

पत्रशाकतृणानां च चर्मणां वैदलस्य च ॥
मृन्मयानां च भाण्डानां सर्वस्याश्ममयस्य च ॥ १३३ ॥
म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम् ॥
न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषये वसन् ॥ १३४ ॥

---

* फ-पुस्तके "यथा फलेन" इति पठित्वा तदनन्तरं "यथाल्पाल्पम्" इति दर्शितः ।

१ ण-पञ्चाशो ।

६७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा कुर्याद्यथा क्षुधाऽस्य विषये श्रोत्रियो नावसीदति ॥ १३४ ॥

यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ॥
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति ॥ १३५ ॥

अनन्तरविधेरतिक्रमफलमेतत् ॥ १३५ ॥

श्रुतवृत्ते विदित्वाऽस्य वृत्तिं धर्म्यां प्रकल्पयेत् ॥
संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसम् ॥ १३६ ॥

धर्म्यां वृत्तिं यया कुटुम्बधर्मस्यावसादनं न भवति । वृत्तिं प्रकल्प्य सर्वतो रक्षेच्चौरादिभ्यः । स्वयमधिकव्ययाच्च ॥ १३६ ॥

संरक्ष्यमाणो राज्ञाऽयं कुरुते धर्ममन्वहम् ॥
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥ १३७ ॥

धार्मिकश्रोत्रियरक्षायाः फलमेतदायुर्द्रविणराष्ट्रवृद्धिः ॥ १३७ ॥

यत्किंचिदपि वर्षस्य दापयेत्करसंज्ञितम् ॥
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥ १३८ ॥

कृषिधनप्रयोगक्रयविक्रयादिर्व्यवहारेण जीवन्तं पृथग्जनं ब्राह्मणाच्छ्रोत्रियादन्यं करं दापयेत् । करसंज्ञासंजाताऽस्य करसंज्ञितम् ॥ १३८ ॥

कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः ॥
एकैकं कारयेत्कर्म मासि मासि महीपतिः ॥ १३९ ॥

शिल्पमात्रोपजीविनस्तान्मासं मासमेकमहः कर्म कारयेत् । आत्मोपजीविनश्च शूद्रा वेशभारवाहादयः ॥ १३९ ॥

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया ॥
उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् ॥ १४० ॥

करशुल्कादेरग्रहणमात्मनो मूलच्छेदः अतिबहुग्रहणं परेषां तच्च तृष्णया भवतीत्यनुवादः । आत्मनो मूलच्छेदेनात्मपीडा भवति कोशक्षयात् अतस्तेऽपि पीड्यंते । उपस्थिते विग्रहे क्षीणकोशशक्तिररिभिरपरुद्धोद्धरणेऽवश्यं भवेत् । सा च तेषां महती पीडा । यत्तु सार्वकालिकं करग्रहणं संपादयतो नाखेदिता भवति ॥ १४० ॥

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः ॥
तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमतः ॥ १४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीक्ष्णमृदुता नित्यमभ्यसनीया । तादृशो राजा प्रजानां संमतो भवत्यभिप्रेतम् ॥ १४१ ॥

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् ॥
स्थापयेदासने तस्मिन्खिन्नः कार्येक्षणे नृणाम् ॥ १४२ ॥

प्रजानां संबन्धिनि कार्यदर्शने **खिन्नः** शान्तः । धर्मज्ञादिगुणयुक्तं सर्वसहममात्यं तस्मिन् **कार्येक्षणे** नियुञ्जीत । न पुनस्तस्मिन्नेव सिंहासने ॥ १४२ ॥

एवं सर्वं विधायेदमितिकर्त्तव्यमात्मनः ॥
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥ १४३ ॥

सहायसंग्रहप्रभृत्युक्तस्यार्थस्यैवमिति परामर्शनं **विधाय** कृत्वा इतिकर्तव्यमुपकारकमितिकर्त्तव्यमुच्यते । **युक्त**स्तत्परः । अत **एवाप्रमत्तः** । अथवा बुद्ध्यस्खलनमप्रमत्तता सर्वकाले । **एवं प्रजाः परिरक्षेत्** ॥ १४३ ॥

विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ॥
संपश्यतः सभृत्यस्य मृतः स न तु जीवति ॥ १४४ ॥

पूर्वोक्तयोरप्रमादयोरन्यथात्वे दोषमाह । यदि सम्यग्गुल्मस्थानानि प्रति न जागर्ति[1] तदा छिद्रान्वेषिभि**र्दस्युभिः** चौरैः प्रजा ह्रियन्ते । तासु किं करिष्यति । अतस्तादृशो राजा मृत एव । जीवितं मरणमेव । अतोऽप्रमत्तेन भवितव्यम् । **विक्रोशन्त्यः** आक्रन्दत्यः । **ह्रियन्ते संपश्यतः** । **सभृत्यस्य** निर्दिष्टं द्रक्ष्यते । केवलं च भृत्यास्तदीयाः पश्यन्ति नानुधावन्ति मोक्षयन्ति । सर्वे ते मृतकल्पाः ॥ १४४ ॥

क्षत्रियस्य परो धर्मः प्रजानामेव पालनम् ॥
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥ १४५ ॥

प्राप्तं फलं भुङ्क्ते राजा स धर्मेण युज्यते । अन्यथाऽनुग्राहकाणामेव पालनं कुर्वन्प्रत्यवैति ॥ १४५ ॥

उत्थाय पश्चिमे यामे कृतशौचः समाहितः ॥
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् ॥ १४६ ॥

पश्चिमो यामो ब्राह्मो मुहूर्त्तः । यत आह । **कृतशौचः समाहितः । हुताग्नि**रिति न च ब्राह्मे मुहूर्ते होमविधानमस्ति । तदा हि चतुर्मुहूर्तशेषा रात्रिर्भवति । होमश्च व्युष्टायां

---

१ फ–न जानाति । ड–क्ष–न प्रतिजानामी ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रात्रौ समाप्य कार्यं उषःकल्पत्यागेन । आच्यं ब्राह्मणान्पूजयित्वा **सभां शुभां** मङ्गलवतीं प्रविशेत् ॥ १४६ ॥

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् ॥
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ॥ १४७ ॥

तत्र तस्यां सभायां **स्थितः प्रजा** दर्शनार्थमागताः **प्रतिनन्द्य** यथार्हसंभाषणेक्षणाभ्युत्थानाभिवादनैर्हर्षयित्वा **विसर्जयेत्** यथागतमनुजानीयात् । ततो विसर्जितेषु तेषु **मन्त्रयेत्सह मन्त्रिभिः** किं कर्तव्यमिति स्वपरराष्ट्रगतकर्तव्यतानिरूपणं मन्त्रास्त्वाङ्गं दर्शयिष्यते ॥ १४७ ॥

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ॥
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥ १४८ ॥

मन्त्रदेशविधिः । **रहोगतः** विविक्ते निर्जने देशे स्थितः । **अविभावितः** अनुमानेनापि यथा न जना जानन्तीदं वस्तु विद्यत इति तथा कुर्यात् । **निःशलाकं** । शलाका इषीकाः । यत्र तृणमपि नास्ति येन न कश्चित्तिष्ठतीति संभावनाऽस्ति तन्निःशलाकम् । इमान्यङ्गानि कर्मणामारम्भोपायः । पुरुषद्रव्यसंपत् देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिरिति । अथवा प्रार्थनाकालं नातिपातयेत्तत्र दीर्घो मन्त्रः स्यात् । न तेषां ब्रूयात् गुप्तमन्त्रश्च स्यात् ॥ १४८ ॥

यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ॥
स कृत्स्नां पृथिवीं भुंक्ते कोशहीनोऽपि पार्थिवः ॥ १४९ ॥

मन्त्रप्रकाशनिवारणार्थः श्लोकः । **पृथग्जना** अमन्त्रिणो मन्त्रविद्वाह्याः ॥ १४९॥

जडमूकान्धबधिरांस्तैर्यग्योनान्वयोतिगान् ॥
स्त्रीम्लेच्छव्याधितव्यङ्गान्मन्त्रकालेऽपसारयेत् ॥ १५० ॥

यत्किंचित्प्राणिजातं तन्मन्त्रयमाणो विशोधयेत् । ततः प्रदेशादपशोधयेत् । मन्त्रभेदाशङ्कया । तिर्यग्योनिषु च शुकसारिकादयोऽपि मन्त्रं भिन्दन्ति गवाश्वादयोऽपि । योगारूढाः परिवर्तितवार्त्ताविनिकाः सदसद्ग्राहीरूपवार्त्तादयो भवंति । तदान्तर्धानादयोऽपि नरेन्द्रविद्याश्च श्रूयन्ते । व्यंगत्वादेवग्रहणे सिद्धे गोबलीवर्दवत् व्यंगस्य हस्तपादादिछेदने न मन्त्रनियमास्था कर्त्तव्या नायं कुत्रचित् गंतुं शक्नोति इहैवावरुद्ध आस्ते कथं मन्त्रान्

For Private And Personal Use Only

मेत्स्यतीति । अथवा एवंविधा मन्त्रिणो न कर्त्तव्या बुद्धिविभ्रमसंभवात् अतो नाप्ता अपि ततोऽपसर्पः ॥ १५० ॥

भिन्दन्त्यवमता मन्त्रं तैर्यग्योनास्तथैव च ॥
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् ॥ १५१ ॥

मानादपेता अवमताः क्षुद्रादयोऽपमानासत्त्वे कदाचित्किंचिच्छृणुयुः । कदाचिद्वाऽक्षराण्युच्चारयितुं शक्नुयुस्ततो मन्त्रभेदः स्यात् । शक्नुवन्ति निपुणाः किंचिदागमेष्वनुमन्तुम् ॥ १५१ ॥

मध्यंदिनेऽर्धरात्रे वा विश्रान्तो विगतक्लमः ॥
चिन्तयेद्धर्मकामार्थान्सार्धं तैरेक एव वा ॥ १५२ ॥

धर्मादीनां परस्परविरोधं चिन्तयेत् अन्यतमवृद्धौ सर्वोत्थितिर्जयेत् ॥ १५२ ॥

परस्परविरुद्धानां तेषां च समुपार्जनम् ॥
कन्यानां संप्रदानं च कुमाराणां च रक्षणम् ॥ १५३ ॥

धर्मार्थकामानां वा मन्त्रिणां वा **समुपार्जनं** संग्रहणम् । **कन्यानां संप्रदानं** स्वकार्यसिद्धिवशेन चिन्त्यम् । **कुमाराणां** राजपुत्राणां **रक्षणं** तव वयमित्येवमादिभिर्धर्ममर्थं च । ते ग्राहयितव्याः । नवं हि द्रव्यं येनार्थजातेनोपदिश्यते तत्तदा दूषयति । एवमसंस्कृतबुद्धयो यद्यदुच्यन्ते तत्तत्प्रथमं गृह्णन्ति यद्यसाद्भिः संसृज्यन्ते तदा तत्स्वभावस्तेषां प्राप्नोति । ते च दुःसंस्कारोपदिग्धाः न शक्यन्ते व्यसनेभ्यो निवर्तयितुम् । उक्तं च नीलीरक्ते वाससि कुंकुमांगरागो दुराधेयस्तस्मात्ते नित्यमनुशासनीयाः । तत्रापि ये गुणवतस्तान्वर्धयेत् । इतरानपि त्संविभजेत् । ज्येष्ठं महागुणममत्सरं यौवराज्येऽभिषिंचेत् । एवं राजपुत्ररक्षणे नित्यं यत्नवता भवितव्यम् ॥ १५३ ॥

दूतसंप्रेषणं चैव कार्यशेषं तथैव च ॥
अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम् ॥ १५४ ॥

येन संधानं विग्रहो वाऽपि कार्यस्तेन च **दूतसंप्रेषणं** चिन्त्यम् । आरब्धकार्यसंबन्धं चिन्तयेत् । अवस्थापनाय कक्षान्तरेष्वन्तर्वैशिकसैन्याधिष्ठितोऽन्तःपुरं प्रविशेत् । तत्र स्थविरस्त्रीमतिशुद्धां देवीं परिपश्येन्नापरिशुद्धां देवीम् । भद्रलीनो हि भ्राता भद्रसेनो मातुः शयनान्तर्गतः कुपुरुषशङ्कविषदिग्धेन नूपुरेणा[illegible] मेखलायाः, सौवीरं

1 क्ष–वारयेत ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेण्यां गूढेन शस्त्रेण विदूरथं तस्मादेतानि विस्त्रंभस्थानानि यत्नतः परीक्षेत । मुण्डजटिलकुहकप्रातिसंसर्गं बाह्यदासीभिरन्तःपुरदासीनां प्रतिषेधयेत् । प्रणिधीनां च कार्पटिकादीनां वा परस्पराभिवेष्टितं चिन्तयेत् ॥ १५४ ॥

***कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः ॥**
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥ १५५ ॥

अकृतारम्भकृतानुष्ठानं अनुष्ठितविशेषणं कर्मफलसंग्रहः । तथा साम भेददानदण्डमेतदष्टविधं कर्म । अथवा वणिक्पथः उदकसेतुबन्धनं दुर्गकरणं कृतस्य वा तत्संस्कारनियमः हस्तिबन्धनं खनिखननं शून्यनिवेशनं दारुवनच्छेदनं चेति । अपरे त्वाहुः “ आदाने च विसर्गे च तथा प्रैषनिषेधयोः । पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे ॥ “ दण्डशुध्द्योः सदा युक्तस्तेनाष्टगतिको नृपः । अष्टकर्मा दिवं याति राजा शत्रुभिरर्चितः ॥”

इत्यौशनसौ श्लोकौ । तत्र स्वीकरणमादानम् । बलीनां भृत्येभ्यो धनदानं विसर्गः । प्रैषो दुष्टत्यागः । अर्थाधिकृतानां मतिप्रवृत्तिनिरोधो निषेधः । अस्त्प्रवृत्तिनिषेधश्चार्थवचनम् । वर्णाश्रमाणां स्वकर्मसंशयव्यवहारावेक्षणम् । परस्पराभियोगे दण्डनिपातनं पराजितानां च प्रमादस्खलिते तु प्रायश्चित्तमित्येतदष्टविधं कर्म ।

पञ्चवर्गः कापटिकोदास्थितगृहपतिकवैदेहिकतापसव्यञ्जनाः परमधर्मज्ञाः प्रगल्भछात्राः कापटिकास्तानयमानाभ्यामुपसंगृह्य मन्त्री ब्रूयात् । राजानं मां च प्रमाणं कृत्वा यत्र यदकुशलं तत्तदानीमेवाच्छातव्यं त्वयेति । प्रव्रज्यायाः प्रत्यवसित उदास्थितः स च *प्रज्ञाशौचयुक्तः* सर्वान्नप्रदानसमर्थायां भूमौ प्रभूतहिरण्याया दासकर्म कारयेत् । कृषिकर्मफलं तच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसथान्प्रतिविदध्यात् । तेषां ये वृत्तिकामास्तानुपजपेदेवमेतेनैव वृत्तेन राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति । सर्वप्रव्रजिताः स्वं स्वं कर्मोपजपेयुः । कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिव्यञ्जनः स कृषिकर्म कुर्याद्यथोक्तायां भूमाविति । वाणिजिको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहिकव्यञ्जनः स

---

* वने वनेचराः कार्याभ्रमणाटविकादयः ॥
परप्रवृत्तिज्ञानार्थं शीघ्राचारपरंपराः ॥ १ ॥]‡

परस्य चैते बोद्धव्यास्तादृशैरेव तादृशाः ॥
चारसंचारिणः संस्था शठाश्चागूढसंज्ञिताः ॥ २ ॥‡

१ क्ष—कृषिवाणिज्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वणिक्कर्म कुर्यात्प्रदिष्टायां भूमाविति समानम् । मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः
सन्नगराभ्याशे प्रभूतजटिलमुण्डान्तेवासिशाकं यवमुष्टिं वा मासान्तरितं प्रकाशमश्नीयाद्धर्म-
व्याजेन गूढं यथेष्टमाहारं तापसव्यञ्जनान्तेवासिनश्चैनं प्रसिद्धयोगैरर्थलाभमग्रे शिष्याश्चा-
दिशेयुः । दाहं चौरभयं दुष्टवधं च विदेशप्रवृत्तमिदमद्य श्वो वा भविष्यतीदं वा राजा
करिष्यतीति तस्य गूढमन्त्रिणस्तत्प्रयुक्ताः संपादयेयुः । ये चास्य राज्ञो वंशलक्षणविद्यासंग- ९
वेद्यां जंभकविद्यां मायागतमाश्रमधर्मं निमित्तज्ञानं चाधीयाना मन्त्रिणस्तत्र राजा एतत्पञ्च-
संस्थायतैर्मन्त्रिभिः स्वविषयेऽवस्थापयेत् । मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वैशिका-
दिषु सव्यपदेशवेषशिल्पभाषाविदो जनपदापदेशेन मन्त्रिणः संधारयेत् । तथा कुब्जवामन-
किरातमूकजडबधिरान्धनटनर्त्तकगायनादयः स्त्रियश्चाभ्यन्तरचारिण्योऽरण्यां वनेचराः
कार्या ग्रामे ग्रामीणकादयः पुरुषव्यापारार्थाः स्वव्यापारपरंपराः परस्परं चैते बोद्धव्यास्ता- १०
दृशैरेव तादृशाः । वारिसंचारिणस्था गूढाश्च गूढसंज्ञिताः ।

एवं पञ्चवर्गं प्रकल्प्य परस्यात्मनश्चात्मीयादेव पञ्चवर्गान्मन्त्रिपुरोहितादीनाम-
नुरागापरागौ विद्यात् प्रवर्त्तेत । तथा राजमण्डलप्रचारको माण्डलिकः संधिविग्रहादौ
कस्मिन्प्रचारे इति ॥ ९९ ॥

मध्यमस्य प्रचारं च विजिगीषोश्च चेष्टितम् ॥
उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः ॥ १५६ ॥ १९

एतस्मिन्राजमण्डल इमाश्चतस्रो राजप्रकृतयो मुख्या भवन्ति । विजिगीषुररिर्मध्यम
उदासीन इति । तत्र एष [1]नयो राजा प्रकृतिसंपन्नोऽहमेवंविधां पृथिवीं विजेष्येऽ-
भ्युत्थितः स **विजिगीषुः** उत्साहशक्तियोगात् । शत्रुस्त्रिविधः सहजः प्राकृतः कृत्रिमः ।
स्वभूम्यनन्तर इति **मध्यमो**ऽनयोररिविजिगीष्वोरसंहतयोर्निग्रहसमर्थनसंहतयो**रुदासीनः**
अरिविजिगीषुमध्यमानामसंहतानां निग्रहसमर्थो न तु संहतानाम् ॥ १९६ ॥ २०

एताः प्रकृतयो मूलं मण्डलस्य समासतः ॥
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥ १५७ ॥

एताः स्मृताः । एता **मूलप्रकृतयो मण्डलस्य** व्याख्याताः । **अष्टौ चान्याः** ।
आसां चतसृणां प्रकृतीनामेकैकस्याः प्रकृतेर्मित्रममित्रं चेति द्वे द्वे प्रकृता एता अष्टौ
आद्याश्चतस्र एवमुभयतो द्वादश भवन्ति ॥ १९७ ॥ २१

अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः ॥
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥ १५८ ॥

१ क—नयो ।

For Private And Personal Use Only

अमात्यादयः पंचप्रकृतयः द्वादशानां प्रकृतीनां एकैकस्या भवन्ति । अतः षट्द्वादशका द्विसप्ततिः ॥ १५८ ॥

* अनन्तरमरिं विद्याद्‌रिसेविनमेव च ॥
अरेरनन्तरं मित्रमुदासीनं तयोः परम् ॥ १५९ ॥

विजिगीषुभूम्यनन्तरमरिं विद्यात्तथाऽरिमित्रं मित्रं त्वेवमरिं भूम्यनन्तरं विजिगीषोर्मित्रं भवति । उदासीनस्तयोः परः । अरिमित्रलक्षणं च सहजकृत्रिमयोरपि द्रष्टव्यम् ॥ १५९ ॥

तान्सर्वानभिसंदध्यात्सामादिभिरुपक्रमैः ॥
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥ १६० ॥

संदध्याद्वशीकुर्यात् । पौरुषनयौ सामदण्डावेव तत्र चोक्तौ सामदण्डौ प्रशंसतीति ॥ १६० ॥

संधिं च विग्रहं चैव यानमासनमेव च ॥
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ॥ १६१ ॥

तत्र हिरण्यादिदानोभयानुग्रहार्थः सन्धिस्तद्विपरीतो विग्रहः । एकान्तताऽप्युच्यते यानमुपेक्षायामासनं सन्धिविग्रहोपादानं द्वैधीभावः । परस्यात्मार्पणं संश्रयः । एते षड्गुणाः । एतेषां यस्मिन् गुणेऽवस्थितो मन्येताहं शक्ष्यामि दुर्गं कारयितुं हस्तिनीर्बन्धयितुं खनीः खनयितुं वणिक्पथं प्रयोजयितुं जतुवनं छेदयितुं अदेवमातृकदेशे क्षेत्राणि बन्धयितुमित्येवमादीनि परस्य वित्तानि व्याहर्तुं बुद्धिविघातार्थं गुणमुपेयादेवं च सति ॥ १६१ ॥

आसनं चैव यानं च संधिं विग्रहमेव च ॥
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥ १६२ ॥

एकेन संधायापरस्मिन्याने शक्तं मृषा विगृह्णीयात् । एवमासनमपि संधाय विगृह्य च सर्वमेतत्कार्यं वीक्ष्य प्रयुञ्जीत । नात्र नियतः कालो यदैव यद्युक्तं मन्येत तदैव तदाचरेत् । यदि कालनियमो लक्षयितुं न शक्यते उपदेशः किमर्थमेवमाह न शक्यते विशेषो दुर्लक्षः सामान्यं तु सुलक्षणमेतदप्यबुधानामुपयुज्यते ॥ १६२ ॥

संधिं तु द्विविधं विद्याद्राजा विग्रहमेव च ॥
उभे यानासने चैव द्विविधः संश्रयः स्मृतः ॥ १६३ ॥

---

*[विप्रकृष्टेऽध्वनीयश्च उदासीनो बलान्वितः ।
स खिलो मण्डलार्थस्तु यस्मिन्ज्ञेयः स मध्यमः ॥ १ ॥ +

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समानयानकर्मा च विपरीतस्तथैव च ॥
तदा त्वायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः ॥ १६४ ॥

समानयानकर्मा यानफलं सहितौ तुल्यौ गच्छावः समानफलभागितया न च त्वयाऽहमुल्लङ्घनीयो यत्ततो लप्स्यते तत्तव मम च भविष्यति। अथवा त्वमन्यतो याह्यह-मन्यत्र यास्यामीत्येवमसमानयानकर्मा विपरीतः ॥ १६४ ॥

स्वयंकृतश्च कार्यार्थमकाले काल एव वा ॥
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥ १६५ ॥

स्वयं विग्रहस्य कालो यदावश्यं स्वबलेनोत्सहते परं कर्षयितुमुत्साहयुक्तः प्रकृतयः संहता विवृद्धाश्च स्वकर्मकृष्यादिफलसंपन्नाः परस्यैतान्यपहरिष्यन्ति कर्माणि क्षीण-लब्धप्रकृतिः परः शक्यास्तत्प्रकृतय उपजापेनात्मीयाः कर्तुं स स्वयं विग्रहस्य **कालः** । **अकाल** एतद्विपरीतः । तत्रापि **विग्रहो मित्रस्यापकृते** यदि शत्रुणा तदीयं मित्रमपकृतं तदा तद्विचिन्त्याकालेऽपि विग्रहः कर्तव्यः । यद्यपि स्वयमपि शत्रोरनन्तरं मित्रं भवति तथापि तेन मित्रेण सहायेन शक्यः शत्रुरपबाधितुम् । शत्रोरनन्तरं मित्रं भवति शत्रोस्तु शत्रुर्विषयानन्तरत्वम् । पाठान्तरं मित्रेण चैवापकृते । तेन यद्यसौ बाधितो भवति तदाऽकालेऽपि विग्रहः कार्यः । एतद्विग्रहस्य द्वैविध्यं स्वकार्यार्थे मित्रकार्यार्थे च । अथवाऽऽत्मनोऽभ्युच्छ्रूयादेकः प्रकारो मित्रेणापकृते व्यसनिनि तत्रैव द्वितीयः ॥१६५॥

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया ॥
संहतस्य च मित्रेण द्विविधं यानमुच्यते ॥ १६६ ॥

एकाकिनो मित्रेण वा संहतस्य यानद्वैविध्यं यानस्यासत्यां शक्तावेकाकिनः । अन्यथा संहतस्य । आत्ययिकं कार्यं परस्य व्यसनोत्पत्तिः। तदा ह्यभिगमनीयतमो भवति परतः । कदाचिल्लब्धोच्छ्रूयो दुरुच्छेद्यः ॥ १६६ ॥

क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा ॥
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् ॥ १६७ ॥

आत्मसंवरण**मासनम्** । तदपि द्विविधम् । **क्षीणस्य** बलकोशोपनयेन वृद्धस्यापि शत्रुं प्रत्यपेक्षा। आसनं च मित्रानुरोधेन यदि मित्रस्य क्षीणस्य शत्रुणा सह संबन्धो नेदृशो भवति तदीयेन मित्रेण नायमुत्तम्भनीय इत्यतस्तदनुवृत्त्यासीत । स च क्षयो **दैवात्पूर्वकृतेन** वेत्यनुवादः । वृद्धिक्षयौ सर्वस्यैतेन कारणेन भवतः। तत्र दैवं स्वकृतप्रमादः अतिव्ययशीलता

---

१ क्ष- यानं द्विविधं । २ फ-अभिगमनियमो ।

For Private And Personal Use Only

अप्रतिजागरणं स्वे बले पूर्वकृतमशुभं कर्मापि विपर्ययेण वैतद्व्याख्येयम् । मोहादिति पाठान्तरम्। अर्थस्तु दैवशब्देन व्याख्यातः ॥ १६७ ॥

बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये ॥
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥ १६८ ॥

बलस्य स्थितिः स्वामिनश्च भेदेन दुर्गस्वामिनः स्वल्पेन बलेन सेनापतेरन्यत्र महता बलेन युक्तस्य । अथवा बलशपथानुग्रहार्थः कश्चित्कर्त्तव्यो हिरण्यादिलाभापेक्षया परस्त्वधिकेनाशु द्वैधीभावो नामायमुपायः ।तस्यैतदेव रूपं यद्विधा स्थितिर्बलस्वामिनोरत्रैवं-रूपस्य तस्यापरं द्वैधं वक्तव्यम् । न च तदनेन किंचिदुच्यते । केवलं बलस्य स्वामिनश्च स्थितिरेतद्द्विविधं तत्र वक्तव्यं मायायां द्वैधीभावस्तस्येदं द्वैविध्यम् । उच्यते । सामर्थ्यलभ्य-मेतत्परानुग्रहार्थमेतत्कर्तव्यं स्वकार्यार्थं चेत्येष द्विधाभावस्य द्वैधीभावः ॥ १६८ ॥

अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः ॥
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥ १६९ ॥

शत्रुभिः पीड्यमानस्य अर्थसंपादनार्थमन्यत्र संश्रयः अर्थपीडानिवृत्तिस्तत्सं-पादनार्थं शक्यमन्यमाश्रयेत् । स्वदेशं हित्वा तत्र गच्छेत् । व्यपदेशश्चापीडितेऽपि आगामिपीडापरिहाराय व्यपदेशार्थमन्यं संश्रयेत् । एषोऽस्य सहायको वर्तते न शक्योऽ-यमुपपीडयितुमिति व्यपदेशसिद्धिर्न केनचिदुपपाद्यते । व्यपदेशप्रयोजनसंश्रयो व्यपदेश-शब्देनोक्तः । सामानाधिकरण्येन पाठान्तरं व्यपदेशार्थमिति । क पुनः संश्रयः कर्त्तव्य-स्तदाह । **साधुषु** ये साधवो राजानस्तेषामन्यतममाश्रयेत् । येभ्यः सकाशात्कुसृतिर्ना-शङ्क्यते । साधुशब्देन परिभवत्राणसामर्थ्यादयो गुणाः प्रतिपाद्यन्ते ॥ १६९ ॥

यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः ॥
तदात्वे चाल्पिकां पीडां तदा संधिं समाश्रयेत् ॥ १७० ॥

आयतिरागामीकालो यद्येवं मन्येत समबलो ममायमप्येष न्यूनबलो वा कालात्तु लब्धकृत्योपजापेन मित्रग्रहेण वा शक्नोत्येनमभिभवितुं **तदा संधिं** कुर्यात् । **आधिक्य-**मधिकबलता । **ध्रुवं** निश्चितम् । **तदात्वे** वर्तमानकालवचनोऽयम् ॥ १७० ॥

यदा प्रहृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशम् ॥
अत्युच्छ्रितं तथाऽऽत्मानं तदा कुर्वीत विग्रहम् ॥ १७१ ॥

प्रहृष्टा उत्साहानुरागयुक्ता दानमानाभ्यामुपसंगृहीता आत्मीयाः **प्रकृतीरमात्यादिका मन्येत अत्युच्छ्रितमात्मानं** कोशहस्त्यश्वादिसंपदा तदा केनचिदपदेशेन संधिदूषणं कृत्वा **विग्रहमाश्रयेत्** ॥ १७१ ॥

---

१ क्ष–वक्तव्यमायायां । २ क्ष–द्वैधीभावस्य । ३ क्ष–पीड्यते । ४ क्ष–वक्तव्यः । ५ क्ष–अधिका

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

यदा मन्येत भावेन त्दृष्टं पुष्टं बलं स्वकम् ॥
परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥ १७२ ॥

भावो हर्षपोषकारणं बहुना धनेन संविभक्तता कृष्यादिकर्माणि फलितान्येषामित्यादि हर्षपोषयोः कारणम् । बलं हस्त्यश्वरथपादातं **परस्य यदा विपरीतं तदा शत्रुं प्रतियायाद्**भिषेणयेच्छत्रुमित्यर्थः । न विग्रहकारणान्येव यानकारणानि । किं तर्हि तान्यपि अपचयश्च हर्षपोषयोः परस्य प्रकृतीनाम् ॥ १७२ ॥

यदा तु स्यात्परिक्षीणो वाहनेन बलेन च ॥
तदाऽऽसीत प्रयत्नेन शनकैः सांत्वयन्नरीन् ॥ १७३ ॥

वाहनं हस्त्यश्वरथं बलं पादातं गोबलीवर्दवद्भेदः । परिक्षीणे बले सति **सान्त्वयन्नरिमासीत** । सामोपप्रदानाभ्यामनुकूलनं सान्त्वनम् ॥ १७३ ॥

मन्येतारिं यदा राजा सर्वथा बलवत्तरम् ॥
तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः ॥ १७४ ॥

अशक्यं संधानं बलवता रुद्धस्य दुर्गसंश्रयणं च हितं दुर्गे च बलावस्थानमेव द्वैधीभावः स च प्रागुक्तार्थः ॥ १७४ ॥

यदा परबलानां तु गमनीयतमो भवेत् ॥
तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपम् ॥ १७५ ॥

गमनीयतमोऽभिभवनीयतमो दुर्गस्थोऽहमिति मन्यते तदा **क्षिप्रं** दुर्गमुज्झित्वाऽन्यं **संश्रयेद्धार्मिकम्** । यतः कुत्सितान्नाङ्क्ष्यते यस्य यशोभयी स्थिरप्रकृतिः बलिनमित्येतेनैतत्समुदर्शितम् ॥ १७५ ॥

निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च ॥
उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा ॥ १७६ ॥

बलिनमित्युक्तम् । कियता बलेन बलवान्भवतीत्येतदर्थमिदमुच्यते । या दुष्टास्तदीयाः प्रकृतयो यश्च शत्रुरुभयस्यापि निग्रहे समर्थः स आश्रयितव्यः । स गुरुवत्परिसेवितव्यो मानमुज्झित्वा । नैवं मन्तव्यं महाराजा एषोऽपि समत्वेन वार्त्तावह इति । प्रभुवदसौ सेवितव्यः । **सर्वयत्नै**रुपायैः प्रियवचनैरवसरे समीपे संनिधानेन ॥ १७६ ॥

यदि तत्रापि संपश्येद्दोषं संश्रयकारितम् ॥
सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् ॥ १७७ ॥

---

१ क्ष—यत्रोपि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि तस्मिन्नपि संश्रये **संपश्येज्जा**नीयात्कथञ्चि**द्दोषं संश्रयकारितं** बलीयानेव हि व्यसने बलं द्विषा करोतीति दृश्यते । दोषदर्शनलिङ्गानि च

" दत्त्वाऽऽनुतापः कृतपूर्वहोमं विमानना दुश्चरितानि कीर्तनम् ।
" दृष्टेरदानं प्रतिकूलभाषणमेताश्च दुष्टस्य भवन्ति वृत्तयः ॥ "

ततस्तत्रापि संश्रये दोषकारिणि विज्ञातेऽपिशब्दादाश्रये निर्दोषेऽसति सुयुद्धमेव तस्मिन्नपि काले निर्विकारः कुर्यात् । न हि संश्रये विनाशो दृश्यते ह्यल्पबलेनापि महाबलो जीयमानः । अपि चान्त्यावस्थायामुभयथा गुणो विजये राज्यं पराजये ध्रुवः स्वर्ग इति युद्धस्य तु शोभनत्वं दर्शयिष्यामः । एकैकगुणाश्रयेण मण्डलविजयाय यायाच्छाक्तः ॥ १७७ ॥

सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः ॥
यथाऽस्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥ १७८ ॥

उपायवचनात्सामादिभिर्व्यस्तैः समस्तैर्वा । **सर्व**ग्रहणात्तु येन शक्यन्ते मंत्रादिनाऽपि **तथा कुर्यात्** तेन प्रकारेण यतेत । **नीतिज्ञः** अर्थशास्त्रज्ञः स्वाभाविकप्रज्ञः नयाद्यभिज्ञो वा राजा यथा स्यात् शक्तित्रयेणाभ्यधिकामित्रादयो न भवेयुस्तथा प्रकृत्यादिसमादिष्ट कर्मप्रवर्तने च तेभ्योऽधिकमात्मानं कुर्यात् । श्लोकानुरोधान्मध्यमग्रहणं न कृतम् । सोऽपि तु द्रष्टव्यो न मित्रमित्युपेक्ष्यम् । स्वप्रयोजनव्यतिरेकेण मित्रं नामाव्यवस्थितं हि मित्रत्वाधिक्यमुपगतं स्वार्थगतिवशाच्च मित्रमप्यरिर्भवति । तथा च **व्यास** आह

"न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।सामर्थ्ययोगाद्विज्ञेया मित्राणि रिपवस्तथा"॥इति। एतैरुपायैर्मण्डलैर्विचारयेत् ॥ १७८ ॥

आयतिं सर्वकार्याणां तदात्वं च विचारयेत् ॥
अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः ॥ १७९ ॥

कार्याणि कर्माणि प्रयोजनानि । तेषां सर्वेषामारिप्समानामा**यतिः** परिणाम्यागामिकालस्तदात्वं प्रारंभावस्थावर्त्तमानकालस्तं च **विचारयेत्** । तत्त्वतस्तत्त्वेन । अनेकमुखानि हि कार्याणि क्षणाच्चान्यथा भवन्तीति । तत्र येषामुभौ कालौ न शुध्यतस्तानि कार्याणि कथमारभेतेति तद्विचारार्थोपदेशः । **अतीतानाम**तिक्रान्तानां **च सर्वेषां गुणदोषौ** ततो विचारयेत् । अत्राप्यतीतानां गुणदोषौ विचार्य यानि कर्माणि गुणवन्त्यतीतानि तान्येव कथं नाम पुनरारभेतेत्यतीतकार्यगुणदोषतत्त्वविचारणोपदेश एवमर्थः ॥ १७९ ॥

१ क्ष-ह्वे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः ॥
अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥ १८० ॥

एवं हि यो ह्यायत्यामागामिनि काले कार्याणां गुणदोषौ विजानाति नियमेनासौ विमृश्यकारीति स्वयं चारभते विमृश्यकारीति न स दोषं एवमर्थं हि ज्ञानं तदात्वे वर्त्तमाने यः क्षिप्रमवधारयति कार्ये न विलम्बते तदात्वे **क्षिप्रनिश्चयः** क्षिप्रकारी भवति गुणवत्करोति न दोषवत् । **अतीते** कृते सति कार्ये शेषतो यः कार्यमेव बुध्यते न तत्परिसमाप्तो लभत इति गुणवत्सर्वकार्यफलसंबन्धादभ्यधिकः **शत्रुभिर्नाभिभूयेत** । न हि धर्मशास्त्रे षाड्गुण्योपदेशः शक्यते कर्तुं दृष्ट इति ॥ १८० ॥

यथैनं नाभिसंदध्युर्मित्रोदासीनशत्रवः ॥
तथा सर्वं संविदध्यादेष सामासिको नयः ॥ १८१ ॥

दिङ्मात्रमुक्तम् । यथा न तैस्तैः प्रयोगैरभिसंदध्युस्तथा कुर्यादर्जितैरितरैरिवोपायैरित्येष सङ्क्षेपिको न्याय इत्युपसंहारः षाड्गुण्यस्यातिसंधानविरोधश्चैवं न भाति । कृत्यानामुपजापरक्षणाद्व्यसनेषु प्रतिकारात्स्वमण्डलसंग्रहाद्गुणोपायानां सम्यक्प्रयोगात्कर्मस्वभ्युत्थानमित्येवं द्रष्टव्यम् ॥ १८१ ॥

यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः ॥
तदाऽनेन विधानेन यायादरिपुरं शनैः ॥ १८२ ॥

इदानीमभियास्यतः कर्माह । यदोपचिकीर्षत्यारिराष्ट्रं प्रत्यभिमुखेन **तदाऽनेन विधानेन** गच्छेदत्वरमाणः । वक्ष्यमाणोपन्यासः सुखावबोधनार्थः ॥ १८२ ॥

मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः ॥
फाल्गुनं वाऽथ चैत्रं वा मासौ प्रति यथाबलम् ॥ १८३ ॥

यातव्यापेक्षया बलापेक्षया दीर्घे योद्धुमिच्छन्बलप्रायः शारदवासन्तिकसस्यप्रायं परराष्ट्रं **मार्गशीर्षे यायात्** । अत्र हि गच्छन् शारदं फलं गृहादिगतं सुखं गृह्णाति वासन्तं सस्यमुपहरति । कामश्च महान्दुर्गोपरोधादिकार्यक्षमो मार्गश्च प्रसिद्धवक्रपथोपभृतकाशोदकवीरुधो न भवन्ति कालश्च नात्युष्णशीतः । उपचितमपि न सस्यं नानाप्रयुक्तं प्रियं सस्यत्रयोपघातकालविप्रकर्षापेक्षया च पर आश्रयं संधत्ते । उभयसस्योपघातावकर्षणं सम्यक्कृतं भवत्यात्मनश्च बलापचय इति उपघातमात्रचिकीर्षया परदेशादेरल्पकालैसाध्ये वा

१ फ-प्रत्याभि । २ य-ततोप्रयुक्तं । ३ य-कृतो । ४ य-काला ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यातरि बलप्रायः फाल्गुनचैत्रयोर्यायात् । वासन्तिकसस्यप्रायदेशं तदाप्यात्मनोयवसादि भवति। परोपघातक्षेत्रगतसस्योपघातात् । यथाबलमिति येन प्रकारेण बलानुरूपं यायादित्यर्थः ॥ १८३ ॥

अस्यापवादः

अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम् ॥
तदा यायाद्विगृह्यैवं व्यसने चोत्थिते रिपोः ॥ १८४ ॥

एतद्व्यतिरेकेणान्येष्वपि प्रावृडादिकालेषु यदा मन्येतात्मनोऽवश्यंभावि विजयं तदा यायात् । यदा हस्त्यश्वबलप्रायं वर्षास्वश्वबलं हस्तिबलं तदा हि स्वबलकालप्रभावादेकान्तिको जयः । व्यसनपरस्य स्वबलकोशादि तस्मिन्नुत्पन्ने स्वबलकालनिरपेक्षो यायात् । व्यसनपीडितो हि शत्रुः साध्यो भवति । काष्ठमिव गुणोपयुक्तसन्नियोगमात्रादेव विनश्यति । विगृह्येति यातव्यमेवाष्टम्याहूय यायान्महानस्मिन्नेवावगम्यते ॥ १८४ ॥

कृत्वा विधानं मूले तु यात्रिकं च यथाविधि ॥
उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च ॥ १८५ ॥

मूले स्वदुर्गराष्ट्रे कुर्यादथपार्ष्णिग्राहश्च तत्र विधानं प्रतिविधानं कृत्वा दुर्गं तावत्प्रभूतधान्यादिकं सुसज्जयन्त्रप्राकारपरिखादि कार्यम् । राष्ट्रस्यापि स्वबलं श्रेणीबलेभ्यो रक्षां विधाय कुर्याद्दानमानेभ्य उपसंयम्य प्रत्यन्तेषु प्रक्षेप्तव्यं पार्ष्णिग्राहं प्रति प्राहै तत्समर्थश्च बलैकदेशः स्वराष्ट्रे स्थापयितव्यः ।यात्राप्रयोजनं यात्रिकं हस्त्यश्वादिबलयोग्यं च प्रहरणधारणादिसज्जं यथाविधिपरोपदेशं कृत्वाऽऽस्पदं प्रतिष्ठानं किंतद्यतोऽपरकीयाः क्रुद्धादयो द्रष्टव्यास्तानुपगृह्य स्वीकृत्याकारस्य परविषये निवृत्तेस्तज्ज्ञानाय सम्यग्यथावद्विधाय प्रयुज्य किमयं दृष्टोपसंग्रहं कर्तुमारब्धमुत शत्रुपरिमण्डलं कोपयितुमथ मध्यममुदासीनं वा संश्रयितुं तथा मूलयात्रां वा हर्तुकामो विधिपद्वेदं वा कर्तुकाम इत्यादि यथा चैतदेवं तथा ॥ १८५ ॥

संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकम् ॥
सांपरायिककल्पेन यायादरिपुरं मति ॥ १८६ ॥

त्रिविधः पन्था जाङ्गल आतप आटविक इति । केचिदाटविकस्थाने वनप्रक्षेपात्त्रिविध इति । अपर उन्नतो निम्नः सम इत्येवं त्रिविधं संशोध्य मार्गरोधिवृक्षगुल्मलताविच्छेदेन स्थलनिम्नयोः समीकरणं नदीगर्त्तयोस्तीर्थीकरणं पथिरोधकव्यालसमुच्छेदः प्रवर्तकाना-

१ ण-वालेषु । २ ण-वं । ३ ण-क्रुद्धा- । ४ ण-क्ष-प्राहन समर्थश्च । ५ ण-उत्तमश्रुपरि; क्ष-उत्तर । दुपरि । ६ ण-छेदं । ७ फ-शनैः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मात्मीकरणं यवसंसेनादिमत्ता चेति **षड्विधं बलमिति** केचित् । हस्त्यश्वरथपदातिसेनाकोशकर्मकरात्मकं षड्विधं बलमित्यन्ये । कोशस्थाने प्रक्षेपणमित्यपरे । मौलभृत्यश्रेणिमित्रामित्राटविकबलभेदात् । सांपरायिकविधानेन सांपरायिकं युद्धे कृत्स्नं तत्प्रत्योजनं यस्य **तत्सांपरायिकं** दुर्गकल्पेन वा रिपुं प्रति **यायात्** । स च सैन्यनिवेशस्तेषु तेषु च स्थानेषु स्थावरजङ्गमदण्डो बहुमुखपरिघफलकशाखाभिः प्राकार इत्यादिस्ताद्दशस्थापित विशेषतस्तु यात्रागतः ॥ १८६ ॥

शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत् ॥
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥ १८७ ॥

शत्रुसेविनि गूढे प्रच्छन्ने **मित्रे** गतप्रत्यागते **च युक्ततरः** स्यात् । अभियुक्ततर आहततरो भवेन्न विश्वसेदित्यर्थः । यस्मात्स **कष्टतरो रिपुरन्येभ्यः** क्रुद्धादिभ्यः । एवं च युक्ततरवचनात्कष्टतरवचनाच्च **गतप्रत्यागतमग्राह्यमम्यस्येति** गम्यते । स चतुर्विधः । कारणाद्गतस्ततो विपरीतकारणादागतो यथा दोषेण गतः पुनरागतो गुणमुभयोः परित्यज्य कारणेनागत इति यः स त्याज्यो लघुबुद्धित्वाद्यत्किंचित्कारीति । पुनरस्य प्रत्ययस्तु कारणाद्गतः कारणागतः यथा स्वामिदोषेण गतः परस्मात्स्वदोषेणागत इति सत्कर्त्तव्यो यदि सङ्गित्वादागतस्ततो ग्राह्यः । अथ परप्रयुक्तस्तेन वा दोषेणापकर्त्तुकाम इति ततो नेति परराष्ट्रं प्रत्यभिप्रस्थितः ॥ १८७ ॥

दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ॥
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥ १८८ ॥

तत्र दण्डाकारो व्यूहो दण्डव्यूहः । एवं शकटाकृतिस्थानाच्छकट इत्यादि योज्यम् । पुरस्ताद्बलाध्यक्षो मध्ये राजा पश्चात्सेनापतिः पार्श्वयोर्हस्तिनस्तेषां समीपेऽश्वास्ततः पदातय इत्येष सर्वतः समवायो दण्डव्यूहोऽतिर्यग्भवति । सर्वतो भयकार्यैः सूचिव्यूहः स्थलसमुत्थानसैनिकः प्रवीरपुरुषमुखोऽतिदीर्घे ऊर्ध्वो यतः परकक्षोऽन्यैः समं प्रवर्त्तमानः । मकरव्यूहस्तु मुखे जघनयोः पृथुरुभयतो येन प्रशस्तः सैन्ये न फल्गुबलं लभते न चार्थे तद्धि शूरैर्हन्यमानमन्येषामपि भङ्गाय भवति । तस्यान्तर्मैन्यकार्यमवरुद्धं[११] निश्चयेनावतिष्ठते । परिशिष्टं तु बलं व्यूहस्यान्तः प्रक्षिपेत् । एवंरचनाविशेषैरुक्तैरुक्तप्रयोजनापेक्षया वा विशेषेण तु समायां भूमौ दण्डगरुडसूचिभिर्यायात् । विषमायां संकटायां कटमकरवराहैरिति ॥ १८८ ॥

---

१ य–यवसेनादि । २ य–आटाविकां बलभेदात्प्रकार इत्यादि । ३ क्ष–प्रार । ४ क्ष–कारण आगतः । ५ क्ष–गतः परस्ता । ६ क्ष–त ७ क्ष–भये । ८ क्ष–समुखमुपनयोः । ९ क्ष–सर्वत्र न फागुलभते । न चयेतरै रन्यमान । १० क्ष–मन्ये । ११ श–विधाइव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतश्च भयमाशङ्केत्ततो विस्तारयेद्दलम् ॥
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥ १८९ ॥

तस्मिन्पथि यस्मात्प्रदेशात्परहितकारिभ्यो भयाशङ्का स्यात्तेन प्रदेशेन पूर्वगृहाद्विस्तारयेद्बलं गव्यूतिमात्रमधिकं वा । यवसंपत्रदृढप्रहारविस्तीर्णशत्रुपृष्ठपरस्परमवरुद्धरथिकाश्वारोहकरीबलान्यवहितानि भवन्ति । समन्ताद्विभृतपरिमण्डलो मध्यनिविष्टविजिगीषुः पद्मव्यूहः । एवं नित्यं निविशेत्पुरान्निर्गच्छेद्ग्रामाद्वा ॥ १८९ ॥

सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत् ॥
यतश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशम् ॥ १९० ॥

सेनापतिः समग्रस्य धनस्याधिपतिर्बलाध्यक्षस्तयोर्बहुत्वाभावाद्द्विवचननिर्देशाच्च सर्वदिक्षु तदसंभव इति तत्पुरुषास्तच्छब्देनोच्यन्ते । तदीयपुरुषसन्निवेशाच्च सर्वदिक्षु तावेव सन्निवेशितौ भवतः । तेन भिन्नैस्तुरगगजादिभिस्तत्प्रतिबद्धनिवेशानां संयोधनाय समन्ततो निवेश्य गिरिं वनं गर्तं वा पृष्ठतोऽध्यक्षं कृत्वा यतो भयमाशङ्केत यथा सा प्राची दिग्भवत्येव । निवेशं कुर्यादभिमुखनिर्गमार्थमिव विद्वद्भिः ॥ १९० ॥

गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समन्ततः ॥
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥ १९१ ॥

गुल्मान्मनुष्यसमवायान् केचित्साक्षात्समन्ततः सशङ्खपटहा अन्ये विपरीतास्तत्र चोत्पन्नं दुश्चिकित्सं महते चानर्थाय गुणैर्विशेषयति । आप्तानाप्तसदृशानित्यभेदार्थं कृतसंज्ञान् कृता संज्ञा यैस्ते कृतसंज्ञास्तानवसरे युद्धेषु शङ्खभेरीनादध्वजादिभिर्वाद्यैस्तूर्यैमेवाहरिष्यामस्तदपगमाशङ्कायां चैवमेव कुर्यात् । आहते ध्वजे वोच्छ्रिते पृथक्पृथगवस्थातव्यम् । एवं संहतैरेवं प्रहर्त्तव्यं एवं व्यावर्त्तितव्यमित्यादिस्थितम् । स्थाने तत्र कुशला अन्यैः शरैः शक्यमागन्तुं समेतेन शक्यमस्मिन् वयमपृथक् परे पृथगित्यादियुद्धे नानुसरणादौ कुशला भवन्तः संहतकैर्योधनीयाप्रसारं कृत्वा प्रविष्टाः पृष्ठदेशार्थः प्रहारिणः चित्रं योजयितव्या भग्नानामनेकायनशतानां पृष्ठं ग्राह्यमित्यादि अभीरवः अनेन विस्तीर्णसमेता *अविकारिणोऽभेदात्मकैर्यैर्युक्तमपरस्य एवमेतान्गुल्मान्समन्ततस्त्रिषु दिक्षु गव्यूतिमात्रव्यापी* प्रत्यहमनियतदेशान् बहूनस्थपतेर्भयप्रतिबोधनार्थमवहितेभेदातरि जनो विश्वस्तो भवति दानमानकार्यदर्शनादिभिरप्रवृत्ते युद्धेऽमात्यादिभिः सह सर्वेषां स्वार्थः संग्रामो[10] मम नाममत्रं राजेति सर्वे वयं समानविभवोपभोगाय जये राज्यं पराजये स्वर्ग इति हेतुनाऽऽगताः ॥ १९१ ॥

---

१ क्ष—आशंकेत भयं यस्मात् । २ य—कृतसंज्ञानां संबोधनाय । ३ फ—दार्यैस्तूर्यमेव । ४ य—वायु रुच्छ्रिते । ५ फ—त्यादिषूद्वेगे । ६ य—संहतः । ७ फ—नाय प्रास्दर कृत्वा । ८ य—क्ष—खिन्नं । ९ य—यैरुक्त मूचरर्यां । १० य—भये इतरो । ११ य

For Private And Personal Use Only

संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् ॥
सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत् ॥ १९२ ॥

असंहता हि बलवद्भिस्तीर्णं बलमासाद्यावयवशो विध्वंसनाय वाहनाद्यैः क्षयं यान्ति तद्विनाशे चोत्पन्ना इमेऽतोऽल्पानात्मीयान्संहतान्योधयेदन्योन्यापेक्षया युध्यमानानभिघ्नत इतरेतरानुग्रहात्परस्परानुरागात्स्पर्द्धायां च परान्संहतान्सोढुं समर्था भवन्ति । **कामं** यथेष्टं कार्यार्थे **बहून्विस्तारयेद्विप्रकीर्णान्योधयेदित्यादि** मन्येत । भिन्नांस्तांश्चैतान्भयमेष्यति परान्स्वान्वा बहून्दृष्ट्वा त्रासः स्यादिति । सूचीपूर्वोक्तोऽक्षव्यूहभेदोऽग्रतः पृष्ठतश्च त्रिधा व्यवस्थितः पार्श्वयोर्भेदनेनं तेन चात्मानं सूचिव्यूहं विभज्य योधयेत् । सतां च सर्वव्यूहानां प्रतिष्ठाव्यूहनसमर्थाविति प्रतिगृहीतावेवं कारणात् । यदा तु परबले ह्येतावेव भवतस्तदा स्वे बले विपर्ययः कार्यः । तुल्यत्वे तु पुष्टिमत्वानुरक्तकुशलमाननप्रभूतैकार्थकारित्वादित्यतो विशेषे यथासंभववाक्यैर्योधयेदिति वचनाद्राजा स्वयं तत्प्रतिसंधानार्थं व्यूहदुर्गाद्यमध्ये प्रतिग्रहभूतस्तिष्ठेत् । **समानतन्त्रेणोक्तम्**

"द्वे शते धनुषां गत्वा राजा तिष्ठेत्प्रतिग्रहः । भिन्नसंघातनार्थं तु न युध्येताप्रतिग्रहः॥" १९२॥

स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ॥
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले ॥ १९३ ॥

सेनानां देशस्य प्रक्लृप्त्यर्थमाह । समप्रदेशे रथैरश्वैश्च युध्येत । तत्र हि तेषामप्रतिघातः । अनूपः पानीयप्रायः । तत्राप्यल्पोदके हस्तिभिरगाधोदके तु नौभिः । तेषां हि तत्र सुखप्रचारता । वृक्षैर्गुल्मैश्च संछन्ने धनुर्भिः । तद्ग्रहणाच्च बलीवर्दगर्त्ताद्याकुले गृह्यते समानकार्यत्वात् । स्थलमिति पाषाणवृक्षलतागर्त्तादिरहितो देशस्तास्मिन्निषद्भिः । धार्यैः शरादिभिरायुधैश्च शक्त्यादिभिर्युध्येत आसन्नयुद्धत्वादेवं सामर्थ्यप्रदर्शनार्थत्वादस्य ॥ १९३ ॥

किंच

कौरक्षेत्रांश्च मत्स्यांश्च पञ्चालान् शूरसेनजान् ॥
दीर्घाँल्लघूंश्चैव नरानग्रानीकेषु योजयेत् ॥ १९४ ॥

कुरुक्षेत्रं प्रसिद्धं । **मत्स्यसंज्ञो** विराटदेशो नागेपुरे **पञ्चाला** उभये कान्यकुब्जा आहिछत्राश्च । **शूरसेनजा** माथुराः । कश्चिचात्र भावार्थे प्रत्ययो लुप्तनिर्दिष्ट एतद्देशजा हि प्रायेण महावर्ष्माणो बलवन्तः पृथुवक्षसः शूरा अभिमानिनो दुर्विषहा इत्यत्र येऽमी कथिताः परेषां भयहेतवो भवन्ति दीर्घकायाध्यस्तौल्पदेशा अपि दीर्घश्वस-

---

१ फ–भेदनेन । २ फ–प्रचारता । ३ ण–क्ष–दस्मादपि योन्यता चिंत्या । ४ फ–कुरु । ५ क्ष–भोगपुरे । ६ फ–ध्यवस्ता । ७ फ–भसूकरा ।

करा महाकायत्वात् लघवस्तु मरणासमर्था निर्भयेन जनेन प्रच्छन्ना विद्धाः प्रहरन्तोऽपकारासमर्था आदर्शभूताश्चैत इतरेषां भवन्ति ॥ १९४ ॥

प्रहर्षयेद्बलं व्यूह्य तांश्च भृशं परीक्षयेत् ॥
चेष्टाश्चैव विजानीयादरीन्योधयतामपि ॥ १९५ ॥

व्यूहं रचयित्वा स्वबलं भृशं दर्शयन्किमेषां जीयते जिता एवामी युष्मत्प्रतापेनेत्येवं प्रहर्षयेत् । जये महानर्थलाभः आश्रितोपाश्रितसुखं वधे वाऽपि स्वर्गो भर्तृपिण्डनिर्यातनं च । पराजये त्रितयाभाव इत्यादि नैमित्तिकोऽपि तदुपदेशः तादृशनिमित्तनियमान्मानय सहस्वोव्यावश्यंभावो यदि प्रधानपुरुषः स्वजनवधो राजा तदप्रतिग्रहव्याजेन स्थितो भीरुत्वात्स्वयं युद्धं न कामयत इत्यादि तत्र ये ब्रूयुर्नैतदेव स्वार्थ एवायमस्माकमत्र वधः शस्त्रोपजीविभूतानां संग्रामविशेषधर्मोऽव्ययीभावः स्वधर्मायासोऽनर्थहेतू राजा सर्वप्रकारै रक्षणीयः । परिश्रान्तानां चास्माकमपरिश्रान्तसुखमनुग्रहं करिष्यतीत्येवमर्थं स्थित इति तान्विशेषतो गृह्णीयात् । जेतुः प्रशंसितुः परसंव्ययं वा कारयेयुस्तानुपग्रहैः परिष्वङ्गालङ्कारदानादिना च वशीकुर्यात् । शवचेष्टां चैवारीणां योधयतां विजानीयात् । कथं युद्धे चेष्टन्ते कोशा बलं वा । केचिद्विधात्दयाः केचित्तु पक्षान्त इत्यादिचिन्तानित्यत्वान्मनुष्याणामुपकुर्वतोऽपि स्वार्थवशादुपकुर्वतीत्यत्र दुष्टानाप्तबलमध्ये विन्यसेद्यथाऽरिर्दुर्गाश्रितो भवति ॥ १९५ ॥

तद्दुर्गलम्भोपायमाह

उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ॥
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ॥ १९६ ॥

उपरोधस्तथा कर्त्तव्यो यथा न कश्चिन्निष्क्रामति किंचित्प्रविशति । राष्ट्रं दुर्गाद्बहिर्देशास्तस्योपपीडनं स्वदेशापवाहोपमर्द्दनादिभिः । यवसादीनां दूषणं विनाशनमसद्द्रव्यमिश्रणादिभिः ॥ १९६ ॥

भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा ॥
समवस्कंदयेच्चैनं रात्रौ वित्रासयेत्तथा ॥ १९७ ॥

तडागग्रहणं सर्वजलाश्रयदर्शनार्थम् । तत्र तडागस्य सेतुबन्धेन प्रयोजनभेदनं प्राकारयंत्रैर्विदारणं सुरङ्गया वा भङ्गः परिखायाः पूरणेन पार्श्वभङ्गेन वा छिद्रेषु प्रवीरपुरुषैरवस्कंदयेत् । दुर्गे रात्रौ च वित्रासयेत् । अग्निकुंभशिरस्कैः शिवावद्रुतानि कुर्वद्भि-

१ फ-तांश्च सम्यक् । २ ण-क्ष-तदुपयोज्यः । ३ फ-र्णं । ४ ण-परिपूरणेन । ५ ण-सिवावासितानि; क्ष-सेवा सितानि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनुष्यैः ये नराः स्वयमुत्पातदर्शनाद्रात्रौ जाग्रति जागरणावजीर्णो लोकः सुसाध्यो भवति । तस्मिंश्च काले भूयो भूयः ॥ १९७ ॥

उपजप्यानुपजपेद्बुद्ध्येतैव च तत्कृतम् ॥
युक्ते च दैवे युध्येत जयमेप्सुरपेतभीः ॥ १९८ ॥

उपजप्याः कुद्धारयः कुलीनाः स्वराज्याभिलाषिणस्तानुपजपेदिति हेतुः । कर्त्तरि कर्त्तव्यव्यपदेशमुपजपेदित्यर्थः । उपजपेद्ग्राहयेदित्यर्थः । उपजाप आश्रयाद्विश्लेषात्महितानुष्ठानप्रतिपादनम् । तेन चारिणा सुकृतमप्यभिमतदुर्गस्थेन वा किञ्चित्प्रारब्धं बलाटाविकपार्ष्णिग्राहादिकोपनार्थं मध्यमोदासीनानामन्यतरेण सह संधानमित्यादि बुध्येत । **युक्ते च दैवे** विजिगीषोरनुकूलदैव इत्यर्थः । नक्षत्रग्रहदैवसुमुहूर्तेषु साधकेषु दृष्टः स्वप्नदर्शननिमित्तेषु चानुगुणेष्वनुलोमवातादिषु जयमिच्छन्निर्गतभयो दुर्गस्थानानि यथा प्रथमं योद्धुं गच्छेत् ॥ १९८ ॥

साम्ना दानेन भेदेन समस्तैरथवा पृथक् ॥
विजेतुं प्रयतेतारिं न युद्धेन कदाचन ॥ १९९ ॥

न सहसा युध्येत एतावत्प्रथमं विशिष्टस्थापनोपदेशनं सुमुखं च मिथो महाजनकथा सहदारदर्शनादि । **दान**विधानं द्रव्याणां हिरण्यादीनां प्रीत्युत्पादनार्थं प्रतिपादनम् **भेद**स्तत्कुलीनादेरुपसंग्रहः । ततो विशेषणाच्च तत्रविश्रासनमित्याद्यकारणम् ॥ १९९ ॥

अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ॥
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥ २०० ॥

यस्मान्नायं नियमो दृश्यते यो जयति सोऽत्यन्तबलवानवश्यं तेन यश्च पराजीयते सोऽत्यन्तं दुर्बलश्चावश्यमित्यनित्यो विजयः ॥ २०० ॥

त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे ॥
तथा युद्ध्येत संपन्नो विजयेत रिपून्यथा ॥ २०१ ॥

सामादीनामसाधकस्तदा संदिग्धेऽपि जये समानेऽपि किं पुना रूपेण सह तेन प्रकारेण युध्येत येन प्रकारेणात्मनो जयः स्यात् । जये राज्यं वधेऽपि स्वर्ग इति युष्माकमेव जयः परप्रत्यूहकल्पना कूटयुद्धादिप्रकारः अत्यन्तोच्छेदानुसरणपीडनाभ्यां सहसा निष्कार्यः । तथा च व्यास आह

"पुनरावर्त्तमानानां निराशानां च जीविनाम् । न शक्यदेग्रतः स्थातुं शक्रेणापि धनञ्जय" ॥

---

१ क्ष–भूयः । २ ण–क्ष–तेषां । ३ ण–क्ष–न । ४ ड–ण–ग्राहकोपनार्थं । ५ ण–क्ष–विग्रह । ६ फ–विशेषेण तत्र विशसनम् । ७ ण–क्ष–अन्येभ्यो.

For Private And Personal Use Only

यदा संदिग्धं पराजयं तदाऽपक्रमणं युक्तं निर्गतो हि जीवो न कार्यमासादयति येन भद्राणि पश्यति स्वर्गमर्जयति मृत इति येनकेनचित्प्रकारेण जित्वाऽरिम् ॥ २०१ ॥

जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान् ॥
प्रदद्यात्परिहारांश्च ख्यापयेदभयानि च ॥ २०२ ॥

लब्धप्रशमनमिदमतो यस्मिन्पुरे जनपदे **देवब्राह्मणांश्च धार्मिका**न्विहितानुष्ठानिनो यथा सामर्थ्यात्प्रतिषिद्धवर्जं कामात्स्वातन्त्र्येणारीन् जित्वा साध्यप्रवृत्तादिकं गंधधूपपुष्पद्रव्यं सविभागास्फोटनादिसंस्कारद्वारेण यथार्हमभ्यर्चयेत् । कुटुंबिनां परिहारार्थं स्थितिर्यथाप्रवृत्तिविशिष्टकरभारशुल्कप्रदेशानां प्रदानेन तथा तया वा संवत्सरमेकं द्वौ वा दद्यादुच्चानां च पौरजनपदबलतानामातपादिडिण्डिमकगदापातेन ख्यापयेत्तैर्यैः स्वाम्यनुरागादस्थानमपचितं तेषामप्या रक्षान्तं यथास्वं स्वं व्यापारमनुतिष्ठत्विति ॥ २०२ ॥

एवमनुग्रहे क्रियमाणेऽपि यदा पौरजानपदानामन्येषां स्वाम्यनुरागादहं वक्तृतैजसभावो बहुमतः स्यादिति मन्येत मदीयस्य दण्डोऽवस्थातुं न शक्नुयात्तदा

सर्वेषां तु विदित्वैषां समासेन चिकीर्षितम् ॥
स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियाम् ॥ २०३ ॥

एष पौरादीनामभिप्रायः संक्षेपेण ज्ञात्वा नैतदेवमिच्छति तत्कुलीनं कर्तुमिच्छत्ययमेव तस्मिन्देशे तद्वंश्यं मृदुमलं प्रियसुखकलत्रं तेन संहततत्प्रकृतिभिश्च प्रधानादिभिः **समयं कुर्यात्** समकोशदानादि परिमाणं[1] च भवता मम दैवाकारेण पापेन भवितव्यं कार्याकार्ये कालेन[2] स्वयमुपस्थातव्यमुभयतो दण्डेन कोशेन चेत्यादि ॥ २०३ ॥

प्रमाणानि च कुर्वीत तेषां धर्म्यान्यथोदितान ॥
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥ २०४ ॥

यत्प्रकारावस्थास्तेषामुपचिताः पूर्वप्रवृत्ताः ब्रह्मदेयामरवृत्तिदेवस्वव्यापारादयस्तानजानीयात्प्रमाणानि कुर्यादेवं ह्यस्मिंस्तेषामनुरागो भवति । ये च तत्र प्रधानाः पुरुषास्तत्र प्रतिज्ञास्वजनबहुत्वादिगुणैस्तैः सह राजानमेनं शस्त्रधनधान्यालङ्कारवाहनछत्रपीठिकादारपट्टबन्धादिभिः पूजयेत् ॥ २०४ ॥

कस्मात्पुनः प्रकृतिभ्यो रत्नादिदानमुच्यते

आदानमप्रियकरं दानं च प्रियकारकम् ॥
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ॥ २०५ ॥

औदेयस्याप्रतिपादनं नवस्य राज्ञोऽन्यस्य वाऽप्रियकरमप्रीतेः कारणं हेतुः ।

---

१ ण–परिमाणश्च । २ फ–कार्यकालेन । ३ ण–क्ष–व । ४ ण–क्ष–अदानं । ५ ण–क्ष–अदेयस्य ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दानं च प्रतिदानं प्रियकारकमेतदुभयं बहुश एवं प्रसिद्धमपि कालयुक्तं कालोपपन्नं क्रियमाणमभिमतानामर्थानां सुखावहं भवेदन्यथा च दुःखयतीत्यर्थः ।

प्रशस्यते यस्मादपि कचित्काले किंचन प्रीतिं जनयति तदाऽपि नाल्पमशोभनं वा प्रीतिमुत्पादयति तस्मात्कालमपेक्ष्य दानादाने कार्ये इति ॥ २०५ ॥

यत्किंचिदतिक्रान्तं वक्ष्यमाणं किञ्चन तत्

सर्वं कर्मेदमायत्तं विधाने दैवमानुषे ॥
तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया ॥ २०६ ॥

समर्थादर्थकर्मकार्यफलं **कर्म** तत्सर्वमशेषमायत्तमाधिकं कापि विदधातीति **विधानं** कर्मफलं यद्दिशति तद्विशेषयति । **दैवमानुषे** दैवधर्मादौ पूर्वकृतविहितप्रतिषिद्धविषये चात्मनः कार्यकर्मफलं यदि फलकर्मक्रिया दृष्टार्था नयानययोः । तथा च **श्रुतिः** "विधिर्विधानं नियतिस्स्वभावः कालो ब्रह्मेश्वरः कर्म दैवं भाग्यानि पुण्यानि भूतांतर्योगपर्यायनामानि पुराकृतस्य ।" **स्मृतिरपि**

"दैवमात्मकृतं विद्यात्कर्मवत्पौर्वदैहिकम् । स्मृतः पुरुषकारस्तु क्रियते यदिहापरम् ॥" इति ।

दैवमानुषस्येति प्राप्ते मृतवशाद्दैवे मानुषस्यापि कारणता विवक्षिता । अस्मिन्कार्य इदं सर्वं क्रियाफलमायत्तं न दैवं पुरुषकाररहितं फलं ददात्यवश्यं हि तेन पुरुषप्रयत्नोऽपेक्षितव्यः । न च पुरुषकारो दैवेनेति दैवाच्च पुरुषकारनिरपेक्षात्फलस्यापि पुरुषसन्निपातो भवेदपि गर्भस्य असति गर्भे नियमैर्दैवसन्निपातात्फलसंभवोऽनुमेय एवं पुरुषप्रयत्नादपि यदि दैवनिरपेक्षा स्यात् यतो व्यायामे सति सर्वदा सर्वेषां स्यान्नैतदस्ति तस्मादुभयं कारणम् । तथा च **व्यास** आह (महाभारते. सौ. प. २।२)

*"आरम्भा मानुषाः सर्वे निदानं कर्मणोर्द्वयोः । दैवे पुरुषकारे च परतोऽन्यन्नविद्यते॥"इति ।

समानतन्त्रेऽपि " दैवं नयानययोर्मानुषं कर्मलोकं पालयति " इति ।

अत्र दैवकारणा आहुर्दैवमेवात्र कारणं दृश्यन्ते हि जडक्लीबपङ्ग्वादयः पुरुषकाररहिता अपि सुखिनो निष्प्रतीकारा अन्योपाधिककर्मलभमानास्तथालंप्रतीकारा अपि कुणयोऽव्यङ्गशूराः प्रवीणाश्च शास्त्रे दक्षाश्चादुःखिनो यतमानाश्च तथा पुरुषकारनिरपेक्षं दैवमात्राभिधानादिनाशविनाशविनिपातादिभिरिष्टानिष्टफलमुत्पाद्यमानमुपलभन्ते । एवं च कृत्वा परलोकहेतवः क्रियारम्भोपदेशात्सुतरामर्थवन्तो भवन्ति । तथा च यत्नेन पूर्वकृतानी-

१ ण–स्थाने । २ ण–दृश्यतो । * " आवद्धामानुषाः सर्वे निबद्धा " इति भारते पाठः ।

For Private And Personal Use Only

ह्युपभुञ्जीमह इह कृतान्यपि परत उपभोक्ष्यामह इति विजानन्तो विचिकित्सा मनुष्यधर्मे एवं प्रयतितव्यम् । तथा चोदाहरन्ति

" जानामि धर्म्मं न च तत्करोमि । पापं न जानामि न मे प्रवृत्तिः ॥

" धात्रा निसृष्टोऽस्मि यथा तथाऽहं । नातःपरं शासयिताऽस्ति कश्चित्" ॥ इति । पुरुषकारिणो ह्याहुः । पुरुषकार एवात्र कारणं कृषित्वमनलसः कुर्वन् स्वव्यापारफलं कर्तृकरणकार्यकृष्यादिषु प्राप्नुयात् । तथा चोक्तम्

"कर्म्मैवेहानसाधूनामारभ्यानुपसेविता । कर्म कृत्वा हि पुरुषो भुङ्क्ते वै बलवानिति ॥" सत्यपि चान्नसंभवे न ह्यभुञ्जन्तस्तृप्यन्ति तदा तत्र चाभ्यवहारैर्यत्समनन्तरं च फलं तन्निमित्तफलोत्पाद इति न्यायस्तस्मादत्राहष्टव्यापारः एवं च कृत्वाऽर्थवन्तः क्रियारम्भोपदेशो भवति । तथा चाहुः

'प्रतिहन्ति मुनिर्येन दैवमापतितं कचित् । शीतोष्णे च तथा वर्षमुत्थापयति हन्ति च ॥"

एवमास्थितेभ्य उभयं कारणमन्यतराभावे फलाभावात् कचित्तु केचित्प्राधान्येन वर्तेत इति तत्परिगृह्यते । कृतोऽपि पुरुषकारो बलवता दैवेनाभिभूतो विशीर्यते आर्द्रमिव दार्वल्पाग्नौ प्रक्षिप्तं न ज्वलति । एवं यदि दुर्बलं दैवं महता यत्नेन पुरुषकारेण पुरस्कृतं फलत्यार्द्रमपि दारु महत्यग्निस्कन्धे प्रक्षिप्तं नाग्निस्तदैव यापयति

"दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते । दैवेन चेतनं कर्म विशिष्टेनोपहन्यते" ॥ इत्येव परिकल्प्याह

तयोर्दैवपुरुषकारयोर्दैवमेवाचिन्त्यं । तुशब्दोऽवधारणार्थः । अपरिज्ञातस्वरूपं कस्मिन्काले तन्निमित्तेन फलं दास्यतीत्येवमचिन्त्यं शास्त्राहते चास्य परिज्ञानादेवाविचार्यत्वात्प्रयोक्तुमशक्यत्वादशक्यमिति । तत्र दैवं निष्फलं मनुष्येषु पुरुषकारो यक्ष्यते क्रियाप्रकृतत्वात् । वित्तं च **क्रिया मानुषे** किञ्चिद्ज्ञानं कृष्यादिभिः शक्यं चिन्तयितुमीदृशं मया कृष्यादि कर्तव्यमेतैः साधनैर्दैवादिभिरेव च तस्य चेदृशं फलमिति । तदेव प्रारब्धं यदारंभमध्यावसानेषु विवक्ष्यते तदैवं समाधेयं न विपन्नानामप्येवं कर्त्तव्यमिति । यावत्फलवेदनमित्यतो दैवस्याचिन्त्यत्वान्न तत्परेणासितव्यम् । मनुष्यकर्म चिन्तयित्वा यद्यत्कार्यं तदनुष्ठेयं यत्किञ्चनकारी हि विनश्यतीति शक्तित्रययोगात्पुरुषकारेण च युक्तस्य पराराष्ट्रविजयचिकीर्षा यत्र दैवमानुपसंपन्ना भवति सैव सर्वार्थसाधिका भवति । तथापि

२ फ–प्रयातितव्यम् ।

तस्यामतिशयं दैवं प्रवर्त्तते । अतिरिक्तः पुरुषकार एव भवतीत्यर्थः । न हि विजिगीषोर्दैवमन्तरेण तदा यातव्यस्य व्यसनं दैवं मानुषं भवति । पौरुषं समं दैवेन नातिन्यूहं द्वयोर्वा समं तुल्यम् ॥ २०६ ॥

किंच

दैवेन विधिना युक्तं मानुष्यं यत्प्रवर्तते ॥
परिक्लेशेन महता तदर्थस्य समाधकम् ॥ २०७ ॥

तदयुक्तं । दैवे च विधानेन पराङ्मुखे[1] दैवमानुषे[2] पुरुषकारः प्रवर्त्तते अष्टविधकर्मणि तन्महता क्लेशेनार्थं फलं साधयति निष्फलं वा भवत्यतः क्लेशेनाप्यसिद्धो वा दैवापेक्षो भूत्वा न परितुष्येत् । पुरुषार्थस्तु दैवेन संयुक्तो यः प्रवर्त्तते अक्लेशेन स सर्वेषां मन्त्रार्थानामेव साधकः पुरुषार्थकः पुरुषकारः । स एव यदाऽऽत्यन्तगुणदैवेऽनुष्ठीयते तदा क्लेशेन विनैकान्तेन समग्रफलसाधको भवति । अस्य दार्ढ्यार्थमुदाहरणं श्लोकद्वयेन

"केचिच्छुद्धमपि क्षेत्रं युक्तं पुरुषकर्मणा । दैवहीनाय तु फलं कस्यचित्संप्रयच्छति ॥ "केचित्क्षेत्रस्य भूतै[3]मित्युक्तं पुरुषकर्मणा ॥" पुनःपुनर्दृष्टेषु शोधितं यथावचोक्तमित्याद्युपकारकलक्षणेन दैवेन हीनाय फलं न ददातीति ॥

संयुक्तस्यापि दैवेन पुरुषकारेण वर्जितम् ॥
विना पुरुषकारेण फलं क्षेत्रं प्रयच्छति ॥ २०८ ॥

संयुक्तस्यापि दैवेनेति । दैवयोगस्तु तस्मात्फलादानादनुमीयते । एवं च सर्वस्य तदाभावः दैवभावः । अन्ये त्वाहुः । दैवं यथाकालं पर्याप्तं दृष्टाद्युपलम्भादेव कृतत्वान्न कृतमिति यथा तत्पुरुषकाराभावं दर्शयति बीजवर्जितमित्यबीजम् ॥ २०८ ॥

चन्द्रार्काद्या ग्रहा वायुरग्निरापस्तथैव च ॥
इह दैवेन साध्यन्ते पौरुषेण प्रयत्नतः ॥ २०९ ॥

चन्द्रार्कास्तावद्ग्रहाः ।

सह वाऽपि व्रजेद्युक्तः संधिं कृत्वा प्रयत्नतः ॥
मित्रं हिरण्यं भूमिं वा संपश्यंस्त्रिविधं फलम् ॥ २१० ॥

पार्ष्णिग्राहं च संप्रेक्ष्य तथाऽऽक्रन्दं च मण्डले ॥
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् ॥ २११ ॥

---

१ ग–खं । २ ग–पं । ३ ग–भृतये ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते ।।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ।। २१२ ।।
धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च ।।
अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते ।। २१३ ।।
प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च ।।
कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः ।। २१४ ।।
आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता ।।
स्थौललक्ष्यं च सततमुदासीनगुणोदयः ।। २१५ ।।

पुरुषाणां प्रकृतधर्माधर्मसंज्ञकेन दैवेन सुखदुःखोपभोगनिमित्तं साध्यते । अनिष्टस्थानप्राप्तिश्चापौरुषेण शान्त्यादिकारणप्रकारेण समतामापद्यन्ते । इह स्थानस्थिता अव्यभिचारानुगुणाः क्रियन्ते । पुरुषज्ञानलोकज्ञानपुरुषविशेषज्ञोऽनुरूपमुपकारी भवति । अनुवर्तते शूरः कार्यक्षमो भवति । कारुण्यगुणसमयेन करुणावेदी दयालुमना लोभेन परिरक्षति । **स्थूललक्षः** प्रभूतस्याप्यर्थमेषां सर्वकालं क्षमते ।। २१५ ।।

क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि ।।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ।। २१६ ।।

तादृशीमपि भूमिमविलम्बमानः **परित्यजेत्** । **क्षेम्या** आटविकादिभिरनभिभवनीया । नित्यमस्य प्रधानमुभयं बहुसस्याऽदेवमातृका च पशुवृद्धिकरी च जाङ्गलरूपत्वादबहुफलपत्रतृणत्वाच्चैवंगुणा हि भूमिर्वणिक्कृषीवलबहुला भवति दुर्भिक्षव्याधिरहिता कान्तारमनुष्यात्मभरणा चेति चतुर्थ्याप्रकृतिपरित्यागे चोभयं न ततो ज्ञापयति न सहसायुधानां प्रकृतिं परित्यजेत्तस्यामवस्थायां किन्तु तां परित्यनेद्या मन्येत साक्ष्ये शेषां प्रकृतिभिः प्रत्यादातुमिति यथा तु न मित्रकोशदण्डपरित्यागे नाविशेषं प्रतिक्षणं यां मन्येत तदा गुणवतीमपि भूमिं त्यजेत् ।। २१६ ।।

आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ।। २१७ ।।

कृच्छ्रप्रकारसाध्योऽयं नियमो भवति । **आपदर्थे** यथा मशकार्थे धूमो मशकानपनेतुमिति ज्ञायते तन्निमित्तं धनं रक्षेन्नान्यत्र धनरक्षायाः कार्यमस्ति । तत्त्वभुक्तफलं हि धनमिति । तथा हि तेन प्रतीक्ष्ययानमासनं दण्डं बिभर्त्ति । उपजप्यानुपगृह्णातीति । धनेनापि दारा रक्ष्याः । दारग्रहणं प्रणिधिसंबंधिप्रत्युपलक्षणार्थम् । आत्मा तु रक्ष्यः ।

---

१ ण–समानापद्यते इष्टस्थान । २ क्ष–दा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्येन प्रकारेणात्मानं रक्षितुमसमर्थः सर्वस्वं दत्वा दारानपि काले परित्यज्य नाग्यतस्थितो दारधनादि वर्जयित्वा धर्मं करिष्यति । ये तु धनदारानुरोधेन विनश्यन्ति न तेषां धनदारादि दृष्टं नाप्यदृष्टं धर्माधर्मानाचरणात् । न च कौमारदारत्यागित्वम् । न त्यागप्रतिषेधस्यायं च वा जयति राजधर्मप्रकरणेऽपि नायमुक्तो दृष्टार्थत्वादन्यस्यापि द्रष्टव्यः ।

ननु च राजा राज्यं प्राप्य महाधनोऽश्वमेधादि करिष्यत्यतुलं च सुखमनुकरिष्यत्यतस्तु लोकः संक्रुष्टं किं करिष्यति नैष दोषोऽल्पस्यापि पावनानि कर्माणि सन्त्यधनस्यापि जपादयः विशेषनिमित्तानि धनान्येव न चेदमस्यामवस्थायां लोकसंक्रुष्टमिति न च सहसैतत्कार्यम् ॥ २१७ ॥

यतः

सह सर्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम् ॥
संयुक्तांश्च वियुक्तांश्च सर्वोपायान्सृजेद्बुधः ॥ २१८ ॥

आपदो दैवमानुषाणि व्यसनानि तानि प्रकृतिविषयाणि युगपदुपजातानीत्यर्थमपि यथा स्युस्तथा **संयुक्तांश्च** सामपुरस्सरं दानं सामपूर्वकं भेदं सामदानभेदसहितं दण्डमेव वा दानमेवेत्यादिकान्सर्वोपायान्विसृजेद्बुध इति । यत्र यत्प्राप्तं तत्समीक्ष्य विचार्य प्रयुञ्जीतेत्यर्थः । न तु विषण्ण आसीत ॥ २१८ ॥

कथमित्यपेक्षायामाह

उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः ॥
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ॥ २१९ ॥

साधयेत्कार्यमात्मन इति पाठान्तरम् । **तत्रोपेतारमा**त्मानं प्राप्य कार्यं मित्रवत्साधयेत । **सर्वोपायाः** समस्तव्यस्ता एव । अयमपि उपेयसामान्यनिर्देशमाह । **समाश्रित्या**ङ्गीकृत्य **समर्थचिन्तनेनैतत्समावृतं** भवति । किमर्थमुपायाः समर्थेनामुमताः समर्थस्तथा किंयुक्तमिति विचार्येयता केनोपायेनैषामिदं प्राप्नुयादिति । **कृत्स्नश** इति त्रयविशेषणं कृत्स्नमित्यर्थः । एवं च यो यदुपायसाध्यो यदा यथा युक्तस्तत्र तदा तथा प्रयुञ्जीत स्वकार्यसिध्यर्थं उपाय एतानामवस्थानां चानन्त्यात्सर्वं तन्त्रेणाशक्यं वक्तुमिति समासेनोक्तमतः परीक्षामुपाचरेत् । उपेत्य विशेषमावतोऽप्याह

"स तु युक्तो हि संवृत्ते युक्त आत्मपराक्रमः ॥
तावुभौ नयसंपन्नौ स्तेनोऽप्ययसमन्वित" ॥ इति ॥ २१९ ॥

---

१ ण–जापादयः । २ फ–सर्वोपायाः । ३ फ–सदा ।

७०

For Private And Personal Use Only

द्वितीयो भागो

एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः ॥
व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् ॥ २२० ॥

एवं यथोक्तं राजा वृत्त**मिदं सर्व**मापद्यनापदि वाऽऽत्मशक्त्यपेक्षया वा कस्यामवस्थायां किं कर्त्तव्यमिति **मन्त्रिभिः सह** विचार्य मध्यंदिनमुक्तकालं मध्यंदिनं **व्यायामं** कृत्वोपचार्य स्नानं च स्नानमक्रमोक्तमपि पुना राज्यार्थमुच्यते मङ्गलाचारे युक्तानाम् । राजा स्नानपरिग्रहार्थं भोजनादियुतं तद्गृहे पूर्वं स्नानापेक्षयाऽ**न्तःपुरं** यायादिति विशेषार्थोर्थमुपसंहारः । विविक्ते देशे ॥ २२० ॥

तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः ॥
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥ २२१ ॥

तत्रान्तर्गतगृह आत्मरक्षाभूता आत्मसमाः **कालज्ञा** वयोविशेषावस्थादिप्रतिनियतकाले भक्ष्यभोज्यदानादिविशेषज्ञाः । **अहार्या** अभेद्या विश्वसनीयाः । **परिचारकाः** स्वरवैद्यादयः । एतैर्गृहीतं सर्वं **परीक्षितमदनीयमन्नाद्यमद्यात्** । परीक्षा कुशलैर्वैद्यैरग्निचकोरादिभिः कर्तव्या । विषादिसंसृष्टस्य शुष्कस्याशुद्धता भवति वैवर्ण्यैः सुगन्धोपघातश्च अतिम्लानताऽग्नौ प्रक्षिप्तस्य वेति । वेति शब्दः वैवर्ण्यज्वालासु ईक्षिते च तस्मिन्वयसां विपत्तिः । दर्शनेन म्रियते यत्र कोकिलः ग्लायति जीवं जीवकः चकोरस्याक्षिणी विनश्यतो विषं प्रदर्श्यापि भवति शुष्कस्यावग्रहः स्वेद इत्यादिमन्त्रैश्च **विषापहैः** परिजपेद्व्यापादिकासु ॥ २२१ ॥

विषघ्नैरगदैश्चास्य सर्वद्रव्याणि योजयेत् ॥
विषघ्नानि च रत्नानि नियतो धारयेत्सदा ॥ २२२ ॥

विषघ्नैरुदकैश्चास्य **सर्वद्रव्याणि** राजौपयिकानि वस्त्रादीनि विशोधयेत् । **विषघ्नानि रत्नानि** गरुडोदीर्णनागदमणिप्रभृतीनि **नियतः** प्रत्यये नित्यं भोजनकालादन्यदाऽपि **धारयेत्** ॥ २२२ ॥

परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ॥
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥ २२३ ॥

परीक्षिता विचारिता उपधाभिः शीलशौचाचारैः **स्त्रियो** दास्यः परिचारिका **व्यजनोदकधूपनैः** करणभूतैः **संस्पृशेयु**रुपचरेयुर्वेषादिसंयुक्ताः सुवेषाः । स्नानेन कृत्वा **समाहिता** अप्रविक्षिप्तमनसः वेषाभरणं कपटवेषः केशनखाद्येवं विचार्य कदाचित्तत्रायुधानि कृत्वा विश्रब्धं हन्युः आभरणानि च विषदिग्धैराभरणैः स्पृशेयुरिति ॥ २२३ ॥

---

१ ण–भूत ।

एवं प्रयत्नं कुर्वीत यानशय्यासनाशने ॥
स्नाने प्रसाधने चैव सर्वालङ्कारकेषु च ॥ २२४ ॥

एवं विषोदकाञ्जनादिनादौ **प्रयत्नं कुर्यात्** । **स्नानं** शिरःस्नानं । गन्धो रोचनादि । आसनमत्र प्रदर्शनार्थम् । तत्र ह्युपविष्टो यथा तत्र महान्यत्नः क्रियते एवं यानादावपि कर्तव्यः ॥ २२४ ॥

भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् ॥ २२५ ॥

तस्मिन्नेवान्तर्गृह आत्मविनोदाय **स्त्रीभि**र्नवोढभार्यादिभिर्यथासुखं क्रीडेत । **यथाकाल**मिति यावद्विहरणकालमिति चोत्तरेण संबन्धनीयम् । **विहृत्य** विश्रान्तः कालोपपन्नानि **कार्याण्ये**काकी मन्त्रिभिश्च सह पुनर्विचारयेत् ॥ २२५ ॥

अलङ्कृतश्च संपश्येदायुधीयं पुनर्जनम् ।
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥ २२६ ॥

अन्तःपुरान्निष्क्रम्यालंकृत **आयुधीयं** पश्येत्तस्याच्छायिकां दद्यात् । **पुन**रिति वचनात्पूर्वाण्हे दृष्टमपि नित्यं दर्शनीयम् । आयुधजीविनामायुधादौ यत्नो भवति । **सर्वाणि च वाहनानि** । तेषां दर्शनमप्युपचयविज्ञानार्थं नियुक्तानां च तत्र विशेषाधानार्थं दण्डप्रधानं जीविभृत्यावेक्षणमभीक्ष्णमुभयतस्ततः ॥ २२६ ॥

संध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् ॥ २२७ ॥

त्रैवर्णिकस्योक्तमपि सन्ध्योपासनमुच्यते । प्रजाकार्ये पुनः कश्चित्कालमतिक्रामेदिति । उत्तरक्रियानन्तर्यार्थं वा **अन्तर्वेश्मनि रहसि** प्रासादादौ भवं **तस्याख्यायिनः** पौरा वा केचित्प्रासप्रणिधयस्तेषां **चेष्टितं** चेष्टा व्यवहारः । किं दृष्टं श्रुतं कृतं चेति तेषां चास्मिन्काले दर्शनमिष्यते । पौरैरनवबोधनार्थं स्वस्थस्य चार्थकार्यकालनियमेनापतितं वर्तेत । "यथा चोत्पादितं कार्यं संपश्येन्नोऽभितापयेत् । कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वाऽपि जायते" इति ॥ २२७ ॥

गत्वा कक्षान्तरं त्वन्यत्समनुज्ञाप्य तं जनम् ।
प्रविशेद्भोजनार्थं च स्त्रीवृतोऽन्तःपुरं पुनः ॥ २२८ ॥

तस्माद्गृहान्ते **कक्षान्तरं गत्वा तं** च रहस्याख्यायिनं विसृज्य स्त्रीभिः परिचारिभिः परिवृताभिरन्तःपुरं **पुनः प्रविशेत्** ॥ २२८ ॥

---

१ क्ष–रैः । २ फ–ण । ३ क्ष–स्वव्यवहारः । ४ क्ष–नित्ययमेनापि– । ५ क्ष–भोजनार्वै ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥ २२९ ॥

किंचिदित्यव्ययं तूर्याणि वेणुवीणापणवमृदङ्गभेरीशंखादीनि तेषां घोषैर्मृदुभिः श्रुतिसुखैः प्रहर्षितो यथाकालं संविशेद् उचितकालस्तं तन्नयेदिति । गतक्लमो विगताशेषदुःखः कार्यदर्शनायोत्तिष्ठेत् ॥ २२९ ॥

एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः ॥
अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत् ॥ २३० ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां राजधर्मो नाम सप्तमोऽध्यायः॥७॥

एतदिति यदनुक्रान्तं "मध्यंदिनेऽर्धरात्रे वेति " तस्याप्येवंवृत्तं व्यापारस्तेन स्वयमुपतिष्ठेदस्वस्थो भृत्येषु विनियोजयेद्वियुञ्जीतेत्यर्थः । यावच्छक्नुयात्तावदेव । एवं प्रतिविहितस्वतन्त्रकृतात्मरक्षाव्यापारः प्रजामात्मनश्च कार्यं करोति ॥ २३० ॥

इति श्रीभट्टवीरस्वामिसूनोर्भट्टमेधातिथिकृते मनुभाष्ये सप्तमोऽध्यायः ॥
॥ शुभमस्तु ॥ श्रीरामचंद्राय नमोनमः ॥

१ क्ष–प्रहर्षिभिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ अष्टमोऽध्यायः प्रारभ्यते ॥

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ॥
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥ १॥

प्रजानां पालनं राज्ञो वृत्तिर्विहिता । सा चात्र (अ. १० श्लो. ७९)

"शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषीर्विशः। आ जीवनार्थं शूद्रस्य द्विजातीनां निषेवणम्" ॥

"एवं नृपो वर्तमानो लोकानाप्नोत्यनुत्तमान् ॥" इति । तथा धर्मो वर्धते लोके। अन्येषामपि वर्णानां क्षत्रियवृत्त्या जीविनामस्त्येव राज्याधिकारः

"यः कश्चित्सर्वलोकानां पालकश्च नृपः स्मृतः । कर्मनिष्ठा च विहिता लोकसाधारणे हिते" ॥

परिपालनं च पीडापहारः । द्वयी च पीडा दृष्टाऽदृष्टा च। तत्र दुर्बलस्य बलीयसा धनहरणादिना बाध्यमाना[1] दृष्टा पीडा। इतरस्य तु विध्यतिक्रमजनितेन प्रत्यवायेनामुत्रिकदुःखोत्पादनमदृष्टपीडा । प्रजा हि द्वेषमत्सरादिभिरितरेतरमयथावदाचरन्ति कुपथेन यान्त्यदृष्टदोषेण बाध्येरन् । अतश्च राज्यनाशः । प्रजैश्वर्यं हि राज्यमुच्यते । तासु विनश्यन्तीषु कस्य राज्यं स्यात् । व्यवहारादयोऽतः शास्त्रदण्डेन व्यवस्थाप्यमाना न भयात्पृथक् प्रचलन्ति तथा चोभयथाऽपि रक्षिता भवन्ति। धनदण्डश्च[2] राज्ञः करशुल्कादिवैतदन्यधर्मिष्ठजीविका न भवतीति वृत्तिपरिक्षयादपि राज्यावसादः । अतो राज्यस्थित्यर्थं व्यवहारदर्शनं कर्तव्यम् ।

तदिदानीमुच्यते। व्यवहारश्चात्र वादिप्रतिवादिनोरितरेतराशनैधाराय[3] वृत्तिरुच्यते। अथवा ऋणादानादयः पदार्था एव विप्रतिपत्तिविषयाः सन्तो विचारगोचरसमर्थतया कर्त्तव्या

---

१ "बाधा या सा" इति "बाधमानस्य" वा समीचीनः पाठः। २ ङ-फ-धनदश्च
३ ख-ङ-क्ष-शतोधाराय ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । दिदृक्षुरित्युक्त्वा 'पश्येत्कार्याणीति' (श्लो० २) सामानाधिकरण्यम् । पुनश्च प्रत्यवमर्शः 'तेषामाद्यमृणादानामिति' (श्लो० ४) तान् पदार्थान्विचारयेदिति संबन्धः । वक्ष्यमाणाधिकृतपुरुषाधिष्ठितः प्रदेशः **सभा** । **प्रवेश**स्तदभ्यन्तरभावः । किमेक **एव** प्रविशेचेत्याह **ब्राह्मणैः सहे**ति ।

अथ **मन्त्रज्ञै**रिति कस्य विशेषणं न तावन्मन्त्रिणो मन्त्रित्वादेव सिद्धेः । न हि मन्त्रमजानानो मन्त्रीति शक्यते वक्तुम् । नापि ब्राह्मणानां व्यवहारदर्शनेऽधिकृतानां तत्परिज्ञानमदृष्टं न स्यात् । अत्रोच्यते । ब्राह्मणविशेषणमेवैतत् । ते ह्यमन्त्रज्ञा भूत्वा निरपेक्षमवधारयन्तः स्युरन्यथा राज्ञोऽनर्थमावहेयुः । तथा हि महामात्याश्रितः कश्चिज्जनपदेन व्यवहरन्सहसा जितो यदि न दण्ड्यते धनं वाऽवष्टभ्य न दाप्यते तदा समत्वेन व्यवहारदर्शनं न कृतं स्यात् पक्षपातमशक्तिं वाऽस्य जनपदा मन्येरन् । अथ दण्ड्यते महामात्यक्षोभादपि प्रकृतिविकृतं स्यात् । मन्त्रज्ञास्तु सन्तः संशयितारो यदि निर्णेतव्यस्य केनचिदपदेशेन प्रसङ्गरोधं कृत्वा रहसि राजानं परिबोधयन्ति 'अनयोर्विवादिनोरयं जीयतेऽयं जयतीति व्यवहारस्त्वस्माभिर्न तदानीमेव निर्णीत इति स्वामी प्रमाणं' तत्र राजैवं विदित्वा महामात्यमादेशयति "त्वदीयो मनुष्यो जीयते मम हानिर्मा भूदिति संप्रति निर्णयोऽवधारितः । त्वमेव तथा कुरु यथैष मनुष्यः संधीयते बाधाऽस्य व्यपनीयते" । ते मन्त्रिणो वाऽऽदेयवाक्या मनुष्याणां सर्वेषामनर्थ्यां च प्रवृत्तिं प्रतिबध्नन्ति ।

अन्ये तु काकाक्षिवदुभयविशेषणमर्थभेदेन मन्त्रज्ञपदं मन्यन्ते । यदा मन्त्रिणो विशेष्यन्ते तत्तद्धा तु तत्परिज्ञानमन्त्रज्ञानम् । ब्राह्मणपक्षे तु कार्यार्थिसमभावश्च । मन्त्रिब्राह्मणानां न प्रवेशमात्रमेव किन्तर्हि 'निर्णयं पश्येत्' इत्युत्तरत्र वाक्यानि यथायोग्य इतरथाऽदृष्टाय प्रवेशः स्यात् । अतो नैकाकी निर्णयं कुर्यात्किन्तर्हि तैः सह निरूप्येति ।

विनीतो वाक्पाणिपादचापलरहितः । वेषतो ह्यनर्थः स्यात् । **पार्थिव**ग्रहणान्न क्षत्रियस्यैवायमुपदेशः किन्तर्ह्यन्यस्यापि पृथिव्यामधिपतेर्देशेश्वरस्य न ह्यनथा राज्यमविचलितं भवतीति ॥ १ ॥

तत्रासीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम् ॥
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् ॥ २ ॥

---

१ ङ-मन्त्रियो वाक्य- । २ ख-ङ-क्ष-उभयविशेष विशेषणम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आसीनो धर्मासनोपविष्टः । स्थितो निषिद्धगतिरनुपविष्ट एव । स्थानासनयोश्च व्यवस्थितो विकल्पः कार्यविशेषापेक्षः । गरीयसि कार्ये बहुवक्तव्य उपविष्ट आसीनः लघीयसि स्वल्पवक्तव्ये स्थितः । क्रममाणस्य सर्वथा प्रतिषेधः । स हि मार्गावलोकनपरो नार्थिप्रत्यर्थिनोर्निपुणतो वचनमवधारयेत् । अन्ये त्वदृष्टार्थं तथा मन्यन्ते । तपस्विवृद्धब्राह्मणादिषु विवादिषु स्थितेषु स्थित आसीनेष्वासीनः । **पाणिमुद्यम्येति** उत्तरपाणिमुद्धृत्योत्थानं कृत्वेत्यर्थः।सूत्रकृतोऽयं व्यतिक्रमः सर्वदा विहितत्वाद्धसनोपव्यानमेतत् । तेनायमर्थो हस्त उत्क्षेप्तव्यो न पुनः समीपवर्तिनि संलग्नः कर्तव्यः । प्रश्ननिषेधावसरे च तेनाभिनेतव्यं न तु प्रव्याणादिना । अनेन व्यवहारदर्शनेन तात्पर्यं ख्यापितं भवति । प्रायेण हि पुरुषकार्येषु प्रयत्नवन्तो हस्तमुद्यच्छन्ति । यथासुखोपविष्टं व्रजति कर्तारं ततश्च परिजने तदेतद्राजा वित्तं न ददाति सभ्यैर्निर्भयैर्वयं जिता इति । पाणिग्रहणं बाहूपलक्षणार्थम् । केवलस्य हि हस्तस्य यावद्व्यवहारदर्शने व्यापारणं पीडाकरम् । न चायमदृष्टार्थ उपदेशः ।

विनीतवेषाभरण इति पूर्वश्लोके बाह्याभ्यन्तरेन्द्रियविषयावधानार्थोऽभिहितः श्वगणानां शालीनतया मुखोपसर्पणार्थं उद्धतवेषे हि रजोनिवृत्तिलक्षणया तथाविधानामप्रतिपत्तिः स्यात् । अत उद्धतवेषाभरणं न कथंचित्केशवसनविन्यासादिविशेषः । **आभरणं** कर्णिकादि । तत्रोद्धतवेष ऊर्ध्ववस्त्रो जवनरक्ताम्बरधारितेत्यादि उद्धताभरणो दीप्तिमद्बहुरत्नालङ्कारो बव्हाहारश्च स ह्यादित्य इव दुर्निरीक्ष्यः सामान्यजनानां विशेषतोऽभियुक्तानाम् । **पश्येदिति** । सभाप्रवेशस्य प्रयोजनमाह । पश्येद्विचक्षणः ।

अयं च राज्ञो दर्शनापदेशो दण्डप्रणयने यथास्थानार्थप्रतिपादनपर्यन्तो भविष्यति । तात्पर्यं तस्यैव रक्षाधिकारः प्रयुक्तः स्यात् । ईदृशस्य च दर्शनस्यान्येषामसंभावनादनधिकारः । सर्वेषां संशयच्छेदमात्रम् । फलं तु व्यवहारदर्शनं प्रायश्चित्तोपदेशवद्विदुषो ब्राह्मणस्यास्त्येव । उक्तं हि 'धर्मसंकटेषु ब्रूयादिति' तथैकवर्गाणां वणिज्यकर्षकपशुपालप्रभृतीनां स्ववर्गसामायिकार्थविप्रतिपत्तावन्यस्यां वोत्सुकनिर्णयादूतिरिति तथाविधव्यवहारदर्शने नियोगः । तथा हि पठितम् (ना. स्मृ. प्र. ७)

"कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः । प्रतिष्ठा व्यवहाराणां गुर्वेभ्यस्तूत्तरोत्तरम्" ॥ इति ।

तत्र कुलानि बन्धुजनसमूहः । तैर्या व्यवस्था कृता ततो न विचालितव्यम् । अथ तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताश्च स्युस्तवैतेऽधिकतरं संबन्धिन इति वदद्भिस्तु ततः श्रेणिषु निवेदितव्यम् । श्रेणयः समानव्यवहारजीविनो वणिक्प्रभृतयः । तेषां बन्धुभ्योऽधिकगुरुत्वम् । बान्धवादिज्ञातिधर्मभयाद्विचलितुं न नियच्छन्ति । श्रेणयस्तु राजगमनेन श्रेणिधर्मो राजपुरुषप्रवेशात्परिभवनीयत्वेन नश्यतीति । अविचलनार्थं प्रतिभूग्रहणपूर्वकं विचारयन्ति य एतस्माद्विचलन्ति । परिषदि दण्डो दातव्यश्चलितुं वाऽपि त्वया न देयमिति । गणा गणशश्चारिणो गृहप्रासादादिकरा मठब्राह्मणादयश्च । ते स्वगणिनां व्यवहारं न पश्येयुः । तत्राविचलार्थं उपसदः कर्तव्याः । पूर्वे समानकर्मजीविन एकाकिनोऽपि इमे तु संभूयकारिण इति विशेषः । श्रेणिभ्यः संभूयकारितया विवादिनो भूमिज्ञत्वात् । अन्ये तु कुलानीति मध्यस्थपुरुषानाहुः । ते हि कार्याभ्यन्तरा अश्रेणिकृता एव निर्णेतारः ।

त्रैविद्यो विद्वान् ब्राह्मणस्तस्य हि धर्मसंकटेषु प्रवक्तृत्वं विहितम् । तस्य पूर्वेभ्यो गुरुत्वं वैदुष्यात् । नृपस्यापि गुरुत्वमतिशयशक्तित्वादतः स्वयं विदुषा नृपेण निर्णीते नास्त्येतत् (या. व. व्य. ३०६)

"मन्येताजितोऽस्मीति यो न्यायेनापि पराजितः।द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत्॥"इति ।

अन्येषु करणेष्वेतद्भवति । तत्र ह्यस्ति वचनावसरो नाधिकृतैः सम्यक् निर्णीतं राज्ञा तु विवेचिते किं वक्ष्यतीति ।

अर्थान्तरं नृपैरधिकृतो राजस्थानीयब्राह्मणः तथाऽन्यस्य गृहिणः । स्वतन्त्रस्तु गृहे गृहीति स्वातन्त्र्यसरणाद्दण्डपर्यन्तोऽस्त्येव व्यवहारः सुपरीक्षितो भवति । वासनाविनयार्थं श्रुतिग्राह्यप्रसक्तशिष्यसुताद्याः " अन्यत्र दण्डाच्छारीरात्पातनीयाच्च कर्मण " इति । स्वल्पेऽपराधे गृहस्थ एव राजायते । महति व्यतिक्रमे राजनिवेदनमेवोचितमित्यस्यार्थः । अतश्च यत्कैश्चित्पश्येदिति परिसंख्यार्थत्वमारोप्य ब्राह्मणादीनामधिकार आशङ्कितः पुनश्च क्लेशेन समर्थितस्तदयुक्तम् । विषयभेदादधिकारभेदात् । स्वविषयो हि राज्ञो दण्डावधिको ब्राह्मणादीनां निर्णयावधिः । अधिकारोऽपि भिन्नो राज्ञो राज्यस्थितिप्रयोजनम् । इतरेषा संशयच्छेदादेरपरोपकारकत्वं अतो नो वृत्त्याशङ्कैव नास्ति । कार्यो विप्रतिपत्तिनिरासोऽर्थिनां विप्रतिपन्नयोर्हि साम्यं व्यवहारदर्शने राज्ञा कर्तव्यम् । नो चेत्संविदाने को राज्ञः स्वाधिगमे निरोधः । कायकशुद्धौ हि श्वानिरोधवानिति वक्ष्यामः ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ॥
अष्टादशसु मार्गेषु निबद्धानि पृथक्पृथक् ॥ ३ ॥

पूर्वेणार्धेन निर्णयहेतवः कथ्यन्ते । उत्तरेण विवादपदसङ्ख्यानिर्देशः । 'पश्येदिति' पूर्वश्लोकादनुषज्यते कार्याणीति च । प्रत्यहं पश्येत्कार्याणि प्रतिदिवसगमने व्यवहारनिर्णयः कर्तव्यः । हेतुभिरिति हेतुर्निर्णयसाधनम् । स च द्विविधः । प्रमाणरूपो व्यवस्थारूपश्च । तत्र प्रमाणरूपोऽर्थनिर्णयहेतुः साक्ष्यादिः । व्यवस्थारूपो यतोऽसत्ये वाऽर्थनिश्चये व्यवहारः संतिष्ठते । यथा सत्यशपथ उभयानुमत एकः साक्षी यद्यर्थिप्रत्यर्थिभ्यामभ्युपगतप्रमाणभावः सभ्यैरपरिक्षितोऽपि निर्णयहेतुतां प्रतिपद्यते । न च परीक्षितस्य पुंसो वचनादसत्यात्पूर्ववदर्थनिश्चयः । प्राश्निकानामभ्युपगमेऽपि व्यवस्था हेतुर्भवति । सा च व्यवस्था द्विविधा । साधारण्यसाधारणी च । देशभेदाश्रयभेदात्साऽपि द्विविधा । अविरुद्धा विरुद्धा च । अविरुद्धा यथा केषांचिद्दाक्षिणात्यानामपुत्रा स्त्री भर्तर्युपरते सभास्थाणुमुपारोहति तमुपारूढाऽविकृतैरक्षपराहता कृतलक्षणा तत् सैवानन्तरं सपिण्डेषु कृच्छ्रं लभते । तथोदीचां लभ्यमानां कन्यां याचमानाय भोजनं यदि दीयते तत इयं तुभ्यं दत्तेत्यनुक्तेऽपि प्रतिश्रुता भवति । विरुद्धा च कश्चिद्देशे । वसन्ते धान्यं युज्यते शरदि द्विगुणं प्रत्यादीयते । तथाऽननुज्ञातभोग आधिर्द्विगुणेऽपि तदुत्थधने प्रविष्ट आ मूलहिरण्यदानाद्भुज्यत एव । एषा हि "अशीतिभागं गृह्णीयात्" "कुसीदवृद्धिर्द्वैगुण्यं नात्येतीति" (श्लो. १५१) विरुद्धा । तत्र भेदाश्रया देशैर्दृष्टहेतुशब्देनाभिहिताः शास्त्रदृष्टास्तु हेतवः शास्त्रे पठितास्ते च केचनशास्त्रकारैः कल्पितव्यवस्थाः केचिद्यथावस्त्ववस्थिता अनुदिताः । तत्र कल्पितव्यवस्था यथालेख्यं यथोपभोगः साक्षिणश्चानुमानं वस्तुनियतं "यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम्" (श्लो. ४४) इति यद्यपि सर्वं लौकिकं न शास्त्रकारवचनात्प्रामाण्यं भवति । तथा लौकिकमेव तस्मिन् कचिच्छास्त्रमाश्रयितव्यम् । या च यदीदृशे चापराध इदं दिव्यं इयता च कालेन भोगः प्रमाणमिति लौकिकमपि तच्छास्त्रदृष्टमित्युक्तम् । तस्यां च व्यवस्थायां शास्त्रकाराणां मूले संभवति सा प्रमाणम् । या त्वसंभवतन्मूला सा नादरणीया । यथा लेख्यकर्मपाठः (याज्ञव० स्मृ. व्य. ८८)

"उभयाभ्यर्थितेनैवं मया ह्यमुकसूनुना । लिखितं ह्यमुकेनैव लेखकस्ततस्ततो लिखेत ॥" इति । यस्यादावेव लेखकः स्वनाम निवेशयेदिदं नामाहममुष्यपुत्रो लिखामीदमिति न कश्चिद्दोषः स्यात् । स ह्येवमर्थं नाम निवेशयत्यनेनेदं लिखितमिति लेख्यकमुपलिखितं यथा स्यात् । यदि ह्यसौ लेखकः प्रमाणान्तरेण प्रत्ययितो भवति ततस्तल्लिखितं प्रमाणं । यदि चासावात्मानं स्वगोत्रनाम्ना नोपलक्षयेत्ततः कस्य प्रत्ययिता

१ ख-ङ-फ-क्ष-पूर्वार्धे । २ ख-ङ-क्ष- अर्थे । ३ ख-ढ-क्ष कृच्छ्रं । लभत-न लभते । ४ खढक्ष भेदाश्रयात् । ५ ख-ङ-क्ष प्रत्ययितता ।

[हिंसां यः कुरुते कश्चिद्देयं वा न प्रयच्छति ।
स्थाने ते द्वे विवादस्य भिन्नोऽष्टादशधा पुनः ॥ १ ॥]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणान्तरादन्विष्यताम् । अथ तु लेख्यान्तरदर्शनेनान्येन वा हेतुना विशिष्टलेखक इति प्रत्यभिज्ञानं स्यादनुपलक्षितोऽपि न कश्चिद्दोषः । तत्र यदि लेखको न लिखेन्मयेदं लिखितमिति भवेदेव तादृशं लेख्यं परिपूर्णलक्षणं एषा च लेखकपरीक्षा तत्रोपयुज्यते । पत्रलेखकस्य साक्षित्वान्तर्भावोऽन्येषां साक्षिणामल्पत्वात् । यत्र त्वन्ये बहवः प्रत्ययिताः साक्षिणः स्वहस्तारूढाः सन्ति तत्र लेखकसंबन्धिनी प्रत्ययिता नोपयुज्यते । तथेयमपरा व्यवस्था (नारदीये १।१४५)

"लिखितं लिखितेनैव साक्षिमच्चैव साक्षिभिः। साक्षिभ्यो लिखितं श्रेयो लिखिते न तु साक्षिणः"

नास्यामपि व्यवस्थायां किंचिन्निबन्धनमस्ति । तथा हि द्विविधं लेख्यं । स्वहस्तकृतं परहस्तकृतं च । परहस्तकृतमपि द्विविधं । स्वहस्तलेखकलिखितमाधिकृतलेखकलिखितं । तदेतत्परहस्तकृतं सर्वप्रकारं साक्ष्यात्मकमेव । तत्र साक्षिभ्यो लिखितमिति भेदानुपपत्तेः । इदं हि तस्य लक्षणम् (याज्ञव० स्मृ. ८७)

"साक्षिणः स्वस्वहस्तेन पितृनामादिपूर्वकम् । तत्राहममुकः साक्षी लिखेयुरिति ते समम्" ॥

इति नाप्येकहस्तलिखितस्य प्रामाण्यमिष्यते । यथैकस्य साक्षित्व अथायं भेदहेतुसाक्षिणो हस्तारूढास्त एव लेख्यमिति नानेन विशेषेण श्रेयस्त्वं भवति । प्रत्ययिता[1] हि श्रेयस्त्वे हेतुः । सा चोभयत्रापि परीक्ष्या । तस्मादीदृशे लेख्ये साक्षिद्वैध्यन्यायो[2] बहुत्वं परिगृह्णीयादिति । अधिकृतत्वमपि न विशेषः । परीक्षितोऽधिक्रियत इत्येतत्तत्राधिक्यम् । न च सर्वे राजाधिकृताः सुपरीक्षिता भवन्ति । यदि तु निरुपाधिस्तादृशश्चेदत्यन्तगुणयोगात्स्यादुपेयादेवासौ एक एव संवादकत्वम् । तथा हि राजाग्रहारशासनान्येककायस्थहस्तलिखितान्येव प्रमाणीभवन्ति । दातुः स्वाहस्तक्यं स्वयमभ्युपगमः । इयदस्मान्मया गृहीतमिदं चास्मै दातव्यमिति । तत्र यदि पश्चात् ब्रूते न गृहीतमिति तदा पूर्वनिबद्धं ब्रुवाणैर्जीयते । तत्र साक्षिणामवसर एव नास्ति ।

ननु च यदीयाल्लेख्यादभ्युपगतमेतदनेनेत्यवगम्यते । उत्तरकालं च स एवाह न गृहीतमिति । तत्रोभयोरभ्युपगमयोः केन हेतुना पूर्वेणोत्तरा बाध्येत न पुनरुत्तरेण पूर्वा । तुल्यत्वाद्विरुद्धत्वसंशयः । ततश्च प्रमाणान्तरव्यापारणमेव युक्तम् । भवेदेवं यदि तुल्यता स्यात् । न गृहीतमिति ह्यभ्युपगमो लोभादिनाऽपि संभवति । न त्वगृहीत्वाऽनुन्मत्तो गृहीतमिति ब्रूयात् । तत्रापि यदि ब्रूयात्प्रतिदत्तमिति लेख्यं तु न संपादितं असंनिधानात्प्रतिलेख्यं च न गृहीतं लेखकासंनिधानात्कार्यान्तरेऽतिपातिनि त्वरावत्त्वान्नात्रास्त्येव प्रमाणान्तरस्य साक्ष्यादेरवसरः । यदपि "लिखितं लिखितेनेति" नैषा परिभाषा वस्तुसामर्थ्यायातामवगतिं बाधितुं शक्नोति । दृश्यन्ते हि धनिकहस्तगतलेख्य-

१ क-प्रत्यायितता । २ क-धाध्याध्यो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रमेण संशोधयन्तो न च पृष्ठे संशोधितं धनमभिलिखन्ति । अद्य तावदिदं दत्तं प्रातरन्यदानीयैकीकृत्योपर्यारोपयिष्यामि सर्वं वा कतिपयैरहोभिः संशोध्य लेख्यं पाटयिष्यामीति नान्यवस्तुतो संबन्धः । धनिकेन चोपरुद्धस्यासंभवत्यंशमूललाभधने संशुद्धिभागमात्रे दीयमाने कुत इयं तत्प्रभवति न ददाति यावत्प्रतिलेख्यं न दत्तमिति । यदि चैषा परिभाषा " लिखितं लिखितेनैवेति " तदा बलोपाधिकृतत्वं कथं विचार्यतां । न हि तत्र लेख्यान्तरसंभवः । तेन यथाऽत्र सत्येव लेख्ये तन्निश्चयार्थं प्रामाणान्तरं व्यापार्यते तद्वदन्यत्रापि व्यापारणीयम् । यथा कश्चिदावेदयेन्नास्य प्रत्ययं गत्वा लेख्यं मया कृतमनेनोक्तः सद्यः पुण्यहेतुरकारणमिमां च धनमात्रां गृहाणाश्च न सर्वदाताऽस्मीत्युक्त्वा सैव धनमात्रा दत्ता परिशिष्टं न दत्तमिति तदाऽस्त्येव न्यायकान्तरव्यापारणावसरः । तत्र यद्यधमर्णस्यास्मिन्प्रकारे साक्षिणः सन्ति तदाऽभिहिते लेख्य आभासाकृते श्वो दानमुत्तमर्णेन साधनीयम् । अथ तयोरपि रहसि परिभाषेयमभूत्तदा दैव्याः क्रियाया अवसरः । अथ तु तस्यामपि व्यभिचारित्वादनाश्वासः सत्यशपथेन व्यवस्था कार्या ।

नन्वेवं सति स्वहस्तलेख्यं प्रमाणान्तरसंवेदसापेक्षत्वादप्रमाणमेव । तत्र " विनाऽपि साक्षिभिः सिध्येत् " " न स्वहस्तपरिचिह्नितमिति " विरोधः । अनेनैव न्यायेन प्रत्यक्षं दीयमानं द्रव्यं न पश्यति । केवलं तत्समक्षं गृहीत्वा परिभाष्यत इयदिदमस्मान्मया गृहीतमिति । तेऽपि साक्षिणः स्युः । तत्रापि शक्यते वक्तुमस्य प्रत्ययं गत्वा प्रपन्नोऽहमिति । उक्तमत्र न स्मृतिविरोधाद्वस्तुस्थितिरहन्तुं शक्यते । अपि च यत्रास्य वचनस्यावसरो नास्ति तत्प्रमाणं भविष्यति क्वचिन्नास्ति । यत्र चिरकालं तिष्ठति धनिकहस्ते लेख्यं यदि हि तेन धनं दत्तं तदा कथमनेन वा नाम न मार्गितं लेख्यं न त्याजितमिति । न हि चिरकालमपेक्षा वस्तुनीदृशोऽवश्यं संभवति । मिथ्यावादिता त्वस्यानुमीयते । तथा चोक्तम् " सद्यस्त्वहाद्वा कार्येषु बलं राज्ञो निवेदयेदिति " । यत्र वा भोग्यबन्धो न च भोग आम्नातोऽपहारकालस्तत्र विप्रतिपत्तौ विनाऽपि साक्षिभिः स्वहस्तलेख्यं न ह्यधमर्णा वक्तुं लभन्ते प्रीत्या त्वयैतदुक्तं संप्रति त्यजेति । न च पूर्वोक्तस्य वचनस्यावसरः । कृतं लेख्यं ततो दास्यामीत्युक्त्वा न दत्तमिति । यदि न दत्तं कथं बन्धभोगो मर्षितः ।

ननु चैवं सति लेख्यसहायो भोगः प्रमाणं स्यात् । केवलस्य तु भोगस्य प्रामाण्यमामनन्ति " लिखितं साक्षिणो भुक्तिरिति " । किमिदं प्रत्युक्तं पर्यनुयुज्यामहे । विशिष्टकालो भोगः प्रमाणं न भोगमात्रम् । एवं हि पठ्यते (श्लोक १४७) "यत्किंचिद्दशवर्षाणि" तथा " पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकीति " (या. व्य. २४) । कस्तर्ह्यस्यार्थो " लिखितं लिखितेनैवेति" व्याख्यातमन्यैः । कर्तृविशेषसंशयेऽनेनैतल्लिखितं न चेति लिखितेन निश्चित-

१ फ—न्यायकादकान्तर ।

For Private And Personal Use Only

तत्कर्तृकेण निश्चीयते । यत्तु साक्षिसमक्षं तत्र कृताकृतसंदेहं साक्षिभिर्हरंति । त एव तत्र प्रमाणम् । न तत्र तत्कृतलेख्यान्तरदर्शनमुपयुज्यते । बुद्धिपूर्वेषु च ऋणादानादिषु केवलेभ्यः साक्षिभ्यो लिखितं श्रेयः । साक्षिणो हि विस्मरेयुरन्यतरेण वा संबन्धं गच्छेयुरन्यद्वा पातकस्यासाक्षित्वे हेतुमासादयेयुः । लेख्यं त्वभियोगवत आत्माधीनतया सुरक्षमिति साक्षिभ्यः श्रेयस्त्वं तस्य । एतदेवाह " लिखिते न तु साक्षिणः " इति । स्वहस्तप्रातिष्ठेन विस्मृतमप्यर्थं वृत्तमिति मन्यते । मृता वा साक्षिणस्तद्धस्तुप्रत्यभिज्ञानेन प्रमाणीभवन्ति । व्याख्यानान्तराणि भर्तृयज्ञेनैव सम्यक्कृतानीति तत एवावगन्तव्यानि सर्वथा प्रमाणमूलानि । स्मृतिः कारणव्यवस्था तु कर्तव्येति । न च स्मृते स्वे प्रमाणकल्पना युक्ता । न हि व्यवहारस्मृतिर्वेदमूला शक्यते वक्तुम् सिद्धार्थरूपत्वात्प्रत्यक्षाद्यवगम्यत्वाज्जयपराजयप्रकाराणाम् । सिद्धो ह्ययमर्थः । एवं व्यवहारे जीयत इतर इतरो जयतीति यदाऽप्यत्र लिङ्गश्रुतिः ' साऽपि हरीतकीं भक्षयेदारोग्यकाम ' इतिवद्द्रष्टव्या । ईदृशेषु विधिस्वरूपेषु प्रत्ययेषु द्रव्यशुद्धेः प्रसङ्गेनार्थो विवेचित इति न पुनः प्रयतामहे । अष्टादशसु मार्गेषु विषयो विवादस्य एतानर्थानुद्दिश्य पुरुषाः प्रायेण विवदन्ते । न विद्धानि कार्याणि प्रयोजनान्यर्थसिद्धय इति यावत्तान्युत्तरत्र दर्शयिष्यामः । पृथक्पृथक् प्राधान्यमेतेषामाह । एतानि प्रत्येकं प्रयोजकानि न पुनः परस्परमन्तर्भवन्ति । यथान्यान्यनुषङ्गागादिष्वन्तर्भवन्ति । नैवमेवेत्यनुषक्तानि तु सहस्रशः सन्ति ॥ ३ ॥

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ॥
संभूय च समुत्थानं दत्तस्यानपकर्म च ॥ ४ ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ॥
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥ ५ ॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ॥
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥ ६ ॥
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च ॥
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥ ७ ॥

पाठक्रमापेक्षमृणादानस्याद्यत्वं प्राथम्यम् । अथवा मुख्यमाद्यम् । अनेन हि वनवासिनोऽपि स्पृश्यन्ते । ऋणादानानुषक्तमनृणादानमेव च । यथा ऋणं ते मया दत्तं शुद्धिलेख्यं प्रयच्छेत्यादि । नैतदृणादानमनुक्तं तु तत्रेति तद्व्यपदेश्यम् । तथा " ऋणं देयमदेयं च येन यत्र यथा च यत् । दानग्रहणधर्माश्चेति । " (नारदीये १।१) तत्र देयमृणं स्वकृतं पितृकृतं च यस्य च ऋक्थं हरेत् । अदेयं स्वकृतं द्विगुणादधिकं पितृकृतं च द्यूतादिभागेनेति पुत्रेण भर्त्रा पित्रा चेत्यतथा (नारदीये १।१६)

---

१ ड–क्ष–दरे । २ ख–ड–क्ष–आह्वयम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा । अभ्युपेतादृते यद्वा सह पत्या कृतं भवेत् ॥"

यद्यपि देयमित्यत्रैतदन्तर्भूतं तथापि द्यूतादिकृतं विशेषानपेक्षं स्वरूपतो देयम् । इदं तु कर्तृनियमादिति गोबलीवर्दवद्भवति चेच्छेदो यावदिति द्वैगुण्यपर्यन्तं तत्रापि भेदः पूर्ववत् । यत्रेति पाठे देशकालग्रहणम् । यत्रैव गृहीतं तत्रैव देयम् । सत्यां धनिकेच्छायां देशान्तरेऽपि । सति संभवे कालोऽपि शरद्यन्विच्छत् प्रयुक्तं "ग्रैष्मे वा सत्सु सस्येषु यदा वाऽस्य धनागमं मन्येतेति" यथा सति संभवे सर्वम् । असति कश्चिदंशो यावत्क्रमेण संशुद्धमिति सर्वभावे परिक्षीणे न "कर्मणाऽपि समामिति–" । दानग्रहणधर्मा इति साक्षिलेख्यादयः । पारुष्ये दण्डवाचिके इति । दण्डश्च वाक् च दण्डवाचं 'द्वन्द्वाच्चुदषहान्तादिति' समासान्तस्तदस्यास्तीति "अत इनि ठनाविति" ठन् (व्या० सू० ५।२।११५) । स्त्रीपुंधर्म इति । स्त्रीसहितः पुमानिति शाकपार्थिवादिवत्समासः । स्त्री च पुमांश्चेति विग्रहे स्त्रीपुंसधर्म इति स्यात् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम् ॥
धर्मं शाश्वतमाश्रित्य कुर्यात्कार्यविनिर्णयम् ॥ ८ ॥

भूयिष्ठग्रहणं प्राधान्यख्यापनार्थम् । अन्येऽपि व्यवहारहेतवः सन्तिः। यथा निवसनार्थं त्वया मे वेश्म दत्तं तत्र किमित्यर्वाग्वत्सरादन्यस्मै ददासीति । न चेदं दत्तानपकर्म न ह्यत्र स्वत्वनिवृत्तिरस्ति भोगानुज्ञामात्रं वसतः । तथा मदीयस्थण्डिलाभिमुखं त्वया वेश्मनि गवाक्षं कृतमिति । धर्मं शाश्वतमाश्रित्येति । अर्थकामावशाश्वतौ अथवा शाश्वतो धर्मः अनिदंप्रथमतो या व्यवस्था तामनुपालयेत् । या त्विदानींतनैः प्रवर्तिता साऽशाश्वतत्वादनादरणीया ॥ ८ ॥

यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ॥
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥ ९ ॥

"अष्टादशपदाभिज्ञं प्राड्विवाकेतिसंज्ञितम् । आन्वीक्षिक्यां च कुशलं श्रुतिस्मृतिपरायणम्"॥ कुतश्चिदतिपातिकार्यान्तरव्यासङ्गादपाटवाद्वा यदि स्वयं न पश्येत्तदा विद्वान्ब्राह्मणो नियोज्यः । विद्वत्ता च या व्यवहारविषया सा तदधिकारत एवार्थगृहीता । न हि यो यन्न जानाति स तत्राधिकारमर्हति । धर्मशास्त्रपरिज्ञानं तु रागद्वेषदोषेण विपरीतार्थावधारणनिवृत्त्यर्थमुपयुज्यते । धर्मज्ञस्तु सतोरपि रागद्वेषयोः शास्त्रभयेन विपर्येत्युपयोगवद्धर्मशास्त्रपरिज्ञानम् । व्यवहारदर्शनं तु तदर्थगृहीतं । येन विना न शक्यते व्यवहार-

---

१ ख–ड–क्ष–फ–भवन्ति । २ ड–फ–भान्विच्छेत् । ३ ख–ड–क्ष–सम्बन्धमिति । ४ ड–तथा । ५ फ–तनयां । ६ फ–यदि । ८ ख–ड–क्ष–विपरीपदरस्येत्युपयोगवद्धर्मम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्णयः कर्तुं । तद्विज्ञानं तदधिकाराक्षिप्तम् । यत्तु ज्ञात्वाऽन्यथा क्रियते तन्निवृत्तिरुप-देशान्तरविषया वक्ष्यति चैवमर्थं यत्नान्तरमपि वेदविदस्त्रयः राज्ञश्च प्रकृतो विद्वानिति । शास्त्रान्तरपरिज्ञानं तु व्यवहारेऽधिक्रियमाणस्यादृष्टाय स्यात् । नियोज्यो विद्वान्स्यादिति पठितव्यम् । नियुंज्यादिति नियुञ्जीत स्वराज्यतः उपसृष्टादिति हि कातीया आत्मनेपदं स्मरन्ति ॥ ९ ॥

सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः ॥
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥ १० ॥

सभ्यैरिति जातिविशेषानुपादानेऽप्युत्तरत्र विप्रग्रहणाद्ब्राह्मणैः सहेति च पूर्वत्र ब्राह्मणग्रहणाद्ब्राह्मणा एव विज्ञायन्ते । त्रिग्रहणं त्वेकद्वयोः प्रतिषेधार्थं त्रिप्रभृतयस्त्विष्यन्त एव । साक्षिप्रकरणे नैतद्वक्ष्यामः । **सभामेव प्राविश्याग्र्यामिति** । राजस्थानापत्त्या सभां प्रविश्य स्थानासनेषु तद्धर्मेषु पुनर्वचनं प्रदर्शनार्थं धर्मान्तरनिवृत्त्यर्थं वा तेन राजस्थाने नोपविशति ॥ १० ॥

यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः ॥
राज्ञश्चाधिकृतो विद्वान्ब्रह्मणस्तां सभां विदुः ॥ ११ ॥

उक्तं सभां प्रविश्य व्यवहारान्पश्येदिति । सभाशब्दश्च लोके गृहप्रासादविशेषे वर्तते " मयेन निर्मिता दिव्या सभा हेमपरिष्कृतेति " । क्वचित्पुरुषविशेषसंघटिता सभेति तन्निवृत्त्यर्थं सभाया लक्षणमाह । यत्र त्रयो ब्राह्मणा वेदविदः सन्निधीयन्ते । राज्ञश्च संबन्धी प्रकृतोऽधिकृतो विद्वानिति । अथवा प्रकृतोऽनन्तरश्लोके सन्निहितः सेह सभाऽभिप्रेता । ब्रह्मग्रहणं स्तुत्यर्थम् । यथा ब्रम्हणः सभा निरवद्यैवेयमपीति ॥ ११ ॥

धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते ॥
शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः ॥ १२ ॥
सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ॥
अब्रुवन्विब्रुवन्वाऽपि नरो भवति किल्बिषी ॥ १३ ॥

अनेनार्थेन द्वयं विप्रतिषिध्यते । प्रतिपन्नाधिकारेण मिथ्यादर्शनं न कर्तव्यमन्येन च क्रियमाणं नोपेक्षणीयम् । तत्रोभयथा दोषः । अब्रुवन्नन्येन विपरीतेऽनुष्ठीयमाने तूष्णीमासीनो हस्तक्षेपेण वा शास्त्रान्यायविरुद्धं ब्रुवन्किल्बिषी पापभाग्भवति । तेन नैषा प्रत्याशा कर्तव्या । द्वितीयः प्राड्विवाको मिथ्या पश्यति । स एव योजयत्यहं तूष्णींभूत

---

१ ख-ड-क्ष-नियुज्यतो स्पराज्यंतोप । सृष्टादिति; फ-जित...तोपसृष्टी— २ फ-अन्तरश्लोके । ३ फ-सभां । ४ ज्ञा (?)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदासीनः किमित्येनसा योक्ष्य इति । सभाप्रवेशनिषेधेन चात्र व्यवहारदर्शनाधिकारप्रतिपत्तिः प्रतिषिध्यते । सभा वा न प्रवेष्टव्येति । व्यवहारदर्शनाधिकारो न प्रतिपादनीय इत्यर्थः । प्रतिपन्नश्चेत्समञ्जसं वक्तव्यम् । अनेन त्वनधिकृतस्यापि यदृच्छया सन्निहितस्य मिथ्यापश्यत्सु सभ्येषु विदुषस्तूष्णींभावं नेच्छन्ति । तथा च "नियुक्तो वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हति" (नारदीये प्र. ३।२) । अथ राजपुरुषपर्यनुयोग आशङ्क्यते किमित्यनधिकृतो ब्रवीति ततश्च तत्प्रदेशादपसर्तव्यम् । तदिदमुक्तं दुर्बलहिंसायां च विमोचने शक्तश्चेदिति (गौतम सू. अ. २१ सू. १९) ॥ १३ ॥

यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ॥
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥ १४ ॥

धर्मशास्त्रन्यायदेशनियता व्यवस्था । सा वेदधर्मेण तद्व्यतिक्रमरूपेण हन्यते विनाश्यतेऽर्थिना प्रत्यर्थिना । तथा सत्यमनृतेन साक्षिभिर्हन्यते प्राड्विवाकादयश्च प्रेक्षन्ते न तत्त्वमुद्धरन्ति ततस्ते हताः शवतुल्या भवन्तीति निन्द्यते । तस्मान्नार्थिप्रत्यर्थिनौ विपरीतमाचरन्तौ सभासद्भिरुपेक्ष्यौ । साक्षिणश्च । धर्माधर्मग्रहणेन सत्यानृतग्रहणेन वा सिद्धं श्लोकपूरणमुभयोरुपादानम्[1] अतो विषयभेदेन व्याख्यातम् ॥ १४ ॥

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ॥
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत् ॥ १५ ॥

न भयादन्यथादर्शनं कर्तव्यं यतो धर्मो व्यतिक्रान्तः सन् हन्ति[2] । नोऽर्थी तत्सहायो राजा वा । तथा धर्म एव[3] पालितः सर्वतो भयमपनुदति नापकर्तुमर्थादयः[4] क्रुद्धाः शक्नुवन्ति । तस्मादेवं जानानः[5] सुखदुःखे धर्माधीने इति धर्मो न हन्तव्यः[6] इति । यदि वयं धर्मं हन्मस्तदा सोऽस्मान्सर्प[7] इव रोषितः प्रतिहन्तीत्यतो धर्मो हतः सन्मास्मान्वधीदित्यात्मपरित्राणार्थं[8] धर्मो रक्षितव्यः ॥ १५ ॥

वृषो हि भगवान्धर्मस्तस्य यः कुरुते त्वलम्[9] ॥
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् ॥ १६ ॥

वृषलशब्दनिर्वचनेन मिथ्यादर्शी[10] निन्द्यते न जातिवृषलो वृषलः[11] । किं तर्हि यो वृषस्य[12] कामवर्षिणो धर्मस्यालंकुरुते । निवृत्तिवचनोऽलंशब्दः स वृषल इत्येतमर्थं । देवाः प्रतिपन्नाः मनुष्यास्तु यदि जातिशब्दमेव मन्यन्ते कामं मन्यन्तां प्रमाणतरास्तु देवाः । ते चानेन प्रवृत्तिनिमित्तेन वृषलशब्दप्रयोगं मन्यन्ते । देवग्रहणमर्थवादः । तस्मा-

१ फ–चाविमोचने २ य–हन्तीत्यर्थः । प्रत्यर्थतत्सहाया राजा वा । ३ य–एवापालितः । ४ फ–क्ष–ख–ड–नापकर्तुमिथ्यारयः । ५ फ–क्ष–ख–ड–एवं जानानः । ६ फ–क्ष–ख–ड–न हन्तव्यः । ७ य–मर्य इव श्रारादितः । ८ य–त्राणार्थे । ९ फ–ख–क्ष–ड–ह्यलम् । १० फ–क्ष–ड–ख–मिथ्यावादी । ११ फ–ख–ड–क्ष–वृषलः । १२ य–र –वृषालस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छ्राद्धकाले वृपलैर्न प्राशव्यम् " हन्तव्यो वृषलश्चौर " इत्याद्यासु क्रियासु मिथ्यादर्शी ब्राह्मण एव वृपलशब्देन ग्रहीतव्य इति । अतो वृषलत्वं मा प्रापमिति धर्मं न लोपयेन्न नाशयेदिति वृपलत्वाध्यारोपो निन्दा ॥ १६ ॥

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ॥
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥ १७ ॥

भयाद्धर्मातिक्रमो न कर्तव्य इत्येत् " धर्म एव हतो हन्ति " इत्यनेनोपदिष्टम् । स्नेहतो न कर्तव्य इत्यनेनोपदिश्यते । यत **एकः सुहृद्धर्मस्तत्र** स्नेहो भावनीयः । अन्योऽपि मनुष्यः सुहृद्धर्मः निधनेऽप्यनुयान् कार्यमपेक्ष्य जहाति जीवनं योऽपि स्यादत्यन्तमित्रं तस्यापि सौहार्दमा निधनात् । धर्मस्तु मृतमपि पुरुषमन्वेत्यतो न सुहृदपेक्षया मिथ्यादर्शनमुपेक्षा कर्तव्या

" भार्या पुत्रो मित्रमर्थाश्च रिक्थं । नश्यन्त्येते देहनाशे नरस्य ।
" धर्मस्त्वेको नैनमुज्झत्यजस्त्रं । तस्माज्जह्यात्पुत्रदारान् न धर्मम् ॥ "

यदन्यद्धर्माद्भार्यादि **तत्सर्वं शरीरेण समं** सह **नाशं गच्छति** । धर्मादन्यो मृतं न परित्रातुं कश्चित्समर्थ इत्यतः सुहृद्बान्धवानुरोधादपि धर्मो न हातव्यः ॥ १७ ॥

पादो धर्मस्य कर्तारं पादः साक्षिणमृच्छति ॥
पादः सभासदः सर्वान्पादो राजानमृच्छति ॥ १८ ॥

न चैषा मनीषा कर्तव्याऽर्थिना प्रत्यर्थिना वाऽन्यतरस्य भूम्याद्यपह्रियते स एव भूम्यपहारदोषभाग्भविष्यति । वयं तु तदकारिणः किमिति दोषवन्तः स्यामो यतस्तस्यायं चतुर्धा विभज्यते । अर्थवादश्चायम् । न ह्यन्यकृतस्यैनसोऽन्यत्र गमनमस्ति । तेषामपि मिथ्यादर्शननिषेधातिक्रमादुत्पद्यते पापं मिथ्यालंबनं राज्ञः स्वयमपश्यतोऽप्यधिकृतराजस्थानीयादिदोषाद्दोषवत्त्वं यदि राजाधिकृतो मिथ्याचरितेन ज्ञापितः पराजितं दुष्टं न गृह्णीते न च पुनः सम्यक् निर्णयं करोति ततः सोऽपि पापभाग्भवति । अधिकृतोपलक्षणार्थं वा राजग्रहणं । यदा राजा स्वयं मिथ्या पश्यति तदा दुष्यति । यदा राजस्थानीयस्तदा तस्य दोष इत्यर्थः ॥ १८ ॥

राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥ १९ ॥

एष एवार्थो विपर्ययेणोच्यते । यत्र दोषवान् दोषं गोपयितुं न लभते प्रकटीक्रियते तदीयो दोषस्तत्र सर्वं साधु संपद्यत इति । ' यत्र धर्म ' इत्यत आरभ्य मिथ्यादर्शनोपेक्षणप्रतिषेधार्थं निन्दाप्रशंसाभ्यां शुभाशुभफलदर्शनार्था अर्थवादाः ॥ १९ ॥

---

१ फ-ख-ड-क्ष-प्रवेष्टव्यम् । २ य-र-उपदिष्टस्तेन हेतोः कर्तव्यः । ३ फ-ख-ड-क्ष-इत्यर्थः । ४ फ-ड-ख-क्ष-निषेधादुत्पद्यते । ५ य-र-पापमित्यालम्बनम् । ६ य-र-पराजितं न तद्राष्ट्राभिगृह्णीते । ७ य-र सर्वमिदं सद्यः संपद्यते । ८ य-र-प्रतिषेधार्थाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ॥
धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन ॥ २० ॥

उक्तं ब्राह्मणैः सह धर्मनिर्णयं कुर्यान्मन्त्रिभिश्च मन्त्रज्ञैः तत्र मन्त्रिणां जातेरविशेषितत्वाच्छूद्रा अपि सभां प्रविष्टा मन्त्रित्वादनुज्ञातव्यवहारनिर्णयास्तद्वता धर्मव्यवस्थां कथंचित्संस्कृतबुद्धयो ब्रूयुः । न च सर्वत्र व्यवहारे स्मृतिशास्त्रपरिज्ञानमुपयुज्यते येन तदभावादर्थलुप्तत्वादनर्थकः शूद्रप्रतिषेध आशङ्क्येत । तथा हि जयपराजयकारणानि लौकिकप्रमाणवेद्यान्येव साक्ष्यादीनि अयं साक्षी धार्मिको न चैतस्यं केनचित्संबन्धेन संबन्धी अयं त्वसाक्ष्यसकृद्दृष्टव्यभिचारत्वादित्येवमादि शक्यते व्युत्पन्नबुद्धिना स्वयमुत्प्रेक्षितुं न स्मृतिशास्त्रैकगोचरः । अतः प्राप्तस्य प्रतिषेधोऽयं । न च मन्त्रित्वे पुरोहितवज्जातिनियमः । तथाहि 'तैः सार्धं चिन्तयेत्' इत्युक्त्वा ततो ब्राह्मणेन सह चिन्तयेदिति तेनायमर्थो यद्यपि कथंचिच्छूद्रो न्यायलेशात्समधिगच्छेत्तथापि राजाधिकरणे विवदतो मन्त्री निग्रहाधिकृतो वा न किंचित्प्रब्रुयात् । पूर्वश्लोकार्थप्रतिषेधः शेषतया व्याख्येयः । न हि जातिमात्रोपजीविनो वैदुष्यादिगुणरहितस्य धर्मप्रवक्तृत्वनियोगः शक्यो वक्तुं तस्यैव रूपपरीक्षायां तस्माद्विषं भक्षय मा चास्य गृहे भुंक्था इतिवत्प्रतिषेधशेषभूतमिदमनुज्ञानं न पुनरनुज्ञानमेव । अत एव काममित्याह । कामशब्दप्रयोगे हि विधित्वं व्याहन्यते । अन्ये तु ब्रुवते । ब्राह्मणस्य प्रवक्तृत्वविधानात्तदा नियोज्यो विद्वान्स्याद्ब्राह्मण इति क्षत्रियादयस्त्रयोऽपि वर्णा निषिद्धास्तत्रेह पुनः शूद्रप्रतिषेधो विद्वद्ब्राह्मणाभावे क्षत्रियवैश्ययोरभ्यनुज्ञानार्थ इति शेषं समानम् । जातिमात्रमुपजीवतीति मात्रशब्दोऽवधारणे । ब्राह्मणजातिमेव केवलामुपाश्रित्य जीवति नाध्ययनादीन् गुणविशेषान्निर्गुणत्वात् । ब्रुवशब्दः कुत्सायां ॥ २० ॥

यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम् ॥
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ॥ २१ ॥

पूर्वविधिशेषोऽयमर्थवादः । यस्य राज्ञः शूद्रो धर्मविवेचनं धर्मनिर्णयं करोति तस्य सीदति नश्यति राष्ट्रं प्रजाः कर्दमे गौरिव ॥ २१ ॥

यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम् ॥
विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितम् ॥ २२ ॥

अयमपि पूर्ववदर्थवाद एव । प्रकरणाच्च शूद्रभूयिष्ठता विवादनिर्णये तु शूद्रविषया द्रष्टव्या । यत्र शूद्रा भूयांसो विवादनिर्णयकारास्तद्राष्ट्रमाशु विनश्यति दुर्भिक्षव्याधिपीडाभिः ।

१ फ-ख-ङ-क्ष-तद्वतो । २ यर-[illegible] । ३ [illegible] व्यवहारं कृतबुद्धयो ब्रूयुः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राष्ट्रनाशे च राष्ट्रपतेर्नाश इत्युक्तं भवति । नास्तिकाक्रान्तमिति दृष्टान्तः । यथा नास्तिकैः परलोकापवादिभिर्लोकायतिकाद्यैराक्रान्तमधिष्ठितमतश्चाद्विजं न हि नास्तिकानां ब्राह्मणादिभेदो यथार्थः संकीर्णत्वात् तदुक्तं वैद्यवणिग्व्यपदेशादिवद्ब्राह्मणादयः । यत्र वा धर्मसंकटे तु न द्विजाः प्रमाणीक्रियन्ते तदद्विजम् ॥ २२ ॥

धर्मासनमधिष्ठाय संवीताङ्गः समाहितः ॥
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् ॥ २३ ॥

धर्मः प्रधानः यस्मिन्नासने भवति तद्धर्मासनम् । राजासने हि राज्यस्थित्यानुगुण्येनार्थमेव प्रधानीकरोति न्यक्कृत्यापि धर्मम् । व्यवहारनिर्णये तु धर्ममेव प्रधानं आश्रयेत् इत्यर्थो न पुनरासनभेदोऽनेन ज्ञाप्यते । संवीताङ्गः वस्त्रादिना स्थगितशरीरः । प्रणम्य लोकपालेभ्य इन्द्राद्यष्टौ लोकपालास्तान्नमस्कृत्य कार्यदर्शनमारभेतेत्यदृष्टार्थमेतद्द्वयं अङ्गसंवरणं लोकपालप्रणामश्च । समाहितः अनन्यचित्तः कार्यदर्शने । एवं हि दृष्टार्थं भवति । प्रणामविशेषणं वा । समाहितग्रहणं यद्यप्यत्र किंचिदुक्तमेव प्रतिभाति तथापि पद्यग्रन्थत्वान्नातीव पौनरुक्त्यम् । लोकपालेभ्य इति चतुर्थी संप्रदाने कथं ? । क्रियाग्रहणं संप्रदानसूत्रे चोदितं 'श्राद्धाय निगृह्णते' 'पत्ये शेत' इत्याद्यर्थं न च क्रियाग्रहणं गृह्णात्यादिविषयमेव भाष्येऽनुक्तत्वात् ॥ २३ ॥

अर्थानर्थावुभौ बुध्वा धर्माधर्मौ च केवलौ ॥
वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् ॥ २४ ॥

धर्माधर्मावेव केवलावर्थानर्थौ न गोहिरण्यादिलाभोऽर्थस्तद्विपर्ययो वाऽनर्थः । किंतर्हि । धर्म एवार्थोऽनर्थश्चाधर्म इति बुद्ध्वा हृदि निश्चित्य कार्याणि पश्येत् । अथवाऽर्थानर्थावपि बोद्धव्यौ धर्माधर्मावपि । धर्मस्य सारता बोद्धव्याऽर्थस्य फल्गुता । अथवा यत्र महाननर्थः स्वल्पश्चाधर्मस्तत्रानर्थं परिहरेत् । शक्यो हि महताऽर्थेनाल्पधर्मो दानप्रायश्चित्तादिना निराकर्तुम् । सन्निपाते च व्यवहारिणां बहूनां वर्णक्रम आश्रयितव्यः । एष च दर्शने क्रमो वर्णानां यदाऽर्थे तुल्यपीडा भवति । यदा त्ववरवर्णस्याप्यात्ययिकं कार्यं महद्वा तदा 'यस्य चात्ययिका पीडा' इत्यनेन न्यायेन तदेव प्रथमं पश्येत् न क्रममाद्रियेत। राज्यस्थित्यर्थो हि व्यवहारनिर्णय इत्युक्तमतो न यथाश्रुतमाश्रयणीयम् ॥२४॥

बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ॥
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ॥ २५ ॥

---

१ य–सावतत्वात् । २ फ–धर्मप्रधानः । ३ फ–आसनं । ४ ख–ड–फ–क्ष–श्रेयः । ५ फ–क्ष–ख–ड–आसनभेदः । ६ य–र–प्रमाणविशेषणं वा । ७ य–र–प्रतिभवति । ८ य–र–पौनरुक्त्यास्तदानखेवरीयः । ९ य–र–अस्थिरत्वात् । १० फ–क्ष–ख–ड–शोध्यौ धर्मावपि । ११ य–र–बाह्या । १२ य–र–शक्येन हितार्थेनैषद– । १३ य–र–निकर्तुम् । १४ फ–क्ष–ख–ड–आदरणीयम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा चेदमाह । अनुमानेनापि सत्यानृतवादिता व्यवहारतः साक्षिणां च निश्चेतव्या इति श्लोकार्थः । अतश्च स्वरादिग्रहणं प्रदर्शनार्थम् । तेन यन्निश्चितलिङ्गं तेन परिछिन्द्यादित्युक्तं भवति न पुनः स्वरादिभिरेव सव्यभिचारित्वात्तेषाम् । अनुचितसभाप्रवेशा हि महाप्रकृतिदर्शनेन सत्यकारिणोऽपि स्वभावतो विक्रियन्ते । प्रगल्भास्तु संवृताकारा भवन्ति । स्वरश्च वर्णश्चेङ्गितं च स्वरवर्णेङ्गितानि तेषामाकाराः **स्वरवर्णेङ्गिताकाराः** । आकारो विकारः । स्वाभाविकानां हि स्वरादीनामन्यथात्वं तैर्विभावयेन्निश्चिनुयात् । भावमभिप्रायमन्तर्गतं मनुष्याणां विवादिसाक्ष्यादीनाम् । तत्र स्वरस्य विकारो वाचि गद्गदरुदितादि वर्णस्य गात्ररूपविपर्ययादि इङ्गितं स्वेदवेपथुरोमाञ्चादि । **चक्षुषा** संभ्रमक्रोधदृष्टिपातेन । **चेष्टितेन** हस्तनिक्षेपभ्रूविक्षेपादि त्वसंवेद्यं चैतत् । यद्गूह्यमानमप्यभिप्रायं स्वरादयः प्रकाशयन्ति निपुणतो लक्ष्यमाणाः । यतः प्रसिद्धमेतेषां गूढाभिप्रायप्रकटनसामर्थ्यम् ॥२५॥

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥ २६ ॥

तथा हि लोके दृष्टशक्तितोऽनेन श्लोकेन स्वरादीनां पूर्वोक्तार्थाधिगमेन दर्शयतीत्यपौनरुक्त्यम् । तत्राक्रियन्ते विक्रियन्त इत्या**कारा** इङ्गितादयः । इङ्गितं व्याख्यातं व्यक्तिभेदाद्बहुवचनम् । **गतिः** पूर्वश्लोकादत्राधिका सा प्रस्खलन्ती स्वभावतोऽन्यथाभूता । **भाषितं** पौर्वापर्यविरुद्धं वचनं । **वक्त्रविकार** आस्यविशेषादिः । शेषं पूर्वश्लोक एव व्याख्यातम् । एतैर्विकृतैरन्तर्गतं चित्तं लौकिकैरन्यत्रापि गृह्यत इति समासार्थः ॥ २६ ॥

बालदायादिकं रिक्थं तावद्राजानुपालयेत् ॥
यावत्स स्यात्समावृत्तो यावद्वाऽतीतशैशवः ॥ २७ ॥

ननु च व्यवहारदर्शनं वक्तव्यतया प्रस्तुतम् । तत्र कः प्रसङ्गो बालधनरक्षायाः । उच्यते । विवादपदतामेवैतद्विषयान्निवर्तयितुमिदमारभ्यते । बालधनं राज्ञा स्वधनवत्परिपालनीयम् । अन्यथा पितृव्यादिबान्धवा ममैवेदं रक्षणीयं ममेदमिति विवदेरन् । न चान्यः प्रसङ्गोऽस्ति । आशङ्क्यमानव्यवहारत्वं च । न केवलेषु राजधर्मेषूपदिश्यते अतोऽस्मिन्नेवावसरे वक्तव्यम् । बालो दायादोऽस्य तदिदं **बालदायादिकम्** । दायादः स्वाम्यत्रोच्यते । बालस्वामिकं धनं **तावद्राजा रक्षेद्यावदसौ समावृत्तो** गुरुकुलात्प्रत्यागतो **यावद्वाऽतीतशैशवः** आ समावर्तनात्प्रतिपाल्यधनः स्यात् । अथवा द्विजातीनां समावर्तनमवधिरन्येषां शैशवात्ययः ॥ २७ ॥

---

१ फ-क्ष-ख-ड-तेन निश्चितलिङ्गेनैव । २ फ-क्ष-ख-ड-यावच्चातीतशैशवः । ३ य-ममैवं-र-ममेदमिति रक्षितस (स्त ?) द्विषयोऽयं ममदमिति विवदेरन् । ४ फ-क्ष-ख-ड-व्यवहारत्वाच्च । ५ फ-क्ष-ख-ड-अन्यस्मिन्नेवावरे । ६ य-र-दायपजे स्वामी पुत्र उच्यते । ७ य-र-शैशव आसमा-शैशव-।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वशापुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च ॥
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥ २८ ॥
एवमेव विधिं कुर्याद्योषित्सु पतितास्वपि ।
वस्त्रान्नपानं देयं च वसेयुश्च गृहान्तिके ॥ २९ ॥

यः कश्चिदनाथस्तस्य सर्वस्य धनं राजा यथावत्परिरक्षेत् । तथा चोदाहरणमात्रं वशादयः । एवं प्रजापालनमनुष्ठितं भवति । पूर्वस्तु श्लोकः कालनियमार्थः । वशा वन्ध्या अपुत्राऽसमर्थपुत्राऽविद्यमानपुत्रा दुर्गतपुत्रा वा । वशाश्चापुत्राश्चेति द्वन्द्वः । ननु च वशाऽप्यपुत्रैव । सत्यम् । उभयोपादानं तु सत्यपि भर्त्तरि तस्याः संरक्षणार्थं तस्यां ह्यधिविन्नायां भर्ता निरपेक्षो भवति । निष्कुलाग्रहणं तासां विशेषणं यासां न कश्चिद्देवरपितृव्यमातुलादि परिरक्षकोऽस्ति स्त्रीत्वाच्च स्वयमसमर्थाः बान्धवास्तु मत्सरिणः तासां च तदुच्यते । बन्धुभिर्हि स्त्रीणां शीलशरीरधनानि रक्षितव्यानि । तदुक्तं (नारद स्मृ. अ. १३ श्लो. २८।२९)
" विनियोगोऽस्ति रक्षासु भरणे च स ईश्वरः । परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये ॥
" तत्सपिंडेषु वाऽसत्सु पितृपक्षः प्रभुः स्त्रियाः । पक्षद्वयावसाने तु राजा भर्ता प्रभुः स्त्रियाः ॥ "

यां तु स्वयमेव कथंचिच्छक्ता न तत्र बान्धवानां व्यापारोऽस्ति । अत एवाह । आतुरास्विति । असामर्थ्यमेतेन लक्ष्यते । अन्यैस्त्वातुरभर्तृका आतुरा व्याख्याता । अविधवाऽपि भर्तुरसामर्थ्याद्राज्ञैव रक्ष्या स्यादिति निर्मनुष्याणामेतत् । कुलं बन्धुजातं यासां नास्ति ताः निष्कुलाः । अन्ये तु कुटिलां निष्कुलामाहुः । तासामपि वेशाद्युपार्जितं धनं अपतितानां राज्ञा रक्ष्यम् । अस्मिंश्च पक्षे स्वतन्त्रनिष्कुलाग्रहणम् । पतिव्रतासु विधवासु । मृतभर्तृका विधवा । धव इति भर्तृनाम । तद्विरहिता विधवा । तांश्चेत्पतिव्रता भवन्ति । तदा सा रक्ष्यधना । व्यभिचाररताना तु स्त्रीधनानर्हत्वं स्मृत्यंतरे पठ्यते " अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका । व्यभिचाररता या च स्त्रीधनं न तु साऽर्हति ॥ " इति

तस्यास्तु निष्काशनं विहितम् । निष्काशनं च प्रधानवेश्मनो बहिरवस्थापनम् । न तु निर्वासनमेव । यतः पतितानामपि तासां गृहांतिके वासो भक्ताच्छादनमात्रदानं च विहितम् ॥ २८ ॥

तेन यः कश्चित्स्त्रीणां निर्वासनविधिः ' स्त्रीधनद्रव्यसर्वस्वम् ' इत्यादिषु श्रूयते स एवंविषय एव द्रष्टव्यः । तथापि यावद्भिक्षोत्सर्पणादिना किंचिदर्जितं तदर्हत्येव । न बान्धवा अपहरेयुः । इह त्वस्मिन्नेव निमित्ते आधिवेदनं विहितं न तु स्त्रीधनापहारः । तथा ह्याह

१ य-र-निष्कुलासु । २ य-र-तासामितदुच्यते । ३ य-र-आतुरा स्वयमेव । ४ य-र-अविधवास्वपि । ५ य-र-वेश्याद्युपार्जितं । ६ फ-क्ष-ख-ड-यावत्पतिव्रता भवति । ७ फ-क्ष-ख-ड-व्यभिचारे तु । ८ फ-क्ष-ख-ड-कार्यम् । ९ फ-क्ष-ख-ड गृहान्तरे । १० फ-ख-क्ष-ड-भेदेन । ११ फ-तथापि । १२ रक्षितं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" मद्यपाऽसाधुवृत्ता च प्रतिकूला च या भवेत् ॥ व्याधिता चाधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा " ॥ अतश्च मानवस्मृतिबलेन च 'स्त्रीधनं न तु साऽर्हति' इत्येषा स्मृतिरेव व्याख्यायते । आधिवेदानिकं स्त्रीधनमेषा नार्हति नैतस्यै देयमित्यर्थः । यदुक्तम् " अधिविन्नस्त्रियै दद्यादाधिवेदानिकं समम् " इति न तु प्राग्दत्तमस्या अपहर्तव्यम् । वयं तु ब्रूमः । पुरुषद्वेषिण्या व्यभिचाररतायाश्च युक्त एवापहारः । यत इहाप्युक्तं

"अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा । सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा "॥ विभूषणपरिच्छदैर्वियुक्ता कर्तव्येत्यर्थः ॥ २८।२९ ॥

जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः ॥
ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥ ३० ॥

बान्धवानां स्त्रीधनमपहरतामयं चोरदण्डः । ते हि बहुभिरुपधाभिरपहरन्ति । अस्वतन्त्रैषा स्त्री किं ददाति किं वा भुंक्ते वयमत्र स्वामिन इति अचौराशंकया चोरदण्डो विधीयते । **जीवन्तीनां तासां स्वबान्धवा** देवरादयस्तद्धनं ये **हरेयुस्ताञ्छिष्यात् पृथिवीपतिर्निगृह्णीयात्** । **चोरदण्डो** वक्ष्यमाणः " येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते । छेत्तव्यं तत्तदेवान्यत्तन्मनोरनुशासनमिति " (अ. ८–३२१) । स्वबन्धुभ्यश्चैतद्विशेषेण राज्ञा रक्षितव्यम् । चौररक्षा तु सर्वराष्ट्रविषया विहिता ॥ ३० ॥

प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् ॥
अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ॥ ३१ ॥

यद्द्रव्यं स्वामिनो नष्टं प्रमादात्कथंचित्पथि गच्छतो भ्रष्टमरण्ये कान्तारे वा स्थापयित्वाऽरण्यपालैरन्यैर्वा राजपुरुषैर्लब्धं राजसकाशमानीतं तद्राज्ञा स्वां रक्षां कृत्वा राजद्वारे राजमार्गे वा प्रकाशं स्थापयितव्यम् । पटहघोषणेन वा कस्य किं हारितमिति प्रकाशयितव्यम् । यतः प्रदेशाल्लब्धं तस्मिन्नेव प्रदेशे रक्षिपुरुषाधिष्ठितं कर्तव्यम् । एवं त्रीणि वर्षाणि स्थापयितव्यम् । तत्रार्वाक् त्रिभ्यो वर्षेभ्यो यः कारणत आत्मीयं ज्ञापयेत्तस्योद्धृतवक्ष्यमाणषड्भागादिभागकं समर्पयितव्यं परतः स्वकोष्ठे प्रवेशनीयमिति ।

प्रनष्टः स्वामी यस्य रिक्थस्य तत्प्रनष्टस्वामिकं प्रनष्टोऽविज्ञातः रिक्थं धनं त्रयाणामब्दानां समाहारस्त्र्यब्दं त्रिवर्षवत् त्र्यब्दे क्लीबभावः । अब्दशब्दः संवत्सरपर्यायः । **निधापयेत्स्थापयेत्** । **अर्वाक्त्र्यब्दात्**पूर्वं त्रिभ्यो वर्षेभ्यः । **हरेत्स्वामी** स्वीकुर्यात् । अर्वाक्शब्दोऽवधौ । दिग्देशादिकान्पूर्वानाह ।

---

१ य–र–ब्राह्मणानां । २ फ–ख–क्ष–ड–उपायैः । ३ य–र–त्यक्तव्यं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये तु नृपतिर्हरेदिति भोगानुज्ञानमपहारमाहुः । न हि ऊर्ध्वमपि त्रिभ्यो वर्षेभ्यः परकीयस्य द्रव्यस्यापहारो युक्तस्तस्मात्रिभ्यो वर्षेभ्य ऊर्ध्वमनागच्छति स्वामिनि राज्ञा भोक्तव्यम् । तदयं श्लोकः कथं व्याख्यानीयो "यत्किंचिद्दशवर्षाणीति" यदि च परकीयस्यापहारो न युक्त इत्युच्यते भोगोऽपि नैव युक्तः । परकीयस्य वस्त्रादिवद्भुज्यमानं नश्यत्येव तत्रानपहारवाचोयुक्तिरेवापहारफलस्य सद्भावात् जपमुद्रादेस्तु कीदृशो भोग इति वाच्यं । तस्मान्न यथाश्रुतार्थत्यागे कारणमस्ति । हरतिश्च गृह्णात्यर्थे असकृद्दृष्टप्रयोग ऋक्थं हरेदित्यादौ । तस्मात्परेण नृपतिर्हरेत्स्वीकुर्यादित्ययमेवार्थः ॥ ३० ॥

ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि ॥
संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति ॥ ३२ ॥

कथं पुनः स्वामी प्रनष्टे धने स्वामित्वं ज्ञापयितुमलमाह । यः कश्चिदागत्य **ममेदं** स्वं द्रव्यमिति **ब्रुयात्सोऽनुयोज्यो यथाविधि** । अनुयोज्यः प्रष्टव्य इत्यर्थः । कोऽसावनुयोगाविधिः को भवान् ? किं द्रव्यं हारितं किंरूपं किंपरिमाणं किंसङ्ख्याकं संपतितमपतितं वा यदि पतित, तं कस्मिन्देशे ? तथा कुत आगमितं त्वयेत्येवं पर्यनुयोगः कर्तव्यः । स यदि संवादयति **रूपसङ्ख्यादीन्** रूपं प्राणिवस्त्रादिविषयं शुक्लं वस्त्रं गौर्वेत्येवमादि । तथा संख्या दश गावो वा युगानि वा । आदिग्रहणाद्धस्तादिप्रमाणम् सुवर्णादिपरिमाणम् प्रकीर्णरूपकं वा एतत्सर्वं संवादयति तदाऽसौ स्वामी भवति । अतस्तद्द्रव्यमर्हति स्वीकर्तुं संवाद उच्यते । यादृशमेकेन प्रमाणेन परिच्छिन्नं तादृशमेवास्यानेन परिच्छिद्यते । रूपसंख्यादिग्रहणं च प्रदर्शनार्थं स्वामित्वकारणानामन्येषामपि साक्ष्यादीनाम् ॥ ३२

अवेदयानो नष्टस्य देशं कालं च तत्त्वतः ।
वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति ॥ ३३ ॥

मिथ्या प्रवर्तमानस्य दण्डोऽयमुच्यते । यो न ज्ञापयति नष्टस्य धनस्य देशं कालं चास्मिन्देशे काले वा हारितं **तत्त्वतः** परमार्थतो **वर्णं** शुक्लादिकं **रूपं** पटीशाटकयुगं वेत्यादिकमाकारं **प्रमाणं** पञ्चहस्तायामं सप्तहस्तमात्रं वाऽ**वेदयानो** तदा **तत्समं** यावति द्रव्ये मिथ्याप्रवृत्तस्तत्तुल्यं दण्डमर्हति ॥ ३३ ॥

आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः ।
दशमं द्वादशं वाऽपि सतां धर्ममनुस्मरन् ॥ ३४ ॥

आददीत गृह्णीयात्षष्ठं भागं दशमं द्वादशं वा प्रनष्टलब्धाद्द्रव्यादवशिष्टं स्वामिनेऽर्पयेत । तत्र प्रथमे वर्षे द्वादशो भागो द्वितीये दशमस्तृतीये षष्ठ इति ।

---

१ ख-ग-यथाविधिः । २ फ-क-ज्ञपयेदत आह । ३ ग-र-के योगे विधिः ४ ग-र-चेतितम चेतितं वा । ५ ग-र-कस्मिन् थे काले वा ? ६ ग-र-भाराने । ७ ग-र-वस्त्रार्थि । ८ फ-ख-सुवर्ण, चेत् । ९ ग-र-तादृशमेव यद्यन्येन परिच्छिद्यते । १० फ-स्पष्टं ११ फ-ख-ग-परिशिष्टं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा रक्षाक्लेशक्षयापेक्षो भागविकल्पः । सतां धर्ममनुस्मरन् शिष्टानामेषं समाचार इति जानानः ॥ ३४ ॥

प्रनष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम् ।
यांस्तत्र चौरान् गृह्णीयात्तान् राजेभेन घातयेत् ॥ ३५ ॥

प्रनष्टमधिगतं प्रनष्टाधिगतं पूर्वं प्रनष्टं पश्चादधिगतमधिष्ठितं युक्तैस्तत्परैः रक्षपुरुषैस्तिष्ठेत् । तथास्थितमपि यदि केचन चोरा गृह्णीयुस्तान् राजा इभेन हस्तिना घातयेत् । हस्तिग्रहणं तर्हि दृष्टार्थम् ॥ ३५ ॥

ममायमिति यो ब्रुयान्निधिं सत्येन मानवः ॥
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥ ३६ ॥

निखातायां भूमौ गुप्तं स्थापितं धनं निधिरुच्यते। वर्षशतिका वर्षसहस्रिकाश्च निधयो भवन्ति। तत्र यदि भूमेर्विदार्यमाणायाः कथंचित्केनचिन्निधिरासाद्यते स तु राजधनम् । तथा च गौतमः 'निध्यधिगमो राजधनम्'(अ.१० सू. ४३.) इति। एतच्चास्मर्यमाणनिधातृके निधौ द्रष्टव्यम् । तस्याऽऽख्याता षष्ठं लभेतेत्युक्तम् । अयं तु श्लोको यत्राख्यातैव निधाता तत्पुरुषो वा पितृपितामहादिस्तद्विषयो द्रष्टव्यः । ममायं निधिरिति यो ब्रूयात्सत्येन प्रमाणेन ज्ञापयेदित्यर्थः । तस्याददीत षड्भागमिति निश्चिते तत्स्वामिकत्वे राज्ञः षष्ठादिभागग्रहणम् । विकल्पश्चाऽऽख्यातृगुणापेक्षया ॥ ३६ ॥

अनृतं तु वदन्दण्ड्यः स्ववित्तस्यांशमष्टमम् ॥
तस्यैव वा निधानस्य संख्ययाल्पीयसीं कलाम् ॥ ३७ ॥

यस्तु मयाऽयं निहितो मत्पूर्वजेन चेति प्रतिज्ञां न साधयति सोऽन्यवादी दण्ड्यः । यावत्तस्य वित्तमस्ति ततोऽष्टमं भागं तस्यैव वा निधानस्याल्पीयसीं कलां मात्रां भागमित्यर्थः । न तु तदेव द्रव्यं सुवर्णादिकं दापयेत्किन्तु तत्परिमाणमन्यद्वा सममूल्यं यया धनमात्रया दण्डितोऽवसादं गच्छेद्विनयं वा ग्राह्येत । अनुबन्धादिविशेषापेक्षया पुरुषगुणापेक्षया च विकल्प आश्रयणीयः । आतिशायनिकात्पूर्वदण्डात्स्वल्पो दण्ड इति ज्ञापयति । तेन यस्य बहु वित्तं स्वल्पो निधिस्तत्र निध्यपेक्षां मात्रामष्टमां अर्वाचीनां दण्ड्यः । सा ह्यल्पीयसी भवति ॥ ३७ ॥

विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितंनिधिम् ॥
अशेषतोऽप्याददीत सर्वस्याधिपतिर्हि सः ॥ ८३ ॥

---

१ फ-क्ष-एत्र । २ य-र-जानीय । ३ ख-ड-क्ष-फ-अदृष्टार्थं । ४ य-र-तत्र । ५ य-र-ममायं मत्पूर्वजैरिति असत्यवादी । ६ फ-ख-फ-क्ष-अभिधानस्य । ७ फ-क्ष-ख-न निध्यपेक्षा मात्रामस्याऽर्थादीनां दण्ड्य, । ८ ख-दृष्ट्वा, य-र-दृष्ट्वा ।

ब्राह्मणस्तु निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत् ।
तेन दत्तं तु भुञ्जीत स्तेनः स्यादनिवेदयन् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा विद्वान्ब्राह्मणः पूर्वैः पित्रादिभिरुपहितं निधिं यदा पश्येत्तदा सर्वमेवाददीत । न राज्ञे पूर्वोक्तं भागं दद्यात् । अस्यार्थवादः सर्वस्याधिपतिर्हि सः । तथा चोक्तं सर्वस्वं ब्राह्मणस्येदमिति । एतच्चाशेषतो ग्रहणं यो ब्राह्मणस्वामिक एव निधिः । यस्त्वविज्ञातस्वामिकः तस्मिन्विज्ञेयः ब्राह्मणदृष्टोऽप्यस्त्येव राज्ञो भागः । यतो वक्ष्यति "निधीनां तु पुराणानाम्" इति ॥ ३८ ॥

यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ ॥
तस्माद्द्विजेभ्यो दत्वाऽर्धमर्धं कोशे प्रवेशयेत् ॥ ३९ ॥

यो राज्ञा स्वयं निधिरधिगतस्तस्मान्निधेरयं ब्राह्मणेभ्यो दाननियमो राज्ञः । **कोश**शब्देन वित्तसंचयस्थानमुच्यते । **पुराणं निहितं क्षिता**विति निधिरूपानुवादः ॥ ३९ ॥

निधीनां तु पुराणानां धातूनामेव च क्षितौ ॥
अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ॥ ४० ॥

अन्येनापि दृष्टस्य निधे राज्ञा भागः पूर्वोक्तो ग्रहीतव्य इत्यस्य विधेरर्थवादोऽयं निधीनां हि पुराणानामिति धातूनामेव च क्षितावयं त्वप्राप्तविधिः । सुवर्णरूप्यादि बीजं । मृदः सिन्दूरकालाञ्जनाद्याश्च धातवः । सुवर्णाद्याकरभूमीर्यः खनति यो वा पर्वतादिषु गैरिकादि धातूनुपजीवति तेनापि पूर्ववद्राज्ञे भागो दातव्यः । अर्धभागिति अर्धशब्दोऽशमात्रवचनः समासनिर्देशात् । यथा ग्रामार्धो नगरार्धमिति । नपुंसकलिङ्गस्तु समप्रविभागः । इह तु समासे लिङ्गविशेषप्रतिपत्त्यभावात्पूर्वस्य चशब्दवशात् षड्दशाद्वादशादेर्भागस्य प्रकृतत्वात्तद्वचनो विज्ञायते । अर्धं भजत एकदेशं गृह्णातीत्यर्थः । अत्र हेतू **रक्षणादि**ति । यद्यपि क्षितौ निहितस्य केनचिदज्ञानान्न राजकीयरक्षोपयुज्यते तथापि तस्य बलवताऽपहारः संभाव्यते अतोऽस्त्येव रक्षाया अर्थवत्त्वम् । एतदर्थमेवाह । **भूमेरधिपतिर्हि सः** । प्रभुरसौ भूमेस्तदीयायाश्च भुवो यल्लब्धं तत्र युक्तं तस्य भागदानम् ॥ ४० ॥

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम् ॥
राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम् ॥ ४१ ॥

चौरैर्यन्नीतं किञ्चिद्धनं तद्राजा प्रत्याहृत्य नात्मन्युपयुञ्जीत । किंतर्हि य एव मुषितास्तेभ्य एव प्रतिपादयितव्यम् । सर्वग्रहणेन च चण्डालेभ्योऽपि देयमिति ।

---

१ फ-खक्ष-ड-प्राप्नुयात् । २ प्रथमाध्याये १०० श्लोके । ३ अग्रे ३९ श्लोके । ४ ख-क्ष-ड-फ-अन्यैरपि । ५ य-र-समलिङ्गम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चौरात्हृतम्' इत्यन्यस्मिन्पाठे चौरैः समात्हृतामिति विगृह्य साधनं कृतेति समासः। पाठान्तरे चौरत्हृतमिति तृतीयेति योगविभागात्पूर्ववद्वा समासः । अयं त्वत्रार्थो यच्चौरैर्हृतमशक्यप्रत्यानयनं तद्राज्ञा स्वकोशाद्दातव्यम् ।

उत्तरश्लोकार्ध एवं योजनीयः। **राजा तदुपयुञ्जान** इति । अनेकार्थत्वाद्धातूनामुपपूर्वो युजिर्लक्षणया वाऽप्रतिपादन एव द्रष्टव्यः । यो ह्यन्यस्मै प्राप्तकालं धनं न ददाति स्वप्रयोजनेषु विनियुङ्क्ते तेनं तदीयमेव तदुपयुक्तं भवतीति युक्तमुच्यते । राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषं पापम् ॥ ४१ ॥

जातिजानपदान्धर्मान् श्रेणीधर्मांश्च धर्मवित् ॥
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥ ४२ ॥

कुरुकाशिकाश्मीरादिदेशो नियतावधिः जनपदम् । तत्र भवा धर्मा जानपदाः । किंच तत्र भवन्ति ये तद्देशव्यपदेशैरनुष्ठीयन्ते । अथवा तन्निवासिनो जनास्तावत् मंचाः क्रोशन्ति' इत्यत्र जनपदशब्देनाभिधीयन्ते । तेषामनुष्ठेया जानपदाः । तस्येदमिति तद्धितः । जातेर्जानपदा **जातिजानपदा** इति षष्ठीसमासः । जातिमात्रविषया देशधर्मा राज्ञा परिपालनीयाः । **समीक्ष्य** विचार्य किमाम्नायैर्विरुद्धा अथ न तथा पीडाकराः कस्यचिदुत न एवं विचार्य येऽविरुद्धास्तान्प्रतिपादयेदनुष्ठापयेदित्यर्थः । तथा च वक्ष्यति "सद्भिराचरितं यत्स्यात्" इति, अथवा जातयश्च ते जानपदाश्चेति विशेषणसमासः । **जाति**शब्देन च नित्यत्वं लक्ष्यते । प्रशंसामात्रं चैतत् । देशधर्मा अपि शास्त्राविरुद्धा नित्यास्ते नित्यवदनुष्ठेया दृष्टार्थो गोप्रचारोदकक्षरणादयः । यथा ग्रामीणा अत्र प्रदेशे गावो न चारणीया इति समयमाश्रयन्ति कस्याचित्कार्यस्य सिद्ध्यर्थं तत्र यो व्यतिक्रामति स राज्ञा दण्ड्यः । अथवा जनपदे भवा जानपदा देशनिवासिन उच्यन्ते । जात्या जानपदा जातिजानपदाः । जातिर्जन्मोत्पत्तिरिति यावत् । एतेन देशबन्धस्य पुरुषाणां नित्यता लक्ष्यते । ये तद्देशीयास्तद्देशाभिजनास्तन्निवासिनश्च गृह्यन्ते तेषां सर्वविशेषणविशिष्टानामनिदंप्रथमतो जाता ये धर्मास्ते जातिजानपदशब्देनोच्यन्ते । 'वृद्धाच्छे" तद्धिते प्रसक्ते छान्दसत्वादणेव कृतः । अथवाऽभेदोपचारात् पुरुषशब्दस्तत्संबन्धिषु धर्मेषु प्रयुक्तः । एतेनायं देशनियमो धर्माणां स एवंविधात्पुरुषात्प्रतिद्रष्टव्यः । एते हि देशधर्मा देशानां न पुनरार्याणाम् । न हि तिर्यक्समानधर्माणोऽन्यत्रानधिकृताः स्वसमाचारप्रसिद्धं धर्ममनुतिष्ठन्ति।

---

१ फ-ख-क्ष-ड-चौरेभ्यः आहृतमिति । २ व्या. सू. २-१-३२ य-र-चौरैर्हृतमिति तृतीया समासः । ३ फ-ख-क्ष-ड-न तदीयं । ४ य-र-कामि । ५ य-र-जनपदः । ६ य-र-अग्रे ४७ श्लोके । ७ य-र-विशेषतो । ८य-र-देशधर्मा अपि देशधर्माणां यथा जातिर्नित्या एवं देशधर्मा अपि ९ फ-क्ष-ड-ख-दृष्टाथ गोप्रतिचारो दकक्षणादयः । १० य-र-समास । ११ य-र-सम्बन्धस्यः । १२फ-ख-क्ष-ड-तद्देशीयाः । १३ य-र-अनिन्दनं प्रथमतयैव धर्माः । १४ व्या-सू-४-२-११४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मातृविवाहादिः सार्वभौमेन निवारणीयः । स्वदेशाचारवतां तेषां जातिधर्मो जननिवासबन्धेनाभ्यनुज्ञानादाम्नाये विरोधोऽप्यत्र नास्ति अधिकृतानां विरोधात् विरोधो न तिरश्चाम्।

ननु "अहिंसा सत्यमक्रोधः शौचमिंद्रियसंयमः" इति प्रतिलोमाधिकारेणैवोक्तं। म्लेछाश्चा प्रतिलोमा एव तत्र यदि मातृविवाहे मूत्रोत्सर्गे चोदकशुद्ध्यभावेन दुष्यति क इन्द्रियसंयमः कीदृशं वा शौचमिति । उक्तमेतत् । आर्यावर्तिनामेते धर्माः शौचादयः चातुर्वर्ण्ये तु तद्देशनियमो धर्माणा नास्ति केचिदृष्टार्था देशधर्मा इति वक्ष्यामः । एककार्यापन्ना वणिक्कुरुकुसीदचातुर्विद्यादयः । तेषां धर्माः श्रेणीधर्माः । यथा केचनवाणिङ्महत्तरा वचनेन परिच्छिन्नं राज्ञो भागं प्रयच्छन्तीमां वणिज्यां वयमुपजीवाम एष ते राजभागोऽस्माकं यावल्लाभोऽस्तु न्यूनोऽधिको वा । तत्र राज्ञाऽभ्युपगते वणिज्ये लाभातिशयार्थं राष्ट्रविरोधिनीं चेतरेतरव्यवस्थां कुर्वन्ति इदं द्रव्यमियन्तं कालमविक्रेयमयं राज्ञोपदेशेनार्थो दण्डः पतति देवतोत्सवार्थो वा तत्र यदि कश्चिद्व्यतिक्रामति स एवं श्रेणीधर्मव्यतिक्रामन्दण्ड्यः ।

कुलधर्मा इति । कुलं वंशः । तत्र प्रख्यातमहिम्ना पूर्वजेन धर्मः प्रवर्तितो भवति योऽस्मद्वंशजः कुतश्चन धनं लभेत स नादत्वा ब्राह्मणेभ्योऽन्यत्र विनियुञ्जीतेत्यादयो धर्माः। तथा सति योग्यत्वे य एव पूर्वपुरुषाणां याजकः कन्यादिसंप्रदानभूतो वा स एव कार्यास्तदतिक्रामन् राज्ञोऽनुष्ठापयितव्यः । एतेषां च सामवायिकत्वादधर्मत्वशङ्कया पुनर्वचनम् । न चायं संविद्व्यतिक्रम इति वक्ष्यामः ॥ ४२ ॥

स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः ॥
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः ॥ ४३ ॥

पूर्वोक्तस्य जानपदादेर्धर्मस्य दृष्टादृष्टताऽनेन प्रदर्श्यते । स्वानि कर्माणि कुलस्थित्यनुरूपाणि ये कुर्वन्ति ते दूरस्था अपि प्रिया भवन्ति । सर्वस्यान्यो निकटवर्ती संसर्गातिशयात्प्रियो भवति । स्वकर्मकारी तु दूरस्थ एव प्रियः । स्वे स्वे कर्मण्यवस्थिता इत्यनेन परकर्माननुष्ठानमाह । ये न परकर्माणि कुर्वन्ति ते सर्वस्य प्रिया भवन्तीति श्लोकार्थः ॥ ४३ ॥

नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः ॥
न च प्रापितमन्येन ग्रसेतार्थं कथंचन ॥ ४४ ॥

कार्यं विवादवस्तु। तद्राजा स्वयं न प्रवर्तयेत् । कस्यचिद्द्रव्यस्योपघातार्थं धनिनो वा धनग्रहणार्थं न तदीयमृणिकमन्यं वाऽपराद्धमुद्रेजयेत् । एष ते धारयति किमिति

१ अ. १० श्लो. ६३ । २ फ-ख-क्ष-ड-आर्यवर्त्ते मध्यवर्तिनाम् । ३ द्रव्यलाभे । ४ फ-राज्ञे । ५ य-र-वाणिज्यम् । ६ य-र-राजाविरोधिना शब्दाविरोधिना च । ७ य-र व्यपकुर्वन्ति । ८ य-र अयं च राजोपायनार्थो बन्धः । ९ य-र-ण-ल-अतिशयेन परकर्मण्येवास्थिताः । १० य-र-ण-ल-परकर्मण्येवानुष्ठानमाह । ११ फ-ख-ड-च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ममाग्रतो नाक्रोशसि एतेन वा तावदपराद्धं यावदहमेनं निपातयामीत्येवं राज्ञा न कर्तव्यम् । सत्यपि द्वेषे धनलोभे वा । न च प्रापितमावेदितमन्येनार्थिना ग्रसेत निगिरेन्नोपेक्षेतेति यावत् । अवधीरणायां निगिरेदिति प्रयुज्यते । तत्समानार्थश्च ग्रसतिः । तथा च वक्तारो भवन्ति यावत्किंचिदस्योच्यते तत्सर्वं निगिरति न किंचिदयं प्रतिवक्ति ।

अन्ये तूत्तरं श्लोकार्द्धमेवं व्याचक्षते । न च प्रापितं व्यवहारादन्येन प्रकारेणार्थं धनं ग्रसेत स्वीकुर्यात् । यदि हि राजा छल्लेशोद्देशिकया धनदण्डे प्रवर्तेत ततः परलोके दोषो द्रष्टव्यः । राज्ये[1] चोपघातः[2] स्यात् ।

अथेदमपरं केषांचिद्व्याख्यानं[3] । नोत्पादयेत्स्वयं कार्यं राजा साक्षादुपलभ्यास्य कार्यकारिणं न स्वयं किंचिद्ब्रूयात् तस्य पराधीनेन यावद्व्यवहारेण नाकृष्टः । येन व्यवहारदर्शनमेव पराजितस्य निग्रहाय भवति । न राजा । एतच्च करणदानादिष्वेव द्रष्टव्यम् । ये तु स्तेनसाहसिकादयः कण्टकस्थानीयास्तान्राजा स्वयमेवावगम्य गृह्णीयात् । शेषं समानम् । नास्यस्य पूरुष इति अस्य राज्ञः पुरुषोऽधिकारी मनुष्यः ॥ ४४ ॥

यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम् ॥
नयेत्तथाऽनुमानेन धर्मस्य नृपतिः पदम् ॥ ४५ ॥

यदुक्तं न स्वयं दृष्ट्वाऽपि राजा सहसा कंचिदाक्रोशेत[4] वा निगृह्णीयाद्यतः नर्मणाऽप्येतत्संभवति । कथं पुनरेतदेव गन्तव्यम् । किं परिहासकृतमेतदुत क्रोधाद्यनुबन्धकृतमिति । यत आह अनुमानेनैतज्ज्ञातव्यम् । यथा मृगयुर्मृगव्याधो विध्वा मृगं नष्टं दृष्टिपथादपक्रान्तं छिद्रनिसृतैरसृक्पातैः स्रवद्भिः शोणितैः पदं मृगस्य नयत्यासादयत्येवं राजाऽनुमानेन परोक्षे प्रत्यक्षे वाऽर्थकारणं निश्चिनुयात् । धर्मश्च कृतव्यवहारविषयस्तत्त्वावगमः । उक्तस्याप्यनुमानस्य पुनर्वचनं स्मृतिदार्ढ्यार्थम् ॥ ४५ ॥

सत्यमर्थं च संपश्येदात्मानमथ साक्षिणम् ॥
देशं रूपं च कालं च व्यवहारविधौ स्थितः ॥ ४६ ॥

व्यवहारविधौ व्यवहारकर्मणि स्थितः प्रवृत्तो न केवलं व्यवहाराक्षराणि संपश्येद्यावदेतत्परं सत्यादि । तत्र सत्यस्य दर्शनं यद्यप्यर्थिप्रत्यर्थिनोरन्यतरेण शालीनतया परिपूर्णाक्षरं नाभिहितं तथापि यदि राजा प्रमाणान्तरतः पूर्वोक्ताद्वाऽनुमानादेव कथंचिदीदृशोऽयमर्थ इति निश्चेतुं पारयेत् तदा तदाश्रयेन्नोपेक्षेत । अनेनैतन्न सर्वमुक्तमिति । तदुक्तम् (या० व्य० १९) "छलं निरस्य भूतेषु व्यवहारान्नयेन्नृप इति" अर्थस्य दर्शनमर्थशब्दो धनवचनः प्रयोजनवचनो वा । तत्र यदि महान्तमर्थमासादयेत्तदा त्यक्तवाऽप्यन्यानि राजकार्याणि नोद्विजेत[5] । व्यवहारेक्षणं कुर्यादेव ।

---

१ ख-ड-स्वराज्य । २ ग-र-ण-ल-तत्रोपघातः । ३ ग-र-ण-छ-विद्याख्यान । ४ ग-र-ण-छ-आक्रोशं तानुपात्रं वा निगृह्णीयात् । ५ ग-र-ण-छ-नोद्विजितव्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा यदि कश्चिद्ब्रूयात्साक्षिभिरर्थं एतस्माद्गृहीतोऽन्येन वा सत्येन तत्र निरूपयितव्यं यदेतव्द्यवहारपदं यदि स्वल्पं न संभवति धनग्रहणं । अथ गुरुसम्याः साक्षिणश्च दैन्यं गतास्तदा संभावनीयं प्रमाणान्तराच्च निश्चेतव्यम् । एतच्चात्मानं साक्षिणं कृत्वा गवेषणीयम् । एतदुक्तं भवति । कण्टकशोधनन्यायेन चारैश्चारयेत् । अथवाऽत्मानं संपश्येदात्मनोऽवस्थां संपश्येत्कोशक्षयं महाकोशतां वा । अस्मिन् पक्षे साक्षिण इति स्वतंत्रं पदम् । देशस्य दर्शनम् । क्वचिदल्पोऽप्यर्थो महत्वमासादयति । महानपि योऽन्यत्र सत्कविर्लघु भवतीति । एतद्देशस्य दर्शनम् । एवं कालोऽपि द्रष्टव्यः । रूपं व्यवहारवस्तुस्वभावः । तस्य गुरुलघुतां पश्येदिति ।

अन्यैस्तु व्याख्यातम् । सत्यार्थयोः सारफलतां पश्येदात्मानं साक्षिणं कृत्वा । एतदुक्तं भवति अर्थात्सत्यं गुरुत्वेन महाप्रयोजनत्वादुभयोर्लोकसाधनरूपतयाऽऽश्रयितव्यम् । अर्थस्त्यक्तव्योऽसारत्वात् । देशः स्वर्गादिः सत्यसमाश्रयप्राप्यः । कालश्चिरं तत्र वासः । रूपं सुरूपं सुंदरं मनोहरम् । एतदेव विपरीतम् । सत्यत्यागेन केवलार्थसमाश्रयणात् ॥ ४६ ॥

सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः ॥
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ॥ ४७ ॥

सन्तः प्रतिषिद्धवर्जकाः धार्मिका विहितानुष्ठायिनः । यद्यप्येक एव शब्द उभयमर्थं प्रतिपादयितुं शक्नोति तथापि भेदोपादानाद्विषयविभागेनैवं व्याख्यायते । तैर्यदाचरितमनुपलभ्यमानश्रुतिस्मृतिवाक्यं तद्देशकुलजातीनां प्रकल्पयेदनुष्ठापयेत् । अविरुद्धं श्रुतिस्मृतिभिरुपलभ्यमानाभिः । यदुक्तं "जातिजानपदान्धर्मान्" (४२) इत्यत्र श्लोके देशकुलाद्याचारस्य प्रामाण्यं तस्यानेन विशेषः कथ्यते । आम्नायेनाविरोधेन तत्प्रमाणं न विरोधे तत्प्रमाणं । तेन दृष्टार्थान्यपि ग्रामदेशराजकार्याणि शास्त्राविरुद्धान्यादरणीयानि । न विरुद्धानि । यथा क्वचिद्देश ऋणिक आत्मानं विक्रय्य धनं दाप्यते । तच्च "कर्मणाऽपि समम्" इत्यनेन विरुद्धं । अन्यच्च श्लोकेन दर्शितम् अन्यस्य त्वाचारस्य शिष्टसंबन्धितयैव प्रामाण्यमुक्तम् "आचारश्चैव साधूनां" इति । न च तद्विरुद्धार्थसमाचरणेन साधुत्वमुपपद्यते । तस्माच्च नादृष्टाय तद्विषयोऽयमुपदेशः ।

अन्यस्त्वाह । देशान्तरे धार्मिकैः सद्भिर्द्विजैर्यदि विरुद्धं श्रुत्या स्मृत्यन्तरेण वाऽचर्यते तद्देशान्तरेऽपि राजा प्रकल्पयेत् । यथोद्वृषभयज्ञादय उदीच्येषु प्रसिद्धास्ते प्राच्यैर्दाक्षिणात्यैः प्रतीच्यैश्चानुष्ठेयाः । कुतः । आचाराद्धि स्मृतिरनुमातव्या । स्मृतेः श्रुतिः । सा च यद्येवमनुमीयत उदीच्यैरेतत्कर्तव्यमिति तत्र तद्धितस्य बहुष्वर्थेषु

१ य-र-ण-ठ-क्वचिल्लघुर्भवति क्वचिद्गुरुः एतद्देशस्य दर्शनम् । २ य-र-व-ठ-विरुद्धार्थपरिचरणे ।

For Private And Personal Use Only

स्मरणात्तत्र जातस्तत्र भक्तस्तत आगतस्तमभिप्रस्थितः शेष इति चैतस्य लक्षणविकारोमयरूपत्वादन्येष्वप्यर्थेषु प्रतिपदमनुपातेषु तद्धितस्मरणान्नास्त्युदीच्यो नाम य उदीच्यशब्देन निवर्त्येत। ततश्च पुरुषमात्रेणैतत्कर्तव्यमित्यापतति। देशसमाख्याया नियतनिमित्तत्वाभावेऽनियामकत्वात् । अथैवं वाक्यमनुमीयेत। उदीच्यां जातेन तद्देशवासिना वा तदपि व्यभिचारितवतोऽपि नान्यत्र करोति तन्निवास्यप्यन्यत्र जातो न करोत्येव। अथोदग्देशाभिजनस्तन्निवासी चेत्यनित्यत्वादभिजननिवासयोस्तदपि न युक्तमेव। न हि जातिगुणगोत्राणीवाभिजननिवासौ नित्यौ। तस्मान्नित्यस्य न कस्यचिदनुष्ठातॄणामवच्छेदकस्यानुपपत्तेः। सर्वविषया धर्माः। न देशधर्मा नाम केचन सन्ति। अनेनैव न्यायेन कुलधर्मा अपि। कथं 'तर्हि देशधर्माः कुलधर्मा' इति च स्मृतिकारैर्भेदेन व्यपदिश्यन्ते। उक्तं दृष्टार्था नियता व्यवस्था। तत्र धर्मस्तस्य च नियम उपपद्यत इति उक्तम्। कुलं च गोत्रैकदेशः। यस्तु कृत्स्नगोत्रधर्मो यथा न वासिष्ठा वैश्वामित्रमवधीरिति स नित्यत्वाद्गोत्रव्यपदेशस्य तान्यस्येति विरम्यते ॥ ४७ ॥

अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥ ४८ ॥

यत्सर्वेषु व्यवहारपदेषु साधारणं तदुक्तम्। विशेषविवक्षायामिदमाह । सोपचयं कालान्तरे दास्यामीति यो धनमन्यस्माद्गृह्णाति सोऽ**धमर्णः**। यस्तु सोपचयं प्रत्यादास्यामीति प्रयुङ्क्ते स **उत्तमर्णः**। सम्बन्धिशब्दावेतौ। अधमर्णस्यार्थः। **अर्थो** धनं प्रकरणाद्यदेवोत्तमर्णाय देयं तदेवोच्यते। तस्य सिद्धिरुत्तमर्णं प्रतिनिर्यणं। द्वितीयोऽर्थशब्दः प्रयोजनवचनः। अयं समुदायार्थः। उत्तमर्णेन यदा राजा चोदितो भवत्यधमर्णेन यो गृहीतोऽर्थः स मे सिद्ध्यतु दापयतु भवान् राजा त्वधमर्णात्तदा **दापयेद्धनिकस्यार्थम्**। धनमस्यास्तीति धनिकः । उत्तमर्ण एव च प्रसिद्ध्या धनिक उच्यते। दापयेदिति संबन्धाच्चतुर्थी प्राप्ता। सा त्वपूर्णत्वात्संप्रदानभावस्य न कृता। यथा प्नतः पृष्ठं ददाति। रजकस्य वस्त्रं ददातीति। न ह्यत्र मुल्यो ददात्यर्थः। इहाप्युभयोः सत्त्वस्य भावादुभयोः स्वत्वाभावादपरिपूर्णो ददातीत्यर्थः। किमुत्तमर्णवचनादेवासौ दापयितव्यो नेत्याह। **विभावितमिति**। यदा निश्चितेन प्रमाणेन धारयतीति प्रतिपद्यते। अथवा विभावितः स्वयं प्रतिपन्नो यतो विप्रतिपन्नस्य वक्ष्यति। अपह्नवेऽधमर्णस्येति। कथं पुनः स्वयं प्रतिपन्नो विभावित इत्युच्यते। नैष दोषः। विस्मरणे स्वहस्तलेख्यादिना स्वयं प्रतिपन्नश्च भवति। विभावितश्चाप्रतिपन्नश्च जानानोऽपि मिथ्याप्रतिपन्नः ॥ ४८ ॥

---

१ ग-र-घ-ल-लक्षमणाविःकरोति भयरूपत्वात्। २ ग-र-ठ-घ-तद्देशमाख्याया। ३ ख-ङ-क्ष-चतुर्थी। यत क्वासात्वपरिपूर्णत्वात्संप्रदानभावस्य। ४ ख-ङ-क्ष-उभयोश्चाभावात्। ५ ख-ङ-क्ष-प्रतिपत्तिः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः ॥
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम् ॥ ४९ ॥

नेहाप्राप्तार्थादुत्तमर्णाद्राज्ञे भागं वक्ष्यत्यधमर्णाद्दण्डं तत्र स्वभागतृष्णया राजानि उपायान्तरेण धनमार्गणं धनिकानां कारयेयुरतस्तन्निवृत्त्यर्थमिदमुच्यते । **यैर्यै**र्वक्ष्यमाणै-रुपायैः स्वधनं पूर्वप्रयुक्तमुत्तमर्णो लभेत **तैस्तैरधमर्णं दापयेत्** । **संगृह्य** स्थिरीकृत्य । अनेनैवोपायेनैतस्मादेतल्लभ्यत इत्येतान्निश्चित्येत्यर्थः । अथवाऽनुकूलमुपसांत्वनं ग्रहः । उत्त-मर्ण एव उत्तमर्णिकः । उत्तमं च तदृणं चोत्तमर्णं । तदस्यास्तीत्युत्तमर्णिकः । "अत इनि ठनाविति"(व्या. सू. ५।२।११५)रूपं । एवमितरावपि सर्वधनादिषु प्रक्षेप्तव्यावन्यत्र वीरपुरुषको ग्राम इतिवद्बहुव्रीहिणैव सामानाधिकरण्यस्य मत्वर्थे चोक्तार्थाविशेषेण समासः । मत्वर्थीयश्च दुर्लभः । वृद्धिलाभार्थं प्रयोगविषयं धनमृणम् । द्वौ च तस्य संबन्धिनौ प्रयोक्ता ग्रहीता च । प्रयोजकस्य च तदुत्तमं भवति । स्वतन्त्रो धनदाने प्रत्यादाने च । इतरस्य सोपचयदा-नाद्ग्लायामत्वाच्चाधमत्वं । व्युत्पत्तिमात्रं त्वेतत् । रूढ्यैव त्वेतौ प्रयोक्तृग्रहीत्रोर्वाचकौ । के पुनस्तत्रोपाया इत्येतत्प्रदर्शनार्थं उत्तरश्लोकः ॥ ४९ ॥

धर्मेण व्यवहारेण छलेनाचरितेन च ॥
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥ ५० ॥

तत्र धर्मस्कन्धकरीत्या स्तोकं स्तोकं ग्रहणमिदमद्य इदं श्व इदं परश्वः यथा कुटुंबसंवाहोऽस्यैवं वयमपि तव कुटुंबभूताः संविभागयोग्या इत्यादि पठितप्रयोगो धर्मः । यस्तु निःश्वसन्व्यवहारेण दापयितव्यः । अन्यत्र कर्णोदकवद्धनं दत्वा कृषिवाणिज्यादिना व्यवहारयितव्यम् । तत्रोत्पन्नं धनं तस्माद्गृहीतव्यम् । यस्तु व्यवहारो राजनिवेद्यस्तस्य सर्वोपायपरिक्षये योज्यत्वाद्बालग्रहणेन च गृहीतत्वात् । यस्तु साक्षान्न ददाति विद्यमान-धनोऽपि स छलेन दापयितव्यः । केनचिदपदेशेन विवाहोत्सवादिना कटकाद्याभरणं गृहीत्वा न दातव्यम् । यावदनेन तद्धनं न दत्तम् । **आचरितम**भोजनगृहद्वारोपवेशनादि । **बलं** राजाधिकरणोपस्थानम् । तत्र राजा साम्नाऽप्रयच्छंतं निगृह्य च प्रपीड्य दापयतीति । ननु स्वगृहसंबंधिधनादि बलं यतः "प्रकृतीनां बलं राजा" इति पठ्यते अस्मिन्नेव प्रसङ्गे **उशनसा** । अन्ये तु राज्ञ एवायमुपदेश इति वर्णयन्ति । राजधर्मप्रकरणात् । राजा ज्ञापित उपायैरेनं दापयेत्पराजितं स्वयं प्रतिपन्नं च । न तु सहसाऽवष्टभ्य सर्वस्वं धनिने प्रति-पादनीयः । यत उभयानुग्रहो राज्ञा कर्तव्यः । सर्वस्वादाने चाधमर्णस्य कुटुंबोत्सादः स्या-

१ ख–ञ–क्ष–राजानं उपा; क–राजानमुपा । २ ण–धनं ।

For Private And Personal Use Only

त्सोऽपि न युक्तः । उक्तं हि " नावसाद्य शनैर्दाप्यः काले काले यथोदयम् । ब्राह्मणस्तु विशेषेण धार्मिके सति राजनि " इति ॥ तस्मात्किंचनवृद्ध्या संदापनीयः । कुटुम्बादधिकंधनसंभवे सर्वं दापनीयः । सर्वासंभवे च ' कर्मणाऽपि समं कुर्यात् ' इत्यन्यस्मिन्व्याख्याने । छलाचारौ राजानमज्ञापयित्वा न कार्यौ ॥ ५० ॥

यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात् ॥
न स राज्ञाऽभियोक्तव्यः स्वकं संसाधयन्धनम् ॥ ५१ ॥

उक्तस्यैवार्थस्य स्पष्टीकरणार्थः श्लोकः । न छलादिनोपायेन स्वेच्छयोत्तमर्णोऽधमर्णाद्धनं संसाधयन् राज्ञा किंचिद्वक्तव्यः । मामविज्ञाप्य किमित्यस्मादाभरणादि स्वधनसंशुध्यर्थं व्याजेन छद्मना गृहीत्वा किं नास्मै प्रतिप्रयच्छसीति ॥ ५१ ॥

अर्थेऽपव्ययमानं तु करणेन विभावितम् ॥
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः ॥ ५२ ॥

सत्यपि विभावके प्रमाणे यो न स्वयं प्रतिपद्यते न तस्य छलाद्युपायप्रयोगः कर्तव्यः । किंतर्हि राज्ञैव तेन ज्ञापयितव्यस्तत्र राज्ञाऽऽकारितेऽर्थे ऋणेऽपव्ययमानमपह्नुवानं नास्मै किंचन धारयामीति वदन्तं कारणेन साक्षिलेख्यभुक्त्यात्मकेन विभावितं धारयामीति प्रतिपादितं दापयेदुत्तमर्णाय धनदण्डलेशं च स्वल्पं दण्डं दण्डमात्रमित्यर्थः । अन्यत्र दशमं दण्डभागं वक्ष्यति । यस्तु तावद्दातुमशक्तः सोऽल्पमपि दशमाद्भागाद्दण्डं दापयितव्यः । अथवा यः प्रमादात्कथंचिद्विस्मृत्यापजानीते तस्यायं यथाशक्ति दशमभागात्स्वतो दण्डः । कारणं प्रमाणं त्रिविधं । तदन्यैरिह संभवतीति परिगणितम् । तथा चाहुः "यत्र न स्यात्कृतं पत्रं साक्षी चैव न विद्यते । न चोपलंभः पूर्वोक्तो दैवी तत्र क्रिया भवेत्॥" इति ॥ ५२ ॥

अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि ॥
अभियोक्ता दिशेद्देशं करणं वाऽन्यदुद्दिशेत् ॥ ५३ ॥

यदा राज्ञा प्राड्विवाकेन वा संसदि व्यवहाराधिकरणादिदेश उत्तमर्णाय धनमिति उक्तस्यापह्नवोऽपलापः अपलापोऽधर्मेण भवति तदाऽभियुक्तो धनस्य प्रयोक्तोत्तमर्णाय दिशेद्देशं साक्षिणं प्रमाणभूतं निर्दिशेत् । अन्यद्वा करणं लेख्यादि । देशशब्देन लक्षणया धनप्रयोगप्रदेशवर्तिनां साक्षिणामुपादानात् । करणशब्दः सामान्यशब्दोऽपि गोबलीवर्दव-

---

१ क-ख-ड-क्ष-धर्मके । २ ण-कंचनवृद्धंशं दापनीयः । ३ ख-ड-क्ष-फ-कुटुंबादधिकं धनं संस्वः सर्वं दापनीयः ।

यत्र तत्स्यात्कृतं यत्र करणं च न विद्यते ।
न चोपलम्भः पूर्वोक्तस्तत्र दैवी क्रिया भवेत् ॥ १ ॥

४ य-र-म-ल-शपथात्मकेन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्साक्षिव्यतिरिक्तं लेख्यादिकरणमाचष्टे । ततश्च पाठान्तरं " कारणं वा समुद्दिशेदिति " । अस्याप्ययमेवार्थः । अथवाऽयमन्यः पाठः अभियुक्तो दिशेद्देशमिति । अयं वाऽर्थः । यत्राधमर्णो देहीत्युक्तः प्रतिजानीते सत्यमेव धनं प्रतिदत्तं यदसावभियोक्ताऽऽसीत्स एवाभियुक्तः संवृतः । स चाभियुक्तः संदिशेद्देशं कस्मिन्देशे त्वया मे प्रतिदत्तं कालं च निर्दिशेद्देशग्रहणस्य प्रदर्शनार्थत्वात्करणं वा समुद्दिशेत् । अस्ति भा किं तव प्रतिपादने तत्समुद्दिशेत्येवं ब्रूयात् । अथवा दिशेद्देश्यं यत्तस्मिन्काले नहि साक्ष्यादि तस्यैव प्रदर्शनं करणं वेति । वाशब्दः चशब्दस्य स्थाने ॥ ५३ ॥

अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः ॥
यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते ॥ ५४ ॥

उक्तमेवाधमर्णेऽपह्नवाने धनिना राजा ज्ञापयितव्यः । ईदृशी च ज्ञापना कर्तव्या । अस्मिन्देशेऽस्मिन्काल इदं धनमियद्वैतेन मत्सकाशाद्गृहीतम् । स च पृष्टो भावयति । नैतस्मिन् देशेऽहमभवं योऽनेन च ग्रहणकाल उपदिष्टः तदा देशे दीयते । अथवा देशसाक्षिणो व्याख्यातास्तान्साक्षिणो देशकालावसंभवतो निर्दिशति । निर्दिश्य देशादिकमपजानीते ' नैतन्मया निर्दिष्टमिति ' । यश्चाधरोत्तरानर्थान्पौरस्त्यानौपरिष्टांश्च विगीतान्विरुद्धानभिहितान्नावबुध्यते । यद्वा पूर्वं वक्तव्यं तत्परस्माद्ब्रवीति यत्परतस्तत्पूर्वं क्रमभेदं च वचनगतमात्मनो नानुसंधत्ते हीनः स इति । निर्दिशेदिति सर्वत्र क्रियानुषङ्गो भविष्यतीति ॥ ५४ ॥

अपदिश्यापदेश्यं च पुनर्यस्त्वपधावति ॥
सम्यक् प्रणिहितं चार्थं पृष्टः सन्नाभिनन्दति ॥ ५५ ॥

पूर्वेणार्धेनोक्तस्यार्थस्य निगमनमुत्तरेणानुक्तोऽर्थ उच्यते । यदुक्तं " अदेशं यश्च दिशति निर्दिश्यापह्नुते च यः " इति स एवार्थोपादिशेत्यस्य अदेश **एवापदेशः** । तमपदिश्य कथयित्वा **पुनः** पश्चादपधावत्यपसरति नैतौ देशकालौ मम निश्चितौ यावत्सुदेशकालोऽवधारयति तावदयं मह्यमिति पश्चाद्ब्रवीति सोऽपि तस्मादर्थाद्धीयते । **सम्यक् प्रणिहितं चार्थ**मनाकुलं निश्चितमुक्तं यदा पृच्छ्यते यदाऽनेनोक्तं तत्र किं ब्रवीषि केन वा प्रमाणेन स्वपक्षं साधयसीति पृष्टो न संधत्ते सम्यक्प्रणिहितं चार्थमनाकुलं निश्चितमुक्तं कथान्तरं प्रस्तौति विचारावसानेन किल मे पराजयो भवतीति कालमुपक्षिपामीति तस्यापि पराजय एव । अथवाऽपदेशो व्याजस्तमपादिश्योपन्यस्य योऽपसरत्यधुना मे महती पीडा समुत्पन्ना न शक्नोमि प्रतिवक्तुमलीकादिना वा प्रस्थितः सोऽपि जीयते ॥५५॥

---

१ फ-अस्ति तावकंसेदुर्दिशेत्येवं ब्रूयादय न वा । २ य-ए-ण-ळ-इयच्च तेन; फ-इयद्वेतनं ३ तदा आदेशं दिशं अनीयते । ४ न मयोद्दिष्टमिति । ५ ण-किंचिद्ब्रवीषि । ६ सूत्रपदादिना वा ।

For Private And Personal Use Only

असंभाष्ये साक्षिभिश्च देशे संभाषते मिथः ॥
निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत् ॥ ५६ ॥

असंभाषणार्हे देशे उपह्वरादौ साक्षिभिः सह **संभाषत** एकाकी तद्भेदाशङ्कया **निरुच्यमानं** पृच्छ्यमानं निरूप्यमाणं वा **प्रश्नं** विचारवस्तु नेच्छति किंचिद्राजकार्यमुद्दिश्य राजपुत्रमान्याद्यनुग्रहेण च काललाभं करोति यश्चापि **निष्पतेत्** वक्ष्यमाणमेव क्रियापदं स हीयत इति । यदेवोक्तं 'पुनर्यस्त्ववधावतीति' स एवार्थः 'यश्चापि निष्पतेदिति' । पुनर्वचने प्रयोजकमुक्तम् । अमत्यन्तापौनरुक्त्यं मा भूदिति कश्चिद्विशेषं आश्रयितव्यः ॥ ५६ ॥

ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत् ॥
न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ॥ ५७ ॥

उक्तार्थ एव श्लोकोऽयं श्लोकान्तरैर्दृश्यते । पुनर्वचने च प्रयोजनमुक्तम् । "बहुकृत्वोऽपि पथ्यं वादितव्यमिति" अक्षरार्थस्त्वर्थिना निःशेपिते पूर्वपक्षे प्रतिवादी ब्रूह्यस्मिन्वस्तुनीति पृष्टो यदि न ब्रूयात्पुनःपुनः पृच्छ्यमानेऽपि यो हि सम्यगुत्तराभावान्मिथ्योत्तरवादित्वादमुनैव मे पराजयो भवति तूष्णींभूतस्य तु मे संशय एव पराजये इत्यनया बुद्ध्या नोत्तरं ददाति सोऽपि जीयते । वक्ष्यति चात्र कालावच्छेदम् " न चेत्त्रिपक्षात्प्रब्रूयादिति" (श्लो.९) । सद्यो ह्याकृष्टस्य पूर्वपक्षार्थानवबोधादुत्तराप्रतिपत्तेर्युक्तं कालहरणम् । अत्र च दिवसैः पञ्चभिर्दशभिर्द्वादशभिर्वर्षदीपद्भदतास्त्रिपक्षसमाप्तिर्न त्वियन्तं कालं तूष्णींभाव एव यश्चातोऽधिकः कालः संस्थितोऽपि कश्चित्संवत्सरं प्रतीक्षेत प्रतिभावयेदिति न युक्तमादर्तुं यतोऽप्रतिभावे प्रतीक्षाकारणम् । सा संवत्सरादूर्ध्वं भवतीति किमित्यकारणम् । न चैष नियमः केनाचित्प्रकारेण नावगम्यते प्रतिभानवतः संवत्सरेण प्रतिभा भवतीति तस्मात्तावन्त्येवाहान्युपेक्षा युक्ता यावद्भिः पूर्वपक्षार्थावधारणं भवत्युत्तरं च प्रतिभाति । एतच्चामुकस्य मन्दधियोप्येतावन्मात्रैरहोभिर्भवतीति नाधिकं कालमुपेक्षणीयम् । पूर्वपाक्षिकस्य तु तदहरेव स्वार्थविनिवेशनं युक्तम् । यत इदमेष मे धारयतीदं वाऽनेन ममापकृतमिति निश्चितं तस्य भवति । स्वेच्छया ह्यसौ प्रवर्तते केवलं तस्मै स्वपक्षमावेदयते । किमित्यनिश्चितः स्वार्थो भवति । उत्तरपाक्षिकस्त्वविदितसंबन्धस्तदानीमेव राजपुरुषैरानीयमानः कथमिव स्वपरपक्षौ निश्चिनुयात् । पक्षद्वयनिरूपणं हि तदस्य तदानीमेवापतति । नान्यथोत्तरपाक्षिको भवति । तस्मात्पूर्वपाक्षिकस्य साध्ये वस्तुनि तदहःपूर्वपक्षसमाप्तिर्द्विदिवसलाभो वा । उभावपि चैतौ पक्षौ स्मृत्यन्तरपरिगृहीतौ । तथा ह्याह

१ ण—किंचिद्राजकार्यमुपदादिनाज्यदेशेन ग्रामान्तरं नायापगच्छेत् । २ य—र—ण—ळ—मेव । ३ य—र—ण—ळ—इव । ४ क्ष—आक्षिप्तस्य; य—र—ण—ळ—अकृष्टस्य । ५—य—र—ल—व—सपठितेऽपि । ६—अप्रतिभायाम् । ७—भवंती । ८—आकारणम् । ९—स्वस्थं प्रतिभासतीति; । १०—प—ण—भवति । ११—सबलं च । १२—निश्चित । १३—आवेदितसंबंध । १४—क्षक्ये य—र—ल—व—प्रतिभावतीनि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सुनिश्चितबलाधानः पूर्वपक्षी भवेत्सदा। दशाहं द्वाशाहं वा स्वपक्षं परिशोधयेत्" इति ॥ तथेदमपरम् (या. व. व्य.७) "ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्।"

या तु संवत्सरपरीक्षा सा मूलासंभवादप्रमाणम्। न हि व्यवहारस्मृतावष्टकादिवद्वेदमूलता शक्यते वक्तुम्। अकार्यरूपत्वादर्थस्य प्रमाणान्तरविषयत्वे च तदसंभवः प्रतिपादितः। एषाऽपि त्रिपक्षोपेक्षा न सर्वत्र। यत उक्तम् (या. व. व्य. १९)

"साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम्।
विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥" इति।

साहसादौ हि चिरमुपेक्ष्यमाणेऽपरमपराध्नुयात्। अतः सद्यो विवादो विधीयते। न चात्र स्मृत्यादयोऽनुक्तहेतवः संभवन्ति। साहसादिकारणे हि तदानीमेव राजानं वेदयेत्। तीव्रसंवेगता हि तत्र भवति। वस्त्राद्युपहारेण तदुपेक्षायां नाशाशङ्का भवति। साक्षिणस्तत्र यदृच्छया संनिहिता अपि भवन्ति। ते हि देशान्तरं गता नामजात्यादिभिर्न विज्ञायन्ते। ततः स्वाभाविकप्रमाणाभावः।

किंच ऋणादानादिषु कदाचिदितरेतरं संदधते। न तत्र राज्ञो हस्तप्रक्षेपः। क्रमेण च संशुद्धौ स्मृतिरुपयुज्यते तदा कियद्दत्तमिति। साहसकारी तु राज्ञाऽवश्यं निग्रहीतव्य इतरेण संधीयमानोऽपि। तस्मादृणादिषु कालहरणं साहसादिषु सद्य इति स्थितम्। तदुक्तं "गहनत्वाद्विवादानामसामर्थ्यात्स्मृतेरपि। ऋणादिषु हरेत्कालं कामं तत्त्वबुभुत्सया"॥ यदा संकुलः पूर्वपक्षो भवति तदा गहनत्वान्न शक्यते ग्रहीतुमनाकुलो विलुप्तक्रमोऽपि गृहीतः प्रतिवचनकाले महत्वान्न शक्यते सर्वेण स्मर्तुमिति स्मृत्यन्तरस्यार्थः। उक्तं च न विभावयेत्। साध्यं वस्तु निर्दिश्य न साधयति साधनस्याभावात्। विपक्षे वा भावात्। न च पूर्वापरं विद्यात् उक्तमेतत् तस्मादर्थाद्व्यवहारवस्तुनः स हीयते पराजितो भवतीत्यर्थः॥ ५७॥

ज्ञातारः संति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः॥
धर्मस्थः कारणैरेतैर्हीनं तमिति निर्दिशेत्॥ ५८॥

ज्ञातारः साक्षिणः पुरुषा मम **संती**त्युक्त्वा यदोच्यते कथ्यतामिति तदा तूष्णीकि आस्ते। न तान्देशनामजातिभिर्विशेषणैः कथयति तदा एतैः प्रत्येकं पूर्वमुक्तैः **कारणैरिह हीनोऽसौ** व्यवहाराद्भ्रष्ट इति। **धर्मस्थो** धर्माधिकरणस्थः प्राड्विवाको **निर्दिशन्नि**श्चितं ब्रूयाज्जितोऽयमिति। यथैव विपक्षबाधकं प्रमाणवृत्त्या पराजय एवं स्वपक्षे साधनाभावादपि। अभावनिश्चयश्च पुनः पुनरवसरेऽनुपन्यासात्कारणान्तरस्य चानुपन्यासेऽभावादिति। ज्ञातार इति

१-य-प-ख-ड-श-फ-अपसप्नुध्यत्। २-राजानं वेदवेत्। ३-ख-ड-श-फ-अपहाणेति समञ्चित पाठ। ४-य-र-ण-ल-महनत्वाद्विवादात्र। २-ख-ड-क्ष-सान्ति ज्ञातर। ३-मपि ४-र-ण-ठ-तूष्णीकामास्ते। ५-विशेष ६-व्यवहारभ्रष्ट इति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृन्नन्तमेव । तत्रेदमिति द्वितीयान्तं युज्यते । "खलर्थतृनामिति" (व्या. सू. । २।३।६९) षष्ठीनिषेधात् । हीनं तमिति द्वितीयान्तः पाठः । इतिशब्दः प्रकारार्थो द्रष्टव्यः । एभिरुक्तैः प्रकारैरन्यैश्चैवंविधैर्हीनं तन्निर्दिशेत् । यदा तु वाक्यार्थपरामर्शः तदा हीनोऽसाविति पाठः । वाक्यार्थस्य कर्मत्वाद्द्वितीयाया अभावः । एते पराजयहेतवः । न त्वाकारेङ्गितादिवद्व्यभिचारणाः । यो हि पुनः पुनर्विचारावसरे न सन्निधीयते संनिहितो नोत्तरं प्रतिवक्ति न तत्र निश्चितमिदं भवति । नास्य जयहेतुरस्तीति । यदि च सर्वदैवानुत्तरवादिनं न पराजयेद्राजा ततो व्यवस्थाभङ्ग आपद्यते । पौर्वापर्यानवबाधस्त्विङ्गितादिवद्द्रष्टव्यः । यः सर्वकालं वाग्मी प्रगल्भं प्रतिपत्तिमांस्तस्येङ्गितादयोऽन्यथाभवंतः पराजयहेतौ प्रमाणान्तरेणानिश्चितेऽपि लिङ्गदर्शनस्थानीया उपोद्वलका भवन्ति ॥ ५८ ॥

अभियोक्ता न चेद्ब्रूयाद्बध्यो दण्ड्यश्च धर्मतः ॥
न चेत्त्रिपक्षात्प्रब्रूयाद्धर्मं प्रति पराजितः ॥ ५९ ॥

अभियोक्ताऽर्थी राज्ञान्तिकं च पुरुषमाहूय यदि व्यवहारपदं न कथयति तदा निष्प्रयोजनाद्बध्यो दण्ड्यश्च । दण्डबन्धने दण्डपरिमाणे च गुणवत्तां प्रत्यर्थिन आव्हानेन च हानिमपेक्ष्य कल्पनीयानि अतस्तदहरेवार्थिना विवदितव्यम् । प्रत्यर्थी तु न **चेत्त्रिपक्षाद्ब्रूया**दित्यर्थस्तदा नासौ दण्ड्यो बन्धयितव्यो वा । किं तर्हीयता कालेनोत्तरे सत्यपराजित एव । **धर्मं प्रति** धर्मत एवायं पराजयो न छलमित्यर्थः । **त्रिपक्षादि**ति पात्रादिषु द्रष्टव्यस्तेनेकाराभावः । अर्थतत्त्वमस्य लोकस्यास्माभिः प्राङ्निरूपितम् ॥ ५९॥

यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत् ॥
तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् ॥ ६० ॥

येन पञ्चसहस्राणि दत्तानीति प्रमाणान्तरानिश्चितं लेख्यादौ तु करणे देशसमारोपितानि प्रमाणान्तरं संवत्सराख्यमिति निश्चित्येदमपश्यत्केवलेन लेख्यप्रमाणेन सर्वत्र प्रवर्तमानछलव्यवहारीति द्विगुणं दण्ड्यम् । यस्य तु विस्मृत्याऽप्यन्यथाप्रवृत्तिराशङ्क्यते तस्य दशकं शतम् । एवमितरस्यापि । न तु सर्वापह्नवे दशभाग एकदेशापह्नवे द्विगुणमिति । किन्तु शाठ्यादन्यथाप्रतिपद्यमानौ द्विगुणं दण्ड्यौ । विस्मृतिदारिद्र्याभ्यां दण्डमुत्तरम् । **यो यावन्तमर्थमपह्नुवीता**पजानीतेऽधमर्णो **मिथ्या** याचति विपरीतं धनं **वदे**दुत्तमर्णः तावुत्तमर्णाधमर्णावधर्मज्ञौ **द्विगुणं दमम्** । **तदि**त्यपह्नूयमानधनपरामर्शः । यावदपह्नुतं ततो द्विगुणं दमो दण्डः । अधर्मज्ञग्रहणाच्च लिङ्गान्निश्चितछलविषयोऽयं दण्ड इत्युक्तम् ॥ ६० ॥

---

१ र-ण-छ-राजपुरुषं ।

For Private And Personal Use Only

पृष्टोऽपव्ययमानस्तु कृतावस्थो धनैषिणा ॥
[1]त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसंनिधौ ॥ ६१ ॥

यः **कृतावस्थ** आहूतोऽभियुक्तो गृहीतप्रतिभूश्च राजसकाशे प्राड्विवाकेनान्यैर्वा पृच्छ्यते किमस्मै धारयसि नेति **पृष्टः सन्नपव्ययते**ऽपह्नुते ह्नुवानो **धनैषिणा** स्वधनं पूर्वप्रयुक्तमात्मनः साधयितुमिच्छता **साक्षिभिर्भाव्यो** विप्रतिपन्नः प्रतिपादयितव्यः । [2]**त्र्यवरै**स्त्रय अवरे येषां तैस्त्र्यवरैः । अवरमपचयातिशयमाह । यद्यत्यन्तं न्यूनास्तदा त्रयः स्युः । अन्यथा त्रिभ्य ऊर्ध्वम् । **नृपब्राह्मणसंनिधाविति** । ननु च तेषामेव यैर्न्यायः प्रारब्धस्तत्र तत्संनिधान एव साक्षिप्रश्नः प्राप्तः । किमनेन नृपब्राह्मणसंनिधाविति । नैवं प्रमाणपुरुषप्रेषणेनापि साक्षिप्रश्न उपपद्यत इति । साक्षात्प्रष्टव्य इति पुनर्वचनम् ॥ ६१ ॥

यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः ॥
तादृशान्संप्रवक्ष्यामि यथा वाच्यमृतं च तैः ॥ ६२ ॥

साक्षिलक्षणोपन्यासः श्लोकः । **यादृशाः साक्षिणो** यज्जातीया यद्गुणयुक्ताश्च **धनिभि**रुत्तमर्णै**र्व्यवहारेषु** धनप्रयोगादिषु कर्तव्या**स्तादृशा**न्वक्ष्यमाणेन कथयिष्यामि । **यथा च वाच्यं** वक्तव्यं पृष्टैः सद्भिस्तैः पूर्वाह्ण इत्यादि तमपि प्रकारं वक्ष्यामीति ॥ ६२ ॥

गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः ॥
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥ ६३ ॥

कृतदारपरिग्रहा **गृहिणः** गृहशब्दो दारेषु वर्तते । ते हि स्वकलत्रपरिभवभयान्न कूटमाचरन्ति । आत्मनि केचिन्निरपेक्षा अभिभवन्ति । अन्यदेशान्तरगमनेनात्मानं रक्षयिष्याम इहैव च कचिद्गुप्ता भविष्यामो धनं मित्रं वाऽर्जयाम इत्यनया बुध्द्या अनृतमपि वदन्ति । कुटुम्बिनस्तु स्वकुटुंबभयात्क वाऽत्मानं न परिरक्षिष्याम इति दूरं कृत्वा कुटुंबस्य सापेक्षतया राजदण्डभयान्नान्यथा प्रवर्तन्ते । **पुत्रिण इति** पुत्रस्नेहात्पुत्रिणः । अपुत्रदारश्च साक्षिप्रश्नकाले साध्वाचारोऽपि कदाचिन्न संनिहितो भवति । स हि नैकस्मिन् देशे आस्थानवान् भवति । एवं **मौला अपि** व्याख्येयाः । मौला जानपदास्तद्देशाभिजनास्ते हि स्वजनज्ञातिमध्ये पापभीरुतया न मिथ्या वदन्ति । मूलं प्रतिष्ठा । सा येषामस्ति ते मौलाः । अर्थकथनमेतत् । तद्धितस्तु भावार्थ एव कर्तव्यः । यो हि यत्र भावः सोऽपि तस्यास्तीत्यविरुद्धम् । **क्षत्रविट्शूद्रयोनयः ।** न [3]ब्राह्मणः । सर्वदा ह्यस्याध्ययनाध्यापने विहिते । अन्वहं वाऽग्निहोत्रहोमस्तत्र दूरस्थे राजनि धर्मोपरोधोऽस्य माभूदित्यसौ न कर्तव्यतयोपादीयते । यदृच्छयाऽवगतार्थस्तु साक्ष्यन्तराभावे गरीयसि कार्ये मुख्यतमः स साक्षी । तथा च " ब्रूहीति

१ ख ड–धनैषिणाः । २ ख ड क्ष–त्रिवरैः । ३ ग ण ठ–ब्राह्मणोऽत्र नोपात्तः ।

ब्राह्मणं पृच्छेदिति " साक्षिप्रश्नो भविष्यति। योनिशब्दः प्रत्येकमभिसंबध्यते। क्षत्रयोनिरुत्पत्तिः कारणमस्यासौ क्षत्रयोनिः । क्षत्रियजातीय इत्यर्थः । क्षत्राद्वा योनिर्जन्मास्येति पञ्चमीति योगविभागात्समासोऽप्युक्तः। अर्थिना यदोक्तं भवत्येते मम साक्षिणः सदा साक्षिकर्मणि योग्या भवन्ति। ये तु स्वयमागत्य साक्ष्यं ददति न ते साक्षिणः । **अनापद्या-**पत्साक्ष्यन्तराभाव इति केचित् तदयुक्तम्। विसंवादकत्वमसाक्षित्वे कारणम्। तत्संवादकान्तराभावेनापैति न वयं ब्रूमः प्रतिषिद्धसाक्षिभावाविद्यमानानृताभिधानहेतवोऽर्थसंबंध्यादयो वाऽस्यामवस्थायां प्रतिप्रसूयन्ते। किं तर्हि येषां कदाचिदाहूयमानानां धर्मविरोधो भवति श्रोत्रियादीनां तेषामविद्यमानेष्वन्येष्वनुभूतार्थानामिदं प्रत्यनुज्ञानं न पुनरनृतानाम् ॥ ६३ ॥

आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः ॥
सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ॥ ६४ ॥

आप्ता अविसंवादका यथादृष्टार्थवादिनः येषां लोको विप्रलम्भकत्वं न संभावयति धर्मानुष्ठानपरा ये ख्याताः । **सर्वधर्मविदः** श्रौतं स्मार्तमाचारनिरूढं च सर्वं धर्ममिह नरकः फलमिह स्वर्ग इत्येवं निरवशेषं जानन्ति ते ह्यनृताभिधाने नरकं पश्यन्तो बिभ्यति। **अलुब्धा** उदारसत्वा न स्वल्पं धनं बहु मन्यन्ते। एकैकस्य समस्तानि सर्वाणि विशेषणानि। साक्षिक्रियायां गुणभूतत्वाद्गुणे च साहित्यस्य विवक्षितत्वात्। **सर्वेषु वर्णेष्विति** सर्वकार्येष्वित्यर्थः । न जातिनियमोऽस्तीत्युक्तं भवति। यत्पुनर्जातिव्यवस्थावचनं तदुपरिष्टाद्वक्ष्यामः। तदेतदुक्तं भवति । सर्वैः कार्यिभिः सर्वे वर्णा यथासंभवं साक्षिणः कर्तव्याः। **कार्येषु** ऋणादानादिषु। यथोक्तलक्षणाः । **विपरीतांस्तु वर्जयेत्**। यद्यपि विशिष्टेष्वभिहितेषु तद्विपरीतानां प्रसङ्ग एव नास्ति तथापि लौकिकोऽयं पर्युदासः । प्रायेण हि लौकिका अन्यविषयेऽन्ये तद्विपरीतं निषेधयन्ति । तथा च भवन्ति वक्तारः क्रिया हि द्रव्यं विनयति नाद्रव्यमिति। किंचाविसंवादकमिह प्रधानं साक्षिलक्षणं तच्च न विधिमुखेन शक्यावसानम्। किन्तु विसंवादकरणाभावमुखेन। न ह्यविसंवादकत्वं प्रत्यक्षदृश्यं तद्धि यथार्थाभिधानम्। श्रोत्रग्राह्ये च वस्तुनि कुतः प्रत्यक्षो यथार्थनिश्चयः। प्रत्यक्षत्वे हि नैव साक्ष्यवगमोऽन्विष्यते । न च सर्वत्र परोक्षे वस्तुनि शब्दावगम्ये प्रमाणान्तरसंवादसंभवः। तस्माद्यानि भूयस्त्वेन मिथ्याभिधानकरणतया दृष्टानि न भावनिश्चयेनाविसंवादकत्वमनुमीयंते अतस्तत्प्रदर्शनार्थोऽयमुपक्रमो विपरीतांस्तु वर्जयेदिति ॥ ६४ ॥

---

१ फ-क्षत्रियो योनिः ॥ ख-र-च-छ-ब्राह्मणोऽत्र नापात्रः । २ र-ण-छ-वदन्ति । ३ र-ण-छ-क्ष-ड-ख-तु । ४ ख-ड-ग आप्यन्यासः । ५ ड-क्ष-अन्य विषये स्येत द्विपरीत । ६ र-ण-छ-साक्षावगमो । ७-तदा ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः ॥
न दृष्टदोषाः कर्त्तव्या न व्याध्यार्ता न दूषिताः ॥ ६५ ॥

तानीमानि संभाव्यमानामिथ्याभिधानकरणत्वेन पठ्यन्ते । तत्रार्थसंबन्धिन उत्तमर्णाधमर्णाद्या उत्तमर्णा ह्यधमर्णवचनेन पराजीयमानास्तदानीमेव रोषावेशवशिताः स्तंभयन्ति । धनं प्रत्यादातुमधमर्णम् अतोऽसौ सन्निहितधनत्वाच्चित्तमनुवर्तमानः शक्यते । तस्मादसौ न साक्षी । उत्तमर्णोऽपि निर्धनेऽधमर्णे व्यवहारजयाच्च धनप्राप्तौ मह्यमयं प्रतिदास्यतीत्यनया बुद्ध्या कदाचित्तत्पक्षानुगुणं वक्तीति सोऽप्यसाक्षी ।

अथवाऽर्थः प्रयोजनं यस्य साक्षिणो विवादिभ्यां किंचित्प्रयोजनं साध्यं तेन वा तयोः स उपकारगन्धान्न साक्षी । यो वा व्यवहारगतेनार्थेन समानफल इत्येवंप्रकारार्थसंबन्धिनः । **आप्ता** मित्रबान्धविकर्या[1] कार्याभ्यन्तराः पितृव्यमातुलादयः । **सहायाः** प्रतिभूप्रभृतयो । **वैरिणः** प्रसिद्धाः । **दृष्टदोषा** अन्यत्र कृतकौटसाक्ष्या अन्यद्वा प्रतिषिद्धमाचरितवन्तः । **व्याध्यार्ता** रोगपीडिताः । न पुनरीषद्रोगिण इत्यार्त्तग्रहणं पीडितस्य हि क्रोधविस्मृत्यादयो मिथ्यावचने संभाव्यन्ते । **दूषिताः** पातकिनोऽभ्यस्तोपपातकाश्च । दृष्टदोषग्रहणं तु तेषामेव कृतनिग्रहाणां परिग्रहार्थम् । ते हि राजभिर्वृत्तिदण्डग्राहितविनयत्वान्न संप्रति दूषिता भवन्ति ॥ ६५ ॥

न साक्षी नृपतिः कार्यो न कारुककुशीलवौ ॥
न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥ ६६ ॥

त्वं मे साक्षी भविष्यसीति व्यवहारकृता[2] धनविसर्गादिकाले साक्षित्वे नृपतिर्नाध्येषितव्यः । तस्य हि साक्ष्यं ददतः पक्षपातमाशङ्केरन् । प्रभुत्वाद्वा ददतोऽन्यतरस्य कार्यनाशः । न च साक्षिधर्मेण प्रष्टुं युज्यते[3] । तद्देशवासी च यद्यपि लेखादिना संवादयेत्तथाऽपि साक्षिधर्मं सर्वं न कुर्यादिति तद्देशवासिनो राज्ञः समानकरणप्रतिषेधः ।

कारुकादीनां स्वकार्योपरोधशङ्कया संगत्या च ते जीवन्ति स्वभावश्चैष जानपदानां यत्स्वयं निश्चितवन्तोऽपि जीवामहे वयमिति जिताः साक्षिकादिभ्यो रुष्यन्ति । ततश्च सार्वलौकिकी संगतिः कारुकादीनामुच्छिद्यते । किं च प्रकृतिपरिलघुत्वात्तेषां वृत्तयश्चलयितुमपि शक्यन्ते । तथा च पक्षपातं भजेरन् । **श्रोत्रियस्य** तु साक्षित्वे कर्तव्यता प्रतिषिध्यते राजवन्न पुनरप्रत्ययितता । न हि श्रोत्रियत्वं प्रामाण्यं विहन्ति जनयत्येव विशेषतः । न हि श्रोत्रियत्वं विसंवादहेतुतयोपलभ्यमेनमुतरत्रापि । **कारुकाः** शिल्पोपजीविनः सूपकारायस्कारादयः । **कुशीलवाः** नटनर्तकगायनाद्याः । **श्रोत्रियो** वेदपाठको

---

१ फ—बान्धवतया र—ण—ढ—राजाभिवृतदण्डः; फ—ख—ढ—क्ष—राजभिभृतदण्डा । २ र—छ—व्यवहारिष्यतत्वेन प्रयोगादि काले राजा साक्षित्वेन नाध्येषितव्यः । ३ र—छ—प्रयुज्यते ।

For Private And Personal Use Only

यः स्त्वध्ययनतत्परः स इह गृह्यते । अथवा श्रोत्रियत्वं कर्मानुष्ठानोपलक्षणार्थम् । तेनानुष्ठानपरस्य तद्विरोधतया प्रतिषेधः । लिङ्गस्थो ब्रह्मचारी । परिव्राजकपाखण्डलिङ्गधारिणस्तु कुशास्त्रवर्तित्वादेवाप्राप्ताः । सङ्गेभ्यो विनिर्गता वेदसंन्यासिनो गृहस्थाः । सङ्गो लाल्सतया विषयोपभोगो दृष्टार्थकर्मारम्भो वा ॥ ६६ ॥

नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत् ॥
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेंद्रियः ॥ ६७ ॥

अध्यधीनशब्दोऽत्यन्तपरतंत्रगर्भदासादौ रूढ्या वर्तते । अन्ये तु तुल्यसंहितत्वादध्याधीन इति पठन्ति । अध्याधीनो बन्धकीकृतो **वक्तव्यो**ऽनुशास्यः शिष्यपुत्रादिराचार्याधीनत्वात् । अथवा कुष्ठादिना कुत्सितकायः । **दस्युः** भृतिदासः वैतनिकः 'स ह्युपादासयति' कर्माणीति **नैरुक्ते** निरुक्तः । तस्य च दिवसभृतत्वान्नात्यन्तपारतन्त्र्यमस्तीति पृथगुपदेशः क्रियते । कर्मजीवनत्वापत्तौ तथाविधानां जीविकोच्छेदः लघुवृत्तित्वाच्च लोभादिसंभवेनाप्रत्ययिततापि । चौरस्य तु शब्दान्तरोपादानान्न दस्युग्रहणेन ग्रहणम् । कठिणहृदयो वा दस्युः क्रूरचेष्टः । **विकर्मकृ**च्छास्त्रविरुद्धं यः कर्म करोति । यथा ब्राह्मणः क्षत्रियवृत्तिं वैश्यो वेत्यादि । **वृद्धो** वयःपरिणामादसंस्मृतिः । **शिशु**र्बालोऽप्राप्तव्यवहारः । एवं व्यवरग्रहणेनैकस्याप्राप्तेः प्रतिषेधो द्वयोः कस्यांचिदवस्थायां सम्यनुज्ञानार्थः । यथा त्रिहस्ताचारोपत्रे यद्यपि तत्र तृतीयलेखको भवति तथापि लेखनमात्रस्य व्यापारो न साक्षित्व इति कस्यचिदियमाशङ्का स्यात् । **अन्त्यो** बर्बरचण्डालादिः । स्वधर्मादन्यत्र शूद्रयोनित्वेन प्राप्तस्य प्रतिषेधः । **विकलेन्द्रियो**ऽन्धबधिरादिः शरीरपीडयोपलब्धिर्विकलत्वाच्च ॥ ६७ ॥

नार्त्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः ॥
न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः ॥ ६८ ॥

आर्तो बन्धुधनादिनाशेन । **मत्तो** मद्यमदक्षीबः । अपस्मारगृहीत **उन्मत्तः** पिशाचकी । **क्षुत्तृष्णोपपीडितो** बुभुक्षापिपासाभ्यां व्यथितः । **श्रमः** कायचेष्टाधिक्येन दूराध्वगमनयुद्धादिनोत्पन्नस्तेनार्तः पीडितः । **कामः** स्त्रीसङ्गाभिलाषस्तेनाऽऽर्तो विप्रलंभोऽत्यन्तसंयोगो द्वावपि तावत्प्रत्ययौ चित्तोपप्लवात्तत्साधने च विप्रलंभाशङ्कया च । **क्रुद्धो**ऽन्यस्मिन्नपि बहुतरक्रोधः । स हि क्रोधेन व्याप्तचित्तत्वान्न यथावदनुभवति नाप्यनुभूतं स्मरति । **तस्करश्चौरः** । यद्यप्यसौ विकर्मकृत्तथाऽपि भेदोपादानं ब्राह्मणबलीवर्दन्यायो द्रष्टव्यः ॥ ६८ ॥

---

१ फ–स्वाध्यायन । २ र–ळ–अभ्यासता; ३–ख–ड–क्ष–विषयोपभोगा; [illegible] ४ ख–ड–क्ष–र–ण–ळ–अध्यायतो । ५ –ख–ड–क्ष–अपादासयति । ६ ण–कूटचेष्ट । ७ ख–ड–क्ष–अन्यत्रा शूद्र योनित्वात । ८ ख–ड–क्ष–उपलब्धि । ९ लेखसाधने ।

स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः ॥
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः ॥ ६९ ॥

यत्र पुमांसावर्थिप्रत्यर्थिनौ तत्र स्त्रीणां साक्ष्यं नास्ति। यत्र तु स्त्रिया सह पुंसकार्ये स्त्रीणामेव चेतरेतरं स्वल्पं तत्र भवन्त्येव स्त्रियः साक्षिण्यः। न चायं नियमः स्त्रीणां स्त्रिय एव साक्ष्यं कुर्युर्न पुमांसः। केवलं पुंविषये व्यवहारे कचिदेव स्त्रीणां साक्ष्यं यतोऽस्थिरत्वादिति हेतुरुपात्तः। भवन्ति काश्चन स्त्रियो ब्रह्मवादिन्य इव सत्यवादिन्यः स्थिरबुद्धयश्च।

द्विजानां सदृशा द्विजाः यः प्रमाणतरो द्विजः स विसदृशं शङ्क्यमानप्रमाणभावमपि दिशन्साक्ष्ये न श्रद्धेयवचनो भवति। यतस्तथाभूतेन प्रमाणभूत एव द्रष्टव्यः। स हि तस्य सदृशः सदृशानां हि समानं देशः स्थानमितरेतरकार्यज्ञत्वं च संभाव्यते। इतरस्य तु तत्प्रदेशसन्निधिर्यत्नेन साध्यः सदृशत्वौचित्यात्सिद्ध एव। एवं हीनस्य हीनगुणोऽपि सदृशाद्ग्रहीतव्यो न तूत्कृष्टगुणो न ग्रहीतव्यः। सादृश्यं जात्या शिल्पादिना वा गुणेन क्रियया वा श्रुताध्ययनादिकया समानशीलतया च। एतच्च नातिमहति कार्ये द्रष्टव्यम्। न हि हीनगुणेषु प्रत्ययितता निश्चीयते। **अन्त्यानां** चण्डालश्वपचादीनां तादृशा एवान्त्ययोनयः। अन्ते भवा अन्त्याः। सा योनिरुत्पत्तिकारणं येषामिति विग्रहः। प्रदर्शनं चैतत्। ये समाना जातिशिल्पशीलादिभिस्तेषामिहानुक्तानामपि वणिक्कारुकुशीलवादीनां हेतोः समानत्वात् ॥ ६९ ॥

अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम् ॥
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये ॥ ७० ॥

अन्तर्वेश्मनि यत्कार्यमतर्कितोपनतं वाग्दण्डपारुष्यसंग्रहस्तेयसाहसादिरूपमरण्ये वा तादृशमेव। शरीरे च पीड्यमाने तत्काले दस्युभिरन्यैर्वा यतः कुतश्चिद्गृहीतं यो वा धननिमित्तं प्रतिभूत्वेन स्थापितो न च साक्षिणामेव सर्वो राजपुरुषादिकं न चोपद्रवंति। रहसि चोक्तो वाऽर्थमाददते अप्रकाशं तादृशे विषये यः कश्चिदनुभावी स साक्षित्वेन ग्रहीतव्यः। तर्हि यावता कालेन यथोक्तलक्षणाः साक्षिणो लभ्यंते तावंतं कालं न प्रतिपालयन्ति। **अनुभावी** साक्षाद्द्रष्टा यः कश्चिदिति न जातिनियमः। सदृशं च तदा नास्तीत्याह। **अन्तर्वेश्मनीति** विरलजनोपलक्षणार्थं। तेन शून्यदेवतायतनादीन्यपि विरलजनानि गृह्यन्ते। तथा **चारण्यग्रहणमस्यैवार्थस्य** प्रदर्शनार्थम्। अन्ये तु **शरीरस्यापि**

१–ख–ड–क्ष–युवतिविषये। २–र–ण–ल–कार्यज्ञता। ३ फ–कणिकार। ४ सादृश्यं इति युक्तः पाठः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चात्यय इत्यन्यथा व्याख्यानयन्ति । कार्यशरीरस्यातिपाते यः कश्चित्साक्षी यत्कार्यमनुष्ठीयमानमतिपतत्युत्तरकालमशक्यानुष्ठानं तत्र साक्षिणां जातिलिङ्गवयःसादृश्यकसंबन्धाभावादिनियमो नास्ति । एतदेवोत्तरेण दर्शयति ॥ ७० ॥

स्त्रियाऽप्यसंभवे कार्यं बालेन स्थविरेण वा ॥
शिष्येण बन्धुना वाऽपि दासेन भृतकेन वा ॥ ७१ ॥

स्त्रियेति लिङ्गव्यत्यय उक्तः । **बालेन स्थविरेण** वेति वयोव्यत्ययः । **शिष्येणे**त्यादिना संबन्धिनः प्रतिप्रसवः । एतच्च प्रदर्शनमेवंविधानां नियमानां व्यभिचाराय । तेन ज्ञातिसादृश्येऽपि नाद्रियेते । सुहृद्वैरिदृष्टदोषादयस्तु नेष्यन्ते । येषां किंचिदसत्याभिधानकरणत्वं दृष्टं नातिव्यापकं ते न प्रतिप्रसूयन्ते । येषां तु बहुव्यापकं क्वचिदेव गुणातिशयं चेति व्यभिचरेत्ततः क्वचिदेव तत्साक्षिणः । उक्तं च

"एकः सहस्राल्लभ्येत न सौहार्दान्न शात्रवात् । नार्थसंबन्धतो वाऽपि पुरुषोऽनृतमाचरेदिति" ॥

असंभवेऽन्येषां साक्षिणां स्त्रियाऽपि कार्यं । किम्? साक्ष्यमिति पूर्वश्लोकादनुषज्यते । **शिष्येणेति** मौखस्त्रौवसंबन्धप्रदर्शनार्थमेतत् । **बन्धुनेति** अहार्योत्पत्तिकायानसंबंधप्रतिप्रसवः । सत्यपि संबन्धत्वे यो नातिप्रत्यासन्नः स गृह्यते । तेन भ्रातृव्यमातुलश्वशुर्यादयो न साक्षिणः । तथाविधे हि बन्धुशब्दो रूढः । **दासेनेति** स्वस्वामिसंबन्ध उपलक्ष्यते । न स्वाम्युपाध्यायो याजकश्च सर्वविधे विषये साक्षिणः । **दासो** गर्भदासो **भृतको** वैतानिकः । ननु चासामर्थ्याद्बालादयः साक्षित्वे निरस्ताः । न ह्येते साक्ष्यमवधारयितुं शक्नुवन्ति 'बुद्धेरस्थैर्यात्परिपाकादिभि' र्दोषैस्तदापदि प्रतिस्वमानसमञ्जसमिति न ह्यापदि शक्तिरस्याविर्भवति । यो हि म्रियात्तेन वा नवौदनः पक्तव्यः सत्याग्नौ तु पक्तव्य इति तादृगे तत्स्यात् । नैष दोष एवमर्थमेवोत्तरश्लोक आरभ्यते ॥ ७१ ॥

बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा ॥
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा ॥ ७२ ॥

अयमस्यार्थः । नेहात्यन्ताप्राप्तनिर्बुद्धभ्रान्तबुद्धयो बालादयो गृह्यन्ते येनानारभ्योऽर्थ उपदिष्टः स्यात् । किन्तु ये शक्नुवन्त्यवधारयितुं न चातिस्थिरचेतसस्तेभ्यः अनुज्ञायन्ते तेषां वचनमनुमानेन परीक्ष्यम् । यदि संबद्धं वदन्ति न च खलन्ति न शङ्क्यमानदोषेण केनचित्संगतास्ततः प्रमाणम् । तदाह तेषां **मृषा वदतामस्थिरां वाचं जानीयात्** । एतदुक्तं भवति । वाचोऽस्थैर्येण मृषात्वं निश्चिनुयात् । तत्र वाचोऽस्थैर्यं पदानामितरेतरमसंगतिः ।

१ फ–नापि । २ ग–र–गुणातिशयवति शयव्यभिचारः ते कचिदेव न साक्षिणः । ३ फ–निरुद्ध । ४ फ–अनारभ्योर्थ । ५ फ–तदा । ६ फ–तत्र । ७ फ–माने । ८ फ–वाचो स्थैर्यं वचनानामितरेतरासंगतिः ।

For Private And Personal Use Only

अस्फुटाऽपरिपूर्णाक्षरत्वं च । एतच्च बालादीनामवस्थोपलक्षणार्थम् । ये च वयसा व्याधिना वाऽप्यवस्थामियतीं गता यैदन्यद्विवक्षन्तोऽन्यदुच्चारयन्ति तच्चाव्यक्तं न ते साक्षिणः । एतत्प्रत्यक्षवेद्यमसाक्षित्वकारणम् । अन्यत्तु रागद्वेषधनलोभादिसाधारणमनुमानतः परीक्ष्यम् । तच्चोक्तमेव । उत्सिक्तचेतसः प्रकृत्यैवोपप्लुता अधीरधियः ॥ ७२ ॥

साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च ॥
वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ॥ ७३ ॥

सहो बलं तदाश्रित्य यत्क्रियते तत्साहसम् । राजवाल्लभ्येन महापक्षतया स्वशरीरबलेन बलवदाश्रयेण वा यदकार्यकरणं तत्साहसम् । यथा वस्त्रपाटनाग्निदाहकेशच्छेदाद्यन्यत्प्रसिद्धम् । अत्र साक्षिणो न परीक्ष्याः । 'गृहिणः पुत्रिण' इत्येवमादिरूपपरीक्षाऽत्र प्रतिषिध्यते । या तु व्यभिचारहेतुतया शङ्क्यते रागद्वेषधनलोभादिरूपा सा कर्तव्यैव । दृष्टमूलत्वादस्याः स्मृतेरित्युक्तम् ॥ ७३ ॥

बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः ॥
समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥ ७४ ॥

यत्र भूमिभागादौ विप्रतिपत्तिर्द्वाभ्यां च भोगसाधनं साक्षिणो निर्दिष्टाः । ते च केचिदर्थिनो भोगमाहुरपरे प्रत्यर्थिनस्तत्र बहूनां वचनं ग्राह्यं । समसङ्ख्येषु तु ये गुणैरुत्कृष्टा बहुगुणा इत्यर्थः । एकेन वा गुणेन दृष्टे पुरुषार्थोपकारिणा सातिशयेन युक्ताः । गुणवतां समगुणानां भेदे जातिरादर्तव्या । सर्वसाम्ये शपथः । अन्यद्वा अनुमाने बहुत्वं परिगृह्णीयात् । बहूनां वचनं प्रमाणीकुर्यात् । द्वैधं परस्परविरुद्धार्थाभिधानम् ॥ ७४ ॥

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति ॥
तत्र सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते ॥ ७५ ॥

ननु च "अनुभावी तु यः कश्चित्" इत्यनेनोक्तमेवैतत्कथं चान्यथासिद्धिराशङ्क्यते येनेदमुच्यते दर्शनश्रवणाभ्यां साक्ष्यसिद्धिरिति । अत्रोच्यते । साक्षी व्यवहरिष्यता कर्तव्यः त्वं मे साक्षी भविष्यसि इत्युक्तं । तत्र य एवमनुक्तः स न प्राप्नोति एवमर्थमिदमुच्यते । यस्तत्र संनिहितः कथंचिदनुभविता त्वं स्मर्तुमर्हस्यावयोरमुमर्थमित्येवमनुक्तेऽपि भवत्येव साक्षी । समक्षदर्शनात्साक्षादनुभावाच्छ्रवणाच्च समक्षशब्दानुषङ्गः कर्तव्यः । यत्कुतश्चिदेकेन श्रूयते ततोऽन्येन तत्परंपराश्रुतं तेन परंपराश्रावी न साक्षी । यथैतेनेदमकार्यं कृतमिदमस्मै वा धारयतीति लोकप्रसिद्ध्याऽगतम् । न तु प्रमाणतः । तत्र समक्षदर्शनं

१ फ–परिपूर्णाक्षरत्वं; य–अस्फुटा अपि पूर्णाक्षरत्वं च । २ ण–य–र–नियती नीताः । ३ फ–अन्यद् । ४ फ–प्रबललोभादिः । ५ फ–तथा च । ६ य–प्रकृतौ; ण–र–प्रकृते । ७ य–र–प–यत् । ८ फ–वल्लभेन । ९ य–यदा । १० फ–कर । ११ फ–तत्र । १२ ण–र–लोभरूपा १३ फ–कर्तव्या । १४ फ–ख–ड–क्ष रूढदृष्टमूलतान । १५ फ–समानं । १६ य–र–ण–चाभावी च यः । १७ य–सिद्धिमाशंक्यते । १८ फ–साक्षि । १९ फ–तत्र । २० फ–अस्मात् । २१ फ–नोक्तः । २२ फ–इमम् । २३ फ–भवान् । २४ फ–साक्ष्य । २५ फ–ननु ।

साक्षादनुभवनमर्थविषयमृणप्रयोगदण्डपारुष्यादि साक्षादृष्टं चक्षुर्व्यापारेण वाक्पारुष्यं-तथेदमस्मान्मया गृहीतमित्येवमादिविषयं शब्दश्रवणं यद्यपि दृशिरुपलब्धिमात्रवचनः तथापि यद्यत्वृत्तानुरोधितया श्रोत्रज्ञानं श्रवणं भेदेनोपात्तम् एतावच्चात्र विवक्षितम् । प्रमाणतो येनानुभूतं स साक्षी । समक्षशब्दग्रहणं प्रमाणमात्रोपलक्षणार्थम् । तेनानुमानादिना ऽप्यनुभूतमनुभूतमेव । अत आप्तागमाच्छ्रुतमप्रत्यक्षमपि प्रमाणम् । उत्तरस्तु श्लोकार्धोऽनुवाद एव । सत्यवचनस्य विहितत्वात् । असत्यवादिनो धर्मार्थहानेश्च प्रमाणान्तरावगतत्वात् ॥ ७५ ॥

साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि ॥
अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ॥ ७६ ॥

असत्याभिधाने साक्षिणां फलदर्शनार्थमिदम् । दृष्टश्रुतशब्द उपलब्धिपर्याय इत्युक्तम् । तस्मादन्यदनुपलब्धं तच्चेद्ब्रवीति । **आर्याः** सभ्याः सभ्यकारिणः । तेषां **संसदि** सभायामवाङ् अधोमुखः **नरकं**[11] यामं यातनास्थानं गच्छति । **प्रेत्य** मृत्वा **स्वर्गाच्च हीयते** भ्रश्यति । यदप्यनेन स्वर्गारोहणिकं[13] कर्म कृतं तदपि कौटसाक्ष्यपापस्य गुरुत्वात्प्रतिबध्यते । न तु स्वर्गस्य कर्मणः पापेनान्येन नाशः । स्वफलविधित्वात् कर्मणामन्यत्र प्रायश्चित्तेभ्यः ॥ ७६ ॥

यत्रानिबद्धोऽपीक्षेत शृणुयाद्वाऽपि किंचन ॥
दृष्टस्तत्रापि तद्ब्रूयाद्यथादृष्टं यथाश्रुतम् ॥ ७७ ॥

ननु चोक्तं समक्षदर्शनादित्यत्र यथाकथंचिदनुभूतवतोऽनियुक्तस्यापि साक्ष्यमस्तीति । तत्र किमनेन यत्रानिबद्धोऽपीति । को वा[15] विशेषः । उच्यते । लेख्यारूढस्य व्यापारविशेषाद्युक्तं साक्षित्वं न पुनरनारूढस्य । आरोहणस्यानर्थक्यप्रसङ्गाद्दुःसाक्षित्वम् । अत एतामाशङ्कामपनेतुमिदमुच्यते । पूर्वस्तु श्लोको यत्र मुक्तकाः साक्षिणः । अयं तु यत्र ससाक्षिकं लेख्यम् । **अनिबद्धो** लेख्यमनारूढोऽपीत्यर्थः । ईक्षणश्रवणे व्याख्याते । शेषं सुबोधम् ॥ ७७ ॥

एको लुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योऽपि न स्त्रियः ॥
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः ॥ ७८ ॥

एकस्य पुनः प्रतिषेधो लोभादिरहितस्य प्रतिप्रसवार्थः । तेन सत्यवादितया निश्चित एकोऽपि साक्षी भवत्येव । स्त्रियस्तु न कथंचित्साक्ष्यमर्हन्त्यल्पा वा बह्व्यो वा शुच्योऽपीति

---

१ फ–प्रायणं । २ ण–य–र–वचनं । ३ फ–तत्रापि । ४ ण–य–र–न साक्षी । ५ फ–गमाश्च तस्य प्रत्यक्षमपि— । ६ ण–य–र–र्धोनुवाद– । ७ र–ण–एवैति । ८ र–ण–दर्शनमिदं । ९ र–ण–उपलब्धे, । १० फ–तद्ब्रवीति । ११ फ–सत्कारिणः । १२ फ–त्याति । १३ फ–णकं । १४ फ–अनेन । १५ फ–यथावदभूतवचने । १६ फ–शेष । १७ फ–अन्वारूढस्य । १८ फ–प्रसंगादुत्रयोः साक्षित्वे अत एतदाशङ्कामपनेतुमिदमुच्यते । १९ फ–अनुकाः । २० फ–अल्पावबोधावाशुच्योपीति ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुणवत्योऽपीत्यर्थः । अत्र हेतुः । **स्त्रीबुद्धेरस्थिरत्वादिति।** प्रकृतिरेषा स्त्रीणां यद्बुद्धेश्चापलम्[1] । गुणास्तु यत्नोपार्जिता अपि प्रमादालस्यादिना व्यपर्यन्त्यतः[2] स्वाभाविकमस्थैर्यं तिष्ठेदेव । यथाऽऽमयाविनो घृतादिनोत्पन्नेऽप्यग्नेः[3] स्थैर्ये स्वल्पेनापि प्रमादे पुनः सहजामयाविर्तानुवृत्तिरतोऽनया[4] शङ्कया[5] गुणवतीष्वपि तासु नाश्वासः। यत्तु "स्त्रियाऽप्यसंभवे कार्यम् " [श्लो० ७१] इति तद्यत्र तत्क्षणादेव पृच्छ्यन्ते । यत्रेयमाशङ्का न भवति केनचिदासां संचलितं[6] मन इति । यत्र तु कालव्यवधानं तत्र जीयमानेन कदाचिदनुकूल्यन्ते[7] इति न क्वचित् साक्षिन्यः ।

दोषैश्चान्येऽपि ये वृताः । रोगादिभिर्दोषैर्ये स्त्रीभ्योऽन्येऽपि पुरुषा वृत्ता आक्रान्ता भूयिष्ठदोषा इत्यर्थः । के पुनरमी दोषा नाम । उक्तं च । रागादयः शास्त्रप्रतिषिद्धाः शंक्यमानव्यभिचारहेतुभावाः । यद्यपि केवलेन स्वशब्देनैवोक्ता दोषाः तथाप्यनुक्तपरिग्रहार्थमिदमपुनरुक्तं सामान्यविशेषाभिधानं हि सर्वत्र ग्रन्थकारा अनुमन्यन्ते । अन्ये त्वकारप्रश्लेषेणालुब्धोऽप्येको न साक्षी किं पुनर्लुब्ध इत्येवमाचक्षते । तथा च द्वयोरप्यननुज्ञानं भवति । शुच्य इतीकारो दुर्लभो "वोतो गुणवचनात् इति" (व्या. सू. ४।१।४४) विधानात् । कृदिकारादिति केचित्समर्थयन्ते ॥ ७८ ॥

स्वभावेनैव यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकम् ॥
अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम् ॥ ७९ ॥

साक्षिणो यत् **स्वभावेन व्यावहारिकं** ब्रुवन्ति तद्ग्राह्यम् । यत्तु स्वभावाद्विचलितारुणया धर्मबुद्ध्या स्त्रीप्रत्ययमाश्रित्य धर्मार्थं ब्रूयुस्तदपार्थकमग्राह्यमित्यर्थः । यद्यन्यथादृष्टस्यार्थस्य वचनं तत् स्वभावतो यत्त्वन्यथा माभूदस्य तपस्विनो मद्वचनेन बाधे इत्यनया बुद्ध्या तदपार्थकं यथाकेनचिदावेदितं भवति अनेनाह माकुष्ट इति । तत्र परेणापह्नुतम् । साक्षिण आहुः । सत्यमाकुष्टं न कर्मणा न तु व्यारोषेणेति । तत्राकुष्टं इत्येतत्साक्षिणां वचो ग्राह्यम् । न कर्मणेत्येतदुत्तरवादिनानुक्तत्वादपृष्टमुक्तमपि न ग्राह्यम् ।

व्यावहारिकं व्यवहारगतमपगतप्रयोजनमपार्थकम् । अन्ये व्याचक्षते । यदप्रगल्भादिभिः स्खलितपदमुदाहरन्ति न तावता तदनादेयं किन्तु स्वभाव एषामुपलक्षितव्योऽनुमानेन । किममी अप्रागल्भ्यात्स्खलन्ति उतासत्याभिधायितयेति । तत्तु प्रागुक्तं न चाक्षरार्थं इत्युपेक्ष्यम् ॥ ७९ ॥

सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ॥
प्राड्विवाकोऽनुयुंजीत विधिनाऽनेनं सान्त्वयन् ॥ ८० ॥

---

१ फ–चपलत्वं । २ फ–न्यतयान्यतः । ३ फ–घृतादिनोत्पत्ते, । अग्ने । ४ फ–ता । ५ ण–र–न शङ्कया । ६ फ–चलितं । ७ फ–अनुकूलास्त । ८ फ–हेतवः । ९ फ–ग्रहणार्थं । १० फ–कृदिकारात । ११ फ-यद्यथा । १२ फ–तश्च । १३ फ–ताप । १४ फ–आकुष्टो नर्मणा । १५ फ–रोपेण । १६ ण–र–य–स्वभावता । १७ फ–अभिधायेति । १८ फ–अपेक्षम् । १९ फ–तेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सभायामन्तः **सभान्तः**। शौण्डादित्वात्समासः। व्यवहारदेशगता उभयोरर्थिप्रत्यर्थिनोः संनिधानेऽनुयोक्तव्या वक्ष्यमाणेन विधिना। **सान्त्वयन्** अपरुषम्। पारुष्येण हि प्राड्विवाकाद्बिभ्यतोऽप्रकृतिस्थानं सर्वं स्मरेयुः। संस्कारभ्रंशहेतुत्वाद्भयस्य प्राड्विवाको राज्ञा व्यवहारदर्शनाधिकृतो रूढ्योच्यते। यद्यप्येवंयवार्थो राजन्यपि संभवति पृच्छति विविनक्तीति। तथा च भेदेन प्रयोगदर्शनम्।"अमात्यः प्राड्विवाको वा यः कुर्यात्कार्यमन्यथा" इति। पृच्छतीति प्राट् "क्विब्वचिप्रच्छिश्रिद्रुश्रुप्रुवां दीर्घोऽसंप्रसारणं चेति" प्राट्। विशेषेण धर्मसंकटेषु विवेक्तीति विवाटः। "कृत्यल्युटो बहुलम्"इति (व्या. सू. ३।३।११३) कर्तरि घञ्। "चजोः कुघिण्ण्यतोः" (व्या. सू. ७।३।५२) इति कुत्वम्। प्राट् चासौ विवाकश्च प्राड्विवाकः ॥ ८० ॥

यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिश्चेष्टितं मिथः ॥
तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ॥ ८१ ॥

यज्जानीथ **अस्मिन्** व्यवहारवस्तुनि **अनयोर्मिथः** अस्मदप्रत्यक्षं रहसि वा **चेष्टितं** वृत्तं **तत्सर्वं सत्येन** तथ्येन **ब्रूत** कथयत। **युष्माकं ह्यत्र साक्षिता** भवतामत्र प्रामाण्यम्। युष्मद्वचनाधीने सत्यानृते। इत्यनेन प्रोत्साह्यन्ते। साक्षिभूतेऽस्मिन् कार्ये इति सामान्यनिर्देशेऽप्यखिलवस्तुश्रावणं सामर्थ्याद्द्रष्टव्यम्। न ह्यश्रुतविशेषाः प्रश्नविषयं वेदितुमर्हन्तीति ॥ ८१ ॥

*** सत्यं साक्ष्ये ब्रुवन् साक्षी लोकानाप्नोत्यनिन्दितान् ॥**
इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ॥ ८२ ॥

इतःप्रभृति सत्यवचनार्थः साक्षिणामनुयोगविधिः। **सत्यं** वदन् **लोकान्** स्वर्गादिलक्षणान**निन्दितान**गर्हितानभिप्रेतफलभोगहेतून् लभते **साक्षी**। जातिवचनो वा लोकशब्दः। शुभे जन्मनि जायत इत्यर्थः। अस्मिंश्च जन्मनि कीर्तिः ख्याति**रनुत्तमा** यस्या अन्यदुत्तमं प्रकृष्टं नास्ति तां लभते। साधुवादो जनेनास्मै दीयते। यस्मादेषा च वाक् सत्या सरस्वती **ब्रह्मणा** प्रजापतिना **पूजिता** ॥ ८२ ॥

---

*[विक्रयाद्यो धनं किंचिद्गृह्णीयात्कुलसंनिधौ ।
क्रमेण स विशुद्धं हि न्यायतो लभते धनम् ॥ १ ॥]

१ फ–ब्रुवन्। २ य–स्मारेयुः; ण–र–स्मारेयेयुः। ३ ण–र–राजा। ४ फ–अत्र यथार्थे। ५ ण–र–विविक्तेषा। ६ य–र–ण–यत्। ७ फ–साक्ष्यं। ८ फ–आप्नोति पुष्कलात्। ९ फ–सत्यार्थे। १० य–र–ण-अनुपयोगविधिः ११ य–र–ण–साधुवादो सज्जनेन दीयते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्भृशम् ।।
विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतम् ।। ८३ ।।

पूर्वेण दृष्टादृष्टशुभाशुभप्रदर्शनेन सत्यवचने साक्षिणः प्रोत्साहिताः । अनेन विपरीताभिधाने दुःखोत्पत्तिदर्शनं सत्यवचनार्थमेवैतत् । साक्षिणः कर्म **साक्ष्यं** । तत्रासत्यं ब्रुवाणो **वारुणैः** पाशैर्बध्यते पीड्यते । **भृशमत्यर्थं विवशः** परतन्त्रीकृतः सर्वचेष्टासु वाक्चक्षुर्गतास्वपि **शतं** यावज्जन्मनि वारुणाः पाशा घोराः सर्परज्जवो जलोदराणि वा । एतद्दोषपरिहारार्थं सत्यं वदेदिति विधिः । **आजातीरिति** नायं मर्यादाभिविध्योराङ् । तथा सति पञ्चमी स्यात् । तस्मादुपसर्गोऽयमनर्थकः । प्रलंबत इति यावत् । द्वितीया चेयं आवृत्तिश्चात्र गम्यते । शतं जन्मान्यावर्तते उदरगृहीतः ।। ८३ ।।

सत्येन पूयते साक्षी धर्मः सत्येन वर्धते ।।
तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ।। ८४ ।।

पूयते शुद्ध्यत्यन्यस्मादपि पापान्मुच्यत इति यावत् । शेषं गतार्थम् ।। ८४ ।।

आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथाऽऽत्मनः ।।
माऽवमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ।। ८५ ।।

एष एवार्थो विस्पष्टीक्रियते उत्तरेण श्लोकेन ।। ८५ ।।

मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः ।।
तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ।। ८६ ।।

न शब्दो व्यवहितः । पापकृतः कूटादिकारिण एवं जानते । **न कश्चिदस्मान्पश्यतीति** । इतिकारेण मन्यतेर्वाक्यार्थः कर्मेति प्रतिपाद्यते । न नः कश्चित्पश्यतीत्येष वाक्यार्थः । तांस्तु देवा वक्ष्यमाणाः पश्यन्ति । स्वस्यान्तरात्मा । तदुक्तम्—"आत्मैव ह्यात्मनः साक्षी" इति । ननु कः पुनरयं पापचारी तस्य च कोऽन्यो द्रष्टा ? यावताऽऽत्मैव कर्त्ता शुभाशुभानां चान्तरपुरुषो द्रष्टेति । सत्यम् । तस्यैव देवतात्वमध्यारोप्य भेदेन कर्मकर्तृव्यपदेशोऽनृतनिवृत्त्यर्थः । देवतारूपस्त्वं जानीष्व । तात्त्विकमात्मीयमान्तरं रूपं शारीरं तथा बाह्यमनात्मीयमसारमेत-

---

* [ब्राह्मणो वै मनुष्याणामादित्यस्तेजसां दिवि ।
शिरो वा सर्वगात्राणां धर्माणां सत्यमुत्तमम् ।। १ ।।]*
[नास्ति सत्यात् परो धर्मो नानृतात् पातकं परम् ।
साक्षिधर्मे विशेषेण तस्मात्सत्यं विशिष्यते ।। २ ।।]*
[एकमेवाद्वितीयं तु प्रब्रुवन्नावबुध्यते ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ।। ३ ।।]+

१ फ—दृष्टानृतवचनबद्ध इत्यर्थः । २ य-र-ण—मेव तेषां कर्म साक्ष्यं । ३ फ—तावत् । ४ फ—जलचराणि । ५ फ—प्रलंब । ६ य-र-ण—मन्यते; वाक्यार्थोऽप्रतिपाद्यते मन्यन्ते वाक्यात्प्रति । ७ फ—स्वयं चान्तरात्मा । ८ फ—कारणं पापाचारस्तस्य । ९ फ—रूपावं जानीषे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुपभोगार्थं मा दुष्कृतं कार्षीरिति प्रोत्साह्यते। अतो 'माऽवमंस्थाः स्वमात्मानम्' माऽवज्ञासी र्नृणां साक्षिणमुत्तमम्। अन्यो हि साक्षी अस्मिन्नेव लोके। अयं तु मृतस्यापि साक्ष्यं ददाति। तस्मादेतस्माद्भेतव्यम्। नासत्यवादिना कदाचिन्मन्यते। आत्मान्तरं प्रतिपन्नस्य किमेष मे द्रष्टाऽपि करिष्यतीति तन्न। **गतिरात्मा तथात्मनः**। आत्मानमन्तरेणान्या गतिर्नास्ति। न हि द्वावात्मानावेकस्य भवतः। अन्ये तु मन्यन्ते परमात्मा साक्षी संसार्यात्मानो नियोज्या इति भेदः॥ ८६॥

के पुनस्ते देवा रहस्यपि प्रच्छन्नं पापमाचरन्तं ये पश्यन्त्यत आह

द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः॥
रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम्॥ ८७॥

हृदयशब्देन हृदयायतनो लिङ्गपुरुष उच्यते। देवादीनां द्रष्टृत्वं अचैतन्यौ श्रुत्याऽऽरोप्यते। दर्शनान्तरे तु महाभूतानि देवतात्मतया चेतनान्येव। तथा च पृथिवीभारावतरणाय ब्रह्माणमुपागमदिति वर्ण्यते। सर्वगतत्वात्तेषां न किंचिदप्रत्ययमस्तीति सर्वशरीरिणां वृत्तं शीलं चात्मनः कायगतं शुभमशुभं च जानते॥ ८७॥

देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्॥
उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन्॥ ८८॥

देवा दुर्गामार्तण्डादयः प्रतिमाकल्पिताः। **शुचीन्** कृतस्नानाचमनादिविधीन्। **शुचिः** प्रष्टा स्वयमपि तथाविध एव स्यात्। ऋतमिति श्लोकपूरणार्थमेव। प्रसिद्धमन्यत्॥ ८८॥

ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवम्॥
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥ ८९॥

क पुनरियं तृतीया गोबीजकाञ्चनैरिति। यदि तावत्पृच्छेदिति क्रियासंबन्धात्करणमुच्यते तदनुपपन्नम्। शब्दो हि तत्र करणम्। नार्थः। नैष दोषः। यथा गवादीनि प्रश्नकरणत्वं प्रतिपद्यंते तथा व्याख्येयम्। पातकैरित्युभयशेषो विज्ञेयः। गोबीजकाञ्चनैः पातकैरिति। तेनायमर्थो भवति। गोबीजकाञ्चनविषयैः पातकप्रदर्शनैः पृच्छेदिति। गां हत्वा हत्वा वा यत्पातकं तद्भवति तव मिथ्या वदत इति प्रश्नवाक्यं पठितव्यम्। एवं वक्ष्यमाणैः पातकैः शूद्रं पृच्छेत्। पातकशब्दस्त्वपातकप्रदर्शनार्थेष्वभिधानेषु द्रष्टव्यो मुख्यानां प्रश्नकरणत्वाभावादित्युक्तम्॥ ८९॥

ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः॥
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा॥ ९०॥

---

१ फ– पोषार्थं। २ ग-र–अन्तर्गतो। ३ फ–द्रष्टृत्वं अचेतनेषु चैतन्यमारोप्यते। ४ फ–अर्थतक। ५ फ–कृतमिति। ६ फ–अर्थसिद्धमन्यत्। ७ फ–पुनरिव। ८ फ–अस्ति। ९ फ–तदयमर्थो। १० ग– अपातकशब्दश्च।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणं हत्वा ये लोका नरकादिलक्षणाः प्राप्यन्ते तत्कारिभिस्ते तव भवन्ति मिथ्यावदतस्तस्मात्सत्यं ब्रूहीत्यनुयोगः । यश्च मित्रं द्रुह्यति ब्राह्मणदारसर्वस्वापहरणादिना नाशयति यश्च कृतमुपकारं विस्मृत्य तमेवोपकर्तारमपकरोति, यत्तस्य परत्र दुःखं तदवाप्नोति ॥ ९० ॥

जन्मप्रभृति यत्किंचित्पुण्यं भद्र त्वया कृतम् ॥
तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ॥ ९१ ॥

शुनो गच्छेन्निष्फलं स्याद्भवत्येवेत्यर्थः । अत्यल्पदोषप्रदर्शनार्थं श्वगमनवचनम् । यथा कृच्छ्रेण महता सुवर्णाद्युत्तमद्रव्यमर्जयित्वाऽशुनिप्रवाहे त्यजेत्तादृक् सुकृतं भवति । न पुनरन्यकृतस्य सुकृतस्यान्यत्र गमनमस्तीत्यसकृदुक्तमेतत् ॥ ९१ ॥

एकोऽहमस्मीत्यात्मानं यस्त्वं कल्याण मन्यसे ॥
नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः ॥ ९२ ॥

पुण्यपापयोरीक्षता द्रष्टा मुनिस्तूष्णींभूतः ॥ ९२ ॥

कः पुनरसौ मुनिर्भयातिशयप्रदर्शनार्थमाह

यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः ॥
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥ ९३ ॥

यथा यमः सर्वप्राणिनां देहवनाद्युच्छेदकारी यातनाभिश्च निगृह्णीतेति श्रुतिपथमागतो भवतः । सोऽयं तव हृदये वर्तते । न विप्रकृष्टः सन्नो कृतापराधमधुनैव नयति । मा चैवं मनसि कृथाः । एष आत्मा मदीयो मामुपेक्षिष्यत इति । न ह्येतस्य कश्चिदात्मीयस्तेन चेदविवादः स चेत्प्रसन्नः प्रत्ययिनः किं गङ्गागमनेन स्नानार्थिनः पापशुद्धये किं वा कुरुक्षेत्रगमनेऽस्ति प्रयोजनम् । यत्फलं पापप्रमोचनलक्षणं ततः प्राप्यते तदिहैवाविसंवादिनि परमात्मनि न हि पापकारिण आत्मा निर्विशङ्को भवति । किं मेऽतः स्यादेतेनेति । नास्तिकस्यापि किंकथिका कदाचित् भवत्येव गङ्गानदी पावयन्ती । कुरुक्षेत्रं तु देश एव पावनः ९३ ॥

नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः ॥
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत् ॥ ९४ ॥

कपालं शरावादिपात्रैकदेशः सुबोधम् ॥ ९४ ॥

अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत् ॥
यः प्रश्नं वितथं ब्रूयात्पृष्टः सन् धर्मनिश्चये ॥ ९५ ॥

---

१ फ-ब्राह्मणादीन्सर्वस्वापहरणाभाशयति । २ ण-र-य-तमेवेप्येकरद्वारं । ३ फ-य-कृतमस्य । ४ फ-भवत । ५ फ-अन्येषु । ६ फ-यतत्वं । ७ फ-यथैष । ८ फ-धना । ९ फ-स चापराधं मामेवं । १० फ-तत्फलं । पापकर्मोपलक्षणार्थं । ११ फ-पुर्ध्व । १२ ण-र-य-अनिरादिभि । १३ फ-श्च-त्तेन १४ य-ण-र- शक्रगृहं । १५ य-ण-शरावदे । १६ ण-र-पतेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमित्तं पृष्टो यो वितथमसत्यं वक्ति स तेन किल्बिषेन पापेन गृहीत ऊर्ध्वपादोऽधोमुखो महति गाढे तमसि नरकं यातनास्थानं तत्प्राप्नोतीत्यर्थः । अन्यस्मिंस्तमसि किंचिद्दृश्यते तत्र तु न किंचिदेवेत्यन्धग्रहणम् ॥ ९५ ॥

अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह ॥
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां गतः ॥ ९६ ॥

अर्थवैकल्यं सत्यादपेतं भाषते । यथा कण्टका असिता भक्षिता जनयन्ति न तादृशीं मत्स्याः प्रीतिं जनयन्ति । यदा धनलोभेन काचित्प्रीतिमात्रा भवति तथापि मोहदुःखं भवतीति सकण्टकमत्स्याशनोपमा ॥ ९६ ॥

यस्य विद्वान् हि वदतः क्षेत्रज्ञो नातिशङ्कते ॥
तस्मिन्न देवाः श्रेयांसं लोकेऽन्यं पुरुषं विदुः ॥ ९७ ॥

यस्य वदतः साक्षिणो **विद्वान्**सत्यानृते जानानः **क्षेत्रज्ञो**ऽन्तर्यामी पुरुषो **नातिशङ्कते** किमयं सत्यं वक्ष्यत्यनृतं वेत्येवं नाशङ्कते निश्चितमेवैष सत्यं वक्तीति यस्यात्मा निर्विशङ्कस्तस्मात्पुरुषान्नान्यं **श्रेयांसं** श्रेष्ठं प्रशस्ततमं **पुरुषं देवा** जानते ।

कः पुनरयं वेदिता । कश्च ततोऽन्य आशङ्किता । एक एव ह्यात्मा सुप्रपन्नद्वारेण वाचमीरयन्वेदितो संपद्यते । स एव तद्धर्मेण किं कथं स्यादित्येवंरूपेणाशङ्काख्यानेन युज्यते । तत्र भेदानुपपत्तिः । सत्यमेतत् । काल्पनिकेन भेदेनैवमुक्तम् । यथा हन्त्यात्मानमात्मनेति ॥ ९७ ॥

यावतो बान्धवान्यस्मिन्हन्ति साक्ष्येऽनृतं वदन् ॥
तावतः संख्यया तस्मिन् शृणु सौम्यानुपूर्वशः ॥ ९८ ॥

द्रव्यविशेषानृताश्रयाः पापविशेषाः **कूटसाक्षिण** इत्येतत्प्रदर्शनार्थं प्रकरणमारभ्यते । तत्रायं श्लोकः संबन्धो धनद्वारेणोपदिश्यमान आदरार्थः संपद्यते । यद्गुह्यं मिथ उपदिश्यते तद्यथाकथंचिद्भवतीत्यवधारितं ग्रहणं नातिगुरु इदं त्वतिमहाप्रयोजनमवहितैः श्रोतव्यमिति ।

सौम्येति चैकवचनमनेकशिष्यसन्निधाने भृगोरिव विवक्षितम् । **यस्मिन् साक्ष्य** इति व्यधिकरणसप्तमी । यस्मिन् द्रव्यभेदाभिन्ने व्यवहारे यत्साक्ष्यं तत्र तन्निमित्तं यदनृतमित्येषा विषयसप्तमी अपरा ‘ यस्य च भावेनेति ’ (व्या. सू. २।३।३७) । अथवा

१ ण–र–याति । २ ण–य–र–अर्थादपेतात्सत्यं । ३ फ–अभि । ४ फ–क्ष–नाशंकते ५ ण–य–र–वाचा । ६ ण–य–र–वदिता । ७ ण–य–र–चित्तेवर्मि । ८ ण–य–र–याण्योपविशेषाः ९ ण–य–र–यत्पूर्वं । १० ण–य–र–सुप्रं । ११ ठ–ण–य–र–भृगोरविवक्षितं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रव्यभेदात्साक्ष्यभेदस्तत्र समानाधिकरण एव । तावत इति परिमाणे व्युत्पाद्यते । तत्र यत्प्रभूतनिमित्तमपि परिमाणं संभाव्यते । शिशून्स्त्रियो वृद्धान् इत्यतो विशिनष्टि— संख्ययेति । अनुपूर्वश इति सुखप्रतिपत्तयेऽनुपूर्वेण ह्यभिधीयमानं सुखेन प्रतीयते । आनुपूर्वी च सङ्ख्या गताऽत्राभिप्रेता । तस्या एव वक्ष्यमाणत्वात् 'पञ्च पश्वेत्यादि'॥९८॥

× पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ॥
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ ९९ ॥

पशुनिमित्तमनृतम् । शाकपार्थिववत्समासः । पञ्चबान्धवांश्चानृतं हन्ति । ततश्च तेषां नरकपातनं मातापितरौ जायामिथुनं चापत्यमिति पञ्च कथं पुनरन्यकृतेनैनसाऽन्यस्य फलम् । संसर्गादिति ब्रूमः । तैरयं परित्यज्यत इत्युक्तं भवति । अथवा तैर्हतैर्यत्पापं तदस्य भवतीत्यघ्नन्नपि हन्तीत्युच्यते । अदृष्टकार्यतुल्यत्वात् अर्थवादश्चायं न तत्कार्योपदेशस्तत्कार्योपदेशे हि हिंसाप्रायश्चित्तं स्यात्कौटसाक्ष्यप्रायश्चित्तमेतद्भवति । उत्तरोत्तरसङ्ख्यादिवृद्धिः प्रायश्चित्तगौरवार्था न पुनर्विवक्षितैव तेनोत्तरोत्तरस्य गरीयः प्रायश्चितमित्युक्तं भवति । अयं पुरुषः कस्य दास इत्येवं संशये यदनृतं तत्पुरुषानृतमुच्यते ॥ ९९ ॥

* हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ॥
सर्वं भूम्यनृते हन्ति माऽस्म भूम्यनृतं वदीः ॥ १०० ॥

कथं पुनरजातानामसति संसर्गे परकीयेन संयोगो येनेदमुच्यते । हन्ति जातानजातांश्चेति उक्तमर्थवादोऽयमिति । सर्वं भूम्यनृतं वदः । माऽवादीः भूमिसंबन्ध्यसत्यं 'स्मोत्तरे लङ् च' (३।३।१७६) इति । माऽवादीरित्यादरार्थे मध्यमेन प्रत्यक्षं संबोधनम् । का पुनरियं भूमिर्नाम यदेतत्पृथिवीगोलकं पर्वतावष्टंभनं सागरावधि प्रसिद्धं न त्वियत्याः कः स्वामी को वाऽऽहर्ता । न हि सार्वभौमः कश्चिदस्ति । तथा च गाथा भूमेः—" न मा मर्त्यः कश्चन दातुमर्हति"। न कश्चित्सार्वभौमोऽस्तीत्यभिप्रायः । विश्वकर्मा भौवनमादिशद्विश्वकर्मभौमनेति पितृव्यपदेशेन स्वनाम्ना च राज्ञामन्त्रणं श्रुतं मयाऽसौ रन्तुमिच्छतीति

× [एवं संबन्धनात्तस्मान्मुच्यते नियतावृतः ।
पशून्गोश्वपुरुषाणां हिरण्यं भूर्यथाक्रमम् ॥ १ ॥]

* [पशुवत्क्षौद्रघृतयोर्यच्चान्यत्पशुसंभवम् ॥
गोवद्वस्त्रहिरण्येषु धान्यपुष्पफलेषु च ॥
अश्ववत्सर्वयानेषु खराष्ट्रयतरादिषु ॥]

१ फ–संख्येति । २ ठ–ग–य–र–प्रतियेति । ३ फ–संयोगेनेद । ४ ठ–ण–य–र–लङ्वादः । ५ फ–क्ष–मध्येतत्प्रत्यक्षं । ६ क्ष–नत्वियत्याः ।

For Private And Personal Use Only

उप[1]मैष्यति सलिलस्य मध्ये निमज्जेऽहं सलिलस्य मध्यमेवं संकल्पं वृथा[2] संकल्पितवति त्वयि सलिले मज्जामि । सलिलमज्जनेन नैष्फल्यमत्र दानसंकल्पस्याह[3] । यथा सलिले निक्षिप्तं निष्फलमेवमेतदपीति । मृषै[4]व कश्यपाय संगरः[5] । तवैष संगरः प्रतिश्रवः प्रतिज्ञानं कश्यपाय ददामीति मोघो[6] वंध्योऽस्तु सर्वसाधारणाऽहम् । सर्वजनोपभोग्या । केवलं राजानो रक्षानिर्वे[7]धमात्रभाज इत्यभिप्रायः । अत एतावत्या भूमेर्न दाना[8]पहारसंभव इति कुतो विवादः । सत्यम् । यथैवायं भूमिशब्दोऽत्र वर्तते एवं क्षेत्रग्रामस्थण्डिलादावपि तत्र च संभवत्येव स्वाम्यं प्रत्यक्षस्यैव दानापहाराविति न किंचिदनुपपन्नं अपहारश्चास्या यादृशेन रूपेण अपहारः गृहादेर्न वीरुद्विच्छेदः । अतश्च यः परकीये क्षेत्रे चंक्रम्येत मृदो वा कश्चिदाद्द्यान्नासौ भूम्यपहारी स्यात् । मीमांसकै[9]रुक्तं " न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति "

एकदेशवशनं च भूमिशब्दमधिकृत्य भगवान् **कृष्णद्वैपायनो** दानधर्मेषु पठितवान्— "परैरप्यनुमन्तव्यो दानधर्मो नृपैर्भुवि । अक्षयो हि निधिर्ह्येषो विहितोऽयं महीभृताम्" ॥इति । कृत्स्नगोलकाभिप्रायमेव नादेयत्वं भूमेर्विश्वजितीति **मीमांसकै**रुक्तं "न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति " । सर्वान्पुरुषान्प्रतिचंक्रमणादियोग्यतयाऽविशिष्टा भूमिः स्वीकर्तुमशक्या कथं दीयत इत्यर्थः । अस्मिंस्तु पक्षे ग्रामनगरादि विश्वजिति दातव्यम् । **अन्ये** तु पठन्ति अन्तरेण सदः पत्नीशालं च दक्षिणा नयन्तीति भूमौ गुणविधेरस्यासंभवात्क्षेत्रादेरप्यत्र दानं वदन्ति चैकवचननिर्देशाच्छृणु सौम्येति साक्षिविषयमेवैतत्संबोधनम् न शिष्यविषयम् । ' शूद्रमेभिस्तुपातकैः इत्यत आरभ्य यावन्तो मध्यमपुरुषनिर्देशास्ते सर्वेषां पातकभूयस्त्वसमानाख्यातरूपत्वेकवाक्यत्वाच्छूद्रानुयोगार्थाः । ' अन्धः शत्रुगृहं गच्छेत् ' इत्यत आरभ्य सर्वे साक्षिविषया अनुयोगाः । आख्यातवैरूप्येन प्रकरणस्य विच्छेदात् मध्यमपुरुषे समानार्थक्रमत्वात्कर्तव्यो गच्छेदिति प्रथमपुरुषनिर्देशः पूर्वाधिकारनिवृत्त्यर्थः ॥ १०० ॥

* अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने ।
अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च ॥ १०१ ॥

कूपतडागादिस्थे महति जले स्वल्पेऽपि महोपकारो भूमिवद्दोषः । स्त्रीणां भोगे

---

* [पशुवत्क्षौद्रघृतयोर्यानेषु च तथाश्ववत् ।
गोवद्रजतवस्त्रेषु धान्ये ब्राह्मणवद्विधिः ॥ १ ॥]

१ ठ-ण-य-र-उपमेष्यामिस्थासलिलस्य; फ-क्ष-वक्ष्याम्यहं सलिलस्य मध्ये मैनं । २ फ-क्ष-कृत्वैवं । ३ फ-ऽहं । ४ फ-मृषैव । ५ फ-क्ष-सागरः । ६ फ-क्ष-मोक्ष वंध्यस्तु सर्वं साधारणाहं । ७ क्ष-निर्वेश; फ-निर्देश फ-क्ष-दानोद्धार । (जै० सू० ६।७।३) ९-जैमिनिसू० ६।७।३।१० ठ-ण-य-र-मन्यन्ते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च मैथुनाख्ये केनेयं स्त्री भुक्ता मैथुनधर्मेणेति । **अब्जेषु रत्नेषु** मणयो रत्नानि मुक्ताद्या **अश्ममयेषु** वैडूर्यादिषु । रत्नेष्विति संबध्यते । [1]द्विविधान्येव रत्नानि जलजान्यश्ममयानि च । अतो रत्नग्रहण एव कर्तव्ये विशेषणद्वयोपादानं श्लोकपूरणार्थम् । अद्भ्यो जातान्यब्जानि । अश्मनो विकारा **अश्ममयानि** ॥ १०१ ॥

एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे ।
यथाश्रुतं यथादृष्टं सर्वमेवाञ्जसा वद ॥ १०२ ॥

ऊहापोहौ वर्जयित्वा यथादृष्टं यथाश्रुतं दृष्टं तत्वेन ब्रूहि ॥ १०२ ॥

*** गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान् ।**
प्रेष्यान्वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ॥ १०३ ॥

कारवः शिल्पिनस्तक्षायस्कारसूपकरादयः । **कुशीलवा** नर्तकगायनाद्याः । **प्रेष्या** जीविकार्थं परस्याज्ञाकारो दासा इति प्रसिद्धाः । **वार्धुषिका** वृद्ध्युपजीविनः । एते ब्राह्मणा अपि [2]सन्तः प्रकरणात्साक्ष्ये शपथे च शूद्रवद्द्रष्टव्या न क्रियांतरे । यथा शूद्रो न दानपुण्यादिना पृच्छ्यते साक्ष्ये शपथे चाग्निहरणादिना शोध्यते तद्वदेषोऽपि शपथो यद्यपि पूर्वत्राप्रकृतः [4]तथाप्युत्तरत्रानन्तर्यादोषवत्वात्प्रयतत्वात् [5]प्रयतत्वेऽप्यानन्तर्यस्य संबन्धहेतुत्वाद्वक्ष्यमाणस्यापि प्रत्यासत्त्या पूर्ववद्द्वयोसन्निपातात् शपथेऽपि तुल्यम् ॥ १०३ ॥

तद्वदन् धर्मतोऽर्थेषु जानन्नप्यन्यथा नरः ॥
न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदन्ति ताम् ॥ १०४ ॥

[6]तदन्यथाऽपि जानन्नन्यथा **वदन् स्वर्गा**द्भ्रश्यति । कूटमपि वदन् दुष्यतीत्यर्थः किं सर्वदैव ? नेत्याह । **धर्मतोऽर्थेषु** धर्मेण दयादिना निमित्तेनार्थेषु व्यवहारेषु । धर्मस्य च निमित्तत्वमुक्तमुत्तरश्लोके दर्शयिष्यति । एतच्च न स्वमनीषिकयोच्यते । किं तर्ह्येतां वाचं वदन्ति अस्मात्पूर्वेऽविस्मर्तारः का पुनर्दैवी वाग्यथाऽस्मिन्निमित्तेऽनृतं वदितव्यमित्येषा देवानां संबन्धिनी वाक् **तां** मन्वादयः श्रुत्वा **वदन्ती**ति विशेषेऽनृतप्रशंसा । अन्यैस्तु पूर्वविधिशेषतयाऽयं [7]श्लोको व्याख्यातः । तदेतद्गोरक्षकादिष्वनुयोगवाक्येषु ब्राह्मणेषु भवितव्यमन्यथा

* [ये व्यतीताः स्वधर्मेभ्यः परपिण्डोपजीविनः ।
द्विजत्वमभिकांक्षन्ति तांश्च शूद्रानिवाचरेत् ॥ १ ॥]

१ फ–विविधानि । २ फ–क्ष–कारा । ३ ठ–ण–र–संभवः । ४ फ–प्रकृतस्था । ५ ठ–ण–र–प्रातयितत्वात्प्रकृतत्वे । ६ ठ–ण–र–तद्वदन्नन्यथापि । ७ ठ–ण–र–श्लोके व्याख्यातः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणेषु सत्यं ब्रूहीति यथा ब्राह्मणा एते कथं शूद्रवदनुयोज्या इति तद्विद्वानपि न दुष्यतीति यतो मन्वादय. एवंविधां वाचं वदन्ति यथैते शूद्रवन्नाचरणीया इति । ते च धर्माधर्मयोः प्रमाणं तैश्च सत्यं वदितव्यं तच्च यथाविहितं तत्र स एव धर्मो यत्र वाऽनृतं तत्रानृताभिधानमेव धर्म इति ॥ १०४ ॥

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः ॥
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ॥ १०५ ॥

तत्रे नानृतं वदेदिति यः प्रतिषेधस्तस्याशूद्रादिविषयताऽनेनोच्यते । न पुनरनृतवदनं विधीयते । तथा सति प्रतिषेधे नैकवाक्यता बाध्येत । का पुनरत्र निमित्तश्रुतिः । तत्रेति । तस्य वधविशेषणत्वान्न वधस्तस्यासतो निमित्तत्वानुपपत्तेरतश्च कृतेऽवधौ पश्चात्तद्विषयमतद्विषयं वाऽनृतं वक्तव्यमित्यर्थः । अपतति तत्त्वनिष्ठं न । ननु च यत्रेति व्यवहारस्तुतिर्निर्दिश्यते । पुनस्तत्रेति तदेव प्रतिनिर्दिश्यते । ततश्च यस्मिन् व्यवहारे पराजिताः सन्तो वधार्हा भवंति तस्य नानुपपन्नो निमित्तभावः । अत्र वदन्ति । न चात्र वधार्हेष्वनृतमिष्यते । यत आनुरूपांपीयसो जीवनमिति । यस्त्ववधार्होनवकाशान्न पुरदास्यादिस्खलितादनुहतदंडताख्यापनाय वा जनैः स्वल्पापराधात् न घातयित्वोपपत्तिराजत्वात्क्रोधदण्डस्य चाशास्त्रीयत्वादस्थितपरिमाणतया निश्चयाभावो न तस्यापि निमित्तत्वोपपत्तिरतः प्रतिषेधशेषतैव न्याय्या । गौतमीये त्वनृतविध्याशङ्काऽपि नास्ति " नानृतवदने दोषो जीवनं चेत्तदधीनम् " इत्येवमादिप्रतिषेधे सत्यानृतयोः कामचारप्रसङ्गे सत्यवचनेन निमित्तभावः प्रतिपद्यमानो ' न हिंस्यात्सर्वभूतानीति ' प्रतिषेधव्यतिक्रमतया चानृतं प्रतिपद्यत इति युक्तिमत्वेनेदं कृतं न चेदसौ पृष्ट आचष्टे न पुनर्हन्ति । अयंश्च कथं हिंसादोषेणानुषज्यते । अथ सत्यपि स्वातन्त्र्ये तद्वचनेन राज्ञा हन्यमानत्वात्तद्धेतुभावापत्त्या प्रयोजिककर्तृत्वमिति चेत् न । सर्वो हेतुः प्रयोजको धनेन कुलं विद्यया यश इति । भवति विद्यायशसोर्हेतुना प्रयोक्त्री । ननु चान्य एवायं लौकिकफलोत्पत्तियोग्यताहेतुलक्षणे हेतुभावः । अपि तु द्रव्यगुणेष्वत्रापि क्रिया श्रूयते अग्निना पाक इति । साऽपि स्वरूपेण सिद्धरूपाभिधानात्कृदन्तैर्भावस्य अन्यश्चायं शास्त्रीयः कर्तृव्यापारस्य प्रयोजको हेतुर्न तु तत्प्रयोजकत्वमेवमित्यर्थम् । यदि तावत्प्रेषणाध्येषणे आज्ञाप्रार्थनारूपे प्रयोजकत्वं शोपयते व्रीहीनातप इत्यादावचेतनेषु णिजुत्पत्तिर्दुर्लभा । ननु च परिहृत-

फ-क्ष-अन्यथा ब्राह्मण एव कथं शूद्रवदनुयोगस्तथापि विद्वान्दुष्यतीति । २ ठ-ण-र-अत्र । ३ फ-शूद्रादिविध; क्ष-आशूद्रादिविध । ४ फ-बाध्यते । ५ फ-तस्यासतोनोमित्र । ६ य-र-ण-अपेतति । ७ एवंमूले " यत अननूरूपं दापीयसो जीवनम् " इति तु समीचिनः पाठः । ८ अ. १३ सू. २४ ९ फ-क्ष-तद्वदनेन । १० फ-प्रयोजिकत्वमिति । ११ फ-गुणः यत्रापि । १२ य-ण-र-प्रसिद्ध । १३ फ-कर्तव्यव्यापारस्य । १४ ण-य-र-ववपहृतम् ।

For Private And Personal Use Only

तमेतद्व्याख्यातृभिः मुख्योपचरितक्रिय इति चेतनावद्वस्तूपचारे भिक्षा वासयति कारीषोऽध्यापयतीति । न ह्यत्र चैतन्यकृत उपकारः । अपि तु निश्चितत्वात्तदन्यस्य प्रयोजकस्य अध्ययनं ह्याचार्यकरणविधिप्रयुक्तं कुर्वाणस्य माणवकस्य शीतादिलक्षणं प्रतिबन्धकमनुवदति कारीषे प्रयोजकत्वाद्व्यारोपः । प्रेरकत्वाद्धि प्रयोजकमुच्यते । तच्च चैतन्यस्य वायुजलादेरग्निकाष्ठादौ सुतरां दृश्यते । तदा विधिप्रयोजकस्तुतिप्रयोक्तृभिः प्रेषणाद्यभावाद्गौणार्थाः शब्दाः स्युः । अथैतत्स्थमर्थाचरणं प्रयोजकत्वं तच्च प्रयोजकस्य व्यापारानुगुणं प्रेषणादिव्यतिरिक्तक्रियान्तराचरणं संविधानाख्यं संविदधान एव हि कारयतीत्युच्यते । यथा बुभुक्षमाणस्य कश्चित्पात्रमाहरत्यन्यो भक्तमुपनयति कस्यचिद्वधप्रवृत्तस्य कश्चिदायुधमर्पयत्यन्यो वध्यदोषाविष्करणेन मन्युमुपदीपयति एवंलक्षणः प्रेषित्रादिरूपरहितः सव्यापारः प्रयोज्यफलसिद्धावानुकूल्यं प्रतिपद्यमानस्तत्समर्थाचरणपक्षे प्रयोजकः । अस्मिन् पक्षे कारीषोपाध्यायौ तुल्यौ प्राप्नुतः । अत्रापि यमन्तरेण क्रियाया अनिवृत्तिर्यस्य च कारकविशेषसंज्ञा न प्रवर्तेत स मुख्यः प्रयोजकः कर्त्ता । अध्यापयितारं चान्तरेण कारीषो न शक्नोत्यध्ययनहेतुभावं प्रतिपत्तुम् । आचार्यस्तु तमन्तरेणापि शक्त एवेति गौणः कारीषः । यत्र च करणादिभावे निश्चितहेतुमत्प्रत्ययदर्शनात्तत्रापि गौणार्थतैव । यथा कश्चित्स्वल्पेनापि प्रयोजनेन दूरं ग्रामं पुनः पुनर्गतवन्तं दृष्ट्वा ब्रवीति 'अश्वो गमयति देवदत्तम्' इति । यत्र तु न कस्यचिदासत्तिविप्रकर्षावन्तरङ्गबहिरङ्गभावो वा गम्यते तत्र यावन्तस्तदानुकूल्यं प्रतिपद्यन्ते सर्वे ते प्रयोजकाः ।

ननु च कारकसंज्ञायामन्तरङ्गयोगो नास्तीति को विशेषः कारीषोपाध्याययोः । स्वप्रक्रियैव सा तत्र भवताम् । न वस्त्वाश्रया । वस्त्वाश्रयौ च विधिप्रतिषेधौ । इदमपि तत्र पठ्यते । विवक्षातः कारकाणि भवन्तीति । एवं च सति यत्राकर्तुरेव कर्तृत्वं कश्चिद्विवक्षेत्तत्र कर्तृप्रत्ययविधिप्रतिषेधावपि स्यातां । यथा पातकपरिगणनायामनुपठति "क्रयविक्रयी संस्कर्ता चोपहर्ता चेति" । तस्मादन्वाख्यानसिद्ध्यर्थं तान्त्रिकी सा व्यवस्था न वस्त्वधिष्ठानमर्थमवस्कन्दति । अत एव व्याख्यातृभिस्तत्समर्थाचरणं चेद्धेतुमात्रे प्रसङ्गः । ततश्च योऽपि कस्मैचिद्भोजनं ददाति स चौदरिकतयाऽतिसौहित्येन व्यापद्येत प्राप्तं तत्र दातुर्वधकर्तृत्वमिति । न च तत्प्रयुक्तं भवति । क्रियान्तरेण ह्यसौ निश्चितो भोजनाख्यप्रयोजको न वधो न वैष्यादि कथंचिन्निमित्तं भवति । भवतु प्रयोजकत्वाभावात्तु कर्तृत्वं नास्तीति ब्रूमः ।

---

१ ण-य-र-चारेण । २ फ-अध्यापयति । ३ फ-आचार्यविधिप्रयुक्तं । ४ फ-समर्थाचरणं । ५ ण-य-र-संविद्धानेव । ६ फ-अस्यो । ७ फ-क्ष-दोषाधिकरणे म वध्यं भवेयति । ८ फ-क्ष-रूपोराहितः ९ ण-य-र-सव्यःपारेः । १० फ-प्रवर्तन्ते । ११ फ-गुणः । १२ फ-स्वल्पो । १३ फ-क्ष-करण कारकाणि । १४ अ. ५ श्लो. ५१ । १५ फ-सिध्यर्थानां तावकी । १६ ण-य-र-वधेन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्य तु भूमिसुवर्णापहारादिनाऽपराध्येत स च तदपहारमन्युना कथंचिन्म्रियेत किं तत्रापहर्तुरपहरदोष एवोभयवधेऽपि निमित्तिभाव इति चिन्त्यं । किमत्र चिन्त्यते ? अव्यभिचारावगम्यत्वाद्धेतुहेतुमद्भावस्य न खड्गप्रहारभोजनविच्छेदादेरिव भूम्यादिहरणस्य नियतनिमित्तत्वोपपत्तिः । कोऽयं नियमोऽभिप्रेतः ? यदि ह वा केचिन्म्रियन्ते केचिन्नेति नियतो नियमो भवति पुरुषस्वभावभेदात् तदेवौषधं श्लेष्मिकोपहितं विपरीतमन्यस्येति सर्वेषामेव च भावानां देशकालस्वभावभेदसहकारिसापेक्षा शक्त्यन्तरप्रादुर्भावस्तदेवं लक्षणं पुरुषचित्तसंततिसापेक्ष्यं पिपासाहेतुप्राण्यन्तरसापेक्ष्यं तद्विच्छेदहेतुरिति । एवमत्यन्तामर्षिणो मन्युमतः स्वहरणपरिभवादि मरणाय कल्पते । किं तत्र शक्यो निमित्तभावोऽपह्नोतुं पेशलमानसस्य तूपेक्षैव तत्र । ये पुनर्मन्युपरीता अनशनश्वभ्रपतनविषभक्षणादिनापरान्द्वारमुद्दिश्य म्रियेरंस्तत्राप्येष एव न्यायः । ननु चान्यस्यैव प्रसिद्धहेतुभावस्य विषभक्षणादेर्निमित्तस्य तत्र दर्शनान्न भूम्यादिहरणस्यापराधो हन्तृत्वमापुयात्तेनोपजनितमन्युमरणहेतोः प्रवर्तत इति पारंपर्येतो निमित्तत्वमिति चेत् । एवं सति पथ्योपदेशेनापि किंचिदुद्विजमाना आत्मानं व्यापादयन्ति । ततश्च तत्रोपदेष्टारो हन्तारः स्युः । तथा मत्सरिणः परद्रव्येष्वीर्ष्यया शुष्यन्तो धनिषु दोषमाददीरन् । तथाऽन्ये मूढमनसः प्रियान्पुत्रान्स्वामिनश्चानुम्रियन्ते । तत्र प्रियादीनां हन्तृतापत्तिः । अपरे च रूपवत्स्त्रीदर्शनेन परिफल्गुमनसः सूयन्ते भज्यमानहृदयाश्च विवेकसूत्यात्मानस्तत्र शीलवत्यः स्त्रियो दुष्येयुः । तदेवेदमापतितं मृतस्य ब्रह्महत्येति । सत्यमेवं यदि विधिप्रतिषेधविशेषो न स्यात् । विहितो हितोपदेशः प्रतिषिद्धं स्वहरणादि । तथा चाहुः

"उपकारप्रवृत्तानां कथंचिच्चेद्विपर्ययः। न तत्र दोषः केषांचिद्भेषजामौषधी यथा" ॥

अत्र न केवलं वैद्यादेरातुरोपकारार्थिनः प्रयुक्तौषधस्य कथंचिद्विपरीततयोपपत्तावदोषः । किंतर्ह्यन्यस्यापि गवादेर्महति पङ्के निमग्नस्योद्धर्तृभुजाकर्षणाय यथाश्रमेण यदि व्यापत्तिर्न तत्रोद्धर्ता दुष्येदिति कथितं भवति ।

एवं सर्वत्र योऽपि कस्मिंश्चित्स्वव्यापारानुष्ठानवति धनरूपातिशयसंपद्वति दृश्यमाने दन्दह्यते न तं प्रति कस्यचिच्छास्त्रार्थातिक्रमः । निश्चितो हि निमित्तभावः प्रतिषेधस्य विषयो भवितुमर्हति । न च प्राण्यन्तराश्रयिषु चैतंनिकेषु धर्मेषु प्रतिक्षणमन्यथाभवत्सु स्वभावविशेषावसायः । न हि शक्यमवसादितुमयमस्या रूपसंपदा व्यापद्यत इति । न च निश्चिते प्रतिषेधविषये संभवत्यनिश्चितविषयता न्याय्या । यत्र तर्हि कथंचिद्व्रणविपर्यय-

---

१ फ–क्ष–मृत्युना । २ पा–य–र–तत्रा......दोषो नच वधेऽपि निमित्तभाक् । ३ ण–य–र–तदवैनं । ४ फ–तव । ५ प–य–र–उपदिश्य । ६ फ–क्ष–प्रवर्तेन इति । ७ फ–पर्यतो । ८ फ–किंचिद्विजमाना । ९ ण–य–र–विहितोपदेशः । १० फ–चैतसिकेषु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शरीरशोषणादिना कुतार्किकपठिता स्यादपि निमित्तावगतिस्तत्र किं भ्रंशयितुं शीलं संयुज्यतां कामिनां भवतु वा पुरुषव्यापिनीति नैतदेवं न हीदृशी भवन्त्यपि निमित्तता प्रतिषेधस्य विषयविध्यन्तरविरोधात् । अस्ति ह्यत्र व्यभिचारप्रतिषेधविधिः । न वाऽपि विध्यन्तरेणानवष्टब्धे विषये कृतावकाशा विधयो विरोधाद्विध्यन्तरं विषयमास्कंदितुमर्हन्ति । येऽपि मन्यन्ते रागलक्षणां प्रवृत्तिं शीलसंरक्षणोपदेशो निषेधति न शास्त्रलक्षणां तेन महानुभावतया नास्य तपस्विनो जीवितुं चेच्छेदिति प्राणो जिहीर्षया मुमूर्षुणा संप्रयुज्यते नासौ व्यभिचारप्रतिषेधमतिक्रामेत् । यत्तु विध्यन्तरविषये न विध्यन्तरं प्रवर्तत इति नैवायं विध्यन्तरस्य विषयो रागलक्षणत्वात् । ननु च प्रवृत्तावपि नैव शास्त्रमस्ति नियोगविधाविव व्यभिचारानुज्ञानं स्मृत्यभावात् । अथाप्रवृत्तौ कामयेत मारणमिति प्रतिषेधभयात्प्रवर्तते सोऽपि प्रतिषेधो रागलक्षणामेव हिंसां प्रतिषेधयति । न चासौ रागतो न प्रवर्ततेऽपि तु प्रतिषेधभयात् या तु परोपकारतः प्रवृत्तिः साऽपि प्रतिषेधविषयपरिहारेण । योऽपि किंचिद्यावदयमहात्मात्मानं हन्मीति हन्यान्न तत्राप्रयच्छतो घातकत्वं व्यवहारोच्छेदप्रसङ्गात् ॥ १०५ ॥

वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम् ॥
अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम् ॥ १०६ ॥

वाक् चासौ देवता च सा वाग्देवता । तदर्थं च चरवो **वाग्दैवत्या**स्तण्डुला नातिपक्काश्चरवस्तैर्यजेरन्निति बहुवचननिर्देशात् । चरुभिरिति बहुवचनं न पुनरेकैकशो बहवश्चरवो नापि संहतानां व्रात्यस्तोमवद्यागो ' देवश्चेद्व्रर्षेद्बहवो ब्राह्मणा यजेरन्निति, तद्बहुवचनम् । ननु काश्चिज्जलैश्च त्रिभिर्यजेरंस्तदेतद्ब्राह्मणाद्यनुग्रहार्थमनृतमुक्तं भवति । अनृतमेवैनः पापमसत्याभिधानलक्षणा क्रिया । यथा धर्मक्रियावत एवं समानाधिकरणे षष्ठी । येषां तु क्रियाजन्यौ धर्माधर्मौ न क्रियैव तन्मतेऽनृतस्य यदेन इति वैयधिकरण्येऽनृतनिमितत्वादेनोऽनृतम् । उपचारतः समानाधिकरणे एव । तस्य **निष्कृतिः** शोधनं पावनं प्रायश्चित्तमिति यावत् । **परा** प्रकृष्टा ।

ननु च कुतोऽत्र पापं यावताऽस्मिन्निमित्तेनानृतवचने दोष इत्युक्तम् । केचिदाहुः " निवृत्तिस्तु महाफलेति " । अस्माच्छास्त्रात्तु यावज्जीवमनृतं मया न वक्तव्यमिति येन संकल्पितं तस्य मिथ्यासंकल्पदोषो मा भूदिति प्रायश्चित्तमुच्यते । गेहदाहवधप्रतिषेधेऽपि नैमित्तिकं विधानमेनसो निष्कृतिमित्यर्थवादः । इदं तर्हि **वाग्देवत्यैः सरस्वतीं यजेरन्** । यदि वाग्देवत्याः सरस्वती कथमिष्यते । अथ वाक्सरस्वत्योरेकत्वेनैवं

१ फ–मात्यानुभावतया । २ फ–प्रतिवृत्तावपि । ३ ण–य–र–संहत्यस्तोमवद्यागः । ४ ण–य–र–अनृतमेव यतः । पापक्रिया । ऐद पनपापं । ५ अ. ५ श्लो. ५६।६ । ६ ण–य–र–वधा अप्रतिषेधेऽपि । ७ ण–य–र–हूज्यते । ८ फ–अथवा सरस्वत्यारेकत्वेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवताभावे शब्दावगम्यरूपत्वाद्देवताया भिन्नौ चेतौ वाक्सरस्वतीशब्दौ । यथाऽग्नये जुहोतीति चोदितेन ज्वलनाय कृशानवे वा स्वाहेति हूयते वायवे निरूप्य जुहुयाद्वायुर्वै प्राण इत्युक्तेऽपि न प्राणायेति हूयते । सत्यम् । वागेव देवता सामानाधिकरण्याद्देवतार्थे तद्धितः । सरस्वतीं द्वितीयानिर्देशात् न हि द्वितीयानिर्देश्या देवता कर्मणि हि द्वितीया संप्रदानं च देवता न कर्म । कथं तर्हि सरस्वतीपदान्वयः । अर्थवादोऽयमग्नये जुहोत्यग्निर्वै सर्वा देवता इति वागेव सरस्वती । तयेष्ट्या साऽपीष्टा भवति । यागेन देवताऽवगम्यते । कथमग्निर्यष्टव्यः प्रजापतिर्यष्टव्यस्तथाग्निं यजति यदग्निं यजतीत्यादि केचिदाहुर्दैवतैः स्वतस्तत्र तत्र पूज्यन्ते । दैवतपूजावचनोऽत्र यजिः पूजा च पूज्यमानकर्मिका । तत्र युक्तैता द्वितीया । तथा च देवता पूजनीयेत्यादि स्मर्यते । एतच्च न युक्तम् । अस्मिन् हि पक्षे देवतात्वं मन्यते । नूनं तत्र यागसंप्रदानं । देवतेति स्मरणविरोधः । एषा च स्मृतिर्बलीयसी । निरपेक्षत्वात् । पूर्वा देवता उद्दिश्या ध्येया च यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेदिति तत्क्रियाकर्मत्वात्कर्मण्येषां द्वितीया ॥ १०६ ॥

कूष्माण्डैर्वाऽपि जुहुयाद्घृतमग्नौ यथाविधि ॥
उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा ॥ १०७ ॥

कूष्माण्डा नाम मन्त्रा यजुर्वेदे पठ्यन्ते । **तैर्घृतमग्नौ जुहुयात्** । जुहोतिश्च देवतामुद्दिश्य द्रव्यस्य त्यागः । आधारविशेषणे तत्रेहाग्नावित्यधिकरणनिर्देशान्मंत्रवर्णिकी देवता वेदितव्या । येषु च मन्त्रेषु देवताविशेषलिङ्गं न दृश्यते यथा ‘ देवकृतस्यैनसोवयजनमसि’ इत्यादिषु तत्र प्रजापतिर्देवतेति याज्ञिकाः । अथवा यस्यान्यत्र देवतात्वं दृष्टं सह संबन्धि यावत् । तथा च **निरुक्तकाराः** ‘ अपि वा सा कामदेवता स्यादिति ’ । यद्यपि योऽन्यस्य हविषो देवता सोऽन्यस्य न कदाचित् तथाऽपि यजति श्रूयते द्रव्यं मन्त्राश्चैते ऽत्रासत्यां दैवतायां जुहोतीति रूपं तदुत्तरेण जुहुयादिति व्याख्येयम् । तच्चायुक्तम् । तथाभिक्षारयेदिति वक्तव्यं स्यात् । वयं तु ब्रूमो ‘ देवकृतस्यैनसोवयजनमसि’ इत्यत्र कर्मैवावयजनमेवान्यथाजनमित्युच्यते । अतस्तद्देवता सर्वत्र च मन्त्राभिधेयं वस्त्वस्त्विति न देवतायां मन्त्रवर्णाभावः ॥

उदित्युचावा वारुण्यति उदुत्तमं वरुणपाशमस्मत्’ इति एषा ऋक् वरुणदेवता उदिति प्रतीकेन तल्लक्ष्यते । वारुणीग्रहणं चान्यस्या ‘ उ त्वा मदंतु स्तोमा ’ इत्युच्छब्दप्रतीकाया निवृत्त्या च तत्रायनाद्दैवतेन चेति तदेव देवतैव दैवतं ‘ आपो दैवतम् ’ अस्य त्र्यृचस्य

१ ण–य–र–नि । २ फ–तया प्रीतया सा प्रीता भवति योगेन । ३ फ–वस्या । ४ फ–नयेत्यादि ५ ण–य–र–देवताच एषमन्यतो मुख्यं तत्र यागसंप्रदानम् । ६ फ–तव । ७ फ–क्ष–एव । ८ फ–दा । ९ फ–अनुवर्णिकी । १० फ–मन्त्रेण । ११ फ–नियम्यते । १२ ण–य–र–देवदेवतेति । १३ फ–यज्ञस्य । १४ फ–सम्यक्सम्यग्भावस्तथापि । १५ फ–मन्त्राऽस्वयंतन्त्राः सत्यं ।

For Private And Personal Use Only

तेन 'आपो हि ष्ठा' इत्यादिना। अतश्चैकैकया भावादेकैकाहुतिः प्रत्येकशब्दवत्तत्वेन समुदायाहुतिरेकेति घृतमग्नाविति सर्वत्रानुषङ्गः । **यथाविधि** यादृशः शिष्टसमाचार इत्यर्थः । तेन च विधिहीनत्वादप्राप्तायामितिकर्तव्यतायां परिसमूहनपर्युक्षणावोक्षणः स्रुवहोमाद्येतावन्मात्रमनुजानाति । **वा**शब्दौ विकल्पिकाः सर्व एव ॥ १०७ ॥

त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः ॥
तदृणं प्राप्नुयात्सर्वं दशबंधं च सर्वतः ॥ १०८ ॥

पञ्चदशाहोरात्राणि पक्षः । त्रयाणां पक्षाणां समाहारः **त्रिपक्षम्** । 'अकारान्तोत्तरपदो द्विगुः ' इति स्त्रीत्वे प्राप्ते पात्रादिदर्शनात्प्रतिषेधः । यद्येवं त्रिपक्षीति न प्राप्नोति छान्दसस्तत्र लिङ्गव्यत्ययः। ल्यब्लोपे कर्मणि पञ्चमी । त्रीन्पक्षान्यो वदतीत्य यः साक्ष्यं न ददाति **अगदो**ऽपीडितशरीरस्तत्सदृशं प्राप्नुयादित्यर्थः । **दशबन्धं** च दशमं भागं दण्डनीयस्तस्माद्दणात्। **ऋणादिषु** इत्यादिग्रहणेन सर्वव्यवहारोपक्रमः । द्वितीयमृणग्रहणमुपलक्षणार्थम् । यस्मिन्व्यवहारे साक्ष्यमियन्तं कालं भवति पराजीयमानस्य बाधैः स साक्षिणो बाढमित्युक्तं भवति । **गदो** रोगस्तत्समानप्रत्युत्थानहेतूपलक्षणार्थं तेनात्र कुटुम्बोपद्रवधनिकोपरोधाद्यपि परीक्ष्यम् । **बन्ध**शब्दः सङ्ख्यादिपरो दण्डविषये दशमापवचनः । **नर**ग्रहणं **सर्वतो**ग्रहणं च श्लोकपूरणार्थम् ।

अन्ये त्वाहुस्तदृणं प्राप्नुयादित्यस्यायमर्थः । ऋणोपहरणलक्षणेन पापेन युज्येत । राज्ञे वा जीयमानस्य यो दण्डस्ततो दशममंशं दद्यादिति दण्डितः पुनः पृच्छ्यते॥१०८॥

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः ॥
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः ॥ १०९ ॥

सप्ताहादिति पञ्चमीदर्शनादर्वागित्यध्याह्रियते । सप्तानां दिवसानामन्यतमस्मिन्नहनि यस्य साक्षिणो रोगादि दृश्यते स मृषावादी दैवेन विभावितः पूर्वोक्तेन विधिना दापयितव्यः । **रोगो**ऽत्यन्तपीडाकरोऽग्निर्गोवाहनदहनः । पुत्रदारादिप्रत्यासन्न**ज्ञातिमरणं** तस्य कूटसाक्षित्वे लिङ्गम् ॥ १०९ ॥

असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः ॥
अविन्दंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत् ॥ ११० ॥

अविद्यमानाः साक्षिणो येष्वर्थेषु व्यवहारेषु तेऽ**साक्षिकाः** । तेषु सत्यमजानानो राजा **तत्त्वतो** लौकिकेनानुमानेनापीत्यर्थः । तत्र **शपथेनापि** वक्ष्यमाणेन दैवेनानुमानेन **लम्भयेत्** जानीयात् । लभिः प्राप्तिवचनोऽपि सामर्थ्याज्ज्ञानार्थ्यर्थः ॥ ११० ॥

१ ण–त्रिपाक्षीति । २ फ–योवदतीत्यर्थं । ३ फ–गदति । ४ ण–य–र–बाध्यः फ–बोधा । ५ ण–य–र–सामर्थ्याजानपरो न ह्यन्यसत्यस्य लाभः । स वंदन्निति पाठे एवमेव वाल्थ्येयम् । (असाक्ष्येष–ः) असाक्षिकेषुत्वर्थेषु शपथलयेदत्येव तावतावाक्ययुदेवावाक्यमावशात् श्लोक पूरणार्थमिथं परस्पर ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः ॥
वसिष्ठश्चापि शपथं शेपे पैजवने नृपे ॥ १११ ॥

अर्थवादोऽयं पूर्वोक्तस्य शपथविधेः । **महर्षिभिः** सप्तर्षिप्रभृतिभिः **कार्यार्थं** संदिग्धकार्यनिर्णयार्थं **शपथाः कृताः** । अस्मिन्नर्थे च भगवतः कृष्णद्वैपायनस्याख्यानमुदाहर्तव्यम् । विशेषेषु तेष्वपहारितेष्वितरेतरं सप्तर्षयः शेपिरे । यस्तेऽहरति पुष्करं स इमां पापकृतो गतिं गच्छेदित्यादि । **देवै**रिन्द्रप्रभृतिभिरिन्द्रो ह्यहिल्यां प्रत्यभिशप्तः शापभयाद्बहुविधं शपथं चकार । **वसिष्ठश्चेति** पृथङ्‌निर्देशः प्राधान्यख्यापनार्थः । शपथं कृतवानित्यर्थः । उपपदादेव विशेषावगतेः शपतिः करोत्यर्थमात्रे वर्तते । यथा यज्ञं यजत इति स्वपोषं पुष्ट इति तथा शपथं शेप इति ज्ञेयम् । 'शपै उपलंभने' इति लिटि प्रथमपुरुषात्मनेपदैकवचने शेप इति रूपम् । पैजवनो राजा बभूव । तस्मिन्काले विश्वामित्रेणाकृष्टो मण्डलमध्यगतः कामक्रोधाभ्यां संशोध्यचरणोऽयासुरो यातुधानोऽस्मीति शपथं गृहीतवान् । विश्वामित्रेणोक्तस्तस्य राज्ञः समक्षमनेनैव तत्पुत्रशतमशितमेष हि रक्ष इति । ततः स उवाच । अद्यैव म्रियेय यदि रक्षः स्यामित्यात्मन्यनिष्टाशंसनमत्र शपथः पुत्रदारादिशिरःस्पर्शने एतदनिष्टासंशनं शपथो मन्तव्यः ॥ १११ ॥

न वृथा शपथं कुर्यात्स्वल्पेऽप्यर्थे नरो बुधः ॥
वृथा हि शपथं कुर्वन् प्रेत्य चेह च नश्यति ॥ ११२ ॥

मिथ्याशपथे फलाख्यानमेतत् । वृथाऽन्यथाऽसत्यमिति यावत् । तत्रापह्रियमाणसुवर्णादिद्रव्यजात्यपेक्षोऽनृतशपथदोषोऽन्यथाशपथे स्वल्पे गरीयसि तु कार्ये गौरवादधिकतरो दोषोऽस्त्येव । प्रेत्य नाशो नरकमिह महदयशः । प्रामाण्यान्तरे त्वज्ञाते राजदण्डः ॥ ११२ ॥

कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ॥
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥ ११३ ॥

कामः प्रीतिविशेषोऽविशिष्टेन्द्रियस्पर्शजन्यः स यासु भवति पुरुषस्य ताः कामिन्यो भार्या वशादयः । तत्र यः शपथः । कामसिद्ध्यर्थो यथा 'नाहमन्यां कामये प्राणेश्वरी मे त्वमित्याद्यो यन्तु संप्रयुज्यस्व मया इदं त्वया देयं दास्य' इति तत्र भवत्येव दोषो वृथाशपथे । विषयसप्तमी चेयं न निमित्तसप्तमी । तेन यस्यामेवैकाकिन्यां यथाप्यते तत्रोक्तरूपशपथे दोषः ; निमित्तसप्तम्यां तु निमित्ते परद्रव्यापहारे दोषः स्यात् । अतश्च 'कामाद्दशगुणं

---

१ ण-य-र-विशिष्यपहारितेषु । २ ण-य-र-शपतिःकरोतीत्यर्थं । ३ फ-शेप उपलेभ इति । ४ ण-य-र-संध्येव्यमानचरणो । ५ ण-य-र-मन्त्रःसशपथ । ६ ण-य-र-अवगन्तव्यः । ७ ण-य-र-अन्यद्वा ब्रह्मणोवधादिकीर्यंगुरुननीक्ष्य किंतु मिथ्याशपथं स्पल्ये । ८ फ-नाकमिन्यो । ८ फ-क्ष-वेश्यादयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वं जनम्' (अग्रे १२२) इत्यादिकं दण्डविधानं न युज्यते तथापि स हि निमित्तानन्तरकृते विवादोऽस्त्येव वृथाशपथदोष एव। एवं सर्वत्र विवाहेषु न त्वयाऽन्या वोढव्या न वाऽन्यो वोढव्येति अन्यस्यापि सुहृदादेर्विवाहार्थमेवंविधमनृतमदोषः। न पुनर्नीत्यपह्नवादौ। **गवां भक्ष्ये** गवां यवससिध्यर्थं मयाऽपहर्तव्यं न मयाऽपहृतं न मयाऽपहर्तव्यं परस्य चातत्संबन्धिभिर्युक्तस्य वृथासाक्ष्ये शपमानस्य न दोषः। **एवमिन्धने।** **ब्राह्मणानामभ्युपपत्तिरनुग्रहः।** सर्ववर्णानुग्रहेऽनुज्ञातमेव। किमिह पुनर्वचनेन। केचिदाहुः। शपथो ब्राह्मणेऽनुज्ञायते। शूद्रादिषु त्वनृतमेव। तच्च 'न हि सत्याद्विशिष्यते' इति वचनान्नैतदनृतमतो न तत्र प्रतिषेधो ह्यसौ वृथाशपथः। पूर्वेण प्रतिषिद्धस्य प्रतिप्रसवशास्त्रमेतत्सर्ववर्णानुग्रहे शपमानस्य न दोषः। किमर्थं तर्हीदमुच्यते। तत्र वधात्परित्राणमुक्तं सर्ववर्णविषयम्। अभ्युपपत्तिस्तु ब्राह्मणस्यैव। सा हि धनलाभादिना संभवति। सर्वतश्च परसंबन्धिषु क्रियास्वेवंविधौ सुशपथाभ्यनुज्ञानमुपायान्तरेण तत्सिध्यसंभव एव द्रष्टव्यम् ॥ ११३ ॥

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ॥
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥ ११४ ॥

ननु च यद्यहमेवं कुर्यां तदिदमनिष्टमाप्नुयामिति संकीर्तनक्रियाशपथं तं यः कारयेत्स **शापयेदि**त्युच्यते। सत्येन शपे सत्यादिनिबन्धनोऽयं धर्मो वा मे निष्फलः स्यादिति। एवं चायुधानामपि करणत्वं वाहनानां च। एतैरात्मानं शपतो न वा निष्फलानि स्युरिति। **गोबीजकाञ्चनानि** वैश्यो हस्तेन स्पर्शयित्वाऽभिशपेदेतानि वा मे निष्फलानि पूर्ववत्। **शूद्रं सर्वैस्तु पातकै**र्वक्ष्यमाणानि पातकानि मे स्युरिति शूद्रो वाच्यते ॥ ११४ ॥

अग्निं वाऽऽहारयेदेनमप्सु चैनं निमज्जयेत् ॥
पुत्रदारस्य वाऽप्येनं शिरांसि स्पर्शयेत्पृथक् ॥ ११५ ॥

अग्निमाहारयेदेनं हस्तेनाश्वत्थपर्णव्यवहितेन तयोः प्रदेशान्तरं सप्तपदसंहितमित्यादिस्मृत्यन्तरान्निपुणतोऽन्वेष्यं पारंपर्यप्रसिद्धेश्चैतदेवोच्यते। **अप्सु** जले **निमज्जयेत्**

---

१ ण-य-र-इत्यधिकदण्डविधानं। २ फ-करणविधानं। ३ फ-त्रिधिरतृतमदोषः। ४ फ-पुनःप्रेत्य बहुदोषः। ५ फ-मेवापयितव्यं। ६ फ-नत्वनृतमेतच्च। ७ फ-तत्र ह्येवमुच्यते। ८ फ-तत्र यः शाप्यते स एवं वाच्यते; ण-य-र-न तत्र शब्द एतदर्थप्रतिपादककरणं न तु सती सत्यस्वरूपप्रधान एवायं सत्यशब्दः। सत्यं सत्यशब्देन शापयेत्। सत्यशब्दश्चैवं शापने करणे भवति। यदि यः शाप्यते स एवं वाच्यते। सत्येन शापो सत्याभिधानमपि करणत्वम् वाचनायुधैर्यथात्मानं शपे तानि वा मे निष्फलानि स्युरिति। ९ फ-वाध्यते। १० फ-स्मृत्यन्तरानिपुणनत्वेऽन्वेष्यं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राड्विवार्के इत्यर्थः । **पुत्रदारशिरांसि स्पर्शयेत्** पुत्रस्य दारस्य शिरः स्पर्शयन् हस्तेन शपथाधिकाराद्वाचा च शपथस्यैवंरूपत्वादित्युक्तम् । **पृथगेकैकस्य** ॥ ११५ ॥

यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च ।
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ॥ ११६ ॥

तप्तायसपिण्डोऽयं अवश्य गृहीतो न दहति आपश्च नोर्ध्वं प्लावयन्ति सत्यशपथे कोशादौ **न चार्तिमृच्छति** पीडां न प्राप्नोति । रोगोऽग्निरित्यत्रोक्तं **स शुद्धः शुचि**-र्निर्दोषः । **क्षिप्रं** चतुर्दश वाऽहान्यवधिः स्मृत्यन्तरात् ॥ ११६ ॥

वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा ।
नाग्निर्ददाह रोमापि सत्येन जगतः स्पशः ॥ ११७ ॥

कथं पुनरग्निर्न धक्ष्यति । आपो नोन्मज्जयिष्यन्ति । न हि महाभूतानि विपरियन्ति स्वभावतो चैतन्यादिति पर्यनुयोगमाशङ्क्यार्थवादेनोक्तमर्थं दृढीकरोति । यद्यप्ययमन्वय-व्यतिरेकसमाधिगम्योऽर्थः प्रत्यक्षः शाब्दो वा तथापि धूर्तकल्पितेन्द्रजालवद्भ्रान्ति-महनादत्रमुखविभीषिकासञ्जनमात्रं फलं शपथागोरणमिति मन्यमानो वैदिकं निदर्शन-मुपन्यसेत् । भवन्ति प्रतिपत्तारोऽर्थागमेन पूर्ववृत्तदर्शनाद्दृढतां प्रतिपद्यन्ते । वत्सो नाम काण्व ऋषिरभवत् । स च कनीयसा वैमात्रेण भ्रात्रोऽभिशप आक्रुष्टो न त्वमसि ब्राह्मणः शूद्रापुत्र इति । स तं प्रत्युवाच सत्येनाग्निं प्रविशामि यदि न ब्राह्मण इति । तस्येद-मुक्तवतः प्रविष्टस्य नाग्निर्ददाह रोमापि । कथं? **सत्येन** हेतुना । कथमग्निः सत्यं जानातीति चेदत आह । **जगतः स्पशः** गूढात्मा परकीयकृताकृतज्ञः स्पश उच्यते । स चै चारः प्रणिधिरिति च प्रसिद्धिः । अग्निर्हि भगवान्सर्वभूतान्तरचारी कृताकृतानां वेदिता । तथा **च छान्दोग्ये** ताण्डके प्रयोगो देवासुरसेनयोरभ्यन्तरे गौतममाश्रयन्ति गौतमामिंद्रं द्रवयेत्तत्र चाह "इह नो भावान्स्पशश्चरत्विषेत्यादि" । अथर्वाचिरित्विपेदर्शनेऽपि **पञ्चविंश-ब्राह्मणमुदाहार्यं** । वत्सश्च ह वै मेधातिथिश्च काश्यपावास्तां । तं वत्सं मेधातिथिराक्रोशत् 'अब्राह्मणोऽसि' इत्यादि । तस्य हलमेव नौपदिति ।

ननु च चौरा अपि न दह्यन्ते । साधवोऽपि दह्यमाना दृश्यन्ते । तत्कथं शपथे आश्वासः । उच्यते । न दृश्येन व्यभिचारेण व्यवस्थेयमपनेतु शक्यते । कादाचित्कत्वा-द्व्यभिचारस्य प्रत्यक्षादिष्वपि प्रमाणेषु दृश्यत एव तादृशो व्यभिचारो न च तानि न

१ ण-य-र-भाल्यां दधादित्यर्थः । २ ण-य-र-+एतशपथेश्चवो इत्यप्रदीमाभितस फ-तप्तायसपि-ण्डनवय ड-ण-य-र-राज्ञो ३ फ-क्ष-शूद्रपुत्र । ४ ण-य-र-प्रविशावः । कतरो तो ब्राह्मण इति । ५ फ-क्ष-स । ६ ण-य-र-पश्य चरतः प्रणधेरिति । ७ ण-य-र-अभ्यन्तरयोरन्तरा गौतमः शम्यमाता गौतमं इंद्रं अपत्यौवाव्रहृतो । ८ ण-य-र-करणे वास्तां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणम् । अथ व्यभिचारवन्ति नैव प्रत्यक्षादिशब्दवाच्यानि यव्द्यभिचारितप्रत्यक्षं यत्प्रत्यक्षं न तव्द्यभिचरतीति वचनादिहापि[1] शक्यते तद्वक्तुं व्यभिचरतीत्यसौ शपथो यः शपथः स न व्यभिचरतीति कः पुनः शपथो यः समस्तेतिकर्तव्यतामात्राद्यपग्रहणनिरूपितकुहकः स्तंभनाभावः विपरीतोऽशपथः न तादृशस्य व्यभिचारोऽस्ति । अथापि स्यात्तत्रापि प्राक्तनस्य कर्मणः फलविपाको भवति । निमित्तत्वाकृतापराधोऽपि पूर्वकृतेन गरीयसाऽशुभेन मुच्यते । अकृतापराधो जन्मान्तरदोषेण निगृह्यते । विचित्रा हि कर्मणां फलपाकाभिव्यक्तिहेतवः । सहस्रादेको मिथ्या गृह्यते । उत्सर्गतस्त्वमिथ्यात्वं पुत्रेष्टिकारीर्यादिष्वप्येतत्समानम् । तस्मात्साक्षिवच्छपथेऽपि प्रत्येतव्यं तेऽपि हि कदाचिन्मिथ्यावदन्तो न भयप्रदर्शनमात्रमेतत् यस्यातो रूढ्या शपथा उक्ताः सत्यं प्रतिष्ठत इति ॥ ११७ ॥

यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत् ॥
तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत् ॥ ११८ ॥

यस्मिन्व्यवहारे कूटसाक्षिभिर्व्यवहारः कृतः स्यात्स निवर्तयितव्यः । **कृतं चाप्यकृतं भवेत्** । गृहीतधनोऽप्युत्तमर्णः प्रतिपादयितव्य इतरदण्डो गृहीतोऽपि त्याज्यो वाङ्मात्रेण जितस्त्वमसीति निश्चिते कार्ये निवर्तेत इत्युच्यते । दण्डपर्यंतं कृतमपीति विशेषः । वीप्सा श्लोकपूरणायाह ॥ ११८ ॥

लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च ॥
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥ ११९ ॥

कौटसाक्ष्यलोभादिनिमित्तं विषयकथनं दण्डविशेषभावार्थम् । **वितथमसत्यम्** । सर्वत्र पञ्चमी हेत्वर्था ॥ ११९ ॥

एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् ।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः ॥ १२० ॥

लोभात्सहस्रं दण्ड्यस्तु मोहात्पूर्वं तु साहसम् ॥
भयाद्वौ मध्यमौ दण्डौ मैत्रात्पूर्वं चतुर्गुणम् ॥ १२१ ॥

लोभाद्यो वितथं वक्ति स सहस्रं दण्डनीय इत्येवं प्रयोजना कर्तव्या । तत्र यः परस्माद्धनमुपादाय विपरीतं वक्ति तस्य लोभो हेतुः । मोहाद्विचिन्तयतो यथार्थवादी यथादृष्टार्थवादी च केनचिच्चित्तसंक्षोभहेतुना प्रश्नकाले व्यारूढः सम्यक् प्रश्नार्थमनवधार्यास्मृतत्वाद्वाऽन्यथा ब्रूयात्स मोहादित्युच्यते । भयं त्रासो यदि भयेन सत्यवचनेनायं जीयेत

---

1 क्ष-क्षाभूः ।

For Private And Personal Use Only

तत्रायं कदाचित् ज्ञातिधनादिबाधया मां व्यापादयेदित्याशङ्का । **सहस्रामिति** संख्येयविशेषावगतिर्वाक्यान्तरात्पणानामिति । **पूर्वं तु साहसं प्रथमं** ' पणानां तु द्वे शते सार्धे ' (श्लो. १३८) इत्यादौ **द्वौ मध्यमौ** साहसाविति विपरिणामः । **पूर्वं चतुर्गुणं** सहस्रमेवेत्यर्थः । वृत्तानुरोधेन विचित्रया शब्दवृत्त्या स एवार्थः कथ्यते ॥ १२० १२१ ॥

कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम् ॥
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु ॥ १२२ ॥

मन्मथः **कामो** यत्र स्त्रियो विवदन्ते तत्संबन्ध्यान्यतरं कामयमानोऽनृतं वदति । अर्धतृतीयानि सहस्राणि दण्ड्यते । **क्रोधात्त्रिगुणं परं** प्रथमसाहसस्य प्रकृतत्वात्ततः **परो** वध्यः । सर्वान्ते लोकविज्ञानादिति वा उत्तम एव परः । द्वेषः क्रोधः । **अज्ञानादिति** यो विपरीतं प्रथमं भ्रान्त्या । ननु प्रश्नकाले द्वे **शते** दमः प्रदर्शनमेव विपरीतं नाभिधानम् । **बालिश्यं** वा बालभावः । अप्राप्तव्यवहारता । ईषदपक्रान्तबालभावस्याप्राप्तबुद्धिस्थैर्यस्यायं बालिश्यदण्डोऽन्यस्य त्वसाक्षितैव ॥ १२२ ॥

एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः ॥
धर्मस्याव्यभिचारार्थमधर्मनियमाय च ॥ १२३ ॥

उभयप्रयोजनो दण्ड इति दर्शयत्यवश्यानुष्ठेयत्वाय शास्त्राचारनिरूढा व्यवस्था धर्मस्तस्याव्यभिचारोऽनिवृत्तिरुच्यते ॥ १२३ ॥

कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः ॥
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥ १२४ ॥

सकृदपराद्धानां पूर्वो दण्डः । अभ्यासात्प्रवर्तमानानां **दण्डयित्वा प्रवासनं** राष्ट्रान्निष्कासनं मरणं वाऽर्थशास्त्रे प्रयोगदर्शनात्तद्रूपत्वाच्च दण्डविधेः । **ब्राह्मणं तु विवासयेत्** वाससोऽपहरणं विवसनं गृहभंगो वा । विवासमं विवासं करोति तत्करोतीति णिचि णाविष्टवदिति टिलोपे रूपम् । **त्रीन्वर्णानिति** क्षत्रादयस्त्रयो ब्राह्मणस्य दण्डान्तरविधानात् ॥ १२४ ॥

---

१ **फ**–अप्राप्तबुद्धिस्थैर्यस्यायं । **फ–क्ष**–अप्राप्तबुद्धिस्थैर्यस्यायं बालिशोऽथ व्यवहारत ईषदपक्रान्तबालभावस्य दण्डोऽन्यस्य त्वसाक्षितैव । अप्राप्तव्यवहारता । ईषदपक्रान्त बालभावस्याप्राप्तबुद्धिस्थैर्यस्यायं बालिश्यदण्डोऽन्यस्य त्वसाक्षितैव । २ **ण–य–र**–निरूढौ । ३ **ण–य–र**–धर्मे अमर्यादितस्य नियम अप्रवृत्तिः प्रवृत्तस्थानादिःकालिकस्य धर्मस्य निवृत्तिर्यासदप्रवृत्तायाश्चौरसंस्थाया प्रवृत्तिर्मा भूदिति । दंडनीयानिरुक्तः कृतस्य क्षणः ज्ञायमानमपि प्रायो जनं स्तुत्यर्थमनूदते । ४ **फ**–गृहाभावो वा । ५ **ण–य–र**–क्षत्रियादयः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दश स्थानानि दण्डस्य मनुः स्वायंभुवोऽब्रवीत् ॥
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् ॥ १२५ ॥

स्थानशब्दो विषयपर्यायः। एतैः प्रदेशैः पीडयितव्यः। प्रत्यपराधशब्देन ब्राह्मणस्य धनदण्डविधानादक्षतत्वोपदेशः शरीरपीडापरिहारार्थः कल्पते। सत्यपि धनस्य दशसङ्ख्यान्तर्भावे वयं तु ब्रूमः समग्रधनमक्षतमित्यत्र धनपीडाऽपि निषिद्धैव ब्राह्मणस्य। तस्माद्यः सकृत्कथंचिदपराद्धः श्रुतशीलाभिजनयुक्तस्तस्य धनदण्डोऽपि नास्ति। तथा च गौतमस्तादृशमेव ब्राह्मणमधिकृत्य 'द्वौ लोके वृतव्रतौ' इत्युपक्रम्य 'षड्भिः परिहार्यश्चेत्यादि' (अ० ८ सू० १; १२) ॥ १२५ ॥

उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ॥
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥ १२६ ॥

उपस्थं प्रजननधर्मः स्त्रीपुंसयोरुद्देशमात्रमिदं विनियोगस्तूत्तरत्र भविष्यति। यत्र च दण्डविशेषो नाम्नातस्तत्र यो येनैवाङ्गेनापराद्धः स तत्रैव पीडयितव्यः। तत्रागम्यागमन उपस्थनिग्रहः चौर्ये उदरंत आहारनिवृत्त्यादिना वाग्दण्डपारुष्ये जिह्वाहस्तयोः पादबलेन व्यतिक्रामन्पादयोः विवृत्य विश्रब्धं राजदारान्वीक्षमाणश्चक्षुषोः अनुलेपनगन्धमाजिघ्रन्नासिकायां रहसि राजानं मन्त्रयमाणं कुड्यपटान्तरित उपशृण्वत्कर्णयोः धने प्रसिद्धो दण्डः देहे मारणं महापातकिनः ॥ १२६ ॥

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ॥
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ॥ १२७ ॥

उक्तानुक्तदण्ड्येष्वपराधेषु मातृकाश्लोकोऽयम्। एतदर्थानुसारेण सर्वत्र दण्डकृतिः कर्तव्या। तत्र पौनःपुन्येन प्रवृत्तिरनुबन्धः प्रवृत्तिकरणं वा। अनुबध्यते प्रयुज्यते येन तस्मिन्कर्मणि तं परिज्ञाय किमयमात्मकुटुम्बक्षुदवसायेन धर्मतंत्रसङ्गेन वा अथ मद्यद्यूतादिशौण्डतया तथा प्रमादाद्बुद्धिपूर्वं वा परप्रयुक्तस्वेच्छया वेत्यादिरनुबन्धः। देशो ग्रामारण्यग्रहजलजन्मप्रसवभूमादिः। कालो नक्तं दिवादिः। सुभिक्षदुर्भिक्षबाल्ययौवनादिः सारः शक्त्यशक्ती आढ्यत्वदारिद्र्ये अपराधोऽष्टादशानां पदानामन्यतमः। एतत्सर्वं पौर्वापर्येण निरूप्य तथा दण्डं पातयेत्कुर्याद्यथा स्थितिः सांसारिकी न भ्रश्यतीति ॥ १२७ ॥

अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् ॥
अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् ॥ १२८ ॥

---

१ ण-य-र-स्वायंभवः। २ फ-अकृतत्वोपदेशः; ण-य-र-अक्षितत्वापदेशः। ३ ण-य-र-वनमकृतः। ४ फ-शीलोभिजन। ५ ण-य-र-प्रजानवन्म। ६ फ-उदरस्थ ७ र-पादजबलेन; ण पादजवपर ८ फ-क्ष-सारमेन। ९ फ-क्ष-सर्वं। १० ण-य-र-तत्रप्रज्ञातिः कारणं वानुबध्यते। ११ फ-क्ष-उत सङ्गेन वा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधर्मप्रधानदण्डनं च पूर्वोक्तमनपेक्ष्येदं शास्त्रपाठमात्रेण राजेच्छया रागद्वेषादिभिर्वा तद्यशोनाशकं कीर्तेश्च विच्छेदकं स्वदेशे गुणख्यातिर्यशः देशान्तरे कीर्तिः जीवतो वा पुण्यशब्दो यशः ॥ १२८ ॥

अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ॥
अयशो महदाप्नोति नरकं चैव गच्छति ॥ १२९ ॥

पूर्वश्लोकेऽनुबन्धादीनि निरूपणविधिविशेषैः। अनेन त्वनपराधानां दण्डनं प्रतिषिध्यते सापराधानां च विधीयते । वृत्त्यर्थतां दण्डस्य मन्यमानोऽनुग्रहेणं माहासीदिति ॥ १२९ ॥

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनंतरम् ॥
तृतीयं धनदण्डं तु वधदण्डमतःपरम् ॥ १३० ॥

यो गुणवानीषत्प्रथममेवापराद्धः स वाचा निर्भर्त्स्यते ' न साधु कृतवानसि मा पुनरेवं कार्षीरिति ' । तथा विनीयमाने यदि न निवर्तते कार्यदोष इति वा प्रतिजानीयात्तदा धिग्धिगादिशब्दैः परुषवचनैः कुत्सार्थैः क्षिप्यते । ततोऽप्यनिवर्तमानो यथाशास्त्रं धनेन दण्डनीयः । तदप्यगणयन्नैश्वर्यादिना हंतव्यः । वधदण्डश्च ताडनोङ्गच्छेदादि न मरणमेव । यत आह ॥ १३० ॥

वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात् ॥
तदैषु सर्वमप्येतत्प्रयुञ्जीत चतुष्टयम् ॥ १३१ ॥

मारणं चेद्वधः किं तदन्यद्यन्न शक्यते कथं चैनं पापं निगृण्हीतेत्यादि-परुषवाक्यपूर्वं दुर्विनीतेषु धनदण्डवधौ समुच्चेतव्यौ । कृतेऽपि शरीरदण्डे यदि नावतिष्ठते ततो न कृतनिग्रह इत्युत्सृजेदपि तु स वधदण्डः कर्तव्यः। धनवधदण्डयोश्च पुनःप्रवृत्त्यर्थोऽयमारम्भः वाग्दण्डधिग्दण्डौ मृदुत्वात्कः पृच्छति। धनेन च गृहीतस्य पुनर्वधो दृष्टो"ऽङ्गुलिग्रन्थिभेदस्येति " ॥ १३१ ॥

लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि ॥
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः ॥ १३२ ॥

ताम्रादीनां लिक्षादयः संज्ञा भुवि प्रसिद्धाः। किं शास्त्रपरिभाषया तत्र वृद्धव्यवहारो गवादिशब्दवदित्यत आह । लोकसंव्यवहारार्थम् । अर्थशब्दो विषयवचनस्तेन

---

१ णयर–अधर्मप्रधने दण्डनं यत्मर्थमनपेक्षदंडशास्त्र—। २ णरय–नाशंकरो कीर्तेश्च—। ३ णयर–निर्दोषगुणवान्नवाकीर्तिः यशसी अन्यो वा भेदोऽन्येप्यो अर्थवादत्वे श अस्वर्गं पवप्वर्गप्राप्तो कर्मांतरजन्यायां प्रतिबंधूके परत्रापीति श्लोकपूरणार्थं स्वर्ग्यस्यामीस्मित्याह—। ४ णयर–विधेः । ५ णयर–द्ध । ६ फ–कृतार्थता; क्ष–वृत्तार्थत्तां । ७ णयर–अनुग्रहणमहाषीदिति । ८ णयर–गुणवानसि । ९ फक्ष–तदानीमङ्गच्छेदन्यपि । १० णयर–तान्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवहारप्रसिद्धिराश्रिता भवति । ततश्च गवादिशब्दतुल्यतया व्यवहारात् प्रसिद्धः । किं शास्त्रोपदेशेन । उच्यते । नियमार्थ उपदेशोऽन्येषामपि परिमेयानामयस्कांस्यसुवर्णादीनामेताः संज्ञाः सन्ति । तन्निवृत्त्यर्थः क्वचिद्देशे परिमाणे भेदोऽप्यस्ति । तन्निवृत्त्यर्थश्च क्वचित् संबन्धतया नियम्यते । तथा च क्वचिदष्टाचत्वारिंशता माषबन्धं क्वचिच्चतुःषष्ट्या क्वचित् साष्टेन शतेन तदेतत्सर्वं नियम्यते । अथ चैवं संबन्धः क्रियते । **याः संज्ञा भुवि प्रथितास्ता** लोकसंव्यवहारार्थं वक्ष्यामि । सर्वस्य लोकस्याभिरेव संव्यवहारो यथा स्याद्दण्डादिनियोगस्याप्यन्यथा प्रसिद्धिः ॥ १३२ ॥

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ॥
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥ १३३ ॥
त्रसरेणवोऽष्टौ विज्ञेयालिक्षैकापरिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥ १३४ ॥

इमं श्लोकं केचिन्नाधीयते । त्रसरेणौ विप्रतिपत्त्या तावद्गवाक्षकुञ्चिकाविवरप्रविष्टे सूर्ये यो रेणुर्दृश्यते स त्रसरेणुः । अन्तरशब्दो विवरपर्यायः । **प्रथमं तत्प्रमाणानामिति।** ततोऽपचितपरिमाणाः । न पुनरयं लिक्षाशब्दः स्वेदजक्षुद्रजन्तुवचनः तास्तिस्रो लिक्षा एको राजसर्षपाख्यपरिमाणपदार्थ एवं योजनीयम् । ततश्च व्यभिचारयन्ति न यथोक्तपरिमाणार्थमेते शब्दा वर्तन्त इति । यथा चोपक्रान्तसंज्ञाः प्रवक्ष्यामि परिमाणमिति त्रसरेणुश्चार्थो नियतपरिमाणस्तेनैतत्सर्वं निश्चेयं शक्नुवन्ति च निपुणास्त्रसरेणून् संहर्तुमिति नानारम्यार्थोपदेशः । एतत्स्वर्णकाराभिमानसंख्यास्मृतिरूपं निर्बाधं भवति । तत एव वस्तु निपुणतोऽशेषतोऽवधारयितव्यम् ॥ १३४ ॥

सर्षपाः षट् यवो मध्यस्त्रियवं त्वेककृष्णलम् ॥
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ॥ १३५ ॥

मध्यमशब्दोऽभ्रान्तिहेतुः परिमाणपरत्वे *नात्यन्तमपचितो नातिस्थूलः सर्षपपरिमाण* इति मध्यग्रहणमर्थवत् । संज्ञापरत्वे तु न किंचिन्मध्यमशब्देन यवशब्दसंज्ञात्वात् । तदसत् । नायं संदर्भो येन प्रत्यवयवं प्रयोजनमुच्यते । पद्यग्रन्थोऽयं । तत्र संगमनार्थमपि वृत्तानुरोधात्किंचिदुच्यते । अस्ति चास्यान्वयः । अनन्विताभिधानं हि वाक्यार्थविरोधान्न प्रमाणं । न चावगताभिधानमपि । परिमाणभेदांस्त्रसरेणुशतमानादीनाद्यन्तानपेक्ष्य मध्यपठितत्वान्मध्यो यवाख्यः परिमाणविशेषः । पञ्चकृष्णला अस्मिन्सन्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

“ अत इति ठनौ ” इति ठन् कर्त्तव्यः । पञ्चकृष्णलिकः । ‘ पञ्चकृष्णलक ’ इति पाठे कबन्तो बहुव्रीहिः । ते कृष्णलाः षोडश एकः सुवर्णः ॥ १३५ ॥

पलं सुवर्णाश्चत्वारः पलानि धरणं दश ॥
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः ॥ १३६ ॥

पलमिति संज्ञानिर्देशः । सुवर्णमिति संज्ञी । चत्वार इति विशेषणम् । धरणमिति संज्ञा । दश पलानीति संज्ञी । द्वे कृष्णले इति संज्ञा । रूप्यमाषक इति समुदायसंज्ञा मन्यन्ते । ननु रूप्यविषयमाषकनिर्देशे द्वे कृष्णले प्रतिपत्तव्ये इति प्रतिजानीते प्रादेशनिश्चयः । समधृते तुलासूत्रके उन्मानादहीने यदि धार्येते प्रयोजनं मध्यशब्दवर्ज्यतोऽसमयाद्धार्यमाणतया परिमाणानिश्चयः ॥ १३६ ॥

ते षोडश स्याद्धरणं पुराणश्चैव राजतः ॥
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥ १३७ ॥

षोडशरूप्यमाषका रूप्यस्य धरणं भवति । पुराण इति संज्ञान्तरम् । कार्षापण इति द्वे संज्ञे ताम्रकर्षस्य । कर्षाख्यश्च शब्दो लोकत एव प्रसिद्धार्थ इह गृह्यते व्यभिचारदर्शनासत्त्ववचनेन न कृष्णलादिवत्परिभाष्यते ॥ १३७ ॥

धरणानि दश ज्ञेयः शतमानस्तु राजतः ॥
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥ १३८ ॥

शतमान इति संज्ञा दशानां धरणानाम् । रजतशब्देन सुवर्णमप्युच्यते । तेन रूप्यसुवर्णयोरियं संज्ञा । सुवर्णस्य समानं तु शास्त्रान्तरात्परिमातव्यम् । तथा च विशेषयिष्यति शतमानं तु राजतमिति ॥ १३८ ॥

पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः ॥
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥ १३९ ॥

मध्यम उत्तम इत्यत्र साहसपदानुषङ्गः कर्त्तव्यो मध्यमोत्तमशब्दावत्र केवलावपि शास्त्रान्तरदृष्टावाभ्यां दण्डः । उत्तम इति तत्र शास्त्रसिद्ध्या साहचर्यात्साहसं प्रतीयते । अवयवाः स्पष्टाः ॥ १३९ ॥

ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ॥
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥ १४० ॥

यो राजसभायामानीतो धर्मेण ऋणं देयतया प्रतिजानीते सत्यमस्ते धारयामि स पञ्चकं शतमर्हति दण्डमिति शेषः । अनेन संकल्पितेन विंशतितमो भागो दण्ड्यते ।

१ ज–ते । असमेपेद्धार्यमाणयोः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किमिति । तत्सकाशमुत्तमर्णः प्रेषितो बहिरेव कस्मान्न परितोषित इत्यतोऽनेन शास्त्रव्यतिक्रमेण दण्डमर्हति । यस्तु व्यतिक्रमान्तरं करोत्यपह्नुते नाहमस्मै धारयामीति स तैः प्रतिपादितस्ताद्विगुणं तस्मात्पञ्चकाद्विगुणं दशकं शतमित्यर्थः । तन्मनोः प्रजापतेरनुशासनं सृष्टिकालप्रभृतिव्यवस्था नीतिरिति यावत् ।

अन्ये तु तच्छब्देन देयमेव प्रत्यवमृशन्ति । यावत्तस्मै देयं तद्विगुणं तेन यावद्दणमित्यनेनैकवाक्यं भवति । अन्यथा वाक्यभेदविषयविशेषानिर्देशादेकविषयत्वे विकल्पः प्राप्नोति । स च न युक्तो द्विगुणस्यात्यन्तबहुत्वात् । असत्यपि निर्देशे तस्य विषयो दर्शनं तस्य प्रत्यासन्नेषु पञ्चकमित्यर्थस्तस्यैवानुप्रत्यवमर्शो युक्तः ॥ १४० ॥

वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धिनीम् ॥
अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते ॥ १४१ ॥

अशीतीति विधेयनिर्देशः । वसिष्ठविहितामित्यादिरर्थवादः । वसिष्ठो भगवान् त्रिकालज्ञो लोभादिदोषरहित इति तां वृद्धिं गृहीतवानत एषा प्रशस्ता । धनं तया वृद्धिमुपैति । न च लोभदोषोऽस्ति । सृजेत्प्रयुञ्जीत । यदा धनं तदधमर्णस्य तां वृद्धिं धनप्रयोगकाले निर्दिशेत् । सर्वद्रव्येषु वस्त्रधान्यहिरण्यादिष्वेतदेव वृद्धिपरिमाणं सङ्कुचेयपरमेयादिषु 'रसस्याष्टगुणा वृद्धिः' इत्यादिषु द्वैगुण्यापवाद इति वक्ष्यामः ॥ १४१ ॥

द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन् ॥
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी ॥ १४२ ॥

द्वौ वृद्धिरस्मिन् शते दीयते द्विशता पूर्वयाऽजिवतो बहुकुटुम्बस्यायं द्विकशतविधिः मासमनुवर्तते । सतामित्यादिरत्रायमर्थवादः । सतां धर्ममिति एषाऽपि वृद्धिः साधूनां धर्मः । नैतया साधुत्वं हीयते नात्यन्तमर्थपर उच्यते । तद्दर्शयति । न भवत्यर्थकिल्बिषी । अन्यायेन परस्वग्रहणात्पापमर्थकिल्बिषं तदस्यास्तीत्यर्थकिल्बिषी ॥ १४२ ॥

द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम् ॥
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः ॥ १४३ ॥

ब्राह्मणादिवर्णक्रमेण चतुर्णां वर्णानां सकाशाद्विकादयश्चत्वारः कल्पा यथासङ्ख्येन ग्राह्यतयाऽनुज्ञायन्ते । समं न पादेन वाऽर्धेन वाऽधिकं तदाधिकोऽपि सपादद्विकं सार्द्धद्विकमिति द्विकादिव्यपदेशस्यानिवृत्तेराशङ्कानिवारणार्थं समग्रहणम् । यथा मात्रान्यत्वेऽपि

---

१ ण-र-तदा । २ क्ष-नि । ३ ण-र-द्विकं शतं । ४ ण-र-अभिवृद्धिभृतानां धर्मः । ५ फ-कल्पयितव्या ६ ण-र-न पादेन दुष्क्रमेण वाधिकां तदाधिकोऽपि । ७ ण-र-यद्यपि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संज्ञान्तरव्यपदेशं निवर्तयति । इदमपि पूर्वेणाजीवतः कल्पान्तरं यस्य वा महते धर्माय गृहारम्भो राजा च नातिधार्मिकस्तत्रायं विधिः । येऽसाधुभ्योऽर्थमादायेति न्यायेन । समामिति पाठान्तरम् । संवत्सरं यावदेषा वृद्धिर्न परतोऽपि महत्त्वादिकत्वाद्द्वैगुण्यं स्यात् ॥ १४३ ॥

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ॥
न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥ १४४ ॥

बहुधा प्रयोगो गृहीत्वाऽऽधिमन्यथा च आधिरपि द्विविधो गोप्यो भोग्यश्च । भोग्योऽपि द्विविधः समयादुह्यमानभोगः सरूपतो वा । आधिर्दोग्ध्री गौः पिहितसुवर्णादि । तत्र भोग्यमाधिमभिकृत्येदमुच्यते । **न त्वेवाधौ सोपकार** इति । विविधसोपकारः क्षीरिणी गौः क्षेत्रारामादि च । तस्मिन् भुज्यमाने कुसीदे भवा **कौसीदी** अनन्तरोक्ता वृद्धिस्तामाप्नुयात् । आधिं तु भुञ्जानो नान्यां वृद्धिं लभेत । गोप्येऽप्याधौ **कालसंरोधा**च्चिरमवस्थानाद्द्विगुणीभूतेऽप्यमोक्षमाणे **न निसर्गोऽस्ति न विक्रयः** । अन्यत्र च विधिनोऽर्पणं निसर्गः । अन्यत्र संक्रामितं द्विगुणीभूतमपि पुनर्वर्धत एव । तथा च पठिष्यति ' सकृदाहृतेति ' । विक्रियः प्रसिद्धः । सोऽपि न कर्तव्यः । किं तर्ह्यस्यामवस्थायां कर्तव्यम् । आधिं भुञ्जीत यावद्द्विगुणं धनं प्रविष्टे ततो मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने भोग्यस्तावदेवमभोग्यस्तावत् । एवमभोग्यस्त्वाधिः शांतलाभस्तिष्ठत्येव यावदाधाता नागतः । यस्तु कथंचिद्धनिको दरिद्रतामुपगतस्तावन्मात्रशेषधनः स कञ्चित्कालं प्रतीक्ष्य राजनि निवेद्य विक्रीणीत बन्धं ततो विक्रयादुत्पन्नं द्विगुणमात्मनो धनं गृहीत्वा शेषं मध्यस्थहस्ते ऋणिकसात्कुर्यात् ।

ननु च " आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्षयेत् " इति पठ्यते । एतदुत्तरत्र व्याख्यास्यामः । प्रणाशयत्वान्न पूर्वस्वामिनः स्वाम्यहानिः प्रयोक्तुश्च स्वत्वापत्तिः । यदि च निसर्गविक्रयौ न स्तः कीदृश्यमस्य स्वाम्यमुच्यते ? तस्मात्प्रतिषेधसामर्थ्येन प्रणाशवचनप्रतिषिद्धभोगं इति भोगानुज्ञानार्थं व्याख्यायते । वस्त्रादिविषयं वा तस्य हि भुज्यमानस्य प्रणाश एव न क्षेत्रादेरिव तिष्ठतः स्वरूपात्प्रपच्यवमानस्य भोग्यता संभवति । तेनैतत्स्मृतिव्यवस्थायां व्याख्येयम् । गौणौ चात्र प्रणाशनिसर्गौ । विक्रयप्रतिषेधस्तु मुख्य एव । न ह्यसौ गौणतया प्रतिपत्तुं शक्यते । एतदेव प्रस्तुत्य " न स्यातां विक्रयाधीने"

---

१ णर–संख्या संख्यान्तरव्यपदेशं । २ णर–अजीवति । ३ णर–ग्राहीतारस्य नातिधार्मिका, तत्रायं । ४ णर–विभुज्यमान भोगः स्वरूपभोगो वा । ५ णर–बन्धकत्वेन । ६ णर–संक्रामिते बन्धे । ७ फ–देयं भोग्यस्त्वाधिरस्य लाभं तिष्ठेद्यावद्दाधो न आगते तुवाधे । ८ फ–बन्धन । ९ फ–भोगस्य । १० णर–ऐते स्मृती विषयव्यवस्था व्याख्येये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति स्मृत्यन्तरपठितम् । अत इह निसर्गोऽन्यत्राधानम् विक्रयसाहचर्यात् सदृशौ हि तौ केनचिदंशेन ॥ १४४ ॥

न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत् ॥
मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत् ॥ १४५ ॥

ननु च प्रागप्येतदुक्तं 'न त्वेवाधाविति'। सत्यम् । यत्र यावत्येव वृद्धिस्तावानेव भोगः । स पूर्वस्य विषयः । यत्र तु महती वृद्धिः स्वल्पोपभोगश्चेद्बलादिना भुञ्जानस्य सर्वेण सर्ववृद्धिहानिः । यत्र क्षेत्रगवादिर्बन्धस्तद्भोगश्च वृद्धिसमितः । स चोपचितामपि वृद्धिं न ददाति । न च बन्धनं द्विगुणं तत्र कयाचिदतिमत्याऽत्यन्तमुक्तैव वृद्धिर्निश्चेतव्या । यदि तु वस्त्रादि भुज्यमानं नश्येत्तत्र **मूल्येन तोषयेदेन**माधातारमितरोऽपि वृद्धिं लभते । **अतोऽन्यथा** ददन्मूल्यम**आधिस्तेनो भवेत्** । यज्जातीयमाधिं भुक्तवांस्तदपहारे यो दण्डः स एव दाप्यः । **स्तेनश्चौरः** । अन्ये व्याचक्षन्ते । बलाद्भुक्ते वृद्धिहानिं भुञ्जीत । तन्मूल्यत एव वा यद्दणिकस्य मूल्यं मूल्यहिरण्यं यत्र भुञ्जान उच्यते 'मा मे बन्धं विनीनशो मा भुङ्क्थाः कतिपयैरहोभिर्मोक्षियामि' तथाऽप्युच्यमानो भुङ्क्त एवेति सोऽस्य विषयः ॥ १४५॥

आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः ॥
अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ ॥ १४६ ॥

आधिरुक्तार्थः । प्रीत्या भुज्यमानः **उपनिधि**स्तु शास्त्रान्तरवदन्तर्वित्तो न्यासः । तौ चिरकालं न स्थाप्यौ । किं तर्हि ? प्राप्ते काले मोक्षणीयौ । आधेर्मोक्षणकाले द्विगुणीभूतं धनं तस्यातिक्रमस्तस्मिन्नपि कालेऽमोक्षणम् । उपनिधिरपि यावता कालेन नास्यावसरो भवति मदीयमेवैतद्भोक्ताऽहमिति स प्रत्याहरणकालः ततोऽधिकः कालः **कालात्ययस्तं नार्हतः** स न कर्तव्य इत्यर्थः । हेतुमाह । **अवहार्यौ भवेतां ताविति** । तौ हि दीर्घकालमवस्थितावप्रत्याह्रीयमाणौ व्यवहार्याविति स्थितं । तस्माद्द्विगुणीभूतधनेऽधिमोक्षणे प्रयतितव्यम् । सुहृदुपदेशोऽयं " न त्वेवाधाविति " । भूयसाऽपि कालेनापहारः यतो वक्ष्यति । " आधिसीमाबालधनमिति " अतस्तस्यैवायमनुवादः ।

अन्ये त्वाधिविषयमुपदेशमिच्छन्ति । यो द्वेषेण द्विगुणीभूते धने कालं क्षपति तन्निलामं धनं नाधिकं वर्द्धते । न चास्याधुनाऽन्यत्राधानविक्रयौ स्त इह वृद्धिमयं मा लभतामित्यनेन मात्सर्येण तत्रेदमुच्यते **अवहार्यौ भवेतां ताविति** । अनया बुध्याऽमोक्ष

१ अजक्ष-भोक्तव्यं । २ णर-सा । ३ णर-अतियत्राभुक्तैकं । ४ णर-आत्मामनरोपवृद्धिं लभते । अददन्मूल्यं । ५ फ-यतो । ६ फ-विजानीष्व मा भुङ्क्ष्व । ७ फ-पूव । ८ फ-अन्तर्हितोव्यासः । ९ फ-आधिमोक्षणकालो । १० णर-अकाले । ११ फ-ऽमोक्षः । १२ णर-तावताकालेनस्य वचनं भवति । १३ णर-भोगो ममेति । १४ णर-अतो । १५ णर-कर्तव्ये न भवति हे न कर्तव्यः । १६ फ-अतोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतः स्वाम्यमस्य निवर्तते । यस्तु कथंचिदसति धने न मोक्ष्यति तस्य निसर्गविक्रयौ न स्तै इति । अर्थवाऽपरोऽर्थो मुखेनोपेक्ष्यति । परहस्तगतया शङ्कयोच्यते अवहार्यौ भवेतामिति ॥ १४६ ॥

संप्रीत्या भुज्यमानानि न नश्यन्ति कदाचन ॥
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते ॥ १४७ ॥

प्रीतिरेव **संप्रीतिः** । तया हेतुभूतयोपभुज्यन्ते धेन्वादयस्ते **न नश्यन्ति** । पूर्वस्वामिसंबन्धहान्याभोक्तुः सत्वापत्तिर्नाशः स धेन्वादीनां प्रीत्या भुज्यमानानां न भवति । ननु च सर्वस्यैवोपनिधेर्भोगेनापहारो नास्ति वक्ष्यति "निक्षेपोपनिधिश्चय" इति । को विशेषो धेन्वादीनाम् । उच्यते । यत्र दशवर्षो भोगो न च स्वरूपनाशस्तत्र यत्किंचिदिति सामान्यवचनेन प्राप्तेऽपहारे उपनिधेः प्रतिषेधः धेन्वादीनां तूपनिधित्वमेव नास्त्यतः प्रतिषेधस्य नायं विषय इति स्यादाशङ्काधाननिमित्तो हि धेनुशब्दो यदि परसंवत्सरे धेनुः स्यात् परत उपसर्या यदि गर्भमादध्याद्धेनुत्वमापद्येत तदा जनयेदाशङ्कामस्यैवेयं न देवदत्तस्य यतः प्रष्ठौहीनभोग्या प्रीतिसंभोग्यश्चोपनिधिर्येन स्वकैर्भोग्यं परिपालयन् पुनर्भुज्यमानं दृष्टं न पुनरुपनिधेरेतद्रूपं भोग्यो ह्युपनिधिरसद्भावाद्भोग्यस्य च कीदृशगुणमुपनिधित्वं उपनिधेश्चासौ प्रतिषेधः तस्मादुपनिधिरूपातिक्रमादसति तस्मिन्प्रतिषेधे यत्नान्तरमुक्तम् । उष्ट्रादीनामपि दशवर्षाणि भुज्यमानामवस्थान्तरापत्तिः । अतस्तत्रापि नोपनिधित्वम् । **वहन्निति** केचिदश्वविशेषणं मन्यन्ते । वृषस्य नायं विधिः । अपरे तु गर्दभाश्वतरार्थं मन्यन्ते । **दम्यो** बलीवर्दः । **प्रयुज्यते** वाहान्यस्य स्पंदयिते ।

अन्ये तु पुनः प्रतिषेधं विकल्पार्थं मन्यन्ते । एतद्व्यतिरेकेणान्यस्योपनिधेरस्ति कादाचित्कोऽपहारः तेन यद्वस्त्रादि प्रीत्या भुज्यतो यावत्परिक्षीणं तत्रत्यैवोपहारः । न हि प्रीत्या गृहीते वस्त्रे तस्योपरिक्षीणे स्वामिनोपेक्षते पुनरवसरोऽस्ति देहि मे वस्त्रं विनाशितं त्वया तत्समेन मूल्येन संसाधयति ॥ १४७ ॥

यत्किंचिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ॥
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥ १४८ ॥

यत्किंचिद्भुज्यमानमित्यवस्थितेन संबन्धो **धनीति** सन्निधानात्सामान्यनिर्देशेऽपि भुज्यमानधनोपेक्षणं प्रतीयते । **यत्किंचिदिति** दासीदासासारभाण्डादि सर्वं ग्राहयति । न

---

१ फ–अथवा । २ फ–बान्धवा; क्ष–बन्धवा ३ णर–यःकश्चिदिति । ४ फ–पाठ्य । ५ ज–निर्भासितं । तत्समानमूल्येन । ६ णर–संशोधयति । ७ णर–भुज्यमानमपि इति विहितेन संबंधः । ८ फ–पुमानत्र । धनोपेक्षणे । ९ ज–+अव्यवहिते–; णर–वीया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि तल्लोकेऽत्यन्तं धनमिति प्रसिद्धं गोभूहिरण्याद्येव महार्घं धनमिति प्रसिद्धतरम् । तेनाय-मत्र वाक्यार्थः । यत्किंचिद्द्रव्यं परेण भुज्यमानं धनी धनस्वामी दशवर्षाणि यावत्प्रेक्षते न किंचिद्वक्ति न राजनि व्यवहरति न कुलसमक्षं भोक्तारं वदति ' मदीयमेतत्किमिति त्वया स्वयं भुज्यत ' इति स दशभ्यो वर्षेभ्य उत्तरकालं न तल्लब्धुं स्वीकर्तुमर्हति निवर्ततेऽस्य स्वमिति यावत् । प्रेक्षणेन ज्ञेयतामात्रमुच्यते न प्रत्यक्षतैव । संनिधाविति वक्ष्यामः । न ज्ञातिसंबन्धिभिः । तथा च स्मृत्यन्तरं–' ज्ञातिसंबन्धिभिर्विना' इति ॥

"सबन्धिबान्धवैश्चैव भुक्तं यज्ज्ञातिभिस्तथा । न तद्भोगो निवर्तेत भोगमन्यत्र कल्पयेत् ॥",

तदयुक्तम् । अव्यवस्थैवं सति स्यात् । के ज्ञातयः के वा संबन्धिन इति संबन्धमात्रग्रहणे न किंचिद्व्यावर्त्यं । तस्माद्येनान्यदीयं भुज्यते स एवं भवति किन्तु तथा सति परशब्दोऽनुवादमात्रमनर्थः कस्यापि न परव्यपदेशः स निरस्यते । यथा भार्यापती पितापुत्राविति । तत्र ह्यात्मन्यपि व्यपदेशोऽस्ति " अर्द्धो ह वा एष आत्मनो यज्जायाऽऽत्मा वै पुत्र नामासि" इति । तेन दम्पत्योः पितृपुत्रयोर्न भोगाभोगौ कारणं तेषामपि विभक्त-धनानां भोगकाले प्राप्तेऽभोगो बाधक एव । भार्याया अपि स्त्रीधने भर्तृसकाशाद्गृहीते बन्धेन पत्युर्भोगे नासिद्धिः सा ह्यत्यन्तपरवती नोभयोर्विभागोऽस्ति स्त्रीधनमपि तेनैव तस्याः परिपालनीयं राज्ञा ' स्त्रीश्रोत्रियद्रव्यादन्यत्र' इति च पठ्यते । एवमनेन स्वामिन उपेक्षमाणस्य स्वाम्यहानिरुक्ता । कस्य तर्हि तत्संभवतीत्येवमर्थमुत्तरश्लोकः ॥ १४८ ॥

अजडश्चेदपोगण्डो विषये चास्य भुज्यते ॥
भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति ॥ १४९ ॥

न स तल्लब्धुमर्हतीत्यस्य शेषः । अजडश्चेदपोगण्डो यदि जडः अप्रतिपत्तिमान् पोगण्डो बालः प्राक्षोडशाद्बालः पोगण्ड इत्युच्यते । एतच्च स्वधनसंरक्षणासामर्थ्य-कारणानामन्येषामप्युपलक्षणार्थं । मद्यद्यूतविशक्तता दीर्घरोगगृहीतता तपःस्वाध्यायै-कपरत्वं व्यवहारेष्वनैपुण्यं वागिन्द्रियाभावो बाधिर्यं यस्यैतेऽसामर्थ्यहेतवः सन्ति न तदीये धने भोक्तुर्बहुतरेणापि कालेन स्वत्वमापद्यते । विषये चास्य भुज्यते । अस्येति धनिनः प्रत्यवमर्शः विषयः काश्मीराणां कश्मीरपञ्चालानां च पञ्चाला यदि भोक्ता च स्वामी चैकस्मिन्नेव देशे वसेत्तथापि शक्तिविहीनस्यायं व्यवहारः । अत्रापि व्याख्याने प्रपञ्च एवायं । अजडापौगण्डग्रहणस्य प्रदर्शनार्थतया व्याख्यातत्वात् तेन यस्य जानतो यदुपेक्षा-कारणं न संभाव्य ते तदीयं धनं दशवर्षाणि भुञ्जानो भोक्तैवार्हति तस्य तत्स्वामित्यवगन्तव्यम् ।

---

१ णर–त्वत्प्रेक्ष्य ज्ञात्वा । २ णर–मुत्रभ्राति । ३ णर–ज्ञायता । ४ णर–सपर । ५ णर–स्त्रीधनेन । ६ णर–आः—पोगण्डस्यापि वासितः । ७ णर–भोक्तरिति शक्ता राज्ञा व्यवहारेषु । ८ नैपुण्यं—णर–तदीय धनं । ९ फ–प्रदर्शनव्याख्यानत्वात् । १० फ–प्रज्ञानोपसंभाव्यते । ११ णर–सातव्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु च न भोगात्स्वत्वं युक्तं स्वत्वे सति भोगो युक्तः । भोगाद्धि स्वत्वेऽव्यवस्था स्यात् । यश्चायमवधिर्दशवर्षाणीति स स्मृत्यन्तरेण न सर्वस्मिन्धन इष्यते । किं तर्हि ? "पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी" इति (या. व. स्मृ. व्य. २४) । अन्ये तु विंशतिवार्षिकेणापि भोगेन स्वाम्यमनुमन्यन्ते । एवं ह्याहुः "अनागमं च यो भुङ्क्ते बहून्यब्दशतान्यपि" । तथा

"संभोगो यत्र दृश्येत न दृश्येतागमः क्वचित् । आगमः कारणं तत्र न संभोग इति स्थितिः" ॥

त्रिपुरुषभुक्तिवादिनस्तावदेवं पठन्ति (नारदीये १।९१)

"यद्विनागममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् । न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम्" ॥

अस्यायमर्थः । आगमो दानाद्यसति तस्मिन्यद्भुक्तं पितृपितामहप्रपितामहैस्तच्चतुर्थस्य सिध्यति न तु विंशत्या वर्षैः । तत्रान्यत्रोक्तम्

"आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा । अन्ते तु भुक्तिरेवैका प्रमाणं स्थावरे भवेत्" ॥

तृतीयस्य भोगात्सिद्धिर्न प्रथमद्वितीययोः पितृपितामहयोरस्यापि न विंशतिवर्षैर्भोगः प्रमाणम् । अन्ये त्वागमरहितस्य वार्षशतिकस्यापि भोग्यस्याप्रामाण्यमनुमन्यन्ते । तथा चाहुः

"अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि । चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥

"भोगकेवलतां यस्तु कीर्तयेन्नागमं क्वचित् । आगमः कारणं तत्र न संभोग इति स्थितिः" ॥

या तु बहून्यब्दशतानीति तदाहर्तृविषयमात्मीयमेव भोगम् । चिरकालत्वे हेतुमाह । तस्य पितृपितामहभोगेन विना न सिद्ध्यतीत्यर्थः । कथं पुनरेकस्यानेकाब्दशतो भोगः पुरुषस्य । नैष दोषः । चिरकालप्रतिपादनपरा बहुत्ववचनाः शतं सहस्रमित्यादयः शब्दाः । यथा "शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रिय"इति । एतदुक्तं भवति । विंशतिवार्षिकाद्भोगादधिकादपि न प्रथमभोक्तुर्भोगात्स्वत्वसिद्धिरथवा तत्परस्यापि न सिद्ध्यतीति यथाश्रुतमेव । न हि बहुष्वब्दशतेष्वागमस्मरणं संभवति । ततश्च चिरन्तनदेवायतनब्राह्मणमठग्रामा राजभिरपह्रियेरन् लेख्यशासनमपि राजाधिकृतलेखकलिखितमिति चिरन्तनेषु नैव प्रत्यभिज्ञायेत । कूटशासनमपि संभाव्येत । तस्माच्चिरन्तनो भोगः स्वत्वकार्यैः स्वत्वस्य दानाद्यागमसंभावनाया ज्ञापको हेतुर्न तु कारकः । अत एव भुक्तिः प्रमाणमध्ये

१ णर–परतो । २ णर–अन्येस्य वार्षशतिकस्यपि भोगस्य प्रामाण्यं नानुमन्यन्ते ३ णर–हि । ४ णर–भोगछलोपदेशेन संज्ञेयस्तु तस्करः । इति उच्यते । यत्र चेदुक्त भोगेनैव प्रमाणमिति तदयुक्तं । सर्वस्मृतिकारै त्रिपुरुषस्य भोगस्य प्रामाण्येनाभ्युपगनत्वार । ५ णर–चिरकालसिद्धिहेतुमाह । ६ ज–परत्व वचनाः फ–परत्ववचनाः । ७ फ–तत्पुत्रस्यापि । ८ णर–ग्राम ।

For Private And Personal Use Only

पठिता ॥ " लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम् " इति । न तु स्वत्वकारणमध्ये " सप्तवित्तागमा इति " " श्रुतशौर्यतपःकन्या " इत्यादौ च । अथवा यत्र बलादिभोग-कारणं संभाव्यते तद्विषयमेतत् । अनागममित्यादि त्वत्रैव प्रकरणे पठितम् (नारदीये १।९२) "याचितान्वाहितं न्यस्तं बलावष्टब्धयाचितम्। अप्रत्यक्षं च यद्भुक्तं षडेतान्यागमं विना"॥ इति ।

ननु च ' आधिः सीमा ' इत्यनेनैवायमर्थः सिद्धःउक्तस्य कालस्य त्रिपुरुषं याव-द्भुङ्क्ते स एवार्थः । अयं तु तत उत्तरकालमपि निवृत्त्यर्थमारभते । तथा च बहून्यब्दशतानी-त्यत्र वचनमन्वाहितं यत्प्रकटमन्यथा प्रदर्श्यान्तर्हितमन्यदवस्थाप्यते बन्धोपात्द्दतं रात्रौ सन्धिभेदच्छलादिना बलावष्टब्धत्वं प्रसह्येति विशेषः । शिष्टं प्रसिद्धम् ।

यदि त्रिपुरुषा भुक्तिः प्रमाणं कस्तर्हि यदुक्तं "पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी" इत्यस्यार्थः ? । केचिदाहुः कियन्तं कालं भुञ्जानस्य सति लेख्यदोषादौ सक्ताभियुक्तादि-कृतत्वं क्रमाक्षरविलोपादसत्यनयाभ्यामधमर्ण उच्यते । संदिग्धरूपमपि लेख्यमियता भोगकालेन निश्चीयते । अन्ये त्वाहुर्येनैव तामेव भूमिरेकस्य बन्धायार्पयति तामेव चापरस्यैकस्याऽऽद्यं प्रमाणमपरस्य पाश्चात्यं तत्र सत्यपि प्रामाण्यस्याद्यत्वे पाश्चात्यो विंशतिवार्षिको भोगो बलवानेतच्चायुक्तम् । ' येनैव स्वीकृतो बन्धस्तथैव सः ' " आधेः स्वीकरणात्सिद्धिः " इति वचनात् स्वीकारश्च भूमेर्भोगाभिलापेव तेनेदृशे विषये स्वल्पेनापि भोगमिति कालेन बन्धसिद्धिः । एतदेवाभिप्रेत्योक्तम्

" विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु । विशेषतः स्थावराणां यन्न भुक्तं न तत्स्थिरम् "॥

इति । विशेषग्रहणं गवाश्वादावभुज्यमानेऽपि नासिद्धिर्यतस्तेनावश्यंभोग्यास्तथाहि भवेद्गौर्गर्भं गृह्णाति कीदृशोऽस्यां अतो भोगः भूमिस्तु सर्वदा फलदेति भोगलाभम-न्तरेण न बन्धत्वसिद्धिः । तत्रापि कथंचिदुपेक्ष्यमाणस्य तु यच्छतः प्रथमभोगकाल एव यदि द्वितीयेनाऽऽधिग्राहकेण संनिकर्षादिना स्वीकृतः स्यादितरेण वाद्य प्रमाणवता देश-विप्रकर्षात्कार्यव्यासङ्गाद्वा न स्वीकृतस्तदा विचार्यते नेयता तदसिद्धिः । यदो तु गृहीताधिरेव समनन्तरं राज्ञा प्रव्राजितो महान्तं व्याधिमाससाद न वाऽस्यान्योऽर्थरक्षाद्यधिकृतः कश्चिदस्ति स चिरेणाप्यागतः सिद्धावपि निरुपधिप्रमाणकाले लभत एव स्वीकृतमप्यन्येन ।

अन्ये तु भ्रातॄणां न्यूनाधिकविभक्तानां पुनर्विभागः समीकरणार्थ उक्तः स विंशतिवर्षेभ्य ऊर्ध्वं नास्तीत्येवमर्थमिदमाहुः । एतावन्मात्रफलत्वे तत्रैवाभिधानमुचितम् । सामान्याभिधानं तु प्रकरणोत्कर्षेणान्यविषयतामपि ज्ञापयति ।

---

१ णर-त्रिपुरुषायायुक्तेरपवादो । २ णर-सिद्धं । ३ णर-द्यन्तं । ४ णर-भोगाभिस्यंग एव । ५ फ-न विह्नो । ६ णर-कीदृशोन्यो भोगोपि न दोष । ७ णर-उद्यच्छतः । ८ णर-संगात्रस्थी । ९ ज-यदि । १० ज-तोधिरेव ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपरे तु खिलीभूता भूमिर्येन क्षेत्रीकृता तत्र भूमिस्थानोपभोग उक्तः । स चेदेतावन्ति वर्षाणि निगृहीतस्तथा सूत्रक्षेत्रयन्त्रैश्च स्वामी भूमित्वेन स च विषय इत्येवमाहुः । इह भवन्तस्त्वाहुर्यौ समानदेशौ समानसामर्थ्यौ समानस्वभावौ समानधनौ तत्प्रयोजनावपरस्परसंबन्धिनौ तयोरन्यतरस्येतरेण भुज्यमानमियन्तमवधिं समक्षमुपेक्षमाणस्यास्यैव स्थावरेषु स्वाम्यं किन्तु त्रिपुरुषभुक्तिविरोधात् । सर्वेण सर्वं विरुद्धे ह्येते स्मृती ते न किमपि कल्पनमर्हतो येनास्ति च स्वाम्यं नास्ति चेत् किंचिद्युज्यते तत एव व्यवस्था युक्ता ।

यद्यपि सत्वागमकारणानि बहूनि सन्ति दानविक्रयबन्धकारणादीनि तथाऽप्यनुपलभ्यमानकारणविशेषे विंशतिवार्षिकभोगेऽनन्तरादर्शितविषये बन्धरूपताऽभ्युपगन्तुं युक्ता चञ्चलं भोग्यं च स्वत्वं वस्त्वपचये तत्प्रत्याहर्तुं लभ्यते । ततश्च त्रिपुरुषा भुक्तिः सर्वस्य स्वमापादयति दानविक्रयसंभावना यावत्येव सा वार्षिकी भविष्यति विंशतिवार्षिकेषु भोगे न किंचिदनुपपन्ना । यत्रोभावप्यागममन्तरेण भोगमात्रबलात्प्रवृत्तौ तत्र पूर्वो भोगश्चिरन्तनोऽपि विंशतिवर्षभोग्येन सांप्रतिकेन निरुपाधिना बाध्यते । दण्डपूर्विकयाऽत्रागत इयत्कालो भोगः त्रिपुरुषागतताया भुक्तेर्बाधक इत्युक्तं भवति ।

भग्नं तद्व्यहारेणेति । व्यवहारग्रहणं धर्मनिवृत्त्यर्थम् । तेन यदि कथंचिज्जानीते तदा जीयेत । तदापि त्वनेनोपनिधिभोगज्ञापने प्रमाणं नास्ति । तेन व्यवहरतो जीयन्ते तद्धर्मो नास्ति । तादृशेन भोगेनापि हृत इति तिष्ठत्वेतत् ॥ १४९ ॥

*** आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः ॥**
राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति ॥ १५० ॥

आधीयत इत्याधिर्बन्धकद्रव्यं गोभूहिरण्याद्युच्यते । यच्चोत्तमर्णाद्धनमादीयते । **उपनिधिः** शास्त्रान्तरेणान्तर्हितो न्यास उक्तः । यदप्रदर्शितरूपं सचिन्हवस्त्रादिना पिहितं निक्षिप्यते । प्रीतिभोग्यं तु युक्तमुपनिधिशब्दवाच्यम् । तस्य निक्षेपग्रहणेनैव गृहीतत्वात् । **सीमा** मर्यादा । ग्रामादीनां बहुसाधारण्याद्धि तत्रोपेक्षा संभवति । गृहादीनां तु प्राकारपरिखादिरूपा द्वित्रिहस्तपरिमाणरूपा द्वयोः साधारणी याऽन्यतरे कथंचिदुपनीयमाना स्वल्पत्वाद्भोगस्य कश्चित्कियन्तं कालमुपेक्ष्य तत्रापि दानादिसत्वापगमहेतुं संभावयतः ।

*** [याद्विनागममत्यन्तं भुक्तपूर्वैस्त्रिभिर्भवेत् ॥**
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥ १ ॥]

१ ज–अत्र । २ णरज–यन्त्रैवरे स्वामीत्येवमादिर्विषय इत्येवमाहुः । ३ णर–ततःस्वंप्रदत्तेषु पामुत लभ्यते । ततोल्पस्वपुरुषानुभक्ति । सर्वेण सर्वस्वाम्यां आत्पादयति । ४ जरण–श्रोत्रियद्रव्यं नोपभोगेन जीर्यते । ५ णर–निकृष्यते । ६ जरण–उपेक्ष्यतापि तत्रापि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतस्तत्पुत्राः पौत्रा वा गूढचिन्हादिना प्रज्ञापितसीमत्वादाच्छिन्दन्त्येव । **बाल-धनं** दृष्टान्तार्थं पोगण्डशब्दस्य दर्शितत्वादित्युक्तम् । **स्त्रियो** दास्यः । भार्या वा । नेतरस्याधनस्यापहार उक्तो 'धनस्य दशवार्षिकी' इति ।

ननु च नेह धनमस्ति यत्किंचिदिति वस्तुमात्रनिर्देशोऽयम् । नैवं धनीति सम्बन्धेन विषयतैव यत्किंचिदिति सामान्यशब्दस्य प्रतीयते । क एवमाह स्त्रियो न धनमिति । इत्थं विनियोज्ये द्रव्ये धनशब्दो वर्तते । अथास्मादेव स्त्रीधनात्स्वत्वमात्रोपलक्षणं धनोपमानेन पुमांसोऽपि भोगेन दासाः स्वीक्रियन्त एव ।

राजस्वं देशेश्वरा राजानस्तेषां धनम् । ते हि महाधनत्वादुचत्वान्वयं धनमन्विच्छन्तो विरुतभेदादिभिर्निधनीक्रियन्ते तदूनापेक्षया श्रोत्रियद्रव्यं श्रोत्रियधनाभियुक्तिः ॥ १५० ॥

यः स्वामिनाऽननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः ॥
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः ॥ १५१ ॥

उक्तं 'न भोक्तव्यं बलादाधिं भुञ्जानो वृद्धिमुत्सृजेत्' इति सर्वस्य हि ग्रहणमुच्यते । तत्र निषिद्धो भोगे बलादाधिं भुञ्जानो वृद्धिमुत्सृजेदिति सर्वं हारयत्येव वृद्धिमनभिहित-प्रतिषेधनं रहस्युपभुज्यमानभोगेन चाधिर्नश्यति । रूपसुवर्णालंकारादावर्द्धवृद्धित्यागोऽनेन श्लोकेनोच्यते । यत्तु नवं महार्घमलङ्करणवस्त्रादि परिधीयमानं नासितं तत्र न केवलं वृद्धि-हानिर्यावद्धनं न नष्टं तत्परिपीड्य मूलतः प्रविशतीति महत्तरैर्व्याख्यातम् । **यज्वना** तु व्याख्यानं यत्र स्वामी व्यवहरति अध्यधीनश्च तत्राप्यधीनेन बन्धो दत्तः स्वामिना च दृष्टस्तत्र धारणकेन कस्मिंश्चिदवसरेऽप्यधीनः पृष्टः प्रयोजनं ममानेन बन्धेनास्ति तत्रोप निधिन्यायेन तेनानुज्ञातः कालान्तरे भुञ्जानं यदि स्वामी पश्यंस्तदनुज्ञातं बन्धं क्षपितवान् । सतीदृशे विषयेऽर्द्धवृद्धित्यागः । तदयुक्तम् । यतस्तुल्यो व्यवहारः परस्परापेक्षः स्वामिभृत्ययोः । तत्र तत्रान्यतरेणानुज्ञाते नायमनुज्ञातः प्रयुज्यते । अधर्मतः स्वामिशब्दस्यार्थे स्वत्वमीदृशि विषये भवति । अन्यथा बन्धं यो ददाति सोऽवश्यं स्वाम्येन अध्यधीनस्तु न स्वामी यद्येवं चौरस्तर्हि तस्मात्स्वामित्वाध्यारोप उपयोगे वाऽध्यधीने स्वाम्यनुज्ञाव्यवहारा-द्ब्रह्मदत्तवदतः पूर्व एवार्थः ।

स्वामिग्रहणं पादपूरणार्थम् । **भुङ्क्तेऽविचक्षण** इत्यकारः *संहितया प्रश्लिष्टनिर्दिष्टो* वेदि-तव्यः । यस्या ह्यस्ति बुद्धिर्वृद्धिर्ममास्त्येवाधिको लाभो वस्तुभोग इति सो **विचक्षणः** । न हि

फ-रूक्ष्मा । १ ण-र-धनुग्रहणमस्ति । २ फ-स्त्रियो धनमिति । ३ ण-र-विनिमयायाते । ४ ण-र-श्रोत्रियवि द्यातियुक्ता । ५ ण-र-निष्पत्तिः । ६ ण-र-सर्ववृद्धिनो धनि इह स्वर्धवृद्धिग्रहणमुच्यते । ७ फ-र-तस्योप । ८ ण-र-नश्येत् । ९ फ-रूपवर्णा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोके शास्त्रवियोजनीया स्थितिः । यदुभौ लाभश्च भोगश्च वृद्धिः स्यात्तेन सा वृद्धिर्भोक्तव्या। निष्कृतिपरशुद्धिर्विनियम इति यावत् । अन्ये तु द्विगुणीभूतेऽप्यमोक्ष्यमाणे प्रतिषेधमिममिच्छन्ति । तस्य हि स्वल्पोऽपराध इति वदन्तः प्रथमं तावदादावेव तैर्याज्ञवल्क्यवचनस्य विषयो देय ' आधिः प्रणश्येदिति ' ॥ १५१ ॥

कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता ॥
धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् ॥ १५२ ॥

लाभार्थो धनप्रयोगः कुसीदं[1] । तत्र वृद्धिः । अथवा प्रयुज्यमानं प्रयोक्तृसंबन्धिधनमेव कुसीदम् । यदायं स्वल्पं दत्त्वाऽधिकं ग्रहीष्यामीति धनं दीयते तत्कुसीदं तत्र वृद्धिः। सा द्विगुणत्वं नातिक्रामति । तावदुत्तमर्णेन वृद्ध्यर्थं धनं दत्तवताऽधमर्णाद्ग्रहीतव्यं यावन्मूलधनं द्विगुणं प्रविष्टम् ।

ननु वृद्धेर्द्वैगुण्यं श्रूयते । मूलेन सह त्रिगुणं प्राप्नोति । नैवंगुणोऽवयव उच्यते । स तावदवयविनमपेक्षते । प्रकृतं च धनम् । अतः प्रयोगविषयस्य धनस्यानेन प्रकारेण द्वैगुण्यमुक्तं भवति । तथा च स्मृत्यन्तरं " चिरस्थाने द्वैगुण्यप्रयोगस्य मोच्य आधिः स तदुत्पन्ने प्रविष्टे द्विगुणे धन " इति ।

वृद्धिश्चानेकरूपा । कार्षापणेषु प्रयुक्तेषु कार्षापण एव वर्द्धते[2] । क्वचित्[3]सन्ततिः स्त्रीपशूनां वेति संततिः । क्वचिदाधिभोगः गोभूम्यादेः । तत्रेदं द्वैगुण्यं सरूपवृद्धिविषयं केचिदाहुः । तत्र हि मुखं वृद्धेर्द्वैगुण्यं प्रतीयते संततौ न विज्ञायते । किं सङ्ख्यायाऽस्य[4] द्वैगुण्यमुत परिमाणेनोन्मानता वेयमतो वेत्यादिनिश्चये पशूनां मूल्याद्धि महार्घत्वं हस्त्यश्वादिषु क्रयविक्रयादौ दृश्यत एव । महाप्रमाणा हि महार्घा भवन्ति ।

ननु च संततौ सारूप्यमस्त्येव । गोः संततिर्गौरिव । तत्र भेदोपन्यासो न युक्तो वृद्धिसरूपा संततिश्चेति । उच्यते । नैकजातीयत्वमात्रेण सारूप्यं भवति । किन्तु वयःपरिमाणादिसाम्येन । अतो युक्तो भेदोपन्यासः । भोगलाभेऽपि कुतो द्वैगुण्यप्रतीतिरूपकाणि जनयतु गावः प्रयुज्यन्ते । गोभूम्यादिपयोयवसादयो यथासंभवं भुज्यन्ते । तत्र कीदृशं द्वैगुण्यं समाचारश्च क्वचिद्दृश्यते । वर्षशतानि भूमिरामूलहिरण्यादानाद्भुज्यते । पठति च याज्ञवल्क्यः "आधिश्च भुज्यते तावद्यावत्तन्न प्रदीयते" (व्य.६०) इति । अत्रोच्यते । वृद्धिमात्रे श्रूयमाणे द्वैगुण्यं कथं विशेषेऽवस्थाप्यते । न हि स्तुत्या सामान्यप्रतिपत्तिर्भवन्ती विना

---

१ फ–कुशीदं । २ र–रूपकेषु प्रयुक्तेषु रूपका एव वर्धते । ३ र–क्वचित् । ४ फ–संख्यास्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणेन विशेषेऽवस्थातुमर्हति । यत्तु संततावनुपपन्नं द्वैगुण्यमित्यवगमे यत्नः क्रियतां मूल्यमर्षेण परिनिश्चितवता वृद्धिस्तत्सामान्या यत एव तज्जातानां भवति भूमिभोगेऽपि यवसगोधूमादौ तत्पच्यमानस्यार्थतः शक्यत एव समत्वं निश्चेतुं । उपकारवचनोऽपि गुणशब्दोऽस्ति । क एवं सति समगुणो भवति क उपकारको भवतीति गम्यते । अनेन यावन्मूल्यं गोधान्यविनिमयादुत्पद्यते तावदेव चेत्तत उत्पन्ना वृद्धिस्तदा भवति समगुणत्वे परिमाणादिसाम्याभावेऽपि यस्तु कचित्समाचारो भवतैव परिहृतः कचिद्ग्रहणं प्रयुञ्जाने समाचारभ्रंशसंभवे स्मृतयो नियामिका अर्थवत्यः ' अक्षीणि मे दर्शनीयानि पादा मे सुकुमारतरा ' इतिवत्प्रयोगाद्बहुष बहुवचनमिति शास्त्रमारभ्यते । असति विप्रयोगदर्शने प्रत्याख्यायते । उपसर्जनोपसर्गपौर्वापर्यप्रयोगासिद्ध्यर्थमुक्तम् । न हि कश्चित्प्रपचतीति प्रयोक्तव्ये पचति प्रेति प्रयुङ्क्ते इति वचनमपि " आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते " यावद्दानात्तोद्विगुणमप्रविष्टम् इत्यपि शक्यते नेतुं स्मृत्यन्तरैकवाक्यत्वाच्चैतदेव युक्तमध्यवसातुं उपपादितं चैतन्निपुणतोऽन्यत्र ।

सकृदाहिता सकृदित्यनेन व्यवस्थापितोऽङ्गीकृतः पुनःपुनःप्रयोग इति यावत् । आधानं स्थापनमुच्यते । वचनव्यवस्थया च निरूपणं स्थापनमेव पुनः प्रयोगस्य द्विगुणीभूते धने आदीयमाने भवति । यदा द्विगुणो हि वृद्ध्यर्थं उत्तमर्णोऽधमर्णश्च तदीयेन धनेन महत्कार्यं करिष्यन् करणपरिवृत्तिं करोतीति या प्राक्तनी वृद्धिरियं वाऽद्यप्रभृति वर्धत इति तदा द्विगुणभूतमपि पुनर्वर्धत एव । पुरुषान्तरसंचारेण वा यदि द्विगुणीभूतं धनिकस्योपयुज्यते तदाऽधमर्ण उच्यमानोऽन्यपुरुषं ददतमर्पयति ' एष त इयद्भिरहोभिर्दास्यतीति ' तत्र स्वहस्तं दीयमानं पुनर्वर्द्धते । न चायं दानं प्रति प्रतिप्रतिभूः किन्तु निक्षेप्ता दातैव । एतत्तु ऋजुना पुरुषान्तरमसंक्रान्तमिति व्याख्यातम् । अथवा प्रागपि द्वैगुण्याद्यदा बन्धमन्यस्मै प्रत्यर्पयति दीनारेषु सलाभेषु द्वित्वे तस्याबन्धस्य एष तु धर्माक्षको बन्धस्य प्राग्वृद्धौ स्थितायां तस्मादह्नः प्रभृति पुनर्द्वैगुण्यमाप्नोति । यदा तदीयं बन्धकं तदनुज्ञयोत्तमर्णेनान्यत्राधाय स्वधनं गृह्यते तदा वर्धत एष पुरुषान्तरसंचारः । उभयत्वाद्विगुणीभूते प्रयोक्ताऽधमर्णकेन प्रकारेणान्यस्माद्ग्रहणमनुज्ञाप्यते । यदि वाऽस्मादन्यद्गृह्यते गृहीता देशान्तरं गमिष्यन् कार्यान्तरेण चान्यत्र संचारयति ऋजुस्तु तस्मादेवाधमर्णादनवीकृते प्रयोगे द्विगुणाधिकां वृद्धिं नेच्छति । अत आह पुरुषान्तरमसंक्रान्ते पुनः क्रिया प्रयोजनं

---

१ फ–दृष्टवियोगत्वात् । २ फ–चारभ्यते । ३ फ–उपसर्गपूर्वापर्य । ४ र–प्रीति । ५ र–दानाद्धौ । ६ र–उपर्चितुं, ज–तं । ७ र–व्यवस्थापितेन नधीकृतः । ८ र–मधिकस्योपमुख्यै । ९ फ–असक्रान्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च वक्ष्यामः । ये तु व्याचक्षते या वृद्धिरुपचिता सांवत्सरी युगपत्सर्वे वा नीयन्ते तत्रायं विधिः । या पुनः प्राप्तदानाऽपि सर्वा न दीयते तत्र द्विगुणादधिकग्रहणमपि तेषां न शब्दो यथार्थो नाप्याहित इति । सांवत्सरी तावदुपचिता ग्राह्या द्वितीयसंवत्सरे पुनरानयनमस्त्येवेति न कश्चिद्द्वैगुण्यनियमः स्यात् । अथ यो द्विगुणीभूतं सलाभं धनमानयति तत्राधिकनिषेधस्तु प्राग्द्वैगुण्याद्वृद्धिमात्रदायसमर्थो वृद्धिं ददाति । मूलं तस्यापरिमितग्रहणमिति । एतदपि न किंचित् । यः संवहति तस्यानुग्रहो न्याय्यो नाधिकग्रहणम् । यस्तु राजा द्विगुणीभूतमपि कथंचिदाप्यते तस्याधिकमोक्ष इत्येतदन्याय्यम् । न चाहितेत्यस्य शब्दस्यायमर्थः ।'अप्याहृतेति' पाठान्तरम् । तथापि सकृच्छब्दो न निश्चितार्थो न्यायात्तु परित्यक्तः स्वकृतश्च पाठः स्यान्न मानवी स्मृतिरित्युक्तैव व्यवस्था न्याय्या ।

धान्यादिषु पञ्चतां पञ्चगुणतां नात्येति । **स्मृत्यन्तरे** धान्ये चतुर्गुणोक्ता "हिरण्यवस्त्रधान्यानां वृद्धिर्द्वित्रिचतुर्गुणा" इति । तत्र व्यवस्था यदि दरिद्रभूतः प्रयोक्ता ग्रहीता च महाधनसंपन्नस्तेन धान्येन महान्तमर्थं कृतवांस्तदा पञ्चगुणाऽन्यथा चतुर्गुणा सा च फलं वार्षम् धान्यस्य पृथगुपादानात् । मालवकउदीच्येषूर्णाविषयः प्रसिद्धः । वाह्यो गर्दभोष्ट्रबलीवर्दादिः ॥ १५२ ॥

कृतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति ॥
कुसीदपथमाहुस्तं पञ्चकं शतमर्हति ॥ १५३ ॥

अनुसरन्त्यनुधावन्त्यनुवर्तन्ते सर्व एवार्था एतमित्य**नुसारः** । शास्त्रोदितः समाचारः । स च विविधोऽशीतिभागादिः पञ्चकशतपर्यन्तस्तस्मा**दधिका** वृद्धिः **कृता** यावत्तथाऽधमर्णेनोत्तमर्णस्य **न सिध्यति** कुतो व्यतिरिक्ता यतः शास्त्रबाह्येत्यर्थः ।

अर्थवादान्तरमाह । **कुसीदपथमाहुस्तमिति** । कुपुरुषा यत्र सीदन्ति कुशीदं धर्मेण तद्धनिनो लक्ष्यन्ते । कुशीदीनामयं पन्था मार्गो व्यवहारो न साधूनामिति निन्दा । यस्यावश्यमधिका कर्तव्या महद्धि कार्यमयं मदीयेन धनेन साधयतीति बुद्ध्या तदा वर्णविभागमनपेक्ष्यं **पञ्चकं शतं ग्रहीतुमर्हति** । लिप्सेदर्थं इदमुच्यते । पाठान्तरं 'कृतानुसारादधिकेति' यस्याकिंचनस्य सतः स्वल्पा कृता तेनैव धनेनान्यथा वा महार्थतां प्राप्तस्तस्यानुसारादधिका क्रियमाणा न सिध्यति यः परं पञ्चकशतमर्हति ॥ १५३ ॥

नातिसांवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत् ॥
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या ॥ १५४ ॥

---

१ ज-न्यायमुपरित्यक्तः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संवत्सरे भवा सांवत्सरी। अतिक्रान्ता सांवत्सरी। भवप्रत्ययार्थः सामर्थ्यादन्तर्भूतः। अथवा संवत्सरमतिक्रान्ता अतिसंवत्सरेति प्राप्ते वृद्धाकारौ छन्दस्तुल्यत्वात्कर्तव्यौ। येषां वृद्धिरनन्तप्रक्रान्तपञ्चकं शतं सर्ववर्णविषया सा संवत्सरं यावद्ग्रहीतव्या। नातीते संवत्सरे। अथवा यावत् संवत्सरं संवत्सरो वर्णः न यावद्वृद्धिर्न मार्गणी। अधमर्णेनापि संवत्सरादूर्ध्वं न विलंबितव्यम्। विनिर्हरेद्विनिष्कृष्य स्वधनादारभ्योपनयेदित्यर्थः। अर्वागपि संवत्सराद्या दयिते साऽप्यतिक्रान्तसंवत्सरैव। अथवा मासादारभ्य संवत्सरस्य यावद्वृद्धिः परिमाणतो निरूपितव्या। मासेन यद्वर्द्धते संवत्सरेण वेत्येवं प्रयोगः कर्तव्यो न तु संवत्सरद्वयस्य लाभार्थी कदाचिच्चिरकालं ग्राहयति किं मे कतिपयाँ मासिकेन लाभेन यदि द्वे वर्षे ततोऽधिकं वा गृह्णासि तद्ग्रहणे एषा वेयता कालेन वृद्धिस्तत्रार्वाचीनमपि दददधमर्णो द्विसांवत्सरीं यथा कालैकृतां तदा दाप्येत। "एकां वृद्धिमेनादेयां न दद्यान्नापि दापयेत्" इति। यथा मासिकी वृद्धिः प्रथमे मासि द्वितीय एवान्हि शोधयन्दाप्यते तथा यदेवमभ्युपैति संवत्सरेण यद्वर्धेत इति तदा तथैव दाप्यते न तु तदधिककालकृता। **न चादृष्टां विनिर्हरेत्।** शास्त्रे या न दृष्टा दशैकादशिकाद्या पञ्चकादधिका न तां गृह्णीयात्। 'व्यतिरिक्ता न सिध्यति' इत्यस्यैवायमनुवाद इति केचित्। इदं तु युक्तम्। **अदृष्टाम्**नुपचितामित्यर्थः। यावद्बहुभिर्मासैर्न संहतीभूता तावन्न ग्राह्या दिवसवृद्धिर्मासवृद्धिः।

ननु च 'मासस्य वृद्धिं गृह्णीयात्' इत्युक्तं परिमाणं मासिकं तद्वृद्धेर्न तु ग्रहणं। "चक्रवृद्धिः कालवृद्धिः कारिका कायिका च या" तामपि न विनिर्हरेदित्यनुषङ्गः। नैवाँदद्याद्यस्याधमर्णस्य प्रतिषेधस्तथापि सामर्थ्यादुत्तमर्णस्यैव द्रष्टव्योऽधमर्णो ह्यार्तः किं न करोति। अथवा विनिर्हारो ग्रहणमेव। तेनोत्तमर्णस्यैव शाब्दः प्रतिषेधः।

ननु च द्विकादिवृद्धिविधानाच्चक्रवृद्ध्यादीनां प्राप्तिरेव नास्ति। किं प्रतिषेधानुषङ्गेण? उच्यते। अप्राप्तः प्रतिषेधः पाक्षिकीं वृद्धिमनुमापयति। यथाऽऽधानेन ब्रह्मसामाभिगायेदित्यविहितं सामगानं प्रतिषेधे नास्तीति ज्ञापयति तेनैता अपि प्रतिषेधद्वारेणाभ्यनुज्ञायन्ते। केषांचिदूनव्यवहाँरिणां चक्रवृद्ध्यादयोऽपि भवन्ति। तेन स्थलपथवारिपथिका वणिजो यथोक्तं (या० व० व्य० ३८)

"कान्तरगास्तु दशकं सामुद्रा विंशकं शतम्। दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु॥" इति। कान्तारगादीनामेव स्वकृता सर्वजातिविषयासाधारणी वृद्धिर्न त्वन्येषां। तत्र चक्रवृद्धिः स्मृत्यन्तरे पठिता। 'वृद्धेर्वृद्धिश्चक्रवृद्धिः' (नारदीये १। १०४)।

---

१ ज-संवत्सरं। २ र-लोमायां। ३ र-कतिपयमासकेन। ४ र-कायकृता वा दाप्यते। ५ ज-दी। ६ फ-गृह्ना। ७ र-न दद्यात्। ८ र-सामानि गयेयेदिति। ९ र-धं। १० र-व्यवहारिणां।

For Private And Personal Use Only

अन्ये तु चक्रवद्यानगन्त्र्यादिमतां तद्वाद्विश्चक्रवृद्धिः । तेषां यस्मिन्नहनि चक्रं वर्तते तत्रैव वृद्धिः । यदा तु नदीसंतारे दुर्दिनादिना अप्रयाणं तदा नास्ति वृद्धिः । एवमन्येषामपि बलीवर्दादिवाह्यप्रयोक्तॄणामीदृशी वृद्धिश्चक्रवृद्धिरुच्यते । कालवृद्धिः "प्रतिमासं तु कालिका" (नारदीये । १।१०१)।मासग्रहणमुपलक्षणार्थम् । याऽनुपचिता वृद्धिर्दिवसे दिवसे गृह्यते मासि मासि वा यस्याः काले न प्रतीक्ष्यते अथ चैतस्मिन्काले यदि ददासि तदा द्विगुणीभवति धनमित्येकरूपा कालवृद्धिः कारिता । इत्थंकृतां यावतीं वा परस्परोपकारापेक्षयोत्तमर्णाधमर्णौ कुरुतः एषाऽपि दिग्भागवणिजामेव । अन्येषां तु " व्यतिरिक्ता न सिध्यति " इत्युक्तं । " पञ्चकं शतमर्हतीति " । हिरण्ये प्रयुक्ते वासांसि वृद्धया गृह्यन्ते तत्राधिलक्षणं द्रव्यं सा कारिता यथाभोगलाभे न्यासरूपविषये च स्यात् । कायिका कायकर्मणा संशोध्या कायजीविका च एषां क्रमेण कांचैवाधिकादीनाम् ॥ १५४ ॥

ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियाम् ॥
स दत्त्वा निर्जितां वृद्धिं करणं परिवर्तयेत् ॥ १५५ ॥

वृद्धिद्विगुणीभूतमृणं धनपरिक्षयाद्दातुमशक्तो यः स पुनः क्रियां कारयितव्यः । करणं लेख्यसाक्ष्यादिपरिवर्तयितव्यः । वृद्धिं तु दद्यात् निर्जितो यावती गणनया भवतीत्यर्थः । द्विगुणादधिकं न ग्राह्यमिति यदुक्तं तस्यायमपवादो ज्ञेयो ह्ययं प्रयोग इति कुतः पुनः द्वैगुण्यापवादार्थता यावता नेह किंचिदीदृशं वचनमस्ति वृद्धिसहितं धनं वर्द्धते मूलधनं वा । केवलं पुनः क्रिया श्रूयते । सा च करणं परिवर्तयेदिति व्याख्यान्तरेण व्याख्याता यदि न वर्धते किमर्थं तर्हि करणपरिवर्तनम् ? उच्यते । शान्तलाभे धनेऽदीयमाने थो गन्त्र्यादिसंभवना साक्षिणश्च दीर्घे गच्छति काले विस्मरेयुर्यथोक्तम्

"यत्र कार्ये भवेद्येन कृतोपेक्षा दशाब्दिकी । विवादस्तत्र नैव स्यात्साहसेषु विशेषतः ॥"

तथा दशवर्षोपेक्षितमृणमसाध्यमिति । तथा च पूर्वे स्म व्याचक्षते । अयं च राज्ञ उपदेशः पीडितस्यानुग्रहः । यदि च द्विगुणस्य नवीकरणेन पुनः प्रयोगे वृद्धिसहितस्य पुनः

---

१ फ–महति नावा प्रयाणं । २ र–अन्यद्वारिलक्षणं द्रव्यं । ३ एवं मूले । र पुस्तके–कत्वैवधिकादीनां ४ र– न वाह्येयं प्रयोग । ५ रं–कथं । ६ र–योगकदादि समासना । ७ फ–कृते पश्चात् । ८ र–पीडितस्य वृद्धा राज्ञैव कारयितव्यः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृद्धिर्महाक्लेशपीडितस्यानुग्रहः । अथ सर्वं तदानीमवष्टभ्य न वाप्यत एषोऽनुग्रहो निर्धनस्येदृशोऽनुग्रहो दैवेनैव कृतः । तथा च सर्वस्मृतिष्वस्यामवस्थायां विहितम् ।

"अथ शक्तिविहीनः स्यादृणी कालविपर्ययात् । प्रेक्ष्यश्च तमृणं दाप्यः काले देशे यथोदयम्"॥

यद्यधमर्णो दैवदोषान्निर्धनीभूतस्तदा न दुर्गावरोधादिना राज्ञा पीडयितव्यः । किं तर्हि कर्तव्यम् ? यदाऽस्य कथंचिद्धनं भवेत्तदा यथासंभवं शनैः शनैर्दापयितव्यः । प्रेक्ष्य शक्तिधनवत्तां ज्ञात्वेत्यर्थः । दाप्योचितस्य वक्ष्यति 'कर्मणाऽपि समं कुर्यात्' इति । तस्मात् कारणपरिवृत्तौ यदेवोक्तमस्माभिस्तदेव प्रयोजनम् ॥ १५५ ॥

अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत् ॥
यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति ॥ १५६ ॥

अदर्शयित्वा हिरण्यमदत्वा निर्धनत्वाद्वृद्धिहिरण्यं तत्रैव पुनः करणं परिवर्तयेत् साक्षिसमक्षमेवं ब्रूयात् 'एतावन्मूलमस्मै धारयामि । एतावती च वृद्धिरिति' यत्रैवारोपयेत् यावत्संवत्सरा वृद्धिरिति तावद्वृद्ध्याचक्षते । पुनः करणे वृद्धिसहितमूलीभूते लवीयसी वृद्धिः कर्तव्या । यावत्या वृद्ध्या नातिपीड्यते या प्रागासीत्ततो न्यूनेत्यर्थः।यज्वासहायनारदानां तु मते काकिणीमात्रमपि शक्तः करणपरिवृत्तिकाले दापयितव्यः । येन साक्षिशक्यश्रवणमात्रे साक्षित्वं ददाति तत्समक्षमधमर्णो अर्थसंबन्धोऽपि प्रत्यक्षीभवति । यतः श्रवणाश्रवणे च कृता भविष्यन्ति।ततश्चित्तं तिष्ठति धने दशवर्षोपेक्षितामित्यादि व्यनश्वरो भविष्यति॥१५६

चक्रवृद्धिं समारूढो देशकालव्यवस्थितः ॥
अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात् ॥ १५७ ॥

वाराणसीं यास्यामि तदीयं पुण्यं मे भाण्डं च हेतुरेषा च ते वृद्धिरिति । तत्र यदि कान्तारनदीसंतरणं राष्ट्रोपप्लवादिना तं देशं न गतस्ततोऽर्वाग्देशात्कियता लाभेन प्रवृत्त्या व्यावृत्तस्तदा यथा निरूपिता वृद्धिर्न दाप्यते । यतस्तं देशं यावद्वहतां या वृद्धिरप्राप्ता तां सा कथं स्यात् ? दीर्घमध्वानं वहतां युग्यानां महान्क्लेशः स्वामिनश्च तावन्तं कालं कृतैव वृद्धिर्युग्योपकारः । शीघ्रं तु प्रतिनिवृत्तानां स्वामिनः पुनरन्यत्रोपकारणं संपद्यत एव । एष एवातिक्रमः । एवं कालातिक्रमो मासमेव हन्तुं बलीवर्दा इयती तव वृद्धिरिति । तत्र यदि पश्चात्प्रत्येति तत्र चक्रवृद्धिमधमर्णः समारूढः प्रतिपन्नोऽङ्गीकृतवानिति यावत् ।

---

१ एवं मूले । २ र–तदीया युग्या । ३ क्ष–नां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्यां वृद्धौ **देशकालौ** व्यवस्थितौ यत्तया पूर्वोक्तेन प्रकारेण देशविशेषं कालविशेषं वा न निर्विशेषणमेव कृतवान् स एवंविधोऽधमर्णस्तौ देशकालौ अतिक्रमो **न प्राप्नुया-** त्तत्फलं वृद्ध्याख्यं नाप्नुयान्न भजेत न दद्यादित्यर्थः ॥ १५७ ॥

कि तत्र नैवास्ति वृद्धिरथवा पञ्चकं शतं नेत्याह

समुद्रयानकुशला देशकालार्थदर्शिनः ॥
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति ॥ १५८ ॥

समुद्रयानग्रहणं पात्रोपलक्षणार्थम् । स्थूलपथिका वारिपथिकाश्च वणिजो **यां वृद्धिं स्थापयन्ति सा तत्राधिगमनं प्रति** निश्चयं प्रति । सैव निश्चेतव्येत्यर्थः । **देशकालार्थ- दर्शिनो**ऽस्मिन्प्रदेश इयानर्थलाभोऽस्मिन्नियानिति ये पश्यन्ति जानते न तु समुद्रयान एव च ये कुशलाः कर्णधारादयः ।

अन्ये पूर्वश्लोकमेवं व्याचक्षते । यदृच्छाध्याहारेणाधमर्णेन या देशकालं चाश्रितौ तां च प्राप्य तद्देशोदितं फलं लाभाख्यमन्यस्माद्देशाद्यदि नाप्नुयात्तदा कीदृशी तत्र वृद्धिरित्याकाङ्क्षायामुत्तरश्लोकः । चक्रवृद्धिग्रहणं कारिताया अपि प्रदर्शनार्थम् । लोभातिशय- भाजां वणिजां क्षयव्ययाय संविविज्ञाः परस्परस्य यां वृद्धिं स्थापयेयुस्तां राजा प्रमाणी- कुर्यात् । **तत्राधिगमं प्रती**ति प्रतिः कर्मप्रवचनीयोऽधिगमस्य लक्षणत्वाल्लक्षणेत्थंभूताख्याने तद्युक्ते च द्वितीया ॥ १५८ ॥

यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः ॥
अदर्शयन्स तं तस्य यतेत स्वधनादृणम् ॥ १५९ ॥

ऋणप्रयोगे द्विविधे । विश्रंभः प्रतिभूराधिर्वा । तत्र प्रतिभूपक्ष इदमुच्यते । त्रिविधश्च प्रतिभूः दर्शने प्रत्यये दाने च । तत्र दर्शनप्रतिभुवमधिकृत्येदमाह । यस्य दर्शनाय प्रतिभू- स्तिष्ठेदमुष्मिन्प्रदेशे मयैष तव दर्शनीयः स तथा कुर्वन्स्वधनात्तस्य **ऋणं यतेत** प्रयत्नं कुर्याद्दातुमिति शेषः । दद्यादिति यावत् । ऋणग्रहणं व्यवहारवस्तुमात्रोपलक्षणार्थं । तेन यावन्तोऽर्थविषया व्यवहारे भूत्वाऽनुकल्पयन्ते तद्वस्तु दद्याद्दर्शनेनान्यतरेणाभियुक्तः वाक्पारुष्यसंग्रहणादौ पणपरिभाषा कर्तव्या यदि न दर्शितं चेत्तन्मयां दातव्यं अकृताया तु परिभाषायां राजदण्डमेव दाप्यः । शरीरे तु निग्रहान्तं विक्रयणं सुवर्णम् ॥ १५९ ॥

१ फ–धर्मस्तौ । २ फ–नाचात् । ३ फ–तनेत्याह । ४ रज–चाश्रितौ । ५ फ–प्रयच्छेत् । फ–येन । ७ र–निग्रहे तन्निक्रयणं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत् ॥
दण्डशुल्कावशेषं च न पुत्रो दातुमर्हति ॥ १६० ॥

प्रतिभुवः कर्म **प्रातिभाव्यं**। प्रतिभुवा यत्कर्तव्यं परर्णसंशोधनादि तत्प्रातिभाव्यं। अर्हत्ता योग्यता साऽनेनें प्रतिषिध्यते। तस्यां च प्रतिषिद्धायामधिकारः प्रतिषेधः। अनधिकृतश्च न ददातीत्येवं न दातव्यमित्युक्तं भवति। सर्वत्रार्हतौ क्रियापदे व्याख्यैयंते द्रष्टव्ये। कथं पुनः पुत्रस्य प्रातिभाव्यादिप्राप्तिस्तर्हि। तदृणस्य पित्राऽगृहीतत्वात् नैष दोषः। यद्येन दातव्यतयाऽङ्गीकृतं तद्गृहीततुल्यफलत्वाद्गृहीतमेव। तन्निश्चितस्वरूपत्वमापन्ना अतः प्रतिषिध्यन्ते।

वृथादानं परिहासादिनिमित्तं प्रतिश्रवणं कुरु कार्यमिदं मम निष्पन्नमिदं दास्यामीति निष्पादिते कार्ये पित्राऽदत्तं प्रतिश्रुते कथंचित्पुत्रो न दाप्यते। एवं पारितोषिकादिबंदिपरिहासादिविषयं। यं चाहममुष्माद्ब्राणिज एतस्येयद्दापयेदिति तत्र तु मनुष्ये प्रेषिते कथंचिद्दातुमघटितेऽसंनिधानाद्वणिजोऽन्यतोऽपि कारणाद्दत्तान्तरे पितरि मृते पुत्रो न दाप्यते। अक्षिनिमित्तमा**क्षिकं** सभिकाय यद्धार्यतेऽन्यतो वा यत्प्रयोजनं तद्गृहीतमिति शक्यते ज्ञातुम्। तस्य प्रतिषेधः। यः परित्यक्तबान्धवोऽक्षमालास्वेव शय्यासनविहारी प्रसिद्धः क्रीडनकस्तदृणमाक्षिकमिति शक्यते निश्चेतुम्। सुरापाननिमित्तं **सौरिकं**। सुराग्रहणं मद्योपलक्षणार्थम्। तेन यः पानशौण्डोऽत्यन्तमद्यपस्तदृणप्रतिषेधः। **दण्डशुल्कयोरवशेषः**। यत्र पित्रा दण्डशः शुल्कशश्च कश्चिद्दत्तः परिपूर्णौ दण्डशुल्कौ न दत्तौ तादृशस्य प्रतिषेधः। यत्किंचित्पित्रा दत्तं स तद्दाप्यते। स्मृत्यन्तरेऽप्यविशेषेणोक्तं "प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डाः। पुत्रान्नाभ्याभवेयुः" इति (गौतमसू. १२।३८)। तत्र विकल्पः। महत्यपराधे महति च धने पैत्रिकेऽवशेषस्य प्रतिषेधः। शुल्केऽप्येवं। स्वल्पे तु सर्वस्य ॥ १६० ॥

दर्शनप्रातिभाव्ये तु विधिः स्यात्पूर्वचोदितः ॥
दानप्रतिभुवि प्रेते दायादानपि दापयेत् ॥ १६१ ॥

पूर्वश्लोके यो विधिर्मया चोदित उक्तः यथा पुत्राणां न भवति पैत्रिकं प्रातिभाव्यं तद्दर्शनप्रातिभाव्ये। यद्येवं प्रत्ययप्रतिभुवः पुत्रा दाप्यन्तामत आह **दानप्रतिभुवि**

१ र-अनयोः। २ र-व्याख्येयमेवं द्रष्टव्याः। ३ र-दे। ४ फ-एतस्य यद्दापयेदिति। ५ फ-सनिकाय। ६ फ-मन्यन्ते ज्ञातुम्। ७ फ-रिव। ८ र-यत्र तु न किंचित्पित्रा दत्तं तद्दाप्यते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेते दायादाः पुत्रा दाप्यन्ते । नान्यस्मिन् । यद्येवं प्रथमोऽर्द्धश्लोकोऽनर्थकः । दानप्रतिभुवः पुत्राणां साधनानुक्ते सामर्थ्योदस्य प्रतिभुवो नास्ति पुत्राणां संबन्ध इति गम्यते । अथ विस्पष्टार्थमुच्यते । प्रत्ययग्रहणमपि कर्तव्यमितरथाप्रतिषेधदर्शनं ग्रहणाद्विधौ च दानग्रहणादुभयपरिभ्रष्टस्य किंविधिभूतप्रतिषेध इति संशयः स्यात् । नास्ति संशयः । स्मृत्यन्तरे स्पष्टमुक्तत्वात् (या० व० व्य० ५४)

"दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा । न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय ये स्थिताः ॥" इति । इहापि दानप्रतिभुवोऽन्यस्य विधित्वादन्यत्राप्राप्तिः । दर्शनग्रहणमुपलक्षणार्थम् । अनुवादे चोपलक्षणत्वमदोषः । किंप्रयोजनमिति चेद्विचित्रा श्लोकानां कृतिर्मानवी ॥ १६१ ॥

अदातरि पुनर्दाता विज्ञातप्रकृतावृणम् ।
पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना ॥ १६२ ॥

अनेन श्लोकेन संदिहानः प्रश्नं कृत्वोत्तरेण निश्चाययति । संदेहहेतुश्लोकः पदद्वयेनादातरि विज्ञातप्रकृताविति सप्तम्यन्तानि समानाधिकरणानि पदानि व्याख्यायन्ते । अदातरि प्रतिभुवि प्रतिज्ञातप्रकृतौ न ऋणमनुत्तमर्णः केन हेतुना परीप्सेत लब्धुमिच्छेत्किंकेवलेनैवात्मव्यापारेण ततः प्रतिभुवः पुत्रमपि व्यापारयति । कुतः संदेहः ? उक्तं । मृतो दानप्रतिभूतज्जातस्तादृशे मृते कस्तत्पुत्राणां संबन्धः? यतस्तु खलु विज्ञातप्रकृतिर्विज्ञातकारणः प्रतिभूत्वेन धनं गृहीत्वा स्थित इत्येतन्निश्चितमतो भवति बुद्धिरस्ति तत्पुत्राणां संबन्धो यतस्तेन ऋणसंशुद्ध्यर्थमस्य निसृष्टमिति । पुनःशब्दः पूर्वस्माद्विशेषमाह । यदि दानप्रतिभुवः पुत्राः संबध्यन्ते । यस्त्वर्द्धदाता तस्मिन्मृते दातोत्तमर्णः । पश्चात्तत उत्तरकालमित्यर्थः । शेषं व्याख्यातम् । परीप्सा प्राप्तीच्छा ॥ १६२ ॥

निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंधनः ॥
स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः ॥ १६३ ॥

निरादिष्टं निसृष्टं स्वधनादर्पितं भव लग्नक इदं ते धनं मत्तस्त्वया संशोधनीयं यद्यहं न दद्याम् । अलंधनः पर्याप्तधनः । यावद्धनमुत्तमर्णाय दातव्यं तावत्परिपूर्णं प्रसृष्टम् । स्वल्पे तु निसृष्टे बहुनि संशोध्ये न दापयितव्यः । पूर्वस्य प्रश्नस्योत्तरमिदं ।

१ र-संबंध । २ र-अन्यस्य । ३ र-ह्रास्यते । ४ र-शब्दार्थमुच्यते । ५ पु-श्लोकोन । ६ र-विज्ञाते प्रकृतौ । ७ अदाता तस्य प्रतिभूर्मृतो दानप्रतिभूर्न जातः । तादृशे प्रतिकथं तत्पुत्राणां संबंधः । ८ क-भवतः पर्याप्तधनं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यपि न दानप्रतिभूरद्य निरादिष्टस्तत्तत्पुत्रो दाप्यते स्वधनादेव तद्योनिरादिष्टपुत्र इति द्रष्टव्यं तस्यैव प्रकृतत्वात् साक्षात्प्रतिभुवस्तु प्रतिभूत्वादेव प्राप्तिरिति चेन्नैवं । निरादेशने न इति स्थितिरेषा शास्त्रमर्यादा विचारादेवावलंबन इति सिद्धे यन्निरादिष्टो लंबन इति चैवमभिधानं तत्पद्यग्रन्थानुरोधेन ॥ १६३ ॥

मत्तोन्मत्तार्त्ताध्यधीनैर्बालेन स्थविरेण वा ॥
असंबद्धकृतश्चैव व्यवहारो न सिध्यति ॥ १६४ ॥

कार्यपर्यायो व्यवहारशब्दः । यत्किंचिद्दानाधानविक्रयादिकार्यं लेख्यादि च प्रमाणमेतैः कृतं तन्न सिध्यति कृतमप्यकृतं भवति । मत्तोन्मत्तौ विख्यातौ । आर्त्तो धनबन्धुनाशादिपीडितः प्रत्युपस्थितभयश्च । यौगिकत्वान्मत्तादिशब्दानां यावन्मदादियुक्तास्तावत्तत्प्रमाणमावस्थिकोऽयं प्रतिषेधः । प्रदर्शनार्थं चैतदप्रकृतिस्थत्वमात्रस्य । यथोक्तं ' कुर्यादप्रतिकृतिं गतः । तदा प्रकृतमस्याहुरस्वतन्त्रे सहेतुत ' इति । अप्रकृतिस्थश्चोच्यते उपप्लुतबुद्धिः स्वकार्यविवेचने ऽसमर्थः । उक्तं च

" कामक्रोधाभियुक्तार्था भयव्यसनपीडिताः । रागद्वेषपराश्चेति ज्ञेयास्त्वप्रकृतिंगताः" ॥ इति । कामादीनां द्वन्द्वं कृत्वा पीडितशब्देन तैः पीडिता इति साधनंकृतेति तृतीयासमासः । तेन पीडितस्य प्रतिषेधः । स चायं संप्रति मन्मथाधिष्ठस्त्रीपरिरम्भणादिपरीप्समानो भवति । अभियुक्ता द्यूतादिक्रियान्तरे दत्तावधानाः । एते हि तत्र संसजन्तः स्वामिनोऽपि स्व इत्यस्य प्रातिभाव्यादिक्रियानिश्चयस्यानवधानान्न प्रमाणम् । यतः क्रियान्तरावहिततया परेण पृच्छ्यमाना इदमस्मै दीयतामङ्गीकृतं वा प्रातिभाव्यमियाति वस्तुनीदृशोऽनेन च प्रकारेणोच्यत इत्येवमादि निपुणतो नावधारयन्ति । प्रकृतिक्रियाविघ्नो वा माभूदस्मिन्निहस्थ इत्यभिप्रायमभ्युपगच्छन्ति । गच्छ त्वं यद्ब्रवीषि तत्सर्वमनुष्ठीयत इति पारतन्त्र्यं वाऽङ्गीकुर्वन्ति । तदुक्तं ' स्वतन्त्रः सहेतुत ' इति । येन हेतुनाऽस्वतन्त्रोऽप्रमाणं सोऽस्य स्वतन्त्रस्यापि हेतुर्विद्यते । यथाऽस्वतन्त्रः स्वमपि न विनियुङ्क्ते एवमयमपि कामादिवशीकृतमर्थविवेकं कार्याणां च गुणदोषौ क्रियमाणावनधिगच्छन्नस्वतन्त्रेण तुल्यो भवति ।

आर्त्तो व्याख्यातः । अभियुक्तविशब्दौ च धर्मिवचनौ लक्षणया धर्मिपरौ विज्ञेयौ । अभियोगोऽभियुक्त आतुर इति । व्यसनानि कामक्रोधसमुत्थितानि मृगयादीनि । अभियुक्त-

१ र–दत्तार्धधानः । २ र–अभियुक्तातवादौ च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यसन्यपि काञ्चित्क्रियां तात्पर्येण कुर्वन्नुच्यते । अन्यसन्यप्रवृत्तोऽपि तद्व्याख्यानरतः । अथवा कामक्रोधशब्दौ कामिनि क्रोधवति वर्तेते । अत्र च पक्षे मयव्यसनशब्दौ कृतद्वन्द्वौ तृतीयान्तौ पीडितशब्देन संबध्येते । अन्ये तु स्वतन्त्रा एव रागद्वेषाभ्यां परीता व्याप्ता रागः क्वचिदात्मीयेष्वभिषङ्ग आत्मीयतया परिगृहीतस्य चित्संबन्धिनाऽपि ध्यायतो वाऽभिप्रेतसिद्धौ मनसः परितोषो रागस्तद्विपरीतो द्वेषविषयः । परिपथिन्यनात्मीयतया परिगृहीते तदस्वास्थ्यतद्विपर्ययात्परितुष्टिवृत्तिरित्येवमादिरूपौ रागद्वेषौ । सर्वथाऽस्य भावबुद्धिश्चलिता क्षणमपि विवक्षिते कार्ये नावतिष्ठते । अन्यद्वदन्तोऽन्यदाचरन्ति । एवंरूपोऽप्रकृतिस्थः । अन्यथा सर्व एव पुरुषाः कामादियुक्ताः जराजीर्णाक्षिशिरोरोगार्त्तिमत्ताः प्रकृतिस्थाः स्युर्न चैवमध्यधीनो गर्भदासः पुत्रशिष्यौ भार्या च । यद्यपि रूढ्या गर्भदास एवाध्यधीनस्तथाऽप्यस्वतन्त्रोपलक्षणार्थत्वात्सर्व एव ते गृह्यन्ते । स्वधनदानादि स्वामिनमनुज्ञाप्य यत्कुर्वन्ति तत्सिध्यति । तथा च **नारदः**

" यद्बालः कुरुते कार्यमस्वतन्त्रकृतं च यत् । अकृतं तदिति प्राहुः " ।। इति

" अस्वतन्त्रः स्मृतः शिष्य आचार्ये तु स्वतन्त्रता । अस्वतन्त्राः स्त्रियः पुत्रा दासाद्यश्च परिग्रहः ।।

" स्वतन्त्रस्तु गृही यस्य तस्य तत्स्यात्क्रमागतम् ।। "

ननु यदि न स्वातन्त्र्यं स्त्रीणामुच्यते पुंसश्च स्वातन्त्र्यमेतदनुपपन्नम् । यतः साधारणं धनं कथमेकाकी मनुष्यो भार्ययाऽननुज्ञातो दानविक्रयादिभ्यः प्रभवेदत इत्युक्तम् । "स्त्रीकृतान्यप्रमाणानि कार्याण्याहुरनापदि" इति तथा ' कुले ज्येष्ठ ' इत्युपक्रम्य तत्कृतं तस्याकृतं नास्वतंत्रकृतमिति च धनसाधारण्ये हि पुरुषोऽपि स्त्रीवदस्वतन्त्रः । यच्छब्दे स्वाम्यं पारतन्त्र्यं चेति तद्विरुद्धमिव स्वामित्वस्येत्येताश्च व्यवस्थेति योज्यं भवति । पारतन्त्र्यं परविधेयता तदिच्छानुवर्तित्वं यदि च परतन्त्रः परेच्छामन्तरेण विनियोक्तुं न लभते कीदृशमन्यस्वाम्यस्य अथ दानाधानविक्रये यत्र प्रकृतत्वादनीशाः स्वशरीरे परिभोगादौ यावदिच्छं स्वधर्मो विनियोज्यते परतन्त्रमहाधनानां शास्त्रनिगृहीतात्मनां द्विजानां योनात्मोपभोगो मवेद्बालस्य स्वाम्यपारतन्त्रे उपपन्नो यदा प्राप्तव्यवहारस्तदा शिष्यते एव पुत्रादावपि । स्त्रियास्तु न कदाचिदपारतंत्र्य ।

---

१ र-परः । २ र-न तद्वंद्वौ । ३ र-भार्यायाः । ४ फ-तत्कृतः स्यात्कार्यज्ञानविक्रीतमिति ।
५ फ-र्ण ६ फ-पुरुषे । ७ फ-परिविधेयता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"बाल्यया वा युवत्या वा वृद्धया वाऽपि योषिता।न स्वतन्त्रेण कर्तव्यं कार्यं किंचिदिति स्थितिः"॥

स्वाम्यपारतंत्र्ये स्त्रीणामसमावेश उच्यते । न पारतन्त्र्यवचनेन स्त्रीणां स्वधनविनियोगनिषेधः क्रियते । किंतर्ह्यस्थाने दानाधानविक्रयादि वार्यते । परतन्त्रास्तैरासां स्थाने निरूपणीयेन हिताः स्वयंविवेक्तुमलमेष पात्रमर्हति । भूमिहिरण्यादिप्रतिग्रहमनेन कन्यासंबन्धं कुर्यात् इदं द्रव्यमस्मात्कर्तुं विक्रेतुं वाऽर्हसीत्येवमादितया ज्ञातव्यम् । अतो लेख्यादिकाले भर्त्राद्यनुमतिरुपयुज्यते । केवलाकृते कार्ये नाहं किंचिदविज्ञाते त्वया विप्रलब्धाऽस्मीति वचनस्यावसरत्वात् । भर्त्राद्यनुमतौ तु किं वक्ष्यति तदुक्तम् ।

" एतान्यपि प्रमाणानि भर्ता यद्यनुमन्यते । पुत्रः पत्युरभावे वा राजाधिपतिपुत्रयोः " ॥

अतिस्वातन्त्र्यमपि नियमितम्

" अनुशिष्टा विसर्गे च विक्रये विस्वरा मता " । अपि बुद्धिपूर्वे बालस्खलिते स्वामिना पत्न्यादयो नियोज्या अनुबन्धादिना । ननु तैः स्वाम्यविसर्गेऽपि " सा सद्यः संनिरोद्धव्या त्यजेद्वा कुलसंनिधौ " इति । स्त्रीणामेव न पुंसः पारतन्त्र्यं पतितस्याप्या प्रायश्चित्तसमाप्तेः प्रतीक्षणोपदेशोऽतो विक्रयोऽपि दासादीनां गरीयस्यामापदि कुत्रचिदस्ति । तेषु स्वामिन इत्येतदपेक्ष्य । भार्याशिष्यदासीनां यथास्वं पारतन्त्र्यं धनसाधारण्यात्तु न भर्तुरनुज्ञाप्य भार्याया यागादौ कचिदधिकार इति स्थितं । यच्चेदं

"पुत्राणां भर्तरि प्रेते वशोत्तिष्ठतु सा तथा । जीवतोरस्वतन्त्रः स्याज्जरयाऽपि समन्वितः

"तयोरपि पिता श्रेयो न भावे बीजिनो मत" इति । अनेन पुत्राणां पारतंत्र्यम् । ननु चान्योन्यव्याहतमिति नास्ति व्याघातः । अनधिकारिणि पुत्रे बाले मातृपरतन्त्रता । मातुस्तु पुत्रे पारतन्त्र्यं । मातृधनरक्षणं चोरादिदोषेभ्यः । पुत्रस्यापि यत्पितरि पारतन्त्र्यं तदपृथक् । तस्य तद्गृहे निवसेत् यदा तु पितृविभक्तधनं स्वयमर्पितवांस्तदा " ऊर्ध्वं तु षोडशाद्वर्षात्पुत्रं मित्रवदाचरेत् " इति स्वातन्त्र्यमेव । बालोऽप्राप्तव्यवहारः षोडशवर्षात्प्राक् । स्थविरो लुप्तस्मृतिः जराभिभूतोऽतीतव्यवहारः । यद्यप्ययं कस्यांचिद्वेलायां प्रकृतिस्थोऽपि भवति तथापि न प्रमाणं अप्रत्ययात् । यस्य तु भर्तुः स्त्री जैनानां कार्यप्रतिबन्धेन वर्तते तयाऽनुज्ञातो[illegible] । अ[illegible]ः कृतः परार्थमनियुक्तो यो व्यवहारयति न भ्राता न पिता

१ फ–निरूपणेयेत[illegible] । २ इ–वेशो[illegible]तयाप्यासद्द । ३ ड–एवं मूल । ४ ए–जातानां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवदत्ताय शतं धारयतीत्येवमादि वक्तुं न लभ्यते । ये तु भ्रातरः समानकार्याः सर्वे च तुल्यव्यवहारिणस्तेषामन्यतरेणापि गोपश्वादिविक्रयो गृहादिबन्धनप्रयोगादि च क्रियमाणं सिध्यति । संबन्धित्वाय व्यवहारशब्दः सर्वव्यवहारग्रहणार्थः । प्रकरणादृणव्यवहार एव स्यात् ॥ १६४ ॥

सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता ॥
बहिश्चेद्भाष्यते धर्मान्नियताद्व्यावहारिकात् ॥ १६५ ॥

कस्यचिदनुष्ठेयस्यार्थस्य प्रतिपादकः शब्दो भाषा । सामान्येन भवति योऽर्थस्तया प्रतिपाद्यते सोऽनुष्ठेयः । किं सर्वा विभाषा न सत्या । नेत्याह । बहिश्चेद्धर्माद्धर्मबाह्यं यदुच्यते शास्त्राचारविरुद्धं पञ्चकाद्धिका वृद्धिः भार्यापत्यविक्रयादिरन्वयिनः सर्वस्वदानमित्येवमादि । यद्यपि स्यात्प्रतिष्ठिताः पत्रलिखिताः प्रतिभुवो वा दत्तास्तथापि न सिध्यन्ति । व्यावहारिको धर्म आचारनिरूढो नियतोऽनादिर्नेदानींतनः । पूर्वशेषं चैतत् । अस्वतन्त्रा-प्रकृतिस्थैः कृतं दानाद्यनिश्चितमिति न प्रमाणम् ॥ १६५ ॥

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ॥
यत्र वाऽप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत् ॥ १६६ ॥

योगः छद्म । तेन यदा बन्धकार्पणं कृतमिति । एतच्च ज्ञायते असत्यकार्येण कृतं तद्राजा विनिवर्तयेत् । कश्चिद्धनिकेनोपरुध्यमान आह न किंचिदस्तीति मे । ननु क्षेत्रे स्थण्डिले वा दत्तमिति तदर्पयेत्यनया शङ्कया सुहृत्स्वजनाय कस्मैचिदसावाधानीकरोति । तत आह । तदन्यस्य मया बन्धकीकृतमिति । एतच्च ज्ञायते । सत्यपि प्रकाशलेख्ये तस्य आधातृतायोगात् । यदि हि परमार्थतयाऽधित्वेन कृतं कथमाधानैव भुङ्क्त इति । एवंविधं योगाधापनमप्रमाणीकृत्य धनिने क्षेत्रादि दापयितव्योऽधमर्णः । यस्य चान्येना-गमेन स्वाम्यं धनदानकाल आगमान्तरेण करणं करोति तदपि योगावापनम् । तत्राधमर्णो यस्य वानेनागमेन स्वाम्यं दण्डितः सत्यमागमं कारयितव्यः । एवं विक्रयादि । ग्रंथांतरपाठवं योऽल्पेन मूल्येन महार्घमर्थज्ञो विक्रीणीते यो वा नैव मूल्यं क्रेतुरादत्ते यच्चात्र तेह विक्रीतं मया तवेदमिति स उत्तरकालं विक्रीतं त्वया ममेदमिति गृहाण मूल्यमिति न लभते वक्तुम् । न चायं विक्रयानुशयो दशाहात्परेणापि निवर्तयेदिति योवाऽऽधेन क्राययति पूर्वोक्ते पञ्चम्याङ्गनिमित्ते सति निमित्तान्तरे वा सति विक्रीणीते न च रूपका-

१ फ–वाच्यं २ । फ–सर्वस्तदानीं । ३ फ–यदावापकं बन्धकीकृते । ४ फ–वासोस्ति । ५ र–तं दर्शयति । ६ र–गुर्वं । ७ र–तत्र किं कृतमिति; फ–बाधकी । ८ र–प्रकारणस्येन्यस्य आदिभागात् । ९ र–परिवृत । १० र–धनिकस्य च बन्धदानकालदं तमन्तरेण करणेणेति । ११ र–विक्रिया ।

For Private And Personal Use Only

दिभिः क्रयोपहर्तव्यव्यवहारे न दृश्यते न च रूपकादिसंचयशील इत्यादिना योगविक्रयाधिगमो योगदानप्रतिग्रहं न यद्यपि दानप्रतिग्रहक्रिययोरन्यतरोपादानेनैवेतराक्षेपोन्यथा-स्वरूपासिद्धेः तथापि क्रियाद्वयोपादानं वृत्तपूरणार्थम् । अथवैकक्रियोपादाने तत्कारिण एव दण्डः स्यात् न द्वितीयस्य । सत्यपि तत्साधनत्वे शब्देनानुपादानादतो दातुः प्रतिग्रहीतुर्द्वयोर्दण्डार्थं भेदेनोपादानम् । तथा सति योगाधमनविक्रीतमित्यत्रापि क्रयादि-द्वितीयक्रियोपादानं कर्तव्यम् । स्मृत्यन्तराद्वा सामान्यशास्त्राद्वाऽनुपादाने दण्डः स्यात् । यत्र वाऽप्युपधिं पश्येदिति यदुभयस्वामिकमन्यतरे प्रतिग्रहीत्रा सह संविदं कृत्वा दीयेत एवमादियोगदानप्रतिग्रहं । दानं च प्रतिग्रहश्चेति विगृह्य द्वन्द्वैकव्यवहारः । उपधिः छद्मनैवं अन्यत्राप्येताभ्यः क्रियाभ्यः उपाधिर्निवर्त्यः यथा कश्चिद्धनिनोत्तर्स्वोयाव-दियाद्भिरहोभिर्दातव्यमिति प्रतिभुवं न स्थापयसि तावत्त्वां न त्यक्ष्यामीति तस्मिंस्तूष्णी-भूते कश्चिदुत्तमर्णेन सह संविदं करोति मासस्य प्रतिभुवं गृहाण यावदेनमुपपीडयामि बव्हनेन ममापकृतं अहमस्य पीडार्थ एव प्रतिभूर्न मया किंचिद्दातव्यमिति तत्रोत्तमर्णः प्रकाशमाह यद्यन्यस्ते प्रतिभूर्नास्ति कर्मादिकं न प्रार्थयसे । नूनं जिहीर्षितं ते धनं सं पी-डितः प्रत्याह नैतेन सह ममेदृशो व्यवहारः प्रवृत्तपूर्व इति । प्रतिभूः पुनराह भवानि तवाहं प्रतिभूः । सोऽनिच्छन्पीडोपरोधादाह । यथेच्छसि तथा कुरु । नास्य पूर्वक्रियाष्वन्तर्भावः । एवं कृषिवाणिज्यशिल्पारम्भादिक्रियाः एतद्व्यतिरेकिण्यः प्रतिदर्शनीयाः । उदाहरणमात्रं दानाधमनविक्रयाः । तदेतद्योगकृतं कार्यं यावत्किंचन तत्सर्वं राजा निवर्तयेद्राजाकृत-मप्यकृतमादिशेन्न प्रमाणीकुर्यात् । कर्तारं कारयितारं च दण्डयेत् ॥ १६६ ॥

ग्रहीता यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः
दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वतः ॥ १६७ ॥

उक्तं येन गृहीतमृणं तेन प्रतिदातव्यं । तदभावे पुत्रपौत्रैस्तदभावे तद्रक्थहारी तत्तद्व्यतिरेकेनान्यस्य दानं प्राप्तमिष्यतेऽत्र क्वचिद्विषये तदर्थमिदमुच्यते । येन गृहीतं धनं स चेन्नष्टो मृतो देशान्तरं गतो वा कुटुम्बेन च कृतो व्ययो दातव्यं बान्धवैस्तद्भ्रातृतत्पुत्र-पितृव्यादिभिः प्रविभक्तैर्विभक्तधनैरपि स्वतः स्वधनादित्यर्थः । यावद्भ्रातरः सह वसन्ति तेषां यदृणमुपजातं तद्गृहमध्यादेव दीयते । तदृष्टेऽस्य विभागः । यथोक्तम्

---

१ र-पिब्यतिदानमिति प्रह्वयोः । २ फ-योगवन्न विक्रीतं । ३ फ पिण्डः । ४ फ-यत्राप्युपधिं । ५ फ-दाप्यते । ६ फ-छद्मनमन्यत्रा । ७ फ-उपाधिर्विधर्मः । ८ र-तद्यो । ९ फ-न्यस्ते । १० एवंमूले । ११ फ-समीहितः । १२ फ-मम दृश्यो । १३ र-भवामि । १४ फ-दानमेवष्यंन । १५ फ-यद्वद्दीतं १६ फ-कृताव्ययो । १७ फ-यत्तावभ्दातरहामिति ।

"पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतम् । मात्रा वा यत्कुटुम्बार्थे दद्युस्तत्सर्वमृक्षित ॥" इति । अविभक्तानामन्यतमेन यत्कुटुम्बार्थमृणं कृतं तद्भ्रातृपितृव्यतत्पुत्रादयः सर्वे दद्युर्न त्वकुटुम्बार्थमित्यर्थः । अविभक्तग्रहणात्तेषामेव तथाविधमृणं संभवेत् प्रायः । न हि प्रविभक्तात्परकीयकुटुम्बकरणार्थमृणं गृह्णन्तो दृश्यन्ते । मविभक्तैरपीत्याह । अपिशब्दादविभक्तैश्च यदि कंश्चिद्भ्रातॄणां विभक्तानां स्वकुटुम्बभरणमकृत्वा प्रवसेदितरश्च महासत्वतया तदीयं कुटुंबं बिभृयात्तत्र विभक्तेनापि भ्रात्रा पितृव्येण वा यदृणं कृतं तदितरो दद्यादेव देशान्तरागतः ॥ १६७ ॥

कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् ॥
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥ १६८ ॥

तिष्ठन्तु तावद्भ्रात्रादयः । **कुटुम्बार्थेऽध्यधीनोऽपि** तु गृहकर्मभृत्योऽपि **व्यवहारं** गोपैश्वादिविक्रयं क्षेत्रस्थण्डिलादिप्रयोगकर्षणाय ऋणं व्यवहारं वा **यमाचरेत् स्वदेशे विदेशे वा** सन्निहितस्य प्रोषितस्य वा **तं ज्यायान्** गृहस्वामी **न विचालयेत्** अविचार्यैव साधु कृतमित्यनुमन्येत । अन्ये तु पूर्वशेषोऽयमर्थवादो न विधिरित्याहुः । तदुक्तं । न ह्यर्थवादताबीजं किंचिदस्ति विभज्यमानं साकांक्षमृणमत्र शब्दाभिसंबन्धोऽपि वा । अथ मत्तोन्मत्तार्त्ताध्यधीनैरस्वातन्त्र्यादप्यधीनस्य तत्कृतप्रमाणमिति । अकुटुम्बार्थे संनिहिते च स्वामिनि न युक्तं कल्पयितुम् । अन्यथा कुटुम्बावसादः स्यात् । अतस्तद्भरणात्मके व्यापारे प्रमाणीभवति दैवाद्यधीनः ॥ १६८ ॥

बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् ॥
सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् ॥ १६९ ॥

यथा न बालस्वतन्त्राप्रकृतिस्थौपधिकृतं प्रमाणं तद्वद्बलकृतमपि सर्वान्बलकृतानर्थान्निवर्त्यानित्येव विधिः । **भुक्तं दत्तं** लेख्यलेखितमित्युदाहरणमात्रम् । तत्र **बलाद्दत्तं** यदनुपयुज्यमानं क्षेत्रारामादि वाहनाय दीयते वृद्धिकामो वा यद्धनं दैवादारोपयति भारेवाहनमनिच्छतां गृहेषु मूल्यार्पणं पण्यमश्नुते लेखितं पत्रकरणम् । **सर्वा**नित्यन्यानप्येवंविधानर्थान्कार्याणीत्यर्थः । योगावापनमित्यत्र निपुणं दर्शितमत्रापि श्लोके समस्य योगबलशक्ये प्रक्षेप्तुं पृथक् श्लोकद्वयकरणं विचित्रा श्लोकस्य कृतिर्मनोः ।

---

१ फ–यदिश्चिन्दोतृणां । २ फ–मरणासमकृत्वा । ३ फ–भृतीयास्तक । ४ र–विचारयेत् । ५ फ– तैव द्मादि ६ फ–दाता । ७ फ–मन्यन्ते । ८ फ–षाकं क्षेत्रं यत्तच्छदाभि सम्बन्धम् । ९ फ–भार । १० फ–मुख्या । ११ फ–लिखितं ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"मत्तोन्मत्तार्ताध्यधीनैर्बालवृद्धैर्बलात्कृतिः । असंवर्धेत योगाश्च व्यवहारौ न सिध्यति" ॥ इति सिद्ध्यत्येव न मानवद्भवति ॥ १६९ ॥

त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम् ॥
चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः ॥ १७० ॥

परेणार्थ्यमाने साक्ष्यं प्रातिभाव्यं व्यवहारेण क्षणं च कर्तव्यम् । कुलादिभिर्न स्वयमुपेत्य हठात् । अतः स्वयं कुर्वन्तो न प्रमाणीभवन्ति । अथवा परस्यार्थे कुर्वन्तः क्लेशमाप्नुवन्ति । न ह्येषां स्वार्थगन्धोऽस्त्यतो बलान्न कारयितव्याः । कुलं वृद्धयुपाः परेण वाऽर्थ्यमाना विप्रादय उपचीयन्ते । अतो न हठादनिच्छन्विप्रं प्रतिग्रहीतव्याः । अथवा परसंबन्धिनोऽर्थायोपचयो विप्रस्यातः स्वार्था प्रवृत्तिर्न परार्थैव तेन विप्रेण न बलात्तदनादाने प्रवर्तनीयम् । हतबलसाध्यं दानमिति लोकप्रवादो न दापयन्तं निषेधति तदिच्छन्तं दापयेत् । याच्ञया तु बलं एवमाढ्यः कुशीदवृत्तिर्धनवानिव न प्रयोजनीयः । किमिति कुसीदं व्यवहारेऽन्यस्मै ददाति न मह्यमिति । अथवा तेन बलवतोऽन्यस्मिन्नेच्छन्ति तद्धयं कुर्वन्नूनमारोपयितव्यम् । यतः परेणार्थ्यमान उपचीयते न बलात्प्रयुञ्जानः । शास्त्रनिषेधात् । एवं वणिक्कुसीदी धनवृद्धिकाम एव व्यवहारयति । वणिक् पण्यजीवी । नृपो राजाऽपि प्रयुक्तराजदन्डमाददान उपचीयते । न तु बलादिप्रोत्साहनेन व्यवहारयन् । तदुक्तं " नोत्साहयेत्स्वयं कार्यम् " इति । विप्रादीना विधिरनुवादो राज्ञो दृष्टान्तार्थः । अथवा सर्वस्योदाहरणप्रपञ्चस्तथाऽप्येतनोऽपि ॥ १७० ॥

अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः ॥
न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत् ॥ १७१ ॥

करदण्डशुल्कादिशास्त्रविहितं वर्जयित्वाऽन्यत्पौरधनमनादेयं राज्ञा क्षीणकोशस्यापि । यत्तु शास्त्रन्यायागतं रक्षानिर्वेशधनं तत्सूक्ष्मं कार्षापणमात्रमपि न त्यजेत् । तदुक्तं " वल्मीकपथवद्राजा कोशवृद्धिं तु कारयेत् " इति ॥ १७१ ॥

अनादेयस्य चादानादादेयस्य च वर्जनात् ॥
दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥ १७२ ॥

अनादानार्हमनादेयम् । अर्हे कृत्यस्तत्र दर्शितम् । दौर्बल्यं ख्याप्यते[1] प्रकृतिभिरस्माभिरस्मान्दण्डयति स्तेनाटविकसामन्तादीन्न शक्तो विजेतुमिति परे स्वशक्तिं प्रप-

---

१ फ-क्षाप्यते ।

For Private And Personal Use Only

यन्ति राष्ट्रे या अतस्तैरभिपेष्यमानो विरक्तप्रकृतिरिह नश्यति आदानादिह प्रेत्य वाधर्मदण्डनात् ॥ १७२ ॥

स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात् ॥
बलं संजायते राज्ञः स प्रेत्येह च वर्धते ॥ १७३ ॥

स्वस्य न्यायप्राप्तस्यादानं शोभनं वाऽऽदानं भव्यमेव शोभनं वर्णयोरेव संसर्गः समानजातीयैर्वर्णसंसर्गः द्विष्टत्वात्संसर्गस्य च संबन्धिनोरश्रुतत्वाद्वर्णानां प्रस्तुतत्वात्तत्रैवापेक्षा युक्ता । यस्तु वर्णानामवान्तरप्रभवे संसर्गो नासौ वर्णानामेव संबन्धितया व्यपदेष्टुं शक्यते । कश्चित्तु नकारं पठति । वर्णासंसर्गादिति सर्वथा वर्णसंकरप्रतिषेधानुवादोऽयम् । दुर्बलानां बलवद्भिर्द्वेषिभिरभिभूयमानानां स्वेभ्यस्त्राणाद्धेतोः **राज्ञो बलं संजायते ।** सम्यग्व्यवहारदर्शनं कर्तव्यं धर्मदण्डनं च न कर्तव्यमित्येतद्विशेषाः पठिष्यन्ते श्लोकानामर्थवादाः ॥ १७३ ॥

तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये ॥
वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः ॥ १७४ ॥

तथा चैतदेव प्रपञ्चयति । अयं सेवक आत्मीयोऽतः प्रियः न केवलं राष्ट्रवासी यस्यैव राष्ट्रं तमेवावतिष्ठतेऽतोऽप्रियः तद्विदित्वा यमवत्प्रजासु तुल्यः परिपालने व्यवहारे च स्यात् । ईदृशी हि यमस्य वृत्तिर्दृष्टा । यमस्येत्यणो बाधकं तत्रोपसंख्यानिकं यकारमिच्छन्ति । कः पुनर्यमतुल्यतां भजति **जितक्रोधो जितेन्द्रियः** । रागद्वेषौ जयेत्प्रसङ्गाख्यानेन ॥ १७४ ॥

यस्त्वधर्मेण कार्याणि मोहात्कुर्यान्नराधिपः ॥
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ॥ १७५ ॥

अधर्मे यः कार्याणि कुरुते स मोहादेवेह व्यामूढो धर्मं जह्यात् । तस्येदं धर्मजं फलं विरक्तप्रकृतितया **वशे कुर्वन्ति शत्रवः** । विरक्ता हि प्रकृतयः क्रुद्धलुब्धभीतावमानिताः परैरुपजप्येरंस्ततश्च बहुकृत्य **वशे कुर्वन्ति** दण्डयन्ति बध्नन्ति[1] घ्नन्ति राष्ट्रमपहरन्ति चेत्येष वशीकारः ॥ १७५ ॥

कामक्रोधौ तु संयम्य योऽर्थान्धर्मेण पश्यति ॥
प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥ १७६ ॥

---

१ फ—बन्धन्ति ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिंधवो नद्यो यथा समुद्रमाश्रयन्त्याश्रिताश्चानुरागिण्यस्तन्मय्यो वसन्ति न ततो निवर्तन्ते एवं कामक्रोधजयाद्राजानं प्रजाः समयोगक्षेमास्तन्मय्यः संपद्यन्ते ॥ १७६ ॥

यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे ॥
स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम् ॥ १७७ ॥

छन्द इच्छा । तेन राजानमज्ञापयित्वा यदा प्रागुक्तैश्चतुर्भिरुपायैः स्वेच्छया न धनमार्गेण प्रवृत्तं तथाभूतं वा राजपुत्रैराव्हयनेनार्हतरप्रदेशोऽनुरुध्येदं हि धनमिति स चापृष्टो धारयामीति यत्प्रतिपद्यते स राज्ञा चतुर्थं भागं दण्डापयितव्यः । यावत्तस्मै धारयति तस्य तत्र सर्वमृणं शतं चेद्धारयति पञ्चविंशतिर्दण्डनीयः । शतं तस्य दाप्यः । एवं पञ्चविंशतिः । न त्वियं भ्रान्तिः कर्त्तव्या । शतं राज्ञः पञ्चविंशतिशिष्टं धनिकस्य । धनिको हि तथा दण्डितः स्यान्नर्णिकः ॥ १७७ ॥

अथ शक्तिविहीनः स्यात् ऋणी कालविपर्ययात् ॥
प्रेक्ष्यश्च तमृणं दाप्यः काले देशे यथोदयं ॥ १७८ अ.

यद्यधमर्णो दैवदोषान्निर्धनीभूतस्तदा न दुर्गाधानादिना राज्ञोपपीडयितव्यः । किं तर्हि कर्तव्यं यदास्य कथंचिद्धनं भवेत्तदा यथासंभवं शनैर्दापयितव्यः । प्रेक्ष्य शक्तिं धनवृत्तां युज्यत इत्यर्थः । दाप्यः उचितस्य वक्ष्यति " कर्मणापि समः कुर्यात् " इति । तस्मात्कारणपरिवृत्तौ यदेवोक्तमस्माभिस्तदेव प्रयोजनम् ॥ १७८ अ. ॥

अनेन विधिना राजा मिथो विवदतां नृणाम् ॥
साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत् ॥ १७९ ॥

अनेनेति पूर्वोक्तप्रकारप्रत्यवमर्शः । विधिना प्रकारेण । साक्षिप्रत्ययः सिद्धशब्दः प्रत्येकमपि संबध्यते । साक्षिभिः सिद्धानि निर्णीतानि प्रत्ययः । अनुमानं दैवी वा क्रिया कार्याणि न केवलमृणादानमन्यदपि संमतं न यदर्थिप्रत्यर्थिविप्रतिपत्तिमपाकुर्यादैक्यमन्यत उत्पादयेत् । उपसंहृतमृणादानं समासो व्यवहारः । सर्वत्र जयपराजयप्रकाराणामेवंरूपत्वात् । न हि साक्ष्यादिभ्य ऋते किंचिदुत्तरेषु विवादेषु प्रतिपत्तिनिरास-

---

१ ज-वित्तानुक्तभयस्त्वमुपति स्वातीत्यर्थः । २ " शनैर्दाप्यो यथोदयम् " इति नारदीये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमित्तं केवल दंडविशेषस्तत्स्वरूपं च वक्तव्यमित्युत्तरः प्रपञ्चः । कीदृशोऽस्वामिविक्रयः कीदृशोऽनुशय इति स्वरूपं व्यवस्थाप्यते ॥ १७९ ॥

कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि ॥
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः ॥ १८० ॥

प्रख्याताभिजनः **कुलजः** । यस्य पितृपितामहा विद्वांसो धार्मिका महापरिग्रहाः स्वकुलांशं निगृहीत्वा नाकार्ये प्रवर्तते । स हि स्वल्पामपि गर्हणां सोढुमसमर्थः । नितरां न च निन्दन्ति जनाः । **वृत्तं** शीलमाचारो जनापवादभीरुता स्वाभाविकं **संपन्नं** तद्युक्तः । **धर्मज्ञस्तु** स्मृतिपुराणेतिहासाभ्याससंजाततदर्थविबोधः । **सत्यवादी** बहुकृत्वः कार्येष्वदृष्टाकार्ये संभाव्यमानो वृत्ताभिधानः । **महापक्षः** सुहृत्स्वजनराजामात्याद्यनुग्रहीतमहिमहत्त्वेन दुष्टराजाधिकारिणां गम्यो न भवति । **धनी** स्वधनरक्षार्थमदृष्टभयाच्च न परद्रव्यापहारणे वर्तते । अस्ति मे पर्याप्तं धनं किं परकीयेन कथंचिज्ज्ञाते दण्ड्यः स्यामिति । **आर्यो** धर्मानुष्ठायी ऋजुप्रकृतिर्वा । निक्षिप्यमाणं सुवर्णादिद्रव्यं कर्मसाधनेन धञोच्यते । **निक्षिपेद्**रक्षार्थं स्थापयेद्**बुधः** । एवं निक्षिपन्प्राज्ञो भवति । अन्यथा मूर्खः संपद्यते । सुहृद्भूत्वोपदिशति । दृष्टं नायमदृष्टार्थोऽष्टकादिवदुपदेशः । ईदृशि पुरुषे निक्षिप्तस्य न विप्रत्ययो भवति एवंविधेन निक्षिप्तमनेनेति शङ्का न भवति । यस्तु नग्नकितवपानशौण्डादिः स केनचिदाकृष्टोऽपि सश्चित्राऽस्य हस्ते निक्षिप्तं मया चेति न शङ्कास्पदं सुवर्णादेर्महतो धनस्य निक्षेपधारक इति काकणी मामिकेति युज्यमानो भवत्येव ॥ १८० ॥

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः ॥
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥ १८१ ॥

यथेति । यादृशेन प्रकारेण समुद्रममुद्रं ससाक्षिकमसाक्षिकमित्येवमादि स तथैवेति । सोऽर्थो निक्षिप्तस्तथैव **ग्रहीतव्यो यथा दायो** दीयते निक्षिप्यते तथा गृह्यते । यत्रैतन्निश्चितं भवति सर्वकालमेवास्य हस्ते समुद्रायित्वा स्थापयति । तत्र विप्रतिपत्तावमुद्रिते लब्धे धारणको यदि ब्रवीति नैष मुद्रयति निक्षिप्य मे बलाद्गच्छति तत्रैवं शङ्कास्पदं जीयते । प्रमाणान्तरात्प्रायशो मुद्रणमन्यथा तु मुद्रानाशे कियदपहारितमिति परि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माणविशेषज्ञानाय प्रमाणान्तरं व्यापारणीयम् । राज्ञाऽपह्नवादेव सामान्यदण्डेन दण्डनीयः । निक्षेपदण्डस्तु द्रव्यपरिमाणे निश्चिते द्वितीयः ।

ननु च सर्वापह्नव एव विभावितो जित एव युक्तः । सत्यम् । यत्राविनाभावसिद्धं यथा मुषिते ग्रामे देवदत्तो नियुज्यते त्वयाऽन्यैश्चोरैः सहामुष्मिन्नहनि स ग्रामो हत इति स आह नैव तस्मिन्नहनि तं ग्राममहमगमंस्तत्र साक्षिभिरुक्तं दृष्टं तस्मिन्नहनि तत्र यन्मुष्टं तत्तु न दृष्टं तत्र देवदत्तेन मेषोऽप्यपह्नुतस्तदहर्ग्रामसन्निधानसिद्धेः स्फुटे च कारणान्तरे सन्निधावनुपलभ्यमाने सन्निधानादेशदेशाच्चौरत्वमपि युक्तमनुमातुम् । इह तु प्रमादनष्टानां नराणां मुद्रितनिक्षिप्तममुद्रितमेव नीयते । यथा दायस्तथा ग्रहः । को मेऽभियोगावसर इत्यनया बुद्ध्या संभवत्यपह्नवः । न हि शक्नोत्यनुमातुं यद्यपि कथंचिदनुमापयेत्परिमाणं तु न विना प्रमाणान्तरं निक्षिप्तवचनादेव सिध्यतीति । युक्तो दिव्योदितो निश्चयः । सर्वथा य एकदेशान्तरेण न संभवति तत्रैवैकदेशपराजित इति निश्चयः ॥ १८१ ॥

यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छति ॥
स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसन्निधौ ॥ १८२ ॥

व्यत्यस्तक्रमोऽयं श्लोकः समाम्नाये पठ्यते । प्रथममस्यार्धश्लोकं पठित्वा साक्ष्यभाव इति पठितव्यम् । ततः स याच्य इति एवं पाठो युक्तः । तथा ह्यर्थसङ्गतिर्भवति । साक्ष्यभावाद्दिव्येषु प्राप्तेषु वचनमिदम् । यथा चर्णादानादिषु साक्ष्यभावसमनन्तरमेव दिव्यानि दीयन्ते न तद्वदत्र । किं तर्हि चरैरस्य वृत्तमनुचारयेत् । तत्र यदि निपुणतश्चार्यमाणो न क्वचिद्वृत्ते स्खलति तदा न शपथैर्दर्शनीयः । अथाप्यत्र प्रमाद्यति तदा निक्षेपहरणसंभावनाऽपि युक्तैव । तदा च दिव्यैः परिशोधनीयः । न पुनरनेकनिक्षेपहरणेनापरनिक्षेपहरणं सिध्यति । कदाचिद्गरीयसा प्रयोजनेनैकमदल्हत्य कृताप्रयोजन उत्पन्नानुशयो वाऽन्यस्य समर्पयति अतोऽयं श्लोकसंघातो झटिति निक्षेपधारणकस्य शपथनिवृत्यर्थो न पुनः प्रमाणोपन्यासः । न च प्राड्विवाकनिक्षेपहरणे राजदण्डवदनिश्चितापरनिक्षेपहरणोऽपि प्रथमाभियोक्तुर्दापयितुं युक्तः । अनिश्चिते हि हरणे दाप्येत यदि शास्त्रेण तदा निर्णयार्थं व्यवहारशास्त्रं स्यात् । ततश्च हेतुभिर्निर्णयः कर्तव्य इति विकल्पितस्तस्मान्न शास्त्रीयोऽयमर्थो न प्रमाणप्रसिद्धौ न च लौकिकी व्यवस्थेति । साक्ष्यभाव इत्याद्युक्तेन प्रकारेणान्यपरतया नेया ॥ १८२ ॥

---

१ फ–उपायो । २ र–तद्वदत्र । ३ फ–पुनश्चर्यं । ४ र–शपथैर्मणीय, । ५ र–अथान्यत्र । ६ र–विरुध्यते । ७ फ–व्यवस्थितिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः ॥
अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः ॥ १८३ ॥

पदार्थयोजनामिदानीमनुसरामः । " स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसंनिधौ " येन रहसि स्थापितं साक्षिष्वसत्सु निक्षेप्ता तस्य याचमानस्य धारणको यद्यपह्नुते न त्वया किंचिन्निक्षिप्तमिति ततो निक्षेप्ता राजाज्ञापितो न निक्षेपधारिण आकारं दर्शयेत् । किं तर्हि कुर्यात् । **प्रणिधिभिश्चा**रैर्हिरण्यमात्मीयं सुवर्णं रूप्यं वाऽन्यस्य **संन्यस्य** निक्षिप्य याचितव्योऽर्थनीयः द्वितीयं निक्षेपं प्राड्विवाकेन । प्राड्विवाकग्रहणं निर्णयाधिकृतपुरुषोपलक्षणार्थम् । किं साक्षादेव याचितव्यो नेत्याह । प्रणिधीनां मुखेन । यैरेव न्यस्तं **वयोरूपसमन्वितैः** वयसामन्विता येन बाला न भवन्ति तेषां हि परैः प्रेरितानां मद्वञ्चनार्थो न्यास इति संभाव्यते । परिणतवयेभ्यस्तु नाशको भवति । एवं रूपसमन्वयो व्याख्येयः । रूपमेव कस्यचित्तादृशं भवति यस्य दर्शनादेव चापलं प्रतिभाति । तथा च रूपमेतद्व्याचष्टे " भगवन्वीतरागताम् " इति तेनैव तदुक्तं भवति । तादृशाः प्रणिधयः कर्तव्या येषा मद्वञ्चनार्थोऽयमुपक्रम इति नाशङ्कते धारणकः । **अपदेशैः** सव्याजैर्निक्षेपकारणैः । राज्ञोपद्रवग्रामगमनादिभिरनेन हेतुना त्वयि संप्रति निक्षिपामीत्यनृतसंभवात्कारणकथनमपदेशः । एतच्च सर्वं प्राङ्निक्षेप्तुरसंनिधौ कर्तव्यम् ॥ १८३ ॥

स यदि प्रतिपद्येत यथान्यस्तं यथाकृतम् ॥
न तत्र विद्यते किंचिद्यत्परैरभियुज्यते ॥ १८४ ॥

स यदि निक्षेपधारी यदि **प्रतिपद्येत** बाढमस्ति गृहाणेत्यंगीकृत्य दद्यात् । **यथान्यस्तं** तथा कृतं समुद्रं अमुद्रं **यथाकृतं** वस्त्रादि संवर्तितमसुद्रितमन्यद्वा अलंकाराद्यनुपभुक्तं परिमलशून्यं गृहमुद्रया स्वचिह्नेन स्थापितम् । तादृशमेव चेद्दद्यान्न तत्र विद्यते किंचित्सत्यं यत्परैः पूर्ववेदिकैरभियुज्यते । एतेनास्माकीनः साक्ष्यभावान्निक्षेपोऽपह्नूयत इति । **यथान्यस्तं यथाकृतमिति** गूढागूढचिन्हकृतेन भेदः । अथवा गृहीतनिक्षेप्तुर्व्यापारभेदेन भेदः । यथाकृतं यथागृहीतं निर्विकल्पमवलंबं च गृहीतं तथैव प्रतिदातव्यं प्रतिदाने यत्र कालग्रहणे न क्रियेत इत्यर्थः ॥ १८४ ॥

तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि ॥
स निगृह्य दाप्यः स्यादिति धर्मस्य धारणा ॥ १८५ ॥

---

१ फ–यमपह्नुते तत्त्वया । २ फ–श्च हिरण्य– । ३ फ–कस्य तादृशं । ४ फ–उभौ । ५ ख–निगृह्योभयो
८२–८३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां प्राड्विवाकप्रयुक्तनिक्षेप्तॄणां[६] यदि द्रव्यं निक्षिप्तं न दद्याद्यथाविधीति यथाकृतपदेन व्याख्यातं स धारणकोऽवष्टब्धस्य राजपुरुषैरुभयमर्थिने राजनिक्षेपं च दाप्यः । इति । **धर्मस्य धारणा** व्यवस्था । तात्पर्यमत्र व्याख्यातम् ॥ १८५ ॥

निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे ॥
नश्यतो विनिपाते तावनिपाते त्वनाशिनौ ॥ १८६ ॥

उत्पत्त्यनन्तर उच्यते । निक्षेप्तुः पुत्रो भ्राता भार्या वा यस्य निक्षेप्तुर्द्रव्ये स्वाम्यमस्ति भार्यायास्तावत्स्वाम्यमुक्तमेव । पुत्रस्यापि पैतामहे भ्रातुश्चैकधनस्य । तत्र तेषां कश्चिद्यावन्निक्षेप्तर्यसंनिहिते देहि नोऽस्माकीनमेतदिति । तत्र कश्चिदनया बुद्ध्या दद्यात्साधारणमेतदेकेन निक्षिप्तमपरेण नीतमिति को दोष इति । अत उच्यते । **न देयौ निक्षेपोपनिधी प्रत्यनन्तरे** । अर्थवादं हेतुसरूपमाह । **नश्यतो विनिपाते तौ** । विनिपातो ऽन्यथात्वं प्रत्यनन्तरस्य देशान्तरगमनादि । तस्मिन्नसति तौ हीयेते । यदि तेन नीत्वा निक्षेप्तुं न दत्तं तदा तेन पर्यनुयुक्तस्य धारणकस्य किमुत्तरं त्वदीयेन भ्रात्रैतद्धनं साधारणस्वामिना नीतमिति नैतदुत्तरं "यथा दायस्तथा ग्रह" इत्युक्तम् । येनैव निक्षिप्तं स्वामिनाऽस्वामिना वा तस्मा एव देयं तस्यैवायं प्रपञ्चः । यदि तु प्रत्यनन्तरो विक्रियां न गच्छेत्तदा तद्दानेऽपि न दोषः । तदाह **अनिपाते त्वनाशिनौ** । तत्र ह्यस्त्युत्तरं मानशात्तस्मादर्पयामि प्रत्यनन्तरेण नीते विनिपाते च तस्य निक्षेप्तुर्याचमानाय स्वधनं दातव्यमिति श्लोकार्थः ॥ १८६ ॥

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे ॥
न स राज्ञा नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥ १८७ ॥

जीवतस्तस्यानिक्षेप्तुः प्रत्यनन्तरदानं नास्तीत्युक्तम् । मृतस्य तु यस्तद्धनमस्तीत्यविजानते स्वयं दद्यान्न स व्यवहारलेखनादिक्लेशनीयोऽन्यदप्यस्ति न वेद वेति । यदि तस्याभविष्यदधिकमिदमिव तदप्यदास्यामिति । न क्लिश्यते । अत्राप्याशङ्का यदि न निवर्तेत महाधनोऽसावभून्न चान्येन समं भुज्यते प्रमाणान्तरं निश्चयाय विचारणीयम् । विषाग्न्यादिभिः शपथैर्नादनीयः । घटकोशसत्यतण्डुलास्तु न विरुध्यन्ते । न हि ते अतिक्लेशकराः । साक्ष्यभाव इत्यत्र द्वितीयो न्यासः । यश्च तयोर्न्यासः स इहापि द्रष्टव्यः ॥ १८७ ॥

अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम् ॥
विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् ॥ १८८ ॥

---

१ फ–साधारणा । २ र–भार्यायाः स्वाम्यमस्ति तावत् । भार्यायास्तावत्स्वाम्यमेव । ३ र–चैकधनस्य । ४ र–तैः । ५ फ–तदीयेन । ६ र–सुतस्मानाय तस्मात्तदर्पयामि । ७ र–तद्धनहराय किं कुशान्नीत्यविजनीते । ८ फ–किमपि । ९ फ–विष दिभिः । १० फ–विनाशकरो यः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निक्षेपेष्वेषु सर्वेषु विधिः स्यात्[1]परि[2]साधने ॥
समुद्रे नाप्नुयात्किंचिद्यदि तस्मान्न संहरेत् ॥ १८९ ॥

निक्षेपेष्वपचयमानेष्वनन्तरोक्तो **विधिः** 'साक्ष्यभाव' इत्यादिः परमसाधनार्थो विज्ञेयः । समुद्रे [3]निक्षेपेऽन्यदप्यस्मिन्भांडे द्रव्यमभून्नाशितं कृमिभिरित्यादिकं पर्यनुयोगं नाप्नुयान्निक्षेपधारी तत्र धारणकस्य । एवं मूषकादिनाशे द्रष्टव्यम् । यदि दारुमये भाण्डे वस्त्रादि स्थापितम् तीक्ष्णदशनैर्मूषकैर्दारु भित्त्वा भ[4]क्ष्येत न निक्षेपधारिणो दोषः । तत्रापि वासनपरिवे[5]ष्टितः स्थूलपोट्टलको मुद्रितो यदि निक्षिप्येत यत्त[6]दीये दारुभाण्डे नैवमान्ति तदा बहिर्मूषकादिभक्षितेऽपि हि न दोषः । यदि चैतन्निक्षेप्तुर्ज्ञानं भवति वारकेण परिभाषितं न मम भाण्डमन्यदस्ति चरित्रज्ञो वाऽस्य निक्षेप्ता कदाचित्प्रत्यासन्नो भवति ॥ १८९ ॥

चौरैर्हृतं जलेनोढमग्निना दग्धमेव वा ॥
न दद्याद्यदि तस्मात्स न संहरति किंचन ॥ १९० ॥

चौरास्तु वेदिता अवेदिता वा सुरङ्गभिदादिना यदि मुष्णीयुः कृतरक्षासंविधाने धारणिके स्वामिन एव नाशः । **जलेनोढ**मुदकेन देशान्तरं नीतम् ॥ १९० ॥

निक्षेपस्यापहर्त्तारमनिक्षेप्तारमेव च ॥
सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः ॥ १९१ ॥

हरति यो निक्षिप्तमसाक्षिकं योऽप्यनर्पणीय नीत्वा वा याचते **तमन्विच्छेत्** । अन्वेषणा तत्त्वपरिज्ञाने यत्नः । सर्वप्रमाणव्यापारेणोपाया प्रमाणा न सामादयो वा । तेन चलितवृत्तस्याप्रतिपाद्यमानस्य ताडनबन्धनाद्यपि महति धने चोरवत्तत्त्वप्रतिपत्त्यर्थं प्रयोज्यम् । न तत्त्वा[8]निश्चये निग्रहः । **वैदिक**ग्रहणं स्तुत्यर्थम् ॥ **१९१** ॥

यो निक्षेपं नार्पयति यश्चा[7]निक्षिप्य याचते ॥
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥ १९२ ॥

निक्षिप्तमपह्नुवानस्य निक्षिप्तयाचमानस्य दण्डोऽयम् । यावति धने मिथ्या प्रवर्तते तावद्दण्ड्यते ॥ १९२ ॥

निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमम् ॥
तथो[9]पंनिधिहर्त्तारमविशेषेण पार्थिवः ॥ १९३ ॥

---

१ ज-र-परि । २ ज-शोधने । ३ फ-निक्षेपेण दाप्येऽस्मिन्; तत्सूत्रत्रयं अच्छेलेनेत्यादि । तत्रेदं सूत्रं पतितं तच्च लिखामि । । ४ फ-भक्षेत । ५ र-वेष्टयः । ६ फ-यदा तदा ये । ७ र-ज-अनिक्षिप्य । ८ र-तत्त्वनिश्चये । ९ र-ततोप ।

For Private And Personal Use Only

चौरवच्छिष्टि[1]: पूर्वेणोक्ता । तया च शरीर[2]निग्रहस्तत्समथनं वैकल्पि[3]के जातिभेदेन ब्राह्मणादन्यत्र प्रदे[4]श उक्तोऽनेन निवर्त्यते । पुनर्विधानेन चोरवच्छिष्टिर्वाग्दण्डधिग्दण्डादिरूपैव समुच्चीयते । धनदण्डेन नाङ्गच्छेदादिरूपा । न च ब्राह्मणस्यापि वैकल्पिके पूर्वेण शारीर[5]दण्डे प्राप्ते तन्निवृत्त्यर्थं पुनर्वचनम् युक्तम् । सामान्येन ब्राह्मणस्य शरीरदण्डप्रतिषेधात् । " न जातु ब्राह्मणं हन्यात् " इति (श्लो. ३८१)। **उपनिधिः** प्रीत्या यद्भुज्यतेऽविशेषेण । द्रव्यजाति निग्राह्या जातिं च नापेक्षते । अन्यैस्तूपनिधिः परिभाषितः । स तत्रैव नेह परि[6]भाषाया अकरणाल्लौकिकार्थ एव ग्रहीतुं न्याय्यः । वक्ष्य[7]ति च " प्रीत्योपनिहितस्य च " इति ॥ १९३ ॥

उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः ॥
ससहायः स हंतव्यः प्रकाशं विविधैर्वधैः ॥ १९४ ॥

उपधा व्याजः । छद्मेत्यनर्थान्तरम् । ताश्चा[8]नेकविधाः । द्रव्यपरिवर्तः[9] कुंकुमं दर्शयित्वा कुसुंभादिदानं तुलादि[10]मानापचय इत्याद्याः । तत्र चान्यं विधिं वक्ष्य[11]ति " नान्यदन्येन संसृष्टम् " इत्यादि । इह तु चित्रा[12]सनं राजत उपकारदर्शनं कन्यानुरागकथनमित्येवमाद्या[13] गृह्यन्ते । चौरास्त्वां मुष्णन्ति यद्यहं त्वां न रक्षामि राजा तवात्यन्तं कुपितो मया तु बहु समाहितं राजतस्ते नगराधिकारं दापया[14]मि मुख्यं वोपकारं करोमि पुष्पमित्र[15]दुहिता त्वत्यन्तमनुरागिणी मद्धस्ते[16] इदमुपायनं प्रेषितवतीत्येवमाद्यनृतमुक्त्वाऽऽत्मीयमुपायनमासं[17]ज्य बहु प्रतिनयन्ति । तत्समक्षं च राजनि तत्समेवाकार्यान्तरमुपांशु निवेद्य कथयन्ति त्वदीयं कार्यमुपक्रान्तमित्येवमाद्या[18]भिरुपधाभिः परद्रव्यं च भुञ्जते । तेषामयं राजमार्गे **प्रकाशं विविधः** कुठारशूलारोपणहस्तिपदमर्दनाद्यनेकोपायसाधनो वध उच्यते । अन्ये तु प्रकरणान्निक्षेपविधे[19]यमेवेदमाहुः । तत्र हि प्रतिपद्यान्यत्र मया निहितं स च न संनि[20]हितः श्वपरश्च आगच्छतीत्यसमर्प[21]यन्हरतीति ॥ १९४ ॥

निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ ॥
तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति ॥ १९५ ॥

य इति निक्षिप्यमाणद्रव्यजातिनिर्देशः । **यावानिति** परिमाणस्य । य आह । सुवर्णमेतस्य हस्ते मया निक्षिप्तं कांस्यं[22] ददाति । शतं च स्थापितमर्धं ददाति । स पृच्छ्यते । किं रहस्युत कस्याचित्समक्षमिति । स[23] चेदाह कुलसंनिधौ । कुलं साक्षिणः पुरुषास्तत्र ते पृष्टा यदाहुस्तदेव सत्यं विब्रुवन्विरुद्धं ब्रुवाणो दण्ड्यते । तत्रापि यदि

१ र-चौरवच्छिष्यः । २ ण-र-शरीरो । ३ ण-र-का । ४ ण-र-प्रशक्तो । ५ ण-र-शरीर । ६ र-परिभाषया । ७ अग्रे १९७ श्लो. । ८ फ-नं । ९ फ-त्वा । १० फ-मानपरिवर्तनाद्याः । ११ अग्रे २०४ श्लो. । १२ फ-चित्रासनन्तरान्यत । १३ फ-दि । १४ फ-दापय मे । १५ फ-पुत्र । १६ फ-मद्धस्तु । १७ ण-र-आनाय्य । १८ फ-द्युपाधिभिः । १९ फ-मेवमाहुः । २० ण-र-असन्निहितः । २१ ण-र-समर्पयन् । २२ प-र-रूप्यं । २३ फ—भवेयुः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रूयात्साक्षिसमक्षं रूप्यं तैर्विनाऽन्यत्स्थापितमिति । अस्त्यत्र प्रमाणान्तरव्यापारणावसरः । अयमपि श्लोको नाधिकविध्यर्थः ॥ १९५ ॥

मिथो दायः कृतो येन गृहीतो मिथ एव वा ॥
मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः ॥ १९६ ॥

यो यथा निक्षिपेदित्यनेन निक्षिप्तविधिरयमुक्तोऽन्येषु कार्येष्वनेन प्रतिपद्यते । ऋणादानोपनिधिविक्रयाद्यपि येन यादृशेन प्रकारेण कृतं तादृशेनैव प्रत्यर्पणीयम् । रहसि कृतस्य राजकुलेंऽशमार्गणादिना प्रकाशनं न कर्तव्यम् । तेन स्वहस्तलेख्येन ऋणे गृहीते न राजकुलेंऽशं दाप्यते । उत्तमर्णधनं क्षपणीयं । अनेनैव निक्षेपेऽपि सिद्धे तत्र पुनर्वचनं नित्यार्थम् । तेन निक्षेपादन्यत्र रहसि कृतस्यापि विप्रतिपत्त्याशङ्कायां प्रकाशं प्रतिदानं कदाचिदस्ति । अथवेहाप्रकाशकृतस्य प्रकाशीकरणं निषिध्यते । तत्र त्वन्योऽर्थः समुद्रोऽसमुद्र इत्यादि तेनापौनरुक्त्यम् । मिथःशब्दो रहसि विज्ञेयः । अथवा परस्परं मिथः सर्वं कार्यं द्वाभ्यां साध्यं दानादिपरस्परमेव क्रियत इति । पुनर्वचनं तृतीयप्रतिषेधार्थम् । **दाय**शब्दः सामान्यशब्दो निक्षेपादन्यानपि विक्रयादीनाह ॥ १९६ ॥

निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च ॥
राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणम् ॥ १९७ ॥

प्रकरणोपसंहारोऽनेन क्रियते । **प्रीत्योपनिहितस्य** स्नेहेन किंचित्कालं भोगार्थं दत्तस्य न्यासो निक्षेपस्तस्य धारणको यथा न पीड्यते तथा निर्णयः कर्तव्य इति । **अक्षिण्वन्न**पीडयन् । द्वित्रश्लोका निक्षेपकरणे विध्यर्थाः । सर्वमन्यदन्यतः सिद्धं श्लोकार्द्धेनोक्तम् ॥ १९७ ॥

विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसंमतः ॥
न तं नयेत साक्ष्यं तु स्तेनमस्तेनमानिनम् ॥ १९८ ॥

अस्वामिविक्रयाख्यविवादपदमिदमनुक्रान्तम् । **परस्य** यद्द्रव्यादि **स्वं** तच्चेद**स्वामी** तत्पुत्रादिरन्यो वा **विक्रीणीते** स्वामिनाऽननुज्ञातस्तं **स्तेनं** चौरं विद्यात् । यद्यपि यस्तस्मात् क्रीणाति स तमस्तेनं मन्यते **न तं नयेत साक्ष्यं तु** तं पुरुषं न नयेत न प्रापयेत् साक्ष्यं न कारयेत्साक्षिकरणे न नियोक्तव्य इत्यर्थः । यथा चौरस्तादृश एवासौ । स्तेनत्वाच्च न साक्षित्व एव प्रतिषेधः । किं तर्हि ? सर्वासु साधुजनसाध्यासु क्रियासु । परस्वमननुज्ञातेन विक्रीतं क्रेतुर्न स्वं भवतीति सिद्धे साक्षिकर्मनिषेधद्वारेण प्रतिषेधो वैचित्र्यार्थः ॥ १९८ ॥

१-ण-र-मिथ्यो । २ ण-र-उत्तमर्णस्य धनस्य क्षपणीयं । ३ फ-संख्या । ४ फ-परमेव ५-ण-र-परस्वमननुज्ञातः न विक्रीतक्रेतुर्नसंभवतीति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवहार्यो भवेच्चैवं सान्वयः षट्शतं दमम् ॥
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् ॥ १९९ ॥

पूर्वेण साधुजनकर्तृकासु क्रियासु साक्ष्यादिष्वपि अस्वामिक्रियकारिणामनर्हतोक्ता । अनेन षट्शतो दण्ड उच्यते । षट्कार्षापणशतानि **अवहार्यो** दापयितव्यो दण्डश्च इति यावत् । **सान्वयो**ऽन्वयोऽनुगमनसंबन्धः । स यस्यास्ति पुत्रभ्रात्रादिः स्वामिनोऽनुगतः सान्वयः । स ह्यननुज्ञातोऽपि विक्रीणानो न स्फुटचौरो यतस्तस्येयं बुद्धिर्मदीयमेवैतद्यत्पितुरिति तं प्रतीयमपि संभावना भवति । तस्यैव विक्रीय मूल्यं ददाति । यस्त्वत्यन्तासंबन्धः स **निरन्वयः** । **चौरकिल्बिषं** निग्रहं निःसंशयं प्राप्तः । **अनपसरो** यदि तद्गृहं तस्य नापसृतं भवति तदाऽनपसरश्चौरवद्दण्ड्यः । यदि तु तद्गृहादेव केनचिद्दत्तं विक्रीतं वा तस्य तेन वाऽज्ञां दत्वा तत्प्रतिगृहीतं प्रकाशक्रयेण वा विक्रीतं तदा न चौरवद्दण्डयः । **षट्शतमेव** दाप्यः । अथवा अन्वयो विक्रीणाति तस्य विक्रेयद्रव्यस्यान्यतः क्रयः अपसरः क्रयादन्यः प्रतिग्रहादिरागमः । एतदुक्तं भवति । यदि तेन तत्र कुतश्चन क्रीतं नापि प्रतिगृह्यादिना लब्धं तदा चौरः ॥ १९९ ॥

*** अस्वामिना कृतो यस्तु दायो विक्रय एव वा ॥**
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥ २०० ॥

न केवलमस्वामिसकाशाद्यत्क्रीतं तन्न सिध्यति । किं तर्हि प्रतिगृहीतमपि । प्रतिग्रहेण प्रीत्या वा दानं **दायः** सोऽपि न सिध्यति । " विक्रीणीते परस्य " इत्यनेन विक्रेतुः प्रतिग्रहीतुश्चास्वाम्यमुच्यते । " स्वामीरिक्थक्रये"त्यादिना स्वाम्याशङ्कायां प्राप्तोऽयं प्रतिषेधः । व्यवहार एषा स्थितिर्नातिक्रमणीया ॥ २०० ॥

संभोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ॥
आगमः कारणं तत्र न संभोग इति स्थितिः ॥ २०१ ॥

यस्मिन्वस्तुनि गोवस्तुहिरण्यक्षेत्रादावन्यस्य भोगो दृश्यते अन्यस्य च रिक्थप्रतिग्रहादिरागमः स्वाम्यापादकस्तत्रागमो बलवान्न भोगः । भोग एव **संभोगः** । **कारणं** स्वाम्ये तत्रेति **स्थितिः** । एवमनादिव्यवस्था न भोगमात्रेण स्वत्वम् । यादृशेन च स्वत्वं तत्पुरस्ताद्व्याख्यातम् । " यत्किंचिद्दशवर्षाणि " इति वानेन विरोधस्तत्रैव परिहृतः ॥ २०१ ॥

विक्रयाद्यो धनं किंचिद्गृह्णीयात्कुलसन्निधौ ॥
क्रयेण स विशुद्धं हि न्यायतो लभते धनम् ॥ २०२ ॥

*** अनेन विधिना शास्ता कुर्वन्नस्वामिविक्रयम् ॥**
अज्ञानाज्ज्ञानपूर्वं तु चौरवद्दण्डमर्हति ॥ १ ॥

१ ज-र-ण-एष । २ ज-स्वा । ३ ज-तेः । ४ ण-र-कारिणोनर्हता । ५ ण-र-आनपतथो । ६ फ-अनुज्ञातोपि । ७ ण-र-स्यात् । ८ ण-र-अत्यन्त संबंध । ९ फ-यदिति न तत्र । १० श्लो. १९८ । ११ गौतमीये अ. १० सू. ३९ । १२. फ-एव । १३ श्लो. १४८ पृ. ६२३ ।

For Private And Personal Use Only

यादृशेन क्रयेण स्वाम्यं भवति तं दर्शयति । विक्रीणतेऽस्मिन्व्यवहारिण इति विक्रयः । आपणभूमिस्ततो यो गृह्णीयाद्धनं गवादि क्रीयमाणं द्रव्यं मूल्यं वा स **लभते न्यायतः** क्रयेण । कुलसंनिधौ विशुद्धं न्यायतः क्रय उचितेन मूल्येनासंभाव्यपापपुरुषाकुलस्यान्यव्यवहर्तृमेलककारपुरुषसमूहस्य समक्षं गृहीतं **लभते** नापहारयति । अन्यथा स्वामिना तु द्रव्यं प्रतिनीयतेऽस्य न्यायतो विक्रये किन्तु मूल्यं लभते । तस्माद्यस्तस्य विक्रयी अन्यायतः क्रयेण तु दण्ड्यते मूल्यं च हारयति । एतदुक्तं (या. व. व्य. १७०) " विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् । क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी ॥ " एष एवार्थस्तेन श्लोकेन प्रतिपाद्यते ॥ २०२ ॥

अथ मूलमनाहार्यं प्रकाशक्रयशोधितः ॥
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥ २०३ ॥

असंभाव्यपापात्तु पुरुषादित्यादि न्यायतः क्रय उक्तः । स चेद्विक्रेता **शक्य** आहर्तुं तदा पूर्वोक्तो विधिः " स्वामी द्रव्यम् " इत्यादि । अथ स विक्रयीगतोऽन्येन क्रीतं स्वामिना चिन्हीकृतं तेन च मूलं विक्रेता पुरुष आहर्तुं न शक्यते । प्रकाशं जनसमक्षं प्रसिद्धाया विक्रयभुवः क्रीतमत ईदृशेन क्रयेण शोधिते द्रव्ये शुद्धः । क्रेताऽ**दण्ड्यो मुच्यते धनं** तु नाष्टिकं स्वामी ज्ञापितस्वं वा लभते । नष्टमन्वेषते **नाष्टिकः** । नष्टमस्यास्तीत्येवं ठनि कृते प्रज्ञादित्वात्स्वार्थिकोऽण् कर्तव्यः । नष्टं प्रयोजनमस्येति वा । तेनायं संक्षेपतः क्रये प्रकाशक्रये तु दण्डो न स्याद्धननाशस्तु स्थित एव ॥ २०३ ॥

नान्यदन्येन संसृष्टरूपं विक्रयमर्हति ॥
न चासारं न च न्यूनं न दूरेण तिरोहितम् ॥ २०४ ॥

अस्वामिविक्रयप्रसङ्गेनान्योऽपि विक्रये धर्म उच्यते । नान्यकुंकुमादिद्रव्यं कुद्रव्येण तदाभासेन कुसुंभादिना संसृष्टं विक्रेयम् । यत्त्वसारद्यं चिरकालं भांडेष्वस्थितत्वात् । प्राप्तविभावं जीर्णमजीर्णाभासं वस्त्रादि न च न्यूनं तुलामानादिना । दूरस्थितं च ग्रामे मम विद्यन्ते वासांसि गुडादि वा द्रव्यं **तिरोहितं** स्थगितं वस्त्रादिनाऽन्तर्हितं यस्य वा स्वरूपं केनचिद्द्रव्यरागेणान्तर्द्धीयते पुराणं नववत्प्रतिभाति तत्तिरोहितं न विक्रेतव्यम् । इदं द्रव्यमीदृशं च प्रदर्श्य विक्रयः कर्त्तव्यः । अन्यथाकृतस्तु न कृतो दशाहादूर्ध्वमपि प्रत्यर्पणे न दोषः । अन्यस्यं दण्डस्येहानाम्नातत्वादुपधाभिरित्येष एव दण्डः प्रकरणभेदेन पठितत्वात् । अस्वामिविक्रयदण्ड इत्यन्ये ॥ २०४ ॥

---

१ **नर**–क्रेतुः । २ **फ**–अनेन । ३ **नर**–अंगीकृत । ४ **नर**–मूलविक्रेता न शक्यः । ५ **नर**–सत्वो ; ६ **फ**–अस्य ।

अन्यां चेद्दर्शयित्वाऽन्या वोढुः कन्या प्रदीयते ॥
उभे त एकशुल्केन वहेदित्यब्रवीन्मनुः ॥ २०५ ॥

विक्रयप्रकारत्वाच्छुल्कादेयों यत्कन्यायाः अस्मिन्नवधौ धर्म उच्यते शुल्ककाले रूपवतीं दर्शयित्वा गृहीतशुल्कोऽस्यां रूपहीनां ददाति वयोहीनां गुणहीनां वा तस्योभौ अपि शुल्कदेनैकेन **शुल्केन** हर्तव्या । कन्यानामेवायं धर्मः । गवाश्वादिद्रव्याणां त्वस्मिन्व्यतिक्रमेऽन्यो विधिर्वक्ष्यते ॥ २०५ ॥

नोन्मत्तया न कुष्ठिन्या न च या स्पृष्टमैथुना ॥
पूर्वं दोषानभिख्याप्य प्रदाता दण्डमर्हति ॥ २०६ ॥

उन्मत्तादिदोषान्कथयित्वा ददतो दण्डो नास्तीति प्रतिषेधद्वारेण कथयतो दण्डमाह । न केवलं शुल्के देया या अन्यस्यापि ब्राह्मादिविवाहेन विवाहयिष्यमाणाया दत्ताऽप्यदत्ता भवति दण्डश्च प्राप्नुयाच्चौरकिल्बिषमिति जानानस्य अजानतः प्रकृतत्वात् । **उन्मत्तया कुष्ठिन्या** ये कुष्ठोन्मत्तादयः । **या च स्पृष्टमैथुना** तस्याश्च यो दोषो मैथुनस्पर्शस्तान्दोषान्**पूर्वं** वाक्प्रदाने**नाख्याप्य** प्रकाश्यैतद्दोषा कन्येत्येवमुक्त्वा ददतो नास्ति दण्ड इति पदयोजना ॥ २०६ ॥

ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत् ॥
तस्य कर्मानुरूपेण देयोंऽशः सह कर्तृभिः ॥ २०७ ॥

संभूयसमुत्थानस्य प्रक्रमोऽयम् । तत्र वैदिकं तावत्संभूयकार्यमुदाहरति । **यज्ञो** ज्योतिष्टोमादिः । तत्र यागरूपानेकांगकर्मनिर्वर्तनार्थमृत्विग्वृतस्त्वया ममेदं हौत्रं कर्तव्यमाध्वर्यवमौद्गात्रं चेति श्रौतेन विधिनाऽनुष्ठेयमित्युपगमश्च प्रवर्तितः । कथंचिदपाटवादिना सामिकृतां **यत्परिहापये**त्त्यजेत्तदानीं तस्य **देयो** दक्षि**णांशः** कर्मानुरूपेण यावती तस्मिन् क्रतौ दक्षिणा तां निरूप्य चतुर्थे भागे कर्मणः कृते चतुर्थतृतीय इत्येतदानुरूप्यं **सह कर्तृभिः** कर्तारः तदनुरूपाः प्रधानर्त्विजो होत्रोद्गात्रादीनां प्रस्तोतृमैत्रावरुणप्रभृतयः ॥ २०७ ॥

दक्षिणासु च दत्तासु स्वकर्म परिहापयन् ॥
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत् ॥ २०८ ॥

माध्यन्दिने सवने दक्षिणा दीयन्त इति । तत उपरिष्टात्कर्म त्यजतामप्रत्याहरणीयौ लभेत न प्रतीपं त्याजयेदित्यर्थः । अन्यां भृतिं दत्त्वा अन्येन पुरुषेण यजमानस्तत्कर्म समापयेत् । ऋत्विग्भिः कर्म कर्त्तव्यं वरणाच्च ऋत्विजो भवंति । तच्च नियतकाले

---

१ फ–च । २ फ–त्ता या । ३ ण–र–उपगमया । ४ र–ण–वरणेन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राक्कर्मण आरंभादतः क्रतुक्रियमाणं विगुणं भवति समाप्तिश्चापि कर्तव्येति विगुणं चेत्समापनीय- मंगान्येव तदन्यकर्तृकाणि करिष्यामीति बुद्धिनिवृत्त्यर्थमुक्तमन्येनैवेति तावदेव त्रिगुणं यदशक्यं शक्यं तु सर्वं कर्तव्यम् । केचित्कारयेदिति ऋत्विजोऽपि संबन्धमाहुः । गृहीत्वा दक्षिणां वाऽधिकां दद्यात्स्वयमशक्नुवन्प्राग्दक्षिणाभ्यः शेषकर्मसमापने यजमान एवाऽधिक्रियते ॥ २०८ ॥

यस्मिन्कर्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः ॥
स एव ताँ आददीत भजेरन्सर्व एव वा ॥ २०९ ॥

इदमपरं प्रकृतोपयोगि वैदिकं कथ्यते । वैदिके कर्मणि सामस्त्येन दक्षिणा आम्नायते न प्रतिपुरुषं विभागेन तस्य द्वादशशतं दक्षिणेति । तच्चेदेकेन क्रत्वन्तराणि तद्विकाराण्यनुगच्छन्ति राजसूयादीनि तत्र च केषुचिदङ्गकर्मसु प्रतिपदमन्या दक्षिणाऽऽम्नाता पुरुषविशेषसंयोगेन हिरण्मये प्रकाशवद्वयव इत्यादि ताः प्रत्यङ्गदक्षिणाः संपद्यन्ते । किमध्वर्यो- श्चातुर्विध्यावादिकवद्ददातिसंबन्धः सर्वेषामृत्विजां दक्षिणाध्वर्यस्तु द्वारमात्रं उत तस्यैव सा अन्येषां प्रकृतांशः संशयोपन्यासार्थः श्लोकः । प्रतिपदं पुरुषविशेषाश्रया अङ्गेषु दक्षिणाः **प्रत्यङ्गदक्षिणाः** । अथवा वीप्सायां प्रत्यङ्गशब्दः । अङ्गमङ्गमाश्रिताः प्रत्यङ्गाः । स एव ता आददीत मुख्य एव पुरुषस्य ददातिना संयोग उत कर्तृत्वाविशेषादन्येऽपि **भजेरं**- ल्लभेरन् । प्रधानदक्षिणाया इवं ॥ २०९ ॥

रथं हरेत चाध्वर्युर्ब्रह्माधाने च वाजिनम् ॥
होता वाऽपि हरेदश्वमुद्गाता चाप्यनः क्रये ॥ २१० ॥

पुरुषविशेषमुक्तास्तदर्था एवेति निर्णयः । एवं ददातिर्मुख्यार्थो भवति । पुरुषसं- योगश्च नादृष्टार्थः । **रथमध्वर्युराधाने हरेद्ब्रह्मा च वाजिनं** वेगवन्तमश्वं होता वा अश्वं वृषमन्यं वा कासुचिच्छाखास्वाधान एता दक्षिणाः । अतः सोमक्रये यच्छकटं तदुद्गातुः । तत्र शकटेऽन्यतरोऽनड्वान्युक्तः स्यात् । अन्यतरो वियुक्त इत्यपि पठ्यते । तेन च सोमः क्रीत उपाह्रियते । अन्ये त्वपूर्वम**न** आहुर्न सोमोपाहरणार्थं न हि क्रयेण शक्यते विशेषयितुम् ॥ २१० ॥

एवं तावत्पुरुषविशेषसंयोगिनीनामङ्गदक्षिणानां विधिरुक्तः । प्रधानदक्षिणानां सामान्यतः श्रुतानामिदानीं विभागमाह

---

१ **ण-र**-वारिकं । २ **ण-र**-परिक्रीणीते । ३ **ण-र**-वा । ४ **फ**-आयत्तेन । ५ **फ**-तच्चातिदेशेन । ६ **फ**-तत्रा । ७ **फ**-अजर्यकर्मसु । ८ **फ**-ताथैव सामान्याऽन्येषां प्रकृत एवांशः । ९ **फ**-उत्तरकर्तृ- । १० **ण-र**-+कथित्वा प्रश्नः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे ॥
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥ २११ ॥

सर्वेषामृत्विजां ये **मुख्यास्तेऽर्धिनः** । यावती तस्मिन्क्रतौ सामस्त्येन दक्षिणाऽऽम्नाता तस्यास्तेऽर्द्धिनोऽर्द्धहराः । सोमयागेषु हि षोडशर्त्विजस्तत्र चत्वारो मुख्या होताध्वर्युर्ब्रह्मोद्गातेति । तेषामर्धं तस्य द्वादशशतं दक्षिणेति । ततोर्धं षट्पञ्चाशन्न तर्धिनोऽष्टाविंशत्याऽर्धिनस्तद्वन्तोऽपरे येषां ततोऽनन्तरं वरणमाम्नातं मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतास्तृतीयेन **तृतीयांशाः** । अंशशब्दोऽर्धशब्देन समानार्थोऽर्धशब्दस्त्वनावश्यं समप्रविभाग एव किंचिन्न्यूनेऽधिकेऽपि सामीप्येन वर्तते । तेन तृतीयो भागः षट्पञ्चाशतः षोडश गृह्यन्ते । एकैकस्य चतस्रो भवन्ति । समतृतीयं भागं प्रयच्छन्ति षट्पञ्चाशततृतीयं च होतुरच्छावाकोध्वर्योर्नष्टाब्रह्मणोऽग्नीदुद्गातुः प्रतिहर्ता । ये च पादिनस्ते चतुर्थं भागं कर्मणः कुर्वन्तीति पादिनः । चतुर्थे च स्थाने मैत्रावरुणस्थानान्ते चतुर्थांशाः । द्वादशसमुदाये पूर्ववत् । एवं " तं शतेन दीक्षयन्ती " त्यत्रापि क्लृप्तिः कर्तव्या । अर्धिनो दक्षियति पादिनो दीक्षयतीत्येवमादिभिः शब्दैः तत्र द्वादशकमविधिरेवान्यत्र श्रुतो व्यवहार इहापि तथैव रीत्या कृत इति ॥ २११ ॥

संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः ॥
अनेन विधियोगेन कर्तव्यांऽशप्रकल्पना ॥ २१२ ॥

यथा यज्ञे यो बहूनि कर्माणि कायक्लेशकरणे विद्वत्तातिशयसाध्ये च नियुक्तो भूयसीं दक्षिणां लभते न्यूनकर्मकारी तु न्यूनां तद्वल्लौकिकेषु गृहचैत्यादिकारिषु **संभूय** संहत्य वर्धकिस्थपतिसूत्रधारादिषु स्वसमयप्रसिद्धो यावानंशः सूत्रधारस्य यावान्स्थपतेस्तत्रानेन **विधियोगेन** विधिर्वैदिकोऽर्थस्तत्प्रसिद्धा व्यवस्था विधियोगवैदिक्या यज्ञगतया व्यवस्थयेत्यर्थः । एवं नाटकादिप्रेक्षायां नर्तनगायनवादकेषु भागप्रक्लृप्तिः । यद्यपि सर्वे विद्वांसः सर्वकर्मानुष्ठानशक्ताश्च तथापि कर्मानुरूप्येण भागो न पुरुषानुरूप्येणेति संभूयसमुत्थानम् ॥ २१२ ॥

धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनम् ॥
पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् ॥ २१३ ॥

यः कश्चिदाह सान्तानिकोऽहं यियक्षुर्वा देहि मे किंचिदिति । तस्मै यदि दत्तं भवेत् स च न यजेत न विवाहकर्मणि प्रवर्तेत । तद्धनं द्यूतेन वेश्याभिर्वा क्षपयेदन्यत्र

---

१ फ–दीक्षेन्महती तत्रापि । २ ण–र–पुरुषानुष्ठानरूपेण । ३ ण–र–कस्मैचिद्याचमानाय दत्तं धर्माय यद्भवेत् । ४ ण–र–भिक्षुर्वा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा विनियुञ्जीत वृद्धिलाभकृष्यादौ न देयं तस्य तद्दत्तस्य दानप्रतिषेधो नोपपद्यते । अतः प्रत्याहरणीयमिति वाक्यार्थः । अथवा नष्टान्तो गौणो व्याख्येयो **दत्तं** प्रतिश्रुतं न **देयम्** । तथा च **गौतमः** (अ. ५ श्लो. २१) "प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्" । किंपुनरत्र युक्तमुचितमित्याह दत्तस्य प्रत्याहरणं प्रतिश्रुतस्य वा दानम् । तथा च स्मृत्यन्तर उभयं पठितम् । आह हि **नारदः** (अ. ८ श्लो. १०–११) "कर्त्ताहमेतत्कर्मेति" उपक्रम्य "यद्दत्तं स्यादविज्ञानाददत्तं तदपि स्मृतम्" इति । प्रयोजनविशेषोद्देशेन यद्दत्तं तस्मिन्ननिवर्त्यमाने स्ववस्थितमपि प्रतिग्रहीतुर्गृहादाहर्त्तव्यम् । दानस्योपक्रममात्रं तदानीं समर्पणं समाप्तिस्तु निर्वर्तप्रयोजनेति **नारदस्य** मतम् ॥ २१३ ॥

यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः ॥
राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः ॥ २१४ ॥

संसाधनं राजनिवेदनादिना ऋणवत्प्रतिश्रुतस्य मार्गणं स्वीकृतस्य प्रतियाच्यमानस्य राजनिवेदनं अयं मह्यं दत्वा प्रतिजिहीर्षतीति सिद्धस्य दृढीकरणं संसाधनमेतदेतत् । **दर्पाल्लोभेनेति** कारणानुवादः । एवं कुर्वतो दण्डः **सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिरिति** चौरदण्डमाशङ्कमानं सुवर्णं विधत्ते । अचौरशङ्कया च दत्तं किल तेन तस्मै न स्वयं हृतं कथमयं चौरः स्यादिति शङ्कां निवर्तयितुं स्तेयशब्दः प्रयुक्तः । सत्यपि चौरत्वे वाचनिकः सुवर्णदण्डोऽन्यासु क्रियासु चौरवद्व्यवहर्तव्यः ॥ २१४ ॥

दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया ॥
अत ऊर्ध्वं प्रवक्ष्यामि वेतनस्यानपाक्रियाम् ॥ २१५ ॥

पूर्वेणार्धेन पूर्ववृत्तादोपसंहारः । उत्तरेण वक्ष्यमाणोपक्रमः । **दत्तस्यैषाऽनपक्रियोदिता** । अपक्रिया क्रियापायः । तस्य नञा प्रतिषेधः । दानमेवं न चालितं भवति । एवैव दाने स्थितिरिति यावत् । धर्मादनपेता **धर्म्या** । कथं प्रतिश्रुत्यादीयमाने धर्मो न पश्यतीति नैषा शङ्का कर्तव्या । एष एवात्र धर्मो यन्न दीयते दत्तं च प्रत्यादीयते । **उदिता** उक्ता यथावच्छब्दसमुदाय एव याथातथ्ये वर्त्तते । सम्यङ्निरूपितेत्यर्थः । अथवा यथाशब्दो योग्यतायां वर्तते तामर्हतीति वतिः कर्तव्यः । **वेतनं** भृतिस्तस्या**नपक्रिया** वेतनेन स्वकर्म कुर्वतां यो धर्मः स इदानीमुच्यत इति प्रतिज्ञा ॥ २१५ ॥

भृतोनार्त्तो न कुर्याद्यो दर्पात्कर्म यथोदितम् ॥
स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनम् ॥ २१६ ॥

---

१ फ–वादिनि युञ्जीत । २ फ–भ । ३ फ–ज्ञानमदत्तं । ४ ण–र–व्यवस्थितमपि । ५ फ–तृष्ट
६ ण–र–निवृत्ते प्रयोजनम् । ७ ण–र–प्रतिमानस्य । ८ ण–र–युक्तः । ९ ण–र–विक्रयापायः । १० फ–तदेवमुदितं भवति ।

For Private And Personal Use Only

उद्दिष्टेन मूल्येनोद्दिष्टं कर्म करोति स इह भृतोऽभिप्रेतः । भृत्यकर्मविशेषेण स्वीकृतो भृतः । देहि मे पञ्चरूपकाणीदं ते कर्म कर्ताऽस्मीयता कालेनेत्याभाष्य प्रविष्टः स चेत्कर्म न समापयति कृष्णलानि सौवर्णानि ताम्ररजतयोर्वा कर्मस्वरूपमनुबन्ध्यादिं च ज्ञात्वा दण्ड्यते । तानि च रूपकाणि वेतनार्थं कल्पितानि न लभेतैं । यद्यनार्तो दर्पान्न करोति यथोदितं कर्म व्याध्यादिनाऽपीडितस्य दर्पादकुर्वतो भृतिहानिर्दण्डनं च । अतः स एवं वक्तुं न लभते । यावन्मया कर्मांशः कृतस्तदानुरूप्येण देहीति । कृत्विग्नामप्येतं दण्डं केचिदिच्छन्ति । स्वेच्छया त्यजतां तद्युक्तं । अत्र हि महाननर्थो यजमानस्य सामिकृत्ये यजमानेऽतो दण्डो महानत्र युक्तः । यजमानस्य च यन्नष्टं तद्दापनीयाः । दीक्षोपसद्देवव्रतैः शरीरापचये समुत्थातव्यम् । अन्यो यः शिल्पी कंचनकर्मणि प्रवर्तयति तडागखनने देवस्य गृहकरणेऽहं ते समापयिता प्रवर्तस्वेति पश्चाच्चापसरेत्तेन स्वामिनः क्षयव्ययायासाः सर्वे संवोढव्याः । भाण्डवाहवणिग्न्यायेन । एष हि न्यायः कात्यायनेन सर्वत्रातिदिष्टः । भाण्डवाहकदोषेण वणिजो यदि द्रव्यं नश्येत्तद्भांडवाहको वहेत् । "यो वाऽन्यः कस्यचित्कर्मणि धनमाबध्यार्धतो निवर्ततेति" कात्यायनीये सूत्रे धनमाबध्याऽऽसज्य धनव्ययं कारयित्वा यद्यर्द्धकृते निवर्तेत सोऽपि तद्वहेदित्यनुषङ्गः । एवं योऽपि षाण्मास्यः सांवत्सरो वा यथोपपादककर्मकारी भक्तदासस्तस्याप्येष एव न्यायः । आह च नारदः (६।५)

"कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्वा भृतिं बलात् । भृतिं गृहीत्वाऽकुर्वाणो द्विगुणं भृतिमावहेत् ॥

"कालेऽपूर्णे त्यजन्कर्म भृतिनाशनमर्हति" ॥ २१६ ॥

अनार्त्तस्य दण्ड उक्तो भृतिहरणं च । आर्त्तस्येदानीमुच्यते

आर्त्तस्तु कुर्यात्स्वस्थः सन यथाभाषितमादितः
स दीर्घस्यापि कालस्य तल्लभेतैव वेतनम् ॥ २१७ ॥

आर्त्तो यो भृतोऽर्द्धकृतं कर्म यदि हित्वा गच्छेत्स स्वस्थः सन्पुनरागत्य यथोक्तमादौ तत्कुर्यात् । बहुनाऽपि कालेन पीडया मुक्तः प्रत्यागतः कृतकर्मशेषे लभेतैव वेतनम् ॥ २१७ ॥

यथोक्तमार्त्तः सुस्थो वा यस्तत्कर्म न कारयेत् ॥
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः ॥ २१८ ॥

---

१ फ–भृत्यः २ फ–नि । ३ ण–र–लमते । ४ ण–र–वध्यादिना । ५ फ–यासः । ६ ण–र–एतं ७ फ–यं । ८ फ–प्रवर्तकत्वेनेति । ९ फ–श्चा । १० फ–क्षयायासाः । ११ फ–अपि । १२ फ–आव यं । १३ फ–उपलभेत च ।

अथवा स्वामिनो वारयत्येनं च तत्कर्म कारितं स्यात्स्वां भृतिं दत्त्वा तदा तत्सममसौ स्वस्थः कारयितव्यः । अथापि स्वामी ब्रूयान्न मे किंचित्कर्तव्यमस्तीति । तत्रापि कृतानुरूपेण लभेतैव यथोक्तमात्राम् ॥ २१८ ॥

एष धर्मोऽखिलेनोक्तो वेतनादानकर्मणः ॥
अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् ॥ २१९ ॥

वेतनादानकर्मण इति विवादपदस्यास्य नामधेयमेवमेतत्तेन न चोद्यमेतत् । कथं वेतनस्यादानकर्मोक्तं यावता दानकर्माप्युक्तं "न लभेतैव वेतनम्" इति । नाम्नो हि येनकेनाचिदन्वितेन संबन्धिना नामता न विरुद्धा । न हि यावन्तः सूत्रार्थास्ते सर्वे प्रवर्तन्ते । तथा चाग्निहोत्रे यद्यप्यग्निप्रजापत्योर्होमस्तथाप्यग्निहोत्रमिति नाम प्रवर्तत एव । तदुक्तं तत्रैवं स्थूणादर्शे या च समानीचा स्यादिति समयसिद्धिः संकेत इदं मया भवतामनुते निश्चितं कर्तव्यमित्यभ्युपगमः । तं भिन्दन्ति व्यतिक्रामन्ति ते **समयभेदिनः** । "संविदश्च व्यतिक्रमः" (अ. ८ श्लो. ५) इति यदुद्दिष्टं तदिदानीमुच्यते । पूर्वेणार्द्धेन पूर्वप्रकारेणोपसंहारोऽपरेण यथोद्दिष्टप्रकरणांतरसूचनम् ॥ २१९ ॥

यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम् ॥
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥ २२० ॥

शालासमुदायो ग्रामस्तन्निवासिनो मनुष्या गृह्यन्ते । तेषामेव संविदः संभवात् । एवं ग्रामसमुदायो देशसंघ एकधर्मानुगतानां नानादेशवासिनां नानाजातीयानामपि प्राणिनां समूहः । यथा भिक्षूणां संघो वणिजां संघश्चातुर्विद्यानां संघ इति । ग्रामादीनां यत्कार्यं यथा पारग्रामिकैर्ग्रामो नोऽपहृतप्रायः अस्माकीने गोप्रचारे गाश्चारयन्ति उदकं च भित्त्वा नयन्ति । तद्यदि वो मतं तदैव एतद्देषां कर्तुं न दद्मे । एवं नः प्रतिवर्धि[११]जां यदि तैः सह दण्डादण्डिर्भवति राजकुले वा व्यवहारस्तत्र[१२] सर्वे वयमेककार्या नो चेदुपेक्षामाह । तत्र ये संविदते चेदं[१३] किमिति प्राक्तनी ग्रामस्थितिस्तैर्व्यतिक्रम्यतेत्येवं प्रोत्साह्य विसंवदेद्बलात्तैरेव सह सङ्गच्छेत तेषु बाह्याभ्यन्तरः स्यात्स राज्ञा स्वराष्ट्रान्निर्वासयितव्यो निष्कासयितव्यः । स्वविषयेऽस्य वस्तुं न देयमेवं वणिङ्मठब्राह्मणादिकार्ये ईदृशे कृतसंवित्तेन नातिक्रमितव्यम् । यत्कार्यं ग्रामाद्युपकारकं शास्त्राचारप्रसिद्धं पुराणशास्त्राविरोधि तत्संविद्व्यतिक्रमे दण्डोऽयं । **लोभादिति** स्वेनोपकारगन्धेन परग्रामणांक्लेनास्वातन्त्र्यं लोभः । अज्ञानात्तु विसंवादे[१४]ऽन्यस्य कल्पः ॥ २२० ॥

---

१ फ-धारयत्यनेन । २ ण-र-कारि । ३ ण-र-अत्र । ४ ण-र-अतिः । ५ फ-तल्लभेतैव । ६ ण-र- संबंधेन नामतः न विरुध्यते । ७ फ-इदं यावता मनुते । ८ फ-रि । ९ फ-हतः प्राय आस्माकीने । ०१ फ-दय एव दोषान् । १ फ-वध्नता । १२ फ-सुत्रे । १३ फ-चेदकमिति । १४ फ-दे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निगृह्य दापयेच्चैनं समयव्यभिचारिणम् ॥
चतुः सुवर्णान् षण्णिष्कांश्छतमानं च राजतम् ॥ २२१ ॥

निगृह्यावष्टभ्य पीडयित्वा कालक्षमकारयित्वा दण्ड्यः। चत्वारि सुवर्णानि येषां निष्काणां परिमाणं ते **चतुःसुवर्णा निष्काः**। यद्यपि चतुःसुवर्णिको निष्क इत्यत्रोक्तं तथापि शास्त्रान्तरात् "शाब्दं शतं सुवर्णानां निष्कमाहुर्महाधियः" इत्येवमादिपरिमाणान्तरं पश्येत्। विशिनष्टि संज्ञाकारणसामर्थ्यादेव लभ्यत इति चेत् पद्यग्रन्थत्वान्न दोषः। अन्ये तु सहार्थे बहुव्रीहिं कृत्वा त्रीन् दण्डानाहुः। चतुर्भिः सुवर्णैः सह षण्णिष्का दण्डनीयो दश निष्काः प्रतिपादिता भवन्ति। बहुव्रीहिसिद्धचर्थं सहार्थे कथंचिन्मत्वर्थो योजितव्यः। न हि चित्राभिर्गोभिः सहितश्चित्रगुर्देवदत्त इति भवति। एते च त्रयो दण्डा यदि च त्रिभिरेक इति कार्यापेक्षया योजनं निर्वासनदण्डो न विकल्पते दण्डोऽयम् ॥ २२१ ॥

एतद्दण्डविधिं कुर्याद्धार्मिकः पृथिवीपतिः ॥
ग्रामजातिसमूहेषु समयव्यभिचारिणाम् ॥ २२२ ॥

जातिसमूहेषु च नानाजातीयानां समानजातीयानां वा संघेषु तद्विषयो व्यभिचारो। येषामित्यार्थः प्रकरणोपसंहारः ॥ २२२ ॥

क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् ॥
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा ॥ २२३ ॥

यद्द्रव्यं प्रचुरक्रयविक्रयं व्यवहारकाले च गच्छति न नश्यति मूलतश्च नापचीयते त्रपुताम्रभाण्डादिस्थिरार्थे तादृशस्यानुपभुक्तस्य दशाहमध्ये यत्तु विरलक्रेम(?)तृकं कश्चिद्देवयात्रोत्सवादौ विक्रीयते अनियतार्थं च तस्य तदहरपरेद्युर्वा। फलकुसुमादौ तु तत्क्षण एवानुशयः। पश्चात्रपः क्रीत्वा यस्यानुशयो न ममैतदुपयुज्यते स दशाहमध्ये दद्यात्। विक्रेता प्रतीपं गृह्णीयात्। विक्रेतुरनुशये आददीत। न मया साधु कृतं यद्विक्रीतमिति तदा क्रेता तस्मै प्रतिपादयितव्यः। एकस्थानवासिनां चैष कालो देशान्तरवासिनां तात्कालिकी प्रतिनिवृत्तिः। केचिद्गोभूम्यादिविषयं विधिमिममिच्छन्ति। न वस्त्रादौ। स्मृत्यन्तरे हि वणिक्पण्येऽन्यो विधिराम्नायते। एवं **नारदः** पठति (९।१–३)
"क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतमिति मन्यते। विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतं" इति।
"द्वितीयेऽह्नि दत्क्रेता मूल्यात्त्र्यंशांशमावहेत्। द्विगुणं तत्तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥"
विक्रयार्थं यद्द्रव्यं तत्पण्यं यद्विक्रीय तदुत्पन्नेन द्रव्यान्तरक्रयादिना पुरुषो व्यव-

१ र–अत्रोच्यते। २ ण–र–शास्त्रान्तरे साष्टशतं। ३ फ–विशिष्टे। ४ ण–र–एतच्च। ५ ण–र–यदि वा त्रिभिरेव। ६ ण–र–योजना। ७ ण–र–एवं। ८ फ–न। ९ ण–र–तत्र। १० ण–र–नवैतत्। ११ ण–र–विक्रयावहेर्थं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरति गीविकाथनमर्जयितुं तथा पणभूमौ प्रसारितमप्रसारितं च भवति वणिजां तत्रेह पण्यग्रहणात्कश्चिद्विशेषो विवक्षितः । इतरथा क्रीत्वा मूल्येन इत्येतावदपेक्ष्यम् । कः पुनरसौ विशेषः ? उच्यते यत्क्रीतमपि पण्यत्वमजहद्वणिग्भिः क्रियते तर्हि विक्रयार्थमेव क्रीणन्ति । तेषां वणिजामितरेतरक्रीणतां विक्रीणानां च **नारदीयो** विधिरन्येषां मानव इति केचित् । किं पुनरत्र युक्तम्। पण्यधर्मादेर्व्यवस्था वाऽनुसरणीया । तथा चाश्वानां बलसञ्चारो हस्तिनामङ्कुशारोहणं विक्रयविभावकमित्यादिना व्यवहारस्तेषु पण्येषु सिद्धो भवति। अविक्षितमविनष्टमुपनिध्यादौ वस्त्रादेर्यावन्नात्र नाशस्तावतो मूल्यमुपनिधात्रे दीयते । द्रव्यं तु गृह्णातीह त्वीपन्नाशेऽपि सर्वं मूल्यं देयं क्रेतुः ॥ २२३ ॥

*** परेण तु दशाहस्य न दद्यान्नापि दापयेत् ॥**
आददानो ददच्चैव राज्ञा दण्ड्यौ शतानि षट् ॥ २२४ ॥

दशाहात्परतो न क्रेता यावतानुशयश्चापि विक्रेता यदि राजनि विवदतां तौ ततः **षट् शतानि दण्ड्यौ** । न दद्यादिति नायमदृष्टार्थः प्रतिषेधः । किं तर्हि ज्ञायते स्थितिरीदृशी । अनिच्छन्क्रेता दशाहादूर्ध्वं न त्याजनीयो नापि विक्रेता ग्राहयितव्यः । अतश्च यदि साम्नोभयेच्छायां दानादाने स्यातां तत्र न कश्चिद्दोषः ॥ २२४ ॥

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ॥
तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥ २२५ ॥

या कन्या दोषैर्युक्ता सा च दात्रा वराय नाख्यायते न प्रकाश्यत एवमेव दीयते तत्र दातुर्दण्डो विदिते राज्ञा कार्यः । **स्वयं** ग्रहणमादरार्थम् । कन्यादोषाश्च धर्मप्रजासामर्थ्यविघातहेतवः । क्षयो व्याधिर्मैथुनसंबन्धश्च नोन्मित्तोया इत्येतत्प्रकरणोक्तो दण्डोऽयं वा ॥ २२५ ॥

अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः ॥
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन ॥ २२६ ॥

अकन्या वृत्तमैथुनसंबन्धेति यो वदेत्तं च दोषं न भावयेत्तदा शतं कार्षापणं

*** [स्याच्चतुर्विंशतिपणो दण्डस्तस्य व्यतिक्रमे ।**
पणस्य दशमे भागे दाप्यः स्याददतिपातिनि ॥ १ ॥]
[क्रीत्वा विक्रीय वा पण्यमगृह्णन्नददतस्तथा ।
पणान्द्वादश दाप्यश्च मनुष्याणां च वत्सरान् ॥ २ ॥]
[पणान्द्वादश दाप्यः स्यात्प्रतिरोधे न चेद्भवेत् ।
पशूनामप्यनाख्याने त्रिपक्षादर्पणं भवेत् ॥ ३ ॥]

१ ण-र-नहि २ फ-अविक्षितं । ण र-ईषत्तु । ४ ण-सापि । ५ फ-अनिच्छेत्क्रेता । ६ ण-र-क्षत्रियो । ७ ण-र-च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दण्ड्यः । अन्ये मन्यन्तेऽल्पत्वाद्दण्डस्य महत्वाच्चाक्रोशस्येति करणस्य च पदार्थविपर्ययेऽसकृत्त्वेन दर्शनादकन्येति शब्दस्वरूपं विवक्षितम् । अकन्येयमित्येतेनैव शब्देनाक्रोशितस्य शतं दण्डः । कः पुनरत्र विशेषः ? । उच्यते । स इदं वादी पृच्छ्यते कथमियमकन्येति । स चेद्ब्रूयान्निर्लज्जा नृशंसाऽश्लीलवादिनी नैष कन्यानां धर्मः । एतच्च न साधयेत्तदाऽयं दण्डः कन्यागुणनिषेधे उक्ते सति । अथवा कन्याशब्दं प्रथमवयोवचनमाश्रित्य परीक्षे प्रार्थयमानस्य ब्रूयात्कितवैन्नासौ कन्या अतिस्विरूपा वृद्धा वा तत्र कन्या दत्ता यदि राजानं ज्ञापयेदभिरूपतमा कन्या मदीया प्राथ्यमानाऽनेन तस्यामभिलाप एवमुक्त्वाऽथ पराजितं तत्र प्राप्तकालायां यद्येवमुक्तं तदा पराजितस्यायं दण्डः ॥ २२६ ॥

पाणिग्रहणिका मंत्राः कन्यास्वेव प्रतिष्ठिताः ॥
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः ॥ २२७ ॥

पाणिग्रहणं विवाहो दारकर्म । तत्र विद्यमानत्वात्स चाग्निमयक्षतेत्येताभ्यां संबन्धेनासां विवाहे कर्तृत्वं दर्शयति । परमार्थतस्तु विवाहविधौ कन्यामुपयच्छेदिति विहितं तादृशमेवार्थं मन्त्रा अभिवदन्ति । न पुनर्मन्त्रेषु कन्याशब्दश्रवणात्कन्यानां विवाहमन्त्राणामविधायकत्वात् । एष एवार्थस्तद्विपरीतप्रतिषेधमुखेन दृढीक्रियते । **कन्यासु क्वचिन्नृणाम्** । न कस्यांचिद्वेदशाखायां मनुष्याणामकन्याविषयो विवाहः श्रुतः । **लुप्तक्रियाः** यासां धर्मेऽग्निहोत्रादावपत्योत्पादनविधौ चाधिकारो नास्त्यतस्ता न विवाह्याः । अतः कन्यामकन्येति वदन्महता दण्डेन योजनीय इति पूर्वश्लोकादनन्तरमुच्यते । अप्राप्तमैथुना स्त्री **कन्योच्यते** ॥ २२७ ॥

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ॥
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥ २२८ ॥

दारा भार्या तस्या लक्षणं निमित्तं विवाहमन्त्रास्तैस्तत्र प्रयुक्तैर्विवाहाख्यः संस्कारो निर्वर्तते । द्विजातीनां पुनर्मन्त्राः । तत्र शूद्रस्य दारप्रसङ्गो न हि तस्य मन्त्राः सन्ति मन्त्रवर्जं सर्वान्येतिकर्तव्यतास्ति । अतो विवाहाख्यसंस्कारोपलक्षणं मन्त्रास्तेषां मन्त्राणां निष्ठा समाप्तिः **सप्तमे पदे विज्ञेया** लाजाहोममभिनिर्वर्त्य त्रिःप्रदक्षिणमग्निमावर्त्य सप्तपदानि स्त्री प्रक्रम्यते " इष एकपदी भव " इत्यादि यावत् " सखा सप्तपदी भवेति " । तस्मिन्प्रक्रान्ते कन्यायाः पदे कन्यापितुर्वोढुर्वाऽनुशयो नास्ति । उन्मादवत्यपि भार्यैव । न त्याज्या । मैथुनवत्यास्तु नैवासौ विवाहः । सत्यपि लाजाहोमादावितिकर्तव्यतास्वरूपे न

---

१ फ-था । २ ण-र-प्रतिषेधे । ३ ण-र-कितावसैनास्त्रैं । ४ फ-कस्यचित्स्वरूपा वृद्धादत्ता । ५ ण-र-अध्यारोपितः । ६ ण-र-सम्बन्धि तास्थं । ७ ण-र-यच्छेतेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मार्या सा । अतस्तत्र द्रव्यान्तरवदनुशयः । यथा च शूद्रकर्तृकेणाधानेनाहवनीयो भवति सपिण्डायाश्च कृतेऽप्यग्निसंस्कारे विवाहस्वरूपत्वं तत्र तु प्रसिद्धम् ।

"संस्कारकरणादेकः प्रायश्चित्तीयते पुमान्" । कन्या चान्यस्याप्यविवाह्या वसिष्ठवचनात् । यदि प्रजननविघातरोगगृहीतामूढ्वा न त्यजति का तर्हि गतिः । प्रत्यधिकारे अन्यामुद्वाहयिष्यति । सद्यस्त्वप्रियवादिनीतिवत् । कृते तु जातपुत्रायामाधाने यदि क्षयो व्याधिः स्यात्तथापि नैनामधिविन्देदधिवेदनिमित्तानां परिगणनात् । तत्रापि यदि "कामतस्तु प्रवृत्तानाम्" इत्येतत्प्रयोजकमिष्यते न निवारयामस्तेनैव संक्षेपतः कन्यायां धर्मो यथाऽन्येषां द्रव्याणां दशाहादूर्ध्वमपि साम्ना प्रत्यर्पणं नैवं कन्यानां कृतविवाहानां शुल्कदेयानामपि प्राग्विवाहाद्द्रव्यान्तरधर्मः । या तु धर्माय दीयते तस्या नैवानुशय इति वचनात् । तत्रापि "दत्तामपि हरेत्कन्यां ज्यायांश्चेद्वर आव्रजेत्" इत्यस्त्येवापहार आ सप्तमपदात् । सप्तमे तु पदे वरे दानानिवृत्तेर्गवादिद्रव्यदानवन्नास्त्यपहारः । अथैव केनचित्कस्मैचिद्गवि दत्तायां न तयोरन्योन्येच्छयाऽनुशयो दानादाने दानस्य तदानीमेव निवृत्तत्वात् । प्रतिगृहीतं चेद्दात्रे पुनः प्रयच्छेत्तद्दानोत्तरमेव तत्स्यात्तत्पूर्वदाननिवृत्तिः । एवं सगणयोः कन्यावरयोर्नान्योन्येच्छया त्यागोऽस्ति प्रागपि विवाहात् । विवाहे कृते दोषवत्या अपि नास्ति त्यागः कन्यायाः । स्पृष्टमैथुना या कन्यैव न भवत्यतोऽसौ त्यज्यते । कन्याया यतो विवाहो विहितो विवाहश्चोपयोगस्थानीयो यथा परिभुक्तं वस्त्रमन्तर्दशाहमपि नैव विक्रेत्रेऽर्प्यते तथैव कन्या कृतविवाहा । पुनश्चायमर्थो निर्णेष्यते "सकृत्कन्या प्रदीयत" इत्यत्रान्तरे ॥ २२८ ॥

यस्मिन्यस्मिन्कृते कार्ये यस्येहानुशयो भवेत् ॥
तमनेन विधानेन धर्म्ये पथि निवेशयेत् ॥ २२९ ॥

न केवलं वणिजां पण्यधर्मोऽयं दशाहिकोऽनुशयः । किं तर्हि । वेतनसंविद्वृद्धिप्रयोगादिषु **यस्मिन्यस्मिन्निति** वीप्सयाऽशेषकार्यपरिग्रहोऽनेन **विधानेन** दाशाहिकेन विधिना । धर्मादनपेतो **धर्म्यः पन्था** मार्गः **निवेशयेत्**स्थापयेद्राजा । अतिदेशोऽयं **कृते कार्ये** इति प्रक्रान्ते पुनः सर्वेण सर्वनिवृत्तेः । तत्र **ह्यनुशयो भावः** । स च निरूपिते स्थापिते वाऽन्तरेऽनुशमय्य दशाहप्रतीक्षणम् । यत्र पुनर्वृद्ध्यर्थं धनं नीतमृत्विक्त्वाद्वृत्तो वेतनं च यद्दत्तं कृतसमये विरोध आरब्धस्तत्र नायं धर्म इति केचित् । न हि कृतमकृतं भवति । एतच्च न कृतं निवृत्तमुच्यते । न प्रक्रान्तं । न ह्ययं "आदिकर्मणि क्तः" । न हि मुख्यार्थत्यागे कारणमस्ति । यत्तु कृतं नाकृतं भवतीति कृतमपि तत्साध्यकार्यप्रतिषेधादकृतमेव । यथा भुक्तं वांतमिति लौकिकेष्वपि पदार्थेषु शास्त्रावसेयव्यवस्था । केषु शास्त्रत

---

१ याज्ञवल्क्यस्मृ. आचारे ६५ । २ ज–आसप्तमात्पदात् समगुणे चे वरे दानानिवृत्ते गवादि । ३ अ. ९ श्लोक. ४७ । ४ व्या. सू. ३।४।७१।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एव निवृत्त्यनिवृत्ती विज्ञेये। अथापि वृत्ताः पदार्थास्तथापि प्रत्याहरणं विधीयेते। निष्पन्नेऽपि धनप्रयोगे स्वस्थाननीतेष्वपि रूपकेषु प्रत्यानयनं कर्तव्यमन्यतरानुशयात्। क्षय-व्ययाः शास्त्रधर्मेण नीतेषु बोढव्याः। तथा च गृहीतमात्रेषु मासिकीं वृद्धिमिच्छन्ति। यत्रैवं बन्ध एव भोक्तव्य इयन्तं कालमित्येवमाद्यन्तर्दशाहमनुशयो निवर्त्यते। ऋत्विजां तु वरणं विवाह इव कन्यानां संविदे दशाहादूर्ध्वं प्रवर्तितव्यमस्मिन् शास्त्रे सति ॥ २२९ ॥

पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे ॥
विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः ॥ २३० ॥

गवादिपशुविषये **व्यतिक्रमे स्वामिनां पालानां** च गोपालादीनां यो **विवादो** गौस्त्वया मे नाशिता तां मे देहीति पालोऽपि विप्रतिपद्यते मदीयो दोषो नाभवदित्यत्र वादपदे यद्धर्मतत्त्वं यादृशी व्यवस्था तां **यथावन्निपुणतो वक्ष्यामी**त्यवधानार्थः पिण्डीकृत-प्रकरणोपन्यासः ॥ २३० ॥

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ॥
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥ २३१ ॥

दिवा पशूनां योगक्षेमे दोष उत्पन्ने ' नष्टं विनष्टम् ' इत्यादिके वक्ष्यमाणे **पाले वक्तव्यता** कुत्सनीयता। तेन स दोषो निर्वोढव्यः। **रात्रौ स्वामिनो** दोष उद्बन्धनादि मृतानां तद्गृहे स्वामिगृहे यदि पालेन प्रवेशिता भवन्ति अन्यथा चेत्तु यदि रात्रावपि पालेन न प्रवेशिता अरण्य एव वर्तते तदा पालो दोषभाक् स्यात्। एतदुक्तं भवति। पालहस्तगता गावो यदा क्षेत्रे कस्यचित्सस्यं भक्षयन्ति केनचिद्वा हन्यन्ते तदा पालस्य। अथ पालेन समर्पितास्तदा स्वामिनः। अयोगक्षेमे **योगक्षेमशब्दप्रयुक्तो** लक्षणया। यथाऽन्धे चक्षुष्मानिति ॥ २३१ ॥

कोऽसौ योगक्षेमः। अतः प्रपञ्चयति

*** गोपः क्षीरभृतो यस्तु स दुह्याद्दशतोवराम् ॥**
गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः ॥ २३२ ॥

गाः पाति **गोपः** गोपालकः। स कदाचिद्भक्तादिना भ्रियते कदाचित्क्षीरेण। तत्र क्षीरभृतो दशभ्यो **वरान्** श्रेष्ठान् अवरान्वा संहितायामकारप्रश्लेषाद्रक्षायामनुरूपकता। यस्य नान्यदन्नं स एकस्या गोः क्षीरमादद्यात् दशतः। अनया कल्पनया न्यूनाधिकरक्षणं भृतिःकल्पयि-तव्या। एवं दोह्यादोह्यधेनुवत्सतरीदम्यवत्सकादिवारणे कचित्त्रिभागः क्षीरस्य कविच्चतुर्भागः

---

* अयं श्लोः केषुचित्पुस्तकेषु (णरज) " तासां देवरद्वानां ' इत्येतच्छोकात्परत उद्धतः ।

१ णर–निवृत्तः । २ णर–प्रतीयते । ३ णर–अनुशयः । ४ णर–सविधर्ठ । ५ पर–तत्वां । ६ णर–गतानां यावान् बाधा (कस्याचित) । ७ णर–सा । ८ फ–योगशब्द । ९ फ–गां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वामिभिः कल्पयितव्यः । [1]दिङ्मात्रप्रदर्शनार्थश्लोकोऽयं । देशव्यवस्था त्वाश्रयणीया । भृतिं निरूपयिष्यामीति ग्रामगोपालेन[2] यदि गावस्त्यक्ता भवन्ति न तेन स्वामिनमननुज्ञाप्य दशमी गौर्दोह्येति भक्तभृतोऽपि क्षीरेण विनिमयस्येति बुद्ध्या दुहीत तन्निवृत्त्यर्थमुक्तं **गोस्वाम्यनुमत इति**। स्वामिनोऽनुमतिमन्तरेण प्रवर्तमानो दण्ड्यः । [3]सानन्तरोक्ता । **अभृते** भक्तादिना **भृतिर्भवेत्** । क्षीरभृतो वा एषा भृतिः । भृत्यो भरणार्थं न धर्माय प्रवृत्तो गोरक्षायाम् । अथवा स्वेच्छया दशम्या गोः क्षीरमाददानश्चोरः स्यात् । अस्मिंस्त्वनुज्ञाते भृतिस्तस्येयमिति न दोषः । अत्रापि स्वामिनोऽननुमत्या दोष एवेति चेत्सत्यं कल्प्या[4] काचिद्दंडमात्रा । न चौरो भवत्यस्मिंस्तु चौरो निक्षेपहारी वा स्यात् । अयं श्लोक आदौ वक्तव्यः । अतोऽनंतरः कश्चित्पठ्यते ॥ २३२ ॥

नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम् ॥
हीनं पुरुषकारेण प्रदद्यात्पाल एव तु ॥ २३३ ॥

नष्टं दृष्टिपथादपेतं न ज्ञायते क्व गतम् । **विनष्टं कृमिभिः** । आरोहकनामानः कृमयो गवां प्रजननवर्त्मनाऽनुप्रविश्य नाशयन्ति । **श्वभिर्हतं**[5] प्रदर्शनार्थमेतत् । तेन गोमायुव्याघ्रादिहतानामेषैव स्थितिः । **विषमे** श्वभ्रदरीशिलादिसंकटादौ **मृतं प्रदद्यात्पाल एव** । **हीनं पुरुषकारेण** पुरुषव्यापारः पालस्य तत्र संनिधानात् वृकनिवारणं च दण्डादिना प्रवृत्तिः । तेनापेतम् । यदि व्याप्रियमाणो व्याघ्रादेर्निवारणे नैव समर्थः सहसैवोत्पत्य कश्चित् पशुर्वेगेन श्वभ्रं गच्छेदनुगच्छताऽपि न शक्यः प्रत्यावर्तयितुं न पाले दोषः ॥ २३३ ॥

विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति ॥
यदि देशे च काले च स्वामिनः स्वस्य शंसति ॥ २३४ ॥

विघुष्याऽऽघुष्य पटहान्युद्घोषणम् । **चौरैर्हृतं** पशुः **पालो न** दाप्यते । विशेषणं च पालस्याशक्त्युपलक्षणार्थम् । यदि बहवश्चोराः प्रसह्य च मुष्णन्ति तदा पालो मुच्यते । सोऽपि यदि प्राप्तकालं तस्यामेव वेलायां स्वामिनः कथयति । देशे यत्र स्वामी संनिहितः कथं विज्ञातस्तत्र अथवा निवासदेशे [8]स्वामिनः तत्र यद्यसावसंनिहितोऽपि भवति तथापि तत्स्थानीयो भवति यो राजानमधिकारिणं वा ज्ञापयित्वा चौरानभिद्रवति । **स्वस्येति** राजनिवृत्त्यर्थं । स्वो हि स्वामी स्वद्रव्यमोक्षणे यत्नं कुरुते न तथा पालज्ञापितो राजा । दुष्करा च राजज्ञापना पालस्य । अथ मुषित्वा गतेषु ज्ञापयेद्दुष्येदेव ॥ २३४ ॥

कर्णौ चर्म च वालांश्च बस्तिं स्नायुं च रोचनाम् ॥
पशुषु स्वामिनां दद्यान्मृतेष्वङ्कानि दर्शयेत् ॥ २३५ ॥

---

१ णर–न दिङ्मात्र । २ णर–पाले । ३ पर–सः । ४ फ–तस्य तावता दण्डमात्रं । ५ फ–स्वहतं । ६ फ–चपलस्य । ७ फ–निषेधकरणं । ८ फ–स्वामी न । ९ णर–ध्या । १० णर–अंकश्च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आयुषः क्षयान्मृतेषु **पशुषु स्वामिनः** कर्णाद्यर्पणीयम् । गोरोचनां गवां शृङ्गेषु चूर्णं भवति । **बस्ति**रङ्गविशेषः । **अङ्काः** कर्णादयः स्वामिविशेषज्ञानार्थं चिन्हानि । तानपि दर्शयेत् । एवं पालस्य शुद्धिः । अङ्कदर्शनेन हि प्रत्यभिज्ञा भवत्ययं स पशुरिति ॥२३५॥

अजाविके तु संरुद्धे वृकैः पाले त्वनायति ॥
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत् ॥ २३६ ॥

अजा चाविका **चाजाविके** । अविरेवाविकैडका । एते **वृकैः** शृगालप्रभृतिभिः **संरुद्धे** अवरुद्धे प्रथमपात एव हते । अस्मिंश्चान्तरे सत्यामोक्षणेऽहतत्वान्न च पाल आयाति मोक्षयितु**मनायत्य**नागच्छति **पाले** यत्तत्र **प्रसह्य** बलेनाभिभूय **वृको हन्यात्पाल**स्य स दोषः । स्वामिनो दापयितव्यः । प्रायश्चित्तं चरेत् । गोर्महत्त्वाद्गोमायुना न शक्यते संरोद्धुमित्यजाविके इत्युच्यते । न पुनस्तद्रूपमतश्च बालानां गोवत्सानामेष एव न्यायः ॥ २३६ ॥

तासां चेदवरुद्धानां चरंतीनां मिथो वने ॥
यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी ॥ २३७ ॥

अजाविकपूर्वश्लोके जात्यपेक्षं द्विवचनम् । पशुशकुनिद्वन्द्वत्वाद्विभाषितैकवद्भावः इह तु तासामिति व्यक्त्यपेक्षो बहुवचने परामर्शः । **अवरुद्धानां मिथ** एकत्र प्रदेशे स्थापितानां संहतीभूतानां दिग्भ्यो विदिग्भ्यश्च निरुद्धगमनानां **वने चरन्तीनां** दृष्टिगोचराणां यदि कुतश्चनकुञ्जात्संचारणोत्पतनानुक्रमेण निष्क्रम्य वृको हन्यान्न पालो दोषभाक् । अशक्यं ह्यनेकवृक्षक्षुपशरवल्लीगहनं वनं निर्विवरीकर्तुं छिद्रानुसारिणश्च वृकाः । मिथो ग्रहणाच्चातिदूरविप्रकृष्टासु वधे दोष एव । पालहस्तगताः पशवस्तदुपेक्षायां यदि दोषमामुयुः स पालेनैव समाधेय इति सिद्धे एष प्रपञ्चः सुखावबोधार्थः ॥ २३७ ॥

धनुःशतं परीहारो ग्रामस्य स्यात्समन्ततः ॥
शम्यापातास्त्रयो वाऽपि त्रिगुणो नगरस्य तु ॥ २३८ ॥

चतुर्हस्तं धनुस्तेषां शतं । चत्वारि हस्तशतानि । **समंत**तश्चतसृषु दिक्षु **ग्रामस्य परीहारः** कर्तव्यः । अनुप्तसस्या भूमिः पशूनां सुखप्रचारार्था कर्तव्या । दण्डयष्टिः सा बाहुवेगेन प्रेरिता यत्र पतति ततः प्रदेशादुद्धृत्य पुनः पातयितव्या यावत्त्रिस्तस्य परिमाणो वा **शम्यापातः** परिहारः । **त्रिगुणो नगरस्य** । ग्रामनगरे प्रसिद्धे । शम्यायाः पाताः प्रेरिताया वेगसंस्कारक्षयो भूमौ स्थानादि ॥ २३८ ॥

---

१ फ–पर्णो । २ णर–चूर्णं । ३ णर–+कर्तारी । ४ फ–अजाविको । ५ णर–विसावितैकवद्भावः । ६ फ–पेक्षेण । ७ णर–कुतश्चिन्निकुंजात्सारेणो । ८ णर–पक्षिवद्धन्यात् । ९ णर–षमयाऽच्यते । १० फ–या । ११ फ–बहु । १२ णर–नि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि ॥
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम् ॥ २३९ ॥

तत्र परीहारस्थाने क्षेत्रं न कर्तव्यम् । अथ कृतं तस्माद्वृत्तिर्न कृता । अतः क्षेत्रिण एवापराध्यन्ति । न पशुपालाः । न हि पाल एकैकं पशुं हस्तबन्धेन नेतुं शक्नोति । न च पशूनामन्यो निर्गमोऽस्ति ॥ २३९ ॥

वृतिं तत्र प्रकुर्वीत यामुष्ट्रो न विलोकयेत् ॥
छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगम् ॥ २४० ॥

कंटकशाखादीनां प्रकारविन्यासः पशुप्रवेशवारणार्थः क्षेत्रारामादीनां **वृतिरुच्यते**। या कचित्पर्णिकेति प्रसिद्धा वारणा वृतिः । तस्या उन्नतिरियती कर्तव्या ययोष्ट्रो नावलोकयति । किमियं द्वितीया तृतीयार्थे **यामुष्ट्र इति** । नेति ब्रूमः । कथं तर्हि वृतिमुष्ट्रो न पश्यति । महोत्सेधाया द्वितीयपार्श्वस्यादर्शनाददृष्टैव वृतिः । **छिद्रं च** विवरमावारये**त्सर्वम्** । **श्वसूकरमुखेन** यदनुगम्यते तन्मुखं परिमाणं तथा कुर्याद्यथाश्वमुखं न माति । तन्मुखादप्यल्पछिद्रमित्यर्थः । तथा कृतायां वृतौ ॥ २४० ॥

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः ॥
सपालः शतदण्डार्हो विपालान् वारयेत्पशून् ॥ २४१ ॥

परिवृते पथि क्षेत्रे ग्रामसमीपवर्तिनि च परीहारमध्यगते । **अन्तशब्दः** समीपवचनो यदि भक्षयेत्पशुः **सपालश्च** स्यात्सन्निहिते **पालः शतदण्डार्हः** पशोर्दण्डासंभवात् । पालेऽसन्निहितेऽपि गृहे यदा नाप्यसौ पालः प्रसिद्धो न पुनस्तत्प्रेषितो वारिको रूपमात्रचेतनः । **विपालाः पशवो वारयितव्या** दण्डादिना न तु दण्डनीयाः । विपालाश्चोत्सृष्टवृषादयः । अन्येषां तु विपालानां स्वामिनो दण्डः । अथवा परिवृत इति प्रश्लेषः । क्षेत्रसंबंधाच्च गम्यमानः क्षेत्रस्वामी सपाल इत्यन्यपदार्थतयाऽभिसंबध्यते । सहपालेति[3] क्षेत्रे को दण्ड्यः । उभौ दण्ड्यौ । पालः क्षेत्रिकश्च । क्षेत्रिकस्तावत्किल किमिति पथि क्षेत्रे वृतिं न कृतवान् । पालेनापि वृतौ चासत्यां किं क्षेत्रं खादयितव्यं विपालप्रमादाद्यूथच्युतं वारयेत् । तथा च **गौतमः** (अ. १२ सू. १८) " पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः " इति ॥ २४१ ॥

क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति ॥
सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा ॥ २४२ ॥

१ **णर**–सिद्धं । २ **णर**–क्षेत्रक्षेत्रसंबन्धाच्च । ३ **फ**–न । ४ **फ**–च सत्यां । ५ **फ**–दपि तौ वारयेत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पथिक्षेत्रग्रामान्तीयेभ्योऽन्यानि क्षेत्राणि तद्भक्षणे **सपादपणो** दण्डः । ननु चात्र स्वल्पेन दण्डेन भवितव्यम् । दूरक्षेत्रात्संनिहिते क्षेत्रे यं तु पन्थानमतिक्रम्य क्षेत्रियं वाहिग्रामं च तत्र महान् दण्डो युक्तः । किमिति गवां पालो गन्तुं तत्र ददाति । नैष दोषः । यद्यत्र महादण्डो नोच्येत तदा प्रत्यहं प्रवेशनिर्गमैर्गवां भक्षयन्तीनां ग्रामान्तरक्षेत्राण्युत्सीदेयुः । दण्डात्तु महतो बिभ्यतो यत्नेन रक्षन्ति । अन्यत्र गोतृणविशेषार्थां कथंचिन्नयति स्वल्पो दण्डः । अत्रापि विपालानां वारणमेव सर्वत्र क्षेत्रस्वामिनो गतफलदेये । कुशलैः च ते परिमाणे कल्पिते । क्षेत्रमस्यास्तीति व्रीह्यादित्वाट्ठक् । इति **धारणैष** निश्चय इत्यर्थः । **सर्वत्र** ग्रहणाच्च विपालेऽपि **पशौ** क्षेत्रिकस्य गतलाभः । यद्यपि **पशुशब्दः** सामान्यशब्दो महिष्यजाव्युष्ट्रगर्दभादिषु वर्तते तथापि स्मृत्यन्तरदर्शनाद्गोष्वयं दण्ड इति मन्यते । तथा च गौतमः (अ. १२ सू. २१-२२) "दशमहिषीष्वजाविषु द्वावित्याद्यन्यत्र कल्पना" ॥२४२॥

अत्रापवादः

अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा ॥
सपालान्वा विपालान्वा न दण्ड्यान्मनुरब्रवीत् ॥ २४३ ॥

गोग्रहणान्महिष्यादिषु दोषः । **वृषाः** सत्कारैर्**देवपशवो** देवयागार्थं यजमानेन कल्पिताः । प्रत्यासन्नयागा अथवेष्टकादिकूटस्थापिता हरिहरादीना प्रकृतयो देवा उच्यन्ते । तेषां पशवः । तानुद्दिश्य केनचिदुत्सृष्टाः । तदा ह्यस्य देवानां पशूनां च स्वस्वामिसंबंधस्य संभवात् पुरुषस्वामिस्वामिभावस्य संभवात् देवायतनमण्डनानां चैष धर्मः । न तु तत्पालकैर्वाहदोहाद्यर्थं ये देवगृहेषु धार्यन्ते । यतः पालका एव तेषां देवानामर्थं विनियुञ्जते । अतस्तत्र पालका एव स्वामिनः । अतो युक्तः स्वामिवतामन्येषां यो धर्मः स तत्र आयतनमण्डनस्थः परिगृहीताऽव्यवधानेन देवपशुशुद्धिमुत्पादयन्ति । वृषोत्सर्गादिविधानोत्सृष्टा वृषाः कैश्चित्परिगृह्यन्ते । ततः **सपाला** अथ चापरिगृहीतास्ततो **विपाला** उभयेषामयं दण्डः ॥ २४३ ॥

क्षेत्रिकस्यात्यये दण्डो भागाद्दशगुणो भवेत् ॥
ततोऽर्धदण्डो भृत्यानामज्ञानात्क्षेत्रिकस्य तु ॥ २४४ ॥

क्षेत्रस्वामिनः स्वक्षेत्रेऽत्ययेऽतिक्रमोऽपराधो यदि भवेत्स्वकृते अकाले वापनं निदानमयोग्यबीजवापः । स्वपशुभिर्भक्षणं गिरणं वा विदितफलके प्रायश इत्यादि तदा राज्ञो यावान्भाग आगच्छति तं दशगुणं दण्डनीयः । अथ तस्याज्ञातमेतत्प्रयुक्तैर्भृत्यैः क्षेत्रजागर्यानियुक्तैर्वा अपराद्धं तदाऽर्धदण्डो भृत्यानामत्यये क्षेत्रिकस्य दण्ड इति संबन्धः । क्षेत्रप्रसङ्गादत्रेदमुक्तम् ॥ २४४ ॥

---

१ **फ**–पातप्रमादासन्निहिते । २ **फ**–क्षेत्रं वा । ३ **फ**–क्षेत्रिणो । ४ **णर**–फलं देयं । ५ **णर**–सोत्कारः । ६ **णर**–मुख्यस्य । ७ **फ**–य । ८ **णर**–गृहे वा विदितफलप्रवेशः । ९ **णर**–अपत्याय क्षेत्रिकस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः ॥
स्वामिनां च पशूनां च पालानां च व्यतिक्रमे ॥ २४५ ॥

सुबोधोऽयं श्लोकः ॥ २४५ ॥

सीमां प्रतिसमुत्पन्ने विवादे ग्रामयोर्द्वयोः ॥
ज्येष्ठे मासि नयेत्सीमां संप्रकाशेषु सेतुषु ॥ २४६ ॥

सीमां प्रति विवादे सीमानिमित्ते लक्षणेत्थंभूतेति प्रतेः कर्मप्रवचनीयत्वात् द्वितीया-निमित्तमपि लक्षणमिति शक्यते वक्तुम् । सीमा मर्यादा ग्रामादीनां विभागः परिमाण-मियत्ता परिच्छेदनमिति यावत् । **ज्येष्ठे मासि नयेन्निर्णयः** कर्तव्यः । मासविशेषनिर्णये हेतुमाह । **संप्रकाशेषु सेतुषु** सेतवः सीमालिङ्गानि वक्ष्यमाणानि लोष्ठपाषाणादिविशेष-जातीयसीमा ग्राह्या तृणंजादीनि प्रागस्मात्कालादनुत्थितेषु तृणेषु लोष्ठपाषाणयोरन्यस्याश्च भूमेर्न विशेषो लक्ष्यते । पाषाणलक्षितायां यदा तत्र तृणानि न ज्ञायन्ते तदा सा सीमेति निश्चीयते । एवं वल्लीस्थानादिष्वपि । प्राग्वसंताद्वासांतिके दाहे विशेषो न लक्ष्यते । हेत्वभि-धानाच्च यस्मिन्देशे यदा व्यज्यंते ततो मासात्कालहरणं कर्तुं नादेयमन्यदा तु लिङ्गाज्ञानार्थं कालापेक्षाऽपि भवतीत्येतावत्फलं ज्येष्ठग्रहणे ॥ २४६ ॥

सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् ॥
शाल्मलीन्सालतालांश्च क्षीरिणश्चैव पादपान् ॥ २४७ ॥

पादपा वृक्षाः । क्षीरिणोऽर्कोदुंबरप्रभृतयः । एवं हि चिरस्थायित्वात्सीमादेश एव रोपयितव्या न ग्राममध्ये सीमादेशादन्यत्र क्रियमाणा न निश्चायकाः स्युः ॥ २४७ ॥

गुल्मान्वेणूंश्च विविधान् शमीवल्लीस्थलानि च ।
शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति ॥ २४८ ॥

अश्मनोऽस्थीनि गोवालांस्तुषान्भस्मकपालिकाः ॥
करीषमिष्टकांगाराञ्छर्करा वालुकास्तथा ॥ २४९ ॥

उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ॥
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम् ॥ २५० ॥

करीषमिष्टकांगारान् शर्करा वालुकाश्च ह उपच्छनानि चान्यानि **सीमालिङ्गानि** कारयेत् । **शरान्मुक्तकुञ्जगुल्मांश्च तथा सीमा न नश्यति** । संहतप्रकाण्डा वीरुधो **गुल्मानि** । वेणव आरग्वधादयः । बहुत्वाच्च **विविधग्रहणम्** । **वल्यो** व्रततयः । दीर्घाङ्कुरास्तृणजातयः । कृत्रिमा सशाड्वलादिपिण्डिका । कुब्जकस्य गुल्मत्वात्पृथगुपदेश

१ फ–सुप्रकाशेषु । २ णर–इयंत परिच्छिनत्ति । ३ फ–दाह्य । ४ णर–तु ५ णर–रि । ६ णर–व । ७ णर–कुक्षक ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदरार्थः । करीषं शुष्कं गोमयम् । अङ्गारा अग्निदग्धाः काष्ठावयवाः । पाषाणकठिना मृदः शर्कराः । कपालिका शकलैकदेशः ॥ २४८ ॥ २४९ ॥ २५० ॥

तडागान्युदपानानि वाप्यः प्रस्रवणानि च ॥
सीमासंधिषु कार्याणि देवतायतनानि च ॥ २५१ ॥

महांभांसि तडागानि । वाप्यः पुष्करिण्यः । उदपानानि कूपप्रभृतीनि । प्रस्रवणान्युदकस्यन्दा ईषत्स्रवदुदका भूप्रदेशाः । देवतायतनानि यक्षगृहादीनि । एतानि प्रकाशकानि । न ह्येतानि स्वल्पेनायासेन नाशयितुं शक्यन्ते । नाश्यमानेषु च महान्प्रत्यवायो भवति । सर्वस्य चोदकार्थिनो देवतादर्शनार्थिनश्च तत्र संनिधानात्सुज्ञातश्च साक्षिणां सीमासन्धिर्भवति । अन्यानि प्रच्छन्नानि करीषादीनि भवन्ति । कारयेद्राजा नवग्रामसंनिवेशे कृते निर्णयम् । एवं सीमा न कदाचिन्नश्यति । अन्यथा तं प्रदेशं कश्चित्कर्षणेन नाशयेत् ॥ २५१ ॥

यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् ॥
तानि संधिषु सीमायामप्रकाशानि कारयेत् ॥ २५२ ॥

गुल्मादीनामुपदेशः प्रदर्शनार्थो न परिसंख्यार्थः । खदिरसारकालाञ्जनाद्यानि शर्करादितुल्यानि कैवंप्रकारता अत आह कालाद्भूमिर्न भक्षयेत् । भूमेर्भक्षणमुपमया स्वरूपोपादानम् । यथा भक्षितं भेदेन नोपलभ्यते तद्वद्भूमिसादापन्नमिव तादृशं कुर्यात् ॥ २५२ ॥

एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः ॥
पूर्वभुक्त्या च सततमुदकस्यागमेन च ॥ २५३ ॥

उभयोर्ग्रामयोः शून्यत्वे लिङ्गैर्निर्णयः । वसतः पूर्वभुक्त्या सततमविच्छिन्नयाऽस्मर्यमाणावधिकया न हि त्रिपुरुषभोगेन स ह्यत्र प्रतिषिद्धप्रामाण्य "आधिः सीमा" इत्यत्र संभवति हि तत्रोपेक्षा बहुसाधारण्यात्सीमायाः । यत्तु तत्र सीमशब्दं पठन्ति तेषां भुक्तेः सिद्धमेव प्रामाण्यम् । लिङ्गानां प्रामाण्यस्योक्तत्वात्प्रमाणान्तरनिवृत्तिराशङ्क्यतेति पुनरुच्यते । कोऽयमुदकागमः प्रामाण्येनोच्यते । यथाऽन्यानि लिङ्गानि नवसंनिवेशे क्रियन्ते तद्वदेवोदकप्रवाहोऽपि कर्तव्यः । अथवा ययोर्ग्रामयोः प्रदेशान्तरे स एवोदकागमो विभागहेतुः प्रदेशान्तरे च विप्रतिपत्तिस्तत्र स एव प्रमाणम् । अथवा महाग्रामविषयमेतत् । नद्या अपर एको वा वार एकग्रामस्तत्र न पारवारिणो वक्तव्यं 'अस्मदीया भूमिरत्रापि विद्यत' इति । यदि नामान्यतरशून्यत्वादतिक्रम्य न दातुस्तमपि तथापि न भोगः प्रमाणं विभागः हेतुः स्वल्पेऽपहारे ॥ २५३ ॥

१ णर-अग्निदग्धिदग्ध । २ फ-गृहकादीनि । ३ णर-ने । ४ णर-सीमाया अप्रकाशानि । ५ फ-शर्करा हि गुल्मादि । ६ णर-उपमा । ७ फ-सादादपन्नमिव । ८ फ-शून्यात्तल्लिङ्गै । ९ णर-वसातः । १० णर-न पठन्ति । ११ णर-संभवति । यदि वा कुतश्चिद्ग्रामात्तादृशेन प्रवाहेण छित्वाऽपि काचिद्भूः तथापि स एव विभागहेतुः स्वल्पेऽपहारे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि संशय एव स्याल्लिङ्गानामपि दर्शने ॥
साक्षिप्रत्यय एव स्यात्सीमावादविनिश्चयः ॥ २५४ ॥

कथं पुनर्लिङ्गेषु सत्सु संशयः । यानि तावत्प्रच्छन्नानि तानि यदि केनचित्कथंचिद्गम्य प्रच्छन्नमन्यत्र नीयेरन्नैवं निश्चयः स्यात् । येऽपि प्रकाश्या न्यग्रोधादयस्तेऽपि न सीमायामेवं रोहन्त्यन्यत्रापि जायन्ते ततः संदेह आभासत्वात् । यत्र पुनरियं संभावना नास्ति तत्र प्रमाणमेव लिङ्गानि । **साक्षिप्रत्ययः** साक्षिहेतुकः । साक्षिणः प्रत्ययो यत्रेति । **विनिश्चयः**तत्त्वाधिगमः संशयितलिङ्गे अलिङ्गे वा **सीमाविवादे** साक्षिहेतुको निर्णय इति तात्पर्यम् ॥ २५४ ॥

ग्रामेयककुलानां च समक्षं सीम्नि साक्षिणः ॥
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥ २५५ ॥

यद्यप्यसंख्यातपुरुषको ग्रामस्तथापि द्वौ विवादिनौ द्वयोर्ग्रामयोर्भक्तस्तयोः समक्षमन्येषां च **ग्रामेयककुलानां च** ग्रामीणपुरुषसमूहानां **समक्षं सीम्नि साक्षिणः प्रष्टव्याः** । साक्षिप्रश्नकाले सर्वैर्ग्रामीणैर्दत्तव्यवहारकैरपि संनिहितैर्भवितव्यं नार्थिप्रत्यर्थिनोरन्यतरो वक्तुं लभते । एवं विसृष्टार्थे विवादे किमेते संनिधीयन्ते । अथवा येऽन्ये सामन्तेभ्यो ग्रामेभ्यः केचिद्वृद्धतमाः साक्ष्ये समुद्दिष्टास्तद्ग्रामीणैरन्यैः संनिहितैर्भवितव्यं । यतस्तैर्वृद्धेभ्यः श्रुतं भवति तत्समक्षं पृच्छ्यमाना न विपर्यन्ति वृद्धाः । **सीमालिङ्गानि** यत्र लिङ्गान्युभयथा तत्र वृद्धेभ्यस्तानि निश्चित्य सीम्नि निश्चयः । असत्सु लिङ्गेषु सीम्न्येव साक्ष्यं पृच्छते काऽत्र सीमेति ॥ २५५ ॥

ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम् ॥
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥ २५६ ॥

ते साक्षिणो यथा यादृशं **निश्चयं ब्रूयुः समस्ताः** सर्व एव । न पुनर्वाक्यभेदोक्तौ न्यायः "द्वैधे च बहूनामिति" । **निबध्नीयात्** पत्रके लिखेत् । तत्र साक्षिणश्च नामविभागे साक्षिमात्रेण ॥ २५६ ॥

शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः ॥
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समंजसम् ॥ २५७ ॥

मूर्ध्नोर्वीं पृथ्वीं मृल्लोष्टकान्गृहीत्वा साक्षिणः **स्रग्विणो** यथासंभवं माल्यधरा रक्तवर्णकुसुमधरा **रक्तवाससो** लोहिताच्छादनाः यद्यपि शुक्लस्य वर्णान्तरापादनेऽपि रञ्जिर्वर्तते भूयांस्तु लोहिते प्रयोगो रक्तो गौर्लोहित इति । भयसंजननार्थं चैतत् लोहित-

---

१ फ-र्णयः । २ फ-अत्रैव । ३ ण-र-+न । ४ फ-श्य । ५ फ-मी । ६ ण-र-तु । ७ फ-एकैरपि । ८ण-र-आवानां सृष्टार्थौ विवादे किमेते संनिधीयन्से । ९ण-र-सामन्ते । १० ण-र-वरा । ११ फ-भजननार्थं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाससश्च सशूकां भवन्ति । 'यदस्माकं सुकृतं किंचिदर्जितमस्ति तन्निष्फलमस्त्विति' वाच्यं ते । **स्वैः स्वैरिति** वीप्सया विशेषनामभिः सुकृतं कथयेयुः । तत्कस्यादानं तीर्थस्नानं चेत्यादि । **समंजसं** क्रियाविशेषणम् । सत्यादनपेतऋजुर्धार्मिको यो मार्गस्तेन नयेयुः । समंजसमृजु स्पष्टमित्येकोऽर्थः । सत्यव्यवहारश्च स्पष्ट इत्युक्तं समंजसमिति ॥ २५७ ॥

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ॥
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् ॥ २५८ ॥

प्रमाणान्तरलिङ्गेभ्योऽन्यथासंभवभ्द्यः प्रत्ययितरपुरुषेभ्यो मिथ्यात्वे वेद्यते । प्रत्येकं द्विशतो दण्डः । एकैकस्य साक्षित्वात्साक्षिणां च दण्डत्यत्वात् न हि व्यासेज्ज वदन्ति साक्ष्यं । सत्यप्रधानाः साक्षिणः **सत्यसाक्षिणः पूयन्ते** अनृताभिधानेन पापेन न संबध्यन्त इति । **यथोक्तेन** यार्थातथ्येन । न हि शब्दात्मकस्य वचनस्यात्रावसरः । प्रमाणान्तरसंवादमात्रमनेन लक्ष्यते । अथवा यथाशास्त्रमुक्तेन सत्येनेति यावत् । शास्त्रे हि सत्यं वक्तव्यमित्येवमुक्तमतो यथोक्तेन सत्येनेत्युक्तं भवति ॥ २५८ ॥

साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः ॥
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ ॥ २५९ ॥

ग्रामसामन्ताः **सीमान्तरवासिनः** प्रष्टव्याः । तेषां वचने निश्चयं कुर्यात् । **प्रयता** साक्षिधर्मेण नान्तरेण । **राजसंनिधाविति** श्लोकपूरणम् । न तु सामन्ताः स्वेच्छया राजवन्निश्चिन्वन्ति ॥ २५९ ॥

सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम् ॥
इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् ॥ २६० ॥

सामन्तानां मौलानामिति विशेषणविशेष्यभावः स्तुत्यर्थः । ग्रामप्रतिष्ठा न तत्काले भवा उत्पत्तिसहभुवो **मौला** उच्यन्ते । ते च सामन्ता नित्याः । नित्यसंनिहितत्वात्तेषामप्यभावः कथंचिदुच्छन्नत्वात्तदा सा गतिः । तदेमानपि वक्ष्यमाणान् पृच्छेत् । अथवा मौला अनुभाविनः । सामन्ता व्याख्याताः । व्यवहर्तव्याः । मौलानां पूर्वोक्तानां अभावे सामन्ताः प्रमाणम् । तदभावे **वनगोचरान्विनियुञ्जीत** निपुणतः पृच्छेत् ॥ २६० ॥

व्याधांछाकुनिकान्गोपान्कैवर्तान्मूलखानकान् ॥
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः ॥ २६१ ॥

एते हि ग्रामवासिनस्तत्र वनानि च भ्राम्यन्ति । ग्राममध्ये न गच्छन्तः कदाचित्तद्वृत्तं विद्युस्ते हि तेन पथा गच्छन्तो विवादास्पदं प्रदेशं पूर्वं कांश्चित्पुरुषान्कृषतो दृष्ट्वा

१ ण-र-शूका । २ फ-लिप्सया । ३ फ-युक्तं न । ४ फ-त्र । ५ण-र-व्यासह्य । ६फ-साक्षात् । ७ ण-र-धानात् । ८ ण-र-यथातत्वेन । ९ ण-र-अपि । १० ण-र-सामान्ता । ११ फ-तदास्तमेति । १२ फ-सद्भावे । १३ ण-र-शकुनिकान् । १४ ण-र-शतशास्तथा । १५ ण-र-कृशतो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृच्छेयुः । कोऽयं ग्रामो यो भवद्भिः कृष्यत इति । एवमादिना संभवति पूर्वानुभवः । **व्याधा** मृगया जीविनः । तेषामपि वनाद्भ्रष्टमृगमनुधावतां भवति ग्रामसंबन्धः । एवं **शाकुनिकाः** शकुनिबन्धजीविनः । तदन्वेषणे ये सर्वान्ग्रामानागोचरयन्ति । **गोपा** गवां तृणविशेषज्ञानाय तत्र तत्र परिभ्राम्यन्ति । **कैवर्ता** दाशास्तडागखननादिजीविनस्तत्र तत्र गच्छन्ति कास्माकीनं कर्मोपयुज्यते । मूलं वृक्षादेः खनयन्ति स्थूलकाशादेः । **व्यालग्राहाः** सर्पग्राहिणः जीविकार्थं तेऽपि सर्पास्तं तं प्रदेशमन्विच्छन्त्यतः तेषामपि पारिग्रामिकैर्बहुभिः संबन्धः । **उञ्छवृत्तयोऽपि** दरिद्रा अनेकग्रामपर्यटनेन यात्रामात्रं निर्वर्तयन्ति **अन्यांश्च** फलकुसुमेन्धनार्थिनः ॥ २६१ ॥

ते पृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणम् ॥
तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः ॥ २६२ ॥

ते धर्मेण पृष्टा इति योजना । सीमाश्च ताः सन्धयश्च **सीमासन्धयः** । ग्रामद्वयसंयोगः सन्धिः । स च सीमैव । **लक्षणम्** ज्ञापकम् ॥ २६२ ॥

क्षेत्रकूपतडागानामारामस्य गृहस्य च ॥
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः ॥ २६३ ॥

आराम उद्यानभूमिः शाकवाटश्च सामन्तप्रमाणकस्तेस्वनिश्चयः । व्याधादिनिवृत्त्यर्थमिदमुच्यते । **सीमासेतुः** सीमाबन्धः । सीमाविभावनार्थं य आबध्यते स्थाप्यते ॥ २६३ ॥

सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम् ॥
सर्वे पृथक्पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥ २६४ ॥

पूर्वेभ्यः **सामन्तानामधिको** दण्डः । **पृथक्पृथगित्यनुवादः** । उक्तत्वान्न्यायस्य क्षेत्रादिप्रातिवेश्या अवश्यं ज्ञातारो भवन्ति । प्रत्यासोत्तरतः (?) एषां दण्डमहत्त्वं । सामन्तानां तु परकीयसीमावेदनं नावश्यमिति द्विशतो दमोऽनुवर्त्यः । तेन ग्रामसीमायां द्रष्टृणां सामन्तानां च द्विशतः । ये तु सामन्तशब्दमाश्रित्य ग्रामक्षेत्रादिसीमयोः सामन्तत्वात्तुल्यदण्डत्वमाहुस्ते न्यायविरोधादुपेक्षणीयाः ॥ २६४ ॥

गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ॥
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः ॥ २६५ ॥

क्षेत्रादिप्रसङ्गादिदमुच्यते सीमाग्रहणनिमित्तोपलक्षणार्थम् । अस्यैवैतन्निश्चितमित्येवं जानतो हरतः पञ्चशतो दण्डः । मध्यमसाहसे प्रकृते पञ्चशतग्रहणं निमित्तभेदे न्यूनाधिक-

---

१ ण-र-मत्र । २ ण-र-शकुनी । ३ ण-र-णाय सर्वानुग्रामाना- । ४ फ-गोपालां । ५ ण-र तृणादि । ६ ण-र-मार्जयन्ति । ७ ण-र-विनिश्चय । ८ फ-कत्व । ९ एवं मूले । १० ण-र-तेषां ग्रहणं हरणनिमित्तोप- ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दण्डार्थं पूर्वत्र वा संख्यानं विवक्षितं मन्यन्ते । तेन व्यवहारं लेखयामि राजनि दंडयामि चौरैर्दोषयामीति भयप्रदर्शनेन हरति तस्यां दण्डो निमित्तान्तरानुकल्पः ॥२६५॥

* **सीमायामविषह्यायां स्वयं राजैव धर्मवित् ॥**
प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः ॥ २६६ ॥

अविषह्या निश्चेतुमशक्या । लिङ्गसाक्ष्यभावात् । **राजैव** स्वेच्छया **भूमिं प्रदिशेद्दद्यात्** । इयं वो भूमिरियं व इति । **धर्मवित्**पक्षपातो नैव कस्यचित्कर्तव्य इति । एतदाह **उपकाराद्धेतोः** । यया सीमया द्वावपि ग्रामौ समोपकारौ भवतः तेन यदि न्यूनाऽपि कस्यचिद्भूमिः स्यात्क्षेत्रं चेत्सुगुणं बहूत्पत्तिकं तदपेक्षः प्रदेशः । ल्यब्लोपे पंचमी । उपकारमपेक्ष्य । अथवैकेषां प्रदिशेदपरेषामनिश्चितामपहरेत् । यदि विवादिग्रामम्भूतां सीमां यावद्भक्तुं न शक्नुयादितरे च शक्तास्तदन्येभ्यः प्रदिशेत् । एवमात्मनो बहूनां च ग्रामीणानामुपकृतं भवति ॥ २६६ ॥

एषोऽखिलेनाभिहितो धर्मः सीमाविनिर्णये ॥
अत ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयम् ॥ २६७ ॥

पूर्वोपसंहारोऽपरसंक्षेपोपन्यासः श्लोकार्थः । दण्डवाचिक इत्युक्त्वा क्रमभेदो लाघवाद्वाक्पारुष्यं स्यात्ततो दण्डव्यापारद्वन्द्वे चेतरेतरयोगाव्यस्तक्रमसमासार्थप्रतिपत्तेरेकैकस्योभयार्थाप्रतिपादनाद्दण्डशब्देन वागर्थोऽप्युपात्त इति कः क्रमभेदः । तथा च यथा यथासंख्यसूत्रारंभो महाभाष्यकारेण समर्थितः एतदेव दर्शनमाश्रित्य संज्ञासमासनिर्देशादिति ॥ २६७ ॥

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ॥
वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥ २६८ ॥

परुषवचनमाक्रोशः । स च बहुधा नृशंसाश्लीलभाषणं तेन भणितो योऽभिशापः अकरणहन्ता वृषलभूयाः । असतां दुःखोत्पादनं "कन्या ते गर्भिणीति" पातकोपपातकैर्योजनमिति । तत्र द्वयोर्ब्राह्मणक्रोशे क्षत्रियावैश्ययोरयं दण्डः । अन्यत्र "पतनीये कृते क्षेपे दण्डो मध्यमसाहसः" इत्यादि (या. व. व्य. २१०) स्मृत्यन्तरोक्तः । तस्यै वधताडने जिह्वाछेदनमारणादि सर्वं आक्रोशभेदा वेदितव्याः ॥ २६८ ॥

---

* [**ध्वजिनी मत्सिनी चैव निधानी भयवर्जिता ।**
राजशासननीता च सीमा पञ्चविधाः स्मृताः ॥ १ ॥]

१ फ-संख्यामेव । २ ण-र-ज-एकेषां । ३ ण-र-सङ्ख्या । ४ ण-र-दि । ५ ण-र-सगुणं । ६ ण-र-गुप्तोपवा । ७ ण-र-प्रदेशेत् । ८ फ-विवादिमत्तां । ९ ण-र-इतरेतरे । १० ण-र-रः । ११ ण-र-द्रमः कामः । १२ ण-र-पुरुष । १३ फ-मृ । १४ ण-र-भाषणात् । १५ ण-र-+प्रमयोः । १६ ण-र-शूद्रस्य च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ॥
वैश्ये स्यादर्धपञ्चाशच्छूद्रे द्वादशको दमः ॥ २६९ ॥

अभिशंसनं सर्वप्रकार आक्रोशः । पतनीयादन्यः । तत्र दण्डान्तरविधानात् । निमित्तसप्तमी चैषा । **वैश्य इति** दण्डविषयसप्तमी । ब्राह्मणस्याक्रोष्टुराक्रुश्यमानस्य च दण्ड उक्तः । क्षत्रियादीनां त्वितरेतरं स्मृत्यन्तरमन्वेषणीयम् । तथा च **गौतमः** (अ.१२सू.११.) " ब्राह्मणराजन्यवत् क्षत्रियवैश्यौ " । परस्पराक्रोशे क्षत्रियश्चेद्वैश्यमाक्रोशेत्पञ्चाशतं दण्ड्यः । वैश्यः क्षत्रियं शतम् । एवं क्षत्रियः शूद्रमाक्रोशेत्पञ्चविंशतिर्दण्ड्यः । वैश्यः पञ्चाशतम् । शूद्रस्य तु तदाक्रोशे गुणापेक्षिको दण्डो वक्ष्यते ॥ २६९ ॥

*** समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ॥**
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥ २७० ॥

द्विजातिग्रहणमत्र **समवर्णे द्वादश** व्यतिक्रमे परस्पराक्रोशे **दण्डः** । स च जातिवित्तबन्धुवयःकर्मविद्याभिर्विशेषानुपदेशात् । तत्र समानजातीये वित्ताधिके द्विगुणं तस्मिन्नेव बन्धुत्वाधिके त्रिगुणं यावत्सर्वगुणानिर्गुणस्य षड्गुणं । **वादा** आक्रोशा **अवचनीया** अत्यन्तनृशंसा मातृभगिनीभार्यादिगताः । **तदेव द्विगुणं** दंडपरिमाणम् । नपुंसकलिङ्गात्सर्वशेषोऽयं न समवर्णविषय एव । अथवा **तदेव** शतमिमिति योजना । लिङ्गसामर्थ्याच्छतस्य च प्रथमश्लोके श्रुतत्वात् । अतोऽवचनीयेषु समवर्णेष्वपि द्विशतो दमः । लिङ्गोपपत्त्यर्थं परिमाणपदमश्रुतमध्याहर्तव्यम् । शते तु व्यवहितकल्पना ज्यायसी ॥ २७० ॥

एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् ॥
जिव्हायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥ २७१ ॥

एकजातिः शूद्रः । स त्रैवर्णिकान्क्षिपन्नाक्रोशन् **दारुणया** पातकादियोगिन्या **वाचा** नृशंसादिरूपया जिव्हाछेदं लभते । **जघन्यप्रभव** इति पादाभ्यां ब्राह्मण उत्पन्न इति हेत्वभिधानं प्रतिलोमानामपि ग्रहणार्थम् । तेऽपि जघन्यप्रभवा एव " नास्ति पञ्चम " इति वर्णान्तरनिषेधात् ॥ २७१ ॥

***[विप्रक्षत्रियवत्कार्यो दण्डो राजन्यवैश्ययोः । वैश्यक्षत्रिययोः शूद्रे विप्रे यः क्षत्रशूद्रयोः॥१ समुत्कर्षापकर्षास्तु विप्रदण्डस्य कल्पना । राजन्यवैश्यशूद्राणां धनवर्जमिति स्थितिः॥ २]**

१ **ण-र-ज**-विप्रः पंचाशतं दंडः । २ **ण र**-वैश्यः । ३ **फ**-सूत्रे । ४ **ण-र**-विषयसप्तमी । ५ **ण-र**-साम्यं च । ६ **फ**-चित्त । ७ **ण-र**-नप । ८ **ण-र**-नपुंसकलिङ्गत्वाच लिङ्गम् ।

For Private And Personal Use Only

नामजातिग्रहं[1] त्वेषामभिद्रोहेण कुर्वतः ॥
निक्षेप्यो[2]ऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥ २७२ ॥

अभिद्रोह आक्रोशः । कुत्साबुद्धिर्ब्राह्मणक त्वं मा मया स्पाक्षीः[3] एवमन्यदपि योज्यम्। ग्रहणं **ग्रहः** । निरुपपदं नाम गृह्णाति कुत्साप्रत्यययोगेन वा । 'देवदत्तकेति' । **अभिद्रोहेण** क्रोधेनाभिद्रोहः क्रोधः । गर्भः क्षेपः । न प्रणयेन । **निःक्षेप्यः[4]** प्रक्षेप्यः[5] । **शङ्कुः** कीलकः । **ज्वलन्न**ग्निना दीप्यमानो**ऽयोमयो** लोहमयः ॥ २७२ ॥

धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः ॥
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥ २७३ ॥

अयं[6] ते स्वधर्म इयं वाऽत्रेतिकर्तव्यता। मैवं कार्षीः। छांदसोऽसीत्येवमादिव्याकरणलेशज्ञानतया दुन्दुकत्वेन दर्पवन्तः शूद्रा उपदिशन्ति। तेषामेष दण्डः । यस्तु प्रणयात् ब्राह्मणापाश्रयादेव व्युत्पन्नो विस्मृतं कथंचिद्देश[7]कालविभागं स्मारयेत्पूर्वाह्ण[8]कालं नातिक्रामयति क्रियतां दैवं कर्म देवांस्तर्पयोपवीती भव मा प्राचीनावीतं कार्षीरिति न दोषः । तप्तमग्निसंबन्धात्पीडाकरम् । **आसेचयेत्**क्षारयेत् । युक्तं **वक्त्रे** मुखेनोपदेशकत्वात् । **श्रोत्रस्य** कोऽपराधः । प्रागसत्तर्कादिश्रवणम्[9] ॥ २७३ ॥

श्रुतं देशं च जातिं च कर्म शारीरमेव च ॥
वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमम् ॥ २७४ ॥

सत्येन[10] श्रुतेनैतदनेन सम्यक् श्रुतं इत्याह। श्रुतमेव वाक्षिपति । नैतत्संस्कारकं यदनेन श्रुतमिति । ब्रह्मा[11]वर्तीयमभिजनी[12]भिमानिनं वाह्लीकोऽयमित्याह । एवं नाति[13]ब्राह्मणं क्षत्रियोऽयमित्याह क्षत्रियं वा बान्धवतया ब्राह्मण इति। **कर्म** स्नातक इति। शरीरावयवः **शारीरे**ऽव्यङ्गं दुश्चर्मेति । **वितथेन** वितथमनृतं । 'प्रकृत्यादिभ्य' इति तृतीया । अथवाऽयं धर्मो वैतथ्यं तस्य वाच्यं प्रति कारणता युक्तैव । स्वगुणमदात्परावज्ञानं **दर्पः** । अज्ञानात्परिहासतो वा न दोषः । कस्य पुनरयं दण्डः । सर्वेषामिति ब्रूमः । शूद्राधिकाराच्छूद्रस्यैवेति परे । द्विजातिविषये वैतथ्ये ॥ २७४ ॥

काणं वाऽप्यथ वा खञ्जमन्यं वाऽपि तथाविधम् ॥
तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरम् ॥ २७५ ॥

एकेनाक्ष्णा विकलः **काणः**। **खञ्जः** पादविकलः । **तथाविधं** कुणिं[14] विटपं **तथ्येन** नासत्येनापि शब्दाद्वितथेन अकाणे काणे च काण इत्युक्ते **कार्षापणावरो** दण्डः ।

---

१ ण–र–ग्रहे । २ ण–र–निक्षेयो । ३ ण–र–द्विष्याः । ४ ण–र–खेयः । ५ ण–र–प्रक्षेप्तव्यः । ६ फ–अथ । ७ ण–र–दिकाल । ८ ण–र–पूर्वाह्णकाल । ९ ण–र–असंतकादिश्रवणम् । १०–ण–र–व । ११ ण–र–ण–शावर्त्तीयं । १२ ण–र–जगानि । १३ फ–जात्य । १४ ण–र–कुणि विपिट ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्यन्ताल्पो यदि दण्डः कथंचिदनुग्राह्यतया तदा कार्षापणोऽवरो दण्डः । अन्यथा द्वौ त्रयः पञ्च वा पुरुषविशेषापेक्षयाऽपि दण्ड्यः । शूद्रः सर्वे वा पूर्ववत् ॥ २७५ ॥

मातरं पितरं जायां भ्रातरं तनयं गुरुम् ॥
आक्षारयञ्छतं दाप्यः पन्थानं चाददद्गुरोः ॥ २७६ ॥

आक्षारणं भेदनं द्वेषजननमनृतेन । 'एषा ते माता न स्नेहवती द्वितीये पुत्रेऽत्यन्ततृष्णावती कनकमयमङ्गुलीयकं रहसि तस्मै दत्तवती' इत्येवमाद्युक्त्वा भेदयति । एवं पितापुत्रौ जायापती भ्रातॄन् गुरुशिष्यौ । **तनयग्रहणं** द्वितीयसंबन्धिप्रदर्शनार्थम् । अन्यथा मातरमित्युक्ते मातरं पुत्राद्भिन्दतो दण्डः स्यान्न पुत्रं मातुः । यद्यपि भेदनमुभयाधिष्ठानं तथापि यन्मुखेन क्रियते स एव भेदयितव्य इति व्यवहारः । तत्रासति तनयग्रहणे प्रदर्शनार्थे यदैवमातरमाह 'नैष ते पुत्रोऽभक्तो दुःशीलश्च' इत्येवमादिना मातरमाक्षारयति तत्रैव स्यान्न पुत्रं यथा दर्शितम् । अन्ये तु चित्तकदर्थनोत्पादनमाक्षारणमाहुः । प्रवक्ष्यामि धनं श्रुतं वाऽर्जयितुं तीर्थान्युपसेवितुं तत्प्रवासशङ्कया च मानसी तृष्णया पीडा भवतीति तथा न कर्तव्यम् । यावद्गुरवस्ते जीवेयुस्तावन्नान्यं समाचरेन्न तैरननुज्ञात इति च । यत्तु विद्वेषणादिना चित्ते खेदोत्पादनं तत्र शतं न मुच्यते प्रतिरोद्धा गुरोरिति महत्वाद्दोषस्य । जायाया अनुकूलायाः पुत्रवत्याः करोत्यन्यं विवाहमित्येतदाक्षारणम् । एवं गुणवतः पुत्रस्याकारणेऽन्यकरणं गुरोः सर्वप्रकारं पन्थानमत्यजतः शतं दण्डः ॥ २७६ ॥

ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता ॥
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः ॥ २७७ ॥

ब्राह्मणक्षत्रियाभ्यां परस्पराक्रोशे कृते तयोरयं दण्ड इत्येवमध्याहारेण योजना । तादर्थ्ये चतुर्थी वा । तद्विनयाय दण्डः कर्तव्यः । पातकस्याक्रोशे कृते अयं दण्डो दुःखोत्पादनरूपे ॥ २७७ ॥

*** विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः ॥**
छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः ॥ २७८ ॥

एवमेव प्रथममध्यमौ साहसावित्यतिदिश्यते । तेनैव क्रमेण वैश्यस्य शूद्राक्रोशे प्रथमः । शूद्रस्य वैश्याक्रोशे मध्यमः । **छेदवर्जं दण्डस्य प्रणयनमिति** । एकजातिर्द्विजातिमित्यनेन जिह्वाछेदं प्राप्तं निवर्तयति । **स्वजातिं प्रतीति** । नैवं मन्तव्यं समानजातीयप्रतीति[10] । किं तर्हि याऽत्र जातिरुपात्ता वैश्यशूद्राविति स्वग्रहणश्लोकाभिप्रायं

१ फ–+युक्ते । २ ण–र–कथंहरेत्सो तस्मै । ३ ण–र–मभया । ४ ण–र–चित्रकथितोत्पादनमाक्षारणमाहु । ५ ण–र–शतं । ६ फ–न्यु । ७ फ–भवति । ८ फ–शतान्न । ९ ण–र–ने । १० फ–प्रतीति ।

* [पतितं पतितेत्युक्त्वा चोरं चौरेति वा पुनः । वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत १)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परस्पराक्रोशे यावत् । स्वजातिमिति पूर्वत्रापि संबन्धनीयं । **प्रणयनम्** प्रवर्तनम् । क्षत्रियस्य वैश्यशूद्राक्षारणे प्रथमार्द्धसाहसः । एवं ब्राह्मणस्य वैश्यशूद्रयोः कल्पः[1] ॥ २७८ ॥

एष दण्डविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः ॥
अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥ २७९ ॥

दण्डपारुष्यं दण्डेन दुःखोत्पादनं यथा कण्टकादे[2]ः पुरुषस्य स्पर्शः पीडाकर एवं पीडाकरत्वसामान्यात्पारुष्यशब्दप्रयोगः । तत्र निर्णयो दण्डविशेषनिर्णयः । पूर्वप्रकरणोपसंहारोपन्यासार्थः श्लोकः ॥ २७९ ॥

येनकेनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः ॥
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥ २८० ॥

अन्त्यजः शूद्रश्चण्डालपर्यन्तः । **श्रेष्ठः** त्रैवर्णिकः । तं **चेद्धिंस्यादङ्गेन केनचित्** साक्षाद्दण्डखड्गादिप्रहरणव्यवधानेन वा **तदङ्गस्य** छेत्तव्यम् । हिंसा च[3] क्रोधेन प्रहरणं ताडनेच्छया[4] हस्ताद्युद्यम्य वेगेन निपातनं मारणमेव । **तत्तदिति** वीप्सा । अङ्गमिति छेत्तव्यमिति चैकत्वविवक्षायोविज्ञापितेनानेकेनाङ्गेन प्रहरणेऽनेकस्यैव छेदः । **अनुशासन**मुपदेशोपनुक्तैषा मर्यादा । अनुशासनग्रहणं कारुणिकस्य राज्ञः प्रवृत्त्यर्थः ॥ २८० ॥

पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ॥
पादेन प्रहरन्कोपात्पादच्छेदनमर्हति[6] ॥ २८१ ॥

उद्यम्योत्क्षिप्यैवं[7] कोपात्ताडनेच्छोर्स्तदङ्गमनिपातयतोऽस्य पाणिः छेत्तव्यः[8] । दण्डग्रहणं समानपीडाकरस्य हिंसासाधनस्योपलक्षणार्थम् । तेन मृदुशफादावन्यो[9] दण्डः । **पादेन प्रहरन्निति** । अत्राप्युद्यम्येत्यपेक्षितव्यम् । अवगुरतोऽप्येष एव ॥ २८१ ॥

सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ॥
कट्यां कृताङ्को निर्वास्यः स्फिचं वाऽस्यावकर्तयेत् ॥ २८२ ॥

उत्कृष्टो ब्राह्मणो जातितो दौःशील्यादवकृष्टोऽपीतरे वर्णा औत्तराधर्येण परस्परापेक्षयोत्कृष्टाश्चा[10]वकृष्टाश्च[11] तत्रे[12]हावकृष्टज इति जनि[13]र्ना जन्म चोत्कर्ष उपात्तं[14] तत्संनिधानादुत्कर्षोऽपि जन्मनैव । जन्मना च निरपेक्षोत्कर्षो ब्राह्मणस्य नापकर्षः[15] । तेन शूद्रस्यायं ब्राह्मणेन सहैकमासनमारूढवतो दण्डः । **कटिः** श्रोणी । तत्र **कृताचिह्नः** । अङ्कविधौ च सुधाकुम्कुमादिना चिह्नकरणमात्रमपि[16] । अयं तु दण्डः ख्यापनार्थः । अतिक्रमाद्विभियुरिति ।

१ ण–र–कल्प्यं । २ ण–र–दः । ३ फ–श । ४ फ–ताडनमिच्छया । ५ फ–ति । ६ ण–र–आप्नुयात् । ७ फ–च । ८ ण–र–ताडनेच्छुस्तदंगमनिपातयंस्त्याजयितव्यः । ९ ण–र–शिफादौ । १० ण–र–त्र । ११ फ–स्या । १२ फ–त्रा । १३ ण–र–वा । १४ ण–र–उपात्तः । १५ ण–र–ब्राह्मणस्य शूद्रस्यवावकर्षः । १६ ण–र–मात्रपितु दंडख्यापनार्थे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेन देशान्तरे यदनपायि तच्चिन्हमायसो लेखनादुपदिश्यत । तथा च वक्ष्यति "उद्वेजनकरे दण्डे चिन्हयित्वेति" । राष्ट्राच्च निष्कास्यः । **स्फिक्** श्रोण्येकदेशः । सव्यो दक्षिणश्च । तं **चावकर्तयेत्** चिन्हेन । विकल्पविधानात्तावन्मात्रच्छेदो न सर्वस्य स्फिजः । अभिप्रेप्सुरिति च नेच्छामात्रेण । किंतर्हि । प्राप्तवत एव । इच्छाया शक्यापह्नवत्वाद्दण्डस्य च महत्त्वात् ॥ २८२ ॥

अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ॥
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम् ॥ २८३ ॥

मूत्रेणावसिंचतोऽभिमुखं वा तदवमानार्थं क्षिपतोऽसत्यपि संस्पर्शेऽवमानयते मूत्रेणेति । निष्कर्तव्यः समानफलत्वादेतस्यापि दण्डोऽयं । निष्ठीवनं नासिकास्यश्रावस्य घ्राणेन क्षेपे नासापुटच्छेदः "येनाङ्गेने"त्युक्तत्वात् । शर्धनं कुत्सितो गुदशब्दः । दर्पान्न प्रमादात् ॥ २८३ ॥

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ॥
पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च ॥ २८४ ॥

दर्पादित्यनुवर्तते । परिभवबुध्या केशेषु ब्राह्मणं **गृह्णतः** शूद्रस्य **हस्तौ छेदयेत्** । द्विवचनमेकेनापि द्वाभ्यां तुल्यपीडाकर उभयच्छेदो नैकस्यैव । **दाढिका** श्मश्रु । अन्यदपि यदङ्गं गृह्यमाणं ग्रीवादितुल्यपीडाकरं तत्र सर्वथाप्ययमेव दण्डः । **अविचारयन्**पीडा कियत्यस्य गृहीतस्य संजाता महती स्वल्पा वेति । एतदनुबन्धश्लोकप्राप्तं विवरणं विचार्यते । ग्रहणमात्रे दण्डः ॥ २८४ ॥

त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः ॥
मांसभेत्ता तु षण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः ॥ २८५ ॥

द्विजातीनामयं परस्परापराधे शूद्रस्य तु शूद्रापराधे मन्यते यः केवलमेव त्वचं भिन्द्याद्विदारयेन्न लोहितं दर्शयेत्तस्य शतं दण्डः । तावदेव लोहितदर्शने । यद्यपि त्वग्भेदमन्तरेण न लोहितं दृश्यते तथाप्यधिकापराधादधिकदण्डे प्राप्ते शतवचननियमार्थं । अन्ये तु कर्णनासिकादेरपि स्रवति शोणितं बहिस्त्वग्भेदेऽपि तदर्थमुच्यत इत्याहुस्तदयुक्तं । अन्तर्भेदे हि महत्त्वान्महादण्डो युक्तस्तस्माद्यत्रैषत्स्रवति शोणितं तत्र शतं शिरोभेदे तु मांसवत् । निष्कशब्दः सुवर्णपरिमाणवाचीत्युक्तं । **प्रवास्यो**ऽस्थ्नां भेदकस्तत्प्रयोजक इति । घञन्तेन समासं कृत्वा तं करोतीति पठितव्यः । अस्थिभेदकादिति । प्रवासनमर्थशास्त्रप्रवृत्त्या मारणं ।

---

१ ण र-च । २ फ-ति । ३ ण-र-विचारणं निर्वार्यते । ४ ण-र-शूद्रापराधा उच्यंते । ५ ण-र-केवलमेव । ६ ण-र-दण्ड्यः । ७ ण-र-श्रोत्रियं । ८ ण-र-महत्तरापीडात् महादंडो युक्तः ।

८६-८७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्वासनं वा । दण्डविधौ ह्यर्थशास्त्रश्रवणं दृश्यते । तथाहि दशबन्धमिति बार्हस्पत्य औशनस्ये च प्रयोगः । निर्वासनं ब्राह्मणस्य नान्येषाम् ॥ २८५ ॥

वनस्पतीनां सर्वेषामुपभोगं यथा यथा ॥
तथा तथा दमः कार्यो हिंसायामिति धारणा ॥ २८६ ॥

वनस्पतिग्रहणं सर्वस्थावरप्रदर्शनार्थं । फलपुष्पपत्रच्छायादिना महोपभोग्यस्य वृक्षस्य हिंसायां विनाशमाह दण्ड उत्तमसाहसः । स मध्यमस्य मध्यमो निकृष्टस्य प्रथमस्तथा स्थानविशेषो द्रष्टव्यः । पत्रच्छेदः फलच्छेदः शाखाछेद इति । फलानामपि विशेषो महार्घता दुष्प्रापता । तथा स्थानविशेषोऽपि द्रष्टव्यः । सीम्नि चतुष्पथे तपोवन इति ॥२८६

मनुष्याणां पशूनां च दुःखाय प्रहृते सति ॥
यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा ॥ २८७ ॥

यदुक्तं त्वग्भेदक इति तस्य विशेषोऽयं । असति मनुष्यग्रहणे प्राणिमात्रहिंसाविषयत्वेऽस्य श्लोकस्य महापशूनां क्षुद्राणां च पशुपक्षिमृगाणां तुल्यदण्डता मा भूदिति तदर्थमिदं । **यथा यथा महद्दुःखमिति** । स्वल्पे भेदने शोणिते च प्राणिनां महत्त्वादल्पत्वं प्रहारस्य शतादूनोऽपि दण्डमर्हति । शतादभ्यधिकोऽपि । अन्ये तु महद्ग्रहणान्महति दुःखे दण्डवृद्ध्यर्थं नाल्पेऽपचयार्थं यथाश्रुतमेव । तत्र दुःखाय प्रहृते दुःखोत्पत्त्यर्थं प्रहारे प्रमादस्तु न वृद्धिः । " अनुबन्धं परिज्ञाय " इति अस्यैव श्लोकद्वयमुदाहरणं भङ्ग्या व्याख्येयम् ॥ २८७ ॥

अङ्गावपीडनायां च व्रणशोणितयोस्तथा ॥
समुत्थानव्ययं दाप्यः सर्वदण्डमथापि वा ॥ २८८ ॥

अङ्गानामवपीडना दृढरज्ज्वादिग्रहणसंबन्धिविश्लेषणादिना तत्र यावतां धनेन पथ्यभिषगौषधादिमूल्येन प्रत्यापत्तिमायाति तावदपीडितस्य दाप्यः । एवं प्राणशोणितयोरवपीडनानामिति समस्तमपि योज्यं । अथवा प्राणशोणितयोः समुत्थानव्ययं दाप्य इति संबन्धः सामर्थ्यादपचितयोरिति लभ्यते । **समुत्थानं** प्रकृत्यापत्तिः । प्राणो बलं । प्रहारेणास्वस्थस्य भोजनादृते कार्श्याद्युपपत्तौ बलमपचीयते । तत्राङ्गेऽनष्टे प्रत्यागते च यावद्बललाभस्तावत्तदुपयोगे यत्किंचिद्वृत्तं तैलादि दापनीयः । एवं शोणिताद्युत्पत्तौ तद्दुर्बलीभूतस्य व्याध्यन्तरं वा प्राप्तस्याप्रकृतशरीरावस्थाप्राप्तेः समुत्थानव्ययं दाप्यः । न चेत्तद्गृह्णाति तदा तच्च दण्डं च परिपिण्ड्य सर्वं राज्ञे दद्यात् ॥ २८८ ॥

१ फ–दशवस्त्रसंवयामिति । २ ण–र–महोपभोगवृक्षादेः । ३ फ–दुणात् । ४ फ–अनुबन्धः परिज्ञायते तस्यैव । ५ ण–र–संखशया । ६ ण–र–निदढ । ७ फ–याचितधने । ८ ण–र–भि । ९ ण–र–दातव्यः । १० ण–र– दाप्यते । ११ फ–सामर्थ्यापचितयो–। १२ ण–र–व्रततैलादिः । १३ ण–र–प्राप्तः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा ॥
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम् ॥ २८९ ॥

द्रव्याणि गृहोपकरणान्यन्यानि वाऽनुक्तदण्डविशेषाणि शूर्पोलूखलघटस्थालीपिठरादीनि तेषां हिंसा प्राग्रूपनाशः । सत्यपि कार्यक्षमत्वे **ज्ञानतोऽज्ञानत इति** प्रमादकृते बुद्धिपूर्वे चाविशेषेणाहिंसता तस्य द्रव्यस्वामिनो जनयेत्परितोषं तद्रूपान्यदानेन मूल्येन प्रणयेन वा । **राज्ञे** तु द्रव्यमूल्यं द्रव्यं वा **दद्यात्** । अस्य कचिदपवादः ॥ २८९ ॥

चर्मचार्मिकभाण्डेषु काष्ठलोष्ठमयेषु च ॥
मूल्यात्पञ्चगुणो दण्डः पुष्पमूलफलेषु च ॥ २९० ॥

चर्मचार्मिकयोर्द्वन्द्वं कृत्वा भाण्डपदेन विशेष्येण समासः । अथवा धार्मिकभाण्डयोर्विशेषणसमासं कृत्वा चर्मशब्देन द्वन्द्वः । चर्मविकाराश्चार्मिकाणि भाण्डानि कटिसूत्रवरत्रादीनि **चर्माण्यविकृतानि** गवादीनां । अथवा **चर्मभाण्डानि** केवलचर्ममयानि चर्मावनद्धानि चार्मिकाणि । **काष्ठमयभाण्डान्युलूखलमुसलफलकादीनि** । **लोष्ठो** मृद्विकारः पाषाणाकृतिः पिण्डीभूता मृत्तन्मयानि स्वल्पपाकाधानादीनि । तन्नाशने **मूल्यात्पञ्चगुणो दण्डस्तु**ष्ट्युत्पत्तिश्च स्वामिनः स्थितैव ॥ २९० ॥

यानस्य चैव यातुश्च यानस्वामिन एव च ॥
दशातिवर्तनान्याहुः शेषे दण्डो विधीयते ॥ २९१ ॥

सत्यामपि हिंसायां कचिद्दोषो नास्तीत्येतदनेन प्रकरणेन प्रदर्श्यते । **यानं** गन्त्र्यादि यदारुह्य यान्ति पन्थानं । तच्च गन्त्र्यादिबलीवर्दगर्दभमहिषादिवाह्यं । त एव वा गर्दभादयः पृष्ठारोह्या यानानि याता तदारूढः सारथ्यादिः । **यानस्वामी** यस्य तत्स्वयानं तत्रैषां चक्रवेगादिभी रथ्याकर्षणयुक्तैर्वाऽश्वादिभिः कस्यचिद्द्रव्यस्य नाशो वा मरणं तत्र पशुस्वामियानव्यतिक्रमन्याये प्राप्ते कदाचिद्यातुर्दोषः कदाचित्स्वामिनः कदाचिदुभयोः कदाचिन्न कस्यचिदपीति यो विशेषस्तत्र नोक्त इहैवेष्यते स उच्यते । अतिक्रम्य हिंसादण्डं वर्तते । नात्र दण्डोऽस्ति । दण्डनिमित्तानि न भवन्तीति यावत् । **शेषे दण्ड** उक्तेभ्यो निमित्तेभ्यः । अन्यत्र तान्यपि वक्ष्यंते ॥ २९१ ॥

यत्र नास्ति दोषस्तानि तावदाह

छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते ॥
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥ २९२ ॥

---

१ फ–न्य । २ फ–मा । ३ ण–र–अहिंसिसिनां । ४ ण–र–राज्ञा । ५ ण–र–चार्मीक । ६ ण–र–विशेषेण । ७ ण–र–विशेष । ८ ण–र–नयानि । ९ ण–र–गम्यते । १० ण–र–पाल । ११ फ–वक्ष्यति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छेदने चैव यन्त्राणां योक्ररश्म्योस्तथैव च ॥
आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत् ॥ २९३ ॥

नासायां भवं **नास्यं** । शरीरावयवाद्यत् नासिकापुटसंयोगिनी बलीवर्दानां रज्जुरश्वानां खलीनं हस्तिनामङ्कुशस्तस्मिन् **छिन्ने** त्रुटिते **युगे** च **भग्ने** रथाङ्गकाष्ठं युगं । छिन्न नास्यमस्येति बहुव्रीहिणा रथ उच्यते । पशुर्वा । उभयोरपि साक्षात्पारंपर्येण संबन्धात् । **तिर्यक्प्रतिमुखागते** याने तिरश्चीनं वा प्रतीचीनं वा कथंचिद्भूवैषम्यात्पशुत्रासाद्वा यानं गच्छेत् कंचिदपराध्येन्न दुष्येत् । प्राजको हि संमुखीनाञ्छक्तो रक्षितुं तिर्यक् प्रत्यगवस्थितौ त्वदृश्यमानस्य कथं रक्षितुं प्रतिमुखागतं प्रत्यगावृत्तिः । अन्ये तु तिर्यगागते हिंस्यमाने ऋजुगामिन्येन यानेन दोषमाहुः । प्रतिमुखं चाभिमुखं मन्यन्ते । अभिमुखागतः किमिति चाक्रिणं दृष्ट्वा पन्थानं न ददाति । अक्षचक्रे रथाङ्गे प्रसिद्धे । **यन्त्राणि** चर्मबन्धनानि शकटकाष्ठानां । **योक्त्रं** पशुग्रीवाकाष्ठरश्मिः । प्रग्रहो हस्तवध्रियुग्यानां संचरणनियमनार्थः । **आक्रन्द** उच्चैः शब्दोऽपेहीत्यपसरेत्यर्थः । इतिकरणो भाषाप्रसिद्धतदर्थशब्दोच्चारणार्थो न त्वयमेव शब्दः प्रयोक्तव्यः । अविधेयेषु युग्येष्वपसरापसरेति क्रोशतः प्राजकस्य पथो नातिक्रामन्यदि हिंस्यान्न दोषः ॥ २९३ ॥

यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु ॥
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥ २९४ ॥

प्राजको यानसारथिस्तस्य **वैगुण्य** मशिक्षितत्वं न तु प्रमादः । प्रमादे हि शिक्षितस्य स्वामिनो न दोषः । तस्माद्धेतोर्यदि **युग्यं** सहसाऽपवर्तते स्पष्टं मार्गं हित्वा तिर्यक् पश्चाद्वा गच्छेद्द्रव्यं च किंचिन्नाशयेत्तत्र **स्वामी दण्ड्यः** । अशिक्षितः प्राजकः किमित्यारोपितः । " मनुष्यमारणे क्षिप्रम् " इत्यादिवक्ष्यमाणेन प्राणिभेदेन द्रव्यभेदेन च दण्डान्तरविधानाद्विशत इति विवक्षति । दण्डनिमित्तमेतदित्येतावतैव वाक्यस्यार्थतत्वादुत्तरत्र न कश्चिदन्योऽर्थः श्रूयते । येन वाक्यं तत्र संख्याविधायकमित्युच्यते ॥२९४॥

प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति ॥
युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम् ॥ २९५ ॥

स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा ॥
प्रमापयेत्प्राणभृतस्तत्र दण्डोऽविचारितः ॥ २९६ ॥

उक्तो हिंसायां दमः । तत्र विशेषं वक्तुमिदमाह । **स** प्राजकः **पथिसंरुद्धोऽ**ग्रजघनावसर्पिणा संरुद्धो निरुद्धगतिः पश्चात्स्थितेनासुशिक्षितत्वात्प्रमादाद्वा वेगेन धुर्याश्चोदिताः

१ ण-र-खलीनं । २ फ-यानाङ्गते । ३ फ-युग्मं । ४ अग्रे २९७ श्लो. ।

For Private And Personal Use Only

पुनः स्थिरयतश्चेन्निकटो रथस्तेन च तस्य वेगनिरोधे कृते यदि पुरो रथस्थावेगंपातात्पशुभी रथयुक्तैरश्वादिभिः रथेन रथावयवैर्वा प्राणिनो मनुष्यादीन्मारयेत् ततो दण्डस्य विचारो नास्ति । स्थित एव दण्डः । अथवा जवोत्पतिता अश्वाः पथि संरोधकसंमुखीनरथदर्शनेन बलाद्विधार्यमाणास्तिर्यग्गत्या गच्छेयुः पार्श्वकीयाः प्रत्यगवस्थितत्वात्तथा हन्युस्तत्र दण्डो विचारितो नास्ति प्राजके दोषाभावात् । अथवा पथितो न स्थितो वर्तमानः संरुद्धो न विध्रियमाणोऽथवा विचारितो विशेषेण विहितो विशेषित इति चेत् ॥ २९६ ॥

मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत् ॥
प्राणभृत्सुमहत्स्वर्धं गोगजोष्ट्रहयादिषु ॥ २९७ ॥

तादृशे प्राजके रथपशुभिर्मानुष्यश्चेन्मार्यते तदा **चौरवत्तस्य किल्बिषं** वा दण्डः । यद्यपि चौरस्य वधः सर्वस्वहरणादयो दण्डास्तथापीह धनदण्ड एव गृह्यते न वधः । **महत्स्वर्धमिति** तत्रैवार्धसंभवात् । स चोत्तमसाहसः । कैश्चिदभ्युपगतो यतश्च क्षते क्षुद्रकपशूनां तृतीयस्थानप्राप्तानां द्विशतो दमोऽतः प्रथमस्थानां मुख्यानामुत्तमो युक्त इति । **प्राणभृतः** प्राणवन्तो मनुष्यतिर्यक्पक्ष्यादयः । **महत्सु** महत्त्वं गवां प्रभावतो हस्त्यादीनां प्रमाणतः । आदिग्रहणाद्गर्दभाश्वतरव्याघ्रादयश्च कथंचित्परिगृह्यन्ते । वयं तु ब्रूमः 'सहस्रम्' इत्येवमवक्ष्यत् । यद्यन्ये चौरवद्दण्डानामभिप्रेता अभविष्यन् तस्मादर्धग्रहणाद्विधा मा भूद्धनदण्डास्तु सर्वस्वहरणादयः सर्वे चौरोक्ताः पुरुषापेक्षयातिदिश्यन्ते । ननु च मनुष्यमारणे कस्य चौरदण्डः स्यादिति व्यतिदेशो युक्तः । स प्रतिपदं मनुष्यहननेन विहितः । स च पुरुषाणां कुलीनानामिति वध एव । तत्र किमिति वाक्यान्तरगतार्धशब्दानुरोधिनैव व्याख्यायते । वरमर्धस्यैव गुणतः कदाचिद्वृत्तिराश्रीयतां । सत्यं यद्धर्मशब्दो मारणेन संबध्यमानोऽन्यथोपपद्यते न च चौरवदित्यस्यानुषङ्गागतस्यार्थान्तरवृत्तिः पूर्वापरवाक्ययोः शक्या ॥ २९७ ॥

क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः ॥
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥ २९८ ॥

अपंठितपरिमाणाः **क्षुद्रकाः** । ते च केचिद्वयसः वत्सकिशोरककलभादयः । केचिज्जातिस्वभावतोऽजैडकादयः । तत्राजाविकानां पञ्च माषान्वक्ष्यति । परिशेषाणां गवादीनामेवायं दण्डोऽल्पपरिमाणानाम् । शुभा मृगात्तपृष्ठादयः । आकारतो लक्षणतश्च । पक्षिणो हंसशुकसारिकादयः । अशुभाः काकोलूकश्च शृगालादयः । पशुशब्दश्चतुष्पाज्जाति-

---

१ ण–र-द्वेगपातात् । २ ण–र–मुक्तैः । ३ ण–र–विधितः सौविशोषित । ४ ण–र–प्रथमस्थानानां । ५ फ–फ–मनुष्याणां । ६ ण–र–गरैः । ७ ण–र–तं । ८ ण–र–वर्धस्यैव । ९ ण–र–अर्थानवृत्तिता । १० ण–र–अपचित ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वचनः । हिंसामात्रेण दण्डमिममिच्छन्ति । न प्रकृतया न विधिहेतुं ब्रुवते । तत्र दण्डो विचारित इत्यनेनैव यानप्रकरणं व्यवच्छिन्नं । विचारितः समासविर्नार इत्यर्थः । इदानीमेतत्प्रकरणनिरपेक्ष्यमुच्यत इति । एवं तु " प्राणभृत्सु महत्स्वर्धमिति " हस्तादिच्छेदो न मारणमित्यर्धशब्दो नेयः स्मृत्यन्तरात् ॥ २९८ ॥

९ गर्दभाजाविकानां तु दण्डः स्यात्पाञ्चमाषिकः ॥
मापिकस्तु भवेद्दण्डः श्वसूकरनिपातने ॥ २९९ ॥

पञ्च माषाः परिमाणमस्येति **पाञ्चमाषिकः** । माषस्य च द्रव्यजातेरनुपपादनान्मध्यमकल्पनायाश्च न्याय्यत्वाद्रौप्यस्य निर्देशोऽयमित्याहुः । हिरण्यं तु युक्तमेवं तत्समामिति नापि वाधिकं भवति । अनुबन्धाद्यपेक्षया तु द्रव्यजातिः कल्प्येति सिद्धान्तः ॥ २९९ ॥

१० भार्या पुत्रश्च दासश्च प्रेष्यो भ्राता च सोदरः ॥
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ ३०० ॥

प्राप्ता अपराधं **प्राप्तापराधा** अपराधो व्यतिक्रमः । नीतिभ्रंशः । स यदा तैः कृतो भवति तदा ताडयितव्याः । ताडनमपि हिंसेत्युक्तं । सा च "न हिंस्याद्भूतानीति" प्रतिषिद्धाऽपराधे निमित्ते भार्यादीनां प्रतिप्रसूयते । संबन्धिशब्दाश्चैते । यस्य भार्या यश्च
१९ यस्य दासः स तेनानुशासनीयः । मार्गस्थापनोपायविधिपरश्चायं । न ताडनविधिरेव । तेन वाग्दण्डाद्यपि कर्तव्यं । अपराधानुरूपेण कदाचित्ताडनम् । **सोदर**स्थाने कनीयान्पठितव्यः । **भ्राता** तथानुजः । स हि ज्येष्ठस्य पुत्रवत्ताडनार्हः । वैमात्रेयोऽपि चेदपितृको गुणवज्ज्येष्ठतन्त्रश्च सोऽप्युन्मार्गगामी ताडनादिपर्यन्तैरुपायैर्निवारणीयः । **वेणुदलं** वंशत्वक् । एतदप्युपलक्षणं तथाविधानां मृदुपीडासाधनानां शिष्यादीनाम् ॥ ३०० ॥

१० पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथंचन ॥
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥ ३०१ ॥

उक्तताडनसाधनाभ्यामन्यैर्न प्रकारेण घनक्षादिषु लगुडादिभिर्वा चौरदण्डं न प्राप्नोति। निन्दैषा । न त्वयमेव दण्डः । योऽन्यत्र हिंसाया दण्डः सोऽत्र भवतीत्युक्तं भवति ३०१

२१ एषोऽखिलेनाभिहितो दण्डपारुष्यनिर्णयः ॥
स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये ॥ ३०२ ॥

एष निःशेषेणोक्तो **दण्डपारुष्यनिर्णयो** दण्डव्यवस्था । दण्डशब्दो हि

१ ण-र-विचरित । २ ण-र-शिष्यो । ३ फ-ने । ४ ण-र-वाप्यादिषु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साधनोपलक्षकतया विवादे पदेऽन्वितार्थो नामधेये पूर्वपदं । **स्तेनस्य** चौरस्य दण्डभेदानतः- **परं वक्ष्यामी**त्युपसंहारोपन्यासार्थः श्लोकः ॥ ३०२ ॥

परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृपः ॥
स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्धते ॥ ३०३ ॥

कश्चित्करुणावान् क्रूरं हिंसा कर्मेति मन्यमानो न प्रवर्तते । अतस्तत्प्रतिपत्त्यर्थं स्तेननिग्रहस्तुत्यर्थवादः प्रक्रम्यते । नात्र हिंसादोषोऽस्ति प्रत्युत दृष्टदाष्टोपकारहेतुत्वात्स्तेनहिंसैव श्रेयस्करी । वेदतुल्यता च ख्यापयितुमर्थवादा भूयांसस्तत्र हि प्रायेण सर्वार्थवादका विध्युद्देशा इति तत्प्रतीत्यनुसरणेन वैदिकोऽयमर्थ इति प्रसिद्धिः । भवन्ति चात्र केचित्प्रतिपत्तारो ये स्तुतिभिरितितरां प्रवर्तन्ते । **परमं यत्नं** प्रकृष्टमतिशयवत्तात्पर्यमाश्रयेच्चरैश्चारयेत् साक्षात्प्रकाशं चातिप्रयत्नतः । **स्तेनाश्चौराः** । **निग्रहो** नियमनवधबन्धनादि । एवं कृते यशः ख्यातिर्भवति । निरुपद्रवोऽस्य राज्ञो देशः स्तेना नाभिभवन्ति निशा दिवा तुल्या तत्रेति सर्वत्र स्थितं भवति । **राष्ट्रं वर्धते** । राष्ट्रं जनपदस्तस्मिन्निवासिनश्च पुरुषाश्चौरैरनुपद्रूयमाणा वर्धन्ते । श्रीभिः प्रमोदमाना बहुपर्यन्ते देशान्तरस्था अपि निरुपद्रवं राष्ट्रमाश्रयन्ते । ततो वर्धते ॥ ३०३ ॥

अभयस्य हि यो दाता स पूज्यः सततं नृपः ॥
सत्रं हि वर्धते तस्य सदैवाभयदक्षिणम् ॥ ३०४ ॥

अभयं चौरादिभ्योऽधिकृतेभ्यश्चासद्दण्डनिवारणेन यो ददाति स सर्वदैव पूज्यो भवति । स्वैरकथास्वपि राज्याच्च्युतो वनस्थोऽपि । **सत्रं** क्रतुविशेषो गवामयनादि । तदस्य **वर्धते** निष्पद्यते । सर्वाङ्गमुत्पन्नमेवंगुणमित्येतद्वर्धत इत्यनेनाहरहः सत्रफलं प्राप्नोतीत्यर्थः । **अभयं** यत्र दक्षिणा । अन्येषु सत्रेषु दक्षिणा नास्ति । इदं तु सर्वेभ्योऽपि विशिष्टं । यद्दक्षिणया वत्सगवाश्वादिभिर्ये पुष्यन्ते तदरक्षातो राज्ञामधर्मो यावद्ये हरन्ति दक्षिणाविलक्षणेत्यर्थवान्सत्रव्यतिरेकः ॥ ३०४ ॥

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः ॥
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ॥ ३०५ ॥

सर्वतः प्रकाशाद्यज्ञादेः तथा ग्रामवासिभिः वनवासिभिश्च कृताकृताद्धर्मषड्भागं राजा लभते । एवमधर्मादपि चौरैः प्रच्छन्नकृताद्राज्ञः षड्भागो भवति न केवलं स्तेनैर्ये मुच्यन्ते । तदरक्षातो राज्ञामधर्मो यावद्ये हरन्ति तेषामपि चौर्यभावेनाधर्मोदयस्तदंशेनापि

---

१ फ–विनयदाने विवक्षितार्थः । २ ण–र–विवर्धते । ३ ण–र–प्रवृत्त्यर्थं । ४ ण–र–प्रलिप्तु । ५ फ–क्रतु । ६ फ–मित्येव तद्धर्मते । ४ ण–र–स्तेनैव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राजानः संबध्यन्ते । तानि निगृह्णतः अदृष्टदोषसंबन्धनिवारणमपि रक्षाणा रक्षैव । तत्राधिकृतस्य राज्ञस्तदकरणाद्युक्तः प्रत्यवायः । ननु च भृतिपरिकीर्तितत्वाद्धर्मषड्भागमयुक्तम् । उक्तं दीनानाथपरिव्रजितादयः सन्त्यकरप्रदाः । परिपूर्णस्वधर्मपालेनैकानुपपत्तिः ॥ ३०५ ॥

यदधीते यद्यजते यद्ददाति यदर्चति ॥
तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ॥ ३०६ ॥

यदुक्तं सर्वतः इति तस्य च प्रपंचोऽयं । अध्ययनादयो धर्मार्थतयाऽन्यत्र ज्ञापिताः प्रसिद्धरूपाश्च । **अर्चनं** देवगुरूणां पूजनं । **तस्येति** कर्मणोऽध्ययनादेः पदार्थस्येति योजनीयं । क्रियायाः स्त्रीलिङ्गत्वात् । **षड्भाग इति** वचनं कर्तुः पञ्चकर्मफलांशात् षष्ठो नृपतेः समग्रकर्मफलभोक्तृत्वस्याधिकारतः कर्तुरेवगतत्वात् । अपि तु **सम्यग्**ग्रहणात्स्वकर्मानुष्ठानात्तावन्मात्रं राज्ञः फलमुत्पद्यत इति नान्यकृतस्य शुभस्याशुभस्य वा अन्यत्र **गमनं** नाकर्तुः फलमस्तीति स्थितम् ॥ ३०६ ॥

रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन् ॥
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥ ३०७ ॥

भूतानि स्थावरजङ्गमानि चौरेभ्यो **रक्षन्वध्यांश्च** शास्त्रतो वधार्हास्तांश्च **घातयन् सहस्रशतदक्षिणानां** पौण्डरीकादीनां क्रतूनां फलमन्वहं राजा प्राप्नोतीति स्तुतिः ॥ ३०७ ॥

योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः ॥
प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत् ॥ ३०८ ॥

बलिप्रभृतीनि राजग्राह्यकरनामानि देशभेदे सूपे माणवककवत्प्रसिद्धानि तत्र **बलि**र्धान्यादेः षष्ठो भागः **करो** द्रव्यादानं **शुल्कं** वणिक्प्राप्यभागः । **प्रतिभागं** फलभरणिकाद्युपायनं राजैतद्गृह्णाति चौरेभ्यश्च न रक्षति **स सद्य** आयुःक्षयान्**नरकं** गच्छेत् । गृहीत्वा राजभागं रक्षा कर्तव्या । नरकायुःक्षयभयादिति श्लोकतात्पर्यम् ॥ ३०८ ॥

अरक्षितारं अत्तारं बलिषड्भागहारिणम् ॥
तमाहुः सर्वलोकस्य समग्रमलहारकम् ॥ ३०९ ॥

पूर्वस्य शेषोऽयं निन्दार्थवादः । न रक्षति अत्तोपजीविता प्रजानां राजभागग्रहणेन । एतदेव स्पष्टयति । **बलिषड्भागहारिणं** तं तादृशं राजानमाहुः शिष्टाः **सर्वलोकस्य** सर्वस्याः प्रजायाः समग्रं बलं पापं तस्य हारकं स्वीकर्तारं सर्वेण प्रजापापेन दूष्यत इत्यर्थः ॥ ३०९ ॥

---

१ फ–नृपति । २ ण–र–वचनमुक्तं । ३ फ–र सत्य । ४ ण–र–पालक । ५ ण–र–पालनात् । ६ ण–र–कर्मत । ७ ण–र–कर्तुरेव मतत्वात् । ८ ण–र–श्रुति । ९ फ–राजानं । १० फ–अर्थवादः । ११ र–पातं । १२ ण–र–नर युज्यते ।

For Private And Personal Use Only

अनपेक्षितमर्यादं नास्तिकं विप्रलुंपकम् ॥
अरक्षितारमत्तारं नृपं विद्यादधोगतिम् ॥ ३१० ॥

मर्यादा शास्त्रशिष्टसमाचारनिरूढा धर्मव्यवस्था या साऽनवेक्षिताऽतिक्रान्ता येन । नास्ति परलोको नास्ति दत्तं नास्ति हुतमिति **नास्तिकः** । प्रथमो रागादिना[2] त्यक्तधर्मो वस्तुविपरीतोऽतिनिश्चयः । विलुम्पति हरति धनान्यसद्दण्डैः प्रजानां तत्तुल्योऽ**रक्षिता** । **तमधोगतिं**[1] विद्यान्नरकपतितमधोगतं विद्यान्नरकपतितमेवाचिरात् । पाठांतरम् । असत्यं[3] च नृपं त्यजेत् । अन्यदुक्त्वाऽन्यत्करोति यस्तं[4] त्यजेत्तद्विषये नासीत् ॥ ३१० ॥

अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः ॥
निरोधनेन बन्धेन विविधेन वधेन च[5] ॥ ३११ ॥

अर्थवादैर्दृढीकृत्य निग्रह[6]विधिमिदानीं प्रस्तौति । **अधार्मिकं** प्रकरणाच्चौरः । **तं त्रिभिर्**नियमनप्रकारै**र्निगृह्णीया**न्नियच्छेत् । न्यायो नियामकः[7] । **निरोधनं** राजदुर्गे बन्धनागारे चरणबन्धस्तत्रैव रज्जुनिगडादिभिरस्वातन्त्र्योत्पादनं **विविधो** वधस्ताडनादारभ्य शरीरनाशनात् । प्राणत्यागपर्यन्तनिर्देशादेव त्रित्वे लब्धे त्रिभिरिति वचनमन्येषामपि नियमनप्रकाराणां परिग्रहणार्थं । तेन तप्ततैलसेकादयोऽपि परिगृहीता भवन्ति ॥ ३११ ॥

निग्रहेण हि पापानां साधूनां संग्रहेण च ॥
द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः ॥ ३१२ ॥

पापयुक्ताः पुरुषाः **पापाः** । तेषां **निग्रहः** । पूर्वोक्त[8]यथाशास्त्रवद्वर्तिनः **साधवः** । तेषां **सङ्ग्रहोऽनुग्रहो** यथाशक्त्युपकारः । तेन पूयंते विपाप्मानो भवन्ति प्रायश्चित्तेन वेत्यर्थवादः[9] । अथवा पापानुत्पत्तिरेव पूतत्वं[10] ब्राह्मणा एव सतत**मिज्याभिः** नित्यैर्महायज्ञादिभिः ॥३१२॥

क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणाम् ॥
बालवृद्धातुराणां च कुर्वता हितमात्मनः ॥ ३१३ ॥

कार्यिणोऽर्थिप्रत्यर्थिज्ञातिसुहृदः कस्मिंश्चिद्धन्यमाने यदि तत्पिता[11] तन्माता वा राजानं क्षिपेत्कुत्सयेत् अभिशपेद्वा तदा क्षमा कार्या । बालादीनां[12] **कार्यिणामेवमात्मने हितं** कृतं भवति क्षंतव्यमित्येतद्द्विविधफलमेवात्माहितम् ॥ ३१३ ॥

यः क्षिप्तो मर्षयत्यार्तैस्तेन स्वर्गे महीयते ॥
यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति ॥ ३१४ ॥

आर्तैर्दण्ड्यमानतत्संबन्धिभिरधि**क्षिप्त** आक्रुष्टो यन्मर्षयाति न क्रुध्यति **तेन** क्षमणेन **स्वर्गे महीयते** । कण्वादिरयं[13] । महत्त्वं प्राप्नोति । **स्वर्गे**ऽकोपेन[14] । तर्हि क्षमा

---

१ ण-र-अधोगतम् । २ ण-र-रामादिना । ३ ण-र-न सत्यं । ४ ण-र-तीत्यसत्यं । ५ ण-र वा । ६ ण-र-ग्रहण । ७ ण-र-निरोधकः । ८ फ-पूर्ववाद्विशाप्मानो । ९ फ-अपरोर्थवादोष्टकं पापा- । १० ण-र-पूतनत्वं । ११ फ-नसतां भावो वा राजानापेक्षितुमिच्छेद्वा तदा । १२ ण-र-बालादीनामपि कार्यिणामपि । १३ " कण्वादिभ्यो यक् " व्या. सू. ३।१।२७ । १४ ण-र-स्वर्गलोकेन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्तव्या । अकामिनो यथाकामी अत आह । यत्तु प्रभुरहमित्यभिमानेन न सहते **तेन नरकं** प्राप्नोति । आर्त्तग्रहणं बालवृद्धयोरपि प्रदर्शनार्थं पूर्वशेषत्वादस्य ॥ ३१४ ॥

राजा स्तेनेन गंतव्यो मुक्तकेशेन धीमता ॥
आचक्षाणेन तत्स्तेयमेवंकर्माऽस्मि शाधि माम् ॥ ३१५ ॥

अविशेषोपादाने सुवर्णहारी **स्तेनो** द्रष्टव्यः । तस्यैव शास्त्रान्तरे गमनविधानात् । न वेदनमागमनपरं विधिशास्त्रदण्डविधित्वात् । **उक्तं** हि "स्तेनैस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णय" इति । अतोऽनुवादमगमनस्यात्र राजसकाशं सुवर्णचौरेण गंतव्यं । **मुक्तकेशेन** धीमता धैर्यवता । धावतेति पाठान्तरम् । **आचक्षाणेन** कथयता पथि **तत्पातकमेवंकर्माऽस्मि** ब्राह्मणस्य मयेयंत्सुवर्णं हृतमिति कुरु निग्रहं मे ॥ ३१५ ॥

*** स्कन्धेनादाय मुसलं लगुडं वाऽपि खादिरम् ॥**
शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥ ३१६ ॥

वर्णानामनुक्रमेण मुसलादीनामुपदेशं मन्यन्ते । तदयुक्तं । वा शब्दो न समर्थितः स्यात् । न च ब्राह्मणस्येदं प्रायश्चित्तमिछन्ति । तत्प्रायश्चित्तेषु निरूपयिष्यामः । खादिरजातिर्लगुड एव । न मुशलेनानुषक्तव्यः ॥ ३१६ ॥

शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ॥
अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषम् ॥ ३१७ ॥

शासनान्मुशलादिभिः प्रहरणात्क्षत्रियादिः पापान्मुच्यते । **विमोक्षा**दुत्सर्गात् । गच्छ क्षान्तमिति "ब्राह्मणस्तपसैवेति" वधतपसी विहिते । तत्र वधस्तावद्ब्राह्मणस्य नास्ति । तपस्तु प्रायश्चितं । न च तप इच्छातो राजाभिगमनमस्ति । तस्मात्क्षत्रियादीनामेष विमोक्षः । स च धनदण्डं गृहीत्वा । यत आह **अशासित्वेत्यादि** । न च विमोक्षणशुद्धौ सत्यां राज्ञस्तदशासनाद्दोषोपपत्तिः । न च शासनमपि विहितं मोक्षोऽपि विहितः । तत्र यस्मिन्पक्षे शासनं तदपेक्षं दोषवचनं । पाक्षिकं हि तथा कल्पेत् । न च नित्यवच्छ्रुतस्य पाक्षिकत्वं युक्तं कल्पयितुं । तथा च सामान्येन **वसिष्ठादय** आहुः । अधर्मेण स्वीयेन ऋच्छति राजानमुत्सृजन्तं सकिल्बिषन्तं चेज्याद्यतो राजाऽन्यधर्मेण न दुष्यति । नायं विकल्पो युक्तः । क्वचिदियं हिंसा प्रतिषिद्धा । "न हिंस्याद्भूतानीति" रागादिना पुरुषार्थतया प्राप्ता क्वचिद्विहिता । क्रत्वर्थत्वेन यो दीक्षितो यदग्नीषोमीयमिति । इयं तु शासनविमोक्षणवञ्चना । न हि नाम प्रतिषिद्धाद्युक्तौ सति विधौ कथं न प्रतिषेधो

[गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् ।
वधेन शुध्यते स्तेनो ब्राह्मणस्तपसैव वा ॥ १ ॥]

१ **फ**–धावता । २ **ण–र**–नवेदागमानंतरं विधिशास्त्रदण्डविधित्वात् । ३ **ण–र**–दोमगमन्यात । ४ **फ**–वीर्यवता । ५ **फ**–वत् । ६ **ण–र**–इच्छासनं । ७ **फ**–छ्रुतं पाक्षिकं । ८ **फ**–कल्पो । ९ **ण–र**–+न हिंसा प्रतिषिद्धा । १० **ण–र**–रणादिना । ११ **ण–र**–नहि नमप्रतिषिद्धायतो मतिविधो कथं न ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" न हिंस्याद्भूतानीति " सामान्यतः प्रतिषेधो विधिविशेषमन्तरेण न शक्यो बाधितुं । अथोच्यते । नैवायं प्रतिषेधस्य विषयः । कर्मार्थत्वात् । कथं पुनरन्तरेण विधिं कर्मार्थता शक्याऽवगन्तुं । लोकत इति चेल्लौकिकी तर्हि प्रवृत्तिः । कथं तर्हि प्रतिषेधस्तत्रावतरेत् । ननु च प्रदाने प्रवृत्तिर्निरूप्यतां । यदि तावद्वैदिकी प्रवृत्तिस्ततस्तदङ्गे हिंसायामपि तत एव एका हि प्रवृत्तिरन्तरङ्गप्रधानयोः । अथ लिप्सातोऽङ्गेऽपि तत्र प्रवृत्तिः । सुतरां तर्हि हिंसेयं लौकिकी । जीविकार्थिनो हि प्रजापालनाधिकारनियमोऽत्रे वेधः । तेनेयमङ्गस्थापि हिंसा मुख्येन तुल्यत्वात्प्रतिषेधविषयः । न च लौकिकमस्यानियतमङ्गत्वं । नो हिंसामन्तरेण प्रजापालनमशक्यं । निरोधादिनाऽपि शक्यत्वात् । नैष नियमः एकरूपाङ्गप्रधानयोः प्रवृत्तिरिति स्यान्नाग्नीषोमीययोरनेन विशेषः स्यादतो लिप्सालक्षणेऽपि प्रधानाङ्गविधिलक्षणमभ्युपेतव्यं । न चैष हिंसाविधिः । लक्षणा शक्याऽभ्युपगन्तुं स्वरूपस्य कार्यस्य च लौकिकत्वात्पालनस्य हिंसायाश्च । अथ विधिलक्षणा षोडशग्रहणवद्विकल्पितुमर्हति । शासनवचनेन प्रतिषिद्धा । अन्ये तु मन्यन्ते । द्वे एते वाक्ये । शासनादिति स्तेनस्य शुद्धिरुच्यते । परेणार्धेन राज्ञस्तदशासने दोषः । तत्र यदि राजा शासनदोषमात्मन्यङ्गीकृत्य मुञ्चेन्मुच्येतैवैनसः । एवं ब्राह्मणस्यापि स्वयमागतस्य वधशुद्धिहेतोर्लक्षणं शास्त्रभृतामिति वचनात् । " न शारीरो ब्राह्मणदण्डः " इति (गौतम सू. १२।४३) । न राजा यदि प्रतिषेधातिक्रमेण हन्याद्ब्राह्मणः शुध्येदेव । अशासित्वा मुशलादिभिरहत्वा स्तेनस्य यत्पापं तेन युज्यते ॥ ३१७ ॥

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्याऽपचारिणी ॥
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥ ३१८ ॥

अन्नमत्तीत्यन्नादो भ्रूणहा ब्रह्महा तदीयमन्नं यो भुङ्क्ते तस्मिंस्तद्ब्रह्महत्यापापं **मार्ष्टि** निरस्य रस्यति श्लेषयति । यथा मलिनं वस्त्रमुदके मृज्यते तन्मलं तत्र संक्रामत्येवं अर्थवादश्चायं । तस्य तत्पापमुत्पद्यते । न पुनर्ब्रह्मघ्नो विशुध्यति । **पत्यौ** भर्त्तरि **भार्यापचारिणी** जारिणी स चेत्क्षमते । अत्रापि भर्तुरुत्पाद्यते पापं न तत्र तस्या अपैति । **गुरौ शिष्यश्च याज्यश्च** शिष्यः सूर्याभ्युदितादिभिरपराध्य तु गुरौ क्षममाणे तत्पापं प्रक्षिपति । एवं याज्ये याजकः । सोऽपि गुरुरेवेत्यतो याजकग्रहणं न कृतं । एवं चौरो **राजनि** । न चेद्राज्ञा निगृह्यते याज्योऽपि कर्मणि प्रवृत्ते विधिमुपेक्षमाणि चेद्याजकवचनेनावतिष्ठते तदा त्याज्यो न पुनस्तस्य ताडनादि शिष्यवत्कर्तव्यं । अन्नादादिषु सर्वेष्वन्यत्र विधिरस्तीति नाशुद्धिरतोऽर्थवादोऽयम् ॥ ३१८ ॥

राजभिः धृतदण्डास्तु कृत्वा पापानि मानवाः ॥
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ ३१९ ॥

---

१ फ–पोषणा । २ फ–न विधिः । ३ ण–र–स्यामपि हिंसाङ्गेन । ४ फ–विधानेऽहं । ५ फ–मात्मीयमंगी । ६ फ–मुंचेतैवैनसः । ७ फ–वधः शुद्धिहेतुः उक्तं । ८ ण–र–ब्राह्मणं शुद्धेव । ९ फ–ब्राह्मणो विशेषः । १० ण–र–न । ११ ण–र–अप । १२ ण–र–उप । १३ फ–कृत ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदुक्तं पापकारिणो निग्रहणे कर्मकृतो रक्षन्त इति तत्स्फुटयति । धृतो विनिपातिते दण्डो येषां राजभिस्ते कृत्वा पापानि कृतपापा राजनिग्रहेण निर्मला निरस्तपापा भवन्ति । अपगते च पापे यदेषां स्वर्गारोहिकं कर्म तेन स्वर्गं प्राप्नुवन्ति । महद्धि पापं शुद्धस्य कर्मणः फलस्य प्रतिबन्धकं । सुकृतिनो नित्यं सुकृतकर्मकारिणः । यथा सत्री धार्मिकस्तद्वदसतामधर्मो नैवोत्पद्यत एषामुत्पन्नो निग्रहणेन विना स्थित इति । प्राक्प्रध्वंसाभावयोर्विशेषो मानवग्रहणानुप्रकरणाच्चौराणामेव । दण्डशब्दस्तु शारीरनिग्रहविषयो न हि प्रकरणमतिक्रामति । धनदण्डो हि राजार्थः । वृत्तिर्हि या राज्ञः शारीरे तु दण्डे दण्ड्यमानार्थता शक्यते निह्नोतुं । त्वक्संस्कारो हिंसा । अथेयं बुद्धिः पालनमेव हिंसामन्तरेण न निष्पाद्यते तच्च राजार्थमिति कुतो मार्यमाणार्थता मारणस्य । अथ किं पालनं न पाल्यमानार्थदृष्टमेवापह्नूयते । न हि तद्दृष्टमुपादेयं राज्ञैवं स्वरक्षार्थं करशुल्कादिभृत्या उपादीयन्ते । अतः सुतरां रक्षोपयोगित्वं हिंसायां हिंस्यमानार्थता सिद्धिः । कथं वा हिंसया विना न रक्षानिवृत्तिर्यदि तावदेवमर्थं निगृह्यन्ते पुनरकार्यमावर्तयिष्यते तन्निबोधनादपि शक्यते नियंतुं । अथ तान् गृहीत्वा तान्दृष्ट्वा भयादन्येन प्रवर्तयिष्यंत इति धनदण्डेनापि शक्यते दुःखयितुं हन्यमानेष्वपि सहस्रशः प्रवर्तन्ते । तस्मादियं हिंसा रक्षा सती हिंस्यमानसंस्कार इति मन्तव्यं । अतश्च कारणादिच्छेदने नियमो हस्त्यादिविधिश्च दंड्येऽदृष्टमाधास्यति न राजार्थो भविष्यति । तस्माच्छरीरदण्डे पापान्मुक्तिर्न धनदण्ड इति स्थितं । तथा च महापातकिनां हृतसर्वस्वानामप्सु प्रवेशितदण्डानां संव्यवहारपरिहारार्थमङ्कनं वक्ष्यति । यदि च धनदण्डेन शुध्येयुः पुनरङ्कनमनर्थकं स्यात् । अत्र च स्वयमागतस्य नानीतस्य विशेषो यः स्तेन एवं विशषो भवतु । इदं तु सर्वं शारीरदण्डविषयम् ॥ ३१९ ॥

यस्तु रज्जुं घटं कूपाद्धरेद्भिद्याच्च यः प्रपाम् ॥
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत् ॥ ३२० ॥

प्रपिबन्त्यस्यामिति प्रपा । जलाधारस्यावस्थानं उद्धृतजलनिधानं वा । माषस्य जातिर्न निर्दिष्टा । स मरुजाङ्गलानुपभेदा द्रष्टव्या । तच्च रज्ज्वादि समाहरेद्दद्यात्तस्मिन् स्थाने न राजनि ॥ ३२० ॥

धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ॥
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥ ३२१ ॥

कुंभशब्दः परिमाणविशेषे वर्तते न घटमात्रे । क्वचिद्विंशतिप्रस्थान्क्वचिद्द्वाविंशद्वाविंशतिरिति देशभेदाद्व्यवस्था । दशभ्योऽधिकं हरतो वधविधिरुक्तार्थोऽनुबंधादिना

१ फ–हृत्तो । २ फ–तत्त्वं । ३–फ तद्दृष्टु । ४ ज्ञे । ५ फ–करमुद्दिश्य । ६ ण–र–रक्षानिवृत्तिः । ७ ण–र–र्थे । ८ फ–तानि । ९ फ–न्ने । १० ण–र–दुःखइतुं; फ–दुःखमपि तु । ११ ण–र–दण्डपापान्मुक्तिः । १२ ण–र–संव्यवहारभे । १३ फ–बन्धनदण्डेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियम्यते । शेषेषु दशसु प्राकृतस्ततः एकादशगुणो दण्डः । **ततस्य च तद्धनमिति** सर्वत्र स्तेये योज्यं । **धान्यं** व्रीहियवादिसप्तदशानीति स्मर्यते ॥ ३२१ ॥

तथा धरिममेयानां शतादभ्यधिके वधः ॥
सुवर्णरजतादीनामुत्तमानां च वाससाम् ॥ ३२२ ॥

धरणं धरिमा तुला । तेन मीयन्ते परिछिद्यन्ते तानि **धरिममेयानि** । घृतादीनां द्रवाणां प्रस्थादिमेयताऽस्तीति कठिनानां धरिमेयता भवतीति तदर्थमाह । **सुवर्णरजतादीनां** । आदिग्रहणादेव रजते लब्धे पुनरुपादानात्तुल्यग्रहणार्थात्प्रवालादीनि गृह्यन्ते । न तु ताम्रलोहादीनि । तेषां शतादूर्ध्वं हरणे वधः । किं पुनरेतच्छतं पलानामुत कर्षाणामेवं कार्षापणानां वा । केचिदाहुः पलानामिति । न त्वत्र विशेषो हन्तुरस्ति तस्माद्यस्मिन्देशे धरिममानकाले यथासंख्यया व्यवहारः । श्रुतमिदं सुवर्णस्य क्वचित्तोलके क्वचित्पलेषु यथादेशं व्यवस्था । **उत्तमानां च वाससां** कौशेयपट्टादीनामिति । नन्वत्र विशेषहेतुरस्ति । तस्माद्यस्मिन् **शतादभ्यधिके वधः** केचिदाहुः । पलानामिति । न त्वत्र विशेषहेतुरित्यनुषङ्गः । अत्रापि शाकटकयुगमेकमिति संख्यायते । पुष्पपटाद्युपबर्हणं त्वेकमेवेति । ननु च सुवर्णरजतादीनामित्येव सिद्धे परिमेयग्रहणमनर्थकं । नानर्थकं कर्पूरागरुकस्तूरिकादीनां महार्घाणां ग्रहणार्थं । **आदिग्रहणाद्धि** तैजसानि गृह्यन्ते । निष्कादिपरिमाणव्यपदेश्यानि वा । न हि कर्पूरादीनां कर्षादिव्यपदेशोऽस्ति । यद्यपि सुवर्णवद्रजतेऽपि शतसंख्या तथापि प्रायश्चित्तभेदवद्दण्डभेदोऽपि युक्तो विषमसमीकरणस्य न्याय्यत्वादतो यावत्सुवर्णगतस्य मूल्यं तावति रूपे गृहीते वधः । कर्पूरादीनां तु पलानामेव शतसंख्या ॥ ३२२ ॥

पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ॥
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥ ३२३ ॥

सुबोधोऽयं । **मूल्यादिति** नापहृतमेव द्रव्यं देयं क्वचित्तज्जातीयं नैव प्राप्यते । अतो रूपकैर्धान्यादिना वा निमेयम् ॥ ३२३ ॥

पुरुषाणां कुलीनानां नारीणां च विशेषतः ॥
मुख्यानां चैव रत्नानां हरणे वधमर्हति ॥ ३२४ ॥

सत्कुले जाता विद्यादिगुणयोगिनः **कुलीनाः नारीणां च विशेषतो** गुणरूपसौभाग्यतः संपन्नानामित्यर्थः । चशब्दात्कुलीनानामित्येव । परस्परापेक्षाणि नारीणां विशेषणानि । **मुख्यानि** उत्तमानि । **रत्नानि** वज्रवैडूर्यमरकतप्रभृतीनि । अत्रापि सुवर्णशततुल्यानीत्यपेक्ष्यमन्यथोत्तमत्वमापेक्षिकमिति दण्डो न व्यवतिष्ठेत । **वधमर्हत्यनुबंधाद्यपेक्षया**

---

१ ण–तत्तुल्यमूल्यग्रहणार्थं–र–तत्तुल्य । २ ण–र–तेन । ३ ण–र–कर्षाणामेव वा । ४ ण–र–शतमिदं । ५ ण–र–संख्याने पुष्पपुरान्युपबर्हणं तु कणैकमिति । ६ ण–र–गृह्येरन् । ७ ण–र–कर्पूरादि । ८ ण–र–सुवर्णस्थ । ९ ण–र–परस्परानपेक्षाणि । १० ण–र–क्षामन्यतोत्तमत्वमापेक्षि । ११ ण–र–ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वत्राहैत्यर्थो योजनीयः । अकुलीनानामवशिष्टानाममुख्यानां च विशेषे त्वेकादशगुण इत्येव ॥ ३२४ ॥

महापशूनां हरणे शस्त्राणामौषधस्य च ॥
कालमासाद्य कार्यं च दण्डं राजा प्रकल्पयेत् ॥ ३२५ ॥

महापशवो हस्त्यश्वादयः । तेषां **हरणे** कालकार्यापेक्षा दण्डप्रकृतिः । ननु च सर्वत्रैव कालाद्यपेक्षोक्ता । तथा च कालदेशवयःशक्तीश्चिन्तयेद्दण्डकर्मणीति । सत्यं । विज्ञाते दण्डस्वरूपे न्यूनाधिकभावोऽनुबन्धाद्यपेक्षः । यथा वधविधौ ताडनमारणादिकल्पनापेक्षया इहात्यन्तविलक्षणो दण्डः । तथा हि विंशतिपणोऽपि खड्गैत्रोरुद्यतशस्त्रस्य सन्निधौ यदि ह्रियेते तेन कार्यातिशयेन तेन च कालेन मारणं दण्डः । अन्यदा द्विगुण एकादशगुणो वा । तैथौषधमलभ्यत्वेन महाप्रयोजनं तदुपयोगवेलायां ह्रियते । लोलॅमानमपि क्वाथाद्यपेक्षं कालातिक्रमणेन महदातुरस्य दुःखं जनयतीति । तत्र महान्दण्डः । अन्यदा तु स्वल्प इति । न यैत्रान्तरामन्तरेणेदृशं वैषम्यं लभ्यते । अन्यथा स एवैकः श्लोको दण्डविधौ पठितव्यः स्यात् । तस्माद्वक्तव्यमिदं विग्रहकालेऽश्वादीनां राज्यापेक्षो दण्डः । शस्त्राणां राजोपयोगिनां कदाचित्क्षमा कदाचिन्महान्दण्डः । गोमहीष्यादीनां तु प्रजासंबन्धिनां न राज्ञा क्षन्तव्यं कार्यं च यदश्वादिभिः कर्तव्यं तदप्यपेक्षं । विग्रहोऽपि यदि पर्वतादौ भवति यत्र नातीवाश्वैः प्रयोजनं भवन्त्येव दण्डादयः । **कालमासाद्य** ज्ञात्वा निरूप्य **दण्डं कल्पयेत्स** एवात्र प्रभवति न शास्त्रम् ॥ ३२५ ॥

गोषु ब्राह्मणसंस्थासु छूरिकायाश्च भेदने ।
पशूनां हरणे चैव सद्यः कार्योऽर्धपादिकः ॥ ३२६ ॥

ब्राह्मणसंस्था ब्राह्मणाश्रिता ब्राह्मणस्वामिकाः । तासां **हरणे** षष्ठ्यर्थे सप्तमी । **पशूनां** चाजैडंकादीनां बहुवचनं सर्वत्रात्र विवक्षितं । **सद्यस्त**त्क्षणादविचार्य । पादस्यार्धमर्धपादं तदस्यास्तीत्यर्धपादिकः । तच्च संभवति यदि पादार्धं तेन छिद्यते तेनार्धपादच्छेदनं कर्तव्यमिति वाक्यार्थः । **छुरिका** यया गोरक्षैक्षेत्रादौ वाह्यते बलीवर्दः । **भेदने** वाह्यमानायाः प्रतोदेन पीडोत्पादनं भेदनं वाहानामुपलक्षणार्थं व्याचक्षते । पूर्वोऽवश्यं वाहयन्दुःखयति अवश्यमयं दण्ड इत्येवान्ये पठन्ति । अन्ये तु पादस्य पश्चाद्भागं चतुर्थं खरिकामाहुः । खरिकेति या प्रसिद्धा । पलायनशीलायाः पौत्रोऽर्धपादिकः कार्यः । अन्ये त्वधिकरणसप्तमीं मत्वा गोसंस्थदध्यादीन्यध्याहरन्ति । तदयुक्तं । श्रुतपदसंबन्धसंभवे कृतोऽध्याहारः ॥ ३२६ ॥

---

१ ण-र-च्यर्थे । २ ण-र-निर्जिते । ३ ण-र-पेक्षा । इहात्येन । ४ णर-वेशस्नैरुद्यत । ५ ण-र-हृदयनेन । ६ ण-र-तथौषधं समंकुरं आतुरेसति । ७ फ-लभ्यमानमपि । ८ फ-नयनान्तरमन्तरेण । ९ फ-कर्तव्यं । १० ण-र-ग । ११ ण-र-अर्धः पादः । १२ फ-खरिक; ण-र-स्फुरिका । १३ ण-र-पलेन्थोवभिंदन् नद्धपादिकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च ॥
दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ॥ ३२७ ॥
वेणुवैदलभाण्डानां लवणानां तथैव च ॥
मृण्मयानां च हरणे मृदो भस्मन एव च ॥ ३२८ ॥
मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च ॥
मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवम् ॥ ३२९ ॥
अन्येषां चैवमादीनामद्यानामोदनस्य च ॥
पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः ॥ ३३० ॥

सूत्रमूर्णासणादि । **लवणानि** सैंधवबिडलवणादीनि । **यच्चान्यत्पशुसंभव**मामिषादिति अन्येषामपूपमोदकादीनां । आदिशब्दः प्रकारे । प्रकारः सादृश्यं तुल्यता सदृशकार्यकरणोपयोगादिरूपा । तथा च सर्पिमण्डेक्षुखण्डशर्करा किलाटकूर्चिकाद्या अपूपा गृह्यन्ते । **पशुसंभवं** राङ्कवाजिनाद्यपीच्छन्ति केचित् । **आदि**ग्रहणात्प्रकृतिर्विकृतिरपि । प्रकृतिं यच्चोभयोपादानं दध्नः क्षीरस्य चेति तदुदाहरणार्थं । एवं **सूत्र**ग्रहणेन सूत्रमयं वासोऽपि गृह्यते । नलिकादीनां सत्यपि सूत्रमयत्वे पशुसंभवत्व उत्तमत्वादुत्तमानां चेत्त्वयमपवादविषयः । प्रकृत्यन्तरे तैलशब्दः स्नेहवाची । न तिलविकार एव । तेनातसीप्रियङ्गुपञ्चाङ्गुलतैलादयोऽपि गृह्यन्ते ॥ ३२६ ॥ ३२७ ॥ ३२८ ॥ ३२९ ॥

पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च ॥
अन्येष्वपरिपूतेषु दण्डः स्यात्पञ्चकृष्णलः ॥ ३३१ ॥

नवमालिकादीनि **पुष्पाणि** हरन्ति । **धान्यं** क्षेत्रस्थं अपक्वं **नगा** वृक्षाः । **अन्येष्वपरिपूतेषु** बहुवचनात्परिपवनाय च धान्यं क्षेत्रेष्वेव तुषपलालादिविमोक्षरूपयोः संभवादुत्तरश्लोके धान्यग्रहणमेवाकृष्यते । **गुल्मादी**नां हि सत्यपि पलाशे व्यामिश्रत्वे पुष्पाणां च परिपूतत्व्यवहारः । सप्तमी हरणापेक्षा । तत्त्वं पूर्वस्मादनुवर्तते । अत्र पञ्चकृष्णलो दण्डः । कृष्णलानां द्रव्यजातिः । अल्पत्वमहत्त्वप्रयोजनापेक्षा सुवर्णस्येति पूर्वं ॥ ३३१ ॥

परिपूतेषु धान्येषु शाकमूलफलेषु च ॥
निरन्वये शतं दण्डः सान्वयेऽर्धशतं दमः ॥ ३३२ ॥

मूलमिक्षुद्राक्षादि । **निरन्वये** द्रव्यहरणे । अन्वयोऽनुनयः । स्वामिनः प्रीत्यादिप्रयोगः । यत्त्वदीयं तन्मदीयमेवेत्यनया बुध्याऽहं प्रवृत्तो न चेदेवं तद्गृहाणेत्येवमादिवचनं तद्यत्र न क्रियते तन्निरन्वयं । साहसप्रकारत्वादधिको दण्डः । अन्वयेन सह **सान्वयः** । येन सह कश्चिदपि संबन्धो नास्त्येकग्रामवासादिस्ततः **शतं** दण्ड्यः । अथवा अनारक्ष

१ ण-र-दीनि । २ फ-नापि सत्ये । ३ फ-वादिकोदण्डः । ४ ण-र-देः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरन्वयं । सति तु रक्षाक उभयापराधादल्पो दंडः । खलस्थेषु धान्येष्वयं दण्डः । तत्र हि परिपूर्यंते । गृहस्थेषु त्वेकादशद्गुणः प्रागुक्तः ॥ ३३२ ॥

स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् ॥
निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यत् ॥ ३३३ ॥

परद्रव्यापहरणं स्तेयमुच्यते। धात्वर्थप्रसिद्ध्या चास्यैव कर्ता स्तेनः। तस्य कर्तव्येन इह तु विशेषेणायं व्यवहार इष्यते तदर्थोऽयं श्लोकः। न परद्रव्यादानमात्रं स्तेयं। ऋणादाननिक्षेपादिष्वपि स्तेयदण्डप्रसङ्गात्। संज्ञाभेदो दण्डभेदार्थः। अपह्नुत्य यत्तेन मया कृतमित्याह कर्म यत्कृतं परपीडाकरं वस्तूत्पाटनाग्निदाहद्रव्यापहरणादि। अग्निदाहे यद्यपि द्रव्यापहरणं नास्ति तथापि चौर्यमेव रहसि करणादपह्नवाच्च मन्यन्ते। चौर्ये हि द्रव्यविशेषाश्रयो दण्डः। सोऽत्र न स्यात् । एवमर्थमेव स्तेयप्रकरणे लक्षणं 'स्तेयं प्रसभं कर्मेति' कर्मग्रहणाद्द्रव्यापहारादन्यदप्येवं कृतमयुक्तं साहसमेव। कस्तर्ह्यग्निदाहादावप्रसभं कृते दण्डः। कंटकशुद्धौ वक्ष्यामः। अत एवमन्विच्छेदसत्यपि द्रव्यापहरणे कण्टकशुद्धौ दण्डमामनन्ति अन्यथा एवं वक्ष्यते ॥ ३३३ ॥

यस्त्वेतान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः ॥
तं शतं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात् ॥ ३३४ ॥

एतानि सूत्रादीन्युपक्लृप्तानि प्रत्यासन्नदानोपभोगादिकार्यकालानि । अथवा संस्कृतानि कृतसामर्थ्याधानानि। यथा तदेव सूत्रं तन्तुवायहस्ते वायनार्थं दत्तं किंचिद्द्विगुणीक्रियते किंचित्परिवर्त्यते एवं दधिमन्थनमरिचशर्करादिसंस्कृतं क्षीरं घृतमित्यादिसंस्कारस्तत्र शतं दण्डः । आद्यमिति पाठे प्रथमसाहसः । **अग्निर्गृहात्** परिगृहीतं शालाग्निहोत्रेत्यादिकं हेमन्ते वा सीतादितानां दरिद्राणामप्रणीतमप्यग्नेरुपकल्पनं पाककालः शीतादिनिवृत्त्यर्थं वा तापनकालः। अविशेषेणायमग्नेर्दण्डः। स्वल्पस्य बहोरुपक्लृप्तस्यानुपक्लृप्तस्य च। सत्यपि सूत्रादिदण्डे । आदिग्रहणेनाग्नेस्तन्मूल्यादि संभवति। क्रयविक्रयव्यवहाराप्रसिद्धेः। यावता वेन्धनेनाग्निरुपहृत्य परिमाण उत्पद्यते यावतीभिर्दक्षिणाभिस्तन्मूल्याद्द्विगुणो दण्डः संभवति शक्यते व्यपदेष्टुं तुष्ट्युत्पत्तिश्च स्वामिनः स्थितैव। अतस्त्रेताग्निहरणे यावत्पुनराधाने गच्छति प्रायश्चित्तेष्टौ च तावदग्निमते दातव्यः। अतोऽयमग्नेर्दण्डः शालाप्रणीताग्निविषय एव स्वल्पत्वात्। त्रेतायां तु तन्मूल्याद्द्विगुण इति।

---

१ ण-र-कृतानापह्नुत। २ + ण-र-किंतर्हि न च त्वयं आरक्षिपुरुषेण वर्जितमनिज्ञातेन यः क्रियते तच्चौर्यं। दघ्या कृत्वापिचेत्तापन्हुते यत्तत्कृतमिदं तन्मयेति विधायान्यत्र संक्रिया इति । न तच्चौर्यं किंतर्हि स्याम साहसं अन्वयवत् मारक्षप्रदेशेप्रसभं प्रसभप्रकाशं तथा कृतमप्यमपन्हुते चेत्स्तेयमेव संज्ञाभेदोदंडभेदामहि। ३ ण-र-वक्ष्यत्। ४ फ-अग्नीन्धन। ५ ण-र अप्रमणीतयपि । ६ ण-र-त। ७ ण-र-दाप्यः। ८ ण-र-शालान्ये। ९ ण-र-तुल्यगुण इति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा च " सुलभेष्वधिकारानिवृत्तिमकुर्वत्सु यागाङ्गद्रव्येष्वपह्रियमाणेषु कुशकारकाग्निहोत्रद्रव्याण्यपहरतोऽङ्गच्छेदः स्यात् " इति शङ्खः । अग्निषु तु हुतेष्वधिकार एव निवर्तते । तत्र कथं महान् दण्डो न स्यात् ॥ ३३४ ॥

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ॥
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥ ३३५ ॥

भूयोभूयः प्रवृत्तस्यायं दण्डः । यो धनेन दण्डितोऽपि न मार्गेऽवतिष्ठते तस्य त्रिचतुर्दण्डितस्यानवतिष्ठमानस्य द्रव्यजातिपरिमाणानपेक्षः सन्धिच्छेदाद्यनपेक्षचौर्यक्रियामात्राश्रितोऽङ्गच्छेदः । यस्य यस्याङ्गस्य बलमाश्रित्यावतिष्ठते स्तेनश्चौर्ये प्रवर्तते तत्तदस्य हरेच्छिन्द्यात् । यथा कश्चित्पादबलमाश्रित्यावष्टभ्य पलायते न मामनुगन्तुं कश्चिदपि शक्नोतीति तस्य पादच्छेदः । अन्यः संधिभेदः । अन्यः संधिभेदज्ञोऽहं तस्य हस्तच्छेदः । **प्रत्यादेशाय** प्रतिरूपफलदर्शनाय स्वावष्टम्भेन साभिमानं सक्रोधं सावज्ञं न्यक्करणं वा । प्रत्यादेशो य एवं करोति तस्य तस्याहमेवं कर्तेति व्याख्यापनं प्रत्यादेशः ॥ ३३५ ॥

पिताऽऽचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ॥
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ॥ ३३६ ॥

भार्यापुत्रः स्वका तनुरात्मीयं शरीरं कः पुनरात्मनो दण्डः प्रायश्चित्ततपोधनदानादिविचलितो धर्मः स्वकान्यो यः स्वधर्मान्न तु तिष्ठति स सर्वो दण्ड्यः ॥ ३३६ ॥

कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः ॥
तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा ॥ ३३७ ॥

प्राकृतो जनः सामान्यपुरुषो यो नातिगुणसंयुक्तस्तस्य यत्र यस्मिन्नपराधे यावान् दण्डस्तत्सहगुणो राज्ञः कार्षापणग्रहणस्य दण्डपरिमाणोपलक्षणार्थत्वात् दण्डस्य चात्मानमनियम्य परो नियन्तुं न शक्यत इति युक्तं प्रत्यपराधे राज्ञो दण्डार्हत्वं । महाधनत्वादल्पं दण्डं न विगणयेत् । राजाधिकृतानां मन्त्रिपुरोहितादीनामनयैव कल्पनया न्यूनाधिकभावः धनदण्डश्च ब्राह्मणेभ्योऽप्सु प्रवेशनेन वरुणाय वा यतो वक्ष्यति राज्ञां दण्डधरो हि सः ॥ ३३७ ॥

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् ॥
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च ॥ ३३८ ॥
ब्राह्मणस्य चतुःषष्टिः पूर्णं वाऽपि शतं भवेत् ॥
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ॥ ३३९ ॥

---

१ ण-र-णामपरहृतो । २ फ-भूतेषु । ३ फ-मसावाश्रितो । ४ फ-प्रसिद्धि । ५ फ-व्याख्यानं । ६ फ-फ-भ्रातापुत्रः । ७ ण-र-स्त्रिका । ८ ण-र-सधर्मान्ननुतिष्ठति समार्थी दण्डः । ९ ण-र-नातिबजादि गुण । १० ण-र-दृष्टयार्थत्वात् । ११ फ-मपि । १२ ण-र-दण्डयत्वं । १३ फ-योतावत् ।

८८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'**तद्दोषगुणविद्धि स इति:**' हेत्वभिधानाद्विदुषां दण्डोऽयं यत्र खलजन एकं कार्षापणं दाप्यते तत्राविद्वान् शूद्रोऽष्टगुणामष्टभिः आपाद्यते संबध्यते । यत्किल्बिषं पापं तदेवमुच्यते । अष्टभिर्वाऽऽपाद्यत आहन्यते गुण्यत इति यावदुभयथाऽप्यष्ट गुणस्य वाचकोऽष्टापद्यशब्द एवं तदेव द्विगुणं वैश्यस्य स हि साक्षादध्ययनज्ञानयोरधिकृतः । शूद्रस्तु कथंचिद्ब्राह्मणापाश्रिततत्सङ्गत्या कियदपि ज्ञास्यति । क्षत्रियस्तु रक्षाधिकारदोषेण समाने विद्वत्त्वे ततोऽपि द्विगुणं दण्ड्यते । ब्राह्मणे तु दण्डविधौ न तृप्यति । चतुःचष्टिशतमष्टविंशं वा शतमिति । तस्य हि प्रवचनमुपदेष्टृत्वं वार्धिकं च रक्षा ततो भवेत् । प्राकृतजनस्य तिर्यक्प्रख्यस्यापराधः । अविद्वांसो गुणदोषानभिज्ञा अकार्ये प्रवर्तन्ते । विद्वानपि तथैव चेद्वर्तेत हन्त हन्त जगत् तृतीयस्य शिक्षितुरभावात्तदुक्तं "द्वौ लोकौ धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुत" इति राज्ञः पूर्वेण दण्डाधिक्यमनेन ब्राह्मणस्याधिक्यमात्राविधिश्चायं न यथाश्रुतसंख्याविधिः ब्राह्मणदण्डेऽनवस्थाश्रवणादयं वायं चेति न च विकल्पो युक्तो व्यवस्थाहेतुत्वाभावात् । तुल्यबलस्यैव विषयस्यानुपपत्तेः । को हि राजा द्विजगुणमुत्सृज्य चतुःषष्टिं ग्रहीष्यति । यदि परमदृष्टार्थे दण्डे विकल्प उपपद्येत न चादृष्टार्थोऽयमित्युक्तं । तथा च **गौतमो** "विदुषोऽतिक्रमदण्डभूयस्त्वम्" इत्याह । तस्मादनवस्थाविधित्वं व्याहरन्ति । न च गुणापेक्षो विकल्पो युक्तो नैष्टादिश्लोकेनैव सिद्धत्वात् । अर्थवादाच्चात्र विध्यगतिः स चाधिक्यविधौ लघ्वालंबन इति न यथाश्रुतपरिकल्पने विकल्पने समर्थः ॥ ३३८ ॥ ३३९ ॥

वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च ॥
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ॥ ३४० ॥

वनस्पत एव **वानस्पत्यं** वृक्षाः । स्वार्थे प्रत्ययः । **ग्रासार्थं** गृह्यमाणमस्तेयं वंशांकुरादि । **मूलफलं** वनस्पतीनामन्यद्व्रिससस्यादि त्रादिगणेऽग्रासार्थं मूलफलाहरणे दण्ड उक्तः । अस्तेयवचनं ग्रासार्थे मात्रार्थमक्षीणवृत्तेरपि कथंचिज्जातलौल्यस्य स्मृत्यन्तरदर्शनात्स्वापरिवृत्तेश्च दण्डः । तथा च **गौतमः** "पुष्पाणि स्ववदाददीत फलानि चापरिवृत्तानाम्" इति । दोषार्थमाहिताग्नेरसंनिहिते वनस्पतावुद्वात्यग्नौ तद्धारणार्थं काष्ठमदोषं पालाशीर्वा समिधो व्यादध्यात् । अप्रचुरपलाशे च ग्रामे कथं स्यादित्यादि गृह्णंश्च दोषः । **तृणं च गोभ्यः** । तादर्थ्ये चतुर्थी । गोग्रहणात्प्रस्तारार्थे दोष एव । ये तु ग्रासार्थपदेन गवामभिसंबन्धमिच्छन्ति तेषां गोभ्य इति नोपपद्यते । षष्ठी हि तंत्र युक्ता ॥ ३४० ॥

---

१ फ–रपि कृतशूद्रस्तु । २ ण–र–मागतमिति । ३ ण–र–विप्रतौ । ४ ण–र–तुल्यवद्विकल्पस्य चैव परविषयाश्रयसानुपपत्तेः । ५ फ–र्थो । ६ ण–र–नुवन्धादि । ७ ण–र–अर्थवदास्वात् विध्यवगतिमाधिक्यविधो लधायम्बन इति । ८ ण–र–न्यत्यर्थमदोषः । ९ ण–र–स्वस्तेनार्थे । १० फ–तत्प्रयुक्ता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् ॥
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ॥ ३४१ ॥

अतिदेशोऽयं । यो ब्राह्मणश्चौरानुपजीवति स चोरवद्दण्ड्यः । **याजनाध्यापनेनापि** । अपिः क्रियान्तरसूचकः । तेन प्रतिग्रहप्रीत्यादायापि गृह्यते । क्षत्रियादीनामन्यथैव वार्ता स्वकर्मणा चोरधनं गृह्णतां । ब्राह्मणग्रहणं तु मया किल धर्मेणार्जितं याजयतेत्यभिमाननिवृत्त्यर्थं । अदत्तमादत्ते गृह्णातीत्यदत्तादायी चोरः । लिप्सेत लब्धुमिछेदगृहीतास्वपि दक्षिणासु तत्संबन्धादेव चौरनिग्रहः ॥ ३४१ ॥

द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ॥
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥ ३४२ ॥

द्विजग्रहणं शूद्रप्रतिषेधार्थं । **अध्वगो** नैकग्रामवासी । तत्रापि **क्षीणवृत्तिः** क्षीणपथ्योदनः । द्वाविक्षूदण्डौ **मूलके** प्रदर्शनार्थं चैतत्परिमितहरीतकमुद्गादिशमीधान्यानां । तथा च " शमीत्रिपुसयुग्यघासेषु च नाप्रतिषेध " इति स्मृत्यन्तरं । **परक्षेत्रात्**परकीयस्थानादित्यर्थः परिवृतादपि ॥ ३४२ ॥

असंदितानां संदाता संदितानां च मोक्षकः ॥
दासाश्वरथहर्ता च प्राप्तः स्याच्चोरकिल्बिषम् ॥ ३४३ ॥

पश्वादयो विमुक्तशृङ्खलादिबन्धना मुस्तादियवभूयिष्ठेषु विजनेषु वार्यन्ते । तत्रश्चेन्निद्रायति स्वामिनि पाले वा कश्चित्सन्दानवतः कुर्यात् । तल्लीनकबन्धादिना नूनं निनीषत्यसाविति शङ्कया चौरवद्दण्ड्यः । यस्तु स्वामिगृहच्युतं यूथभ्रंशागतं वा रक्षितुमेव वा बध्नीयान्न तस्य दोष एवं गवादीनामपि गले दामादि संजात एष एव दमः । ये च संदिताः पादस्थशृङ्खलादिना तेषां **मोक्षकः** । दासांश्च रहसि प्रोत्साह्य भक्तदासादीनपहरति " अहं ते बहु ददामि किमेतं भजस " इति । कुलीनानां हरणे वध उक्तः । पुरुषाणामित्यत्रानेन दासा मुच्यन्ते । यद्येवं तत्रैव कुलीनमुक्तमेवं प्रोत्साह्य नयनग्रहणं न कर्तव्यं । तत्र प्रबलादिना चौर्येण वेति । **अश्वरथहर्तेति** । अश्वानां रथानां च महापशूनामित्यत्र राजसंबंधिनोऽश्वा इमे तु जनपदानां । राजेच्छया दण्डः । इह तु नियतो वधः । यद्यपि बहवश्चोरदण्डास्तथापि **स्मृत्यन्तरे**
" बंदिग्राहांस्तथा वाजिकुञ्जराणां च हारिणः । प्रसह्य घातिनश्चैव शूलमारोपयेन्नरान् " ॥ इति । इहापि सामान्यदण्डो येन येनेत्युपक्रम्य तत्तदेव हरेदिति । अन्ये त्वश्वयुक्तो रथ

१ फ–स्तेनं प्रतिगृह्णतो । २ फ–वार्तादि । ३ फ–चोरं । ४ फ–ता । ५ ण–र–न्यस्तादि । ६ ण–र–संजातः । ७ ण–र–मिह । ८ फ–तत्प्रव । ९ ण–र–नपातो । १० फ–सामान्यतो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति सामान्यं मन्यन्ते प्रदर्शनाच्चाश्वगोरथादीनां । तत्र केवलानामश्वानां रथस्य च दण्डश्चिन्त्यः । स्मृत्यन्तरे केवलानामश्वानां चौरदण्डस्योक्तत्वात् । यद्यप्ययुक्तानामपि सिद्धो ये तु प्रोत्साह्य नयनं हरणं मन्यन्ते तेषामश्वरथशब्देन रथकारो लक्ष्यते । रथकर्तेति । स च सर्वशिल्पार्थं शिल्पिनां हरणे चौरदण्डः । अश्वानामपि प्रोत्साहनं वडवादर्शनेन ॥ ३४३ ॥

अनेन विधिना राजा कुर्वाणः स्तेननिग्रहम् ॥
यशोऽस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखम् ॥ ३४४ ॥

अनेनान्तरप्रक्रान्तेन मार्गेण **चौरनिग्रहं कुर्वाणो यशः** सकलजनसाधुवादो **अस्मिंल्लोके** यावज्जीवं **प्रेत्य** मृतस्या**नुत्तमं** स्वर्गाख्यं **सुखमश्नुत** इति । प्रकरणोपसंहारोऽयम् ॥ ३४३ ॥

ऐन्द्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययम् ॥
नोपेक्षेत क्षणमपि राजा साहसिकं नरम् ॥ ३४५ ॥

सहो बलं तेन वर्तते **साहसिकः** । दृष्टादृष्टदोषानपरिगणय्य बलमात्रमाश्रित्य स्तेयहिंसासंग्रहणादि परपीडाकरेषु वर्तमानः प्रकाशं पुरुषः साहसिकः । **तदुक्तं** "स्यात्साहसमिति" । न स्तेयादिभ्यः पदार्थान्तरं साहसं किन्तु प्रसह्यकरणात् तान्येव साहसानि भवन्ति । यद्यप्यग्निदाहवस्त्रपाटनादि साऽपि द्रव्यनाशात्मकत्वात्सिद्धैवेति तस्य निग्रहो **नोपेक्षेत** न विलंबेत क्षणमपि यदा गृहीतस्तदैव निगृहीतव्यः । इन्द्रस्वामिकं स्थानं स्वर्गाख्यमै**न्द्रं** तदाभिमुख्येन प्राप्तुमिच्छन् । अथवा स्वमेव राज्यपदमैन्द्रमिव गच्छन्नविचालित्वसामान्यं निग्राह्य निग्रहेण हि प्रतापानुग्रहाभ्यां प्रजा अनुप्रवर्तन्ते । **तदुक्तं** "समुद्रमिव सिन्धव" इति । **यशोऽक्षयमव्ययं** च द्वैधविशेष्यविशेषणे स्थानमव्ययं यशोऽक्षयमिति । अथोभयेनापि यशो विशिष्यते । **क्षयो** मात्रापचयः । **व्ययो** निरन्वयविनाशः । उभयमपि तन्नास्ति । न मलिनीभवति यशो न कदाचिद्विच्छिद्यते । भूतार्थवादस्तुतिरियम् ॥ ३४५ ॥

वाग्दुष्टात्तस्कराच्चैव दण्डेनैव च हिंसतः ॥
साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः ॥ ३४६ ॥

अयमपरार्थवादो निग्रहविधिः स्तुत्यर्थः । वाचा दुष्टो **वाग्दुष्टस्तस्करश्चौरदण्डेनैव** दण्ड्यः । पारुष्यकृत् दण्डः प्रहरणोपलक्षणार्थः । त्रिभ्य एतेभ्योऽनन्तरातिक्रान्तेभ्यः पापकारिभ्योऽयमतिशयेन **पापकृत्तमः** ॥ ३४६ ॥

---

१ ण-र-अनन्तर । २ ण-र-करणे प्रवर्तमानः । ३ ण-र-सं ; ४ फ-करणान्येव । ५ ण-र-सीभवन्ति । ६ ण-र-स्वयमेव । ७ ण-र-अधिवासत्वं । ८ ण-र-यशोव्ययमिति । ९ फ-तत्रास्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साहसे वर्तमानं तु यो मर्षयति पार्थिवः ॥
स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ॥ ३४७ ॥

अयमप्यर्थवादः । **साहसे** स्थितं पुरुषं **यो मर्षयति** प्रकृत्यर्थेऽयं णिच् । यो मृष्यति क्षमते **स विनाशं** प्राप्नोति द्वेष्यतां च प्रजासु प्राप्नोति द्वेष्यैश्चाभिभूयते ॥३४७॥

न मित्रकारणाद्राजा विपुलाद्वा धनागमात् ॥
समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ॥ ३४८ ॥

अत आह पार्श्ववर्तीयस्य कस्यचित्स्नेहहेतोरमात्यादिना प्रार्थ्यमानो न मृष्येत् । अथवा स एवातिबहुधनं ददातीति नापेक्षेत । सर्वेषां भूतानां भयमावहन्ति **साहसिकाः** । अयमप्यर्थवादः ॥ ३४८ ॥

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ॥
द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥ ३४९ ॥
आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ॥
स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति ॥ ३५० ॥

" वैणवीं धारयेद्यष्टिम् " इति विधानादनुदितशस्त्रग्रहणाः श्रोत्रियाः स्वबलाविष्टं भवति च साहसिके बलातिशयधार्यिवें शस्त्रमतः साहसिकत्वाच्छङ्काय शस्त्रग्रहणमप्राप्तं विधीयते । **शस्त्रं द्विजातिभिर्ग्राह्यमिति** । एतावता वाक्यं विच्छिद्यते । अवशिष्टं तु "घ्नन्धर्मेण" इत्यनेनाभिसंबध्यत इत्यतो द्वे एते वाक्ये । ये त्वेतेष्वेव निमित्तेषु ग्रहणमिच्छन्ति नान्यदेति तेषामतर्कितपोपनताततायिमुखपतितस्याशस्त्रस्य का गतिः । न हि ते शस्त्रग्रहणं तस्य प्रतिपालयन्ति । अथैवं व्याख्यायते " धर्मो यत्रोपरुद्धयते " " विप्लवे कालकारिते " राजनि व्यतिक्रान्ते संस्थायां प्रवृत्तायां शस्त्रं ग्राह्यं । अन्यदा तु सौराज्ये राजैव रक्षतीति न हि प्रसार्य हस्तौ राजा प्रतिपुरुषमासितुं शक्नोति । भवन्ति केचिद्दुरात्मानो ये राजपुरुषानपि शूरतमाभियुक्तान्बाधन्ते शस्त्रवतस्तु बिभ्यतीति सार्वकालिकं शस्त्रधारणं युक्तं । किं पुनर्ग्रहणमात्रं बिभीषिकाजननमात्रम् ? नेत्याह । **घ्नन्धर्मेण न दुष्यतीति** । हिंसापर्यन्तोऽयमुपदेशः । **यत्त्वापस्तंबेनोक्तं** न " ब्राह्मणः परीक्षार्थमपि शस्त्रमाददीतेति " असति यथाभिहते निमित्त आकर्षणस्य प्रतिषेधो न ग्रहणस्य विकोशा हि परीक्ष्यन्ते ।

धर्मस्योपरोधो यदा यज्ञादीनां विनाशः कैश्चित्क्रियते **वर्णानां विप्लवो**ऽव्यवस्थानं वर्णसंकरादि शर्वकालकारिते राजमरणादौ तत्र स्वधनकुटुंबरक्षार्थं शस्त्रं ग्राह्यम् ।

---

१ ण-र-विनाशनाशु । २ फ-स । ३ ण-र-रथाख्रम् । ४ ण-र-शंकया । ५ फ-कार्यकाल- ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये तु परार्थमप्यस्मिन्नवसरे । तथा च **गौतमः** " दुर्बलहिंसायां च विमोचने शक्तश्चेदिति " । उक्तं यज्ञविनाशशंकानिवृत्त्यर्थं शस्त्रग्रहणं । निमित्तांतरमाह । **आत्मनश्च परित्राणे** परिः सर्वतोभवे । शरीरभार्याधनपुत्ररक्षार्थं घ्नन्धर्मेण न दुष्यति । दक्षिणानां च संगरोऽवरोधः । यदि यज्ञार्थं कल्पिता दक्षिणाः कैश्चिदपह्रियेरंस्तदा तन्निमित्तं योद्धव्यं । अन्ये त्वेवमभिसंबध्नन्ति । **दक्षिणानां** हेतोः **संगरे** यदुपरोधः प्रवृत्ते धर्मेऽप्रवृत्ते दक्षिणासंगर इति विशेषाणामर्थ्यवपत्तिपरिभवः । यत्र स्त्रियः साध्व्यो हठात्केनचिदुपगम्यन्ते हन्यन्ते वा एवं ब्राह्मणाः केनचिद्धन्यन्ते तत्र घ्नन्खड्गादिना न दुष्यति हिंसाप्रतिषेधातिक्रमो न कृतो भवतीत्यर्थः । असति प्रतिषेधे कामचारप्राप्तौ विध्यन्तरपर्यालोचनया **गौतमवचन**-मनुध्यायमानेन " दुर्बलहिंसायां विमोचने शक्तश्चेत् " इत्यवश्यं हनने प्रवर्तितव्यं । अथ प्रतिहारशङ्का भवति तदा सर्वत एवात्मानं गोपायेदित्युपेक्षा ॥ ३४९ ॥ ३५० ॥

आत्मपरित्राणार्थमविचारेण योद्धव्यं । तदनुदर्शयति

*** गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ॥**
आततायिनमायांतं हन्यादेवाविचारयन् ॥ ३५१ ॥

आततायुच्यते यः शरीरधनदारपुत्रनाशे सर्वप्रकारमुद्यतः तमविचारयन्न **विचारयेत् हन्यात्** । गुर्वादिग्रहणमर्थवादः । एतेऽपि हन्तव्याः । किमुतान्य इति । एतेषां त्वाततायित्वेऽपि वधो नास्ति । 'आचार्यं च प्रवक्तारम् " इत्यनेनापकारिणामपि वधो निषिद्धः । " गुरुमाततायिनमिति " शक्यः संबन्धस्तथा सत्याततायिविशेषणमेत-त्ततो गुर्वादिव्यतिरिक्तस्याततायिनः प्रतिषेधः कुतः स्याद्वाक्यान्तराभावात् । अथ " नात-तायिवधे दोष " इत्येतद्वाक्यान्तरं सामान्येनाभ्यनुज्ञापकमिति तदपि न विधिरश्रवणात् पूर्वशेषतया चार्थवादत्वे प्रकृतवचनत्वादिह भवंतांस्त्वाहुर्यथाऽऽततायिनमित्येव विधिरव-शिष्टोऽर्थवादस्तथापि गुर्वादीनां वधानुज्ञानं यतोऽन्यदपकारित्वमन्यदाततायित्वं यो ह्यन्यां कांचनपीडां करोति स सर्वेण शरीरादिना स्तेयकारीतस्त्वाततायी । **तथा च पठ्यते**

" उद्यतासिर्विषाग्निभ्यां शापोद्यतकरस्तथा । आथर्वणेन हन्ता च पिशुनश्चापि राजतः ॥

[अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥ १ ॥] †
[उद्यतासिर्विषाग्निभ्यां शापोद्यतकरस्तथा ॥ आथर्वणेन हन्ता च पिशुनश्चापि राजनि ॥२॥]*
[भार्यारिक्थापहारी च रन्ध्रान्वेषणतत्परः । एवमाद्यान्विजानीयात्सर्वानेवाततायिनः॥३॥]

१ ण–र–भवच्छरिर २ ण–र–प्रकारशंका भवति । ३ फ–उद्यतो । ४ फ–धा । ५ ण–र–अनर्थ-वादः । ६ ण–र–भवन्तस्त्वाहुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" मायातिक्रमकारी च रन्ध्रान्वेषणतत्परः।एवमाद्यान्विजानीयात्सर्वानेवाततायिनः"॥ आयान्तमिति वचनादात्तशस्त्रो हन्तुमभिधावन्दारान्वा जिहीर्षन्हन्तव्यः । कृते तु दोषे किमन्यत्करिष्यतीत्युपेक्षा इति ब्रुवते तदयुक्तं । यतः " प्रकाशमप्रकाशं चेति " वक्ष्यति। समानौ ह्येतौ करिष्यन्कृतवांश्च सृष्टश्चेदिति तस्मादायान्तमित्यनुवादः कर्तुमागतं कृत्वा वा गतमिति । आततायित्वाच्चासौ हन्यते । न च कृतवचन आततायित्वमुपैति । नास्यात्मनो रक्षार्थ एव वध आत्मनश्च परित्राण इति नोक्तम् ॥ ३५१ ॥

नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति ॥ ३५२ ॥

न कश्चनेति नाधर्मो न दण्डो न प्रायश्चित्तमिति। **प्रकाशं** जनसमक्षमप्र**काशं** विषादिदानेन येनकेनचिदुपायेन । **मन्युः** क्रोधाभिमानिदेवताऽ**सौ मन्युमृच्छति** । नात्र हन्तृहन्तव्यभावोऽस्ति । पुरुषयोरर्थे आततायिक्रोध इतरेण हन्यत इत्यर्थवादोऽयं । यथा प्रतिग्रहकामः को मह्यं ददातु नाहं प्रतिग्रहीता न त्वं दाता ततश्च कुतः प्रतिग्रहदोषो ममेवमत्रापीह साहसिके दण्डो नाम्नातः। स दण्डपारुष्ये च द्रष्टव्यः । इह त्वधिकतरो यत उक्तं विज्ञेयः पापकृत इति ॥ ३५२ ॥

परदाराभिमर्शेषु प्रवृत्तान्नॄन्महीपतिः ॥
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत् ॥ ३५३ ॥

विवाहसंस्कृतायां स्त्रियां दारशब्दो वर्तते । आत्मनोऽन्यः **परः अभिमर्शः** संभोग आलिङ्गनारभ्य आलिङ्गनं जनद्वयसमवायभोगजन्यायाः प्रीतेः प्रवृत्तिः प्रारंभस्तन्निवृत्त्यर्थं दूतीसंप्रेषणादिना प्रोत्साहनं । अथ च संग्रहणमभिमर्शनं प्रचक्षते । यमर्थं परभार्यागमने **प्रवृत्तं** पुरुषं ज्ञात्वो**द्वेजनकरै**स्तीक्ष्णाग्रैः शक्तिशूलादिभिरङ्कयित्वा नासाछेदादिभि**र्विवासयेत्** । सर्वत्रात्र विशेषदण्डस्योक्तत्वादस्य विषयभावो न सामान्यदण्डोऽयं। किं तर्हि । पुनःपुनः प्रवृत्तौ । इदं तु युक्तं । अलभ्यमानस्य विषयान्तरं प्रवासस्य धनदण्डस्य च कार्यभेदात्समुच्चयः । तथा दर्शयिष्यामः ॥ ३५३ ॥

तत्समुत्थो हि लोकस्य जायते वर्णसंकरः ॥
येन मूलहरोऽधर्मः सर्वनाशाय कल्पते ॥ ३५४ ॥

समुत्थानमुत्पत्तिः । ततः परदारागमनात्**संकरो**ऽवान्तरवर्णरूपो जायते । येन जातेनाध**र्मो** मूलस्य लोकस्य दिवः पतिता वृष्टिस्तां **हरत्यधर्मः**। धर्मे हि सति " आदित्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जायते वृष्टिः" । न च संकरे सत्यपि कारीरीयागो नापि पात्रे दानमतो दानयागहोमानां सस्योत्पत्तिहेतुभूतानामभावात्सर्वजगन्नाशसमर्थो भवति । तस्मात्पारदारिकाधर्ममूलवर्णसंकरः स्यादिति सस्यादिनिष्पत्तिमूलां वा वृष्टिं रक्षन्प्रवासयेत् ॥ ३५४ ॥

परस्य पत्न्या पुरुषः संभाषां योजयन्रहः ॥
पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसम् ॥ ३५५ ॥

संभाषः संभाषणं तमालपितुं कुर्वन्संग्रहणाद्दोषे तत्स्त्रीप्रार्थनादिति पूर्वमाक्षारितोऽभिसंभवामेव पत्न्या[1] तस्यामुत्रादृष्टदोषः चपल उद्भातादौ निषिद्धसंभाषण इति केचित् । कारणादप्यन्यपत्न्या संभाषणं कुर्वन्प्रथम**साहसं** दण्डं **प्राप्नुया**द्दापयितव्य इत्यर्थः ॥३५५॥

यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात् ॥
न दोषं प्राप्नुयात्किंचिन्न हि तस्य व्यतिक्रमः ॥ ३५६ ॥

पूर्वस्य प्रत्युदाहरणमेतत् । अनाक्षारितोऽप्यकारणात्संभाषयन्मिश्रयन्पूर्वदण्डभाक् ॥ ३५६ ॥

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा ॥
नदीनां वाऽपि संभेदे स संग्रहणमाप्नुयात् ॥ ३५७ ॥

परस्य पत्न्येति प्रकृते पुनः **परस्त्रीग्रहणं** मातृभगिनीगुरुपत्न्यादीनामप्रतिषेधार्थं । न हि ताः सत्यपि परसंबन्धित्वे परस्त्रीव्यपदेश्या तीर्थमुच्यते । येन मार्गेण नदीतडागादिभ्यो जलमानेतुमवतरन्ति स हि विजनप्रायो भवति । नानुदकार्थे न तत्र संनिधीयते । सङ्केतस्थानं तादृशमत्र कल्पितायामवश्यमेव गन्तव्यमहमपि संनिधीयमानो नाशंक्यो भविष्यामीति उदकार्थी दिवा शौचाचारं वा करिष्यन्प्रतिपालयन्निति जना मंस्यन्ते । प्रदेशान्तरे तु किमत्रायं प्रतिपालयतीति शङ्का स्यादतस्तीर्थे प्रतिषेधः । **अरण्यं** हि ग्रामाद्विजनो देशो गुल्मवृक्षलतादिगहनो वनवृक्षसंततो **नदीनां संभेदः** समागमः । सोऽपि हि सङ्केतस्थानं स संग्रहणं स्मृतं येनकेनचित्संबन्धेन संबन्धिनि तस्या वस्त्रमाल्यादिदानेनोपकारकरणं तद्दात्रोपक्रान्तं भोजनपानादिना केलिपरिहासो वक्रभणितादिना प्राप्नुयात् । परस्त्रीकामत्वं संग्रहणम् । अतश्च यस्तत्र दण्डः सोऽस्य स्यादित्युक्तं भवति । अनाक्षारितस्यापि सत्यपि कारणेऽयं प्रतिषेधः । यत्त्वापस्तंबेनोक्तं "नासंभाष्य स्त्रियमतिव्रजेदिति" तदन्येषु संनिहितेष्वेतच्छास्त्रज्ञेषु प्रकाश्ये एतच्छास्त्रं भगिनी नमस्ते इत्याद्यभिवादनमविलम्बमानेन कर्तव्यम् ॥ ३५७ ॥

---

१ ख-र-पतीत्यन्यत्राहष्टदोषः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपचारक्रियाकेलिः स्पर्शो भूषणवाससाम् ॥
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥ ३५८ ॥

भूषणं हारकटकादि तदङ्गलग्नं तदीयमेतद्वेति ज्ञात्वा विनाप्रयोजनेनान्यगृहीतमपि स्पृश्यते । एकस्यां खट्वायामसंसक्ताङ्गयोरपि सहासनं सर्वमेतत्तुल्यदण्डम् ॥ ३९८ ॥

*** स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया ॥**
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ॥ ३५९ ॥

प्रदेशास्पर्शस्य यत्र विनैव तत्स्पर्शनं गमनागमनादि संसिध्यति । महाजनसंकुले न दोषः । यथा शरीरावयवोऽपि देशस्तत्र हस्तस्कंधपृष्ठभाण्डावरोपणे तत्स्पर्शे न दोषः। ओष्ठचिबुकस्तनादिषु दोषः । तया वा स्तनादिस्पर्शेनोत्पीडितो यदि कस्तत्सहते भवेन्न कार्षीरित्यादिना प्रतिषेधति **परस्परस्यानुमते** मतिपूर्वमेतत्तस्मिन्नकृते न दोषोऽयम् । न पुनः कर्मादौ । खलं पुरुषं कण्ठेऽवलंबते । पुरुषो वा स्तनान्तरे स्त्रियं तद्धस्तगृहीतद्रव्यादानप्रवृत्ताशुल्के पतिष्याभीति । कर्दमे पततीति निवेदनस्यापि न दुष्यताम् ॥ ३९९ ॥

अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति ॥
चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा ॥ ३६० ॥

उक्तं संग्रहस्वरूपं । दण्ड इदानीमत्रोच्यते । **अब्राह्मणः** क्षत्रियादि**संग्रहणे** कृते **चतुर्णामपि वर्णानां** हीनोत्तमजातिभेदमनपेक्ष्य **प्राणान्तं** प्राणत्याजने मारणे पर्यवसितं **दण्डमर्हति** । कथं पुनर्ब्राह्मण्यां शूद्रायां च संगृहीतस्य समो दण्डः । अत्र हेतुस्वरूपमर्थमाह । **दारा रक्ष्यतमाः सदा** । सर्वस्य कस्यचिद्राज्ञा दारा धनशरीरेभ्योऽतिशयेन रक्ष्याः । तुल्ये हि सङ्करे शूद्रस्यापि कुलनाशः । एतदुक्तं भवति । वाचनिकोऽयमर्थोऽत्र हेतुर्वक्तव्यः । कोऽसौ अत्र पूर्वे व्याचख्युर्न सर्वस्मिन्संग्रहणे प्रागुक्तदण्डोऽयं । किं तर्हि मुख्ये स्पर्शविशेषे जन्यप्रीतिविशेषात्मके गमने कथं हि तीर्थादिष्वपि वदनं गमनं च समदण्डात्तूपपद्येयातां । तस्मादब्राह्मणः शूद्रोऽपि जातिमगने ब्राह्मणे छेदार्हो नान्यः । न हि विषमसमीकरणं न्याय्यमतः स्वप्रागुक्तेषु संग्रहणेष्वनुबन्धाद्यपेक्षया दण्डः कल्प्यः । यत्रैवं निश्चितं गमनार्थ एवायमुपकारः क्रियादिरूपक्रमस्तत्र मुख्यदण्ड एव युक्तो न ह्यत्र वैषम्यमस्ति । दृष्टं चैतदप्यहत्वाऽपीति । यथेदमुक्तं यद्यत्रायं दण्डो मुख्ये संग्रहणे । किं करिष्यतीति नैवान्यन्मुख्यसंग्रहणमस्ति । न ह्यस्य लौकिकः पदार्थोऽवधृतो येन परश्च दस्यनुकारादौ प्रयुक्त इत्येवमस्यैवायं चाभवन् मुख्यं संग्रहणं मन्यते । तत्र

*** कामाभिपातिनी या तु नरं स्वयमुपव्रजेत् ।**
राज्ञा दास्ये नियोज्या सा कृत्वा तद्दोषघोषणम् ॥ १ ॥

१ ण-र वक्तोऽसौ । २ ण-र प्रत्युक्ते ।

८९-९०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महान्दण्डः । प्रतिषिद्धं परस्त्रीगमनं शास्त्रपर्यनुयोज्यमिति चेत् उपकारादावपि प्रतिषेधवत् । प्रतिषेधवद्धि प्रायश्चित्तमपि तुल्यप्रसक्तमिति चेत्का नामेयमनिष्टापत्तिः । किन्तु प्रसज्येत यदा संग्रहणशब्देन तदुच्यते सिक्ते हि रेतसि गन्धेनाद्यभिधानं यत्र यादृशो दण्डस्तत्र तत्समानं दुःखं प्राप्तमतोऽस्मिन्विपर्यये रेतःसेकनिमित्तं तच्छब्देनाभिधानात् उपकारादिषि-रादौ कल्प्यं यदि च संलापादौ स्वल्पो दण्डः स्यात्तदा प्रवर्तेरन् । तत्परस्त्रीसंलापादि-भूतेनान्येनाभिवसता न्यादीपितमन्मथा स्मरशराकृष्यमाणा शरीरनिरपेक्षा राजनिग्रहं न गणयेयुः । राज्यापोह्यानामेव तु निवृत्तौ गृह्यमाणेष्वप्रबन्धवृत्तौ रागे शक्यं निराकरणं तस्मात्परस्त्रीमुपजापतामेव महादण्डो युक्तः । इह त्वन्तग्रहणादादिभूतेनान्येन दण्डेन भवितव्यम् । न ह्यसत्यवादवन्तो भवंति । प्राणोऽन्तो यस्य प्राणान्तस्तावत्पातयितव्यो यावत्प्राणेषु पतति न सर्वस्वग्रहणात् । अङ्गच्छेदाद्यप्युक्तं भवति । एकैकस्य च दण्डत्वमन्यत्र ज्ञातं समुदाये दण्ड आम्नातस्तेषु स महानन्यायोऽन्यजातीयः । स्त्रीसंग्रहणेऽब्राह्मणस्य युक्तैव कल्पना न सर्वत्र तत्र कुलस्त्रीभिरनिच्छन्तीभिः सह रमतीभिः संगृह्यमाणस्य प्राणापहरणं न सजातीयाभिरपि ॥ ३६० ॥

भिक्षुका बन्दिनश्चैव दीक्षिताः कारवस्तथा ॥
संभाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः ॥ ३६१ ॥

भिक्षुका भिक्षाजीविनो भिक्षायाचनारूपं संभाषणमवारिताः कुर्युर्यदि स्वामिना न निषिद्धाः अथवा नैते वारयितव्याः । बन्दिनः स्तावकाः । दीक्षिता यज्ञे भृतिवचनार्थं संभाषेरन् । कारवः सूपकारादय एते तीर्थादिष्वपि न निवार्याः ॥ ३६१ ॥

न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् ॥
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥ ३६२ ॥

केचिद्भिक्षुकादीनां निवारितानां संभाषणे दण्डोऽयमिति मन्यन्ते । तदसत् । नैव ते निवार्या इत्युक्तं । कुतश्च भिक्षुकाणां सुवर्णो दण्डः । तस्मात्कोऽपि प्रकाशमना-क्षारितोऽपि कथं विनिषिद्धगोस्वामिना समाचरन्सुवर्णं दण्ड्यः ॥ ३६२ ॥

नैष चारणदारेषु विधिर्नात्मोपजीविषु ॥
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ॥ ३६३ ॥

यः संभाषणप्रतिषेध उपकारक्रियाप्रतिषेधश्च नैष चारणदारेषु स्यात् । चारणा नटगायनाद्याः प्रेक्षणकारिणः । तथा आत्मोपजीविषु वेषेण जीवत्सु ये दारा अथवा ऽऽत्मजायैव " अर्धो ह वा एष आत्मेति " तां य उपजीवन्ति उत्कृष्टमाकारं सज्जयन्ति संश्लेषयन्ति ते चारणपुरुषेण निगूढाः प्रच्छन्नमापणभूमौ प्रतिष्ठंते । गृहवेषत्वादेव ताः प्रसिद्ध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेश्याभ्यो भिद्यन्ते । चारयन्ति च ता मैथुनं प्रवर्तयन्ति नेत्रभ्रूविलासपरिहासादिभिः पुरुषानाकर्षयन्ति । तदनुज्ञानां सज्जनं वारणं संप्रयोग एव । अथवा स्वा नारी जयति अन्त्याश्च स्त्रीभिश्चारयन्ति प्रवर्तयन्ति वेश्यात्वं कुट्टिनीत्वं च सुधाराणां कारयन्तीत्यर्थः ॥ ३६३ ॥

किंचिदेव तु दाप्यः स्यात्संभाषां ताभिराचरन् ॥
प्रैष्यासु चैकभक्तासु रहः प्रव्रजितासु च ॥ ३६४ ॥

रहोऽप्रकाशं विजने देशे चारणनारीभिः संभाषं कुर्वन् किंचित्सुवर्णाद्यत्यन्ताल्पं सत्रिंशद्भागिकं जातिप्रतिष्ठाने अपेक्ष्य दण्ड्यः । यतो न परिपूर्णता सुवेशत्वं भर्तृभिरनुज्ञाता हि ताः प्रणयन्ते । तत्र भर्तृविज्ञानार्थं दूतीमुखेन व्यवहर्तव्यं । न तु साक्षात्ताभिरस्वतन्त्रत्वात् । प्रकाशं तु नृत्यन्तीनां गायन्तीनां वाऽभिनयतालादिनिरूपणावसरे कीदृशमेतदित्यादिप्रश्नद्वारं संभाषणमनिषिद्धम् । प्रैष्या दास्यः सप्तभिर्दासयोनिभिरुपनता एकं भजन्ते । एकभक्ता एकेनावरुद्धा तत्रान्योऽप्यस्ति दण्डलेशः । किंपुनरयं दासीशब्दः संबन्धिशब्दो य एव यस्याः स्वामी तस्यैव दासी दासा गृह्यन्ते । सा चेन्नावरुद्धा न दोषः संग्रहणे । अवरुद्धायामनेन दण्ड उक्तः । विभागे चैतन्निपुणं चालिङ्गिप्रच्छन्नम् ॥ ३६४ ॥

योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति ॥
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ॥ ३६५ ॥

प्रासङ्गिकमिदम् । **तुल्यः** समानजातीयः । सोऽनिच्छन्तीं कुमारीं **दूषयेत्**कौमार्यादप्रच्यावयेत्स्त्रीपुरुषसंभोगेन सद्यस्तस्मिन्नेवाहन्यविलम्बं हन्तव्यः । **सकामाया** दूषणं नास्ति कुतो वधप्राप्तिः । यच्चात्र भविष्यति तद्वक्ष्यामः । यद्यपि तुल्यवध इत्यत्रापि श्रुतं वधेऽपि जात्यपेक्षायामवश्यंभाविन्यां प्रत्यासत्त्या संबाध्यते ॥ ३६५ ॥

कन्यां भजन्तीमुत्कृष्टं न किंचिदपि दापयेत् ॥
जघन्यं सेवमानां तु संयतां वासयेद्गृहे ॥ ३६६ ॥

जातिधनशीलविद्यानामन्यतमेनापि पितृकुलादुत्कृष्टं **भजन्तीं** प्रवर्तितमैथुनां **किंचिद्दण्डयेत्** । कन्यायाः स्वातन्त्र्याभावात्तद्रक्षाधिकृतानां पित्रादीनां दण्डे प्राप्ते प्रतिषेधः । **जघन्यं** जात्यादिभिर्हीनं **सेवमानां** मैथुनायोत्कलयन्तीं **संयतां** निवृत्तक्रीडाविहारा कञ्चुकिभिरधिष्ठितां पितृगृह एव **वासयेद्**यावन्निवृत्ताभिलाषा संजाता । अथ हीनजातीये निर्वृत्तप्रीतिविशेषा तदा आऽन्त्योच्छ्वासात्संयतैव तिष्ठेत् ॥ ३६६ ॥

उत्तमां सेवमानस्तु जघन्यो वधमर्हति ॥
शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ॥ ३६७ ॥

---

१ र-ण-मैथुनानुकूलयन्तीं । २ ण-र-येननिवृत्तप्रीति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकामाया दूषणे ब्राह्मणवर्जमविशेषेण हीनोत्तमानां वध एव दण्ड इत्युक्तम् । सकामाया दूषणे त्विदमाहुः । उत्तमां रूपयौवनजात्याभिः । जघन्योऽत्यन्तनिकृष्टो नातिसाम्येऽपि गुणैर्वध्यः । समां तु गच्छन्सकामां सशुल्कमासुरविवाह इव पित्रे दद्यात् । न चेदिच्छति पिता तदा राज्ञे दण्डं तावंतं । ननु च गान्धर्वोऽयं विवाह 'इच्छयाऽन्योन्यसंयोग' इति तत्र न युक्तो दण्डः । केनोक्तं गान्धर्वे नास्ति दण्डः । अत एव नायं सतीधर्मः । न चायं विवाहः अग्निसंस्काराभावात् । यदपि शाकुन्तले व्यासवचनममन्त्रकमनग्निकमिति तद्दुष्यंतेन कामपीडितेनैवं कृतं न चेच्छासंयोगमात्रं विवाहः स्वीकरणोपायभेदादष्टौ विवाहा न पुनर्विवाहभेदात् वृत्तवरणं तत्र पुनः कर्तव्यमेवमिति ।

अथवा ऋतुदर्शनोत्तरकालं गान्धर्वः । प्रागृतोः शुल्को दण्डो वा । अथ कन्यायाः का प्रतिपत्तिः । तस्मा एव देया निवृत्ताभिलाषा चेत्काममन्यत्र प्रतिपद्या । शुल्कग्रहणं चात्रापि सकृदुपभोगनिष्कृत्यर्थमस्त्येव । वरश्चेन्निवृत्ताभिलाषो हठाद्वाहयितव्यः ॥३६७॥

अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः ॥
तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम् ॥ ३६८ ॥

यद्यपि सकामा कन्या पित्रा यस्तु तस्याः सन्निहितास्ताननिच्छतोऽभिषह्याभिभूय दर्पेण बलेन कः किं कर्तुं मे शक्तः कन्यानुरागमात्राश्रितः कन्यां कुर्याद्विकुर्याद्दूषयेत् । अनेकार्थः करोतिः । तस्याशु कर्त्याः च्छेत्तव्या अर्धाङ्गुलयः षट्शतानि वा दण्ड्यः । अन्ये तु योऽकामां दूषयेदित्यस्यैव वध्यर्थस्योपसंहारोऽयम् ।

ताडनात्प्रभृतिमारणं यावद्वध्यर्थस्तत्रेमां निकृष्टजातीयां च दूषयन्न मार्यतेऽपि त्वङ्गुली अस्य च्छिद्येत ॥ ३६८ ॥

सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् ॥
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥ ३६९ ॥

सकाममित्यनुवादः । पूर्वस्यापि सकामविषयात् । अभिषह्य करणे पूर्वं दण्डोऽप्रकाशं चौर्यवद्द्विशतोऽङ्गुलीच्छेदवर्जितः । अथ कस्मिंश्चित्पुरुषेऽनुरागवती कन्या तेन संयुज्यमाना कन्या त्वनिवृत्तौ सकामा येन विकृतीक्रियते तस्यायं दण्डः । अथ हस्तस्पर्शमात्रमिह दूषणं प्रार्थनीयायाः कन्याया हस्तस्पर्शः मया स्पृष्टां ज्ञात्वा नान्य एतामर्थ इष्यतेऽन्यस्मिन्ननुरागिणीं मन्यमानः ॥ ३६९ ॥

कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः ॥
शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ॥ ३७० ॥

---

१ ण–र–+कन्यासा । २ ण–र–+अपरेषां मतं । गः कन्यां नाशयति द्वेषेण न तां गच्छति तस्यायं दण्डः । गन्तुस्तु वध एव तथा च स्त्रिया अप्यतेस्मिन्निति कामदण्डो वक्ष्यते । ३ ण–र–सर्वस्यापि । ४ ण–र–अभिषह्यविषये कारण । ५ ण–र–विक्षती ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बालभावाद्रूपादिद्वेषाद्वा **कन्यैव कन्यां** नाशयेत्सा **द्विशतं** दाप्या । **शुल्कश्च** त्रिगुणः । किंपुनः शुल्कस्य परिमाणमेषामन्यद्रूपसौंदर्याद्यपेक्षं सौभाग्यापेक्षं च । **शिफा** रज्जुलताप्रहाराः ॥ ३७० ॥

या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति ॥
अङ्गुल्योरेव वा छेदं खरेणोद्वहनं तथा ॥ ३७१ ॥

स्त्रियाः कन्यानां कन्यालिङ्गं नाशयन्त्यां मौण्ड्यं केशवपनं दण्डोऽङ्गुलिच्छेदो वा **खरेणोद्वहनं** केशच्छेदपक्षे कन्याजात्यादिभेदान्निग्राह्य भेदात् त्रैवर्णिकस्त्रीणां ब्राह्मणादिक्रमेणेमं **दण्डमिच्छन्ति** मुद्राश्च कल्पयन्ति ते प्रमाणाभावादुपेक्षणीयाः ॥ ३७१ ॥

भर्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता ॥
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥ ३७२ ॥

लङ्घनं भर्तारमतिक्रम्यान्यत्र पुरुषागमनं तच्चेत्स्त्री करोति दर्पेण बहवो मे ज्ञातयो बलिनो द्रविणसंपन्नाः । स्त्रीगुणो रूपसौभाग्यातिशयसंपत् । किमनेनाशीलरूपेणेत्येव **दर्पेण । तां श्वभिः खादयेद्यावन्मृता । संस्थानं** देशः । बहवः संस्थिता यत्र जनाश्चत्वरादौ ॥ ३७२ ॥

पुमांसं दाहयेत्पापं शयने तप्त आयसे ॥
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥ ३७३ ॥

योऽसौ पत्न्या जारः स **आयसे** लोहशयने तप्तेऽग्निसमे कृते दाहयितव्यः । तत्र च **शयनस्थितस्य** काष्ठानि वध्यघातिनोऽ**भ्यादध्युः**रुपरि क्षिपेयुः । यावत्काष्ठप्रहारैरग्निज्वालाभिशयनतापेन च मृतः ॥ ३७३ ॥

संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ॥
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥ ३७४ ॥

अभिशस्तस्तत्पापकारीत्यभिशब्दितः । यो यस्यां स्त्रियां संगृहीतः सोऽ**भिशस्तो दण्डितः** । स चेत्संवत्सरः प्रतिपाल्यः । अतीते संवत्सरे पुनस्तस्यामेव संगृह्यते तदा तस्यैकं वारमभिशस्तस्य संवत्सरे गते पुनर्दुष्टस्य द्विगुणो दण्डः । **संवत्सराभिशस्तस्येति** समासपाठे कथंचिद्योजना । व्रात्यया सह संवासे तावदेव किं यावदेव पुनर्दुष्टस्य नेति ब्रूमः तत्राप्युत्तमाधममध्यमानामनेकविधो दण्डः । तत्र कोऽसाविह द्विगुण इति न ज्ञायते । किं तर्हि **चाण्डाल्या संवासे** यावदेव **तावदेव व्रात्ययेति** । "सहस्रं त्वन्त्यजस्त्रियमिति" । व्रातः पूगः संघस्तेन चरितं पुंश्चलीकर्तव्यं अथ व्रातमर्हति व्रात्येत्यस्तेयकारां दण्डादिः का च शतमर्हति याऽनेकपुरुषोपभोग्या पुंश्चली सा हि पुरुषव्रातमर्हति

१ ण–र–कन्यां प्रकुर्याद्या तु स्त्री । ३ ण–र–दर्पवत्या जारः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवाऽनेकपुरुषस्वामिका ग्रामस्य दास्यस्तत्रमेव दास्यश्च व्रात्या ये तद्वदहीना व्रात्या मन्यन्ते । तेषां मतेन मुख्यः शब्दार्थः। अयं हि व्रात्यशब्दः स्मृतिकारैः सावित्रीपतितेषु प्रयुक्तः न च स्त्रीणां तत्संभवः । अथ स्त्रीणां विवाहस्य तदापत्तिवचनादुपनयनं तद्धीनपुरुषवद्व्रात्या गौणस्तर्हि न मुख्यः । यदि नामोपनयनशब्दोऽनुपनयने विवाहे प्रयुक्तस्तथाप्युपनयनहीनो व्रात्य इत्युक्तेन विवाहहीन इति प्रतीयते । यथाऽसिंहोऽयं देश इत्युक्तेन सिंहशब्दस्य माणवके प्रयुक्तस्यापि देशस्यामाणवकत्वं प्रतीयते । अस्ति तत्र मुख्य इहासंभव इति चेन्नासंभवमात्रनिबन्धना गौणी प्रतीतिः । किं तर्हि संबन्धमपरमुपेक्ष्य भवेदुपनयनशब्दो विवाहे गौणः। व्रात्यशब्दस्तु गौण इति को हेतुः । गौणत्वेऽपि विवाहाभावनिबन्धन इति निरुपपदव्रात्यजापि काकाज्जातः काकः श्येनाज्जातः श्येन इति व्रात्येति शङ्क्यते । बहुसंबन्धप्रत्यासत्त्या हि तत्र रूपातिदेशप्रतिपत्तिः । व्रात्यभार्या तु सत्यपि संबन्धेन व्रात्यशब्देन शक्याऽभिधातुं सोऽयमित्यभिसंबन्धे हि पुंयोगादाख्यायामिति तथा भवितव्यं तावतश्चार्थं भेदविवक्षायां तद्धितेनेति। तस्माद्यदि गौणो व्रात्यशब्दो गृहीतव्यस्तज्जाताः प्रत्येया अथशब्दार्थे व्रातमर्हतीति विवाहभ्रष्टा तु न मुख्या न गौणीति न च विवाहकालः स्त्रीणां नियतो यत्कालाद्भ्रष्टा व्रात्याः स्युर्यदपि प्रागृतोर्विवाह्याः तदपि स्वयं वरस्य ऋतुमत्या विना तत् परेणाभ्यनुज्ञात एव काममामरणात्तं चेद्दृहे कन्या ॥ ३७४ ॥

शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् ।
अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते ॥ ३७५ ॥

शूद्र आचाण्डालात् गुप्तं वर्णं द्वैजातं द्विजातीनां स्त्रिय आवसन्मैथुनेन गच्छन् रक्षिता भर्त्रादिभिः स्वनियमेन दण्ड्यः । को दण्ड इति चेदगुप्तां चेद्गच्छत्यङ्गसर्वस्वी हीयते। अङ्गं च सर्वस्वं तद्वत् केन हीयते प्रकृतत्वात्ताभ्यामेवान्यस्यानिर्देशाद्विशेषस्यानुपादानादपराधानन्तरमेवाङ्गं गुप्तं चेद्गच्छति सर्वेण हीयते नैकेनाङ्गेन यावच्छरीरेणापि हान्युद्देशेनाङ्गच्छेदनसर्वस्वहरणमरणान्युपदिष्टानि भवन्ति हानिरस्य कर्तव्येत्यर्थः । तथा च गौतमः (अ.१२सू २-३)"आर्यस्त्र्यभिगमने लिङ्गोद्धारः सर्वस्वहरणं च। गुप्तां चेत्"॥३७५॥

वैश्यः सर्वस्वदण्डः स्यात्संवत्सरनिरोधतः ।
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति ॥ ३७६ ॥

वैश्यस्य सर्वस्वदण्ड उक्तः । इह तु साहचर्यात्सत्यपि द्विजातित्वे न वैश्यस्य समानजातीयागमे दण्डोऽयं किं तर्हि ब्राह्मणक्षत्रिययोरेव । एवं क्षत्रियस्य ब्राह्मणीगमने सहस्रं मौण्ड्यं च मूत्रेणोदकस्थाने गर्दभमूत्रं ग्रहीतव्यम् । अन्ये व्याचक्षते । अन्यस्या-

१ ण-र-दुरुपपद । २ ण-र-प्रत्याहितशब्देन । ३ ण-र-न द्विजेनेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नुपादानात्समानजातीय एव संवत्सरनिरोधनेन दण्डाधिक्यं यदि संवत्सरमवरुद्धं करोति ततोऽयं दण्डः । आद्यमेव तु व्याख्यानं न्याय्यम् । न च समहीनोत्तमानां कथं समदण्डत्वमिति वाच्यं । यत उक्तं "सर्वेषामेव वर्णानां दारा रक्ष्यतमाः सदा" इति ॥ ३७६ ॥

ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ॥ ३७७ ॥

अगुप्ता व्याख्याता । भ्रष्टशीलाऽनाथा च । तद्गमने **वैश्यं पञ्चशतं कुर्यात्** । करोतिः प्रकरणाद्दण्डने वर्तते । दण्डयेदित्यर्थः । पञ्च शतान्यस्येति पञ्चशतः । बहुव्रीहिर्मत्वर्थीयः । तथा कर्तव्यं यथा पञ्चाशतान्यस्य भवन्ति । किं यदधिकं तत्तस्यापहर्तव्यमित्यधनेति क्रमः । तथा सति यस्य पञ्च वै शतानि धनं वा न्यूनं तस्य दण्डो न कश्चिदुक्तः स्यात् कस्तर्ह्यर्थः । पञ्चशतं कुर्यादिति । दण्डाधिकारा दण्डं पञ्चशतसंबन्धिनं कुर्यात् । एवं सहस्रिणं क्षत्रियमिति । सहस्रमस्यास्ति दण्डो न गृहे धनम् । अन्नसर्वस्वीति व्याख्येयं तथा कर्तव्यं यथाऽन्नं सर्वस्वं च तस्य दण्डो भवति क्षत्रियस्याधिको दण्डो रक्षाधिकृतो रक्षति तत्पुनः स एवापराध्यति ॥ ३७७ ॥

उभावपि तु तावेव ब्राह्मण्या गुप्तया सह ।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥ ३७८ ॥

तावेव क्षत्रियवैश्यौ **गुप्तया ब्राह्मण्या विप्लुतौ** कृतमैथुनौ मैथुनप्रवृत्तावेव विप्रशूद्रवद्दण्ड्यौ 'गुप्ते सर्वेण हीयत' इति । **दग्धव्यौ वा कटाग्निना** वा शब्दो वधप्रकारविकल्पे[1] वधविकल्पेन । न हि शूद्रगुप्ते वधादन्यो दण्ड आम्नातः ॥ ३७८ ॥

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्याः सह सङ्गतः ॥ ३७९ ॥

गुप्ता भ्रष्टशीलाऽपि यदि केनचिद्रक्ष्यते पित्रा भ्रात्रा बन्धुभिर्वा तां हठाद्गच्छन् **सहस्रं ब्राह्मणो** दाप्यः । गुप्ता शीलवती चेत्प्रवासनाङ्कनेनाधिके । अथापि शीलवत्यपि गुप्तशब्देनोच्यते । तथापि सहस्रमात्राद्ब्राह्मणो मुच्यते । अङ्कनप्रवासने सर्वत्र मुखीक्रियेते परदाराभिमर्शे ॥ ३७९ ॥

मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥ ३८० ॥

यत्र क्षत्रियादीनां वध उक्तस्तत्र ब्राह्मणस्य मौण्ड्यं यथाऽब्राह्मणः संग्रहणात्प्राणान्तं दण्डमर्हति तथा तु पुमांसं दाहयेदिति प्राणानामन्तं गच्छति प्राणान्तं वा करोति **प्राणान्तकः** । " अन्येष्वपि दृश्यते " (व्या. सू. ३।२।१०१) इति दण्डः । अन्ये तु **प्राणान्तिक**

---

1 ण-र-विप्रकार ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति पाठान्तरं प्राणान्ते भवः प्राणान्तिकः अध्यात्मादित्वाट्ठञ् **इतरेषां** ब्राह्मणादन्येषां क्षत्रियादीनां **वर्णानां** प्राणान्तिक एव श्रुतं मारणादिपूर्वमेव तदनन्तरमिदमुच्यते उच्यमानं मौण्ड्यं तच्छेषतया सहस्रं दण्डो विधीयत इति मन्यन्ते । अन्यथा ब्राह्मणस्य प्राणांतदण्डविधानात्कः प्रसङ्गो ब्राह्मणस्य येनैवमुच्यते मौण्ड्यं प्राणान्तिक इति पुमांसं दाहयेदिति सामान्यविधानप्रसक्तामिति चेत्तत्रैव कर्तव्यं स्यात्तथा हि स्फुटं तद्विषयत्वं प्रतीयते ॥ ३८० ॥

न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम् ॥
राष्ट्रादेनं बहिःकुर्यात्समग्रधनमक्षतम् ॥ ३८१ ॥

सर्वपापेष्विति प्रकरणविधौ न केवलं संग्रहणे ब्राह्मणो न हन्यते यावदन्येष्वप्यपराधेषु । अपिशब्दो युगपत्सर्वपापकार्यपि ब्राह्मणो न जातु कदाचिद्धन्तव्यः । किं तर्हि तस्य पापकारिणः कर्त्तव्यं **राष्ट्रादेनं** विषयाद्ब्राह्मणं **बहिःकुर्यान्निर्वासयेत् समग्रधनं** सर्वस्वसहितं **अक्षतमक्षतशरीरं** धनमप्यस्य नापहर्तव्यं । कथं तर्हि दण्डो ब्राह्मणस्य केचिदाहुर्निर्वासने त्वाधीयमानं सधनं निर्वास्य धनदण्डं प्रतिषेधति । अन्ये तु समग्रं धनं हृतसर्वस्वं कृत्वा निर्वास्यत इति मन्यन्ते ॥ ३८१ ॥

न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि ॥
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥ ३८२ ॥

पूर्वशेषोऽयमर्थवादः । **न ब्राह्मणवधादन्यो** बहुतरोऽ**धर्मो** दुःखफलोऽस्ति अन्यशब्दाध्याहारेण पञ्चमी । **तस्माद्धेतोरस्य** ब्राह्मणस्य **राजा** मारणमङ्गच्छेदं वा **मनसाऽपि** नेच्छेत् ॥ ३८२ ॥

*** वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ॥**
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥ ३८३ ॥

अगुप्ताया ब्राह्मण्यागमने वैश्यः पञ्चशतं कुर्यात्क्षत्रियं सहस्रिणमिति । तत्र वैश्यस्य पञ्चशतो य एव परिपालयति स एव चेन्नाशयति युक्तं तस्य दण्डमहत्त्वम् ॥ ३८३ ॥

सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन् ॥
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः ॥ ३८४ ॥

गुप्ते क्षत्रियावैश्ये गच्छन्ब्राह्मणः **सहस्रं** दण्ड्यः । प्रवासनाङ्कने स्थिते एव । शूद्राया गमने क्षत्रियवैश्ययोः **साहस्रो** दण्डः । सहस्रमेव साहस्रं स्वार्थिकोऽण् । सहस्रं वा दण्डोऽस्ति साहस्रो दण्डोऽत्र पदार्थः । मत्वर्थीयोऽण् ॥ ३८४ ॥

*** क्षत्रियां चैव वैश्यां च गुप्तां तु ब्राह्मणो व्रजन् ।**
न मूत्रमुण्डः कर्तव्यो दाप्यस्तूत्तमसाहसम् ॥ १ ॥

१ ण-र-युक्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः ।
मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्रियो दण्डमेव वा ॥ ३८५ ॥

वैश्यस्य पञ्चशतानि दण्डः । अगुप्तां च क्षत्रियां गच्छति क्षत्रियस्य स एव यदि वा मौण्ड्यं मुण्डनमृच्छेत्प्राप्नुयाद्गर्दभमूत्रेण एष एव वैश्यागमन उभयोर्दण्डः ॥ ३८५ ॥

*** अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ॥**
शतानि पञ्च दण्ड्यः स्यात्सहस्रं त्वन्त्यजस्त्रियम् ॥ ३८६ ॥

ब्राह्मणस्य क्षत्रियाद्यगुप्तास्त्रीगमन उभयोर्दण्डः । अन्त्यजश्चण्डालश्वपचादिस्तत्र सहस्रम् । तत्रायं सहस्रपणदण्डसंग्रहः ब्राह्मणस्य चतुर्ष्वपि वर्णेषु गुप्तागमने सहस्रं श्रोत्रियदारेषु प्रवासनाङ्कने अन्यत्र प्रवासनमेव श्रोत्रियदारेषु प्रायश्चित्तमहत्त्वादेव कल्प्यते । गुप्तागमने पञ्चशतानि प्रवासनाङ्कने । यद्यप्यगुप्तापरदारात्यपदेशो भवति विवाहसंस्कारे सति तथापि स्वैरिणी भर्तृस्वतामतिक्रान्ता अब्राह्मणस्य प्राणान्तो गुप्तागमने दण्डो बलात् सकामागमने साहस्रो दण्डः प्रवासनाङ्कने च गुप्तागमने वैश्यं पञ्चशतं कुर्यात्क्षत्रियं सहस्रिणामिति ॥ ३८६ ॥

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् ॥
न साहसिकदण्डघ्नो स राजा शक्रलोकभाक् ॥ ३८७ ॥

यस्य राज्ञः पुरे देशे राष्ट्रे स्तेनश्चौरो नास्ति स शक्रस्येन्द्रस्य लोकं स्थानं भजते स्वर्गं प्राप्नोति । नान्यस्त्रीगमनमन्यस्य या स्त्री भार्याऽवरुद्धा पुनर्भूर्वा स्त्रीग्रहण-मभार्याया अप्यसंबन्धिन्याः प्रतिषेधार्थम् । दुष्टवाक् त्रिविधस्याक्रोशस्य कर्ता साहसिक उक्तः । दण्डेन हन्ति दण्डपारुष्यकृत् । शक्रलोकभागिति सर्वत्रानुषङ्गः । स्तेनादीनां शरीरसंग्रहदोषेऽयमर्थवादः ॥ ३८७ ॥

एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके ॥
साम्राज्यकृत्सजात्येषु लोके चैव यशस्करः ॥ ३८८ ॥

साम्राज्यपरः प्राणयितास्वातन्त्र्यं सजातेषु समानस्पर्द्धिनो राजानः सजात्या अभिप्रेतास्तेषु मूर्द्धन्यधितिष्ठति तस्याज्ञाकराः संभवन्तीत्यर्थः । लोके च यशस्कर इत्यु-त्पादयन्ति । उभयत्रापि निग्रह एव कर्त्ता हेतुत्वात् । जनमारकोऽयं क्रोधन इति वदन्त्यपि तु स्तुवन्ति ॥ ३८८ ॥

---

* शूद्रोत्पन्नांशपापीयान्नवं मुच्येत किल्बिषात् । तेभ्यो दण्डाहृतं द्रव्यं न कोशे संप्रवेशयेत् ॥ १ ॥ अयाजिकं तु तद्राजा दद्यादृतकवेतनम् । यथा दण्डगतं वित्तं ब्राह्मणेभ्यस्तु लंभयेत् ॥ २ ॥ भार्यापुरोहितस्तेना ये चान्ये तद्विधा द्विजाः ॥ ३ ॥

१ ण-र-विप्रक्षत्रियविप्रस्त्रीरगुप्ता परिव्रजन् । २ ण-र-विना । ३ ण-र-अगुप्तागमने । ४ फ-मौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि ॥
शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतम् ॥ ३८९ ॥

यज्ञे कर्मकर **ऋत्विग्**घोतोद्गात्रादिः। यद्यपि वर्णोत्तरकालमाप्रयोगसमाप्तेस्तद्व्यपदेशस्तथाप्यत्र कर्मणोरितरेतरत्यागे विधिरयं किं तर्हि प्राग्वरणात्। भूतपूर्वगत्या ऋत्विग्व्यवहारः यः प्रयोगान्तरे वृतः स एव **शक्तः** प्रयोगान्तरेऽपि वरितव्यः। न केवलं पूर्ववृतस्यायमत्यागः। किं तर्हि तत्पित्रादिभिरपि। तथाहि 'पूर्वो जुष्टः स्वयंवृत' इति **नारदः**।

न चायमैकपुरुषिको नियमः। किं तर्हि कुलधर्मोऽयम्। तथा च **महाभारते** संवर्त्तमरुत्तीयेषु प्रपञ्चितं तेन यत्कुलाः पित्रादिभिर्ऋत्विजो वृतास्त एव वरीतव्याः। याजनकानामप्येष एव विधिस्तैरपि ते योजनीयाः। ऋत्विजं कृतार्त्विज्यं तत्कुलीनं वाऽन्यं यो न वृणीत यियक्षुरपि त्वन्यं याजकमर्थयेत् **शक्तं कर्मणि** यज्ञे प्रयोगज्ञमदुष्टमभिशंसनाङ्गवैकल्यादिभिर्दोषैरयुक्तमेवमीदृश एवर्त्विगर्थ्यमानो यदि नाङ्गीकुर्याद्याजकत्वं अदुष्टमेभिरेव दोषैरनाक्रान्तं याज्यं शक्तं विद्वत्तया च तादृशे त्यागे **तयोः शतं दण्डः**। **ऋत्विक् शतं** दाप्यो **याज्यं त्यजन्याज्यऋत्विजम्**। न केवलमयमृत्विग्याजकधर्मः शिष्याचार्ययोरपि। तथाच **गौतमः**-(अ.१२सू.१२-१३.) "अथ याजकावृत्विगाचार्यौपतनीयसेवायां च हेयावन्यत्र हानात्पतति" इति। दातृसंप्रदानयोरपि प्रतिग्रहे केचिद्धर्ममिममिच्छन्ति॥ ३८९॥

न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति ॥
त्यजन्नपतितानेतान्राज्ञा दण्ड्यः शतानि षट् ॥ ३९० ॥

माता न त्यागमर्हति। न त्याज्या। त्यागः स्वगृहान्निष्कासनं मातृवृत्तेः सत्कार्या[3] उपकारस्योपक्रियायामुदितायामकारणे एवं पित्रादीनामपि व्याख्येयम्। संबन्धे साहचर्यात्**स्त्री** भार्यैवाभिप्रेता। अपतितानामेषां त्यागो नास्ति। मातुस्तु "न मातापुत्रं प्रति पततीत्येक इति" **शातातपः**। भार्यायाश्चापि त्यागः संभोगे गृहकार्यनिषेधः। भक्तवस्त्रादिदानं तु न निषिध्यते। "योषित्सु पतितास्वपि। वस्त्रान्नमानं देयं च वसेयुः स्वगृहान्तिके॥" इति पठ्यते॥ ३९०॥

आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः॥
न विब्रूयान्नृपो धर्मं चिकीर्षन्हितमात्मनः॥ ३९१ ॥

वानप्रस्थादीनामरण्याश्रमवासिनामाश्रमेषु कार्ये धर्मसंकटरूपमयं शास्त्रार्थो नायमिति इतरेतरं विवदमानां न धर्मव्यवस्थां सहसा विब्रूयात्प्रभुतया निर्णयमन्येषामिव न कुर्यात्। कथं तर्हि? वक्ष्यमाणेन प्रकारेण। एवमात्मने हितं कृतं भवति। शास्त्रार्थत्यागो

१ फ-अन्यायः २ महाभारते १४।४। ३ ण-ट-सत्कारस्य।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न भवतीत्यर्थः । गृहस्थानां चाश्रमित्वेऽपि यथोक्त एव निर्णयप्रकारः । **कार्ये** धर्मसंशयात्मकविवादपदम् । आश्रमग्रहणाच्च विशिष्टविषयता व्याख्यायते ॥ ३९१ ॥

यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह पार्थिवः ॥
सान्त्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत् ॥ ३९२ ॥

यथा तत्कर्तव्यं तथेदानीमाह । यो यादृशी पूजामर्हति गुणानुरूपेण तं तथैवाभ्यर्च्य **ब्राह्मणैर्म**न्त्रिपुरोहितादिभिः आचार्यसाहित्ये धर्मप्रवचने वा । तदा च ब्राह्मणाः सत्या विज्ञेयास्तैः सह **स्वधर्म**न्याय्यमर्थं बोधयेत् । सिद्धे महत्त्वे सम्येभ्य उपदेशः प्राधान्यार्थस्तान्पुरस्कुर्यात् । तथाहि । न राज्ञः कुध्यन्ति शास्त्रेण प्रीतिस्तुतिवचनैः प्रथमं प्रथममप्यत्यपनीतक्रोधान्कृत्वा ततो ब्रूयात् ॥ ३९२ ॥

प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे ॥
अर्हावभोजयन्विप्रो दण्डमर्हति माषकम् ॥ ३९३ ॥

विशन्त्यस्मिन्निति वेशो निवासस्तत्प्रतिगतः प्रतिवेश्यः पृष्ठगृहाभिमुखस्तत्र भवः **प्रातिवेश्यः ।** प्राग्दीव्यतीये स्वार्थिकोऽण् । एवमनुवेश्यः पृष्ठतो वसन्तौ चेन्न भोजयेत् । यदि स्वगृहमानीय **कल्याणे** विवाहाद्युत्सवे **विंशति**मात्रा यत्र **द्विजा** अन्ये भोज्यन्ते तदा माषकं सुवर्णं दण्डं दाप्यो हिरण्यमित्युत्तरत्र विशेषणादिहापि विज्ञायते । **अर्हौ** यदि तौ प्रातिवेश्यानुवेश्यौ योग्यौ भवतो न द्विषन्तौ नात्यन्तनिर्गुणौ ॥ ३९३ ॥

श्रोत्रियाः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन् ॥
तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकम् ॥ ३९४ ॥

अप्रातिवेश्यार्थोऽयमारंभः । सब्रह्मचारिणामयं नियमः । **श्रोत्रिय**स्तादृशमेव । **श्रोत्रियं** गुणवन्तं **भूतिकृत्येषु** भूतिर्विभवस्तन्निमित्तेषु कार्येषु विभवे धनसंपत्तौ सत्यां यानि क्रियन्ते गोष्ठीभोजनादीनि । अथवा भूतिग्रहणं कृत्यविशेषणं । भूतिमन्ति यानि कृत्यानि प्राचुर्येण प्रभूतया विवाहादीनि क्रियन्ते यत्र विंशतेरधिकनरा भोज्यन्ते तादृशेषूत्सवेषु अभोजयंस्तदर्थमन्नं भूतिकृत्येषु भोक्तव्यं तावद्द्विगुणं तस्मै दापयेद्राज्ञे वा उभयं हिरण्यं माषको वा ॥ ३९४ ॥

अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः ॥
श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचित्करम् ॥ ३९५ ॥

सप्तत्या स्थविरः प्रकृत्या विरूप इतिवत्तृतीया । सप्ततिर्वर्षाणि यस्य जातस्य स एवमुच्यते । **श्रोत्रियेषु** वेदाध्यायिषूपकुर्वन्पादशुश्रूषादिना कारुकर्मणा वा एतेन कर्मवत्कारुशिल्पिनो मासिमासीत्यादि दाप्याः । क्षीणकोशेनापि दातव्या इति केनचिद्ग्रहणम् ॥ ३९५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रोत्रियं व्याधितार्त्तौ च बालवृद्धावकिंचनम् ॥
महाकुलीनमार्यं च राजा संपूजयेत्सदा ॥ ३९६ ॥

संपूजनमनुग्रहः । अनेकार्थत्वाद्धातूनां न हि बालादीनामन्या पूजोपपद्यते । श्रोत्रियोऽत्र ब्राह्मण एवेति स्मरन्ति । **आर्त्तः** प्रियवियोगादिना । **अकिंचनो** दुर्गतः । **महाकुलीनः** ख्यातिधनविद्याशौर्यादिगुणे कुले जातो महाकुलीनः । **आर्यं** ऋजुप्रकृतिरवक्रः । एतेषां दानमानादिभिरनुग्रहः कर्तव्यः । केचिदकिंचनमहाकुलीनविशेषणं व्याचक्षते ॥ ३९६ ॥

शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः ॥
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥ ३९७ ॥

शाल्मली नाम वृक्षस्तद्विकारे फलके । स हि प्रकृत्यैव दृढो भवति । न च वाससोऽपि पातैरवयवा अस्य च्यवन्ते । ते हि च्युता वासः पाटयेयुः । न चायं जातिनियमो दृष्टो येनान्यदपि यत्काष्ठमेवंस्वभावं तत्फलके न दोषः । **श्लक्ष्णे**ऽपरुषे च **वासां**स्यन्यदीयान्यन्यदीयै**र्वासोभिर्न निर्हरेत्** । बद्धोपरिवेष्टच तीर्थे प्रक्षालयितुं न नयेत् । बन्धनाद्वाससां विनाशो माऽभूत् । अधिकं हि तानि पीडितानि भवन्ति । **न च वासयेत्** अन्यदीयानि वासांस्यन्यस्मै प्रयच्छन्वसनार्थं न दद्यात् । एतद्धि वासनं वस्तेऽपरस्तं रजको वासयति अश्रुतत्वाद्दण्डस्य प्रकृतमापकयोजना कर्तव्या ॥ ३९७ ॥

तन्तुवायो दशपलं दद्यादेकपलाधिकम् ॥
अतोऽन्यथा वर्तमानो दाप्यो द्वादशकं दमम् ॥ ३९८ ॥

तन्तून्वयति **तन्तुवायः** कुविन्दः । शाकटकादेः पटस्य कर्ता । स सूत्रपलानि दश गृहीत्वा शाटकं यं नैकपलाधिकं वस्त्रं दद्यात् । अनया वृद्ध्या सर्वं दद्यात् । स्थूलसूक्ष्मादिवाससां रोमवतां च कल्पना कर्तव्या । अन्यथा द्वादशपणो दण्डः । वृद्धिदानेऽयं दण्डो मूलच्छेदे तु सूत्राणि गणोक्तः । एवं विंशतिपलं यदि न ददाति वृद्धिं द्विगुणो दण्डः । एवं कल्पना कार्या । त्रिगुणश्चतुर्गुण इत्यादि । अन्ये तु दण्डं राजभागमित्याहुः ॥ ३९८ ॥

शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः ॥
कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ॥ ३९९ ॥

येषु प्रदेशेषु शुल्कमादीयते तानि **शुल्कस्थानानि** च राजभिर्वणिग्भिः स्वप्रतिदेशनियतानि कल्पितानि । येषु स्थानेषु ये **कुशलाः** शौल्किकाः ये धूर्तैर्न च शक्यन्ते वंचयितुं तथा सर्वेषां पण्यानामागमक्रयविक्रयसारसादिविविज्ञा **विचक्षणास्**तैर्भाण्डस्यागतस्यान्यदेशान्तरानीयमानस्य वाऽर्घं **कुर्युस्ततो विंशति**भागं राजा गृह्णीयात् । किंपुनरर्घकरणेनैतावदेव वक्तव्यं पण्यानां विंशतिभागमिति । सत्यम् । यदा स्वरूपेण द्रव्यं राजा न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृह्णाति स्वरूपकान्युपयुज्यन्ते साटकादीनि विंशतिर्विंशतिभागः प्राग्विंशतेर्न पाटनमन्तरेणोपपद्यत इत्येवमर्थमर्घकरणमविक्रेयाणामात्मोपयोगिनां नास्ति शुल्क इति ज्ञापितुम् । यथापण्य एव कालानुरूप्येण न सर्वपण्यं सर्वदा विक्रियत एकरूपेणार्घेण अतो देशकालापेक्षया पण्यानामर्घव्यवस्था न नियतोऽत्र इति ॥ ३९९ ॥

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च ॥
तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ॥ ४०० ॥

राज्ञः संबन्धितया **प्रख्यातानि** यानि **भाण्डानि** राजोपयोगितया यथा हस्तिनः काश्मीरेषु कुंकुमप्रायेषु पट्टोर्णादीनि प्रतीच्येष्वश्वा दाक्षिणात्येषु मणिमुक्तादीनि यद्यस्य राज्ञो विषये सुलभमन्यत्र दुर्लभं तत्र तस्य प्रक्षालनं भवति । तेन हि राजान इतरेतरं संदधते । **प्रतिषिद्धानि यानि** राज्ञा मदीयाद्देशान्नैतदन्यत्र नेयं अत्रैव वा विक्रेयं यथा दुर्भिक्षे धान्यमित्येवमादीनि । **लोभान्निर्हरतो** देशान्तरनयतो विक्रीणानस्य वा **सर्वहारं हरेत्**सर्वहरणं सर्वहारः । अयं धनलोभान्नयतो दण्डः । राजान्तरोपायनार्थे त्वधिकतरः शारीरोऽपि दुर्गावरोधादिः ॥ ४०० ॥

शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी ॥
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम् ॥ ४०१ ॥

क्रयविक्रयी वाणिज्य उच्यते । **शुल्कस्थानं परिहरन्**नुत्पथेन गच्छन्नकाले वा रात्रौ शुल्काध्यक्षेषु गतेषु **संख्याने मिथ्यावादी** न्यूनं कथयति गणनायाम् । उपलक्षणं चैतत्संख्यानं तेन प्रच्छादनेऽप्येष एव विधिः । **दाप्योऽष्टगुणमत्ययं** दण्डो यावदपहुते तावदष्टगुणं यावान्वा तस्यापह्नुतस्योचितः शुल्कस्तमष्टगुणं दाप्यः । आद्यमेव युक्तम् । अत्ययशब्दो हि तत्र समंजसः तद्धेतुत्वाद्रूव्ये । अन्ये त्वकाले क्रयविक्रय इति संबन्धं कुर्वन्ति । अकालश्चागृहीते शुल्के रहसि वा प्रतिषेधोऽयम् ॥ ४०१ ॥

आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ ॥
विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ ॥ ४०२ ॥

आपणभूमौ ये विक्रेतारस्ते न स्वेच्छया मूल्यं कर्तुं लभेरन्नापि राजा क्रीणीयात् स्वरुचिकृतेन मूल्येन । कथं तर्हीदमिदं निरूप्य आगमं किं प्रत्यागच्छति देशान्तरादुत न तथेयतो दूरादागच्छति । एवं निर्गमस्थाने किं संप्रत्येव विक्रियत उत तिष्ठति । संप्रति निष्क्रामतो द्रव्यस्य स्वल्पोऽपि लाभो महाफलस्तदुत्थितेन मूल्येन द्रव्यान्तराविषयेण पुनर्लाभो स्थानात् वृद्धिक्षयौ कियत्यस्य वृद्धिस्तिष्ठति कीदृशो वा क्षय इत्येतत्सर्वं परीक्ष्य स्वदेशे क्रयविक्रयौ कारयेत् । यथा न वणिजां पीडा भवति नापि क्रेतॄणां तथाऽत्र व्यवस्थापयेत् ॥ ४०२ ॥

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते ॥
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः ॥ ४०३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगमनिर्गमनादेर्द्रव्यस्यानित्यत्वादुपचयापचयावर्घस्यानेकरूपौ । ततोऽर्घसंस्थापनं **पञ्चरात्रे पञ्चरात्रे** प्रत्यक्षीकार्यं न सकृत्कृतं मन्तव्यं नापि वणिजो विश्वसितव्याः। किंतर्हि स्वयं प्रतिजागरणीयं । यद्द्रव्यं चिरेण निष्क्रामति तत्र पक्षेऽर्घगवेषणमन्यत्र पाञ्चरात्रिकम् ॥ ४०३ ॥

तुलामानं प्रतीमानं सर्वं च स्यात्सुलक्षितम् ॥
षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् ॥ ४०४ ॥

तुलाप्रसिद्ध**मानं** प्रस्थो द्रोण इत्यादि । **प्रतीमानं** सुवर्णादीनां परिच्छेदार्थं यत्क्रियते सर्वतोभागे **तत्सुलक्षितं** राजचिन्हैरङ्कितं कार्यम् । स्वयं प्रत्यक्षेण परिच्छिद्य स्वमुद्रया **परीक्षयेत् षट्सु षट्सु मासेषु** पुनः परीक्षां कारयेदाप्तैरधिकारिभिर्यथा न विचालयन्ति केचित् ॥ ४०४ ॥

पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे ॥
पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान् ॥ ४०५ ॥

नदीतीरे **यानं** गन्त्रीशकटादि **तरेण पादं दाप्यम्** । भाण्डपूर्णानामुत्तरत्रोपदेशाद्रिक्तभाण्डानां यानानां यानद्रव्यानयनार्थमुत्तार्यमाणानामयं राजभागः । पौरुषवाह्यो भारो द्रव्यानयनार्थमानीयमानोऽर्धपणं दाप्यः । पशुर्गोमाहिष्यादिः **पादं स्त्रीचरिक्तको** न किंचिद्यो गृहीतवान्भारं स पुमान्पादार्धं दाप्यः । रिक्तस्य पुंसो नदीलङ्घनसामर्थ्यासंभावनया लाघवादल्पमादानं । स्त्री अशक्तत्वात्स्वयं तरेण बहु दाप्यते **तरे** तरनिमित्तम् ॥ ४०५ ॥

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः ॥
रिक्तभाण्डानि यत्किंचित्पुमांसश्चापरिच्छदाः ॥ ४०६ ॥

भाण्डं द्रव्यं वस्त्रव्रीह्यादि तेन **पूर्णानि यानानि सारतस्तार्यं** तारार्थं दाप्यानि । यदि महार्घं वस्त्रादि तत्र बह्वारोपितं तदा बहु दाप्यानि अथ व्रीह्यादिना नातिचारेण तदाल्पम् । एवं नद्याः सुतरदुस्तरत्वेन कल्पना कर्तव्या । **रिक्तभाण्डानि** यानानि यत्किंचित्पणपादानि। भाण्डशब्दोऽत्र धनवचनः । ये च परिच्छदाकोशतोऽपरिच्छेदास्ते न पादार्धमपि तु यत्किंचित्ततोऽधिकं न्यूनं वा अत्र न शक्यो नियमोऽतः कल्पनैव शास्त्रार्थः ॥ ४०६ ॥

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत् ॥
नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणम् ॥ ४०७ ॥

पारावारोत्तारणे पूर्वं दानम् । अयं नावा ग्रामान्तरगमने । **दीर्घाध्वनि** योजनादिपरिमाणेनागन्तव्ये । **यथादेशं** यस्मिन्देशे यत्तरिदानं नाविकैः स्थापितं तदेव । **यथाकालं** कालो वर्षादि बहूदकस्तत्रान्यन्मूल्यम् । स्वल्पोदकायां सरिति चिरेण ग्रामप्राप्तौ नाविकानामधिकतरायासवतामधिकमूल्यं तरमूल्ये कारणे कार्यशब्दस्तरे भवेदिति यावद्यावद्दीर्घो देशस्तावत्तरपणो वर्धते । एतच्च **नदीतीरेषु विद्यात्** । **समुद्रे** सागरे **नास्ति** तर**लक्षणम्** ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न शक्यते लक्षयितुं कति योजनानि नौर्व्यूढा येन तदनुसारेण मूल्यं कल्प्यन्ते । नदनदीषु शक्यते ज्ञातुमयं पन्था योजनमात्रो द्वियोजन इति । तत्र हि तत्र ग्रामाः परिमाणचिन्हं तत्रैकयोजनेऽध्वनि यन्मूल्यं द्विगुणं तद्द्वियोजने । समुद्रे तु बहुधाह्या नौ न च सुष्टु शक्यते योजनादिपरिच्छेदः कर्तुम् । अत एवोक्तं समुद्रे नास्ति लक्षणमिति ॥ ४०७ ॥

गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः ॥
ब्राह्मणालिङ्गिनश्चैव न दाप्यास्तारिकं तरे ॥ ४०८ ॥

द्वाभ्यां मासाभ्यामृतुदर्शनस्य व्यक्तगर्भा स्त्री भवति तस्या अनुग्राह्यत्वात्तरपणो न ग्राह्यः । प्रव्रजितश्चतुर्थाश्रमी मुनिस्तापसः । ब्राह्मणालिङ्गिनो ब्रह्मचारिणो ब्राह्मणग्रहणं विशेषणम् । तेन बाह्यप्रव्रज्यालिङ्गधारिणां नैष विधिः । तरप्रयोजनं तारिकं पणादि तरनिमित्तं न दाप्याः । वृत्तानुरोधात्तारिकमिति सिद्धे तरग्रहणम् ॥ ४०८ ॥

यन्नावि किंचिद्दाशानां विशीर्येतापराधतः ॥
तद्दाशैरेव दातव्यं समागम्य स्वतोंऽशतः ॥ ४०९ ॥

नाव्यारोपितभाण्डं तरणिकायां यदि दाशानां नाविकानामपराधादावर्तमानजलेन प्रदेशेन नयतां वा तत्स्थानं ज्ञात्वा दृढबन्धनजलप्रवेशमकुर्वतां वध्यादिनहनीभिरयोमयीभिश्चर्मबन्धैः सूत्रबन्धैर्वा शिथिलीकृतवातां यदि भाण्डं विशीर्येत विनाश्येत तदा तैरेव दातव्यं स्वतोंऽशतः स्वराजालभागाद्भाण्डस्वामिने समागम्य यावन्तो नाव्यारूढा दाशाः ॥ ४०९ ॥

एष नौयायिनामुक्तो व्यवहारस्य निर्णयः ।
दाशापराधतस्तोये दैविके नास्ति निग्रहः ॥ ४१० ॥

नौभिर्यान्ति तच्छीला नौयायिनस्तेषामेष विधिरुक्तो यथा दाशापराधाद्दत्तभ्रष्टमुदके तद्युर्दैविके दोष उत्पाते वातादिना नौभङ्गे नास्ति नाविकानां द्रव्यनाशे निग्रहः । एष स्थले भाण्डवाहकानां भारिकाणां वा न्यायः यद्यप्रमादेन प्रक्रामति भारिको गृहीतदण्डावलंबनो दृढबन्धोपरिभागोकस्माद्दृष्टच्या पथि कर्दमीकृते पतितस्य भाण्डं नश्येन्न भारिकस्य दोषः स्यात् ॥ ४१० ॥

वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च ॥
पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनाम् ॥ ४११ ॥

इह केचिद्व्याचक्षते । अनिच्छन्तावपि वैश्यशूद्रौ बलादेव तानि कर्माणि कारयितव्यौ यत एतयोः स्वधर्मोऽयम् । सत्यपि दृष्टार्थत्वेऽदृष्टार्थता विद्यते नियमविधित्वात् । एवं च सति ब्राह्मणोऽपि हठात्प्रतिग्राहयितव्य इत्यापतति पक्ष एव दोषत्वेनायमुक्त इति चेदत्राप्येष एव पक्षस्तदयुक्तम् । सत्यां धर्मार्थितायां शास्त्रतो नियमः । न तु विधिबन्धनैव प्रवृत्तिर्यत्र स्वयं प्रयोजकमस्ति तत्र विधिः प्रयोक्तृत्वं नियमांशे तु विधेर्व्यापारः । स चेदृशो नियमः । वैश्यमेव कारयेद्वाणिज्यमन्यं कुर्वाणमसत्यामापदि दण्डयेत् । एवं ब्राह्मण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेव प्रतिग्रहं तथा च प्रतिग्रहसमर्थोऽपि संतोषपरश्च स्यादित्यापद्यते । यदपि श्रूयतेऽनिच्छतावपीति सोऽर्थवादः । शूद्रमेव दास्यमित्येवं सर्वत्र नियमरूपता द्रष्टव्या ॥४११॥

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ ॥
बिभृयादानृशंस्येन स्वानि कर्माणि कारयन् ॥ ४१२ ॥

ब्राह्मणस्य च **वृत्त्या कर्शितौ ब्राह्मणो बिभृयाद्**भक्तदानादिना क्षत्रियवैश्ययोर्भरणं कुर्यादानृशंस्येनानुकम्पया **स्वानि कर्माणि** कारयेत् । ब्राह्मणस्य यानि स्वानि समित्कुशोदकुंभाहरणादीनि अथवा क्षत्रियवैश्ययोर्यानि स्वानि क्षत्रियो ग्रामरक्षादौ नियोक्तव्यो वैश्यः स्वकृषिपशुपाल्यादौ महाधनो यो ब्राह्मणो महापरिपच्च सामर्थ्यात्तस्यैष विधिः । स्वानि कर्माणीति वचनात् दास्यं कारयितव्यो गर्हितोच्छिष्टमार्जनादि ॥ ४११ ॥

दास्यं तु कारयँल्लोभाद्ब्राह्मणः संस्कृतान्द्विजान् ॥
अनिच्छतः प्राभवत्याद्राज्ञा दण्ड्यः शतानि षट् ॥ ४१२ ॥

संस्कृता उपनीता । यद्यपि द्विजग्रहणादेवैतल्लभ्यते तथापि त्रैवर्णिकजात्युपलक्षणार्थं न विज्ञायीति यो ब्राह्मणः समानजातीयान्दास्यं पादधावनोच्छिष्टावकरणं संमार्जनादिकं रूप**मनिच्छतः** प्रभवतो वाचः **प्राभवत्यं** प्रभुत्वं शक्त्यतिशययोगतो बलादिना यः कारयति **स षट्शतानि दण्ड्यः** । **लोभादे**तत्प्रेषादिभिस्त्वधिको दण्ड्यः । शत्रन्तस्य भवतेर्भावप्रत्यये प्राभवत्यादिति रूपं प्रभुत्वेनेति वचनाद्गुरोर्न दोषः । अनिच्छत इति वचनादिच्छतामन्यो दण्डः ॥ ४१३ ॥

शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा ॥
दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयंभुवा ॥ ४१४ ॥

क्रीतमक्रीतं भक्ताद्युपनतं वक्ष्यमाणस्य विधेरनुवादोऽयं । **दास्यायै**वेत्यर्थवादः॥४१४॥

न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते ॥
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ॥ ४१५ ॥

यमाश्रितः सप्तभिः दासयोनिभिस्तेन **निसृष्टोऽपि** । दास्यायैवेत्यर्थवादः । **न स्वामिना निसृष्टोऽपि** किंतु **निसर्गजं** सहजं जातिसहभाविकं । **तस्माच्छूद्रो** दास्य**मपोहत्य**पनयति यथा शूद्रजातिर्न तस्यापनेतुं शक्यैवं दास्यमपि । अर्थवादोऽयं । यतो वक्ष्यति निमित्तविशेषे शूद्रस्य वा दास्यान्मोक्षः ॥ ४१५ ॥

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ ॥
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ॥ ४१६ ॥

ध्वजग्रहणं वाहनोपलक्षणार्थं । ध्वजिनी सेनोच्यते । तत **आहृतः** । संग्रामे जितः सन्दासीकृतः । किंपुनरिदं क्षत्रियस्य वचनम् । युद्धे जितः क्षत्रियो दासीभवति । नेति ब्रूमः । शूद्रस्यैव प्रकृतत्वात् । " दास्यायैव हि सृष्टोऽसौ " इति स्वामिनं जित्वा

अध्याय ५ श्लो. २२-४१ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदीयो दास आहृतः । आहर्तुर्दास्यं प्रतिपद्यते । ननु शूद्रस्य विशेषेणैव दास्यमुक्तं "निसर्गजं तत्तस्य" इति नैव । तथा सत्यव्यवस्था स्यात्कस्यासौ दास इति न विज्ञायते । सर्वे हि त्रैवर्णिकास्तस्य दासाः पूर्वापरनरवतश्चानियमोऽविधित्वात् । तस्य तु न ते सर्व एवोत्तरे परिचरेयुरिति क्षत्रियादीनामपि दास्यमस्ति तदसत् । अन्यद्दास्यमन्या परिचर्या । निकृष्टकर्मकारित्वमप्यज्ञातस्य दास्यं । सर्वस्याप्रेषितस्याप्रतिबन्धः । परिचर्या तु शरीर-संवाहनमर्थदारादिना । नारदेन चैतत्प्रपञ्चितं[1] । भक्तलाभार्थं दास्यं प्रतिपन्नो **भक्तदासः** । गृहे जातो **गृहजो** दास्यामुत्पन्नो गर्भदासः । **क्रीतो** मूल्येन स्वामिनः सकाशात् । **दत्रिमः** प्रीत्याऽदृष्टार्थं वा दत्तः । क्रमागतः **पैत्रिकः** । अथ गृहजस्यास्य च को विशेषो गृहजस्तदीयायामेव दास्यां जात इतरस्तु क्रमागतः । **दण्डदासो** राज्ञे दण्डं दातुमशक्तो दासीक्रियते । "कर्मणाऽपि समं कुर्यात्" इत्यवर्णस्यापि दास्यमिच्छन्ति तदयुक्तं । अन्यद्दास्यमन्यच्च तत्कर्मकारित्वं । न चायं दण्डो येनान्तर्भवेत् । न च दासयोनि-पुरुषधारणमुक्तं केवलं कर्मणापीति । तथा दासकर्माऽप्यस्ति । ननु च धर्मोपनतोऽपि शूद्रो दास इष्यते । तत्र कथं सप्त दासयोनयः । नैष दोषः । न तस्योत्पत्तिकं दासत्व-मिच्छाधीनत्वाद्धर्मार्थिनो न हि तस्य दानाधानक्रिया युज्यन्ते क्रीतगृहजादिदासवत् । एवं ह्युक्तं यथायथा हि सद्वृत्तमिति तेनैवं ब्रुवतैतत्प्रदर्शितं भवति । न तस्य नित्यं दास्यं किं तर्हि फलविशेषार्थिनः ततश्चानिच्छतो दास्यमस्ति । अतो यदि शूद्रो विद्यमानधनं स्वातन्त्र्येण जीवेद्ब्राह्मणाद्यनपाश्रितो न जातु दुष्येत् ॥ ४१६ ॥

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ॥
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥ ४१७ ॥

एते त्रयोऽर्जितधना **अप्यधनाः** स्वामिनो धनं यत्किंचित्ते धनमर्जयन्ति । **तद्धनं तस्य** स्वं यस्य ते सत्वमापन्नाः । भार्याधनं भर्तुः पितुः पुत्रस्य स्वामिनो दासस्य । ननु च यद्येते निर्धनाः कथमेषां कर्मभिरधिकारस्तत्रेदं नोपपद्यते । पुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता दद्यात्तेभ्यः पुत्र इति । दम्पत्योरपि सहजधर्मश्चरितव्यः । "धर्मे चार्थे च कामे च नातिचरितव्या त्वयेति" । यदि च निर्धनः कोऽन्यार्थेऽनातिचारः । शूद्रस्यापि पाकयज्ञैः स्वयं यजेतेति निर्धनत्वे विरुध्यते । स्वच्छन्दशूद्रविषयत्वेन विरोधो न भवेत् । अस्ति तावद्दासानां स्वधने स्वाम्यं यदा स्वधनमिति व्यपदिश्यते न ह्यसति संबन्धे व्यपदेशः । अर्जनं च स्वत्वं नापादयतीति विप्रतिषिद्धं तस्माद्विरुद्धमिदं **यत्ते समधिगच्छन्ति** । न तत्तेषां स्वामिनि यथाकश्चिद्ब्रूयाद्यस्या अहं पुत्रः सा मम जननीति तादृगेतत् । असति वा स्त्रीणां स्वाम्ये पत्न्यैवानुगमनं क्रियते "पत्नी वै पारिणाह्यस्येश" इत्यादि **श्रुतयो** निरालम्बनाः स्युः । अत्रोच्यते । पारतन्त्र्यविधानमेतत् । असत्यां भर्तुरनुज्ञायां

१ अ. ५ श्लो. २२-४३ । २ फ-तत्वेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न स्त्रीभिः स्वातन्त्र्येण यत्रक्वचिद्धनं विनियोक्तव्यं । एवं पुत्रदास्योरपि द्रष्टव्यम् । अन्ये तु मन्यन्ते भार्यापुत्रग्रहणदासार्थं तस्य चैतद्वचनमुत्तरार्थं आपदि तासां धनग्रहणेन विचिकित्सितव्यं भर्तुरेव हि तत्स्वम् ॥ ४१७ ॥

विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत् ॥
न हि तस्यास्ति किंचित्स्वं भर्तृहार्यधनो हि सः ॥ ४१८ ॥

तथा च कश्चिदाह धर्मोपगतशूद्रविषयमिदं तदुक्तं विशेषे प्रमाणाभावात्तस्मात्सर्वस्य दासः शूद्रस्तस्यैव प्रतिग्राह्यत्वमुच्यते । विस्रब्धं निःशङ्कं शूद्रधनं कथं प्रतिगृह्णीयात्प्रतिषिद्धं हि तदित्येषा शङ्का कर्तव्या । यतो न तस्य किंचिदर्थो यस्य निचयः स्यादित्युक्तं भवति स्वामी न ह्रियते धनस्य एतदेवार्जने तस्य प्रयोजनं स्वामी हीयतेऽतो विश्रब्धं द्रव्योपादानद्रव्यग्रहणं कुर्यात्तेनोपनीयमानमपि स्वगृहस्थमिव विनियुञ्जीत । सति प्रयोजन एतद्युक्तं भवति । अविद्यमानधनस्य दासाच्छूद्रात्प्रतिगृह्णतो न दोषः ॥ ४१८ ॥

वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत् ॥
तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत् ॥ ४१९ ॥

कर्म व्यतिक्रामन्तः क्षोभयेयुराकुलीकुर्युर्जगदतस्ते प्रयत्नेन स्वकर्मभ्यश्चावयेदनल्प एवातिक्रमे भूयसा दण्डेन योजनीया वैश्या अपि बन्धनं नास्त्यपि धनशक्यः स्वधर्मः ॥ ४१९ ॥

अहन्यहन्यवेक्षेत कर्मान्तान्वाहनानि च ॥
आयव्ययौ च नियतावाकरान्कोशमेव च ॥ ४२० ॥

राजधर्माणामनुसन्धानार्थं कर्मान्ताः कृषिशुल्कस्थानादपवाहनम् । हस्त्याद्याय-व्ययमिदमस्य प्रविष्टमिदं निर्यातमित्येव सततं गवेषणीयं । आकरा धातवः सुवर्णाद्युत्पादे भवन्ति भूमयः । कोशो द्रव्यनिश्चलस्थानम् ॥ ४२० ॥

एवं सर्वानिमान्राजा व्यवहारान्समापयन् ॥
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥ ४२१ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां
राजधर्मे व्यवहारनिर्णये सामान्यव्यवहारो नाम अष्टमोऽध्यायः ॥ ८ ॥

उक्तेन प्रकारेण व्यवहारानृणादीन्समापयन्निर्णयावसानं कुर्वन्यत्किञ्चित्तत्सर्वमविज्ञातदोषं तत्सर्वं व्यपोह्यापनुद्य पापं परमां गतिमभिप्रेतां स्वर्गापवर्गभूमिं प्राप्नोति लभते ॥ ४२१ ॥

इति भट्टमेधातिथिस्वामिकृते मनुभाष्येऽष्टमोऽध्यायः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवमोऽध्यायः ॥

पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान् ॥ १ ॥

स्त्रीसंग्रहणानंतरं विवादपदनिर्देशः " स्त्रीपुंधर्मो विभागश्चेति " तदिदानीमुच्यते अत्यन्त + ह्युपमृष्टेन भर्त्रा कथंचिदपि बाध्यमानया तेन सह राजनि विवदितव्यमिति + विध एव न्यायानुवर्तिनि न द्वेषमत्सरादिमतिभार्यायां तथा च विशील + ति तथाविधस्य पत्युरुपचर्योक्ता न भार्या प्रति प्रभुत्वं उपचारश्च भृत्यवच्छुश्रूषापादसंवाहनादि + + + + + + + + + + + स्त्रीपुरुषशब्दौ च यद्यपि लिङ्गाविशेषावच्छिन्नमनुष्यजातिवचनौ तथापीह सम्बन्धिनि जायापत्या + + + + + + + + + " अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशमिति" (श्लो. २) स्वग्रहणेन संबन्धितां लक्षयति वर्तमानप्रतिज्ञावचन + प्रयोजन + + + + + + भर्तुः **स्त्रियाश्च** जायायाः **संयोग** एकत्र संबंधिनिधाने तथा **विप्रयोगे** प्रवासप्रायेण + + + + + धर्मे या वृत्तिः प्रसाधनं शरीररक्षा हि + तान्वक्ष्यामि शाश्वतग्रहणश्रुतिः । **धर्म्ये वर्त्मनि तिष्ठतो**रनुवादोऽयं न्याय्यः । धर्मशास्त्राचारनिरूढो मार्गः ॥ १ ॥

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् ॥
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥ २ ॥

स्वेच्छया स्त्रीणां धर्मार्थकामेषु व्यवहर्तुं न देयं । यत्किंचन धनं धर्मादौ विनियुज्यते तत्र यथावयः स्वपुरुषाः पत्यादयोऽनुज्ञापनीयाः । स्वपुरुषारक्षाभिगताः " पिता रक्षती " त्यादिनिर्दिष्टाः । **विषयेषु** हि गीतादिष्वन्यतः प्रसङ्गं कुर्वन्त्य **आत्मनो वशे स्थाप्यास्ततो** निवारणीयाः । यद्यप्यस्वतन्त्रा इत्यनेनैव सर्वक्रियाविषयास्वातन्त्र्यनिवृत्तिरुपदिष्टा भवति तथापि पुनर्विषयव्यावृत्तिरुपदिष्टा भवति वचनं यत्नतः परिहारार्थमाविज्ञायी। यत्नेभ्य एव परपुरुषसंपर्कादिभ्यो निवारणीयाः । गृहावस्थितास्तु मद्यपानादिसक्ता न दुष्यन्ति । चशब्देन तावदयं धर्मः पुरुषाणामुक्तः । स्वातन्त्र्यं स्त्रीणां तावन्न देयम् अर्थात्तु ताभिरपि स्वतन्त्राभिर्न भवितव्यमित्युक्तं भवति । एवं च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यादृशं भजते हि स्त्री सुतं सूते तथाविधम् ।
तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः ॥ ९ ॥

"स्वां प्रसूतिमिति" (श्लो. ७) यदुक्तं तद्दर्शयति । न चैवं मन्तव्यं यादृशं द्वितीयं पुरुषं सेवेत **सुतं सूते** पुत्रं जनयति तथाविधजातीयं नापि गुणसादृश्यमभिप्रेतं यतः शूद्रादिजातस्य चण्डालादिजातिं च + + मानजातीयजातस्यापि नैव तज्जातीयत्वं "पत्नीष्वक्षतयोनिष्विति" वचनात् गुणसादृश्येऽपि विशीलदरिद्रपतिकाया उत्कृ + + नमनुज्ञातं स्यात् । यदा त्वयमर्थवादस्तदा यादृशं तथाविधमित्यकुलानुरूपमिति नीयते ॥ ९ ॥

न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥ १० ॥

वक्ष्यमाणोपायप्रशंसार्थः श्लोकः । **प्रसह्य** बलेनावष्टभ्य शुद्धान्तावरोधादिना परपुरुषाभिध्यानादिना **न** शक्या **रक्षितुं** । किंत्वे**तैरुपाययोगैः शक्याः** । योगाः प्रयोगा उपायैः प्रयुज्यमानैरित्यर्थः ॥ १० ॥

अर्थस्य सङ्ग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे ॥ ११ ॥

अर्थो धनं । तस्य **संग्रहः** संख्यादिना परिच्छिद्य रक्षार्थं वेश्मनि निधानं रज्ज्वायसबन्धादिना संयम्य स्थापनं मुद्राङ्कमित्येवमादि । **व्ययो** विसर्गस्तस्यैव इदमेतावद्भक्तार्थमिदं च सूपार्थमेतावच्छाकार्थमिति । **शौचं** दर्विपिठरादिशुद्धिर्भूमिलेपनादिश्च । **धर्म** आचमनोदकतर्पणादिदानं स्त्रीवासगृहकादौ बलिकुसुमविकारैर्देवार्चनं **अन्नपक्तिः** प्रसिद्धा । **पारिणाह्यं** यस्यासंदीखट्वादि तत्प्रत्यवेक्षणे नियोक्तव्या ॥ ११ ॥

अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥ १२ ॥

आप्तं प्राप्तं काले तं कुर्वन्त्या**प्तकारिणो**ऽवधानवन्त उच्यन्ते शुद्धान्ताधिकारिणः । कञ्चुकेन स्वे **गृहे रुद्धा**श्चास्वतन्त्रीकृता यथेष्टं विहारनिषेधेन रक्ष्यमाणा न रक्षिता भवन्ति । किंत्व**ात्मनाऽऽत्मानं** रक्षन्ति । ताः कथं रक्षन्ति । यद्येतेषु कार्येषु नियुज्यन्ते । उक्तोपायप्रशंसा नोपायान्तरनिषेधः ॥ १२ ॥

For Private And Personal Use Only

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ॥
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥ १३ ॥

अटनमापणभूमिषु शाकशाकादिक्रयार्थं देवतायतनेषु च ज्ञातिकुले बहून्यप्यव-स्थानं। **अन्यगेहवासः नारीसंदूषणानि** स्त्रीणामेते चित्तसंक्षोभहेतवः। एते हि श्वशुरादिभयं जनापवादभयं च त्यजन्ति ॥ १३ ॥

नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः ॥
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥ १४ ॥

नायमभिमानो वोढव्यः सुभगः स्वाकृतिस्तरुणोऽहं मां हित्वा कथमन्यं कामयिष्यते। यतो नैता दर्शनीयोऽयं पुरुषाकृतिरयमित्येव विचारयन्ति । **पुमानयमित्येतावतैव भुञ्जते** संयुज्यन्ते तेन ॥ १४ ॥

पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः ॥
रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥ १५ ॥

यस्मिन्कस्मिंश्च पुंसि दृष्टे धैर्याच्चलनं कथमनेन संप्रयुज्येयेति रेतसो विकारः स्त्रीणां **तत्पौंश्चल्यं** अन्यत्रापि धर्मादौ कार्येऽस्थिरता चलचित्तत्वात्। य एव द्वेष्यः स एव स्पृह्यत इति भ्रातृपुत्रादिर्यो दृष्टस्तस्मा एव कामुकत्वेन स्पृहयन्ति। स्नेहो रागस्तृष्णा च भर्तरि पुत्रादौ मानविरुद्धहृदया भवन्ति । एतैर्दोषैर्योगाद्विकुर्वते विक्रिया भर्तृषु गच्छति । तस्मात् ॥ १५ ॥

एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम् ॥
परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति ॥ १६ ॥

प्रजापतिर्हिरण्यगर्भस्तदीये निसर्गे उत्पत्तिकाले **जातम्**। शिष्टं स्पष्टम् ॥ १६ ॥

शय्यासनमलङ्कारं कामं क्रोधमनार्जवम् ॥
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥ १७ ॥

शय्या शयनं स्वप्नशीलत्वं। **आसनमनभ्युत्थानशीलता**। **अलङ्कारः** शीलमण्डनं। **कामं** पुरुषोपभोगस्पृहा। **क्रोधो** द्वेषः। अनार्यता स्निग्धेऽपि द्वेषो द्विष्टेऽपि स्नेहः। आकारसंवरणं निर्द्धर्मता द्रोग्धृभावो द्रोग्धृत्वं भर्तृपित्रादेः पुरुषव्यसनीयतयाऽधर्मात्मकत्वं भर्त्रादीनां। द्रुहेः कर्त्तरि तृचा भावशब्देन समासः। **कुचर्या** नीचपुरुषसेवनं। एष स्वभावः स्त्रीणां मनुना सर्गादौ कल्पितः। शय्यासनालङ्कारा द्रोहकुचर्ययोर्दृष्टान्तत्वेनोपदीयन्ते। यथैते पदार्थाः स्वभावभूता अविचारिता एवं कुचर्यादयोऽपि ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः ॥
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥ १८ ॥

केचिदेवं मन्यन्ते । सत्यपि प्रमदाव्यभिचारे वैदिकेन जपेन रहस्यप्रायश्चित्तादिना शुद्धिमाप्स्यन्ति ततो नास्ति दोष इति । तन्न । **न हि स्त्रीणां मन्त्रैः क्रिया** जपोऽप्यस्ति । येन वृत्तव्यतिक्रमेऽप्रख्यातौ स्वत एव वैदुष्याच्छुद्धिमाप्नुवन्ति तस्माद्यत्नतो रक्ष्या इत्येतच्छेषमेवैतत् । अतो ये केचिदविहितमन्त्रे मन्त्रप्रतिषेधोऽयमिति वर्णयन्ति ततश्च यत्र स्त्रियः कर्तृतया संबध्यन्ते सायंबलिहरणादौ तथा संस्कार्यतया चूडादिषु संप्रदानतया श्राद्धादौ तत्र सर्वत्र मन्त्रप्रतिषेधादमन्त्रकं स्त्रीणां श्राद्धादि कार्यमिति ते ते युक्तवादिनोऽन्यपरत्वादस्यार्थवादितया यदस्ति तदालम्बनन्यायेन विहितप्रतिषेधमन्त्रसंबन्धमन्त्रचूडासंस्कारापेक्षं व्याख्येयमेतत् अध्ययनाभावाच्च प्रायश्चित्तमन्त्रजपाभावः प्रेक्ष्यः **निरिन्द्रिया** इन्द्रियं वीर्यं धैर्यप्रज्ञाबलादि तासां नास्त्यतोऽनिच्छन्त्योऽपि कदाचित्पापाचारैर्बलेनाक्रम्यन्ते । ततो रक्षितुं युक्ताः । स्त्रियो वृत्तमिति शीलस्नेहत्वास्थिरत्वादन्यद्वचनेन निन्द्यते ॥ १८ ॥

तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि ॥
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥ १९ ॥

स्वभावतोऽशुद्धहृदयाः स्त्रिय इत्यस्मिन्नर्थे वैदिकानि मन्त्रार्थवादरूपाणि वाक्यानि साक्षित्वेनोपन्यस्यति । **तथा च** यथा मयोक्तं 'स्त्रियोऽनृतम्' इति तथैव **निगमेषु** वेदेषु **श्रुतयः** सन्ति । निगमशब्दो वेदपर्यायः दृष्टप्रयोगश्च । "बभूथाततन्थ" इत्यादिनिगमे वेदार्थव्याख्यानाङ्गवचनोऽप्यस्ति । निगमनिरुक्तव्याकरणान्यङ्गानीति निरुक्ते हि प्रयोगो निगमा इमे भवन्तीति । तस्येह श्रुतिग्रहणाद्वा वक्ष्यमाणोदाहरणाच्च संभवोऽतो वेदवचनो निगमशब्द इह गृह्यते । समुदायावयवभेदाच्चाधाराधेयभावः । तेषु निगमेषु **श्रुतय** एकदेशभूता वाक्यानि **निगीता** अधीताः संशब्दिताः पठ्यन्त इति यावत् । नित्यप्रवृत्ते च कालाविभागादिनिरुक्तः "पाठान्तरनिगदा" इति । निगदा मन्त्रविशेषाः । **श्रुतयो** ब्राह्मणवाक्यानि । मन्त्रेषु ब्राह्मणेषु चायमर्थो दर्शितो यदनृता स्त्रिय इति । बह्व्यस्ताः संतीत्यस्मिन्पक्षेऽध्याहारस्**तासां** श्रुतीनां या या **निष्कृ**तिरूपा व्यभिचारप्रायश्चित्तभूतास्ताः **शृणुत** । किमर्थमुदाह्रियन्त इति चेत्**स्वालक्षण्यपरीक्षार्थं** । स्वलक्षणं नित्यसंनिहितस्वभाव-

---

१-ण-र-कदाचियमेव मन्येत । २ ण-र-प्रज्ञादिदोष । ३ ण-र-जपारक्ष्यास्ति । ४ ण-र-अतो ये केचिदविशेषेण प्रतिषेधं मन्यमाना यत्किंचित्स्त्रीसंबंधि कर्म येनकेनचित्स्त्री तत्संबंधेन तत्र सर्वत्रःप्रतिपादविहितमंत्रे अतःपरं ण-र-पुस्तकयोर्न किंचिदप्यस्ति १९ श्लोकार्धटीकापर्यन्तं । ५ फ-एकादशभूतानि । ६ ण-र-च निरुक्तः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तत्प्रतिपादनार्थमक्षदकुण्डलादिलक्षणं तत्परिभूतमिदं स्वलक्षणं स्वभाव इत्यर्थः । एतदासां स्वलक्षणं यदव्यभिचारात्मकम् ॥ १९ ॥

यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता ॥
तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् ॥ २० ॥

इति कारणान्तेन पादत्रयेण मन्त्रैकदेशोऽनुकृतः । यन्मे माता अपतिव्रता पत्युरन्यपुरुषे न कामश्चेतसापीति यस्या व्रतं नियमः सा पतिव्रता । तद्विपरीताऽपतिव्रता **विचरन्ती** परगृहान्गच्छन्ती तत्रोज्ज्वलवेषं दृष्ट्वा **प्रलुलुभे** । लोभं स्पृहामन्यपुरुषं प्रति कृतवती तत्पापं ममोत्पत्त्या वा तत्पितुः संबन्धि यद्रेतः शुक्रं तद्वृङ्क्तामपनुदतु । तद्रेतसा स दोषोऽपमृज्यतां । रेतं इति षष्ठी स्थाने प्रथमा व्यत्ययेन । अथवा रेत एव पितृत्वेन परिकल्पते । अपरित्यक्तस्वलिङ्ग एव रेतसा सामानाधिकरण्यमनुभवति । "द्यौर्मे पितेति" (ऋग्वेदे २।३।२०) यथा । अथवा मातृबीजमप्युच्यते । तद्रेतः पिता जनको वृङ्क्तां शोधयतां । दोषंसपाद्यत्वं पितृजबीजप्रभावेन मातृदोषोऽपनुद्यतामित्यर्थः । अस्य व्यभिचारात्मकस्यैतन्निदर्शनं दृष्टान्तः । सर्वे जपमाना एतं मन्त्रमुच्चारयन्ति । यदि च सर्वाः स्त्रियो दुष्टस्वभावास्ततो मन्त्रस्य नित्यवत्प्रयोगोपपत्तिरितरथा पाक्षिकः स्याच्चातुर्मास्येष्वयं मन्त्रो विनियुक्तः पाद्यानुमन्त्रणे च श्राद्धे ॥ २० ॥

ध्यायत्यनिष्टं यत्किंचित्पाणिग्राहस्य चेतसा ॥
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥ २१ ॥

पाणिग्राहो भर्ता । तस्य **चेतसा यदनिष्टमप्रियं** परपुरुषसंपर्कादिकं स्त्री चिन्तयति **तस्य** मानसस्य **व्यभिचारस्य निन्हवः** शुद्धिरनेन मन्त्रेण कर्मणि नियुक्तेनोच्यते । प्रसङ्गान्मन्त्रप्रयोजनं दर्शितं । यद्यपि कर्मगुणतैव कर्माङ्गमन्त्रप्रयोजनं तथापि जपादौ विनियोगान्मानसव्यभिचारनिवृत्त्यर्थताऽप्युच्यते ॥ २१ ॥

यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ॥
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥ २२ ॥

भार्यासंरक्षणकामेन दौःशील्यादात्मा रक्षितव्यो नाप्येतयैव केवलया पापतो दुःशीलस्य भार्याऽपि तथाविधैर्भवति गुणवतः शीलवती यथा **समुद्रेण निम्नगा नदी** संयुज्यमाना क्षारोदका भवति मधुररसापि सती ॥ २२ ॥

अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा ॥
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥ २३ ॥

---

१ ण–र–द्वयोभिचारात्मकः । २ ण–र–तन्मे । ३ ण–र–पुरुषेण । ४ ण–र–मेता उत्पन्ना मम च शुद्धाभाष्यं तत्पुनः संबंध यद्रेतशुक्रं । ५ ण–र–पितेति । ६ ण–र–षष्ठ्या । ७ ण–र–तं दोषं संपादयं तु येतु । ८ क–जप । ९ ण–र–येताः १० ण–र–मन्त्रस्था । ११ ण–र–इतरथाः ।

For Private And Personal Use Only

हीनजातीयाऽप्यक्षमाला वसिष्ठभार्या तत्संयोगादभ्यर्हणीयतां प्राप्ता । शार्ङ्गी तिर्यग्जातिः चटका **मन्दपालेन** मुनिना संयुक्ता तथैव पूज्या । अतो हीनजातीयाः कनीयस्योऽपि भूयो भर्तृवत्पूज्याः । तथा चोक्तं "वयसि स्त्रिय" इति ॥ २३ ॥

एताश्चान्याश्च लोकेऽस्मिन्नवकृष्टप्रसूतयः ॥
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः ॥ २४ ॥

अवकृष्टा निकृष्टा प्रसूतिरुत्पत्तिर्यासां ता **अवकृष्टप्रसूतयः**। अन्याश्च गङ्गकालीप्रभृतयः । द्वयोः प्रकृतत्वादेता इति बहुवचनं चशब्देन तृतीयामाक्षिप्य द्विर्वचनं वा एते च ॥ २४ ॥

एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा ॥
प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत ॥ २५ ॥

लोकयात्रा लोकवृत्तं लोकाचारो लोकसिद्धमेतत् । नायं विधिलक्षणोऽर्थो यदेवं शक्यते रक्षितुं नान्यथेति । अपरिक्षिताभिश्च ताभिः प्रसूत्यादिदोषे भवतीति । इदानीं **प्रजाधर्मान्निबोधत** । कस्य प्रजा बीजिनो वा क्षेत्रिणो वेति । उदर्क आगामिकालः स सुखो येषां सर्वे हि वस्त्ववसाने विरमन्ते । ते तु नैवमिति प्रशंसा । ननु च का सुखोदर्कता प्रजा धर्मस्य या च प्रजाऽस्याधीना स्त्रियश्च बहुभिर्दोषैरावृतत्वत्यागार्हाः॥२५॥

न हि 'गृहे सर्वान्निभृयात्' इत्येतन्निवृत्त्यर्थमाह

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ॥
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥ २६ ॥

शक्यप्रतिविधानत्वाद्दोषाणां **पूजार्हाः**। यदेतद्दोषप्रयोजनं तन्नावज्ञानार्थं परिवर्जनार्थं वाऽभिशस्तपतितादि च । किं तर्हि । रक्षार्थं दोषाणां । न हि भिक्षुकाः सन्तीति स्थाली नाधिश्रियते । न च मृगाः सन्तीति यवा नोप्यन्त इति प्रयोजनं गर्भग्रहणात्प्रभृत्यपत्यपरिपोषणपर्यन्तो व्यापारोऽभिप्रेतः । तथा च वक्ष्यति "उत्पादनमपत्यस्य जातस्य परिपालनम्" इति । गृहे दीप्तय इव । न हि गृहे सेवा स्त्रिभिर्विना काचिदस्तीति सुप्रसिद्धमेतत् । सत्यपि श्रीविभवे भार्यायामसत्यां सुहृत्स्वजनादिष्वागतेषु न गृहस्थाः प्रतिपुरुषं भोजनादिभिरावर्जयितुं समर्थाः । यथा दरिद्रे न भवति शक्तिरतः स्त्रियाः श्रियश्च न विशेषो गृहेष्विति ॥ २६ ॥

उत्पादनमपत्यस्य जातस्य परिपालनम् ॥
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥ २७ ॥

---

१ फ-प ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्रस्थानीयस्य पूर्वश्लोकस्य भाष्यस्थाविमौ श्लोकौ स्त्रीनिबन्धननिमित्तमपत्योत्पादनादौ प्रत्यक्षमेतत् । लोकयात्रा गृहागतानामन्नादिदानेनावर्जनमामन्त्रणनिमन्त्रणादि । अस्य प्रत्यर्थं सर्वस्मिन्नर्थे स्त्रीनिबंधनं । प्रत्यहमिति पाठः । प्रत्यक्षशब्दोऽन्तरङ्गवचनः । अन्तरङ्गमित्यर्थः ॥ २७ ॥

अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ॥
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह ॥ २८ ॥

प्राग्दर्शितार्थोऽयं श्लोकः ॥ २८ ॥

पतिं या नाभिचरति मनोवाग्देहसंयता ॥
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥ २९ ॥
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निंद्यताम् ॥
सृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते ॥ ३० ॥

पञ्चमे[1] श्लोकाविमौ व्याख्यातौ ॥ २९ ॥ ३० ॥

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः ॥
विश्वजन्यमिमं[2] पुण्यमुपन्यासं निबोधत ॥ ३१ ॥

उपन्यासो विचार्यवस्तुप्रक्षेपः । विचारो वा । तं निबोधत । पुत्रं प्रति पुत्रमधिकृत्योदितमुक्तं सद्भिर्विद्वद्भिर्महर्षिभिश्च । विश्वजन्यं सर्वेभ्यो जनेभ्यो हितं । पुण्यं कल्याणकरं स्त्रीस्तुत्या व्यवधानात् ' प्रजाधर्मं निबोधत ' इत्यस्यार्थस्यापि पुनरादरार्थमुपन्यासः । उपन्यासं निबोधतेति ॥ ३१ ॥

भर्तुः पुत्रं विजानन्ति श्रुतिद्वैधं तु कर्तरि ॥
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥ ३२ ॥

भर्तोद्वोढा । विवाहसंस्कारेण संस्कृतो[3] येन या नारी तस्यां यस्तस्मादेव जातस्तं पुत्रं तस्य विजानन्त्यभ्युपगच्छन्ति सर्व एव विद्वांसो नात्र विप्रतिपत्तिः । सिद्धांतोऽयम् । श्रुतिद्वैधं तु कर्तरि[4] । यः कर्तैव केवलमुत्पादयिताऽन्यदीयक्षेत्रे[5] न तूद्वोढा तत्र श्रुतिद्वैधं मतभेदस्तं दर्शयति । आहुरुत्पादकमपत्यवन्तं केचित् । अपरे क्षेत्रिणं यस्य सा भार्या तस्यामनुत्पादकमपि[6] । एवमाचार्यविप्रतिपत्तेः संशयमुपन्यस्य कारणकथनेन तमेव समर्थयते ॥ ३२ ॥

क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान ॥
क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनाम् ॥ ३३ ॥

---

१ ण–र–लोकानाप्नोति निन्दितान् । २ श्लो. १६५ । ३ ण–र–इदं । ४ फ–भर्तरि । ५ ण–र–संस्कृता । ६ ण–र–अन्यदीये । ७ ण–र–इति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षेत्रमिव क्षेत्रभूता नारी व्रीह्यादेरुत्पत्तिस्थानं भूमिभागः क्षेत्रं तत्तुल्या नारी। यथा क्षेत्रे बीजमुप्तं तत्र विध्रियमाणं जायते एवं नार्यामपि निषिक्तं रेतो **बीजभूत** एवं **पुमान्**। अत्रापि भूतशब्द उपमायां। तदीयं रेतोबीजं न साक्षात्पुमान् तदधिकरणत्वात्तु तथावद्व्यपदिश्यते। समायोगात्संबन्ध आधाराधेयलक्षणः। ततः **संभव** उत्पत्तिः **सर्वदेहिनां** शरीरिणां चतुर्विधस्य भूतग्रामस्य स्वेदजानामप्याकारशः क्षेत्रं बीजं स्वेदोऽतो युक्तः संशयः। उभयमन्तरेण संभवानुपपत्तेः। अपत्योत्पत्तौ उभयोर्व्यापारः। विनिगमनाद्यावद्धेत्वभावात्कस्य तदुभयोः अन्यथान्यतरस्येति संदेहः। सर्वस्य च प्रकरणस्यायमर्थो नानुमानपरिच्छेद्यो-ऽपत्यापत्यवद्भावः। तथा च विभागश्लोके वक्ष्यामः॥ ३३॥

विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित्॥
उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते॥ ३४॥

बीजस्य वैशिष्ट्यं व्यासऋष्यश्रृङ्गादीनां महर्षीणां दृष्टं। स्त्रीयोनिष्वेव क्षेत्रजादि-पुत्रेषु धृतराष्ट्रादिषु ब्राह्मणाज्जाता अपि मातृजातयः क्षत्रियास्ते। **उभयं तु समं** एकस्वामिकमेकजातीयं समं **सा प्रसूतिः प्रशस्यते** विप्रतिपत्त्यभावात् तदुक्तमेव "भर्तुः पुत्रं विजानन्तीति"॥ ३४॥

बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते॥
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता॥ ३५॥

एवमुपपादिते संशये बीजप्राधान्यपक्षं पूर्वं परिगृह्णाति। तत्प्राधान्याद्यस्य बीजं तस्यापत्यं तस्य च प्राधान्यं व्रीह्यादेर्द्रव्यस्य क्षित्याद्यनेककारणत्वेऽपि तद्धर्मानुविधान-दर्शनात्। अतश्च स्फुटमदृष्टबीजानुविधानस्यापत्यस्य कार्यत्वाद्व्रीह्यादीनामिव तद्धर्मानुवि-धायित्वं युक्तमभ्युपगंतुं। तथाहि सर्वत्र कार्ये ऐक्यरूप्यं न त्यक्तं भवति। तथा च बीजे प्राधान्यं तद्दर्शयति। **सर्वभूतप्रसूतिर्हि** सर्वेषां भूतानां प्रसूतिरुत्पत्ति**र्बीजलक्षण-लक्षिता** बीजस्य यल्लक्षणं रूपवर्णसंस्थानादि तेन लक्षिता चिह्निता तद्रूपानुविधायिनीति यावत्॥ ३५॥

यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते॥
तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः॥ ३६॥

अनन्तरस्यैवार्थविस्तरत्वेन श्लोकोऽयं वत्क्रान्वयप्रदर्शनेन। **यादृशं** शब्दस्यार्थं व्याख्यास्यति। व्रीहयः शाल्य इत्यादिना **कालोपपादिते** काले वर्षादौ वपनकाल उत्पादिते कष्टसमीकरणादिना संस्कृते **तादृग्रोहति** जायते। **स्वैर्गुणै**र्वर्णसंस्थानरसवीर्यादिभि-**र्गुणैर्व्यञ्जितं** परिदृश्यरूपम्॥ ३६॥

---

१ ण-र-तत एवं। २ ण-र-विनिगमनायां वाहपत्रावां। ३ ण-र-स्थानादि।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते ॥
न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु ॥ ३७ ॥

बीजगुणानुवृत्तिः पूर्वेणोक्ता । अनेन क्षेत्रगुणानामभावमाह । एषा **भूमिर्भूतानां** स्थावराणामोषधीतृणगुल्मलतानां **योनिः** क्षेत्रमुच्यते । **न च** तद्गुणास्तेषु भूतेषु केचन
दृश्यन्ते । न मृदः पांसवो वा तत्रोपलभ्यन्ते । **बीजं पुष्यति पुष्टिषु** । बीजशब्दोऽत्राङ्कुर- ९
निर्गतव्रीह्यादिवचनो न मूलवचनस्तदपि हि पुनरुपभुक्तशेषमुप्यमानमपरस्मिन्वत्सरे भवत्येव बीजं तच्च **पुष्यति** नानुवर्तते । पुष्टचङ्गं भूतायामनुवृत्तौ । पुष्यतिर्वर्तमानः सकर्मकत्वं द्वितीयानिमित्तं । योनिर्गुणान्प्राप्यति वा भजते । पुष्टिषु तदवयवेषु निमित्तं न पुष्यति नानुवर्तते । यदि पुष्यङ्गाऽनुवृतिराख्यातेनोच्यते पुष्टिष्वित्यन्यार्थकं तस्मादनेकार्थ-
त्वाद्धातूनामन्यवचनमात्र एवाख्यातेनानुव्याख्येयः । श्लोकपूरणार्थं वा पुष्टिष्विति १०
कथंचित्पौनरुक्त्यं परिहार्यं सामान्यविशेषभावेन वाऽन्वयो वक्तव्यः । स्वपोषं पुष्ट इति यथा ॥ ३७ ॥

भूमावप्येककेदारे कालोप्तानि कृषीवलैः ॥
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥ ३८ ॥

अनन्तरोक्तोऽर्थ उदाहरणाद्व्याक्रियते । **एककेदारेऽपि** परत्र योजनीयः । एक- ११
स्मिन्नपि क्षेत्रे भूमेः काले यस्य बीजस्य यो वैककालस्तस्मिन्नुप्तानिकर्षकैर्भिन्न**रूपाणि जायन्ते बीजानि** स्वभावानुविधानादित्यर्थः । यदि च क्षेत्रे प्राधान्यं स्यात्क्षेत्रस्यैकत्वात्सर्वाण्यैकरूपाणि स्युः ॥ ३८ ॥

व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः ॥
यथा बीजं प्ररोहन्ति लशुनानीक्षवस्तथा ॥ ३९ ॥ २०

तानि नानारूपत्वेन बीजानि दर्शयति । **यथा** वा बीजस्वभावाभिपत्या । सर्वत्र जात्याख्यायां बहुवचनम् ॥ ३९ ॥

अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते ॥
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥ ४० ॥

एष एवार्थः शब्दान्तरेण निगम्यते । **अन्यदुप्तं जातमन्यदित्यनेनोपपद्यते** । २१
यद्धि यद्बीजं तदेव प्ररोहति मुद्गेपूप्तेषु व्रीहयो जायन्त इत्येतन्नास्ति । प्रतिषेधमुखेनोक्तस्य विधिमुखेन पुनः प्रतिपादनमुच्यते । यद्धि यद्बीजम् ॥ ४० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मात्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना ॥
आयुष्कामेन वप्तव्यं न जातु परयोषिति ॥ ४१ ॥

एवं पूर्वपक्षे सिद्धान्तमाह । क्षेत्रप्राधान्यमनेनोच्यते । ननु च नात्र क्षेत्रप्राधान्याभिधायकं किंचित्पदमस्ति केवलं परक्षेत्रोपगमननिषेधः श्रूयते । **वप्तव्यं न जातु परयोषितीति** परदारेषु बीजनिषेको न कर्तव्य इत्यस्यार्थः । न पुनर्यस्य क्षेत्रं तस्यापत्यमित्यनेनोक्तं भवति । सत्यम् । "तथा नश्यति वै क्षिप्तं बीजं परपरिग्रहे" इत्यनेनैकवाक्यत्वात् दृष्टापत्यापहारलक्षणदोषनिमित्तोऽयं प्रतिषेधो नादृष्टार्थ उपगमनप्रतिषेधः । स हि चतुर्थे विहित एव । "न हीदृशमनायुष्यम्" इत्यादिना । तस्मादन्यशेषतया प्रतिषेधश्रुतेरनन्तरेणैकवाक्यत्वादसति स्वातन्त्र्ये युक्ता क्षेत्रप्राधान्यप्रतिपादनपरता । **प्राज्ञेन** सहजया प्रज्ञया । **विनीतेन** पित्रादिभिरनुशिष्टेन । **ज्ञानविज्ञानवेदिना** करणसाधनौ ज्ञानविज्ञानशब्दौ । ज्ञानं वेदाङ्गशास्त्राणि । विज्ञानं तर्ककलादिविषयं । एतदुक्तं भवति । यस्य काचिद्बुद्धिर्विद्यते तेनैवं न कर्तव्यं यतः सर्वशास्त्रेष्वेषा स्थितिः । यस्तु मूर्खस्तिर्यक्प्रख्यः सोऽत्र नाधिकृत एवेत्यनुवादोऽयं । **आयुष्कामेनेति** चातुर्थिकस्य प्रतिषेधस्य प्रत्यभिज्ञानार्थमेतत्ततश्च पृथक्प्रतिषेधशङ्का निरस्ता भवति ॥ ४१ ॥

अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥ ४२ ॥

गाथाशब्दो वृत्तविशेषवचनः । यथोक्तं **पिङ्गलेन** "अत्रासिद्धं गाथेति" । अतिगीताः परंपरागताः श्लोका अप्युच्यंते । तदेषापि यज्ञगाथा गीयत इत्युक्त्वा श्लोका उत्तरत्र वेदे पठ्यन्ते । यदस्य पूर्वमपरं तदस्येति वायुना गीताः पठिता वायुप्रोक्ताः **पुराविदः** पुराणकल्पान्तरवेदिनः **परपरिग्रहे** परक्षेत्रे ॥ ४२ ॥

नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः ॥
तथा नश्यति वै क्षिप्तं बीजं परपरिग्रहे ॥ ४३ ॥

ता इदानीं गाथा दर्शयति । **इषुः** शरः । स **नश्यति खे** छिद्रे अन्येनेष्वासेन **विद्धं** मृगमनुविध्यतः पूर्वस्य वेधकस्यात्र स्वाम्यं । अथवाऽऽकाशे खे शरः क्षिप्तो लक्ष्यमन्तरेण नश्यति निष्फलो भवति विद्धं चानुविध्यतः । एवं परस्त्रियं तेजो निःक्षिप्तं तस्य बीजिनः क्षेत्रस्वामिनोऽपत्यं भवति ॥ ४३ ॥

पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः ॥
स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम् ॥ ४४ ॥

---

१ ण-र-दृष्टापहार । २ श्लो. १३४ पृ. ३४७ । ३ ण-र-विशेषतया । ४ ण-र-लक्षण । ५ ण-र-तथा विद्धं योऽनुविध्यति तथा नश्यति क्षिप्रं बीजं निक्षिप्तं नश्यति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ईदृशोऽयं पुराणकृतो जायापतिलक्षणसंबन्धो यद्भिन्नावपि तावेकीकृताविव दर्शयति । तथाहि अनेकवर्षसहस्रातीतपृथुसंबन्धा मही तेनैव व्यपदिश्यते **पृथिवीति** । तस्मादन्याऽपि स्त्री यस्य भार्या तस्य पुत्रोऽन्येनापि जातः **स्थाणुच्छेदस्य केदारं** स्वमाहुः संबन्धान्तरस्याभावात् । स्वस्वामिसंबन्धं षष्ठी प्रतिपादयति । स्थाणुर्गुच्छगुल्मलतादिप्ररूढो यत्र भवति तच्छिनत्ति यः स स्थाणुच्छेदः तस्य तत्क्षेत्रं येन प्ररूढगुल्मलतावीरुधः छित्त्वा भूमिः क्षेत्रीकृता तत्र कर्षणवपनजातं फलं तस्यैव । **शल्यवतो मृगमाहुरित्यनुषज्यते** । बहूनां मृगमनुधावतामाखेटकार्ये यस्यैव संबंधि शरशल्यं मृगे दृश्यते तस्य तमाहुर्यः प्रथमवेद्धुश्च स भवतीत्युक्तं " नश्यतीषुः " इत्यत्र ॥ ४४ ॥

एतावानेव पुरुषो यज्जायात्मा प्रजेति ह ॥
विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना ॥ ४५ ॥

युक्तं च यस्य भार्या तस्यापत्यं यस्माद्भार्यायाः भर्तुश्चैकत्वमेव प्रजाऽप्यात्मभूतैव कथं वाऽन्यस्यात्मा सोऽन्यस्य भवेत् । एवं तावदृष्टमेतल्लोके शास्त्रज्ञा अप्येवमेव विप्राः प्राहुरिति ॥ ४५ ॥

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते ॥
एवं धर्मं विजानीमः प्राक्प्रजापतिनिर्मितम् ॥ ४६ ॥

अथ मन्येत धनादिदानेन क्रीत्वा स्वीयाः करिष्यन्ते परभार्यायां ततो विनिवृत्ते दुःस्वाम्ये तज्जातो जनयितुः पुत्रो भवतीत्येतन्न यतो न शक्या भार्यात्वेन निष्कसहस्रैरप्यन्यदीयाः स्वत्वमानेतुं । नापि भर्त्रा त्यक्ता प्रहीणद्रव्यतया प्रतिग्रहीतुः स्वत्वमापद्यते । यत " उद्वहेतेति " कर्त्रभिप्रायक्रियाफलविषयादात्मनेपदाल्लिङ्गान्नान्येव संस्कृताऽन्यस्य भार्या भवति । यथा नाहवनीयादय आधातुरन्यस्य क्रियादिनाऽऽहवनीयादिव्यपदेश्या **निष्क्रयो** विक्रयो विनिमयश्च **विसर्गस्त्यागस्ताभ्यां** न मुच्यते न भार्यात्वमस्या अपैति॥ ४६॥

सकृदंशो निपतति सकृत्कन्या प्रदीयते ॥
सकृदाह ददामीति त्रीण्येतानि सतां सकृत् ॥ ४७ ॥

अयमनुशयविभावष्टमे व्याख्यातः । विभागकाले हि समविषमांशभाग्भिः समविषमांशभागकेषु परिकल्प्य विभागः कर्तव्यः । तत्र कृते यो विप्रतिपद्येत तस्य प्रतिषेधार्थमिदं । तत्रापि यद्यसावयथार्थतां कस्यचिदंशस्य प्रज्ञापयेत्तदाऽस्यैव पुनर्विभागः । अथ बहुना कालेनायथाकृततां ब्रूयाद्यावदितः स्वेषु स्वेषु भागकेष्वन्यनिवेशशीर्णप्रति-

१ फ अनेन २ ग–र–दानेन । ३ ग–कृत्वा । ४ ग–र–परभार्या । ५ ग–र–ततो गोलकः। ६ फ–नी ।

For Private And Personal Use Only

संस्कारादि कृतं भवेद्वस्त्रहिरण्यादि चोपयुक्तं स्यात्तदा समतामात्रकरणे प्रभवति न पुनः सर्वं समर्वापविभागं । अन्ये तु क्लीबादीनामनर्हितविभागकानां पश्चादभागहरत्वनिमित्त-क्लीबत्वादिपरिज्ञानान्नास्ति भागापहार इति सकृन्निपातप्रयोजनं वदन्ति । एवं द्वित्रिचतुर्भाग-हराणां यदृच्छया ये समतां प्रकल्पयेयुः पश्चादनुशयनात्प्राक्तनं व्यवस्थानमतिक्रम्यापहर्तुं लमेरन् । पतितस्य तु लब्धभागस्याप्यपहारं वक्ष्यामि ।

सकृत्कन्या प्रदीयते । यद्यपि चानेन वाग्दानोत्तरकालं प्रागपि विवाहाद्भर्तुः स्वतोच्यते । तथापि "दत्तामपि हरेत्कन्यां" "तेषां तु निष्ठा विज्ञेया विद्वद्भिः सप्तमे पद" इत्यादिपर्यालोचनया विशिष्टविषयतैव । सा च व्याख्याता । सकृदाह ददामीति गवादयो हि येनैव रूपेणात्मनः स्वं तेनैवान्यस्मा आपद्यन्ते । कन्या तु दुहितृत्वेन स्वं सती भार्यात्वेनानिवृत्तस्वसंबन्धा दीयत इति पृथगुपन्यासः ।

ननु चानिवर्तमाने पितुः स्वसंबन्धः कथं कन्यादाने निवर्तते । एतद्धि दानस्य रूपं यदेकस्य संबन्धो निवर्ततेऽन्यस्योपजायत इति । नैष दोषः । द्वावत्र संबन्धावपत्या-पत्यवद्भावः स्वस्वामिसंबन्धश्च । तत्रापत्यापत्यवद्भावो न निवर्तते । इतरस्तु निवर्तते । तथा च "बाल्ये पितुर्वशे तिष्ठत्" इति पितुश्चात्र स्वाम्यनिवृत्तिमाह "पाणिग्राहस्येति" भर्तुस्तदुत्पत्तिम् ॥ ४७ ॥

यथा गोश्वोष्ट्रदासीषु महिष्यजाविकासु च ॥
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ॥ ४८ ॥
येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः ॥
ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित् ॥ ४९ ॥

प्रसिद्धमेवैतत् । अक्षेत्रिणो बीजवन्तो व्रीह्यादिबीजस्वामिनः सस्यस्य मुद्गमाषादे-र्जातस्य न लभन्ते फलं परक्षेत्रे चेदुत्पत्तिः ॥ ४९ ॥

यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ॥
गोमिनामेव ते वत्सा मोघं स्कंदितमार्षभम् ॥ ५० ॥

पूर्वेण स्थावरेषु धर्मः प्रसिद्धवदुदितो ज्ञापितो वा । अनेन तिर्यक्षु परिगृहीतेषु गवादिषु निदर्श्यते । अन्यदीयो वृषभो यद्यप्यन्यगवीषु वत्सान्बहूनपि जनयेन्न वृषभ-स्वाम्येकमपि वृषभं लभेत सर्वे एव ते वत्सा गोमिनां गोस्वामिनां आर्षभमृषभसंबन्धि-स्कंदितं बीजनिषेको मोघं वृथा निष्फलम् ॥ ५० ॥

तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः ॥
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥ ५१ ॥

---

१ ण-र-आ वाप । २ क-शयतात् । ३ अ. ५ श्लो. १४८ । ४ अ. ५ श्लो. १५६ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वस्य निर्देशोऽयम्। यथा गवादिषु स्थावरेषु चैवं मनुष्येष्वपि कुर्वन्ति। क्षेत्रस्वामिनामर्थं प्रयोजनं बीजकार्यं संपादयन्ति ॥ ५१ ॥

फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा ॥
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी ॥ ५२ ॥

अविशेषेणोक्तं क्षेत्रिणां फलं न बीजिनस्तस्यावशिष्टविषयत्वमाह। **अनभिसंधायेति**। अभिसंधानं बीजक्षेत्रिणोरितरेतरसंविद्व्यवस्थापनं नष्टाश्वदग्धरथवत् । उभयोरावयोः फलमास्त्विति यत्र वचनव्यवस्था न भवति तत्र क्षेत्रिण एव प्रत्यक्षोऽर्थो निश्चितं फलं। **प्रत्यक्ष**शब्देन निःसंदिग्धतामाह । यतो **बीजाद्योनिर्बलीयसी** क्षेत्रमधिकबलं सत्यां तु संविदि ॥ ५२ ॥

क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते ॥
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥ ५३ ॥

अनभिसंधाय क्षेत्रिणः फलमुक्तमभिसंधाने किंबीजिन उतोभयोरिति संशय उभयोरित्याह । **क्रियाया अभ्युपगमो**ऽङ्गीकरणमेवमेवैतदिति संविल्लक्षणः यो निश्चयः सा क्रियाऽभिप्रेता तामभ्युपगमय्य **बीजार्थं** बीजकार्यफलनिष्पत्त्यर्थं **यत्प्रदीयते** सामर्थ्याद्बीजमिति गम्यते । **तस्येह** द्वावपि **भागिनौ** ॥ ५३ ॥

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ॥
क्षेत्रिकस्यैव तद्बीजं न बीजी लभते फलम् ॥ ५४ ॥

परक्षेत्रे वप्तुर्बीजनाशो उक्तस्तत्र मन्येत पुरुषापराधात्तस्य युक्तोपहारो नूनमसौ क्षेत्रं जिहीर्षति । नो चेत्किमिति परक्षेत्रे वपतीति येन तु स्वक्षेत्रे व्युप्तमोघवाताभ्यामन्यत्रानीतं तस्य कोऽपराधो यदि स्वं द्रव्यं हारयति तदर्थमाह । ओघवाताहृतं बीजं सर्वत्र क्षेत्रप्राधान्यमित्यर्थः। **ओघो** जलनिषेकः । तेन वायुना चाहृतं नीतं यस्य क्षेत्रे प्ररोहति तस्यैव तद्भवति । एतेनैव सिद्धे विस्पष्टार्थं **न बीजी लभते फलमिति** ॥ ५४ ॥

एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ॥
विहङ्गमहिषीणां च विज्ञेयः प्रसवं प्रति ॥ ५५ ॥

अपत्याधिकारात्तद्विषयतैव माविज्ञायीति गवाश्वादिग्रहणम् । यदि वा बीजफलव्यवहारः सस्यादिविषयतया प्रसिद्धतरस्तन्निवृत्त्यर्थमाह। द्विपदां चतुष्पदां पक्षिणां स्थावराणां च सर्वत्रैष धर्मः । **एष इति** । द्वयं प्रत्यवमृश्यते । अनभिसंधाने यस्य क्षेत्रं तस्य

---

१ ण–र–सर्वस्य । २ क्षेत्रिणः । ३ ण–र–प्रत्यक्ष भवादति । ४ ण–र–चैवं । ५ फ–वसा । ६ फ–वाप । ७ ण–र–मन्येते । ८ र–ण–ल–पुरुषापलस्य । ९ फ–अतः । १० फ–नीतं । ११ फ–सर्व । १२ फ–नतं । १३ फ–विशिष्टार्थं । १४ फ–रस्य । १५ र–ण–ल–अनभिसंधानिते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फलमभिसंधाने चोभयोः उदाहरणार्थत्वाच्च गवाश्वादिग्रहणस्य श्वमार्जारादिष्वप्ययमेव न्यायः । तर्हि[2] किमर्थं "यद्यन्यगोषु" इति । प्रायेण गावः पुरुषाणां भवन्ति । न तथा विहङ्गमादय इति प्रसिद्धेरनुवादोऽसौ । **दास्यः** सप्तभिर्दासयोनिभिरुपगताः । **प्रसवः** कायजन्म । तं प्रति तत्रेत्यर्थः ॥ ५५ ॥

एतद्वः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितम् ।
अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ॥ ५६ ॥

सारं प्रधानं फल्ग्वसारम्[3] । उपसंहारः पूर्वप्रकरणस्य । उत्तरार्धेन वक्ष्यमाणसूचनम् । **आपज्जीवनस्थितिहेतुभूतभोजनाच्छादनाभावः संतानविच्छेदश्च** ॥ ५६ ॥

भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा ॥
यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ॥ ५७ ॥

श्लोकद्वयेन प्राकृत[4]व्यवस्थामनुवदन्नापदि नियोगं विधातुं **ज्येष्ठोऽग्रे** जातः **अनुजः** पश्चाज्जातः कनीयान्यवीयाननुज एव ॥ ५७ ॥

ज्येष्ठो यवीयसो भार्यां यवीयान्वाऽग्रजास्त्रियम् ।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥ ५८ ॥

इतरेतरभार्यागमने ज्येष्ठानुजयोः पातित्यम**नापदि** सत्यपि नियोगे ॥ ५८ ॥

देवराद्वा सपिंडाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या संतानस्य परिक्षये ॥ ५९ ॥

सर्वविशेषेण विशिष्टोऽनेन नियोगो विधीयते । **संतानस्य[5] परिक्षये । नियुक्तया** देवरादिभ्यः **सम्यक्** प्रजोत्पादयितव्येति । यदुक्तं "योषितां धर्ममापदि" इति सेयमापत् । संतानस्य परिक्षयः संतानशब्देन[6] पुत्र उच्यते । दुहिता च पुत्रिका । सा हि पितृवंशं तनोति नान्या । तस्य परिक्षयोऽनुत्पत्तिरुत्पन्ननाशो वा पुत्रिकायाश्च[7] करणं । केवलाया न हि पुत्रिकायाश्च पुत्रस्य करणं न हि स्त्रियाः केवलायां[8] पुत्रिकायामन्यस्मिन्वा पुत्रप्रतिनिधावधिकार इति वक्ष्यामः । नियुक्तोत्पादयेदनुज्ञातया गुरुभिः । कुतः पुनः । गुरुभिरिति स्मृत्यन्तरनिदर्शनात् । अथवा नियोगशब्दादेव नियोगे हि गुरुसंबन्धी लोकोऽप्युच्यते । न हि विशेषेण नियुक्तोऽध्यापयतीत्युच्यते । आचार्येण नियुक्तः करोत्यनुवदति । गुरवश्च श्वश्रूश्वशुरदेवरादयो भर्तृतगोत्रा द्रष्टव्याः । न पित्रादयः । एतेनापत्येनापत्यवन्तस्ते उच्यन्ते । तर्हि विशेषेण येषां चोपकारस्तत्कृत और्ध्वदेहिको

१ फ-वानु । २ र-ण-ल-तत्तर्हि । ३ र-ण-ल-फल्गुरसारार्थः । ४ ण-र-प्राकृती । ५ र-ण-संतानपरिक्षये । ६ ण-र-शब्दे । ७ ण-र-पुत्राश्च । ८ ण-र-नहि केवलाया पुत्रिकाया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवति । यद्येवं मातामहस्यापि दौहित्रोपकारोऽस्ति । ततः पित्रा दुहिता नियोक्तव्येत्यापन्नं उक्तं येनापत्यवन्त उच्यन्ते । देवरसपिण्डग्रहणत्वेन तद्गोत्रा एव त्द्दयमागच्छन्ति । **महाभारते** च तत्र तत्र नियोक्तृभावो भर्तृपक्षिणामेव दर्शितः । अत एव भ्रातृपुत्रे सति न नियोगः कर्तव्यः । ये हि न युक्तास्तेषामेव संतानोपकारः पुत्रजनिते स्नेहे पत्योपकार-मर्थयमाना अभिक्रियन्ते । न मृतस्याधिकारोऽस्ति कथं तर्हि तस्यापत्यमिति व्यपदिश्यते कथंचित्पिण्डदाने स उपकरोति । वचनादिति च ब्रूमः । न ह्यपत्यमुत्पादयितव्यमित्येष विधिस्तेनानुष्ठित इति तथापि तदीये क्षेत्रे नियोगविधिजातेन पिण्डदानादि कर्तव्यमिति शास्त्रार्थः । ततश्च तस्योपकारकमवगतं यथा चैतत्तथा पुरस्तान्निपुणं वक्ष्यामः ।

देवरः पतिभ्राता । **सपिण्डः** पत्यन्वयः । स एव स्त्रियां स्मृत्यन्तरे जातिमात्राचे-त्युक्तं भवति । **सम्यगिति** घृताक्तादिनियमं वक्ष्यमाणमनुवदति । **प्रजेप्सिताधिगन्तव्या** विधौ कृत्य ईप्सितशब्देन कार्याक्षमतामाह । ततो दुहितर्यन्धबधिरादौ च जाते पुनर्नियोगोऽनुष्ठेयः ॥ ५९ ॥

विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ॥
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥ ६० ॥

विधवाग्रहणमतन्त्रं । क्लीबादिनियोगो जीवत्पत्या[1] अप्येष एव विधिः । यतो वक्ष्यति "नियुक्तां यो विधिं हित्वेति" । एतदेव तस्य प्रयोजनं नियमोऽत्र विषयाणां । न नियमाना-मन्यथा विज्ञायेत । प्रकृतत्वाद्विधवाया एव स्युः । **निशि** प्रदीपाद्यालोकनिवृत्त्यर्थमेतत् । वचना-न्तरेण दिवोपगमनप्रतिषेधात् । अन्ये त्वाहुः पुरुषार्थोऽसौ प्रतिषेधः कर्मार्थस्त्वयं तेनाह्नि गमनेन **क्षेत्रजमेकमुत्पादयेत्पुत्रं** न द्वितीयम् ॥ ६० ॥

द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ॥
अनिवृत्तं नियोगार्थं पश्यन्तो धर्मतस्तयोः ॥ ६१ ॥

अस्य प्रतिप्रसवः । **द्वितीयः** पुत्र इत्येकेषां मतं । **तद्विदः** क्षेत्रजोत्पत्तिविधिज्ञाः । अनिवृत्तं नियोगार्थं पश्यतो नियुक्तया प्रजोत्पादयितव्येत्यस्य विधेरेकस्योत्पादनेन संपत्तिं **मन्यन्ते** । कस्तेषामभिप्रायः । एकवचनमविवक्षितं मन्यन्ते । द्रव्यप्रधानत्वात् कर्मणो गुणाभावादविवक्षाग्रहैकत्ववत् । ननु चानुपात्तोपदेशे सत्यपि द्वितीयया द्रव्य-प्राधान्यावगमे संख्यादिविशेषेण विवक्षा स्थितैव । "उद्वहेत द्विजो भार्याम्" इति । लिङ्गादपत्यविधावेकत्वसंख्यातिक्रमो "दशास्यां पुत्रानाधेहीति" (ऋग्वेदे ९।१०।८) । यदेवं न द्वित्व एवावस्थानं अस्यामेवाशङ्कायां द्वितीय इति वचनं अन्यनिवृत्त्यर्थमर्थवता

१ ण—र—जीवपत्या ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्याप्ययमभिप्रायः । औरसे न लिङ्गविवाहप्रकरणे तु मन्त्रपाठात् । इह त्वेकस्यातिक्रमः । अपुत्र एकपुत्र इति शिष्टप्रवादात् । अथवाऽस्या एव स्मृतेर्द्वितीयपुत्रस्तुतिकल्पनात । धर्मतः शिष्टाचारतः ॥ ६१ ॥

विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ॥
गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् ॥ ६२ ॥

इह तु नियोगविषयो यत्र नियुज्यते स च संप्रयोगाभिमर्दपर्यवसान उपगमनलक्षणस्तस्मिन्निवृत्ते पूर्ववं वृत्तिर्गुरुवत्स्नुषावज्ज्येष्ठस्य भार्यायां गुरुवद्यवीयसस्नुषावत्परस्परग्रहणात् स्नुषावद्वर्तेत स्त्रीपुरुषे ज्येष्ठे देवरे गुरुवत ॥ ६२ ॥

नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः ॥
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ॥ ६३ ॥

विधिं " घृताक्त " इत्यादिस्तदतिक्रमे पातित्यं । **नियुक्तो** ज्येष्ठः **स्नुषागः** पुमान्गुरुतल्पगः कनीयान् ॥ ६३ ॥

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ॥
अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥ ६४ ॥

पूर्वेण विहितस्य नियोगस्य प्रतिषेधोऽयं । तत्र केचिद्विधवाग्रहणान्मृतभर्तृकायाः प्रतिषेधः क्लीबेन तु पत्यादनियोक्तव्येति विधिप्रतिषेधौ विभक्तविषयाविति प्रतिपन्नाः । अन्ये तु विधिवाक्ये सन्तानविच्छेदस्य निमित्तश्रवणात्तस्य च क्लीबव्याधितयोर्मृतस्याप्युपपत्तिभेदः । न च विध्यभावप्रतिषेधोऽप्यविशिष्ट एव । अपेतधवसंबन्धा विधवेत्युच्यते । तत्तुल्यमुभयत्रापि । अवश्यं चैतदेवं विज्ञेयं इतरथा घृताभ्यक्तादिनियमोऽपि क्लीबेन नियुज्यमानाया न स्यात् । तत्रापि ह्यामनन्ति " विधवायां नियुक्तश्च घृताक्त " इति । तस्माद्विहितस्याविशेषण प्रतिषेधोऽप्यशिष्टः । अतश्च विषयसमत्वे विधिनिषेधयोर्विकल्पः । अयं च नित्योऽपत्योत्पादनविधिर्न विकल्प एव कल्पते ग्रहणाग्रहणवत् । यदा तु " पुत्रेण जयति " इत्येवमादिफलोत्पादनविधिस्तदाऽसत्यपत्ये तत्कार्यस्यौर्ध्वदेहिकस्योपकारस्याभावाद्भिन्नफलयोः कुतो विकल्पः । समानविषयौ विधिनिषेधावेकार्थे विकल्पेते । षोडशीग्रहणाग्रहणयोरिति केचित् । उक्तमङ्गभूयस्त्वे फलभूयस्त्वं । प्रधानकार्यसिद्धौ त्वविशेषः तस्मादस्मिन्पक्षे पुत्रोपकाराभावमाह । उपकारविशेषार्थेनास्य प्रवृत्तौ प्रतिषेधातिक्रमेण श्येनतुल्यता । इदं त्वत्र निरूप्यं । योऽसौ नियुज्यते स किमिति प्रवर्तते । न हि तस्य विधिरस्ति । ' नियुक्तेन गन्तव्यम् ' इति । स्त्रिया पुनर्विधते "सम्यक् स्त्रिया नियुक्तयेति" ।

---

१ फ–निर्वृते । २ ण–ट–भावप्रतिषेधो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न तु देवरादिषु प्रवर्तमानेषु स्त्रिया नियोगसिद्धिरित्यर्थः । तेषामपि वृद्धिस्तद्विधिना क्षेत्रज ईप्सित इति वाच्यं । यतो रागतः प्रवृत्तिरुच्यते । घृताक्तादिनियमविधानमनर्थकमिति चेन्नानर्थकं । तथानियमैरुत्पन्ने क्षेत्रजव्यपदेशो नान्य इति । यदपि गुरुवचनं कर्तव्यमिति केचित्प्रवृत्तिनिबन्धनमाहुः । एवं सति सुरापानादिष्वपि गुर्विच्छया प्रवृत्तिः प्राप्नोति न चासौ गुरुरकार्ये यः प्रवर्तयति

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयत"॥ इति स्मरणात् परित्यागश्च गुरुकार्यान्निवृत्तिः । एतेनैतदपि प्रत्युक्तं यन्नियमातिक्रमपातित्यवचनं नियमपूर्विकां वृत्तिमनुजानाति "तावुभौ पतितौ स्याताम्" इति । इतरथा सर्वप्रकारं गच्छतः पातित्यमिति विशेषपातित्यमनुपपन्नं यतस्तत्र केवलस्य पुंसः श्रुयते किं तर्हि स्त्रिया इति तस्याश्च पुत्रार्थिन्या नियोगो विहितस्तदपेक्ष्यं हि व्यतिक्रमे पतितवचनं "तावुभौ पतितौ स्यातामिति" । असति व्यतिक्रम एकः पतितः पुमानेवातिक्रमे तु द्वावपीत्येवमपि लिङ्गानि गच्छन्त्येव । तस्माद्देवरादिविधिलक्षणः प्रवृत्तिः कथमिति वक्तव्यं । उच्यते । व्यासादिदर्शनेनापत्यपिण्डदान इव क्षेत्रजोत्पत्त्यर्थं सपिण्डानां गुरुनियोगापेक्षा तदा नापगमेन स्तुतिरस्तीत्यनुमन्तव्यं । न हि महात्मनां रागलक्षणप्रवृत्तिरभ्युपगन्तुं न्याय्या । यच्चोक्तं नियमातिक्रमे पतितत्ववचनं लिङ्गमिति तदयुक्तं । यतः पुंसः पतितत्वे[1] पतितोत्पन्नस्याधिकाराभावादुत्पादनमनर्थकं तस्मादस्ति देवरादिविधेराभासोऽयम् ॥ ६४ ॥

नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ॥
न विवाहविधावुक्तं विधवावेदनं पुनः ॥ ६५ ॥

उद्वाहनं[2] कर्म तत्र ये मन्त्राः प्रयुज्यन्ते "अर्यमणं नु देवं कन्या अग्निमयक्षत" इत्यादयस्तथान्येऽपि तत्संबन्धाः "मया पत्या जरदष्टिः" इति "मया पत्या प्रजावतीति"[3] तत्र सर्वत्र वोढुर्वरयितुः स्वापत्यं भवतीत्याहुः । न तत्र श्रूयते मया यत्र नियुज्यसे ततो जनयेति मन्त्रग्रहणेनैतद्दर्शयति । मन्त्रार्थवादा अपि नैवंविधाः सन्ति । दूरत एव तद्दर्शयति । **न विवाहविधावुक्तं विधवावेदनं पुनः** । आवेदनं गमनमभिप्रेतमन्त्रे । अथ विवाह एवेयं वा संयुज्यते विवाहयिष्यति देवरो भ्रातृजायां[4] ततोऽयं नियोगो विवाहविहित एव । न त्वत्र विवाहविधाविति पूर्वशेषोऽयमर्थवादः ॥ ६५ ॥

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ॥
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥ ६६ ॥

---

१ र-पातितत्वे । २ र-उद्वाहष्वर कर्म । ३ ऋग्वेदे १०।८ । ४ र-देवरभ्रातृजायां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयमप्यर्थवाद एव नियोगप्रतिषेधशेषः । येऽविद्वांसः सम्यक् शास्त्रं न जानते तत्र व्यवहारिणो लिङ्गाद्यन्वयपरत्वं च न जानते तैरयं **पशुधर्मः** स चात्यन्त**गर्हितो मनुष्याणामपि प्रोक्तः** प्रवर्तितः । स चेदानींतन आदि वेने **राज्ञि प्रशासति** राष्ट्रं पालयति।

ननु च लिङ्गानि नैव सन्तीत्युक्तं । नैवमुद्वाहकेषु मन्त्रेषु तु सन्तीत्युक्तम् । अन्यत्र तु दृश्यते । "को[1] वांऽशयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ" इत्यादि । यथा विधवा स्त्री देवरपतिं मनुष्यं कुरुते समानशयन एव को वा मनस्विनी कुरुते येन नागच्छतः को विशेषु विवाहमन्त्रेषु स किमपत्योत्पत्तिविध्यनुक्रमरूप इत्यभिप्रायः । अन्यै-र्विद्वद्भिरिति पठितं गर्हितो मनुष्याणां प्रोक्तः । पशूनामेष धर्मो भ्रातृस्त्रीगमनं नाम । स च प्रवृत्तो वेनस्य राज्ये ॥ ६६ ॥

स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ॥
वर्णानां संकरं चक्रे कामोपहतचेतनः ॥ ६७ ॥

भुञ्जन्पालयन् । कथं पुनर्वर्णसङ्करं प्रवर्तयन् राजर्षीणां प्रवरः । उक्तं महीमखिलां भुनक्ति यः महाराजत्वात् । **कामेन** रागादिलक्षणे**नोपहता** नाशिता **चेतना** चित्तस्थैर्यं यस्य सः ॥ ६७ ॥

ततःप्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम् ॥
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥ ६८ ॥

अस्पष्टार्थोऽर्थवादः ॥ ६८ ॥

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ॥
तामनेन विधानेन निजो विन्देत देवरः ॥ ६९ ॥

नियोगरूपत्वात्कन्यागतोऽयं धर्म उच्यते । **वाचा सत्ये कृते** वाग्दाने निवृत्त एकेन दत्ताऽपरेण प्रतिगृहीता । **तामनेन** वक्ष्यमाणेन **विधानेन** निजसोदरो **देवरो विन्देत** विवाहयेत् ॥ ६९ ॥

यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ॥
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ ॥ ७० ॥

यथाविधि यथाशास्त्रं । वैवाह्यो विधिस्तथा विवाह्य वाचनिकोऽयं विवाहः । पुनर्भूश्च तथोच्यते । नवा व्यूढाऽपि सती भार्या भवति । केवलं परार्थोऽस्या[3] वाचनिको विवाहः[4] । तथा च दर्शयति (अग्रे ७१ श्लोके) "न दत्वा कस्यचित्कन्यां पुनरन्यस्य दीयत" इति । नासौ देवराय दीयत इत्यर्थः । अदत्ता चास्वभूता कथमिव भार्या भवेत् **शुक्लवस्त्रा** नियमो गमनेऽन्यस्मिन्नपि नियोगे धर्मोऽयमिष्यते ॥ ७० ॥

---

१ ऋग्वेदे १० । ७ । २ क–कोवासपुत्रो विधवेव देवरं मयानुदोषो कृणुते– । ३ र–स्य । ४ र–विवाहसंस्कारः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः ॥
दत्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥ ७१ ॥

" तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पद " इति प्राग्विवाहान्मृते वरे दत्तायामपि पुनर्दानाशङ्कायां प्रतिषेधोऽयम् । विशिष्टे तु पुनर्वचनं तथाविधायाः पुनर्भूरुक्ता । नान्यस्मै **दत्वा** तस्मिन्मृतेऽन्यस्मै **दद्या**त्तथा कुर्वन्**प्राप्नोति पुरुषानृतं** मनुष्यहरणे यत्पापं तस्य भवति ॥ ७१ ॥

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ॥
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥ ७२ ॥

विधिशास्त्रं तदर्हतीति **विधिवत्** । यादृशः शास्त्रेण **विधि**रुक्तः " अद्भिरेव द्विजाग्र्याणाम् " इति स च कैश्चिदुदकाधिकारः कन्याविषये स्मर्यते । तेन **प्रतिगृह्यापि त्यजेत्कन्यां** प्राग्विवाहाद्**विगर्हितां** दुर्लक्षणां विदुष्टां पूर्वं प्रतिगृहीतां मनोज्ञामपि तथा निर्लज्जां बहुपुरुषभाषिणीं **व्याधितां** क्षयव्याधिगृहीतां **प्रदुष्टां** रोगिण्यादिशब्दितामन्यगतभावां च त्यजेत् । क्षतयोनिं **विप्रदुष्टां** व्याचक्षते । न ते सम्यङ्मन्यन्ते यदि तावत्पुरुषानुपभुक्ता स्त्री कन्यादिविकृता तदा नैव दुष्यति । अथ पुरुषसंयुक्ता तदा कन्यैव न भवति । तत्र " त्यजेत्कन्यामिति " सामानाधिकारण्यानुपपत्तिः । उक्तश्च तस्यास्त्यागः । **छद्मना चोपपादिता** न्यूनाधिकाङ्गी या हेतुनियुक्ता । अकथितेषु स्वल्पेष्वपि दोषेषु कृतवरणाऽपि त्याज्यैव ॥ ७२ ॥

यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् ॥
तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः ॥ ७३ ॥

कन्यादोषा उक्तास्ताननाख्यायानुक्त्वा प्रयच्छति ददाति तस्य तद्दानं **वितथं** निष्फलं कुर्यात्प्रत्यर्पणेन । उक्त एवायमर्थः पूर्वश्लोकेनाति[1]स्पष्टीकृतः ॥ ७३ ॥

विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः ॥
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ॥ ७४ ॥

यदा प्रवसेत्तदा भार्याया वृत्तिं विधाय प्रवसेदिति विधिं विधत्येत्येवमर्थं द्रष्टव्यं । " प्रवसन्भार्याया वृत्तिं विदधीतेति " तथा कुर्याद्यथाऽस्या यावत्प्रवासं वृत्तिर्भवति । शरीरस्थितिहेतुभोजनाच्छादनगृह्योपकरणादि । तां **विधाय प्रवसेत्**स्वदेशाद्देशान्तरं गच्छेत् **कार्यवान्**कार्यं पुरुषार्थो दृष्टोऽदृष्टश्च । अदृष्टो धर्मो दृष्टावर्थकामौ । तथा वक्ष्यति (७६ श्लो.) " प्रोषितो धर्मकार्यार्थं " इत्यादिना । अन्तरेणैतानि निमित्तानि भार्यां

---

१ र–विस्पष्टीकृतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हित्वा प्रवासो निषिध्यते । अवृत्तिकर्शिता हि दृष्टदोषप्रदर्शनमथवार्दः । अवृत्त्या दारिद्रेण कर्शिता पीडिता प्रदुष्येत् पुरुषान्तरसंपर्कादिना । स्थितिमत्यपि स्थितिः कुलाचारस्तत्संपन्ना क्षुर्धावसरे दीना दोषमवाप्नुयादन्यं भर्तारमाश्रित्य जीवतीति भाष्यत एतत् । संभावनायां लिङ् ॥ ७४ ॥

विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता ॥
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥ ७५ ॥

नियमो यथा निहते भर्तरि परिग्रहप्रयाणादिनिषेध एवं प्रोषितेऽपि आस्थिता आश्रिता गृहीतवती अकृत्वा तु वृत्तिं प्रोषिते शिल्पैर्जीवेतोति कर्तनजालिकाकरणादिना । गर्हितानि वस्तूनि विजनादीनि । एष एव विधवादीनां निजश्रमजन्यो वृत्त्युपायः ॥ ७५ ॥

प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः ॥
विद्यार्थं षड्यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥ ७६ ॥

यदुक्तं कार्यवान्प्रवसेदिति तानि कार्याणि दर्शयति । तद्विशेषेण प्रतीक्षाकालभेदः । परतस्त्विदं तया कर्तव्यमिति नोक्तं । तत्र केचिदाहुः । प्रकरणादगर्हितैर्जीवेदिति । तदयुक्तं । प्रागस्मात्कालादगर्हितैरितीयं किं म्रियतां न ह्यस्या आत्मत्याग इष्यते । पुंस इव प्रतिषिद्धत्वात् । तस्मात्प्रागप्यस्मात्प्रतीक्षणविधेरगर्हितैः शिल्पैरजीवन्ती गर्हितैर्जीवेत् । अन्ये व्यभिचारमिच्छन्ति । तथाच स्मृत्यन्तरे (नारदस्मृ० अ० १२ श्लो० ९७)
"नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥"
अन्येऽप्याहुः । नास्याज्ञाने ब्रह्मचर्यमपनेतुं शक्यते । स्त्रीधर्मेषु हि तदस्या विहितं मनुनाऽपि "न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु" इति । मृते भर्तरि नास्ति व्यभिचारः । किमङ्ग प्रोषिते । पतिशब्दो हि पालनक्रियानिमित्तको ग्रामपतिः सेनायाः पतिरिति । अतश्चास्मादबाधनैषा भर्तृपरतंत्रा स्यात् । अपि त्वात्मनो जीवनार्थं सैरंध्रीकरणादिकर्मवदन्यमाश्रयेत । तच्च यदा षण्मासभृत्या संवत्सरभृत्या वा कस्मिंश्चिदाश्रिते भर्ता यद्यागच्छेत्तदानीं तां चेद्वशीकुर्याद्वशीकर्तुं शक्नुयात्त्यज त्वं भार्यामिति यावद्भवति कालो न पूर्वः प्राक् पत्युरेव सा पंचमे चार्वितमन्यत् ।

अन्येऽप्यर्थमिममाहुः । पूर्वे तु पुनर्भूवृत्तमिच्छन्ति । या पत्या वा परित्यक्ता भवति यस्याः किल पतिरियन्तं कालं निहितवृत्तिको नागच्छति सा तेन त्यक्तैव भवति । ततश्च यदि सा पुनर्भूधर्मेणान्येनोढा भवेत्तदा भर्ताऽभ्यागतो न किंचिद्ब्रूयात्पुनर्भवस्येयं भार्येति । तदयुक्तं । न निष्क्रयविसर्गाभ्याम्" इति तस्य श्लोकस्यार्थवत्वं दर्शयिष्यामः ।

---

१ र क्षुधा तद्भावे क्षुधावसरे । अ. ५ श्लो. १५७ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मश्च तत्कार्यं च धर्मकार्यं । सोऽर्थः प्रयोजनं प्रवासस्येति **धर्मकार्यार्थं** । कुतः न गृहस्थस्य धर्मार्थो दीर्घकालः प्रवासः । अवश्यं ह्यग्नयस्तेन परिचरणीयाः । पांचयज्ञिकमनुष्ठेयं । कुतो गन्तव्यं " वसन्ते वसन्ते ज्योतिषा यष्टव्यमिति " तीर्थस्नानादीन्यपि स्मार्तानि च श्रौताविरोधीन्यनुष्ठेयान्यसंविशय प्रोषितस्य वा भवतीति येनोच्यते संविधायापि
प्रवास आपर्वणः स्वयं पर्वणि जुहुयादृत्विजामेकतरकाल इति युक्तं । अनाहिताग्नेस्तीर्थ- ९
यात्रायां पांचयाज्ञिकस्य तुल्यत्वेऽपि स्मार्तत्वे भार्यासहितस्योपपत्तेः न तत्त्यागे तीर्थगमनं युक्तमुच्यते । गुरुवचनेन यं गुरवो धर्मार्जने राजोपसेवायां वा सुकार्याय प्रेषयन्ति स धर्मार्थं प्रवासः । प्रायश्चित्तं वा तपोवनदेशभ्रमणेन । अथवाऽर्थार्जनार्थमेव धर्मकार्यार्थमभिप्रेतं दरिद्रोऽहं कुतश्चिद्धनमर्जयिष्ये । **विद्यार्थं** । ननु स्नातस्य च भार्याधिगमः ।
कृतविद्यस्य च स्नानं । तत्र कुतः कृतविवाहस्य विद्यार्थिता । दर्शितमेतत् । ईषदवगत- १०
वेदार्थो विवाहेऽधिक्रियते । निश्चिते स्नानादौ नैतद्युक्तं । कृतायां धर्मजिज्ञासायां स्नानं जिज्ञासा च विचारपूर्वकसंशयच्छेदननिश्चितार्थो । सत्यं । नायं विधिर्विद्यार्थितायाः । तथा च सति धर्मकार्यार्थमित्यनेनैवावगता स्यात् । उत्पन्नेऽप्यधिकारोपयोगिन्यवगमेऽभ्यासातिशयार्थं विशेषार्थं चान्यासु विद्यासु क्षिप्रं शौर्ययशःख्यापनार्थं बहिः सविशेष-
विद्यात्वख्यापनार्थं । देशान्तरप्रवसने यशोहेतुः प्रवासः । **कामार्थं** रूपाजीवानुगमोऽभि- ११
प्रेततरां भार्यामुद्वोढुं । **स्मृत्यन्तरे** प्रसूताभेदेन च कालभेदः स्मर्यते । तथा च **विष्णुः** " अष्टौ विप्रसूताः षट् राजन्याः चतुरो वैश्या त्रिगुणं प्रसूतेति ॥ न शूद्रायाः कालनियमः स्यात्संवत्सरमित्येक " इति ॥ ७६ ॥

संवत्सरं प्रतीक्षेत द्विषाणां योषितं पतिः ॥
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥ ७७ ॥ २०

द्वेष्यः पतिर्यस्यास्तां **द्विषाणां** । एतेन तु सनिष्कासनं कुर्यात् । समपूर्वस्य वसेरेनामिति च द्वितीयानुपपत्तेर्वासयेदिति निर्भर्त्सयेत् । पातकेऽपि तस्या निष्कासनं नास्ति " निरुन्ध्यादेकवेश्मनि " इति वचनात् । प्रायश्चित्तेऽप्यस्मिन्निमित्ते विनयाधानार्थोपहार इष्यते । न सर्वेण सर्वं आत्यन्तिक आच्छेदः ॥ ७७ ॥

अतिक्रामेत्प्रमत्तं या मत्तं रोगार्त्तमेव वा ॥ २१
सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ॥ ७८ ॥

अतिक्रमस्तदुपचर्याऽवज्ञानं पथ्यौषधादिष्वतत्परता न पुरुषान्तरसंचारः । मासत्रयं परित्यागश्च संभोगस्यैव पूर्वस्मादेव हेतोः हारकटकादिविभूषणैर्वियुक्ता कर्तव्या । **परिच्छदापरिग्रहेण** भाण्डकुण्डादिना दासीदासेन वा ॥ ७८ ॥

---

१ र–धर्मश्चासौ । २ र–महणं । ३ ण–र–ख–उदीक्षेत । ४ फ–द्विषन्तीं । ५ फ–अपरिच्छादी ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम् ॥
न त्यागोऽस्ति द्विषंत्याश्च न च दायापवर्तनम् ॥ ७९ ॥

क्लीबबीजशब्दौ नपुंसकमाहतुः । भेदस्तु वातरेता अप्रवृत्तेन्द्रियोपरः यादृशं यो द्वेष्टि तस्य नास्ति निग्रहः पूर्वोक्तं अपवर्तनमपहारः प्रोषितप्रतिपिद्धान्नादयः स्मृत्यन्तरनिषिद्धाः ॥ ७९ ॥

मद्यपाऽसाधुवृत्ता च प्रतिकूला च या भवेत् ॥
व्याधिता वाऽधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा ॥ ८० ॥

मद्यपाऽसौ मद्यपानरता । पक्तिसंस्कारगृहकार्यानुष्ठानासमर्था तत्परिजागर्या सा परिवेदनायामर्हति । या तु गुरुभिः प्रतिषेधमापद्यमाना तस्या दण्डं वक्ष्यति " प्रतिषिद्धां पिबेदिति " । स्वयं नियमस्य त्वन्यनियमव्यतिक्रमवत्प्रायश्चित्तेन प्रत्यापत्तिर्युक्ता पुनरधिवेदनं च । तथा च धर्मानुष्ठानप्रजोत्पत्तिगृहकार्योपघातनिमित्तान्यधिवेदननिमित्तानि पठ्यन्ते " प्रतिकूला व्याधितार्थघ्नीति " । ब्राह्मण्यास्तु शास्त्रेण प्रतिषिद्धमद्यायास्ततः पानप्रायश्चित्तमेव भूयः अतिप्रवृत्तौ पातित्यं तु भ्रूणहन्त्रि हीनसेवायां स्त्री पततीति परिसंख्या नान्नमद्यपाने पातित्यमिति । तदेकादशे वक्ष्यामः । उक्तं च पञ्चमे असत्यवृत्ताऽसाध्वाचारा भृत्येष्वसत्परुषवाक् बलिकर्मणां प्रागेव भुङ्क्ते । दैवपित्र्ययोर्ब्राह्मणभोजनादौ न श्रद्धावती अतिव्ययशीला भाण्डोपस्करणं न परिरक्षति अनल्पमूल्येन क्रीणाति हिंसानाकुलशङ्कया । स्यादेवातिताडणशीला । अन्वाहिकस्य व्ययस्यापहन्त्री । अधिवेदनं तस्या उपर्यन्याविवाहः ॥ ८० ॥

वन्ध्याष्टमेऽधिवेद्याऽब्दे दशमे तु मृतप्रजा ॥
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥ ८१ ॥

अन्यासामप्यधिवेदनमाह । तत्र वन्ध्याऽष्टमेऽब्देऽधिवेद्या दशमे तु मृतप्रजा । नाधिवेदनेऽपत्योत्पत्त्यभावाद्धि वन्ध्याया अनुष्ठानपरिपातनं स्यात् । अपत्योत्पत्तिविधिराधानविधिश्च नापुत्रे ह्याधानं श्रूयते । एवं मृतप्रजायाः स्त्रीजनन्या अप्रियवादिन्यास्तु दोषाभावेन नाधिवेदनेन सत्यां क्षमायां श्रमनियमः ॥ ८१ ॥

या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः ॥
साऽनुज्ञाप्याऽधिवेत्तव्या नावमान्या च कर्हिचित् ॥ ८२ ॥

भर्त्रे हिता परिचर्यापरानुज्ञापनावमानयोरिह विधानयोः पूर्वासामेतद्भावात् रोगिणी-

---

१– ण–द–द्विषाणायाश्च । २ ण–द–जागरणया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रहणं वन्ध्यास्त्रीजनन्यावपि लक्षयति प्रकृतत्वाविशेषादवमाननिमित्ताभावाच्च कर्हिचित्कदाचिदवमाननं शिष्टचर्यं परिभाषणादि ॥ ८२ ॥

अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् ॥
सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ ॥ ८३ ॥

क्रोधेनाधिवेदनहेतुना निर्गतायास्त्यागसंनिरोधौ विकल्पतो विधीयेते । ननु यथोपपन्न- ९
हेतुना भोजनाच्छादनाभिताडनादिना तत्र प्रीत्या क्रोधावमार्जनं श्वश्रूभिः श्वशुरादिभिर्वा परिभाषणं । संनिरोधो रक्षिपुरुषाधिष्ठानं । त्यागो व्याख्यातः । असंभोगः सहशय्यावर्जनं । कुलं ज्ञातयः तत्पितृपक्षाः स्वपक्षाश्च ॥ ८३ ॥

प्रतिषिद्धाऽपि चेद्या तु मद्यमभ्युदयेष्वपि ॥
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥ ८४ ॥ १०

प्रतिषेधे गुरुसंबन्धि व्ययं दण्डः क्षत्रियादिस्त्रीणां । न शास्त्रीयो ब्राह्मणीनां । न हि तत्र दण्डमात्रेण मोक्षः । किं तर्हि महता । न च तत्राभ्युदयेषु पानाशङ्का । अप्रतिषिद्धमद्यानां तु नियमेनोत्सवसमागतानामादरवती प्रवृत्तिर्दृश्यते । यां सम्यङ्निषेधत्यभ्युदयेष्वपीति दण्डश्चायं भर्त्रा दीयते । सत्यपि राजवृत्तित्वे "स्त्रीणां भर्ता प्रभुः" इति
विज्ञायते । अन्येषामपि परिग्रहवतां भृत्यादिविषये कियति दण्डः स्वातन्त्र्येऽभ्युदयः पुत्र- १५
जन्मविवाहादय उत्सवाः । प्रेक्षा नटादिदर्शनं । समाजो नितान्तमपि जनसमूहः । तत्र कुतूहलिन्या अयं दण्डः ॥ ८४ ॥

यदि स्वाश्चापराश्चैव विन्देरन्योषितो द्विजाः ॥
तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च ॥ ८५ ॥

कामतः प्रवृत्ता यदि समानजातीयाश्च विन्देरन्विवाहयेयुस्तासां वर्णक्रमेण २०
जात्यनुरूपं ज्यैष्ठ्यं न वयस्तो न च विवाहक्रमतः । फलादिदाननिमित्ते पूजा प्रथमं ब्राह्मण्यास्ततः क्षत्रियावैश्ययोरित्येष वर्णक्रमः । वेश्म प्रधानं गृहं । तद्ब्राह्मण्याः सवर्णानां विवाहक्रमो निश्चलः स्मृतः ॥ ८५ ॥

भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम् ॥
स्वा चैव कुर्यात्सर्वेषां नास्वजातिः कथंचन ॥ ८६ ॥ २१

शरीरशुश्रूषा भर्तुरुपयोगिपाकादिलक्षणा दानभोजनप्रतिजागरणं स्वा स्वैव कुर्यात् । पृष्ठपादसंवाहननिर्णेजनादौ त्वनियमः । युगपत्संनिधौ तु शरीरावयवक्रमो वर्णक्रमेण ।

१ ण-र-किं तन्मे महता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैत्यकं धर्मकार्यं " सायं त्वन्नस्येत्यादि " अग्निशरणोपलेपनाचमनोदकतर्पणदानादि । अस्या निन्दार्थवादः ॥ ८६ ॥

यस्तु तत्कारयेन्मोहात्सजात्या स्थितयाऽन्यया ॥
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥ ८७ ॥

यस्त्वेतत्कर्माऽन्ययाऽसमानजातीयया कारयेत्सजातीयायां स्थितायां ब्राह्मण एव स चण्डालः पूर्वस्माद्दृष्टः ॥ ८७ ॥

उत्कृष्टायाभिरूपाय वराय सदृशाय च ॥
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ॥ ८८ ॥

उत्कृष्टायाभिरूपायेति विशेषणविशेष्यभावः । उत्कृष्टायाभिरूपतराय इत्यर्थः । अथवोत्कृष्टाय जात्यादिभिरभिरूपायेति पृथग्विशेषणं । रूपमाकृतिमाभिमुख्येन प्राप्नोति रूपस्वभाववचनो वा स्वभावः विद्वानप्यभिरूप उच्यते । **सदृशाय** जात्यादिभिर्वरो वोढा जामाता । **अप्राप्ता**मप्ययोग्यामपि कामवशत्वेन वाऽलमप्राप्तं कौमारं वयः स्मृत्यन्तरेऽनग्निकेत्युच्यते । काम स्पृहा यस्या नोत्पन्ना सा चाष्टवर्षा षड्वर्षा वा न त्वत्यन्तबालैव । तथाहि लिङ्गम् " अष्टवर्षामिति " । इदमेव लिङ्गं धर्मप्रयुक्ते तामपि विवाहस्येति । अन्यथा रागस्यैव प्रयोजकत्वे कुतोऽप्राप्ताया विवाह इत्याहुस्तदयुक्तं । धनार्थिनोऽपि बालां विवाहयन्ति । नाशास्त्रीयैव सर्वा प्रयुक्तिस्तृतीये निरूपिता ॥ ८८ ॥

काममा मरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ॥
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥ ८९ ॥

प्रागृतोः कन्याया न दानं ऋतुदर्शनेपि न दद्याद्यावद्गुणवान्वरो न प्राप्तः । **गुणो**विद्याशौर्यातिशयः शोभनाकृतिर्वयोमहत्त्वोपेतता लोकशास्त्रनिषिद्धपरिवर्जनं कन्यायामनुराग इत्यादिः ॥ ८९ ॥

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ॥
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥ ९० ॥

रेतोऋतुकालं तद्वत्यपि **त्रीणि वर्षाणि** तद्गृहे आसीत । अतः परमुत्कृष्टाभावे सदृशं समानजातीयं स्वयं वृणुयात् ॥ ९० ॥

अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ॥
नैनः किंचिदवाप्नोति न च यं साऽधिगच्छति ॥ ९१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्षत्रयादूर्ध्वमदीयमाना यं भर्तारं वृणुते तस्य दोषो न कन्यायाः पूर्वेणैव दोषाभाव उक्ते त्रियमाणस्य दोषार्थमिदं ऋतुदर्शनं च द्वादशवर्षाणामिति स्मर्यते ॥ ९१ ॥

अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा ॥
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ॥ ९२ ॥

भ्रात्रादिभिर्यदादौ दत्तं स्वयंवरणाभिप्रायं तस्या अजानद्भिस्तदलङ्करणं तेषामेव प्रत्यर्पयेत् । यदि तु तथाविधाया एव ददाति तदा न त्यागः । तेनास्मै न वयमेनां दास्याम इत्येवमभिप्रायं यद्भूषणं न तस्मिन्नन्यथात्वमापन्ने युक्तं । "स्तेनः स्यादिति" पुलिङ्गेन पाठान्तरं वरस्य चौरत्वमाहुस्तस्मात्तेन पित्रा नालङ्कारस्त्याजयितव्यः ॥ ९२ ॥

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् ॥
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ॥ ९३ ॥

शुल्कदेयाया ऋतुमत्याः शुल्कनिरोधोऽयं **स च स्वाम्यादतिक्रामेत्** । "बाल्ये पितुर्वशे तिष्ठेत्" इत्युक्तं । वयोन्तरप्राप्तौ वेदयितुः पितुः स्वाम्यं नास्ति । शुल्कादेयाया अपि हेतोः समानत्वात्पितुः स्वाम्यनिवृत्तिः । अपक्रमणं निवृत्तिः । **प्रतिरोधनं** प्रतिरोधो ऽपत्योत्पत्तिकार्ये केचिदाहुः अमानवोऽयं श्लोकः ॥ ९३ ॥

त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ॥
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥ ९४ ॥

इयता कालेन यवीयसी कन्या वोढव्या न पुनरेतावद्वयस एव विवाह इत्युपदेशार्थः । अथापि न यथाश्रुतवर्षसंख्यैव । किं तर्हि । बहुना कालेन यवीयसी वोढव्या । न ह्येतद्विवाहप्रकरणे श्रुतं । येन संस्कार्यविशेषणत्वेन तदङ्गं कालो दशादिवर्षापञ्चविंशत्यादिवर्षं च निवर्तयेत् । ननु च वाक्यान्तरस्थस्याप्यङ्गविधिर्भवत्येव । सत्यमिह प्रकरणोत्कर्षेण पाठादाचार्यस्याभिप्रायान्तरमनुमीयते । तथा शिष्टसमाचारः । सुतस्य च पुनर्दारक्रियायां नैष कालः संभवतीति "पुनर्दारक्रियां कुर्यात्" इति नोपपद्यते ॥ ९४ ॥

देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः ॥
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ॥ ९५ ॥

साध्वी भार्या प्रातिकूल्याप्रियवादादिदोषयुक्ताऽपि भर्त्रा न त्याज्येति श्लोकार्थः । अवशिष्टा प्रशंसा । यां तु निरुध्यादेकवेश्मनीत्यसाध्व्या अपि विहितं तत्सकृद्व्यभिचारे । अभ्यासे तु त्याग एव । नान्यथा तां साध्वीं बिभृयादित्यनेन किंचित्कृतं स्यात् । यदपि "हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् । परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥"

---

१ र-ण-तस्मात्तेन पवित्रानलङ्कारांस्त्यजयितव्याः । २ अ. ५ श्लो. १४८ । ३ र-ण-वेदकृतः । ४ ण-र-त्तिः । ५ याज्ञवल्क्यस्मृ. आ. ७० ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच्च सत्यां शक्तौ पत्युरिच्छा सा । अनिच्छायां तु त्याग एव । यच्चेदं पतितास्वपि वस्त्रान्नदानं देयं चेत्यादि वक्ष्यति तद्ब्रह्महत्यादिषु प्रायश्चित्तेषु भैक्ष्यभोजनारम्भे निवासप्राप्तौ प्रतिषेधवचनमिति वक्ष्यामः । सर्वथा तु पुनर्व्यभिचारिण्या भरणं नास्ति । न चात्र त्यागः श्रुतो येन संभोगविषयतया कल्पेत । "सोमोऽददत्" इत्यादिमन्त्रार्थवादेभ्यो देवतानां दातृत्वं प्रतीयते । अथवा विवाहे देवताभार्या भवत्यत उच्यते । देवदत्तामिति । विन्देत नात्मन इच्छया यथान्यद्व्रीहिरण्याद्यापणभूमौ लभ्यते नेयं भार्या । अत उच्यते नेच्छयात्मन इति । देवेभ्यो हितं त्यक्तायां भार्यायां वैश्वदेवादिक्रियानिमित्ते नास्ति देवहितं । अतस्तां द्विषाणां द्विषतीमपि बिभृयात् । पातित्ये तामधिकारप्राप्तां पतिर्विन्देत ॥ ९५ ॥

प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः ॥
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ॥ ९६ ॥

प्रजनं गर्भग्रहणम् । **सन्तानो** गर्भाधानम् । तस्माद्धेतोरपत्योत्पत्तेरुभयाधीनत्वाद्वेदे स्त्रीपुंसयोः **साधारणो धर्मः पत्न्या सह** पुंस उक्तः । अतः केवलस्याधिकाराभावात् । स्त्रियो द्वेष्या अपि न त्याज्याः ॥ ९६ ॥

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः ॥
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥ ९७ ॥

यस्याः पित्रादिभिर्गृहीतं शुल्कं न च दत्ता केवलवचनेन देयत्वेन व्यवस्थिता अत्रान्तरे स **चेन्म्रियेत** तदाऽन्यद्रव्यवद्देवरेषु प्रजार्थेषु वा युधिष्ठिरादिवत् तदभावे सपिण्डेष्वतो विशेषार्थमिदमुच्यते । **देवराय प्रदातव्येति** न सर्वेभ्यो भर्तृभ्रातृभ्यो नापि सपिंडेभ्यः । किं तर्ह्येकस्मै देवरायैव । तत्रापि कन्याया अनुमतौ सत्यां । अथासत्यां कन्यायाः शुल्कस्य च का प्रतिपत्तिः । यदि कन्यायै रोचते ब्रह्मचर्यं तदा शुल्कं कन्यापितृपक्षाणामेव । अथ पत्यन्तरमर्थयते तदा प्राग्गृहीतं शुल्कं त्यक्त्वाऽन्यस्मादादाय दीयते ॥९७ ॥

आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन् ॥
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम् ॥ ९८ ॥

इच्छातः शुल्कग्रहणे पूर्वेण विधिरुक्तः कस्यचित्तत एवाऽऽशङ्का स्याददोषं शुल्कग्रहणं शास्त्रे गृहीतशुल्काया विशेष उक्तो यतोऽत इमामाशङ्कामपनेतुमाह ।

---

१ ऋग्वेदे ८।३।२८। २ ण-र-द्वि । ३ ण-र-प्राप्ता सर्वेषु वा युधिष्ठिरादिदत्ता ।

For Private And Personal Use Only

आददीत न शूद्रोऽपि शुल्कमिति इच्छातः प्रवृत्तौ शास्त्रीयो नियमो न तु शास्त्रेण पदार्थस्यैव कर्तव्यतोक्ता । यथा मद्यपीतस्य प्रायश्चित्ते मद्यपानं शास्त्रेणानुज्ञातं भवति । शुल्कसंज्ञेन यदेवोक्तं " गृह्णन्हि शुल्कं लोभेन " इति । येन तु विशेषेण पुनः पाठोऽसौ प्रदर्शित एव ॥ ९८ ॥

एतत्तु न परे चक्रुर्नापरे जातु साधवः ॥ ९
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते ॥ ९९ ॥

तदुक्तं गृहीते शुल्के न कन्येच्छायां सत्यां मृते तु शुल्कदेऽस्या अन्यत्र दानमिति तन्निषेधति । **यदन्यस्य** शुल्कदस्यानुज्ञया **पुनरन्यस्मै दीयते** पुनः शुल्कं गृहीत्वेति वरं स्वयंवरं तु कारयेत्कन्या । एष एवार्थः ॥ ९९ ॥

नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु ॥ १०
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम् ॥ १०० ॥ *

न कुतश्चिदस्माभिः श्रुतं पूर्वेषु जन्मसु कल्पान्तरेष्वित्यर्थः ॥ १०० ॥

अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः ॥
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः ॥ १०१ ॥

अविशेषेण वचनवित्त्यौ सर्वक्रियास्वव्यभिचारः । तथा **चापस्तम्बः** " धर्मे १९
चार्थे च कामे च नाभिचरितव्या " इति । एतावच्च श्रेयो धर्मोऽर्थः कामः । तथा **चोक्तं** । " त्रिवर्ग इति तु स्थितिः " इति । यच्चाहुरपरित्यागोऽत्राव्यभिचार इतरथा स्त्रीवत्पुरुषस्यानेकाभार्यापरिणयनं न स्यात्तदयुक्तम् । अस्ति पुरुषे वचनं " कामतस्तु प्रवृत्तानां " तथा " वन्ध्याष्टमेऽधिवेत्तव्या " इति । न तु स्त्रियाः । तथा च लिङ्गान्तरं स्यात् " एकस्य बह्व्यो
जाया भवन्ति नैकस्यै बहवः सह पतय " इति (ऐतरेयब्राह्मणे ३।३ ।) । आमरणान्ते २०
भव **आमरणान्तिकः** । अन्यतरमरणेऽपि तस्यान्तोऽस्तीत्यर्थः । **एष** संक्षेपेण **स्त्रीपुंसयोः प्रकृष्टो धर्मो** वेदितव्यः ॥ १०१ ॥

तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ ॥
यथा नातिचरेतां तौ वियुक्तावितरेतरम् ॥ १०२ ॥

यतेयातां प्रयत्नवन्तौ तथा स्यातां **यथेतरेतरं** परस्परं **नातिचरेतां** । अति- २१
चारोऽतिक्रमः । धर्मार्थकामेष्वसहभावः । **कृतक्रियौ** कृतविवाहादिसंस्कारौ नियुक्तौ । ततः परोपसंहारः श्लोकोऽयं नानुक्तार्थोपदेशकः ॥ १०२ ॥

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः ॥
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत ॥ १०३ ॥

---

१ ण-र-स्याशुल्कदस्य । * ण पुस्तके न दृश्यते । २ ण-र-क्रिया । ३ फ-भि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वोक्तप्रकरणयोः संबन्धश्लोकोऽयं उक्तेषु स्त्रीपुंसयोश्चापत्योत्पत्तौ च दायधर्मस्य विभागस्यावसरः ॥ १०३ ॥

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ॥
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥ १०४ ॥

भजेरन्निति प्राप्तकालतायां लिङ् । तथा पञ्चमे प्रपञ्चितं । अथवा यस्मिन् शयने संक्रामति ॥ १०४ ॥

ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः ॥
शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥ १०५ ॥
ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ॥
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ १०६ ॥
यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ॥
स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥ १०७ ॥

इतरानित्यर्थवादोऽयं । यथाश्रुतितात्पर्ये श्रुतिग्रहणाद्धि कनीयसामभागार्हतैव स्यात् । ततश्च वक्ष्यमाणविरोधः ॥ १०७ ॥

पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः ॥
पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥ १०८ ॥

पुत्रवत्पालनीया न तु बाला इति धनादिना गर्हणीयाः । तदाह **पुत्रवच्चापि वर्तेरन्निति** ॥ १०८ ॥

ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ॥
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः ॥ १०९ ॥

अपरा प्रशंसा । य एव गुणज्येष्ठः स **वर्धयति कुलं** । अयमेव निर्गुणस्तत्कुलं **विनाशयति** । शीलवति ज्येष्ठे कनीयांसोऽपि तथा वर्तन्ते । तेऽपि गुणहीना विवदन्ति ॥ १०९ ॥

यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः ॥
अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बन्धुवत् ॥ ११० ॥

ज्येष्ठस्य वृत्तिः । पुत्रे च स्नेहः कनीयांसोऽपि तथैव वर्तन्तेति पालनं शरीरधनेषु तदीयेषु स्ववदनुपेक्षाऽकार्येभ्यो निवर्तनं यस्त्वन्यथा वर्तते तत्र बन्धुवत्प्रत्युत्थानाभिवादनैः मातुलपितृव्यवत्संपूजा कर्तव्याऽन्यकरणविधेयतानुवृत्तिः ॥ ११० ॥

---

१ ण–र–गुणो । २ ण–र–तथैव । ३ ण–र–गुणादीना वदन्ति । ४ ण–र–अन्याकरणानुवेदतापवृत्तिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया ।। १११ ।।

स्वेच्छानियोज्यत्वाभावान्निरपेक्ष्यस्य द्रव्यसाध्येषु ज्योतिष्टोमादिष्वसंभवात्तत्सिद्ध्यर्थोऽयं न्यायप्राप्तो विभाग उच्यते । **पृथग्वा धर्मकाम्ययेति** न पुनरविभागादधर्मो विभाग एवाग्निहोत्रादिवद्धर्मः । ननु च धर्मानुष्ठानप्रतिबन्धहेतुत्वादधर्मत्वैवाविभागस्य । नैष दोषः । अधिकृतस्यानुष्ठाने प्रत्यवायः । न चाविभक्तधनस्याधिकारोऽग्निमत्त्वाभावात् । विभागकाल एवाग्निपरिग्रहस्य विहितत्वात् । यस्तु जीवत्येव पितरि कृतविवाहस्तदैव च परिगृहीताग्निस्तस्याधिकृतत्वान्नैवाविभागः । सोऽपि यदि विच्युतः परिग्रहादन्यतो वा विहितानुष्ठानपर्याप्तधनस्तदा नैव सह वसन्प्रत्यवेयात् । न हि विभागाविभागयोर्धर्माधर्म्यं तत्स्वरूपेणास्तीत्युक्तं । ननु च " भ्रातॄणामविभक्तधनानामेको धर्मः प्रवर्तत " इति वचनाद्दंपत्योरिव सहानुष्ठाने प्राग्विभागादस्त्येव धर्मव्यक्तिः । साधारण्याद्द्रव्यस्य सर्वैः संभूय कर्तव्यमिति नैतदग्निहोत्राद्याहवनीयादिषु ह्यग्निहोत्रादयः संस्कारनिमित्ताश्चाहवनीयादय आत्मनेपददर्शनादन्यतरस्य संबन्धितां प्रतिपद्यन्ते । परकीये वाऽग्नौ जुह्वतः प्रतिषेधदर्शनमस्ति । नान्यस्याग्निषु यजतेति न स्मार्ते ह्यपि गृह्येऽग्नौ विधानं । गृहशब्दस्य विशिष्टोपादानादग्निवचनत्वादेष एव न्यायः । अतिथ्यादिभोजनदाने महायज्ञमध्यपाठात् ।।

" वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि ।। पञ्चयज्ञविधानं च " इति गृह्यत एवाधिकारः । तेनैतद्वचनमेको धर्म इति श्राद्धपूर्तोत्रादिमात्रं विज्ञेयम् ।। १११ ।।

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः ।। ११२ ।।

इयमुद्धारनियोगस्मृतिरतिक्रान्तकालविषया । न त्वद्यत्वेऽनुष्ठेये नियतकालत्वात्स्मृतीनामिति केचित् । अनुष्ठेयत्वव्यपदेशो दीर्घसत्रवज्ज्ञानादभ्युदयो यथा स्यादिति । न हि दीर्घसत्रमद्यत्वे केचिदाहरमाणा दृश्यन्ते । अधीयते तु तदुपदेशं ब्राह्मणाः । तथाच " अन्ये कलियुगे धर्मा " इत्युक्तं तेन देशनियमवत्कालनियमोऽपि धर्माणां द्रष्टव्यः । न ह्युपदिष्टो धर्मः सर्वत्र देशेऽनुष्ठीयते । तथाहि देशधर्मा नियतदेशव्यवस्थिता उच्यन्ते । अन्यथा सर्वानुष्ठाने न देशव्यपदेश्यता धर्माणां । तथा च पठति (अ. २ श्लोक १९) " अयं द्विजैर्हि विद्वद्भिः " इत्यादि । तस्मादुद्धारनियोगगोवधस्मृतय उपदिष्टा नानुष्ठेयास्तदेतदपेशलं । न ह्येवंविधः कालनियमः क्वचिदपि श्रूयते सायंप्रातः

१ ण-र-धर्मात् । २ ण-र-अनुष्ठाने । ३ ण-र-तं । ४ ण-र-व्यवस्थादेशे ।

For Private And Personal Use Only

पर्वादिनियमादन्यत्र । यच्च " अन्ये कृतयुगे धर्मा " इति तत्प्रथम एव व्याख्यातं । न हि युगभेदेन धर्मव्यवस्थाहेतुदेशनियमोऽपि प्राचीनप्रवणादिव्यतिरेकेन मध्यदेशः पूर्वदेशकृतो नैवास्तीत्युक्तं । " निजान् जनपदधर्मान्सद्भिराचरितान् " इत्यत्र दीर्घसत्रेष्वद्यत्वेऽप्यनुष्ठानसंभवः। संवत्सरशब्दस्त्वहःसु प्रथम एव दर्शितः। यत्तु नाद्यत्वे केचिदनुतिष्ठन्तो दृश्यन्त इति उपदिष्टार्थस्य नित्यवदाम्नातस्यापि बहुभिः प्रकारैरनुष्ठानसाधनाशक्त्याफलानिच्छया वा नास्तिकतया वा यत्तु " वेने राज्यं प्रशासति " तदा प्रभृतिकं महापौर्वकालिकमनुष्ठानं दर्शयतीत्यर्थवादोऽसौ न कालोपदेशः। **ज्येष्ठस्य विंशः** ज्येष्ठस्य मध्यद्रव्याद्वा विंशतितमो भाग उद्धृत्य दातव्य एव । **मध्यमस्य तदर्धं** चत्वारिंशत्तमो भागः । एवं कनिष्ठस्य तुरीयो ज्येष्ठापेक्षयाऽशीतितमो भागः । एवमुद्धृते परिशिष्टं त्रिधा कर्तव्यं । तत्र सर्वेभ्यो द्रव्येभ्यो यद्वरं श्रेष्ठं तज्ज्येष्ठस्यैव । अथवा "द्रव्येष्वपि परं वरम् " इति पाठः । उत्तमाधममध्यमानि यानि द्रव्यादीनि सन्ति ततस्तस्माद्यदेकं श्रेष्ठं तत्तस्यैव तदुक्तं भवति । यत्र गावोऽश्वा वा सन्ति एकः श्रेष्ठो ज्येष्ठस्य दातव्यो न द्रव्यान्तरेण मूल्येन वा स्वीकर्तव्यः । त्रयाणां सर्वेषां गुणिनामयमुद्धारविधिः । गुणवतामुद्धारदर्शनात् ॥ ११२ ॥

ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् ॥
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम् ॥ ११३ ॥

त्रिभ्योऽधिकपुत्रस्य ज्येष्ठकनिष्ठयोर्गुणवतोर्यथोक्तमुद्धृत्य बहूनामपि मध्यममध्यमानां गुणवतो मध्यमस्य यश्चत्वारिंशत्तमो भाग उक्तोऽनन्तरश्लोके बहुभिरपि मध्यमैः संविभजनीयः। समगुणानां तु मध्यमानां सर्वेषामेकैकस्य पूर्ववचनाच्चत्वारिंशत्तमो भाग उक्त उद्धार्यः। **तेषां स्यान्मध्यमं धनमिति** उभयथा वचनं व्यज्यते । मध्यमधनं यदनन्तरश्लोके निर्दिष्टं तत्सर्वेषां समवायेन दातव्यं । यदि वा प्रत्येकमेव ज्येष्ठकनिष्ठतामपेक्ष्य तत्र प्रथमपक्षो निर्गुणेषु युक्तस्तेन बहुधनार्हो द्वितीयो गुणवत्स्वेव ॥ ११३ ॥

सर्वेषां धनजातानामाददीताग्र्यमग्रजः ॥
यच्च सातिशयं किंचिद्दशतश्चाप्नुयाद्वरम् ॥ ११४ ॥

आद्येनार्धश्लोकेन "सर्वद्रव्याच्च यद्वरम्" इत्युक्तमनुवदति । **जातशब्दो** जातिपर्यायः प्रकारवचनो वा । **अग्रजो** ज्येष्ठः । **अग्र्यं** श्रेष्ठं । **यच्च सातिशयमेकमपि** वस्त्रमलङ्कारं वा **दशतो** दशावयवाद्वा वरमेकमाददीत । यदि दशगावोऽश्वा वा सन्ति तदा एकं श्रेष्ठमाददीत । अर्वाग्दशावयवाद्वा न लभते । वर्गो दशशब्दः । अन्ये तु स्वार्थे तसिं चाचक्षते ।

---

१ ण-र-उद्धृतपरिशिष्टं । २ ण-र-सर्वत्र गुणानाम् । ३ ण-र-मतो ।

"दशैव दशतो वरान्" इति बहुवचनं पठन्ति । दशवरानाददीत अन्यस्तद्विशिष्टान्स्मरति "दशतःपशूनामेकशफद्विपदानाम्" इति ॥ ११४ ॥

उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु ॥
यत्किंचिदेव देयं तु ज्यायसे मानवर्धनम् ॥ ११५ ॥

दशसु पशुषु यः पूर्वत्रोद्धार उक्तः स नास्ति । ये भ्रातरः **स्वकर्मसु** श्रुताध्ययनादिषु **संपन्ना** विशेषवंतो दशस्विति चोपलक्षणं व्याख्यानयन्ति । दशसु यत्र श्लोक उद्धार उक्तः स सर्व एव नास्ति । कर्मसंबन्धात् । किंतु तैरपि यत्किंचिदेवाविकमुपानीविघ-**मानवर्धनं** पूजाकरं ज्येष्ठाय देयम् ॥ ११५ ॥

एवं समुद्धृतोद्धारे समानंशान्प्रकल्पयेत् ॥
उद्धारेनुद्धृते त्वेषामियं स्यादंशकल्पना ॥ ११६ ॥

समुद्धृते पृथक्कृत उद्धारेऽधिके भागेऽवशिष्टे धने **समानंशान्प्रकल्पयेत्** । **अनुद्धृते** वक्ष्यमाणा भागकल्पना ॥ ११६ ॥

एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः ॥
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः ॥ ११७ ॥

एकेनांशेनाधिकं स्वांशं हरेत्स्वीकुर्यात् द्वावंशौ प्रतिपद्येतेत्यर्थः । **ततोऽनुजस्त**दनन्तरमध्य**र्धमर्ध**द्वितीयं **यवीयांस**स्तस्मादर्वाग्जाताः सर्वे सममंशं नाधिकं किंचिन्नाल्पमित्यर्थः ॥ ११७ ॥

स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् ॥
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ॥ ११८ ॥

कन्याशब्दः प्रायोऽनूढासु प्रयुज्यते । कानीनपुत्रः **स्मृत्यन्तरे** चोपात्तानामिति पठ्यते । अतोऽनूढायामयं भाग उच्यते । स्वाभ्यः प्रजाभ्य इत्यपेक्षया स्वाभ्यो **भ्रातरः कन्याभ्यश्चतुर्भागमंशं दद्युः स्वादंशात्** । यत्र बह्व्यः कन्याः सन्ति तत्र समानजातीयभ्रात्रपेक्षया चतुर्थांशे कल्पना कर्तव्या । तथा चायमर्थः । त्रीनंशान्पुत्र आददीत चतुर्थं कन्येति । यदपि कैश्चिदुक्तं महानुपकारः पितृकरणं कन्यानामदत्तानां येन जीवति पितरि तदिच्छया मूल्येनापि धनेन संस्क्रियन्ते मृते त्वंशहरा इति तत्पुत्रेऽपि तुल्यवाचनिके चार्थे [3]केयं नोदना अथाभिप्रायसमाचार उद्वाहमात्रप्रयोजनं दानमित्याचारो दुर्बलः स्मृतेरिति । न वैकान्तिकः अनैकान्तिकत्वे च स्मृतितोऽयं नियमो युक्तः । यदपीदं केनचिदुक्तमुद्वाहमात्रप्रयोजनं देयं न चातुर्थो भागो यथाश्रुतमिति च । इदं वाच्यो नोद्वाहे

१ ण-र-समर्थ एव । २ ख-मुपपानविधि । ३ ण-र-केयंतो नोदना । ४ फ-उद्धार ।

परिमितधनदानमस्ति । तस्य द्वादशशतं दक्षिणेतिवत् केवलमाच्छाद्यालंकृतां विवाहयेत् । सौदायिकं वाऽस्या दद्यादिति श्रूयते । अलङ्कारत्वं सुवर्णमणिमुक्ताप्रवालादिरनेकधा भिन्नामिति । तत्र न ज्ञायते कियद्दातव्यं धनं कीदृशो वाऽलङ्कार इत्यतश्च परिमाणार्थमेवेदं युक्तं **स्वादंशाच्चतुर्भागमिति** । न चास्मिन्नर्थे शास्त्रविरोधो युक्तिविरोधो वा । स्मृत्यन्तराण्येवमेव पक्षमुपोद्बलयन्ति । [या. व. स्मृ. व्य. १२४]

"असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।भगिन्यश्च निजादंशाद्दत्वांऽशं तु तुरीयकम्"॥इति। तथा "आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः" इति । अस्यायमर्थः । यत्र स्वल्पं धनमस्ति भ्रातुर्भगिन्याश्च न चतुर्भागे कन्याया भरणं भवति तत्र समभागं कन्या हरेदा संस्कारात् । परतस्तु स्मृत्यन्तराच्चतुर्भागं गृह्णीयात्स्वल्पमपि । कथं तर्हि भरणमात्रं कुर्यादित उक्तं "परतो बिभृयात्पतिः" इति । भ्रातृग्रहणं सोदर्यार्थं व्याचक्षते । कोऽभिप्रायः । भ्रातृशब्दो निरुपपदसोदर्य एव मुख्यया वृत्त्या वर्तते । पृथक्त्ववचनं च लिङ्गम् । यस्यास्तु हि सोदर्यो नास्ति तस्या अयं दायः सौदायिकस्य प्राप्नोति । वैमात्रेयो दास्यतीति चेन्नासति वचनान्तरे ददात्ययं । भ्रातृशब्दा एकात्ममातृकाश्च गृह्यन्ते । पैतृष्वस्रेयादिषु तूपचाराद्वर्तत इति युक्तं । एवमेकशब्दस्यानेकार्थत्वं नाभ्युपगतं भवति स्मृत्यन्तरसमाचारश्चेति श्रेयान् । तत्र हि पठ्यते "यच्छिष्टं पितृदायेभ्यः प्रदानिकम्" इति । नात्र भगिनीशब्दो भ्रातृशब्दो वा श्रूयते । यत इयमाशङ्का स्यात् । यत्तु पृथगिति तदेकैकस्यैव समूहभागः सर्वास्य इत्येवमपि युज्यते । यदप्युच्यते अददतां प्रत्यवायान्न तु हठाद्दाप्यन्ते । यत उच्यते **पतिताः स्युरदित्सव इति** । यो हि यत्र यावत्यंशे स्वामी स हरेदित्युच्यते । न पुनरनेनास्मै दातव्यमिति । यथा चोच्यते भ्राता भ्रात्रे दद्यादिति चोच्यते न पुनरस्वामिभ्यः ॥ ११८ ॥

अजाविकं सैकशफं न जातु विषमं भजेत् ॥
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते ॥ ११९ ॥

एकशफमश्वाश्वतरगर्दभादयः विभागकाले समसंख्यया यद्विभक्तुम**जाविकं** न शक्यते **ज्येष्ठस्यैव** स्यान्न तदन्यद्रव्यांशपातेन समतां नयेद्विक्रीतं वा ततस्तन्मूल्यं दापयेत् । अजाविकमिति पशुद्वन्द्वांवधविकवद्भावः ॥ ११९ ॥

यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि ॥
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः ॥ १२० ॥

ज्येष्ठस्य नियोगधर्मेण पितृवत्सोदरेऽतिदेशे प्राप्ते तन्निवृत्त्यर्थमुच्यते । **समस्तत्र**

---

१ एतदर्थमेव नारदीये अ० १३ श्लो० २७ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभागः स्यात् । न चोद्धारं न चैवाधिकं हरेज्ज्येष्ठ इति । नापि यत्किंचिदेव देयमिति । समः स्यात्केनोत्पादकेन पितृव्येकेण कनीयसा अनियुक्तासुतस्य त्वभागार्हतैव वक्ष्यते । इदं च लिङ्गं भ्रातरि सहिते सत्यपि भ्रातृशब्दे भ्रातृपुत्रेणाप्यसति भ्रातरि सह विभागः कर्तव्यः ॥ १२० ॥

उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते ॥
पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत् ॥ १२१ ॥

उपसर्जनमप्रधानं क्षेत्रं क्षेत्रजस्य **प्रधानस्यौ**रसस्य तुल्य इत्येतद्वाश्रित्य **तद्धर्मतः** शास्त्रतो न युज्यते । औरसः किल पितृवज्ज्येष्ठांशं कृत्स्नं लभते । अयं तु क्षेत्रजोऽप्रधानं **तस्माद्धर्मेण तं भजेत्** । धर्मः पूर्वोक्ता भागकल्पना । ननु चायमपि ज्येष्ठः पुत्रो भवति किमित्यौरसवन्न लभतेऽत आह **पिता प्रधानं प्रजने** । पिता जनकोऽत्राभिप्रेतः । स प्रधानमपत्योत्पादने । अयं चाप्रधानः कनीयसा जनितः । उपसर्जनप्रधानस्य सममित्येवात्वत्य श्लोको गम्यते । अर्थवादोऽयं पूर्वस्य ज्येष्ठांशनिषेधस्यार्थवादत्वाच्च प्रधानोपसर्जनशब्दयोर्यत्किंचिदालम्बनमाश्रित्य व्याख्या कर्तव्या । अन्ये पठन्ति " तस्माद्धर्मेण तं त्यजेत् " इति तदयुक्तं सर्वत्र समभागस्योक्तत्वात् । अर्थवादत्वाच्चास्य न विकल्पाशङ्का कार्या ॥ १२१ ॥

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः ॥
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत् ॥ १२२ ॥

ज्येष्ठा प्रथमोढा । पश्चादूढा **कनिष्ठा** । तयोर्जातानां किं मातुरुद्वाहक्रमेण ज्यैष्ठ्यं स्यात्स्वजन्मक्रमेणेति संशयमुपन्यस्योत्तरत्र निर्णेष्यते संप्रतिपत्तुम् ॥ १२२ ॥

एकं वृषभमुद्धारं संहरेत स पूर्वजः ॥
ततोऽपरेऽज्येष्ठवृषास्तदूनानां स्वमातृतः ॥ १२३ ॥

पूर्वस्यां जातः **पूर्वजः** । कनीयान् वृषभस्योक्तो भागवान् । ततो वृषादन्ये ये वृषभा अज्येष्ठास्ते बहूनामेकशः कृत्वा देयाः । अतश्च ज्यैष्ठिने यस्यैतावदुक्तमाधिकं यच्छ्रेष्ठो वृषो गुणमात्रेणाधिक्यं न संख्यया **तदूनानां** तस्मात्पूर्वजादूनानाम् । कियतामित्याह । **स्वमातृतः** पुनर्मुख्यत्वोढत्वात्तेनात्र मातृज्यैष्ठ्यमाश्रितं भवति न जन्मतः ॥ १२३ ॥

ज्येष्ठस्तु जातोऽज्येष्ठायां हरेद्वृषभषोडशाः ॥
ततः स्वमातृतः शेषा भजेरन्निति धारणा ॥ १२४ ॥

उद्धारान्तरं वैकल्पिकमेषामुच्यते । **अज्येष्ठायां ज्येष्ठो जातः** पंचदश गा हरेत् ।

---

१ ग-र-पितृव्येन । २ ग-र-क्तां । ३ ग-र-पितृपुत्रेणापि । ४ ग-र-ल । ५ र-नो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षोडशो वृषभो वृषभसंबन्धाद्गावो लभ्यन्ते । यथास्य गोर्द्वितीये नार्थ इति अन्ये **शेषा** गा हरेरन्**स्वमातृतः** यथैवैषां माता गरीयसी कनीयसीमाहरेत् । अथवा ज्यैष्ठिनेयस्यायमुद्धारोऽधिक उच्यते । पूर्वस्तु स्थित एव । नात्रानडुत्प्रश्लेषः । **शेषाः** कनीयांसः स्वमातृतो हरेरन् । स्वामातृत इति विविच्यते । श्लोकद्वयस्यार्थवादत्वान्न विवेके यत्नः । उपक्रममात्रमेतत् । सिद्धान्तस्त्वयमुच्यते ॥ १२४ ॥

सदृशस्त्रीषु जातानां पुत्राणामविशेषतः ॥
न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ॥ १२५ ॥

सदृशः समानजातीयः ॥ १२५ ॥

जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् ॥
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥ १२६ ॥

अर्थवादोऽयं जन्मज्येष्ठतामभ्युपगमयति । सुब्रह्मण्या नाम मंत्रो ज्योतिष्टोमे छन्दोगैः प्रयुज्यत इन्द्राह्वनाय सुब्रह्मण्यो इन्द्र आगच्छेत्यादिप्रयोगे बहुत्वाद्बहुवचनं तत्रेदमुच्यते । प्रथमपुत्रेण पितरं व्यपदिश्य हूयते । देवदत्तस्य पिता यजते जन्मनो ज्यैष्ठ्यं मुख्यम् । अन्यत्र तु मातृविवाहसंबन्धाद्गौणं । **यमयोर्गर्भे** एककालनिषिक्तयोरपि जन्मतो ज्यैष्ठ्यम् ॥ १२६ ॥

*** अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ॥**
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरं ॥ १२७ ॥

यदपत्यमस्यां जायेत **तन्मे** मह्यं **स्वधाकरम्** और्ध्वदेहिकस्य श्राद्धादिपुत्रकार्यलक्षणार्थः स्वधाशब्दो न त्वयमेवोचार्यः । तथा च **गौतमः** । पितोत्सृजेत्पुत्रिकामनपत्योऽग्निप्रजापतिं चेष्ट्वास्मदर्थमपत्यामिति संवादाद्यभिसंबन्धमात्रादियोगेन विनाऽपि भवति पुत्रिका । ननु संवादाभावेन यद्यप्यभिसंबन्धे हृदयात्कृतमुच्यते सुतवचनेन यावन्न ज्ञापितस्तावज्जामाता विप्रतिपद्येत **कुर्वीत पुत्रिकामे**व तस्या व्यपदेशः ॥ १२७ ॥

अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः ॥
विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः ॥ १२८ ॥

प्रजोत्पादनविधिज्ञः **प्रजापतिर्दक्षः** स एवोदाह्रियते । अर्थवादोऽयं परकृतिर्नाम ॥ १२८ ॥

---

१ ण-र-गरीयसीमाहरेत् । २ ण-र-ज्येष्ठता स्मृता ।

* अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां ॥
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ददौ स दश धर्माय कश्यपाय त्रयोदश ॥
सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् ॥ १२९ ॥

...स्येति तदत्र विधीयते। दशेत्यादिलिङ्गादनेकपुत्रिकाकरणमपीच्छन्ति ॥ १२९ ॥

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ॥
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥ १३० ॥

"यदपत्यं भवेदस्यां तन्मम स्यात्" इत्युक्तं। अपत्यं च ऋक्थभाक्। अतः पितरि मृते पुत्रिकाया अनुत्पन्नपुत्राया धनहरत्वमप्राप्तं विधीयतेऽर्थवादेन। तस्यामात्मनि पुत्रनिमित्तं तिष्ठन्त्यामेव धनं न पुत्रोत्पत्तिस्तदीयाय युज्यते। अथवा **तस्यामात्म**भूतायां पितृरूपायामिति **पुत्रेण दुहिता समेति** सामान्यवचनो दुहितृशब्दः प्रकरणात्पुत्रिकाविषयो विज्ञेयः ॥ १३० ॥

मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः ॥
दौहित्र एव च हरेदपुत्रस्याखिलं धनम् ॥ १३१ ॥

यौतकशब्दः पृथग्भावेन च स्त्रीधने। तत्र हि तस्या एव केवलायाः स्वाम्यम्। अन्ये तु सौदायकमेव तत्संबन्धस्त्रीधनं। तत्र हि तस्याः स्वातन्त्र्यम्।

"सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते"। न भक्तभूषाद्युपयोगिनः आन्वाहिकाद्भर्तृदत्ताद्धनादुपयुक्तशेषमेव। युवत्या स्वीकृतं **यौतकमाहुः। कुमारीभाग एव** कुमारीग्रहणादूढा नास्ति। एवकारस्य च प्रसिद्धानुवादकत्वात्प्रकरणबाधकत्वमतश्च[3] पुत्रिकाकुमारीविषयमपि **यौतकम्**। एवं च **गौतमः**। "स्त्रीधनं तदपत्यानाम्" इत्युक्त्वाऽऽह "दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति[4]"। तत्राप्रतिष्ठिता या ऊढा अनपत्याभिधाना भर्तृगृहे याभिः प्रतिष्ठा न लब्धा। **दौहित्र एव च** हरेदपुत्रस्यानौरसपुत्रस्या**खिलं धनं हरेत्**। सति त्वौरसे यावानंशस्तं वक्ष्यति। अत्रापि पुत्रिकापुत्र एव दौहित्रो न सर्वत्र पूर्ववत्प्रकरणत्यागस्य यौतकविषयत्व एव प्रमाणसंभवात् ॥ १३१ ॥

दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ॥
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च ॥ १३२ ॥

अपुत्रमातामहप्रमातामहाय पूर्वेणैव पौत्रिकेयदौहित्रस्याखिलं रिक्थहरत्वमुक्तमतोऽयं श्लोकस्तदनुवादेन पिण्डदानविधानार्थ इति कैश्चिद्व्याख्यातं। हरेद्यदीति च ते पठन्ति यस्मिन्पक्षे सर्वं हरेत्तस्मिन्नेव पक्षे दद्याद्दातुः "समस्तत्र विभागः स्यात्" इति पक्षस्तदा दद्यादन्यथा "यो यत आददीत स तस्मै दद्यात्" इत्यनेनैव पिण्डदानेन

---

१ ण–र–+ अपि। २ फ–दूनोऽस्ति। 'दनूढा स्त्री' इत्येवं तु युक्तः पाठः। ३ ण–र–एवकारस्य च एवं प्रसिद्धानु। ४ अ. २८ सू. २२। ५ ण–र–तः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धे पुनर्वचनमनर्थकम्। अखिलरिक्थग्रहणानुवादश्चानर्थक एव। तदयुक्तं। "अपुत्रस्य पितुर्हरेत्" इत्ययमेवार्थोऽवगीतश्चिरन्तनपाठः। पितृशब्दश्च जनके प्रसिद्धतरो न मातामहे। अतश्च पुत्रिकाया भर्ता न तु तदन्यभार्यापुत्रपुत्रिका च पुत्रवती। तदाऽनेनैव पुत्रेण जातेन पिता पितामहश्चोभावपि पुत्रवन्तौ वेदितव्यौ। यदा तु बीजीतरासु जातः पुत्रस्तदा पुत्रिकापुत्रः समानजातीयायामूढायां जातोऽपि नैव बीजिनो रिक्थं हरेन्नापि पिण्डं दद्यात्। अन्यो हि जन्यजनकभावोऽन्यश्चापत्यापत्यवत्संबन्धः। अजनका अपि क्षेत्रजादिभिरपत्यवन्तो जनकाश्च विक्रीतापविद्धादिपितरो नीवाजीगर्तादयः पुत्रवन्तस्तथा चौरसलक्षणः स्वक्षेत्र इति स्वग्रहणं क्षेत्रं च पुत्रिकापितुरेव। भर्ता हि तस्य चानुविधेयवर इति मातृकुले स्वामी। तस्मादेवं तद्व्यक्तव्यम्। यस्मिन्पक्षे विद्यमानान्यपुत्रपुत्रिकाभर्ता पुत्रिकापुत्रश्चाखिलद्रव्यहारी तस्मिन्पक्षे "अञ्जसा अयं प्रयुङ्क्ते इति" रूढाया अपि प्राथमिकात्संप्रयोगादनपगतमेवानुषज्येत। प्रायेण ह्यत्र शास्त्रे कन्याशब्दः पुमांसं प्रयोगमाचष्टे। अर्थसंस्कारहीनेति। तदपि न। यतः प्रथममेव वचनमेवं स्मरणाभिप्रायेण तत्र संभविप्रमाणान्तरवशाल्लक्षणया हिता इत्यत्र प्रतीयते। यथोक्तं

"पाणिग्रहणका मन्त्राः कन्यास्वेव प्रतिष्ठिताः। नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥"

इति। अत्र धर्मलोपवचनलिङ्गात्पुरुषोपभुक्ताऽकन्येत्युच्यते। तद्विपर्ययेणानुपभुक्ता कन्येति सर्वत्रैव मुख्यार्थमनुरुध्य क्रियमाणा धर्मा लक्ष्यन्ते। ते च न सर्वे। किं तर्हि। यावतां प्रमाणमस्ति। तथा हि कानीन इति पितुः स्वतासंस्काराभावश्च प्रतीयते। केवले हि संस्काराभावे चोढास्वैरिणीपुत्राः कानीनाः केवलायां च पितृस्वतालक्षणायां पुत्रिकापुत्रोऽपि कानीन इति व्यपदिश्यते। तथोक्तं स्वदारतस्तु नियमातिक्रमः प्राप्नोतीति। न ह्यस्यायमर्थः स्वदारेभ्योऽन्या गन्तव्येति। परस्त्रियं च कामयते न चापरां दारांस्तथा सत्यनेनैव गतत्वात्परदारप्रतिषेधोऽनर्थकः स्यात्किंतर्हि स्वदारेषु रतिर्धारयितव्या रतिभावनयाऽऽभ्यासात्प्रीत्यतिशयोत्पत्तेः। स्त्रियं च न कामयते न चापरान्दारांस्तथा सति धर्मेभ्यो न हीयत इत्यनुवादोऽयम्। अथवा स्वदारनिरतोऽपि पर्ववर्जनमेनां व्रजेयुरसौ सुपुत्स्यैवमपत्यशेष एव परदाराप्रतिषेधोऽपि नास्ति। अनूढत्वात्केनचिद्दारव्यपदेशाभावात्। किं पुनरपुत्रयुक्तमविवाह्येति अष्टौ हि विवाहास्ते च स्वीकारभेदेन ब्राह्मादिव्यपदेशभेदं प्रतिपद्यन्ते। न चास्यास्वकरणं भर्तुरस्ति। पितुरेव स्वत्वानतिवृत्तेः। अभ्रातृकायां च विवाहप्रतिषेधे पुत्रिकामविवाह्यां दर्शयति। यथा नाभ्रातृकामुपयच्छेत तोकं ह्यस्य तद्भवतीति प्राकरणिकश्चायं प्रतिषेधस्तदप्रतिषेधेपूपलभ्यमानमूलत्वात्प्रकरणाधीनोऽपि

१ ण–र–तो। २ ण–र–रौ। ३ अ. ८ श्लो. २२७। ४फ–ताः कन्यास्वपितॄणां हि या हिता। ५ फ–+अक्षराणि?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संस्कारत्वमपनुदति । तथा च शिष्टादर्शनीयकन्याभावे कपिलादिरूपामुपयच्छन्ति । तथा च स्वधर्मानुष्ठानमाचरन्ति । क्षतयोन्यन्यपूर्वाभावोऽत्र समानप्रवरादिकयोढयापि कथंचिन्न पत्नीकार्यं कुर्वन्ति । एतदर्थमेव कैश्चिन्नोद्वहेत्कपिलामित्यत्र दृष्टदोषोपवर्णनं प्राकरणिकत्वेऽपि सपिण्डादिप्रतिषेधस्य चैकरूप्यं मा विज्ञायीति । कथं पुनः स्पष्टप्रतिषेधो भ्रातृकामुपयच्छते तस्मिन्नोद्धारशङ्का उच्यते । अस्य प्रतिषेधस्य वाक्यशेषः श्रूयतेऽपत्यं ह्यस्य तद्भवतीति अनेन ततश्चापत्योत्पत्तावेव पुत्रिका न भार्या । धर्मार्थमर्थकामयोस्त्वस्त्वेव सहाधिकार इति भवत्यपरिहारस्तु स्वकरणाभवादविवाहः । ननु तस्मिन्पक्षे कानीन एव पुत्रिकापुत्रः स्यात् । न ह्यसौ पितुः स्वस्यादसंस्कृतयोश्चापत्यमिति । संस्कारपक्षे तु पितृसुतासंस्कारभावो न धर्मलक्षणप्रत्ययादन्यतरधर्माभावे कानीनाद्भिद्यत इति युक्तम् । अत्रोच्यते । न वयं पुत्रिकापुत्रस्य कानीनस्य लक्षणं तदस्य नास्तीति ब्रूमः । इदं हि तस्य लक्षणं

"पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः । तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥"

इति । अस्य चार्थः । य एवंलक्षणः स इहशास्त्रे कानीनग्रहणेषु ग्रहीतव्यः । स च कस्यापत्यमित्यपेक्षायां 'वोढुः कन्यासमुद्भवम्' इति द्वितीयं वाक्यं । अथवा नेह पदार्थो लक्ष्यते । किं तर्हि ? संबन्धिता नियम्यते । य एवंविधः कानीनस्तं वोढुः संबन्धिनं वदेदित्येकवाक्यतैव । संबन्धिता च पदार्थभेदे चाप्युपाधिभेदाद्भिद्यत एव । रहः प्रकाशभेदेन चैव मातामहस्य । अन्ये चाहुरिति पदार्थस्तु तदा कानीनशब्दस्य शब्दार्थसंबंधोऽवाधित एवावगन्तव्यः । ते चेदपत्यमात्रे कानीनं स्मरन्ति । भवतु पैतृके कानीने व्यवहारः । अन्ये तु स्मृतिमेव विशेषनिष्ठामाहुः । न हि कन्यापत्यमात्रे सर्वकानीनशब्दः प्रयुज्यते । किं तर्हि मानवस्मृतिर्लक्ष्यते । एतदप्यनुमन्यामहे निश्चिते प्रयोगाभावेऽवशेषस्मरणेऽपि पुण्यसिद्ध्यादितद्विशेषावगतिः प्रयोगतो न्याय्यैव ॥ १३२ ॥

पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः ॥
तयोर्हि मातापितरौ संभूतौ तस्य देहतः ॥ १३३ ॥

पूर्वशेषोऽयमर्थवादः । कथमविशेषस्तयोर्हि मातापितराविति ॥ १३३ ॥

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते ॥
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः ॥ १३४ ॥

समस्तत्र तुल्यो विभागो जातेन पुत्रेण ज्येष्ठांशनिषेधः । ज्येष्ठता नास्ति हि स्त्रियाः रिक्थभाग एव ज्येष्ठता निषिध्यते न त्वस्यां गुरुवृत्तौ ॥ १३४ ॥

---

१ अ० ९ श्लो० १७२ । २ ण-र-ज्येष्ठिता ।

For Private And Personal Use Only

अपुत्रायां मृतायां तु पुत्रिकायां कथंचन ॥
धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् ॥ १३५ ॥

अस्वामिन्यास्तु पुत्रिकाया भर्तुरप्राप्तधनसंबन्ध उच्यते । अथ किं पुत्रिकाविवाहेन संस्क्रियते । उताहो न किंचन यदि संस्क्रियते भार्यैवासौ भवति । भार्याकरणो हि विवाहः । ततश्च तद्धनं *........ न संस्तूयते कन्यागमनं प्राप्नोति 'स्वदारनिरतः सदा' इति नियमातिक्रमश्च यथेच्छसि तथास्तु । *........ ननु चास्मिन्पक्षे श्लोकोऽयमनर्थकः । नैष दोषः । अपरिपूर्णत्वायार्थवत्वस्य यथैतदयमपत्यं न भर्तुस्ते न वेत्याशङ्कानिवृत्त्यर्थो युक्त एव श्लोकारम्भः । बहवश्चार्थवादिनो मानवाः श्लोकाः । अथवा पुनरस्तु न संस्क्रियत इति । न तु चास्मिन्पक्षे कन्यागमनं प्राप्नोति । किं कृतं तथाविधायां जातो मातामहस्य पुत्र इतःसाध्यं गंतुर्विध्यर्थातिक्रमनिरूपणेन प्राकरणिकं । न च तानि नामानि न पतनीयानि । *........ किं पुनर्भवां कन्याशब्दार्थे मत्वा चोदयति कन्याग्रहणं प्राप्नोतीति । त्रिधा हि कन्या एका तावदप्रवृत्तपुंप्रयोगा । तथा *........ देवाहिताः प्रथमे वयसि वर्तमाना च तत्र यदि तावत्पुंसा संप्रयुक्ता येन कार्यमतः पिण्डदानं यदा तु बीजी स पुत्रः संपद्यते तदा स पुत्रिकापुत्रो नैव बीजिने पिण्डं दद्यात् । न तु दौहित्र इत्युच्यते । पौत्रिकेय इत्यर्थः । यथा मातामहपक्षे पितुरपि यो हरेत्तत्रापि स दद्यादिति श्रूयते । न पुनः पक्षान्तरेऽपि निषेधमनुमापयति । पित्रे पितामहाय चेत्युभयोरप्राप्तत्वात् द्योतनं परिसङ्ख्येति अनुद्यमाने द्योतनमन्यस्मा एव दद्यात्तद्युगपदुभाभ्यामनेनायमनुवादः । यथैव पित्रे मातामहाय च एवं पितामहाय प्रपितामहाय च । तथैव च ततः पराभ्यां द्वाभ्याम् ॥ १३५ ॥

अकृता वा कृता वाऽपि यं विंदेत्सदृशात्सुतम् ॥
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥ १३६ ॥

अधस्तनोपरितनवाक्यपर्यालोचनया पुत्रिकापुत्रविषय एवायमतिशयोक्त्या प्रतीयते । अकृताया अपि दुहितुः पुत्रो मातामहधनभागित्युक्तं । किं पुनः कृताया इत्येवमन्यशेषत्वात्पुत्रिकाया विधिष्वानर्थक्यप्रसङ्गान्न दौहित्रस्य रिक्थप्राप्त्यर्थः । ननु च स्मृत्यन्तरे[2] दौहित्रमात्रस्य दानाधिकारः श्रूयते "मातामहानामप्येवमिति" । इहापि करणं हित्वा श्रुतिवाक्यसामर्थ्येन दौहित्रमात्रविषयतैव प्रतिपत्तुं न्याय्या । दद्यात्पिण्डं हरेद्धनमिति । तथापरमुक्तं[3] "दौहित्रो ह्यखिलं रिक्थम्" इत्यादि । अत्रोच्यते यदुक्तं मातामहानामिति तद्बहुवचनं किं व्यक्त्यपेक्ष्यमुत लक्षणया प्रमातामहाद्यभिप्रायेण व्यक्तिपक्ष एकस्यैव

---

१ ण-र-संज्ञायते । * अत्र कानिचिदक्षराणि गलितान्येव दृश्यन्ते । बहुनाऽपि प्रयत्नेनापि नैवाद्यापि शुद्धं पूर्णं च कंचिदपि पुस्तकं प्राप्तं । भाग्यवशाद्यदि प्राप्येत तदा प्रेषयिष्यत एव । २ याज्ञवल्कीये अ० २४३ । ३ श्लो. १३२ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मातामहस्य पिण्डदानं प्राप्नोति श्राद्धादिवत् । तच्च सपिण्डीकरणे कृते विरुद्धं । एवं ह्याहुः 'अत ऊर्ध्वं त्रिभ्यो दद्यात्' इति । अथापि पितुरन्यस्य सपिण्डीकरणमेव न करिष्यत इत्युच्यते तदपि निषेधाभावात्[1] लक्षणयोः सन्निकर्षो विशेषाभावाल्लक्षणविशेषापरिज्ञाने-[2]ऽनवगमत्वमेव स्मृत्यादिबलेन च कारणत्यागस्येति विरोधप्रसङ्गस्तं निवेशो हि पदार्थ-प्रकरणादुत्कृष्यते द्वादशोपसदो हीनस्येतिवत् । अकृतावेत्यस्य चान्यपरत्वमुक्तं । तस्मात्पौत्रिकेयविषयमेतत्[4] ॥ १३६ ॥

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ॥
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥ १३७ ॥

पुत्रेण जातेन तत्कृतेनोपकारेण **लोकान्**स्वर्गादीन्दश विशोकान् **जयति** प्राप्नोति । तत्रोत्पद्यत[5] इति यावत् । एवं **पौत्रेणानन्त्यं** तेष्वेव चिरन्तनकालमवस्थानं लभते । पौत्रस्य पुत्रेण **ब्रध्नस्य विष्टपमा**दित्यलोकं **प्राप्नोति** । प्राकाश्यमश्नुते न केनचित्तमसा व्रियते ॥ १३७ ॥

पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ॥
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ १३८ ॥

अपत्योत्पादनविधिशेषोऽयमर्थवादः । **पुंनामनरकं** चतुर्विधभूतोत्पत्तिः पृथिव्यां व्यपदिश्यते । ततस्त्रायते पुत्रो जातः देवयोनौ जात इत्यर्थः[7] । **तस्माद्धे**तोः पुत्र इति व्यपदिश्यते ॥ १३८ ॥

पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते ॥
दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् ॥ १३९ ॥

अत्रापि दौहित्रः पुत्रिकापुत्र[8] एव विज्ञेयः । **दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत्** । अयमप्यर्थवाद एव विहितत्वादर्थस्य[10] एतयोर्विशेषो नास्ति । एकस्य माताऽन्यकुलीनाऽपरस्य पिता तस्माद्दौहित्रोऽप्यमुत्र लोक **एनं** प्रेतं सन्तं सततं **संतारयति** नरकात्पूर्वस्मात् ॥ १३९ ॥

मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः ॥
द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः ॥ १४० ॥

'स एव दद्यात्पिण्डं च पित्रे मातामहाय च' इत्यत्र पुत्रिकापुत्रपिण्डदानं मातामहप्रक्रममुक्तं । तस्मादयमपरः क्रमः पुत्रिकापुत्रपिण्डदानस्य **मातुः प्रथमतः पिण्डं निर्वपे**दित्येवमादि । **द्वितीयं तु** पुनः **पितुः** । **तस्या** एवेत्यनुमन्तव्यं । [12]ये तु पठन्ति

---

१ ण–र–तः । २ ण–र–निषेधभावात् आकृतावेत्यस्य लक्षणायामपि सन्निकर्षादिविशेषात् लक्षत्रिशेषापरिज्ञाने अनवगमत्वमेवं श्रुत्यादिबलेन प्रकरणत्यागः । सति विरोधे असंभवनिवेशोहि पदार्थकरणात्कृष्यते द्वादशोपसंताहिनस्येतिवत् । ३ ण–र–विशेषपरिज्ञाने । ४ ण–र–हौत्रिके । ५ ण–र–उपपद्यते । ६ ण–र–पाद । ७ ण–र–पुत्र इत्यर्थ इति । ८ ण–र–पुत्रा । ९ ण–र–पुत्रिक । १० ण–र–अस्यार्थस्य । ११ ण–र–पुनर्वचनात् । १२ ण–र–यत्तु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

' पितुस्तस्येति ' तत्प्रथमं पुत्रिकायै निरूप्यं जनकाय निर्वपन्ति । [2]पितुः पितुरिति च जनकस्यैव पित्रे तृतीयमस्मिंस्तु पक्षे मातामहाय पिण्डदानं नोक्तं स्यात् ॥ १४० ॥

उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्रिमः ॥
स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः ॥ १४१ ॥

"न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः" इति सर्वपुत्राणां रिक्थहरत्वमुक्तं। सति त्वौरसे प्रजीवनमात्रभाक्तं क्षेत्रजादीनां । "एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः । शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनमिति"॥ (९।१६३)। [4]अतोऽस्ति सिद्धमेव दत्रिमस्य रिक्थहरत्वं । इदं तु वचनं सत्येवौरसे प्राप्त्यर्थमन्यथा न किंचिदनेन क्रियते। कियांस्तु तस्य भाग इति विशदंशाभावात्सम औरसेनेति केचित्। तद्युक्तं। साम्ये ह्यभिधीयमाने यथैव पुत्रिकाप्रकरणे पठितमेवमत्राप्यपाठिष्यत् "समस्तत्र विभागः स्यात्" इति। तस्मात्क्षेत्रजवत्षष्ठाष्टमादिभागकल्पना कार्येत्युच्यते। अत्राप्यस्ति वक्तव्यं । यथैव भागविशेष उक्तः क्षेत्रजस्य "षष्ठं तु क्षेत्रजस्यांशम्" इति तथैव कृत्रिमे वक्ष्यति। तस्मात्पुनर्वचने प्रयोजनं चिन्त्यं । उपाध्यायस्त्वाहा पुनर्वचनाद्विशेषनिर्देशाभावाच्च क्षेत्रजान्न्यूना कल्पना युक्ता न स्वभागता नापि समभागता न क्षेत्रजतुल्यतेति ॥ १४१ ॥

गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः क्वचित् ॥
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ १४२ ॥

इतश्च भागहरत्वं दत्रिमस्य तूक्तं । यतो जनयितुः सकाशाद्गोत्रं धनं च न हरति । वंशादपेतत्वात् । गोत्ररिक्थग्रहणाभावे च पिण्डमपि जनयित्रे न ददाति । गोत्ररिक्थानुगो हि पिण्डो गोत्ररिक्थेऽनुगच्छति । यदीये गोत्ररिक्थे गृह्येते तस्मै पिण्डोदकदानाद्यौर्ध्वदेहिकं क्रियते । व्यपैति तस्मान्निवर्तते स्वधाकारसाधनं पिण्डश्राद्धादि लक्ष्यते । तद्ददते योऽन्यस्मिन्स्वपुत्रं ददाति तस्मान्निवर्तते । न तस्य कर्तव्यमित्यर्थः । एष एव न्यायः कृत्रिमादीनां सहोढोपविद्धव्यामुष्यायणानामुभयोपकारकत्वं । अन्ये तु न हरेन्न हरयेदित्यन्तर्भावितण्यर्थं व्याचक्षते । तेनोभयस्यापि व्यामुष्यायणवदुपकर्तव्यमित्याहुः । उत्तरस्तूपकारोपक्रमः । तमेवं गमयन्ति । यदि गोत्ररिक्थे न हरेत्पुत्रस्तदा तु व्याख्येयं न चैतदुक्तं न ह्यर्थान्तरभावे प्रमाणं वक्तव्यम् ॥ १४२ ॥

अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात् ॥
उभौ तौ नार्हतो भागं जारजातककामजौ ॥ १४३ ॥

अपुत्रे भर्तरि मृते पुत्रोत्पादने स्त्रिया गुरुनियोगोऽपेक्षितव्य इत्युक्तं। तस्यैवायमनुवादः।

१ ण-र-अनुजनकाय । २ फ-न पितुः पितुरिति । ३ ण-र-औरसि प्रजावतः शार्वभक्तक्षेत्रादी । ४ ण-र-श्रुतो सत्योरससिद्धमेव । ५ ण-र-पुनर्वचनात् । ६ ण-र-संवि दानुकल्पात् । ७ ण-र-दाहरयेत् । ८ ण-र-तत्युक्तं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

या गुरुभिरनियुक्ता पुत्रार्थिनी पुत्रमुत्पादयेत् क्षेत्रं किलाहं भर्तुः क्षेत्रजश्च पुत्रस्तदर्थहर इत्यनया भ्रान्त्या स तस्यां समुत्पन्नो न रिक्थहरः । यद्यपि क्षेत्रजादिविशिष्टेन विधिनोत्पन्नस्य शास्त्रे क्षेत्रजव्यपदेशात् नैव चास्य क्षेत्रजस्य रिक्थहरत्वमत्र वार्यते पिण्डदानं तु न निषिध्यते । यद्यपि पतितोत्पन्नो भवति । नारदस्तु विशेषं स्मरति (अ० १३ श्लो० १९–२०) ॥

" जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा । अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः ॥ "दद्युस्ते बीजिने पिण्डं माता चेच्छुल्कतो हृता।अशुल्कोपनतायां तु पिण्डदा वोढुरेव त"॥इति।

सुतवचनात्कृत्रिमादिवदुत्पत्तिविध्यभावात्पुत्रमध्ये चापरिगणितत्वात् त्रैवर्णिकानां च बीजजाः प्रजीवनमात्रभागा न रिक्थहराः । यतोऽविशेषेण सर्वपुत्राणां भर्तरि प्रेते स्मर्यते । ऊर्ध्वमपि पितुः पुत्रोपकर्तव्यशिष्टस्य धनस्य विभाज्यत्वाल्लभेरन्नेव प्रजीवनं । एवमेवौरसादिपुत्रस्य सपिण्डबीजकाः प्रजीवनमात्रभागाः कर्तव्याः । रिक्थहरत्वं तु नास्ति परिगणितपुत्रविशेषोद्देशेनाश्रवणात् । उक्तं चैतत् । उक्तानां " यद्येकरिक्थिनौ स्यातामिति " । अत्रानेन चतुर्दशेनानियुक्तासुतादय इतरत्रानंशत्वाद्बीजिनो रिक्थं लभेरन्निति रिक्थं प्रजीवनपर्याप्तमेतद्विज्ञेयं । उक्तत्वादस्या भागार्थ एव दासीव भण्यते । या " सप्तैता दासयोनय " इति निरूपिता यासां प्रयोगार्थमवगन्तव्यं क्रियते। तस्यां जातो न दासः सुतव्यपदेशाभावः शूद्रस्यापि तज्जा ब्राह्मणादिवत्प्रजीवनभाजः ।

अन्यस्त्वाह । नियतकर्मकरा अपि दासा भवन्ति । यथा स्नापकः प्रसाधकः पाचकः पावक इति । एवं कामतोऽप्यवरुद्धा भक्ताच्छादनेन पोष्यमाणा दास्ये भवन्ति । एवं पुत्रिण्याविद्यमाने पुत्रे आप्तो देवरान्नियुक्तयाऽपि कथं पुनः पुत्रवत्यामियोगः । देवर एव कामार्थं नियुक्तः पुत्रोत्पादनव्यपदेशेनेत्यभिप्रायः । जारजातकत्वमुभयोः कामजत्वं तु पुत्रवत्यां जातस्य आद्यार्थायां पुत्रार्थेव प्रवृत्तिर्न कामतो येनै ॥ १४३ ॥

नियुक्तायामपि पुमान्नार्योज्जातोऽविधानतः ॥
नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः ॥ १४४ ॥

अविधानतः शुक्लवस्त्रादिनियमस्यागो विधानाभावः । स नार्हति रिक्थं नासौ क्षेत्रज इत्यर्थः । नियमत्यागेन देवरभ्रातृजाययोः पुत्रोत्पादने प्रवर्तमानयोर्युक्तं पतितत्वं। शास्त्रेण नियमितयोर्गमनानुज्ञानात् ॥ १४४ ॥

हरेत्तत्र नियुक्तायाञ्जातः पुत्रो यथौरसः ।
क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः ॥ १४५ ॥

---

१ ण–र–प्रेते । २ ण–र–अप्राप्तो । ३ ण–र–जने ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथौरस इत्येतदत्र विधीयते ज्येष्ठांशप्राप्त्यर्थमन्यदा नोच्यते । अनेन विधानेन ज्येष्ठांश उद्धारक्षेत्रजस्य प्राप्यते ज्येष्ठभार्याजातस्य । अतश्च यत्पुत्रसमांशभाक्त्वमुपसर्जनं प्रधानस्येत्यनेन तस्यायमपवादः । उभयस्य च प्रामाण्यात् विकल्पितस्य च गुणापेक्षया व्यवस्थाने ह्यन्यदस्य श्लोकस्य प्रयोजनमस्ति प्रागुक्तत्वात् सर्वस्य क्षेत्रिकस्य क्षेत्रस्वामिनस्तद्बीजं तत्कार्यकरत्वात् प्रशंसयैवमुच्यते । अत एवाह **धर्मतः** धर्मेण शास्त्रीयया व्यवस्थया । तत्र प्रमाणान्तरं दृश्येत । रूपेण **प्रसवः** । अपत्यार्थवादः श्लोकः ॥१४५॥

धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव च ।
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम् ॥ १४६ ॥

विभक्तधनस्य भ्रातुर[1]भावे विधिरयमुच्यते। पूर्वस्तु सह वसतः । एतावान्पूर्वोत्तरयोर्विध्योर्विशेषः । **सोऽपत्यं भ्रातुरुत्पाद्य** नियोगधर्मेणेति व्याख्येयं । न **दद्यात्तस्यैव** न पुनस्तदीयायै च मात्रे । अनेनैव च दर्शनेन स्त्रियो भरणार्हा । न तु पतिधनैश्वर्य इति । अन्यथैव वक्ष्यमाणत्वात्तस्य वचनं दद्यादिति ॥ १४६ ॥

या नियुक्ताऽन्यतः पुत्रं देवराद्वाऽप्यवाप्नुयात् ॥
तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते ॥ १४७ ॥

अनियुक्तेन च प्रश्लेषो द्रष्टव्यः । पूर्वोक्तेन च विरोधे यतस्तथा सत्यनर्थक इति चेदुक्तः पौनरुक्त्यपरिहारस्तत्र तु पूर्वानुमतामिच्छन्ति । ततश्चेयं व्याख्या । नियुक्तायामपि जातः पैतृकं रिक्थं नार्हति जारजमिति । यत्तु उत्तर उच्यते यद्यपि नियोगात्प्रवर्तते न कामात्तथापि तत्र कामोऽवश्यभाव्युच्यते । तं कामजमिति मिथ्योत्पन्नं यदर्थमुत्पादितस्तत्कार्यानर्हत्वादेवमुच्यते । एवं च पूर्वोक्तस्य भागार्हत्वस्य प्रतिषेधोऽयमतश्च विकल्पितं पाठे । पुनः पाठान्न संगच्छेतेतरामित्युपाध्यायः ॥ १४७ ॥

एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु ॥
बह्वीषु चैकजातानां नानास्त्रीषु निबोधत ॥ १४८ ॥

एकयोनिषु एकजातीयजानां सर्वहरत्वमेव । **नानास्त्रीषु** नानाजातीयास्विदानीं व्याचक्षते । बह्वीष्वित्यनुवादः । अन्ये तु विवक्षितं मन्यन्तेऽनेन नानाजातीयाया जातानां वक्ष्यमाणौ चतुरंशान्हरेदित्यादि भागव्यवस्था । एकस्यां तु विजातीयायां जातीयानां सर्वहरत्वमेव ॥ १४८ ॥

ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः ॥
तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः ॥ १४९ ॥

१ ण–र–भावे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुपूर्वग्रहणं तृतीये **दर्शितस्य** क्रमस्यानुवादः । अयमपि वक्ष्यमाणसंक्षेपप्रतिज्ञानार्थः ॥ १४९ ॥

कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च ॥
विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः ॥ १५० ॥

एकस्यां तु विजातीयायां कदर्येऽपि प्रयुज्यते । तस्येहासंभवादग्रहणं । तथा च मन्त्रः "इन्द्र आसीत्सुरपतिः कीनाशा आसन्मरुतः यथा सुतं कीनाशा अभियंतु वाहैरिति" । **यानं** गन्त्र्यादिः । **अलङ्कारः** पितृधृताङ्गुलीयकादिः । **वेश्म** प्रधानं । **एकांशश्च** यावन्तोऽशास्तत्र एकः प्रधानभूतस्तस्य दातव्यः । एतन्मध्यकादुद्धृत्य ज्येष्ठस्य शिष्टं वक्ष्यमाणकल्पनया विभजनीयम् ॥ १५० ॥

त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः ॥
वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत् ॥ १५१ ॥

सत्यप्येकत्वश्रवणाद्धि बहुष्वपि समांशेष्वेषैव कल्पना दर्शिता । विषमसंख्येष्व-[1]कल्पना ॥ १५१ ॥

सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च ॥
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित् ॥ १५२ ॥

ऋक्थजातं धनरूपं धर्मप्रवचनाद्धर्म्यं पूर्वोक्तं नानुमन्यते । वक्ष्यमाणप्रतिज्ञाश्लोकात् ॥ १५२ ॥

चतुरोंऽशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः ॥
वैश्यापुत्रो हरेत् द्व्यंशमंशं शूद्रासुतो हरेत् ॥ १५३ ॥

इहाविशेषेणापि क्षत्रियादिपुत्राणां भागश्रवणे **स्मृत्यन्तरे** विशिष्टायागमायाष्टमो भागविशेषः श्रूयते (बृहस्पतिस्मृ.)

"न प्रतिग्रहभूर्देया क्षत्रियायाः सुताय वै । यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्" ॥ इति । प्रतिग्रहोपात्ता प्रतिग्रहभूः । क्रयाद्युपात्ताया न निषेधः । तथाऽन्यत्र पठ्यते । "शूद्रायां तु द्विजाज्जातो न भूमेर्भागमर्हति" इति भूमिमात्रस्य शूद्रापुत्रे निषेधः । एतच्च यत्रान्यद्धनमस्ति तद्विषयं द्रष्टव्यं । अन्यथा दशमांशवचनमुपतिष्ठेत । धनान्तराभावे च जीविकैव न स्यात् । अहं तु ब्रुवे भागदानं तु निषिध्यते । प्रजीवनार्थत्वं चोपकल्पनमनिवारितमेव । को विशेष इति चेत् भागपक्षे सर्वेण सर्वं स्वरिक्थोत्पत्तौ दानविक्रयादिष्वपि युज्यते । इतरत्र तूपजीवनं तदुत्पन्नस्य व्रीह्योदनं च प्रजीवनं ब्राह्मणीपुत्रादेव शूद्रो

१ र–तु कल्पना; ण–न कल्पना ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लभ्यते । किंभूमिभागकल्पनया । तथा चोक्तं "लभते तद्वृत्तिमूलमंतेवासिविधिनेति"। सत्यं । पितृधननिमित्तं तु तस्य प्रजीवनं कल्पयितव्यं । भागकाले च यदि न कल्पेत तदा द्विजातयो भ्रातरः कदाचिदसद्वृत्तयो निमित्तान्तरतो वा दानविक्रयादिनाऽपहरेयुः । उच्छिद्येत तदाऽस्य जीवनं । विकल्पिते तु तदीयामनुज्ञामन्तरेण लभतेऽन्यत्र नियुक्तम् ॥ १९३ ॥

यद्यपि स्यात्तु सत्पुत्रोऽप्यसत्पुत्रोऽपि वा भवेत् ॥
नाधिकं दशमाद्द्याच्छूद्रापुत्राय धर्मतः ॥ १५४ ॥

सत्पुत्रो विद्यमानपुत्रः ब्राह्मणीपुत्र एव वा । विद्यमानो विवक्षितो न द्विजातिपुत्रमात्रमतश्चासति ब्राह्मणपुत्रे क्षत्रियवैश्ययोः सतोरप्यष्टमांशं लभते । केवले च वैश्यपुत्रे तृतीयं । अन्ये त्वविशेषेण द्विजातिपुत्राभावे पुत्रपदेनोक्त इत्याहुः । अस्मिन्पक्षे सपिण्डगामि दशमांशशेषधनं । इयं तु द्रष्टव्यवस्था बहुवचनं योगक्षेमे तदा दशमांशं हरेच्छौद्रः । अथ कतिपयजनजीवनपर्याप्तं तदा शूद्रपुत्रस्यैव । क्षत्रियादीनां समानभावजातीयास्त्रीजातानां स्मृत्यन्तरे विधिर्दर्शितः । "क्षत्रजास्त्रिव्येकभागा विड्जाः स्युर्द्व्येकभागिनः"। क्षत्रियाजातास्वजातीयविजातीयासु शूद्रपर्यन्तासु वर्णक्रमेण त्र्यादिभागहराः । तदा तेन स्वधनं क्षत्रियस्य शूद्राः षष्ठमंशं लभन्ते । विशश्च तृतीयम् ।

अन्ये त्वस्य श्लोकस्य सामर्थ्यमाहुः । शूद्रपुत्राय यदा ददाति तदाऽनेन धनं सङ्कल्प्य दशोंऽशो दातव्यो न तदधिकः । सत्यपि स्वातन्त्र्ये । यथा वक्ष्यति "यदेवास्य पिता दद्यात्" इति । अस्मिन्पक्षे स पुत्रो दद्यादिति समानाधिकरणे पदे उपपन्नतरे इतरथा यस्य सदसत्पुत्रः पिता स दद्यादिति संबन्धो दुश्लिष्टः स्यात् । सपुत्रपदेनास्य पुत्रादेरभिधानं दद्यादिति जीवतः पुत्रसपिंडादेः । ततश्च यदि क्षत्रियवैश्यापुत्रौ न स्तः केवलौ ब्राह्मणशूद्रौ तदा न शूद्रस्य दशम एवांशः किं तर्ह्यत्यल्पं नाधिकतरं धनं लभते । यत्र दश गावः सन्ति तत्र चतस्रो ब्राह्मणस्यैका शूद्रस्य पञ्च क्षत्रियवैश्ययोः । यदा तौ न स्तः तदा पञ्चगावस्तस्यैव कल्पनया ब्राह्मणशूद्राभ्यां विभजनीयाः । यदि सर्वा ब्राह्मण आदद्यान्न चांशहरः स्यान्न चतुरंशहरस्तस्माच्चतुरोंऽशान्हरेदिति चतुर्षु भ्रातृषु सत्सु कल्पना । शूद्रस्यापि दशमोंऽशहरत्वं चतुर्ष्वेव । द्वयोस्त्रिषु चतुर्षूभयोर्भागाधिक्यम् ॥ १९४ ॥

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् ॥
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् ॥ १५५ ॥

न रिक्थभाक् द्विजातीनां शूद्रापुत्रः । किं सदा नेत्याह । **यदेवास्य पिता दद्यात्** अस्य पित्रा दशमांशकल्पना कृता तदेव तत्तस्य तदधिकं पैत्रिकं नान्यल्लभते । तत्रापि

---

१ गौतमसू. २८।३७ । २ ख–यद्यपुत्रोऽपि । ३ याज्ञवल्क्य स्मृ. व्य. १२५ । ४ फ–मोंऽ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शङ्खेनोक्तं " न शूद्रपुत्रोऽर्थभागी । यदेवास्य पिता दद्यात्स एव तस्य भागो गोमिथुनं त्वपरं दद्युः "। विभागकाले भ्रातर इति वाक्यशेषः । अन्ये त्वनूढायाः शूद्रायाः पुत्रस्येमं विधिमिच्छन्ति । न ह्यत्र विवाहलिङ्गं किंचिदस्तीति । जातिविशेषवचनः शूद्राशब्दोऽतो यदेवास्य पिता दद्यात् अतो यदस्य प्रजीवनं पित्रा दत्तं तदेव दातव्यं । अथ तेन का विभागकल्पना कृता यावज्जीवं जीवनाय तदा तदेवास्य धनं न भ्रातृभिः किंचिद्दातव्यं । यथा गौतमः शूद्रापुत्रप्रकरण एवाह । " अपरिग्रहीतास्वपि शुश्रूषा चेल्लभते वृत्तिमूलमन्तेवासिविधिना " इति । तेषां मते क्षत्रियवैश्ययोरनूढयोर्जाता रिक्थहराः प्राप्नुवन्ति । तत्र च कियानंश इति न ज्ञायते । यावानंश ऊढयोरिति चेत्तत्रापि नोढाग्रहणं न लिङ्गं वचनं वास्ति । " एक एवौरसः पुत्र " इति धर्मपत्नीष्वौरसो न चानूढयोर्जातानामौरसलक्षणमस्ति । उक्तं च ' अनियुक्तासुतश्चैवेत्यादि । अभ्रातृजायाविषयमेतत् । तत्र किल नियोगे विहतेऽनियुक्तासुत इति प्रतिषेधेऽपि तद्विषया बुद्धिरुपजायते । अत्राप्यस्ति तर्हि जातमात्रेष्विति । तस्मात्परस्त्रीषु नियोगेन विनाऽनियुक्तासुताः सर्वेशं च तेषां प्रजीवनमुक्तम् ॥ १५५ ॥

समवर्णासु ये जाताः सर्वे पुत्रा द्विजन्मनाम् ॥
उद्धारं ज्यायसे दत्वा भजेरन्नितरे समम् ॥ १५६ ॥

वाशब्दो द्वितीयं विकल्पमन्तरेणानुपपद्यमानः प्रकृतमपेक्ष्य निराकाङ्क्षो भवति । समवर्णास्वसमवर्णासु वा शूद्रस्यैव सर्वधनहरत्वनिषेधाद्द्विजातिविषयमेव विज्ञायते । तेन ब्राह्मणस्यासति ब्राह्मणीपुत्रे क्षत्रियादिजाताः सर्वधनहरा भवन्तीत्युक्तं भवति । एवं क्षत्रियावैश्यापुत्रैः न त्वयमर्थः **उद्धारं ज्यायसे दत्वा सर्वेऽसवर्णा जाताः समं सवर्णापुत्रैर्भजेरन्** प्रागुक्तैकांशापचयविरोधात् । यद्यप्युक्तं निर्गुणेषु सवर्णापुत्रेषु गुणवत्स्वितरेषु युक्तमेव साम्यं । तथाप्युक्तं सवर्णापुत्रो अन्यायवृत्तो न लभते केषामिति तदेतदसत् । जातेरत्यन्तमान्यत्वात् " उत्पन्नो वाऽर्थस्वाम्यमित्याचार्या " इति तेनेयमत्र व्याख्या । असत्सु सवर्णास्वसवर्णास्वपि जातास्तेऽपि जायांशमुद्धारेण सवर्णाद्विभजेरन् ॥ १५६ ॥

शूद्रस्य तु सवर्णैव नान्या भार्या विधीयते ॥
तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् ॥ १५७ ॥

प्रतिलोमाविवाहः शूद्रस्य नेष्यते । उक्तानुवादोऽयं । तस्यां जाताः समांशाः स्युरिति । पञ्चमस्य जात्यन्तरस्याभावादेवमुक्तं सवर्णैव तस्य भार्या नान्याऽस्तीति ॥ १५७ ॥

---

१ ण-र-+वदतः । २ ण-र-शूद्र । ३ अ० २८ सू० ३७ । ४ ण-र-न लिङ्गवचनं नास्ति । ५ र-दिति । ६ फ-र-अनियुक्तासु ताः सर्वेषाम् । ७ ण-र-शब्दा । ८ ण-र-पुत्र न त्वयमस्यार्थः । ९ ण-र-वृत्तौ । १० फ-सर्ववर्णेष्वपि ये यातास्तेऽपि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः ॥
तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥ १५८ ॥

वक्ष्यमाणसूत्रस्थानमेतत् । बन्धुशब्दो बान्धवपर्यायः । गोत्रहरा दायहराश्च षडितरे विपरीताः । यदत्र तत्त्वं तदुपरिष्टान्निदर्शयिष्यते ॥ १५८ ॥

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ॥
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥ १५९ ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ १६० ॥

श्लोकद्वयेन संख्यानिर्देशो वर्गद्वयप्रदर्शनार्थः ॥ १५९ ॥ १६० ॥

यादृशं फलमाप्नोति कुप्लवैः संतरं जलम् ॥
तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः ॥ १६१ ॥

क्षेत्रजादीनामौरसेन सहोपदेशात्तु नाशङ्का । तन्निषेधार्थमिदं । न तुल्यमौरसेनोपकारं कर्तुं शक्ताः कुपुत्राः क्षेत्रजादयः । असत्यपि विशेषश्रवणे प्रकृतत्वादेवं व्याख्यानयन्ति । अन्ये तु कुपुत्रानभियुक्तासुतान्मन्यन्ते । एतदुक्तं भवति । नैतेषु सत्सु पुत्रवानहमिति कृतिनमात्मानं मन्यन्ते । किं तर्ह्यौरसोत्पादने पुनरपि यत्नवता भवितव्यं तमपारलौकिकं दुष्कृतकर्मजं दुःखमृणापाकरणानिमित्तं "सप्रजया पितृभ्य" इति ॥१६१॥

यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ ।
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः ॥ १६२ ॥

क्लीबस्य प्रागुपात्ते क्षेत्रजे यत्तत्पजप्रमीतस्य व्याधितस्य वेति पश्चादौषधे कथंचित् क्लीबत्वनिवृत्तौ संभवति तदीयमेवासौ रिक्थं लभेतेति । जनयितुर्यदि नाम पितृव्यपदेशः स्यादपि जनको हेतुः तस्मादपि पुत्रः सुतोयमुपचारात्क्षेत्रज इत्युक्तस्तत्रौरसे बाले मातृधने गृहीते कथंचिदपचारिणः पुत्रमपत्यमुत्पादितं भवतीति । न च तदायत्तमेव प्रीत्यादिना धनं कृतं न चास्य सपिण्डाः सन्ति । अस्यामवस्थायां यद्यस्य पित्र्यमुपपद्यते एतदेव लिङ्गमनियुक्तासुतादयोऽसत्सु सपिण्डेषु जनयितू रिक्थहरा भवंतीति । अन्ये तु व्याचक्षते । सति दायादे समुत्पन्नः क्षेत्रजः स जनयितुर्लभते रिक्थं न क्षेत्रिकात् सत्यौरसे उक्तश्च तस्य सत्यौरसे भागः " औरसक्षेत्रजौ पुत्रौ पितू रिक्थस्य भागिनौ " इति । तथा " षष्ठं तु क्षेत्रजस्यांशम्" इति । **एकरिक्थिनौ** एकहस्तस्थधनौ यथा च तौ भवतस्तथा दर्शयति ॥ १६२ ॥

---

१ ण–र–गुणे । २ ण–र–असर्थत्यपि । ३ एवं मूले । ४ ण–र–अतः परालौकिक । ५ अग्रे श्लो० १६५ । ६ श्लो० १६४ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः ॥
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम् ॥ १६३ ॥

सत्यौरसे क्षेत्रजादन्ये सर्वेऽदायादाः प्रजीवनमौरसाल्लभेरन् । आनृशंस्यमपापं अददत्पापमाप्नोति ॥ १६३ ॥

षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ॥
औरसो विभजन्दायं पित्र्यं पञ्चममेव वा ॥ १६४ ॥

क्रीतादिपुत्रवत्प्रजीवनमात्रे प्राप्ते क्षेत्रजस्य भागविकल्पोऽयमुच्यते । स च गुणापेक्षः ॥ १६४ ॥

औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ ॥
दशापरे तु क्रमशो[1] गोत्ररिक्थांशभागिनः ॥ १६५ ॥

आद्योऽयं[2] श्लोकः पूर्वोक्तविध्यनुवाद एव । पुनर्विध्यन्तरमौरसेन साम्यं क्षेत्रजस्य नेष्यते । गोत्रभागिनो रिक्थांशभागिनश्च । रिक्थांशः प्रजीवनसंमित इत्युक्तः । दत्तके च क्षेत्रजवत् । स्मृत्यन्तरमुदाहरन्ति क्रमशः । औरसक्षेत्रजौ युगपद्भागहरावन्येषां तु पूर्वाभाव उत्तरस्य भागहरत्वं । यद्येषां षट् दायादाः षडदायादा इति वर्गद्वयप्रतिभागेन दायादादायादयोरनयो रिक्थवचनमनुपपन्नं । सत्यौरसेऽदायादा इति आद्याः षण्महोपकारा इतरे षट् न्यूना इति । आद्या औरसादन्ये समानाफला एवमुत्तरे षट् ततो न्यूना अवान्तरापेक्षया तुल्या एव । न पूर्वोत्तरपठितानां भेदोऽस्ति ॥ १६५ ॥

स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम् ॥
तमौरसं विजानीयात्पुत्रं प्रथमकल्पितम् ॥ १६६ ॥

आत्मीयवचनः स्वशब्दो न समानजातीयतामाह । एतेन स्वयं संस्कृतायां जात औरस इतरथाऽसंस्कृतायां निवृत्तिपरः संस्कृतशब्दः संभाव्यते । ततश्चान्येन संस्कृतायामन्य औरसः स्यात् । उक्तार्थे[3] च स्वशब्दे क्षत्रियादिपुत्रा अप्यौरसा भवन्ति । न हि तेषामन्यत्पुत्रलक्षणमस्ति । अन्ये तु प्राथमकल्पिकमौरसविशेषणं[4] चतुरः[5] क्षत्रियापुत्रानौरसान् संपूर्णलक्षणान्मन्यन्ते । एवं तु व्याख्याने यथा स्वक्षेत्रे संस्कृतायामसंपूर्णलक्षण औरसस्तच्च स्वेऽसंस्कृतायां प्राप्नोति किं पुनः क्षत्रियादीनामौरसत्वेन पुत्रास्तावद्भवन्ति परिमितांशभाजश्च । अथोच्यते । असत्यौरसक्षेत्रजादिलक्षणे द्वादशसंख्यानियमात्कथं पुत्रत्वमिति । अत्रोच्यते । किमु[6] लक्षणेन लोकतो व्यवहारप्रसिद्धेः । तथाहि यो यतो जातः स तस्य पुत्र इति लौकिका व्यवहरन्ति । तथा च जनके कश्चित्पितृव्यवहारं

१ ण-र-क्रमशो गोत्ररिक्थसंभागिनो । २ र-आद्योऽर्थः । ३ एवं मूले । ४ ण-र-प्राथम; र-कल्पिकं । ५ ण-र-चत्वारः । ६ ण-र-किमलक्षणेन ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुर्वन्नन्यो नेति बोध्यते नैष ते पिता न हि त्वमनेन जात इत्यन्वयव्यतिरेकाभ्यां जनकः पिता जन्यश्च पुत्र इत्येतदवगम्यते । विशेषव्यपदेशार्थस्तु लक्षणारम्भः । ये तु क्षेत्रजादिजनके वा पुत्रत्वमिति तत्कार्यनिबन्धनमपुत्रस्यापि कार्यविधानात्पुत्रत्वं पुत्रत्वस्य तन्निषेधान्न जातत्वमिति । तथा चैते प्रतिनिधय उच्यन्ते । तैरत्रायं जन्मनिबन्धे हि पुत्रत्वे औरसपुनर्भव-नियुक्तासुतानां विशेषो न स्याज्जन्मनस्तुल्यत्वात् । किंच पुत्रकार्यकारणान्नैव कश्चिद्पुत्रः स्यात् । यस्तु लौकिको व्यवहारः असौ जनकेऽपि पितृव्यवहारदर्शनाव्यभिचारी । तेन सत्यपि प्रयोग इन्द्रादिशब्दवल्लोकतोऽर्थातिशयाच्छास्त्रे चोत्पत्तिविधानाद्भार्यादिव्यवहारवत् पुत्रव्यवहारोऽवगंतव्यः । तत्र च यदौरसस्य प्राथमकल्पिकत्ववचनं तत्र व्यवहारोऽवगन्तव्यः । न व्यवहारे किं तर्ह्युपकारेऽपि पितुरुपकारेण दृष्टो यथौरसो भूयांसं शक्नोत्यप-कर्तुमिति ज्ञापयति । उपकारापचयो हि प्रायश्चितप्रतिनिधिव्यवहारः । न ह्येषां प्रतिनिधिता संभवति । प्रारब्धस्य कर्मणोऽङ्गोपचारप्रतिनिधेने च पुत्रकर्मागमोऽपत्योत्पादनकर्मणो गुणकर्मत्वात् । तेन सत्येव क्षेत्रजे प्रतिनिधित्ववचनमौरसत्वप्रशंसार्थं । यथा-ऽपशवो वाऽन्ये गोऽश्वेभ्यः पशवो गोऽश्वानिति पशूनामपशुत्ववचनं गवाश्वानां प्रशंसितुं । यदा च यो यदीयाद्वीजाज्जातः स तस्य पुत्र इति । तथा च दर्शितं **महाभारते** । द्वैपायनाज्जाताः पाण्डुधृतराष्ट्रविदुरादयो नैते व्यासपुत्रा इति व्यपदिश्यन्ते । अथ स्वयं प्रयो-जनं क्षत्रियादिपुत्राणामौरसत्वं तथोपपादितं । अथ क्षत्रियापुत्रिकापुत्रत्वे द्वादशसंख्यातिरेक आप्नोति । भवतु को दोषः । त्रयोदशोऽयं पुत्रोऽस्तु । औरसेन तुल्यफलत्वात् तद्ग्रहणमतस्तत्साम्याच्च । तथा च **स्मृत्यन्तरं** (याज्ञवल्क्य स्मृ०व्य० १२८) "तत्समः पुत्रिकासुतः" इति ॥ १६६ ॥

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ॥
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥ १६७ ॥

व्याधितस्याप्रतीकारराजयक्ष्मादिव्याधितस्य । अवशिष्टं स्पष्टम् ॥ १६७ ॥

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ॥
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ॥ १६८ ॥

च शब्दः पठितुं वा युक्तो "माता पिता चेति" न ह्युभयोरपत्यमन्यतरानिच्छायां दातुं युक्तं । अथापि वाशब्दः पठ्यते । तथा चोक्तं । "माता पिता वा दद्या-त्तयोरपि पिता श्रेयान्" इति । कार्यान्तरविनियोगाविषयमेतत् । ननु सत्त्वापत्तौ मातुः स्वमिति पितरि पुत्रं प्रतिदातृत्वं नास्ति । सत्यं पितृत इति वचने "अभावे बीजिनामिति"

---

१ ण–र–यैं । २ ण–र–दृष्टं । ३ ण–र–अगुण । ४ ण–र–क्षेत्रजादीनां पुत्रत्वे प्रतिनिधि । ५ ण–र–पशवः पशवो । ६ ण–र–गवाश्व । ७ ण–स स्वयं प्रयोजनं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगविशेषविषयत्वात्सदृशमित्युक्तं। आह च वसिष्ठः (अ० १९ सू० १) "न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाच्च" इति । **सदृशं न** ज्ञातितः। किं तर्हि कुलानुरूपैर्गुणैः क्षत्रियादिरपि ब्राह्मणस्य दत्तको युज्यते । प्रतिग्रहणलोभादिना प्रतिपेधार्थम् ॥ १६८ ॥

सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम् ॥
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥ १६९ ॥ ९

अत्रापि सदृशो गुणत एव विज्ञेयः। स तु सदृशं सवर्णं व्याचक्षते। तेषां सजातीय इति एष पाठो युक्तो यद्ययमर्थोऽभिप्रेतः। ननु जात्या सादृश्यमपि तूक्तमेव। **गुणदोषविचक्षणं** केचिदाहुस्तावन्न क्रियते यावन्न प्राप्तव्यवहारः। न ह्यसौ गुणदोषान् जानाति। तथात्वेवं जानाति येनाहं जातो येन च संप्रति पुत्रतया भरणं मे क्रियते तस्याप्यहं पुत्र इत्यभ्युपगतपुत्राभावात्तथैव ग्रहीतव्योऽपि त्वन्यतरत्वे विशेषो नास्ति॥१६९॥ १०

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ॥ ॥
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥ १७० ॥

न च ज्ञायेत माता यद्युद्भ्रान्त्या बहुशो गता वा तदा न ज्ञायते का पुनस्तस्य जातिर्यतः पूर्वैरुक्तं अविज्ञातबीजिनो मातृतः। एतच्च यत्र हीनजातीयपुरुषशङ्का नास्ति। तदाशङ्कायां हि प्रतिलोमसंभवः। प्रतिलोमत्वान्न क्वचित्पुरुषकार्याधिकारिणः॥[2] १७०॥ १९

मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ॥
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥ १७१ ॥

बहुप्रजातया भरणासमर्थेनात्यन्तदुर्गत्या केनचिद्वा दोषयोगेन मातापितृभक्तिहीनत्वादिना न पुनः प्रत्यक्षत्वेन तस्य न क्वचिदेव पुत्रकार्येऽधिकार इति दर्शितं। अन्य[3]त्वमप्यन्यतरेणोत्सर्गः परिग्रहः पुत्रबुद्ध्या न तु तज्जीवितेच्छया च ॥ १७१ ॥ २०

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ॥
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥ १७२ ॥

अयं श्लोकः प्राक् स्वयंदत्तकृत्रिमापविद्धेषु। अस्य च भागकल्पना प्राक् निरूपिता। प्रतिग्रहभूमिनिषेधश्च सत्यस्मिन्धनेन तावत् ॥ १७२ ॥

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ॥ २१
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥ १७३ ॥
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ॥
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥ १७४ ॥

---

१ ण-र-लोभतयादिना । २ ण-र यें । ३ ण-र अन्यप्रमाय ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ॥
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥ १७५ ॥
सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा ॥
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति ॥ १७६ ॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ॥
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ॥ १७७ ॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ॥
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥ १७८ ॥

कामादित्यनुवादः " कामतस्तु प्रवृत्तानाम् " इत्यस्य । पारयन् पिण्डदानादिना उपकुर्वन्नपि दशवतुल्यः । अनुपकारकः । असंपूर्णोपकारकत्वात् ॥ १७८ ॥

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ॥
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥ १७९ ॥

शूद्रस्यानूढायामनियुक्तायामपि जातः सुत एव । एवं यद्यपि दासस्य दासीत्यर्थेऽपि वचनात्तस्यां जातो न दासस्य दासस्वामिनः । सोऽनुज्ञातः पित्रा समममंशमौरसेन हरेज्जीवितभागे क्रियमाणे अन्यथा वा यदि ब्रूयादेष वः समांश इति । यदा तु पिता नानुजानाति । तत्स्मृत्यंतरे पठितं (याज्ञव० स्मृ० व्य० १३३) " जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् " । कामतो यावन्तमंशं पिताऽनुजानाति । " मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं " । तं कुर्युः । स्वांशापेक्षया आत्मना द्वौ द्वौ परिगृह्णीयुर्भागौ तस्यैकं दद्युः । " अभ्रातृको हरेत्सर्वं " । असत्स्वौरसेषु सर्वं रिक्थं स एव हरेद्यदि दौहित्रो न स्यात् । सति तस्मिन्नौरसवत्कल्पना । दौहित्रस्यान्यस्याश्रुतत्वात्तस्य च प्रकृतत्वेन बुद्धौ सन्निवेशात् । ब्राह्मणादीनां तु दासीसुताः प्रजीवनमात्रभाजो न रिक्थभाज इति स्थितिः ॥ १७९ ॥

क्षेत्रजादीन्सुतानेतानेकादश यथोदितान् ॥
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥ १८० ॥

मुख्याभावे प्रतिनिधिः । अतो सत्यौरस एते कर्तव्या इत्युक्तं भवति । एतेषां स्मृत्यन्तरेऽन्यादृशः क्रम उक्तः । यथा गूढोत्पन्नः कैश्चित्पंचमोऽपरैः षष्ठ इति । तत्र पाठक्रमो नात्राङ्गमत एवानियमपाठात्प्रयोजनं चोत्तरत्रानङ्गत्वे दर्शयिष्यामः । क्रियालोपाद्धेतोः क्रियतेऽपत्यमुत्पादयितव्यमित्यस्य विधिलोपो माभूदिति । नित्यो ह्ययं विधिः । स यथाकथंचिद्गृहस्थेन संपाद्यः । तत्र मुख्यः कल्प औरसः तदसंपत्तावेते कल्पा आश्रयितव्याः ॥ १८० ॥

१ एतत्तु ण-र-पुस्तकयोरेव दृश्यते । २ ण-र-भ्रात्रौ । ३ ण-र-अतःपरं पत्रच्युतिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः ॥
यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ॥ १८१ ॥

पूर्वोक्तस्याभावे विधिप्रतिषेधोऽयमिति व्याचक्षते । य एते औरसाभावे प्रतिनिधयः कर्तव्यतया उक्तास्ते न कर्तव्याः । यतस्तेऽन्यबीजजातास्तस्यैव ते पुत्रा नेतरस्य । येन क्रियन्ते तस्य ते न भवन्तीत्यर्थः । अतश्च पूर्वेण विधिरनेन प्रतिषेध इति विकल्पः । स च व्यवस्थितो रिक्थग्रहणे । कानीनसहोढपुनर्भवगूढोत्पन्ना न रिक्थभाजः । दत्तकादयस्तु रिक्थभाजः । असत्यौरसे कानीनादयश्च सत्यप्यौरसे न पितृधनहराः । ग्रासाच्छादनभाजः केवलं । सत्यसति चौरसे । यत उक्तं (अग्रे श्लो. २०२)

"सर्वेषामपि च न्याय्यं दातुं शक्त्या मनीषिणः । ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्"॥

सर्वेषामपि क्लीबादीनां च प्रकृतत्वेन दर्शितमिति । अत्यन्तं यावज्जीवमित्यर्थः । शरीरधारणार्थत्वाद्ग्रासाच्छादनस्य भृत्यादेस्तदुपयोगिनः परिचारकस्यापि वेतनदानं विज्ञेयं । न ह्यन्धादेः परिचारकमन्तरेण जीवनसंभवः । येषां दारकरणं मतं तेषां सभार्याणां भरणं दातव्यं शक्नोति धनानुरूपेण भोजनवस्त्रादि देयं पतित इत्यर्थवादः ॥ १८१ ॥

भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् ॥
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ १८२ ॥

सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ॥
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥ १८३ ॥

श्रेयसः श्रेयसो लाभे पापीयान्रिक्थमर्हति ॥
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ॥ १८४ ॥

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः ॥
पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च ॥ १८५ ॥

*त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते ॥
चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते ॥ १८६ ॥

× अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत् ॥
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ॥ १८७ ॥

---

* असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः ।
पितामह्यश्च ताः सर्वा मातृकल्पाः प्रकीर्तिताः ॥ १ ॥

× हरेरन्नृत्विजो वापि न्यायवृत्ताश्च याः स्त्रियः ॥ १ ॥

For Private And Personal Use Only

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ॥
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥ १८८ ॥
अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः ॥
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः ॥ १८९ ॥
संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत् ।
तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत् ॥ १९० ॥
द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने ॥
तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः ॥ १९१ ॥
जनन्यां संस्थितायां तु समं सर्वे सहोदराः ॥
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः ॥ १९२ ॥
यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः ॥
मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम् ॥ १९३ ॥
अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ॥
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ १९४ ॥
अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ॥
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ॥ १९५ ॥
ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु ॥
अप्रजायामतीतायां भर्तुरेव तदिष्यते ॥ १९६ ॥
यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु ॥
अप्रजायामतीतायां मातापित्रोस्तदिष्यते ॥ १९७ ॥
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन ॥
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् ॥ १९८ ॥
न निर्हारं स्त्रियः कुर्युः कुटुंबाद्बहुमध्यगात् ॥
स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया ॥ १९९ ॥
पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत् ॥
न तं भजेरन्दायादा भजमानाः पतन्ति ते ॥ २०० ॥
अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ॥
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥ २०१ ॥

१ क—थे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ॥
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ॥ २०२ ॥
यद्यर्थिता तु दारैः स्यात्क्लीबादीनां कथंचन ॥
तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति ॥ २०३ ॥

अर्थिता संप्रयोगेच्छारतिनिमित्तं तस्यां सत्यां विवहेत् । तत्रोत्पन्नसंतानानामपत्यं पुत्रो दुहिता वा दायं रिक्थविभागमर्हति । दुहितुर्यावान्भागः प्रागुक्तः । वान्तरेतास्तु यः क्लीबस्तस्य मत्स्येव मैथुनेच्छा । कुतः पुनस्तस्य जंतूत्पत्तिः । उक्तं च "तस्य यस्तल्पजः न प्रमीतस्य क्लीबस्य व्याधितस्य" इति । रागप्रयुक्तता वा तेन श्लोकेन विवाहस्य दर्शिता । धर्मप्रयुक्तत्वे ह्यनधिकृतानां कर्मसु कुतो विवाह उपनेयता च । जात्यन्धपङ्गूनां वातरेतसश्च स्वकीयस्य श (?) दर्शिता । उन्मत्तादयस्त्वमुनेर्याः कुतस्तेषां विवाहः । आदिग्रहणं चोक्तविषये चरितार्थं । यदि हि आदिग्रहणासामर्थ्यात्सर्व एव गृह्येरन्पतितोऽपि गृह्येत तस्य सर्व एव गृह्येरन्पतितोऽपि स्मृतिविरोधान्नेष्टं अथवा कृताध्ययनानां 'कृतविवाहानामुन्मत्तादिरूपे' समुपजाते विधिरेष विज्ञेयः ।

ननु च कृतविवाहानां 'यद्यर्थिता तु दारैरिति' नोपपद्यते । नैतदेवं कृतविवाहानां उन्मत्तादिरूपेण समुपजाते विधिरयं विज्ञेयः । ननु कृतविवाहानां जायार्थितायाः संभवात् वूर्वैस्तु धर्म्येऽपि विवाहेऽस्य प्रयोजनं दृष्टं । ततश्च क्लीबस्य स्मार्तेष्वधिकारात्तदर्थो विवाहोऽसत्यामप्यर्थितायां युक्त एव । श्रौतेषु तु जातत्रपुस्याधानात्क्लीबस्य नाधिकारः । यस्य च प्रयोजकत्वं युक्तं तद्दर्शयितव्यम् ॥ २०३ ॥

यत्किंचित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति ॥
भागो यवीयसां तत्र यदि विद्यानुपालितः ॥ २०४ ॥

पितृक्रमागतान्मित्राद्राजामात्यपुरोहितादेव क्षेत्राद्वा कयाचिद्युक्त्याऽधिकोत्पत्तिं जनयेत्तत्सर्वेषां साधारणं नैव मन्तव्यं । मयैतद्बुद्ध्या पित्रा प्रागनुपार्जिता मयैतल्लब्धं ममैवेतदिति **विद्यानुपालिन** इति वचनाद्विद्याजीविनां शिल्पिकारुकप्रभृतीनामेव विधिर्वैद्यनटगायनादीनाम् ॥ २०४ ॥

अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत् ॥
समस्तत्र विभागः स्यादपित्र्य इति धारणा ॥ २०५ ॥

अविद्या कृषिवाणिज्याराजोपसेवादि । तत्र ईषन्न्यूनाधिकभावो न गणयितव्यः । तत्रापि यदि केनचिदपि बह्वर्जितं तदाऽस्त्येव विभागता । ज्येष्ठस्य तु ज्येष्ठांशनिषेधार्थं

१ ण-निमित्तांतरस्यां; ण-र-निमित्तान्तरस्यासत्यां । २ एवं मूले । ३ फ-विरोधेनेष्टं । ४ ण-र-जायार्थितायां संभवात् । ५ र-नः । ६ फ-महृतश्चेद्धनं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वचनं। ईषदाधिक्ये तु सर्वेषां समांशकल्पना। अपित्र्येऽपि हेतुवचनादनपत्यधनस्याप्येष एव विधिः ॥ २०५ ॥

विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत् ॥
मैत्र्यमौद्वाहिकं चैव माधुपर्किकमेव च ॥ २०६ ॥

विद्याया अध्यापनादिना शिल्पकौशलेन वा तथा मित्राद्र्जितमौद्वाहिकं मान्तानिकतया लब्धं चैव **माधुपर्किक**मार्त्विज्येन। यद्यप्येतदपि विद्याधनं भवति तथापि जायमानेन निमित्तेनोपादीयमानत्वाद्भेदेन व्यपदिश्यते। श्वशुरगृहलब्धमौद्वाहिकमपरे उद्वाहनिमित्तेन यतस्तल्लभ्यते ॥ २०६ ॥

भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्मणा ॥
स निर्भाज्यः स्वकादंशात्किंचिद्दत्त्वोपजीवनम् ॥ २०७ ॥

ये भ्रातरः सह वसन्ति विद्यमानपितृधनाश्च कृष्यादिना व्यवहरन्ति तेषां यद्येको न व्यवहरेत्तस्येयं निर्भाज्यता पठ्यते। **स निर्भाज्यः स्वकादंशा**दिति। भागान्नेतव्योऽपसारयितव्यः। स्वकादंशाद्यावदधिकं तदीयाद्धनाद्व्यवहारेणोत्पन्नं तत्तस्य न दातव्यं न तु मूलस्य पैतृकस्य निषेधः। तत्रापि न सर्वेण सर्वं निर्भाज्यं किंचिदन्योपजीवनं क्लेशफलमात्मनो गृहीत्वा शिष्टमस्मै दातव्यम्। अथवा निर्भाज्यः पृथक्कार्यः सह वस्तुं। न चेयं कदाचि-दुत्तरकालशक्तिसाधारण्येन धनेनार्जितत्वात्समांशता। तत्र भागकल्पना **नारदेन** दर्शिता। तत्र वचनेनोद्धतस्य भूयान्भागो गृह्यतेऽनुक्तस्य स्वल्प इति ॥ २०७ ॥

अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितम् ॥
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति ॥ २०८ ॥

विद्यानिमित्तस्य स्वयमर्जितस्यादानमुक्तं। अनेन व्यतिरिक्तस्य कृष्यादिलब्धस्यादातव्यतोच्यते। ननु चायमेव श्लोको न वक्तव्यः। **स्वयमीहितेन** स्वयं चेष्टया यल्लब्धं **तन्नाकामो दातुमर्हतीति**। किं विद्याधनादिश्लोकेन उच्यते। मन्त्रे विवाहादौ न सर्वस्य स्वयमीहोपपत्तिरिति भेदेन व्यपदेशः ॥ २०८ ॥

पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ॥
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम् ॥ २०९ ॥

ग्रहणादन्यदर्थयन्पित्रा **स्वयमर्जितं तदाकामो** न विभजनीयोऽधिकारप्राप्तैरपि पुत्रैः कः पुनर्जीवति पितरि पुत्राणां विभागकाल उच्यते। यदा तावत्स्वयं पिता पुत्रान्विभजते तदोक्तं। (नारदस्मृ. १३—२) "मातुर्निवृत्ते रजसि" इति "जीवति चेच्छतीति"

---

१ ण—र—यदा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा पितर्यगतस्पृहे " निवृत्ते वापि रमण " इति । अन्यथा तु यदैव प्राप्ताः पुत्रा भवन्ति यतस्ते पितामहधनस्येशते । तथा चोक्तं (या. व. स्मृ. व्य. १२१)
"भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा । तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः" ॥ इति ।

सत्यपि च पुत्रस्य स्वाम्ये यावदप्राप्तास्तावत् सर्वथा विशेषाभावात्सर्वे सत्यपि पितामहधनभाजः । स्वत्वपूर्वकत्वाद्विभागस्य बन्धकक्रयादिक्रियासु पितृधनं जातपुत्रेण नियोक्तव्यं । योगकुटुंबभरणादौ तु विनियोगो दर्शितः । आचारे चास्यामवस्थायां पुत्राणां स्वाम्ये पुत्रकामेन वा विभक्ताविति निन्दादर्शनाद्बलाद्विभाजयन्तः पापा इत्यनुमीयते । यथाऽसत्प्रतिग्रहेण भवति स्वाम्यं दोषस्तु पुरुषस्य तेनान्वयागतमितीदृशमशुद्धमेव । अतः संभवत्युपायान्तरे न पिताऽर्थनीयः । अधर्मो हि तथा स्यात् । स्वयमर्जितमपि धनमधिकारप्राप्तान्गुणवतः पुत्रान् ज्ञात्वा विभक्तव्यमेव । उक्तं च । " वयसि स्थितः पिता पुत्रान्विभजेत् । ज्येष्ठं श्रेष्ठांशेनेतरान्समैरंशैः " इति । न चैतत्पितामहधनविषयं । न हि तत्र पिता ज्येष्ठस्याधिकांशदानाय प्रभवति । तुल्यत्वादुभयोः स्वाम्यस्य । यत्त्विदं (या. व. स्मृ. व्य. ११६) " न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः " इति तत्पितामहेऽपि स्वल्पया मात्रयेच्छन्ति । यत्र न परिपूर्णं भागद्वयं गृहीतं स्वयमर्जितविषये ह्यपवाद एव स्यात् ॥ २०९ ॥

विभक्ताः सह जीवन्तो विभजेरन्पुनर्यदि ॥
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते ॥ २१० ॥

स्पष्टार्थः श्लोकः । विभागधर्मे विभागस्योद्धारप्रत्याशङ्कानिवृत्त्यर्थं " स्वपित्र्य इति " ' धारणेति ' वचनात् पित्र्यस्य सर्वधनस्योद्धारः । इह तु भूतः सर्वगत्या पित्र्यं नास्तीत्याशङ्कया वचनम् ॥ २१० ॥

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः ॥
म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ २११ ॥

येषां भ्रातॄणां **ज्येष्ठः कनिष्ठो वा** भ्रातांऽशप्रदानाद्धीयते । अंशप्रदानं विभागकालः हीयते पादेत्याद्यविभागार्थं च हेतुमासादयेत् **म्रियेत वा तस्य भागो न लुप्यते** तस्येयं प्रतिपत्तिः ॥ २११ ॥

सोदर्या विभजेरंस्तं समेत्य सहिताः समम् ॥
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥ २१२ ॥

सोदर्या भ्रातरो येषां संसृष्टार्थे गृह्णीयुः । **भगिन्यश्च सनाभयः** । सोदर्या अपुत्रास्ता हि सनाभिव्यपदेश्याः प्रवृत्ताः पुनः प्रतिगोत्रभावमनुभवन्तीति न भ्रातॄणां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सनाभयः । ये च संसृष्टा इति चशब्दो भगिनीं समुच्चिनोति त्वियमाशङ्का कर्तव्या । सोदर्या गह्णीयुर्ये च भ्रातरः संसृष्टा इति तथा सत्यसोदर्याणामपि संसृष्टानां भागः प्रसज्येत। सन्त्येव सोदर्या असंसृष्टाः संसृष्टाश्च । सोदर्या यत्र सन्ति तत्रोभयोरपि विभागेन विभागं गृह्णीयुः । न चेदं विरुध्येत

" अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् । असंसृष्टोऽपि वादद्यात्सोदर्यो नान्यमात्रिकः " ॥

अस्यायमर्थः । सापत्नो भ्राता सत्यपि संसृष्टित्वेन गृह्णाति । यदा सोदर्योऽसंसृष्टोऽपि विद्यते सोदर्याणां मध्याद्येन संसृष्टः स एव नान्यः सत्यपि सोदर्यत्वे । तदुक्तं " संसृष्टिनस्तु संसृष्टी सोदर्यस्य तु सोदर " इति । यदा तु सोदरा नैव सन्ति तदा यैरेव सापत्नैः संसृष्टस्त एव गृह्णीयुर्न त्वितरे । सोदर्यविभक्तानां सह वसतां महानिकटमावसत्यपि सान्निध्यं विशेषकार्यसामान्योत्थविभक्तानामपि विज्ञायत इत्याहुः । तेन विभक्तानामप्यन्यतरप्रमेयसोदर्य एव गृह्णीयान्नास्य भागः परिलुप्यते । न चैतच्चोदनीयं नैवास्य तदानीं भाग उत्थितः परलोको वा चिन्त्यते यत उक्तं । " समुत्पन्ने वाच्यः स्वामीति " । " अनीशास्ते हि जीवतोः " इति ॥ २११ ॥

यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः ॥
सोऽज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिः ॥ २१३ ॥

तत्र पितुरूर्ध्वं समनन्तरमेव पुत्राणां स्वाम्यं दर्शयति । विनिकारो राजपूजादिष्ववज्ञापरे धनेन वंचनं अज्येष्ठो बन्धुवत्पूज्य इत्युक्तं । न सर्वेण सर्वे ज्येष्ठवृत्तिनिषेधोऽभागकर्त्वं च ज्येष्ठांशनिर्हत्वं नियन्तव्यमविशेषोपदेशात् । वाग्दण्डधिग्दण्डाभ्यां धनं चार्थानुरूपेऽपराधे ॥ २१३ ॥

सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम् ॥
न चादत्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम् ॥ २१४ ॥

विकर्मस्थाः प्रतिषिद्धाचरणाः । कुटुंबार्थे चानुतिष्ठमानानां तेषामन्येषां भ्रातॄणा संबन्ध्युपविष्टं स्थापयेद्यत्ते वक्ष्यन्ते कुतस्तद्वर्धनमिति तदा मूलं दर्शयिष्यामीति तादृशवृद्धिसहितमपि सर्वेषामपि दापयेत् । यदि तु तस्मिन्नेव काले भ्रातॄणां दर्शयेदिदमधिकं दृश्यते तथयांशं गृह्णीताहमपि स्वतस्तत्पृथक्कृत्य वृद्धिं नेष्यामीति तदा नास्ति तेषां भागस्तस्यैव तद्यौतकम् ॥ २१४ ॥

भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह ॥
न पुत्रभागं विषमं पिता दद्यात्कथंचन ॥ २१५ ॥

१ या० ध० स्मृ० व्य० १३९ । २ या० ध० स्मृ० व्य० १३८ । ३ पर–पज ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदुक्तं "न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृत" इति तेभ्योऽस्मिन्विषये प्रतिषेधः । सहोत्थानं सर्वे एव धनमर्जयन्तीत्यर्थः । कश्चित्कृष्यादिना कश्चित्प्रतिग्रहेण कश्चित्सेवया कश्चिद्यथाहृतं परिरक्षति यथोपयोगमसन्निहितेषु विनियुक्ते तत्सर्वमेकीकृत्य समं विभजनीयं । न स्नेहादिना कस्मैचित्पित्राऽधिकं देयम् ॥ २१५ ॥

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम् ॥
संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह ॥ २१६ ॥

विभागोत्तरकालं पित्रा यद्विभागद्वयं गृहीतं "द्वावंशौ प्रतिपद्येत" इति तदेव सत्या पितुरिच्छायां ग्रहीतव्यं । पितुरूर्ध्वं वा न तत्र भ्रातृभिर्वाच्यं किमित्ययं द्वावंशौ गृह्णातीति । अथ च नास्ति पितुरिच्छा तदा समं च स्वसमोऽस्य भाग उद्धर्तव्यः । पितुरूर्ध्वं संसृष्टास्तेषामेव स पैतृकोऽशस्तदुत्थं दद्यादपरेषां स्वांशं "जातस्य च मृतस्य च" इति । जातस्य संसृष्टिन एव दद्युः । पितुरूर्ध्वं तदीयमंशं च त एवमेव विभक्ताः सह इत्यनयानुबुद्ध्या "भगिन्या आ प्रसवान्नैव विभागोऽस्ति" इति वसिष्ठेन दर्शितम् ॥ २१६ ॥

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ॥
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् ॥ २१७ ॥

व्याख्यातोऽयं श्लोकः ॥ २१७ ॥

ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि ॥
पश्चाद्दृश्येत यत्किंचित्तत्सर्वं समतां नयेत् ॥ २१८ ॥

अविज्ञानान्न्यूनमाधिकं वा विभक्तं परतो ज्ञातं समांशीकर्तव्यं । किंच विभागोत्तरकालं लब्धे नास्ति ज्येष्ठस्योद्धार इति ॥ २१८ ॥

वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः ॥
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥ २१९ ॥

वस्त्रपत्रालङ्कारकृतान्नोदकानामेकत्वं विवक्षितं । पत्रं[1] वाहनं गन्त्रीशकटादि । अलङ्कारोऽङ्गुलीयकादि । वस्त्रं सममूल्यं न तु महार्घं । उदकं कूपवाप्यादि । स्त्रियो दास्यो योगक्षेमं यतो योगे क्षेमो भवति मन्त्रिपुरोहितामात्यवृद्धावास्तुचारादिभ्यस्ततो रक्षा भवति । स्मृत्यन्तरे च पठ्यते 'वास्तुनि विभागो न विद्यते' । प्रचारं यत्र गावश्चरन्ति प्रनेत्रेत्याह तेन यत्पैतृकेनोक्तं न ह्यत्र धर्मातिक्रमः कश्चिदस्तीति तदनुपपन्नं दर्शयति । अदृष्टासु हि ते प्रतिषेधास्तदतिक्रमादधर्मो न स्यात् ॥ २१९ ॥

१ ण-र-एवं वाहनं ।

९८

For Private And Personal Use Only

अयमुक्तो विभागो वः पुत्राणां च क्रियाविधिः ॥
क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत ॥ २२० ॥

द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ॥
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥ २२१ ॥

प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ ॥
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान्भवेत् ॥ २२२ ॥

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ॥
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥ २२३ ॥

द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा ॥
तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥ २२४ ॥

कितवान्कुशीलवान्क्रूरान्पाषण्डस्थांश्च मानवान् ॥
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ॥ २२५ ॥

एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः ॥
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥ १२६ ॥

द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं महत् ॥
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान ॥ २२७ ॥

प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ॥
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ॥ २२८ ॥

विविधः[1] कल्पो विकल्पः । सम एव राज्ञोच्यते[2] ' द्यूतधर्मं निबोधत ' इति तत आरभ्य द्वित्राः श्लोका विधायकाः । सर्वोऽप्यर्थवादः ॥ २२८ ॥

क्षत्रविट्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन् ॥
आनृण्यं कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः ॥ १२९ ॥

क्षत्रियादयो निर्धना न संबन्धेनावसादयितव्याः । किंतर्हि ? कर्मणा यद्यस्योचितं कर्म राजोपयोगि तेन दण्डधनं संशोधयितव्याः । ब्राह्मणस्तु कुटुंबानामविरोधेन शनैर्दाप्यो बन्धताडनकर्मणी तस्य निषिध्येते । धनिकविषयः प्रागुक्तः श्लोकः । दण्डविषयोऽयमपौनरुक्त्यम् ॥ २२९ ॥

स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणाम् ॥
शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्[3]दमम् ॥ २३० ॥

---

१ ग-र-विधिः । २ ग-र-रोच्यते । ३ ग-र-नृपतिध्रुवम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दमः कर्मकरणेऽप्यसमर्था दरिद्रा एव गृह्यन्ते । महापातकिनां साम्यात्तच्छिफ्यादिभिस्ताडनं । शिफा लता । विदलं वृक्षत्वक् ॥ २३० ॥

ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणाम् ॥
धनोष्मणा पच्यमानास्तान्निःस्वान्कारयेन्नृपः ॥ २३१ ॥

ये कार्यिणामर्थिप्रत्यर्थिनां कार्येषु व्यवहारदर्शितादिषु नियुक्ता अधिकृता राजस्थानीयप्रभृतयस्ते धनोष्मणा पच्यमाना अन्यस्माद्धनं गृहीत्वा कार्याणि नाशयेयुस्तान्निःस्वान्कारयेत्सर्वस्वहरणं तेषां कार्यं । सत्यानामभ्यासेन वर्तमानानां सत्यपि वक्ष्यमाणो दण्डान्तरविधावेष एव दण्डो न्याय्यः । येऽप्यन्ये सेनापतिप्रभृतयः कस्यचित्साहाय्यके नियुज्यन्ते ततश्चार्थं गृहीत्वा शयन्ति तेऽप्येवमेव दण्ड्याः । अन्ये तु 'येऽनियुक्ता' इत्यकारप्रश्लेषं पठन्ति । ये राजवल्लभत्वाद्बलातिशयाद्वाऽन्यस्य साहाय्यं कुर्वन्ति कार्यनाशनार्थं द्वितीयस्य तेषामयं दण्डः । धनोष्मणेत्यविवक्षितं । अनियुक्ता इत्येतदेव प्रधानम् ॥ २३१ ॥

कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् ॥
स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथा ॥ २३२ ॥

कूटशासनस्य कर्तारो यन्नैव राज्ञादिष्टं तद्राजकृतमिति वदन्ति । शासनं राजादेशः । एतस्य गृहे न भोक्तव्यमस्य चायं प्रसाद आज्ञात इयं वा स्थिती राज्ञा कृतेति पत्रकं राजाधिकृतलेखकलिखितमस्ति शासनं राजादेशसंबाधशासनं तत्कूटं कुर्वन्ति पालयन्ति । प्रकृतीनां कुद्धलब्धानां दूषका भेदकाः । स्त्रीबालयोर्ब्राह्मणयोरपि हन्तारः । द्विट्सेविनो राजशत्रुसेविनः प्रच्छन्नं गतागतिकान् ॥ २३२ ॥

* तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत् ।
कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् ॥ २३३ ॥

यत्र क्वचन राजाधिकारणे व्यवहारपदं तीरितं पारतीरकर्मसमाप्तौ निश्चितमसौ यत्र प्रयुञ्जीतेति न केवलं वाचा सत्यैरुक्तं यावदनुशब्दं दण्डप्रणयनं कृतं तद्राजा कृतमेव विद्यान्न पुनर्निवर्तयेदन्तरेण द्विगुणं दण्डं यथाह "द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत्" इति । धनग्रहणसंबन्धेन पूर्वं निःस्वीकरणं । अयं तु निमित्तान्तरेणाज्ञानादिना ॥ २३३ ॥

---

१ ण–र–राज्ञा ।

*तीरितं चानुशिष्टं च यो मन्येत विकर्मणा । द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत् ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा ॥
तत्स्वयं नृपतिः कुर्यात्तान्सहस्रं च दण्डयेत् ॥ २३४ ॥

धनग्रहणसंबन्धेन पूर्वं निःस्वीकरणं अर्थतस्तु निमित्तान्तरेण प्रज्ञादिनाऽमात्यो राजस्थानीयादिस्तं **सहस्रं च दण्डयेत्** । गर्गेशतदण्डनवत्समुदायेन वाक्यपरिसमाप्तिः॥२३४॥

ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः ॥
एते सर्वे पृथक् ज्ञेया महापातकिनो नराः ॥ २३५ ॥

सुरापो ब्राह्मण एव महापातकी । **तस्करो** ब्राह्मणः सुवर्णापहारी । न यः कश्चित् उक्तार्थकथनमुत्तरार्थम् ॥ २३५ ॥

चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम् ॥
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥ २३६ ॥

ननु च सुरापो ब्राह्मण एव पातकी । तस्य च शरीरसंयुक्तो दंडो नास्ति "न शारीरो ब्राह्मणो दण्ड" इति । तत्र चतुर्णामपीति कथं केचिदाहुः । पतितः संप्रयुक्तो गृह्यते पूर्वमनुपात्तोऽपि चतुःसंख्यासामर्थ्यात् । अन्ये चै कर्तनं शरीरसंयुक्तमित्याहुः । तच्च ब्राह्मणस्याप्यस्ति । अन्ये त्वपिशब्दात्पञ्चानामयं दण्ड इत्याहुः । चतुर्णामपि । अपिशब्दात्पञ्चमस्यापि तत्संसर्गिणो ब्राह्मणस्य वधे पूर्वत्र शरीरदण्ड उक्त एव । स्त्रीबालब्राह्मणघ्नांश्च हन्यादिति । अनेनान्तःशरीरयुक्तमङ्कनमेवोच्यते । धर्म्यमित्यपराधानुरूपेण गुरुतरलाघवं कार्यमित्यर्थः ॥ २३६ ॥

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ॥
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् ॥ २३७ ॥

ललाटाङ्कनमप्रतिषेधविधौ "नाङ्क्या राज्ञा ललाटेषु" इति तच्छ्रवणात् ॥ २३७॥

असंभोज्या ह्यसंयाज्या असंपाठ्याविवाहिनः ॥
चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः ॥ २३८ ॥

सर्वधर्मग्रहणादेवासंभोजनादीनां सिद्धे प्रतिषेधे दोषगुरुत्वख्यापनार्थमेषामुपादानम् । **संभोग** एकत्र ग्रसनं गीतादिश्रवणं च । **संयोजनं** तेषामेव योजनं तैः सह याजनं वा। एवं संपाठोऽपि द्रष्टव्यः । **असंपाठ्याविवाहिन इति** । असंपाठ्याश्च अविवाहिनश्चेति द्वन्द्वः । **दीना इति** । सत्यपि स्वेवत्वे तत्संबन्धिनिषेधभिक्षादिभोजनेन परयाऽवज्ञया च वस्त्रखण्डादिवर्जनम् ॥ २३८ ॥

---

१ फ-ण-र-ब्राह्मणसुवर्णापहारी । २ फ-शारीर । ३ ण-र-पत्तो । ४ फ-स्तेकिनः शरीमुक्त- । ५ फ-पूर्वं । ६ फ-अन्तरशरीरात्समाङ्करमेवोच्यते । ७ थ-र-ण-ल-अपराधानुतम्ये । ८ फ-विगर्हिता; क्ष-अतिगर्हिता । ९ ण-र-स्वरत्वेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञातिसंबन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः ॥
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम् ॥ २३९ ॥

कृतलक्षणा इति निश्चिते कार्यकारणत्वे इत्यर्थः । व्याध्यादियोगेप्येषु दया न कर्तव्या । ज्येष्ठ्यादिगुणयोगेऽपि च नैते नमस्कार्याः प्रत्युत्थानादिभिः । एष एव वचनसामर्थ्याद्धर्मो विज्ञेयः ॥ २३९ ॥

प्रायश्चित्तं तु कुर्वाणाः पूर्ववर्णा यथोदितम् ॥
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम् ॥ २४० ॥

शूद्रादावन्ये पूर्ववर्णास्तेषां प्रायश्चित्तं कुर्वतामङ्कनं नास्ति **दण्डस्तूत्तमसाहसं** पणसहस्रं दाप्याः ॥ २४० ॥

आगस्सु ब्राह्मणस्यैव कार्यो मध्यमसाहसः ॥
विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः ॥ २४१ ॥

प्रायश्चित्तं तु कुर्वाणा इत्येतदत्र नापेक्षते । एतेषु ब्रह्महत्यादिष्वपराधिषु ब्राह्मणो मध्यमसाहसं दण्ड्यः । अकामत इत्युतरश्लोकादपकृष्यते । दण्डयित्वा प्रायश्चित्तं कारयितव्यः। **सपरिच्छदः**। गुणवतो ब्राह्मणस्यानुग्राह्यस्यैतत्। अकामं वाऽनिर्वास्यः॥ २४१ ॥

इतरे कृतवन्तस्तु पापान्येतान्यकामतः ॥
सर्वस्वहारमर्हन्ति कामतस्तु प्रवासनम् ॥ २४२ ॥

इतरे क्षत्रियादयो वर्णा **एतानि पापानि** महापातकान्य**कामतो**ऽनिच्छया **कृतवन्तः** **सर्वस्वहरणाः** कार्याः । केचित्प्रायश्चित्तमपि कुर्वतामेतद्दण्डं पूर्वेण वैकल्पिकमिच्छंति **कामत**स्तेषां वध उक्तः । शूद्रस्याकामतोऽङ्कनसर्वस्वहरणे कामतो वधः ॥ २४२ ॥

नाददीत नृपः साधुर्महापातकिनो धनम् ॥
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते ॥ २४३ ॥

ननु धनेन दण्डनं राज्ञो वृत्तिरिति स्थापितम् । कथमिह तद्धनस्याग्रहणं उक्तम् राजनिर्धूतदण्डा इत्यत्रान्तरे ॥ २४३ ॥

अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत् ॥
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् ॥ २४४ ॥

१ फ-तत्कार्यकरत्वमित्यर्थः । २ फ-ज्येष्ठादि । ३ फ-दोपे । ४ य-र-ण-ल-गुणवतो ब्राह्मणस्यानुग्राह्य स्याभर्तुं कामं वा राष्ट्रान्निर्वास्यः । ५ ण-र-उत्तमः । ६ य-र-ल-ण-तेन दोषैर्विकल्प्यते; य-विलिप्यते । ७ ण-र-बन्धनं । ८ य-र-ल-ण-वृत्तिलिखितस्य । ९ ण-र-न स्थापितं । १० ण-र-वचनस्य । ११ य-र-ल-ण-राजभिः कृतदण्डा; भिर्धूतदण्डा ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरुणायेदमिति मनसा ध्यायन्नप्सु दद्यादप्सु निक्षिपेत् । ब्राह्मणाय वा विद्याशीलसंपन्नाय दद्यात् ॥ २४४ ॥

ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः ॥
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ॥ २४५ ॥

पूर्वस्य प्रतिपत्तिविधेरर्थवादोऽयम् । महापातकिनं दण्डस्य वरुण ईष्टे । यतो राज्ञां स दण्डधरो नेता ईशितेति यावत् । एवं ब्राह्मणोऽपि तद्धनस्येशोऽनेनैं ग्राह्यः ॥ २४५ ॥

यत्र वर्जयते राजा पापकृद्भ्यो धनागमम् ॥
तत्र कालें न जायन्ते मानवा दीर्घजीविनः ॥ २४६ ॥
निष्पद्यन्ते च सस्यानि यथोप्तानि विशां पृथक् ॥
बालाश्च न प्रमीयन्ते विकृतिर्नै च जायते ॥ २४७ ॥

प्रसिद्धाविमावप्यर्थवादश्लोकौ । काले न जायन्त इति वर्तमानजन्म न विवक्षितं जाता जनिष्यमाणाश्च । विकृतिः करचरणाक्षिविहीनम् ॥ २४७ ॥

ब्राह्मणान्बाधमानं तु कामादवरवर्णजम् ॥
हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः ॥ २४८ ॥

अवरवर्णजः शूद्रः । बाधनं धनाद्योहरणं शरीरोपपीडनं च । चित्रा विविधोपायाः शूलारोपणं रक्तच्छेदः अंगकल्पनं खड्गप्रहारकर्तृका इत्याद्याः । उद्वेजनकरैर्दीर्घकालपीडाकरैः २४८

यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे ॥
अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ॥ २४९ ॥

अवध्यवधे यो दोषस्तत्तुल्यो वध्यमोक्षणे राज्ञोऽयुक्तस्य षड्भागहरस्य स्वकर्माकुर्वतः प्रत्यवायेन अवश्यमेव भवितव्यं । कुर्वतस्तु न कदाचिददृष्टासिद्धिः । यस्त्वयं **धर्मस्तु विनियच्छत** इति एवमादिधर्मप्रवादः सर्वोऽसौ स्वकर्मानुष्ठानप्रशंसार्थोऽर्थवादः । राज्यनिग्राह्यसंस्कारार्थस्त्वयं वधोपदेशः । अतो यथाश्रुतिचित्रैर्वधोपायैः कर्तव्यः । इष्टार्थेषु राज्यतन्त्रसिद्ध्यर्थवधश्रवणं यथा हि साधनश्च हन्यादित्युक्तं । तत्र दृष्टप्रयोजनत्वादुपदेशस्य नं नियतो वधः । एवं च सत्युपायांतरेणापि बन्धनादिना नियच्छतो न दोषः ॥ २४९ ॥

---

१ य-र-ल-ण-नद्यादिषु । २ य-र-ल-ण-कुल । ३ ण-र-ईशानेन ग्राह्यः । ४ य-र-ण-ल-श्लोके च । ५ ण-र-यथासानि । ६ फ-विकृतं न; ण-र-नैव । ७ फ-कर्णाक्षिविहीनम् । ८ ण-मानास्तु-जान् । ९ ण-र-धनदारहरणं; ण-र-धनदानहरणं । १० फ-शिरश्छेदोऽऽकल्पनं । खड्गप्रहारकर्तिका इत्याद्याः । ११ ण-र-राज्ञा अप्रयुक्तेश्च; अप्रयुक्तेषु; अथ भागहरस्य धर्मानकुर्वतः- । १२ ण-र-प्रत्यवायेनावश्यं भवितव्यं कुर्वतस्तु न कदाचिददृष्टसिद्धिः । १३ ण-र-चैत्रवधोपायैः । १४ फ-उपदेशेषु प्रवचनं यथादत्तं योधांश्च— । १५ ण-र-तन्नियतो वधः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदितोऽयं विस्तरशो मिथो विवदमानयोः ॥
अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः ॥ २५० ॥

सर्वव्यवहारोपसंहारार्थः श्लोकः ॥ २५० ॥

एवं धर्म्याणि[1] कार्याणि सम्यक्कुर्वन्महीपतिः ॥
देशानलब्धांल्लिप्सेत लब्धांश्च परिपालयेत् ॥ २५१ ॥

अलब्धांल्लिप्सेतेति संतोषपरेण न भवितव्यमित्यर्थः ॥ २५१ ॥

सम्यङ्निविष्टदेशस्तु[2] कृतदुर्गश्च[3] शास्त्रतः ॥
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम् ॥ २५२ ॥

देशनिवेशो दुर्गकरणं यत्सप्तमाध्याये उक्तं । तत्कृत्यं कण्टकोद्धरणं तेनापि राष्ट्ररक्षा क्रियते । कण्टकशब्दः पीडाहेतुसामान्यात्तस्करादिषु प्रयुक्तः ॥ २५२ ॥

एतदेव दर्शयति

रक्षणादार्यवृत्तानां कण्टकानां च शोधनात् ॥
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः ॥ २५३ ॥

आर्यवृत्तं[4] शास्त्रेणोदितं[5] । कर्तव्योऽनुष्ठाननिषेधस्तद्वृत्तये[6] पामित्युत्तरपदलोपी समासः। ते च दीनानाथश्रोत्रिया अकरशुल्कदा गृह्यन्ते । तद्रक्षणाद्धि[7] त्रिदिवगमनं युक्तं । अन्येषां तु वृत्तिपरिक्रीतत्वादकरणे प्रत्यवायो यथोत्तरत्र वक्ष्यते " स्वर्गाच्च परिहीयत " इति । रक्षानुवृत्तिनिष्क्रयणेन[8] प्रत्यवायाभावमात्रं[9] न तु स्वर्गः । अथवा वृत्तिनियमापेक्षं[10] त्रिदिवप्राप्तिवचनं[11] यथोक्तं प्राक्[12] अन्येषां तु वृत्तिपरिक्रीतत्वादर्शनमर्थवादमात्रं राज्ञः स्वर्गवचनं अवृत्तिदपरिपालनेऽपि वृत्तिप्रयुक्तं स्वराजभागस्थानीयस्य तद्राज्ञो यथैव च शिल्पिजीविनः शिल्पिनो मासि मास्येकैकं काम्यं कुर्युरिति वृत्यर्थं शिल्पं कुर्वाणा राज्ञा कर्म कार्यन्ते करग्रहणाय । एवं राजापि वृत्तियुक्तः प्रजापालनेप्रवृत्तो[13] नित्यकर्मवदनार्यपरिपालनं कार्यते । शास्त्रेण यथैव हि कामश्रुतितोऽन्याहितो नित्यान्यनुतिष्ठति । न स्वर्गादिलाभाय न हि तानि फलार्थतया नोदितानि[14] अथ च क्रियन्ते तद्वदेतद्द्रष्टव्यं । अतो[15] यावती काचित्फलश्रुतिः[16] सा सर्वार्थवाद इति कोवेर[17]विष्णुस्वामी । यदत्र तत्त्वं तद्दर्शितमधस्तात् ॥ २५३ ॥

१ ण-र-कार्याणि धर्म्याणि । २ ण-र-विशिष्टदेश । ३ ण-र-स्य । ४ ण-र-त्वार्य । ५ ण-र-चोदितम् । ६ फ-ण-र-कर्तव्येतरानुष्ठानविधौ । ७ ण-र-हते । ८ ण-र-भकुर्यकम् । ९ ण-र-वृद्धि । १० ण-र-रक्षणेनुवृत्त । ११ फ-भावामात्रेण । १२ ण-र-प्राक्अन्येषां मासि मास्येकैकं कर्मकुर्युरितिवृत्त्यर्थं शिल्पं । १३ र-पालनेवृत्तो । १४ ण-र-चोदितानि । १५ फ-अथो । १६ ण-र-इति । १७ ण-र-काचन विष्णुस्वामी । ण-र-कावर विष्णुस्वामी ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशासंस्तस्करान्यस्तु बलिं गृह्णाति पार्थिवः ॥
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥ २५४ ॥

शासनं यथाशास्त्रं वधादिदण्ड[1]मन्तरेण तस्कराणां निग्रहरक्षा न शक्यते । अतो वृत्तिं[2] गृहीत्वा यस्तस्करवधाज्जुगुप्सते तस्योभयो[3]र्दोषः । इह राष्ट्रक्षतोऽमुत्र स्वर्गपरिहानिः । युक्ता च बलिपरिगृहीतस्य तन्निष्कृतिमकुर्वतो दोषवत्ता ॥ २५४ ॥

निर्भयं तु[4] भवेद्यस्य राष्ट्रं बाहुबलाश्रितम् ॥
तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः ॥ २५५ ॥

प्रसिद्धमेवैतच्छ्लोके[5] त[6]स्करधर्मविशेषतयानूद्यते ॥ २५५ ॥

द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान् ॥
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः ॥ २५६ ॥

चाराः प्रच्छन्ना राष्ट्रे राजकृत्य[7]ज्ञानिनस्ते चक्षुषी इव यस्य स चारचक्षुः । प्र[8]काशस्तस्कराणां नाति तस्करव्यवहारो यथा लोकेऽन्येषामटवीरात्रिचराणामातस्तैः सामान्योपादानं तद्वन्निग्रहार्थं क्रियते ॥ २५६ ॥

प्रकाशवंचकास्तेषां नानापण्योपजीविनः ॥
प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः ॥ २५७ ॥

तत्र ये क्रयार्थं मानतुलादिना मुष्णन्ति द्रव्याणामागमस्थाननिर्गमनापेक्षार्थं कुर्वन्ति ते प्रकाशका वणिजकाः । प्रच्छन्नास्तु ये रा[10]त्रौ मुष्णन्ति ते **स्तेना आ[9]टविका** विजने प्रदेशे वसन्ति । अपरे तु प्रसह्य हारिणो न केवलमेत एव किंतर्हीमे चान्ये यानूर्ध्वं वक्ष्यामः ॥ २५७ ॥

उत्कोचकाश्चौपधिका वञ्चकाः कितवास्तथा ॥
मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह ॥ २५८ ॥

उत्कोचकार्येण कस्यचित्कार्येण कस्यचिद्राजामात्यादेः प्रवृत्तो ग्रहणातिकार्यसिद्धौ प्रवर्तते । **औपधिकाः** छद्मव्यवहारिणः । अन्यद्ब्रुवन्त्यन्यदाचरन्ति । प्रत्यक्षं प्रीतिं दर्शयित्वा हठापकारे वर्तन्ते । विनाप्यर्थग्रहणेन निमित्तान्तरतः अन्यतोऽपरस्य कार्यसिद्धिमवश्यं विज्ञाय मया तवैतत्क्रियत इति परं गृह्णन्ति भीषिकां[11]प्रदर्शनं वा उपधावनग्रहणार्थे सदा देविन इत्यर्थः । पृथगर्थे वा पादवञ्चका विप्रलम्भकाः । इदं कार्यं वयमेव

१ ण-र-दण्डानां । २ ण-र-बलि वृत्तिं । ३ ण-र-उभयोर्दोषः । ४ ण-र-हि । ५ ण-र-लोक । ६ ण-र-न तस्करवधविधिशेषतया । ७ ण-र राजकृत्यवार्ताज्ञानिनः । ८ फ-प्राकाश । ९ फ-जवनिका । १० फ-रात्रेरुद्धरति । ११ ण-र-भीतिका ।

For Private And Personal Use Only

करिष्यामस्तव नान्यत्रस्था इत्युक्त्वा न कुर्वत उपेत्य नानाकारणनानाविधैरुपायैर्ग्रामिणान्मुष्णन्ति शिवमाधवादयः शिवमादित्यं जीवन्ति । मङ्गलादेशवृत्ता यान्त्युपदेशिका ज्योतिषिकादयः। अथवा एतां देवतां त्वदर्थेनाहं प्रीणयामि दुर्गां मार्तण्डं चेति तथाऽऽख्यानां धनमुपजीवन्ति । अथवा मङ्गलं तथाऽस्त्विति वादिनः । आदेशवृत्ताः सर्वस्य करवर्धने अभद्राभद्रप्रेक्षणकाः प्रशंसिपुरुषलक्षणाः ॥ २५८ ॥

असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः ॥
शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः ॥ २५९ ॥

महामात्रा मन्त्रिपुरोहितादयो राजनिकटिकास्ते चेद**सम्यक्कारिणः**। **चिकित्सका** वैद्याः । **शिल्पोपचारयुक्ताः** चित्रपत्रच्छेदरूपकारादयः । उपचार उपायनमनुपयुज्यमानस्वशिल्पकौशलं दर्शयित्वाऽनुष्ठाय धनं नयन्ति । एवं **पण्ययोषितो** निपुणाश्चापकारेणासत्प्रीतिदर्शनेन असम्यक्कारिण इति सर्वत्रानुयुज्यते ॥ २५९ ॥

एवमादीन्विजानीयात्प्रकाशाँल्लोककण्टकान् ॥
निगूढचारिणश्चान्याननार्यानार्यलिङ्गिनः ॥ २६० ॥

एवमाद्या न शक्यन्ते धूर्तानां परद्रव्यापहाराणा प्रकारान्संख्यातुमित्याद्यग्रहणं तथा ह्यशक्यं कथयन्ति अवधारयन्तीमनुरागिणीं तथा भृत्यो भृत्यवदात्मानं दर्शयित्वा न यदि हिरण्यमृजुप्रकृतेर्न स्वार्थभृतस्त्वं ब्रह्मा त्वं बृहस्पतिरित्युक्त्वा मूर्खाद्यान्नयन्ति देहि प्रसादेन कतिपयैर्वाऽहोभिः प्रत्यर्पयामीति सिद्धे प्रयोजने तनुतरो भवति प्रियवाद्यप्रियवादि संपद्यते । **निगूढचारणस्**तुल्यकर्मकारिभिर्विधापूर्वं ये तत्कर्म कृतवन्तः । अथवा संप्रत्येव तत्कर्म कार्यन्ते अन्तर्भावसिद्ध्यर्थं लब्धान्तरा आगत्य कथयिष्यन्ति॥ २६० ॥

तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः ॥
चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् ॥ २६१ ॥

तथाद्यैरपि **चारै**स्तत्कर्मकारिभिरनेकसंस्थानैः ॥ २६१ ॥

तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्वतः ॥
कुर्वीत शासनं राजा सम्यक् सारापराधतः ॥ २६२ ॥

न हि दण्डादृते शक्यः कर्तुं पापविनिग्रहः ॥
स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ ॥ २६३ ॥

सभा प्रपापूपशालावेशमद्यान्नविक्रयाः ॥
चतुष्पथाश्चैत्यवृक्षाः समाजा प्रेक्षणानि च ॥ २६४ ॥

---

१ ग-र-यथा । २ ग-र-तद्वितः ।

जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च ॥
शून्यानि चाप्यगाराणि वनान्युपवनानि च ॥ २६५ ॥
एवंविधान्नृपो देशान्गुल्मैः स्थावरजङ्गमैः ॥
तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत् ॥ २६६ ॥
तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः ॥
विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः ॥ २६७ ॥
भक्ष्यभोज्योपदेशैश्च ब्राह्मणानां च दर्शनैः ॥
शौर्यकर्मापदेशैश्च कुर्युस्तेषां समागमम् ॥ २६८ ॥
ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये ॥
तान्प्रसह्य नृपो हन्यात्समित्रज्ञातिबान्धवान् ॥ २६९ ॥
न होढेन विना चौरं घातयेद्धार्मिको नृपः ॥
सहोढं सोपकरणं घातयेदविचारयन् ॥ २७० ॥
ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः ॥
भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत् ॥ २७१ ॥
राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव चोदितान् ॥
अभ्याघातेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम् ॥ २७२ ॥
यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः ॥
दण्डेनैव तमप्योषेत्स्वकाद्धर्माद्धि विच्युतम् ॥ २७३ ॥
ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने ॥
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः ॥ २७४ ॥

शक्तौ सत्यामालस्यादिना ते निर्वास्याः । ये तु चौरैः कृतसंकेतास्तेषां पूर्वत्र वध उक्तो घातयेदिति । परिच्छदो गवाश्वादिः । तदपि निर्वास्येनापहर्तव्यं नासत्परिच्छदः कर्तव्यो धनं तु हर्तव्यम् ॥ २७४ ॥

राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान् ॥
घातयेद्विविधैर्दण्डैररीणां चोपजापकान् ॥ २७५ ॥

कोशो राज्ञां धनसंचयस्थानं तत्रापहर्तारो द्रव्यजातिपरिमाणामपेक्ष्यैव वध्याः । ये च प्रतिकूल्येन वर्तन्ते यद्राज्ञां देशान्तरादानेतुमभिप्रेतं तद्देशदुर्लभमाजानेयाश्वादि प्राच्यानामुदीच्यानां कलिङ्गदेशोद्भवहस्त्यादि तदानयनप्रतिबन्धे ये वर्तन्ते । तथा यानि

१ क-षा ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मित्राणि तानि शत्रून्कुर्वते कृत्वा शत्रुभिः संयोजयन्ति । अरीणामुपजापकाः प्रोत्साहकास्तान् घातयेत् स्वतन्त्रप्रयोजनत्वान्नावश्यं घातनमित्युक्तम् ॥ २७५ ॥

सन्धिं भित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः ॥
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् ॥ २७६ ॥

अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे ॥
द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥ २७७ ॥

ग्रन्थिं भिनत्तीति ग्रन्थिभेदः । भेदनं मोक्षो ग्रन्थेर्वस्त्रप्रान्तादौ ग्रन्थिः । यद्वा यद्द्रव्यं गृहीतं तत्केनचिच्छलेन ग्रन्थिमवमोच्य ये निनीषन्ति ते ग्रन्थिभेदाः । तेषां प्रथमायां प्रवृत्तावङ्गुलीनां च्छेदः । द्वितीयस्यां प्रवृत्तौ हस्तचरणयोस्तृतीयस्यां मारणम् ॥ २७७ ॥

अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान् ॥
संनिधातॄंश्च मोषस्य हन्याच्चौरमिवेश्वरः ॥ २७८ ॥

सीतापनोदनाद्यर्थं येऽग्निं ददति शस्त्रं कर्तरिकादि मोक्षस्य सन्निधातारः कर्तारः सर्वे चौरवत् ज्ञेयाः । शस्त्रावकाशदग्रहणं प्रागुक्तमप्युपसंहारार्थमुच्यते ॥ २७८ ॥

तडागभेदकं हन्यादप्सु शुद्धवधेन वा ॥
यद्वाऽपि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम् ॥ २७९ ॥

तडागग्रहणमुपलक्षणार्थं । नद्युदकहरणेऽप्ययं दोष इति केचित् । तदयुक्तं । महान्हि तडागभेदनेऽपराधः । स्वल्पो नदीभेदने । तडागस्य हि वप्रभेदनेनोदकेऽप्ययमेव विधिः ॥ २७९ ॥

कोष्ठागारायुधागारदेवतागारभेदकान् ॥
हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् ॥ २८० ॥

यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत् ॥
आगमं वाप्यपां भिद्यात्स दाप्यः पूर्वसाहसम् ॥ २८१ ॥

समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ॥
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ॥ २८२ ॥

राजमार्गे ग्रामनगरे रथ्यायाममेध्यं मूत्रपुरीषं समुत्सृजेदन्यतो वाऽऽनीय चण्डालादिर्निक्षिपेत् । अनापदि आपद्वेगेनात्यर्थमुक्तं भवति । चण्डालादेर्मूल्यं दत्वाऽपासयेत्स्वयं वाऽन्यासंभवे ॥ २८२ ॥

---

१ ण-र-शत्रूननुकुर्वन्ति । २ फ-च ।

For Private And Personal Use Only

आपद्गतोऽथवा वृद्धा गर्भिणी बाल एव वा ॥
परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः ॥ २८३ ॥

आपद्गतः पूर्वोक्तः । वृद्धादयो ये बहिर्ग्रामं निर्गन्तुमशक्ता गृह्यन्ते शोणितमपि कर्तुमित्याशङ्क्यन्ते मेध्यमपि व्यपदेष्टुं न पुनरेवं कर्तव्यं । पुनः करणे राजतो महान्प्रत्यवायो भवति । क्रोधगर्भमीदृशवचनं **परिभाषणं तच्च शोध्यमिति** राज्ञ उपदेशः । यद्युत्स्रष्टारो न ज्ञायन्ते तथा च रथ्याचण्डालादिभिरपासनीया ॥ २८३ ॥

चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः ॥
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥ २८४ ॥

चिकित्सका भिषजस्तेषां **मिथ्याप्रचाराणा**मौषधदानमुभयथा संभवति । यदि वाऽविज्ञातशास्त्रप्रयोगतया शास्त्रे परिचितेऽपि वाऽनन्यरतयाऽर्थलिप्सयाऽमानुषेषु गवाश्वहस्त्यादिषु प्रथमः साहसशब्दोऽनुषक्तव्यः । एवं **मानुषेषु तु मध्यम इति** । तथा प्रचारेण यद्यश्वेव विपद्येत तदा महान्दण्डः कल्पनीयः ॥ २८४ ॥

संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः ॥
प्रतिकुर्याच्च तत्सर्वं पञ्च दद्याच्छतानि च ॥ २८५ ॥

येन संक्रामन्ति मार्गेणावतरन्ति जलोपस्पर्शादिना निमित्तेन शुभ्रं वासः संक्रमध्वजचिन्हं राजामात्यादीनां देवायतनेषु च यष्टिः । ईदृशे च । **प्रतिमानामिति** व्याख्यातं । **प्रतिकुर्यात्समद**धीताप्रत्यापत्तिं नयेत् ॥ २८५ ॥

अदूषितानां द्रव्याणां दूषणे भेदने तथा ॥
मणीनामपवेधे च दण्डः प्रथमसाहसः ॥ २८६ ॥

यानि स्वयमदुष्टानि द्रव्याणि लाभार्थी दूषयति तथा धान्यविक्रयी क्षेत्रे निर्दोषं धान्यमुत्तमं तृणतुषैर्योजयति कुंकुमादेश्च तेन कुंकुमादिना द्रव्यान्तरेणैकीकरणं मणयो मुक्तास्तेषां भेदनं द्विधाकरणं । अत्र वेधतिर्भेदने विद्यते । अनेकार्थत्वाद्धातूनां विधते रूपमेतत् । मणयो हीनमध्यमोत्कृष्टतमा भवन्ति । तत्र दण्डकल्पना कर्तव्या । मध्यमेषु मध्यम उत्तमेषूत्तमः ॥ २८६ ॥

समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा ॥
समाप्नुयाद्दमं पूर्वं नरो मध्यममेव वा ॥ २८७ ॥

येषां द्रव्याणां समत्वेन विनिमय उक्तो यथा "तिला धान्येन तत्समा" इति । तत्र यदि विषममाचरति व्यवहारार्थं तिलं दत्वा बहुधान्यं व्रीह्यादि गृह्णीयादसति वा

---

१ ण-र-प्रत्यापत्तिं । २ ण-र-साहसं ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनिमये मूल्यतः क्रयव्यवहारेण व्रीह्यादिधान्येभ्योऽधिकेन मूल्येन क्रीणाति । अथवा कस्यचिदुत्तरीयमुपबर्हणमस्ति विक्रेतव्यं कस्यचिदन्तरे शाटकास्तत्र यस्योपबर्हणमस्ति तस्यान्तर उपयुज्यन्ते उपबर्हणेन च ते सममूल्यांस्तत्र तदीयां कार्यवत्तां ज्ञात्वा समत्वेन ददात्यधिकमूल्यं गृह्णाति स उच्यते समैर्विषमं चरति । मूल्येन तयोः क्रेतुर्विक्रेतुश्च तौ दण्डौ चरति मूल्यत इत्येकार्थस्तथैव वाशब्दोऽस्मिन्पक्षे पादपूरण एव । प्रथममध्यमोक्तौ क्रयविक्रयौ विकल्पितौ द्रव्यसारापेक्षया ॥ २८७ ॥

बन्धनानि च सर्वाणि राजा मार्गे निवेशयेत् ॥
दुःखिता यत्र दृश्येरन्विकृताः पापकारिणः ॥ २८८ ॥

प्रसिद्धे राजरथ्याप्रदेशे बन्धगृहाणि संनिवेशयेत्कुर्यात् । दुःखिता यत्र दृश्येरन्नित्यन्यत्रापि संनिवेशनं तत्प्रदेशभ्रमणं दर्शयति । एतेनान्या अपि बन्धसंस्थानां पीडाः कर्तव्या इत्याह । शरीरात्यन्तकार्श्यावस्थांतरापत्त्या विकृता अभोजनेनैपद्भोजनादिना । शेषं स्पष्टम् ॥ २८८ ॥

प्राकारस्य च भेत्तारं परिखाणां च पूरकम् ॥
द्वाराणां चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥ २८९ ॥

दुर्गतानां प्राकारादीनां विनाशने प्रवासनं दण्डः । परिखा भूभागाः खाताः ॥ २८९ ॥

अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः ॥
मूलकर्मणि चानाप्तैः कृत्यासु विविधासु च ॥ २९० ॥

अदृष्टेनोपायेन मन्त्रादिशक्त्या मारणमभिचारः । तत्र प्रवृत्तानाममृतेऽभिचारणीये दण्डोऽयं अनभिचारणीयाभिचारेषु नैतावतामुच्यते । तत्र मनुष्यमारणदण्डः स विज्ञेयः । सर्वग्रहणं लौकिकवैदिकयोरविशेषेण दण्डार्थं । वैदिका श्येनादयः । लौकिकाः पादपांशुग्रहणसूचीभेदनादयः । मूलकर्म वशीकरणादि । आप्ताः पौत्रभार्यादयस्ततोऽन्येऽनाप्ताः । कृत्या अभिचारप्रकारा एव मन्त्रादिशक्तय उच्चाटनसुहृद्बन्धुकुलाद्धि विचित्रीकरणादिहेतवो भूताद्याधराः प्रसिद्धाः ॥ २९० ॥

अबीजविक्रयी चैव बीजोत्कृष्टा तथैव च ॥
मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम् ॥ २९१ ॥

अबीजं बीजमित्युक्त्वा विक्रीणीते स्वरूपलोपेन धान्यशाकादीनां बीजानि चिरप्रोषितानि क्षेत्रे प्ररोहन्ति न च तानि शक्यन्ते वन्ध्यानीति । क्षेत्रात्तु बीजं यत्कर्षति

---

१ ण-र-सममूल्ये । २ ण-र-राजमार्गे ।

* **एतेनैव तु कर्माणि श्रान्तः श्रान्तः पुनः पुनः ॥**
कर्माण्यारभमाणं तु पुरुषं स्त्री निषेवते ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शोभनं यद्बीजं क्षिप्रं प्ररोहति तदुत्कृष्य तदाभासं प्रतिधान्यादि क्षिप्त्वा विक्रीणीते। अथवा न्युप्तं बीजं क्षेत्रादेवोद्धृत्य नयन्ति मर्यादा शास्त्रदेशाचारनिरूढा स्थितिः। विकृतं कर्णनासादिकर्तनम् ॥ २९१ ॥

सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः ॥
प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः ॥ २९२ ॥

यावन्तः केचन कण्टकाः पूर्वमुक्तास्तेषां पापतमः सुवर्णकारः। यदि निर्धारणे षष्ठी। कथं न "न निर्धारण" इति समासाभावः। तस्य च पापतमत्वं स्वरूपेणैवापहरणेन महत एनसोत्पत्तिर्ब्राह्मणस्वर्णापहरणे च महापातकमतस्तमन्याये प्रवर्तमानं छेदयेत्खण्डशः परिवर्तनतुलान्तरतापच्छेदादिभिः। अपहरन्ति गृह्णते न चात्र ह्रियमाणद्रव्यपरिमाणापेक्षा न स्वामिजात्यपेक्षा अभ्यासस्त्वपेक्ष्यत इति महत्त्वाद्दण्डस्यान्याये तु प्रवृत्तौ धनदण्डेन क्षुरमांसलवच्छेदो विनिर्मातव्यः। शारीरनिग्रहे निगृह्यमाणानां पापमपैतीति प्रतिपादितम् ॥ २९२ ॥

सीताद्रव्यापहरणे शस्त्राणामौषधस्य च।
कालमासाद्य कार्यं च राजा दण्डं प्रकल्पयेत् ॥ २९३ ॥

कृष्यमाणा भूमिः सीता तद्द्रव्याणि लाङ्गलकुद्दालकादीनि। तदपहरणे दण्डः प्रकल्प्यः। किं इच्छयैव। नेत्याह। कालमासाद्य कार्यं च कर्षणकाले प्रत्यासन्ने महान् दण्डः। अकृष्टे च यदा तस्मिन्महतः फलस्य नाशस्तदा भूयानेव। आसाद्यासन्नं ज्ञात्वेत्यर्थः। अन्यदा तु द्रव्यज्ञानाद्यनुरूपः। एवं शस्त्राणां च खड्गादीनां युद्धकाले औषधस्य भेषजार्थमुपयोगकाले तेन चौषधेन ह्रतेनानुपयुक्तेन यद्यातुरस्य महती पीडा जायतेऽन्यच्च तस्मिन्काले न लभ्यते तल्लभ्यमपि बाधकादिसंस्कारापेक्षया चिरेणोपयोगार्थमेवमाद्यपेक्षा राजदण्डप्रकल्पनायै प्रभवेत्। शस्त्राणां राजोपकरणानां। अन्यथापि जनपदस्य भ्रातृव्यतस्कराशङ्किनस्तदा महान्दण्डः। स्वस्पे स्वल्पः ॥ २९३ ॥

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥ २९४ ॥

समाप्तायां कण्टकशुद्धौ केवलं राज्यतन्त्रोपयोगी राजधर्म उच्यते। यथैतास्मिन्ननुष्ठीयमाने राज्यानाशः। एवं व्यवहारदर्शने कण्टकशुद्धौ वा क्रियमाणायां तुल्यो राज्यानाशः। किं च महिषीकुमारराजवल्लभसेनाध्यक्षाश्रिताः प्रायेण भवन्ति कण्टकास्तान् कदाचिदनया बुद्ध्या नोद्धरेत् प्रकृतक्षोभशङ्कायां महत्तमप्रयोजनं। सेनाध्यक्षेण साम-

१ ण-र-भूतविद्या। २ ण-र-मंतव्यः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तेन च किमनेन निगृहीतेन राष्ट्रापराधिना तदर्थमुच्यते तुल्यं राष्ट्रं स्वाम्यादिति राज्यप्रकृतित्वेन तत्परिहर्तव्यं राष्ट्रं ततो दुर्बलान्केनचिदुपायेन वा योधयित्वा कण्टकशुद्धिं करिष्यामीति न सहसा प्रवर्तितव्यं । अतः सप्तमाध्यायोपदेशतोऽप्युत्क्रम्यास्मिन्नवधाबुध्यते । स्वामी राजैव अमात्यो मन्त्रिपुरोहितः । सेनानी पुरं निवासनगरं राष्ट्रं जनपदाः कोशो रूप्यसुवर्णरूपकादिधनसंचयः हस्त्यश्वरथपादातं दण्डः धर्मदंडादिव सुहृत्समानकार्यः । यथोक्तं "मित्रं तस्मादनन्तरमिति" । **एता राज्यस्य प्रकृतयः** कारणमवयवा यथा घटस्य कापालिनि । स्वभाववचनो वा प्रकृतिशब्दः । एवं तदात्मकमेव राज्यं समस्तं क्षिप्रं । अस्यैव भेदो विस्तारो द्वासप्ततिस्तत्रापि योज्यो भेदः स उक्त एव ॥ २९४ ॥

सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम् ॥
पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत् ॥ २९५ ॥

मित्रव्यसनात्स्वबलव्यसनं गरीयः । स्वबलसंपन्नो हि शक्नोति मित्रमनुग्रहीतुं । एवं दण्डात् कोशः कोशनाशे हि दण्डोऽपि नश्यत्येव । एवं कोशराष्ट्रं । राष्ट्रनाशे हि कुतः कोशोत्पत्तिः । पुनः राष्ट्राविनाशकार्यं पुरं यत्नतो रक्षितव्यं । तत्र हि सर्वावयवसाधनादि संभवति । पुरादमात्यः प्रधानं प्रधानादमात्यनाशे हि सर्वं बलं भज्यते । आत्मनाशे सर्वनाश इत्येत्प्रसिद्धमेव तदुक्तं "आत्मा तु सर्वतो रक्ष्य" इति ॥ २९५ ॥

सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत् ॥
अन्योन्यगुणवैशेष्यान्न किंचिदतिरिच्यते ॥ २९६ ॥

काचित्प्रकृतिरधिकेत्यर्थः । एवं प्रकृतिनाशे सर्वनाशः तथा च दृष्टान्तः । **विष्टब्धस्य त्रिदण्डवदि**त्यवष्टब्धस्यान्योन्यस्याधारभावेनैतदेवाह । **अन्योन्यगुणवैशेष्यात्** परस्परस्योपकार्योपकारकाभावेनैकैकस्य विनाशोत्पत्तेः भूमिबीजोदकसामग्र्यां इव अंकुरजनने तस्मात्सर्वेषां तुल्यताऽत्रोच्यते । अस्त्वेवात्र गुरुलघुभावः । यत्तु **न किंचिदतिरिच्यत** इति तदनादरेण मित्रादिरक्षायां वर्तितव्यमित्येवंपरमेतत् । मित्रनाशेऽचिरेण राज्यनाशो यथा बलवतोपरोधो न तु तदानीमेवेत्यलं वल्लघीयस्तायाः ॥ २९६ ॥

तेषु तेषु तु कृत्येषु तत्तदङ्गं विशिष्यते ॥
येन यत्साध्यते कार्यं तत्तस्मिन् श्रेष्ठमुच्यते ॥ २९७ ॥

नास्ति सद्वस्तु यैद्राज्ञो नोपयुज्यते । भवति हि तत्कार्यं यन्निकृष्टेन साध्यते न

---

१ ण-र-योन्यो । २ ण-र-राष्ट्रस्यासां यथा क्रमः । ३ ण-र-पितृ । ४ फ-गृह्णीयात् । ५ ण-र-अमात्यः । ६ फ-श्र । ७ ण-र-भावमस्थितां एतदेवा । ८ फ-विशोमेपश्यति । ९ फ-सामग्र्येन कुंजर । १० फ-पूज्यताम् । ११ फ-स्थे । १२ ण-र-न चिरेण । १३ फ-आलंबनरूपीयस्त्वया । १४ फ-परा हि । १५ ण-र-प्राज्ञो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महता । तस्मात्सर्वाः प्रकृतयो यत्नतः पालनीयाः । असद्दण्डादिना न राष्ट्रं कर्शनीयं । चोराद्युपद्रवेभ्यश्च यत्नतो रक्ष्यमिति तात्पर्यार्थः । अतः कण्टकशुद्धिशेषोऽयम् ॥ २९७ ॥

चारेणोत्साहयोगेन क्रिययैव च कर्मणाम् ॥
स्वशक्तिं परशक्तिं च नित्यं विद्यात्परात्मनोः ॥ २९८ ॥

परस्यात्मनश्च नित्यं शक्तिं विद्यात् । किमयं प्रारिप्सते । किंच मर्मं कर्तुं शक्तिः किं चाहमस्मिन्निति एतन्नित्यं वेदितव्यं । कथं चैतच्छक्यते वेदितुं **चारेण** सप्तमाध्यायोक्तेन । **उत्साहयोगेन** दानादिपरितोषिता उत्साहेन युज्यन्ते । संपन्नकृष्यादिफलाश्च **क्रिययैव च कर्मणां** । कर्माणि वा निवेशादीनि । तदारंभेन शक्तिमान् रिपुरवगम्यते । तानि ह्यर्थसंपत्कराणि ततः सामर्थ्योत्पत्तेः ॥ २९८ ॥

पीडनानि च सर्वाणि व्यसनानि तथैव च ॥
आरभेत ततः कार्यं संचिन्त्य गुरुलाघवम् ॥ २९९ ॥

पीडनानि नरकदुर्भिक्षपातादीनि । तथाऽवर्षादिवर्षपर्जन्यमूषिकशलभाशनिप्रभृतयः **व्यसनानि** कामक्रोधसमुत्थानि । स्वपुत्रसंप्रासदैवविघटनयोपन्यासेन वा । तथापि न नित्यमुत्साहेन भवितव्यं । अथवा न संतोषिणा भवितव्यं । अथ तावत्षाड्गुण्यचिन्ता अन्वाहिकी चायव्ययौ कयाचिन्मात्रया गतौ च राष्ट्रवृत्तं प्रकृतिसमहीतं चरमुखादवधृतम् ।

आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः ॥
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥ ३०० ॥

कर्मसूद्युक्तः पुरुषः श्रिया युज्यते इति सिद्धानुवादः । यद्यपि कुतश्चित्कर्मणोऽनुष्ठितात्कथंचित्फलं न संप्राप्तं तथापि निरुत्साहे न भवितव्यम् । अथवा न संतोषेणान्वितव्यमाद्यातवत्षाड्गुण्यचिन्ताकृता । आन्वाहिकायव्ययौ कथाचिन्मात्रयोपगतो राज्यवृत्तं प्रकृतिसमीहितं चरमुखादवाप्तं गीतादिसुखानुभवव्यापारान्तरेण वा पुनः कर्माणि वेदितव्यानि । पुरुषग्रहणं तिष्ठतु तावद्राजानोऽपि जनपद उद्योगश्रियोपचीयन्ते एतदुक्तम् " आमृत्योः श्रियमन्विच्छेत् " इति ॥ ३०० ॥

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च ॥
राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते ॥ ३०१ ॥

---

१ फ–महीपतिः । २ ण–र–परस्परात्मनश्च । ३ फ–मयि । ४ फ–शक्तः । ५ ण–र–प्रचारं मण्डलस्येत्यत्र प्रयुक्तं । ६ ण–र–शून्य विवेशादिनि । ७ ण–र–शक्तियोपुनरवगम्यते । ८ ण–र–त्तिः । ९ ण–र–वा । १० ण–र–मरक । ११ फ–पर्यय । १२ ण–र–व्यसनानिकामक्रोधसमुत्थानि ।स्वपरात्मनोः संचित्य तथा गुरुभावः तयो कस्यैतद्गुरु कस्याल्पमिति । तत आरभेत कार्यं । संदविग्रहादिनैवमेव । १३ ण–र–चैव विघटनापत्यासेम नवा । १४ फ–विपर्येषु भावने । १५ ण–र–गुरुग्रहणं १६ अध्याय श्लो० १३७ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतश्च कर्मारंभपरेण भवितव्यं । अनारंभी कलिः स्यात्स च महान्दोषः । न चैवं मन्तव्यं राज्ञा कलिर्नाम कालविशेषं इतिहासप्रसिद्धः । कथमहं स्यामिति यतो राज्ञो वृत्तानि सर्वाण्येतानि युगानि तदुत्तरेण निर्दिश्यते ॥ २०१ ॥

कलिः प्रसुप्तो भवति सजाग्रद्द्वापरं युगम् ॥
कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ॥ २०२ ॥

अनुत्थानशीलः प्रसुप्तः कलिर्भवति। जानानश्चोत्कर्षाभ्युपायानातिष्ठन्सजाग्रद्द्वापरं भवति । व्यवसितकर्मप्रयोगस्त्रेतायुगं भवति । विश्वस्य सर्वरूपाणि यथाशास्त्रं कर्मफलसंपादात्कृतंयुगं भवति ॥ २०२ ॥

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च ॥
चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ॥ २०३ ॥

तेजः शुक्रं कार्ये सामर्थ्यमित्यर्थः ॥ २०३ ॥

वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति ॥
तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥ २०४ ॥

नात्र प्रकरणे मासनियमोऽभिप्रेतः । केवलं चतुर्षु मासेषु सन्ततवर्षी पर्जन्यो भवति । अतः सन्ततं सर्वकालं स्वराष्ट्रं कामैः पूरयेदित्युक्तं भवति । तथा कर्तव्यं यथा स्वराष्ट्रिया अनुरक्ता भवन्ति ॥ २०४ ॥

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः ॥
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥ २०५ ॥

स्तोकं स्तोकमपि रसमीपत्तापेनादत्ते यथाऽऽदित्यस्तथा करमादद्यादित्येष उपमार्थः ॥ २०५ ॥

प्रविश्य सर्वभूतानि यथा चरति मारुतः ॥
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥ २०६ ॥

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ॥
तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ॥ २०७ ॥

अपराधेन प्रियद्वेष्ययोर्निग्रहसमत्वेन वर्तितव्यम् ॥ २०७ ॥

वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते ॥
तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ॥ २०८ ॥

---

१ ण-र-विकलं सुकृतं युगम् । २ फ-विशेषत । ३ ण-र-द्दे । ४ फ-दि । ५ ण-र-विकृतं सुकृतं युगम् । ६ फ-ष्टान । ७ ण-र-मपीडयन्नी षत्तापेन ।

For Private And Personal Use Only

अवशङ्किता एव कार्यकारिणो निग्रहीतव्या यथा न पलायन्ते ॥ ३०८ ॥

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः ॥
तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः ॥ ३०९ ॥

अक्रोधनेन प्रसाधनालङ्कारवता प्रत्हृष्टवदनेन प्रजादर्शनकाले भवितव्यं । निर्वाता[1] आपन्नपरितापा भवन्तीत्यर्थः ॥ ३०९ ॥

प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु ॥
दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतम् ॥ ३१० ॥

भृशमुद्वेजनीयो दुष्ट इत्याग्नेयव्रतं । सामन्ता अमात्या एव बहुसाधनयुक्ताः॥३१०॥

यथा सर्वाणि भूतानि धरा धारयते समम् ॥
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥ ३११ ॥

धरा पृथ्वी । तद्वद्दीनानाथाश्च वंशाश्च भरणीयाः ॥ ३११ ॥

एतैरुपायैरन्यैश्च युक्तो नित्यमतन्द्रितः ॥
स्तेनान्राजा निगृह्णीयात्स्वराष्ट्रे पर एव च ॥ ३१२ ॥

उपसंहारः श्लोकः । एतैर्देवव्रतैरन्यैर्लोकतोऽवगम्यैः ॥ ३१२ ॥

परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत् ॥
ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम् ॥ ३१३ ॥

यः क्षीणकोशो बलीयसा च राज्ञा दण्ड्यते तथापि न ब्राह्मणधनमप्यापदि ग्रहीतव्यं । न चावज्ञानादिना प्रकोपनीयाः ॥ ३१३ ॥

यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिः ॥
क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान् ॥ ३१४ ॥

प्रागुक्तार्थसिद्धये ब्राह्मणमाहात्म्यं इतिहासं लोकप्रसिद्धमनुवदति । एवमर्थेप्याख्यानानि महाभारतादवगमयितव्यानि ॥ ३१४ ॥

लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः ॥
देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्स मृध्नुयात् ॥ ३१५ ॥

क्षिणोति छादयति तदविशेषात्स्मृतीनां क्षिण्वन्हि संक्षेपोऽप्युत्तमानामेवेति युधिष्ठिरेण गाण्डीवे विक्षिप्ते व्यासमुनिना दर्शितम् ॥ ३१५ ॥

यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा ॥
ब्रह्म चैव धनं येषां को हिंस्यात्ताञ्जिजीविषुः ॥ ३१६ ॥

---

१ ण-र-निर्वातपरितापाभवन्तीत्यर्थः । २ फ-ध्नि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकास्त्रयः पृथिव्यादयः। **देवा** आहुतिद्वारेण ब्राह्मणोपाश्रिताः। अध्यापनाधिक्येन कर्मबहुत्वेन ब्राह्मणो देवानामाश्रयो न तथा क्षत्रियवैश्यौ ॥ ३१६ ॥

अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ॥
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ ३१७ ॥

जातिमात्राश्रयाणामनवज्ञानं न विद्वत्तामपेक्षेत । नादिक्रियास्विव यथा चैतन्न पादतः कुर्यादित्यग्नौ ॥ ३१७ ॥

श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति ॥
हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ॥ ३१८ ॥

गतार्थोऽयं दुराचारोऽप्यविज्ञेय इत्यर्थः ॥ ३१८ ॥

एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु ॥
सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥ ३१९ ॥

अनिष्टेषु प्रतिषिद्धेषु वर्तमाना मृदूपकर्मैर्यथाशास्त्रं दण्ड्या न सहसाऽऽक्रम्य वर्णान्तरवत् ॥ ३१९ ॥

क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः ॥
ब्रह्मैव सन्नियंतृ स्यात्क्षत्रं हि ब्रह्मसंभवम् ॥ ३२० ॥

क्षत्रियस्य ब्राह्मणान्प्रतिबाधितुं प्रवृत्तस्य ब्राह्मणा एव **संनियन्तारः**। श्रीमदावलिप्तावस्थामङ्गेन वर्तमानाः क्षत्रिया जपहोमादिशापादिना ब्राह्मणैर्मार्गे व्यवस्थाप्यन्ते । अत्र हेतुः **क्षत्रं ब्रह्मसंभवं** ब्राह्मणजातेः सकाशात्क्षत्रियाणां संभवः । अत्रार्थवाद एवायं ॥ ३२० ॥

ननु यो यस्योत्पत्तिहेतुर्नासौ तस्य नाशकः । नैवं

अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ॥
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ ३२१ ॥

अद्भ्य ओषधिवनस्पतिभ्य एव जायत इत्येवमग्निरद्भ्य एव उत्पन्नस्तस्य **सर्वगं तेजः** सर्वदाह्यं दहति तेजसाऽभिभवति अपः प्राप्य तदस्य तेजः शाम्यति । अश्मनो लोहं खड्गादि तेन सर्वं विदार्यते अश्मसंपातात्स्फुटति । एवं क्षत्रियाः सर्वजिगीषवो विजयन्ते ब्राह्मणेषु चेदौद्धत्येन वर्तन्ते तदा विनश्यन्ति ॥ ३२१ ॥

नाब्रह्मक्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ॥
ब्रह्म क्षत्रं च संपृक्तमिह चामुत्र वर्धते ॥ ३२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्क्षत्रियब्राह्मणरहितं राज्यं मन्त्रिपुरोहितादयो यत्र न ब्राह्मणास्तत्र कुतः समृद्धिः । एवं ब्राह्मणा अपि राजोपाश्रिताः कुतः संपत्तिं लभन्ते । उभौ युक्तौ जगज्जयतः । ब्रह्मक्षत्रशब्दौ ब्राह्मणक्षत्रियजातिवचनौ ॥ ३२२ ॥

दत्वा धनं तु विप्रेभ्यः सर्वदण्डसमुत्थितम् ॥
पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे ॥ ३२३ ॥

यदा तु रजसाऽभिभूयेत कृतकृत्यः स्यात्तदा वसुनि धने सति **सर्वदण्डसमुद्भूतं** ब्राह्मणेभ्यो दद्यात् । महापातकिधनस्य वरुणाय प्रतिपादनमुक्तं न राज्ञा तद्गृहीतव्यं । अन्यत्तु दण्डधनं राज्ञा दृष्टादृष्टकार्यार्थवादाद्बहुधनमस्ति प्रयाणकालश्च तदा सर्वस्यायं विनियोगः । अन्ये तु दण्डग्रहणं करशुल्कादीनामपि प्रदर्शनार्थं व्याचक्षते । तथा सति सर्वस्वं दद्यादित्युक्तं भवति । वाहनायुधभूमिपुरुषवर्जं सर्वं दातव्यं । एवं तु व्याख्या[1] 'पुत्रे राज्यं समासाद्य इति' न घटते । न हि तस्य कोशस्य राजकरणसंभवः । **कुर्वीत प्रायणं रणे** आत्मत्यागे संग्रामं कुर्यात् । यदि कथंचिदन्त्यावस्थायां रणं नोपलभेत तदाग्न्युदकादिना शरीरं जह्यात् । फलातिशयसंपत्तिस्तु रणे समासं जनमारोपणम् ॥ ३२३ ॥

एवं चरन्सदा युक्तो राजधर्मेषु पार्थिवः ॥
हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत् ॥ ३२४ ॥

एवं चरन्विहरन्राजधर्मेषु यथाशास्त्रोपदिष्टेषु तदायुक्तस्तत्परः लोकेभ्यस्तत्परः लोकेभ्यः स्वराष्ट्रीयेभ्यो हितेषु सर्वान्भृत्यान्नियोजयेत् ॥ ३२४ ॥

एषोऽखिलः कर्मविधिरुक्तो राज्ञः सनातनः ॥
इमं कर्मविधिं विद्यात्क्रमशो वैश्यशूद्रयोः ॥ ३२५ ॥

आद्येनानेन शूद्रेण कण्टकशुद्धिपर्यन्तो राजधर्म उपसंह्रियते । द्वितीयेन वैश्यशूद्रयोरुपचारे चेत्युक्तमनुस्मारयन्ति ॥ ३२५ ॥

वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम् ॥
वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे ॥ ३२६ ॥

कृतसंस्कार उपनीतः कृतविवाहश्च । **वार्तायां** वक्ष्यमाणकालसमुदायो वार्ता । तत्र **नियुक्तः** स्यात् । यथा बार्हस्पत्ये वार्ता समुपदिष्टा ॥ ३२६ ॥

प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ॥
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥ ३२७ ॥

---

१ ण-र-धर्मं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पशुरक्षणं वैश्यस्य न केवलं जीविका यैर्योवद्धर्माय प्रीतिं दर्शयत्यर्थवादेन। कथं पुनर्दृष्टे सत्यदृष्टमुक्तं प्रजापालनत्वाश्रियमात्परिपालनीयं त्वयेति नियोगपरिदानं क्षत्रियस्य प्रजापालनेऽधिकारो निरूपितः ब्राह्मणस्य प्रायश्चित्तोपदेशादिना जपहोमादिना च "आदित्याज्जायते वृष्टिः" इति सर्वाधिकारः । दृष्टान्तार्थं चैतत् । तथैव धर्म एव वैश्यस्य पशुरक्षणादिः ॥ ३२७ ॥

न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ॥
वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन ॥ ३२८ ॥

ननु को जीवितार्थे कामः यदुक्तं यद्यप्यदृष्टं तदा दृष्टाश्रितमेव भोजने प्राङ्मुखतायामिव तत्र कथंचिदिदमुच्यते। **न च वैश्यस्य कामं स्यादिति** न ह्यबुभुक्ष्यमाणः[1] प्रत्यवैति। सत्यमेव कृष्टाविकृष्टं पाशुपाल्यमिति ज्ञापयितुं । कश्चिन्मन्यते सर्वाण्येतानि नियमार्थानि तुल्यफलानीति। तत्र तुल्यफलत्वे च पक्षेऽकामोऽपि स्यात्कर्मान्तरं कामयमानस्य यदा त्वन्येभ्यो गुणवत्तरो यदा तदा तु तेनाजीवेन्न कर्मान्तरे प्रकृतिः। अत एव तदालंबनो जीवेत् ॥ ३२८ ॥

मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च ॥
गन्धानां च रसानां च विद्यादर्घबलाबलम् ॥ ३२९ ॥

लोहशब्देन ताम्रायस्कांस्यान्याह । अर्घबलाबलं न्यूनताऽर्घस्य न्यूनताधिक्ये देशकालापेक्षे। कस्मिन्देश इदं महार्घं कस्मिन्वाऽपचितार्घमेवं कालेऽपि ॥ ३२९ ॥

बीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च ॥
मानयोगं च जानीयात्तुलायोगांश्च सर्वशः ॥ ३३० ॥

इदं बीजं विस्तृतमुच्यत इदं संहतमुच्यत इत्येनामुप्तिं विद्यात्। इदं बीजमस्मिन् क्षेत्रे प्ररोहतीदं न इदं च बलवत्फलति एवमादयो गुणदोषाः द्रोणशूर्पादिकादयो मानविशेषास्तेषां योगा ये हस्तेन मीयन्ते ॥ ३३० ॥

सारासारं च भाण्डानां देशानां च गुणागुणान् ॥
लाभालाभं च पण्यानां पशूनां परिवर्धनम् ॥ ३३१ ॥

भाण्डशब्देन विक्रेयं वस्त्राजिनान्युच्यन्ते। तत्र **सारासारता** यत्कालान्तरे स्थितं च न नश्यति तत्सारं तदितरदसारं । अस्मिन्देशे व्रीहयो भूयांसो अस्मिन्काले यवा अस्मिन्नीदृश आचार ईदृशो जानपदानां स्वभाव एवमादयो **देशे गुणागुणाः**। अनेन च यवसेनेदृशेन च लवणेनास्मिन्काले प्रयुक्तेन पशवो वर्धन्त इति ॥ ३३१ ॥

---

१ ण-र-बुभुज्यमाना।

For Private And Personal Use Only

भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणाम् ॥
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च ॥ ३३२ ॥

भृत्या दासा प्रेष्यादयः । गोपालाजपालमहामात्राद्यास्तेषां च कियती भृतिरिति **विद्यात्** । मालवकमगधद्रविडादिदेशभाषाः एतद्देशा अस्मिन्नर्थे ईदृशमुच्चारयन्ति इदं द्रव्यमेवं स्थाप्यत एवं संवर्तत एवमाव्रियतेऽनेन योज्यत इयता विक्रीयते ॥ ३३२ ॥

धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम् ॥
दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः ॥ ३३३ ॥

बहु अन्नं दातव्यमित्यर्थः । अन्यथा राज्ञा दण्ड्यः । एवमर्थमत्रोच्यते महाधनस्य चैतत् ॥ ३३३ ॥

विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम् ॥
शुश्रूषैव तु शूद्रस्य धर्मो नैश्रेयसः परम् ॥ ३३४ ॥

यशस्विनामिति साध्वाचारो लक्ष्यते । **शुश्रूषा** परिचर्यैव । तस्य धर्मः परं श्रेय आवहति ॥ ३३४ ॥

शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः ॥
ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते ॥ ३३५ ॥

शुचि मृद्वारिशुद्ध्येन्द्रियसंयमनेन च उत्क्राष्टान्त्रैवर्णिकान् **शुश्रूषुर्मृदुवाक्तर्कादि**शास्त्रगन्धितया परुषभाषी । **उत्कृष्टां** ब्राह्मणादिजातिमाप्नोतीत्यर्थः । स्पष्टमुक्तं प्रयोजनं पुनर्ब्राह्मणाद्याश्रयग्रहणात् अन्यानप्याश्रितस्यान्यशुश्रूषा कस्यैतदविरोधेन धर्म एव ॥३३५॥

एषोऽनापदि वर्णानामुक्तः कर्मविधिः शुभः ॥
आपद्यपि हि यस्तेषां क्रमशस्तन्निबोधत ॥ ३३६ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां नवमोऽध्यायः ॥ ९ ॥

स्पष्टमुक्तं प्रयोजनं च ॥ ३३६ ॥

॥ इति भट्टवीरस्वामिसूनोर्भट्टमेधातिथिकृतौ मनुभाष्ये नवमोऽध्यायः समाप्तः ॥ ९ ॥

---

१ फ–वृत्ति । २ फ–र–परः ।

१ ण–र–मान्याकापि इति भट्ट । २ इदं पुस्तकं महाजन्युपाल्यवीरेश्वरस्य सं० १८५१

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीः ॥

॥ श्रीगणेशायनमः ॥

॥ अथ दशमोऽध्यायः प्रारभ्यते ॥

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः ॥
प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः ॥ १ ॥

" वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना " इति ग्रहणार्थं त्रैवर्णिकानां स्वाध्यायविधिरुक्तो गृहीतस्य वेदस्य वा विस्मरणमप्युक्तं सर्वाश्रमिणां स्वाध्याये नित्ययुक्तः स्यात्तथा " नित्यं शास्त्राण्यवेक्षेत " शास्त्रं प्रमुख्यया वृत्त्यैव शासनाद्धि शास्त्रं प्रमाणान्तरानवगतविधिप्रतिपादनाच्च वेद एवेति तदेव शास्त्रमन्यत्रग्रन्थसंदर्भसामान्याच्छास्त्रशब्दप्रयोगः । तथा नियतो वेदमभ्यसेत् । ब्रह्मोज्झता वेदनिंदेति । यस्तु ब्रह्मयज्ञः स एकेनापि सूक्तेन साम्नानुवाकेन खण्डेन काण्डिकया वैकयैव यावज्जीवमधीतया सिध्यति न तेन ब्रह्मस्मरणमाक्षिप्यते । तदेवं निर्विषयत्वादस्य विधेरनुवादार्थतैव **प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति** । क्षत्रियवैश्ययोः प्रवचनं निवर्तयितुम् ।

ननु च " अध्यापनं ब्राह्मणस्य " इत्यादिना तयोस्तदप्राप्तमेव । नैष दोषः । वृत्तिकरणस्याश्रुतत्वात्तदर्थैव निवृत्तिः संभाव्यते । धर्मार्थं तु विद्यादानं तयोरप्यस्त्येवेत्याशङ्कां निवर्तयति । अथास्ति सामान्येन निषेधः । एवं तर्हि ज्ञातिलक्षणप्रसङ्गजननार्थं सिद्धमेवोच्यते । एवं च कृत्वाऽनुक्रमणीयः संबन्धो न हातव्योऽयमिति भविष्यति । वैश्यशूद्रोपचारं च " संकीर्णानां च संभव " इति कश्चिदाह । अध्यापनं शब्दोच्चारणशिक्षणं । प्रवचनं तु तदर्थं व्याख्यानमपि । अतो भिन्नत्वान्नाध्यापननिवृत्त्या तदर्थव्याख्याननिवृत्तिर्भवतीत्यतः पुनरुपदेशः ।

ननु च नात्र वेदशब्दोऽस्ति । कुतस्तत्कर्मता । अध्ययनक्रियया[१]ऽत्र लौकिकगद्यपद्यविषयमपीदमध्ययनमु[२]च्यते । तथा सत्यदृष्टार्थो विधिः स्यात् । यतश्चाधिकारकल्पना प्रसज्येत मूलकल्पना च स्यात् तथा तु व्याख्यातं । उपलब्धमूलैवेयं स्मृतिर्भवतीति नादृष्टमूलकल्पनाप्रसङ्गः । **द्विजातय** इति सिद्धे **त्रयो वर्णा** इति पादपूरणमेवं **स्वकर्मस्था** इति ॥ १ ॥

१ ₹—विधि । २ ₹—+उच्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि ॥
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् ॥ २ ॥

'न चास्योपदिशेद्धर्मम्' इति न कश्चिद्धर्मोपदेशः शूद्रस्य कर्तव्य इत्युक्तं । वृत्तिधर्मा उपदेष्टव्या इति तस्यापवादः । **वृत्तिः** शरीरकुटुम्बस्थितिस्तदर्था **उपायास्तान् विद्यात्** । **प्रब्रूयात्सर्वेभ्य इतरेभ्य** इति बहुवचनं शूद्रावरोधार्थं **स्वयं च तथा भवेद्यथोप**दिष्टा वृत्तिनियमा अनुष्ठेया इत्यर्थः ॥ २ ॥

वैशेष्यात्प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥ ३ ॥

किं पुनः कारणं ब्राह्मण एव प्रकृतत्वेनाऽधिक्रियते । न पुनः क्षत्रियादयोऽपि । यत एतच्छेषतया प्ररोचनं पठति । **वैशेष्याद्**विशिष्टत्वादित्यर्थः । गुणाधिक्यादिति यावत् । तदिदानीमाधिक्यमाह । **प्रकृतिश्रैष्ठ्याद्**उत्तमाङ्गोद्भवादिदमुक्तं । प्रकृतिः कारणं **नियमस्य च धारणा**न्मद्यपानप्रतिषेधादयमेव नियमोऽभिप्रेतः स्नातकव्रतानि वा वैणवधारणादीनि ब्राह्मणस्यैव **संस्कारस्य च विशेषो** त्वद्दयङ्गमाभिरित्यादि आम एव नियमोऽभिप्रेतः । स्नातकव्रतानि च विशेषो त्वद्दयङ्गमाभिरित्यादेरुपनयनादेर्वा बालस्यैव विधानात् क्षत्रियवैश्ययोस्त्वतीतशैशवयोरेकादशद्वादशतोऽतो हेतो**र्वर्णानां ब्राह्मणः प्रभुः** शासिता ॥ ३ ॥

के पुनरपी वर्णा नाम मनुष्यजातिवचनो वर्णशब्दो नेत्याह

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ॥
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥ ४ ॥

चत्वारो वर्णा ब्राह्मणाद्याः शूद्रपर्यन्ताः । अन्ये तु बर्बरकैवर्तादयः संकीर्णयोनयो यथा वक्ष्यन्ते । तत्र चतुर्णां **त्रयो द्विजातय** उपनयनस्य तेषां विहितत्वात् । **एकजातिः शूद्रो** न हि तस्योपनयनमस्ति । उपनयनविधौ ब्राह्मणादिवर्णविशेषसंयोगात् । "अष्टमे ब्राह्मणमुपनयीतैकादशे राजन्यं द्वादशे वैश्यम्" इति[3] । न कस्मिंश्चित्काले शूद्रं पठन्ति । ननु कालविशेषानुपादानादनियतकालं शूद्रोपनयनमस्तु । भवेद्यद्यसंयुक्ता सामान्येनोपनयनस्योत्पत्तिः । स्यादेव स्ववर्णकालविशेषयुक्तो निमित्तार्थः । स्तुतयः स्युः । न तु पृथगुत्पत्तिरस्यास्ति । तत्कस्य प्रमाणस्य सामर्थ्येनास्योपनयनमनियतकालं क्रियतां । यद्येवं किं तर्ह्यनेन **चतुर्थ एकजाति**रिति । सत्यं आशङ्कामात्रनिवारणार्थं मन्त्रवर्जं तदुच्यत इति । अमन्त्रकस्य नियतकालस्य प्राप्तिराशङ्क्यते । मनु च पाकयज्ञविधावेतद्वाक्यं

१ द-द्दयमाभिः । २ द-दयः । ३ आश्वलायनीये गृह्यसूत्रे १।१९।१, ३, ४,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्सन्निधौ श्रवणात्तत्र कृतार्थं नान्यत्र भवितुमर्हति । अत एवाशङ्कामात्रमित्युक्तं । परमार्थतस्तु व्यवहारनियमार्थमयं श्लोकः ॥ ४ ॥

सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ॥
आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ॥ ५ ॥

के पुनरमी ब्राह्मणादयो नाम न ह्येषां परस्परो भेदः शक्योऽवसातुं । व्यक्त्यधीनाधिगमा हि जातयो न च व्यक्तयः स्वावयवसन्निवेशविशेषावगमशून्याः शक्नुवन्ति तासां भेदमावेदयितुं । न च ब्राह्मणक्षत्रियादीनां गवाश्वस्येव वाऽऽकारभेदोऽस्ति । येन रूपिसमवायाच्चाक्षुष्यः स्युः । नापि विलीनघृततैलगन्धरसादिभेदेन क्रियान्तरगोचराः । नापि शौचाचारपिङ्गलकेशत्वादिभिर्धर्मैः शक्यं भेदावसानास्तेषां सर्वत्र संकरोपलब्धेः । व्यवहारश्च पुरुषाधीनो विप्रलंभभूयिष्ठत्वाच्च पुरुषाणां नान्ततो वस्तुसिद्धिरित्यतो जातिलक्षणमुच्यते । **सर्ववर्णेष्वे**तल्लक्षणं जातेर्य**त्तुल्यासु** समानजातीयासु भर्तृसंभूतासु **पत्नीषू**ढासु जातास्त एव जात्या ज्ञेयाः । प्रायेण मातापित्रोर्या जातिः सैवापत्यस्योढायां जातस्य वेदितव्या । संबन्धिशब्दत्वात्पत्नीग्रहणात्स्याश्रुतोपि वोढा पिता लभ्यते । तेन येनैवोढा तत एव यस्तस्यामेव जातस्तदा तज्जातीयो भवति । **अक्षतयोनिग्रहणं** पुनर्विवाहसंस्कारेण पत्नीत्वमाशङ्कमानं निवर्तयति । सहोढकानीनमातॄणां च । ननु च नैवैतासां विवाहसंस्कारोऽस्ति "पाणिग्रहणिका मन्त्राः कन्यासु" इति वचनात् । यद्यपि "वोढुः स गर्भो भवति" इति विवाहश्रवणेन शास्त्रीयसंस्कारप्रतिपत्तिः प्राप्तिमात्रवचनत्वात्तस्य न विहितवचनीयं प्रत्यभिज्ञानमस्ति तस्मात्स्वीकारमात्रे धातुर्वर्तते स्वीकर्तुरित्यर्थः । पित्रादीन् वंचयित्वा येनैव स्वीकृता तस्यैव सा भवति ततः पुत्रश्चेति तस्यार्थः । पुनर्भूसंस्काराभावात् "सा चेदक्षतयोनिः स्यात्" इति पठ्यते । गतप्रत्यागतायामपि पुनः पुनः शब्दप्रत्यभिज्ञानाद्धेतुरुक्तः । न च ताभिः सहाभिः सहाधिकारोऽस्ति । यज्ञसंयोगेऽस्ति पत्नीशब्दः । अतोऽक्षतयोनिशब्दोऽतिरिच्यते । अत्र पूर्वे पत्नीशब्दपर्यायेण नारीष्विति पठन्ति । तदपि न किंचित् । केवले ह्यक्षतयोनिशब्दे त्वसंस्कृतास्वपि जातास्तज्जायाः स्युः । पत्नीशब्दपाठेन शास्त्रीयेण विधिना या संस्कृता भार्यात्वमापादिता सा गृह्यते । यास्तु कुमार्य एवोपगम्यन्ते भवन्ति ता अक्षतयोनयो न तु पत्न्यः । तस्मादक्षतयोनिशब्दस्य प्रयोजनवाच्यं उच्यते । यत्तावदुक्तं न ताः पत्न्यो यज्ञसंयोगाभावादिति । यदि विवाहेरन् स एव यज्ञः स्यात्तत्रापि पूषवरुणार्यम्णामस्त्येव यागः । समानार्थौ च यागयज्ञशब्दौ तस्मात्स्युरेव पत्न्यः । अकन्यात्वादविवाह्यतयैव न पत्न्य इति युक्तं । अतश्चानर्थक्येऽक्षतयोनिशब्दस्य प्रयोजन-

१ ख—अन्यतो । २ ख—स्वतेमवोढा पिता लभ्यते । ३ अ. ८।२२६ । ४ अ. ९।१७३ । ५ ख—या । ६ अ. ९।१७६ । ७ ख—गो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुच्यते। दृश्यते लक्षणयाऽसत्यपि यज्ञसंयोगे पत्नीशब्दः प्रयुज्यमानो लोके। रजकस्य पत्नी यथाऽन्यत्रावरुद्धासु स्त्रीषु गृहिणीशब्दः सोऽपि भार्यावचन एव केनचिद्धर्मसाम्येन तत्रापि प्रयुज्यते। यद्यपि सति मुख्ये लक्षणा न न्याय्या तथापि मन्दधियां सुहृद्भूत्वा आशङ्कामात्रं निवर्तयति। किंनाम नाशङ्क्यते मूढमतिभिः। आनुलोम्यग्रहणमुत्तरार्थं येऽपि 'त एव त' इति पठन्ति तेषामपि स एवार्थस्तज्जातीया इति। अत्रोच्यते। किं प्रमाणमूलमेतत्स्मृतिकाराणां स्मरणमकार्यरूपत्वान्न धर्माधर्मोपदेशतुल्यं प्रमाणं तैरेव नास्तीत्युक्तं स्मृत्यन्तरमूलत्वेऽन्धपरंपराप्रसङ्गः प्रमाणश्लोकैर्दर्शितः। उच्यते। वृद्धव्यवहार एव मूलं साधुत्वस्मृतिवत्। ननु च पुरुषापराधाऽसावित्युक्तं। अत एव नियामकाः स्मृतयः फलवत्यः अभियुक्तस्मरणमन्यथेति न शक्यते वक्तुं। शास्त्रस्थाः प्रसिद्धाः प्रमाणतराः संभवति च तेषामनादिव्यवहारो मूलं एतत्स्मृतिसंस्कृतानां वावगताभिजनजातीयानां प्रत्यक्षमभ्युपपद्यत इति केषांचिद्दर्शनं। एतत्स्मृतिविवेके प्रपंचितं। ननु च स्मृत्यन्तरे नायं विशेषोऽस्ति "सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः। अनिन्द्येषु विवाहेषु पुत्राः संतानवर्धनाः॥" इति। आद्येनार्धेन जातिर्लक्ष्यते। उत्तरेण हि ब्राह्मादिविवाहजातानां संतानवचनत्वात्तत्र सवर्णेभ्यः सवर्णास्विति नात्र पत्नीशब्दोऽस्ति कथं नास्ति यावता "विन्नास्वेष विधिः स्मृत" इति मा वा भूत् अविशेषस्मृतेर्विशेषस्मृतिर्बलीयसी। अदर्शनाद्दर्शनं बलीयो यत एकेन विशेषो न दृष्टोऽपरेण दृष्ट इति संभवत्येतत्। अतोऽभियुक्तस्मरणं संभवन्मूलतया प्रमाणं। ननु चाव्याप्तेरलक्षणमेतत्। न हि सहोढकानीनपौनर्भवादीनामनेन ब्राह्मण्यं भवति। कुण्डगोलकयोः वा क्षेत्रजस्य च। अनभिप्रेतमेव तत्तेषामिति चेत् का तर्हि तेषां जातिः कुण्डगोलकयोश्च असति ब्राह्मण्ये श्राद्धे प्राप्त्यभावादनर्थको निषेधः स्यात् स्मृत्यन्तरविरोधश्च। (या०व०प०१३३) "सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः" इति। किं यदेव लक्षणं तदेव लक्ष्यं। अनिर्ज्ञातं लक्ष्यं भवति। निर्ज्ञातं लक्षणं। यथा को देवदत्त इति संशयेऽङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुः। इह तु यथा कश्चित् ब्रूयात्कः काक इत्युक्ते काकाज्जात इत्युत्तरं तादृगेव को ब्राह्मणो यो ब्राह्मणाज्जात इति। जनकेऽपि हि ब्राह्मण्यमप्रसिद्धमेव न्यायविरोधश्च सजातीयात्सजातीयायां जातः स लोके सजातीयो भवति। यथा गोर्गवि गौरश्वाद्वडवायामश्वः। अत्रोच्यते। यत्तावदुक्तं का तेषां जातिरिति किमन्यया जात्या मनुष्यास्तावद्भवन्ति पुरुषधर्मैश्चाधिक्रियंते अनुपात्तजातिविशेषैः पुत्रत्वाच्छ्राद्धादिभिश्च दाने च सर्वेषामधिकारः। ननु च विशेषस्योपदेशेन विना व्यवहारो न सिध्यति सर्वसाधारणत्वान्मनुष्यजातेः। असदेतत्सर्वस्यैव स्वसंज्ञाविशेषो विद्यते। प्रतिपुरुषं

१ र—अन्य। २ र—फलम्। ३ या० व० आचारे ५०। ४ र—प्रतिषेधः। ५ र—आदाने।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवदत्तो यज्ञदत्त इति । अथापि संबन्धव्यपदेशः कर्तव्य इति " कानीनः सहोढ " इत्येव व्यपदिश्यते । सोऽपि चातुर्वर्ण्ये सद्भावात्सामान्यरूप एवेति चेद्देवदत्तस्य कानीन इत्यादि जनकेन व्यपदेशः करिष्यते । तस्मादसंबद्धमेतद्यदुच्यते व्यपदेशः कथमिति । एवं तर्हि सर्वे एव धर्माश्चातुर्वर्ण्यं प्रतिबोध्यन्ते । " अन्तरे प्रभवानां च " तत्र बहुत्वं ब्राह्मणादिजातिचतुष्टयविषयं । न चैतेषामप्येकजातिः सर्वजातिष्वेतस्य लक्षणस्य प्रवृत्तेः । यथैव ब्राह्मणादूढायां ब्राह्मण्यां जातो ब्राह्मण एवं क्षत्रियादयोऽपि समजातीयमातृपितृजाताः । सर्वविशेषाभावे च कुतः सामान्यं । न हि शिंशपादिसर्वविशेषाभावे वृक्षत्वसंभवः । अन्तरप्रभवाश्चानुलोमप्रतिलोमाः । तत्रानुलोमा मातृजातीयाः । " प्रतिलोमास्तु धर्महीना " अन्यत्राहिंसादिभ्यः । ते च सर्वे स्वसंज्ञाभिर्विशेषतो निर्दिष्टाः । न चैषां नामापि तत्रास्ति । तत्र कतमे ते धर्मा यैरमी अधिक्रियेरन् । कतरं च तद्वचनं यदेतानधिकुर्वीत । न हि कश्चिज्जातिविशेषः स्वीयो धर्मविधिरस्ति । सर्ववर्णानामन्तरभावानां चेति शास्त्रादधिकृतत्वाच्च । उच्यते । यत्तावदहिंसादिषु चातुर्वर्ण्यवचनं तत्तरमात्रोपलक्षणार्थमेव । सत्यपि प्रतिलोमाधिकारे मुख्यार्थवृत्तेः प्रत्युत सहचारिजात्यन्तरेण त्रित्वमेव लक्षयितुं क्षमं नान्तराऽवस्थातुमर्हति । तत्रैव च वक्ष्यामः । इदं चास्ति " शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृता " इति । अपध्वंसोऽसंस्कारः । स चाष्टविधः । ' व्यभिचारेण वर्णानाम् ' इत्यादिनोक्तः । व्यभिचारः परस्त्रीषु गमनं । सजातीयासु अन्यद्वक्ष्यामस्तस्मादसत्यपि वर्णत्वे वाचनिक एव तेषामधिकारः । क्षत्रियस्य तु मातृजातीयत्वमेव लिङ्गदर्शनात् पुत्रो व्यामुष्यायणस्य संविधानादितिकर्तव्याविशेषः श्रुतः । अन्येष्वपि श्रौतेषु तस्य विधानान्तरं दृश्यते । तस्मादेव ब्राह्मणादिजातीय एव समभागः स्वैपितृव्येण " तस्माद्धर्मेण तं भजेत् " इति । न च यथोक्ते विधौ तदुक्तं । तदा ह्ययं शूद्रधर्मा । धनस्य यज्ञार्थतायामुक्तायां कुतस्तस्य तावद्भागः । कुण्डगोलकौ क्षेत्रजावेव । शिष्टसमाचारश्चैवमेव । पाण्डुधृतराष्ट्रविदुराः क्षेत्रजाः सन्तो मातृजातीयाः । अतो युक्तः श्राद्धे प्रतिषेधः । किं च पतितोऽपि तत्र प्रतिषिद्धो यस्य सर्वधर्मबहिष्कृतत्वात्प्राप्त्याशङ्कैव नास्ति । यत्तु सजातीयेष्वपि स्मृत्यन्तरं तदुक्तानुवादत्वाद्यथासंभवं व्याख्येयं । कार्यपुत्रविषयतया वा । यच्च निर्ज्ञातं लक्षणं भवति तत्किं ब्राह्मणार्थो नैव लोकप्रसिद्धः यत्र ब्राह्मणादिशब्दः प्रयुज्यत एवापध्वंसनिवृत्त्यर्थं च । स च मातापित्रोरेतदेव जातिलक्षणं । न चानवस्थानादित्वात्संसारस्य प्रस्तुतन्यायविरोधस्तु साक्षात् व्यवसायगम्यत्वं आसां जातीनां स्यात् । तासु स्मृतिलक्षणा यथास्मरणं भवितुमर्हति । यथा वा वसिष्ठादयः शब्दा अन्तरेणैवाद्यत्वं धर्ममनवच्छिन्न-

१ ख–न्धि । २ गौतम धर्मसू० ५।२० । ३ र–कश्चिदजातिविशेषासूयेधर्मविधि– । ४ ख–विषयं । ५ अग्रे २४ श्लो. । ६ र–स । ७ र–तयक्तं । ८ र–विरोधः समेत्यश्चाव्यंवासभेदत्वे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मृतिपारंपर्यं कैश्च विदितार्थेषु प्रयुज्यंते भवन्ति व्यवहारहेतवो वसिष्ठब्राह्मणा वासिष्ठाः शृण्वंतीति तद्वदेतद्द्रष्टव्यं । यथा समाने ब्राह्मणत्वे केचिद्भृगवो वत्सा भारद्वाजा इत्यादिविशेषः स्मृत्येकप्रमाणः तथैव समाने पुरुषत्वेऽमी ब्राह्मणा अमी क्षत्रिया इत्यादिरुपपन्नो व्यवहारः । यैरपि लिङ्गदर्शनत्वे **जाबालश्रुतिरुक्ता** "सत्यकामो जाबालो मातरमपृच्छत्किंगोत्रोऽहमस्मीति । सैवं प्रत्यब्रवीत् बह्वहं चरन्ती परिचारिणी यौवने त्वामालभे नाहं तद्वेदेति । स एवमुपश्रुत्य हारिद्रुमं तं गौतममियाय । तं होवाच ब्रह्मचर्यं भवतो विवत्स्यामि । स एवमुवाच । किंगोत्रस्त्वमसीति । स प्रत्युवाच । अपृच्छं मातरं सा माता प्रत्यब्रवीत् 'यौवने त्वामि' त्यादि । गौतमो न चैतद्ब्राह्मणो वक्तुमर्हति समिधं सोम्याहर उप त्वानेष्ये" । अस्यायमर्थः । बहुभिरहं यौवने पुंभिः संगताऽभूव न जाने केन जातोऽसीति । गौतमस्तु सत्यवचनान्निश्चिकाय ब्राह्मणेनायं जातस्त्वतस्तमुपनिन्येऽतो मन्यामहे स्वैरिणीष्वप्यनूढासु समानजातीयाज्जातासु तज्जातीया भवन्ति । तदेतन्न किंचिद्यतो यौवने त्वामालभे यौवने किल न स्मृतिर्दृढीभवति । उत्कलिकाबहुलत्वाद्यौवने चेतसः । किंच परिचारिणीपरिचारिकाजीविकाहेतोः क्षुधापीडिता[1] बहु विचरन्ती[2] नैकस्मिंस्थाने ततो मे न स्मृतिरस्ति भर्तुः किं गोत्रमिति । अतः स्थितमेतत्समानजातीयोढायां जातास्तज्जातीया इति । गौतमस्यापि न ततो वचनाद्ब्राह्मणोऽयमित्यवगमः । प्रागेवासौ तं ब्राह्मण इति वेद । गोत्रं तु न वेद । गोत्रप्रश्नेन चरणप्रश्नो वेदितव्यः । तत्र उपनयनभेदोऽस्ति । न तु गोत्रभेदेनोपनयने प्रयोजनं । ननु यथा केचिदाहुः जातिप्रश्नोऽयमाभिजात्याद्गोत्र एव जातिमवगमिष्यामि । साक्षाज्जानाति प्रश्ने हि मुखरता स्यात् ॥ ५ ॥

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान् ॥
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥ ६ ॥

अनन्तरास्वव्यवहितास्वानुलोम्येन य उत्पन्नाः पुत्रास्ते **सदृशा** ज्ञेयाः । न तु तज्जातीयाः । यथा ब्राह्मणात्क्षत्रियायां क्षत्रियाद्वैश्यायां । ते न (?) सदृशा न तु त एव । अत्र हेतुः । **मातृदोषविगर्हितान्** तत्सदृशग्रहणान्मातृत उत्कृष्टान्पितृतो निकृष्टान् । **द्विजैरिति** बहुवचननिर्देशान्मातृतश्च ग्रहणादानुलोम्येष्वेतत्संभवति । प्रातिलोम्ये पितृतो ग्रहणेन मातृतः पितुर्निकृष्टजातीयत्वात् । अत आनुलोम्यग्रहणं पूर्वश्लोके यदुक्तमुत्तरार्थमिति तदिहानर्थकं इतःपरेषु श्लोकेषूपदिश्यते ॥ ६ ॥

---

१ र–परिता । २ र–विचरति ।

For Private And Personal Use Only

अनन्तरासु जातानां विधिरेष सनातनः ॥
द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम् ॥ ७ ॥

आद्येनार्धश्लोकेनोक्तमर्थमनुवदति । द्वितीयेन वक्ष्यमाणसंक्षेपः । **द्व्येकान्तरा** व्यन्तरा ब्राह्मणस्य शूद्रा । एकान्तरा वैश्या । नातीवश्लोकः सप्रयोजनः ॥ ७ ॥

ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ॥ ९
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥ ८ ॥

एकान्तरा ब्राह्मणस्य वैश्या तत्र जातोऽम्बष्ठः । **स्मृत्यन्तरे** ' मृज्जकण्ठ ' इत्युक्तः । द्व्यन्तरायां शूद्रकन्यायां **निषादः । पारशवश्च** निषादशब्दः प्रतिलोमजातीयेऽपि वर्तते । **कन्याग्रहणं** स्त्रीमात्रोपलक्षणार्थमिति व्याचक्षते । वैश्यस्त्रियामित्यर्थः । एवं
सर्वत्र द्रष्टव्यम् ॥ ८ ॥ १०

क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् ॥
क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ॥ ९ ॥

आचारविहारौ कायचेष्टावाग्व्यापारश्च तावस्य क्रूरौ भवतः । स्वभावानुवादोऽयं । **वपुःशब्दः** स्वभाववचन एव । उभयजातिसंभूतत्वादुभयधर्मा भवति ॥ ९ ॥

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ॥ १९
वैश्यस्य वर्णे चैकस्मिन्षडेतेऽपसदाः स्मृताः ॥ १० ॥

अत्र त्रिपादी अनुवाद एव । चतुर्थस्तु पादोऽपसदाभिधानार्थः । एते त्रैवर्णिकानामेकान्तरव्यन्तरस्त्रीजाता **अपसदा** एते वेदितव्याः । सदा पुत्रार्थफलदा अपशीर्णाः समानजातीयपुत्रापेक्षाया भिद्यन्ते ॥ १० ॥

क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः ॥ २०
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥ ११ ॥

आनुलोम्ये पूर्वो विधिः । प्रातिलोम्ये न त्वयमुच्यते । **कन्याग्रहणमुक्तार्थं** । **वैश्यान्मागधवैदेहौ** यथासंख्येन राजस्त्रियां मागधः ब्राह्मण्यां वैदेहः ॥ ११ ॥

शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् ॥
वैश्यराजन्यविप्रासु जायन्ते वर्णसंकराः ॥ १२ ॥ २१

अत्रापि यथासंख्यमेव **वैश्यराजन्य** इति निर्देशो जातिपरेऽपि सामर्थ्यात्स्त्रीलिङ्गप्रतिपत्तिः । मृगक्षीरं कुक्कुटाण्ड इति यथा वृत्तानुरोधात्स्त्रीप्रत्ययो न कृतः ॥ १२ ॥

---

१ र-शूद्रायां । २ र-निर्यंते ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकान्तरे त्वानुलोम्यादंबष्ठोग्रौ यथास्मृतौ ॥
क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि ॥ १३ ॥

एकान्तरे वर्णे ब्राह्मणाद्वैश्यायामम्बष्ठः क्षत्रियाच्छूद्रायामुग्रः । एतावानुलोम्येन एवमेकान्तरे प्रातिलोम्येन शूद्रात्क्षत्रियायां **क्षत्ता** वैश्याद्ब्राह्मण्यां **वैदेहः** । तौ **तुल्यौ** भवनादिक्रियासु । न त्वध्ययनादिषु । चण्डाल एकः प्रतिलोमोऽस्पृश्यः । यथा च दिवाकीर्तिरलोके तत्स्पर्शे एवं स्नानं वान्येषु प्रतिलोमेषु सूतमागधायोगवानामनन्तरजातानां चण्डालदण्डापूपिकायां सिद्धः स्पर्शादिसंबन्धः ॥ १३ ॥

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ॥
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥ १४ ॥

यथा ब्राह्मणात्क्षत्रियायां वैश्यायां च एवं क्षत्रियादुभयोस्**ताननन्तरनाम्नः** प्रचक्षते । **अनन्तरा**ऽनुलोमा या जातिः समाना तेषां मातृजातीया इत्यर्थः । अनन्तरग्रहणमविवक्षितमत एवाह **मातृदोषादि**ति । पितृजात्युत्कर्षेण नो दुष्यन्ते । अतश्च सत्यपि वर्णसंकरत्वे वचनान्मातृजात्याः स्मृताः संस्कारास्तेषु कर्तव्या इत्युक्तं भवति । तर्ह्येतद्वचनमन्तरेण क्षत्रियादिसंस्कारास्तेषु लभ्यन्ते । अश्वतरवज्जात्यन्तरत्वात् । वचनेन तु मातृजातावुक्तायामदोषः ॥ १४ ॥

ब्राह्मणादुग्रकन्यायामावृतो नाम जायते ॥
आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः ॥ १५ ॥
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम् ॥
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥ १६ ॥
वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु ॥
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥ १७ ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ॥
शूद्राज्जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः ॥ १८ ॥

अयं निषादोऽस्मिँल्लोके न शूद्रायां ब्राह्मणाज्जातो यः प्रागुक्तः । किंतर्हि । यः प्रतिलोमो वक्ष्यमाणः प्रतिलोमाधिकारात्प्रतिलोमादिपुल्कसा जातिः प्रसिद्धा । एवं शूद्रान्निषाद्यां कुक्कुटकः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते ॥
वैदेहकेन त्वंबष्ठ्यामुत्पन्नो वेण उच्यते ॥ १९ ॥

अनुलोमाः स्त्रियः प्रतिलोमाः पुमांसस्तयोः संभवे श्वपाकवेनौ प्रतिलोमजातीयौ ॥ १९॥

१ जातांस्तु । २ ख–नु । ३ र–प्रतिलोकोऽधिकारात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विजातयः सवर्णासु जनयंत्यव्रतांस्तु यान् ॥
तान्सावित्रीपरिभ्रष्टान्व्रात्यानिति विनिर्दिशेत् ॥ २० ॥

नैते प्रतिलोमवर्णसंकराः स्युरतोऽस्मिन्विधावुच्यन्ते **द्विजातयो यान्सवर्णासु जनयन्ति** ते वेदव्रता भवन्ति । अब्रह्मचारिणः **सावित्रीपरिभ्रष्टा** उपनयनहीनाश्च तदा **व्रात्या** इति **तान्निर्दिशेत्** । **अव्रताञ्जनयन्तीति** नायं संबन्धः । न हि व्रतिनोऽव्रता वा जन्यन्ते । जातानामुपनयनसंस्कारविधानात् । उक्तव्रात्यलक्षणानुवाद उत्तरविवक्षया यस्त्वयं पाठोऽव्रतायाञ्जनयन्ति तान्व्रात्यान्विनिर्दिशेत्तदसत् उक्तव्रात्यलक्षणविरोधात् ॥ २० ॥

व्रात्यात्तु जायते विप्रात्पापात्मा भूर्जकण्टकः ॥
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥ २१ ॥

स्ववर्णास्वपि पूर्वश्लोकादनुवर्त्येते । इह स्त्रीजातेरनुपादानादवश्यंभावाच्च तदपेक्षायाः स्मृत्यन्तरे वैश्यायां ब्राह्मणाज्जातो भृज्जकण्टकः स्मर्यते । अतो विशिनष्टि **पापात्मेति** । स ह्यनुलोमत्वान्न **पापात्मा** । अयं चासंस्कृतात्मनो व्रात्याज्जातोऽनधिकारित्वाद्युक्तं यन्निन्द्यते । न च पर्यायशब्दा देशभेदेन प्रसिद्धप्रयोगभेदाः । पूर्वैस्तु व्याख्यातं तत्पुत्रपौत्राणामेता आख्या भृज्जकण्टको ब्राह्मण्यां जात **आवन्त्यश्चावन्त्यां** तस्यामेव **वाटधानो** वाटधानात्पुष्पशेखर एवमुत्तरेष्वपि ॥ २१ ॥

झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च ॥
नटश्च करणश्चैव खसो द्रविड एव च ॥ २२ ॥
वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च ॥
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥ २३ ॥

एताभिः संज्ञाभिः प्रसिद्धा एवंजातीया वेदितव्याः ॥ २२ ॥ २३ ॥

व्यभिचारेण वर्णानामवेद्यावेदनेन च ॥
स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः ॥ २४ ॥

व्यभिचारः परस्त्रीगमनं । तत्समानजातीयासु परकीयास्वनुलोमप्रतिलोमासूढास्वनूढासु च तत्स्वयं **अवेद्यावेदनमविवाह्याविवाहः** । अविवाह्याः स्वसृनप्त्रादयस्तदयोन्यः । **स्वकर्मणां त्याग** उपनयनवेदग्रहणादीनां क्षत्रवृत्त्यादयोऽपि पुत्रपौत्रान्वयिन एवमुक्ताः केचित् ॥ २४ ॥

संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ॥
अन्योन्यव्यतिषक्ताश्च तान्प्रवक्ष्याम्यशेषतः ॥ २५ ॥

१ द–स ।

For Private And Personal Use Only

व्यतिषङ्गः संबन्धः । इतरेतरमनुलोमानामनुलोमैः प्रतिलोमैश्चैवं प्रतिलोमानामन्यैः प्रतिलोमैरनुलोमैश्च वक्ष्यमाणसंज्ञार्थं वचनम् ॥ २५ ॥

सूतो वैदेहकश्चैव चण्डालश्च नराधमः ॥
मागधः क्षत्तृजातिश्च तथाऽयोगव एव च ॥ २६ ॥

उक्तलक्षणा एते प्रातिलोमा उत्तरार्धे पुनरुपन्यस्यन्ते ॥ २६ ॥

एते षट्सदृशान्वर्णा[illegible]षु ॥
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥ २७ ॥

एते सूतादयः प्रतिलोमाः **स्वयोनिसदृशान् जनयन्ति** तज्जातीयानित्यर्थः । तद्यथा । सूतः सूतायां सूतमेव जनयति । एवं चण्डालः चण्डालायां । ये च **मातृजात्याः प्रसूयन्तेऽ**नुलोमा मातृजातीया ये पूर्वमुक्तास्ताननन्तरानाम्न इति तेऽपि **स्वयोनिषु सदृशानेव** जनयन्ति । यथाऽम्बष्ठोऽम्बष्ठां तथा वैश्यायामात्मनो हीना वैश्याञ्जनयन्ति । मातृजातित्वस्योक्तत्वात् । अन्ये पुनः पठन्ति ' मातृजातौ प्रसूयन्ते ' । अर्थश्चायं । वर्णयोनिषु अम्बष्ठादौ मातृजातौ च वैश्यायां सदृशानेव जनयन्ति । यद्यपि शुद्धवैश्येभ्य उत्कृष्टा अम्बष्ठादयस्तथापि साम्यमुच्यते । वैश्यधर्मे उभयेषामधिकारात् । अनुलोमग्रहणं मातृजातिपदसामर्थ्याल्लभ्यते सत्यपि प्रकृतिप्रतिलोमप्रत्यवमर्शकत्वे प्रसज्यत इति । प्रवरासु च योनिषु प्रतिलोमा गच्छन्तो जनयन्ति हीनतरमित्येवं ज्ञेयं वक्ष्यमाणपर्यालोचनया । न हि आयोगवादिभिः स्वजातीयासु जनिता आयोगवादि व्यपदेशं लभन्ते । सदृशग्रहणं तु प्रातिलोम्यं च सामान्येन हीनतरत्वं चावान्तरविशेषमनपेक्ष्य प्रयुक्तं तेनायमत्र वाक्यार्थः । प्रतिलोमेभ्यः समानजातीयासूत्कृष्टजातीयासु च प्रतिलोमा एव भवन्ति ॥ २७ ॥

यथा त्रयाणां वर्णानां द्वयोरात्माऽस्य जायते ॥
आनन्तर्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्रमात् ॥ २८ ॥

अस्य ब्राह्मणस्य **त्रयाणां वर्णानामात्मा जायते द्वयोर्वर्णयोः** क्षत्रियवैश्ययोर्द्विजत्वं जायते तथा स्वयोनौ । एवं त्रयाणां वर्णानां ब्राह्मणो द्विजान् जनयति । एवं बाह्येष्वपि प्रातिलोम्येन वैश्यक्षत्रियाभ्यां क्षत्रियब्राह्मणोरात्मा द्विजत्वं भवति । सति च द्विजत्वे उपनयनं कर्तव्यं । वक्ष्यन्ति च एते षड्द्विजधर्माण इति । एतावांस्तु विशेषः । अनुलोमजा मातृजात्या मातृजातीया । स्तुतिमात्रमिदं वक्ष्यामः ॥ २८ ॥

ते चापि बाह्यान्सुबहूंस्ततोऽप्यधिकदूषितान् ॥
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥ २९ ॥

---

१ द-संक्षेप । २ द-अनन्तर । ३ द-च मृ (सू ?) त इति । ४ फ-दृष्टं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ते चाप्यायोगवादयः ९द् बाह्यान् सुबहून् परस्परदारेषु जनयन्ति । तद्यथाऽऽयोगवः क्षत्रियायां क्षत्राऽऽयोगव्यां परस्परमात्मापेक्षया गर्हितान् जनयन्ति । तद्यथाऽऽयोगवः क्षत्रियायामात्मनो बाह्यतरं जनयति । ततोऽपि बाह्यतरं चण्डालाभ्यः । एवं सर्वत्र ॥ २९ ॥

यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ॥
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ॥ ३० ॥

एवं परस्परगमने स्त्रीप्रतिलोमानां पूर्वेण बाह्यतरेण बाह्या जाताः । इदानीं चातुर्वर्ण्ये कथ्यते । सूयतिर्जनिनात्यन्तसमानार्थोऽत्र प्रकरणे प्रयुक्तः । प्रसूयते जनयतीत्यर्थः । तदुत्तरश्लोकेन निर्दिश्यते ॥ ३० ॥

प्रतिकूलं वर्तमाना बाह्या बाह्यतरान्पुनः ॥
हीनाहीनान्प्रसूयन्ते वर्णान्पञ्चदशैव तु ॥ ३१ ॥

एकैकस्य तु वर्णस्य संकीर्णयोनयो भवन्ति । कस्यचिदनुलोमाः कस्यचित्प्रतिलोमाः कस्यचिदनुलोमप्रतिलोमाः । ब्राह्मणस्यानुलोमाः शूद्रस्य प्रतिलोमा एव । क्षत्रियवैश्ययोरनुलोमाः प्रतिलोमाः । क्षत्रियस्य द्वावनुलोमौ एकः प्रतिलोमो वैश्यस्यैकोऽनुलोमो द्वौ प्रतिलोमौ । एवमेते द्वादशानुलोमप्रतिलोमाः । एतेषामेकैकस्य चतुर्षु गच्छतश्चत्वारो भेदा भवन्ति ते च केचिद्धीनाः केचिदहीनाः । बाह्यतरास्तु सर्व एव । बाह्यतरत्वं मातापितृजातेर्विप्रकर्षः कर्मभ्यो हीनत्वात्तदेतदुदाहरणैः स्फुटीक्रियते । प्रतिलोमांस्तावद्गृहीत्वा वक्ष्यामः । आयोगवो वैश्यायां शूद्राज्जातः शूद्रायां वैश्यायां क्षत्रियायां ब्राह्मण्यां चतुरो जनयति । सोऽयमात्मना सह पंचधाऽऽयोगवः । एवं क्षत्रियचण्डाला अपि । एवं शूद्रास्त्रयः पंचकाः पंचदशधा भवन्ति । एवं वैश्यप्रभवौ द्वौ प्रतिलोमौ क्षत्रियायां मागधो ब्राह्मण्यां वैदेहकः शूद्रायामनुलोमस्तत्र यः शूद्रायां जातः स यदा चातुर्वर्ण्यं जनयति तदैष एव प्रकारः । स यदा शूद्रां गच्छति तदा हीनतरो वर्णो जायते तदपेक्षया । एवं वैश्यां गच्छन्हीनतरं जनयति । एवं क्षत्रियायां ब्राह्मण्यां च केवलशूद्राज्जाता उत्कृष्टा एवमित्यपेक्षावशाद्धीनांश्चाहीनांश्च । एवं क्षत्रिये ब्राह्मणे च द्रष्टव्यं । ब्राह्मणस्य त्वयं विशेषः । अनुलोमा एव तस्य भवन्ति । एवं चतुर्वर्णानां प्रत्येकं पंचदशधा भेदाः षष्ठिः संपद्यन्तो मुख्याश्चत्वारो वर्णाः सा चतुःषष्टिर्भवति । परस्परसंपर्कात्तेषामन्येऽनन्तभेदा भवन्ति । तदुक्तं । " ते चापि बाह्यांत्सुबहून् " इति (१०।२९।) । प्रतिकूलं

For Private And Personal Use Only

शास्त्रव्यतिक्रमेण वर्तमाना मिथुनीभवन्ति । हीनाहीनानित्येकं पदं । अथवा हीनाः सन्तोऽहीनान्प्रसूयन्ते जनयन्तीत्यर्थः । वर्णान्पंचदशैवेति ' नास्ति तु पंचम ' (१०।४) इति पंचमस्य वर्णाभावात्पंचदशसु वर्णत्वमुपचाराद्द्रष्टव्यम् ॥ ३१ ॥

प्रसाधनोपचारज्ञमदासं दास्यजीवनम् ।
सैरन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे ॥ ३२ ॥

प्रसाधनं मण्डनमुपचारोऽनुवृत्तिः । केशरचनाकुंकुमचन्दनादिनाऽनुलेपनविच्छित्तिः पाणिपादविमर्दनं प्रासिलाभकर्मकार्याक्षिप्रकारिता कार्याणामवसरमित्यादिविधिज्ञ एवमुच्यते । **अदासं दास्यजीवनं** वत्सरभृत्या षण्मासभृत्या च कंचन सेवते । अथवैतद्विधिज्ञतया [1]सर्वोपस्थापको भवति जीवनाय मता [2]वागुरा वृत्तिर्द्वितीयोऽयं वृत्युपायः वागुरा अर[3]ण्यपशुहिंसनं । तच्चार्याणां दैवपित्र्यर्थं क्षुधार्थं च । न तु व्याधवत्पशून्हत्वा मांसविक्रयेण जीवनं राजनिर्देशाद्बहुप्राणिवधो जीविकार्थः **सैरन्ध्र** नामानं **सूते** उत्पादयति वर्णकः **दस्युर्नाम** वक्ष्यमाणः **अयोगवे** जातिविशेषे सामर्थ्यात्स्त्रीत्विलामः ॥ ३२ ॥

मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते ॥
नॄन्प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये ॥ ३३ ॥

मैत्रेयकं नाम्ना वर्णमायोगव्यां **संप्रसूयते** जनयति । **वैदेहनामा** ब्राह्मण्यां वैश्याज्जातो यः। पाठान्तरं मैरेयकमिति । **माधूकमुपमापदमेतत्** मधूककुसुमतुल्यं । मधुरभाषित्वात्। अथवा मधुकायतीति[4] ' अन्येष्वपि दृश्यते ' (व्या. सू. ३।२।१०१) इति डः । अन्येषामपीति दीर्घः । स्वार्थिकेन चादिवृद्धिस्तस्य वृत्तिः । नॄन् मनुष्यान् **प्रशंसन्ति** अतस्तं सर्वदा बन्दीति यः कथ्यते । **अरुणोदये** प्रबोधकाले घण्टां ताडयत्याहन्ति राज्ञामीश्वराणां चान्येषां प्रबोधाय । आयोगव्यामेवायं जनयति प्रकृत्वात् ॥ ३३ ॥

निषादो मार्गवं[5] सूते दासं नौकर्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्यावर्तनिवासिनः ॥ ३४ ॥

प्रतिलोमप्रकरणान्न यः शूद्रायां ब्राह्मणाज्जातो निषाद पूर्वमुक्तः स इह गृह्यते । अपि तु दस्युवत्प्रतिलोम एव **मार्गवं** नाम प्रतिलोमं **सूते** आयोगव्यामेव यस्येमे अपरे नामनी दासः **कैवर्त** इति । **आर्यावर्तः** प्रसिद्धः । तस्य वृत्तिर्नौ कर्मणा नौवाहनेन जीवति ॥ ३४ ॥

मृतवस्त्रभृत्स्वनार्यासु[6] गर्हितान्नाशनासु च ॥
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः[7] ॥ ३५ ॥

---

१ र–सर्वमुपस्थापको । २ र–; ख–सतं वागुरा–जीवनाय ससंवागुरा वृत्ति– । ३ ख–अन्ये
४ र–मधुकाय तद्वति; ख–मधुकाश्च इति । ५ र–मार्गव । ६ फ–मृतवस्त्रभृत्सु नारी । ७ ख–क्रियाः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येऽनन्तर उपदिष्टास्त्रयो मार्गवपर्यन्तास्तेषां मातृजातिर्नोक्ता तत्प्रतिपादनार्थोऽयं श्लोकः। **आयोगवीषु** स्त्रीष्वेते जायन्ते। तासां च विशेषणं **मृतवस्त्रभृत्सु** शववासांसि परिदधतीष्वित्यर्थः। **अनार्या** अस्पृश्याः **गर्हितमुच्छिष्टं** मांसादि चान्नमश्नन्ति ॥ ३५ ॥

कारावरो निषादात्तु चर्मकारं प्रसूयते ॥
वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥ ३६ ॥

उत्तरत्र वैदेह्यामेव जायन्त इत्येवकरकारणाल्लिङ्गादिहापि वैदेह्यां निषादात्**कारावरो** नाम जायत इति संबंधप्रतीतिः। वैदेहिकाद्द्वा**वांध्रमेदौ** कस्यां स्त्रियां कारावरीनिषाद्यौ तयोरत्र सन्निधानात् वैदेह्यां च वैदेह्याभिन्नवर्णसंभवादेवं व्याख्यायेते। स्त्रीभेदेन चैकस्माद्वर्णादेते द्वे जाती। बहिर्ग्रामं प्रतिश्रयो निवासो ययोः ॥ ३६ ॥

चाण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥ ३७ ॥

चाण्डालात् वैदेह्यां **पाण्डुसोपाको** नाम वर्णो जायते। तस्य वृत्तिः **त्वक्सारव्यवहारत्वात्** त्वक्सारो वेणुः तद्व्यवहारेण वंशक्रयविक्रयादिना कटादिकरेण वा जीवति निषादात्तस्यामेवाहिण्डकस्तस्य वृत्तिरेषैवान्वेष्या वा ॥ ३७ ॥

चाण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ॥
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥ ३८ ॥

व्यसनं दुःखं तस्य **मूलं** मारणं तद्वृत्तिर्वध्यमारणं राजादेशादनाथशववहनं तद्वस्त्रादिग्रहणं प्रेतपिण्डभोजनमित्येवमादिवृत्तिः। **पुक्कस्यां चाण्डालेन** जायते। अथवा मूलादिवृक्षादीनां तद्व्यसनं विभागकरणं सा वृत्तिर्व्यवच्छिन्नेषु वृक्षेषु यदनुवृत्तं मूलं तदुद्धृत्य विक्रयादिना जीवति ॥ ३८ ॥

निषादस्त्री तु चण्डालात्पुत्रमन्त्यावसायिनम् ॥
श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ॥ ३९ ॥

अन्त्यावसायिनं चण्डालमेव वदन्ति। अथवा निषाद्यां चण्डालादुत्पन्नस्यान्त्यावसायीति नामधेयम्। **श्मशानगोचरं** शवदहनादिवृत्तिराहारादीनि कर्माणि तैः प्रसिद्धैः सोपाकादिनामतया तज्जातीय एव सोऽतश्चाण्डालादपि कुत्सिततरो विज्ञेयः। तदेतदानन्त्यात् संकराणां प्रदर्शनमात्रं कृतम् ॥ ३९ ॥

सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः ॥
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ॥ ४० ॥

---

१ र–द्व्यवर्णसंभवं। २ र–कटादि। ३ र–तज्जातीयास्त्रिविधाश्च अतश्चण्डालादपि। ४ र–सङ्कर।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यान्येतान्यनन्तरमुद्दिष्टानि त्वक्सारव्यवहारादीनि कर्माणि तैरप्रसिद्धाः सोपाकादिनामतया तज्जातीया वेदितव्याः । पित्रा मात्रा च विभागेन दर्शिताः । **प्रच्छन्ना वा प्रकाशा वा** तज्जातीया **वेदितव्याः** । आयोगव्यां मात्रा विभागो निषादाद्वैदेहिकादान्ध्रमेदाविति पित्रा दर्शितो विभागः ॥ ४० ॥

स्वजाति[1]जानन्तरजाः षट्सुता द्विजधर्मिणः ॥
शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ॥ ४१ ॥

स्वजातीयास्त्रैवर्णिकेभ्यः समानजातीयास्तु जातास्ते **द्विजधर्माण** इत्येतत्सिद्धमेवानूद्यते । अनन्तरजानां तुल्यताभिधानं तद्धर्मप्राप्त्यर्थम् । **अनन्तरजा** अनुलोमा ब्राह्मणात् क्षत्रियवैश्ययोः क्षत्रियाद्वैश्यायां जातास्तेऽपि द्विजधर्माण उपनेया इत्यर्थः । उपनीताश्च द्विजातिधर्मैः सर्वैरधिक्रियन्ते ।

ननु च "ताननन्तरनाम्न" इति मातृजातीयत्वमेषामुक्तमेव । ततश्च तज्जात्या समेषु धर्मेषु सिद्ध एवाधिकारः । सत्यम् । अनन्तरनाम इति नामग्रहणात्संज्ञैवैषां न तु जात्यतिदेश इति कस्यचिदाशङ्का स्यादतः स्पष्टार्थं " षट्सुता द्विजधर्मिण " इति वचनारम्भः । धर्मिण इतिशब्दस्य धर्मो[3]ऽर्थनीयः । ये[4] **पुनरपध्वंस जाः** संकरजास्ते **शूद्राणां सधर्माणः** समानाचारास्तद्धर्मैरधिक्रियन्त इत्यर्थः । प्रतिलोमानां तु विशेषो वक्ष्यते । अनन्तरग्रहणमनुलोमोपलक्षणार्थमेव । तेन व्यवहितोऽपि ब्राह्मणाद्वैश्यायां जातो गृह्यते । षट्संख्यातिरिक्तत्वान्न शूद्रायां पारशवः ॥ ४१ ॥

तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ॥
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ॥ ४२ ॥

त एतेऽनन्तरजाः तपःसामर्थ्येन बीजसामर्थ्येन **युगेयुगे** जन्मनि जन्मनि **उत्कर्षमपकर्षं** च गच्छन्ति । तद्वक्ष्यामः ' शूद्रायां ब्राह्मणाऽज्जात ' इत्यत्र ॥ ४२ ॥

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ॥
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ ४३ ॥

यदुक्तं ' स्वकर्मणां त्यागेनेति ' तस्यैवायं प्रपञ्चः । क्रियालोपो यत्र संस्कार्यतया संबध्यते तथोपनयनादिषु यत्र वा कर्तृतया यथा नित्याग्निहोत्रसंध्योपासनादिषु तासां लोप उभयासामप्यननुष्ठानमतश्च न केवलमुपनयनसंस्काराभावेन जातिभ्रंशः । अपि तूपनीतानां विहितक्रियात्यागेनापि । तथा चाह **शनकैरिति** पुत्रपौत्रादिसंततः प्रभृति[6]शूद्रत्वं न तु जातस्यैव । उपनयनाभावे तु तस्यैव

---

१ फ–स्वाजातिजा २ फ–वचनान्तरं (नं०) । ३ र–धर्ममर्थनीयाः । ४ र–येन । ५ अग्रे १०।६४ । ६ स्व–संभूते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यपदेशान्तरं प्रवर्तते । यद्यपि सा जातिर्न निवर्तते तत्पुत्रपौत्राणां भृज्जकण्टकादिजात्यन्तरमेव व्यपदेशहेतुकमिति ब्राह्मणातिक्रमेण ब्राह्मणविधिविहितातिक्रमेणेत्यर्थः । अथवा शास्त्रार्थसंशये प्रायश्चित्ते वा परिपृच्छनाभावः ॥ ४३ ॥

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ॥
पारदापह्लवाश्चीनाः किराता दरदाः खशाः ॥ ४४ ॥

पुंड्रकादयः शब्दाः परमार्थतो जनपदशब्दा इह तु क्षत्रियेषु मुख्यास्तत्संबन्धत्वाज्जनपदेषु वर्तन्त इत्येतद्दर्शनमाश्रितं । यथालुब्विधौ तस्य निवासो जनपदे लुगिति न तु यथा लुब्योगात्प्रख्यानादिति । नैतेषु देशेषु बाहुल्येन चातुर्वर्ण्यमस्तीत्येतदालंबनं वृषलत्ववचनं । यदि वा पुंड्रादयः शब्दाः कथंचिद्देशसंबन्धेन विना दृश्यन्ते तदैतज्जातीया वेदितव्याः । **महाभारतादौ** क्षत्रिया वर्ण्यन्ते । तथाऽऽद्यत्वेऽप्येते क्षत्रिया एवेति कस्यचित् भ्रान्तिः स्यादत एवमुक्तमेते वृषला इति । ये चैते दिगन्तवासिनः किरातवैनदरदादयस्तेषामप्राप्तरूपं वेदेनानूद्यते न जनैमियान्नांतमियादिति ॥ ४४ ॥

मुखबाहूरुपज्जानां या लोके जातयो बहिः ॥
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥ ४५ ॥

असदविद्यमानार्थासाधुशब्दान्वया वाक् म्लेच्छोच्यते । यथा शबराणां किरातानामन्येषां वान्त्यानाम् । **आर्यवाच** आर्यावर्तनिवासिनस्ते चातुर्वर्ण्यादन्यजातीयत्वेन प्रसिद्धास्तदा दस्यव उच्यन्ते । एतदुक्तं भवति । न देशनिवासेन म्लेच्छवाक् संकरत्वे कारणमपि तु यथोक्तबर्बरादिशब्दप्रसिद्धिर्मुखादिजानां बहिः क्रियते ब्राह्मणादिशब्दैरप्रसिद्धैरित्यर्थः । ते सर्वे दस्यव उच्यन्ते ॥ ४५ ॥

ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ॥
ते निन्दितैर्वर्तयेयुर्द्विजानामेव कर्मभिः ॥ ४६ ॥

अपसदा अनुलोमाः प्रतिलोमाः **अपध्वंसजा** गोबलीवर्दवद्भेदः । द्विजानामुपयोगिभिः **प्रेष्यकर्मभिर्वर्तयेयुः** आत्मानो निन्दितैः प्रेष्यकार्यत्वान्निन्दितानि ॥ ४६ ॥

तथा च वक्ष्यते

सूतानामश्वसारथ्यमंबष्ठाना चिकित्सनम् ॥
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ॥ ४७ ॥

स्त्रीकार्यमन्तःपुररक्षाकारित्वं । **वणिक्पथः** स्थलपथवारिपथादिप्रसिद्धः ॥ ४७ ॥

---

१ फ-अपि । २ ख-श्चांध्र । ३ जनपदे लुप् (व्या. सू. ४।२।८१) ४ फ-तमिया । ५ फ-शब्दतया ।

For Private And Personal Use Only

मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च ॥
मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥ ४८ ॥

ताष्टिर्दारुतक्षणं तक्षा कर्म ॥ ४ ॥

क्षत्त्रुग्रपुक्कसानां तु बिलौको वधबन्धनम् ॥
धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम् ॥ ४९ ॥

बिलौकसोऽहिनकुलगर्गरादयः । तेषां वधबन्धनं क्षत्रादीनां जीविका । चर्मकार्यं कवचादिसीवनमुपानद्ग्रथनमित्येवमादि । भांडवादनं मुरजार्धमुरजादीनाम् ॥ ४९ ॥

चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ॥
वसेयुरेते विज्ञाना वर्तयन्तः स्वकर्मभिः ॥ ५० ॥

बहिर्ग्रामनिवासिनः पर्वतलक्षणाप्रदेशे निवसेयुः विज्ञाताविज्ञातिचिन्हं विदुषां यद्यस्य कर्म विहितं स तेनैव जीवेत् । उत्कृष्टं कर्मसंकरं कर्तुं न लभते ॥ ५० ॥

चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः ॥
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् ॥ ५१ ॥

प्रतिश्रयो निवासस्तेषां ग्रामान्निष्क्रान्तः स्यात् । अपपात्राश्चिरवसानीयास्तैर्येषु पात्रेषु भुक्तं तानि न संस्कार्याणि त्यक्तव्यानि । सौवर्णराजताभ्यामन्यानि । तयोः शुद्धिविशेषा उक्ताः । अथवाऽपपात्राय तदीयेषु च शक्तेषु पात्रेषु सक्तुभक्तादि न दातव्यं । भूमिष्ठे पात्रेऽन्यहस्तस्थे वा दत्वा तत्पात्रं भूमौ स्थितं तद्गृह्णीयुः भिन्नं वा पात्रमपपात्रं यथा वक्ष्यति “ भिन्नभाण्डे च भोजनम् ” इत्यादि । धनमेषां श्वगर्दभगवाश्वादि सुवर्णरजतादि धनत्वेन गृह्णीयुः ॥ ५१ ॥

वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ॥
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥ ५२ ॥

सर्वकालं परिव्रज्या नैकत्रस्थाने वसेयुः ॥ ५२ ॥

न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन् ॥
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥ ५३ ॥

समयः संकेत एककार्यता । संगतिरित्यनर्थान्तरं । एकत्र स्थानासनविहारास्तैः सह न कर्तव्या इत्यर्थः । विवाहो दारग्रहणादिः । सोऽप्येवमेव ॥ ५३ ॥

अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ॥
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥ ५४ ॥

---

१ र–तक्षणम् । २ र-शिवन । ३ र–न्यः । ४ र–स्फासा लक्षण–। ५ फ–तौ ।

रात्राविति । तत्साक्षादेषां न दातव्यं । प्रेष्यैः कैश्चित्पूर्वोक्तेन प्रकारेण दापयितव्यो रात्रौ स्पर्शाशङ्कयाऽन्तर्ग्रामनगरचर्याप्रतिषेधः ॥ ५४ ॥

दिवा चरेयुः कार्यार्थं चिन्हिता राजशासनैः ॥
अबान्धवं शवं चैवं निर्हरेयुरिति स्थितिः ॥ ५५ ॥

दिवा विचरन्ति **कार्यार्थं** क्रयविक्रयस्वकार्यसिद्ध्यर्थं राजकार्याय वा चरेयुर्नगरोत्सवप्रेक्षादिनिमित्तम् । तत्रापि च **चिन्हितराजशासनै**रुपलक्षिता राजादिष्टैर्वज्रादिचिन्हैर्वध्यवधशासनैर्वा परशुकुठारादिभिः स्कन्धारोपितैः ॥ ५५ ॥

तथा चाह

वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ॥
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥ ५६ ॥

वर्णापेतमविज्ञातं नरं कलुषयोनिजम् ॥
आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ॥ ५७ ॥

वर्णादपेतं चातुर्वर्ण्याद्भ्रष्टव्यं । **अविज्ञातं** सत्यां शङ्कायां जारजातं वक्ष्यमाणैः **कर्मभिः** स्वभावातिशयैश्च निश्चिनुयात् । हीनकर्मरतिः क्रूरकर्मा च सत्यां शङ्कायां **कलुषयोनिजो** जारजातो वेदितव्यः ॥ ५७ ॥

अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता ॥
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ ५८ ॥

अनार्यो द्वेषमत्सरप्रधानः । निष्ठुरः स्वार्थपरः । **क्रूरो** लोभहिंसापरः । **निःक्रियात्मा** विहितक्रियावर्जितः । एतैः स्वभावैः कलुषयोनिता व्यज्यते ॥ ५८ ॥

पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा ॥
न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥ ५९ ॥

दुर्योनिः संकीर्णजन्मा । **प्रकृतिं स्वा**मात्मीयं कारणं न नियमेन गृह्णाति ॥ ५९ ॥

कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसङ्करः ॥
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥ ६० ॥

तस्य शीलं येन जातो न तु यस्य क्षेत्रं स लोके प्रसिद्धः ॥ ६० ॥

यत्र त्वेते परिध्वंसाज्जायन्ते वर्णदूषकाः ॥
राष्ट्रियैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥ ६१ ॥

तस्माद्वर्णसंकरो राज्ञा परिवर्जनीयः । **राष्ट्रिया** जानपदाः । **राष्ट्र**ममात्यादयः ॥ ६१ ॥

ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ॥
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम् ॥ ६२ ॥

अनुपस्कृतो धनमगृहीत्वा अभ्यवपत्तिरनुग्रहः । **बाह्यानां** प्रतिलोमानां **सिद्धिकारणं** उत्कृष्टजातौ जन्मसिद्धेः सिद्धिहेतुत्वमेवमुच्यते । तादृशं जन्म लभन्ते यथाविकृता भवन्ति । स्वर्गादिप्राप्तिर्वा सिद्धिः ॥ ६२ ॥

*** अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ॥**
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥ ६३ ॥

शौचं मृज्जलादिबाह्यगतं **सामासिकं** समस्तस्य सर्वमनुष्यभेदजातेरुक्तं । न ब्राह्मणादिजातिविभागेन व्याख्यातमन्यत् । यद्यहिंसाप्रतिलोमानां धर्मः स्यात्कथं तर्हि तदुक्तं "मत्स्यघातो निषादानां विलौको वधबन्धनम् । क्षत्रादीनामरण्येयं पशुहिंसनमेव च" ॥ केचिदाहुः । ये जीविकाहेतुतया वध्यत्वेनोक्तास्ततोऽन्यत्राहिंसा । अन्ये मन्यन्ते अहिंसास्तेषामभ्युदयसाधनहेतुत्वेन धर्मो न तु प्रतिषेधो हिंसायाः संमत इति । यथा "न मांसभक्षणे दोष" इतिवत् । यद्यहिंसाधर्मस्तेषां कथं तर्हि तैर्जीवितव्यं । यथा कुताश्चिदवगमस्तेषामुत्पन्नः हिंसानिवृत्तिर्नो धर्मायेति चेत्तदा को जीवनोपायः । अन्याश्च वृत्तयः प्रतिवर्णनियता अध्यापनादयस्तावदत्यन्तासंभवादप्राप्ताः कृष्यादयोऽपि वैश्यनियताः । शूद्रस्य सेवाऽन्या वा साधारणी वृत्तिरस्ति । यथा "वर्तेरन्विद्याशिल्पं" इत्यत्र दर्शयिष्यामः । यदपीदमुच्यते "अतिनिन्दितैर्वर्तयेयुर्द्विजानामेव कर्मभिः" इति तत्र किमस्ति निन्दिततरमन्यदतो हिंसायाः न च मत्स्यघातो द्विजानामुपयुज्यते । श्राद्धेऽतिथिभोजनादौ च कदाचित्क उपयोगो न सार्वकालिको जीविकाभावः । तस्मान्न घातादिस्वतंत्रम् ॥ ६३ ॥

शूद्रायां ब्राह्मणाज्जाता श्रेयसा चेत्प्रजायते ॥
अश्रेयान् श्रेयसीं जातिं गच्छत्या सप्तमाद्युगात् ॥ ६४ ॥

गर्भं गृह्णाति गर्भश्च श्रवणाज्जात इति पुलिङ्गनिर्देशे पित्र्यर्थे योग्यता विज्ञेया । अत इदमुक्तं भवति । **शूद्रायां ब्राह्मणात्** या जाता कुमारी सा **चेच्छ्रेयसा** जात्युत्कर्षवता ब्राह्मणेनैव **प्रजायते** विवाहादिसंस्कृताऽपत्योत्पत्तिहेतुसंबन्धं प्राप्नोति । तस्यामपि यदि कुमारी जायते सा ब्राह्मणेनैव विवाह्यते । एवमनया परंपरया सप्तमे पुरुषे प्राप्ते ब्राह्मण्यां यस्तत्र जायते तस्य भवति श्रेयसेति यद्यप्युत्कृष्टजातीयमात्रे वर्तते तथापीह

१ ख–त्यमक्रोधः २ र–एवं । ३ र–जघान्या । ४ र–ताः, फ–तः । ५ ख–ग । ६ फ–श्रेयसे सति ।

* आर्द्रं कर्मातिथेयं च दानमस्तेयमार्जवम् ॥ प्रजनं स्वेषु दारेषु तथा चैवानुसूयता ॥१॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणपदसन्निधानादुत्तरत्र च "शूद्रो ब्राह्मणतामेति" इति वचनात् ब्राह्मण्यप्राप्तिः शूद्रवर्णस्य विज्ञेया । अनयैव कल्पनया पञ्चमे वैश्यायां जातस्य वर्णस्य तृतीये क्षत्रियायामत्रापि स्त्रीत उत्कर्षः । एवं वैश्यस्य तृतीये क्षत्रियत्वं शूद्रायां जातायाः कुमार्या वैश्यान्तरेण संयोगे तृतीये जन्मनि वैश्यत्वं क्षत्रियजातायाः शूद्रायाः पञ्चमे युग इति । युगशब्दो जन्मवचनः । **अश्रेयान्**निकृष्टजातीयः **श्रेयसी**मुत्कृष्टाजातिं **गच्छति** प्राप्नोति । **आङ्** अभिविधौ । एव एवार्थः ॥ ६४ ॥

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ॥
क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च ॥ ६५ ॥

शूद्रो ब्राह्मणतामेतीत्युक्तोऽर्थः । **ब्राह्मणश्चैति शूद्रताम्** । ब्राह्मणोऽत्र पारशवो ब्राह्मणजातो विज्ञेयः । स चोक्तलक्षणशूद्रां यदि परिणयते तदाऽपकर्षं जन्मनि प्राप्नोति । तृतीय इति व्याचक्षते । एते यथोक्ते युगपरिवर्त उत्कर्षं प्राप्तं यथासंस्कारैः कर्मभिश्चाधिक्रियन्ते ॥ ६५ ॥

अनार्यायां समुत्पन्नो ब्राह्मणात्तु[1] यदृच्छया ॥
ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं [2]केति चेद्भवेत् ॥ ६६ ॥

किंशब्दः क्षेपे । यदि बीजप्राधान्याद्धीनजातीयासु जाता मातृजातेरुत्कृष्टाः क्रमेण पितृजातितां प्राप्नुवन्ति । इदं तर्हि क्षेत्रप्राधान्येऽपि द्रष्टव्यं । यथा क्षेत्रजः पुत्रोऽतश्च यथा**ऽनार्यायां** शूद्रायां **ब्राह्मणा**ज्जात उत्कृष्टो भवति **यदृच्छया** यथाकथंचिद-नूढायामपि । एवं **ब्राह्मण्यामनार्या**च्छूद्रात्क्षेत्रप्राधान्येन **श्रेयस्त्वम्** । यथोक्तं "क्वचित् बीजं क्वचिद्योनिः" इति ॥ ६६ ॥

जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः ॥
जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः ॥ ६७ ॥

नार्यां स्त्रिया**मनार्यायां** हीनजातीयाया**मार्याज्जात** उत्कृष्टजातीयाद्ब्राह्मणा**दार्य एव भवेत्** । किं ब्राह्मणजातीयत्वं नेत्याह । **गुणैर्**गुणतो गौण्या वृत्त्या । पाकयज्ञा-द्यधिकारमात्रेण वक्ष्यमाणानार्यापेक्षयाऽऽर्य इत्युच्यते । **अनार्याच्छूद्रादार्यायां** ब्राह्मण्यां **जातोऽनार्य** एवैष **निश्चयः** । एतदुक्तं भवति । यावद्वचनमेव प्राधान्यमवतिष्ठते नानुमानेन शक्यमन्यत्प्रसंजयितुमतः समानजातीयागमनमेव युक्तं क्षेत्रप्राधान्यं क्षेत्रज एवमन्यत्र ॥ ६७ ॥

---

१ र-तु । २ केति चेद्भवेत्=केनचिद्भवेत (य, ल)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः ॥
वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः ॥ ६८ ॥

एवं च कृत्वोभावपि चण्डालः पाराशवश्च**ासंस्कार्या**वनुपनेयौ । अत्र हेतुमन्निगदोऽर्थवादः । **वैगुण्याज्जन्मतः पूर्वे** ब्राह्मणाद्यः शूद्रायां जातः सत्यपि बीजप्राधान्ये विगुणमेतस्य जन्म योनिदोषात् । **उत्तर**श्चण्डालः । स प्रतिलोमोऽत्यन्तप्रातिलोम्यात् सत्यपि क्षेत्रप्राधान्ये पितृदोषात् ॥ ६८ ॥

सुबीजं चैव सुक्षेत्रे जातं संपद्यते यथा ॥
तथाऽऽर्याज्जात आर्यायां सर्वं संस्कारमर्हति ॥ ६९ ॥

पूर्वोक्तावसंस्कार्यौ स्वजातिजास्तु संस्कार्या इत्युभयत्राप्यर्थवादः । अत एतदेव स्थितम् । "क्वचिद्बीजं क्वचिद्योनिः" इति । यथोपदेशात् एकान्तरपरिग्रहस्तु न युक्तः ॥ ६९ ॥

बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ॥
बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः ॥ ७० ॥

यथा त्रय एते पक्षास्तेषां कश्चित्पक्षः केनचित्परिगृहीतः । केचिदाहुर्**बीजमे**त्र ज्यायस्तथा च ब्राह्मणाज्जातः क्षत्रियादिस्त्रिषु मातृजातित उत्कृष्टः । अन्ये पुनराहुः । **क्षेत्रं** श्रेष्ठं यतः क्षेत्रियो यत्र क्षेत्रे जातः तज्जातीयो भवति तस्यैव च तदपत्यं । अपरे मन्यन्ते । उभये बीजक्षेत्रे ज्यायसी । तदुक्तं "सुबीजं चैव सुक्षेत्र" इति । तदेतत्सर्वमारोचयमान आह **तत्रेयं तु व्यवस्थितिः** इयमत्र निरूप्यावस्थितं ॥ ७० ॥

अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति ॥
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥ ७१ ॥

अक्षेत्रे ऊषरे **उत्सृष्ट**मुप्तमपि बीजमन्तरैवादत्वैव **फलं नश्यति**। **अबीजकम**योग्यबीजकं **क्षेत्रं** वा **स्थण्डिलमेव भवेत्केवलं** ततो न फलं लभ्यत इत्यर्थः ॥ ७१ ॥

यस्माद्बीजप्रभावेण तिर्यग्जा ऋषयोऽभवन् ॥
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ॥ ७२ ॥

पूजिताः सर्वेण केनचित्प्रणम्यन्ते । **प्रशस्ताः** स्तुतिवचनैः स्तूयन्ते । **तस्माद्बीजं** विशिष्यत इति बीजप्राधान्यवादिनस्तदेतदयुक्तमित्युक्तं "तत्रेयं तु व्यवस्थितिः" इति । अथवा **बीजप्रभावेनेति** न बीजप्राधान्यं दर्शितमपि तु दूषणमेव । यदा शक्यन्ते बीजप्राधान्यान्मन्दपालादीनां तिर्यग्जा ऋषय इति बीजप्राधान्यं तद्दर्शनात् । न तत्र बीजप्राधान्येन तदपत्यानामृषित्वमपि तु तपःश्रुतादिनेन प्रभावेन धर्मविशेषेण ॥ ७२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणम् ॥
संप्रधार्याब्रवीद्धाता न समौ नासमाविति ॥ ७३ ॥

अनार्यः शूद्रः । स **आर्यकर्मा** द्विजातिशुश्रूषादिरतः पाकयज्ञयाजी च देवद्विजनमस्कारपरः । **आर्यो** ब्राह्मणादिः । **सोनार्यकर्मा** प्रतिषिद्धाचरणो विहितकर्मत्यागी । तावुभौ संप्रधार्य तद्गुणत्वेनावगम्य तयोः किं कस्यचित्सातिशयो गुणः कस्याश्चिद्वाऽन्ते निरूपणबुद्धिः **संप्रधार्य धाता** प्राजपतिर्मनुर्बुद्धा निरूप्या**ब्रवीत् न समौ** जातेर्गरीयस्या उत्कृष्टगुणोऽपि शूद्रतुल्यः स्यात् । पुनराह समौ किं जात्या तूत्कृष्टयाऽपि बहुदोषावगृहीतस्यैतदुक्तं भवति । न जातिबलमाश्रित्य नरो माननीयः किंतु गुणा माननीयाः । न गुणहीनं जातिः परित्रातुमलं । प्रायश्चित्तोपदेशवैयर्थ्यप्रसङ्गात् । "अनार्यायां समुत्पन्नः" इत्यत आरभ्य यावदयं श्लोको वर्णसङ्करनिन्दाकर्मप्रशंसार्थो नात्र किंचिद्विधीयते प्रतिषिध्यते वा । नापूर्वार्थो ज्ञाप्यतेऽभिलक्षणवत् । तस्मात्प्रशंसार्था एवैते ॥ ७३ ॥

ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः ॥
ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमम् ॥ ७४ ॥

आपद्धर्माणामुपोद्धातो योनिः कारणं । **ब्राह्मणा ब्रह्मयोनिस्थास्ते षट्कर्माण्युपजीवेयुरनुतिष्ठेयुः** । अनेकार्था धातवो **यथाक्रमं** यथाविकारं यस्मिन्कर्मणि योऽधिकारी कानिचिद्विध्यर्थानि कानिचिद्दृष्टार्थानि ॥ ७४ ॥

अध्यापनमध्ययनं यजनं याजनं तथा ॥
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥ ७५ ॥

प्रथमेऽध्याये शास्त्रस्तुत्यर्थं एषां पाठः । इह तु विध्यर्थम् । यद्यपि तेषां केवलानां विधिरुक्तस्तथापीह समस्य निर्दिश्यते सौहार्देन विध्यन्तरसापेक्ष्यमेवेदं रूपं वचनाच्चैतेषां कर्मणामतो यथाविहितमनूद्य वक्ष्यमाणोऽर्थो विधीयते ॥ ७५ ॥

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ ७६ ॥

कर्मत्रिकविभागः स्पष्टप्रयोजनः । एकं त्रिकं दृष्टार्थमुपात्तं । सामर्थ्यादन्यस्यादृष्टार्थता । **विशुद्धो**ऽपापकर्मा । एवं शूद्रोपि विशुद्धः प्राप्नोति । को भवतो मत्सरः स्मृत्यन्तरविरोधः प्राप्नोति । प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुञ्जीत प्रतिगृह्णीयाच्चेति । एवं तर्हि यथाऽविरोधो भवति तथा व्याख्येयं । न ह्यविरोधे संभवति विरोधो न्याय्यः । अपि चानुवाद एवायं 'राजतो धनमन्विच्छेत्' इति । एवमादावस्यार्थस्य विहितत्वात् ॥ ७६ ॥

---

१ फ–दितः । २ र–सौ हा देश्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्रियं प्रति ॥
अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ॥ ७७ ॥

जीविकाकर्माण्येतानि क्षत्रियस्य न भवन्ति । यानि त्वदृष्टार्थानीष्ट्यध्ययनदानानि न विवर्तन्ते । वेदस्य च प्रकृतत्वादेतदध्यापनं निषिध्यते । न तु धनुर्वेदाशिल्पकलाविद्याः ॥ ७७ ॥

वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः ॥
न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ॥ ७८ ॥

पूर्वेणैतद्व्याख्यातं । तौ क्षत्रियवैश्यौ प्रत्येतेऽध्यापनादयो धर्मा मनुना प्रजापतिना नोक्ता न स्मृता इत्यर्थः ॥ ७८ ॥

शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषीर्विशः ॥
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ॥ ७९ ॥

इदं तयोर्जीविकाकर्म शस्त्रं खड्गादि । अस्त्रं तन्मन्त्राः धनुर्वेदप्रसिद्धाः । अयमप्युक्तानुवाद एव । वणिक्पशुशब्दौ वणिक्कर्मान्तर्भावेन प्रयुक्तौ । वणिज्या पशुपालनं च यद्यप्यध्ययनादिधर्माः सर्वेषां सन्ति तथापि प्राधान्यमेतेषाम् ॥ ७९ ॥

वेदाभ्यासो ब्रह्मणस्य क्षत्रियस्य च रक्षणम् ॥
वार्ताकर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ॥ ८० ॥

वेदाभ्यासो वृत्तिप्रकरणादध्यापनं एवं विशिष्टानि स्वकर्मशास्त्रप्रवृत्तिकर्मस्वन्येभ्यो जीवनकर्मभ्य इमानि श्रेयस्करतराणि ॥ ८० ॥

अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा ॥
जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥ ८१ ॥

यदाऽस्य शरीरकुटुंबनित्यकर्मावसादो भवति न तेभ्यः प्राप्तं धनं भवति तदा यमजीवन्नित्युच्यते यथोक्तेनाध्यापनादिना तदा क्षत्रियवत् ग्रामनगररक्षादिना शस्त्रास्त्रधरणेन सति संभवे सर्वाधिपत्येन जीवेत् । जीवतिर्व्याख्यातार्थः । शरीरमात्रसंधारणे न वर्तते । किं तर्हि कुटुंबस्वकर्मनित्यकर्मावस्थितिमपि लक्षयति । स ह्यस्य प्रत्यनन्तरोऽनन्तर एव प्रत्यनन्तरः । हेतुवचनाद्व्यवहितानिवृत्तिः पापकारी स्ववृत्तिपरित्यागेपि नैवं मन्तव्यं शास्त्रातिक्रमकृतस्तत्र न विशेषो वैश्यशूद्रेष्वपीति ॥ ८१ ॥

तथा चाह

उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ॥
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥ ८२ ॥

---

१ फ–काणिक्पशु कृषिर्वंशः, वणिक्पशु, ण–कृविशः । २ र–णा । ३ र–करा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उभाभ्यामप्यजीवंस्तु क्रमोऽनेन प्रदर्श्यते। प्रथममनन्तरा वृत्तिस्तदभावे व्यवहितेति। कृषिगोरक्षाग्रहणं वैश्यवृत्तिमात्रप्रदर्शनार्थं । तथा च वणिग्ज्यायामाविक्रयप्रतिषेधं वक्ष्यति "जीवेद्वैश्यस्य जीविकाम्"इति । " सामान्यविशेषभावेन क्रियायाः साध्यसाधनभावः प्रागुपपादितः। तत्र कृषिवाणिज्यकुशीदान्यनापद्यैवोक्तान्यध्यापनादिवत्। "प्रमृतं कर्षणं स्मृतम् । सत्यानृतं तु वाणिज्यम्" इति। तु केचिदाहुः (गौ०९।५-६)। "कृषिवाणिज्ये वा स्वयंकृते । कुसीदं चेति" । उक्तं स्वयंकरणमत्राभ्यनुज्ञायते । यत्त्वध्यापनादिवदिति साम्यमाशङ्कितमत्रैव परिहृतं यदि सर्वेषां कृष्यादयः समत्वेन स्युः कथमिदमुच्यते "वणिक्पशुकृषीर्विशः"। आजीवनार्थं ब्राह्मणक्षत्रिययोरपि नाऽऽजीवनार्थस्तदा। किंच 'याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः' इत्यत्र तान्यपि समाख्यास्यत् । तस्मादध्यापनादिनियमैर्जीवतः कृष्यादयः प्रतिषिद्धा एव । यस्तु प्रकरणादन्यत्रैषामुपदेशः स तत्रैव प्रदर्शितप्रयोजनः ॥८२॥

वैश्यवृत्त्याऽपि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा ॥
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥ ८३ ॥

कृषिनिन्देतरवैश्यवृत्तिस्तुत्यर्था न पुनस्तस्यामप्रतिषेधार्था। तथा च सति उपदेशो व्यर्थोऽस्यापद्यते ॥ ८३ ॥

कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता ॥
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥ ८४ ॥

कृषिं लोकाः साध्वेव कर्मेति मन्यन्ते । न तु तद्युक्तम् । कर्षतः पुरुषस्य बहु धान्यं भवति। ततोऽतिथ्यादिभ्योऽन्नदानेनोपकरोत्यतः साध्वी । तथा चोक्तं "नाकृष्यतोऽतिथिप्रियः । कृषिं यत्नेन कुर्वीत मौर्व्या सर्वत्र यत्नतः" । तथा "लाङ्गलं पवीरवं सुशेवं सुमतित्सरु । उदित्कृषतिगामविंप्रफर्व्यं च पीवरीम्" इत्यादि तेन सम्यक् मन्यन्ते। सा हि वृत्तिः सद्भिर्निन्द्यते । कस्य हेतोर्भूमिं हन्ति **काष्ठमयोमुखं** लाङ्गलं **भूमिशयांश्च** भूमौ शेरते ये प्राणिनस्तृणजलूकादयस्तांश्च हन्ति । ननु च भूमेः कीदृशं हननं न हि सा प्राणिवत्काष्ठवत्पीडामनुभवति । अनुभवन्ती तु सर्वविदारणं भूमेर्दोषवदिति ज्ञापयति ॥८४॥

इदं तु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणम् ॥
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्धनम् ॥ ८५ ॥

इदमिति वक्ष्यमाणस्य प्रतिनिर्देशः। विशः पण्यं **विट्पण्यं** वैश्यानां यद्विक्रेयं तदपि वृत्तिवैकल्याद्धानाभावाद्ब्राह्मणेन विक्रेयं। उद्धार्याणि द्रव्याण्युद्धारशब्देनोच्यन्ते । उद्धृत उद्धारो

१ ट—वयायाम । २ ख—स्यातः । ३ विक्रेयं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्मिन् तदेवमुच्यते । वक्ष्यमाणानि द्रव्याण्यत उद्धृत्यान्यानि विक्रेयाणि । **वित्तवर्धनमिति** भावानुवादः । वाणिज्यायां हि धनवृद्धिः प्रसिद्धा । **त्यजतो धर्मनैपुण्यं** धर्मे या निष्ठाऽतस्तेन पण्यविक्रयो न कर्तव्य इति ज्ञापयति । अतश्चेदमवगम्यते सर्वासां वैश्यवृत्तीनां गर्हिता कृषिः । ततो गोरक्षादयः ॥ ८५ ॥

सर्वान् रसानपोहेत कृतान्नं च तिलैः सह ॥
अश्मनो लवणं चैव पशवो ये च मानुषाः ॥ ८६ ॥

मधुरादयः षड्रसाः । तत्प्रधानानि द्रव्याणि गुडदाडिमकिराततिक्तकादीनि प्रतिषिध्यन्ते । न हि केवलानां रसानां संभवः । यद्यपि रसशब्दो न स्वयं द्रव्ये शुक्लादिशब्दवद्वर्तते सामानाधिकरण्येन तथापि लक्षयति द्रव्यं 'गंगायां घोष' इति । तथा **अपोहेत** त्यजेन्न विक्रीणीयादिति यावत् । **कृतान्नं** सिद्धमन्नमोदनादि तण्डुलादि च **तिलैः सह** । तिला अपि न विक्रेयाः । न तु पुनस्तिलकृतान्नयोः सह प्रयुक्तयोः प्रतिषेधः केवलयोरभ्यनुज्ञानं । **अश्मानः** सर्वपाषाणाः । **लवण**मपाषाणरूपमपि सैन्धवस्य पाषाणशब्देन ग्रहणं रसपक्षे लवणस्य नित्यार्थ आरंभस्तेन मधुरादीनां पाक्षिको विक्रयः । **पशवो** ग्राम्यारण्याः । **मानुषा** मनुष्याः ॥ ८६ ॥

सर्वं च तान्तवं रक्तं शाणक्षौमाजिनानि[1] च ॥
अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥ ८७ ॥

तान्तवं तन्तुनिर्मितं वस्त्रपटबृहतिकादि । **रक्तं** लोहितं । लोहिते वर्णे रक्तशब्दः प्रसिद्धतरः । तथाहि रक्तो गौर्लोहित उच्यते । यद्यपि शुक्लस्य वर्णान्तरापादनमपि रञ्जेरर्थः **शाणक्षौमाजिना**न्यरक्तान्यपि । यत आह । **अपि चेत्स्युररक्तानि** । शिष्टं प्रसिद्धम् ॥ ८७ ॥

अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः ॥
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥ ८८ ॥

शस्त्रं खड्गपाशादि । **गन्धा**स्तगरोशीरचन्दनादयो द्रव्यविशेषाः । रसशब्दवदेतद्व्याख्येयं । **क्षीरं** रसविकारं स्मृत्यंतरप्रसिद्धमतो मस्तुकिलाटोदश्विदादीन्यपि न विक्रेयानि । **दधिघृत**ग्रहणं प्राधान्यादुपात्तम् । **मधु** मधूच्छिष्टमेकदेशलोपाद्देवदत्तो दत्त इतिवत् । **स्मृत्यन्तरे** हि तत्प्रतिषिद्धम् । इह च क्षौद्रशब्देन सारघस्य निषिद्धत्वान्माध्वीकस्य च मद्यग्रहणेनोत्तरत्र प्रतिषेधात् । अन्ये तु माध्वीकस्यैवाप्राप्तमद्यावस्थस्य प्रतिषेधार्थं मधुशब्दं वर्णयन्ति । तदयुक्तं । नायं निष्पीडितमृद्धिकारसवचनः । किं तर्हि ?

---

१ फ—क्षौमाविकानि=क्षौमविकारि (राम०) । २ मधु=मज्जा (ल)

For Private And Personal Use Only

मद्यरूपतयैव वर्तत उभौ मध्वासवक्षीवाविति प्रयोगदर्शनात् क्षीवतामद्यकृतैव गुडस्य रसत्वप्रतिषेधे निवृत्त्यर्थग्रहणं। अन्ये तु खण्डमत्स्याण्डिकादीनामनुज्ञानार्थं व्याचक्षते ॥८८॥

*** आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च ॥**
मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफांस्तथा ॥ ८९ ॥

आरण्यपशुशब्दौ गुडलवणेनैव व्याख्यातौ ग्राम्यपश्वनुज्ञानार्थं ग्राम्या अपि पशवो हिंसायां संयोग इति निषिद्धार्थः । **दंष्ट्रिणः** श्वशूकरादयः । **वयांसि** पक्षिणः । **एकशफा** अश्वा अश्वतरगर्दभादयः । बहूनिति तथा शब्दस्थाने पठन्ति । एकस्य विक्रये तथा न दोषः ॥ ८९ ॥

कामुमुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः ॥
विक्रीणीत तिलान् शुद्धान्धर्मार्थमचिरस्थितान ॥ ९० ॥

" कृतान्नं च तिलैः सह " इति प्रतिषिद्धानां तिलानां स्वरूपप्रयोजनविशेषाश्रयः प्रतिप्रसवः । **शुद्धानचिरस्थितानिति** च स्वरूपविशेषः । **धर्मार्थमिति** प्रयोजनविशेषः । **शुद्धा** व्रीह्यादिभिरमिश्राः । कृशराद्यर्थं मिश्राणां विक्रयासंभवः । **अचिरस्थिताः** अर्थादिकं लाभमनपेक्ष्य स्वल्पं मूल्यमद्यकालान्तरेणागामी बहुमूल्यं लभेयेत्येवं न प्रतीक्षितव्यं । अथवा शुद्धा अकृष्णाः । कृष्णतिलानां प्रतिषेधः । अचिरस्थितानिति वेयमर्थे । चिरस्थितं हि कृष्णं भवति । कृष्णा उत्पाद्य क्रीत्वा न विक्रेयाः । **स्वयं कृष्या कृषीवल इति** । प्रायिकोऽनुवादो न विवक्षितानि पदानि प्रतिग्रहाद्यर्जितानामप्यप्रतिषेधः । धर्मप्रयोजने यत्तिलान् विक्रीयन्ते । इह च रूपकैर्गावो दक्षिणाद्यर्थं स्वाध्यायाग्निहोत्राद्यर्थं क्रीयन्ते । व्राह्यादयो वा दर्शपूर्णमासाद्यर्थं स धर्मार्थो विक्रयः । यस्य वा तिला एव दानादिधर्मायोपयुज्यन्ते भेषजतैलोपयोगे वा क्रेतुः सोऽप्येवमेव ॥ ९० ॥

भोजनाभ्यञ्जनादानाद्यदन्यत्कुरुते तिलैः ॥
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥ ९१ ॥

प्रकृततिलैर्विशेषव्यतिरेकेण तिलविक्रयप्रतिषेधे विशेषोऽयमर्थवादः । ननु चोक्तं प्रतिषेधानां दोषसूचनं फलतयैव संबध्यते तत्किं " भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमिभूत " इत्ययमर्थवाद इत्युच्यते । असंभविनः फलस्य शास्त्रान्तरेण

---

*त्रपुसीसं तथा लोहं तैजसानि च सर्वशः ॥ वालांश्चर्म तथास्थीनि सस्नायूनि च वर्जयेत् ॥१॥

१ र–हस्त । २ र–दष्टयांतु । ३ र–शुद्धा अन्यात्तु व्राह्यादिभिः । ४ र–विक्रेयानि । र–तिलप्रार्थं ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विरुद्धस्य च श्रवणादेवमुच्यते । तथा पितृभिः सहेत्युच्यते । न च तैः किंचिदपराद्धं । सुकृतदुष्कृतयोः फलं हि कर्तृगामि । न च पितॄणां कथंचिदपि कर्तृत्वमित्येतत्प्रागुक्तमेव । किंच "सद्यः पतति मांसेन" इति पतितत्ववचनं परेषां न पातित्यमिति नियमात् । तस्मादस्ति किंचिदनिष्टमित्येतावन्मात्रं प्रतिषेधेन संबध्यते । यथाश्रुतमेव युक्तं भोजनादिक्रिया यत्र तद्व्यतिरेकेण **यदन्यद्विक्रयस्थानादि** तत्र **तिलैर्यः कुरुते** स **कृमित्वं प्राप्नोति** यथोक्तेन दोषेण संयुज्यते ॥ ९१ ॥

सद्यः पतति मांसेन लाक्षया लवणेन च ॥
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥ ९२ ॥

उक्तार्थः ॥ ९२ ॥

इतरेषां तु पण्यानां विक्रयादिह कामतः ॥
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥ ९३ ॥

कामत इतिवचनादनापदित्यनुमीयते । गुरुलघुत्वदर्शनं मांसादीनां प्रायश्चित्तविशेषार्थं गुरुणिगुरूणि लघुनिलघूनीति वक्ष्यामः ॥ ९३ ॥

रसा रसैर्निमातव्या न त्वेव लवणं रसैः ॥
कृतान्नं चाकृतान्नेन तिला धान्येन तत्समाः ॥ ९४ ॥

रसाः पूर्वोक्तास्ते **रसैर्निमातव्याः** । मधुरसं गुडादि दत्वाऽऽम्लादिरसमामलक्यादि ग्रहीतव्यं । न केवलं **लवणं** दत्वा रसान्तरमादेयं । पाठान्तरं 'लवणं तिलैरिति' । अस्मिन्पाठे तिलैरेव लवणस्य प्रतिषेधो न रसान्तरैः । **कृतान्नं** सक्त्वोदनाद्यकृतान्नेन पायसादिना निमातव्यं । **तिलास्तु** धान्येन[1] व्रीह्यादिना **तत्समाः** प्रस्थं दत्वा प्रस्थ एव ग्रहीतव्यो नार्थापेक्षयाऽधिकं वादेयं । विनिमयो नाम विक्रय एव । क्रीणातिस्तु द्रव्यविनिमये पठ्यते । न हि तद्युक्तं । "विक्रये प्रकृतिविनिमयमास्त्विति" **गौतमेनैवं** दर्शितं । एवं तर्हि प्रसिद्धेन रूपकादिना द्रव्यार्पणं विक्रयः । तदन्यद्रव्यपरिवृत्तौ विनिमयः ॥ ९४ ॥

जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः ॥
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ॥ ९५ ॥

एतेन सर्वेणापि प्रतिषिद्धपण्यप्रतिप्रसवोऽयं राजन्यस्य । न किंचित्तस्याविक्रेयं वैश्यवत् । किंतु सत्यपि स्ववृत्तित्यागेन **ज्यायसीं** ब्राह्मणवृत्तिं कदाचिदप्य**भिमन्येत** इ मां करोमीति चेतसि **न** कुर्यात् । प्रतिकूलं दैव**मनय** एतदापदुपलक्षणार्थं **गतः** प्राप्तः । आपद्गत इति यावत् ॥ ९५ ॥

---

१ फ–धन्येन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः ॥
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥ ९६ ॥

यो जात्याऽधमो निकृष्टः क्षत्रियादिः । सत्यपि प्रकृतत्वे राजन्यस्य सर्वेषामयं ब्राह्मणवृत्तिप्रतिषेध एवमेवायं श्लोकः। उत्कृष्टे निरपेक्षो ब्राह्मण एव **कर्मभि**रध्ययनादिभिर्जीवति । दण्डोऽयं सर्वस्वग्रहणप्रवासनैः ॥ ९६ ॥

वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः ॥
परधर्मेण जीवन्हि सद्यः पतति जातितः ॥ ९७ ॥

पूर्वस्य विधेर्निन्दार्थवादोऽयम् । यो यस्य विहितो **धर्मो** जात्याश्रयेण **विगुणो**ऽप्यपरिपूर्णाङ्गोऽपि युक्तोऽनुष्ठातुं न परधर्मः सर्वाङ्गसंपूर्णोऽपि । अत्र निन्दार्थवादः **परधर्मेणे**ति ॥ ९७ ॥

वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्याऽपि वर्तयेत् ॥
अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ॥ ९८ ॥

स्वधर्मेणा**जीवतो** वैश्यस्य शूद्रवृत्तिरनुज्ञायते पादधावनादिशुश्रूषया । **अनाचरन्नकार्याणि** । उच्छिष्टापमार्जनाद्यकार्यं । तत्परिहर्तव्यं । **शक्तिमान्निवर्तेते**ति सर्वशेषः । अत्र केनचिदुक्तं सामर्थ्यात् ब्राह्मणक्षत्रिययोरप्येतदतिदिश्यते । तत्रापरेण संदिह्यते । कथं शूद्रवृत्तिं ब्राह्मणः कुर्यात् । एवं हि श्रूयते

“उत्कृष्टं चापकृष्टं च विद्येते कर्मणी तयोः । मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते”॥ इति । तदुक्तं न त्वस्यायमर्थो ब्राह्मणस्य शूद्रवृत्तिरनुज्ञायते सामर्थ्यादिति । किं तर्हि निवर्तेत च शक्तिमानिति यदस्माभिरुक्तं सर्वे शेष इति ॥ ९८ ॥

अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम् ॥
पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ॥ ९९ ॥

कारुकाः शिल्पिनः सूदतन्तुवायादयस्तेषां कर्माणि पाकवयनादीनि प्रसिद्धानि तैर्जीवेत । **पुत्रदारात्यय**स्तद्भरणासमर्थता । एतेन धनतन्त्रभंगेन तस्यापदि विवाहादिकर्मणामेषां विधानान्निकृष्टताऽनुमीयते ॥ ९९ ॥

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ॥
तानि कारुककर्माणि शिल्पानि विविधानि च ॥ १०० ॥

प्रचरितैरनुष्ठितैः। **शुश्रूष्यन्ते** सेव्यन्ते । तदुपयोगीनि यानि **कर्माणि शिल्पानि**।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यपि शिल्पमपि कारुकर्मैव तथापीह भेदेनोपादानात्तक्षकिवर्धकिप्रभृतयः कारवस्तेषां कर्माणि तक्षणवर्धनादीनि शिल्पानि यत्र छेदरूपकर्माण्यालेख्यानि ॥ १०० ॥

वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथि स्थितः ॥
अवृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत् ॥ १०१ ॥

अनातिष्ठन्निच्छया । एतदुक्तं भवति । क्षत्रवृत्त्यसंभवे यदि वा वैश्यवृत्तिमाचरेदसत्प्रतिग्रहं वा तुल्ये एते वृत्ती । असत्प्रतिग्रहात्क्षत्रवृत्तिः श्रेयसी । अथवाऽ**नातिष्ठन्** वैश्यवृत्तिरसंभवे ततश्चासत्प्रतिग्रहो वैश्यवृत्तेर्हीनतरः । स्वे पथि स्थित इति ब्रुवन्नापद्वृत्तीनां समुच्चयोऽस्तीति ज्ञापयति । **अवृत्त्या कर्शितं सीदन्नवसादं प्राप्नुयात्** ॥ १०१ ॥

सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः ॥
पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते ॥ १०२ ॥

सर्वत इति प्रतिग्राह्यजातिगुणानामपेक्षा न कर्तव्या । अत्रापि हीनहीनतरहीनतमेषु क्रमेण पूर्वपूर्वाभाव उत्तरोत्तरप्राप्तिरस्त्येव । यथा क्षत्रवृत्त्यभावे वैश्यवृत्तिः । **पवित्रं** गङ्गास्रोतस्तदमेध्यसंसर्गेण **दुष्यति** "नदी वेगेन शुध्यति" इत्युक्तं । एवं ब्राह्मणोऽपीति ॥ १०२ ॥

नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ॥
दोषो भवति विप्राणां ज्वलनांबुसमा हि ते ॥ १०३ ॥

पूर्वेणासत्प्रतिग्रह उक्तः । अनेन याजनाध्यापने अनुज्ञायेते । **गर्हितादिति** सिंहावलोकितवत्पूर्वाभ्यामप्यभिसंबध्यते । यथाग्निरापश्च सर्वत्र शुद्धा एवं ब्राह्मणा अपीति प्रशंसा केचिदाहुः । असत्प्रतिग्रहवदसद्याजनाध्यापने अप्यनुज्ञायेते । यद्यभविष्यतां तदा पूर्वश्लोक एवं प्रतिग्रहवदपाठिष्यतां । इह तु विधिप्रत्ययाभावाद्**दोषो भवति विप्राणा**मिति वर्तमानप्रत्ययेन सिद्धव्यपदेशादर्थवादताप्रतीतेः । किंच प्रतिवचनं तावदर्थवादः पूर्वेण सिद्धत्वात्तदेव वाक्यत्वापत्तेर्याजनाध्यापने अप्येवं भवितुमर्हतः । वयं तु ब्रूमोऽसंभवे सत्प्रतिग्रहस्य तत्रापि वृत्तिर्युक्ता । यतः प्रभृतिः[1] स्मर्यते । यथाकथंचित्स आत्मानमुद्धरेदन्यत्र प्रत्यवायेभ्यः[3] । कर्मार्थस्त्वापद्धर्मपाठः[2] ॥ १०३ ॥

जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ॥
आकाशमिव पङ्केन न स पापेन लिप्यते ॥ १०४ ॥

पूर्वेणासत्प्रतिग्रह उक्तोऽनेन प्रतिग्रहदुष्टमन्नमप्यनुज्ञायते । ततस्तत इति जातिकर्मोत्तदपेक्षमत्र स्वामिनमाह । शेषार्थवादश्च ॥ १०४ ॥

---

१ र–वचनं । २ र–प्रवृत्ति । ३ र–पतनायेत्यः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अजीगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः ॥
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥ १०५ ॥

अजीगर्तो नाम ऋषिः । स क्षुत्परिपीडितः पुत्रं **सुतं** शुनःशेपनामानं **हंतुमुपासर्पत्** प्रचक्रमे । न चासौ क्रव्याद इति युज्यते । शौनःशेपमाख्यानं **बह्वृचि** सुप्रसिद्धं । नात्र विस्तर आगमस्योपयुज्यते । परमार्थस्तु प्रकृतिरूपोर्थऽवादः । एवं सर्व एते द्रष्टव्याः ॥१०५॥

श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्माधर्मविचक्षणः ॥
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥ १०६ ॥

एवं **वामदेवो** नाम ऋषिः । स **आर्त्तः** क्षुधा **श्वमांसमत्तुं** भक्षयितुमैच्छत् ॥ १०६॥

भरद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने ॥
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः ॥ १०७ ॥

वृधो नाम तक्षा अप्रतिग्राह्यस्ततो **बह्वीर्गा भरद्वाजो** नाम ऋषिः प्रतिजग्राह ॥१०७॥

क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ॥
चण्डालहस्तादादाय धर्माधर्मविचक्षणः ॥ १०८ ॥

विश्वामित्रो नाम महामुनिः प्रसिद्धः । स कस्मिंश्चिदवसरे क्षुधादुःखेन **श्वजाघनीं चण्डालहस्तादादायात्तुमभ्यागत** आभिमुख्येनाध्यवसितः । न केवलं परिदुष्टेऽन्ने दोषोऽस्ति यावत्स्वभावदुष्टेऽपीति श्वजाघनीग्रहणं सर्वदोषदुष्टमप्यापदि भक्षयितव्यमिति श्लोकतात्पर्यार्थः ॥ १०८ ॥

प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ॥
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥ १०९ ॥

आपदीषद्गर्हितयोर्याजनाध्यापनयोः संभवेन गर्हितप्रतिग्रहे वर्तितव्यमिति श्लोकार्थः ॥१०९॥

याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ॥
प्रतिग्रहस्तु क्रियते शूद्रादप्यंत्यजन्मनः ॥ ११० ॥

अत्रैव हेतुरूपोऽर्थवादः । प्रवृत्तिरेवेदृशी लोकस्य यदनुपनीता नाधीयते न च यजन्ते । अतः सुष्ठ्वार्त्तोऽपि न शूद्रं याजयिष्यत्यध्यापयिष्यति वा । दानं तु सार्ववर्णिकं प्रसिद्धं । **शूद्रादपि** प्रतिग्रहः कर्तुं प्राप्नोत्यतः स प्रत्यवरः ॥ ११० ॥

जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् ॥
प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च ॥ १११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जपेन होमेन चैनः पापमपैति विनश्यति । ते च वक्ष्यति प्रतिग्रहाद्यदेनस्तत्यागेन तस्य प्रतिग्रहस्य तपसा वक्ष्यमाणेन "मासं गोष्ठे पयः पीत्वा" इत्यादि॥ १११॥

शिलोञ्छमप्याददीत विप्रोऽजीवन्यतस्ततः ॥
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥ ११२ ॥

अस्याप्यनुवादोऽर्थवादमेवाह । महदेतदन्याय्यं यत्परद्रव्यग्रहणं । तत्र कदाचिदश्रूयमाणस्य ग्रहणेऽपीदं भवद्दुष्यतोऽप्येतावता प्रशस्यत्वमत्र भूयः प्रतिग्रहः समानजातीयः । स एवायं प्रकर्षप्रत्ययहेतुर्भवति । **प्रतिग्रहाच्छिलः श्रेयानिति** यतो निकृष्टमपेक्ष्योत्कृष्टत्वनिमित्तं प्रकर्षमनुभवति । न हि भवति चण्डालाद्ब्राह्मणः श्रेयानतः शिलोञ्छयोरपि ग्रहणे प्रशस्यत्वग्रहणं । तथापि शिलोञ्छः श्रेयः । यद्यपि शिलोञ्छवृत्तिरित्यन्तोत्कृष्टोक्ता तथाप्यस्ति प्रतिग्रहेण किंचित्स्यात् । यतस्तत्राधिदेवतानिष्ठितमृत्यागतं क्रियावैकल्यमसत्प्रतिग्रहेऽप्यात्मनि ग्रह उपपन्नेन कुर्वीतेयमिति । तत्रेतरसंनिहितद्रव्यस्याऽऽत्मनिग्रहोऽतः शिलोञ्छवृत्तिरपि न निरवद्या । ततो युक्तं प्रतिग्रहाच्छिलः श्रेयानित्यादि ॥ ११२ ॥

सीदद्भिः कुप्यमिच्छद्भिर्धने वा पृथिवीपतिः ॥
याच्यः स्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ॥ ११३ ॥

अत्र त्रीणि निमित्तानि राजप्रतिग्रह उच्यन्ते । **सीदद्भिः** कुटुंबावसादं प्राप्तैरापदीत्यर्थः[1] । **कुप्यमिच्छद्भिः** कुण्डलकटकाद्युष्णीषासनादि काञ्चनादि अन्यद्वा धनं गोहिरण्यादि यज्ञोपयोग्यन्यत्र वा निमित्तैः **पृथिवीपतिर्याच्यो** देशेश्वरोऽभ्यर्थयितव्यः । अत्र यदुक्तं 'न राज्ञः प्रतिगृह्णीयात्' इति स दुष्टराजविषयः प्रतिषेधो द्रष्टव्यः । तथा चोक्तं "लुब्धस्योच्छास्त्रवर्तिन" इति । **अदित्सन्** याचितः सन् दातुं यो नेच्छति स त्यागमर्हति । तस्य विषये न वस्तव्यम् । अथवा[2] त्यागो हानिरन्यस्य चानिर्देशाद्धर्महानिं प्राप्नोति ॥ ११३ ॥

अकृतं च कृतात्क्षेत्राद्गौरजाविकमेव च ॥
हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत् ॥ ११४ ॥

अकृतमकृष्टं क्षेत्रं प्रशस्यं अजाविकं च भवति । परस्परविशेष उक्तार्थः श्लोको गम्यते ॥ ११४ ॥

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ॥
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥ ११५ ॥

दायोऽन्वयागतं धनं । **लाभो** निध्यादेः पित्राद्यर्जिताद्वा निबन्धात्संविभागः ।

---

१ र–आदापदीत्यर्थः । २ र–वा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यपि तत्पित्रादिक्रमायातं तथापि न तदीयशब्देन शक्यमभिधातुं बहुसाधारण्यात् । तथा च ' निबन्धो द्रव्यमिति ' स्मृत्यन्तरे पठितं । अथवा मित्राच्छ्वशुरगृहाद्वा यल्लब्धं प्रीत्या स लाभः । क्रयः प्रसिद्धः । जयः संग्रामे । प्रयोगकर्मयोगौ कुसीदकृषिवाणिज्या-न्यतश्च वर्णभेदेनैतेषां धर्म्यत्वं । तत्राद्यास्त्रयः सर्वसाधारणाः । जयः क्षत्रियस्य । प्रयोगकर्मयोगौ वैश्यस्य । सत्प्रतिग्रहो ब्राह्मणस्य । विशेषश्रवणेऽपि प्राग्दर्शनन्यायो विभागः । केचित्क्रये विवदन्ते तन्न युक्तं सर्वव्यवहारोच्छेदप्रसङ्गात् । जयं यानबन्धेनापि केचिदिच्छन्ति सर्वविषयं तदयुक्तं । द्यूतधनस्य स्मृत्यन्तरे स्वशुद्धित्ववचनात् पार्श्वक-द्यूतेत्यत्र । तथापरे प्रयोगमन्यापारमाहुः । तथा हि प्रयोगो दृश्यते ' ज्ञानपूर्वप्रयोग ' इति । तत्र शब्दस्य प्रयोग इति गम्यते । तथा कर्मप्रयोगः कर्मप्रचार आवर्जनः॥११५॥

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ॥
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ॥ ११६ ॥

सर्वपुरुषाणामापदि वृत्तिरियमनुज्ञायते । तत्र विद्या वेदविद्याव्यतिरेकेण वैद्यकतर्क-भूतविषासनविद्या सर्वेषां जीवनार्था न दुष्यति । शिल्पं व्याख्यातं । भृतिः प्रेष्यकत्वं । सेवा परवृत्तानुवृत्तित्वं । धृतिः संतोषः । दृष्टान्तार्थं चैतत् । अतो यथाविहितवृत्तिभावेनैते जीवनोपायाः संकीर्त्यन्ते । पुरुषमात्रे विषयत्वात् ॥ ११६ ॥

ब्राह्मणः क्षत्रियो वाऽपि वृद्धिं नैव प्रयोजयेत् ॥
कामं तु खलु धर्मार्थं दद्यात्पापीयसेऽल्पिकाम् ॥ ११७ ॥

धर्मार्थमिति पूर्वोक्तैवाऽऽपत्तिवृत्तिर्वेदितव्या । पापीयस इति वचनाद्धार्मिकादल्पाऽपि न ग्रहीतव्या । यदुक्तं अध्यापनतुल्यानि कृषिवाणिज्यकुसीदानि तदापद्गतेन ॥ ११७ ॥

चतुर्थमाददानोऽपि क्षत्रियो भागमापदि ॥
प्रजा रक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते ॥ ११८ ॥

राज्ञः क्षीणकोशस्य षड्भागग्रहणापवादश्चतुर्थभागोऽभ्यनुज्ञायते । परिशिष्टोऽर्थवादः । परमिति क्रियाविशेषणं । परया रक्षयेत्यर्थः ॥ ११८ ॥

स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः ।
शस्त्रेण वैश्यान रक्षित्वा धर्म्यमाहारयेद्बलिम् ॥ ११९ ॥

विजयशब्देन विजयफलयुक्तं स्वधर्मतया विधीयते । तथा चाहवे न स्यात्पराङ्मुखः भय उपस्थिते पराङ्मुखो युद्धे न स्यादित्यर्थः । अनेन प्रकारेण प्रजा रक्षित्वा

१ याज्ञवल्कीये व्य. १२१ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैश्याद्बलिर्हारयितव्यः । वैश्या महाधना भवन्ति । ततस्तथा हरणे नियुक्ताः कृतापराधा न हन्यन्ते ॥ ११९ ॥

धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरम् ॥
कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥ १२० ॥

धान्यव्यवहारिणः शूद्राः कर्म उपकरणमुपकारो येषां न ते किंचिद्दापयितव्याः । एवं शिल्पिनः कारवस्तदेवमुक्तं प्राक् ' शिल्पिनो मासिमासि ' इत्यादि । अधिकभागग्रणार्थोऽयं श्लोकः ॥ १२० ॥

शुद्रस्तु वृत्तिमाकांक्षन्क्षत्रमाराधयेद्यदि ॥
धनिनं वाऽप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥ १२१ ॥

शूद्रस्तु वृत्तिमाकांक्षेत्तदा क्षत्रमाराधयेत् । वृत्तिग्रहणाज्जीविकार्थमेव क्षत्राराधनं । न धर्मार्थं । ब्राह्मणाराधनं तूभयार्थमपीत्युक्तं भवति । एवं धनिनं वैश्यमाराध्य जीवेत् ॥ १२१ ॥

स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः ॥
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥ १२२ ॥

आराधयेदित्युक्तं । तदाह । जातब्राह्मणशब्दस्य ब्राह्मणोऽयमिति यदस्य विशिष्टं कर्मैष शब्दो भवति । तदासौ कृतकृत्यः कृतार्थो वेदितव्यः । अथवा जातब्राह्मणव्यपदेशस्येति व्याख्येयं । ब्राह्मणाश्रितोऽयमिति यदस्य व्यपदेशो जायते ॥ १२२ ॥

विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते ॥
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् ॥ १२३ ॥

ब्राह्मणशुश्रूषैव मुख्यः शूद्रस्य धर्मः । ततो यदन्यद्व्रतोपवासादि कुरुते तदस्य निष्फलं । न तु दानपाकयज्ञादीनामस्य प्रतिषेधः । प्रत्यक्षविधानात् । इतरप्रतिषेधो ब्राह्मणशुश्रूषास्तुत्यर्थः ॥ १२३ ॥

प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुंबाद्यथार्हतः ॥
शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहम् ॥ १२४ ॥

द्विजातीनामयं धर्मः । तस्य वृत्तिः कल्पनीया । शुश्रूषमाणस्य स्वकुटुंबादिति पुत्रवदसौ पालनीयः । आत्मीयां शक्तिमवेक्ष्य दाक्ष्यं च तस्य कार्येषु योगं भृत्यानां च पुत्रदाराणां तदीयानां परिग्रहं कियंतोऽस्य भर्तव्या इत्येतदपेक्ष्य सर्वेषां भरणं कर्तव्यम् ॥ १२४

उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ॥
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥ १२५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उच्छिष्टशब्दो व्याख्यातार्थः । अतिथ्यादिभुक्तशिष्टमाश्रिताय शूद्राय दातव्यं । एवं वासांसि जीर्णानि धौतानि शुक्लानि पुलका असारधान्यान्येवं **परिच्छदाः** शय्यासनादयः ॥ १२५ ॥

न शूद्रे पातकं किंचिन्न च संस्कारमर्हति ॥
नास्याधिकारो धर्मोऽस्ति न धर्मात्प्रतिषेधनम् ॥ १२६ ॥

सर्वोऽयमनुवादश्लोकः । यदस्याहत्यश्रृङ्गग्राहिकया न प्रतिषिद्धं यथा हिंसास्तेयाद्यनादृतवर्णविशेषं सामान्यशास्त्रप्रतिषिद्धं न तद्व्यतिक्रमादस्य पापमुत्पद्यते । श्रुतमेवास्य शब्देन यथा हिंसास्तेयादिस्तत्रास्य भवत्येव दोषः। **न च संस्कारमु**पनयनलक्षणमर्हति। तदुक्तं " त्रयो वर्णा द्विजातय " इति । एवं **नास्याधिकारो धर्मोऽस्ति** स्नानोपवासदेवतार्चनादौ नास्य नित्योऽधिकारोऽस्ति । अकरणे न प्रत्यवैति । **न धर्मात्प्रतिषेधनं** येषु स्नानोपवासव्रतादिषु नित्याधिकारो नास्त्यकरणे प्रत्यवायाभावोऽस्य निषेधो नास्ति तादृशेभ्यो धर्मेभ्यो न प्रतिषेधः । न चेदृशादस्य प्रतिषेधोऽतः शिष्टप्रतिषिद्धत्वादभ्युदयकामस्य तदनुष्ठानं न युज्यते । तदुक्तं " निवृत्तिस्तु महाफला " । एवं लशुनादिभक्षणनिवृत्तिरप्यभ्युदयायास्य वेदितव्या । सामान्यशास्त्रविहितं ' निवृत्तिस्तु महाफलेति '। अतो न धर्मात्प्रतिषेधनमिति यत्रारम्भः ॥ १२५ ॥

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तमनुष्ठिताः ॥
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥ १२७ ॥

एतदेवाह । धर्मप्राप्तुमिच्छन्तोऽभ्युदयकामाः **सतां** साधूनां धर्म**मनुष्ठिताः** समाश्रिताः **मन्त्रवर्जं न** दुष्यन्ति अतस्तानेकाहोपवासदेवतार्चनगुरुब्राह्मणनमस्कारादि सतां वृत्तमाचरन्तो न दुष्यन्ति **प्रशंसाफलं च प्राप्नुवन्ति** । न पुनरेतन्मन्तव्यं यानि समन्त्रकाणि ब्राह्मणादीनां कर्माणि दर्शपौर्णमासादीनि तानि मन्त्रवर्ज्यं शूद्रस्य न दुष्यन्तीति । यतः समन्त्रेषूत्पन्नेषु मन्त्ररहितेनानुष्ठानमशास्त्रं स्यात् । मन्त्रवर्जमित्येतस्य दर्शितो विषयः । तथा च भगवान् व्यासः

" न चेह शूद्रः पततीति निश्चयो न चापि संस्कारमिहार्हतीति ।
"स्मृतिप्रयुक्तं तु न धर्ममश्नुते न चास्य धर्मे प्रतिषेधनं स्मृतम् " ॥ इति ॥

एतदपि यथाविहितानुवाद्येव लशुनसुरापानादेर्न पतति । संस्कारानर्हतोक्तैव । उक्तं चानुपनीतत्वाच्छ्रुतिविहितधर्माभावे स्मृतिविषये सामान्यविहिता धर्मा यथोक्तप्रकारास्ते नास्य प्रतिषिध्यन्ते। तथा च **स्मृत्यंतरं** " पाकयज्ञैः स्वयं यजेत । अनुज्ञातोऽस्य नमस्कारो मन्त्र इति " । ये पुनराहुः आवसथ्याधानपार्वणवैश्वदेवान्नपाकयज्ञादिषु शूद्राणां पाक्षिकोऽधिकारस्तेषामभिप्रायं न विद्मः। आवसथ्याधानं तावद्गृह्यकारैराम्नातं त्रैवर्णिकोद्देशेनैव । मन्वादिभिश्च नैवमाम्नातं। तथा केवलं" वैवाहिकाग्नौ कुर्वीत गृह्यं कर्मेति " तत्र नैवाम्नातं । कुतः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शूद्रस्याधानं। अथ पाकयज्ञविधानादग्न्याधानाक्षेपस्तदपि न लौकिकाग्नौ वैश्वदेवो भविष्यति । यावद्वचनं तावतिकं वाचनिकं नान्यदाक्षेप्तुलं विवाहाग्नावित्यत्रैव प्रदर्शितं पार्वणशब्देन च यथामावास्यं श्राद्धमुच्यते तदभ्यनुजानीमः । अष्टकापार्वणश्राद्धवैश्वदेवानां विहितत्वात् । अथ दर्शपौर्णमासौ तदपाकृतम् ॥ १२७ ॥

यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः ॥
तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः ॥ १२८ ॥

उक्तार्थः श्लोकः ॥ १२८ ॥

शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः ॥
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥ १२९ ॥

शक्तेनापि कृष्यादिकर्मणा **धनसंचयः शूद्रेण न** कर्तव्यस्तत्र हेतुस्वरूपमर्थवादमाह । **शूद्रो धनं** बह्वासाद्य स्वीकृत्य **ब्राह्मणानेव बाधते** । का पुनर्ब्राह्मणानां बाधा महाधनत्वादत्यर्थं ब्राह्मणान्प्रतिग्राहयेत् । शूद्रप्रतिग्रहश्च तेषां प्रतिषिद्धः । तत्र निमित्तभावमापद्यमानो दुष्येत् । एतच्च न विहितं कुर्वतः कर्मदोषाशङ्का तस्माद्ब्राह्मणान्न परिचरेदित्येषैव बाधा ॥ १२९ ॥

एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्तिताः ॥
यान्सम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम् ॥ १३० ॥

सम्यगापद्धर्मानुष्ठानात्परमा गतिः प्राप्यते । शरीररक्षणाद्विहितातिक्रमो न भवतीति युक्ता शुभफलप्राप्तिः । नापद्गतेनासत्प्रतिग्रहादौ विचिकित्सितव्यमिति शास्त्रन्यायानुवादः ॥ १३० ॥

एष धर्मविधिः कृत्स्नश्चातुर्वर्ण्यस्य कीर्तितः ॥
अतःपरं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥ १३१ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां दशमोऽध्यायः ॥ १० ॥

पाठादेव सिद्धार्थोऽयमिति ॥ १३१ ॥

मान्या काऽपि मनुस्मृतिस्तदुचिता व्याख्या हि मेधातिथेः ।
सा लुप्तैव विधेर्वशात्क्वचिदपि प्राप्यं न यत्पुस्तकं ॥
क्षोणीन्द्रो मदनः सहारणसुतो देशान्तरादाहृतं ।
जीर्णोद्धारमचीकरत्तत इतस्तत्पुस्तकैर्लेखितैः ॥

इति श्रीभट्टवीरस्वामिसूनुमेधातिथिविरचिते मनुभाष्ये दशमोऽध्यायः ॥

श्रीकृष्णार्पणमस्तु ॥

---

१ ए-केऽग्नौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशायनमः ॥

॥ अथ एकादशोऽध्यायः प्रारभ्यते ॥

सान्तानिकं यक्ष्यमाणमध्वगं सार्ववेदसम् ॥
गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः ॥ १ ॥
न वैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान ॥
निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः ॥ २ ॥

श्लोकद्वयेन च वाक्यार्थसमाप्तिः । स्नातकविशेषेण विशिष्टो दानार्थो विधीयते । सान्तनिकादिभ्यो धर्मार्थं भिक्ष्यमाणेभ्यो निःस्वेभ्यो विद्याविशेषेण दातव्यमिति । संप्रति संप्रदानविशेषणत्वे धर्मभिक्षुकशब्दस्याधिकारसंपादनमपि प्रतीयते । एवं नैवं विशिष्टाया-श्चैव निमित्तमिति नैमित्तिको दानाधिकारश्चोच्यते । संतानं प्रजाप्रयोजनमस्येति सान्तानिको विवाहार्थी भण्यते । तत्र हि धनमुपयुज्यते । भवति च पारंपर्येण संतानप्रयोजनः । धर्मग्रहणात् " कामतस्तु प्रवृत्तानाम् " इति द्वितीयादिविवाहप्रवृत्तौ न नियमतो देयमिति । एवं वक्ष्यमाणो नित्ययज्ञाग्निष्टोमाद्यर्थं वृत्तिवचनं यः करोति स वेदितव्यः । अध्वगः क्षीणपथ्योदनः । सार्ववेदसो विश्वजिति सर्वस्वं दक्षिणात्वेन दत्तवान्न तु प्राय-श्चित्ताद्यर्थं । स्वाध्यायार्थी यद्यपि ब्रह्मचारिणोऽध्ययनं विहितं भिक्षाभोजनं च तथापि वस्त्रार्थोपयोगि धनं दातव्यं । अथवा गृहीतवेदस्य तदर्थजिज्ञासा भैक्षभुजोऽपि । उपतापी रोगी ।

स्नातकग्रहणं प्रशंसार्थं । गुर्वर्थस्वाध्यायार्थत्वं प्रायः स्नातकविषये विद्यते । ब्रह्मचारिणो गुर्वर्थं कर्तव्यमिति विहितं । निश्चित्य निर्वचनेभ्यो विद्याविशेषतो बहुविद्याय बहु स्वल्पविद्यायाल्पमिति । ननु च सर्वमेवेदमप्रकृतं प्रक्रियते । एवं हि प्रतिज्ञातम् । " अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् " इति । नैष दोष आश्रमधर्मत्वादस्य प्रकरणस्य । प्रायश्चित्तानामतुल्यरूपतया सहोपदेशस्तत्र प्रायश्चित्तनिमित्तत्वादस्यार्थस्य प्रथममभिधानं । दानं देयमित्युक्तं । दानशब्दश्च कर्मसाधनः । किं तद्देयमित्यपेक्षाया-मुत्तरश्लोकः ॥ १ ॥ २ ॥

एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणम् ॥
इतरेभ्यो बहिर्वेदिकृतान्नं देयमुच्यते ॥ ३ ॥

दक्षिणाशब्दो यद्यपि कर्मकरसंयुक्ते संत्यागे वर्तते तथापि गोभूमिहिरण्यादिभाजना-दन्यद्देयं द्रव्यमुच्यते । तथापि लौकिकी प्रसिद्धिरिति इतरेभ्य एतद्व्यतिरिक्ता ये

---

१ ण-र-अनेक । २ ण-र-क्ष । ३ ण-विशेषणं । ४ र-सत्यपि । ५ फ-र्थौ ६ र-तत्रापि ।

For Private And Personal Use Only

भिक्षुकास्तेभ्यः कृतान्नं सिद्धमन्नं भोजनार्थं दातव्यं । **बहिर्वेदि** यज्ञादन्यत्रातिथिभ्यो दानं गृहस्थधर्मेषु यदेतत्तदेवानूद्यते ॥ ३ ॥

सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत् ।
ब्राह्मणान्वेदविदुषो यज्ञार्थं चैव दक्षिणाम् ॥ ४ ॥

सर्ववर्णानां स्वर्गादिफलाय पुरुषार्थोपयोगि दानं विहितं । अयं तु राज्ञो नियमार्थमुपदेशो बहुधनेन राज्ञा **सर्वरत्नानि** मणिमुक्तादीनि **यथार्हं** विद्याकर्मानुरूपेण ब्राह्मणेभ्यो दातव्यानि । **यज्ञार्थं च दक्षिणा** काम्यकर्मसिद्धयेऽपीति पुनरुपदेशं **प्रतिपादयेत्**स्वीकारयेत् ग्राहयेदिति यावत् ॥ ४ ॥

कृतदारोऽपरान्दारान्भिक्षित्वा योऽधिगच्छति ।
रतिमात्रं फलं तस्य द्रव्यदातुस्तु सन्ततिः ॥ ५ ॥

कामतो द्वितीयादिविवाहप्रवृत्तौ भिक्षमाणस्य निषेधोऽयं । **रतिमात्रं फल**मित्यादिरर्थवादो न यथाश्रुतमेव प्रतिपत्तव्यम् । अन्ये तु व्याचक्षते । धर्मार्थे सान्तानिकाय दातव्यं न कामप्रवृत्तायेति । स एवायमर्थः पुनरन्यथोच्यते । सान्तानिकाय दातव्यं अयं तु रतिकामो न सान्तानिक इत्यर्थः । **द्रव्यदातुर्हि** सा **संततिर्न** तस्येति ॥ ५ ॥

धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत् ।
वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ॥ ६ ॥
यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये ।
अधिकं वाऽपि विद्येत स सोमं पातुमर्हति ॥ ७ ॥

त्रीणि वर्षाणि यस्य पर्याप्तं भृत्यभरणाय धनं तत् **त्रैवार्षिकं** ततोऽ**धिकं** वा यस्यास्ति **स सोमं पातुमर्हति** । श्रुतौ नित्यस्य सोमस्यावश्यकर्तव्यतयाऽनुक्तत्वात् भृत्योपरोधेऽपि नैष निषेधः प्रवर्तते । बलीयस्त्वाच्छ्रुतेरत इच्छासोमविषयोऽयं निषेधः । ननु च सोमे धनं परिक्रियार्थमुपयुज्यते "तस्य द्वादशशतं दक्षिणेति" । तत्र वृत्तिर्वर्धतेऽतश्च सोमे तत्र धनमुपयुज्यते । नोच्यते यस्य त्रैवार्षिकमिति । ननु च वृत्तिधनमसति धने नित्यवदस्तीति विद्यमानधनेनापि तत्कर्तव्यमेवेष्यते । प्राशस्त्यकरदानशब्दो भक्तमात्रे यदि हिरण्यदानं सोमक्रयार्थमेवमादिनिवृत्तिः ॥ ७ ॥

अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः ।
स पीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलम् ॥ ८ ॥

प्रतिषेधातिक्रमेणानधिकारिणः कुर्वतो न्यायसिद्धफलाभावोऽनेनानूद्यते फलग्रहणाच्च

१ ग–सर्वमणीनि । २ ट–वचनत्वात् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काम्यविषयता स्फुटतरा प्रतीयते । स पीतसोमपूर्वोऽपि अनेन प्रथमयज्ञस्यावश्यकर्तव्यतां दर्शयति । स[1]पीतत्वाच्चा[2]र्थवादोऽयं । न पुनरपीतसोमस्य प्रतिषेधः ॥ ८ ॥

शक्तः परजने दाता स्वजने दुःखजीविनि ॥
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥ ९ ॥

यः स्वजनो भृत्यामात्यमातृपितृपुत्रदारादिस्तस्मिन् **दुःखजीविनि** यः **परजने** यशोर्थं ददाति तस्यासौ **विषास्वादः** आपाते सन्निपाते मधुरो यथा विष[3]स्यास्वादः सन्निपातमधुरो विपाकविरसो मरणफलत्वादेवं तादृशं दानं यद्यपि संप्रति यशः सुखं जनयत्यमुत्र प्रत्यवायोत्पत्त्या विषास्वादसमं संपद्यते तदेवाह **धर्मप्रतिरूपकोऽसौ** सदृशो न धर्मः । शुक्तिरिव रजतज्ञानस्य ॥ ९ ॥

*** भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकम् ॥**
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च ॥ १० ॥

पूर्वस्य निन्दार्थवादोऽयं । **भृत्या** व्याख्याताः । **उपरोधो** भक्तवस्त्रादिना यथोपयोगमाहरणं । **और्ध्वदेहिकं** परलोकप्रयोजनम**सुखोदर्क**मुदर्कः आगामीकालः । सोऽस्य दानस्यासुखोदर्कं भवतीति प्रयोजनं सिद्धमेव ॥ १० ॥

यज्ञश्चेत्प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः ॥
ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥ ११ ॥
यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः ॥
कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ॥ १२ ॥

अत्राङ्गहरणान्न केवलं सर्वासां दक्षिणानामसंपत्तौ वैश्यानामिदमाहरणं विधीयते । अपि च तस्मिन्नपि पश्वादावाहरेदिति तत्स्वीकारोत्पत्तिमात्रमुच्यते । नोपायविशेषः । अतश्च याञ्चयाविनिमये चौर्येणैवापहर्तव्यं । न च चौर्येण साम्यं नोत्पद्यत इत्युक्तं । नैष दोषः । इह स्वशब्देनैवोक्तं हर्तव्यमिति । एवं ह्याह कर्तव्यं हीनकर्मण इति । अयं वाऽपहारः प्रागारब्धयागस्य सर्वाङ्गोपेतस्यैकाङ्गासंपत्तौ प्रारिप्स्यमानस्य वेति न विशेषहेतुरस्ति **ब्राह्मणस्य विशेषेणे**तिव[4]चनात्क्षत्रियवैश्ययोरप्यस्ति तदेकाङ्गग्रहणमस्मिन्निमित्ते । ननु कः क्षत्रियो याचेदिति क्षत्रियस्य याञ्चा प्रतिषिद्धा अत्यल्पमिदमुच्यते ब्राह्मणस्यापि चौर्यं निषिद्धं तस्मात्तस्मिन्निमित्ते नास्त्यर्जनोपायनियमो । **धार्मिके सती**त्यनुवादोऽयं । यो हि धर्मज्ञो राजा तस्मिन्निमित्ते चौर्यं विहितमिति । अन्यस्य तु निगृहीतत्वात्कुतः प्रवृत्तिः । बहुपशुग्रहणं धनमात्रोपलक्षणार्थं कुतः कर्मयोगादन्यदपि दानादि न करोति ।

१ र-न-अ । २ फ-य । ३ ण-विषयस्वाद । ४ फ-निर्वचनात् ।

*वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सत्यप्यसोमपे कुटुंबाद्गृहादित्यर्थः । गृहाद्धि चौर्यं दोषवत्तरमतस्तदनुज्ञायते । न पुनरप्येवमेव नियमोऽन्यतोऽपि यत्खलादेः संपद्यते तत्कर्तव्यमेव । वक्ष्यति च " खलात्क्षेत्रादगाराद्वेति " ॥ ११ ॥ १२ ॥

आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः ॥
न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः ॥ १३ ॥

वैश्यासंभवे शूद्रादप्याहर्तव्यं । त्रीणि वा द्वे वेत्यङ्गप्रकरणादङ्गानि वेदितव्यानि । अत्रार्थवादो न हि शूद्रस्येति । यद्यपि पूर्वमनेकोपायकृतमाहरणं विहितं तथापि भिक्षणमत्र नास्ति । न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेतेति । ननु च स्मृत्यन्तरेऽविशेषेण शूद्रधनेन यागः प्रतिषिद्धः । अस्योपदेशस्य सामर्थ्याच्छूद्रात्प्रतिगृह्णीतेति द्रष्टव्यम् । अन्ये त्वाहुः । ब्राह्मणेन स्वीकृतत्वान्नैव तच्छूद्रधनमिति । यस्तु प्रतिषेधः स शूद्रस्य शान्तिकपौष्टिकादि येन धनेन करोति ऋत्विग्भवत्तत्र द्रष्टव्यः । इह तु भूतपूर्वगत्या शूद्रधनव्यपदेशोऽस्य स्यात् । सांप्रतिकस्याभावे च सा ॥ १३ ॥

योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः ॥
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥ १४ ॥

ब्राह्मणक्षत्रियाभ्यामप्येवंविधाभ्यामाहर्तव्यमिति श्लोकार्थः । गोग्रहणं तावत्परिमाणधनोपलक्षणार्थं । अयज्वाऽसोमयाजी ॥ १४ ॥

आदाननित्याच्चादातुराहरेदप्रयच्छतः ॥
तथा यशोऽस्य प्रथते धर्मश्चैव प्रवर्धते ॥ १५ ॥

अयं सर्ववर्णविषयः श्लोकः । आदाननित्यो यः सर्वकालं कृषिप्रतिग्रहकुसीदादिभिर्धनमर्जयति न च ददाति तत उपायान्तराण्याश्रयणीयानि । अदातुरित्ययागशीलस्यापि द्रष्टव्यम् ॥ १५ ॥

तथैव सप्तमे भक्ते भक्तानि षडनश्नता ॥
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥ १६ ॥

आत्मकुटुम्बावसादेऽपि पूर्ववत्परादानं कर्तव्यं । अश्वस्तनग्रहणादेकदिनवृत्त्यर्थमेवानुजानाति । नाधिकं हीनकर्मण इति कर्मार्थं स्मृत्यंतरे
" हीनादादेयमादौ स्यात्तदलाभे समादपि । असंभवे त्वाददीत विशिष्टादपि धार्मिकात् ॥ "

सप्तमे भक्ते त्र्यहं येन न भुक्तं चतुर्थेऽहनि प्रातर्भोजनार्थं परादाने प्रवर्तेत । सायंप्रातर्भुञ्जीतेत्यहन्यहनि भक्तद्वयं विहितम् ॥ १६ ॥

---

१ फ.-शो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते ॥
आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति ॥ १७ ॥

यतो वापीति आरामादेरपि **आख्यातव्यं पृच्छत** इत्येव **यदि पृच्छतीति** वचनं न हठात्पुनः प्रेषणादिना प्रश्नमसौ कारयितव्यः । अथवा पृच्छते धनस्वामिने यदि पृच्छति राजेति राजपुरापनीत एव विषयभेदो दर्शयितव्यः । तथा च **गौतमः** (अ.१८सू.३०)" आचक्षीत राज्ञा पृष्ट " इति । भक्तच्छेदे यज्ञप्रतिबन्धतः प्रकरणविशेषादुभयत्रायं विधिर्ज्ञेयः ॥ १७ ॥

ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदाचन ॥
दस्युनिष्क्रिययोस्तु स्वमजीवन्हर्तुमर्हति ॥ १८ ॥

क्षत्रियेणेति क्षत्रियग्रहणं वैश्यशूद्रयोरपि प्रदर्शनार्थं । **कदाचनेति** महत्यामापदीत्यर्थः । **दस्युनिष्क्रिययो**र्ब्राह्मणयोरेव दस्युस्तस्करो निष्क्रियस्त्वकर्मानाश्रमी ॥१८॥

योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति ॥
स कृत्वा प्लवमात्मानं संतारयति तावुभौ ॥ १९ ॥

प्लवः समुद्रतरणः । **उभौ** यस्यापहरति । शेषोऽर्थवादः ॥ १९ ॥

यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः ॥
अयज्वनां तु यद्वित्तमासुरस्वं तदुच्यते ॥ २० ॥

अयमस्यार्थवाद एव । गुणवद्भ्यो नापहर्तव्यं निर्गुणेभ्यस्तु न दोषः ॥ २० ॥

न तस्मिन्धारयेद्दण्डं धार्मिकः पृथिवीपतिः ॥
क्षत्रियस्य हि बालिश्याद्ब्राह्मणः सीदति क्षुधा ॥ २१ ॥

अस्मिन्निमित्ते चौरत्वेनानीतेभ्यो राज्ञा दण्डो न कर्तव्यो यतस्तस्यैव **बालिश्या**न्मौर्ख्यात् क्षुधाऽवसीदन्ति । क्षुधेत्यविवक्षितमुभयोः प्रकरणादर्थवादत्वाच्च ॥ २१ ॥

तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः ॥
श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत् ॥ २२ ॥

धर्म्या वृत्तिर्यया नित्यकर्माण्यपि संपद्यन्ते क्षीणकोशेनापि महिषीराजपुत्रादिकल्पिताद्दायाद्विहिताच्च धनाच्च किंचिदवकृष्य दातव्यमिति । **स्वकुटुम्बादि**त्यादिना महाधनस्यैव राज्ञोऽयं विधिः । सर्वरत्नानीति वचनात् ॥ २२ ॥

कल्पयित्वाऽस्य वृत्तिं च रक्षेदेनं समन्ततः ॥
राजा हि धर्मषड्भागं तस्मात्प्राप्नोति रक्षितात् ॥ २३ ॥

स्पष्टार्थोऽयं श्लोकः ॥ २३ ॥

For Private And Personal Use Only

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत कर्हिचित् ॥
यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते ॥ २४ ॥

भिक्षणमत्र निषिध्यते । अयाचितोपपन्नं तु न दुष्यति । तथा चोक्तं "अयाचितोपपन्नानां द्रव्याणां यः प्रतिग्रहः । विशिष्टलोकशास्त्राभ्यां तं विद्यादप्रतिग्रहम्" ॥ इति । यज्ञार्थोऽयं प्रतिषेधो न तु भृत्यभरणे । केचित्पूर्वशेषमेव मन्यन्ते । भिक्षणे दोषदर्शनादुपायान्तरेणोक्तमादानम् ॥ २४ ॥

यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति ॥
स याति भासतां विप्रः काकतां वा शतं समाः ॥ २५ ॥

भिक्षितस्य यज्ञार्थं परिशेषितस्य कार्यान्तराय फलं काकता भासता प्राप्तिः ॥ २५ ॥

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ॥
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥ २६ ॥

यागशीलानां त्रयाणां वर्णानां यद्वित्तं **तद्देवस्वं** ब्राह्मणस्यायागशीलस्यापि यत्स्वं **तद्ब्राह्मणस्वमिति** । एवमपि श्लोको गच्छत्येव । किंतु अर्थवादश्लोकोऽसौ । धनं यज्ञशीलानामिति न चौर्यादिशब्दवच्छब्दार्थपरिभाषापरोऽतोऽन्यथा व्याख्यायते । देवानुद्दिश्य यागादिक्रियार्थं धनं यदुत्सृष्टं तद्देवस्वं मुख्यस्य स्वस्वामिसंबन्धस्य देवानामसंभवात् । न हि देवता इच्छया धनं नियुञ्जते । न च परिपालनव्यापारस्तासां दृश्यते । स्वं च लोके तादृशमुच्यते । तस्माद्देवोद्देशेन यदुक्तं नेदं मम देवताया इदमिति तद्देवस्वं । तच्च दर्शपूर्णमासादियागेष्वग्न्यादिदेवताभ्यश्चोदितं शिष्टसमाचारप्रसिद्ध्यैव गौणोपायदुर्गायागादिषु । ननु चतुर्भुजादिप्रतिमासंबन्धि लोके देवस्वमुच्यते । लोकप्रसिद्धश्च शब्दार्थः शास्त्रे ग्रहीतुं न्याय्यः । स्यादेवं यदि देवस्वशब्दो निर्भागः प्रसिद्धिमुपेयात् । देवानां स्वं देवस्वमित्यवयवप्रसिद्ध्या समुदायार्थः प्रकृष्टो न च वाक्यान्तरप्रकल्पना प्रमाणेनाप्यस्ति मुख्यं चतुर्भुजादीनां देवत्वं प्रतिमाव्यवहारेणैवापहृतम् । न च यद्युक्तलक्षणमस्ति अथ समाचारतो देवस्वं भवतु । स्वस्वामिभावस्तावन्नास्ति । यथोक्तेन च प्रकारेण स्वव्यवहारोपपत्तिरिति शिष्टं द्वितीये ॥ २६ ॥

इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये ।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे ॥ २७ ॥

वैश्वानर्या इष्टेर्गृह्यस्मृतिभ्यः स्वरूपमवसातव्यं । समाप्ते वर्षे द्वितीयवर्षस्य प्रवृत्ति**रब्दपर्ययः** । **क्लृप्तानां** विहितानां पशुसोमानां नित्यानां षाण्मास्यः सांवत्सरः पशुर्नित्यं

ण-र-चोक्त ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वसन्ते सोमस्तेषामसंभवे धनाभावादिदोषेण निष्कृत्यर्थं नित्यस्याकरणे यो दोषस्तन्निवृत्यर्थं श्रुतेऽस्मिन्निमित्तेऽन्यकर्म समामनन्ति । तत्र केचित्समुच्चयं मन्यन्ते सत्यप्येककार्यत्वे प्रमाणभेदेन विधिनाऽत्र तदयुक्तं । तथा च ब्रह्महत्याप्रायश्चित्ते श्रौते स्मार्ते च स्वशब्देन विकल्पं वक्ष्यति " अभिजिद्विश्वजिद्भ्यां च " इति ॥ २७ ॥

आपत्कल्पेन यो धर्मं कुरुते नापदि द्विजः ।
स नाप्नोति फलं तस्य परत्रेति विचारितम् ॥ २८ ॥

आपत्कल्पप्रतिनिधिं वैश्वानरीं वा विद्यमानधनो यो गौणपक्षमाश्रयति तस्य न सोऽर्थः सिध्यति ॥ २८ ॥

विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः ॥
आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः ॥ २९ ॥

एष एवार्थः । आपदि प्रतिनिधिराश्रयितव्यो न संपदि ॥ २९ ॥

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ ३० ॥

अयमपि पूर्वशेषोऽर्थवादः । सांपरायिकं पारलौकिकम् ॥ ३० ॥

न ब्राह्मणो वेदयेत किंचिद्राजनि धर्मवित् ॥
स्ववीर्येणैव तान् शिष्यान्मानवानपकारिणः ॥ ३१ ॥

निमित्तेऽभिचारो न दोषायेति श्लोकार्थः । न त्वभिचारो विधीयते न च राजनि वेदनं प्रतिषिध्यते । केवले सति निमित्तेऽभिचरितुं प्रवृत्तो राज्ञा न किंचिद्वक्तव्यः । तथा वक्ष्यति " विधाता शासिता वक्ता " इति । " तस्मै नाकुशलं ब्रूयात् " इति राजेति " प्रीतयेऽभिछिन्द्यात् " इत्यपि । सत्यपि विधौ राजनि निवेदयेन्न च प्रतिषेध उपसंहारश्लोकपर्यालोचनया अतत्परमवतिष्ठते निमित्तानि चोक्तानि " भार्यातिक्रमकारी " इत्यादीनि । किंचित्पीडानिमित्तमनेन मे कृतमिति राज्ञे निवेदयेद्धर्मवित् अभिचारविधिज्ञः । स्ववीर्येण मन्त्राभिशापाभ्यां । तत्रैवोत्तरश्लोकार्थः ॥ ३१ ॥

स्ववीर्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरम् ॥
तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन्द्विजः ॥ ३२ ॥

राजा कदाचिदनिपुणतया न निग्रहेण प्रवर्तेत स्वतस्तु न कदाचिदुपेक्षेति स्ववीर्यं बलीयः॥ ३२॥

*** श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन् ॥**
वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ॥ ३३ ॥

किंतत्स्ववीर्यमिति शङ्कानिवृत्त्यर्थोऽयं श्लोकः । श्रूयन्त इति श्रुतयः । अथर्वणवेदे येऽभिचारप्रकाराः श्रुतास्ते कर्तव्या इत्यर्थः । बाहुल्येन तत्राभिचाराणां विधानात् अथर्वा-

* तद्वत्त्वं सर्ववर्णानामनिवार्यं च शक्तितः । तपोवीर्यप्रभावेण अवध्यानपि बाधते ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ङ्गिरसग्रहणं । न पुनरन्येषु वेदेष्वननुज्ञातं । अथवाऽभिचारश्रुतयोऽथर्वाङ्गिरसशब्देनोच्यन्ते । अर्थाथर्वणशब्दा एवंविध एवार्थे प्रयुज्यन्ते “यज्ञोऽथर्वणवित्काम्य” इति ॥ ३३ ॥

क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः ॥
धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ॥ ३४ ॥

पूर्वशेष एव ॥ ३४ ॥

विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते ॥
तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ॥ ३५ ॥

प्राग्व्याख्यातोऽयं । **तस्मै** ब्राह्मणायाभिचरेण निगृह्यतामयमित्य**कुशलं न ब्रूयात् न शुष्कां गिरमीरयेत्** । वाग्दण्डधिग्दण्डयोरपि प्रतिषेधः । अथवा सर्वेषां वर्णानां न ब्राह्मणः क्षोभयितव्यो यस्त्रयीविद्याप्रभावेण शक्तः स्वयं निग्रहीतुं । **विधाता** स्रष्टा अन्यस्य राज्ञः । **शासिता** निग्रहीता । **वक्ता** हितान् । अतो **मैत्र**स्तस्मात्सर्वप्रशक्तियुक्तत्वान्न दुर्बलोऽयमित्यवमन्तव्यः ॥ ३५ ॥

न वै कन्या न युवतिर्नाल्पविद्यो न बालिशः ।
होता स्यादग्निहोत्रस्य नार्त्तो नासंस्कृतस्तथा ॥ ३६ ॥

अग्निहोत्रे ऋत्विग्वरणस्य समाम्नानात् जुहुयाद्धावयेद्वेति स्त्रीपुंसयोरविशेषेण स्त्रीरहोतृताप्राप्तौ कन्यायुवत्योः प्रतिषेधः । एवमाहुतिद्वयमात्रविधिज्ञस्याल्पविद्यस्य **बालिशस्य** वा प्राप्तिः प्रतिषिध्यते । **आर्त्तो** व्याधिना **असंस्कृतो**ऽनुपनीतः । एतच्चायुक्तं “श्रौते ह्यग्निहोत्रे स्वयं पर्वणि जुहुयात् ऋत्विजामेक इतरेषां कालमिति” समाचरन्ति न च स्त्रीणामार्त्विज्यसंभवोऽतो गृह्याग्निविषये कन्यायुवत्योः प्रतिषेधो जातपुत्रायाः प्राप्त्यर्थ इति वर्णयन्ति । तथा चान्येपि **सूत्रकाराः** “कामं गृह्येऽग्नौ पत्नी जुहुयात्सायंप्रातर्होमाविति” अन्ये तु “वैतानकुशल” इति वचनात्त्रेताग्निविषयमेवेदं मन्यन्ते । वितानो विहारः । स च श्रौतेष्वग्निषु संभवति । न च तत्र स्त्र्यादीनां प्राप्तिर्न त्वविदुषां विशिष्टानामेव पुंसामार्त्विज्यविधानात् । अतोऽग्निहोत्रग्रहणं सर्वकर्मणां होतृग्रहणं च सर्वर्त्विजां प्रदर्शनार्थं । अतः श्रुत्यर्थानुवादमात्रमेषा स्मृतिः ॥ ३६ ॥

नरके हि पतन्त्येते जुह्वतः स च यस्य तत् ॥
तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ॥ ३७ ॥

एते कन्यादयो जुह्वतो नरकं गच्छन्ति । स च यजमानो ह्वाययिता ॥ ३७॥

१ फ-पाताः । २ फ-अथवा । ३ ण-र-माः । ४ ण-र-चा ।

ताद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ॥

For Private And Personal Use Only

प्राजापत्यमदत्वाऽश्वमग्न्याधेयस्य दक्षिणाम् ।
अनाहिताग्निर्भवति ब्राह्मणो विभवे सति ॥ ३८ ॥

अग्न्याधेयेऽश्वो दक्षिणा दातव्या । प्राजापत्यग्रहणं स्तुत्यर्थं । अथवा नात्युत्कृष्टो नातिनिकृष्टः प्राजापत्यः । अथ च लौकिका ईदृशे वस्तुनि प्रजापतिशब्दमुदाहरन्ति । विभवे सतीति वचनादसंपत्तावददद्भवत्येवाहिताग्निः ॥ ३८ ॥

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः ।
न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथंचन ॥ ३९ ॥

यावती दक्षिणा विहिता ततो न्यूना दीयते यत्र सोऽल्पदक्षिणो परिक्रयः किल दक्षिणा स्वल्पेन चेत्परिक्रयेण कर्मकरो लभ्यते किमिति बहु दीयते लोक इव वाहादीनां पणलभ्यं हि कः प्राज्ञः क्रीणाति दशभिः पणैर्द्वादशशतदानं तत्फलभूयस्त्वायेति मन्यामनस्य प्रतिषेधः । ये तु स्वल्पदक्षिणा उत्पत्त्यैव च सोमे दक्षिणेति क्रतुमन्तो न तन्निषिध्यते ॥ ३९ ॥

* इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून् ॥
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत् ॥ ४० ॥

पूर्वविध्यतिक्रमे फलकथनम् ॥ ४० ॥

अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः ॥
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ॥ ४१ ॥

अपविध्य त्यक्त्वा त्यागश्च नित्यानामग्निहोत्रादीनां अकरणमुद्वापनं च प्रसङ्गादत्र प्रकरणात्प्रायश्चित्तोपदिशोऽग्नीनिति बहुवचननिर्देशात् गृह्याग्नित्यागे कल्पना कार्या । वीरहत्यासममिति श्रुतिः[1] " वीरहा वा एष देवानामिति " कामकारवचनादकामत्यागे कल्पनैव ॥ ४१ ॥

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ॥
ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ॥ ४२ ॥

शूद्रादधिगतेनार्थेन प्रीत्यादिनाऽग्न्याधेयं न कर्तव्यमिति व्याचक्षते न तु प्रवृत्त-कर्मणो नित्यकर्मानुष्ठानं प्रतिषिध्यते । तथा चोक्तं न शूद्राद्भिक्षित्वाऽनुष्ठानं करणीयमयाचित-लाभे तु नास्ति दोषः प्रवृत्तकर्मणस्तदर्थं तथा चासत्प्रतिग्रहादात्मवृत्तिरेका प्रतिषिद्धा । नित्यानि कर्माण्यभ्यनुज्ञातान्यतः शूद्रधनेन प्रार्थितलब्धेन वाऽविशेषाभिधानसामर्थ्या-

---

* अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजः । दीक्षितं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥ १ ॥

१ ख-र-श्रुति पुंलिंगा ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दन्याधेयस्यैवास्य प्रतिषेधोऽयं विज्ञायते । यदि सर्वकर्मार्थोऽयं प्रतिषेधः स्यादनेनैव सिद्धत्वान्न भिक्षणं प्रतिषिध्येत । "न यज्ञार्थं धनं शूद्रात्" इति अग्नीनां वृषलाग्नित्ववचनं लिङ्गात् ॥ ४२ ॥

तेषां सततमज्ञानां वृषलाग्न्युपसेविनां ॥
पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ॥ ४३ ॥

पूर्वविध्यतिक्रमे दोषाभिधाने निखिलप्रकरणमेतत् ॥ ४३ ॥

अकुर्वन्विहितं कर्म निंदितं च समाचरन् ॥
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥ ४४ ॥

इदानीं प्रकृतान्येव प्रायश्चित्तानि कथ्यन्ते । प्रथमं तावत्तेष्वधिकारं निरूपयति । कोऽत्राधिकारो **विहितं** नित्यतया संध्योपासनाग्निहोत्रादि 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिभिः पदैर्ज्ञापितं नित्यभावात् । यदप्यनियतनिमित्तेऽशुचिः स्पर्शनादौ स्नानादि तद्विहितमकुर्वन् प्रमादालस्यादिना तथा निन्दितं प्रतिषिद्धं सुरापानादि तदपि शास्त्रमतिक्रम्य सेवमानः **प्रायश्चित्तीयते** तदेतदुक्तं भवति । नैमित्तिकोऽयमधिकारो विहिताकरणात्प्रतिषिद्धसेवनाच्च प्रायश्चितम् ।

ननु च ग्रामकामस्य सांग्रहणी विहिता । ततो ग्रामार्थिनः[1] कथंचिदकरणे विहितातिक्रमः स्यात् । यदि नाम ग्रामार्थी[2] प्रत्यवेयात्ततस्तत्कामो[3]ऽस्य यदा तु ग्रामं कामयते तदा तस्य तद्विहितं भवति । न चेत्प्रवर्तते विहितमतिक्रामेदतश्च प्रायश्चित्ते[4] प्राप्त उच्यते । ग्रामस्य स्वामी स्यामिति फललिप्सया तस्य तत्र प्रवृत्तिर्न विधिलक्षणा । शास्त्रं तु यागग्रामयोः साध्यसाधनसंबन्धावेदकमेव । वस्तुतो यद्यपि तत्रापि कर्तव्यताप्रधानप्रसाधनो वाक्यार्थः तथापि फलसिद्ध्यर्थमेव कर्तव्यताविधिरवगमयति । अतश्च नावगमं कुर्वतः फलं निषिध्यते । न पुनः प्रत्यवायो यत्र प्रत्यवायस्तत्र च प्रायश्चित्तं ।[5]

ननु च नित्यानामकरणे प्रत्यवायो भवतीति कुत इयमवगतिः । न ह्येवमग्निहोत्रादौ श्रूयते "यो न कुर्यात्स प्रत्यवेयात्" । श्रूयते वाक्यशेषेषु "वेदिभ्यः परमा भवति" इति सर्वत्रार्थवादाः प्रत्यवायप्रदर्शनार्थाः सन्ति । अवश्यं च तेषामालंबनं वाच्यं नान्यथा विधिनैकवाक्यतां भजंति । यत्रापि न श्रूयंते तत्रापि विध्यनुग्रहार्था अर्थवादाः प्रकल्प्यंते । किं चार्थवादैर्विधेरेव प्रवर्तकत्वमन्यथा नोपपद्यते । यावदप्रवृत्तौ प्रत्यवायपरिहारो न कल्पित एवंविध एवार्थे वृद्धव्यवहारे विधिः प्रवर्तते । बाध्यंते[6] तु पुरुषप्रवर्तना[7] रूढोऽसौ[8] न च पुरुषा अपुरुषार्थे प्रवर्तयितुं शक्यन्ते । अतः प्रवर्तकत्वविहतविधिर्माभूदिति

१ ण-र-त्तं । २ ण-र-र्थिनः ३ ण-र-कामस्य । ४ ण-र-प्रायश्चित्ती प्राप्तोत्युच्यते । ५ ण-र-तत्रागमवग कुर्वत फलं न निषिध्यते । ६ ण-र-ना । ७ ण-र-वाध्यते पुरुषप्रवर्तना । ८ ण-र-ह्यसौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतिसिद्ध्यर्था कल्पनैषा । यद्यपि स्वर्गादिकल्पनानामपि तथार्थलाभस्तथापि यावज्जीवादिपदविरोधात्प्रत्यवायपरिहारार्थताऽपि स्यात् । **उक्तं**

"भयाद्धि यादृशी पुंसां प्रवृत्तिरुपजायते । न तादृशी भवेदत्र विधिकोटिशतैरपि" ॥

तस्मा**दकुर्वन्विहितम्** इति नित्यं कर्मेति द्रष्टव्यं ।

ननु चाशुचिस्पर्शनादौ न नित्यावेदि किंचित्पदमस्ति यावज्जीवमित्यादिवत् । किमत्रान्येन पदेन निमित्तं विशेषयेत् । श्रुतं तस्यं च तन्निमित्तेन कर्तव्यता नाम प्रतीयते । नाधिकारान्तरं प्रत्यपेक्षायां जायते यदा निमित्तसंविधानं तदा कर्तव्यमित्युपगमैर्नित्यतासिद्धिरग्निहोत्रादावपि न नित्यशब्दोऽस्ति निमित्यनित्यत्वात् । प्रसज्जंश्चविदितत्वेषु विषयेषु संस्कृतान्नभोजनचन्दनानुलेपनादिषु तात्पर्यत आसेवाप्रसङ्गो विषयाभिलाषपरतेति यावत् ।

ननु चैतदपि प्रतिषिद्धम् "इन्द्रियैः सुखलुब्धेषु न प्रसज्येत कामत" इति स्नातकव्रताधिकारान्नायं प्रतिषेध इति मन्यते । व्रतशब्दाधिकारे हि तत्र प्रतिषेधकः संकल्पविशेषो हि मानसस्तत्रोपदिश्यते इदं मया न कर्तव्यमिति । अथवा कश्चिदल्पप्रतिषेधे न तुल्यतां मन्येत पदार्थस्तावदयं न निषिध्यत इति मन्यमानोऽतः समानीक्रियते । अथवा सामान्ये तद्भूतस्यापि विशेषस्य पृथगुपदेशो दृष्टः प्राधान्यख्यापनार्थं यथा ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति । **प्रायश्चित्तीयते** प्रायश्चितशब्दो रूढिरूपेण विशिष्टे नैमित्तिके वर्तते । तदेतच्छिति वेति कर्तव्यो "व्यत्ययो बहुलम्" इति (व्या. सू. ३।१।८५) । **नर** इति वचनं चातुर्वर्ण्याधिकारार्थम् ॥ ४४ ॥

अकामतः कृते पापे प्रायश्चितं विदुर्बुधाः ।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥ ४५ ॥

कामकारकृतेऽप्यतिक्रमे प्रायश्चित्तगौरवार्थमिदमुच्यते । **अकामतः कृत** इति प्रमादकृते पापे शास्त्रव्यतिक्रमे **प्रायश्चितमाहुः** कस्य पुनर्हेतोर्विधिः प्रतिशास्त्रमतिक्रम्याकार्ये प्रवर्तते स प्रायश्चित्तमाचरिष्यत इति । कोऽत्र विशिषहेतुस्तस्मात्कामकृते दोषे प्रायाश्चित्तं शास्त्रानर्थक्यमिति मन्यन्ते । एवं पूर्वपक्षभङ्ग्योपन्यस्यति । **कामकारकृतेऽपीति** शब्दात्कामतोऽकामतश्च कृते व्यतिक्रमे प्रायश्चित्तं कर्तव्यमिति **शास्त्रार्थः** । श्रुतिनिदर्शनादिति वैदिकलिङ्गनिदर्शनमुपहव्यंब्राह्मणमुपकर्तव्यं । "इन्द्रो यतीन् शालावृकेभ्यः प्रायच्छत्" । न च श्वभ्यो दानं यतीनामकामतः संभवति । उपहव्यं प्रायश्चित्तार्थं प्रजापतिरिन्द्राय प्रायच्छदिति स्पष्टार्थः ॥ ४५ ॥

---

१ **ख**—सत्यवन्निमित्तेन कर्तव्यतामब्रवीदित्यनेनाधिकारांतरं प्रत्यपन्नाया जायते । २ **ण-र**—याजयते यदा । तदा निमित्त । ३ **ण-र**—प्रसजंश्च । ४ **ण-र**—संस्कृतभोजन । ५ **फ**—विनिमयः कर्तव्यो । ६ **ण-र**—हव्य । ७ **ण-र**—इंदः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकामतः कृतं पापं वेदाभ्यासेन शुद्धयति ।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ॥ ४६ ॥

किं पुनरेतानि प्रायश्चित्तानि निमित्तमात्रपर्यवसायीनि सन्ध्योपासनादिवदुत कार्यपर्यन्तानि शारीरशौचवदुत्पन्नदोषनिर्घातार्थानि । तत्र केचिदाहुः । न हि कर्म क्षीयते कार्यविरागित्वमेव धर्माधर्मयोः । न हि कर्माणि स्वफलमदत्वा प्रलीयन्ते । तदुक्तं न हि कर्म क्षीयत इति । तस्माद्योऽतिक्रमकारी स ततो नरकफलं भुंक्त एवं प्रायश्चित्तानि यदि न करोति ततस्तदतिक्रमात्प्रत्यवायान्तरोत्पत्तिः । तदेतदयुक्तं । न हि कर्म चरितन्यमतो नित्यं प्रायश्चित्तं विशुध्यत इति स्वशब्देनैव शुद्धयर्थता विहिता । तथापि तैः कृतैरपोहेत पापं स्वयं कृतत्वात् । यदप्युच्यते प्रतिषेधविधिना प्रतिषिध्यमानक्रियाकर्तुः प्रत्यवायभागित्वमवगमितम् । न तस्य प्रायश्चित्तैर्मिथ्यात्वं शक्यते कर्तुं तदप्ययुक्तं । यतस्तेन दुःखहेतुता तस्यावगमिता । प्रायश्चित्तेष्वपि तपोदानादि दुःखमस्त्येव । अल्पेन तादात्मिकेन दुःखेनागामिनः संभाव्यमानस्य महतो दुःखस्य निवृत्तिर्युक्तैव । यथा व्याधेस्तिक्तकटुकौषधदानलब्ध्याहारादिना यथा व्यतिक्रमं कृत्वा कश्चित्स्वयमागत्य राजनि वेदनं करोति "इत्येवं कर्मास्मि" इति सोऽर्द्धदण्डभाग्भवति । यस्तु राजपुरुषैर्हठादानीयेत स भूयो दण्ड्यते । एवमुपदेशानामर्थवत्वासिद्धिरतः स्वकार्यविरोधित्वमस्य विहितत्वान्निष्कृतिः प्रायश्चित्तमिति समाख्यातमपि तत्तदेव कृतदोषस्य निर्यातनमप्यकारणं निर्यातो निष्कृतिरिति उच्यते । एवं प्रायश्चित्तमपि नास्याधिकारप्रतिप्रसवार्थं पंचानामेव पातकानामधिकारोपगमविहितत्वाद्द्विजातिकर्मभ्यो हानिः पतनमिति । न चात्र वेदाभ्यासोऽकामतः कामतस्तप इति विषयविभागो बोद्धव्यः । उभयार्थोभयत्रोपदर्शनार्थत्वात् । निमित्तोपदेशाकरणे पठितत्वात् । ब्रह्महा द्वादशेत्यादि प्रायश्चित्तानामुपक्रम्यमाणत्वात् । तस्मादकामतो लघुप्रायश्चित्तं कामतो गरीय इति श्लोकस्य तात्पर्यम् ।

ननु चाकामतो नैव तस्य कर्तृत्वं बुद्धिपूर्वं कुर्वन्कर्तेत्युच्यते । यथा च लौकिको दैवेनकार्यते । किमयं करोतीति किं च लिप्सया यत्र प्रवृत्तिस्तत्र प्रतिषेधः । यो हि मद्यपः स्पृहयति स पिपासुं न कदर्थयेति 'मा पासीः सुराम्' इति । यस्तु जलार्थी जलबुद्ध्या सुरां पीतवांस्तस्याजानतो नापराधो न हि तस्य सुरालिप्सया प्रवृत्तिः ।

अथोच्यते विधिलक्षणप्रवृत्तिर्न निषिध्यते । सत्यं । भवत्वर्थलक्षणा । न तु मध्ये तद्भेदकेन च सर्वस्यार्थलक्षणायाः प्रतिषेधः । केचिदाहुः । प्रत्यवायपर्यन्तो विधिर्विषभक्षणवन्निषेधशास्त्रार्थस्तेषामचोद्यमेतद्विषमविशेषेणोपात्तं ज्ञानतोऽज्ञानतश्च मरणाय कल्पत एव । एवं

१ ग–र–यद्यप्युच्यते । २ ग–तदेतदप्युक्तं । ३ फ–स्वयं । ४ फ–कायो हि । ५ फ–कदर्थेति । ६ फ–थपुरां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्महत्यादयोऽपीति । येषामपि कर्तव्यमिति वचनात् क्रियते न कर्तव्यमिति न क्रियते तेषामपि लौकिकक्रियया प्रवर्तमानस्य निषेधः प्रवर्तमानश्चोच्यते प्रवृत्तः कर्ता कर्तृत्वमबुद्धिपूर्वकमप्यस्ति कूलं पततीति । न चायं गौणकर्तृताभावः । स्वतंत्रः कर्तेति हि स्मर्यते । नेच्छया प्रवर्तते यः स कर्तेति । किं चास्मादेव वचनात्प्रमादकृतो दोषोऽस्ति । प्रायश्चित्तमिति किमपरेण विकल्पितेन ॥ ४६ ॥

* प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा ॥
न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः ॥ ४७ ॥

दैवात्स्वीकृतात्प्रमादादित्यर्थः । अन्ये तु दैवशब्दस्थाने मोहादिति पठन्ति । मोहादेवाकार्यं क्रियते । को ह्यमूर्खः शास्त्रं व्यतिक्रमिष्यति । पूर्वकृतेन जन्मान्तरकृतेन चोपभुक्तफलेन कर्मणा विशेषेण कौनख्यादिलिङ्गाद्यनुमितेनैतदुक्तं भवति । इह जन्मकृते व्यतिक्रमे बुद्धिदर्शनेपूर्वमबुद्धिपूर्वं वा तथा जन्मान्तरकृतेऽपि लिङ्गानुमेये कर्तव्यं । किं पुनः कुनख्यादीनां "प्रायश्चितं कृछ्रातिकृछ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तानि" वसिष्ठेन तु यस्य यल्लिङ्गं तेन तदेव प्रायश्चित्तं केनचिदंशेन कर्तव्यमिति पठितम् । अतश्चैव ते सर्वेऽकृतप्रायश्चित्ता न संसर्गं साद्भिर्वर्जयेयुरध्ययनादिक्रियैकस्थानादिरूपतया संसर्गो यद्यप्युभयाश्रयत्वादन्यतरप्रतिषेधेनोभयोरपि सिद्धिः प्रतिषेधस्तथापि सद्भिस्तैः संसर्गो न कर्तव्य इति पुनः प्रतिषिध्यते । उत्तरत्र कर्तृभेदादेकस्य हि प्रतिषेधे स एव प्रायश्चित्ती स्यान्न द्वितीयः सत्यपि संसर्गेऽत उभयोः प्रायश्चित्तार्थमुभयत्र प्रतिषेधः । सतामसतां चातः श्यावदन्तिप्रभृतिभिरकृतप्रायश्चितैः शिष्टैः सह संसर्गो न कर्तव्यः ॥ ४७ ॥

इह दुश्चरितैः केचित्केचित्पूर्वकृतैस्तथा ॥
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ॥ ४८ ॥

एतदेवाह । इह दुश्चरितैः केचिदस्मिन् जन्मनि प्रतिषिद्धाचरणैस्तथा पूर्वकृतैः कर्मभिस्तथोक्तं प्राक् । स इदानीं रूपविपर्ययप्रपंचो दुष्कृतशेषे चिन्हरूपतोऽनुक्रम्यते॥ ४८॥

सुवर्णचौरः कौनख्यं सुरापः श्यावदंतताम् ॥
ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ॥ ४९ ॥
पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम् ॥
धान्यचौरोऽङ्गहीनत्वमातिरिक्यं तु मिश्रकः ॥ ५० ॥

---

* प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥१॥
१ ण-र-प्रवृत्तिः । २ फ-दर्शी । ३ अ. २२ सू. १६ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* अन्नहर्तामयावित्वं मौक्यं वागपहारकः ॥
वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः ॥ ५१ ॥
एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः ॥
जडमूकान्धबधिरा विकृताकृतयस्तथा ॥ ५२ ॥

क्षयो नाम रोगो राजयक्ष्मेति वैद्यानां प्रसिद्धस्तेन तद्वान्भवति ब्रह्महत्याविशेषेण । गुरुस्त्रीगामी **दुश्चर्मा** । कथितगन्धवाहिन्या नासिकया युक्तः **पिशुनः** । एवं **सूचको** दुर्गन्धवाहास्यः । ननु च सूचकः पिशुन एव । सत्यम् । एकः कल्पयित्वा परदोषान् प्रकाशयति । अन्यस्तु सत्यानेवाविदितानिति भेदः । **आतिरिक्त्यमधिकांगता । मिश्रको** यो द्रव्याण्यद्रव्यैस्तदाभासैः संमर्दयति । यथा कुंकुमं कुसुंभेनान्यैरन्यानि । **आमयावी** यस्य भुक्तमन्नं न सम्यक् जीर्यते । **मौक्यं** वाग्वैकल्यं यत्राप्रतिपत्तिमानपस्मारी । शिष्टं प्रसिद्धं । **विकृताकृतयः** । आकृतिः संस्थानं विकृताऽमनोरमा निन्दितैषां कर्मविशेषेणेति । एषां कर्मणां कुम्भीपाकयमयातनास्थानेषु फलं तदनुभूतवत ईषच्छेषे तस्मिन् कर्मण्युद्रिक्ते च सुकृतेऽदत्तफले फलदानोन्मुखे दुष्कृतस्यासद्भावोऽतः कर्मविशेषोपपत्तिः ॥४९।५०।५१।५२।

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ॥
निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः ॥ ५३ ॥

निन्द्यैर्हि लक्षणैः कुनखश्यावदन्तादिभिरनिष्कृतैः सह ॥ ५३ ॥

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ॥
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥ ५४ ॥

गुर्वंगनागमः स्तेयं पतितसंप्रयोगः । सर्ववर्णानां महापातकानि । **सुरापानं** ब्राह्मणस्यैव । स्तेयं ब्राह्मणसुवर्णहरणं **स्मृत्यन्तरात्** "ब्राह्मणसुवर्णापहरणे महापातकम्" इति । पातकशब्दः पातयतीति व्युत्पत्त्या सर्वव्यतिक्रमेषु वर्तते । महापातकेषूपपातकेषु च । **महच्छब्दो** गुरुत्वप्रदर्शनार्थः । तैश्च संयोगमेकैकेनापि । स च वक्ष्यति "संवत्सरेण पतति" इत्यादिना ॥ ५४ ॥

अनृतं च समुत्कर्षे राजगामि च पैशुनम् ॥
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ ५५ ॥

समुत्कर्ष इति निमित्तसप्तमी । 'चर्मणि द्वीपिनं हंति' इतिवत् । समुत्कर्षं प्राप्स्यामीति **यदनृतमभिधीयते** तद्ब्रह्महत्यया समं । यत्र पूजातिशयो वासनातिशयो ब्राह्मणत्वेन श्रोत्रियत्वेन महाकुलीनतया वा प्राप्यते तत्रातद्रूपस्तपमात्मानमावेदयति । यो वा

---

*धीपहर्ता भवेदन्धः काणो निर्वापको भवेत् । हिंसया व्याधिभूयस्त्वमरोगित्वमहिंसया ॥१॥
१ वासिष्ठे २० । ४१ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पात्रातिशयेन पुण्यस्कन्धोत्कर्षं प्राप्तुमिच्छति तस्यापात्रं पात्रमित्युच्यते । एवंविधे समुत्कर्षेऽनृतं न पुनः स्वल्पवस्तुनि अपेक्षायां सत्यपि समुत्कर्षन्यपदेशो पिशुनमलीकवदिति परच्छिद्रप्रकाशनं **गुरोश्चालीकनिर्बन्धो**ऽसत्याभिधानेन चित्तसंक्षोभः । ' कन्या ते गर्भिणी ' इत्येवमादिना निष्प्रयोजनो द्वेषः । राजकुलत्तेन सह विवादो निर्बन्धोऽनृतादिशंसनं वा । तथा च **गौतमो** " गुरावनृताभिशंसनम् " इति पातक**समानि** ॥ ५५ ॥

ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः ॥
गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् ॥ ५६ ॥

अधीतस्ववेदस्यानाभ्यासेन विस्मरणं **ब्रह्मोज्झता** नित्यस्वाध्यायविधेः त्यागो वा । **कूटसाक्ष्यं** समुत्कर्षादन्यच्चापि **सुहृद्वधो** मित्रमारणं । **गर्हितानाद्ययोर्गर्हितं** शास्त्रप्रतिषिद्धं लशुनाद्यनाद्यममनस्तुष्टिकरं न भोक्ष्य इति कल्प्य यद्भुज्यते ॥ ५६ ॥

निक्षेपस्यापहरणं नराश्वरजतस्य च ॥
भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतम् ॥ ५७ ॥

निक्षेपस्यासारद्रव्यस्यापि । नराश्वशब्दौ जातिशब्दो नारीहरणेऽप्येतदेव यो हि दुहितरं दत्वाऽसति[3] नरदोषेऽन्यस्मै पुनर्ददाति तस्याप्येतदेव । तदुक्तं " प्राप्नोति पुरुषोऽनृतम् " इति ॥ ५७ ॥

रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च ॥
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥ ५८ ॥

स्वयोनयो भगिन्य एकोदरसंभूताः । **कुमार्यो**ऽनूढाः । **अन्त्यजा** वर्बरचंडालस्त्रियः । **सख्युः** सखा मित्रं तस्य स्त्रियः । स्त्रीग्रहणं न जायायामेव प्रतिषेधार्थम् । एवं पुत्रस्यान्यापि या अवरुद्धा मैथुनधर्मेण । वयं तु ब्रूमः । सत्यपि ग्रहणेनोढानूढयोर्विषयसमीकरणस्य न्यायत्वात्समत्ववचनमेतन्न प्रायश्चित्तनिर्देशार्थं किं तर्हि गुरुत्वख्यापनपरम् । अतश्च गुरुतरं प्रायश्चित्तं भवति । तथा चोक्तं "एनसि गुरूणि गुरूणि लघुनि लघुनि"। यदि ह्येतत्प्रायाश्चित्तनिर्देशार्थमभविष्यत्प्रायाश्चित्तं निर्देशप्रकरण एव वाऽवक्ष्यत् । कौटसाक्ष्यसुहृद्वधयोश्चेह सुरापानसमीकृतयोर्ब्रह्महत्याप्रायश्चित्तातिदेशमुपरिष्टान्न कुर्यात् । " गुरोश्चालीकनिर्बन्ध " इत्येतस्य चेह ब्रह्महत्यासमीकृतस्य पुनरुपरिष्टात् ब्रह्महत्याप्रायश्चित्ताभिधानात् तथा कुमार्यामिति रेतःसेकस्य गुरुतल्पसमीकृतस्येह पुनस्तत्र गुरुतल्पप्रायश्चित्तविधानाद्गम्यते नेदं प्रायश्चित्तार्थं समीकरणमिति । अन्ये तु मन्यन्ते भेदेन समीकरणं गुरुत्वभावेऽपि वक्ष्यते । न त्याज्यमतः प्रायश्चित्तार्थानामेव सुरापानस्य समीकृतयोश्च कौटसाक्ष्यसुहृद्वधयोर्ब्रह्महत्याप्रायश्चित्तनिर्देशो विकल्पार्थं । सुरापानप्राय-

१ फ-ण-क्षं । २ फ-दंतान् । ३ फ-ती ४ ण-र-पर । ५ फ-तस्या । ६ वासिष्ठे २२ । १५ । ७ ण-र-न्याय्यं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चित्तमस्य चातिदेश एव श्रूयते । समीकरणे तु विकल्पो नास्ति । यथा "हत्वा गर्भमविज्ञातम्" इति ॥ ५८ ॥

इदानीमुपपातकान्याह

गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः ॥
गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च ॥ ५९ ॥

अयाज्या अविरुद्धापातकिशूद्रादयस्तेषामसंयाज्यं संयाजनं । भावे ष्यंच्छान्दसः । आत्मविक्रयं गवादिद्रव्यवदात्मनः परविधेयकरणं दास्येन अन्येन । अन्ये तु पारदार्यमविक्रयमिति पठन्ति । अनुत्साहो निराहारः स्वल्प एवोपघातेऽवसादाश्रयणं । गुरोस्त्यागो यथावदनुवृत्तिरध्यापनसमर्थेऽध्यापयितर्युपाध्यायान्तराश्रयः । एवं मातापित्रोरपतितानां चैतेषां त्यागो दोषाय । पतितानां त्विष्ट एव । **स्वाध्यायाग्न्योस्त्याग** इति संबध्यते । स्वाध्यायत्यागश्च "अहरहः स्वाध्यायमधीयीत" इत्यस्य विधेरननुष्ठानं । किमैकाहिके माससांवत्सरिके वा त्यागे व्यतिक्रमोऽयं । अविशेषादैहिके प्राप्नोति तदयुक्तं । एतस्य विधेर्नित्यत्वात् । नित्यानां च व्यतिक्रमे प्रायश्चित्तांतरं वक्ष्यति । तस्माद्विस्मरणपर्यन्तस्त्यागोऽभिप्रेतः । स ब्रह्मोज्झतापदेन सुरापानेन समीकृतः तत्र विकल्पनार्थमेतत् । अस्य च लघुत्वात्तस्य गुरुत्वाद्व्यवस्थायां विकल्पो योज्यः । तत्र यो वैदिक एवान्यस्मिन् कर्मणि युक्ततया स्वाध्यायं जहाति तस्योपपातकत्वं । यस्तु भोगसेवयाऽर्थपरतया कलहशीलतया जहाति तस्य सुरापानसमत्वं । अग्नेस्त्वेकत्वविशिष्टस्येहोपादानाद्गृह्यस्येति द्रष्टव्यं । "प्रागग्नीनिति" बहुवचनाच्छ्रौतानां ग्रहणं । ननु च तत्रापि चान्द्रायणमुक्तमिहाप्युपपातकत्वात्तदेवात्र वाच्यं नैष दोषः । उपपातकेष्वप्यन्यान्यपि प्रायश्चित्तानि सन्ति । शक्त्यपेक्षया गुरुलघुभावो न्यूनाधिकभावोऽतो नियमार्थं तत्र चान्द्रायणग्रहणम् । **सुतस्य त्यागो**ऽभरणं गृहान्निष्काशनमशिशोः प्राप्तस्य च गुणवतः पातकिनस्तु न दोषः ॥ ५९ ॥

परिवित्तिताऽनुजेऽनूढे परिवेदनमेव च ॥
तयोर्दानं च कन्यायास्तयोरेव च याजनम् ॥ ६० ॥

अनुजः कनीयान् भ्राता । **तयोर्याजनं** विवाहे दर्शपूर्णमासादौ वाऽऽर्त्विज्यम् ॥ ६० ॥

कन्याया दूषणं चैव वार्धुष्यं व्रतलोपनम् ॥
तडागारामदाराणामपत्यस्य च विक्रयः ॥ ६१ ॥

कन्याया दूषणं नेयं कन्या पुरुषेणोपभुक्तेत्यध्यवसायेन प्रतिपादनं । अङ्गुष्ठादिना वा प्रजननं धर्मभेदो मैथुनधर्मवर्जं । तत्र हि गुरुतल्पसाम्यमुक्तं । **वार्धुषित्वं** धनापदि

१ क—स्त्या । २ ख—युक्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धनप्रयोगेन वृत्तिग्रहणं । वासिष्ठे तु " वृद्धेस्तु प्रयोक्ता धान्यानां वार्धुषित्वं तदुच्यते "। सा च शास्त्रपरिभाषा । न लौकिके वा पदार्थे व्रतच्युतिरशिष्टप्रतिषिद्धेऽमुष्यगृहे न भोक्तव्यमुपवस्तव्यमेवंरूपः संकल्पो व्रतं ततो यः संकल्पाच्चलति सा तस्य व्रतच्युतिः ।

ननु च व्रतमिति शास्त्रतो नियम उच्यते । चोदितश्चेच्छास्त्रकृतः संकल्पस्ततो निवृत्तौ कः शास्त्रातिक्रमो विहितमकुर्वन् प्रायश्चित्तीयत इत्युक्तं । न चैतद्विहितम् । उच्यते । सत्यमिथ्यालक्षण आरंभः । समाप्तिस्तु शास्त्रीया यथा सौन्दर्यादीनां काम्यानां कर्मणां लिप्सातः प्रवृत्तिः समाप्तिस्तु शास्त्रीया अतीतायां फलेच्छायामवाप्ते फले यथोक्तं तदर्थ एवावशिष्टं वर्जयेयुः प्राक्रमिकोऽयं कापुरुष इति वदन्तः स्नातकव्रतानां त्वत्यन्तलघीयः प्रायश्चित्तं प्रवक्ष्यते । तेनेदं विकल्पितुमर्हति । आराम उद्यानोपवनादि स्मृत्यन्तरे सर्वभूमिरविक्रेया ॥ ६१ ॥

व्रात्यता बान्धवत्यागो भृत्याध्यापनमेव च ॥
भृताच्चाध्ययनादानमपण्यानां च विक्रयः ॥ ६२ ॥

बान्धवा ज्ञातयोऽसोदरादिभ्योऽन्येपि मातुलमातृष्वस्रेयादयः । सति विभवे तेऽप्यजीवन्तो भर्तव्याः । तदुक्तं " स्वजने दुःखजीविनि " इति । यद्येवं सुतस्येत्याद्यनर्थकं नानर्थ्यार्थं वचनं । जालपादप्रतिषेधे हंसप्रतिषेधवत्तेन मात्रादित्याग उपपातकमेव । इह तु लघीय इति । भृत्याध्यापनं भृतकस्य सतोऽध्यापकत्वात् यश्च भृतकादधीते । अपण्यानि दशमे उक्तानि ॥ ६२ ॥

सर्वाकरेष्वधीकारो महायन्त्रप्रवर्तनम् ॥
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च ॥ ६३ ॥

आकराः सुवर्णादिभूमयस्तत्राधिकारो राजनियोगेनाधिपतित्वं सर्वग्रहणादन्यदप्यर्थोत्पत्तिस्थानं गृह्यते । तेन ग्रामनगरनियोगो व्यवहारदर्शनदण्डग्रहणादिनियोग एव । एवमेव यन्त्राणि सेतुबन्धादीनि जलप्रवाहनियमार्थास्तेषां महतां वर्धनं । औषधीनामशुष्काणां हिंसाच्छेदः । स्त्रीणामाजीवः स्त्रियमुपजीव्यते । स्त्रीधनेन शरीरकुटुंबधारणं क्रियते । भार्यापण्यभावो वेशस्त्रीप्रयोजनं वाऽभिचारो वैदिकेन शापादिना मन्त्रप्रयोगेण श्येनादियागेन वा शत्रुमारणं मूलकर्मवशीकरणं मन्त्राभार्यापण्यभादिक्रियैयैव ॥ ६३ ॥

इन्धनार्थमशुष्काणां द्रुमाणामवपातनम् ॥
आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ॥ ६४ ॥

---

१ ण-र-न नर्यार्थं । २ ण-र-फ-अपण्यानि । ३ ख-श्रि ।

१०७-१०८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इन्धनार्थं तु न दोषः अग्निशुद्धत्वाच्छुष्कसर्वसंभवे **क्रियारंभः** पाकारंभः । " आतुरत्वादेवात्मार्थं न भवेदिति " प्रतिषेधात् । क्रियारंभ एवं व्याख्यायते । क्रियारंभे हि प्रायश्चित्तोपदेशादेव प्रतिषेधः कल्प्येत । न ह्यप्रतिषिद्धप्रायश्चित्तं युक्तं " निन्दितं न समाचरन् " इति वचनात् । अद्य पुनर्यत्प्रभाषितं तथा सिद्धे प्रतिषेधे प्रायश्चित्त विधीयते । न कल्पनागौरवं भवति तेन । **निन्दितान्नादनं** न तु गर्हितान्नायतः कुत एतद्विकल्पार्थमभ्यासे तत्प्रायश्चित्तमिदं तु सकृदेव प्रत्ययभेदो वा ॥ ६४ ॥

अनाहिताग्निता स्तेयमृणानामनपक्रिया ॥
असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया ॥ ६५ ॥

कृतविवाहस्य विदुषो द्रव्यसंपत्तौ जातपुत्रस्य वाऽ**नाहिताग्निता** साधिकाराविशेषान्नित्यश्रुतयो नित्याधानस्य प्रयोजिका इति स्मृतिकारो मन्यते । कथं पुनः श्रुतिप्रयुक्तमाधानं विहितं कस्यचित्प्रकरणे कथ्यते येनागमोऽप्युच्छिद्येत । स्वतश्च प्रतीयमानाधिकारत्वादग्निनिष्पत्त्यर्थतया कुतोऽधिकारान्तरप्रयुक्तिरग्नयस्तावद्विनियुक्ता " यदाहवनीये जुहोति " इत्यादिना । न चाधानेन विना तेषां निष्पत्तिरित्यतोऽग्निषु प्रयुक्तेषु तदपि प्रयुक्तमित्युच्यते । यद्येवमग्निनिष्पत्त्यर्थं तदाहिताग्निष्वधिकारोऽन्यत्स्वग्निषु नाधिक्रियते । न चाधानं नित्यं यावज्जीवादिविधिवदतः कथमनाहिताग्निता दोषो " ऽकुर्वन् विहितं कर्मेति " विहिताकरणे प्रायश्चित्तं विहितम् " अग्नीनादधीतेति " । सत्यं विहितम् । न स्वर्गाय नाधिकारान्तरसंपत्तये । किं तर्हि अग्निनिष्पत्तये । अग्नेश्च ज्ञातप्रयोजना यस्य तैः प्रयोजनं स तेनोपायेनार्जयति । अन्यस्तु नेति का तत्र विहिताकरणाशङ्का येन प्रायश्चित्ती स्यात् । यो हि सुवर्णं नार्जयति कथमसौ दुष्येत । उच्यते । अस्मादेव वचनात्सत्यधिकारेऽग्नयोऽवश्यमर्जनीया इति गम्यते । **स्तेयमुक्तेभ्यो** द्रव्येभ्योऽन्यस्य । **ऋणानां** " चतुर्भिर्ऋणैः " इत्येतच्छ्रुतेरनुष्ठानं । **असच्छास्त्राणि** चार्वाकनिर्ग्रन्थाः यत्र न प्रमाणं न वेदकर्म फलसंबद्धमापद्यते । **कौशीलवत्वं** चारणत्वं नर्तनत्वं गायनत्वम् ॥ ६५ ॥

धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम् ॥
स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकम् ॥ ६६ ॥

शणसप्तदशानि **धान्यानि कुप्यं** लोहताम्रादिमयं कुण्डकटाहादि । ननु चाविशेषेण पूर्वश्लोके स्तेयमुक्तं परिहृतमेतत् ' हंसप्रतिषेधवदिति ' । अथवा स्तेयं यदन्यस्माद्युद्यम-गृहीते संभ्रमेनाचोद्यते न हि जातु स्तेयमिति लोकप्रसिद्धं यथा वैर्यादिना अपकरणम् ।

---

१ ज–र–येनाङ्गं सयुजेत् । २ फ–पठावादि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मद्यपेति । ब्राह्मणस्य क्षत्रियादिस्त्रीनिषेवनं सह शयनं संप्रयोगं वा । **स्त्रियः** वधो ब्राह्मण्या अपि । **नास्तिक्यं** "नास्ति परलोको नास्ति दत्तम्" इत्याद्यभिनिवेशः॥६६॥

ब्राह्मणस्य रुजः कृत्यं घ्रातिरघ्रेयमद्ययोः ॥
जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥ ६७ ॥

दण्डहस्तादिना शरीरपीडाजननं रुजःकृत्यं किं पुनरघ्रेयं न हि भक्षणप्रतिषेधवत् घ्राणप्रतिषेधः क्वचिदस्ति । न तु शक्यं विज्ञातुं यदभक्ष्यं तदघ्रेयमिति । घृतादेर्यागार्थमुपात्तस्याभक्षत्वमनाघ्रेयत्वमुच्यते । पूतिदुर्गन्धतया घ्राणं विकरोति लशुनपलाण्डुपुरुषपुरीषादि तद्गृह्यते मद्यसाहचर्याच्च यदभक्ष्यं तदेव विज्ञायते । न पूतिदार्वादि । **जैह्म्यं** कुटिलताऽप्रसन्नहृदयत्वं अन्यदुच्यतेऽन्यत्क्रियते हृदये चान्यत् ॥ ६७ ॥

खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ॥
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च ॥ ६८ ॥

मृगा रुरुपृषतादय आरण्याः । **इभो** हस्ती । सत्यपि मृगत्वे बाहुल्येन ग्रामवासित्वाद्ग्रहणं । **मीनो** मत्स्यः । **अहिः** सर्पः ॥ ६८ ॥

निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ॥
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥ ६९ ॥

निन्दिता अप्रतिग्राह्याः शूद्रा ये पापकर्माणस्तेभ्यो **धनादानं** प्रतिग्रहेण न पुनः प्रत्यादिष्टप्रतिग्रहस्य प्रतिषिद्धत्वात् ॥ ६९ ॥

कृमिकीटवयोहत्यामद्यानुगतभोजनम् ॥
फलैधः कुसुमस्तेयमधैर्यं च मलावहम् ॥ ७० ॥

कृमयो भूमिचारणाः क्षुद्रजन्तवः । **कीटास्तथाविधा एव किंचिदुपचितमूर्तयो**ऽपक्षाः सपक्षाश्च मक्षिकाशलभादयः **वयांसि** पक्षिणः शुकसारिकादयः । **मद्यानुगतं** मद्येन संसृष्टं तद्गन्धाचितं च । **अधैर्यं** चेतसोऽस्थिरत्वं स्वल्पेऽप्युपघातेऽपध्वंसः ॥ ७० ॥

एतान्येनांसि सर्वाणि यथोक्तानि पृथक्पृथक् ॥
यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ्निबोधत ॥ ७१ ॥

प्रायश्चित्तनिमित्तान्युक्तानि । संज्ञाभेदश्च प्रायश्चित्तभेदार्थः । वक्ष्यमाणस्य संक्षेपवचनम् ॥ ७१ ॥

ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत् ॥
भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥ ७२ ॥

---

१ क—ट—मद्य पश्यामिति । २ ग—ट—कृत्यं । ३ख—भि; फ—भे । ४ फ—उध्वंसः ।

For Private And Personal Use Only

तृणपर्णादिकृतो निकेतो:वर्षातपशीतत्राणादिहेतुर्गृहं कुटीति कथ्यते । " समावर्षाणि भैक्षाशीति " स्मृत्यन्तरे सप्तागारमनभिसंहितं च भैक्ष्यमुक्तं । शवशिरोहतस्यान्यस्य वा ध्वजे काष्ठादिमयीं शिरःप्रतिकृतिमुद्यतां धारयेदिति मन्यन्ते । नैवं शब्दार्थविदः । न हि तच्छवशिर इत्युच्यते । अन्योऽप्यत्र विधिर्भविष्यति " कृतवापनो निवसेत् " इत्यादि ॥ ७२ ॥

लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः ॥
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥ ७३ ॥

धानुष्का यत्र युद्धं कर्तुं लक्षं विध्यन्ति तत्र तद्भूतेन भवितव्यं । अथवा संग्रामेऽन्यत्र युध्यमानानां शस्त्रप्रहाराः प्रतीप्सितव्याः । **आत्मन इच्छयेति** न प्रमादात्तदंतर्गतस्य सत्यपि स्ववधेन शुद्धिः । **विदुषामित्यवजानते** प्रायश्चित्तोपदेशोऽयमिति । अथवा धनुर्वेदज्ञानं **अग्नौ वाऽऽत्मानं** क्षिपेत्स**मिद्धे** त्रिरुत्थाय पुनः पतेत् ॥ ७३ ॥

यजेत वाऽश्वमेधेन स्वर्जिता गोसवेन वा ॥
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुताऽपि वा ॥ ७४ ॥

जनपदेश्वरस्याश्वमेधेऽधिकारः । तत्र हि रणादिप्राच्यादिग्भ्यः आत्दतं द्रव्यं दक्षणा विहिता । ये चानाहिताग्नयस्ते न यागेष्वधिक्रियन्ते न पुनस्तदर्थमेवाधानं कर्तव्यं । कर्माणि हि प्रायश्चित्तार्थानि सांगानि न चांगमाधानम् ॥ ७४ ॥

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ॥
ब्रह्महत्यापनोदाय मितभुङ्[3]नियतेन्द्रियः ॥ ७५ ॥

मितभुग्यावता न तृप्यति । **नियतेन्द्रियो** ब्रह्मचारी विषयेष्वगृध्नुः ॥ ७५ ॥

सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत् ॥
धनं वा जीवनायालं गृहं वासः परिच्छदम् ॥ ७६ ॥

यावत्किंचिद्गोहिरण्यादिकं तत्सर्वं दातव्यं । अत्रार्थवादो **धनं हि जीवनायालमिति** । तावता धनेन दत्तेनान्यस्मै जीवितं दत्तं भवतीत्येव साम्यं । **गृहं वासः परिच्छदं** । परिच्छदशब्देन यावत्किंचिद्गृहोपकरणं सर्पिस्तैलधान्यादि कुण्डकटाहादि कुप्यशयनासनादि तत्सर्वं गृह्यते ॥ ७६ ॥

हविष्यभुग्वाऽनुसरेत् प्रतिस्रोतः सरस्वतीम् ॥
जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम् ॥ ७७ ॥

---

१ ण–र–स्यपि शस्त्राधेन शुद्धिः फ–तदंतर्गतस्य । २ ण–र–प्रतीचीभ्यो गृहाति । ३ ण–र–विजितेन्द्रियः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हविष्यं मुन्यन्नं नीवारादि ग्राम्यमपि पयोघृतादि । **प्रतिस्रोतः** स्रोतःस्रोतः प्रति यावन्ति सरस्वत्याः स्रोतांसि तावन्त्यनुसरेत् । **नियताहार** आहारनिवृत्तिं कृत्वा **वेदसंहितां** समन्त्रब्राह्मणकां त्रिरावर्तेत । एतेषां प्रायश्चित्तानामियमत्र व्यवस्था । बुद्धिपूर्वेण ब्राह्मणमात्रवधे द्वादशवार्षिकं लक्ष्यं शस्त्रभृतामनेन विकल्प्यते । यद्यपि द्वादशवार्षिकेन मरणान्तं तथापि दैवोपपत्तिपतितेऽन्तरामरणे सामिकृते प्रायश्चित्ते शुद्ध्यभावात् प्रत्यवायो न निवर्तते । द्वितीये तु तदानीमेव निर्मुक्तपापः शस्त्रहतो वा कदाचिन्न म्रियेत । अत एव आद्योपात्तप्रायश्चित्तमिच्छया विकल्पेन दातव्यं । अग्नौ प्रवेशस्तु श्रोत्रियत्वादिगुणयुक्ते तत्रापि सवनगुणेऽग्नौ सन्ति ब्रह्मघ्नस्त्रिरवस्थास्तस्यावसानं शस्त्रेण गात्राणां खण्डशो विदारणं । सवनगत इति पठन्ति । न च प्राणान्तिकेषु द्वैगुणसंभवः । न ह्येकस्मिन् जन्मनि द्विर्मरणोपपत्तिस्तत्तुल्यपीडानुभवात्तस्य द्वैगुण्यं । न च द्वादशवार्षिकं द्विगुणं युक्तं । को हि देवसमश्चतुर्विंशतिवर्षाणि प्रायश्चित्तं चरेत् । संवत्सरशेषे हि मृतस्य सर्वं निष्फलं स्यात् । अश्वमेधयागस्तु त्रैवर्णिकानां सति संभवे पूर्वोक्तैर्विकल्प्यते । गोसवादयस्त्वबुद्धिपूर्वं महागुणवति हन्तरि स्युर्योजनश्रुतं दृष्ट्वा च ब्राह्मणजातीयमात्रवध एवमुत्तराण्यपि त्रिवृताग्निष्टुतेति समानाधिकरणे एवं स्वर्जिता गोसवेनेति अभिजिद्विश्वजितौ द्वे प्रायश्चित्ते ॥ ७७ ॥

कृतवापनो निवसेद्ग्रामान्ते गोव्रजेऽपि वा ॥
आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ॥ ७८ ॥

द्वादशवार्षिकस्यायं विशेषः कश्चिद्वैकल्पिकधर्म उपदिश्यते । कश्चिदपूर्ववचनः अपूर्वमाश्रमवृक्षमूले वैकल्पिकमेव वा कुटी स्यात् । किमर्थं पुनस्तत्रैव नोक्तं प्रक्रान्तद्वादशवार्षिकस्य वक्ष्यमाणं यथा स्यात् पृथक् प्रायश्चित्तं मा भूदिति पूर्वेऽर्थाख्यातं स्वतन्त्रं ह्यन्यास्मिन् प्रक्रान्तेऽन्यत्र प्राप्नोति प्रक्रान्तासमासौ दोषश्रवणात्पृथगधिकारात्पृथक्प्रयोगताऽन्यस्यान्यतरप्रयोगः ॥ ७८ ॥

ब्राह्मणार्थे गवार्थे वा सम्यक् प्राणान्परित्यजेत् ॥
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च ॥ ७९ ॥

अपरित्रायापि सम्यक् प्राणपरित्यागेन मुच्यते परित्रायाप्राणत्यागेनापि ॥ ७९ ॥

त्रिवारं प्रतिरोद्धा वा सर्वस्वमवजित्य वा ॥
विप्रस्य तन्निमित्ते वा प्राणालाभेऽपि मुच्यते ॥ ८० ॥

---

१ फ-कल्पते; ण-र-+यदि वावक-मेव । २ ण-र-केनवा । ३ ण-र-सम्यक्...परित्यजन् । ४ ख-बि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिरोद्धा प्रवृत्तः शस्त्रेण क्षतो वा युद्धकरणेऽप्यवरं यदि न्यूनं तदा त्रिरावृत्तयः कृते युद्धेऽसौ मुच्यतेऽपरित्राय मृतोऽपि सर्वस्वमवजित्येति ब्राह्मणादीनां चौरापहृतं यदि प्रत्यानयति तदा मुच्यते । ब्राह्मणस्य वा तन्निमित्ते प्राणदाने ।

ननु चोक्तं "गोप्ता गोब्राह्मणस्येति"। सत्यं । युद्धेनान्येन वा शरीरव्यापारेण गां पङ्कलग्नां दस्युभिर्वाह्यमानां ब्राह्मणं शत्रुभिश्चौरैर्व्याघ्रा वाऽपह्रियमाणं यदि मोक्षयति ततः शुध्यतीत्युक्तं। इह तु तन्निमित्तग्रहणाद्यदि धनेऽपह्रियमाणे ब्राह्मणो व्यामूढतयाऽऽत्मानं हन्ति निरपेक्षं वा चोरैर्युध्यते तत्र तत्समधनदानेन 'मा' मृथा अहं ते इयद्धनं ददामीति तमाश्वास्य दत्वा मुच्यते ॥ ८० ॥

एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः ॥
समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ॥ ८१ ॥

तस्माद्वचनादाद्यशेषमुत्क्रान्तं विज्ञायते **दृढव्रत** इति । **समाहित** इति च पादपूरणे पदे । उपसंहारोऽयं पूर्वस्य ॥ ८१ ॥

शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे ॥
स्वमेनोऽवभृथस्नातो हयमेधे विमुच्यते ॥ ८२ ॥

चरमपक्ष उच्यते **शिष्ट्वा स्वमेन** आत्मीयं दोषं भूमिदेवतानां ब्राह्मणानां **नरदेवैः** क्षत्रियैः**समागमे** ऋत्विजो ब्राह्मणाः क्षत्रियो यजमान एवं कृतोऽश्वमेधेऽवभृथस्नातो विमुच्यते द्वादशवार्षिकस्योपसंहृतत्वात्स्वतन्त्रमिदं वैकल्पिकमिच्छति । अन्ये त्वाहुर्वैकल्पिकानां मध्य उपदेशात्प्रक्रान्तद्वादशवार्षिकस्यैव गोब्राह्मणपरित्राणवत्समाप्तत्वविमाहुर्यथा सारस्वतेन पक्षं वा प्रस्रवणं प्राप्योत्थानमिति । वयं तु ब्रूमः । उपसंहृतत्वादाजयस्य वैकल्पिकमध्ये वा पाठादुभयरूपताऽस्य प्रक्रान्तेऽप्रक्रान्ते च सति संभवे ॥ ८२ ॥

धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते ॥
तस्मात्समागमे तेषामेनो विख्याप्य शुध्यति ॥ ८३ ॥

यजमानर्त्विजां ब्राह्मणक्षत्रियाणामश्वमेधसमागम एनो विख्यापनीयमित्यत्रार्थवादः॥८३॥

ब्राह्मणः संभवेनैव देवानामपि दैवतम् ॥
प्रमाणं चैव लोकस्य ब्रह्मात्रैव हि कारणम् ॥ ८४ ॥

प्रायश्चित्तिना परिषद्गमनं कर्तव्यं । परिषत्पृच्छ्यन्तु विधिरनुष्ठेयः । साचैवंरूपा परिषदेवमर्थश्लोकोऽयमुत्तरश्च । उत्पत्त्यैव **ब्राह्मणो देवानामपि** देवो **लोकस्य प्रमाणं**

---

१ ण–र–चरमे पक्षे ऊलिसभेत् । २ ण–र–स्व स्तव मेधन । ३ ण–र–सारस्वते ते प्रक्षं व प्रस्रवण– ।
४ ज–र–प्रायश्चित्तानाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्ययितः प्रत्यक् दर्शनवत् । न तदीयं वचनमपि शङ्कते कश्चित् । अत्र कारणं ब्रह्म वेदस्तदर्थज्ञो ह्यदृष्टमुपदर्शयन् प्रमाणीक्रियते ॥ ८४ ॥

तेषां वेदविदो ब्रूयुस्त्रयोऽप्येनः सुनिष्कृतिम् ॥
सा तेषां पावनाय स्यात्पवित्रं विदुषां हि वाक् ॥ ८५ ॥

परिषद्गमनं प्रायश्चित्तिनोऽनेन कथ्यते । तस्याश्च लक्षणं ब्राह्मणा **वेदविदस्त्रयः** परिषदिति । ननु च "दशावरा वा परिषत्" इति वक्ष्यति । तथा "एकोऽपि वेदविद्धर्मम्" इति । न दशसंख्या पुरुषाणामुपदिश्यते । किं तर्हि गुणानां । तथा "च त्रैविद्यो हैतुकस्तर्की" इति गुणानामेव निर्देशः । "एकोऽपि वेदवित्" इत्यनेन चैतत्प्रकटीकरोति हैतुकत्वाद्गुणांतराभावेऽपि केवलेनैव वेदेन वेदवित्परिषत्वं लभ्यते । अयं तु श्लोकः संख्यानिर्देशार्थः । अत्र यद्यपि वेदविद इत्युपात्तं हैतुकत्वादयोऽपि गुणा गृह्यन्ते न ह्यन्यथा वेदवित्त्वं शिष्टपरिषल्लक्षणं । तत्रैव व्याख्यास्यामः । यदि वेदवित्त्वं न हैतुकत्वादिना विना भवति कथं तर्हीदमुक्तम् "एकोऽपि वेदवित्" इति गुणान्तराभावेऽपि वेदवित्परिग्रहार्थमित्येतदपि तत्रैव वक्ष्यामः । अतः प्रायश्चित्तिना त्रयः समुदिताः प्रष्टव्याः । एकस्य कदाचित्प्रमादोऽनवधानं स्यात् तस्मैतत्परिषद्गमनं विदुषाऽप्यदृष्टार्थं कर्तव्यमिति । यथा च **पवित्रं विदुषां हि वाक्** । न च रहस्यप्रायश्चित्ताभावप्रसङ्गः । यत्र कस्याप्यविदितं तद्रहस्यं विदिते तु परिषद्गमनं । तथा चोक्तं "ख्यापनेनानुतापेन" इति तदेतदयुक्तं । कल्पनाविषयत्वादस्य शक्तिं पापं चावेक्ष्य प्रायश्चित्तं विकल्पयेदिति । अनुक्तनिष्कृतीनां प्रायश्चित्तं कल्पयेत् । तत्र त्रिभिर्या कल्पना कृता सा प्रमाणयितव्या ॥८५॥

अतोऽन्यतममास्थाय विधिं विप्रः समाहितः ॥
ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया ॥ ८६ ॥

सर्वेषां ब्रह्महत्याप्रायश्चित्तानामुपसंहारार्थः श्लोकोऽयं । विप्रग्रहणं चात्र सर्ववर्णप्रदर्शनार्थं । **व्यपोह**त्यपहरति । **आत्मवत्तया**ऽऽत्मज्ञानतया । शास्त्रार्थकृताभिनिवेश आत्मवानित्युच्यते । तस्मायमध्यवसायो न शास्त्रार्थमन्यथा करोति ॥ ८६ ॥

*** हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् ॥**
राजन्यवैश्यौ चेजानावात्रेयीमेव च स्त्रियम् ॥ ८७ ॥

गर्भो ब्राह्मणजातीयस्य एव केन गर्भस्य पातनं कारयेत् । **अविज्ञात**मज्ञातस्त्रीपुरुषविशेषव्यञ्जनं । उपज्ञाते यथायथं स्त्रीपुंसनिमित्तमेव । कथं पुनः स्त्रियामहतायां

१ ण-र-अदृश्यं । २ अ. १२ । ११०-११२ । ३ अग्रे. २२७ श्लो. ४ ण-र-जातीय एवात्वकेन ।
जन्मप्रभृतिसंस्कारैः संस्कृता मन्त्रवाचया । गर्भिणी त्वथवा स्यात्तामात्रेयीं च विदुर्बुधाः ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गर्भस्य वधो भवति । औषधादियोगेन गर्भस्य पातनं । **एतदेवे**त्येकवचनात्प्रत्यासन्नद्वादशवार्षिकमेवातिदिश्यत इत्याहुः । अन्ये एतदिति शुद्धिकारणं सामान्यापेक्षायामतः सर्वप्रायश्चित्तातिदेशः । **क्षत्रियवैश्यौ चेजानौ** यजमानौ भूतकालता न विवक्षिता । **स्मृत्यन्तरे** "सवनगतौ राजन्यवैश्याविति"। अतश्च प्रारब्धसोमपानयोरेव विधिर्न दर्शपूर्णमासादियजमानयोः । लिङ्गदर्शनं तु यजमानमात्रयोर्भावयतीति ब्राह्मणी भूयैव यजत इति । **आत्रेयीं स्त्रिय**मत्रिगोत्रजातां जातेरविशेषान्न स्त्रीपुंसयोर्ब्राह्मणीनामपि प्राप्तावात्रेय्या वचनमन्यगोत्रनिवृत्त्यर्थमतो ब्राह्मण्या अप्यन्यस्या वध उपपातकमेव । "स्त्रीविट्क्षत्रियवध" इति । ये तु 'स्त्रीसुहृद' इति तच्चातुर्वर्ण्यस्त्रीमात्रे अवर्मस्त्रीणामुपपातकं महापातकप्रायश्चित्ते विकल्पते । भर्तृस्वगुणापेक्षो विकल्पो बुद्धिपूर्वाबुद्धिपूर्वकृतश्च सस्तनपबालापत्ययोस्तदभावे बालानां दुःखके जीविते त्रिजातियाया अपि ब्राह्मणभार्याया भर्तृद्वेषादनपराधिन्या निमित्तान्तरतो वोपजाप्यमानायाः शीलं रक्षन्त्या असंप्रयुज्यमानाया वधः । एवमप्युत्प्रेक्षया "स्त्रीसुहृद्वधम्" इत्यादेशात् । अन्यत्र तु स्त्रीशूद्रेति आत्रेय्यां त्वविकल्पः । अन्ये त्वात्रेयीं गर्भसाहचर्यादृतुमतीमाहुः । पठ्यते भ्रूणहात्रेयाश्च हन्तेति । भ्रूणहा ब्राह्मणवधकारी सा । सा च ब्राह्मण्येव । अत्र कुक्ष्यावश्यं गर्भे उद्यत इत्यात्रेयी । यद्यपीदृश्यां वृत्तौ तद्धितो न स्मर्यते प्रयोगानुसारेण तु भवतीति ॥ ८७ ॥

उक्त्वा चैवानृतं साक्ष्ये प्रतिरभ्य गुरुं तथा ॥
अपहृत्य च निःक्षेपं कृत्वा च स्त्रीसुहृद्वधम् ॥ ८८ ॥

हिरण्यभूम्यादिसाक्ष्ये तु वधादिसंशये वाऽनृताभिधाने प्रायश्चित्तमेतत् । अत्र हि दोषातिशयः श्रूयते । भञ्जतामित्यौद्यन्यत्र गुरुलघुभावेन कल्पना कार्या । **प्रतिरभ्येति** यदुक्तमलीकनिर्बन्ध इति तदेवेदं प्रतिरंभः संरंभपूर्वको गुरोरुपद्रवारंभः निक्षेपः । अत्रापि दरिद्रस्य महतो धनवतोऽधमस्योतान्यस्य ब्राह्मणजातीयस्येत्यादिकल्पना । यत्र त्वेकमेव श्रूयते तत्र यथाश्रुत्यैव भवितुमर्हति । कः कल्पनाया अवसरो न चेह कौटिल्यसाक्षिनिक्षेपयोर्लघुप्रायश्चित्तमस्ति । यदपि सुरापाने तदपि तुल्यमनेन गरीयः श्रुताश्रुतविषयत्वं शक्तिं चावेक्ष्येति यत्सत्यप्यनुक्तनिष्कृतीनामिति श्रवणे ॥ ८८ ॥

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ॥
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥ ८९ ॥

प्रमाप्य हत्वा **निष्कृतिरिति** प्रागयं व्याख्यातार्थः प्रायश्चित्तगौरवोपदेशपरः ॥ ८९ ॥

१ ण–र–पेक्षयां । २ ण–र–आमर्च्य । ३ ण–र–हन्त्रीति । ४ ण–र–ब्रह्मवधकारी । ५ फ–रुध्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् ॥
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः ॥ ९० ॥

द्विजश्रुतिर्ब्राह्मणार्थैव । आह च **स्मृत्यन्तरे** "ब्राह्मणस्य उष्णां वा पिबेयुः सुराम्" इति । **मोहा**दित्यनुवादोऽ**ग्निवर्णां** वर्णश्रुतिग्रहणं सामान्यलक्षणार्थमत एवाह **काये निर्दग्धे मुच्यत** इति ॥ ९० ॥

गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा ॥
पयो घृतं वा मरणाद्गोशकृद्रसमेव वा ॥ ९१ ॥

अन्यतरप्रायश्चित्तमग्निवर्णं भवत्येव । गोमूत्रादयो द्रव्यविशेषा अन्यप्रकारमरणा-निवृत्त्यर्थाः[1] । **सुरा** च पैष्टीति विज्ञेया । तां मुख्येत्युपचरन्ति । अन्यत्र तु प्रयोगो गौणः । कामतः पाने चैतत् । तथा च वक्ष्यति । "अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति" । **अग्निवर्ण**मित्यग्निस्पर्शमिति ज्ञातव्यं । तथा चाह "आमरणादिति" सुरा च स्त्रीणामपि प्रतिषिद्धा । उक्तं हि **वासिष्ठे**

"तया ब्राह्मणी सुरापी भवति । न तां देवाः पतिलोकं नयति ॥
इहैव सा भ्रमति क्षीणपुण्या "लोके प्रेत्यावाप्सु च जलभुग्भवति" ॥ ९१ ॥

कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि ॥
सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी ॥ ९२ ॥

इदं प्राणात्यय औषधार्थे[2] । अन्येन[3] विहितस्यापि तस्य अज्ञानात्तु तप्तकृच्छ्रसहितः पुनःसंस्कारो दर्शयिष्यते । अन्ये तु गौडीमाध्व्योरुपचरितसुराभावयोरिच्छन्ति । तथा च **स्मृत्यन्तरे** "असुरामद्यपाने चान्द्रायणमभ्यसनीयं" । **सकृ**दिति कणपिण्याकयो-रुभयोः शेषः । **निशा**यामवालमयं[4] । गोलोमाजालोमादिकृतं वासो **जटी** शिखयाऽन्यैर्वा केशैर्ध्वजी मद्यघटिकादिनेति ॥ ९२ ॥

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ॥
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥ ९३ ॥

अन्नशब्दो यद्यप्यदनक्रियाकर्मणि व्युत्पाद्यते तथापि व्रीह्यादिप्रभृतावेव भक्त[5]-सक्त्वपूपादौ प्रसिद्धतरप्रयोगस्तथा चान्नेन[6] व्यञ्जनमिति भेदोपपत्तिः । अतः पिष्टविकारत्वात् सुराया अन्नव्यपदेशे लब्धेऽन्नानां मलमिति निवारणोपपत्तौ पैष्ट्याः सुरायाः प्रतिषेधे

---

१ ण–मरणनिवृत्त्यर्थं । २ ण–र–क्षयथार्थं । ३ ण–र–अन्येन नाह गत्यायितस्य । ४ ण–र–निशायामवलायर्यं । ५ ण–र–भक्ते । ६ फ–न्ये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिङ्गमिदं लिङ्गं त्रयाणां वर्णानां संपद्यते । ब्राह्मणक्षत्रियवैश्यैरपि वर्णैः पैष्टी न पातव्या । किंच सैव सुरा मुख्या गौडीमाध्व्योः । एवं यथा माधुमाध्वीकयोर्गुरु प्रायश्चित्तं न तथान्येषामरिष्टादीनां मद्यानां मलशब्दः । पाप्मेति व्याख्यातो निन्दातिशयदर्शनार्थः । सत्यपि प्रायश्चित्तप्रकरणे वाक्यात्म सुरापाननिषेधोऽयं भिन्नवाक्यत्वाच्च नार्थवादः ॥ ९३ ॥

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ॥
यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ॥ ९४ ॥

गुडविकारो गौडी येषामपीक्षुरसमेव मद्यतामापद्यते तेषामपि कारणे कार्योपचारेण गौडीव्यपदेशो न विरुद्धः । मधुनो विकारो माध्वी । ननु माध्वीकं विकारवृत्त्या न मद्ये जातस्य नूद्री विकारस्य प्रतिषेधो यावन्मद्यावस्थामप्राप्त इति दर्शयति । अविकृतं हि मधुमाध्वीकमिच्छन्तीति स्मरति । यत्रापि मद्यशब्देन प्रतिषेधस्तत्राप्यनापादितमद्यपानशक्तियोगस्य नैव प्रतिषेधः । तस्य मद्यशब्देनानभिधानात् । यथा शुक्तशब्दोऽवस्थाविशेषवति प्रवर्तते नाविशेषेण न हि तदेवाम्लतामनापन्नं शुक्तमित्युच्यते । यथा स एव गौः वत्सावस्थायां न बलीवर्दः । एवं किंच पिष्टोदकादिसंघातसंसृष्ट्या न सुरा यावत्कालपरिवासे न मदशक्तिमापन्ना । एवमिक्षुरसमृद्वीविकारयोर्द्रष्टव्यं । अल्पायाम्ताहिं पाने प्राप्नोति यावत्या मात्रया पीता न मदयति । प्रतिबन्धकद्रव्ययोगेन च नैव दोषो नायं मदोत्पत्तिप्रतिषेधः । तथा कर्तव्यं यथा मत्तः क्षीबो न भवतीति । किं तर्हि यन्मदजननसमर्थशक्तियुक्तं तन्न पातव्यमिति । अल्पाया अपि सा शक्तिर्विद्यते । यावता रूक्षमल्पप्राणं स्वल्पमपि मद्यं मदयति । स्निग्धं महाप्राणं बह्वपि नेति । नैतावता मदशक्त्यभावः शक्यो वक्तुं कार्याभावेन कारणभावान्मद्यानामपि नैव निश्चीयते । न हि महत्काष्ठं दग्धुमसमर्थस्याग्नेरदाहकत्वमनुमीयते । शुष्कतृणेन तादृशस्यैव दाहकत्वोपलंभात् । यदप्युक्तं द्रव्यान्तरेण शक्तिप्रतिबन्धकत्वपानप्राप्तिरिति तदप्यचोद्यं । न हि तृणेन तादृशस्यैव दाहे तदानीं सा तस्य शक्तिर्नास्ति किंतु विद्यमानाऽपि कार्यारंभं प्रत्यसमर्था शक्तिसंभवश्च प्रतिहेतुर्न ते नित्यकार्ये तद्द्रव्यान्तराणि शक्तिं विनाशयन्ति ; अपि तु कार्यारंभं प्रतिबध्नन्ति तथा च तत्परिमाणारंभकद्रव्ययोगेऽपि पैत्तिको माद्यति न श्लैष्मिकोऽतोऽनुमीयते । न तस्य विनाशस्तस्मात्र भाविमद्यावस्थस्य प्रतिषेधो नापि प्राप्तावस्थाविशेषस्य प्रतिबन्धकाभावादिवत्तत्प्रतिषेधः यथा चौरः स वर्जनीय इति नोदश्चितोऽप्राप्ताम्लभावस्य प्रतिषेधो माध्वीति कथं यावता गुणेन माध्वीति भवितव्यं संज्ञापूर्वको विधिरनित्य इति परिहारः

१ ण–र–वाक्यात् सुरापान् । २ ण–र–गुडविकारे गौडे येषामपीक्षुरसमेव मद्यतामापद्यते तेषामपि कार्य रणे । ३ ण–र–नृद्वीकारस्य । ४ ण–र–संसृष्ट्यो । ५ ण–र–सो । ६ ण–र–मे । ७ ण–र–तं । ८ ण–र–नोदश्चितो । ९ ण–र–तद्गुणेन । १० ण–र–हारीति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञापकं चास्याः परिभाषाया गुरोरिति वक्तव्ये तद्गुण इति गुणग्रहणम् । अत्र द्विजोत्तमग्रहणं च क्षत्रियवैश्ययोर्मद्यानुज्ञानार्थं । तथा च महाभारते भारतानां यादवानां मद्यपानं तु वर्ण्यते "उभौ मध्वासवक्षीबौ दृष्टौ मे केशवार्जुनौ" इत्युत्तरश्लोकादर्थवाद एव । ननु च तथा सर्वा इति बहुवचनं कथं यावता एकमुपमानं द्वे उपमेये अन्नमलत्वं चात्र हेतुमन्निगदोऽर्थवादो मलं हेतुर्यथा शूर्पेण जुहोति तेन ह्यन्नं क्रियत इति ॥ ९४ ॥

यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् ॥
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ॥ ९५ ॥

यक्षादयो निन्द्याः प्राणिनो भक्ष्याभक्ष्यविवेकशून्या मांसमभक्षयन् । सुरा चासवश्च **सुरासवं** "जातिरप्राणिनाम्" इत्येकवद्भावः । आसवोऽत्र मद्यविशेष एव ईषन्मद्याद्भिन्नं गोबलीवर्दवदिहोपादानं । **देवानामश्नता** देवदेयानि हवींषि चरुपुरोडाशादीनि दर्शपूर्णमासोदितानि ब्राह्मणस्याशितुं युक्तानि न पिशाचाद्यन्नं मद्यमांसादीनि ॥ ९५ ॥

अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत् ॥
अकार्यमन्यत्कुर्याद्वा ब्राह्मणो मदमोहितः ॥ ९६ ॥

अमेध्ये पतनं देवान्नाशनवदर्थवादः । ननु च वैदिकोदाहरणं कथमकार्यं । अत्रोच्यते । तदपेक्षयाऽन्यदकार्यं कुर्यादिति । कथं न कार्यं अशुचेर्वेदाक्षरोच्चारणप्रतिषेधात् ॥ ९६ ॥

यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत् ॥
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति ॥ ९७ ॥

अधीतवेदब्रह्मसंस्काररूपेणावस्थितत्हृदयेनोच्यते तदपेक्षयाऽकार्यं कुर्यादिति । अतो हृदये मद्येनाप्लाविते स शूद्रतां गच्छति । ब्राह्मण्यवचनं सर्वप्रकारमद्यनिषेधार्थं ब्राह्मणस्य । क्षत्रियवैश्ययोः पैष्ट्या एव निषेध इति दर्शयति ॥ ९७ ॥

एषा विचित्राऽभिहिता सुरापानस्य निष्कृतिः ॥
अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम् ॥ ९८ ॥

उक्तप्रयोजनौ पूर्वोत्तरश्लोकौ ॥ ९८ ॥

सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु ॥
स्वकर्म ख्यापयन् ब्रूयान्मां भवाननुशास्त्विति ॥ ९९ ॥

१ फ-ओरादिति । २ व्या. सू. २।४।६ । ३ ण-र-येनोच्यते । ४ र-अधीतो वेदो वा स्थितं हृदये. अतो हृदये मद्येना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणसुवर्णस्तेय एतत्प्रायश्चित्तं । विप्रग्रहणं सर्ववर्णप्रदर्शनार्थं । क्षत्रियादीनामन्यस्य प्रायश्चित्तस्यासमाम्नानात् । **मामनुशास्तु** निग्रहं करोतु । राजा गत्वा च वक्तव्यः । अत्र च राजशब्दो देशेश्वरवचन एव न क्षत्रियजात्यपेक्षः ॥ ९८ ॥

गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् ॥
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव तु ॥ १०० ॥

मुशलं दण्डविशेष आयसो दारुमयो वा । सकृत्स्वयमिति विवक्षितं । **वधेन शुध्यति** सकृत्प्रहारेण वधो मरणफलो वा भवतु मा वाऽस्तु तादृशेन मुशलप्रहारेण शुद्धो भवति । **ब्राह्मणस्तु तपसा** वक्ष्यमाणेन । अत्रापि ब्राह्मणग्रहणमविवक्षितं । तथा चोत्तरत्र द्विजग्रहणं । यद्यपि च कृष्णलग्रहणे महापातकं तथापि मरणान्तं प्रायश्चित्तं सुवर्णशतहरणे द्रष्टव्यं । उक्तं दण्डप्रायश्चित्तं तुल्यरूपेण । तत्र चोक्तं "शतादभ्यधिके वध" इत्यतोऽर्वाक् कल्पना कार्या । यस्तु "मरणात्पूतो भवति" इति प्रायश्चित्तान्तरं तस्मिन् राजशस्त्र उदुंबर आदद्यात्तस्मात्तं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायते । यदा क्षत्रियादिर्हन्ता स्वामी च गुणवांस्तत्रैतद्विज्ञायते । यदा तु मरणोद्यतस्तदा स्यादिति प्रयोजने प्रयोजनापहारस्तदा वा शिष्टं निष्कालको घृताक्तो गोमयादिना पातप्रभृतिः[1] ॥ १०० ॥

तपसाऽपनुनुत्सुस्तु सुवर्णस्तेयजं मलम् ॥
चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् ॥ १०१ ॥

इति च द्वादशवार्षिकं धर्मानुवादात्तस्यैवातिदेशो न ब्रह्महत्यायाः प्रायश्चित्तान्तरं ब्रह्महणि यद्व्रतमुक्तं तच्चरेदिति योजना । **अपनुनुत्सुरपनेतुमिच्छुः** शुद्धिं चिकीर्षतीति यावत् ॥ १०१ ॥

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः ॥
गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत् ॥ १०२ ॥

ननु च वधेन शुध्यति स्तेनस्तपसा चेति द्वयस्य प्राक्तनत्वादेतैरिति बहुवचनं न सम्यक् । एतदेव ज्ञापकं एष निःशेषोक्तानप्यनुक्तान् कल्पेतानुबन्धाद्यपेक्षया गुरुस्त्रीगमनप्रयोजनं गुरुस्त्रीगमनीयं निमित्तमपि प्रयोजनमुच्यते । प्रयोजयति प्रवर्तयतीति ॥ १०२ ॥

गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये ॥
सूर्मीं ज्वलंतीं स्वाश्लिष्येन्मृत्युना स विशुध्यति ॥ १०३ ॥

गुरुतल्पगो गुरुतल्पीति वा पाठः । तल्पीति मत्वर्थीयेन विशिष्ट एव स्त्रीपुंसयोः संसर्ग उच्यते । गुरुराचार्यः पिता चेति । तल्पशब्दो दारवचनः आचार्याणी मन्त्वेवं

---

[1] ग–र–पातुः प्रभृति शः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रायश्चित्तमपरा मातैव । समानजातीयागमन इमानि त्रीणि प्रायश्चित्तानि कल्पते । बुद्धिपूर्वं चाभिभाष्यैनः पापं विख्याप्य तप्ते शयनेऽग्निस्पर्शेऽयोमये शयीत । मृत्युना शुध्यतीति वचनात् तथा स्त्रीप्रकृतिरयोमयी तामाश्लिष्येदालिंगेत् ॥ १०३ ॥

स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ ॥
नैर्ऋतीं दिशमातिष्ठेदा निपातादजिह्मगः ॥ १०४ ॥

उत्कर्तनेन कल्पेन शोधनं शस्त्राद्याक्षिप्तशक्तिः सर्वत्र सहकारिणी । येन शक्येत छेत्तुं तत्सामर्थ्याल्लभ्यते । प्रत्यगुदग्दक्षिणा नैर्ऋती दिक् । अजिह्मगोऽकुटिलगः । श्वभ्रकूपादि न परिहरेदित्यर्थः । कुड्यादिषु प्रतियातनं हि तदापाताद्गच्छेदेव ॥ १०४ ॥

खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने ॥
प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः ॥ १०५ ॥

अबुद्धिपूर्वकं च भार्याभ्रान्त्या गमन इदं प्रायश्चित्तं । द्विजातीयगमने बुद्धिपूर्वकमपि ॥ १०५ ॥

चान्द्रायणं वा त्रीन्मासानभ्यस्येन्नियतेन्द्रियः ॥
हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये ॥ १०६ ॥

अतिदिष्टगुरुभावानां मातुलपितृव्यादीनां या भार्यास्तद्गमन इदं प्रायश्चित्तं । हविष्यं पयोमूलघृतादि । यवागू द्रवपेयादि । चीरं वस्त्रखण्डं श्मश्रुलो रूढश्मश्रुः समानजातीयाया अपि व्यभिचारिण्यागमने लघ्वेव प्रायश्चित्तम् ॥ १०६ ॥

एतैर्व्रतैरपोहेयुर्महापातकिनो मलम् ॥
उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः ॥ १०७ ॥

उक्तवक्ष्यमाणसंक्षेपवचनोऽयम् ॥ १०७ ॥

उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत् ॥
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः ॥ १०८ ॥

गोघ्नो गोघाती मूलविभुजादिदर्शनात्कः । यवान् पिबेदिति यवसक्तुपानं केचिदाहुः । अन्ये तु प्रकृतिशब्दः कार्ये यवाग्वां प्रयुक्तोऽतो यवान् पिष्ट्वा पाययेदित्युक्तं भवति । पूर्वस्मिन्पक्षेऽश्रुतोदकादिद्रवकल्पना भवति । न हि यवा उदकादिना विना पातुं शक्यन्ते । इह तु लक्षणमात्रमश्रुतकल्पनायाश्च लघ्वी लक्षणा । कृतवपनः कृतमौण्ड्यः केशच्छेदवचनो वा गोष्ठे यत्र गाव आसते । चर्मणा तेन येन गौर्हता अपि त्वन्यस्या अपि ॥ १०८ ॥

१ ण-र-तद्यातनं । २ ख-भि । ३ फ-वि । ४ ख-र्थे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्थकालमश्नीयादक्षारलवणं मितम् ॥
गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः ॥ १०९ ॥

द्वौ मासावेकैकमाहारं भुक्त्वा द्वितीयेऽहनि सायमश्नीयात् । लवणविशेषेण क्षारग्रहणात्सैन्धवस्याप्रतिषेधः । स्वतन्त्रः क्षारप्रतिषेधो हि द्वन्द्वे सति स्यात् । तत्र वचनप्रवृत्तिः पदद्वयस्य च लक्षणार्था युगपदधिकरणतायां द्वन्द्वः । स्थिते[1] विशेषणसमासे विशिष्टस्यार्थस्य नानुज्ञासंबन्धः । न मासादिलाघवं । **मितं** स्वल्पमित्यर्थः । न यावता तृप्तिर्भवति शरीरस्थितिश्च जायते । **गोमूत्रस्नानं** त्रिष्वपि कालेषु । **चतुर्थकालं** द्वौमासाविति संबन्धः । एवं **स्मृत्यंतरे**

" कृतवपनो वसेद्गोष्ठे चर्मणा तेन संवृतः । द्वौ मासौ स्नानमप्यस्य गोमूत्रेण विधीयते ॥
" पादशौचक्रियाकार्यमद्भिः कुर्वीत केवलं । " न चास्य द्वौ मासावित्यनेन संबन्धः संभवति । स्नानग्रहणं पादपूरणार्थं । स्नानकाले यदि पादाद्यशुद्धिर्भवत्यर्थात्तदुदकेनैव द्रव्यशुद्धिविधिना शोधनीयम् । अत आचमनमपि शुद्ध्यर्थमुदकेनैव स्नानकालेऽन्यदा मृदा शुद्धिः । सा मृद्वारिक्रमेणैव कर्तव्या । स्नानविधौ गोमूत्रश्रवणादाचमनादौ कः प्रसङ्गः स्नानेऽपि प्रायश्चित्ताङ्गेन शुद्ध्यर्थम् ॥ १०९ ॥

दिवानुगच्छेद्गास्तास्तु तिष्ठन्नूर्ध्वं रजः पिबेत् ॥
शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत् ॥ ११० ॥

यासां गवां स्थाने वसति ताश्चरितुं गच्छन्तीः पश्चाद्गच्छेत् । तच्छब्देन प्रत्यवमर्शाद्यासां गृहे स्थितस्तासां अन्यासां गच्छन्तीनां न भवत्यनुगमनं । ताभिः समुत्थापितं रजो रेणुरूर्ध्वं गच्छन् पिबेत् । एवं तत्रैव ताभिः सह दिवसं विलंघ्य ताभिरेव सह पुनर्गोष्ठमागच्छेत् । **शुश्रूषयित्वा** कण्डूकर्षणरजोपनोदनेनोपगच्छन्नमस्कृत्य जानुशिरसा प्रणामं कृत्वा **वीरासनो** वसेत् । भित्तिशय्यादावनिषद्य यदुपविष्टस्यावस्थानं तद्वीरासनम् ॥ ११० ॥

तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत् ॥
आसीनासु तथासीनो नियतो वीतमत्सरः ॥ १११ ॥

तिष्ठन्तीत्येवमादिको विधिर्यत्र काश्चित्तिष्ठन्ति काश्चिद्व्रजन्ति काश्चिद्वाऽऽसते तत्र भूयसीनां धर्मं समाश्रयेत् । वीतो मत्सरो क्षोभो यस्येति । प्रदर्शनार्थं चैतत् । त्यक्तरागादिमनोदोष इति यावत् । नियतेन्द्रियवचनात् ॥ १११ ॥

---

१ ख-र-स्थितेर्वि- ।

For Private And Personal Use Only

आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः ।
पतितां पङ्कलग्नां वा सर्वोपायैर्विमोचयेत् ॥ ११२ ॥

आतुरां व्याधितां **अभिशस्तां** गृहितः **भयैर्व्याघ्रादि**निमित्तैः **सर्वेण** सामर्थ्येन प्राणशब्देनोच्छ्वासपवन एव अल्पप्राणैर्महाप्राण इति । स्थूले बलवति च प्रयोगदर्शनात् । तेन स्वयमशक्तेन सहायको पादानेनाप्युद्धारः कर्तव्यः ॥ ११२ ॥

उष्णे वर्षति शीते वा मारुते वाति वा भृशम् ।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ॥ ११३ ॥

उष्णेन भृशं तपत्यादित्ये **वर्षति** पर्जन्ये **शीते वा मारुते वाति** वायौ भृशमिति ॥ ११३ ॥

आत्मनो यदि वाऽन्येषां गृहे क्षेत्रेऽथवा खले ।
भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम् ॥ ११४ ॥

व्रीह्यादिभक्षयन्तीं गां न धारयेत् । न चान्यानाचक्षीत निवारणार्थं यदि तु बलीयात् आशंक्यते बाध इति तृष्ण्या तदा पूर्वोक्तकरणे न दोषः तदनुग्रहो विधीयत एवं पिबंतं वत्सकमपि ॥ ११४ ॥

अनेन विधिना यस्तु गोघ्नो गामनुगच्छति ।
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ॥ ११५ ॥

वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः ॥
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ॥ ११६ ॥

दश गावो देया एको वृषभः । शक्तौ चत्वारि व्रतान्यविद्यमाने गदितधने ततो न्यूनं **सर्वस्वं देयं वेदविद्भ्य** इति बहुशः द्वयोरेकस्मिन् वा । वेदविद्ग्रहणं न बहुत्वार्थम् अनुवादो वेदविदामेव । पात्रतयोक्तत्वात् । यत्तु **स्मृत्यन्तरे** "दमनवाहन-बन्धनदामपाशयोजनतैौषधादियोगविपन्नां सशिखं वपनं कृत्वा प्राजापत्यं चरेत्ततश्चैल-खण्डं दद्यादिति" तस्य नातिप्रयत्नेनैतासु क्रियासु प्रवर्तते । तस्य प्रमादजेऽपराधे प्रायश्चित्तमेतत् । यतः

"यंत्रणे गोश्चिकित्सायां मूढगर्भविमोचने । यत्ने कृते विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ॥
" औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु यः । दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते ॥ "
इति **सांवर्ते** । तथाऽन्यत्रमारो न शुद्धिरुक्ता " पंचगव्यं पिबेत् षष्ठे काले

१ ग—र—मेव । २ ग—र—अन्यस्य ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पयः । समासे ब्राह्मणांस्तर्पयेत् । तिलधेनुं च दद्यात् । तथान्यत्र अर्द्धमासेन सक्तुयावकाशी-पयोदधि घृतं सकृदिति " । विकल्पानेतान्वक्ष्यामि । येन द्रव्येण यः प्रयोग आरब्धः स तेनैव समापनीयो न तु कस्मिंश्चिदाह्नि सक्तवः कस्मिंश्चिद्यावकादीनीति व्रीहिभिर्यजेत यवैर्वेति विकल्पतेऽपि द्रव्यद्वयेन व्रीहिषूपपत्तेः स्वेच्छया चैतेषां वा विनाशे यवा उपादीयन्ते । प्रतिनिधिनैवं प्रयोगसमाप्तिस्तत्रापि गोदानं विहितं तथैतावन्त्येव तपांस्यतो वत्ससहितां गां दद्यादित्यत्रोक्तं । **गौतमीये** च " गां वैश्यवदिति " । तत्र श्रोत्रियस्य यज्ञंविदुषोऽश्याहितस्य दोग्ध्रीं बहुक्षीरां बालवत्सां निर्धनस्य गां हत्वा गौतमीयं क्षेत्रारामादौ व्रीह्यादिषु च प्रविश्य तन्निवारणार्थं प्रद्रुते मा मारयाम्येनामिति न मया बुद्ध्या कथं मृतायामिदमासितव्यं । तथाऽश्रोत्रियस्य जरत्या अक्षीरायाश्च बुद्धि-पूर्ववधे त्रैमासिकं सर्वतो निर्गुणाया निर्गुणस्वामिकाया अबुद्धिपूर्ववधे प्राजापत्यं । तस्या एव बुद्धिपूर्वमृतायां त्रैमासिकमिति ॥ ११५ ॥ ११६ ॥

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः ॥
अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥ ११७ ॥

एतदेवेति गोघातकप्रायश्चित्तं सर्वेषूपपातकेष्वतिदिशति । वैकल्पिकं चान्द्रायण-मप्युपपातकित्वे विशेषोपदेशान्न गोघ्नस्य चान्द्रायणमिच्छन्ति । तेषामुपपातकित्ववचने गोघ्नस्य प्रयोजनं मृग्यम् ॥ ११७ ॥

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे ॥
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ॥ ११८ ॥

अवकारोऽवकीर्णो ब्रह्मचारिणो व्रतनियमः स्त्रीसंप्रयोगलक्षणः सोऽस्यास्तीत्यव-कीर्णी । वक्ष्यति " कामतो रेतसः सेकमिति " । **काणेन गर्दभेनेति** सगुणद्रव्य-निर्देशः । **चतुष्पथेनेति** देशस्य । **निशीति** कालस्य । **नैर्ऋतमिति** । देवतायाः । **पाकयज्ञ-विधानेनेतीति** । कर्तव्यताविधानं । ननु च पशुयागा अग्निष्टोमीयपशुयागा अग्निषोमीय-पशुप्रकृतयः । सत्यं । स एव पाकयज्ञप्रकृतिः सत्यधिकारे हि । उक्तं च " पशुरपि द्रवति पयोऽपि द्रवतीति " । पाकयज्ञाः पूर्णमासादयः ॥ ११८ ॥

हुत्वाऽग्नौ विधिवद्धोमानंततश्च समेत्यृचा ॥
वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाऽऽहुतीः ॥ ११९ ॥

अग्नौ यदा होममग्निहोमाश्च " स्हृदयस्याग्र " इति । अतः समासेषु होमेषु मरुद्भ्य इन्द्राय बृहस्पतयेऽग्नयेऽप्याहुतीर्जुहुयात् । ' **सम्** ' इत्यनया ॥

१ ण-र-विदुषो । २ ण-र-मिदमासितव्यं । ३ ण-र-व्रतानि स्त्रीसंप्रयोगः । ४ श्लो० १२०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सं मा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः । संचायमग्निः सिञ्चतु प्रजया च धनेन च ॥" इत्येतया जुहुयान्मान्त्रवर्णिकत्वात् देवतानां श्लोके वातमरुच्छब्दो मरुद्बृहस्पतिशब्दलक्षणावतो वातादिषु स्वाहाकारादौ मरुद्बृहस्पतिशब्दौ प्रयोक्तव्यौ न वातगुरुशब्दौ ॥ ११९ ॥

कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः ॥
अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः ॥ १२० ॥

अवकीर्णिपदार्थनिरूपणमतश्चोपात्तव्रतातिरिक्तविषय एवं विज्ञायते । व्रतस्यास्येति ब्रह्मचर्याश्रमस्थस्येति स्मृत्यन्तरदर्शनाद्विज्ञेयं । रेतःसेकस्त्वस्यैव विशेषतःप्रतिषिद्धोऽन्तरेणापि स्त्रीसंप्रयोगं । कामतः सेके विधिरयम् ॥ १२० ॥

मारुतं पुरुहूतं च गुरुं पावकमेव च ॥
चतुरो व्रतिनोऽभ्येति ब्राह्मं तेजोऽवकीर्णिनः ॥ १२१ ॥

आद्याहुतिरिति विधेरर्थवादो व्रतिनः सत अवकीर्णिनः यत् ब्रह्मतेजो विविधविज्ञानोपार्जितं पुण्यं तद्देवतां देवतामुपैत्युपसंक्रामति । तत्र लयं गच्छतीति यावत् । व्रतिनोपैतीति विवक्षितम् ॥ १२१ ॥

एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम् ॥
सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकीर्तयन् ॥ १२२ ॥

वसित्वा आच्छाद्य स्वकर्मावकीर्णोऽस्मीत्येवम् ॥ १२२ ॥

तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम् ॥
उपस्पृशंस्त्रिषवणं त्वब्देन स विशुध्यति ॥ १२३ ॥

प्रातर्मध्याह्नापराह्णेषूपस्पृशन् स्नानं कुर्वन् संवत्सरेण पूतो भवति ॥ १२३ ॥

जातिभ्रंशकरं कर्म कृत्वाऽन्यतममिच्छया ॥
चरेत्सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ॥ १२४ ॥

समासान्युपपातकानि । अन्यतममित्यनुवादो न हि निमित्तानां समाहारसंभवः समुदायविवक्षायां न च कस्यचित्प्रायश्चित्तमुपादिशति । को हि मनुष्यः सर्वाणि जातिभ्रंशकराण्यकार्याणि कुर्यात् । एक एव शब्दः प्रायश्चित्तानुदेशोऽशास्त्रताप्रसङ्गो न च साहित्यविवक्षाऽप्युक्ता लक्षणत्वेन श्रवणात्पुरुषं प्रति निमित्तानामतः प्रत्येकं वाक्यपरिसमाप्तिर्यस्य पिता पितामहः सोमं न पिबेदित्यन्यतरस्य पितुः पितामहस्य वासो मम पीतव्रतो भवत्येव पशुर्यथा सत्यप्युभयश्रवणे यद्युभयं हविरिति याच्यादित्यन्यतरहविर्विनाशेऽपि

१०९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवत्येव पंचशरावः । एवं सर्वप्रायश्चित्तेषु द्रष्टव्यम् । इच्छयेति विवक्षितमनिच्छयेति च प्राजापत्यसान्तपनयोः स्वरूपं वक्ष्यति ॥ १२४ ॥

सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम् ॥
मलिनीकरणीयेषु तप्तः स्याद्यवकऽयहम् ॥ १२५ ॥

सङ्करीकरणमपात्रीकरणं पूर्वमुक्तेनेति । एवं **सङ्करापात्रकृत्यास्विति** संज्ञिभेदाद्बहुवचनम् । **कृत्याशब्दः** प्रत्येकमभिसंबध्यते । कृत्यं कारणम् । **ऐन्दवो मासः** चान्द्रायणो **यावको** यवविकारः पेयलेह्यादिः । अत्राविशेषश्रवणेऽपीच्छानिच्छयोर्गुरुलघुभावो विज्ञेयः ॥ १२५ ॥

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः ॥
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः ॥ १२६ ॥

सवनगतयो राजवैश्ययोर्ब्राह्मणमुक्तं । इह तु ततोऽन्यत्र स्वधर्मानुष्ठानयोश्चतुर्थाष्टमविभागविधिः । तथा च वृत्तस्य ग्रहणं सर्वक्रियार्थम् । त्रीणि वर्षाणि क्षत्रियस्य सार्धवर्षं वैश्यस्य नव मासान् शूद्रस्य । यत्तु स्त्रीशूद्रस्य विट्क्षत्रियवध इति तत्परित्यक्तस्वकर्मणोर्वैश्यवृत्तौ वैश्यस्य वृत्तावेव वाऽधर्मस्थितयोः शूद्रस्य वृत्तं द्विजशुश्रूषादि न महायज्ञानुष्ठानं च वृत्तं शीलं तिष्ठति गहने यथा समये स्वधर्मपराणां विधिवत्प्रायश्चित्तम् ॥१२६॥

अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः ॥
वृषभैकसहस्रा गा दद्यात्सुचरितव्रतः ॥ १२७ ॥

इदमपरं दानप्रायश्चित्तं संभवद्वित्तस्य । तपो नास्तीति वक्ष्यति । "दानेन वधनिर्णेकम्" इत्यादि । **अकामत इति** न विवक्षितं महत्त्वात्प्रायश्चित्तस्य । यदि वा सवनगतयोरेवाकामत इति कल्पनीयम् । वृषभ एको यासां सहस्रे ता **वृषभैकसहस्राः** ।१२७।

त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम् ।
वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥ १२८ ॥

आद्योऽर्धः श्लोकस्तुरीय इतरस्यानुवादो जटीति चीरखट्वाङ्गधारणादिनिवृत्त्यर्थमिति केचित् । तदुक्तं तत्रैव ते धर्मास्तदीयतुरीयभागातिदेशो नान्येषां सत्यपि संभवे सरस्वतीपरिसर्पणादीनामिव प्रयोजनसत्त्वोपपत्तौ **दूरत** इति ग्रामान्निवृत्तिर्वृक्षमूले कुटीं कृत्वेति ॥ १२८ ॥

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः ।
प्रमाप्य वैश्यं वृत्तस्थं दद्याद्वैकशतं गवाम् ॥ १२९ ॥

पूर्वत्राष्टमोऽशः । अनेन द्वादशो विधीयते । अतुल्यत्वादब्दन्यूनगुणस्य विधिरयमिति

1 **णार**–शुद्ध्यर्थमात्मनः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विज्ञायते । ननु वृत्तस्थ इवि श्रुतं सत्यं संप्रति वृत्तस्थो वधकाले प्राङ्निर्गुण इति । यस्तु सर्वदैव वृत्तस्थस्तस्य पूर्ववदिति ज्ञेयम् ॥ १२९ ॥

एतदेव व्रतं कृत्स्नं षण्मासान् शूद्रहा चरेत् ।
वृषभैकादशा वाऽपि दद्याद्विप्राय गाः सिताः ॥ १३० ॥

अत्रापि मासषट्कं नवकं च वृत्तस्थेतरभेदेन योज्यम् । यथाश्रुतसंख्यं च गोदानं सर्वत्र वैकल्पिकं । द्विजोत्तमग्रहणं च प्रदर्शनार्थं । सिता न वर्णतः । किं तर्हि? शुद्धि-सामान्याद्या बहुक्षीराख्यपत्या अनष्टप्रजाश्च ॥ १३० ॥

मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ॥ १३१ ॥

अतिमहत्वात्प्रायश्चित्तस्य समुदायविधेः प्रायश्चित्तमेतत् । ननु चात्र साहित्यं न विवक्षितमित्युक्तं यतो जातिभ्रंशकरादिषु कथं चैतत् । एवं सर्वे चैकस्य हन्तार उपनयेयुः । अतिरिक्तसद्भावे न तन्निमित्तं स्यात् । अर्थान्तरमेवैतद्दर्शनैव तच्छक्यते वक्तुं तेना-वृत्तेन हर्ता अधिकवधे त्वन्यद्भविष्यति । नैतच्छूयते न्यूने वधे च न स्यात् । पयः पिबेदित्यादि प्रत्येकविधेन संबध्यते न समुदाये प्रत्येकं वाक्यपरिसमाप्तिः समुदाये वा । अर्थान्तरे तु न चेत्स्यातुं लभ्यन्ते । यत्तावदुच्यते साहित्यं न विवक्षतमिति तत्र न विवक्ष्यते । यत्र प्रत्येकं संबन्धिवाच्यमर्थवद्यथा "यस्य पिता पितामहः सोमं न पिबेत्" इति । यत्र पुनरविवक्ष्यमाणे वाच्यमेवानर्थकं तत्र तत्परिहारार्थं युक्ता विवक्षा । यथा वक्ष्यति "सहस्रस्य प्रमापणे पूर्णे वानसीति" । अत्राविवक्षायां सहस्रस्येति व्यर्थं स्यात् । एवं हि शास्त्रान्तरविरोधादतिमहत्वे युक्तैव विवक्षा । ननु च पदोपादानतायामपि लक्षणागतस्य विशेषणस्याविवक्षैव । यथा यस्योभयं हविरित्युभयशब्दार्थं तत्र तुल्यं । अत्र हविरुभयमिति च पदद्वये वक्ष्यमाणे वाक्यभेदो हविरत्रोभयं वेति । यत्रावस्था-भेदस्तत्र वाक्यभेदपरिहारार्थमावश्यं भेदोऽन्यतरस्मिन् व्यवहितो गुणो वा हातव्यो भवति । तथोभयशब्दे सर्वमस्ति । यच्छेदिति हविःशब्देन व्यवहितो भवति । संख्यानु-रूपत्वात् गुणानुवादकत्वं वाऽस्य संभवति । अविवक्षिते च तस्मिन् परिशिष्टं वाक्य-मर्थवाद एव । इह पुनः समुदायविवक्षायां सहस्रशब्दविवक्षायां वा कृत्स्नमेव वाक्य-मनर्थकं तथा ह्येतावद्वाक्यं स्यात् । स्थानतां प्रमाणतां तथाऽस्यां शूद्रहत्याव्रतमित्येताव-द्वक्तव्यं स्यात्प्रमाणे शूद्रहत्येति । एतावतामेव हिंसा संभवति । तथाऽन्यदप्येवं-जातीयकं विशेषणं न विवक्ष्येत । समानन्यायत्वात् । "फलदानं तु वृक्षाणाम्" इति ।

१ ण-र-प्राङ्गनिर्गुण । २ फ-हन्ता । ३ ण-र-वाक्यं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततश्च सर्वमसमंजस्यं स्यात् । पौरुषेयं चेदं वाक्यं नैव वैदिकं । वेदे च कस्य पुरुषस्य प्रयोगः किमर्थमनर्थकं प्रयुक्तमिति । इह तु बुद्धिपूर्वे प्रयोगे मात्रायामप्ययुक्तमानर्थक्ये तत्साहित्यविवक्षाविशेषेण विवक्षा युक्तैव । यच्चोक्तं कथं चेदिति सर्वमेवेति च तत्राप्या-खेटकमृगयादावदाहिनो वा उपपाद्यतयैव यदप्युक्तमतिरिक्तसद्भावेन तन्निमित्तमिति तद-प्ययुक्तं । न त्वाधिक्ये पूर्वेषां नाशो न्यूनेषु च तथैव कल्पना कार्या ॥ १३१ ॥

पयः पिबेत्त्रिरात्रं वा योजनं वाऽध्वनो व्रजेत् ॥
उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाऽब्दैवतं जपेत् ॥ १३२ ॥

प्रत्येकं वधे प्रायश्चित्तान्तरमुच्यते । **पयः** क्षीरं प्रसिद्धतरत्वात्प्रयोगस्य नापः । सत्यामप्युभयार्थतायां यथा 'पयसा जुहोति' इति । यथैव वराहशब्दो मेघे पर्वते सूकरे वर्तते प्रसिद्धतरसूकरेन पर्वतादिप्रवृत्तौ समानाधिकरण्यमपेक्ष्यते वराहो हिमवान् वराहः पारियात्र इति । प्राकृते च भोजने भक्तादौ शरीरस्थित्यर्थे प्राप्ते तत्स्थाने पयो विधीयमानमन्यदन्नं निवर्तयति । तपोरूपत्वाच्चैतदेव प्रतिपत्तुं युक्तं । तापयति दुःखयतीति तपोऽतो यथा प्राणायामघृतप्राशनमिति नात्र पौरस्य भोजनं निवर्त्यते । एवमिह नाचमनं निवर्तयति यो घृतप्राशनं भोजनान्तरनिमित्तं बाधत इति नापः पयःपानेन विकल्पिताः । किं तर्हि **उपस्पृशेत् स्रवन्त्यामिति** पयःपानात्तद्गमने अध्वगमनशब्द उक्तः । स्रवन्त्यां स्रवन्तिवचनात्तडागसरसोर्निवृत्तिः । अब्दैवतं "आपो हि ष्ठा" इत्यादि ऋक्-समुदायोक्तं पवमानसूक्तं **स्मृत्यन्तरेषु** "कृशरभोजनमेकार्थं लोहदण्डं च दक्षिणेति" **व्रजेन्न** देशान्तरप्राप्तिरित्येव किं तर्हि पादाभ्यां गमनम् ॥ १३२ ॥

अभ्रिं काष्र्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः ॥
पलालभारकं षण्ढे सैसकं चैकमाषकम् ॥ १३३ ॥

द्विजोत्तमग्रहणमतंत्रम् । तीक्ष्णामायसीमभ्रीं काष्र्णायसीग्रहणं काष्ठादिनिवृत्यर्थं । **षण्ढे** नपुंसके । तच्चतुर्विधं । अरेतो वा सरेतो वाऽप्रवृत्तेन्द्रियमुभयव्यञ्जनं वा । सप्राणि-मात्रसंबन्धेनैतत्प्रायश्चित्तं ब्राह्मणस्य शूद्रस्य मेषस्य[1] छागस्य च ॥ १३३ ॥

घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ ॥
शुके द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनम् ॥ १३४ ॥

वराहः सूकरस्तस्मिन्हते **घृतघटं** दद्यात् । चतुराढकं **द्रोणः हायनो** वर्षं । **वत्सो** गोजातीयो बालः ॥ १३४ ॥

---

१ क–र–मेध्यस्य च्छागस्य वा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हत्वा हंसं बलाकां च बकं बर्हिणमेव च ॥
वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम् ॥ १३५ ॥

हंसादयः पक्षिणो वानरो मर्कटः । स्पर्शयेद्दद्यात् प्रत्येकवधे चैतत्प्रायश्चित्तं द्वन्द्वानिर्देशादित्युक्तम् ॥ १३५ ॥

वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजम् ॥
अजमेषावनड्वाहं खरं हत्वैकहायनम् ॥ १३६ ॥

हयोऽश्वो गजो हस्तिः । अनड्वान पुंगवोऽजमेषवधे खरवधे । अनडुत्साहचर्यादेकहायनो गोवत्सः ॥ १३६ ॥

क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम् ॥
अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम् ॥ १३७ ॥

क्रव्यादास्तरक्षुसिंहमृगादयः । अक्रव्यादाः रुरुपृषतादयः । धेनुर्गौरेव । कृष्णलं विशिष्टपरिमाणं सुवर्णं दण्डाधिकारशास्त्रपरिभाषा । अन्यत्र लौकिकमेव " शतकृष्णलं घृतमायुष्काम " इति ॥ १३७ ॥

* जीनकार्मुकबस्तावीन्पृथग्दद्याद्विशुद्धये ॥
चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिताः ॥ १३८ ॥

अनवस्थिता बहुभिः संगच्छमाना वेश्यावृत्तमाचरन्त्योऽनवस्थिता भवन्ति । न पुनः शास्त्रातिक्रममात्रं । तथा सति न परपुरुषसंप्रयोग एव लभ्यते । वर्णक्रमेण जीनादिदानात् जीनं चर्मपुटं मुटकाधारादिप्रयोजनं । कार्मुकं धनुः । बस्तः छागोऽविर्मेषः । पृथग्ग्रहणं लिङ्गादुक्तं समुदाये प्रायश्चित्तमिति । केचिद्धत्वेति पठन्ति तदयुक्तं । हिंसाप्रकरणात् ॥ १३८ ॥

दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् ॥
एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये ॥ १३९ ॥

निर्णेकः शुद्धिः हिंसायां दानमुख्यमिति दर्शयति । न च तस्यैकैकश इति लिङ्गात् केचित्समुदायेऽपीति । द्विज इत्यादिपादपूरणं । अविशेषग्रहणे कृच्छ्रशब्दं प्राजापत्य इति स्मरन्ति ॥ १३९ ॥

अस्थिमतां तु सत्वानां सहस्रस्य प्रमापणे ॥
पूर्णे चानास्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् ॥ १४० ॥

स्वल्पशरीरत्वमिहास्थिमत्त्वमनास्थिसाहचर्यात् । अनः शकटस्तत्संख्यानमेतत् । उक्तार्थे सत्येव ॥ १४० ॥

---

* वर्णानामानुपूर्व्येण त्रयाणामविशेषतः । अमत्या च प्रमाप्य स्त्रीं शूद्रहत्याव्रतं चरेत् ॥१॥

१ ण-र-द्वन्द्वनिर्देशात् । २ ण-र-तिष्ठ । ३ ण-र-जाल फ-जिन । ४ ण-अयन्वतां; र-अस्यान्वतां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किंचिदेव तु विप्राय दद्यादस्थिमतां वधे ॥
अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति ॥ १४१ ॥

किंचिदिति स्वल्पधनमुच्यते। परिमाणतः प्रयोजनो मूल्यतश्च पूर्वेषामेव प्रत्येकवध एतत् । अनुक्तनिष्कृतयश्चास्थिमन्तो ज्ञेयाः । आत्मनिरोधः **प्राणायामः** । मलिनीयेषु यत्कृमिकीटवयोग्रहणं तदुपचितग्रहपरिमाणार्थं । इदं तु ये क्षुद्रा मशकादयः ॥ १४१ ॥

फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् ॥
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम् ॥ १४२ ॥

फलदा आम्रकण्टक्यादयः । **ऋक्शतं** जपो द्विजानां शूद्रस्य । तर्हि किं केचिदाहुः " इन्धनार्थमशुष्काणाम् " इति उपपातकप्रायश्चित्तं तच्च नातिमहत्त्वाद्यदि न तद्भवति किमर्थं तर्ह्युपपातकेषूपदेशो भूयोभूयः प्रवृत्तः स्यादिति । तस्माच्छूद्रस्य द्विरात्रत्रिरात्रादीत्येव कल्पयेत् । **गुल्मादयो** व्याख्याताः । **लता** वृक्षशाखाः ॥ १४२ ॥

अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः ॥
फलपुष्पोद्भवानां च घृतप्राशो विशोधनम् ॥ १४३ ॥

अन्नाद्भक्तसक्त्वादेश्चिरस्थिताद्यानि जायन्ते **सत्वानि** प्राणिनः । **रसजानामिति** गुडोदश्विदादिभ्य उदुंबरमशकादीनि **फलपुष्पोद्भवानि** । **घृतप्राशः** अशनप्रारंभे घृतं पातव्यं । प्रशब्द आदिकर्मणि । तेन न प्राकृतं भोजनं निवर्तते । यथा पयोव्रतादौ तथा चैते प्राणिनः क्षुद्रजन्तवो येषां वधे प्राणायाम उक्तस्तदपेक्षयोपवासोऽतिमहान् । तस्मादाचमनवत् घृतप्राशनम् ॥ १४३ ॥

कृष्टजानामोषधीनां जातानां च स्वयं वने ॥
वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः ॥ १४४ ॥

फालकुद्दालादिना याः **कृष्टे** जायन्ते याश्च **स्वयं वने** तासां **वृथारंभे** गवादिप्रयोजनेन विना छेदनं गवानुगमनं । **दिनमेकं** परमहर्षाय परिचर्यते । **पयोव्रतं** भोजनान्तरनिवृत्तिः ॥ १४४ ॥

एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम् ॥
ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे ॥ १४५ ॥

हिंसासमुद्भवं हिंसात उत्पन्न**मेनः** पापमेतैरनन्तरोक्तैः प्रायश्चित्तैर**पोह्यमपनोद्यं** । बुद्धिपूर्वकृतमबुद्धिपूर्वकृतं वा । **अनाद्यभक्षणे**ऽभक्ष्यभक्षणे यथा पापमपोह्यते तथा शृणुत ॥ १४५ ॥

---

१ फ–मी । २ र–ण–तौ । ३ फ–श्वि । ४ ण–र–रंभोर्गवादि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ॥
मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ॥ १४६ ॥

मेखलादीनां निषेधाद्रूपनयनं विज्ञायते । ततश्च **स्मृत्यन्तरात्तप्तकृच्छ्रसहितं** । एवं हि **गौतमः**[1] " अमत्या मद्यपाने पयोघृतमुदकं वायुश्चेति त्र्यहं तप्तातितप्तकृच्छ्रव्रतोऽस्य संस्कारः " । सुरा चात्र न पैष्टी किंतर्हि गौडी माध्वी । कुत एतस्मृत्यन्तरदर्शनात् । " प्रमादान्मद्यमसुरां सकृत्पीत्वा द्विजोत्तमः । गोमूत्रयावकाहारो दशरात्रेण शुध्यति " ॥ पैष्ट्याश्च प्रमादपाने प्रत्यवायः प्रायश्चित्तात् । व्रतं विधितो विज्ञाय संवत्सरं कणभक्षश्चान्द्रायणाभ्यासो वा । **मतिपूर्वे** तयोरपि पाने एतदनिर्देश्यं किंतर्हि येन **प्राणानामन्तो** भवति । किंतत् यत्र मुख्या या सुरोक्ता । अभ्यासे चैतद्द्रष्टव्यं । " सकृत्पाने सुरापाने चान्द्रायणमाचरेदिति " श्रेयमत्रव्यवस्था । बुद्धिपूर्वे पैष्ट्याः पाने प्राणान्तमेव तस्या एवाबुद्धिपूर्वे सकृत्पाने कणभक्षणचांद्रायणाभ्यासोऽबुद्धिपूर्वे बुद्धिपूर्वे च । अन्येषां तु मद्यपानां बुद्धिपूर्वत्वे चांद्रायणमभ्यसेदिति । अबुद्धिपूर्वसकृत्पाने तप्तकृच्छ्रसंस्कारगोमूत्रयावकद्रव्याणि । अबुद्धिपूर्वमसकृत्पाने पैष्टीवत् ॥ १४६ ॥

अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा ॥
पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीश्रितं पयः ॥ १४७ ॥

यत्र सुरारसोऽनुभूयते तत्र तद्भाजनस्थानामपां पाने प्रायश्चित्तमेतत् । ननु च मद्यशब्दस्य सामान्यशब्दत्वान्मद्यभाण्डस्थिता इत्येव सिद्धे अपः सुरेत्यादि न वक्तव्यं । सत्यं । यद्यपि सुरामद्ययोर्मद्यपानेऽत्यन्तप्रायश्चित्तभेदो न स्यात् । सति तस्मिन् कल्पनायाश्चानुज्ञातत्वात् । सुराभाजनस्थानामधिकतरस्ततोऽतः कल्पनावृत्त्यर्थं समप्रायश्चित्तवचनं । **पंचरात्रं शंखपुष्पीघृतं** पयोघृतग्रहणात्पयः क्षीरमेव क्षीरहविषोरेव घृतशब्दः साधुः । शंखपुष्पीनामौषधिस्तया शृतं क्वथितं पंचाहानि पयः पातव्यम् ॥ १४७ ॥

स्पृष्ट्वा दत्त्वा च मदिरां विधिवत्प्रतिगृह्य च ।
शूद्रोच्छिष्टाश्च पीत्वाऽऽपः कुशवारि पिबेत्त्र्यहम् ॥ १४८ ॥

विधिवत्प्रतिगृह्य स्वस्तिवाचनिकेन एवं दत्त्वेत्यपि श्रीह्याद्यौ न दोषः । **कुशो** दर्भः ॥ १४८ ॥

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः ।
प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यति ॥ १४९ ॥

सुरापस्य गन्धमिति सुराया एव जाठरेणाग्निना धातुभिश्च संयोगेन गन्धघ्राणे लघीयः । भाण्डान्तरस्थितायाः प्राप्तिरघ्रायैव । अन्ये तु व्याचक्षते सुरापस्य ब्राह्मणस्य

---

१ अ. २२ सू. २ । २फ–र्वे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आघ्राणेऽप्येतदेव सोमप इति वचनाद्दर्शपूर्णमासयाजिनः कल्पेन । घृतं प्राश्येति अत्रापि न भोजनान्तरनिवृत्तिः सुराग्रहणान्न मद्यस्य ॥ १४९ ॥

अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ १५० ॥

विण्मूत्रग्रहणं रेतस उपलक्षणार्थं । **स्मृत्यन्तरे** "पुरीषकुणपरेतसां[1] प्राशने चैवमिति" । किंजातीयविण्मूत्रप्राशन एतन्मनुष्याणामेव । अन्येषां तु वक्ष्यामः । अत्रापि तप्तकृच्छ्रं समुच्चीयते । दर्शितश्च हेतुः । **द्विजातय** इति विवक्षितं । शूद्रस्यान्यद्वक्ष्यामः । **अज्ञानादित्यनुवादः** । को हि ज्ञात्वा विण्मूत्रमश्नीयात् । यथा मद्यपान एतदेवोक्तं "मद्यं भुक्त्वा चरेत्कृच्छ्रमिति" यदि तु संस्कारो भवति तदा वचनात्तुल्यमेव ॥ १५० ॥

वपनं मेखलादण्डो भैक्ष्यचर्याव्रतानि च ।
निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि ॥ १५१ ॥

व्रतानि वेदव्रतानि तदयुक्तं ग्रहणार्थत्वात्तेषां कुतः प्राप्तिः । तस्माद्यान्युपनयनकाले "मा दिवा स्वाप्सीः सायंप्रातः समिधमादध्या आचार्याधीनो भव" इत्येवमादीनि च व्रतानि निवर्तन्ते ॥ १५१ ॥

अभोज्यानां तु भुक्त्वाऽन्नं स्त्रीशूद्रोच्छिष्टमेव च ।
जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत् ॥ १५२ ॥

येषामन्नं न भुज्यते तेऽभोज्याः पुरुषा अश्रोत्रियस्त्रीसंग्रामजीव्ययाज्ययाजकादयः । शूद्रजातिग्रहणादेव जातिनिर्देशात्स्त्रीग्रहणं लब्धसवर्णार्थं विज्ञेयं । **उच्छिष्टं** तदास्पृष्टं यच्च "नित्यमास्यं शुचिः स्त्रीणामिति" तस्य विषयो दर्शितः । शूद्रोच्छिष्टानामपां पाने पूर्वत्र कुशवार्युक्तं । इह तु **सप्तरात्रं यवानिति** । अगामिकत्वादस्यार्थस्योभयत्र भक्तायुच्छिष्टभोजनेदं द्रष्टव्यं । **अभक्ष्यं मांसं** प्लवहंसचक्रवाकादीनां । इदं तु बुद्धिपूर्वकमभ्यासभक्षणे द्रष्टव्यं । अन्यत्र "शेषेषूपवसेदहरिति" । एतदेव पयः पीत्वा सूकरोष्ट्रादिभ्यो अन्यत्र तत्र प्रतिपदं प्रायश्चित्तान्तराम्नानात् । सक्तुपानं यवकपानं भवत्येव ॥ १५२ ॥

शुक्तानि च कषायांश्च पीत्वा मेध्यान्यपि द्विजः ॥
तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः ॥ १५३ ॥

अमेध्यानि[2] **शुक्तानि** "दधि भक्ष्यं च शुक्तेषु" इत्येतत् त्रयाभ्यनुज्ञानाद्दध्नस्तु सत्यपि शुक्तत्वे भक्ष्यताया विहितत्वान्नैष विधिः पवित्रं हि तदिति स्मरन्ति । **कषाया**

---

१ 'मूत्रपुरीषरेतसां' इति गौतमीये अ. २२-१ । २ ख-मेध्यानि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैद्यकप्रसिद्धा अनेकौषधिसंयोगेन ये क्वाथ्यन्ते । **अप्रयतोऽशुचिर्यावद्गजरयधः** अधोगमनं जीर्णानां मूत्रपुरीषभागेन निष्क्रामणाद्यदि वा पक्वाशयप्राप्तिः ॥ १५३ ॥

विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः ॥
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् ॥ १५४ ॥

विशेषानुपदेशादमत्या वा तुल्यमेव च युक्तं लाघवकल्पनात् ॥ १५४ ॥

शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च ॥
अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत् ॥ १५५ ॥

शुष्काणि वल्लूरादीनि । **भौमानीति** कोटरजातानामनिषेधार्थम् । **अज्ञातं** मेषस्य महिषस्येति प्रकृतेरज्ञानात् । **सूना** घातस्थानम् । यत्र विक्रयार्थं पशवो हन्यन्तेऽतोऽन्यत्र स्थितस्य लघुप्रायश्चित्तम् । ननु 'सूनास्थ' इति वचनादन्यत्र स्थितस्य प्रायश्चित्ताभाव एव युक्तः । नैतदेवं । सौनमित्यविशेषेण प्रतिषेधात् । प्रायश्चित्ते तु स्थग्रहणात्तदुत्थितस्य गुरुलघुभावो युक्ततरस्तदेव चांद्रायणं । ज्ञाते तु जातिविशेषेऽभ्यासे सप्तरात्रं यावकपानम् । 'शेषेषूपवसेदहः' इति ॥ १५५ ॥

क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे ॥
नरकाकखराणां च तप्तकृच्छ्रं विशोधनम् ॥ १५६ ॥

चेति पूर्वश्लोकोऽत्राकृष्यते । तेन विड्वराहादीनां भक्षण एतदेव । द्वितीयेन शब्देन क्रव्यादानां विण्मूत्रप्राशने यदेव विड्वराहादीनां **स्मृत्यन्तरे** च नरमात्राधिकारेणेह द्विजग्रहणमविवक्षितं "द्विजश्चांद्रायणमिति" । एवमियं द्विश्लोकी बिडालकाकादन्यत्रापेक्षते । अतश्चैतेषामप्युच्छिष्टप्राशने बिडालादिवत्ततोऽस्यां त्रिश्लोक्यां समुद्दिष्टम् । मूत्रपुरीषं च सर्वेषां प्रतिषिद्धम् । अतश्च यत्क्रव्यादानां मूत्रपुरीषप्राशने तद्बिडालादीनामपि ॥ १५६ ॥

मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः ॥
स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् ॥ १५७ ॥

मासिकमेकोद्दिष्टश्राद्धं "कृते सपिण्डीकरणे प्रतिमासं तु वत्सरम्" इति आमावास्यस्य तु मासिकव्यपदेशोऽप्यनुज्ञातत्वात् । "काममभ्यर्थितोऽश्नीयात्" इति कुतः प्रायश्चित्तं । अन्ये त्वभ्यर्थितस्यानुज्ञानादनभ्यर्थ्यमानस्योक्तमेवेत्याहुः । **असमावर्तको** गुरुकुले तिष्ठन्नर्थाद्ब्रह्मचार्युच्यते । त्र्यहादन्यतरस्मिन्नहन्युदके वसेत् । त्र्यहस्यैव बुद्धौ स्थितत्वात्तर्हि चतुर्थमहस्तद्दिवसः ॥ १५७ ॥

ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कथंचन ॥
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ॥ १५८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्रतचारी प्रयुक्तो ब्रह्मचर्याश्रमस्थ एव । **कथंचन** आपद्यपीत्यर्थः " प्राणानामेव चास्यय " इत्यापदि विधानात् । असति दोषे न तन्निर्घातार्थमेतत्प्रायश्चित्तं । किं तर्हि निमित्तमात्रपर्यवसायिवचनात्क्रियते । **प्राकृतं** प्राजापत्यं प्रकृतौ भवं प्राकृतं । सर्वकृच्छ्राणां प्रकृतित्वादेवमुच्यते **व्रतशेषं समापयेत्** ॥ १५८ ॥

बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च ॥
केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलाम् ॥ १५९ ॥

अकृतप्रायश्चित्तस्यावशिष्टव्रतसमापनाधिकारमाह । **आखुर्मूषकः** । **अवपन्नमे**तत्संपर्कदूषितं । **ब्रह्मसुवर्चलां** पिष्टोदकेन सह पिबेदेकाहमविशेषात्तेनैव शास्त्रार्थस्य कृतत्वात् ॥ १५९ ॥

अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता ॥
अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः ॥ १६० ॥

आद्योऽर्धः श्लोकोऽनुवादः । **अज्ञातभुक्त**शुद्ध्यर्थमित्येतद्विधीयते । समनन्तरं वमितव्यमित्यर्थः । क्षिप्रं वा **शोधनैः** प्रायश्चित्तैः **शोध्यं** । अन्ये तु शोधनानि हरीतक्यादीनि रेचनान्याहुः । गौतमीये चेदमुदाहरन्ति " अभोज्यभोजने पुरीषाभाव " इति तदेतदसाधकं । उपवासेनापि निष्पुरीषत्वोपपत्तेः । तस्माद्वान्तौ यथाश्रुतप्रायश्चित्तमेव वेदितव्यम् ॥ १६० ॥

एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः ॥
स्तेयदोषापहर्तॄणां व्रतानां श्रूयतां विधिः ॥ १६१ ॥

व्रतानामनाद्यादनस्याभक्ष्यभक्षणस्य **स्तेयं** तद्दोषशमस्तमपहरन्ति यानि व्रतानि तेषामिदानीं विधिरुच्यते ॥ १६१ ॥

धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः ॥
स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति ॥ १६२ ॥

द्विजोत्तमग्रहणं प्रदर्शनार्थं क्षत्रियादीनामपि । द्विजोत्तमशब्दसन्निपाताच्च **स्वजातीयगृहादि**ति ब्राह्मणगृहाद्विज्ञायते । तेनैतदुक्तं भवति । सर्व एव वर्णा ब्राह्मणगृहात् धनं हृत्वा कृच्छ्राब्देन शुध्येयुः । धनग्रहणात्सर्वस्मिन् धनं सिद्धं धान्यान्नग्रहणं सद्धान्यार्थं । अल्पसाराणामन्यं विधिं वक्ष्यति । अतः सारभूतप्रधानद्रव्यापहरण इदं विज्ञायते तेषां न हि परस्परद्रव्यापहरणे ब्राह्मणस्य तदीयधनापहारे कतरत्प्रायश्चित्तमुच्यते । हिंसाप्रायश्चित्तवच्चतुर्थाष्टमादिभागकल्पना कर्तव्या । क्षत्रियस्य धने त्रीन् वैश्यस्य सार्धं

---

१ फ-सं । २ अ. २३।२३ ।

For Private And Personal Use Only

शूद्रस्य द्वाविंशतिरात्रं वा किंचित्परिमाणे धान्येऽपहृते दशाभ्यः कुंभेभ्यः किंचिदूने महत्त्वात्प्रायश्चित्तस्य धनमाप्यैवं काले न कल्पनेति विज्ञेयम् । कामादिति श्लोकपूरणम् । न ह्यकामस्य परधनहरणसंभवः । धान्यं व्रीह्यादि तदेवापहृतं अन्नं सिद्धमांसं च । धान्यादीनां प्रत्येकं हरणे त्र्यहं कृच्छ्रम् । केचित्तु समुदायहरणे प्रायश्चित्तमिच्छन्ति । गरीयो ह्येतत् ॥ १६२ ॥

मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च ॥
कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम् ॥ १६३ ॥

मनुष्याणां दासानां । **स्त्रीणां** दासीनां । क्षेत्रं भूभागो ब्राह्मणादिधान्योत्पत्तिस्थानं । कूपवाप्योर्जलशब्दः प्रत्येकमभिसंबध्यते । उद्धृतोदकस्येरणादिस्थस्यापहरणे तद्भवति । जलग्रहणाच्छुष्कयोः कूपवाप्योर्विध्यन्तरं । वापी खातः । तडागेऽप्येवमेव ॥ १६३ ॥

द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मतः ॥
चरेत्सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये ॥ १६४ ॥

अल्पसाराणि न चिरमवतिष्ठन्ते । स्वल्पमूल्यानि च मृन्मयानि स्थालीपिठरादीनि दारुमयानि द्रोणाढकादीनि अयोमयानि लेपनीकुद्दालकादीनि । वेश्मनीति गृहस्थितापहारे भूयान् दोषः । न तथा खलक्षेत्रादिगते । निर्यात्य दत्वा । सर्वशेषश्चायं विशेषाभावात् । यत्र त्वपहृतं दातुमशक्यं तत्र द्विगुणं प्रायश्चित्तम् ॥ १६४ ॥

भक्ष्यभोज्यापहरणे यानशय्यासनस्य च ॥
पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥ १६५ ॥

यानं गन्त्र्यादि । **शय्या** खट्वादि । **आसनं** वृस्यासंदीपट्टादि । भक्ष्यभोज्ययोः खरविशदतद्विपरीत्येन भेदो विज्ञेयः । **भक्ष्यं** मोदकशष्कुल्यादि । **भोज्यं** यावकादि । **पंचगव्यं** प्रसिद्धं । अत्राप्येकाहमेव ॥ १६५ ॥

तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च ॥
चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥ १६६ ॥

तृणादीनां पूर्वस्मात् यानादेरधिकहरणे प्रायश्चित्तमेतत् । काष्ठमघटितं वंशःस्तंभादिद्रुमसाहचर्यात् द्रुमो वृक्षः । **शुष्कान्नं** तण्डुलादि भ्रष्टयवा वा । गुडग्रहणं स्वविकारार्थं तेन खण्डमत्स्यण्डिकादेर्ग्रहणं । **चैलं** वस्त्रं बहूनां "उत्तमानां च वाससां" प्रागुक्तेन धनग्रहणेन कृच्छ्रादिश्चर्म कवचं । **मांसमामिषम्** ॥ १६६ ॥

---

१ ण-र-तरणादिस्थस्यस्यापहरणेस्त । २ ण-र-कम ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च ॥
अयःकांस्योपलानां च द्वादशाहं कणान्नता ॥ १६७

स्वल्पबहुत्वापेक्षया च कालह्रासः सकृदावृत्तौ च ॥ १६७ ॥

कार्पासकीटजोर्णानां द्विशफैकशफस्य च ॥
पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः ॥ १६८ ॥

कीटजाः पट्टाः । द्विशफा गवादयः । एकखुरा अश्वादयः । पक्षिणः शुकश्येनादयः । रज्जुकूपादेरुदकोदंचनी ॥ १६८ ॥

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः ॥
अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् ॥ १६९ ॥

उक्तार्थः श्लोकः ॥ १६९ ॥

गुरुतल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु ॥
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ॥ १७० ॥

गुरुतल्पव्रतमित्यविशेषवचनेऽपि न तेन स्वयोन्यादिष्वित्येवमाद्यातिदिश्यते । अपि तु "प्राजापत्यं चरेदब्दम्"[१] इति महापातकत्वात् न हि महापातकेभ्योऽन्यत्र मरणांतं प्रायश्चित्तमस्ति । अभ्यासे तु स्यादिति । स्वयोनयो भगिन्यः सोदराः । सख्युः स्त्रीषु सुहृद्भार्यासु सुहृत्त्वमेवात्र कारणं न यौनादिविशेषः । नापि श्रोत्रियत्वादिगुणः । एवं पुत्रस्य स्त्रीषु स्नुषास्वसमानजातीयास्वपि कुमारीषु पुत्रादिभिरदत्तासु स्वयं संप्रीत्यानुपनतास्वेतदेव बलाद्गमने । अत्रापि न सत्यपेक्षा । यद्यप्यतिदेशे विशेषो नास्ति तथापि प्रायश्चित्तद्वयं स्यादिति दृष्टत्वात् । तथा च गुरुलघुभावाद्धीनजातीयासु कृच्छ्राब्दाचांद्रायणं मासत्रयं लघीय आदेश्यं । अन्त्यजाश्चाण्डालम्लेच्छादिस्त्रियः । चण्डालादिस्त्रीषु च स्मृत्यन्तरे ज्ञानाज्ञानकृतो विशेष उक्तो "अन्त्यावसायागमने कृच्छ्रार्धमभत्यासु द्वादशरात्रम्" ॥ १७० ॥

पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ॥
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् ॥ १७१ ॥

पितृष्वसुर्दुहिता पैतृष्वसेयी भगिनी । मातृष्वस्रीया मातृष्वसुर्दुहिता । मातुश्च भ्रातुर्मातुलदुहिता । आप्तस्य सोदर्यस्येत्यर्थः ॥ १७१ ॥

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ॥
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः ॥ १७२ ॥

---

१ गौतमीये अ. २३।३२–३३ ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु च सपिण्डा चेत्यनेनैवैतासामविवाह्यत्वे सिद्धे किमर्थमिदं नोपयच्छेतेति । केचिदाहुः । अन्यासां पक्षेऽभ्यनुज्ञानार्थं सपिण्डश्लोके प्रतिषिद्धानां तद्युक्तं 'पतति ह्युपयन्नध' इति प्रायश्चित्ताविशेषात् । एतस्मिंश्च प्रयोजने संभवति सपिण्डश्लोकस्य पाक्षिको बाधो युक्तोऽगत्या हि विकल्प आश्रीयते । **ज्ञातित्वेन** बन्धुत्वेनेत्यर्थः ।
अनुपेया अविवाह्या अगम्याश्च । **उपयन्विवाहयन्** । **अधःपतति** नरकं प्राप्नोतीति ९
यावत् । अथवा ज्ञातितो भ्रश्यति हीनजातीयः संपद्यते । यद्यपि जातेर्जीवत्पिण्डानपाय-स्तथापि तत्कर्मानविकारादेवमुच्यते ॥ १७२ ॥

अमानुषीषु पुरुष उदक्यायामयोनिषु ॥
रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् ॥ १७३ ॥

अमानुष्यो वडवाद्याः । गोरमानुषित्वेऽपि " सखिसयोनिसगोत्राशिष्याभार्यासु १०
स्नुषायां गवि च गुरुतल्पसममेव । अवकर " इति विशेषविहितमेव । अनयोर्गुरुतल्पावकीर्णि-प्रायश्चित्तयोरबुद्धिपूर्वबुद्धिपूर्वभेदेन व्यवस्था । तल्पशब्देन प्रसिद्धसंम्बन्धादत्र शास्त्रे गुरुतल्पमेवोच्यते । अवकरोऽवकीर्णानिमित्तं निमित्ते चातिदिष्टे तत्कार्यातिदेशः । सखी चात्र या पुरुषवन्मैत्रीमागता न तु या सख्युः स्त्री । न ह्यत्र पुंयोगात्प्रवृत्तिः । न च
भार्यासंबन्धेन संबन्धोऽस्ति । सयोनिपदेन व्यवधानात् । तथा च **वसिष्ठो** " गुर्वी सखी " । १९
न च पात्रागत्वात्कृच्छ्राब्दपात्रं न च पात्रकुमारी अनयोस्तूपस्यादन्यत्र । उदक्यायां च मासिकेन रजसाभिप्लुतोदक्या । पाठान्तरं " पत्विाधरं पुरुष " इति । **उदक्यायामयोनिषु** एक एवार्थः । **अयोनिः** स्त्रीलिङ्गादन्यत्र स्थानं तथान्ये " जले खे च " इति पठन्ति । ननु चायोनिग्रहणादेव सिद्धं ख इति न पठितव्यं । आकाशः खशब्देनोच्यते ।
योनेरन्यश्च सः । नैष दोषः । योनिशब्देन साहचर्यात् अन्यदङ्गमेवोच्यत इति मन्यन्ते । २०
जले साक्षात् ॥ १७३ ॥

मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः ॥
गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् ॥ १७४ ॥

मैथुनेषु समनन्तरं सवाससः स्नानं । **गोयाने** गन्त्र्यादावप्सु चापि ॥ १७४ ॥

चंडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ॥ २१
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥ १७५ ॥

चण्डालाः म्लेच्छा दिगन्तवासिनस्तत्स्त्रीगमने प्रायश्चित्तं तदन्नभोजने प्रतिग्रहे च । **पततीति** वचनात्कृच्छ्राब्दादाधिकं प्रायश्चित्तं न पुनः पातित्यमेव भोजने ।

---

१ ण-ए-कर्मानविकरादेव । २ गौतमीये अ. २३।१२-१३। ३ अ. २० सू. १६.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" अभोज्यानां तु भुक्त्वाऽन्नम् " इति प्राप्ते वचनमिदं कृच्छ्राब्दप्रायश्चित्तार्थमेवं प्रतिग्रहेऽपि " मासं गोष्ठे पय " इति प्राप्ते तदर्थमेव ज्ञानात् सम्यगिति कामकारकृतेऽपि प्रायश्चित्तविधानार्थेऽर्थवादोऽयं । यत्स्मृत्यन्तरेऽब्दशब्देन ज्ञाताज्ञातयोः प्रायश्चित्तमुक्तं तच्च दर्शितम्। अतः कुतोऽधिकप्रायश्चित्तार्थता। भुक्त्वा चेति केन संबध्यते। चाण्डालान्त्येत्यनेन। ननु च गुणीभूतमेतत्। गुणीभूतस्याप्यपेक्षायां संबन्धो दर्शितः। भुक्त्वा कस्येत्याकांक्षायां अन्यस्याश्रुतत्वात्साम्यवचनाच्च चाण्डालान्त्यानामेव संबन्धः । अतोऽयमर्थो भवति। चाण्डालस्त्रीम्लेच्छानामन्नमशित्वा तेभ्यः प्रतिगृह्य च स्त्रियं गत्वा सकृद्गमनात्प्रायश्चित्तं। अभ्यासे तु साम्यमेव युक्तमनधिकारप्रायश्चित्तेन। यतः प्रतिनिमित्तं नैमित्तिकेन भवितव्यं न च तान्येकेन जन्मना शक्यन्तेऽनुष्ठातुम् ॥ १७९ ॥

विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादेकवेश्मनि ॥
यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् ॥ १७६ ॥

विशेषेण प्रदुष्टां निरुन्ध्यात्पत्नीकार्येभ्यो निर्वर्तयेत् " अर्थस्य संग्रहे चैनाम् " इत्यादिभ्यः। एकवेश्मनीति निगडबन्धे कर्तव्या। न स्वैरं भर्तृगृहे विहर्तुं लभेत। तत्र निरुद्धां प्रायश्चित्तं कारयेत्। किं पुनर्यत्पुंसः परदारेषु प्रायश्चित्तमुपपातकं ब्राह्मणस्य तत्समानहीनजातीयासु पारदार्यमिति वर्णान्तराणां तदेव। उत्तमागमने तु द्विगुणं वैश्यस्य त्रिगुणं ब्राह्मण्यां क्षत्रियस्य। तथाऽयं विशेषो द्वे परदारे त्रीणि श्रोत्रियस्येति । शूद्रस्य ब्राह्मणीगमने महापातकप्रायश्चित्तं। वैश्यस्य क्षत्रियागमन उपपातकं द्विगुणं त्रिगुणं। केचित्तूत्तमागमने शूद्रस्य ब्राह्मणीवदिच्छन्ति । " प्रातिलोम्ये वधः पुंसाम् " इति लिङ्गदर्शनात्। एतदुक्तं दण्डेष्वपि विशेषो दर्शितः । यथैवोत्तमागमने पुंसां व्यवस्था तथैव स्त्रीणां हीनजातीयपुरुषसंपर्के युवतिदोषेऽपि स्त्रीणामर्धं प्रायश्चित्तम् ।

" प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च। बालश्चा षोडशाद्वर्षादशीतिपरतःपुमान्॥ " तथा दृष्टव्यभिचारायां गमने लघीयः स्वैरिण्यां वृषलयामवकीर्णः सचैलस्नानादुदकुंभं दद्याद्ब्राह्मणाय । वैश्यायां चतुर्थकालाहारो ब्राह्मणं भोजयेत् । क्षत्रियायां त्रिरात्रोपोषणं यवाटकं दद्यात्। वैश्यवदित्यपि स्मर्यते । तद्वच्छूद्रभार्यायां द्रष्टव्यं। ऋतौ या गच्छतो गर्भमादधतो वा।

" [1]ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण संगताः। अप्रजाता विशुध्येयुः प्रायश्चित्तेन नेतरा।"

अथवा या एता न केनचिदूह्यन्ते वैश्येन चरन्ति तद्गमनेऽस्ति प्रायश्चित्तं नेति संदेहः। कुतः संशयः। दारशब्दस्य संस्कारशब्दत्वात् असति विवाहे न ता अस्य

१ वासिष्ठे अ. २१।१२।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दारा इति व्यपदेशमर्हन्ति । पारदार्ये च प्रायश्चित्तमतो नास्तीत्यवगच्छामः । यतस्तु " स्वदारनिरत " इति नियमो विहितोऽतो भवतीति मन्यामहे । किं पुनरत्र युक्तमस्तीति कुतो नियमस्य विहितत्वात् अकुर्वन्विहितमित्यादि तदतिक्रमे प्रायश्चित्तस्मरणात् । माभून्नामोपपातकं । न तावता प्रायश्चित्तार्थमुपपातकजातिभ्रंशकरादि परिगणितं । सामान्यं तु निमित्तं सर्वत्राकुर्वन्विाहितमित्यादि । उक्तं च प्राक् " स्वैरिणीत्यादि " तत् च मृतभर्तृकाभर्तृपक्षेण पितृपक्षेण वा संबद्धैव परदारव्यपदेश्या अधिकामविहारित्वात् स्वैरिण्यः । सत्यं वेश्यास्वपि स्वातन्त्र्यावलंबनः स्वैरिशब्दो न विरुध्यते अतश्च तासां सचैलस्नानोदकुंभादिदानं । तत्र केचिदाहुः व्रतमेतत्तस्य व्रतं इत्युपक्रम्य " व्रतानीमानि धारयेदिति " च यानि विहितानि तानि स्नातकव्रतानि न सर्वपुरुषधर्मः ॥ १७६ ॥

* सा चेत्पुनःप्रदुष्येत्तु सदृशेनोपयंत्रिता ॥
कृच्छ्रं चांद्रायणं चैव तदस्याः पावनं स्मृतम् ॥ १७७ ॥

प्रार्थिता समानजातीयेन पुनः संसर्गे चांद्रायणमुपपातकत्वात्सिद्धं । गोघ्नानिवृत्यर्थं पुनश्चांद्रायणविधानं साकल्यविधानार्थं यावच्चैवमुक्तं

"माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
"दुहिताचार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता साध्वी धात्री वर्णोत्तमा च या ॥"

अत्र सत्यप्यतिदेशे न तुल्यप्रायश्चित्तता दण्डविशेषदर्शनात् । तत्र मातर्युक्तमेव । मातृष्वसृप्रभृतीनां दुहित्रन्तानां कृच्छ्राब्दोऽवशिष्टानां चान्द्रायणाभ्यासः । तत्र या उक्तास्ताः सगोत्रा उच्यन्ते तज्जातीयास्तेन व्यपदिश्यन्ते । उभयस्यै दत्तास्तद्गोत्रा इत्युभयेनेत्याह उभयथालिङ्गदर्शनात् । गोत्रं वंशः पित्रादिरभिजनः प्रबन्धाच्च पितृष्वसृग्रहणमनर्थकं असगोत्रा हि सा । अथ येनैकतां गतास्तद्भावमनुभवन्ति तदा भर्तृगोत्रव्यपदेशार्हास्तस्मिन् पक्षे पितृव्यस्त्रीग्रहणमनर्थकं भवति हि सा सगोत्रा नन्वियं कस्येति लिङ्गाभावादुभयोरपि युक्ता सर्वेषां तु दर्शनं भर्तृगोत्राः सगोत्राः । यत्तु कैश्चिदुच्यते " श्राद्धविधौ तु कुर्वन्पैत्रिकं गोत्रमिति " तत्तत्रैवास्ति । अथवाऽप्यस्ति वचनात्तथा क्रियते ॥ १७७ ॥

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः ॥
तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ १७८ ॥

---

* ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण सङ्गताः । अप्रजाता विशुध्येयुः प्रायश्चित्तेन नेतराः ॥ १ ॥

१ ननु न मृतभर्तृपक्षेण । २ ण-र-धवं आलम्बनः । ३ ह-धर्माः । ४ फ-ऽप । ५ ण-र-क्रियेत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृषल्यत्र चण्डाल्यभिप्रेता। महत्त्वाद्भिरभ्यासे चेद्बुद्धिपूर्वे द्रष्टव्यं। अन्यथा कृच्छ्रशब्द एवं वा एकरात्रग्रहणात्। सर्वा रात्रिं शयनस्य तया सह गच्छतश्चैतद्विज्ञेयं। सेवनं संभोगः। वृषलीशब्दो निन्दया प्रयुक्तो न जातिशब्दो यत्करोति तत्पापं जनयति तत्त्रिभिर्वर्षैर्व्यपोहति विनाशयति। भैक्षाहारो जपन्निति अविशेषचोदनायां भावी[1] आसु परं च नास्तीत्याहुः। अन्ये तु यथा श्राद्धमन्यानि मन्त्रब्राह्मणवाच्यानि न तु लौकिकं वाच्यमविशेषेण मन्त्रजपस्य शुद्ध्यर्थे विहितत्वाद्दृक्संहितामित्यादि। यत्तु त्रिभिर्मासैः सेवित्वा वृषलीं शूद्रामेवाचक्षते तदप्ययुक्तं। शूद्राविवाहस्य विहितत्वात्। स्वैरिण्याश्च लघुप्रायश्चित्तस्योपदेशादन्यस्याश्चोपपातकत्वाद्दुस्तरमिदमयुक्तम्॥ १७८॥

एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः।
पतितैः सम्प्रयुक्तानामिमाः शृणुत निष्कृतीः॥ १७९॥

ऋज्वर्थः श्लोकः॥ १७९॥

संवत्सरेण पतति पतितेन सहाचरन्॥
याजनाध्यापनाद्यौनान्न तु यानासनाशनात्॥ १८०॥

द्विजातिकर्मभ्यो हानि पतत्यर्थः पतति भ्रश्यति हीयतेऽधिकारात्। पतिताश्चत्वारो ब्राह्मणादयः। तैः सहाचरन् संवत्सरेण पतितो भवति तत्तुल्यो भवतीत्यर्थः। किमाचरन् यानासनाशनसंलापगात्रस्पर्शादिना सहागमनमासनं तादृशमेव शय्यायामेकस्मिन्नासन आसनमेकपात्रे भोजनं याजनाध्यापनाद्यौनात्कृत्वाप्यविच्छेदः। किं याजनादिभिर्न च पातित्यमयार्वाक्संवत्सरादूर्ध्वं वेत्येतद्वक्तव्यं। स्मृत्यन्तरदर्शनादिभिः सद्यो याजनाध्यापनमिति द्वितीयान्तः पाठो युक्तः। आचरन्निति शत्रा हेत्वर्थस्य गमितत्वात्॥ १८०॥

यो येन पतितेनैषां संसर्गं याति मानवः॥
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये॥ १८१॥

यस्य पतितस्य यद्विहितं तत्प्रायश्चित्तं कुर्यात्तत्संसर्गस्य शुद्धये। एषामिति निर्धारणे षष्ठी। एषां पतितानां येन पतितेन यः संसर्गं याति पूर्वोक्तसंसर्गं गच्छति स तस्यैव पतितस्य यद्विहितं प्रायश्चित्तं तत्कुर्यात्। तत्संसर्गाद्यो दोष उत्पन्नस्तद्विशुद्धये तद्विनाशाय। अनुवादोऽयं श्लोकपूरणः। अथ यदिदमुच्यते पतितात्याग्यपतितात्यागीत्यादिनिन्दितकर्माभ्यासेन पतनं। तत्र यदेतत्पतितत्ववचनं तत्किमुपदिश्यत आहोस्विदतिदिश्यते। यदि तावदुपदिश्यते पंच पातकानीति प्रसिद्धमूलं वाच्यं। अथ पंचानुगमोपदेशिकमन्येषामातिदेशिकैर्व्यवहारे भेदेन कश्चिदर्थः। तान्येव प्रायश्चित्तानि त एव धर्मा

१ ज-र-भावि। २ फ-स्वाविहितत्वात्। ३ घ-र-एताः पापकृता युक्ताश्चतुर्णाममिनिष्कृतीः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्मा उपदिश्यंते अतिदेशेन व्यवहारेण कोऽर्थः । अत्रोच्यते । न व्यवहाराः प्रयोजन एव भिद्यन्ते । अपि त्वन्यतोऽपि निमित्तादिह चास्ति प्रमाणतो भेदः । यत्र पतितत्वमभिधाय द्विजातिकर्मभ्यो हानिः पतितस्योदकं कार्यमित्याद्यभिधीयते सकृत्स्वधर्माभिधानादुपदेशः । यत्र तु तत्संबन्धवचनान्नाम्ना लिङ्गसंयोगाद्वा तद्धर्मप्राप्तिः सोऽतिदेशः । सूर्याग्निषदयोर्न हि सौर्ये कश्चिद्धर्मः श्रुतो येनातिदेशो सत्ययं विशेषो लभ्य इति निश्चीयते । तदसत् । यतः सूर्यादिशब्दस्यैव प्रभुता अकृतत्वाद्वेदस्यायं पौरुषेयो ग्रन्थः । पुरुषश्चासति भेदे किमिति व्यवहारं नवं प्रवर्तयति । या तु प्रत्यक्षानुमानाभ्यां बाधकाभावात्सिद्धिः साऽत्र कदाचिदुपलभ्यते । योऽप्यभ्यासः सोऽपि द्विरावृत्तिस्तत्र ततः प्रवृत्तिः आवृत्तिशतेष्वभ्यासरूपतयैक एवेति । लोके तावदावृत्तिमात्रमभ्यासः । तत्र योऽपि द्विरपवादः योऽपि शतकृत्वः तौ द्वावपि प्रायश्चित्ते समौ स्यातां । निन्दितं च कर्म प्रतिषिद्धं । तत्र योऽपि द्विर्दिवा सुप्याद्योऽपि गा असकृद्धन्यात्तत्र निन्दितकर्माभ्यासेऽविशेषेण पतनप्राप्तिस्तस्माद्विचिन्त्यमेतत् । किमत्र चिन्त्यते । पंचानां तावत्पातकित्वं सर्वस्मृतिकारैरुच्यते । अन्येषां केषांचित्समत्वं तदुभयमपि बाधितुं तत्र विशेषो नास्तीति संकल्प इष्यते । "शक्तिं चावेक्ष्य पापं च" इति । न हि तस्य तत्सदृशस्येति वा एकत्वं युक्तं । गोर्गवयस्येवं । अथ केषांचिद्धर्माणां भेदः केषांचिदेकत्वे सादृश्यं भवति । तस्मात्तत्समानां पतित्वं भवति । अतः किंचिदूनं तत्समानां पतितप्रायश्चित्तं अधिकारागमे केचिद्विशेषमाहुः । श्रौतेष्वधिकारो निवर्तते साक्षान्न स्मार्तेषु । यदप्युक्तं "द्विरावृत्तौ शतकृत्वश्चाभेदो न स्यादिति" तत्राप्यभ्यासानां भेदः कथं तुल्यप्रत्यवायता । यदपि दिवा स्वप्नगोवधयोर्निन्दितत्वाविशेषात्तदभ्यासे तुल्यं पतितत्वमिति कथमविशेषो निंदाया यत्रार्थवादेषु प्रत्यवायविशेषः श्रूयते प्रायश्चित्तबहुत्वं बाहुल्येऽपि प्रतिषेधे तत्रायं विधिः । "निन्दितकर्माभ्यासे पतनमिति" न प्रतिषिद्धमात्रे । तथा च पूर्णेवानसीति सत्यपि निन्दितकर्माभ्यासे नैव पातित्यमस्ति ॥ १८१ ॥

पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः ॥
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ ॥ १८२ ॥

जीवत एव पतितस्य प्रायश्चित्तमनिच्छतो घटोदकदानं मृतस्येव कर्तव्यमुच्यते । **सपिण्डाः** सप्तमपुरुषावधयः एकवंश्यास्ततोऽन्ये **बान्धवाः** सगोत्राश्च । निन्दितेहऽनि चतुर्दश्यादौ **सायाह्ने**ऽस्तमिते रवौ **ज्ञात्यृत्विक्** ज्ञात्यादयः कर्तॄणां तथा पतितस्य ॥ १८२ ॥

दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा ॥
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥ १८३ ॥

१ ग—र—गवयस्य च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रेतवदिति कर्तव्यतोपदेशोऽयं । दासी प्रेष्योदकुंभं पदा पादेन पर्यस्येत् क्षिपेदिदममुष्मा इति । क्षिप्ते तस्मिन्नहोरात्रमाशौचं युक्तं बान्धवैः सह तथासरित्येकत्र स्थाने निवसेयुस्तदहः । दासीग्रहणात् स्वयंकरणं निषेधति । यद्येवं ज्ञात्यृत्विक्गुरुसन्निधावित्यस्वयंकरणपक्षे ज्ञातीनां सपिण्डानां च को विशेषो येनोच्यत एतेषां संनिधान एतेन कर्तव्यमिति । यावता सर्व एव सन्निधानमात्रेणोपकुर्वन्ति । तस्यासन्निपात्योपकारत्वात् । नैतदेवं सपिण्डादयः प्रयोजकत्वेन कर्तारः । ज्ञात्यादयस्तु सन्निधाप्यन्ते केवलमदृष्टायेति ॥ १८३ ॥

निवर्तेरंश्च तस्मात्तु संभाषणसहासने ॥
दायाद्यस्य प्रदानं च यात्रा चैव हि लौकिकी ॥ १८४ ॥

कृतोदके यथा वर्तितव्यं तथेदानीमुच्यते । **संभाषण**मितरेतरमुक्तिप्रत्युक्तिरूपो व्यवहारः । **दायाद्यं** धनं तदपि तस्मै न दातव्यं । **लौकिकी** यात्रा संगतयोः कुशलप्रश्नादिका विवाहादौ नैमित्ते गृहानयनं भोजनं चेत्येवमादि । ननु च संभाषणप्रतिषेधादेवैषु निवृत्तिः सिद्धे वा । अभ्युत्थानासनत्यागस्यापि निवृत्तिरूपस्य संभवात् । संभाषणं तु शब्दात्मकमेव ॥ १८४ ॥

ज्येष्ठता च निवर्तेत ज्येष्ठावाप्यं च यद्वसु ॥
ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः ॥ १८५ ॥

ज्येष्ठावाप्यं च यद्वसु । अत्रापि चोद्यते । दायाद्यदाननिषेधाज्ज्येष्ठप्राप्यवसुनो धनस्य सिद्ध एव निषेधः । केचिदाहुर्गुणतोऽधिकस्य यवीयसस्तदंशप्राप्त्यर्थमनूद्यते । अन्ये तु मन्यन्ते । दायाद्यशब्देन धनमात्रमुच्यते । नान्वयागतमेव । तथा चा**भिधानकोशे** "दायाद्यं धनमिष्यत" इति स्मर्यते । अतो[3] यत्तस्मात्केनचिदृणत्वेन गृहीतं तेनापि तन्न दातव्यं । किं तर्हि कर्तव्यं ? पुत्रभ्रात्रादिरिक्थहारिणामर्पणीयम् । अन्ये तु मन्यन्ते । अविभक्तधनानां दायाद्यधननिषेधः कृते तु विभाग उद्धारस्यैव ज्येष्ठांशस्यैवोच्छेदः । सत्स्वपि पुत्रेपूद्धारं वर्जयित्वाऽन्यस्य पुत्रा एवेशते ॥ १८५ ॥

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम् ॥
तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥ १८६ ॥

कृतप्रायश्चित्तस्येदानीमुदकक्रियोच्यते । **तेनैव सार्धं स्नात्वा जलाशये पुण्य**स्रवन्त्यां महाह्रदे वा प्रभासमानसादौ वा तीर्थविशेषे कृतस्नानोऽपां कुंभं नवं स्वयं **प्रास्येयुः** । कुंभग्रहणाद्दासीग्रहणाच्चात्र पूर्वत्रोपयुक्तस्य क्रियासु कुंभस्य ग्रहणं उदकेन पूरयित्वा हरणमुक्तम् ॥ १८६ ॥

---

१ ख–ज्येष्ठाशिरूप– । २ क–यद्धनम् । ३ क–अतोयं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरसौ घटः प्रक्षप्तव्य इत्याह

स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकम् ॥
सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत् ॥ १८७ ॥

यास्वप्सु स्नातास्तास्वेव घटः प्रक्षेप्तव्यः । ततस्तं पुरस्कृत्य तदीयं भवनं प्रविशेयुः । ततो **यथापूर्वं** संभोजनादीनि **ज्ञातिकार्याणि** प्रवर्तयेयुः । अन्ये तु सकृत् प्रायश्चित्त इति संबध्नन्ति । घटप्रासनं तेनैव कर्तव्यमेषा चास्य पतितोदकक्रिया नान्यस्य त्याज्यस्य । " त्यजेचेत्पितरं राजघातकं च सुयानकम् " इत्यादिः ॥ १८७ ॥

एतमेव विधिं कुर्याद्योषित्सु पतितास्वपि ॥
वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके ॥ १८८ ॥

योषित्सु स्त्रीष्वपि **पतितास्वेष एव विधिः** । पतितास्वकृतप्रायश्चित्तासु च । ताभ्यस्तु कृतोदकाभ्योऽपि वस्त्रान्नं दातव्यं दानग्रहणात् । **वस्त्रान्ने** शरीरस्थितिमात्रसंपादिनी दातव्ये न भोगादयः । **पानमौ**चित्यादुदकं । तच्च प्राचुर्याददत्तमपि लभ्यते । वचनं तु परानुरोधादपि स्वातन्त्र्येण वानुमांसं न देयं । यादृशं च पानं तादृशे एव वस्त्रान्नेऽतो निकृष्टं वस्त्रं चान्नं दातव्यं । तथोक्तं (याज्ञवल्क्य स्मृ. आ. ७०)

" हृताधिकारां मलिनां पिण्डमात्रोपजीविनीं । परिभूतामधःशय्यां वासयेद्व्यभिचारिणीं ॥ " पातित्यहेतवश्च स्त्रीणां य एव मनुष्यस्य यत्तु भ्रूणहनि हीनवर्णसेवायां न च स्त्रीणामधिकं भ्रूणहनीति तत्तुल्यतार्थं न तु परिसंख्यार्थं । तथा च **याज्ञवल्क्यः** (प्रायश्चित्ते. २९८)
"नीचाभिगमनं गर्भपातनं भर्तृहिंसनं । विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवं " ॥
वसेयुः स्वगृहान्तिके प्रधानगृहान्निष्कास्य कुटीगृहे वासयितव्येत्यन्तिकग्रहणं । केचिदाहुः ' प्रायश्चित्तं तु कुर्वतीनामेतद्देयं न त्वन्यथा ' तदयुक्तं । वस्त्रान्नदानव्यवहारस्य तत्र योगत्वात् । प्रायश्चित्ते भिक्षाहारता पयोव्रतं चांद्रायणविधिश्चेत्यादि । न च भैक्षाहारता चानेन विवर्तयितुं शक्या । वृत्तिविधानेन चरितार्थत्वात् । तस्माद्यस्याः प्रायश्चित्तेष्वनधिकारः शक्ततयाऽतिपुष्टतया वा तस्या अपि वस्त्रादिदानं कर्तव्यमिति श्लोकार्थः ॥ १८८ ॥

एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्सहाचरेत् ॥
कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित् ॥ १८९ ॥

एनस्विनः प्रकृतत्वात्पातकिनः **तैरनिर्णिक्तै**रशुद्धैरकृतप्रायश्चित्तै**र्नार्थं** किंचिदृणदानकर्यविक्रयव्याजनाद्युक्तं । **निर्णेजनं** शोधनं पापापनोदनं । तस्मिन् कृते नैनां **जुगुप्सेत** कृतप्रायश्चित्तां न कुत्सयेत् ॥ १८९ ॥

१ गौतमीये अ. २०।१ । २ ण स्यां । ३ क-पा । ४ क-नैवा । ५ क-र्थैः । ६ क-कि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः ॥
शरणागतहंतॄंश्च स्त्रीहंतॄंश्च न संवसेत् ॥ १९० ॥

शरणागतो यः शत्रुभिरभिहन्यमानो बलवताऽन्येन वोपद्रूयमानः परित्राणार्थं किंचिदन्यमभिधावेत् 'त्रायस्व मामिति'। एवं कृतदोषो विद्वान् समुपधावेत् 'उद्धर मां देहि प्रायश्चित्तमिति' **शरणागतः । कृतघ्नः** कृतमुपकारं विस्मृत्य योऽपकाराय यतते यो व कृतोपकारं पुनर्विनाशयति तस्यैवोपकृतस्यापकार्ये उद्यच्छति । यद्यप्येषा शब्दव्युत्पत्ति-स्तथापि लोकप्रसिद्धेर्यत्रोपकर्तुरपकारे वर्तते स कृतघ्नः । अत्र जातिर्नापेक्षते बालादि-स्वरूपमेव कारणं । **स्त्रियो** व्यभिचारिण्योऽपि । यद्यपि तासां स्वल्पं प्रायश्चित्तं तथापि वाचनिकः संवासः प्रतिषेधः । **संवासः** संगतिस्तद्गृहनिवासश्च ॥ १९० ॥

येषां द्विजानां सावित्री नानूच्येत यथाविधि ॥
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥ ॥ १९१ ॥

"आ षोडशाद्ब्राह्मणस्य" इत्यादिनोपनयनकालनियमः कृतः। तदतिक्रमे प्रायश्चित्त-मिदं । गर्भाष्टमात्प्रभृति यावत्षोडशवर्षं ब्राह्मणस्य **सावित्री नानूच्येत** सावित्र्यनु-वचनेनोपनयनाख्यसंस्कारो लक्ष्यते । अस्मिन् काले यद्युपनयनं न क्रियेत एवं " आ द्वाविंशात् क्षत्रियस्य आ चतुर्विंशतेर्विशः " । अत ऊर्ध्वं **त्रीन् कृच्छ्रांश्चारयितव्यः**। निरुपपदकृच्छ्रश्रवणे प्राजापत्यप्रत्यय इति **स्मृतितन्त्रसिद्धिः** । अन्ये तु कृच्छ्राति-कृच्छ्रानाहुः कृच्छ्रेषु कृतेषूपनेतव्या यथाविधीत्यनुवादः ॥ १९१ ॥

प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थास्तु ये द्विजाः ॥
ब्रह्मणा च परित्यक्तास्तेषामप्येतदादिशेत् ॥ १९२ ॥

विकर्मस्था यथा ब्राह्मणाः शूद्रसेवाद्यभिरताः । यस्य यत्कर्म जीविकाहेतुस्तया तत्तस्य विहितं कर्म । यस्य न विहितं तस्य **तद्विकर्म** । द्विजातीयस्य विहितं विजातीयस्य विकर्म । **ब्रह्मणा परित्यक्ता** उपनीता अप्यस्वीकृतवेदा अधीत्य वा वेदमुपविस्मरेयु-स्तेषामप्येतत्कृच्छ्रत्रयं प्रायश्चित्तं चिकीर्षतीत्यनुवाद एवायं । इच्छन्नेव यतः प्रवर्तते ॥ १९२ ॥

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ॥
तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च ॥ १९३ ॥

गर्हितेनेत्यविशेषेऽप्यसत्प्रतिग्रहणेति द्रष्टव्यं । उत्तरत्र विशेषविधेस्तं प्रत्येवोपदिश्य-मानत्वात् । मुच्यतेऽसत्प्रतिग्रहादिति । **उत्सर्गः** त्यागो ममतानिवृत्तिर्दानेन वा ।

---

१ अ. २९ श्लो. ३८ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनपेक्ष्य दृष्टमदृष्टं राजरथ्यादिषु त्यागे नादेयं मम यो गृह्णाति स गृह्णात्वित्याद्यभिधाय क्षिपेत् श्वभ्रे गर्ते नद्यादिषु वा जपतपसी वक्ष्यत्युपदिष्टश्लोके । अन्ये तु ब्राह्मणशब्दस्थाने वर्णशब्दं पठित्वैवं व्याचक्षते । यस्य वर्णस्य द्विजातेः शूद्रस्य वा धनार्जनोपायतया यत्प्रतिषिद्धं तत्तस्य गर्हितं । यथा " ब्राह्मणः क्षत्रियो वाऽपि वृद्धिं नैव प्रयोजयेत् " इत्यादि । तेन येऽर्जयन्ति धनं कर्मणा तस्योत्सर्गजपतपांसि त्रीणि समुच्चितानि प्रायश्चित्तानि ब्राह्मणस्यासत्प्रतिग्रह उत्तरो विशेषविधिः ॥ १९३ ॥

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ॥
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥ १९४ ॥

त्रीणि सावित्रीसहस्राणि प्रत्यहमिति केचिदाहुः । अन्ये तु मासं त्रीण्यभिसंबध्नंति । अतश्च प्रत्यहमेकैकं शतं गोष्ठ इति वासस्थानम् ॥ १९४ ॥

उपवासकृशं तं तु गोव्रजात्पुनरागतम् ॥
प्रणतं प्रतिपृच्छेयुः साम्यं सौम्येच्छसीति किम् ॥ १९५ ॥

कार्श्यवचनात्स्वल्पं पयःपानमाह । **प्रणतं** जानुभ्यां स्थितं भुवि ते विद्वांसो ब्राह्मणाःपृच्छेयुस्तं हे **सौम्येच्छसि** सत्यमिति । अथ पुनरपि शास्त्रमवगणय्य न प्रवर्तितव्यमसत्प्रतिग्रहलोभेनेति ॥ १९५ ॥

सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवाम् ॥
गोभिः प्रवर्तिते तीर्थे कुर्युस्तस्य परिग्रहम् ॥ १९६ ॥

पृष्टेन वा तेन वक्तव्यं सत्यमिति । येन मार्गेण गावो विचरन्ति नदीप्रस्रवणादिजलं पातुं तस्मिंस्तीर्थे तरणप्रदेशे ते ब्राह्मणाः **परिग्रहमस्य कुर्युस्ते** हि हस्तारोपणेनान्तिकवेशमानयेयुः ॥ १९६ ॥

व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च ॥
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति ॥ १९७ ॥

व्रात्याः सावित्रीपतितास्तेषां व्रात्यानां व्रात्यः स्तोमः क्रतुर्विहितस्तेन ये याजयन्ति आर्त्विज्येनोपदेष्टृत्वेन च **परेषां** मातापितृगुरुवर्जमं**त्यकर्म** श्मशानादि । **अभिचारं** श्येननिधनादि । **अहीने च** द्विरात्रिकं कृच्छ्रैर्विशुध्यति । अन्ये त्वाहुर्नायमभिचाराहीनयोर्यजमानस्य विधिः । कस्य तर्हि ? ऋत्विजां । तथा च व्रात्यानां याजनमितीदृश एवाधिकारः । यजमानस्य तु विधिलक्षणाप्रवृत्तिस्तस्याः प्रतिषेधाभावे कुतः प्रायश्चित्तं । भवत्वहीने शास्त्रतः प्रवृत्तिः । श्येनादौ तु कथं । न हि शत्रून् मारयेदिति नोदनाऽस्ति ।

१ अ. १० श्लो. ११७ । २ ण—यो याजयति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किंतर्हि यः शत्रोर्मारणं कामयते तेन तत्सिध्यर्थं श्येनादि कर्त्तव्यं। शत्रुमारणे च लिप्सालक्षणाप्रवृत्तिः। सा च निषिद्धा। "न हिंस्यात्सर्वाभूतानीति" अहीनेष्वपि लिप्सात एव प्रवृत्तिः। फलकामस्य हि तत्राधिकारो भवति। न तु फलकामना तत्र निषिद्धा। नापि काम्यमानार्थनिष्पादको व्यापारः। इह तूभयं निषिद्धं "न हिंस्यादिति" मरणफलव्यापारेण प्रवर्त्तितव्यं तत्फलं च श्येनादेरेव। इह तु नास्ति निषेधः। स्वर्गादिफलकर्मणः कर्त्तव्यमिति केचिदाहुः। "वाक्शस्त्रं वै ब्राह्मणस्य" इत्यभिचारिणीयाभिचारेऽप्यनुज्ञयाऽऽम्नात एव। तुल्यावहीनाभिचारौ। तत्र ऋत्विजामेव प्रायश्चित्तं युक्तं। ननु च काम्यान्यनिषिद्धानि "कामात्मता न प्रशस्ता" इति यस्तस्य विषयः स तत्रैव व्याख्यातः। श्रुतिश्चाहीनतया याजनं कार्यमिति। अभिचरणीयाभिचारे च यजमानस्यायुक्तं कथमाम्नातं यज्ज्योतिषोऽभिचार्यन्ते। तद्विविप्रायश्चित्तान्युक्तान्येव। अस्य अभिचरर्त्विग्विषयेऽभिचरणीयाभिचारे सविषयत्वाद्वैदिकेन जपहोमादिना शत्रोर्मारणमभिचारः॥ १९७॥

शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः॥
संवत्सरं यवाहारस्तत्पापमपसेधति॥ १९८॥

द्विविधः **शरणागतः** प्रागुक्तस्तस्य परित्यागः प्रत्याख्यानं न सत्यां शक्तौ प्राक् तद्विचारितम्। वेदं विप्लाव्यानध्यायाध्ययनं कृत्वाऽधिकारेणाधीयानस्य तु योगदानं 'किं पठसि नाशितं त्वयेति'। अथवा धनहेतोः परीक्षास्थानेष्वनियुक्तेन पठ्यते स्मृतिश्च। दत्वा निर्योगं धनहेतोः "पतितान्मुनिरब्रवीत्"॥ १९८॥

* श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च॥
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति॥ १९९॥

दष्टो दन्तैर्दंष्ट्राभिर्ग्राम्यैः क्रव्याद्भिर्मार्जारनकुलादिभिः॥ १९९॥

षष्ठान्नकालता मासं संहिताजप एव वा॥
होमाश्च साकला नित्यमपाङ्क्त्यानां विशोधनम्॥ २००॥

अपांक्त्यास्तृतीयाध्याय उक्ताः। येषां प्रतिपदं प्रायश्चित्तमन्यत्राम्नातं तेषां मासं संहिताजपः। शाकलहोमः षष्ठान्नकालता चेति समुच्चयः। काष्ठशाकादि- "देवकृतस्य" इत्यादिभिर्मन्त्रैर्हूयते स शाकलहोमः। नित्यग्रहणं समासेऽपि संहिताजपे पुनः पुनरावृत्त्यर्थं यावन्मासः पूर्णः॥ २००॥

---

१ फ—चारिणीया। २ फ—क। ३ ण—तु।

* शुनाघ्रातोपलीढस्य दन्तैर्विदलितस्य च। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनम्॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उष्ट्रयानं समारुह्य खरयानं तु कामतः ॥
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति ॥ २०१ ॥

उष्ट्रैर्युक्तं यानं गन्त्र्यादि साक्षादुष्ट्रादावारोहणमव्यवधानेन चाधिकतरं प्राणायामानामावृत्तिः । दिग्वासा नग्नो नग्नदोषनिर्हरणार्थं पुनः सवासाः स्नानं कृत्वा प्राणायामः कर्त्तव्यः ॥ २०१ ॥

विनाऽद्भिरप्सु वाऽप्यार्त्तः शारीरं सन्निवेश्य च ॥
सचैलो बहिराप्लुत्य गामालभ्य विशुध्यति ॥ २०२ ॥

विनाऽद्भिरसंनिहितास्वप्सु अदृष्टगोचरस्थास्वप्सु आर्त्तो विष्ठया स्तब्धशरीरं मूत्रपुरीषोत्सर्गं सन्निवेश्य सचैलो यत्प्रावृतं वस्त्रं तेन सहितः । बहिर्ग्रामान्नद्यादावाप्लुत्य निमज्य ततो गामालभ्य स्पृष्ट्वा शुध्यति ॥ २०२ ॥

वेदोदितानां नित्यानां कर्मणां समतिक्रमे ॥
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥ २०३ ॥

वेदविहितानां दर्शपौर्णमासादीनां श्रौतानां स्मार्तानां च संध्योपासनादीनां तान्यपि वेदोदितानि तन्मूलत्वात्स्मृतीनां स्नातकव्रतानि " न जीर्णमलवद्वासा " इत्यादीनि । तेषां लोप एकाहमुपवासः । श्रौतकर्मातिक्रमे या इष्टय उक्तास्ता अनेन समुच्चीयन्ते ॥ २०३ ॥

हुङ्कारं ब्राम्हणस्योक्त्वा त्वङ्कारं च गरीयसः ॥
स्नात्वाऽनश्नन्नहः शेषमभिवाद्य प्रसादयेत् ॥ २०४ ॥

सक्रोधाक्षेपे हुंकारेण हुंकुरुते ' तूष्णीमास्व हुं मा एवं वादीः ' इत्येवमादिष्वर्थक्रियासु तन्निषेधार्थं हुंकारकरणं ब्राह्मणस्य ज्येष्ठस्य समस्य कनीयसो वा शिष्यस्य पुत्रस्य वा तथा गरीयसस्त्वंकारमुक्त्वा । 'त्वमेवमात्थ' 'त्वयेदं कृतम्' एकवचनान्तयुष्मच्छब्दोच्चारणे प्रायश्चित्तमेतत् । प्रथमादिविभक्तिर्न विवक्षिता । तथा च समाचारो गुरौ युष्मास्वित्यादि-बहुवचनं प्रयोक्तव्यमिति । स्नात्वाऽनश्नन् प्रातर्भक्तत्यागः । उपसंग्रहणं कृत्वा प्रसाद्य क्रोधं त्याजयित्वा सायमश्नीयात् ॥ २०४ ॥

ताडयित्वा तृणेनापि कण्ठे वाबध्य वाससा ॥
विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत् ॥ २०५ ॥

तृणेन पीडाकरेणापि ताडयित्वा प्रहृत्य वाससाऽपि कण्ठे मृदुस्पर्शेन बध्द्वा । विवादे लौकिके कलहे विनिर्जित्य प्रणिपत्य नत्रेण भूत्वा प्रसादयितव्यः । वादजल्पयोस्तु नायं विधिः ॥ २०५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवगूर्य त्वब्दशतं सहस्रमभिहत्य च ॥
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥ २०६ ॥

अवगुरणप्रतिषेधोऽयं परिशिष्टोऽर्थवादो **जिघांसया** हन्तुमिच्छया दण्डादिकमुद्यम्य संवत्सरशतं नरकेष्वास्ते । **अभिहत्य** प्रहारं दत्वा **सहस्रं** संवत्सराणां **जिघांसया** न परिहासतः ॥ २०६ ॥

शोणितं यावतः पांसून्संगृह्णाति महीतले ॥
तावन्त्यब्दसहस्राणि तत्कर्ता नरके वसेत् ॥ २०७ ॥

ब्राह्मणस्य रुधिरदण्डादिप्रहारेण भूमौ पतितं यावत्पांशून् रजोवयवान् संगृह्णाति तावन्ति संवत्सरसहस्राणि तस्य जनयिता **नरके** व्रजेद्वसेत् । अयमप्यर्थवादः ॥२०७॥

अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ॥
कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् ॥ २०८ ॥

पूर्वस्य प्रायश्चित्तमेतत् । ब्राह्मणरुजः कृत्वेति शोणितोत्पादनादन्यत्रैतत् । यदि वा तेनेदं विकल्पते ॥ २०८ ॥

अनुक्तनिष्कृतीनां तु पापानामपनुत्तये ॥
शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ॥ २०९ ॥

अनुक्ता निष्कृतयः प्रायश्चित्तानि येषां विकर्मणां यथा चाण्डालादिप्रतिलोमवधे तत्र कल्पयेत् । ननु चात्राप्युक्तं "किंचिदेव तु विप्राय दद्यादस्थिमतां वधे"[1] इति अनस्थिसाहचर्यात्क्षुद्रजन्तुप्रायास्तत्रास्थिमन्तो गृह्यन्ते । महाकायानां तु नैष विधिः । ननु चत्वारो वर्णा "नास्ति पंचम" इति शूद्रप्रभेद एवं प्रतिलोमाः । यदि नाम पंचमो वर्णो न जातो नैतावता शूद्रैस्तैर्भवितव्यं तेषामपि लक्षणस्य नियतत्वात् "समानजात्यामूढायां जातः शूद्र" इति वर्णसंकरजाश्चेत्तस्मान्न शूद्रहत्याप्रायश्चित्तं । नापि 'किंचिदेव तु विप्राय' इत्यन्यस्तत्र कल्पनाया अनवसरः । **शक्तिः** प्रायश्चित्तिनस्तपसि । तथा किमयं तपसि समर्थ उत दाने । **पापं च** हिंसाया विहितप्रायश्चित्तमेव । अभक्ष्यभक्षणे तदेव । अथ पापस्य गुरुलघुभावोपेक्षणीयः । ननु च गुरुलघुभावः पापस्य कथं ज्ञायते प्रायश्चित्तमहत्वादिति चेत् अनुक्तप्रायश्चित्तविषयेयं कल्पना । सत्यम् । अर्थवादे दोषातिशयश्रवणाद्गुरुत्वात् तथा बुद्धिपूर्वानुकृते च । किंच नेदमनुक्तनिष्कृतिविषयमेव प्रकल्पयेत् । उक्तेऽपि कल्पना कार्या । कुत एतत् दण्डप्रायश्चित्तयोस्तुल्यत्वात् । दण्डेन चोक्तानुक्तविषयमनुज्ञायते । किंचैतस्मिन् व्यतिक्रमे गुरुलघूनामुपदेशात्तत्रावश्यंभावनीया कल्पना । अत उद्दिष्टानुद्दिष्टसर्वदोषोऽयम् ॥ २०९ ॥

---

[1] श्लो. १४१ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यैरभ्युपायैरेनांसि मानवो व्यपकर्षति ॥
तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् ॥ २१० ॥

ननु चोक्ता एवाभ्युपायाः। इह चान्द्रायणं इह प्राजापत्यं इह द्वादशवार्षिकमिति। सत्यं। संज्ञामात्रेण निर्दिष्टा। इह तु स्वरूपं सेतिकर्तव्यताकमुच्यते। उपाय एवाभ्युपायः। **व्यपकर्षति** अपमार्ष्टि। देवर्षीत्यादिः स्तुतिः। मानवग्रहणं सर्ववर्णार्थम् ॥ २१० ॥

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ॥
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः ॥ २११ ॥

यद्यप्यहर्मुखं प्रातस्तथापि पूर्वाह्णकालो लक्ष्यते। द्वितीयाह्णकालप्रतिषेधादस्य प्रातःकालविधौ हि यदृच्छया भोजनं प्राप्तं वर्तते। केवलमत्यर्थं हि "यत्पूर्वाह्णे वा मध्यंदिने वा मनुष्याणामिति" अयाचितत्वात्प्राप्तमर्थित्वाद्भोजनं तदेव चेत्प्रातःकाले विधीयते तदा माध्यंदिनं निवर्तेत न सायंतनं। अद्य पुनर्यदेव पौरस्त्यं पूर्वाह्णमध्यंदिनकालयोर्विकल्पितयोः प्राप्तं भोजनं तदेव पुनरुच्यमानं कालान्तरनिवृत्त्यर्थं संपद्यते। व्रतत्वाच्चैतदेव युक्तम्। एकाहारता हि व्रतपरिगणनायां संख्यायते। तपश्चेदं तापयति दुःखयतीति। यदि च द्वितीयं भोजनं निवर्तते तत्र सायंतनं निवर्तेत। अन्ये तु "हविष्यान् प्रातराशानिति" स्वल्पपरिमाणता भोजनस्य लक्ष्यत इत्याहुः। प्रातराशे हि स्वल्पं भुंजते। यत्तच्छीलाः प्राकृतपुरुषास्तथा सिद्धे पाके भोजनं प्राप्तं भुक्त्वेति व्यपदिशति। सायमिति वाऽपरस्मिन् त्र्यहे ततोनंतरां तथा हस्तिवेदिकायां यावद्भुज्यते तावदनुज्ञायते। उक्तं च **स्मृतिकारैः** "ईषत् भुक्त्वाऽर्थं संविशेयात्"। अयाचितेऽपि हविष्यभोजनमेककालिकं च। स्वगृहेऽपि 'दीयतां मे भोजनमिति' यत् भृत्यादय आज्ञायन्ते तदपि याचितमेव। प्रार्थनमात्रं याच्ञप्रेषणाध्येषणयोः साधारणं। अतः स्वगृहेऽपि यदि भार्यादयोऽननुज्ञाता उपहरन्ति तया भोक्तव्यं न त्वन्यथेति ॥ २११ ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ २१२ ॥

गोमूत्रादीनां कुशोदकानां समाहारमाहुरेकस्मिन्नहन्येकरात्रोपवासश्च ततो त्र्यहं सांतपनं। अन्ये तु प्रत्यहमेकैकं भक्षयितव्यं संहतस्याश्रुतत्वात्। अतः सप्ताहानि सांतपनं। द्वावप्येतौ पक्षौ स्मृत्यन्तरे परिगृहीतौ ॥ २१२ ॥

---

१ ण–न तदा। २ ण–न निवर्तेत तपः। ३ वशिष्ठे अ–२७।१६। ४ फ–प्र। ५ ण–प्राग्भक्तेति। ६ ण–ततोन्नानतरो। ७ ण–संयमनस्य।

११२ –११३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् ॥
त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन्द्विजः ॥ २१३ ॥

पूर्ववदिति प्राजापत्यविधिमतिदिशति । एष्वेव कालेष्वे**कैकं ग्रासमश्नीयात्** ॥ २१३ ॥

तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् ॥
प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥ २१४ ॥

तेष्वेव कालेषु जलादीनि यावता नातितृप्तिर्भवति । क्वचित्परिमाणं पठ्यते

" अपां पिबेत्तु त्रिपलं पलमेकं तु सर्पिषः । पयः पिबेत्तु द्विपलं त्रिपलं चोष्णमारुतं " ॥
सकृत्स्नायीति त्रिरह्नः त्रिर्निशायामित्यस्यापवादः ॥ २१४ ॥

यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ॥
पराको नामकृच्छ्रोऽयं सर्वपापापनोदनः ॥ २१५ ॥

यतात्मा संयतेन्द्रियो गीतादिशब्दश्रवणेष्वनभिलाषी । **अप्रमत्तस्तत्परः** । अर्थवादोऽयं । सर्वकृच्छ्रेष्वस्य धर्मस्य विहितत्वात् ॥ २१५ ॥

एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत् ॥
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥ २१६ ॥

चतुर्दश्यामुपोष्य स्वयंभूतायां[1] पौर्णमास्यां पंचदश ग्रासानश्नीयात् । ग्रासप्रमाणं चास्याधिकारेण ग्रासानुमंत्रणं च । " आप्यायस्व सन्ते पयांसीति " स्मृत्यन्तरोक्तो विधिरपेक्षितव्यः । एकशास्त्रत्वात्सर्वस्मृतीनामसति विरोधे समग्रं योज्यं । विरोधे तु विकल्पः । प्रतिपदमारभ्यैकैकं ग्रासं दिवसे दिवसे ह्रासयेत् । प्रतिपदि चतुर्दशद्वितीयस्यां त्रयोदशेत्यादि यावच्चतुर्दश्यामेको भवति ततोऽमावास्यायामुपोष्य प्रतिपद्येकं ग्रासमश्नीयात् । द्वितीयस्यां द्वावेवमेकैकं[2] वर्धयेद्यावत्पौर्णमास्यां पञ्चदश भवन्ति । **उपस्पृशन्** स्नानं कुर्वन् **त्रिषवणं** प्रातर्मध्यंदिनापराह्णेषु " त्रिर्निशायामिति " निवर्तते विशेषविहितत्वात् ॥ २१६ ॥

एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ॥
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम्[3] ॥ २१७ ॥

यवमध्यमेऽमावास्यायामुपोष्य प्रतिपद्येको ग्रासः । द्वितीयस्यां द्वौ यावत् पौर्णमास्यां पंचदश । पुनः प्रतिपदमारभ्य कृष्णपक्ष एकैकग्रासापचयो यावदमावास्यामुपवासः ॥ २१७ ॥

१ ण–स्वरोभूतायां । २ ण–एवमेव । ३ ण–ण व्रतं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अष्टावष्टौ समश्नीयात्पिण्डान्मध्यंदिने स्थिते ॥
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥ २१८ ॥

प्रत्यहं मासमष्टौ ग्रासान् कृष्णपक्षाद्वाऽऽरभ्य शुक्लपक्षाद्वा **यतिचान्द्रायणं** भवति। **मध्यंदिने स्थिते** प्रवृत्ते पूर्वाह्णापराह्णौ वर्जयित्वेत्यर्थः । शिष्टं प्रसिद्धम् ॥ २१८ ॥

चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः ॥
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम् ॥ २१९ ॥

अत्र **प्रातः**शब्दोऽस्तमयसाहचर्यात्सूर्योदयप्रत्यासन्नं कालं लक्षयति । **अस्तमिते सूर्ये** प्रदोष इत्यर्थः ॥ २१९ ॥

यथाकथंचित्पिण्डानां तिस्रोऽशीतीः समाहितः ॥
मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम् ॥ २२० ॥

कस्मिंश्चिद्दिवसे चतुरो ग्रासान् कस्मिंश्चिद्द्वादश कस्मिंश्चिन्नाश्नाति **यथाकथंचित्** त्रिंशद्रात्रौ प्रवृत्तिः । यदि कस्मिंश्चित्कस्मिंश्चित् षोडश अयं तु नियमः **तिस्रोशीतीर्मासेनेति** द्वे शते चत्वारिंशदधिके चंद्रलोकं प्राप्नोति ॥ २२० ॥

एतद्रुद्रास्तथादित्या वसवश्चाचरन्व्रतम् ॥
सर्वाकुशलमोक्षाय मरुतश्च महर्षिभिः ॥ २२१ ॥

एतच्चांद्रायणं व्रतं सर्वे देवाः समाचेरुः सर्वेषामकु**शलानां विमोक्षाय** न केवलं यत्रैवोक्तमनुक्तेष्वपि द्रष्टव्यम् । तदुक्तं "कृच्छ्रातिकृच्छ्रौ चांद्रायणमिति सर्वप्रायश्चित्तानि"[1]।

अत्रेदं संदिह्यते । यदेतत्सर्वप्रायश्चित्तवचनं किं तन्त्रेण सर्वेषां शोधनमुत योगसिद्धिन्यायेन प्रतिनिमित्तमावर्तत इति । उच्यते । यद्यप्येतन्न्याय्यं निमित्तावृत्तौ नैमित्तिकावृत्तिरिति तथापीदमनाम्नातप्रतिपदप्रायश्चित्तनिमित्तेष्वसंविदितेषु कृतसंभावनायामाम्नायते तत्र येषां तावत्संभावनामात्रेण शुद्धिः क्रियते तथा "संवत्सरस्यैकमपीति," । तत्र निमित्तस्यानिश्चितत्वादुपपत्तेः कुत आवृत्तिसंभवो यथा सुप्तस्य परिवर्तनैः शय्यागतसूक्ष्मप्राणिवधस्तथा नगरस्य रथ्यासु भ्राम्यतः परस्त्रीमुखसंदर्शनमा गृहप्रासेरसकृत् संभवति तादृग्विषये तन्त्रभाव एव युक्तः । दर्शितं चैतत् "अस्थन्वताम्" इत्यादौ समुदायवध एकं प्रायश्चित्तमिति । यानि च गरीयांसि पापानि तत्र सर्वत्र प्रायश्चित्तान्याम्नातानि इदं च यथाप्रदर्शित एव विषये भवितुमर्हति । महत्त्वाच्चानावृत्तौ न्याय्यं । तस्मात् संशितेष्वपि कथंचित्प्रायश्चित्तेषु न निमित्तान्तरोत्पत्तौ युक्त एव तन्त्रभावः । तथा

१ वासिष्ठे अ. २२ सू. १६ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च तन्त्रधर्म एव न्याय्य इति दर्शयति । "यद्दिवा च नक्तं चैनश्चकृम....यत्स्वपंतश्च ....कृम....यज्जाग्रतश्चापि" । यदिति च वीप्सायां युगपदशेषपापवर्जनम् ॥ २२१ ॥

अत्र वदन्ति

महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहम् ॥
अहिंसा सत्यमक्रोधमार्जवं च समाचरेत् ॥ २२२ ॥

सर्वेष्वेतेष्वितिकर्तव्यतेयमुच्यते । सर्वहोमेष्वाज्यद्रव्यमनुपात्ते द्रव्यविशेषे दर्शितं । **स्वयंग्रहणा**त्परकर्तृकता निवर्तते । किंपुनरयं होमो लौकिकेऽग्नावनावसथ्यस्य भवति नेति विचार्यते । इदमेव तावद्विचार्यं कुतोऽग्नौ होमः प्रक्षेपावधिकस्त्यागो जुहोतेरर्थः । तत्र यस्मिन् कस्मिंश्चिदाधारे प्रक्षेपेण सिध्यत्येव होमः । ततश्च स्थले जले वाऽग्नौ वा क्रियतां होमो गृह्याग्निमतस्तु न लौकिकेऽग्नौ होमः ग्राम्याग्नौ तस्य तद्धोमप्रतिषेधात् । समाचारादग्निसिद्धिरिति चेत्समाचार एव तर्ह्यन्विष्यतां । गृह्यकारैस्तत्प्रणीताग्न्यधिकारैः कृच्छ्रविधिषु होम आम्नातः । तद्दर्शनेनानावसथस्य प्रायश्चित्तेनाहोमकाः कृच्छ्राः । अभ्युदयार्थिनस्तु नैवानग्निकस्य सन्ति । सर्वांगोपसंहारेण फलसिद्धेरहिंसा । शिष्यभृत्याद्यपि ताड्यं न ताडनीयं सत्यं नर्मणाऽपि नानृतं यदि वा पुरुषार्थतया प्राप्तयोरङ्गत्वाय विधानं । **आर्जवमक्रूरता** ॥ २२२ ॥

त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत् ॥
स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् ॥ २२३ ॥

त्रिरह्न इति "सवनेष्वनुसवनमुदकोपस्पर्शनमिति" **गौतमो** निशायामपि त्रिषु यामेषु महानिशां वर्जयित्वा तदवधि न हि अस्ति स्नानकालः । यदेव वासोयुगमाच्छादनार्थमौचित्यप्राप्तं तेनैव सह **जलं** प्रविशेदाविशेदिति नोद्धृतोदकेनेत्यर्थः । **स्त्रियो** ब्राह्मणीरपि **नाभिभाषेत** अन्यत्र मातृज्येष्ठभगिन्यादिभ्यो भार्यया सह कर्मोपयोगी संलापो न निषिध्यते अन्यस्तु न कर्तव्य एव ॥ २२३ ॥

स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा ॥
ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः ॥ २२४ ॥

उत्थित आसीन उपविष्टोऽथवा न क्वचिन्निषीदेदशक्तावधः**शयीत** न पर्यङ्के । **ब्रह्मचारी** मैथुननिवृत्तः । **व्रती** शिष्टाप्रतिषिद्धेषु नियमं गृह्णीयादिदं मया न कर्तव्यमिति । गुर्वादीनामर्चाप्रणतेन स्रगनुलेपनाद्युपहर्तव्यम् ॥ २२४ ॥

सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः ॥
सर्वेष्वेव व्रतेष्वेवं प्रायश्चितार्थमादृतः ॥ २२५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सावित्री "तत्सवितुरिति" गायत्री सवितृदेवत्वाज्जपचोदनासु सावित्रीशब्देन तस्याः सर्वत्राधिकारः । **पवित्राण्यघमर्षणपावमानीपुरुषसूक्तादीनि** शुक्रियाध्यायाजनं-रौहिणेयादीनि सामानि सर्वकृच्छ्रेषु **आदृतो** यत्नवान् । सर्वेष्वित्यादि-श्लोकपूरणस्तथाविध-स्यैवाधिकारात् ॥ २२५ ॥

एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः ॥
अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् ॥ २२६ ॥

आविष्कृतं प्रकाशं लोकविदितमेन**ः** पापं येषां । **एतैः**कृच्छ्रैः **शोध्याः** । ये तु रहस्यपापास्तेषां न कृच्छ्रतपांसि । किंतर्हि **मन्त्रैर्होमैश्च शोधयेत्** । यदि तावत्पैरिषदः ।

ननु रहस्येषु नास्ति परिषद्गमनंमाविष्कृतं न स्याद्विदुषां हि तत्राधिकारः । उच्यते । न प्रायश्चित्तमनागतं शोधयेदित्युच्यते । अपि तु शास्त्रव्याख्यानकाले शिष्याणामुपदेशादिदं रहस्येषु शोधनं बोद्धव्यमिति ॥ २२६ ॥

ख्यापनेनानुतापेन तपसाऽध्ययनेन च ॥
पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥ २२७ ॥

विप्राणां विदितेऽप्येषामप्येवंकर्माऽस्मीति प्रकाशयेत् । **एतत्ख्यापनमनुतापः** । तस्मात्तापेन धिङ्मां महदकार्यमकरवमनर्थो मे दुष्कृतकारिणो जन्मन्येवमादिः चित्त-परिखेदः । **अध्ययनं** साविञ्या जपो वेदपाठो वाहिंसायामन्यत्रासमर्थस्य तपसि दानं । एतदाहेदानीं न **चापदीति** प्रक्रांततपसः आपदि पीडायामनिग्रहणे दानम् ॥ २२७ ॥

यथा यथा नरोऽधर्मं स्वयं कृत्वाऽनुभाषते ॥
तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते ॥ २२८ ॥

ख्यापनविधेरर्थवादः । **नरोऽधर्ममिति** नञः प्रश्लेषो धर्मस्य स्वयं ख्यापनं निषिद्धं । न गुणाः स्वयं वाच्या इति प्रकृतश्चाधर्म एव **तेनाधर्मेणेति** श्रूयत एव ॥ २२८ ॥

यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति ॥
तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते ॥ २२९ ॥

शरीरमन्तरात्मैव न भूतात्मा पुण्यपापयोस्तदाश्रयात् । उपचाराद्धि आत्मनः शरीरशब्दोऽयं द्रष्टव्यः । अनुतापार्थवादोऽयं गर्हाख्याता ॥ २२९ ॥

कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते ॥
नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः २३० ॥

---

१ ण–मे । २ ढ–कस्यायंशोधयेदित्ययं । ३ फ–तावत्य परिषदः । ४ ण–विषदां । ५ ण–नरः स्वस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमित्तपर्यन्तमित्याहुस्तदयुक्तं । **संतापो** मनःपरिखेदः । प्रमाद्यैतन्मया कृतमित्येवंरूपः। **निवृत्तिस्तु** संकल्पो न कर्तव्यः । **पुनरिति** क्रियाभेदं च दर्शयति । क्त्वाप्रत्ययेन संतप्य निवर्तेतेत्यतः प्रायश्चित्तवत्ख्यापनानुतापनिवृत्तयः प्रायश्चित्तिना कर्तव्याः । प्रयतः सिद्धिमाप्नोति ॥ २३० ॥

एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम् ॥
मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत् ॥ २३१ ॥

एवमिति कृत्स्नस्य विधिनिषेधसमूहस्य प्रत्यवमर्शः । **प्रेत्य कर्मफलोदयं** शुभस्य कर्मणः स्वर्गादिफलावाप्तिरशुभस्य नरकोपपत्तिरकृते प्रायश्चित्ते । प्रायश्चित्तं चातिदुःखरूपमेतन्**मनसि संचिन्त्य** शुभं कर्म समाचरेत् । विहितं शुभं तत् । तथा संकल्पमूलः कामो वाक्यार्था नियता इति च तस्माद्यद्यपि न हिंस्यादित्युद्यमननिपातने दण्डादेः परदुःखोत्पादने उच्येते । तथाऽप्येवमादिशास्त्रपर्यालोचनयाऽध्यवसायादिनिषेधः एवमभक्ष्यभक्षणादावपि द्रष्टव्यं । यद्यपि भक्षणमात्रादन्नादिनिगरणपर्यन्तं तथापि मानसोऽध्यवसायो निषिद्ध एव । एवमगम्यागमनेऽपि । यद्यपि हीन्द्रियसमापत्तिर्गमनं तथापि तदर्थाध्यवसायो व्यापार एवमादिशास्त्रान्तरैर्निषिध्यते । यद्येवं हननभक्षणागम्यागमनेषु यत्प्रायश्चित्तं तदध्यवसायेऽपि प्राप्नोति । नैष दोषः । ब्राह्मणवधे तावदिष्टमेव । अहत्वाऽपीति वचनात् । अन्यत्र तु मुख्यस्यैव शब्दार्थस्य परिग्रहो न्याय्यः । प्रतिषेधे तूक्तशास्त्रपर्यालोचनया स मनोव्यापारात्प्रभृतिकायव्यापारपर्यन्तविषयोऽवतिष्ठते । यद्येवं निन्दितं समाचरन्निति प्रायश्चित्तनिमित्तोपदेशात्प्रतिषेधानुसारिप्रायश्चित्तं प्राप्नोति क एवमाह नास्ति प्रायश्चित्तमिति । किंच तच्छब्दचोदितान्न भवत्यन्यस्य लघुकल्प्यं । तथा च सर्वप्रायश्चित्तानामेवमादिरपि विषयो न्याय्यः । कुतः पुनरयं विशेषो लभ्यते प्रतिषेधाध्यवसायादिति । प्रायश्चित्तानि तु शब्दार्थेष्वेव व्रतनियमधर्माश्च सर्वे संकल्पजा इति । अनेन विधिप्रतिषेधावेवोच्येते । व्रतानि विधिरूपाणि । यमाः प्रतिषेधलक्षणास्तत्रैव च कृतार्थत्वान्नैमित्तिकेषु यावत्प्रवर्तितुमर्हन्ति । अस्ति च प्रतिषेधसामान्यनिमित्तमतो भवति प्रायश्चित्तं । न च परद्रव्येष्वभिध्यानमिति चात्रैवान्ते दर्शयिष्यामः ॥ २३१ ॥

अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम् ॥
तस्माद्विमुक्तिमन्विच्छन्द्वितीयं न समाचरेत् ॥ २३२ ॥

कृतप्रायश्चित्तस्यापि पुनरकार्यप्रवृत्तावधिकतरं प्रायश्चित्तमिति एवमर्थं **द्वितीयं न समाचरेदिति** । अथवा निवृत्तेरनन्तरोपदिष्टाया अर्थवादो द्वितीयं न समाचरितव्यमिति ।

१ फ–विवर्तेत्यतः । २ ण–वाह्यत्तिभि । ३ ण–दिति खेधः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्रतं न हातव्यं तस्मादाद्यकृताद्व्यतिक्रमाद्विमुक्तिमिच्छन् मोक्षमिच्छन् पुनर्न कुर्यादतश्चैतदुक्तं भवति । कृतेऽपि प्रायश्चिते न विमुच्यते । यदि पुनः समाचरति न च निष्कृतौ कृतायामकृतायामपि मोक्षो युक्तोऽतो मुक्तस्य मुक्तिमान्विच्छन्निति नोपपद्यते । तस्मादाधिक्याय पुनर्वचनम् ॥ २३२ ॥

यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवम् ॥
तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत् ॥ २३३ ॥

असत्यां चित्तशुद्धौ विहितातिरेककरणार्थमिदं दुष्कृते कर्मण्यलाघवं कापि विचिकित्सा यदि भवति । ततः कृतेऽपि प्रायश्चित्त आत्मनः प्रसादोत्पत्तेरावर्तयितव्यम् । तपोग्रहणं दानादीनामपि यथाविहितदर्शनार्थम् ॥ २३३

तपोमूलमिदं सर्वं दैवमानुषकं सुखम् ॥
तपोमध्यं बुधैः प्रोक्तं तपोन्तं वेददर्शिभिः ॥ २३४ ॥

मनुष्यलोके यत्सुखमाभिमानीकं जनपदैश्वर्यादि यच्चैहिकमरोगित्वादि यच्च सांसर्गिकं धनपुत्रादि संपत् यथाभिमतकांतादिविषयोपभोगलक्षणमैन्द्रियकं यच्च वेदेषु (ब्रह्मवल्ल्यां ८।२) "मनुष्याणां शतमानन्दाः स एक आजानदेवेषु"इत्यादि तस्य सर्वस्य तपो मूलं उत्पत्तिकारणं । तपोमध्यमुत्पन्नस्य स्थितिर्मध्यावस्थाऽतोऽवसानं तदपेक्षयेति वेदविदां दर्शनं । यथैव कर्माणि स्वर्गग्रामाद्यभिप्रेतफलसाधनान्येवं तपो विज्ञेयम् ॥ २३४ ॥

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् ॥
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम् ॥ २३५ ॥

नैवं मन्तव्यं तपसि समर्थोऽत एव सर्वफलसिद्धिमवाप्स्यामि विध्यतिशययोगाच्च विहिताकरणेऽपि न द्रव्येण कथं मेऽनुष्ठेयो धर्म इति । यतो ब्राह्मणस्य तपो ज्ञानं । ज्ञानं वेदार्थावबोधः । तस्मिन्नसति न तत्फलसाधनमतो ज्ञानमेव तप उच्यते । महत्यपि व्रतसिद्धिः । तेन स्वधर्मो न हातव्य इत्येवमर्थोऽयं श्लोकः । ज्ञानग्रहणं स्वाध्यायग्रहणाध्ययनात्प्रभृति सर्वस्वधर्माणां प्रदर्शनार्थमेवं तपः क्षत्रियस्येति । शूद्रस्य सेवनं द्विजातीनामिति शेषः । तत्सेवाया विहितत्वात् । अस्य चानुवादत्वात् ॥ २३६ ॥

ऋषयः संयतात्मानः फलमूलानिलाशनाः ॥
तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम् ॥ २३६ ॥

अतीन्द्रियज्ञानातिशयासादनमपि मुनीनां तपोबलेनैवेत्यर्थः । वाङ्मनःकायनियमात् संयतात्मानः फलमूलेत्याहारनियमः । ईदृशेन तपसा त्रैलोक्यं प्रत्यक्षवत्पश्यंति ॥२३६॥

१ ण–महितव्यं । २ ण–अहनि । ३ ण–मुनीनीत । ४ ण–ब्रह्मज ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

औषधान्यगदो विद्या दैवी च विविधा स्थितिः ॥
तपसैव प्रसिद्ध्यन्ति तपस्तेषां हि साधनम् ॥ २३७ ॥

औषधानि रसायनानि । **अगदा** व्याध्युपशमभेषजानि । **विद्या** भूतविशेषादिविषया । **दैवी स्थिति**रणिमादिशक्तियोगोऽनेकप्रकारः ॥ २३७ ॥

यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् ॥
सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमम् ॥ २३८ ॥

दुःखेन यत्तीर्यते **तद्दुस्तरं** । व्याधिनिमित्तामहत्यापदतिबलेन शत्रूणां यदुपरोध. । एतदपि तपस्विनां सुसाध्यम् । कृच्छ्रेण यत्प्राप्यते **तद्दुराप**माकाशगमनादि । **दुर्गं** मेघपृष्ठारोहणादि । **दुष्कर**मभिशापवरदानादि । अन्यथा त्वकरणं यथा **संवर्त**स्यान्यदेवतासृष्टिः । **सर्वमेव तपसा सिध्यति** । श्लोकत्रयेण संयोगपृथक्त्वादभ्युदयार्थता कृच्छ्राणामुच्यते ।

ननु च प्रायश्चित्तानां प्रकृतत्वात्कृच्छ्रस्तुतिस्तच्छेषतयैव न्याय्या नाभ्युदयार्थिनो विधेयतया । न च दुस्तरादयोऽर्थवादतया न संभवन्ति । एवंविधः महांतः कृच्छ्राय दुस्तरमपि समुद्रादि तीर्यते । किं पुनर्दुष्प्रापं नापनोत्स्यते । उच्यते । **गृह्यस्मृतिषु** सामविधौ चाननुक्रम्यैव प्रायश्चित्तानां कृच्छ्रविधिः समाम्नातः । तत्र चानारभ्याधीतत्वायुक्तैव अभ्युदयार्थता । आह च (गौतमसू. अ. १६।२४) "अथैतान् कृच्छ्रांश्चरित्वा सर्वेषु वेदेषु ज्ञातो भवतीति"। वेदेषु ज्ञात इत्यनेन नियमपूर्वकं वेदाध्ययनानुष्ठानाद्यत्फलं तत्सिद्धमाह । यस्तु निष्फलो ग्रहणार्थोऽध्ययनविधिः स एकवेदाध्ययनेनात्रापि संपद्यते । एवमनेकवेदाध्ययनं तु धर्मायैवेत्युक्तं । वेदेषु ज्ञात इत्यनेनाशेषयागफलावाप्तिमाह । यजमानो हि वेदैर्ज्ञायते । यो ह्यर्थवादतया संभवति न प्रायश्चित्तानिदानभावं गच्छद्भिरिहापि स्वधर्मनिवृत्तिमाशङ्कमानेन "ब्राह्मणस्य तपोज्ञानम्" इति यदुक्तं तदभ्युदयार्थत्वे संभवति न प्रायश्चित्तानि पापप्रमोचनार्थानि काम्यानि फलसाधनानि । तत्र भिन्नविषयत्वात्कुतः प्रायश्चित्तैर्निवृत्तिराशङ्क्यते । अभ्युदयार्थत्वे तु कृच्छ्राणामन्येषां च कर्मणां तुल्यत्वाद्युक्ता निवृत्त्याशङ्का । तथा महापातकिनश्चेति पापप्रमोचनार्थेऽपि चोद्यते यद्दुस्तरमित्यादिना । अभ्युदयार्थतेति भिन्ने एव ते वाक्ये । तेन च प्रकरणस्य बाधो युक्त एव । तथा च **द्वैपायनमुनि**प्रभृतयस्तपःप्रभावाद्बुद्धीर्विचित्रास्ता वक्ष्यन्ते । तस्मात्सर्वफलानि तपांसि । न च यथा सर्वार्थान्यपि वैदिकानि कर्माणि नियतफलानि सर्वेभ्यो दर्शपूर्णमासौ सर्वेभ्यो ज्योतिष्टोम इत्याधिकारात्तत्र सर्वत्र यान्येव वेदे स्वर्गादीनि फलानि श्रुतानि तदपेक्षयैव सर्वार्थता न तु ऋध्यतिशयातिभोगेनैवमिति । किं तर्हि यद्दुस्तरमित्यादि यथा निर्दिशितम् ॥ २३८ ॥

---

१ फ–स्वी ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महापातकिनश्चैव शेषाश्चाकार्यकारिणः ॥
तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः ॥ २३९ ॥

उक्तार्थमेतत् ॥ २३९ ॥

कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च ॥
स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ॥ २४० ॥

तपस्तुतिरियं । येन तपसा सर्वत्र गमनात्सर्वे स्वर्गमासत इति । यथाऽनधिकृता अपि कीटादयस्तपोबलाद्दिवं गच्छन्ति किं पुनर्विद्वांसो ब्राह्मणा आलंबनं कीटादीनां जातिसहजं दुःखं तदेव तपः । तेन च क्षीणकल्मषाधिकारिजन्मान्तरकृतेन सुकृतेन दिवं यान्ति ॥ २४० ॥

यत्किंचिदेनः कुर्वन्ति मनोवाङ्मूर्तिभिर्जनाः ॥
तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः ॥ २४१ ॥

वाङ्मनःकायकृतस्य जपहोमाभ्यां शुद्धिः स्मर्यते । तत्र तपसा निवृत्तिः स्यात् । अत इदमारभ्यते तदपि तपसानूद्यते ॥ २४१ ॥

तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः ॥
इज्याश्च प्रतिगृह्णन्ति कामान्संवर्धयन्ति च ॥ २४२ ॥

काम्यकर्मारंभे पूर्वं तपः कर्तव्यं । तदपि तावदनूद्यते । तथा चोक्तं[1] "प्रथमं चरित्वा शुचिः पूतः कर्मण्यो भवति"। यत्र तावद्दीक्षोपशमनाद्यङ्गं तत्र तदेव तपः एकस्तनं व्रतमुपेत्युपयन्निति विहितं चेति तप एव । यत्रापि शान्तिकपौष्टिकादौ गृह्यादिविषये तत्रापि पूर्वं तपः कर्तव्यमिति श्लोकार्थः । ब्राह्मणग्रहणं योगाधिकृतकाममात्रप्रदर्शनार्थं । उक्तं च

" नातप्ततपसः पुंसो हविर्गृह्णन्ति देवताः । नागृहीतहविष्यस्य कामः संपद्यते क्वचित् " ॥

यद्यपि न देवता तत्फलं तथापि यागस्य[2] देवतया विनाऽनिष्पत्तेर्देवताः संवर्धयन्तीत्युच्यते । हविर्ग्रहीतृत्वं च न पुनर्देवतानां च स्वीकारः । किं तर्हि संप्रदानतयोद्देशोऽनिराकरणम् ॥ २४२ ॥

प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः ॥
तथैव वेदानृषयस्तपसा प्रतिपेदिरे ॥ २४३ ॥

मनोरियं प्रतिष्ठा ग्रन्थस्य सा तपसः सामर्थ्यजैव । अन्योऽपि यो ग्रन्थप्रतिष्ठाकाम-

१ गौतमीये अ. २६ सू. २१ । २ ग-योगस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तेनापि तपःपूर्वं कृत्वा ग्रन्थः प्रणेतव्यः । ऋषीणामपि यत्ताहत्त्वं वेदाः प्रादुर्भवन्ति तत्तपसैव ॥ २४३ ॥

*** इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते ॥**
सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्यमुत्तमम् ॥ २४४ ॥

तपस्तुत्युपसंहारः । **यदेतत्तपसो महाभाग्य**महाफलत्वमुक्तं **तद्देवाः प्रचक्षते** न केवलं मनुष्या एव । **सर्वस्यास्येति** जगन्निदर्शयति कृत्स्नस्य जगतः पुण्यमुद्भवं शुभजन्मतपसः सकाशात्पश्यन्तः ॥ २४४ ॥

वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमा ॥
नाशयन्त्याशु पापानि महापातकजान्यपि ॥ २४५ ॥

वेदाभ्यासादीनां नित्यानां कर्मणां पापप्रणोदनार्थताधिकारान्तरत्वेनोच्यते । अनिर्दिष्टप्रायश्चित्तानामप्रत्ययकृतानां प्रतिभूतानां चैतद्विज्ञायते । अन्ये त्वाहुर्यदेवोक्तं "ब्राह्मणस्य तपो ज्ञानम्" इति तपोविधानेन कर्मान्तरनिवृत्तिमाशङ्कमानस्य वचनं इदमपि तथैव विज्ञेयं । अनुसंधानार्थं **क्षमा**ग्रहणम् । सर्वात्मगुणप्रदर्शनार्थं । **महापातकान्यपीति** । अपिशब्दाच्छ्रुतिः प्रतीयते । न महापातकनिवृत्त्यर्थता न चाकस्मात्स प्रवर्तित इति तथा प्रदर्शितैर्विषयैर्विज्ञायते ॥ २४२ ॥

यथैधस्तेजसा वन्हिः प्राप्तं निर्दहति क्षणात् ॥
तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित् ॥ २४६ ॥

ज्ञानप्रशंसेयं । विदुषः स्वल्पेन प्रायश्चित्तेन शुद्धिरित्यस्मिन् प्रकरण आज्ञायते । ज्ञानं च सरहस्यं वेदार्थविषयं ज्ञेयं । प्रायश्चित्तविधिज्ञानं केवलं शुद्धये प्रयोगार्थत्वात् न ह्यन्यथाप्रयोगोपपत्तिः । यस्तु देवादिसत्तत्वविज्ञानं रहस्याधिकारज्ञानं च तस्याकामार्थत्वाद्युक्तं "तद्धि ताः पापनिष्क्रियाः" । आह च "यथा पुष्करपलाश आपो न श्लिष्यन्ति एवमेवं विदि पापं कर्म न श्लिष्यतीति" । **एधो** दार्विन्धनं यथा शुष्कदारु चाग्नौ क्षिप्तं क्षिप्रं दह्यते न त्विषा एवं ज्ञानमग्निरिव पापस्य दाहकत्वाद्विनाशसामान्यादेवमुच्यते । वेदविदिति ज्ञानं विशिष्यते । तेन तर्ककलाकाव्यादिज्ञानमपास्तं भवति ॥ २४६ ॥

इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि ॥
अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत ॥ २४७ ॥

---

* ब्रह्मचर्यं जपो होमः काले शुद्धाल्पभोजनं ।अरागद्वेषलोभाश्च तप उक्तं स्वयंभुवा ॥ १ ॥

१ ण—अथैव । २ ण—कृत्स्नं पादं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वोत्तरप्रकरणाभिसंबन्धार्थः ॥ २४७ ॥

सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश ॥
अपि भ्रूणहणं मासात्पुनंत्यहरहः कृताः ॥ २४८ ॥

मुखनासिकासंचारी वायुः प्राणस्तस्यायामो निरोधः । स चोभयपथा प्राणप्रवृत्तेर्बहिः क्रमतोऽपानप्रवृत्तेर्वा यद्रेचकाख्यं प्रसिद्धं । **व्याहृतयः** सप्त **प्रणव** ओंकारो व्याहृतिभिः **प्रणवेन** च सह प्राणायामाः कर्तव्या इति । **षोडश**त्यावृत्तिसंख्यानं । कीदृशः सहभावः । केचिदाहुः प्राणायामं कृत्वा व्याहृतिः प्रणवजपः प्रत्यावृत्ति कर्तव्यः । अन्ये त्वाहुः श्वासनिरोधकालेन ध्यातव्याः । किंपरिमाणः प्राणायामानां कालो यावता नातिमहती श्वासनिरोधनपीडा जायते कुंभकरेचकपूरकाश्च प्राणायामाः स्मर्यन्ते । तेन श्वासनिरोधमात्रं यथाऽप्रमाणं नासिद्धेरिति । असाध्यतयैव परिमाणानामपि भ्रूणहनमपि शब्दात्तत्समेषु ॥ २४८ ॥

कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च प्रतीत्यृचम् ॥
माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुध्यति ॥ २४९ ॥

कुत्सेन ऋषिणा दृष्टं प्रोक्तं **कौत्सं** । " अपनः शोशुचदघम् " इत्यष्टर्चं बह्वृचे पठ्यते (१।७।५) । **वासिष्ठं च प्रतीत्यृचं** तिस्र ऋचः समाहृतास्त्र्यृचं । प्रतीतिसूक्तादिप्रतीकार्थं चेति । " प्रतिस्तोमेभिरुषसं वसिष्ठा " इत्येतत् (५।५।२७), " माहेंद्रं माहित्रीणाम् " इति (८।८।४२) तृचमेव । महितृशब्दोऽस्मिन् सूक्तेऽस्तीति विमुक्तादिप्रक्षेपात् । अक्रतुऋचो ये तु माहेन्द्रमिति पठन्ति तेषां " महां इन्द्रो य ओजसे " (५।८।९) इत्यष्टचत्वारिंशतं पयःसूक्तमाहुः । शुद्धवत्यश्च " एतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन " (६।६।३१) इति । अत्रापि शब्दस्तत्समानार्थः ॥ २४९ ॥

सकृज्जप्त्वाऽस्य वामीयं शिवसंकल्पमेव च ॥
अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मलः ॥ २५० ॥

अत्र **सकृत्**ग्रहणात् पूर्वत्र पाठावृत्तिः प्रतीयते । सा च समाचारादन्यत्र दर्शनाच्च । त्रिर्जपित्वाऽघमर्षणमित्यत्रापेक्षायामधिकृतेन संबन्धः । अस्य वामशब्दोऽस्मिन् सूक्तेऽस्तीति मतौच्छःसूक्तनाम्नोरिति शब्दव्युत्पत्तिः " अस्य वामस्य पलितस्य होतुरिति " (२।३।१४) द्वापंचशदृचं सूक्तं **शिवसंकल्पमपि** " यज्जाग्रतोदूरमुदैति " इति **वाजसने** षडृचम् ॥ २५० ॥

हविष्यन्तीयमभ्यस्य न तमं ह इतीति च ॥
जपित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः ॥ २५१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतीकार्थो द्वितीय इति इतिकरणः पदार्थविपर्यासकृत् ततो मन्त्रस्वरूपग्रहणमिति वेत्यत्र लभ्यते । **पौरुषं** " सहस्रशीर्षा पुरुष " (ऋग्वेदे ८।४।१७) इति षोडशर्चं सूक्तम् ॥ २५१ ॥

एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम् ॥
अवेत्यृचं जपेदब्दं यत्किंचेदमितीति वा ॥ २५२ ॥

अर्वाङ्महापातकेभ्य एनांसि **स्थूलसूक्ष्मा**ण्युच्यन्ते उपपातकादीनि तेषा**मपनोदनं चिकीर्षन् अवेत्यृचं जपेदब्दं** अवेत्यवशब्देन प्रतीकेन " अव ते हेळो वरुण नमोभिः " इति लक्ष्यते (१।२।१९) । पापप्रमोचनलिङ्गत्वान्न त्वतत्संदुर्हणायत इति " यत्किंचेदं वरुण दैव्ये जन " इति एषाम् ॥ २५२ ॥

प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम् ॥
जपंस्तरत्समंदीयं पूयते मानवस्त्र्यहात् ॥ २५३ ॥

अप्रतिग्राह्यं मद्यादि यदप्यप्रतिग्राह्यं पापकर्मणः सुवर्णादि तदग्राह्यमेव । **विगर्हितमन्नं** चतुर्विधं स्वभावकालपरिग्रहसंसर्गदुष्टम् । " तरत्समंदीधावति " (७।१।१९) पावमानीषु चतुष्टयम् ॥ २५३ ॥

सोमारौद्रं तु बह्वेनामासमभ्यस्य शुध्यति ॥
स्रवन्त्यामाचरन्स्नानमर्यम्णामिति च तृचम् ॥ २५४ ॥

" सोमा रुद्रा धारयेथामस्त्रम् " इति (५।१।१८) चतस्रो यज्ञं च भरणानीन्द्रियं चेति ऋक् समा संवत्सरं चाह्वान इदं लिङ्गं यदुक्तं क्वचित्तन्त्रेणापि प्रायश्चित्तमस्तीति । **स्रवन्त्या**मिति तडागसरसी निवर्तेते ॥ २५४ ॥

अब्दार्थमिन्द्रमित्येतदेनस्वी सप्तकं जपेत् ॥
अप्रशस्तं तु कृत्वाऽप्सु मासमासीत भैक्षभुक् ॥ २५५ ॥

" इंद्रं मित्रं वरुणमग्निम् " (१।७।२४) इत्येतत्सप्तकं षण्मासान् **जपेदेनस्वी**त्यविशेषात्सर्वैनसाम् । **अप्रशस्तं** मैथुनं तत्र पुरीषोत्सर्गो वा तदप्सु कृत्वा **मासं** भैक्षाहारो भवेत् ॥ २५५ ॥

मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः ॥
सुगुर्वप्यपहंत्येनो जप्त्वा वा नम इत्यृचम् ॥ २५६ ॥

" देवकृतस्यैनसोऽवयजनमसि " इत्येवमादयोऽष्टौमन्त्राः शाकलहोमीयास्तैर्घृत**मब्दं हुत्वा गुर्वप्यपहन्त्येनः** सर्वमहापातकान्यपीत्यर्थः । जपित्वा " नमो रुद्राय तवसे

१ फ–दा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कपर्दिन " इत्येवं मन्त्रं संवत्सरमेवमेतां सिद्धिमाप्नुयात् । अन्तरेणापि शाकलहोमं तदिदं वैकल्पिकं जपकर्मपूर्वेण शाकलमन्त्रहोमेन प्रायश्चित्तमन्येन वा जपित्वा वामन इत्यृचं सा तु शिष्टेभ्यः सुगमयितव्या ॥ २५६ ॥

महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः ॥
अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यति ॥ २५७ ॥

महापातकसंयुक्त इति पूर्वपदार्थसंख्याविशेषप्रतिपत्तिरनेनापीति गम्यते । एकैकस्य लघुनः प्रायश्चित्तविधानमनेकेनापि युक्तं । **पावमान्यः** कृत्स्नमेव मण्डलं दाशतयं " स्वादिष्ठयामदिष्ठया " (ऋग्वेद ६।७।१६) इत्यारभ्य " यत्ते राजञ्छृतं हविः " इति (७।९।२८।) । पदं नाम गवामनुगमनं । गवामनुगमनं नानुव्रज्यामात्रं । किं तर्हि ? परिचर्या । सा च गोघ्नप्रायश्चित्तादनुसंधेया ॥ २५७ ॥

अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम् ॥
मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः २५८ ॥

महापातकसंयुक्तस्यैव प्रायश्चित्तान्तरमेतत् । **वेदसंहितां** मन्त्रब्राह्मणं "षट्त्रिंशद्रात्रमुपोष्य " इति **संहितामरण्ये** जपन् **प्रमुच्यते** ॥ २५८ ॥

त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः ॥
मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाऽघमर्षणम् ॥ २५९ ॥

अपोऽभ्युपयन् जपित्वाऽघमर्षणमिति संबन्धः । अन्तश्चान्तर्जलं जपसिद्धिरेवं स्मृत्यन्तरानुग्रहोऽघमर्षणमंत्रविशेषस्तृच उक्तः ॥ २५९ ॥

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः ॥
तथाऽघमर्षणं सूक्तं सर्वपापापनोदनम् ॥ २६० ॥

स्तुत्यर्थः श्लोकः ॥ २६० ॥

हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः ॥
ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किञ्चन ॥ २६१ ॥

इयमपि स्तुतिः । ऋग्वेदधारिणो रहस्यप्रायश्चित्तार्था । अन्ये तु " महापातकिसंयुक्त " इत्यारभ्य रहस्यार्थमिच्छन्ति ॥ २६१ ॥

ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः ॥
साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते ॥ २६२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋगादिविशेषणात् ब्राह्मणनिवृत्तिः । **रहस्यानि** सामान्यारण्यकाधीतानि ॥२६२॥

यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति ॥
तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ॥ २६२ ॥

त्र्यवयवस्त्रिवृदेकार्थत्वादवयवव्यवहारात् वेदो वेदान्तरस्यावयवः ॥ २६३ ॥

ऋचो यजूंषि चान्यानि सामानि विविधानि च
एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित् ॥ २६४ ॥

तत्त्र्यवयवं दर्शयति । आद्यानि मुख्यानीत्यर्थः । ब्राम्हणाध्येयानि च पठितानि । अथवा पदक्रमितानि **विविधानि सामानि** ग्राम्यारण्यविभागेन ॥ २६४ ॥

*** आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता ॥**
स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥ २६५ ॥

॥ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां सं० एकादशोऽध्यायः ॥

त्र्यक्षरमक्षरत्रयसमाहार ओंकार आद्यं ब्रह्म गुह्यं रहस्याधिकारे यथावदुपदिष्टत्वाच्छब्दब्रह्मरूपतयोपासनकर्मत्वेन विहितः परमात्मवाचकतया वा **गुह्यो** न तु ज्ञानाक्षरत्वेन । स हि लोकप्रसिद्ध ओमित्यभ्युपगमस्**त्रयी यस्मिन्नेषा** संकुचिता सर्वाणि वर्णानीत्येवमादि तस्योपासना पुरस्तादुक्तेति । एवमोमित्येतदक्षरमुपासीतेति पूर्वश्लोके मन्त्रार्थवेदनेन वेदत्वमुक्तमनेन वेदान्तज्ञानं कर्मवेदनं त्वध्ययनविध्याक्षिप्तमेवेति प्रसिद्धम् ॥२६५॥

"मान्या काऽपि मनुस्मृतिस्तदुचिता व्याख्या हि मेधातिथेः
सा लुप्तैव विधेर्वशात् क्वचिदपि प्राप्यं न यत्पुस्तकं ॥
"क्षोणीन्द्रो मदनः सहारणसुतो देशांतरादाहृतै-
र्जीर्णोद्धारमचीकरत्तत इतस्तत्पुस्तकैर्लेखितैः " ॥

इति **श्रीभट्टवीरस्वामिसूनुभट्टमेधातिथिविरचित** एकादशोऽध्यायः ॥

---

* **एष वोऽभिहितः कृत्स्नः प्रायश्चित्तस्य निर्णयः । निश्रेयसं धर्मविधिं विप्रस्येमं निबोधत १**

१ क–का । २ ख–न ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥

॥ अथ द्वादशोऽध्यायः प्रारभ्यते ॥

चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयाऽनघ ॥
कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः पराम् ॥ १ ॥

आद्योऽर्धः श्लोकः शास्त्रार्थपरिसमाप्तिदर्शनेनाधिकाकांक्षानिवृत्त्यर्थः । **कृत्स्नग्रहणं** सामान्यार्थं । एतावन्तः स्मार्ता धर्मा यस्मिन शास्त्रे रहस्यपर्यन्त उपदिष्टाश्च शिष्यमुखेनाचार्यस्यैव कृत्स्नकारिता शास्त्रस्य प्रतिपाद्यते । न विवक्षिता नात्र शिष्याचार्यौ वस्तुतः प्रतिप्रत्तव्यं ग्रन्थकार एवेमं ग्रन्थमेवं विभजति । **धर्मशब्दश्च** कर्तव्यतावचनो विधिप्रतिषेधसमूहमनुवदति । तेन कर्मफलसंबन्धोऽनुक्त इति इत ऊर्ध्वं प्रतिपाद्यते । कृत्स्नो धर्म उक्तस्त्वया विधिप्रतिषेधापेक्षया वचनमुपपन्नं भवति । कस्य पुनः कर्मणः फलसंबन्धो जिज्ञास्यते येनोच्यते **कर्मणां फलनिर्वृत्तिं शंसेति** । यावता यानि तावन्नित्यानि शास्त्रनोदितत्वादेव क्रियन्ते न तेषां फलमभिसंधेयं । न हि तानि फलार्थानि यान्यतुल्यानि । तत्रापि प्रतिकर्म प्रायशः फलान्युक्तान्येव "वारिदस्तृप्तिमाप्नोति" 'स्वर्गायुश्च' इत्यादीनि च । यत्रापि नोक्तमिव मन्येत तत्रापि स्वर्गादि साधितमेव । यानि जातकर्मादीनि संस्कारकर्माणि तानि संस्कार्यविशेषोक्तस्य क्रियाफलेनैव फलवन्ति नादृष्टमाकांक्षन्ति । यान्यपि नैमित्तिकानि द्रव्यशुद्ध्यादीनि चाण्डालस्पर्शनस्नानादीनि तान्यपि दृष्टप्रयोजनान्येव शुद्धये विहितानि क्रियन्ते । अशुद्धैर्व्यवहारप्रतिषेधात् । प्रायश्चित्तानि चानन्तरमुक्तप्रयोजनान्येव । अतो न विद्मः कस्य वास्य कर्मणः फलमभिजिज्ञास्यते । प्रतिषेधानां शरीरजैः कर्मदोषैः कृते तेषामेव वक्ष्यमाणत्वात् । तथाप्रतिषेधानुष्ठानमपि शास्त्रचोदितमेव ।

न च तत्र फलार्थित्वे हि न सर्वविषयोऽधिकारः स्यात् । अर्थिता वाऽधिक्रियेत । उच्यते । नैवात्र तादृशं फलमभिधीयते यत्काम्यते । अनिष्टफलदर्शनमत्र क्रियते । नैव तत्काम्यते । नैव च कश्चिदनिष्टप्राप्तिमिच्छति । अतः सर्वविषयतासिद्धिः । यदप्युच्यते शास्त्राचोदितं प्रतिषेधानुष्ठानं क्रियते अत्यल्पमिदमुच्यते । एवं तत्र नानुष्ठानमिति सर्वमेव शास्त्रनोदितं क्रियते । किन्तु तच्छास्त्रं फलार्थिनः कस्यचित्कर्तव्यतां स्थापयति । कस्यचिदन्तरेण फलं नैमित्तिकत्वेन । इह तु यावज्जीवमिव निमित्तश्रुतेरभावात्किमर्थं प्रतिषिद्धं न क्रियत इत्यपेक्षा प्रत्यवायश्च दृश्यते । जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते इति ।

---

१ र-न्यो । २ र-प्यते । ३ र-फलं सम्बन्धो । र-ण-अपेक्षायां । ४ फ-तावन्ति । ५ र-चोदिता ।

For Private And Personal Use Only

ननु च यत्प्रतिषिद्धं ब्राह्मणवधादि न तच्छास्त्रचोदितं। शास्त्रनोदितस्य हि शास्त्रीयेण फलेन संबन्धो युक्तः । यथा "स्वर्गकामो यजेत" इति । शास्त्रतो हि यागस्य कर्तव्यताप्रतिपत्तिर्नान्यतः । इह तु द्वेषादिना लौकिकी प्रवृत्तिरशास्त्रीया। न चाशास्त्रीयस्य शास्त्रीयेण फलेन संबन्धो न्याय्यः। यदप्युक्तमुपेक्षायां प्रत्यवायः प्रदर्शित इति किमित्यत्र कांक्षा । यावता द्विषन्तं प्रवर्तमानस्य न कर्तव्यमिति शास्त्रतोऽवगतिर्जायते तावता वाक्यार्थसमाप्तिः । किमत्र पदमस्ति यदाकांक्षीयेत एतद्विविच्यमानं महान्तं ग्रन्थविस्तारमाक्षिपति । संक्षेपस्त्वयं "न हिंस्याद्भूतानि" इति प्रतिषेधविधेः प्रतिषेधो भावार्थः कर्तृकरण इति च श्रूयते । तत्र विधिस्तावन्नियोज्यं विषयाकांक्षा तत्र नियोज्यस्येयमवगतिर्भवति । मयैतत्कर्तव्यं नार्थस्तत्र नियुक्तः । पुरुषनियोगरूपत्वाद्विधेः । स चात्र नियोज्यो लौकिक्याद्वेषलक्षणया प्रवृत्त्यार्थेन प्रवर्तमानहिंसास्वभावोपदेशेन समर्पितः । यः स्वेच्छया हनने प्रवर्तते स हन्यादिति । न चैतेन युज्यते स ह्यत्र विधेर्विषयः । न चेति शून्येषु भावार्थस्यान्यतः प्राप्तत्वात्पुरुषोपलक्षणत्वात्स्वेन विषयत्वेन विधेः संबन्धः । यश्चासौ नियोज्यः स न तीर्थत्वेन नियोज्यभावमात्मनः प्रतिपद्यते । यावत्तद्विषयस्य प्रतिषिध्यमानस्य नानिष्टफलतामध्यवस्यति । तथा हि लोके व्युत्पत्तिः । "सन्ध्यायांगुलिर्देयेति" वदन् प्रतिषिद्धे तदतिक्रमेण तदनुष्ठीयमानमनर्थहेतुतया प्रतिपन्नं तत्र लौकिकीं व्युत्पत्तिमवमृज्य हेत्वन्तरमुपन्यासमर्हति । न चाश्रुताप्यनिष्टफलता प्रतिषेधसामर्थ्यात्कल्पयितुं युक्ता । किं पुनर्यत्र श्रूयत एव । न हि श्रुतस्योत्सर्गो न्याय्यः । न चात्र वादमात्रोपलक्षकत्वं नरकादिफलं श्रुतियुक्तमुक्तेन न्यायेन। फलापेक्षान्वयः सकाशात् किं चार्थवादा विधिविशेषा भवन्ति । न चेह कश्चिद्विधिः श्रुतः प्रकृतो वा कर्मफलसंबन्धस्यैव प्राधान्येन प्रतिपादयिष्यमाणत्वात् । न ह्यत्र कर्माणि विधीयन्ते । अतश्च तेषां फलसंबन्ध उच्यते । न चैतावता भवन्ति वाक्यशतान्यनर्थकानि । भवन्त्वर्हन्तु स्मृतिकारणं तावदेतद्दर्शनं । न ह्यन्यथैतानि वाक्यानि व्याख्यातुं शक्यन्ते । अविधिशेष इह नास्ति गुणवादेनैतव्द्याख्यानं शास्त्रकाराणामपि भ्रान्तिरिति चेन्न नैवंवादिन आत्मनः प्रकर्षतो महर्षीनवजानते । अघं पापमनघेति संबोधनं निष्कल्मषतया स्तुत्यर्थं शंसेति वाग्यतो वर्तते ॥ १ ॥

स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः ॥
अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् ॥ २ ॥

---

१ ण-र-अपेक्षायां । २ ण-र-तान मिति । ३ र-आकांक्षीत् । ४ फ-स्त । ५ ण-र-चार्थस्तत्र । ६ र-अत्रत्यार्थतः । ७ र-तैलेन । ८ ण-र-विधिः । ९ र-किंच । १० र- क्षयत्वं । ११ फ-अवधि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृष्टप्रतिवचनमेतत् । यदहं पृष्टः शृणु तत्कर्मणो योगमिति संबन्धः । स च प्रकृतत्वात्फलेनैव विज्ञेयः ॥ २ ॥

शुभाशुभफलं कर्म मनोवाग्देहसंभवम् ॥
कर्मजा गतयो नृणामुत्तमाधममध्यमाः ॥ ३ ॥

शुभस्य निर्देशो दृष्टान्ततया मनोवाग्व्यापारविध्यर्थो वा मनसो वाचो देहाच्च संभवति। कर्मशब्दो न चेज्यायामेव कायपरिस्पन्दे वर्तते। किं तर्हि क्रियामात्रयोगध्यानवचनात्मकेऽपि फलशब्दः प्रत्येकमभिसंबध्यते । शुभमशुभफलं च नैवं विज्ञेयं कायव्यापारसाधनादिवत् कर्मानुष्ठानाच्छुभाशुभफलप्राप्तिः । अपि तु मनोवाक्कायसंभवादप्येवमेव । तस्मादपि त्रिविधात्कर्मणस्तु विधीयते फलप्राप्तिः ॥ ३ ॥

तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः ॥
दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकम् ॥ ४ ॥

ननु च 'दण्ड्यान् यजेत' 'न हिंस्यादिति' शुभमशुभं च ते सर्वे कायव्यापारसाध्ये तदानेनात्मनः स्वत्वनिवृत्तिः परस्य च स्वत्वसंपादनं तच्च पूर्वं दक्षिणेन हस्तेनेत्यादि विहितं। यागोऽपि प्रयोगरूपोऽवभृथान्तः कायव्यापारनिर्वर्त्यो भवति। एवं संघातदण्डाद्यविद्या तु कायिकतया प्रसिद्धैव । तत्र किं तत्कर्म यन्मनसः संभवत्यत आह अर्थस्यास्य **मनो विद्यात्प्रवर्तकं**। मनसो हि व्यापाराः सर्वदर्शनादयः। न च त्रिष्वसत्सु मौतिको व्यापारः। तथा हि प्रथमं तावन्मनसाऽयमर्थं संपश्यत्ययमीदृश एतस्य वस्तुनः सुखं दुःखं वाऽस्य कारणात् तत आयत्ते कथमेतन्मनः संपद्यते ततोऽध्यवस्यति संपादयाम्यतो नेदमिति । तत्र उदरे क्रियाप्रधाने कायपरिस्पन्दरूपवाग्व्यवहारश्चातः सर्वस्य मनः प्रवर्तकं प्रेक्षापूर्वकारिणः अबुद्धिपूर्वे तु नावश्यं सद्दर्शनादयः पूर्वभाविरूपस्य ताद्रूप्येण ग्रहणं यथा मेघवर्णसादृश्यात्पानकबुद्ध्या प्रवृत्तिः सन्तमासंभवात्प्रवृत्ति संतमासंभवति । तया परस्त्रीष्वन्यत्तु दैवोपनिपतितं। यथा सुप्तस्य हस्तसंचारपार्श्वपरिवर्तनादिना मशकादिप्राणिवधस्तत्रापि कर्तृत्वमुपपादितं प्रायश्चित्तेषु प्रवृत्तिहेतुर्विविधस्य वाङ्मनःकायसाधनभेदेन त्र्यधिष्ठानस्योत्तमाधममध्यमगतिभेदेन **दशलक्षणयुक्तस्य मनः** कायकर्मणोः प्रत्येकं त्रैविध्यं वाङ्मयं चतुर्विधं । एतानि दशलक्षणानि तान्युपरिष्टाद्वक्ष्यति ॥ ४ ॥

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ॥
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥ ५ ॥

---

१ ण-र-शृणुतकर्मणो योग । २ ण-र-आपादन । ३ र-ष्ठ्या । ४ फ-एव तस्य । ५ र-रूपा । ६ र-ष्वत्यंतं तु ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिध्यानं नाम परद्रव्यविषयेर्ष्याबुद्ध्या परद्रव्याभिभवानुचिन्तनं। कियदश्वगोधनं कियद्वाऽजाविकमिति च विभवोऽश्वाः धिग्देवं कस्मादस्येयती समृद्धिः। अथ च कथं नामैतस्यापहरेयमथवा साधुर्भवति यद्येतस्यैतन्न भवति। अन्ये त्वाहुरेतद्धनं समभिभवत्यनिष्टचिन्तनं परस्येत्यभिसंबध्नन्ति। परवधोपायचिन्तनं यदि म्रियते तन्ममास्त्विति वा।

ननु च परद्रव्याभिध्यानमीदृशमेवोक्तम्। अनेनैव सिद्धे तदनर्थकं। सामान्यशब्दो ह्ययं। यदनिष्टमनभिप्रेतं परस्य तन्न चिन्तनीयं। धननाशोऽपि परस्य नैवेष्टः। एतद्भयाच्च किंचन परस्येत्येतन्न व्याहरन्ति। अनिष्टं च यत्प्रतिषिद्धं तद्व्याचक्षते। अस्मिन्नपि पक्षे परद्रव्याभिध्यानं प्राधान्यार्थमेव। एवं वितथाभिनिवेशोऽपि। पूर्वपक्षार्थस्य सिद्धान्तत्वेन ग्रहणं विज्ञानवादो विदां प्रामाण्यं "अनात्मता ग्रह" इत्येवमादि। अन्ये तु नित्यनिरामिषद्वेषमाहुः। इयं च त्रिविधाऽकुशला[1] मानसी प्रवृत्तिः। अतोऽन्या कुशला अस्पृहा परद्रव्येषु दया सर्वसत्त्वेषु श्रद्धा धर्मोऽस्तित्वादिषु। तथा च भगवान् व्यासः

"अनभिध्यापरस्वेषु सर्वसत्त्वेषु सौहृदं। धर्मिणां फलमस्तीति त्रिविधं मनसा स्मरेत्" ॥५॥

पारुष्यमनृतं चैव पैशून्यं चापि सर्वशः॥
असंबद्धमलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ ६ ॥

अदत्तानामुपादानं हिंसा चैवाविधानतः॥
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥ ७ ॥

शास्त्रीयाप्राधान्यतयाऽस्यादत्तानामसद्भ्य उपादानं दुष्टं चैव। तथा कुमार्यादिपरदारादावपि विपरीतधर्मोदानं परित्राणमिन्द्रियसंयमश्च। इदं मनोवाग्देहभेदेन दशविधं। प्रवृत्तिकुशलाकुशलविभागेन विंशतिप्रकाराः ॥ ७ ॥

*** मानसं मनसैवायमुपभुंक्ते शुभाशुभम्॥**
वाचा वाचा कृतं कर्म कायेनैव च कायिकम् ॥ ८ ॥

परस्य मनस्तापो येन जन्यते कर्मणा ततो मानसं दुःखमाप्नोतीति केचित्। वयं तु ब्रूमो यत्त्रिविधं मानसमुक्तं ततो मनोदुःखाप्तिः। एवमुत्तरयोरपि ॥ ८ ॥

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः॥
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥ ९ ॥

---

१ ण–र–भूतेषु।

* त्रिविधं च शरीरेण वाचा चैव चतुर्विधम्। मनसा त्रिविधं कर्म दश धर्मपथांस्त्यजेत् ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूयस्त्वाभिप्रायमेतत्। प्रायेणैतासां जातीनामेतानि यथाविभागं निमित्तानि। न त्वयं नियमः तथा महापातकिनां तिर्यक्पर्यटन्तीति वक्ष्यतीति पक्षिमृगग्रहणं तिर्यग्जातिमात्रप्रदर्शनार्थम्। मनोवाक्कायकर्मणामुत्तरोत्तरस्य गुरुत्वप्रदर्शनार्थं परम् ॥ ९ ॥

वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ॥
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥ १० ॥

दमनं दण्डः। वाचो दण्डः पारुष्याप्रवृत्तिरेवमुत्तरयोरपि। **यस्यैते दण्डा बुद्धौ निहिता** नैतन्मया कर्तव्यमिति यो न स्खलति **स त्रिदण्डीत्युच्यते**। न त्वनार्यो गुरुकाष्ठदण्डं धारयति ॥ १० ॥

त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः ॥
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ॥ ११ ॥

त्रयाणां दण्डानां समाहारस्त्रिदण्डं पात्रादिदर्शनादक्रियां भाषणात्। बुद्धौ **निक्षिप्य** बुद्धौ कृत्वा सर्वभूतेष्वघातकत्वं चावस्थितं त्रिदण्डं वा निहितं कामक्रोधयोः संयमः सुसाधुस्ततः **सिद्धिं** मोक्षाख्यां गच्छति प्राप्नोति। आध्यात्मिकत्वोपन्यास उपक्रमोऽयं। कस्य पुनरेषा सिद्धिः कस्य वा न। अत्र विकारकर्मफलानां भोक्तृत्वं भस्मान्तं शरीरं न च ततोऽग्यमुपलभामहे। ते सर्वे धर्माधर्मेष्वधिकारिपुरुषं प्रदर्शयितुकामः प्रारभते ॥ ११ ॥

योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ॥
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥ १२ ॥

अस्य शरीरस्य क्रियां परिस्पन्दात्मिकां क्रियां स्वयं प्रवर्तयिता प्रयत्नवशेनास्य कर्तृत्वं स क्षेत्रज्ञः। **अस्यात्मन** इति समानाधिकरणे षष्ठी। आत्मशब्दस्य शरीरे तस्यापि आत्मार्थत्वात्। **यः करोति** पाणादिलक्षणं तज्जन्यो यः शरीराख्यः कर्ता **स भूतात्मोच्यते** पृथिव्यादिभूतसंघातो जघन्यत्वात् भूतविकार आत्मा भूतात्मा। तथा चोक्तं "द्वावात्मानावन्तरात्मनाशरीरात्मना ॥ १२ ॥"

जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनाम् ॥
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥ १३ ॥

---

१ र-ण-नियता दण्डाः।

* शुभैः प्रयोगैर्देवत्वं व्यामिश्रैर्मानुषो भवेत्। अशुभैः केवलैश्चैव तिर्यग्योनिषु जायते ॥ १ ॥
वाग्दण्डो हन्ति विज्ञानं मनोदण्डः परां गतिम्। कर्मदण्डस्तु लोकांस्त्रीन्हन्यादपरिरक्षितः ॥२॥
वाग्दण्डोऽथ भवेन्मौनं मनोदण्डस्त्वनाशनम्। शारीरस्य हि दण्डस्य प्राणायामो विधीयते ३
त्रिदण्डं धारयेद्योगी शारीरं न तु वैणवम्। वाचिकं कायिकं चैव मानसं च यथाविधि ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किं पुनरयं जीवो नाम यावता क्षेत्रज्ञमेव जीवं मन्यन्ते । द्वौ चात्रोपलभ्येते । शरीरमहंप्रत्ययविज्ञेयश्चान्तरात्मा ततोऽन्यः कश्चिज्जीवो नाम । केचित्तावदाहुः महदभिभूतं सूक्ष्मपरिवेष्टितं लिङ्गं यत्पठ्यते संसरति नानारूपं भोगभावैरधिवासितं लिङ्गमिति येनेति-करणत्वं च वेदनं प्रति तस्योपपद्यते । तद्धि स्थूलभूतानामाश्रयः । तस्यैव शरीराख्यबाह्य-भूताश्रयत्वात् । शरीरे च सत्यात्मनः सुखदुःखभोक्तृत्वमतो येनेति करणविभक्त्योच्यते । अन्ये तु मन्यन्ते अंतःकरणं मनोबुद्ध्यहंकाररूपं जीवस्तस्य चान्तःकरणसंज्ञत्वाद्युक्त एव करणविभक्त्या निर्देशः । अन्तरात्माशब्दश्च तादर्थ्याद्युक्त एव । सहशब्दस्या मोक्षप्राप्तेरा प्रलयाच्च तदपि योगेन ॥ १३ ॥

*तावुभौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च ॥
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥ १४ ॥

उच्चावचेषु बहुविधेषु नानारूपेषु भूतेषु सर्वेषु यः स्थितो व्याप्य तानि भूतानि तिष्ठतः संश्रयतः । अतश्च सर्वकर्मकर्तृत्वं तिष्ठतेरनेकार्थत्वात् । कोऽसावुच्चावचेषु भूतेषु व्याप्य स्थितः परमात्मा चेतनाचेतनजगत्परित्यक्तः परमानन्दरूपः परस्ताच्च प्रतिपादयिष्यते । भूतसंपृक्तौ भूतानि पंचमहान्ति । येन वेदयत इत्युक्तक्षेत्रज्ञस्यात्मन इति । अथाव्याप्त्या-पक्षेऽपि द्वितीयस्थितं तमिति संश्रयणं च तत्कारणत्वात्सर्वस्यास्य जगतः कार्यं च कारणमाश्रयत्यतोऽपेक्षैव संश्रयणं । तथा च भगवान्व्यासः (भ. गी. अ. १५ श्लोक)

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते" ॥

क्षरशब्देन सर्वं चैतदुच्यते । विचारप्रपंचरूपमक्षरं प्रकृतिकरणं । कूटस्थशब्देन कारणरूपतया प्रलयेऽप्यविनाशात । अथवा क्षरं शरीरमक्षरः क्षेत्रज्ञः । कूटस्थत्वं तु तस्या मोक्षप्राप्तेः कर्तृत्वभोक्तृत्वानिवृत्त्या

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" ॥ १४ ॥

असंख्या मूर्तयस्तस्य निष्पतन्ति शरीरतः ॥
उच्चावचानि भूतानि सततं चेष्टयन्ति याः ॥ १५ ॥

मूर्तिशब्देन यावत्किंचिद्भौतिकं कार्यकारणमिति शक्तिश्च तदुच्यते । तदेतत्सर्वं तस्य परमात्मनः शरीरात्प्रादुर्भवति । स्वभाव एव तस्य शरीरं शिलापुत्रकस्य शरीरमिति-वच्छेदेन व्यपदेशः । असंख्या अनन्ताः समुद्रादिवोर्मयो निष्पतन्ति प्रादुर्भवंतीत्युक्तं ।

---

१ ण-र-तौ । २ ण-र-कर्मकर्तृत्वं ।

* उत्तमः पुरुषस्त्वन्यःपरमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताभिः प्रादुर्भूताभिरिदं जगच्चेष्टते सक्रियं भवतीत्यर्थः । शरीरेन्द्रियविज्ञानैर्विना चेष्टाया अभावाच्चेष्टयतीत्युच्यते । अन्ये तु शरीरतः प्रधानं च परमात्मनः शरीरं तदधीनप्रवृत्तित्वात् ॥ १५ ॥

पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम् ॥
शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवम् ॥ १६ ॥

नात्र भूतानि **पंचभ्यो** भूतेभ्योऽन्यच्छरीरं प्रेत्योत्पद्यते । एतदुक्तं भवति । शुक्रशोणितमन्तरेणैव पाञ्चभौतिकं शरीरमुत्पद्यते । **दुष्कृतीनां** च पाञ्चभौतिकं **शरीरं** पुण्यकृतां तु तेजसाऽऽकाशमात्राणि भवन्ति । यथोक्तं " वायुभूतः स्वमूर्तिमान् " इति । **यातना** पीडातिशयः यद्यतिदृढमलौकिकदुःखसहिष्णुः ॥ १६ ॥

तेनानुभूय ता यामीः शरीरेणेह यातनाः ॥
तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः ॥ १७ ॥

यमो नाम देवताविशेषो दुष्कृतिनां निग्रहादिकृत्तद्दृष्टा **यातना** अस्य **ता अनुभूय** छलेन पांचभौतिकेन **शरीरेण** तानि शरीराणि पुनः **प्रलीयन्ते** तासु सूक्ष्मासु **भूतमात्रासु** ॥ १७ ॥

सोऽनुभूयासुखोदर्कान्दोषान्विषयसङ्गजान् ॥
व्यपेतकल्मषोऽभ्येति तावेवोभौ महौजसौ ॥ १८ ॥

विषयसङ्गात्प्रतिषिद्धविषयोपसेवनात्प्रतिषिद्धान् ततः सङ्गाच्च ये जाता दोषाः पापनिर्मिताः । नरकादुःखान्यनुभूय तेन च दुःखोपभोगेन **व्यपेतकल्मषो**ऽपहतपाप्मा चेति । **तावेवोभौ महौजसौ** कावुभौ महाक्षेत्रज्ञाच्च तौ प्रकृतावनन्तरश्लोकेन च क्षेत्रज्ञ एवानुभाविता सुखदुःखयोः स इति च तस्यैव परामर्शोऽतः क्षेत्रज्ञमभ्येतीति प्राप्तं । तच्च विरुद्धं । स एव प्राप्यः प्रापकश्च । सत्यमौपचारिको भेदोऽभिप्रेतः । अभ्येतीत्ययमर्थः । एतावन्मात्रशेषो भवति । यदुत क्षेत्रज्ञतया प्राणादिसंघातमकेन महानिति व्यपदिष्टेन फलेषु तावन्मात्रः परिशिष्यते । लिङ्गजीवश्च क्षेत्रज्ञः । अन्ये तु महत्परमात्मानाविति व्याचक्षते । **सुखोदर्कान्** क्षीणे पाप उत्तरकालं सुखमनुभूयते । प्रतिरंध्रिणि पापे स्वल्पेऽपि न सुखोत्पत्तिः । यथा स्वल्पेऽप्यजीर्णे न भोजनं सुखाय ॥ १८ ॥

तौ धर्मं पश्यतस्तस्य पापं चातन्द्रितौ सह ॥
याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम् ॥ १९ ॥

---

१ ण-र-णीव । २ ण-उपचारितः ।

For Private And Personal Use Only

ननु च यदि तौ महान् क्षेत्रज्ञश्च संबध्येते ततस्तस्य पश्यत इति तस्येति कः संबध्यते। जीव इति केचित् । उक्तं च "स एव क्षेत्रज्ञः स एव जीव" इति । अथ लिङ्गं । ननु च महच्छब्देन तदेवोक्तं अथान्तःकरणं महद्बुद्ध्यादि तत्रापि कः संबन्धो लिङ्गस्य धर्माधर्माभ्यां तद्धि सूक्ष्मं भूतरूपमेव । यथोक्तं "तेषामिदं तु सप्तानाम्" इत्यत्रान्तरे । अतो मन्यामहे यदेवान्यैर्व्याख्यातमस्ति न श्लोके "तावेवोभौ" इति महत्परमात्मानौ बुध्येते इति तदेवमुक्तं पश्यामः । तयोर्हि दृष्टान्त उपपद्यते । महतः करणस्य ततः कर्तृत्वोपचारात् । काष्ठानि पचन्तीति यथा तस्येति च क्षेत्रज्ञस्य परामर्शभेदोपपत्तिः । परमात्मनश्च क्षेत्रज्ञाश्रययोर्धर्माधर्मयोर्दृष्टान्तवचनं सर्वस्य सुखदुःखोपभोगस्य तदधीनताख्यापनार्थं । यथोक्तं । "ईश्वरप्रेरितो गच्छेत्स्वर्गं वाश्वभ्रमेव वा" । प्रेरणा च धर्माधर्मनियमितेच्छैव । ननु च धर्माधर्मयोरिच्छां प्रति नियन्तृत्व ऐश्वर्यं हीयते । तथा **शारीरके** दर्शितं यथेह राजा सेवानुरूपं ददाति न च तस्येश्वरत्वमपैत्यतो महत्परमात्मानौ पश्यत इति व्यपदिश्यते। **तस्येति** क्षेत्रज्ञज्ञानं तदप्ययुक्तमुत्तरग्रन्थविरोधात् । **याभ्यां प्राप्नोति संपृक्त इति** । न हि परमात्मना कस्यचित्संपर्कः संबन्ध उच्यते । न च परमात्मना कश्चित्संबन्धोऽपि। एवं तर्ह्यथ याम्यामिति नैवं महत्परमात्मानौ संबध्येते । किं तर्हि । धर्मः पापं च । तयोरपि प्रकृतत्वात् । **तौ धर्मं पश्यतस्तस्य पापं चेति** । यदि महच्छब्देनान्तःकरणमुच्यते सुतरामनुपपत्तिः । न हि परमात्मनो द्रष्टृत्वे करणापेक्षा । अधिकरणमेव हि बोधिपरमात्मस्वरूपमभ्येति "तावेव चोभाविति" । कीदृशमेतदभिगमनं यदि तद्भावापत्तिः । सा नैव कल्मषव्यपायमात्रसाध्या । अथ तत्प्राप्तिप्रवणभासाऽपि नैव प्रलीनेषु भूतेष्वशरीरस्य भवति । तस्मात्तौ धर्मं पश्यतस्तस्य तस्यैवात्मन इति पूर्ववन्नेयम् ॥ १९ ॥

यद्याचरति धर्मं स प्रायशोऽधर्ममल्पशः ॥
तैरेव चावृतो भूतैः स्वर्गे सुखमुपाश्नुते ॥ २०

प्रायशो बाहुल्येन **तैरेव भूतैर्महदादिभिर्महाभूतपर्यन्तैः स्वर्गे सुखमाप्नोति** ॥ २० ॥

यदि तु प्रायशोऽधर्मं सेवते धर्ममल्पशः ॥
तैर्भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः ॥ २१ ॥

ननु च पंचभ्य एव मात्राभ्यः **शरीरं** दुष्कृतिनामित्युक्तं किमिदानीमुच्यते **तैर्भूतैः परित्यक्त इति** । उच्यते । न भौतिकं शरीरं नाप्यशरीरस्य यातनाः । किं तर्हि अत्यन्तविलक्षणे ते मानुषशरीरेऽतोन्यान्येतानि मृदुस्निग्धसुकुमारशरीरारंभकाण्यत्यन्त-

---

१ प्रकरणं । २ फ- ण-मुप । ३ ण-उक्तं । ४ ण-करणा । ५ ण-व्यक्तमिति ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विलक्षणा[1]दुःखाभिघातनिष्कृत्यापरित्यक्त उच्यते । यानि स्वर्गशरीराणि भक्ष्याणि तैः परित्यक्तः ॥ २१ ॥

यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः ॥
तान्येव पञ्चभूतानि पुनरप्येति भागशः ॥ २२ ॥

प्राप्त्याख्यातोऽयं । एतच्चान्यश्लोकचतुष्टयस्य तात्पर्यं । यदि भूयानधर्मस्तदा याम्यो यातनाः । न तु स्वल्पेऽधर्मेऽस्मिन्नेव लोके सुखानुभवेन स्वर्गावाप्तिः ॥ २२ ॥

एता दृष्ट्वाऽस्य जीवस्य गतीः स्वेनैव चेतसा ॥
धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः ॥ २३ ॥

स्वल्पार्थोऽयं । धर्मतोऽधर्मत इति नञःप्रश्लेषः । धर्माधर्मनिमित्ताज्जीवस्य क्षेत्रज्ञस्यात्मनः स्वेनैव चेतसा शास्त्रप्रामाण्यात्तदनुभवे कृत्स्नशास्त्रार्थफलोपसंहारः ॥२३॥

सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् ॥
यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः ॥ २४ ॥

धर्माधर्मयोः कर्मकाण्डोपयोगि यत्तदुक्तं । इदानीं विद्याकाण्डमारिप्सते । तत्र द्वैताश्रयमिव तावदंगार्थं प्रक्रियते । सत्वादयस्त्रयो गुणा आत्मनः[2] । नात्रात्मा जीवः । किं तर्हि **महानेव** । **आत्मशब्दः** स्वभाववचनो न प्रत्यक्त्ववचनः । निर्गुणो हि पुरुषः । अथवा भोग्यतया भोक्तुरेवात्मनः संबन्धित्वेन व्यपदिश्यते । महानिति च प्रधानमेवोच्यते । प्रत्यासत्तेः । आद्या हि विक्रियोद्भूतिः प्रधानस्य महदाख्या यथा जीवन्त्यौ प्रमावस्था वाप्यत्र भवान् विकारानवस्थितः । प्रकृतित्वात्सर्वविकाराणामिदमुच्यते ॥ २४ ॥

यो यदैषां गुणो देहे साकल्येनातिरिच्यते ॥
स तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥ २५ ॥

यद्यपि सर्वं त्रिगुणं तथापि **यो यदा गुणः साकल्येन** कार्त्स्न्येनातिरिच्यत आधिक्यं प्राप्नोति पूर्वकर्मातिशयवशात्स तदा पुरुषस्य गुणान्तरमभिभवति । अतः शरीरी तद्गुणप्रायो भवति । तदीयमेव धर्ममादर्शयति । गुणान्तरं जहातीव ॥ २५ ॥

सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम् ॥
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥ २६ ॥

सामान्यमेतदेषां लक्षणं व्यापि सर्वप्राणिषु ज्ञानं वेदकं **अज्ञानं** मोहः । उभयरूपता **रजः** । रागद्वेषशब्देनोभयधर्मयोग उच्यते । न यया मदमूर्च्छाद्यवस्थास्वचैतन्यमेव नापि सम्यक्ज्ञान[3]वशानामतिशयेन क्रोधो न चातिप्रसादः । तत्तद्रजो वपुःस्वभावः ॥२६॥

---

१ ण—णात् । दुःखाभिघातानि हि श्रुत्वात् परि । २ ण—आत्मानः । ३ ण—ज्ञानं यशानातिशयेन क्रुद्धो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ॥
प्रशान्तमिव शुद्धाभं सत्त्वं तदुपधारयेत् ॥ २७ ॥

प्रीतिसंयुक्तं संवेदनं शुद्धाभं शुद्धमिवाभाति रजस्तमोभ्यामकलुषितं मदमानरागद्वेषलोभमोहभयशोकमात्सर्यदोषरहितं एवं सर्वमनुच्छेदाद्बीजवासनाया आ ब्रह्मप्राप्तिस्थितत्वादेषा चावस्था स्वसंवेद्यैव कस्यां वेलायां भवेत् ॥ २७ ॥

यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः ॥
तद्रजोऽप्रतिपं विद्यात्सततं हारि देहिनाम् ॥ २८ ॥

दुःखेन समायुक्तं संभिन्नं शुद्धं प्रीतिरूपं न भवत्यत उच्यतेऽप्रीतिकरं दुःखानुविद्धतया प्रीत्या न युक्तं अप्रतिपमप्रत्यक्षं पारमार्थिकमेतद्रजसो रूपं भर्तृविषयेषु प्रवर्तकं स्पृहाजनकमित्यर्थः ॥ २८ ॥

यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकम् ॥
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ २९ ॥

मोहो वैचित्यं युक्तायुक्तविवेकाभावः । विषय आत्मा स्वभावो यस्य । ननु चायमविषयोऽन्तरात्मत्वादेव । तत्कथं विषयस्वभावो मोहविषयानुरागात् बुद्धिरिव एवमुच्यते । विषयाद्बाऽतीव बुद्धिस्तदात्मिका संपद्यत इति संख्यात्रैगुण्यं न त्वन्तर्बहिःसत्त्वानामविशब्दं । अप्रतर्क्यं तदनुमानगोचरमविज्ञेयं अंतर्बहिःकरणानामगोचर इत्यर्थः ॥ २९ ॥

त्रयाणामपि चैतेषां गुणानां यः फलोदयः ॥
अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥ ३० ॥

त्रयाणामेषामासेव्यमानानां यत्फलमुत्पद्यत उत्तमाधममध्यमं तद्वक्तव्यतया प्रतिज्ञायते । यस्मिन् गुण उद्रिक्ते यः पुरुषस्य स्वभावो भवति स उच्यत इति प्रतिज्ञा॥३०॥

वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ॥
धर्मक्रियाऽऽत्मचिन्ता च सात्विकं गुणलक्षणम् ॥ ३१ ॥

तत्कस्येति संबन्धगुणलक्षणमित्येवं वक्तव्यतया प्रतिज्ञायते सात्विकमिति कथंचिद्योजयितव्यं । गुणो लक्ष्यते येन तद्गुणलक्षणं तत्कस्येति सात्विकमिति संबन्धः । प्रयोजनं समुदायसम्बन्ध्यवयवा अपि दृश्यन्ते । तेनैतदुक्तं भवति । सम्बन्धस्य गुणस्यैतल्लक्षणं । यथा देवदत्तस्य गुरुकुलं गुरुद्वारोपसर्जनीभूतोऽपि देवदत्तपदेन संम्बध्यते तद्वदेतत् द्रष्टव्यम् । पदार्थी व्याख्याताः ॥ ३१ ॥

आरम्भरुचिताऽधैर्यमसत्कार्यपरिग्रहः ॥
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥ ३२ ॥

१ ग-मिव । २ ग-राज्ञा लक्षणम् ।

For Private And Personal Use Only

कर्मणां काम्यानां दृष्टार्थानामदृष्टार्थानां चारंभे रतिर्वृथारंभश्चैतत् [1]राजसं लक्षणम् । अधैर्यमल्पेऽप्युपघातहेतौ चेतसोऽसमाश्वासो दैन्यग्रहणमुत्साहत्यागः । असत्कार्यं लोकशास्त्रविरुद्धं तस्य परिग्रह आचरणम् । विषये संगोऽजस्रं पुनः पुनः प्रवृत्तिः ॥ ३२ ॥

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ॥
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥ ३३ ॥

धनादिषु रागो लोभः । क्रौर्यं स्वल्पेऽपराधे वैरानुबन्धः । नास्तिक्यं प्रमादता । भिन्नवृत्तिता शीलभ्रंशः । गणनं शिष्टविगर्हणा । याचिष्णुता याचकत्वं तच्छीलता । प्रमादोऽनवधानं धर्मादिष्वपायपरिहारेऽनादरः । स्वप्नोऽधृतिरिति नञ्प्रश्लेषः ॥ ३३ ॥

त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम् ॥
इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ॥ ३४ ॥

त्रिषु कालेषु साम्योपचयापचयेषु वोत्तमाधममध्यमेषु च फलोदयेष्विदमिति वक्ष्यमाणस्य निर्देशः ॥ ३४ ॥

यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति ॥
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥ ३५ ॥

यदुक्तं त्रिष्विति कालनिर्देशस्तद्दर्शयति । कृत्वा कुर्वन् करिष्यन्निति च । कदाचित्त्रिष्वपि कालेषु कदाचिदन्यतरस्मिन् । किमर्थमहमेवमकरवं कथं शिष्टानामग्रतो भवामीति लज्जा चेतसि परिखेदः ॥ ३५ ॥

येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम् ॥
न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसम् ॥ ३६ ॥

लोके साधुवादो ममैवं स्यादिति बुद्ध्या यद्यागतपोधनानामाचरणं तच्च ख्यापनार्थम् । यथा तीर्थकालेभ्यो दानं राजनि स्पर्धया जल्पः शूद्रेभ्यः शास्त्रव्याख्यानं पुष्कलमित्यनेनानुषंगित्वात्ख्यातेः सहायतामाह । धर्मार्थे प्रवर्तमानस्य यदि जनाः प्रकाशयन्ति तादृशो धर्मो न दोषाय । तदुक्तं यथेक्षुहेतोरिति । यथा महाभारताख्याने कृष्णद्वैपायनेनोक्तं

" यथेक्षुसक्तो युधि कर्षकोऽस्ति । तृणानि वल्लीरपि संचरन्ते ॥
" तथा नरो धर्मपथेन संचरन् । यशश्च कामांश्च वसूनि चाश्नुते ॥ "

असंपत्तौ च कर्मफलानां न शोचति न दुःखमस्ति । अथवा कर्मणामसंपत्तौ ॥ ३६ ॥

---

१ ण—राक्षा लक्षणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् ॥
येन तुष्यति चात्माऽस्य तत्सत्वगुणलक्षणम् ॥ ३७ ॥

विस्पष्टोऽयम् ॥ ३७ ॥

तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते ॥
सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ॥ ३८ ॥

ननु च कामेऽपि सुखमस्ति । तत्र यत्प्रीतिसंयुक्तं तत्सत्त्वलक्षणमिति प्राप्तं । कथं तमसो लक्षणं । उच्यते । मोहरूपं तमोऽत्र संवेदनमस्ति । तदपि सत्वस्यैव लक्षणं " सत्यं ज्ञानम् " इत्युक्तत्वात् । उच्यते । नात्र भोक्तृभोग्यभावावस्थाभिप्रेता । किं तर्हि ? विषयगतस्पृहातिशयः । न च तस्यामवस्थायां सुखोत्पत्तिरव्यक्तविषयत्वं च विद्यते कामप्रधानस्य युक्तायुक्तविवेकशून्यत्वादस्त्येव मोहरूपता । ईदृशश्चात्र कामोऽभिप्रेतः । न यदृतौ शास्त्रार्थतया स्वदारेषु गमनौत्सुक्यम् ॥ ३८ ॥

येन यस्तु गुणेनैषां संसारान्प्रतिपद्यते ॥
तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ॥ ३९ ॥

एषां गुणानां मध्ये **येन गुणेन यान् संसारान्** पुरुषः **प्रतिपद्यते** । संसारशब्दो गतिवचनः । यानि जन्मानि प्राप्नोतीत्यर्थः । तदुत्तरत्र वक्ष्यत इति प्रतिज्ञाश्लोकः ॥ ३९ ॥

देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः ॥
तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥ ४० ॥

सामान्येन गतिनिर्देशो गुणनिमित्तोऽयम् ॥ ४० ॥

त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः ॥
अधमा मध्यमाग्र्या[1] च कर्मविद्याविशेषतः[3] ॥ ४१ ॥

एषा[2] त्रिविधा गौणिकी सत्त्वादिगुणप्रयुक्ता प्रत्येकं पुनः त्रिविधोत्तमाधम-मध्यमभेदेनातो नवधा संपद्यते । कर्मविद्याविशेषाच्चानन्ताः कुशलाकुशलकर्मवशात् । बुद्धिपूर्वप्रयोगश्च कर्मणां च बहुभेदत्वात्तदिदमाह **कर्मविद्याविशेषत** इति ॥ ४१ ॥

स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः ॥
पशवश्च मृगाश्चैव जघन्या तामसी गतिः ॥ ४२ ॥

हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः ॥
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ॥ ४३ ॥

चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः ॥
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ॥ ४४ ॥

---

१ ण–मध्यात् । २ ण–एषां । ३ ण–विशिष्यतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारणाः कथकगायकस्त्रीसंयोजकादयः। **सुपर्णाः** पक्षिविशेषाः। **शूद्रा** गर्हिता इति संबन्धः। ये ब्राह्मणानवजानते ये च तद्वृत्त्युपजीविनो ये च मदमानादियुक्ता हिंस्राश्चौरा इत्येवमादयो विगर्हिताः ॥ ४४ ॥

झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः ॥
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥ ४५ ॥

झल्ला मल्ला इति रङ्गावतारकास्तत्र मल्ला बाहुयोधिनः। झल्ला यष्टिप्रहारिणः परिहासजीविनो ॥ ४५ ॥

राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः ॥
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥ ४६ ॥

राजानो जनपदेश्वराः। **क्षत्रियास्**तदनुजीविनः सामन्ताः। **वादप्रधानाः** शास्त्रार्थगहनेष्वितरेतरं जल्पन्ति। **युद्धप्रधाना** योधकाः ॥ ४६ ॥

गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये ॥
तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः ॥ ४७ ॥

गन्धर्वादयो देवास्तेषामर्थवादेतिहासेभ्यो भेदो विज्ञेयः। **विबुधा** देवास्तेषा**मनुचराः** सिद्धविद्याधरादयः ॥ ४७ ॥

तापसा यतयो विप्रा ये च वैमानिका गणाः ॥
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥ ४८ ॥

तापसास्तपःप्रधाना वानप्रस्थादयः। **यतयः** परिव्राजकादयः। अनेन च ज्ञापयति न केवलं जन्मोपपत्तिर्गतिजातस्य कर्माचरणादपि। यतो न तापसादयः कतिचिज्जातिविशेषाः किं तर्हि कर्मनिमित्ता एते व्यपदेशाः। अन्ये तु मन्यन्ते। सन्ति मेरुनिवासिनः केचिज्जनपदा यतयो नाम श्रूयन्ते "इन्द्रो यतीन्सालावृकेभ्यः प्रायच्छदिति"। विमानानि यानविशेषाः पुष्पकादयस्तैश्चरन्ति **वैमानिकाः**। अन्तरिक्षचराः केचिद्देवयोनयः। प्रथमा निकृष्टाः ॥ ४८ ॥

यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः ॥
पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥ ४९ ॥

आनुपूर्वीविशिष्टः शब्दो वेदः। ननु च गत्यधिकारे कः प्रसंगोऽचेतनानां। अचेतनाश्च शब्दादयः। अत्यल्पमिदमुच्यते शब्दादयोऽचेतना इति। सर्व एवैते देवादयः स्थावरान्ताः शरीरात्मानः। तत्र सर्वशरीराणामचेतनादितच्छक्तिः केवलं पुरुषादिचैतन्यरूपिणी प्राप्यते। निर्गुणश्च पुरुषस्तदधिष्ठितानि शरीराण्यचेतनान्यपि

---

१ ण–पुरुषाश्च कुवृत्तयः। २ ण–पत्तिगतिजातस्य। ३ ण– + वत्सरः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चेतनान्युच्यन्ते । अत एतदुक्तं भवति । सत्त्वप्रधानो वेदस्तदभ्यासात्सात्त्विकी गतिः प्राप्यते । न पुनः सत्त्वप्रधानस्य वेदत्वप्राप्तिः सात्त्विकी गतिरुच्यते । अन्येषां तु प्रदर्शनं सर्वक्षेत्रज्ञाः सन्त्यधिष्ठातारो वेदपुरुषा वारुणे लोके श्रूयन्ते ॥ ४९ ॥

ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च ॥
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥ ५० ॥

विश्वसृजो मरीच्यादयः प्रजापतयः । **धर्मो** वेदार्थः । पूर्वं वेदस्वरूपमुक्तमिदानीं तदर्थः स्वरूपार्थः प्रधानतर इत्युक्तं भवति । अथवा धर्मादेश्च विग्रहवत्त्वं पूर्ववद्द्रष्टव्यं । **महानिति** संज्ञांतरं । **अव्यक्तं** प्रधानं कृतिरित्येकोऽर्थः । ननु च सत्त्वाधिक्ये प्रधानस्य तद्विकारत्वाज्जगतः सर्वेषां विकाराणां सत्त्वाधिक्यं प्राप्तं । ततश्च रजस्तमसो कुतोऽतिरेकः । अतो यदुक्तं "यो यदेषां गुणो देहे साकल्येनातिरिच्यत" इति तदनुपपन्नं । उच्यते । नैतदेव परं प्रधानरूपता प्राप्या किं तर्हि ये ये प्रकाराः सन्ति यदि प्राप्यो व्यक्तिभावो यदि वाऽदृष्टविधिर्यदि वा नैवायं संख्येयः प्रधानेऽव्यक्तशब्दो वर्तते क्रियानिमित्तो ह्ययं नास्य व्यक्तिर्विद्यत इति अस्फुटप्रकाशत्वादव्यक्तं । तथा च परमात्मनि वृत्तिर्भवति । महत्त्वं च तस्य विभुत्वादुपपद्यत एव । ननु च नैवास्य सात्त्विकी गतिः । अगुणत्यागा चाप्येवं । यदा हि नाहं न मम किंचिदिति मुक्ताहंकारममकारो भवति तदा ब्रह्मता भवतीति विज्ञायते । निदिध्यासनयैव ब्रह्मप्राप्तिः । किन्तु सत्त्वप्रधाना एव ज्ञानादितत्परा भवन्ति । न तामसी राजसी चेति । एवं कृत्वोच्यत " उत्तमा सात्त्विकी गतिः "। अन्यौ पक्षावनुपपन्नौ । न हि प्रधानभावं प्राप्य काचित्पुरुषार्थसिद्धिः । अचेतनं हि तव्द्यपदिशन्त्यचैतन्यं स्थावरेभ्योऽपि यदधीना हि मदमूर्च्छावस्थाः केचिदर्थयन्ते । दृष्टविधिस्तु नैव संभवत्यश्रुतत्वात् " आत्मा वारे द्रष्टव्य " इति (बृहदारण्यके अ० २ ब्रा० ६) श्रुतितः प्रधानं द्रष्टव्यमिति तस्मात्परमात्मविषयावेव महानव्यक्त इत्येतौ शब्दौ ॥ ५० ॥

एष सर्वः समुद्दिष्टस्त्रिःप्रकारस्य कर्मणः ॥
त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥ ५१ ॥

त्रिःप्रकारस्य वाङ्मनःकायसाधनस्य **त्रिविधः** सत्त्वादिगुणभेदेन पुनस्त्रिविधः उत्तमादिविशेषतो या अप्यत्र गतयो विशेषतोऽनुक्तास्ता अप्युक्तसादृश्यादन्तर्भावनीयाः गुणप्रकरणोपसंहार उत्तरोऽपि श्लोको वक्ष्यमाणसूचकः ॥ ५१ ॥

इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च ॥
पापान्संयान्ति संसारानविद्वांसो नराधमाः ॥ ५२ ॥

---

१ ग–सम्भवन्ति । २ ग–प्रवृत्तो भवति । ३ ग–धर्मः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इंद्रियसंगोऽप्रतिषिद्धसेवनप्रदर्शनार्थः । असेवेनं धर्मस्य शिष्टाकरणं । एतश्चाविदुषां भवत्यत आह्नाविद्वांसो त एव नराधमाः । अतश्च परमात् संसारात् कुत्सितानि जन्मस्थानानि संयान्ति प्राप्नुवन्ति । तत्र प्रसिद्ध एव तावत्कर्मविपाकः प्रचक्ष्यते॥ ९२॥

यां यां योनिं तु जीवोऽयं येन येनेह कर्मणा ॥
क्रमशो याति लोकेऽस्मिस्तत्तत्सर्वं निबोधत ॥ ५३ ॥
बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात् ॥
संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥ ५४ ॥

घोरान्नरकान् दुःखप्रसहनव्यथया घोरा यातनास्थानानि नारकान् तत्क्षणादुद्भूतरूपस्य कर्मणः फलोपभोगेन क्षयं तत ईषदवशिष्टे कर्मणि संसारप्रतिपत्तिः । कथं पुनः सर्वकर्म तत्रैव न भुज्यते । उक्तं । इंद्रियस्य कर्मणो नरकफलं नोपशान्तस्य कार्यविरोधित्वाच्च कर्मणां फलेनोपशमः । तत्र यथैव च ज्वलितस्याग्नेरुदर्चिषो दाहो विनियोगस्तपश्चादंभ एव स्थितस्यैवं नरकेष्वपि द्रष्टव्यं । अग्नेस्तु द्वे अवस्थे भवतः । प्रशान्तता ज्वाला च । नरकस्तु एकरूप एव सर्वदा । उदर्चिष इवाग्नयः कर्माणि चोपचयापचयवन्त्यत उपचितस्य कर्मणो नरकोऽपचीयमानस्य ततोऽन्यत्रोपभुक्तिः तत्र युक्तं ततः शेषेणेति ॥९४॥

श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् ॥
चण्डालपुक्कसानां च ब्रह्महा योनिमृच्छति ॥ ५५ ॥
कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम् ॥
हिंस्राणां चैव सत्वानां सुरापो ब्राह्मणो व्रजेत् ॥ ९६ ॥

विड्भुजा वायसादयः । हिंस्राणां व्याघ्रादीनाम् ॥ ९६ ॥

लूताहिसरटानांच तिरश्चां चाम्बुचारिणाम् ।
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥ ५७ ॥
तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि ॥
क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः ॥ ५८ ॥

क्रूरकर्मकृताः परवधशीलाः ॥ ९८ ॥

हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षिणः ॥
परस्परादिनः स्तेनाः प्रेताऽन्त्यस्त्रीनिषेविणः ॥ ५९ ॥

क्रव्यादा गृध्राद्यः । अमेध्यभक्षिणः कृमयः परस्परमदन्ति । यथा महामार्जारो मार्जारं महामत्स्यः सूक्ष्मं मत्स्यं नैकभेदमिव अन्त्यस्त्रीनिषेविणो बर्बरादयः ॥ ९९ ॥

---

१ ण–संगम अप्रतिषिद्ध–। २ ण–पापात् । ३ विनियोगतपश्चादंगारावस्थितस्य पवनरकेष्वपि द्रष्टव्यम् ।

For Private And Personal Use Only

संयोगं पतितैर्गत्वा परस्यैव च योषितम् ॥
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥ ६० ॥
मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः ॥
विविधानि च रत्नानि जायते हेमकर्तृषु ॥ ६१ ॥

हेमकर्तारः पक्षिणः ॥ ६१ ॥

धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः ॥
मधुदंशः पयः काको रसं श्वा नकुलो घृतम् ॥ ६२ ॥

आखुः मूषकः ६२ ॥

मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः ॥
चीरीवाकस्तु लवणं बलाका शकुनिर्दधि ॥ ६३ ॥
कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः ॥
कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम् ॥ ६४ ॥

दर्दुरः मंडूकस्तोकः ॥ ६४ ॥

छुच्छुन्दरीः शुभान्गन्धान्पत्रशाकं तु बर्हिणः ॥
श्वाविस्कृतान्नं विविधमकृतान्नं तु शल्यकः ॥ ६५ ॥

बर्हिणो मयूराः ॥ ६५ ॥

बको भवति हृत्वाऽग्निं गृहकारी ह्युपस्करम् ॥
रक्तानि हृत्वा वासांसि जायते जीवजीवकः ॥ ६६ ॥
वृको मृगेभं व्याघ्रोऽश्वं फलमूलं तु मर्कटः ॥
स्त्रीमृक्षः स्तोकको वारि यानान्युष्ट्रः पशूनजः ॥ ६७ ॥

जलं प्लव इत्यत्र पानार्थमुदकं ज्ञेयं । स्तोकको वारीत्यत्र धान्यसेकाद्यर्थं रसश्चाद्यं रसमाहुर्यदि वाऽतिरिक्तौषधादि द्रष्टव्यम् ॥ ६७ ॥

यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ॥
अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥ ६८ ॥

नात्र तिरोहितमिव किंचिदस्ति ॥ ६८ ॥

स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः ॥
एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ॥ ६९ ॥
स्वेभ्यः स्वेभ्यस्तु कर्मभ्यश्च्युता वर्णा ह्यनापदि ॥
पापान्संसृत्य संसारान्प्रेष्यतां यान्ति दस्युषु ॥ ७० ॥

---

१ ण-शत्रुषु ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणोऽध्यापनादिजीविकाकर्मत्यागेन यदि क्षत्रियादिवृत्तिमुपजीवेत् एवं क्षत्रियादयः **स्वकर्मच्युताः पापान् संसारान्** तिर्यग्योनीरनुभूय मनुष्यत्वे जाता **दस्युषु** चौरादिहिंस्रादिषु भृत्यभावं प्राप्नुवन्ति । **अनापदी**त्यनुवादः । आपदि विहितत्वाद्दोषाभावः ॥ ७० ॥

वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः ॥
अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ॥ ७१ ॥

स्वकर्मच्युतानां पापगतयः प्रदर्श्यन्ते । **वान्तमश्नाति** उल्कया चास्यं मुखं दह्यते । **कुणपः** शवशरीरं । **कूटपूतनः** कुत्सितगंधा नासिकाऽस्य भवति । कटपूतन इति वा पाठः । प्रकटः पूतनो नाम पिशाचादिः स तु कश्चिददृश्यो भूतविशेषः श्मशानिकभूमिसेवी ॥ ७१ ॥

मैत्राक्षिज्योतिकः प्रेतो वैश्यो भवति पूयभुक् ॥
चैलाशकश्च भवति शूद्रो धर्मात्स्वकाच्च्युतः ॥ ७२ ॥

मैत्राक्षिज्योतिकं इति शब्दान्तरं पिशाचवचनं पूर्ववत् । अथवा मैत्रास्ये ज्योतिर्दृष्टावपीति मैत्रमंगं पायुः तदक्षिविवरं छिद्रम् । अन्ये तूलूकमाहुः । मैत्रमादित्यलोकः । अक्षं ज्योतिः ऐन्द्रियकं दर्शनं स ह्यादित्याल्लोके न पश्यति ॥ ७२ ॥

यथा यथा निषेवन्ते विषयान् विषयात्मकाः ॥
तथा तथा कुशलता तेषां तेषूपजायते ॥ ७३ ॥

भेदग्रहगृहीतानां पुत्रदाराभिष्वंगधनादिलोभे विषयसुखगंधमात्मैकत्वपरिपन्थिविद्याप्रतिपक्षभूतं निवर्तयितुं संसारस्वरूपं मानुष्यकं जन्म यथास्थितमनूद्यते सर्वस्य प्रसिद्धं यथा यथा विषयेष्वभ्यासेन प्रवर्तन्ते । **विषयात्मका** विषयलालसाः । आत्मशब्देन प्रवृत्तस्य स्यात्तत्स्वभावतयैव भवतीत्याहुः । यस्तु कथंचित्सहितं भुंक्ते तस्य भोगादिना तत्स्मृत्युपपत्तावभिलाषो जायते । यस्त्वत्यन्तमेवाधरः स तद्भावनया तदात्मत्वे च संपद्यते । तदिदमाह **तथा तथा कुशलतेति** कुशलतापदं चैकरसीभावोऽतश्च स न शक्नोति विषयान्परिहर्तुं । ईदृश्येव प्रवृत्तिरशिष्टप्रतिषिद्धेष्वपि । स्वदारगमनादिष्वागमार्जितद्रव्योपपादकेन भोज्याविशेषेष्वपि प्रतिषिद्धा ॥ ७३ ॥

तेऽभ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः ॥
संप्राप्नुवन्ति दुःखानि तासु तास्विह योनिषु ॥ ७४ ॥

ततश्च **तेषां पापानां** प्रतिषिद्धानां कर्मणामभ्यासात् "निन्दितकर्माभ्यासे पतनमिति" तद्वत्तु **दुःखानि** पश्यन्ति । **तासु तासु** कृमिकीटादियोनिषु ॥ ७४ ॥

---

१ ण–चौर हिंसादिषु । २ ण–तु । ३ ण–कमिति । ४ ण–विषयैषिणः । ५ फ–स्मि । ६ ण–पादिकेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तामिस्रादिषु चोग्रेषु नरकेषु विवर्तनम् ॥
असिपत्रवनादीनि बन्धनच्छेदनानि च ॥ ७५ ॥

"तामिस्रमन्धतामिस्रम्" इत्याद्याः प्रागुक्ता नरकाः । तत्र विवर्तनमेकेन पार्श्वेनासित्वा पार्श्वान्तरेणावर्तनं अबद्धस्योत्तानस्य वा खड्गधारानिशितपत्रैर्वृक्षैर्बन्धनं भूमिष्ठैर्वा पत्रैरेव कदलीदलखंडवत् । तथाविधैर्मैत्री दुष्कृतिनामंगच्छेदप्राप्तिः ॥ ७५ ॥

विविधाश्चैव संपीडाः काकोलूकैश्च भक्षणम् ॥
करम्भवालुकातापान्कुंभीपाकांश्च दारुणान् ॥ ७६ ॥

करंभः कर्दमः । कुंभीषु प्रक्षिप्तास्ते हि तापेनाऽऽग्नेयेनान्नादिवत्पच्यन्ते ॥ ७६ ॥

संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः ॥
शीतातपाभिघातांश्च विविधानि भयानि च ॥ ७७ ॥

वियोनयः तिर्यक्प्रेतपिशाचादयः । तत्र संभवो जन्म दुःखबहुलासु ॥ ७७ ॥

असकृद्गर्भवासेषु वासं जन्म च दारुणम् ॥
बन्धनानि च काष्ठानि परप्रेष्यत्वमेव च ॥ ७८ ॥

स्पष्टार्थः ॥ ७८ ॥

बन्धुप्रियवियोगांश्च संवासं चैव दुर्जनैः ॥
द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनम् ॥ ७९ ॥

जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनम् ॥
क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयम् ॥ ८० ॥

एतावप्युक्तार्थौ ॥ ७९ ॥ ८० ॥

यादृशेन तु भावेन यद्यत्कर्म निषेवते ॥
तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ८१ ॥

सात्त्विकेन राजसेन तामसेन वा भावेन यद्यत्कर्म निषेवते सात्त्विकं राजसं तामसं वा शरीरेण तादृशेनेत्यर्थः । सत्त्वबहुलेन रजोबहुलेन तमोबहुलेन वा तत्तत्फलमुपाश्नुते । सात्त्विकं राजसं तामसं वा यतश्चैतदेवं रजस्तमोबहुलात् कर्मणोऽकुशलसंकल्पहेतोरनिष्टफलप्राप्तिः । अतस्तत्परिवर्जनेन कुशलसंकल्पकर्मणा भवितव्यम् ॥ ८१ ॥

एष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः ॥
नैःश्रेयसकरं कर्म विप्रस्येदं निबोधत ॥ ८२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिषिद्धानां च कर्मणां यावत्फलोत्पत्तिस्तानि समुपदिष्टानि ततो वर्तितव्यम् । यतो दुःखानुबन्धी विषयसुखोपभोगोऽस्तस्ततो निवर्तन्ते । श्रेयसे कर्मविधौ मोक्षोपाये वक्ष्यमाणविद्याकाण्ड उपदिष्टे स्यातव्यं तदिदानीं वक्ष्यामः ॥ ८२ ॥

वेदाभ्यासस्तपोज्ञानमिन्द्रियाणां च संयमः ॥
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥ ८३ ॥

निःश्रेयसशब्देन न पुनः पुरुषार्थसिद्धिरुच्यते । अपि तु निश्चितसुखदुःखानुबन्धः प्रीतिविशेषोऽपि । वेदाभ्यासादीनां तत्र तत्रोक्तानां पुनर्वचनमात्मज्ञानस्तुत्यर्थं । ज्ञानं वेदार्थविषयं । उक्तार्थान्यन्यानि पदानि ॥ ८३ ॥

सर्वेषामपि चैतेषां शुभानामिह कर्मणाम् ॥
किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ॥ ८४ ॥
सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ॥
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥ ८५ ॥

द्विविधमात्मज्ञानं देहेंद्रियबुद्ध्यादिव्यतिरिक्तस्य कर्तृभोक्तृत्वोपपत्तिरूपस्य । अहंप्रत्ययप्रमेयतयाऽऽत्मनि विषयप्रतीत्यन्तर्गतस्य जीवक्षेत्रज्ञविज्ञानात्मादिपर्यायस्य शरीरनाशेऽप्यनष्टानां कर्मफलानामौर्ध्वदेहिकानां भोक्तृत्वज्ञानं अपरं सर्वस्य जगतो जन्मादीनां परमात्मैककारणत्वे नित्यस्य सत एकस्याविद्यावासनोपहितनानारूपस्य तिर्यक्मनुष्यादिष्वेकत्वदर्शनं । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" (बृहदारण्यके अ. २ ब्रा. ५) इत्येवमादिश्रुतिभिरुपदर्शितस्वरूपस्य ज्ञानं । तत्र क्षेत्रज्ञपरिज्ञानं कर्मविधिपूपयुज्यते । असति हि देहादिव्यतिरिक्तेऽस्मिन्नौर्ध्वदेहिकानां भोक्तरि फलानां स्वर्गकामादिचोदना अनर्थिकाः स्युरतस्तत्र न कश्चित्प्रवर्तेतातस्तत्कर्मानुष्ठानोपयोगि । यत्तु परमात्मैकत्वज्ञानतिरोधानोपसेनाभ्याससामर्थ्येनोपपद्यमानं शुद्धबुद्धमुक्तानन्दनित्याविनश्वरभावस्यात्मनः प्रकाशनं तत्रेदमुपपद्यते । तदग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं तत इति । अमृतं ततः गतेर्व्याप्ति तत इति विद्यानिर्देश आत्मविद्यार्थाः क्षेत्रज्ञज्ञानं तु कर्मोपकारकत्वादमृतत्वाय कल्पते । अतो वेदान्तोपदिष्टस्य समस्तस्य द्वैताद्वैतविषयस्य सदात्मनो दर्शनं तदात्मज्ञानमभिप्रेतम् ॥ ८५ ॥

षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च ॥
श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ॥ ८६ ॥

---

१ फ–त्रः । ख–ता । २ ण–ने । ३ ण–तद्गतेर्व्याप्ति । ४ क–धा ।

११६–११७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदाभ्यासादीनि षट्कर्माणि श्रेयस्कराणि । तेभ्यो निःश्रेयसकरत्वं वैदिकस्य ज्योतिष्टोमादेः कर्मणस्तेषु मोक्षत्वं प्रतिपद्यते ।

ननु च यदि तावत्पूर्वेषामिति निर्धारणे षष्ठी तदनुपपन्नं। निर्धारणं हि समुदायभूतविशेषस्य केनचिद्धर्मेण तदैकविषयेण चोपपद्यमानस्यावान्तरेणासंभविना 'क्षत्रियो मनुष्याणां शूरतम' इति मनुष्यजातौ क्षत्रियोऽप्यन्तर्भूतः स शूरतमत्वेन निर्धार्यते। अनुपदिष्टस्य'नन्तरितस्य कुतो निर्धारणं न हि भवति। न चेह प्राग्वैदिकं कर्मादिष्टं।

अथोच्यते। अन्तर्वेदाभ्यासादीनि वैदिकान्येव। कथमुद्दिष्टं वैदिकं कर्म। यद्येवं सामान्यसामान्यात्सुतरामनिर्धारणं। न हि भवति गवां गौरुत्पन्नक्षीरतमेति। यदि ह्यवैदिकानि चोद्दिष्टान्यभविष्यंस्तत एवैतदपेक्षेत **वैदिकं श्रेयस्करमिति**।

किंच कानि तावदत्र वैदिकानि कर्माण्यभिप्रेतानि। यदि तावत् ज्योतिष्टोमादीनि। विशेषग्रहणे प्रमाणं वक्तव्यम्। वेदाभ्यासादीनामवैदिकत्वात्। अथ स्मार्तत्वान्न तानि वैदिकानि। यान्यत्र प्रत्यक्षश्रुतिविहितानि तान्येव वैदिकादीनि। न हि सर्वे वैदिकेषु कर्मसु वेदाभ्यासादीनामङ्गत्वेन तद्भावः। एतच्च यद्वक्ष्यति (अग्रे ८७) "अन्तर्भवति क्रमशः तस्मिन् क्रियाविधाविति" तद्धि तस्य नेति। तर्ह्यग्निहोत्रादौ तपो गुरु संपाद्यं स्यात। अनेन तेनोक्तेन न कश्चिदर्थः। वेदाभ्यासादीनामप्यनुष्ठेयान्यग्निहोत्रादीन्यपि। तत्र न विद्मः कीदृशमर्थोषां श्रेयस्करत्वं नापि समानि फलानि येन फलस्योत्कर्षवक्तयैवमुच्यते। यथा गोदानात्स्वर्गस्य ज्योतिष्टोमाच्च दीर्घकालाद्यनुवृत्ततः यथोक्तं "लोकवत्परिमाणवत्फलविशेषः स्यादिति"।

अत्रोच्यते। यदुक्तं चैतेनोक्तेन कश्चिदर्थ इति। तत्र केचिदाहुः। विरोधे स्मार्ते श्रौते बाधकत्वज्ञापनार्थं वैदिकानां श्रेयस्करतरत्वे वचनं। यथोक्तकल्पविरोधे विकल्पः। अतुल्यायाः श्रुतेः स्मृत्याबाध इति। "श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ"। स्मृतिद्वैधे अनुवादस्मृतिरित्यर्थयुक्तं भवति। अमुनैवावगतत्वादवाच्यमेतत्। विस्पष्टीकरणार्थमेव पुनरुच्यत इत्यदोषः।

अथवाऽन्योऽपि तथार्थः संभाव्यते। शुद्धे च विकल्पवचनं। स्मृतिद्वैधे न तद्विकल्पार्थं। तेनायमर्थः। स्मार्तेभ्यो वैदिकानि बलीयांसि। वेदाभ्यासादिग्रहणं सर्वस्मार्तप्रदर्शनार्थं वृत्तानुरोधादेवं पठितं।

वयं तु ब्रूमो न्यायसिद्धोऽयमर्थो न्यायसिद्धस्यापि सौहार्देनाभिधानमनारभ्य युक्तं। इहात्मनो ज्ञानं प्रतिपदं पठ्यते। तत्र कःप्रसंगो बाधात्तस्य स्मृतिकारा न च स्ववाक्यानि

१ ण–पुत्राणां। २ ण–न हि सर्वे वैदिकानि। ३ ण–अंतत्वेन। ४ ण–तत्। ५ अ–श्लोक १४। ६ ण–उत्पद्यते। ७ ण–आत्मज्ञानं। ८ ण–स्मृतिकारा सवाक्यनिष्ठावाक्यैरेव।

For Private And Personal Use Only

स्ववाक्यैरेव प्रमाणयितुमर्हन्ति । अथोच्यते । याज्ञवल्कीयायाः स्मृतेर्विधिस्तैरुच्यते । नात्मीयायाः समानता । यत्तावदात्मीयायामप्युक्तं भवत्यतः प्रकरणानुरोधाद्वेदाभ्यासादि पदं पृथक् अग्निहोत्राद्युपदेशः । नेहात्मानं प्रतिज्ञायेदं पठ्यते । कथं च तैर्व्याख्यातामिति आत्मज्ञानं श्रुतिपरत्वेन वेदाभ्यासादिभ्यो वैदिकं यागादि कर्म श्रेष्ठमिति । ततोऽध्यात्मज्ञानमितरथाऽन्यत्र प्रजाया अन्यदुच्यमानमन्यत्रास्तमन्यत्र पतितं स्यात् । अथवा वैदिकं मन आत्मज्ञानमेवमर्थस्य वेदस्य तत्प्रतिपादनपरत्वादग्निहोत्राद्युपदेश औषधपाने वृद्ध्युपदेशवद्बालादिप्रवृत्त्यर्थः । यदि वा कर्मकाण्डेन शिष्टाः स्वाभाविकीमेनामनाद्यविद्यां वासनाविषयासंगहेतुभूतामवधूय शास्त्रोभ्यासवासनासामर्थ्यवशात् क्रमेणोपजातवैराग्यशिथिलीभूतदृढतृष्णारागग्रहण उत्तमाधिकारानुशासने नियोज्यतां प्रतिपत्तुं समस्तमपि श्रुत्यादिष्टत्वमधिकारोपकारकत्वं कर्मकाण्डस्य विज्ञायत इति ब्रह्मवादिनः। अतो वक्ष्यमाणनिवृत्त्याख्यकर्माभिप्रायमेतत् । **श्रेयस्करतरं ज्ञेयं सर्वथा कर्म वैदिकमिति** ।

अथवा भेदो यदि सर्वेषामपि स्वप्नवदसत्यदर्शनद्वयेऽप्यात्मैकत्वज्ञाने श्रेय इत्यर्थः । स्ववेदाभ्यासादीनां भेदोपदेशादिनोद्यं तत्कर्तव्यम् । षष्ठीनोद्यं तु तैरेव समाहितं बुद्ध्यारोपितान्तरेण पृथक्त्वोपपत्तेः । यथा मथुराः पाटलीपुत्रकेभ्य आढ्यतरा इति । तथा सति पंचमी स्यादिति चेत् अत्रापि प्रतिविहितं धर्माविशेषात् ॥ ८६ ॥

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः ।
अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ॥ ८७ ॥

एतावद्वैदिकं कर्म ज्योतिष्टोमाद्याचक्षते । तेषामेव श्लोकयोजना **क्रियाविधिः** कर्मविधिर्वैदिककर्मयोगे कर्मप्रयोगे बहिःसंपाद्यावस्थाः । एतान्युपनिषद्वेदाभ्यासादीन्यन्तर्भवन्ति । **तस्मिन्निति** व्याप्यतया कचित् कस्यचित्समग्रेषामन्तर्भावमाह । **कर्मयोग** इत्युक्ते क्रियाविधिग्रहणं श्लोकपूरणार्थं । क्रतुं यज्ञेभ्य इति तद्वा सोमयागभेदेन भेदो व्याख्येयः । तत्र वेदाभ्यासस्तावत् सर्वत्रान्तर्भवति । यजमानमन्त्रेषु सर्वत्रोपयोगतः तपोदीक्षोपदेशसोमयागेषु "पयोऽमृतं ब्राह्मणस्य" इत्यादि ज्ञानं सर्वत्रापि दुःखानधिकारात् । एवमिन्द्रियसंयमः प्रत्यहगामिनः 'स्त्रियमपेयान्न मांसमश्नीयादिति' । अहिंसानिरतां रात्रिं प्राणभृतः प्राणेनाच्छिन्द्यादपि कृकलासस्येति गुरुसेवादेरित्थमप्रवृत्तिः । ये तु निवृत्तमेव कर्माहुस्तेषां वेदाभ्यासादीनामनुवृत्त्यर्थः श्लोकः । **अन्तर्भवन्त्युपासनापरस्यापि** तेषामनुष्ठानादन्तर्भावः । तथा चोपनिषद्व्य उपासकस्य प्रायश्चित्तनिर्देशः पापक्षपणार्थो न

---

१ ण–अनादिप्रतिज्ञावासना २ ण–शास्त्रार्थेभ्यो वासनासामर्थ्यात् क्रमेणापजायेत वैराग्यं । ३ ण–श्रुत्याधिपूर्व मधिकारो–। ४ ण–काण्डे । ५ ण–चोद्यं । ६ ण–समौहितं । ७ ण–पञ्चमीत्यस्येति चेत् । ८ ण–वीप्सया ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनः प्रतिविधानविकार एवोक्तो भवति । अतो विहिताकरणे प्रतिषिद्धसेवने सति प्रत्यवाय एव तर्हि कुतो मोक्षः फलोपभोगेन जन्मान्तरोपात्तदुरितक्षयादकरणात्स्वबुद्धिपूर्वमज्ञानानस्य प्रमादकृतस्य प्राणायामविद्याविशेषाभ्यासातिशयेन कृतिनिष्कृतित्वात् निरुपाध्यात्मस्वरूपसाक्षात्करणाच्च प्रथमं तं वेदयेत्तद्भावापत्तिर्मोक्षः । अतश्च ब्रह्मनिष्ठापरेणापि वेदाभ्यासादीन्यनुष्ठेयानि । यस्य यस्य कर्मन्यासः श्रूयते स षष्ठे व्याख्यातः । वीप्साया विधिरुपासनविधिरेव "द्रष्टव्यः श्रोतव्य" इत्यादिनोदितो बहुत्वाच्चोपासनाप्रकाराणां तस्मिंस्तस्मिन्निति वीप्सा युज्यत एव । अतो "ब्राह्मणान्युपासीत य एष आदित्यो हिरण्मयः पुरुष" इति । "स च एष आत्मापहतपाप्मा" इत्यादि क्वचिदुपात्तबुद्ध्याऽध्यारोपितश्चोद्यते । क्वचिद्धिरण्मय इत्यादौ लक्षणया तस्यैवोपासना । क्वचित्सर्वोपासनाधिपत्येन निष्कलंकमिवात्मनस्तस्यैवाधस्तात्स उपरिष्टादिति चोदनाबहुत्वाद्वीप्सोपपत्तिः ॥८७॥

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ॥
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ ८८ ॥

ननु च प्रवृत्तमेव वैदिकं कर्म व्याख्यातं । किमिदमुच्यते द्विविधमिति । नैष दोषः । प्राधान्यं तत्र निवृत्तं वैदिकं व्याख्यातं । न पुनरग्निहोत्रादीनि । वैदिकं तु सर्वत्राविशिष्टं सुखमुपेत्योपपद्यते । यदपि **सुखाभ्युदयिकं** सुखोदयः प्रयोजनमस्येति वाऽन्वर्थो वा कर्तव्यः । निःश्रेयसं प्रयोजनमस्येति च केचन प्रवृत्तपदे यथासंख्यं पूर्ववत्संबन्धनीये ॥ ८८ ॥

*** इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ॥**
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥ ८९ ॥

इह कारीरिवैश्वानर्याद्यमुत्र ज्योतिष्टोमादि काम्यसंपादकं कर्म । काम्यत इति **काम्यं** । फलस्य काम्यत्वात्साधनमपि कर्म काम्यत एव । **निष्कामं** नित्यं ज्ञातं पूर्वमुभयत्र शेषमविदुषो नाधिकारात् । अनयोरपि रहस्याधिकारिज्ञानमुपदिश्यते । तदा तदुभयशेषः । पूर्वशब्दश्चाद्यर्थं लक्षयति । ज्ञानमाद्यं मुख्यं यस्येति विग्रहः । योऽभिमुख्यः स लोकः पूर्वं क्रियां प्रतिलभते । अतश्चैतदुक्तं भवति । ज्ञानं प्रधानं प्रधानतोऽनुष्ठेयं । वेदाभ्यासादि तु शास्त्रमात्रया ॥ ८९ ॥

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ॥
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥ ९० ॥

---

* अकामापहतं नित्यं निवृत्तं च विधीयते । कामतस्तु कृतं कर्म प्रवृत्तमुपदिश्यते ॥ १ ॥
१ ग–अन्योन्यस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

